TIGHT BINDING BOOK

THE BOOK WAS DRENCHED

TEXT PROBLEM WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY

OU_184546

UNIVERSAL
LIBRARY

OUP—390—29-4-72—10,000

OSMANIA UNIVERSITY LIBRARY

Call No. S181.43 S69N PG Accession No. S1021(a)

Author सोमेश्वरभट्ट

Title न्यायसुधा 1909

This book should be returned on or before the date last marked below.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 45. 46. 47. 49. 50. 52. 53. 55. 56. 57. 60.
71. 73, 107. 121. & 133.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA

BY

PANDIT SOMEŚWARA BHATTA,

EDITED BY

PANDIT MUKUNDA ŚÂSTRÎ,

Professor, Deccan College, Poona.

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES:

AGENTS:—OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHṬHÂRÂMA MUKUNDAJÎ, BOMBAY.

PROBSTHAIN & CO., BOOKSELLERS, LONDON,

Printed by Harikrishna Dâs, Proprietor,

AT THE VIDYÂ-VILÂS PRESS.

BENARES.

1909.

Registered According to Act XXV. of 1867.

श्रीगणेशायनमः ॥

॥ तन्त्रवार्त्तिकव्याख्या ॥

॥ न्यायसुधाख्या ॥

॥ श्रीमद्भट्टसोमेश्वरविरचिता ॥

आनन्दात्मनि विश्ववैभवभवाविर्भावसम्भावितः ।
स्वेच्छाधीसचिवः पुरन्दरपुरीशानः स्वयं खेलति ॥
तत्कारुण्यकटाक्षकुड्मलकलाकान्तोदयाघूर्णितः ।
स्वात्मानन्दसुधाम्बुधिर्विजयते धीमन्महेन्द्रामृतः ॥ १ ॥
यद्यप्यूषरमुप्तमेत्य गुरुणा बीजम्महेन्द्रामृतम् ।
क्षेत्रञ्चित्रमनेकधोरु फलति प्राप्यात्मनो ऽनर्घ्यताम् ॥
यन्मेघस्तुतवाङ्निरन्तरसुधासारैः समासिञ्चितम् ।
सो ऽयं सर्वसुहृज्जनार्दनजगज्जीयाज्जगन्मण्डनम् ॥ २ ॥[१]
उमानन्दनमाराध्य शारदामीश्वरं गुरुम् ॥
कृत्स्नशास्त्रप्रसादेन व्याख्यास्ये तन्त्रवार्त्तिकम् ॥ ३ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतद-
र्थानां तस्मादनित्यमुच्यते ॥ १ ॥

अत्र भाष्यकारेणार्थवादानुदाहृत्य किं कंचिद्धर्मं प्रमिमत उत नेति विचारितम् । तदयुक्तम् । प्रथमपादएव सर्वाप्रामाण्यकारणनिरासेन सर्वात्मकवेदप्रामाण्यस्य सुस्थापितत्वात् । अथ साध्यसाधनेतिकर्त्तव्यतान्वितभावनाप्रतिपादकपदसमुदायमात्रेण श्रेयःसाधनरूपधर्मप्रमितिसिद्धेस्तदतिरिक्तानां वायुक्षेपिष्ठादिपदानां धर्मप्रमितावनुपयोगमाशङ्क्य उपयोगोऽत्रोच्यते । ततो विधिमन्त्रना-

१ इमौ श्लोकौ २ पु० न भवतः ।

मधेयान्यप्युद्धरिष्येरन् । धर्मप्रमित्यनुत्पादकत्वेन चानुपयोगित्वे अर्थवादादेर्दोषाभावे ऽपि प्रामाण्यायोगादयमेव विचारः प्राग्भावी स्यात् । चोदनासूत्रप्रतिज्ञातप्रामाण्यस्य विधिभागस्य प्रसिद्धधर्मसंयोगस्य परतः प्रामाण्यनिरासेन प्राक् प्रामाण्योक्तावर्थवादादिविचारो ऽप्रतिज्ञातविषयत्वादसङ्गतः स्यादित्याशङ्क्याचतुष्टयं निराकर्तुमाह (१ पृ०) * सिद्धप्रमाणभावस्येति * तत्रार्थवादार्पितप्राशस्त्यमन्त्रस्मारितनामधेयावच्छिन्नधात्वर्थानुरक्तभावनाविषयप्रवर्त्तकपरत्वेन चोदनाशब्दस्य मन्त्रार्थवादाद्युपेतमहावाक्यविषयत्वाज्जिज्ञासासूत्रेण चाध्ययनविधिदृष्टार्थताप्रतिपादनेन सकलवेदप्रामाण्योपक्षेपादौत्पत्तिकत्वादियुक्तिसाधारण्याच्च वेदमात्रप्रामाण्यस्य प्रतिज्ञापरत्वे ऽपि यागेन स्वर्गमित्यादिसाध्यसाधनभावप्रतिपादकशब्दाभावेन धर्मप्रमित्यशक्तत्वादसम्भवदर्थविषयत्वमाशङ्क्य धर्मप्रमितिशक्तिप्रदर्शनार्थत्वेन चोदनात्वसङ्कीर्त्तनोपपत्तेरुपदेशो हि भवतीति चोदनाख्योपदेशत्वस्य हेतुत्वेन भाष्यकृता व्याख्यातत्वाद्वेदवाक्यानि धर्मे प्रमाणं चोदनात्वादिति प्रतिज्ञासूत्रार्थावधारणादर्थवादादिप्रामाण्यविचारस्य प्रतिज्ञासङ्गतिनिरूपणार्थं वेदग्रहणं, सिद्धे ऽपि सामान्यतो वेदप्रामाण्ये तद्विशेषस्यार्थवादादेस्तदसंभवाशङ्कानिरासार्थत्वेनास्य विचारस्यापौनरुक्त्यनिरूपणार्थं विवेककीर्त्तनम् । सिद्धग्रहणेन चैतद्दर्शयति । प्रमाकरणत्वं प्रमाणत्वम् । न च प्रथमे पादे धर्मप्रमोत्पत्तिसिद्ध्यङ्गीकारेण तत्र वेदस्य करणत्वमुच्यते । प्रत्यक्षादेस्तत्करणत्वनिषेधाच्छब्दस्य च प्रमाणान्तराहृष्टे ऽर्थे करणत्वासिद्धेः तस्मात्कारणाभावेन धर्मप्रमानुत्पत्तिमाशङ्क्य कारणान्तराभावे ऽप्याकाङ्क्षासन्निधियोग्यतासधीचीनपदार्थप्रतिपादनद्वारेणापौरुषेयत्वात्प्रमाणान्तरानपेक्षस्यात एव निरस्तदोषाशङ्कस्य वेदस्य कारणत्वोपपत्तेर्धर्मप्रमाख्यकार्यमद्भावस्तत्र प्रतिपादितः, इह त्वर्थवादादिरूपस्य वेदभागस्य तत्राकरणत्वमाशङ्क्य करणत्वं प्रतिपाद्यतइति स्पष्टमेवापौनरुक्त्यं करणनिरूपणार्थे तु प्रथमपादे सत्युक्तप्रमाणभावस्येत्यवक्ष्यत्। धर्मप्रमाया वेदकार्यत्वप्रतिपादनेन त्वर्थात्सिद्ध्यदपि वेदस्य करणत्वं संमुग्धरूपेणैव सिध्येन्नार्थवादादिविशेषरूपेणेति प्रतिपादयितुं सर्वश इत्युक्तम् । अर्थवादादिप्रामाण्यासिद्धौ सर्वात्मकवेदप्रामाण्यासिद्धेः संमुग्धाभिप्रायः सर्वशब्दो व्याख्येयः । परतः प्रामाण्यादिद्वारा अप्रामाण्ये सकलस्य वेदस्य निरस्ते ऽप्यर्थवादादीनामवोधकत्वेनाप्रामाण्यमाशङ्क्य धर्मबोधोपयोगित्वमिह प्रतिपाद्यमित्युपयोगशब्देनोक्तम् । अर्थवादोदाहरणं स्वानर्थ-

भूमिका ।

—:०:—

अलौकिकार्थज्ञापकमेव शास्त्रम् । लोकावगतार्थकथने हि शास्त्रस्यानुवादकत्वमेव स्यात् । अलौकिकश्चार्थ आत्मैव । तस्य प्रत्यक्षादिप्रमाणैः कथमप्यग्राह्यत्वात् । प्रत्यक्षादिप्रमाणानामभावेऽपि सुषुप्त्यादौ स्वतः प्रकाशमानेन आत्मनैव प्रकाशितानां तेषां तत्प्रकाशनेऽसामर्थ्यात् । तत्त्वमस्यादिमहावाक्यं तु तत्प्रकाशितमपि गुरुमुखाच्छ्रुतं सद् धर्मताऽनापन्ननिरपेक्षकैवल्यरूपेणार्थं जीवस्य ग्राहयत् तदीयमज्ञानं स्वस्य बोधकतां च निवर्तयति । अतो वस्तुतस्तस्य तद्बोधकत्वेऽपि जीवाज्ञाननिवर्तकत्वात्तद्बोधकत्वं व्यवह्रियतेऽतिरोहितं गुरुपुत्रणामवत् । एवं च अलौकिकात्मार्थज्ञापकत्वात् साक्षात् शास्त्रत्वं महावाक्यस्येति सिद्धम् । अन्येषां पुनः परम्परया शास्त्रत्वम् । तथाहि । महावाक्येन आत्मैक्यज्ञानं शुद्धान्तःकरणस्यैव । तथाच श्रीभागवते

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या
चेतोमलानि विधमेद् गुणकर्मजानि ।
तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वं
साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः ॥ इति ।

संक्षेपशारीरके च,

पुरुषापराधमलिना धिषणा
निरवद्यचक्षुरुदयापि यथा ।
न फलाय भवेच्छ्रुतिविषया भवति
श्रुतिसम्भवाऽपि तु तथाऽऽत्मनि धीः ॥ इति ।

अन्तःकरणशुद्धिश्च निष्कामस्वस्ववर्णाश्रमधर्मानुष्ठानात् । तथाच भगवान् शङ्कराचार्यः अपरोक्षानुभूतौ.

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत् पुंसां वैराग्यादिचतुष्टयम् ॥ इति ।

फलोद्देशेन विहितानामपि कर्मणां यज्ञेनेत्यादिवाक्यात् विविदिषायां विनियोगोऽस्त्येवेति अन्तःकरणशुद्ध्यर्थत्वं सूपपादम् । वर्णाश्रमधर्माणां यथावद् ज्ञानं च पूर्वमीमांसां विना न सम्भवतीति भव-

नि तस्या अपि आत्मैकयज्ञानसाधनान्तःकरणशुद्धिसाधनभूतानां व-
र्णाश्रमधर्माणां ज्ञापकत्वेन शास्त्रत्वम् । एवमन्यत्राप्यूह्यम् ।

अस्य च जैमिनि प्रोक्तस्य शास्त्रस्यार्थज्ञानं व्याख्यां विना मन्द-
मतीनां न भवितुमर्हतीति भगवान् शबरस्वामी तद्भाष्यं चकार ।
ततस्ततोऽल्पबुद्धीनां तात्पर्यार्थानवगममालोक्य भट्टकुमारिलः
प्रथमपादं श्लोकरूपेण, ततस्तृतीयाध्यायान्तं सविस्तरं, ततः समाप्ति-
पर्यन्तं संक्षेपेण व्याचख्यौ । तत्र तत्र पूर्वमीमांसाशास्त्रे प्रक्षिप्तान्
बौद्धादीनामाक्षेपांश्च निरास्यत् । स्थलविशेषेषु च भाष्यतो मतभेदं
च प्रादर्शयत। द्वयोरपि ग्रन्थयोर्गूढाभिप्रायतामवलोक्य भट्टसोमे-
श्वरः राणकेति प्रसिद्धां न्यायसुधां नाम टीकां व्यरचयत् । सा चेयं
टीका इदानीं दिदृक्षूणां दुर्लभतामापन्नेति महतोद्योगेन तारक-
मठात् बाबूगोविन्ददासमहाशयपुस्तकालयात् अन्यतश्च पुस्तकानि
आहृत्य महता श्रमेण शोधनादिपरिष्कारपूर्वकं बाबूहरिदासगुप्तेन
मुद्रिता । तथापि तृतीयाध्यायस्य तृतीयपादे द्वितीयादीनि चत्वारि
अधिकरणानि न कस्मिंश्चिदपि पुस्तके उपलब्धानीति तावान् भागः
खण्डित एवाभवत् । तृतीयाध्यायस्य चतुर्थः पादः निर्वीतपादत्वेन
प्रसिद्धः, एतत्पर्यन्तव्याख्यानस्यैव तन्त्रवार्तिकमिति प्रसिद्धिरित्य-
भिप्रायेण न्यायसुधायां निर्वीतपादव्याख्यानसमाप्तौ ग्रन्थसमाप्तिद्यो-
तकाः श्लोका उपलभ्यन्ते । टुपटीकाव्याख्यानत्वेन प्रसिद्धं तन्त्ररत्नं
च चतुर्थाध्यायत एव प्रवृत्तमित्यतः तृतीयाध्यायान्तं तन्त्रवार्तिक-
मिति गम्यते । राणकस्तु निर्वीतपादान्तभागस्यैव विस्तृतत्वा-
त्तावद्भागस्यैव तन्त्रवार्तिकमिति संज्ञामभिप्रेतवान् अत एव तदन्ते
समाप्तिद्योतकान् श्लोकान् व्यरचयत् । तृतीयाध्यायस्य सप्तमाष्ट-
मपादयोर्व्याख्यानं च भट्टसोमेश्वरकृतमुपलब्धमिति टुपटीकाव्याख्या-
नेनापि भट्टसोमेश्वरकृतेन भवितव्यम् । श्लोकवार्तिकव्याख्यानं च भ-
ट्टसोमेश्वरकृतमस्ति नवेति शास्त्ररसिकैरन्वेषणीयम् । तन्त्रवार्तिकटी
का काचित मैथिलपरितोषमिश्रकृता न्यायसुधातः प्राचीना
Sस्तीति श्रूयते । राणकफक्किकाव्याख्यानामिका अज्ञभट्टकृता टीका
च किञ्चिदुपलब्धा न पूर्णतयेति ग्रन्थप्रकाशनरसिकैः एतदुभयमपि
अनुगृह्य प्रकाशनीयम् । १४४० संवत्सरीयप्राचीनपुस्तकोपलब्ध्या

अतः प्रागेव भट्टसोमेश्वरस्यैतद्ग्रन्थकर्तृत्वमवगम्यते । भट्टसोमेश्वरश्च कं देशं स्वजन्मनाऽलंकृतवानिति न निश्चीयते, परम् अस्य पाण्डित्यं लोकोत्तरमिति तदीयग्रन्थदर्शनाद् व्यक्तं मीमांसकानाम् । संकर्षकाण्डं च चतुरध्यायीरूपं द्वादशाध्यायीतोऽतिरिक्तं भाट्टचन्द्रिकाव्याख्योपेतमुपलभ्यते । शबरस्वामिकृतं भाष्यं च तस्यास्तीति भाट्टचन्द्रिकालेखादेवावगतं नास्माभिरद्यापि तद् उपलब्धम् । संकर्षकाण्डस्योल्लेखश्च उत्तरमीमांसायां तृतीयाध्यायस्य तृतीयपादे त्रिचत्वारिंशत्तमे सूत्रे श्रीमद्भगवत्पूज्यपादैः शंकरस्वामिभिः कृतः । अतोऽस्य वार्तिकादिव्याख्यानानुपलब्ध्या अप्रामाणिकत्वं नाशङ्कनीयम् इत्यास्तां प्रासङ्गिकम् । एतत्पुस्तकशोधने च अहं हरिदासगुप्तेन प्रार्थितः यथामति अशोधयम् । तत्र यदि भ्रमात्प्रमादाद्वा संजाता दोषा उपलक्ष्येरन् तान् संशोध्य अपूर्वग्रन्थार्थरसमनुभवन्तु गुणग्राहिणो विद्वांस इति प्रार्थयते—

पूनाडेकनकालेजस्थसंस्कृतप्रधानाध्यापकः
आडकरोपाह्वमुकुन्दशास्त्री ।

ास्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतकं सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एव ग्रन्थो मुद्र्यते।

प्राचीनादुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, अलङ्कारशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्यमुद्र्यते

३ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयै, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
अन्यैर्देयं प्रतिस्तवक " " १ " ०
प्रापणव्ययः पृथग् नास्ति।

सम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

संस्काररत्नमाला। गोपीनाथभट्टकृता (संस्कारः) २
शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम्। भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम्। (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शनप्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम्। श्रीनारायणतीर्थ विरचित भाट्टिभाषा प्रकाश सहितम्। स० (वेदान्त) २
(५) करणप्रकाशः। श्रीब्रह्मदेवाविरचितः सम्पूर्णः (ज्योतिषः) १
(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः। तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० स० (मीमांसा) २
(८) ब्रह्मसूत्रभाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्रामानुजमुनिभिश्च कृत व्याख्यानम्। सम्पूर्णः। (वेदान्तः) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा। (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम्। सम्पूर्णम् (वेदान्तः) १
(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयः-न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः। सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् स० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । } (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । } (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयाध्यायाध्यायार्थसंग्रहः) श्रीभट्टनाराणात्मजभट्टशङ्करविरचितः । } (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि मीमांसादर्शनम्) महामहोपाध्याय-श्रीशालिकनाथमिश्रविरचितम् । श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च समपूर्णाः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीमदानन्दबोधेन प्रणीतस्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् महामहोपाध्याय-श्रीकर्काचार्यविरचितभाष्यसहितम् । ६३

(२०) ब्रह्मसूत्रभाष्यम् श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतम् खण्डनखण्डखाद्यम् आनन्द पूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । } (वेदान्त) ८

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया ऽवतरणिकया च सहितम् । } ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता । (वेदान्त) २

(२५) क्रोडपत्रसंग्रहः अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि । (न्यायः) १

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्-श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नव्याख्यव्याख्या० २

(२७) षड्दर्शनसमुच्चयः । बौद्ध नैयायिक कापिल्य जैन वैशैषिक जैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । } १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याः जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(३१) स्मृतिसारोद्धारः । विद्वद्वरविश्वभरत्रिपाठिसंकलितः । २

(३२) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्य कृता । २

पत्रादिप्रेषणस्थानम् } हरिदास गुप्तः,
अनारस सिटी

THE

CHOWKHAMBA SÂNSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA,

BY

PANDIT SÔMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS I.

PUBLISHED AND SOLD BY THE SECRETARY,

'OWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

NT.—OTTO HARRASSOWITZ, LEIPZIG:

ed By Hari Das Gupta Proprietor

T THE VIDYA VILASA PRESS.

BENARES.

1901.

श्रीः

—*—

आनन्दघनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—४५

क्यमतदर्थानामित्यविशेषश्रवणात् प्रदर्शनार्थे द्वारप्रविशेषप्रतिपादने चार्थवादमात्रस्य द्वारविशेषो ऽत्राधिकरणे प्रतिपाद्यतइति दर्शयितुम्। सामान्यतस्तुत्युपयोगित्वासिद्धौ लाक्षणिकस्तुत्यादिद्वारविशेषस्याशक्यकल्पनत्वात्पूर्वं सामान्योपयोगे विचार्ये। सर्वेषामेवोदाहरणत्वामिति विध्यर्थवादमन्त्राणामित्यनेनोक्तम्। सिद्धे च धर्मप्रमाख्ये कार्ये कियतो वेदभागस्य तत्र कारणतेति विचारावसरो भवतीत्यधुनेत्यनेनोक्तम्। तस्मात्सर्वमदुष्टं श्लोकं व्याचष्टे * सामान्यत इति * यद्वा प्रतिपादितमपि सकलवेदप्रामाण्यमर्थवादादिष्वसम्भवादाक्षिप्येह समाधीयते इति। अन्यथा श्लोकं व्याचष्टे * अवधृतप्रामाण्यस्येति * अस्मिन्व्याख्याने सामस्त्यं सर्वशब्दार्थः। विध्यर्थवादमन्त्राणामिति तस्यैव विवरणम्। विध्यादिग्रहणस्योपलक्षणत्वाद्व्याख्याने नामधेयग्रहणम्। इह हि द्विपर्वाविचारः। पूर्वं तावदेषामक्रियार्थत्वेनानुपयोगमाशङ्क्याध्ययनविधिबलाद्विधिना त्वेकवाक्यत्वादिति सूत्रावयवेन तत्तुल्यं च साम्प्रदायिकमित्यनेन च सूत्रेण निराकृतं द्वारासंम्भवात् पुनरुज्जीव्यार्थवादानां तावत् द्वारविशेषो ऽस्मिन्नधिकरणे चिन्त्यते। तस्मादनेन सूत्रेण सामान्यविशेषरूपेण पूर्वपक्षद्वयं तन्त्रेणोच्यते। आम्नायस्य तद्भूतानां क्रियार्थेन समाम्नाथ इत्यनेन न्यायेन क्रियार्थत्वावधारणादर्थवादादीनां तदसम्भवादानर्थक्यम्। अथाप्यध्ययनविधिबलादेषां कथं चित्क्रियार्थत्वं कल्पयितुमारभ्यते तथाप्यर्थवादानां तावद् द्वारासम्भवाद् दुःपरिहरमानर्थक्यमिति। भाष्यमप्येवमेव योज्यं सामान्योपयोगप्रतिपादनं विना विशेषोपयोगप्रतिपादनासम्भवस्यातो यावद्वेद एव पुरुषार्थतया सकलमात्मानं न प्रतिपादयति तावदप्रमाणमित्यत्र वक्ष्यमाणत्वात्। तदभिधीयतइत्यादिपूर्वपक्षभाष्यं व्याचष्टे * तत्रेत्यादिना प्रसिद्धमेवातदर्थत्वमित्यन्तेन * विध्युपयोगस्यापि पूर्वपक्षिणो ऽनिष्टत्वात्साध्यसाधनेतिकर्त्तव्यतान्वितभावनाप्रतिपादकपदसमूहपरो विधिशब्दः। चोदनोपदेशशब्दावपि तत्परौ पूर्वपक्षी मन्यते। तद्वैतदग्रन्थपर्यालोचनयार्थवादादीनामेवेहोपयोगश्चिन्त्यते। पूर्वं तु विधिग्रहणं न केवलं विधेरेवोपयोगः किं त्वर्थवादादीनामपीत्येषं नेयम्। धर्माधर्मोपयोगिविचारोपक्रमाद्धर्माधर्मविषयमेव प्रामाण्यमभिप्रेतं विधिनिषेधयोरेव चोदनोपदेशशब्दाभ्यां धर्माधर्मप्रामाण्याभिधानादतद्रूपस्यार्थवादादेर्न तत्र प्रामाण्यं नाप्यन्यत्र तद्भूतानां क्रियार्थेन समाम्नाय इति सर्वस्य समाम्नायस्य क्रियार्थत्वावधारणेन भूताख्या-

ख्यानपरत्वानभ्युपगमादित्यर्थः । न चैतत्प्रक्रियामात्रं किं तु न्याय्यमेवेति यथाक्रमं फक्किकाद्वयेनोक्तम् * उक्तमेवेति * अर्थे ऽनुपलब्धे इत्यत्रेत्यर्थः । तदनेन क्रियेत्यादिः समामनन्तीत्यन्तोभाष्यावयवो व्याख्यातः तद्यानीत्यादिभाष्यं व्याख्यातुमतश्चेत्याद्युक्तम् । कं धर्मं प्रमिमीरन्निति काक्वा सूचितो ऽर्थो यथाश्रुतेत्यादिना प्रकाशितः । एवं सर्वेषामनुपयोगित्वे पूर्वपक्षिते अध्ययनविधिसामर्थ्योपबृंहितसिद्धान्तसूत्रगततुशब्दोपक्षिप्तं तुल्यं साम्प्रदायिकसूत्रोपपादितपुरुषार्थानुबन्धित्वनिर्वाहाय अध्याहारादिनापि क्रियार्थत्वं यथासम्भवं कल्प्यमिति पूर्वविचारसिद्धान्तनिरूपणार्थमथोच्येतेत्यादिभाष्यं तद्व्याचष्टे*अथ कया चिदिति* द्वारविशेषानिर्द्धारणेन पुनः प्रत्यवस्थानार्थं स कल्प्यमान इत्यादिभाष्यं तद्व्याचष्टे एवमपीत्यादिना ऽनर्थक्यमित्यन्तेन कः कल्प्येतेत्यनेनोक्तमनवधारणं दर्शयितुमुद्भाष्यः प्रतिषेधाध्याहारोपन्यासः चिरवृत्तेष्टवियोगध्यानादिना रोदनादिशक्यताशङ्कापरिहाराय शास्त्रविरोधोपन्यासः रोदनवपोत्खननदिङ्मोहेषु यथाक्रमं मङ्गलाचारात्मरक्षणप्राङ्मुखभोजनशास्त्रविरोधः । अश्रुणश्च रजतपरिणामविरुद्धसद्यःशोषदर्शनाद् दृष्टविरोधः पुरास्य सम्वत्सराद् गृहे रोदनं भवतीत्यत्र फलाभावमादिशब्देनाह । धर्माधर्मपरत्वाभावे ऽपि सिद्धार्थकथनेनानर्थक्योपसंहारानुपपत्तिमाशङ्क्योक्तम् * यत्तु भूतान्वाख्यानमात्रमिति * क्रियतइत्यस्मिन्नर्थे प्रत्ययेन विविक्षिते तदनुग्रहार्थे पाकं पचतीतिवत् प्रतिपाद्यतइतिधातुप्रयोगः । वायुर्क्षेपिष्ठादिवाक्यानां स्वार्थसत्यत्वे ऽपि अनुवादमात्रत्वाद् धूमादिवाक्यानां च स्वरूपे ऽप्यसत्यत्वादानर्थक्यम् । एवमपि प्राशस्त्यादिलक्षणया क्रियार्थत्वसम्भवादानर्थक्योपसंहारो न युक्त इति सिद्धान्तिमतमाशङ्क्याह । * विध्येकवाक्यत्ववशेन चेति * तत्र निरासहेतुमाह * न चेति * लक्षणयैकवाक्यत्वकल्पने अन्योन्याश्रयापत्तेरितिभावः । श्रौतार्थाभिधानं तु भिन्नवाक्यत्वे ऽप्युपपन्नमित्याह * भिन्नैरपीति * न च निष्प्रयोजनत्वप्रसङ्गभयेन प्रतीयमानविषयत्यागेन विषयान्तरकल्पनोचिता प्रत्यक्षादावदर्शनादित्याह * न चेति * ननु अस्तु प्रमाणान्तरे तथाशब्दे तु प्रयोजनवत्त्वाय श्रौतार्थत्यागेनार्थान्तरकल्पना युक्ता बहुक्षीरादिवाक्ये तथा दर्शनादित्याशङ्क्याह * सर्वायये-वेति * सर्वमेव वस्तु स्वविषयएव व्याप्रियते न ह्यूर्णनाभः कदाचित्पदसूत्रं करोति । लौकिकवाक्ये तु प्रमाणं प्रत्यक्षादेरन्यथात्वकल्पनम् । तदभावे तत्रापि श्रौतार्थानतिक्रमादिति भावः । तार्किक-

स्थितिपर्यालोचनयापि न प्रयोजनानुसारेण विषयकल्पनोचितेत्याह * तेनैवेति * प्रयोजनवत एव प्रमेयत्वे तस्य हानोपेक्षानुपपत्तेः प्रमाणानां वैफल्यं न स्यादित्यर्थः । अप्रतीयमानस्य च प्रयोजनवत्तया ज्ञातुमशक्यत्वात्तद्विषयत्वमशक्यनिरूपणमित्याह * अपि चेति * प्रयोजनानुसारेण प्रमाणविषयकल्पनं निराकृतमुपसंहरति * तस्मादिति * प्रमातृणां प्रयोजनवत्प्रमित्सायामपि प्रमाणशक्त्यनियमात्प्रमेयानियम इत्याह * न हीति * पुरुषाधीने ऽपि च चक्षुरादिव्यापारे प्रमेयानियमात्स्वतन्त्रे वेदे का वार्त्तेत्याह * यत्रापीति * प्रमाणान्तरस्य प्रयोजनवद्विषयत्वानियमे ऽपि वेदस्य शास्त्रत्वेन हितोपदेशित्वात् प्रयोजनवद्विषयत्वनियमेन भाव्यमित्याशङ्क्याह * न चेति * कुतः प्रथममित्यपेक्षिते परीक्षात इति दर्शयितुमाह * अयमेव हीति * शास्त्रत्वस्यैव प्रागसिद्धेरिति भावः । न च वेदस्य निष्प्रयोजनार्थाभिधायित्वं तथाभूतस्य चादरणीयत्वं पर्यनुयोज्यमित्याह * तच्चेति * उभयत्र यथाक्रमं कारणमाह * सर्वेति * उत्तरकालतामुपपादयति * न हीति * परीक्षणेन[1] हि पुरुषाधीनप्रामाण्यापत्तेर्नाध्येत्रा ऽऽदरमात्रेण प्रयोजनवत्त्वनिश्चय इत्याह * पश्वादिति * यथा दर्शपूर्णमासप्रकरणाधीतानामपि पुरुषाद्यनुमन्त्रणमन्त्राणां न तादर्थ्यनिश्चय इति दृष्टान्तार्थः । न चाग्निहोत्रादिवाक्येषु प्रयोजनवद्विषयत्वदर्शनाद्वेदवाक्यत्वेन वायुक्षेपिष्ठादिवाक्येष्वपि तथानुमानं युक्तम् । प्रतीतिविरोधादित्यभिप्रायेणोपसंहरति * तस्मादिति * इह च यानि त्वतिरिक्तार्थान्यर्थवादमन्त्रनामधेयानुपातीनीति सर्वेषां पूर्वनिर्दिष्टानां विध्येकवाक्यत्ववशेन चैतेषामित्यादिभिर्निर्दिष्टप्रतिनिर्दिष्टकैः सर्वनामभिः परामर्शाद् धूम एवाग्नेर्दिवेत्यादीनामपीत्यत्राप्यादिशब्दस्योपक्रमवशेन सर्वविषयत्वात्सदृशविषयत्वे चार्थवादानामपि सर्वेषामपरामर्शापत्तेस्तुल्यहेतुत्वेन चैतावता ग्रन्थेन सर्वानुपयोगप्रतिपादनपरतयैतद्ग्राह्यं व्याख्यातमिति गम्यते । मन्त्रेष्वपि[2] च प्रयोगविध्येकवाक्यत्ववशेना

---

१ अध्ययनोत्तरकालीनपरीक्षणेन अध्येत्रादरमात्रेण वा न प्रयोजनवत्त्वनिश्चय इत्याह परीक्षणेन हीति प्रथमपक्षे हेतुमाह पुरुषाधीनप्रामाण्यापत्तेरिति द्वितीयपक्षे वार्त्तिककृतैव दृष्टान्त उक्तः यथा पूषाद्यनुमन्त्राणां दर्शपूर्णमासप्रकरणपाठे सत्यपि न तदङ्गत्वनिश्चयस्तथादरमात्रेण न प्रकरणेन न च लिङ्गनिश्चयादित्यर्थः ।

२ लक्षणया विध्येकवाक्यत्वमङ्गीकृत्य अर्थवादमात्रपरत्वमविष्यतीत्याशङ्क्याह मन्त्रेष्वपीति अर्थवादानामिव समभिव्याहारलक्षणैकवाक्यत्वाबाधेपि प्रयोगविध्येकवाक्यत्वमसंख्येवेत्याह प्रयोगेति लिङ्गसमवायादधिकमन्त्रनामधेययोः--व्रीहीनवहन्तीत्यादौ क्रियार्थत्वादितिङ्गोः स्मृत्यादितिभावः ।

पूर्वसाधनरूपलक्षणा सिद्धान्तिनो ऽभिप्रेतेवेति न तद्वशेनाप्यर्थवादमात्रपरत्वनिश्चयः । व्याख्यातॄणां त्वर्थवादमात्रपरत्वेनेमं ग्रन्थं व्याचक्षाणानामभिप्रायं न विद्मः । इदानीमेतदेव भाष्यमर्थवादमात्रानुपयोगप्रतिपादनपरतया व्याचष्टे * यो ऽपि चेति * सर्वानुपयोगसाधारणोपपत्त्यनुकर्षणार्थश्चशब्दः । क्लेशेनेत्यप्रतीयमानैकवाक्यताकल्पनेनेत्यर्थः कल्प्येतेत्यनेनैतद्दर्शयति न तावत्स्तुतिनिन्दे एव निरूप्येते गुणदोषवत्त्वप्रतिपादनं हि स्तुतिनिन्दाशब्दाभ्यामभिप्रेतम् । तत्र यदीष्टानिष्टफलत्वं विधिप्रतिषेधविषयत्वं वा विशिष्टोतिकर्त्तव्यताकत्वं[1] वा गुणदोषवत्त्वं तदन्यतः सिद्धत्वान्नार्थवादापेक्षं न च वायुक्षेपिष्ठत्वादेर्गुणदोषवत्त्वं सर्वार्थवादाननुवृत्तेः श्रौतत्वाच्च तस्य लाक्षणिकस्तुतिनिन्दार्थत्वासिद्धान्तभङ्गापत्तेः । न चान्यौ गुणदोषौ निरूप्येते।प्ररोचना[2]द्वेषजनकत्वेन च स्तुतिनिन्दयोरर्थवत्त्वं प्रयोजनवत्त्वमिष्यते तत्र न तावदिच्छानिच्छे तच्छब्दवाच्ये विधिनिषेधावगतेष्टानिष्टफलत्वादेव तत्सिद्धेः । प्रवृत्तिनिवृत्तिप्रतिबन्धकविपरीतत्वेनालस्योत्साहभङ्गो ऽपिश्न । प्रवृत्तिनिवृत्तिहेतुभूतविधिनिषेधसिद्धत्वात्तस्मान्न स्तुतिनिन्दाख्यः कश्चिदर्थः । न ह्यसावर्थवादगम्यो नापि तत्प्रयोजनमिति। एवं सिद्धान्त्याभिमतविधिनिषेधापेक्षितप्ररोचनाद्वेषजनकस्तुतिनिन्दासमर्पकत्वेन विधिनिषेधाभ्यां ग्रहणे निराकृते यदि भावनान्तर्गतिः स्यात् ततस्तद्द्वारेण विधिनिषेधग्रहणात् पुरुषार्थानुबन्धित्वं भवेत्तच्च नाशङ्क्यमेवेति भावः । अगम्यमानैकवाक्यत्वेष्वर्थवादेषु लाक्षणिकस्तुतिनिन्दार्थत्वकल्पने दुःपरिहरमितरेतराश्रयत्वमित्याह * अपि चेति * एतच्च पूर्वं सर्वानर्थक्याय योजितमपीदानीमर्थवादानर्थक्याय प्रकटितमित्यपौनरुक्त्यम् । अर्थवादानर्थक्यमेवोपसंहरति * तस्मादिति * तस्मादनित्यमुच्यते इत्येतत्सूत्रावयवव्याख्यानपरं तस्मादित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातम् । वृत्तिकारान्तरैरेतत्सूत्रमर्थवादाप्रामाण्येन तदेकवाक्यतया साकाङ्क्षत्वाद्विध्युद्देशस्याप्यप्रामाण्यापत्तेः । प्राभाकरैरपि सकलवेदाप्रामाण्यपरतया व्याख्यातं तन्निराकरणार्थं स एष इत्यादिभाष्यम् । तत्र पूर्वपक्षे ऽर्थवादानां भिन्नार्थत्वेनैकवाक्यत्वायोगादेकदे-

---

१ एकत्र प्रयाजादि परत्र खड्गीद्यमादि ।

२ नापि स्तुतिनिन्दयो.प्रयोजनमित्याह प्ररोचनेति ।

३ न गुणदोषवत्त्वमित्यनुषङ्गः ।

शशब्दो न युक्त इत्याशङ्क्याह * स एष इति * व्याख्यानान्तरमाह * अथ वेति * एतच्च विभवार्थं न निर्द्धारणइति षष्ठीसमासनिषेधात्सम्बन्धमात्रषष्ठ्यां च मध्यशब्दानुपपत्तेः। कर्मधारये ऽप्येकदेशशब्दस्योपसर्ज्जनत्वेन पूर्वनिपातापातादवयववाचित्वेन च कतिपयार्थत्वाभावात् । नन्वित्यादिवृत्तिकारान्तराभिप्रायविवरणार्थं भाष्यं तस्योत्तरं नैवमित्यादि तस्यार्थः न तावत्सर्वो विध्युद्देशो ऽर्थवादापेक्षः शुद्धस्यापि वसन्ताय कपिञ्जलानालभतइत्यादेर्दर्शनात्कश्चिदेव तु वाक्यं श्वेतमालभेतेत्यादिस्तदपेक्षस्तस्यापि विधिविधेयसम्बन्धरूपावान्तरवाक्यार्थे ऽर्थवादपदनिरपेक्षस्य स्तुतिस्तुत्यसम्बन्धात्मके महावाक्यार्थरूपे ऽर्थान्तरएव तदपेक्षा ततश्चैकदेशाक्षेपरूप एव तेषामाक्षेपः । अर्थवादाप्रामाण्येन महावाक्यार्थविवक्षायामप्यवान्तरवाक्यार्थविवक्षा दुर्निवारेतिभावः । तत्र कश्चिदिति काक्वा सूचितमर्थं दर्शयति * तत्रेति * भाष्यार्थं व्याचष्टे * यान्यपीति * विधिप्रत्ययशून्येषु तर्हि समस्ताक्षेपः स्यादित्याशङ्क्य सिद्धसाध्यतामाह * यानि त्विति * यद्वा ऽनेनावृत्त्या खण्डशो भाष्यं व्याख्यायते कश्चित्पदसमूहो नैवं भवति नाप्रमाणत्वेन शङ्क्यो भवतीत्यर्थः । कश्चित्वर्थवादपदैः संयुज्यार्थान्तरे वर्त्तते तत्र तान्यर्थवादपदानि केवलान्याक्षिप्यन्ते । पुनस्तानीत्यादि शुद्धार्थवादविषयत्वेनैव व्याख्यातं यानि केवलान्यर्थवादपदानि तच्छब्दनिर्दिष्टानि तानि समस्तान्याक्षिप्यन्तइति ।

शास्त्रदृष्टविरोधाच्च २

अत्र भाष्यकारेण स्तेनं मन इत्याद्युदाहृत्य एवं जातीयकानां धर्मं प्रति अप्रामाण्यं भूतानुवादादित्युक्तम् । तदेवं जातीयकानि कं धर्मं प्रमिमीरन्नित्यनेन गतार्थत्वात्पुनरुक्तमित्याशङ्क्य व्याचष्टे * वाङ्मनसयोरिति* अनेनैवं भाष्यं व्याख्यातं भूतशब्दः परमार्थवाची यादृशं परमार्थतः प्रच्छन्नरूपत्वादौपचारिकं मनसस्तेनत्वं प्रायिकं च वाचो ऽनृतवादिनीत्वं तादृशानुवादमालोच्य धर्मं प्रत्यप्राण्यम्[1] अतथाभूतमुख्य[2] रूपस्तेनानृतवादिनीत्वकीर्त्तने तु स्वार्थे ऽप्यप्रामाण्यमिति भूतानुवादादिति विशेषणोपादानसामर्थ्यात् सूचितम् । ततश्च पूर्वोदाहरणेष्वतीतार्थकीर्त्तनेन योग्यानुपलब्ध्यभा-

---

१ पूर्वोक्तविपरीतमितिभावः

२ मुखरूपइ २ पु. पा.

३चातुर्मास्ये साकमेधाख्ये पर्वणि महापितृयज्ञेष्टावित्यर्थः.

वात्स्वार्थासत्यत्वानिश्चये ऽपि धर्मे प्रत्यप्रामाण्यमुक्तम् । इह तु स्वार्थे ऽप्यसत्यत्वमित्यधिकार्थत्वादपौनरुक्त्यमिति । अनेन चेहोदाहरणे पूर्वसूत्रमेवं योजितम् । अनसत्तेनशब्दवाच्यपरस्वापहारित्वाभावाद्वाचश्चानृतवदनकर्तृत्वाभावान्मुख्यरूपस्तेनानृतवादिनीत्वकीर्त्तने स्वार्थासत्यत्वादानर्थक्यमभिधेयशून्यत्वं यथाहृष्टार्थानुवादे ऽप्यक्रियार्थत्वादानर्थक्यं निष्प्रयोजनत्वमिति । अध्याहारादिभिस्तु क्रियार्थत्वकल्पने प्रतिषेधशास्त्रविरोधापत्तेरानर्थक्यमेव युक्तमिति शास्त्रविरोधसूत्रव्याख्यानार्थं विपरीणामादिभिरित्यादिभाष्यं तद्व्याचष्टे * अथ त्विति * न चेत्यादिभाष्यमाशङ्क्यापूर्वं व्याचष्टे * तत्रेति * अत्राशङ्कते * ननु चेति * पितृयज्ञेऽतिदेशप्राप्तस्य होतृवरणस्य न होतारं वृणीतइति निषेधः श्रूयते दर्शपूर्णमासयोश्चानारभ्य विधिप्राप्तस्य ये यजामहस्य नानुयाजेषु य जामहं करोतीति । तत्रानयोर्नित्यं बाधो विकल्पेन वेति निरूपणार्थं नञ् अयं प्रतिषेधार्थः पर्युदासार्थो वेति चिन्तायां पूर्वपक्षयिष्यते । श्रुत्या नञः प्रधानभूतविधायकान्वयेन निषेधार्थत्वं प्रतीतमपि नेक्षेतेत्यत्र व्रतशब्दसामानाधिकरण्यादनङ्गीकृत्योपसर्जनीभूतधात्वर्थान्वयेन पर्युदासो ऽङ्गीकृतः न त्विह तथा विकल्पपर्युदासे ऽप्यपरिहार्यः; तस्यापि पर्युदसनीयप्राप्तिसापेक्षत्वात् । अन्यथा न सौम्ये ऽध्वर इत्यस्यापि पर्युदासत्वापत्तेः । किं चान्यत एव तदन्येषु प्राप्तेस्तदन्यमात्रसङ्कोचार्थत्वे च पर्युदासोपसंहारयोरभेदापत्तेर्न पर्युदासाख्यविध्यन्तरोपपत्तिः, तस्मात्प्रतिषेध एवायं ततश्च विहितप्रतिषिद्धत्वाद्विकल्प इति तत्र प्राप्तिसापेक्षस्यापि सुरापानादिनिषेधवद्विशेषनिष्ठत्वाद् बलीयस्त्वं स्यादित्याशङ्क्य विशेषनिष्ठेनापि निषेधेनात्मलाभायोगापत्तेः सामान्यरूपस्यापि विधेः स्वविषयादपने तु मशक्यत्वादनपनीतस्य च शास्त्रस्यात्यन्तबाधायोगाद्विकल्पो दुःपरिहर इत्युक्तम् । न तुल्यहेतुत्वादुभयं शब्दलक्षणमिति सिद्धान्तस्तु कर्तव्यत्वप्रतिपादनात्मकविधिविरोधित्वेनाकर्त्तव्यत्वप्रतिपादनात्मकनिषेधे जाग्रति विकल्पापत्तेस्तत्परिहाराय पर्युदासो ऽत्राङ्गीक्रियते तस्य विषयसमर्पणेनानुकूलतया विकल्पानासञ्जकत्वात्तन्मात्रसङ्कोचनार्थोपसंहारात्तदन्यमात्रसङ्कोचार्थस्य पर्युदासस्य स्पष्टं वैलक्षण्यमित्यनवद्यं परिहरति * सत्यमिति * दृष्टविरोधादिन्वक्ष्य-

---

१ अत्यत एव पर्युदासशब्दादेव पर्युदसनीयान्येषु पर्युदसनीयान्यमात्रं यत् यागायाग-साधारण्यलक्षसङ्कोचः यागमात्रलभ्यत् विशेषवाक्येन आज्यभागौ यजतीत्यादिना क्रियतइत्यर्थः;

माणान्सर्वान्हेतूनभिधेयशून्यरूपानर्थक्यप्रतिपादनपरतया सामान्यतो व्याचष्टे * अतः परामिति * अत्र भाष्यकारेण धूम एवाग्नेर्दिवा ददृशे नार्चिरित्यादिदृष्टविरोधोदाहरणं दर्शयित्वा तस्मान्नैषावधारणा सिध्यतीत्युक्तम्। तद्धूम एवार्चिरेवेत्यवधारणानुपपत्त्युपसंहारार्थत्वेन तावद्व्याचष्टे * रात्रिं दिवमिति * यद्वैतद्वधारणद्वयानुपपत्त्युपसंहारस्य तस्मात् दृष्टविरुद्धमित्यनेनैव सिद्धत्वात्तदुपपाद्यस्य दिवाग्निरादित्यं गतो रात्रावादित्यस्तमित्यवधारणद्वयस्यासिद्धिप्रतिपादनार्थमेतद्भाष्यमित्याह * अथ वेति * स्वरूपपरत्वस्य वा सिद्धान्तिनोऽनिष्टत्वात्तत्रासत्यत्वे ऽपि न कापि क्षतिरित्याशङ्क्य स्वार्थासत्यत्वे निरालम्बनस्तुत्यनुपपत्तिं तदनुपपत्त्या वा तत्कल्प्यमन्त्रविध्यनुपपत्तिमेकदेशाप्रामाण्ये वा समस्तवेदप्रामाण्यावधारणानुपपत्तिं प्रतिपादयितुमेतदित्याह * ततश्चेति * एतच्च स्वार्थासत्यत्वप्रतिपादनस्य पूर्वपक्ष्यभिप्रेतधर्माप्रामाण्योपयोगित्वप्रदर्शनार्थं व्याख्यानत्रयं न त्वनन्तरानिर्दिष्टस्य स्तुत्यादिरेवेति सर्वेनाम्ना निर्देशो युज्यते। एकैकोदाहरणे चोभयविरोधव्याख्यासिद्धेरुदाहरणद्वयमनर्थकम्। अथ परिहारवैलक्षण्यादुदाहरणद्वयम्। तथापि शास्त्रविरोधोदाहरणद्वयमुक्त्वा दृष्टविरोधोदाहरणं वाच्यं व्युत्क्रमे किं कारणमित्याशङ्क्याह * शास्त्रेति * प्रायादित्यनेनानृतवादिनीत्वालम्बने बाहुल्ये ऽभिहिते धूम एवेत्यवधारणे ऽपि भूयस्त्वारव्यस्य बाहुल्यस्यालम्बनत्वेन बुद्धिस्थत्वादनृतवादिनीत्वोदाहरणपरिहारानन्तरं धूमोदाहरणपरिहारे ऽपि भूयस्त्वशब्देनोक्तेनार्चिरित्यदर्शनोक्त्यालम्बने च समीपगमनक्लेशनिबन्धने दुर्ज्ञेयत्वे दूरशब्देनोक्ते ब्राह्मणयाज्ञानोक्तावपि स्रुचपराधनिबन्धनस्य दुर्ज्ञेयत्वस्यालम्बनत्वेन बुद्धिस्थत्वात्तदनन्तरं परिहार इति परिहारक्रमकारणम्। परिहाराणां सूत्रक्रमेण भेदेन चेति विग्रहः। उदाहरणानेकत्वकारणत्वेन परिहारभेदोक्तिः। न चैतद्विग्र इत्यत्राक्रियार्थत्वादप्रमाणमिति भाष्यकारेणोक्तं तत्सिद्धान्त्यभिमतस्तुत्यर्थत्वनिराकरणपरतया व्याचष्टे * न चैतदिति * आर्षेयप्रवरणशब्देनात्र प्रवरे प्रक्रियमाणे देवाः पितर इति ब्रूयादित्यार्षेयवरणानुमन्त्रणविधिरभिप्रेतः तेन चेहोदाहरणे ऽनुमन्त्रणक्रियास्तुत्यप्रतीतेरानर्थक्यमित्याद्यं सूत्रं योजितम्। तदेवोपपादयति * न हीति केन चिदंशेनेति * विधेयस्तुत्यंशेनान्यनिन्दांशेन वेत्यर्थः। यद्वा दृष्टविरोधित्वेनैव क्रियास्तुत्यर्थत्वासम्भवादानर्थक्यमनेनोक्तमित्येतदेवभाष्यमन्यथा व्याचष्टे * न चेति * अथायमर्थ इत्यनेनानर्थक्यएव दृष्टवि-

रोधो हेतुरुक्तः तद्व्याचष्टे * न चेति * बोधयति * कथं पुनरिती ति । शास्त्रेणैवेति * सवर्णायां स्वभार्यायामुत्पादितः सवर्ण एवासवर्णायां मूर्धावसिक्तादिः । परभार्यायां जीवत्पतिकायां मृतडो विधवायां गोलकः । पुनश्चोत्कर्षापकर्षाभ्यामन्यतरवर्णापत्तिरित्यादिशास्त्रैकगोचरत्वान्न प्रत्यक्षगम्यमित्यर्थः । परिहरति * नायमिति * एतदेवाशङ्कापूर्वकं विवृणोति * कथं पुनरिति * आशङ्किता स्वाभिप्रायमाविष्करोति * कस्मात्पुनरिति * सत्यपीन्द्रियव्यापारे प्रतीत्यभावान्न ब्राह्मणत्वादेः प्रत्यक्षत्वं युज्यते । न चोत्पादकजातिज्ञानस्य सहकारित्वं सम्भवत्यात्माश्रयदोषापत्तेः । प्रागुत्पादकजातिज्ञानादाप्तवाक्यजनितं ज्ञानं न प्रत्यक्षत्वेनाशङ्क्यमित्यनाख्यातग्रहणेनोक्तम् । यद्वानेन ग्रन्थेन ब्राह्मण्यादिजातिरपह्नूयते । सपिण्डानुवर्त्ती विजातीयेभ्यो व्यावृत्त आकारो जातिर्न च क्षत्रियादिभ्यो व्यावृत्तो ब्राह्मणेष्वनुवृत्तः कश्चिदाकारविशेषो मातापितृसम्बन्धज्ञेनापि प्रतीयते । तस्माद् ब्राह्मणादिशब्दव्यपदेश्यमातापितृसन्तानजन्यत्वौपाधिको ब्राह्मणादिशब्दो न जातिवचनः । सन्तानस्य चानेकविप्रकृष्टकालपुरुषव्यासङ्गिनः प्रत्यक्षेण ग्रहीतुमशक्यत्वान्न तदुपाधिकस्य ब्राह्मण्यादेः प्रत्यक्षत्वं सम्भवतीति । आशङ्काभिप्रायं परिहर्त्ता दूषयति * शक्त्यभावादिति * अयमाशयः मातापितृसम्बन्धज्ञस्यापत्ये ब्राह्मण्यादिप्रत्ययस्तावत्सन्देहबाधरहितः । स्वसंवेद्यः न च निर्विषयः प्रत्ययो ऽस्तीत्युक्तम् । न चास्य सन्तानविशेषजन्यत्वं विषयः । निरालम्बनशब्दप्रयोगायोगेन जातिव्यतिरिक्तस्य सन्तानान्तरव्यावृत्तस्य विशेषस्यासम्भवात् । न चास्मद्बाह्याद्वित्रिसन्तानमात्रे सन्तानः समाप्यते । येन सम्बन्धिविशेषेणैव सम्बन्धः सन्तानिविशेषेण सन्तानो विशेषुं शक्यते । यथा चैकदेशावस्थिता वृक्षा एव वनशब्देनोच्यन्ते । तथोत्पाद्योत्पादकक्रमेणावस्थिताः पुरुषा एव सन्तानशब्दवाच्याः न सन्तानाख्यं किंचिद्वस्त्वस्ति । तस्मात्सर्वेषु ब्राह्मणेष्वनुस्यूतं प्रत्येकसमवेतं ब्राह्मणप्रत्ययविषयभूतं किं चिदवश्यमेष्टव्यम् । यच्चाकारविशेषो न प्रतीयतइत्युक्तम् । तत्र यद्याकारशब्देन संस्थानं मुद्रापरनामधेयमभिप्रेतं ततस्तस्य जातित्वानङ्गीकाराददोषः । ब्राह्मणप्रत्ययवेद्यस्तु धर्मविशेषो ऽनुभवसिद्धत्वान्नापह्नवमर्हति । वृक्षत्वाद्यप्यनुभवारूढरूपातिरेकेण निरूपयितुमशक्यम् । शाखादिमद्रूपस्य संस्थानात्मकत्वेन जातित्वाभावात्संस्थानविशेषस्य हि प्रतिव्यक्तिविलक्षणत्वात्संस्थानमात्रस्य त्वन्यजातीयेष्वपि समानत्वादवान्तरविशेषस्य चानिरूपणाद्-

यवधिन्यासविशेषात्मकस्य संस्थानस्य निरवयवेष्वसंभवाच्च संस्थानमाकारमुद्रापरनामधेयं जातिरिष्यते। तस्मात्समानाकारेष्वपि पिण्डेषु विलक्षणब्राह्मणप्रत्ययवेद्यब्राह्मण्यादिजातिर्नापह्नोतुं शक्यते। न चासौ शास्त्रस्य विषयः। प्रमाणान्तरागृहीतायां जातौ अग्रहीतसम्बन्धत्वेन ब्राह्मण्यादिपदार्थाज्ञानात्। ब्राह्मणाद् ब्राह्मण्यां यो जायते स ब्राह्मण इतिवाक्यार्थानवधारणात्सम्बन्धाग्रहणादेव नानुमेयत्वं सहशानुपपद्यमानार्थाभावादुपमानार्थापत्त्यसम्भवात्पारिशेष्यात्प्रत्यक्षत्वम्। उत्पादकजातिज्ञानात्तु प्रागप्रतीतेस्तस्य सहकारित्वं कल्प्यते जात्यभेदे ऽपि व्यक्तिभेदेन जातिव्यक्तिसम्बन्धभेदादुत्पादकव्यक्तिसम्बन्धितया जातिज्ञानमुत्पाद्य व्यक्तिसम्बन्धितया जातिज्ञाने कारणमित्यात्माश्रयत्वाप्रसङ्गः। सहकार्यपेक्षत्वे ऽप्यैन्द्रियकत्वाव्याघाते दृष्टान्तमाह * यथेति * शब्दोल्लेखप्रतीतौ १ चायं दृष्टान्तः। आशङ्किता तु वृक्षत्वस्य स्वरूपग्रहणे सहकार्यनपेक्षणाद्वैषम्यमाह * नैतदिति * शब्दोल्लेखप्रतीतावपि २ शब्दातिरिक्तसहकार्यनपेक्षणादपरं वैषम्यमाह * अपि चेति * निमित्तान्तरग्रहणेनैतद्दर्शयति। प्रतीत्यन्यथानुपपत्त्या कल्प्यमानमपि शब्दातिरिक्तसहकारिग्राह्यात् ब्राह्मणत्वादन्यत्कल्प्यम्। न चोत्पादकगतं ब्राह्मणत्वमुत्पाद्यगतात् ब्राह्मणत्वादन्यदित्येकस्य कर्मकरणत्वायोगान्न तस्य सहकारित्वं युक्तमिति। उपवीतादीनां तु व्यभिचारात्सहकारित्वमनाशङ्क्यमेवेत्याह * नचेति * अध्यापनादीनां ब्राह्मणस्यैव विधानादव्यभिचारमाशङ्क्याह * अध्यापनाद्यपीति * क्षत्रियवैश्यौ प्रतियुज्यतइति क्षत्रियवैश्यप्रतियोगिक्षत्रियवैश्यौ वा प्रतियोगिनौ प्रतिसंबन्धिनौ यस्येत्यर्थः। नन्वध्यापनादिकारिणि लोके निर्विचिकित्सब्राह्मणप्रत्ययदर्शनात् न क्वचिदव्यभिचारमात्रेणाप्रामाण्याशङ्का युक्तेत्याशङ्क्याह * यस्त्विति * अध्यापनादीनां व्यभिचारित्वेन निर्विचिकित्सप्रत्ययोत्पादकत्वं न युक्तमितिभावः। परिहर्त्तुं तून्मीलितनेत्रस्य ब्राह्मणो ऽयमित्यसन्दिग्धाबाधितापरोक्षप्रत्ययोत्पत्तेर्ब्राह्मण्यप्रत्यक्षत्वापह्नवायोगादन्वयव्यतिरेकबलेनोत्पादकजातिज्ञानस्योक्तप्रकारेण परिहृतात्माश्रयदोषस्य सहकारित्वकल्पनैवोचितेत्यभिप्रायेणाह * नैष दोष इति * वृक्षे त्ववैषम्यलक्षणे ऽध्यापनादिनिमित्तत्वासम्भवलक्षणो वा न दोष इत्यर्थः। यदि चान्यजातिग्रहणे

---

१ नन्वगृहीतसङ्केतिनापि समनस्केन्द्रियसन्निकर्षे वृक्षत्वं गृह्यतएव तत्रेव परं न गृह्यतइत्यत आह शब्दोल्लेखेति। वृक्षो ऽयमितिशब्दोल्लेखप्रतीतिरित्यर्थः

२ वृक्षत्वज्ञाने शब्दातिरिक्तं सहकारि नापेक्ष्यते ब्राह्मणे त्वपेक्षतइति वैषम्यमित्यर्थः

सर्वत्रैकरूपं सहकारि स्यात्ततो ऽत्र तद्वैषम्यस्य दोषत्वं शङ्क्यतापि न त्वेतदस्ति आकृतिवादे तस्योपलक्षणं वापि क्वचित् केन चिदिष्यत इत्यादिना जातिविशेषेषु यथा दर्शनविलक्षणसहकार्यभिधानादित्याह * क्वचिदिति * रूपादेर्गुणविशेषस्यैव सुवर्णत्वादिजातिग्रहणे सहकारित्वदर्शनान्न जातेः सहकारित्वं कल्पयितुं युक्तमित्याशङ्क्यान्यत्राहृष्टमपीहैव प्रतीतिबलादवश्यं कल्पनीयमिति दर्शयन्नुपसंहरति * तेनेति * प्रतीतिबलादेव यथासम्भवं प्रत्यक्षानुमानाद्यवगतायाः सहकारित्वकल्पनं नायुक्तमित्याह * अयं चेति * न च प्रत्यक्षावगतमेव प्रत्यक्षज्ञाने कारणमिति नियमो युज्यते चक्षुरादौ व्यभिचारादित्याह * न चेति * न च जातिस्मरणव्यवधानमात्रेण चक्षुषो ऽकारणत्वं वाच्यं प्रत्यक्षसूत्रे तत्र शब्दार्थसंबन्धमित्यादिना १ स्मरणव्यवधाने ऽप्यपरोक्षप्रतीतेः प्रत्यक्षत्वाभिधानादित्याह * आन्तरालिकेति * न च मातापितृसंबन्धानभिज्ञाप्रत्यक्षत्वमात्रेण तदभिज्ञाप्रत्यक्षत्वं विमनस्का यदा केचिदित्यादिना २ निराकृतत्वादित्याह * न चेति * ननु स्त्रीव्यभिचारशङ्क्या मातापितृसंबधनिश्चयान्नापत्ये ब्राह्मण्यनिश्चयः कस्य चिदपि सम्भवतीत्याशङ्क्याह * स्त्रयपराधात्विति * स्त्रीणां स्वातन्त्र्यनिषेधाद्भर्त्रादिभिः प्रयत्नेन रक्षणाद्योग्यानुपलब्ध्या व्यभिचारशङ्कायाः परिहर्तुं शक्यत्वाद् दुर्ज्ञानत्वमात्रं मातापितृसंबन्धानभिज्ञस्य भवेन्न तु सर्वात्मना ज्ञानाभाव इत्यर्थः । एतच्च दुर्ज्ञानत्वादज्ञानवचनं गौणमिति स्त्रयपराधेनेत्यत्र भाष्यकारो वक्ष्यतीत्याह * इति स्वयमेवेति * न च दुर्ज्ञानत्वमात्रेणाप्रत्यक्षत्वं शङ्क्यं, गिरिश्रृङ्गारोहणजन्यस्यापि दूरस्थपदार्थज्ञानस्य प्रत्यक्षत्वसिद्धेरित्याह * न चेति * ननु स्त्रीणां प्रायेण चञ्चलत्वदर्शनान्न वै स्त्रैणानि सख्यानि सन्ति शालावृकाणां हृदयान्येतासियाः अशास्यं मन इति च वेदे ऽनुवादात्सुरूपं वा कुरूपं वा पुमानित्येव भुञ्जत इत्यादिस्मृतेश्च । व्यभिचारस्वभावत्वावधारणादहृष्टव्यभिचारास्वपि स्त्रीत्वेन व्यभिचारो ऽनुमास्यते पलाशत्वेनेव वृक्षत्वमित्याशङ्क्याह * न चेति * स्त्रीत्वस्य व्यभिचाराप्रयोजकत्वसूचनार्थो ऽनुमाने कल्पनाशब्दः । न च निर्मूलकत्वेन लोकस्याप्रामाण्यं प्रयत्नेन रक्षणे योग्यानुपलब्धेर्मूलत्वसम्भवादिति दर्शयितुमाह * विशिष्टेन हीति * महाकुलीनानां पुरुषाणां स्त्रीरक्षणमेवात्मरक्षणं जायायां रक्ष्यमाणायामात्मा भवति रक्षित इतिस्मरणात् । यद्वा दुष्कुलप्रसूतत्वं व्य

---

१ स्मर्यते शब्दसंबन्धो मा भूत्प्रत्यक्षता तयोः । तदप्रत्यक्षभावेन न स्मर्यस्यापि वार्थता ।

२ तत्र शब्दार्थसंबन्धप्रमातुः स्मरतो ऽपि वा । बुद्धिः पूर्वं गृहीतार्थसन्तानादुपजायते

भिचारशीलत्वे प्रयोजकं न स्त्रीत्वमिति दर्शयितुं महाकुलीनत्वं स्त्रीणामुक्तम् । व्यभिचाराभावनिश्चयमेवाभियुक्तवृद्धव्यवहारेण द्रढयति * अनेनैवेति * व्यभिचाराभावानिश्चये हि निर्मूलत्वात् पितृपितामहादिपरम्परालेखनात्मकसमूहलेख्यं व्यर्थं स्यादितिभावः । कुलपरीक्षापूर्वकेदानींतनपुरुषगतविवाहादिव्यवहारेणापि तमेव द्रढयति * तथा चेति * एतावत्प्रयत्नान्वेषणे योग्यानुपलब्धिपूर्विकया लोकप्रसिद्ध्या व्यभिचाराभावनिश्चयान्न स्त्रीत्वमात्रेणादृष्टव्यभिचारासु व्यभिचारानुमानं युक्तमित्युक्तम्। इदानीमनुमीयमानोऽपि व्यभिचारोऽनैकान्ततो वर्णासङ्करमापादयतीत्याह * न चेति * न च व्यभिचारोत्पन्नत्वाभावेऽपि मातृव्यभिचारमात्रेणापत्ये वर्णसङ्करः शङ्क्यः। सावर्ण्योत्पत्तिकारणस्योत्पादकसवर्णत्वस्याविघातादित्याह * तदपराधनिमित्तस्त्विति * व्यभिचारोत्पन्नस्यापि वर्णान्तरव्यभिचारानिश्चये वर्णसङ्करानिश्चय इत्याह * न चेति * ननु विन्नास्वेव विधिः स्मृत इत्यादिवचनाद्भर्तृव्यतिरिक्तसवर्णोत्पन्नस्यापि वर्णान्तरापत्तिः स्यादित्याशङ्क्याह * सवर्णेन चेति* गवादावुत्पादकसजातीयापत्योत्पादकत्वदर्शनेनेहापि तथानुमानान्न वर्णान्तरापत्तिः सम्भवतीति ब्राह्मणादिविहितकर्म्मानधिकारप्रतिपादनपरं विन्नास्वितिवचनं व्याख्येयं कुण्डगोलकधवनमपि सत्येव ब्राह्मण्ये ऽवान्तरसंज्ञाविशेषप्रतिपादनपरमिति उत्पादकासावर्ण्ये ऽपि क चिदन्यतरसवर्णोत्पत्तिस्मरणान्नात्यन्तं तदुच्छेदः किमुत तत्सावर्ण्यइत्यतिशयार्थमाह * सङ्करजातानामपि चेति * एवं हि स्मर्यते।

जात्युत्कर्षो युगे ज्ञेयस्सप्तमे पञ्चमे ऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरमिति ॥

अस्यार्थः क्षत्रियायां ब्राह्मणादुत्पन्ना कन्या मूर्द्धावसिक्ता ब्राह्मणाय दीयमाना मूर्द्धावसिक्तजातेरुत्कृष्टां[१] कन्यां जनयति सापि ब्राह्मणाय दीयमाना कन्यान्तरमेवेत्येवं पञ्चमे युगे पुरुषान्तरे ब्राह्मण्योत्पत्त्या जात्युत्कर्षः एवं वाशब्दात् षष्ठे वैश्यायां सप्तमे शूद्रायामिति। मूर्द्धावसिक्तादिपुत्रपरम्परायास्तु क्षत्रियादिस्त्रीणां तथैव पञ्चमादिषु क्षत्रियादिजातीयापत्योत्पत्तेरपकर्ष इति पूर्ववच्चाधरोत्तरमित्युत्तरत्रातिदेशात्सूचितं, नन्वस्यार्थस्य प्रत्यक्षेण विवेक्तुमशक्यत्वाद् ब्राह्मण्यादेश्च शास्त्रविषयत्वानङ्गीकारेण निर्मूलमेतत्स्मरणं स्यादत आह * तत्र त्विति *

१ ब्राह्मणजातितोरपकृष्टामित्यधिकं २ पु०।

क चित्प्रत्यक्षावगतायां जातौ सम्बन्धग्रहणसम्भवात् गृहीतपदार्थकेन शास्त्रेणान्यत्र तत्प्रतिपादनं युक्तमिति मात्रशब्देन सूचितं, प्रत्यक्षावगतिसम्भवादन्यत्र शास्त्रव्यापारो नाङ्गीकृतः, इह तु तदसम्भवाच्छास्त्रविषयत्वं नायुक्तमित्याह * न हीति * नन्वाकारसाम्येन क चिदपि ब्राह्मण्यादिविवेकस्य प्रत्यक्षेणावगत्यसम्भवात्सर्वत्रागमगम्यत्वमेवाङ्गीकार्यमित्याशङ्क्यं निराकुर्वन्नुपसंहरति * तस्मादिति । केन चिन्निमित्तेनेति * स्वरविशेषादिनेत्यर्थः । स्मरणस्य स्वातन्त्र्येण प्रामाण्यायोगात्तन्मूलप्रदर्शनार्थं दर्शनग्रहणं तस्याप्युत्पादकजातिस्मरणनिरपेक्षेन्द्रियजन्यत्वायोगात्पूर्वोत्पादकजातिस्मरणं तत्सहकारीति निदर्शयितुं पारम्पर्य्यग्रहणं प्रत्यक्षत्वोपपादनफलमुपसंहरति * इति भवतीति * ननु

शमोदमस्तपः शौचं सत्यमार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म प्रचक्षते ॥

इत्यादिस्मृतिपर्यालोचनया तपः प्रभृत्याचारयोगनिमित्तत्वे ऽपि ब्राह्मणशब्दप्रवृत्तेस्तस्य प्रत्यक्षत्वेन दृष्टविरोधसम्भवात्किमिति महता क्लेशेन जातिः साध्यते अत आह * येषामिति *प्रमाणाभावमुपपादयितुमाह * सिद्धानां हीति * अनवस्थितत्वापत्तेरप्याचारनिमित्तत्वं न युक्तमित्याह * स एवेति * कारणान्तरमाह * तथेति * ननु तपःप्रभृत्याचारयोगिनि लोके ब्राह्मणशब्दप्रयोगदर्शनात् कथं तन्निमित्तत्वनिरासो ऽत आह * एताभिरिति * ब्राह्मणत्वप्रतिपादने द्योतकत्वमात्रं तपःप्रभृतीनां न तु ब्राह्मणशब्दप्रवृत्तिनिमित्तत्वमित्यर्थः यद्वा का तर्ह्यस्याः स्मृतेर्गतिरित्याशङ्क्यैतदुक्तम् । द्योतकत्वमात्रं स्मृत्या प्रतिपाद्यते न तु तपआदीनां समुदायो ब्राह्मण्यं स्मृत्या प्रतिपाद्यतइत्यर्थः । यदा तु पूर्वोक्तार्थोपसंहारपरत्वेनेयं फक्किका व्याख्यायते तदा नैताभिस्तपःप्रभृतिभिरुपपत्तिभिरयं ब्राह्मणः प्रतिपाद्यते द्योत्यतइति योज्यम् । किं त्वेताभिरितरेतराश्रयप्रसङ्गादिभिरुपपत्तिभिरयमर्थः प्रतिपाद्यते । तदुच्यते न तपआदीनां समुदायो ब्राह्मण्यमिति । ननु तपःप्रभृतीनां आचाराणां व्यभिचारित्वेन प्रत्येकं ब्राह्मणशब्दप्रवृत्तिनिमित्तत्वायोगात् युगपदनुष्ठानाभावेन च समुदायाभावान्माभून्निमित्तत्वं तज्जनितस्य तु संस्कारस्य भविष्यत्यत आह * नेति * माभूच्छब्दप्रवृत्तिनिमित्तत्वं जात्यभिव्यञ्जकत्वं भविष्यत्यत आह * नेति * उभयत्र पूर्वोक्तमेवोपपत्तित्रयमतिदेष्टव्यम् । एवं तर्हि व्यञ्जकाभावेनाप्रत्यक्षत्वं स्यादित्यशङ्कानिराकरणार्थं पूर्वोक्तमाभव्यञ्जकं स्मारयति * किं तर्हि इति *

नन्वाचारनिमित्तत्वाभावे मासेन शूद्रो भवति ब्राह्मणः क्षीरविक्रयादिति वचनमनर्थकं स्यादित्यतआह * तस्मादिति * न तु सत्यपि प्रत्यक्षविरोधे विकल्पेन प्रामाण्योपपत्तेः प्रत्यक्षविरुद्धंवचनमप्रमाणमिति भाष्यमयुक्तमित्याशङ्क्याह * पूर्ववच्चेति * विकल्पविषय एवायं न भवतीत्याह *अपि चेति * को हि तद्वेदेति *शास्त्रदृष्टविरोधोदाहरणे भाष्यकारेण पूर्वं तावदाद्यं सूत्रं योजितं * यदि प्रश्नइति * तद्व्याचष्टे * पूर्ववदेवेति * शास्त्रदृष्टविरोधप्रतिपादनार्थं यद्यनवक्लृप्तिरित्यादिभाष्यं तद्व्याचष्टे * निश्चितेति *

तथा फलाभावात् ॥ ३ ॥

अत्र भाष्यकारेण शोभते ऽस्य मुखमित्याद्युदाहृत्य आद्यन्तावत्सूत्रं योजितं यदि भूतानुवादो ऽनर्थक इति तद्व्याचष्टे * यदि तावदिति * गर्गात्रिरात्रब्राह्मणोपक्रमोपन्यासस्य य एवं वेदेत्येवं शब्दव्याख्यानार्थत्व गर्गात्रिरात्रब्राह्मणग्रहणेनोक्तम् । उदाहरणान्तरगतैवंशब्दस्य व्याख्यानार्थं वेदानुमन्त्रणग्रहणम् । विद्यमानयोरेवेत्यनेन यथादृष्टवचनत्वं भूतशब्दस्य दर्शितम् । सम्भवति च गर्गात्रिरात्राहीनविशेषविधायिब्राह्मणज्ञस्य परिहारसूत्रवक्ष्यमाणप्रकारेण मुखशोभावेदानुमन्त्रणज्ञस्य तु वाजिनमिति मन्त्रलिङ्गादपि गम्यते । प्रकृतसूत्रयोजनार्थम् । अथाध्ययनफलानुवाद इति भाष्यं तद्व्याचष्टे * अथ त्विति * मुख्यरूपयामुखशोभावाजिजन्मनोर्योग्यानुपलब्धिर्बाधितत्वादिति भावः । कालान्तरफलत्वेन योग्यानुपलब्धिविरोधपरिहारशङ्कानिराकरणार्थत्वेन सौत्रतथाशब्दव्याख्यानार्थं कालान्तरइत्यादिभाष्यं तद्व्याचष्टे * वर्त्तमानापदेशाच्चेति * तदनेन यथाभूतं मुखशोभाद्यनन्तरफलत्वेन कीर्त्यते तथाभूतस्याभावादानर्थक्यामितिसूत्र योजितम् । फलविधित्वेन कालान्तरभावित्वावगमात् वर्त्तमानापदेशो ऽस्य न भवतीत्याशङ्क्य द्रव्यसंस्कारकर्म्मस्वित्यत्र निराकरिष्यमाणत्वान्नायं फलविधिरिति भाष्यकृतोक्तम् । तत्र विद्याया द्रव्यादिबाह्यत्वात्तदधिकरणाविषयत्वमाशङ्क्य संस्कारान्तर्गतिं दर्शयितुमाह * कर्म्मानुष्ठानेति * तत्र हि यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति । तीर्थे स्नाति तीर्थमेव समानानां भवति । वर्म्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजा इज्यन्ते वर्म्म यजमानस्य भ्रातृव्याभिभूत्याइत्यादीनि द्रव्यादिविषयाणि वाक्यान्युदाहृत्य किमेते फलविधयः फलार्थवादा वेति विचारयिष्यते । तत्र पर्णतादेरप्राप्तत्वेनावश्यविधेयस्य फलाकाङ्क्षायां साक्षात्पुरुषार्थरूपश्रु-

तफलसम्भवे पारम्पर्य्यपुरुषार्थरूपकृतूपकाराख्यफलकल्पनायोगात्फलविधित्वेन पूर्वपक्षयित्वा यथा कथं चित्पुरुषार्थरूपफलत्वेन विध्यनुपपत्तिपरिहाराद्दाश्रिसत्रादिवद्विपरिणामकल्पनानुपपत्तेर्यथाश्रुतवर्त्तमानफलत्वसङ्कीर्त्तनस्य चानुपलब्धिविरोधान्न फलविधित्वमिति सिद्धान्तयिष्यते चिन्तयिष्यत्येतदित्यादिभाष्यं पौनरुक्त्याशङ्कानिराकरणार्थत्वेन व्याचष्टे * न पौनरुक्त्यादिति * एवं तर्हि सिद्धान्त्यभिमतं स्तुत्यर्थत्वमेव पूर्वपक्षिणा निराकार्यमित्याशङ्क्य तदर्थमेव स्वार्थासत्यत्वनिरूपणमित्याह * स्तुत्यर्थतेति *

अन्यानर्थक्यात् ॥ ४ ॥

अत्र भाष्यकारेण पूर्णाहुत्याद्युदाहरणेषु यदि भूतानुवादमात्रमनर्थकामित्यनेनाद्यं सूत्रं योजयित्वाऽष्टाफलाविधिरन्येषामानर्थक्यमित्यनेनान्यानर्थक्यसूत्रं योजितम् । तत्र फलाभावसूत्रमपि योजयितुं शक्यत्वात् किमिति न योजितमित्याशङ्क्यानन्तरेणैव निर्ज्ञातपारार्थ्येषु फलविधित्वनिराकरणन्यायेनात्रापि फलाभावस्य सुज्ञानत्वादित्याह * अनन्तरेणैवेति * कथमेषां तदधिकरणविषयत्वमित्याशङ्क्याह * पूर्णाहुतेरिति * यदीत्यादिभाष्यं व्याचष्टे * यदि पुनरिति * न ह्यकृत्वेत्यादिनान्यानर्थक्योपपादनार्थं पौर्वापर्य्यमुपन्यस्तम् । तत्र समानफलकर्मालप्तत्वमहत्वमात्रेणान्यानर्थक्योपपत्तेः पौर्वापर्योपन्यासो व्यर्थ इत्याशङ्क्याह * समानफलान्यपीति * अपिशब्देनालप्तत्वमहत्वमुपक्षिप्तमज्ञातस्यानुष्ठातुमशक्यत्वाद्युक्तमश्वमेधज्ञानस्य तदनुष्ठानात्प्राग्भावित्वं पूर्णाहुतिपशुबन्धयोस्तु कथमत आह * पूर्णाहुतीति * अग्निहोत्राद्यङ्गभूताग्न्युत्पादकाधानाङ्गत्वात्पूर्णाहुतेः प्राग्भावः स एष औपवसथ्ये ऽहनि द्विर्देवत्यः पशुरालभ्यतइत्यनेन वचनेनाग्नीषोमीयस्येति भावः * प्रथमं वा नियम्येतेति * वसन्ताय कपिञ्जलानालभेत इत्याद्युदाहृत्य किं त्र्यादयः परार्द्धपर्य्यन्ता विकल्पेनालब्धव्या उत त्रय एवेत्येकादशे चिन्तयिष्यते । तत्र बहुवचनेन द्वित्वातिरिक्तसङ्ख्यासामान्यरूपबहुत्वाभिधायिनां तदविशेषाकाङ्क्षायां परार्द्धातिरिक्तसङ्ख्याविशेषाभावात्तत्पर्य्यन्तत्र्यादिसंख्याविशेषाक्षेपात्समुच्चये संख्यान्तरोपजननेन सर्वविनाशापत्तेर्विकल्पेन विनियोग इति। बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यादित्यनेन पूर्वपक्षयित्वा प्रथमं वा नियम्येत कारणादतिक्रमः स्यादित्यनेन त्रिसंख्योपादानं विना चतुराद्युपादानाशङ्केरवश्योपादेयत्रित्वमात्रेण बहुवचनोपपत्तेरतिरिक्ताक्षेपे प्रमाणाभावात् त्रित्व-

नियम इति सिद्धान्तयिष्यते । दृष्टान्ते पौर्वापर्य्यादरार्थमेव तेनैव पथेत्युक्तमित्याह * तथा चेति * भवत्वन्यानर्थक्यमत आह * तस्मादिति * फलविशेषार्थत्वेन तर्ह्यन्येषामर्थवत्त्वं भविष्यतीत्यत आह * न चेति * नन्वेवमपि सिद्धान्त्यभिमतस्तुत्यर्थत्वानिराकरणात्पूर्वपक्षो न सिद्धो ऽत आह * न चेति *

अभागिप्रतिषेधात् ॥ ५ ॥

अत्र भाष्यकृता न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीत्यप्रतिषेधभागिनमर्थं प्रतिषेधन्तीति बहुवचनं प्रयुक्तम् । तदयुक्तम् । पृथिवीचयनस्य प्राप्तेः प्रतिषेधभागित्वादित्याशङ्क्याह * त्रीण्यपीति * विज्ञायत एवेति भाष्यं व्याचष्टे * अन्तरिक्ष इति * अस्तु तर्हि पर्युदासो ऽत आह * अतश्चेति * प्रतिषेधग्रहणं पर्युदासस्याप्युपलक्षणार्थमिति भावः । उभयत्र सिद्धान्त्यभिमतं नित्यानुवादत्वं निराकर्त्तुमाद्यं सूत्रं योजयति * अथापीति * पृथिवीचयनस्याप्रतिषेधभागित्वप्रदर्शनार्थं पृथिवीचयनप्रतिषेधार्थं च यद्वाक्यं भवेत् चयननिषेधार्थमेव तदितिभाष्यं तदुपपादयति * पृथिवीति * अस्तु तद्बाधो ऽत आह * बाधे चेति * विकल्पेन चयनविधेरप्यर्थवत्त्वं भविष्यत्यत आह * विकल्पे ऽपीति * पाक्षिकबाधार्थमेवायं प्रतिषेधो भविष्यति नातिरात्रे षोडशिनं गृह्णातीतिवदत आह * कामसंयोगाच्चेति * पशुकामश्चिन्वीत प्रजाकामश्चिन्वीतेत्यादिभिर्वाक्यैः काम्यत्वावगमाद्विनापि प्रतिषेधं पाक्षिकत्वसिद्धेः प्रतिषेधानर्थक्यमिति भावः । न च कामाभावे पाक्षिकत्वं प्रतिषेधवशाद्भविष्यतीति शक्यं वक्तुं काम्यस्य कामनाभावे प्राप्त्यभावेन प्रतिषेधायोगात् विशेषणोपादाने च तत्परतयावगतस्यास्य प्रतिषेधस्य क्रियायां कल्प्यत्वेन दौर्बल्यान्न पाक्षिकत्वापादने सामर्थ्यमस्तीत्याह * दुर्बलश्चेति * ननु दुर्बलेनापि प्रतिषेधेनागत्या पाक्षिकचयनविधिबाधो नातीव दोषमावहतीत्याशङ्क्य अथाप्रमाणं नैष विरोधो भवतीत्यनेन भाष्येण प्रतिषेधाप्रामाण्येनागतिपरिहारः कृतस्तदतिस्पष्टत्वान्न वार्त्तिककृता व्याख्यातम् । ननु बहुतरकल्पाग्निहोत्रादिविधिविरोधेनैकस्य कल्प्यस्य पूर्णाहुत्यादिविधेरप्रामाण्यं युक्तं इह तूभयोः प्रत्यक्षत्वेनाविशेषात्कथमेकान्ततः प्रतिषेधस्यैवाप्रामाण्यमित्याशङ्क्यानिराकरणार्थं भाष्यम् * कथं तत्प्रमाणमित्यादि * तत्र

---

१ अगल्येति इष्टकाभिरग्निं चिन्वीतेतिवचनात्सामर्थ्यात्पृथिव्यामेव चयन प्राप्तं तत्र न पृथिव्यामिति यथाश्रुते ऽर्थे ऽभ्युपेतव्ये विधिरनर्थकः प्रत्यगतिः ।

स्वयमाकुलत्वमुपपादयति * एतदेवेति * अप्राप्तस्य चयनस्य पृथिव्याधारत्वनिषेधायोगात्प्राप्तिस्तावदङ्गीकार्या पुनश्चानाधारचयनायोगात्तन्निषेधोऽपीत्येतदेवेत्यनेन परामृष्टम् । किं तद्विध्यन्तरमित्यपेक्षायामाह * विध्यन्तरं चेति * अस्य गुणपरत्वाच्चयनोत्पत्तिवाक्योपलक्षणार्थत्वं दर्शयितुमिष्टकावाक्योपन्यासः स्तुत्यर्थत्वं चानाशङ्क्यमेवेत्याह * प्ररोचनाबुद्धिरित्विति *

अनित्यसंयोगात् ॥ ६ ॥

नन्वतः परं स्वार्थेनैवानर्थक्यं प्रतिपादयतीति वार्त्तिककृद्वचनात्स्वार्थासत्यत्वरूपानर्थक्यप्रतिज्ञायामयं हेतुर्गम्यते तच्च विरुद्धम् । अनित्यो ह्यत्र प्रवाहणापत्यं बबरः स्वार्थः प्रतीयते तत्रासत्यत्वे सति अनित्यसंयोग एव न स्यात् न चानित्यसंयोगेनानित्यसंयोगाभावः साध्यो भवितुमर्हति * उच्यते[2] * अनित्यसंयोगप्रसङ्गोऽत्र हेतुर्विवक्षितः ततश्च स्वार्थसत्यत्वेऽनित्यसंयोगप्रसङ्गात्तत्परिहारार्थं स्वार्थासत्यत्वं बबरः प्रावाहणिरित्यादीनामेष्टव्यमितिसूत्रार्थो भवति अनित्यसंयोगान्मन्त्रानर्थक्यमित्यत्राप्यर्थप्रकाशनपक्षे यस्य योऽर्थः स एव तेन प्रकाशयितव्यः क चिद्धानित्यैरकर्म्माङ्गभूतैः स्वार्थैरर्थवन्तो मन्त्रा लक्ष्यन्तइत्युपक्रमवार्त्तिकाद्यद्येतद्विवक्षितं तथा सत्यादिमदर्थाभिधानाद्वेदस्य कृत्रिमत्वेनाप्रामाण्यं प्रसज्येतेति चोपसंहारवार्तिकादनित्यसंयोगः खल्वपि भवेन्मन्त्रेष्वभिधानार्थेष्वितिभाष्याच्चायमेवार्थः प्रतीयते । अन्यानर्थक्याभागप्रतिषेधयोरप्येवम्[3] । तत्रापि स्वार्थासत्यत्वे तयोरभावात्सूत्रव्याख्यानार्थमनित्यसंयोगश्चेति भाष्यं तत्सोपस्कारमेव द्रष्टव्यम् । अनित्यसंयोगः स्वार्थवत्त्वे प्रसज्येत तस्मादानर्थक्यमेव युक्तमिति तत्रानित्यसंयोगप्रसङ्गान्भाभूत्स्वार्थस्य सत्यत्वं स्तुत्यर्थत्वं तु सिद्धान्त्यभिमतं निराकर्त्तुमशक्यमित्याङ्क्याह * सर्वोपाख्यानेष्विति * अयमाशयः अन्यपरत्वं ह्युच्यमानं कार्यपरत्वं वा स्यात् स्तुतिपरत्वं वा तच्चोभयमपि प्रतीत्यनारूढत्वान्न युज्यते तेन पारिशेष्यादर्थवत्त्वमङ्गीकुर्वता स्वार्थपरत्वमेव वाच्यं तत्र चानित्यसंयोगः प्रसज्येत इति । ननु परं तु

---

१ यदा स्वार्थासत्यत्वरूपानर्थक्यप्रतिज्ञा तदा बबरादीनामनित्यानामर्थानामभाव इत्यभिप्रायेणाह नचेति ।

२ बबरादिवाक्यानि प्रतीयमानबाधितार्थकानि सत्यत्वे ऽनित्यसंयोगप्रसङ्गात् ।

३ साध्य तदेव सत्यार्थत्वे ऽन्यानर्थक्यप्रसङ्गात् यथार्थत्वे प्रसज्यमानाप्रतिषेधभाग्यर्थप्रतिषेधकत्वादिति ।

श्रुतिसामान्यमात्रमित्यत्र बबरादिशब्दानां नित्यसिद्धवाच्यवाद्यर्थाभिधायित्वस्योक्तत्वात्स्वार्थपरत्वे ऽपि नानित्यसंयोगप्रसङ्ग इत्याशङ्कानिराकरणार्थं वेदप्रामाण्ये सतीति भाष्यं तद्व्याचष्टे * स चेति * अयमाशयः । अनित्यार्थाभिधायित्वे कृत्रिमत्वेन वेदस्याप्रामाण्यापत्तेस्तत्परिहारार्थं कथं चिन्नित्यसिद्धवाच्यवाद्यर्थवचनत्वं कल्पितं यदा तु कथं चित्प्रामाण्यं न सम्भवति तदा यथाश्रुतार्थपरित्यागकारणाभावान्न क्लेशेन बबरादिशब्दानां वाच्यादिवचनत्वकल्पनं युक्तमिति । नन्वेवमप्रामाण्ये सति यथाश्रुतार्थपरित्यागकारणाभावादनित्यार्थाभिधायित्वमनित्यार्थाभिधायित्वे बबरादिवाक्यानां कृतकत्वेनाप्रामाण्यमितीतरेतराश्रयमाशङ्क्येतरैकदेशवदित्युक्तम् * तस्यार्थः * यथेतरेषामनित्यसंयोगरहितानामापो वै शान्ता इत्यादीनामेकदेशानामक्रियार्थत्वादप्रामाण्यं तथैतेषामनित्यार्थानामप्यक्रियार्थत्वेनैवाप्रामाण्यसिद्धेन्न इतरेतराश्रयत्वमिति । नन्वध्ययनविधिबलात्सर्वस्य वेदस्य पुरुषार्थोपायिकत्वावगतेः कथमर्थवादानर्थक्यशङ्का अत आह * तस्मादिति * अदृष्टार्थत्वे ऽपि पुरुषार्थोपायिकत्वोपपत्तेर्नैकान्ततो ऽर्थपरत्वमध्यापनविधिराक्षिपतीति भावः । एवमादीनामित्यनेनैतदर्शयति प्रथमसूत्रव्युत्पादितमध्ययनविधेर्दृष्टार्थत्वमर्थवादेष्वेवासम्भवादाक्षिप्य तेन सर्वत्र विधेर्हि प्रयोजनाकाङ्क्षायां दृष्टे सम्भवत्यदृष्टं न कल्प्यमिति तत्रोक्तम् । न च सर्वत्रैकरूप्येण भाव्यमिति नियमो युक्तः । स्तोभादिष्वर्थपरत्वासम्भवात् । अथ तत्रापि नियतकालसामभागपूरणाद्यर्थत्वादर्थज्ञानार्थत्वाभावे ऽपि दृष्टार्थत्वमात्रेणैकरूप्यमुच्यते । ततो ऽत्रापि यत्सम्भवति तत्प्रयोजनमित्यनेन रूपेणैकरूप्यं मत्वा सन्तोष्टव्यम् । यद्वा अध्ययनसंस्कृतैरक्षरैर्यच्छक्यते पुरुषार्थरूपं तत् कुर्यादित्यध्ययनविधिना वेदाध्ययनस्य शक्यफलसाधनत्वावगमादर्थवादाक्षरैः कस्य चित्पुरुषार्थरूपस्य कर्त्तुमशक्यत्वान्निष्प्रयोजनत्वमेवाङ्गीकृतमित्याह * अथ वेति * प्रत्यक्षशब्देनापरोक्षाकारधाचिनो ग्रहणपर्यन्तमध्यापनमभिप्रेतं तस्योपेक्षाफलत्वमुपपादयितुं हेतुतयार्थवादजनितस्य[3] ज्ञानस्य हेयोपादेयार्थविषयत्वेन तद्वाक्यानामुपेक्षाफलत्वं दृष्टान्तामिषेणोक्तं द्रष्टव्यम् । अर्थपरत्वाभावे ऽपि कर्मानुष्ठा-

---

१ यद्ग्रहणपर्यन्तैताथा प्रत्यक्षत्वं भवतीतिभाव. ।

२ तस्य यद्ग्रहणपर्यन्तताध्ययनस्योपेक्षाफलत्वमुपपादयितुमर्थवादवाक्यानामुपेक्षाफलत्वं दृष्टान्तामिषेण हेतुतयोक्तमिति संबन्धः ।

३ अर्थवादवाक्यानामुपेक्षाफलत्वमुपपादयितुमाह अर्थेति ।

नकाले उच्चारणार्थत्वसम्भवादर्थवादाध्ययनस्याद्दृष्टार्थत्वं निष्प्रयोजनत्वं वा पूर्वपक्षिणापि नाङ्गीकार्य्यमित्याशङ्कते * अथेति * परिहरति * प्रयोगेति * अव्यापाररूपत्वेन मन्त्राणां व्यापारग्राहिणा करणेन साक्षाद्ग्रहणायोगादुच्चारणद्वारा तद्ग्रहणं तद्ग्रहणाच्चोच्चारणार्थतेत्यन्योन्याश्रयापत्तेर्न प्रकरणपाठमात्रेण विनियोगो युक्तः सामर्थ्यात्त्वभिधानक्रियार्थत्वावगमे तद्द्वारा प्रकरणग्रहणोपपत्तेरनुच्चारितस्याभिधानाशक्तेः कर्म्मकालोच्चारणसिद्धिरिति भावः । मन्त्राधिकरणपूर्वपक्षन्यायेन चार्थवादानामर्थपरत्वाभावे ऽपि कर्म्मकालोच्चारणमत्रत्यःपूर्वपक्षी मन्यतइत्यनभिमतमपि प्रौढ्यानुजानाति * अथ वेति * अस्मिन्पक्षे सूत्रविरोधमाशङ्क्याह * यत्त्विति *

विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधिनां स्युः ॥७॥

पूर्वपक्षसिद्धान्तयोर्भिन्नविषयत्वापत्तेरपूर्वोदाहरणानुपपत्तिमाशङ्कते * पूर्वपक्षेति * नातिप्रयत्निनां परिहारमाह * के चिदिति * भाष्यकारस्यानिपुणत्वापत्तेरिमं परिहारं दूषयति * यद्यपीति * स्वमतेन परिहरति * तदभिधीयतइति * अत्र भाष्यकारेण वायुर्वैक्षेपिष्ठा देवतेति यद्यपि क्रिया नावगम्यते क्रियासम्बद्धं वा तथापि विध्युद्देशेनैकवाक्यत्वात्प्रमाणमित्युक्त्वा कथमेकवाक्यभाव इति पृष्टे पदानां साकाङ्क्षत्वाद्विधेस्तुतेश्चैकवाक्यत्वमित्यभिधानादेकवाक्यत्वं प्रामाण्यकारणं[1] स्तुत्यर्थत्वं त्वेकवाक्यत्वकारणमुक्तमिति प्रतिभाति । तच्चायुक्तं, विध्येकवाक्यत्वं विना लाक्षणिकस्तुत्यर्थत्वायोगादितरेतराश्रयापत्तेरित्याशङ्क्य व्याचष्टे * तत्रेति * स्तुत्यर्थत्वोपपादनद्वारैणैकवाक्यत्वस्योपयोगरूपप्रामाण्यकारणत्वमभिप्रेतं न साक्षात् विधिस्तुतिपदसाकाङ्क्षत्वं तु समभिव्याहारावगतैकवाक्यत्वनिर्वाहायोक्तमित्यदोषः । तदेतद्भाष्यमाक्षिपति * एतावत्त्विति * सामान्यतः पुरुषार्थानुबन्धित्वासिद्धौ तदधीनलाक्षणिकस्तुत्यादिद्वारविशेषनिरूपणाशक्तेस्तदवादौ साध्यमिति प्रथमशब्देनोक्तम् । स्वारसिकैकवाक्यत्वावगमे[2] श्रौतार्थत्यागस्य गङ्गायां घोष इत्यादौ दर्शनात्तदव्युदासार्थं बलादित्युक्तम् । स्वरसतो प्रतीयमानाप्येकवाक्यता

---

१ प्रयोगसमवेतार्थप्रकाशनसामर्थ्यादित्यर्थः ।

२ धर्मप्रमाजनकत्वरूपप्रामाण्यकारण तद्बाधितं ततो धर्मप्रमानुत्पत्तेः ।

३ ननु समभिव्याहारलक्षणैकवाक्यताप्रकृते स्वारसिकीसम्भवतीति चेत् विभज्यमानसाकाङ्क्षत्वे सत्यकार्थप्रतिपादकत्वं स्वारसिकमेकवाक्यत्वं विवक्षितं प्रकृते त्वर्थवादानां निराकाङ्क्षत्वेन तदभावात् ।

पुरुषार्थानुबन्धित्वलाभाय स्तुत्यर्थत्वावधारणात्तद्वशेन कल्प्यमाना नेतरेतराश्रयापादिकेत्याशङ्क्य निराकर्तुं पुरुषार्थत्वं वेत्युक्तम्। पुरुषार्थानुबन्धित्वस्याप्यप्रमाणकत्वादितिभावः। बहुक्षीरादिवाक्येषु रूपभङ्गेनापि पुरुषार्थपर्य्यवसायित्वदर्शनाद्भेदे ऽपि तथानुमानं स्यादित्याशङ्कते * लौकिकवाक्येष्विति * आक्षेप्ता पुरुषार्थपर्य्यवसायित्वे साध्ये वाक्यत्वस्य ,हेतोरप्रयोजकत्वं दूषणमाह * तत्रेति * एतदेवोपपादयति* लोके ऽपीति * समाधानान्तरमाशङ्कते * तत्रेति * कथं तेन सूत्रेण पुरुषार्थपर्य्यवसायित्वसिद्धिरत आह * न हीति * आदरणान्यथानुपपत्तिः पुरुषार्थपर्यवसायित्वे प्रमाणं तेन सूत्रेण वक्ष्यतइति भावः। न च व्यामोहादादरोपपत्तिरित्याह * यद्यपीति * एतदेवोपसंहरति * तस्मादिति * एतदप्याक्षेप्ता दूषयति * न त्वेतदिति * नन्वाप्तवाक्यवत्पुरुषाधीनप्रामाण्याङ्गीकरणमपि न दोषाय स्यादत आह * यदि हीति * अयमाशयः किमत्र स्वादरान्यथानुपपत्त्या प्रयोजनवत्त्वकल्पनं स्यात् पुरुषान्तरादरान्यथानुपपत्त्या वा। तत्राद्ये पक्षे स्वादरात्प्रयोजनवत्त्वावगमः प्रयोजनवत्त्वावगमाच्च स्वादर इत्यन्योन्याश्रयः स्यादित्यनेनोक्तम्। द्वितीये तु मूलप्रमाणाभावेनान्धपरम्परेत्याह * अथेति * तदेव दर्शयति * सर्वत्र हीति * नन्वादरान्यथानुपपत्त्याध्येतृषु प्रयोजनवत्त्वज्ञाने कल्पिते तत्कारणीभूतं किं चिन्मूलप्रमाणं कल्पयिष्यामो ऽत आह * तेनेति * कस्य चिन्मूलप्रमाणस्यासम्भवाद् भ्रान्तिमूलत्वं प्रसज्येतेति भावः। कथमसम्भवो ऽत आह * अतो यावदिति * एवमाक्षिप्याध्ययनविधिरेव सर्वस्य पुरुषार्थपर्यवसायित्वे प्रमाणमिति स्वमतेन समाधातुमुपक्रमते * तदुच्यतइति * विध्यादिसाधारण्यप्रदर्शनार्थं सकलग्रहणं पूर्वं तावत्सर्वोपयोगः प्रतिपाद्यते पश्चादर्थवादानां द्वारविशेष इति तावच्छब्देनोक्तम्। निष्प्रयोजनाक्षरमात्राध्ययने ऽपि बुद्धिपूर्वकारिणां पुंसां प्रवर्त्तयितुमशक्यत्वान्नैकस्याप्यक्षरस्य निष्प्रयोजनत्वमध्ययनविधिरनुमन्यते। न चैकदेशे दृष्टार्थस्यादृष्टार्थत्वमेकदेशान्तरे युक्तम्। एकत्र नियमविधिरपरत्राप्राप्तविधिरिति वैरूप्यस्यापरिहार्य्यत्वात् तस्मात्सकलस्यैव वेदस्य प्रयोजनवदर्थपर्यवसायित्वमध्ययनविधिबलादवसीयतइति भावः। ननु क्व चिदध्ययनविधेः पुरुषार्थपर्यवसायित्वे सिद्धे सत्यवैरूप्याय सर्वत्र तथाङ्गीकरणं युक्तं तदेव तु निष्प्रमाणकं समानपदोपात्तस्याध्ययनस्यैव भाव्यत्वोपपत्तेरित्याशङ्क्य प्रथमसूत्रोक्तं दृष्टार्थत्वे दर्शयि-

१ अर्थवादवाक्यं पुरुषार्थपर्यवसायि वाक्यत्वात् बहुक्षीरादिवाक्यवत्।

तुमाह * तत्रेति * कस्मिन्नंशे तर्हि तस्य निवेशो ऽत आह * तत्रेति * साध्यांशानिवेशकारणस्य विधिविरोधस्यात्राभावमविरोधादित्यनेन दर्शयति । नामार्थस्य करणांशे निराकर्तुं सन्निधेरित्युक्तम् । तेनात्र भाव्याकाङ्क्षायां श्रुतभाव्याभावादश्रुताद्दष्टकल्पने च तस्य स्वरूपं तज्जन्यत्वं तत्र चाध्ययनस्य शक्तिः कल्प्येतेत्यनन्ताद्दष्टकल्पनागौरवापत्तेर्दृष्टस्य जन्यत्वमात्रं कल्पनीयमित्याह * तेनेति* एवं तर्ह्यनन्तरदृष्टाक्षरग्रहणमात्रेण नैराकाङ्क्ष्याान्नाभिमतं वाक्यार्थज्ञानपर्यन्तत्वं सिद्ध्येदित्याशङ्क्य प्राक् पुरुषार्थसिद्धेर्नैराकाङ्क्ष्याभावं दर्शयति * तस्यापीत्यादिना । निराकाङ्क्षी भवतीत्यन्तेन । आधानादिविधीनामपुरुषार्थरूपाहवनीयादिमात्रे नैराकाङ्क्ष्यदर्शनादिहापि तथा स्यादित्याशङ्क्याह * एवमिति * एवं तर्हि न साक्षात्पुरुषार्थपर्यवसाय्येव सर्वत्र फलमस्त्वत आह * न चेति * पारम्पर्यपुरुषार्थफलत्वेनापि विध्युपपत्तेर्न्न नियोगतः साक्षात्पुरुषार्थफलत्वे किं चित्प्रमाणमस्तीति भावः । एवमपि कथमत्र दृष्टफलत्वनिश्चयो ऽत आह * योग्यतया हीति * लाघवमनेन निश्चयकारणमुक्तम् । एवं तर्हि होमादावप्याहवनीयप्राप्त्यादिदृष्टकार्यसम्भवादृष्टकल्पना न स्यात् वक्तव्यो वा विशेषो ऽत आह * तत्रेत्यादिना अदृष्टकल्पनेत्यन्तेन * पारम्पर्य्येणापि तस्य पुरुषार्थानुबन्धाभावात्फलत्वं न सम्भवतीति भावः । नन्वेवमपि पारम्पर्य्यपुरुषार्थानुबन्ध्यक्षरग्रहणमनन्तरदृष्टत्वात्फलं स्यात्साक्षात्पुरुषार्थरूपं वा स्वर्गादिवाक्यार्थज्ञानस्य तूभयरूपरहितत्वात्फलत्वाङ्गीकरणमयुक्तामित्याशङ्क्य तत्प्रतिपत्त्युपयोगितया सामान्यन्यायं तावद्वक्तुमारभते * सर्वत्र चेति * विहिते ऽवघातादावफलात्मकवैतुष्यादिदृष्टकार्यपरम्परायामान्तरालिकं यत्पुरोडाशादि क्रतवे यागादि वा पुरुषार्थाय चोद्यते तदेव तस्य क्रतोः पुरुषार्थस्य वा साधनम् । पूर्वस्य त्ववघातादिविधेः पुरोडाशादियागाद्युपकारार्थत्वमात्रं न पुरुषार्थपर्य्यन्ततेत्यर्थः । पेषणादीनां तर्हि कथमन्वयो ऽत आह * यानि त्विति * पेषणादिविधेयानि कार्याण्यनुष्ठेयानि पेषणादीन तानि पूर्वविहितस्यावघातादेः स्वव्यापारमात्रतया द्वारमात्रतयान्वीयन्ते नान्तरीयकत्वात्तैर्विना ऽवघातादिना पुरोडाशादेः कर्त्तुमशक्यत्वात् । किमिति पेषणादेरवघातादिसाध्यत्वं पुरोडाशसाधनत्वं वा नेष्यत इत्याशङ्क्योक्तम् * प्राक् साध्यसाधनभावेनाचोदितत्वादिति * यदि ह्यवघातविधेः प्राक्

१ अनुष्ठानापेक्षयेत्यर्थः ।

२ किमपेक्षया प्रागत आह ।

पेषणादेः पुरोडाशसाधनत्वमवगतं स्यात्तत्प्रयोजनवत्त्वेन योग्यत्वादवघातसाध्यत्वं युज्येत पुरोडाशप्रकृतिभूतव्रीह्युद्देशेन विधानाच्चावघातस्यैव पूर्वं पुरोडाशसाधनतां प्रतीमः । यदि च पेषणादिविधेः प्राक् पेषणादेरवघातसाध्यत्वावगमः स्यात् ततो द्वारमात्रत्वं न युज्येत न त्वेतदस्ति पुरोडाशस्यैवोक्तन्यायेनावघातसाध्यत्वावगमादित्यर्थः यद्वोत्तराविधिशब्देन पुरोडाशाविधिमभिप्रेत्य तस्मात्प्राग्यानि कार्याणीति योज्यम् । नन्वेवं[2] तर्ह्यदाहानुमितविधिबलेन भस्मसाद्भावस्यापि फलसाधनत्वावगमादश्रुतफलस्य होमस्य तत्साधनत्वापपत्तेर्न दृष्टफलकल्पना स्यादित्याशङ्क्याह * यत्र त्विति । अयमाशयः[3] * विध्यभावे ऽप्यदग्धस्य क्रत्वर्थस्य कदाचिदुपघाते सति क्रतुवैगुण्यापत्तेस्तत्परिहाराय दाहादरोपपत्तेर्नैकान्ततो विध्यनुमानं विध्यनुमाने ऽपि द्वारमात्रतयापि विध्युपपत्तेर्न फलसाधनत्वकल्पना युक्तेति । एवं सामान्यन्यायमुक्त्वा तदनुसारेण यथाध्ययनविधेर्वाक्यार्थज्ञानपर्यन्तत्वं भवति तथा प्रपञ्चयन्नाह । तत्रेति । श्रुतफलेषु क्लृप्तः पुरुषार्थो ऽश्रुतफलेषु कल्पयिष्यमाण इति सर्वाणि प्रधानवाक्यानि अनेन परामृष्टानि । तत्प्रतिपादनं यावदित्यनेनाक्षरग्रहणादीनां पेषणादिन्यायेनावान्तरव्यापारमात्रत्वाद्ध्ययनफलत्वं निराकृतं फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गतानिष्फलत्वेन शब्दस्य योग्यत्वादवधार्यतइत्यनेन न्यायेन वाक्यार्थज्ञानार्थं स्वाध्यायोद्देशेन विहितस्याध्ययनस्य पुरोडाशार्थावघातवद्वाक्यार्थज्ञानार्थत्वावधारणात्तदन्तरालवर्त्तिनामक्षरग्रहणादीनां पेषणादिन्यायेनावान्तरव्यापारत्वमात्रं युक्तमिति भावः। ननु पुरोडाशस्य विध्यन्तरेण क्रत्वर्थतया फलत्वज्ञानाद्युक्तमवघातसाध्यत्वं वाक्यार्थज्ञानस्य तु कथमत आह * परतस्त्विति * वाक्यार्थज्ञानस्य सामर्थ्येन यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीतिवाक्येन वा कर्म्मानुष्ठानार्थत्वावधारणात्कर्म्मणां च विध्यन्तरैः पुरुषार्थफलत्वावधारणात् न तत्पर्य्यन्तमध्ययनविधिरायास्यति इत्यर्थः । ननु च भवतु प्रधानवाक्यानां स्वार्थप्रतिपादनमात्रेण पर्य्यवसानमङ्गवाक्यानां त्वर्थद्वारेण स्वरूपस्यापि मन्त्रवत्प्रधानैर्ग्रहणात्कर्म्मकालप्रयोज्यत्वावगते-

---

१ यदा तूत्तरविधेरितिपञ्चमी तदोत्तरविधिः पुरोडाशविधिः प्रागितिच कार्यपदेन सम्बध्यतइत्याह यद्वेति ।

२ तर्ह्यादरानुमितेति २ पु० पु०

३ नन्वादरानुमितविधिविहितत्वं भस्मसाद्भावस्य विद्यतएवकथमुच्यते न किंचिद्विधीयतइत्यत आह अयमाशयइति ।

नार्थप्रतिपादनमात्रेण पर्य्यवसानमित्याशङ्क्याह * यानि त्विति * अयमाशयः । न मन्त्राणामङ्गभूतार्थप्रतिपादनमात्रेण स्वरूपग्रहणं ज्ञातं किं तु विधिवशात्।न चाङ्गवाक्यानां विधिरस्ति प्रकरणपाठेन च क्रत्वङ्गत्वं शङ्क्यमानमनारभ्याधीतानां तावन्न शक्यते शङ्क्तुं प्रकरणाधीतानामपि प्रयाजादिवाक्यानां प्रमाणाभावान्न सम्भवतीति।एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * अदृष्टार्थत्वेन क्रतोरदृष्टोपकारापेक्षत्वान्न दृष्टार्थाङ्गवाक्यग्राहकत्वमित्यर्थः[2] प्रयोजनशब्देनोपकारमाह न च साक्षात्क्रतुसम्बन्धायापि प्रयोज्यत्वकल्पनं[3] पारम्पर्येणापि पुरुषार्थानुबन्धलाभादित्यर्थान्तरन्यासेनाह * अत इति * अङ्गानां प्रधानवाक्यवदेकान्तरितपुरुषार्थान्वयित्वाद् बाह्यत्वम् । तद्वाक्यानां तु द्व्यन्तरितत्वात्प्रधानाद् बाह्यतरत्वं एतच्च द्व्यन्तरितत्वं प्रकरणाधीतारादुपकारकाङ्गवाक्यविषयं सामवायिकाङ्गवाक्यानां त्वादिशब्दोपात्तोपनयनादिवद् बहुव्यवधानमित्याह * एवमिति[4] * स्वमते पुरोडाशस्यैव साक्षात्प्रधानभूतयागसाधनत्वाद्भाष्यकाराभिप्रायेण द्व्यवदानग्रहणं व्यवहिततरत्वप्रदर्शनार्थं कृतं आदिशब्दो व्रीह्यादीत्यादिशब्दोपात्ताज्यादिविषयः चतुर्गृहीताद्यभिप्रायो द्रष्टव्यः एतामेव सन्निधिव्यवधिव्यवस्थामनारभ्याधीताङ्गवाक्येष्वतिदिशति * एवमेवेति * कथं तर्ह्यनारभ्याधीतानां प्रकरणाधीतेभ्यो दौर्बल्यमत आह * तत्र त्विति * असम्बद्धवाक्यान्तरव्यवायेन तेषां प्राकरणिकाङ्गवाक्यवत्प्रधानवाक्यैकवाक्यत्वायोगादिति भावः । अनङ्गवाक्यनां त्वतिदूरव्यवधानमित्याह * यानि त्विति * ननूक्तेन द्वारेण पुरुषार्थानुबन्धिकर्म्मानुष्ठानोपयोगिवाक्यार्थज्ञानं सर्वविधिवाक्येषु सम्भवदपि सकलवेदाध्यापित्वान्नाध्ययनविधिप्रयोजनं भवितुमर्हतीत्याशङ्क्य सूत्रभाष्यकारानुक्तत्वादुपनिषद्वाक्यानां तावदुपयोगमाह * एतेनेति *उपनिषदामपि[5] आधानादिवाक्यन्यायेन दूरस्थेनैव क्रतुफलेन नैराकाङ्क्ष्यमित्यर्थः । कथमित्यपेक्षिते क्रत्वर्थकर्तृप्रतिपादनद्वारेणेत्युक्तम् । परलोकफलेषु कर्म्मसु विनाशिदेहादिव्यतिरिक्तनित्यकर्तृभोक्तृरूपात्मज्ञानं विना प्रवृत्त्यनुपपत्तेरहंप्रत्ययेन च देहे ऽपि दृष्टेन स्फुटतया तद्व्यतिरेकस्य ज्ञातुमशक्यत्वा-

---

१ वाक्यार्थप्रतिपादनं दृष्टोऽर्थः ।

२ नन्वङ्गानामफलत्वात् कथं प्रयोजनद्वारेणेत्युक्तमत आह प्रयोजनेति ।

३ प्रयोगकालपाठकल्पनमित्यर्थः ।

४ ननु द्व्यवदानस्याचार्यमते प्रतिपत्तिसिद्धत्वात् कथंयागसाधनत्वमुक्तमत आह स्वमत इति ।

५ यथाधानादिवाक्यानां क्रत्वङ्गभूताग्निसंस्कारप्रतिपादनद्वारेण पुरुषार्थत्वं तथेत्यर्थः ।

तु शास्त्रीयमात्मज्ञानं क्रतुविधिभिरपेक्षितं तस्य चानारभ्यं विहितस्यापि सामर्थ्येन पूर्वोदाहृतेन वाक्येनोपनिषदाममन्त्रत्वेन स्वरूपप्रयोज्यत्वाभावादुपनिषज्जनितस्यात्मज्ञानस्य फलातिशयलक्षणावीर्यवत्तरत्वहेतुत्वाभिधानपरेण क्रत्वङ्गत्वावधारणात् तद्द्वारेण पुरुषार्थानुबन्धित्वम् । ज्ञानस्य चाव्यापाररूपत्वेन स्वरूपेणाविधेयत्वे ऽप्युपासनापरनामधेयं ध्यानमेवात्मा ज्ञातव्य इत्यादिभिर्विधीयते । अप्रतिपन्नस्वरूपस्य च ध्यातुमशक्तेरात्मस्वरूपप्रतिपादनमविनाशी वा अरे ऽयमात्मेत्यादिभिः क्रियमाणं विध्यपेक्षितत्वान्नार्थवादेष्विवानादरमर्हतीति तद्द्वारेणोपनिषदां पुरुषार्थपर्य्यवसानामिति भावः । एतच्च संसारिरूपात्मप्रतिपादनाभिप्रायम् । असंसारिरूपसगुणानिर्गुणात्मज्ञानस्याभ्युदयनिःश्रेयसार्थतया साधुशब्दाधिकरणे वक्ष्यमाणत्वात्सिद्धार्थप्रतिपादनपराणामप्युपनिषदामुपासनाविधिशेषतया चोदनाशब्देनोपादानसम्भवाच्चोदनासूत्रप्रतिज्ञातप्रामाण्यसाधनं सङ्गतम् । पुरुषार्थोपायिकत्वेन चात्मस्वरूपप्रतिपादनेनैराकाङ्क्ष्यसम्भवात् पदैकवाक्यत्वाभावेनार्थवादवैलक्षण्यमिति सर्वमनवद्यम् । मन्त्रनाम्नोः केन द्वारेण नैराकाङ्क्ष्यमत आह * मन्त्रेति * योज्यते संबध्यते भावनया सहानेनेति व्युत्पत्त्या योजनाशब्देन द्वारमुक्तम्। ननु साध्यसाधनेतिकर्तव्यतानभिधायित्वेनाक्रियार्थत्वान्मन्त्रादीनामानर्थक्यमाशङ्क्य तत्कथं क्रियार्थत्वमव्युत्पाद्यैवार्थवत्त्वं व्युत्पाद्यते तत्राह * तेनेति * येन भावनासंबन्ध्यर्थप्रतिपादनेनैवार्थवत्त्वं वक्ष्यते तेन भावनान्तर्गतेः सिद्धेवेत्यर्थः अर्थवादोपयोगद्वारानभिधाने ऽप्यध्ययनविधिबलेन सामान्यतः सर्वोपयोगस्य साधितत्वात्सर्वेषामित्युक्तम् । एतच्च सामान्यतः सर्वोपयोगप्रतिपादनं, सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिकइति न्यायाद्विधिना त्वेकवाक्यत्वादिति सूत्रावयवारूढं[2] द्रष्टव्यं, तत्र तुशब्देनानर्थक्यनिराकरणार्थेनार्थवत्त्वं सामान्यतः सर्वेषां प्रतिज्ञातं श्रुतिवृत्त्या क्रियार्थत्वानवगमे ऽपि क्रियाविधैकवाक्यत्ववशेन लक्षणया तदपेक्षितार्थप्रतिपादनाक्रियार्थत्वमुपपादयितुं विधिनैकवाक्यत्वादित्युक्तमिति योज्यं, भाष्यम-

१ चोदनेति ननु चोदनाशब्दस्य मन्त्रार्थवादनामधेयोपेतमन्त्रावाक्यत्वमुक्तम् । तत्र चोपनिषदामनन्यार्थात्पुरुषार्थोपयिकत्वेन चैत्यग्निमभक्किक्यार्थवादेभ्यः पृथक्करणात् कथं चोदनाशब्देनोपादानं कथं वा तत्सूत्रप्रतिज्ञातप्रामाण्यसाधनमिति चेत् सत्यं किं तु कर्तुरितिकर्तव्यतात्वेन सर्वत्र भावनान्तर्गतेरुक्तदोषाभावादित्यर्थः ।

२ सूत्रेति ततश्चोक्ता सामान्यविशेषसमाधानपरतया सूत्रं योजनीयमिति ।

पि यद्यपीत्यादिप्रमाणमित्यन्तमेतत्सूत्रावयवव्याख्यानपरमेव यौज्यम् । यद्यप्यर्थवादादिभ्यः श्रुत्या क्रिया तत्सम्बद्धं वा नावगम्यते तथापि तत्रैव प्रमाणं विध्युद्देशैकवाक्यत्ववशेन लक्षणया वृत्त्या तत्परत्वसम्भवादिति । एवं सामान्यतः सर्वेषां क्रियार्थत्वमुपपाद्येदानीमर्थवादानां क्रियार्थत्वनिर्वाहाय द्वारविशेषं प्रतिपादयितुं योऽपि चेत्यादिनोक्तं पूर्वपक्षन्तावदनुभाषते * यत्त्विति * क्रियाप्रतिपादकत्वं हि क्रियार्थत्वं न चार्थवादैराख्यातवत्स्वरूपेणासौ प्रतिपाद्यते नापि फलादिपदवत्तदंशः कश्चित्साध्यादिः तस्मात्तदर्थस्य भावनांशत्रयानन्तःपातान्न तत्प्रतिपादकत्वं विनार्थवादानां भावनया ग्रहणमित्यर्थः । एवमनुभाष्य निराकर्तुमाह * तत्रेति * यद्यप्यर्थवादानां विधिवदनुष्ठापकत्वेन न क्रियार्थत्वं क्रियाभिधायकत्वं वा तथापि प्राशस्त्यज्ञापनेनैवानुष्ठापकत्वात्स्वरसतश्च प्राशस्त्याज्ञानादध्ययनविधिबलालुक्षणया तादर्थ्यमङ्गीकार्यम् । न च प्राशस्त्यज्ञानस्य कर्त्तव्यत्वासिद्धावध्ययनफलत्वं युक्तं रागतो विधितो वा कर्त्तव्यत्वेनानवगतस्य कस्य चित्फलत्वायोगात् । कर्त्तव्यत्वं च भावनान्तर्गत्या विना न सिध्यतीत्यर्थवादाध्ययनफलत्वोपपत्तये प्राशस्त्यज्ञानस्य कर्तव्यत्वासिद्ध्यर्थं भावनान्तर्गतिव्युत्पादयितुमारभते * सत्यमिति * ननु न तावदर्थभावनान्तर्गतिः प्राशस्त्यज्ञानस्य कैश्चिदिष्यते । न च ततोऽन्या शब्दभावना नाम का चिदुपपत्तिं सहते शब्दश्रवणानन्तरभाविन्यां हि प्रवृत्तौ हेतुः प्रवृत्त्युत्पादकत्वात् शब्दभावनाशब्देनाभिप्रेतः । न चासौ कश्चित्सम्भवति । तथा हि

प्रवर्त्तको लिङादिर्वा तत्क्रिया वा विलक्षणा ।
अभिधा वाथ वाज्ञादिः कार्यं वाथेष्टहेतुता ॥ १ ॥
तत्र शब्दः स्वरूपेण वायुवच्चेत्प्रवर्त्तकः ।
प्रमाणत्वं विहन्येत नियमाच्च प्रवर्त्तयेत् ॥ २ ॥
न च स्वरूपसम्बन्धज्ञानापेक्षो भवेन्न च ।
प्रकृत्यान्वयमाकाङ्क्षेन्न च स्यात्फलकल्पकः ॥ ३ ॥
अथ प्रवृत्तिं हेत्वर्थस्व्यापाराभिधानतः ।
प्रवर्त्तकत्वाच्छब्दस्य सर्वदोषनिवारणम् ॥ ४ ॥
तत्र प्रवृत्तिसामर्थ्यापादनात्मास्य या क्रिया ।
कारीर्य्यादिषु दृष्टा सावनुक्तैव प्रवर्त्तिका ॥ ५ ॥
तेनाभिधानवैयर्थ्यात्पूर्वदोषानिवारणम् ।
अलौकिकी प्रेरणा तु सम्बन्धानुभवादृते ॥ ६ ॥
अभिधातुमशक्यत्वान्न प्रवर्त्तयितुं क्षमा ।

राजादिवच्च शब्दस्य फलादातृत्वतः स्वतः ॥ ७ ॥
तद्व्यापाराभिधाने ऽपि न प्रवर्त्तेत कश्चन ।
पुरुषार्थोपयोगित्वं न लिङादेश्च गम्यते ॥ ८ ॥
येनास्यानुविधेयत्वात्फलकल्पकता भवेत् ।
तस्याप्यानुविधेयत्वे शब्दस्य न तदीयताम् ॥ ९ ॥
अज्ञात्वा व्यापृतेः कश्चित्प्रवर्त्तेताभिधावपि ।
न च शब्दमनुक्तेतद्व्यापारत्वं निरूप्यते ॥ १० ॥
स्वरूपवाचितातो ऽस्मिन्पक्षे ऽनिष्टा लिङां भवेत् ।
अस्तु तर्ह्यभिधानाख्यो व्यापारो ऽस्य प्रवर्त्तकः ॥ ११ ॥
तस्य ह्यर्थप्रतीत्याख्यकार्यकल्पस्य केवलम् ।
कल्प्यं प्रवृत्तिहेतुत्वं लिङ्वाच्यस्येति लाघवम् ॥ १२ ॥
शब्दान्तरगतार्थे ऽस्मिन्नभिधा स्यात्प्रवर्त्तिका ।
पक्षे ऽर्थतो विशेषश्चेत्स एव स्यात्प्रवर्त्तकः ॥ १३ ॥
न चास्या अभिधेयत्वाद्विशेषः कार्यतो गतेः ।
न युक्तं ह्यभिधेयत्वं सर्वासां हि प्रसज्यते ॥ १४ ॥
अथ प्रवर्त्तनात्वेन कार्यादनवबोधतः ।
तद्रूपेणाभिधेयत्वं तच्चान्यासु न विद्यते ॥ १५ ॥
तन्नास्या ह्यभिधानात्प्राक् चेत्प्रवर्त्तकरूपता ।
स्याद्व्यर्थमभिधेयत्वं नास्ति चेत्स्यादसत्यता ॥ १६ ॥
आज्ञादिस्तु न वेदार्थः पुंधर्म्मत्वेन युज्यते ।
अथ मानान्तराऽगम्यनियोगापरनामकम् ॥ १७ ॥
कार्यं लिङादिवाच्यं सत्स्वतन्त्रं स्यात्प्रवर्त्तकम् ।
तदप्ययुक्तमज्ञातसम्बन्धत्वाल्लिङर्थता ॥ १८ ॥
मानान्तराप्रमेयत्वे कार्यस्य हि कथं भवेत् ।
अथ स्वस्थस्वतन्त्रस्य पुंसो लिङ्श्रवणे सति ॥ १९ ॥
प्रवृत्तेरात्मदृष्टान्तात्कार्यधीहेतुतां शिशुः ।
अनुमाय लिङस्तत्र वाचकत्वं प्रकल्पयेत् ॥ २० ॥
कार्यं च वेदे षष्ठाद्यसिद्धान्तात्कामिनाऽन्वितम् ।
नियोज्येनात्मनः कार्यतया ज्ञातमिति स्थितम् ॥ २१ ॥
नियोज्यश्च स्वसंबन्धिकार्यबोधो ऽभिधीयते ।
काम्यमानाभ्युपायं च बुध्यते कार्यमात्मनः ॥ २२ ॥
कामी न च क्रिया तत्र क्षणिकोपायतां व्रजेत् ।
क्रियातो ऽन्यदतः कार्यं वेदे वाच्यमलौकिकम् ॥ २३ ॥
तत्रापूर्वस्य कार्यत्वं कृत्युद्देश्यत्वलक्षणम् ।

अयुक्तमपुमर्थत्वाद्व्यापारतया न च ॥ २४ ॥
अनुष्ठेयत्वरूपं न व्यापारत्वे स्वतन्त्रता ।
अव्यापारतया चास्मिन्नियोगो नावकल्पते ॥ २५ ॥
तेनात्मनि नियोक्तृत्वान्नियोग इति वाङ् मृषा ।
किं च नित्यनिषेधाधिकारेषु फलवर्ज्जनात् ॥ २६ ॥
क्रियातिरिक्तकार्यस्य कथं सिद्धिर्भवेत्तव ।
कृत्युद्देश्यत्वरूपं च कार्यत्वं चेत्प्रवर्तकम् ॥ २७ ॥
तद्रूपत्वात्फलस्यैव प्रसज्येत प्रयोक्तृता ।
तच्च कामपदोक्तत्वान्न लिङादिभिरुच्यते ॥ २८ ॥
लिङर्थस्य प्रयोक्तृत्वं ततश्चेष्टं न सिध्यति ।
नन्विच्छाजननेनान्यत्सर्व्वैरिष्टं प्रवर्त्तकम् ॥ २९ ॥
साक्षात्प्रवृत्तिहेतुत्वादतः सैव लिङोच्यते ।
तद्द्वारेण लिङर्थत्वात्फलं तेन प्रवर्त्तकम् ॥ ३० ॥
नैतद्युक्तं फलेच्छायाः पुंव्यापारतया पुमात् ।
अस्मिन्पक्षे प्रयोक्ता स्यात् प्रवर्त्यत्वात्स नेष्यते ॥ ३१ ॥
फलस्य प्रीतिरूपत्वं लिङुक्तं चेत्प्रवर्त्तना ।
फल एव प्रवर्त्तेत नान्यत्रातिप्रसङ्गतः ॥ ३२ ॥
अथाव्यापाररूपत्वात्प्रवृत्त्यविषयत्वतः ।
फलस्य साधने ऽङ्गावतारन्यायात्प्रवर्त्तते ॥ ३३ ॥
ततः साधनबोधात्प्रागप्रवृत्तेः प्रवर्त्तना ।
वरं साधनतैवास्तु न क्लेशात्प्रातिरूपता ॥ ३४ ॥
तस्याश्च कर्म्मधर्मत्वात्कर्मैव स्यात्प्रवर्त्तकम् ।
प्रवृत्तिविषयत्वाच्च न तद्युक्तं प्रवर्त्तकम् ॥ ३५ ॥
साध्यता फलधर्मो ऽथ लिङुक्तः सन्प्रवर्त्तना ।
नासौ पूर्वमसिद्धत्वात्प्रवर्त्तयितुमर्हति ॥ ३६ ॥
अथानुष्ठेयतारूपं कार्यत्वं स्यात्प्रवर्त्तकम् ।
ततो ऽर्थभावनैव स्यात्तद्रूपत्वात्प्रवर्त्तिका ।
सा चाख्यातान्तरे भावात्प्रवृत्तिव्यभिचारिणी ॥ ३७ ॥
कालसंबन्धतो ऽर्थानुष्ठेयत्वप्रतिबन्धनात् ।
तत्राप्रवृत्तिरित्येतत्किं स्यादिति निरूप्यताम् ॥ ३८ ॥
कृत्यात्मभावना या हि न कृतिव्याप्यतां विना ।
जन्यत्वं प्रागसिद्धत्वात्फलस्येवाप्रवर्त्तकम् ॥ ३९ ॥
अथानिष्पन्नरूपत्वं तदभावे ऽपि विद्यते ।
तस्मात्क्रियात्मकं कार्यमथ वा तत्फलात्मकम् ॥ ४० ॥

न ताभ्यामतिरिक्तं वा पूर्वमस्ति प्रवर्त्तकम्।
अत एवेष्टहेतुत्वं न तदेकार्थसङ्गतम् ॥ ४१ ॥
प्रवर्त्तकं नापि शुद्धं चन्द्रादौ व्यभिचारतः।
शुद्धस्य च लिङर्थत्वे कर्त्तव्यत्वात् प्रतीतितः ॥ ४२ ॥
भवेन्नाकरणे दोषो निष्कामेष्वपि कर्म्मसु।
न च द्रव्यगुणादीनां क्व चित्स्यादिष्टहेतुता ॥ ४३ ॥
प्रत्ययेन प्रकृत्यर्थान्वयिस्वार्थाभिधानतः।
कर्त्तव्यत्वविशिष्टस्य वाच्यत्वं तु न युज्यते ॥ ४४ ॥
कर्त्तव्यत्वाविनाभावात्तत्प्रतीत्युपपत्तितः।
नन्विष्टहेतुतामात्रं लिङ्गं तावन्निरूप्यते ॥ ४५ ॥
कस्येष्टमित्यपेक्षायामेकप्रत्ययवाच्यया।
कर्त्तुर्भावनयाक्षिप्तस्येत्येवं गमयिष्यते ॥ ४६ ॥
क्रियायां चाप्रवृत्तस्य कर्त्तृत्वानुपपत्तितः।
प्रवृत्तिविषयत्वारव्यं कर्त्तव्यत्वं प्रतीयते ॥ ४७ ॥
एवं तु वर्त्तमानापदेशे ऽप्येतत्प्रतीतितः।
कर्त्विष्टसाधनत्वस्य तदूबलेनैव कल्पनात् ॥ ४८ ॥
लिङाद्यवाच्यतापत्तेरप्रामाण्यं विधेर्भवेत्।
प्रवृत्तिविषयत्वं च नेच्छा विषयतां विना ॥ ४९ ॥
युक्तमिच्छाप्रवृत्त्योर्हि परशुच्छिदयोरिव।
भिन्नगोचरता म्याय्या न हेतुफलभावतः ॥ ५० ॥
अत एवेष्टहेतूनां स्वबुद्ध्या यो ऽयमिच्छति।
प्रवर्त्तते स तत्रैव नानिष्टे ऽपीष्टसाधने ॥ ५१ ॥
तेनेष्टसाधनत्वस्य सद्भावे ऽप्यप्रवृत्तितः।
प्रवृत्तिव्यभिचारित्वान्न प्रवर्त्तकतोचिता ॥ ५२ ॥
इच्छात्वव्यभिचारित्वाद्भवेत्पुंसां प्रवर्त्तिका।
स्वरूपसत्तामात्रेण न तु ज्ञानमपेक्षते ॥ ५३ ॥
अथापि ज्ञायमानासौ कारणं स्यात्तथापि तु।
स्वप्रत्यक्षैकगम्यत्वान्नाभिधानमपेक्षते ॥ ५४ ॥
एतत्सर्वं पूर्व्वपक्षी मनस्याधाय पृच्छति ॥ ५५ ॥

कथमिति। उत्तरमाह * इह हीति * अयमाशयः। स्वतन्त्र-पुरुषप्रवृत्तिर्द्विधा लोके दृश्यते। क्व चित्स्वेच्छयार्थेषु स्वार्थः प्रवर्त्तते क्वचिदन्यप्रेरितः आचार्यप्रेरितो ऽहं गामानयामि न स्वेच्छयेत्यादि-व्यवहारदर्शनात्। यद्यप्याचार्यादिरप्यनिच्छन्तं न शक्नोति प्रवर्त्त-यितुं तथापि स्वारसिकेच्छारहितमपि शिष्यादिकं स्वप्रवर्त्तनाबले-

नेच्छामुत्पाद्य प्रवर्त्तयतीति सर्वसाक्षिकं, तस्माच्छब्दश्रवणानन्तरभाविन्यां प्रवृत्तावाचार्यादेः प्रवर्त्तनाज्ञापनेन[1] प्रवर्त्तकत्वमवसीयते का पुनः प्रवर्त्तना प्रवृत्तिहेतुभूतः प्रवर्त्तयितुर्धर्मः[2] कश्चिदिति ब्रूमः । स्वातन्त्र्ये देवदत्त एवमां प्रवर्त्तयति न यज्ञदत्त इति व्यवस्थानुपपत्तेः प्रवर्त्तनाज्ञापनमात्रेण प्रवर्त्तकत्वे देवदत्तस्त्वां प्रवर्त्तयतीति प्रवर्त्तनाद्यज्ञदत्तस्यापि प्रवर्त्तकत्वप्रसङ्गः।सर्वत्र लोके पुरुषस्याचार्यादेः प्रवर्त्तयितुर्द्धर्म्मोऽहमेनं प्रवर्त्तयामीति प्रवर्त्तयितुर्म्मानसप्रत्यक्षवेद्यः प्रैषादिरूपो नापह्नोतुं शक्यते। वेदे तु पुरुषाभावेन लिङादेरेव प्रवर्त्तकत्वात्तद्धर्म्मो भविष्यति कथमज्ञातपूर्वेण प्रवर्त्तयितुर्द्धर्म्मेणाव्युत्पन्नो बालः प्रथमं लिङादेः संबन्धं गृह्णातीति चेत् । पश्य यदा बुभुक्षितस्य बालस्य रोदनेन स्तनदानप्रवर्त्तनां ज्ञात्वा स्तनदाने माता प्रवर्त्तते तदासौ तस्या मातुः प्रवृत्तेः कारणं जिज्ञासमानः कारणान्तरानुपलब्ध्या स्वप्रवर्त्तनायां कारणत्वं प्रकल्प्य गामानयेत्यादिवाक्यश्रवणानन्तरं प्रयोज्यवृद्धप्रवृत्तिं दृष्ट्वा मातृप्रवृत्तिदृष्टान्तेन तस्यामपि प्रवर्त्तनाज्ञानकारणकत्वमनुमाय तत्कारणजिज्ञासायां लिङादिशब्दश्रवणानन्तर्यात्तस्यैवान्वयव्यतिरेकाभ्यां प्रवर्त्तनाभिधानशक्तिं कल्पयन् केन वार्यते । तत्र च प्रैषादीनां विशेषाणां व्यभिचारित्वेनावाच्यत्वात्सर्वानुयायिनः प्रवर्त्तनासामान्यस्य वाच्यत्वे ऽवगते तद्विशेषावाकाङ्क्षायां प्रैषादीनां पुरुषधर्म्माणां वेदे ऽनुपपत्तेस्तद्विलक्षणं विशेषान्तरमभिधेयेन सामान्येन विधिप्रेरणानियोगाख्यं लक्ष्यते अतो गृहीतसंबन्धतया लिङादिवाच्येन प्रवर्त्तनासामान्येन तद्विशेषस्य प्रेरणाख्यस्य लक्षणायावगतिसम्भवात् संबन्धाग्रहणमदोषः । तस्य च प्रवर्त्तनासामान्यविशेषत्वेन हेतुना प्रैषादिदृष्टान्तेन प्रवर्त्तयितृधर्म्मत्वानुमानाद्वेदे च पुरुषाभावात् भावनादेश्च[3] प्रवृत्तिविषयत्वेन तदानीमसत्त्वात् प्रवर्त्तकत्वानुपपत्तेः। पारिशेष्याल्लिङादेरेव प्रवर्त्तकत्वावधारणात्तदीयत्वसिद्धेर्न लिङादिशब्दस्वरूपाभिधानापत्तिः । प्रवृत्तिविषयत्वस्य च श्रेयःसाधनत्वाक्षेपकत्वेन लिङादेः पुरुषार्थौपयिकत्वेनानुविधेयत्वात्प्रवर्त्तकत्वाव्याहतिः : कथं श्रेयःसाधनत्वाक्षेपकत्वमिति चेत् । पश्य प्रवर्त्तना तावत् प्रयत्नरूपभावनाविषया सर्वत्राधार्यते । गामानयेत्युक्ते गवानयने प्रयतमानस्य कुतश्चित्कारणद्गवानयनासिद्धावपि मदाज्ञामयं कृतवानित्याप्तुर्व्यवहारदर्शनात्

१ स्वप्रवर्तनाज्ञापनेनेत्यर्थः ।

२ प्रवर्तयितुर्धर्मइति २ पु० पा०

३ वृत्तेरप्यौपाधिकवृत्तिविषयत्वस्वीकारादित्यर्थः ।

इतो ऽपसरेतिचोक्ते स्वयमप्रयतमानस्य बलात्केनचिद्पसारितस्य जाते ऽप्यपसरणे नायं मदीयामाज्ञाकृतवानित्याक्षप्तुर्व्यवहारदर्शनात् । चेतनप्रवर्त्तकत्वाच्च प्रवर्त्तनायास्तस्य च प्रयत्नमन्तरेणान्यत्राप्रवृत्तेः प्रयत्नविषयत्वसिद्धिः । प्रयत्नश्चेच्छाकारणकत्वात् तां विना नोपपद्यते सा च स्वरसतः पुरुषार्थ एव स्वर्गपुत्रपश्वादौ भवन्ती साधनमन्तरेण तदसिद्धेस्तत्सिद्ध्यर्थं तत्साधने संक्रामेत् । तेन स्वयमपुरुषार्थस्य यागादेः पुरुषार्थसाधनत्वं विनेच्छाविषयत्वानुपपत्तेः प्रवृत्तिविषयत्वासम्भवेन तत्र लिङादेः प्रवर्त्तकत्वायोगात्तन्निर्वाहार्थं पुरुषार्थसाधनत्वाक्षेपकत्वसिद्धिः । न चैवं[2] पुरुषार्थसाधनत्वावगताविच्छात एव प्रवृत्तिसिद्धेः कारणकारणत्वेनान्वयव्यतिरेकयोरन्यथासिद्धत्वाल्लिङादीनामप्रवर्त्तकत्वं प्रसज्येतेति शङ्कनीयम् । न हि यत्सिद्ध्यर्थं यत्कल्प्यते तेनैव तदूबाधोचिता कल्पकाभावेनात्मोपमर्दप्रसङ्गात् । यथैव च श्रेयः साधनत्वाकल्पने प्रवर्त्तकत्वानिर्वाहात् तन्निर्वाहाय श्रेयः साधनत्वं कल्प्यते तथैवं स्वरूपेण यागादेः श्रेयः साधनत्वे सति इच्छयैव प्रवृत्तिसिद्धेर्लिङादीनां प्रवर्त्तकत्वानिर्वाहाद्विहितस्वरूपेण श्रेयः साधनत्वं कल्पयिष्यते । तथा च लोके ऽपि स्वाम्याज्ञामन्तरेण स्वेच्छया गवानयनादौ कृते ऽपि न तत्फलं वेतनं लभ्यते तस्मात्प्रवर्त्तकान्तरासम्भवे ऽपि प्रेरणाज्ञापनेन लिङादेर्वेदे प्रवर्त्तकत्वं सिद्धम् । सा च प्रेरणाप्रवृत्त्युत्पादकव्यापारत्वाद्भावनाशब्देन गीयते । भाव्योत्पादानुकूलस्य व्यापारस्य भावनात्वप्रसिद्धेः व्यापारत्वं च तस्याः सिद्धरूपत्वे निर्व्यापारायाः प्रवृत्त्युत्पादकत्वासम्भवेन ज्ञानस्य च ज्ञेयव्यापारत्वायोगाद्व्यापारान्तरकल्पनापत्तेर्गौरवपरिहारार्थं कल्प्यते प्रेषणाध्येषणादीनामपि पुरुषाशयविशेषाणामनेनैव न्यायेन व्यापारत्वाध्यवसानं द्रष्टव्यं व्यापारस्य च व्यापारवतो ऽत्यन्तभेदाभावाच्छब्दात्मिकेत्युक्तम् । एतामेव शब्दात्मिकां शब्दस्यात्मनो व्यापारं भावार्थाधिकरणे तत्रार्थात्मिकायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्मो ऽभिधात्मिका भावना विधिरित्युच्यतइत्य-

---

१ तदिति २ पु० ना० ।

२ इष्टसाधनताज्ञानस्येच्छाजनकत्वात् तद्द्वारैव वृत्तिरित्यर्थः ।

३ यथा श्रेयः साधनव्यतिरेकेण विधिना पुरुषो यागे प्रवर्तयितुं न शक्यते इति प्रवर्तकतानिर्वाहाय तत्कल्प्यते तथा प्रवर्तकत्वनिर्वाहाय विहितरूपेण श्रेयःसाधनत्वं कल्प्यिष्यते अन्यथास्वरूपे सति श्रेयःसाधने इच्छयैव प्रवृत्तेः प्रवर्त्यस्य फलाभावात् विधेः प्रवर्तकत्वं न स्यादित्यर्थः ।

नेन स्वयमेव विवरिष्यति । लौकिकानां प्रवर्त्तनाविशेषाणां पुरुषधर्म्मत्वेन शब्दात्मकत्वायोगात् वेदविषयत्वं शब्दभावनाया दर्शयितुमिहेत्युक्तम् । प्रवर्त्तनाविशेषशब्दभावनाविषयभूताथाः प्रयत्नरूपभावनायास्तत्फलप्रवृत्तिविषयत्वसिद्ध्यर्थं श्रेयोहेतुत्वाक्षेपकत्वायार्थशब्दाभिधेयार्थयितृचेतनधर्मार्थनापरम्पर्य्यायेच्छायोनित्वसूचनार्थमर्थात्मकत्वाभिधानमिति सर्वं मनोहरम् । ननु सत्यपि भावनाद्वये कयार्थवादानां ग्रहणमत आह * तत्रेति * अनेन च ग्रन्थेनार्थवादानामर्थभावनांशप्रतिपादकत्वे ऽपि तदनुष्ठापकशब्दभावनाङ्गत्वेनार्थभावनाख्यक्रियार्थत्वं दर्शितम् । कथं तया ग्रहणमत आह * सा हीति * सा शब्दभावना यस्मादेवं वक्ष्यमाणेन प्रकारेण प्रवर्त्तते अध्ययनविधिवशात्कार्यत्वेन प्रतीयते तस्मात्तदङ्गभूतस्य प्राशस्त्यज्ञानस्य तद्द्वारेण कार्यत्वावगमात् साधनापेक्षायामर्थवादानां तत्साधनतयाध्ययनविधिनैव विनियोगाद्दर्शपूर्णमासभावनयेव प्रयाजाद्यङ्गभूतद्रव्यदेवतादेः शब्दभावनया ग्रहणं युक्तमित्यर्थः । शब्दभावनायास्तु कार्यत्वाप्रतीतौ तद्द्वारेण प्राशस्त्यज्ञानस्य कार्यत्वानवगमात्साधनानपेक्षत्वेन स्वरसतो ऽसमर्थानामर्थवादानां लाक्षणिकप्राशस्त्यज्ञानार्थत्वायोगात् तादर्थ्येन तया सहग्रहणं न स्यादिति तमेव प्रकारं दर्शयति * स्वाध्यायाध्ययनविधिनेति * अध्ययनविधिना हि अधीतैरक्षरैर्यथाशक्ति पुरुषस्योपकर्त्तव्यमिति शक्त्यनुसारेणाक्षराणि विनियुञ्जानेन लिङादीनि सामर्थ्यात्प्रवर्त्तने विनियुञ्जन्ते तत्र चैषां प्रवर्त्तयितृपुरुषाभावेन स्वातन्त्र्यात्कर्तृत्वमवसीयते स्वतन्त्रकर्त्तुश्चानियुक्तस्य वैधविनियोगान्नियोज्यत्वं लिङादीनां कल्प्यते । नन्वस्तु नाम विधायकान्तराणामध्ययनविधिनियोज्यत्वं तस्य चात्मनि नियोगायोगेनात्मना नियोज्यत्वासम्भवात् तद्विषयविधायकान्तराभावाच्च तद्व्यापाररूपायाः शब्दभावनायाः कार्यत्वाभावात्प्रेरणाज्ञानजननमात्रेण कृतार्थतया प्रवृत्त्याग्राहकत्वाभावे सति तद्विषयभूतस्य वेदाध्ययनस्य पुरुषार्थानुबन्धित्वाक्षेपप्रमाणाभावाद्वेदस्यानर्थक्यं स्यादित्याशङ्कामपाकर्त्तुम् * स्वाध्यायपदोपात्तश्चात्मे * त्युक्तम् अयमभिप्रायः न तावदचेतनानां लिङादीनां स्वसम्बन्धिप्रेरणाबोद्धृत्वलक्षणं नियोज्यत्वं मुख्यं युज्यते प्रवृत्त्याग्राहकत्वं तु तेषां पुरुषार्थानुबन्धित्वायाध्ययनविधिना शक्त्यालोचनेन पुरुषो ज्ञाप्यते स्वारसिकेच्छारहितस्य चादरापरपर्य्यायग्रहकारित्वं नियोज्यस्यैव दृष्टमित्यौपचारिकमिह नियोज्यत्वम् । अर्थवादान्वयाय शब्दभावनाया विधेयत्वसिद्ध्यर्थं विवक्षितं तच्चाध्यय-

नविधावपि समानं तस्य च स्वरूपेण नियोक्तृत्वं स्वाध्यायपदोपात्तत्वरूपेण विधायकान्तरसाधारण्येन नियोज्यत्वमित्यौपचारिकभेदाश्रयणात् न विरुद्धमिति। भावयेदिति च विधिः प्रेर्यान्वयात् प्राग्विषयान्वयपक्षे लिङादिप्रेर्यान्वयवशेन व्यापारविशेषानवगमात्सामान्यविषक्षयोक्तम्। अत्र भाव्याकाङ्क्षायां यच्छक्यते तदित्यवधारणात् शक्तिप्रदर्शनपूर्वकं पुरुषप्रवृत्तेर्भाव्यत्वं दर्शयति * तत्रेति * येन लिङादीनां प्रवर्त्तकत्वे शक्तिः पुरुषस्य च प्रवर्त्यत्वे तेन कारणेन भावनाया भाव्याकाङ्क्षायां पुरुषप्रवर्त्तनं भाव्यत्वेन संबन्ध्यतइत्यर्थः। प्रवृत्तेः प्रयोज्यव्यापाररूपत्वात्प्रयोज्यान्वयं विना भाव्यत्वासम्भवाच्चेतनं प्रवर्त्तकत्वेन श्रेयस्साधनत्वाक्षेपपर्यन्तत्वसूचनार्थं पुरुषविशेषणं प्रेर्यान्वयपूर्वकविषयान्वयपक्षे तु प्रवर्त्तनाख्ये व्यापारविशेषे एव लिङादेः शक्त्यवधारणात्तत्रैव नियोगकल्पनायां किमंशापेक्षां पुरुष एव पूरयिष्यतीत्याह * अथ त्विति * लिङादिविषया क्रिया प्रवर्त्तयेदित्येवं विशेषरूपेणोच्यते विधेयतया प्रतिपाद्यतइत्येव योज्यं, नन्वचेतनत्वाल्लिङादीनां नियोज्यावगमपूर्वकप्रयोजककर्तृत्वानुपपत्तेः कथं तद्वशेन पुरुषप्रवर्त्तनस्य भाव्यत्वाभिधानमित्याशङ्क्याह * यद्यपि चेति * अध्ययनविधिना लिङाद्यध्ययने नियुज्यमानस्य पुरुषस्य कतमं ममोपकारं करिष्यन्तीत्यपेक्षायां प्रवर्त्तनाज्ञापनद्वारेण पुरुषार्थसाधनबोधरूपमिति सामर्थ्यालोचनेनावगतौ सत्यां प्रवर्त्तनाज्ञापनमात्रपर्यवसाने पुरुषार्थसाधनत्वाक्षेपायोगादनुपकारकत्वोपपत्तेर्मातापित्रादिवदाग्रहेणेष्टसाधनेषु कर्म्मसु प्रवर्त्तयिष्यन्तीति प्रवृत्त्या ग्राहकत्वावगतिर्भवति तेन लिङादिभिरवश्यं प्रवर्त्तनीय इति लिङादिविषयनियोगावगतिर्या पुरुषस्य भवति तां लिङादिषु उपचर्य प्रयोजकत्वव्यवहारो ऽयमित्यर्थः। न चैतत्स्वोत्प्रेक्षामात्रेणास्माभिर्लिङादीनां प्रयोजकत्वमुच्यतेकिं तु कर्तृवाचिण्वुलप्रयोगादन्यैरपि अभियुक्तैरङ्गीकृतमित्यवसीयतइत्याह * यदि चेति * करणाकाङ्क्षायां शक्त्यालोचनेन प्रेरणाज्ञानस्यान्वयं दर्शयति * अथेति * विधेरलौकिकत्वेन लिङादिप्रतिपाद्यत्वासम्भवमाशङ्क्य प्रवर्त्तनासामान्येन पूर्वोक्तरीत्या सम्बन्धग्रहणसम्भवात् लिङाद्याभिहितेन लक्षणया तत्प्रतिपादनसम्भवप्रदर्शनार्थं पूर्वसम्बन्धानुभवापेक्षणेत्युक्तम्। इतिकर्त्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानस्यान्वयं दर्शयति * कथमिति * ननु विधिज्ञानमात्रेण प्रवृत्तिसिद्धेरन्यानपेक्षत्वात्कथमित्यपेक्षाप्रदर्शनमयुक्तम्। अथापि भावनान्तरह-

१ विधिज्ञानं संबन्धज्ञानं तयोरित्यर्थः।

दृष्टान्तेनात्रापि कथम्भावाकाङ्क्षा स्यात् । तथापि विधिसम्बन्धज्ञानयोरेव कारणतिकर्त्तव्यतात्वसम्भवात्प्राशस्त्यज्ञानस्याज्ञातशक्तिकस्येतिकर्त्तव्यतात्वाभिधानमयुक्तमित्यभिप्रायद्वयेन पृच्छति * कुत एतदिति * एतत्कथमित्यपेक्षणं प्राशस्त्यज्ञानस्य चानुग्राहकत्वं कुत इत्यर्थः । उत्तरम् * बुद्धिपूर्वेति * विध्यन्यथानुपपत्त्ये[1] इष्टसाधनत्वावगमात् प्रवृत्तिहेत्विच्छोत्पत्तावपि द्रव्यव्ययायासदर्शनेनापि अनिष्टसाधनत्वावगमात्प्रवृत्तिप्रतिबन्धकालस्य हेतुद्वेषसम्भवे प्रवृत्त्यभावप्रसङ्गात्तदपनायकापेक्षायां प्राशस्त्यज्ञानस्य लोके तदपनयशक्तत्वेन दर्शनाद्युज्यते ऽनुग्राहकत्वमित्यभिप्रायः । उत्तभ्नातीत्यनेन प्रतिबन्धकापनायकत्वं दर्शितम् । ननु प्रवृत्तिकारणेच्छाविरोधिद्वेषनाशाय प्राशस्त्यज्ञानापेक्षणे फलांशे ऽपि तदपेक्षोपपत्तेः स्वर्गस्वरूपप्रतिपादकानामपि वाक्यशेषाणां प्राशस्त्यपरत्वेन स्वरूपपरत्वाभावप्रसङ्गात् न लौकिकसुखातिरिक्तस्वर्गसिद्धिः स्यादित्याशङ्क्याह *तच्चेति* अयमभिप्रायः अङ्गप्रधानयोरेवं[2] विषयत्वात्प्रेरणाविषयएव प्राशस्त्यज्ञानस्य कार्यत्वावगतेः फलांशे च स्वारसिकेच्छात एव प्रवृत्तिसिद्धेरानर्थक्यप्रसङ्गात्, प्रेरणानुपपत्तेः प्राशस्त्यज्ञानस्य कार्यत्वाभावात्, साधनानपेक्षत्वेनार्थवादाग्रहणात्स्वर्गसाधनतो विध्यपेक्षितस्वर्गस्वरूपप्रतिपादनार्थानां वाक्यशेषाणां प्राशस्त्यपरत्वाभावात्स्वरूपे प्रमाण्यं न विरोत्स्यत इति । क्व तर्हि प्राशस्त्यज्ञानस्य साधनापेक्षेत्यत आह * साधनेति * साधनेतिकर्त्तव्यताविषये प्राशस्त्यज्ञानस्य साधनभूतशास्त्राकाङ्क्षायामपि फलपदादिभिरेवं[3] तत्सिद्धिसम्भवात्कथमर्थवादानां तादर्थ्येन शब्दभावनया ग्रहणमित्याशङ्क्य यथासम्भवं साधनान्तराणि निराकर्त्तुमुपन्यस्यति * तत्पुनरिति * तत्प्राशस्त्यप्रतिपादनं केन शास्त्रेण क्रियतेत्यर्थः । निराकरोति * तत्रेति * दूषणगुणोपन्यासार्थस्तत्र शब्दः । ननु यद्यन्यार्थत्वे प्राशस्त्यार्थत्वं न युज्यते प्राशस्त्यार्थत्वमेव केवलमस्त्वत आह * विध्युत्तरेति * पूर्वोपेक्षितार्थत्यागो न युक्त इत्यभिप्रायः[4] कारणान्तरमाह * लक्षणया चेति * फलाभावापत्तेरपि प्राशस्त्यार्थत्वं न युक्तमि-

---

१ इच्छोत्पादनद्वारा प्रवर्तकत्वम् इच्छा चेष्टसाधनत्वज्ञान विना न संभवतीति अनुपपत्तिशब्दार्थः ।

२ अङ्गप्रधानयोरेव विधिविषयत्वात्र फलांशस्य विषयत्वमित्यर्थः ।

३ आदिशब्देनाहवनीयपरिग्रहः यस्मादेतत्फलकमेतदेवताक तस्मात्प्रशस्तमित्यर्थः ।

४ साध्यसाधनेतिकर्तव्यताविशिष्टाया भावनाया सङ्घायामेवोद्देश्यत्वमतस्तत्र पूर्वमेव फलत्यागानन्वयइत्यर्थः ।

त्याह * युगपच्चेति * ननूभयपरत्वायोगात् फलादिषु तात्पर्याभावेऽपि प्रतीयमानत्वात्फलादीनां सिद्धिः स्यादत आह * न हीति * वक्ष्यतइत्यपाप्लोकश्रवणादीनां प्रशंसार्थत्वेनोपात्तानां फलत्वाभावः पर्णमय्यधिकरणे जर्तिलयवाग्वा वा जुहुयादित्यादौ लिङ्गे विधित्वाभावो जर्तिलयवाग्वादेश्चेतिकर्त्तव्यत्वाभावो दशमे वक्ष्यमाणः परामृष्टः । यत एवोक्तप्रकारेण प्राशस्त्यपरत्वे फलाद्यभावः प्रसज्यते अत एवानन्यलभ्यफलादिपरत्वावधारणान्नार्थात्प्रतीयमानेऽपि प्राशस्त्ये फलपदादीनां तात्पर्यमित्याह * अत एवेति * एतदेव दृष्टान्तद्वारेणोपपादयितुमाह * न हीति * धावनक्रियैवानिष्पन्नरूपत्वात्कार्यशब्देनोक्ता न तेनान्वीयन्तइत्यर्थः दार्ष्टान्तिके योजयति * तद्वदिति * इच्छाविरोधिद्वेषनाशवाचिना प्ररोचनाशब्देन तद्धेतुभूतगुणातिशयवत्त्वलक्षणं प्राशस्त्यं लक्षणया व्युत्पत्त्या वोक्तम् । ननु यथा प्रतितिष्ठन्ति हवा य एता रात्रीरूपयन्तीत्यादीनां प्राशस्त्यपराणामप्याकाङ्क्षितफलसमर्थकत्वमङ्गीकृतं तथा भूतिकामादिशब्दानां फलादिपराणामप्याकाङ्क्षितप्राशस्त्यसमर्थकत्वमपि कस्मान्न स्यादित्याशङ्क्याह * अन्यथानुपपत्त्या चेति * प्रकारान्तरेण फलप्रतीत्ययोगादगत्या तत्र तथाङ्गीकृतम् । न चेहागतिरस्तीत्यभिप्रायः । नन्वर्थवादानां स्वरसतः प्राशस्त्यप्रतिपादनशक्त्यभावात् इहापि सर्वप्रमाणाप्रत्यस्तमयादगतिः समानेत्याशङ्क्याह * प्रमाणाभावश्चेति * स्वरसतोऽशक्तावपि लक्षणया तत्प्रतिपादनशक्तिसम्भवान्न प्रमाणाभावनिश्चय इति भावः। नन्वेवं तर्हि वसन्ताय कपिञ्जलानालभतइत्यादावपि अर्थवादाकाङ्क्षा प्रसज्येतेत्याशङ्क्याह * तद्यदीति * अतिदेशग्रहणं तस्योक्तो बन्धुस्तस्योक्तं ब्राह्मणमित्यादिवाचनिकातिदेशविषयं द्रष्टव्यम् । श्रुतविध्यन्यथानुपपत्त्यैव प्राशस्त्यकल्पनोपपत्तावसन्निहितार्थवादातिदेशकल्पने प्रमाणाभावात्कल्पने वा वसन्तादिवाक्येष्वपि अग्नीषोमीयप्रकृतित्वेन तदीयार्थवादतिदेशसम्भवाद्विध्युद्देश्यशक्तिद्वयकल्पनं निरवकाशमेव स्यात् * दर्विहोमन्यायेनेति * यथा दर्विहोमेषु भिन्ने जुहोतीत्यादिजुहोतिचोदनविहितेष्वविहितेतिकर्त्तव्यताकेष्वपि प्रकृतिविशेषानिर्द्धारणान्नियतविध्यन्तातिदेशानुपपत्तेर-

---

१ ननु कथं चिच्चोदनलिङ्गानुमितवचनादेवार्थवादातिदेशकल्पना भविष्यत्यत आह प्रमाणाभावादिति अयं भावः काल्पनिकातिदेश्यस्यार्थभावनेतिकर्त्तव्यतानिदेशकल्पकत्वात् अर्थवादानां च प्राशस्त्यप्रतिपादनेन शब्दभावनेतिकर्त्तव्यताङ्गत्वेन तदंशाप्रतिपादकत्वादिति प्रत्यक्षवचनस्य निर्विषयत्वं च स्यादित्यपि बोद्धव्यम् ।

नियमसर्वातिदेशयोश्चाष्टमाधे निराकृतत्वादपूर्वत्वेनाष्टमान्ते वक्ष्यमाणेषु यावच्छ्रुतस्य द्रव्यदेवतादेरितिकर्त्तव्यताजातस्य सन्निपत्योपकारित्वेन नियमापूर्वद्वारा करणपूर्वोत्पत्तिमात्रे पर्यवसायितया ऽन्यत्रावधारितस्याप्यगत्यारादुपकारकाङ्गसाध्यकरणानुग्रहसाधनत्वमपि कल्पितम् । तथा वसन्तादिवाक्येष्वपि विधायकस्यैव करणभूतविधेयज्ञानोत्पत्तिमात्रपर्यवसायितयान्यत्रावधारितस्याप्यगत्याङ्गभूतप्राशस्त्यज्ञाने ऽपि व्यापारः कल्पयिष्यतइत्यर्थः । लक्षणया प्रेरणापरनामधेयस्य विधेः प्रतिपादनात्प्राशस्त्यस्य चान्यथानुपपत्त्याक्षेपाच्छक्तिशब्दो व्यापाराभिप्रायो व्याख्येयः । अर्थवादाभावे ऽपि विधेरेव स्वानुग्राहकप्राशस्त्याक्षेपकत्वं युक्तं न तु फलेतिकर्त्तव्यतापदानां कथं चिदित्येवकारेण सूचितम् । योजना त्वेवं यस्मात्सर्वप्रकारं प्रयतमानस्य यः प्रमाणाभावस्स प्रमाणं तस्माद्यदि केन चिदन्येन प्ररोचनां न लप्स्यामहइति । कथं चित्त्वन्यतः प्ररोचनालाभसम्भवे ऽन्यत्रोपयुक्तस्य विधायकस्य तदाक्षेपकत्वायोगाद्वायव्यादिवाक्येषु प्राशस्त्यज्ञानस्य साधनापेक्षा युक्तेत्याह * अथ त्विति * केन चिल्लक्षणयापि प्रतिपादकेन दूरस्थेनातिदेशिकेनापि यदि प्ररोचना सेत्स्यतीत्यर्थः । नन्वेवं प्राशस्त्यप्रतिपादनस्य साधनभूतप्राशस्त्यशास्त्रापेक्षायामप्यर्थवादानां तत्र शक्त्यनवधारणात्कथं तादर्थ्येन शब्दभावनया ग्रहणमित्याशङ्क्याध्ययनविध्यालोचनेनैवेषां प्राशस्त्यपरत्वं दर्शयितुमाह * तथेति * यथालभेतेतिविधिः स्वविषयप्राशस्त्यप्रतिपादकं प्रति साकाङ्क्षस्तथाघायुर्वै क्षेपिष्ठा देवतेत्याद्यपि प्रतिपाद्यमर्थं प्रति साकाङ्क्षमेवेति यस्तेन भूतान्वाख्याननरूपेण वाक्यार्थेन लक्ष्यमाणः प्राशस्त्यरूपो ऽर्थः सो ऽर्थवादप्रतिपाद्यत्वेन स्वाध्यायाध्ययनविधिना परिगृह्यतइत्यन्वयः । प्राशस्त्यस्यार्थवादप्रयोजनत्वे योग्यतां दर्शयितुमनन्तरप्रवृत्तेत्याद्युक्तम् । विधिसंबन्धद्वारा चेत्प्राशस्त्यस्य पुरुषार्थानुबन्धित्वं तर्ह्यर्थवादानां विधिनैव साक्षात्प्रतिपादकलक्षणः संबन्धो ऽस्तु किमन्तरा प्राशस्त्येनेत्याशङ्क्य यच्छक्यत इत्याद्युक्तम् । न तावल्लिङादिवत्तस्य विध्यभिधाने शक्तिरस्ति, न च प्राशस्त्यलक्षणया श्रुतविध्यैकवाक्यत्वसंभवे वाक्यभेदापादकप्राशस्त्यं विना विध्यनिर्वाहात् प्राशस्त्यलक्षणावश्यंभावेन गौरवापादकमश्रुतविध्यन्तरकल्पनं युक्तमित्याशयः शक्त्यभावाच्चेन्न साक्षाद्विधिना संबन्धस्ततो ऽक्षरग्रहणएव साक्षा-

१ ननु केवलार्थवादानां वाक्यत्वाभावाद्वाक्यार्थेनेत्ययुक्तम् । सत्यं वाक्यार्थेनेत्यस्यायमर्थः अर्थवादस्थानि यैः पदार्थैर्वस्त्वतइति ।

क्यस्य पर्यवसानप्रसङ्गाद्वाक्यार्थपर्य्यन्तमगमनात् कथं तेन प्राशस्त्यलक्षणा स्यादित्याशङ्क्याऽपुरुषार्थत्वेन वेत्याद्युक्तम् । अक्षराणामादिरादानं ग्रहणमक्षरादिशब्देनोक्तम् । तत्रैव तर्हि श्रौततात्पर्यावसानमस्त्वित्याशङ्क्योक्तम् * तत्रापि त्विति * साकाङ्क्षानुरूपेत्यादिना लक्षणाप्रकारो दर्शितः । अयं चोभयाकाङ्क्षालक्षणत्वात्प्राशस्त्यार्थवादयोः प्रतिपाद्यप्रतिपादकत्वसंबन्धः समञ्जस एवेत्याह * सोऽयमिति * एवं चास्मिन्सन्निकृष्टे संबन्धे संभवति विधायकार्थवादयोः प्राशस्त्यविध्याकाङ्क्षित्वेऽपि प्राशस्त्यविध्योरर्थवादविधायकप्रतिपादितत्वेन प्रतिपादकानाकाङ्क्षत्वादन्यतराकाङ्क्षालक्षणत्वेन च विप्रकृष्टः प्राशस्त्यविधायकयोर्विध्यर्थवादयोर्वा प्रतिपाद्यप्रतिपादकसंबन्धो न युक्त इत्याह * एवं चेति * विधायकोपयोगं प्रसङ्गाद्वक्तुं न चार्थवादैरित्याद्युक्तम् । दृष्टान्ततया वा । नन्वेवमप्यन्यतरेणोभयकार्यासिद्धेरुभयाम्नानानर्थक्यमत आह * आम्नानेति * उभयोरित्यर्थवादैरेव प्ररोचितं विधायकैरेव विहितं सदनुष्ठितं फलं साधयतीति अध्ययनविधिरेव कल्पयिष्यतीत्याभिप्रायः उभयोरित्यर्थवादप्ररोचनयोरित्यर्थः । एतमेव न्यायं निन्दार्थवादेष्वतिदिशति * एतेनेति * तत्रापि निषेधान्यथानुपपत्त्यानिष्टसाधनत्वबोधान्निवृत्तिकारणाप्रीतिसम्भवेऽपि तादात्विके[2]ष्टसाधनत्वावगमान्निवृत्तिप्रतिबन्धकोत्साहकारणेच्छाप्रसङ्गे निवृत्त्यभावापत्तेरप्रीतिविरुद्धेच्छानाशाख्यप्रद्वेषोत्पादनशक्तत्वेन दोषातिशयत्वलक्षणप्राशस्त्यज्ञानस्य लोकेऽपि दर्शनान्निवृत्तिफलाया नञ्लिङादियुक्तशब्दभावनाया निवारणापरनामधेयनिषेधज्ञानात्मककरणानुग्राहकत्वं तावदवसीयते तत्र च साधनापेक्षायां पूर्वोक्तेनैव प्रकारेण सोऽरोदीदित्येवमादीनामध्ययनविधिबलात्साधनत्वावगतेस्तादर्थ्येन शब्दभावनया ग्रहणमनुसन्धेयम् । अप्रशस्तप्रत्ययाधीनोत्पत्तिरस्येति विग्रहः प्रशस्तग्रहणं दृष्टान्तार्थम् । तस्मादध्ययनविधिबलेनार्थवादानां पुरुषार्थानुबन्धित्वाय लाक्षणिकस्तुतिनिन्दापरत्वावधारणारूपभङ्गेनैकवाक्यतासिद्धेति पूर्वाक्षिप्तैकवाक्यतासमर्थनोपयोगित्वं, तदुच्यते इत्यारभ्याध्ययनविधिव्यापारचर्चात्मकस्य वार्त्तिकखण्डकस्य दर्शयति * अतश्चेति * समभिव्याहारवशात्पूर्वमेवावगतस्यैक-

---

१ अन्यतरेति विधायकस्य प्राशस्त्याकाङ्क्षायामपि प्राशस्त्यस्य तदनाङ्क्षत्वात्तस्यार्थवादैरेव प्रतिपादितत्वात् । एवमर्थवादानांविध्याकाङ्क्षासत्वेऽपि न विधेस्तदाकाङ्क्षा विधयकेनैव विधिप्रतिपादनादित्यर्थः ।

२ तदात्वे सत्वं तादात्विकं तात्कालिकमित्यर्थः ।

वाक्यत्वस्य परस्परानिरपेक्षत्वेनानुपपत्तिप्रतिभासे ऽध्ययनविधि-सामर्थ्यावधारितस्तुतिनिन्दापरत्वेनार्थवादानां विधिनिषेधग्रहणा-न्निर्वाहः क्रियतइति * सिद्धिग्रहणेनोक्तम् * नन्वध्ययनविध्यव-धारितपुरुषार्थपर्यवसायित्वात्तेनैव स्तुतिनिन्दापरत्वावसायात्किमि-ति महता प्रयासेनैकवाक्यत्वं साध्यते ऽत आह * नित्यं चेति * विधिनिषेधापेक्षावशाल्लक्षणाया स्तुतिनिन्दापरत्वं स्वरसतो ऽप्रती-यमानमपि कल्प्यते तदभावे तु प्राशस्त्याप्राशस्त्यलक्षणाकारणाभा-वात्सिद्धवत् कीर्त्तनान्यथानुपपत्त्या ताभ्यामेव तमग्नीषोमीयमेका-दशकपालं पूर्णमासे प्रायच्छदित्यादिवद्विधिकल्पनेनैव पुरुषार्थप-र्यवसानसिद्धेरित्याशयः । वाक्यशेषग्रहणेन स्वातन्त्र्ये सति स्तु-तिनिन्दानिर्णयहेतुत्वाभावं दर्शयति तत्र कारणमाह * न हीति * अव्यवस्थामुपपादयति * निन्दारूपास्विति * अविधेयनिन्दात्वे-नाभासमानासु परमार्थता निन्दाविपर्ययविधेयस्तुतित्वदर्शनाद्विधे-यनिन्दात्वेनाविधेयस्तुतित्वेन चाभासमानानां परमार्थतस्तद्विपर्यय-केवलविधेयस्तुतित्वदर्शनादित्यर्थः । यथाक्रममुदाहरणद्वयमाह * यथेति * प्रातः प्रातरनृतं ते वदन्ति पुरोदयात् जुह्वति ये ऽग्निहोत्रमित्यनुदिते होमनिन्दात्वेनाभासमानापि तस्मादुदिते होत-व्यमिति विध्येकवाक्यत्वात् स्तुतिरेवेति शाखान्तराधिकरणे भा-ष्यकारो वक्ष्यति। दशमे च त्रैयम्बकान्पुरोडाशान्प्रकृत्य पठितमभि-धार्याख्यम्बका नाभिधार्या इति मीमांसते यदभिधारयेद्रुद्रायास्ये प-शून्निदध्याद्यन्नाभिधारयेन्न रूद्रायास्ये पशून्निदध्यान्न सूक्ष्ममभिधार्या एव न ह्यनभिघृतं हविरस्तीति वाक्यमुदाहृत्य चिन्तयिष्यते । कि-मभिधार्यानभिधार्या इति विधिप्रतिषेधार्थता उत नेति । तत्र हिंस्र-रुद्रास्ये पशुनिधानापादकत्वेनाभिधारणस्य निन्दितत्वादनभिधारणस्य च तदनापादकत्वेन स्तुतत्वान्निषेधावगतेर्न ह्यनाभिघृतं हविरस्तीति च हविः सम्पादकत्वेनाभिधारणस्य स्तुतत्वाद्विध्यवगतेर्विकल्पे प्राप्ते ऽभिधास्यते मीमांसासमाभिव्याहारेण विधिनिषेधशक्तिप्रतिब-न्धादभिधारणाभिधारणनिन्दास्तुत्योश्चाभिधार्या एवेति विध्येकवा-क्यत्ववशेनाभिधारणस्तुतिपर्यवसायित्वावधारणान्न वाक्यभेदापा-दकं विधिप्रतिषेधार्थत्वं युक्तमिति । तत्र कथमभिधारणस्तुति-रित्यपेक्षिते वक्ष्यते इत्थमभिधारणं प्रशस्ततरं यत्त्रैयम्बकानां दर्विहोमत्वेनापूर्वत्वादतिदेशतो ऽप्राप्ते मीमांस्यमाने दोषो ऽप्येवं विधो ऽनभिधारणस्य च गुणो न गण्यते हविः स-म्पादकत्वेन गुणवत्तरत्वादिति । न केवलं स्वातन्त्र्ये ऽन्यथाप्र-

तिभानादव्यवस्था किं तु सन्देहादपीत्याह * सन्दिग्धेति * तत्राप्युदाहरणमाह * यथेत * यथोक्तं नवमे यद्दचा स्तुवते तदसुरा अन्ववायन्यत्साम्ना स्तुवते तदसुरा नान्ववायन्यं एवं विद्वात्साम्ना स्तुवीतेत्युदाहृत्य किमृचा स्तुवत इति च विधानार्थमुत साम्ना स्तुवीतेत्येतद्विहितसामस्तुत्यर्थमिति चिन्तायिष्यते । तत्र य एवं विद्वान्साम्ना स्तुवीतेत्यस्य कर्तृप्रवृत्त्यनुवादियच्छब्दयोगेन य एवं विद्वान्पौर्णमासीं यजतइत्यादिवद्विधिशक्तिप्रतिबन्धादित्तरयोस्तु क्रियास्वरूपमात्रानुवादियच्छब्दयोगेन यदाग्नेयोऽष्टाकपाल इत्यादिवद्विधिशक्त्यप्रतिबन्धादुभयविधिवशाद्विकल्प इति पूर्वपक्षिते कथमसुरागमननिमित्तत्वेन निन्दिताया ऋचो विधिः इत्याशङ्क्य भाष्यकारो वक्ष्यति । न वयं निन्दितानानन्दितान्वासुरान्विदूम इति भाष्यकारोक्तं सन्देहमुपपादयति * कदा चिदिति * सिद्धान्ते विध्येकवाक्यतावशेनैव निर्णय इत्याह * तत्रेति * स्तुवीतेतिप्रत्यक्षस्य विधेर्यच्छब्दयोगेऽपि प्राप्त्यभावेन य एवं विद्वान्सामेन यजेतेतिवद्विधिशक्त्यप्रतिबन्धादितरयोस्तु वर्त्तमानापदेशत्वेन विध्यशक्तेरेकवाक्यत्वसम्भवे वानेकादृष्टानुबन्धिवाक्यभेदापादकविधिद्वयकल्पनायोगात्सामविध्येकवाक्यत्ववशेन सामस्तुत्यर्थमृचां निन्देति सिद्धान्ते निर्णय इत्यर्थः । ननु वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिङ्गमयतीत्यादीनां यो बर्हिषि रजतं दद्यात्पुरास्य संवत्सराद् गृहे रोदनं भवतीत्यादीनां च पदानां स्वरसतो भूतान्वाख्यानार्थानामपि लाक्षणिकस्तुतिनिन्दार्थत्वसम्भवेन विधिनिषेधैकवाक्यताव्यवसायात्तात्पर्यनिर्णयो भवतु परिशिष्टानां वायुर्वै क्षेपिष्ठा देवतेत्यादीनां सो ऽरोदीत्येवमादीनां च लक्षणयापि स्तुतिनिन्दार्थत्वाऽप्रतीतेर्विधिनिषेधैकवाक्यत्वासम्भवात्कथं तद्वशेन स्तुतिनिन्दापरत्वनिर्णयो ऽत आह * सर्व्वत्र चेति * तेषामपि स्तावकनिन्दकपदैकवाक्यत्वेन स्तुतिनिन्दार्थत्वसम्भवात्तद्द्वारेण विधिनिषेधैकवाक्यत्वोपपत्तेः स्तुतिनिन्दापरत्वनिर्णय इत्यर्थः । यत्र तर्हि न किं चिदपि पदं स्तावकं निन्दकं वोपलभ्यते आपो वै शान्ता इत्यादिषु तत्र पारम्पर्येणापि विधिनिषेधैकवाक्यत्वासम्भवात्कथं स्तुतिनिन्दापरत्वनिर्णयो ऽत आह * यत्रापीति * तत्रापि वेतसशाखयावकाभिश्चाग्निं विकर्षतीत्यादिविधिसन्निधिवशेन लक्षणया तद्विधेयवेतसावकास्तुतिप्रतीतेर्लक्षितलक्षणया वा विकर्षणस्तुतिप्रतीतेर्विध्येकवाक्यत्वात्तात्पर्यनिर्णय इत्यर्थः । यद्वैतदूफक्किकाद्वयमेकवाक्यत्वाभिधानोपयोगप्रतिपादनपरतयैव व्याख्येयं विधिनिषेधैकवाक्य-

स्वाभावे केषु चित्पदेषु कथं चित्स्तुतिनिन्दाप्रतीतावस्यानर्थक्येनोपपादनानपेक्षत्वात्परिशिष्टानां पृथग्वाक्यत्वेन स्वरूपमात्रेण पर्यवसानं स्यात्तादृक् पदाभावे च स्तुतिर्वा निन्दा वा शङ्खस्यैव न केवलस्यैव स्यादिति । ननु विधिनिषेधयोः स्तुतिनिन्दापेक्षायां तदभावे वसन्तादिवाक्येषु साकाङ्क्षत्वादप्रामाण्यं स्यादत आह*विधीति * विधिप्रतिषेधयोर्मध्ये ऽन्यतरदर्शनेन स्तुतिनिन्दयोर्मध्ये ऽन्यतरदनुमायेत्यर्थः। एवं वैदिकार्थवादोपयोगं व्युत्पाद्य स्मृत्यधिकरणवक्ष्यमाणप्रामाण्यविद्यास्थानान्तरगतेष्वर्थवादेषु तमेव न्यायमतिदिशति * एवं चेति * इतिहासपुराणयोरर्थवादबहुत्वाद्भारतादीत्युक्तं, नन्वध्ययनविधिबोधितपुरुषार्थानुबन्धित्वबलेन वैदिकार्थवादानां श्रौतार्थातिक्रमेण लाक्षणिकस्तुतिनिन्दापरत्वमवधारितमत्र तु कथमित्युशङ्क्याह्याप्यध्ययनविधिस्थानीयं विधिं दर्शयति * तेषामपि हीति * एतया निषादस्थपतिं याजयेदित्यादिवत् प्रयोज्यव्यापारत्वमभिप्रेत्य श्रावणविध्युपन्यासः धर्म्मादीनां साध्यानां साधनप्रतिपत्तिरिति विग्रहः धर्मादिचतुष्टयसाधनप्रतिपत्तिरूपादानाङ्गभूताऽधर्म्मादिचतुष्टयसाधनप्रतिपत्तिः परित्यागाङ्गभूतेति योज्यं भारतोपक्रमे ।

धर्म्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदि हास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिद् ।

इति जनमेजयस्य भारतश्रवणप्रवृत्तिसिद्ध्यर्थं धर्म्मादिचतुर्विधपुरुषार्थतत्प्रतियोगिशब्दसूचिताधर्म्मादिसाध्यसाधनप्रतिपादनपरत्वाभिधानात्सर्वत्र यथासम्भवं तत्परत्वमुन्नेयमिति भावः । ननु विधिनिषेधशून्यानां बहुशो भारतादिषु दर्शनात्कथं पुरुषार्थपर्यवसानकल्पनमित्याशङ्क्य यथासम्भवं विभज्योपयोगं दर्शयितुमाह * तत्रापि त्विति * शङ्कानिरासार्थस्तु शब्दः । दानराजमोक्षाणां धर्मा इति द्वन्द्वगर्भः षष्ठीसमासः दानस्येतिकर्त्तव्यताभूतो धर्म्मो राज्ञो ऽनुष्ठेयः मोक्षस्य साधनमादिशब्देन तपो ब्राह्मणाभ्युदयादिसंबन्धिधर्मोपादानम् । अनेन च ग्रन्थेन तत्सन्निधिपठितानामुपाख्यानानां तत्तद्विधिशेषत्वेनोपयोगो दर्शितः । विध्यश्रवणे ऽप्येकानेककर्तृकत्वचरित्रकथनात्मकपरकृतिपुराकल्परूपेण यस्मात्पूर्वैर्महात्मभिरेवं कृतं तस्मादन्यैरपि कर्त्तव्यमिति विध्यनुमानात्तच्छेषत्वेनार्थवादतयोपयोगो भविष्यतीत्याह * के चित्पुनरिति * किमित्येवं

---

१ आनर्थक्यनेति विध्येकवाक्यत्वाभावेन स्तुतेन स्तोपपादकार्थवादपदान्तरानपेक्षत्वात् तदन्यतिरिक्तानां पदानां पृथग्वाक्यत्वम् ।

क्रेशाङ्कीकरणमत आह * सर्वोपाख्यानेषु चेति * अन्वपरत्वादेव स्वार्थसत्यत्वमनाशङ्क्यामित्याह * तत्परत्वाच्चेति * ननु वेदस्यापौरुषेयत्वेनाप्तप्रणीतत्वाद्यथाम्नातस्य न्यायबलेन तात्पर्यकल्पनं युक्तं भारतादौ त्वसत्योपाख्यानप्रणेतॄणां मूढत्वं विप्रलम्भकत्वं वा प्रसज्येतेत्याशङ्क्याविवक्षितोपाख्यानविस्तरप्रणयने कारणमाह * वेदप्रस्थानेति * एवमपि प्रक्रियामात्रत्वाद्बुद्धिपूर्वकारिता स्यादत आह * प्रतिपाद्यानां चेति * विचित्रबुद्धित्वमेव दर्शयति * इहेति * नन्वेवमपि केषां चित्प्रतिपत्तिसिद्धौ शास्त्रप्रणयनार्थवत्त्वोपपत्तेरलं महता प्रबन्धेनेत आह * सर्वेषां चेति * न चासत्योपाख्याप्रणेतृत्वेन व्यासादीनामप्रत्यापितत्वाशङ्क्या धर्म्मादिविषयाणां विधिप्रतिषेधानां केषां चिच्छ्रुतिमूलत्वदर्शनेनार्थादिविषयाणां च प्रमाणान्तरमूलत्वेनाप्तत्वावधारणादित्याह *तत्रेति * आदिशब्देनानर्थदुःखोपादानं न चोपाख्यानेष्वपि तेषामसत्यवादित्वं बहूनां वेदलौकिकमूलत्वात्स्वोत्प्रेक्षितानामपि काव्यवत् लोकरञ्जनार्थत्वेन विप्रलिप्साभावादित्याह * तथेति * ननु धर्म्मादिविषयाणां स्मृतीनां वेदैकशरणत्वात् प्रामाण्यं स्यात्तद्वतानामवेदमूलानामर्थवादानां विध्येकवाक्यत्वाभावेन स्तुत्यर्थत्वायोगादप्रामाण्यं स्यादित्याशङ्क्याह * सर्वे चेति * अर्थवादशून्ययोर्विधिप्रतिषेधयोः श्रुतार्थापत्त्यर्थवादकल्पकत्वस्य विधिप्रतिषेधयोश्च स्तुतिनिन्दाभ्यामविनाभावादन्यतरदर्शनेनान्यतरदनुमाय वाक्यं पूरयितव्यमित्यत्रोक्तत्वाद्वेदैकल्पितार्थवादानां व्यासादिभिर्लोकानुसारेण[1] स्वोत्प्रेक्षया वा प्रणीतत्वात्सम्भवत्येवैकवाक्यत्वमिति भावः। ननु भवतु विधिप्रतिषेधसन्निधिपठितानां प्रत्यक्षमूलभूतवैदिकार्थवादाभावे[2] ऽप्युक्तेन न्यायेन कालपनिकविधिप्रतिषेधैकवाक्यभूतार्थवादमूलत्वेन तदेकवाक्यत्वात्स्तुतिनिन्दार्थत्वम्। तत्सन्निधिरहितानां तु स्तुतिनिन्दार्थत्वायोगादानर्थक्यं स्यादत आह * ये त्विति * स्वयंशब्देन स्वातन्त्र्यमुक्तम्। प्रीतिं जनयन्तीति कामोपयोगितोक्ता पार्थिवानामुपयुज्यन्तइत्यर्थोपयोगिता ऽदृष्टशब्देन धर्मोपयोगिता देवतादीत्यादिशब्देनार्थादिग्रहणम्। यत्र तर्हि न किं चिदपि श्रूयते किं तु स्वरूपमात्रं कीर्त्यते यथा सृष्टिप्रलयादिवाक्येषु कथं तेषामुपयोगो ऽत आह * इत्येषा दिगिति * युक्तोपयोगोपाख्यानमार्गेण सृष्टिप्रलयादिवाक्या-

१ वेदे यदार्थवादो न श्रूयते तत्र कल्पिता ये ऽर्थवादास्तएव लोकानुसारेण स्वोत्प्रेक्षया वा तत्र प्रणीता इति भवत्येवैकवाक्यत्वमिति भावः।

२ प्रत्यक्षश्चासौ मूलभूतश्चासौ वेदिकार्थवादश्चेति विग्रहः।

नामपि यथासम्भवं धर्मोपयोगितोन्नेया सा च स्मृत्यधिकरणे वक्ष्यते अर्थवादोपयोगमात्रस्यैवात्र विवक्षितत्वादिति भावः । एवं सिद्धान्तस्वरूपं व्युत्पाद्य भाष्यमिदानीं व्याख्यातुमुपन्यस्यति * विध्युद्देशेनेति * कैश्चिदेतत्सकलं भाष्यं सार्थवादवाक्येष्वर्थवादादेव प्रवृत्तिसिद्धेर्विधिप्रत्ययपरित्यागपरत्वेन व्याख्यातं तेषां व्याख्यानं दूषयितुमुपन्यस्यति * के चिदाहुरिति । अयमर्थः * अर्थवादानामप्यध्ययनविधिबलेनैव पुरुषार्थपर्यवसायित्वाद्यथासम्भवं स्तुतिनिन्दार्थत्वावसायात्तद्द्वारा कथं रोचेतेति भाष्योक्तरीत्या प्रवर्त्तितव्यं निवर्त्तितव्यमित्येवंरूपप्रवृत्तिनिवृत्तिहेतुभूतार्थप्रतिपादकत्वाल्लिङादीनामपि तदभिधायकत्वात्तुल्यार्थतया समुच्चयायोगे केवलानां व्यवस्थयार्थवत्त्वे ऽप्युभयसम्भवे ऽन्यतरेण सिद्धेरवश्यं त्याज्ये ऽन्यतरस्मिन्भूयो ऽर्थवादपदानुसारेणैकस्य लिङादेस्त्यागो युक्तः । प्रकृत्यनुग्रहार्थं च कस्मिंश्चित्प्रत्यये प्रयोज्ये स्तुत्योत्पादितेच्छालब्धकर्त्तव्यानुवादिनी लिङ् प्रयुज्यते, इति दृष्टं लिङो ऽन्यतः सिद्धकर्त्तव्यतानुवादिनीत्वमिति परमतेनैतद्दृष्टान्ततम् * यथेति * प्रत्ययश्चेत् त्यज्यते किं तर्हि विवक्षितमित्यपेक्षिते * तस्मादित्युक्तम् । एवं सोपपत्तिकं भाष्याभिप्रायमुक्त्वाक्षरयोजनमाह * स एवचेति * वायव्यश्वेतालम्भ एव भाष्ये विद्धचुद्देशशब्देनोक्त इत्यर्थः । ननु भूतिकामान्तस्य विध्युद्देशत्वं वदता विधिप्रत्ययो ऽपि गृहीतो लक्ष्यते । अन्यथा स्तुत्यन्वयात्प्राक् कर्त्तव्यत्वाप्रतीतेः फलानापेक्षत्वाद्भूतिकामान्तवचनानर्थक्यं स्यादत आह * फलादीति * अनुष्ठानयोग्यस्यानुष्ठानसिद्ध्यर्थं स्तुत्यपेक्षणात्फलाद्यन्वयं च विनानुष्ठानायोग्यत्वाद्विध्यविवक्षायामर्थवद्भूतिकामान्तवचनमिति भावः । कस्मादेवं व्याख्यायते ऽत आह * अन्यथेति * ननूद्देशग्रहणं ऽप्यनुवाद्येन विधिनैवैकवाक्यत्वप्रतीतेः कथमालम्भोपादानमत आह * सूत्रोक्तेन त्विति * उद्देशग्रहणस्योक्तेन न्यायेन विवक्षितार्थत्वादविवक्षितस्य च पदान्तरान्वयायोगात्षष्ठीसमासस्य कर्म्मधारयस्य चानुपपत्तेर्विधेरुद्देशो ऽविवक्षास्मिन्निति कण्ठेकालादिवद्बहुव्रीह्याश्रयणात्कर्म्मणि वोद्देशशब्दं व्युत्पाद्य सामानाधिकरण्योपपत्तेस्तद्विषयालम्भोपादानमित्यर्थः । स्फुटीकृतं चैतद्भाष्यकृतेत्याह * तथा चाहेति * कथमनेनैतद्व्याख्यानं स्फुटीकृतमत आह * वि-

१ यथा गवामयने सवे अवभृथानन्तरं पृष्ठ्यशमनीयमेकाहः क्रियते तत्र समानकर्तृकयोः पूर्वकाले इति विधानेन उत्तरक्रियाकर्तव्यतायाः क्त्वाप्रत्ययविधानात् तद्बलेनैवोत्तरक्रियाकर्तव्यतायामिति तत्र लिङोऽनुवाद्यत्वं तथेति भावः ।

धीति * स्तुतिस्तुत्यसम्बन्धविवक्षा केनोक्तेत्यपेक्षिते पठति * यत इति * ये अनेन भाष्यावयवेन स एवैनं भूतिं गमयतीत्यादिस्तुत्यन्वयं दर्शयता स्तुतिस्तुत्यसम्बन्धं विवक्षितं वदन्तीति पूर्वेणान्वयः प्रत्ययासहिष्णुतया लभेतेत्याद्यपदत्यागेन भाष्ये शेषपाठः कृतः । ननु विधित्यागे शब्दभावनायाः कथम्भावाभावेन स्तुत्यनाकाङ्क्षणात्कथं स्तुतिस्तुत्यसम्बन्धविवक्षात आह * सैव चेति * वायव्यश्वेतालम्भस्य भूतिसाधनत्वे ऽभिहिते कस्माद्धेतोस्तस्य भूतिसाधनत्वमित्यपेक्षायां हेतुवन्निगदार्थवाद्वदन्वयो भविष्यतीति तेषामाशय इत्यर्थः । अस्मिन्नर्थे फक्किकैवं योज्या । विधेयस्यालम्भस्य विधिसम्बन्धे सति यार्थवादयोजना पूर्वमुक्ता योज्यते सम्बन्ध्यते ऽनेनेत्युभयाकाङ्क्षालक्षणो ऽन्वयप्रकारो योजनाशब्देनाभिप्रेतः सा विधिविधेयसम्बन्धनिषेधे ऽपि शुद्धस्यैवालम्भस्य भविष्यति * निमित्तत्वेनोक्तत्वादिति * आलम्भस्यार्थवादानाकाङ्क्षत्वे ऽप्यर्थवादस्य पुरुषार्थानुबन्धित्वाय साकाङ्क्षत्वादन्यतराकाङ्क्षयापि सम्बन्धो ऽपि भविष्यतीति च शब्देन सूचितम् । एवं वानेन भाष्ये व्याख्यातमालभेतेतिमध्यप्रतीकेन समस्तविध्युद्देशनिर्देशार्थतदर्थो भूतिसाधनत्वमालम्भस्योक्तम् । कस्मादित्यपेक्षिते पूर्वभाष्यनिर्दिष्टं वायुं तच्छब्देन परामृश्य यस्माद्वायुर्भूतिं साधयतीति स्तुत्यन्वयप्रदर्शनमिति । कस्माद्भूतिकामेनालब्धव्यमित्यभिसम्बन्धो न विवक्षित इत्याशङ्क्याविवक्षाकारणमुक्तम् * भिन्नविभावर्थाविति * तदेकस्यैव सम्बन्धस्यानिराकार्यतयोपन्यस्तत्वादयुक्तमित्याशङ्क्य व्याचष्टे * भिन्नाविति * भूयो ऽर्थवादानुग्रहायावश्यविवक्षणीये स्तुतिस्तुत्यसम्बन्धे सतीतरसम्बन्धविवक्षां वदतोभयविवक्षाङ्गीकारात् तत्र च वाक्यभेदापत्तिरित्यर्थः । किमर्था स्तुतिरिति प्रश्नभाष्यं स्तुतेरिच्छोत्पादनेन प्रवर्त्तकत्वस्य स्फुटत्वादयुक्तमाशङ्क्याभिप्रायद्वयमाह * किमर्थेति * कथं रोचेतेत्युत्तरभाष्यं यथाक्रममभिप्रायद्वयनिरासार्थत्वेन व्याचष्टे * आचार्यस्त्विति * ननु प्रागित्याशङ्काभाष्यं द्वितीयप्रश्नाभिप्राये पुनरुक्तमाशङ्क्य विवरणपरत्वेन व्याचष्टे * इतरेति *न हि यदेत्यादिपरिहारभाष्यं तत्र नञ्द्वययोगेन सन्निधानमेवोक्तं स्यान्न च तदा विधिविधेयसम्बन्धाविवक्षाङ्गीक्रियते विरोधश्चोत्तरभाष्येण स्यादित्याशङ्क्य न हीति छित्त्वानर्थक्यनिरासार्थत्वेन व्याचष्टे * न हीति * कथं नानर्थक्यमित्यपेक्षिते केवलश्रवणावधारितसामर्थ्यस्यापि विध्युद्देशस्यार्थवादसन्निधौ विधायकत्वाभावादिति कारणम् * यदेत्यादिनोक्तम् । यथेत्यादिना * दृष्टान्तद्वा-

रोपपादितं तत्प्रपञ्चयति * सर्वत्रेति * दृष्टान्तएव किं व्यवस्थाकारणमित्यपेक्षायामाह * योग्येति * आकाङ्क्षणीयाऽलाभनिमित्ता ह्याकाङ्क्षानिवृत्तिर्नान्यथेत्यर्थः । ननु यथाप्राकृतपदार्थलाभान्निवृत्ताकाङ्क्षायाम् । अपि विकृतेः सन्निधिपठितपदार्थाकाङ्क्षावशादाकाङ्क्षोत्थापनं तथेहापि पदार्थान्तराकाङ्क्षावशादाकाङ्क्षोत्थापनेऽपि स्वतो निराकाङ्क्षत्वात्[1] प्रकरणगतानां प्रयाजादिवाक्यानामिव कस्मात्प्रामाण्यं न स्यादत आह * इतरथेति * इतरेण प्रकारेण योग्यपदान्तरानुच्चारणमनालोच्य स्वरूपमात्रालोचने सर्वत्राकाङ्क्षा भवत्येव श्रुतपदातिरेकेणापि दर्शनादित्यर्थः । स्वाभाविकीमाकाङ्क्षामुपपादयति * तथा चेति * एवं यदेत्यादिभाष्यं पूर्वेण पुनरुक्तमाशङ्क्योपसंहारार्थतया व्याचष्टे * तदिहेति * नन्वेवं सतीत्याशङ्काभाष्यं महावाक्ये ऽवान्तरवाक्याप्रामाण्यस्योक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * नन्वेवमिति * सत्यं विनापीति परिहारभाष्याभिप्रायमाह * सत्यमिति * गवादिप्रचारार्थं ग्रामस्य समन्ताद्या भूः कर्षकैः परिह्रियते सा परिहारशब्देनोच्यते । धनुः शतं परिहारो ग्रामस्य स्यात्समन्ततइति स्मृतेः । तस्य पन्थाः परिहारपथस्तेन ग्रामगमनवदिति दृष्टान्तार्थः । ननु सत्स्वपीत्याशङ्काभाष्यं वेदस्यापर्यनुयोज्यत्वेनोक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * नन्विति * आहेति परिहारभाष्यं व्याचष्टे * तत्र उत्तरमिति * भवन्त्वित्याशङ्काभाष्यं व्याचष्टे * भवन्त्विति * नेत्यादिपरिहारभाष्यं व्याचष्टे * नोक्तेनेति * प्रतीतिमात्रेणार्थस्य विवक्षितत्वमतिप्रसङ्गादयुक्तमाशङ्क्य योऽसावित्यादितोपपादितं तद्व्याचष्टे * व्ययसम्भवं हीति * अर्थवादानुग्रहो युक्त इत्यनेनातोऽस्मादितिभाष्यमेव व्याख्यातं, यतः प्रत्यक्षो वाक्यशेषभावे सतः कारणादस्मात्सार्थवादकाद्विधेः सकाशाच्छ्रुतिमिव प्रवर्त्तकत्वेन विवक्षितामवगच्छामो न विधिं भूयोऽपविरोधे भूयोऽनुग्रहस्य न्याय्यत्वादिति। ननु निरपेक्षादपीतीत्याशङ्काभाष्यमन्यत्रावधारितविधिशक्तेर्विध्युद्देशस्यात्रापि प्रत्यभिज्ञानात्स्तुतिसम्बन्धाविवक्षाप्रतिपादकत्वेनाभासमानं ननु सत्स्वपीत्यनेन पौनरुक्त्येनाक्षिपति * नन्विति * सत्यपि समस्तस्य स्तुतिस्तुत्यसम्बन्धरूपेऽर्थे पूर्वस्य विधिविधेयसम्बन्धरूपार्थापह्नवनिरासार्थतया समाधत्ते * तदुच्यतइति * अथास्येत्यनेन भाष्योपक्षिप्तं कारणमुक्तम् । भवत्वि-

---

१ प्रकरणगतानामपि प्रयाजादिवाक्यानां स्वतो निराकाङ्क्षत्वात् प्रमाजनकत्वं भावनया कृत्स्नभावेनापेक्षणात् विध्येकवाक्यत्वं तद्विधेः स्वार्थप्रतिपादकत्वं पदार्थान्तराकाङ्क्षावशादेकवाक्यत्वमित्यर्थः ।

तिपरिहारभाष्यं व्याचष्टे * तदभिधीयतइति * अनेनैवं व्याख्यातं भवतु निरपेक्षादर्थवादरहिताद्वसन्तादिवाक्येषु विध्यवगतिः न हि निरपेक्षे सत्यर्थद्वयासम्भवलक्षणो विरोधो ऽस्ति न चात्र शक्त्यभावाद्विध्यर्थत्वासम्भवः येनास्यैव क्व चिच्छक्तिः क्व चिदशक्तिरिति विरोधः स्यात्। बाधाबाधौ तु बाधकसदसद्भावाभ्यां न विरुध्येते इति काका सूचितम्। इह तु स्तुत्यर्थत्वस्योक्तन्यायेनावश्याङ्गीकार्यत्वद्वाक्यभेदप्रसङ्गेनाशक्यो विध्यर्थ इति। द्वौ चेदितिवाक्यभेदभाष्यं भिन्नाविमावर्थावित्यनेन पुनरुक्तमाशङ्क्य पूर्वव्युत्पादितस्यैव वाक्यभेदस्य स्तुतिसम्बन्धे सत्यशक्यो विध्यर्थ इत्युक्ते कुतो ऽशक्य इत्यापन्नहेतुप्रश्नोत्तरत्वेन पुनरुपन्यास इति परिहरति * प्रश्नोत्तरत्वेनेति * ननु यदि स्तुत्यसम्बन्ध एवात्र विवक्षितो न विधिविधेयसम्बन्धः ततो ऽनुष्ठानाप्रतिपादकत्वेनाक्रियार्थत्वाद्धर्मप्रामाण्यानुपपत्तेर्विध्युद्देशेनैकवाक्यत्वात् प्रमाणमित्युपक्रमानुपपत्तिः स्यादत आह * तस्मादिति * यस्मादन्यथा वाक्यभेदः प्रसज्येत तस्मात्प्ररोचनयैवात्र विधिः तथा सत्यैकार्थ्यादित्यर्थः अनेन चाथ यदुक्तमित्यनूदिता शङ्का निरासार्थत्वेन भाष्यकारावतारितस्तुत्यर्थेन विधीनां स्युरिति सूत्रावयवमेवं व्याख्यातं स्तुतेरर्थः प्रयोजनं प्ररोचना तद्द्वारेण कर्मव्युत्पन्नविधिशब्दोक्तानां क्रियाणामुपकारिणो ऽर्थवादा इति एतत्सूत्रावयवव्याख्यानार्थं स्तुतिशब्दा इति भाष्यम्। तत्रानुष्ठातृणामिति षष्ठीमाक्षिपति * प्ररोचयमाना इति * नन्विकस्तिपौ धातुनिर्देशइति धातुभूतरुचियोगे सम्प्रदानसंज्ञा विहिता न च तत्प्रयोगे पूर्वप्रकृतेर्धातुत्वमस्ति तथा सति धातुद्वयप्रसङ्गेन धातोरिति विवक्षितैकत्वधातूपरिविहितप्रत्ययानुपपत्तिप्रसङ्गादित्याशङ्कते * प्ररोचयतेरिति * परिहरति * अयमाशयः * सनाद्यन्ता धातव इत्यन्तग्रहणसामर्थ्यात्केवलस्य सनादेर्धातुत्वाभावेन धातुद्वयाप्रसक्तेर्न पूर्वप्रकृतेर्भूवादयो धातव इति विहिता धातुसञ्ज्ञा नापह्नवमर्हतीति संबन्ध्यविशेषाविवक्षया चतुर्थ्यप्रसङ्गमाशङ्कते * अथेति * परिहरति * सापीति रुचिसंबन्धाविवक्षायां तद्व्यतिरेकषष्ठ्यनुपपत्तेः प्रातिपदिकार्थाव्यतिरेके प्रथमैव स्यात्। रुचिसंबन्धविवक्षायां तु तस्य चतुर्थी निमित्तत्वेन विशेषरूपत्वात्सामान्याविवक्षा कुतो न तस्येतिभावः। पदान्तरसंबन्धमङ्गीकृत्य षष्ठीमुपपादयति * तस्मादिति * एवं तु व्यवहितान्वयापेक्षेरुपकरिष्यन्तीत्यनेनान्वयमाह * अथ वेति * अस्मिन्पक्षे क्रियाया इत्यस्य विच्छिन्नस्यार्थमाह * क्रियाया इति * क्रियाशब्देन

तद्विषयत्वाद्विधिरभिप्रेतः तदेतत् दूषयति * इदं त्विति * किं सर्वप्रत्ययार्थाविवक्षया प्रत्ययत्यागो विधिमात्राविवक्षया वा तत्राद्ये कल्पे तावत् दूषणान्याह * यदि हीति * ननु भूतिकाम आलभेत कस्माद्यतो वायुः क्षेपिष्ठा देवतेति हेत्वाकाङ्क्षायामर्थवादान्वयस्य भाष्यकृतोक्तत्वाच्छब्दभावनाकथम्भावासम्भवे ऽपि न कश्चिद्दोष इत्याशङ्क्याह * यापीति * वेदावगतस्यार्थस्य हेत्वनपेक्षत्वान्न तदूद्धारेणार्थवादान्वयः सम्भवतीति कल्पेतेति काक्का द्योतितं, यापि भाष्यकृता कस्मादित्यपेक्षा दर्शिता सापि कस्मात्कारणान्मया प्रवर्त्तितव्यामिति प्रवृत्तिसिद्ध्यर्थं प्राशस्त्यरूपकारणविषयत्वाद्विध्यभावे न युक्तेत्यर्थः । नन्वितिकर्त्तव्यताविषयत्वे कथमित्येवाकाङ्क्षा किमिति न दर्शिता ऽत आह * शब्दान्तरेति * विधायकस्याध्ययनविधिना पुरुषप्रवर्त्तनेतियुज्यमानस्य कथं मया पुरुषः प्रवर्त्तयितव्य इत्यर्थवादान्वयासिद्ध्यर्थमचेतनस्यापि पुरुषगतचैतन्यारोपेणाकाङ्क्षोपचर्यते भाष्यकृता तु पारमार्थिकी पुरुषस्याकाङ्क्षा तद्विषयैव दर्शिता न त्वनयोर्भिन्नविषयतेत्यर्थः । अथापि हेतुविषया कस्मादित्यपेक्षा तथापि यागादिस्वरूपस्य द्रव्यदेवतामात्रेण सिद्धेः फलसाधनत्वस्य च स्वसामर्थ्यमात्रेण सिद्धेः कर्त्तव्यत्वाभिधानं विना न युक्तेत्याह * सापि चेति * ननु क्रियानपेक्षितमपि प्राशस्त्यमर्थवादोक्तं सत्कर्त्तव्यताङ्गमयिष्यतीत्यत आह * तदनपेक्षितं चेति * प्राशस्त्यस्य श्रौतत्वाभावान्न स्वरसतो ऽर्थवादप्रतिपाद्यत्वं सम्भवतीत्यर्थः । प्रतिपादितस्यापि कथं चित्प्राशस्त्यस्य न तावद्धात्वर्थेन संबन्धो ऽनपेक्षत्वादित्याह * न चेति * न केवलं प्राशस्त्यस्यासंबन्धः किं तु फलादेरपीति * कस्य चिदिति * काक्कोक्तम् । भावनया सह तर्हि संबन्धो भवत्वत आह * भावना त्विति । किमपेक्षेतेति * न किं चिदित्यर्थः । अनपेक्षायां वा सर्वाभावः स्यादित्याह * तस्मादिति * अथापि कथं चित्प्राशस्त्यमभिधीयते संबन्ध्यते च तथापि न कर्तव्यतामालम्भस्य गमयतीत्याह * उक्ते ऽपि चेति * माभूत्तर्हि कर्त्तव्यबुद्धिः प्राशस्त्यप्रतिपादनमात्रेणार्थवादपर्यवसानं भविष्यतीत्यत आह * अकल्पिते त्विति * आनर्थक्यपरिहारार्थमेव तर्हि कर्त्तव्यता कल्पयिष्यते ऽत आह * प्रत्यक्षं चेति * कल्पस्य कल्पना ऽनुचितेति भावः । न केवलमनुचिता किं त्वशक्यापीत्याह * न चेति * अशक्यत्वे कारणमाह * अनुक्तो हि सन्निति * एवं तावत्कर्त्तव्यतायाः कल्पत्वान्नार्थवादकल्पत्वमित्युक्तम् । अर्थवादानामपि तत्कल्पकत्वं सम्भवति प्ररोचनामात्रपर्यव-

सोनादित्याह * तथेति * ननु तर्हि नार्थवादैः प्ररोचनोच्यतां कर्त्तव्यताप्रतिपादनेनैव पुरुषार्थानुबन्धित्वसिद्धेरत आह * अवश्यकर्त्तव्या चेति * तया विना प्रवृत्त्यसिद्धेरिति भावः । ननु माभूदर्थवादानां कर्त्तव्यताप्रतिपादनपर्यन्तं व्यापारः तत्प्रतिपादितप्राशस्त्यान्यथानुपपत्त्या सा कल्पयिष्यते अत आह * सर्व्वत्र चेति * यच्च तुल्यार्थत्वं समुच्चयासम्भवकारणमुक्तं तदसिद्धमित्याह * तुल्यार्थयोश्चेति * न चात्राल्पभूयोविरोधिन्यायो ऽस्ति प्रत्ययत्यागे भूयसां तदर्थानां बाधापत्तेरित्याह * यदि चेति * परस्मैपदात्मनेपदरूपोपग्रहविशेषः । आदिशब्देन विधिभावनयोरुपादानम् । एतत्सर्वं दोषपरिहारार्थं कल्पान्तरं शङ्कते * स्यादेतादिति * एतदपि निराचष्टे * एतच्चेति * अशक्यत्वं कारणमाह * यत इति * उदितमप्यविवक्षितं भविष्यत्यत आह * प्रतीतस्य चेति * ग्रहैकत्वं ह्यप्राप्तत्वान्नानुवदितुं शक्यते सम्मार्गभावनया गुणत्वेन प्रधानत्वेन चान्वयायोगान्न विधिना स्पृश्यते । इन्द्रियकामहोमस्त्वाश्रयमन्तरेण गुणस्य फलसाधनत्वायोगाद्विधिमन्तरेण च प्रकरणावगतस्यापि होमस्याश्रयत्वे प्रमाणाभावात्प्रकरणावगतं स्वरूपमनूद्य गुणफलसंबन्धविध्यन्यथानुपपत्तिप्रसूतेन विधिना आश्रयत्वेन विधीयतएवेति श्रौतेन विधिना वाक्यभेदप्रसङ्गेनापरिग्रहादविवक्षितत्वमिति ननु विध्यसंस्पर्शादेव विधिरविवक्षितो भविष्यत्यत आह * न तावदिति * विधिव्यातिरिक्तस्य विध्यसंस्पर्शित्वं विधिविवक्षाकारणं युक्तम् । विधेस्त्वविधिरहितत्वं विध्यसंस्पर्शाख्येनाविवक्षाकारणं सर्वविधीनामविवक्षाप्रसङ्गादित्यर्थः । अनुवादो ऽपि विधेरयुक्त इत्याह * नापीति * कारणमाह * तस्यामिति । अयमाशयः * न तावद्य आलम्भः स प्रशस्त इत्यालम्भमात्रोद्देशेन प्राशस्त्ये ऽभिहिते ऽपि कर्त्तव्यबुद्धिः सम्भवति येन प्ररोचनालब्धविधित्वानुवादो घटेत् । एतद्योक्ते ऽपि च प्राशस्त्यइत्यादिनोपपादितम् । यदि तु योऽयं वायव्यश्वेतालम्भः कर्त्तव्यः स प्रशस्त इतिकर्त्तव्यतारूपस्य विधेरनुवाद इष्यते । स तर्हि न सम्भवति । अनुवादावस्थायामप्राप्तत्वादिति । ननु त्वत्पक्षे वायव्यश्वेतालम्भः कर्त्तव्य इति विध्यर्थो भवेत् तस्य चालम्भः प्रशस्त इत्यर्थवादार्थेन नान्वयः स्यादित्याशङ्क्याह * भवति त्वेवमिति * दृष्टान्तो ऽपि साध्यविकल इत्याह * यत्त्विति * दशमे हि सत्रादुदवसाय पृष्ठ्यशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्नित्युदाहृत्य किं तत्र सहितानां कर्तृत्वमेकैकशो वेति सन्दिह्य बहुवचनस्य श्रवणात् साहित्ये प्राप्ते तत्काश्रुत्यैवोदवसानसमानकर्तृकत्वप्र-

तीतेरवगतसङ्ख्यत्वेन च बहुवचनस्यानपेक्षितसङ्ख्याविधायित्वायोगादपेक्षितधात्वर्थविशेषविधायित्वाख्यातो यथाप्राप्तप्रचयशिष्टसङ्ख्यानुवादिबहुवचनप्रयोगोपपत्तेर्न प्राकृतैककर्तृकत्वबाधो युक्त इति सिद्धान्तो वक्ष्यते क्त्वाश्रुत्या ह्यनन्तरक्रियामात्रमाक्षेप्तुं न च नियोगतः कर्त्तव्यता । न मांसं भुक्त्वा ऽधीयीतेति प्रतिषेधो ऽपि भुक्त्वाव्रजतीति च वर्त्तमानापदेशे ऽपि क्त्वाश्रुतिदर्शनादित्यर्थः । न च केवलं कारणाभावाद्विध्यविवक्षानुचिता किं त्वतिव्याप्तेरपीत्याह * यदि चेति * स्वमतेन व्याख्यातुमुपक्रमते * तस्मादिति * अत्रैव भाष्यानुमतिमाह * तथा चेति * विधिविषयाभिप्रायेषु भाष्यकारीयविध्युद्देशशब्दे फलपदस्य विधिविषयसमर्थकत्वाभावादुपन्यासो न युक्त इत्याह * अन्यथेति * विध्यभावे च धात्वर्थस्य तद्विषयत्वायोगात्तदभिप्रायो विध्युद्देशशब्दो न युक्त इत्याह * न चास्येति * कस्तर्हि विध्युद्देशशब्दस्यार्थो ऽत आह * तस्मादिति * विधेरुद्देशकः प्रतिपादक इति कर्तृव्युत्पन्नं करणव्युत्पन्नं वोद्देशशब्दमङ्गीकृत्य षष्ठीसमासाश्रयणेन लिङादिरेव विध्युद्देशशब्देनोक्त इत्यर्थः किमर्थं तर्ह्युद्देशग्रहणमत आह * विध्यर्थेन त्विति * विधिशब्दस्य लिङादिशब्दे तदर्थे चोभयत्र प्रयोगदर्शनादिह शब्दपरतयापि व्याख्यानेन सूत्रनाश इति चोद्यमितिं । नन्वस्मिन्पक्षे प्रत्ययो विध्युद्देश इत्येवं वक्तव्यं न भूतिकाम इत्येवमन्त इत्यत आह * भूतिकाम इति * ननु यदि फलादिसङ्गत्युत्तरकालं तद्विशिष्टायां भावनायां पुरुषं नियुञ्जाने विधावनुग्रहार्थं स्तुत्यर्थावसरः तदभावे तर्ह्याकाङ्क्षाभावादर्थवादान्वयो न स्यादित्याशङ्कते * नन्विति * परिहरति * एवमेवैतदितिं * का तर्ह्यर्थवादानां तत्र गतिरत आह * तथेति * यद्यपि विध्यभावेनार्थवादाः सम्बन्ध्यन्ते तथापि नानर्थक्यापत्तिः प्रयोगवचनेन पञ्चमलकारेण वा, कल्पितविधित्वे ऽर्थवादसङ्गतिसम्भवादिति वक्ष्यमाणानुषङ्गेण योज्यम् । आग्नेयो ऽष्टाकपालो भवतीत्यादौ भवति परस्य पञ्चमलकारस्य प्रयोजकव्यापारविधानाशक्तेः प्रयोगवचनेन वानुत्पन्नस्य प्रयोगासम्भवादुत्पत्तिरप्याक्षिप्यते उपांशुयाजमन्तरा यजतीत्यादौ पञ्चमलकारेण अव्यवस्था लिङर्थलेडिति पञ्चमलकारस्य विधौ स्मरणे ऽपि वर्त्तमानापदेशसन्दिग्धत्वात्पञ्चमलकारनिर्णयव्याक्षेपाद्विधित्वस्य कल्पितत्वमभिप्रेतम् । इदं तु प्रयोगवचनोत्पत्तिकल्पनं दुरुपपादम् । अनुत्पन्नस्य प्रयोगविधिविषयत्वायोगादुत्पत्तौ कल्पितायां प्रयोगविधिविषयत्वं प्रयोगविधिविषयत्वाच्चोत्पत्तिकल्पनमितीतरेतराश्रयापत्तेः । पञ्चमलकार-

चिन्हाभावे न तन्निर्णयः स्यादित्यपरितोषादन्यथाविधित्वकल्पनमाह * अथ वेति * ननूक्तेन प्रकारेणाग्नेयो ऽष्टाकपालो भवतीत्यादौ विधिं प्रकल्प्य तच्छेषत्वेनाङ्गिरसो वा इत उत्तमाः स्वर्गलोकमायन्नित्यादेरर्थवादस्यान्वयो भवतु नाम ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादौ त्वर्थवादमात्रकल्पविधिदर्शनाद्विधेः प्राक् स्तुत्यनवसरत्वप्रतिपादनमयुक्तमित्याशङ्क्याह * यत्रापीति * तत्रापि पूर्वचरितकीर्त्तनान्यथानुपपत्तिमात्रेण कर्त्तव्यतां कल्पयित्वा शेषपदानां स्तुत्यर्थत्वेनान्वयः। ननु प्रागेव कस्य चित्स्तुतिः प्रतीयतइत्यर्थः सिद्धरूपार्थकीर्त्तनाभिप्रायो ऽर्थवादशब्दो न स्तुत्यभिप्राय इति भ्रमितव्यम्। नन्वेवमपि सिद्धरूपार्थकीर्त्तनमात्रेण कर्त्तव्यतायाः प्रतीतिसिद्धेः प्रत्ययानर्थक्यं तदवस्थमित्याशङ्क्याह * सम्भवत्यां त्विति * ननु श्रौतार्थद्वयाश्रयणे वाक्यभेदापत्तेः प्रत्ययश्रवणे ऽपि भूयो ऽर्थवादपदानुग्रहाय स्तुत्यैव कर्त्तव्यताकल्पनमगत्याङ्गीकार्यमित्युक्तमत आह * यस्त्विति * प्राशस्त्यकर्त्तव्यतयोर्विशेषणविशेष्यभावात्प्राशस्त्यविशिष्टकर्त्तव्यतात्वरूपैकार्थप्रतिपादनादेकव्यापारोपपत्तेर्नार्थभेदनिबन्धनवाक्यभेदापत्तिरित्यर्थः। नन्वर्थभेदाभावे ऽप्यप्राप्तस्य विधिसम्बन्धात्प्राप्तस्य च विशेषणभूतप्राशस्त्यसम्बन्धाद्वैरूप्यलक्षणो वाक्यभेदः प्रसज्येत अत आह * विधीयमानस्यैव हीति * प्राशस्त्यं विना विध्यपर्यवसानादप्राप्तावयवस्यैवालम्भस्य विधिनेव प्राशस्त्येनापि सम्बन्धादवैरूप्यमित्यर्थः। नन्वेवमपि विशिष्टार्थप्रतिपादनाद्गौरवापत्तिरत आह * यदि चेति * का तर्हि नायमभिसम्बन्धो विवक्षित इत्यादेर्भाष्यस्य गतिरत आह * तस्मादिति * अनेन ग्रन्थेनैवमेतद्भाष्यं व्याख्यातम्। भूतिकाम आलभेत कस्माद्यतो वायुः क्षेपिष्ठेत्यनेन यः सार्थवादकस्य विध्युद्देश्यस्य विधिस्तुतिसम्बन्धरूपो विशिष्टो ऽर्थो दर्शितः। नायं विध्युद्देशमात्रेण विवक्षितः। किं तु सार्थवादकेनेति तत्रालभेतेतिमध्यप्रतीकेन विध्युद्देशोपलक्षणं ततो भूतिरिति पूर्वप्रकृतवायुपरामर्शितच्छब्दयोगिना भूतिपदेन स एवैनं भूतिं गमयतीत्यन्तार्थवादोपलक्षणं विशेषणविशेष्यरूपार्थद्वयस्य विशेष्यप्रतिपादकविध्युद्देशमात्रेणाभिधाने गौरवलक्षणावाक्यभेदापत्तेरिति विधित्वादीत्यादिशब्देन फलेतिकर्त्तव्यताग्रहणं किमर्थेत्याशङ्काभाष्यं विधिविवक्षायां तदितिकर्त्तव्यताभूतस्तुत्याकाङ्क्षानिराकरणायोगादयुक्तमाशङ्क्य व्याचष्टे * किमर्थेति * अयमाशयः प्रवृत्तिप्रतिबन्धकालस्यादिभङ्गरूपा

१ भूतिकामान्तविध्युद्देशप्रदर्शनेनेत्यर्थः।

प्ररोचनाविधेरितिकर्त्तव्यता । न स्तुतिः । स्वार्थं तु तया स्तुतिराकाङ्क्ष्यते विध्यवगतश्रेयःसाधनत्वादेव तु प्रवृत्तिहेत्विच्छाजननेन तद्विरोध्यालस्यादिनिराकरणसिद्धेरनर्थिका स्तुतिरिति भाष्यं चैवं व्याख्येयं, यद्य ऽपि विधिस्तुतिरूपार्थद्वयप्रतिपादनं विध्युद्देशमात्रेण न क्रियते तथाप्यर्थवादानर्थक्यं विधित एव प्ररोचनासिद्धेस्तादर्थ्येन स्तुत्यनाकाङ्क्षणादिति, कथं रोचेतेत्युत्तरभाष्याभिप्रायमाह * कथमिति * श्रेयःसाधनत्वाधिगमे ऽपि बहुव्ययायासदर्शनात्द्वेषोत्पत्तेः स्तुतिमन्तरेणानिराकरणात् दुर्वारा स्तुत्याकाङ्क्षेतेतिभावः । ननु प्रागित्याशङ्काभाष्यं किमर्थं स्तुतिरित्यनेन पुनरुक्तमाभासमानं तदभिप्रायविवरणार्थतया व्याचष्टे * नन्विति * न हीत्यादिपरिहारभाष्यं तस्यायमर्थः न तावत्प्राशस्त्यं विना प्ररोचना सम्भवतीत्युक्तम् । कथं रोचेतेत्यनेन । यदि तु विध्युद्देशेनैव प्राशस्त्याक्षेपस्य वसन्तादिवाक्येषु दर्शनादिहापि तत एव प्राशस्त्याक्षेपसिद्धेः स्तुतिपदानर्थक्यमुच्येत तन्निराकरणार्थं यदेत्याद्युक्तं तद्व्याचष्टे * न हीति * न हीत्यादिनैतदाहेत्यन्वयः । शक्तिद्वयनिराकरणासमर्थत्वमस्य ग्रन्थस्य दर्शयितुं विधीयते इत्येतत्समाप्तिपरत्वेन न तदेत्यादिना व्याख्यातम् । अनेन च तदा पूर्वेण विधिरित्यत्रापि समाप्यतइत्यध्याहारो दर्शित इत्यवगन्तव्यम् । प्ररोचनया च विधिसमाप्तेः प्ररोचनाशक्तिः समाप्त्युक्त्या दर्शिता, भवतीति न भाष्याऽवाचकत्वोपालम्भः । दृष्टान्तभाष्यं पूर्ववदेव व्याख्येयमित्याह * यथेति * यच्चास्माभिः प्रत्ययार्थवादयोः पुनरत्यन्तभिन्नानुग्राह्यानुग्राहकार्थभेदात्समुच्चय इति प्रागुक्तं तदनेन दार्ष्टान्तिकयोजनाभाष्येण स्पष्टीकृतमित्याह * विधिशब्देनेति * नन्वेवं सतीत्याशङ्काभाष्यगतमविधायकपदप्ररोचकत्वाभिप्रायं व्याख्यातुमाह * नन्विति * सत्यमित्यादिपरिहारभाष्यं प्रतीकेन गृहीत्वा तास्मिन्विद्यमानइत्यादिभाष्यशेषं तस्मादित्यध्याहारपूर्वकं सावधारणत्वेन व्याचष्टे * सत्यमिति * अविद्यमाने हि स्तुतिवचने विध्युद्देशमात्रस्य प्राशस्त्यविशिष्टविधिरूपो ऽर्थो भवेदिह तु स्तुतिवचनस्य विद्यमानत्वाद् यो ऽर्थो न्याय्यो भवति सो ऽङ्गीकार्य इत्यर्थः । स्तुतिः प्रयोजनमिति भाष्यावयवमवतारयितुम् * कश्चासावित्युक्तम् * अर्थवादमात्रस्य स्तुतिप्रयोजनत्वाद्विधिवचनानुपपत्तिमाशङ्क्य * न तस्यैवेत्याद्युक्तम् * अर्थवादाभावे त्वित्यनेन तस्मिन्नसतीति भाष्यावयवो व्याख्यातः। ननु सत्स्वपीत्यादिप्रत्यक्षश्च वाक्यशेषभाव इत्यन्तं भाष्यं पूर्ववदेव व्याख्येयमित्याह * नन्विति * अत्राप्युपात्ते लघूपाये गुरूपायाश्रयणा-

नुपपत्तिमाशङ्क्यानर्थक्यपरिहारायोपात्तेऽपि लघौ गुरोराश्रयणमित्येतावतार्थतुल्यत्वमिति अतोऽस्मादित्युपसंहारभाष्यं विधेरिति पञ्चम्या विधेः स्तुत्यवगतिप्रतिपादनादभिप्रेतविरुद्धमाशङ्क्याह * *अतोऽस्मादिति * किं सम्बन्धनिबन्धनेयं षष्ठीत्यपेक्षिते आह * वाक्येति * पूर्वप्रकृतेर्वाक्यशेषोऽस्मादिति सर्वनाम्ना परामृष्टो विधेरिति षष्ठ्या सम्बध्यतइत्यर्थः । एवं सत्येष भाष्यार्थो भवतीत्याह * इत एवेति * अस्य विधेः सम्बन्धिन इतो वाक्यशेषादेव स्तुतिमवगच्छामो न स्वतो विधिमात्रादित्यर्थः । ननु निरपेक्षादपीत्याशङ्काभाष्याभिप्रायमाह * नन्विति * भवत्विति परिहारभाष्यमाशङ्कानुज्ञानादयुक्तमाभासमानं सोपहासत्वेन व्याचष्टे * आचार्यस्त्विति * एवमर्थविरोधाशक्यत्वयोः परस्परव्याघातात्तत्परिहारार्थं व्यवस्था यत्रासावित्यादिना दर्शिता सर्वेऽमी विधिशब्दाः सप्ररोचनाविधिपरा व्याख्येयाः अशक्यत्वोपपादनार्थं पूर्वोक्तगौरवलक्षणवाक्यभेदस्मारकं वाक्यं हीत्यादिभाष्यं व्याचष्टे * वाक्यं हीति । एकमेकस्यैवेति * वाक्यसंबन्धपदगतयोरेकवचनयोर्विवक्षितसङ्ख्यत्वं दर्शितं तच्चात्र विध्युद्देशरूपमभिप्रेतमिति विध्युद्देश एवेत्यनेन दर्शितम् । संबन्धशब्देन चात्र कर्मण्युत्पत्त्या विशेषणविशेष्यरूपौ संबन्धिनावभिप्रेतौ * एष हि गुणो भवती * त्यर्थवादप्राशस्त्यप्रदर्शनम् । यतस्ततोभूतिरितिवदिति कस्य चिच्छङ्का स्यात्तद्व्युदासार्थं * विध्युद्देशोत्थापितानामेकेत्याद्युक्तं * नायमभिसंबन्धो विवक्षित इत्यादिना यत्प्रबन्धेन विध्युद्देशस्य प्राशस्त्याक्षेपकत्वं निराकृतं तस्य प्रकृतैकवाक्यतासिद्धिप्रयोजनतां दर्शयन्स्वाभिप्रेतं सूत्रार्थमुपसंहरति * तस्मादिति * अनेनैवं सूत्रं व्याख्यातं विधेयभावनांशप्रतिपादकत्वेऽपि तदनुष्ठापकानां विधीनामङ्गमर्थवादाः स्युः केनोपकारेणेत्याक्षिप्ते स्तुत्यर्थेनेत्युक्तम् । विधिनानुष्ठानसिद्ध्यर्थे स्तुतेरुपकारकत्वेऽभिहिते विधिमात्रेणानुष्ठानसिद्धेः किं स्तुत्येत्याशङ्कानिराकरणार्थमर्थवादानां धर्मप्रमोपयोगित्वसिद्धावतिक्लिष्टलाक्षणिकस्तुत्यर्थत्वाङ्गीकारकारणं विधिनैकवाक्यत्वादित्यनेनोक्तमिति ।

तुल्यं च सांप्रदायिकम् ॥ ८ ॥

सामान्योपयोगप्रतिपादनं विनार्थवादानां द्वारविशेषोपयोगप्रतिपादनाशक्तेः सामान्योपयोगप्रतिपादनार्थमेतत्सूत्रं पूर्वं कार्यमपि प्रथमसूत्रव्युत्पादिताध्ययनविधिदृष्टार्थत्वबलेन सामान्योपयोग-

स्य सिद्धस्य विशेषोपयोगमन्तरेणानिर्वाहात्तत्सम्भवप्रदर्शनोत्तरकालं कृतम् । तत्र भाष्यकारीयपरिचोदनोपन्यासस्य प्रयोजनमाह * चशब्देति * तुल्यासांप्रदायिकत्वस्यादृष्टार्थत्वे ऽप्युपपत्तेः पूर्वप्रतिज्ञातस्तुत्यर्थत्वासाधकत्वाद्विध्येकवाक्यत्वलक्षणस्तुत्यर्थत्वसाधकहेतुसमुच्चयार्थं चशब्दायोगात्प्रमादपाठत्वशङ्कानिराकरणार्थार्थवत्त्वावगमलक्षणहेत्वन्तरसमुच्चयार्थत्वेन चशब्दो भाष्यकृता व्याख्यात इत्यर्थः । परिचोदनार्थं व्याचष्टे * आनर्थक्यमेवेति * निराकरणभाष्यं व्याचष्टे * तत्रैवमिति * एवं त्वर्थावगमप्रकारानुक्तेः साकाङ्क्षत्वप्रसङ्गादपरितोषेणान्यथा छेदं करोति * अथ वेति * अनेन च विधिना त्वेकवाक्यत्वादित्येतदेव सूत्रं प्रमादपाठत्वशङ्कानिराकरणे ऽपि योजितम् । विध्येकवाक्यत्वेन स्तुत्यर्थतया ऽर्थवत्त्वावगमादप्रमादपाठत्वनिराकरणएव हेत्वन्तरसमुच्चयार्थं तुल्यं सांप्रदायिकत्वं योजयति * किं चेति * सांप्रदायिकशब्दव्याख्यानार्थमनध्यायादिधर्म्माणां वेदाध्ययनाख्यसम्प्रदायप्रयोजनत्वं भाष्यकृतोक्तमुपपादयति * सम्प्रदायेति । तादर्थ्यस्मरणादिति[1] *

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नो ऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥

इत्यादिना धर्म्मजातस्य सम्प्रदायार्थत्वस्मरणादित्यर्थः । पुरुषार्थत्वं तु निष्प्रमाणकमित्याह * स्वर्गादीति * नन्वध्ययनस्वरूपे तत्कार्ये च ग्रहणे धर्म्मजातस्यानुपयोगात्तत्पूर्वकज्योतिष्टोमादिकर्म्माङ्गत्वं भविष्यत्यत आह * न चास्येति * एतच्च द्वादशाधिकरणसिद्धमुक्तं तत्र ह्याध्यायानध्यायादिधर्म्मजातस्याध्ययनप्रकरणपठितस्यापि तस्य स्वरूपे कार्ये चानुपयोगादध्ययनेनैव फलवत्कर्म्मावबोधं भावयेदित्यध्ययननियमस्यानारभ्य विहितस्याप्यध्ययनजनितज्ञानोपस्थापितज्ञेयकर्म्माङ्गतया सामर्थ्योपबृंहितेन सन्निधिनावधारणात्तद्द्वारा कर्म्माङ्गत्वावगतेरभावास्यादौ कर्म्माङ्गभूतयाज्यानुवाक्यादिमन्त्रोच्चारणं न कार्यमिति । मन्त्राणां कर्मसंयोगे स्वधर्म्मेण प्रयोगः स्यात्, धर्म्मस्य तन्निमित्तत्वादितिसूत्रेण पूर्वपक्षयित्वा प्रकरणेनाध्ययनाङ्गतया ऽवधारितस्यान्यार्थत्वे प्रमाणाभावादविघ्नपरिसमाप्त्यर्थत्वेन तदुपयोगसम्भवात्कर्म्माङ्गत्वाभावेन कर्म्मकाले ऽध्यायानध्यायादिधर्म्मानादरेणाभावास्यादावपि कर्म्माङ्गमन्त्रोच्चारणं कार्यमिति विद्यां प्रतिविधानाद्वा सर्वकालं प्रयोगः स्यात् कर्म्मार्थत्वात्प्रयोगस्येति सूत्रेण सिद्धान्तयिष्यते । केनोपकारेणाध्ययनाङ्गत्वं कर्म्मजातस्येत्य-

१ तत्संबन्धस्मरणादिति २ पु० पा० अयमेव समीचीनः प्रतिभाति ।

पेक्षायामविघ्नार्थत्वं भाष्यकृतोक्तमुपपादयति * सम्प्रदायाङ्गत्वे ऽपि चेति * विघ्ने सत्यध्ययनेनाक्षरग्रहणस्य कर्त्तुमशक्यत्वात् तत्सिध्यर्थमविघ्नमेवापेक्षितं * तादर्थ्यस्मरणाच्चेति *

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टमीपौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥

इत्यादिना धर्म्मजातस्याविघ्नार्थत्वस्मरणादित्यर्थः।प्रकरणावगताध्ययनाङ्गत्वान्यथानुपपत्त्याप्यविघ्नो ऽर्थतो ऽवसीयतइत्याह * न हीति * एतदेव प्रपञ्चयति * यदि तावदिति * नन्वध्ययनजनितज्ञानसाध्यकर्म्मानुष्ठानजन्यापूर्वार्थत्वे ऽपि धर्म्मजातस्य व्रीहिसाध्ययागापूर्वत्वे ऽपि प्रोक्षणस्य व्रीह्यर्थत्वाविघातवदध्ययनाङ्गत्वाविघातः स्यादत आह * अथ पुनरिति * व्रीहीणां यागापूर्वार्थत्वात्तदुत्पत्त्युपयोगिप्रोक्षणादिधर्म्मग्राहकत्वं युक्तम् । अध्ययनस्य क्रत्वनङ्गत्वान्न तत्साम्यमिति भावः।कः पुनरध्ययनस्याविघ्नेनोपकारो जन्यंतइत्यपेक्षायामक्षरग्रहणाख्यकार्ययोग्यतालक्षणमुपकारं दर्शयितुमाह * तस्मादिति * तुल्यसाम्प्रदायिकत्वस्य प्रकृतानर्थक्यनिराकरणोपयोगितां दर्शयति * न चेति * न चाध्ययनादिधर्मनियमस्मृतेर्निमूलत्वेनाप्रामाण्यं शङ्क्यं स्मृत्यधिकरणे स्मृतीनां वेदमूलत्वस्य वक्ष्यमाणत्वादित्याह * नियमस्मृतेश्चेति * तुल्यसाम्प्रदायिकत्वसाधितसामान्योपयोगोपसंहारपूर्वकं तस्य पूर्वसूत्रोक्तस्तुत्यर्थत्वलक्षणविशेषोपयोगसिद्ध्युपयोगितामाह * स चेति * अत्रैवार्थे स्मरणं च दृढमित्यादिभाष्यं योजयति * स्मरणं चेति * इति करणः प्रभृत्यर्थः तत्र स्मरणं च दृढमिति वेदशब्दत्वाभिधाने योजितम् । अतो न प्रमादपाठ इति सामान्योपयोगोपसंहारे इतिकरणस्तस्य विशेषोपयोगित्वे यस्मान्न प्रमादपाठः अतः कारणात्प्रयोजनविशेषापेक्षायां सामर्थ्यात्स्तुत्यर्थतार्थवादानां सिध्यतीतिकरणो हेत्वर्थ व्याख्येय इत्यर्थः। साम्प्रदायिकशब्दो वा धारणाध्ययनपरतयानेन भाष्येण व्याख्यायतइत्याह * अत एवेति * यत्त्वस्मिन्व्याख्याने पुरुषाधीनप्रामाण्यप्रसङ्गादित्यादिना दूषणं पूर्वसूत्रव्याख्योपक्रमे ऽभिहितं तत्परिहरति * सम्भाव्यते चेति * पूर्वोक्तमध्ययनविधिप्रमाणकं सर्वस्य यदस्य प्रयोजनवदर्थपर्यवसायित्वमेतत्सूत्रारूढं कर्त्तुमध्ययनविधिपरतया साम्प्रदायिकशब्दं स्वयं व्याचष्टे * तुल्यं चेति * अनयोरपि व्याख्ययोरेतत्सूत्रोक्तस्य सामान्योपयोगस्य पूर्वसूत्रोक्तविशेषोपयोगसिद्ध्यर्थत्वप्रतिपादनार्थमतो नेत्यादिभाष्यमिति दर्शयितुं ग्रन्थशेषः ॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः
स्याच्छब्दार्थस्त्वप्रयोगभूतः तस्मादुपपद्येत ॥ ९ ॥

सूत्रद्वयेनैव सिद्धान्तसिद्धेरुत्तरसूत्रानर्थक्यमाशङ्क्य पूर्वपक्षनिराकरणपरतया सामान्यतो व्याचष्टे * उक्तेति * अप्राप्तामनुपपत्तिमिति द्वितीयान्तं पदद्वयं साकाङ्क्षत्वादध्याहारेण व्याचष्टे * शास्त्रेति * ह्रस्वपाठे अन्यथाध्याहारमाह * अथ वेति * प्रयोगे हीति सूत्रावयवव्याख्या भाष्ये स्तेयादीनामित्यादिशब्देन, पूर्वोपन्यस्तस्य रोदनादेरपि ग्रहणमिति व्याचष्टे * प्रयोगे हीति * सूत्रशेषं व्याचष्टे * अस्माकं पुनरिति * श्रौतार्थाभिप्रायो ऽर्थ शब्दः प्रयुज्यते ऽनेनेति व्युत्पत्त्या प्रयोजनवचनः प्रयोगशब्दः अविवक्षितश्चार्थः प्रयोजनं न भवतीत्यप्रयोगशब्देनाविवक्षितत्वमुक्तम् । नन्वनुष्ठानविवक्षायां विरोधापत्तेस्तत्परिहारार्थं तस्यैवाविवक्षा वाच्या न श्रौतार्थाविवक्षात आह * न चेति * अतः शब्दार्थे चशब्दः निपातानामनेकार्थत्वात् । विवक्षितत्वे हि श्रौतस्यार्थस्य। प्रयोजनवत्त्वसिद्धये ऽध्याहाराद्विनानुष्ठानकल्पना स्यात् यतस्त्वसौ न विवक्षितः अतः कल्पकाभावान्नाध्याहारादिभिर्विधिकल्पनेत्यर्थः अनेन चानुष्ठानाविवक्षार्थे श्रौतार्थाविवक्षेत्युक्तम् । किं तर्हि विवक्षितमित्यपेक्षायामुत्तरसूत्रवक्ष्यमाणं स्तुत्यर्थत्वमाकाङ्क्षानिवृत्तये ऽभिहितम् । ननु स्तुतेरपि श्रौतार्थकल्प्यत्वादाविवक्षितस्य चासत्यत्वेन कल्पकत्वायोगात्तद्विवक्षापत्तेरपरिहार्यो विरोधो ऽत आह * न चेति * असत्येनापि स्तुत्युपपत्तेर्वक्ष्यमाणत्वान्नास्मत्पक्षे श्रौतार्थविवक्षापत्तिरिति भावः । स्तुत्यर्थत्वमेव वाशब्दार्थास्त्वित्यनेनोच्यत इत्यन्यथा व्याचष्टे * अथ वेति * तदानुष्ठानवचनएव प्रयोगशब्दः प्राप्तशब्दार्थे च भूतशब्द इति न स्वार्थानुष्ठानेनेत्यादिनोक्तम् । ननु भाष्यकारेणाप्राप्ता चा ऽनुपपत्तिरिति प्रथमान्तमेव पदद्वयं पठितं कथं भवतान्यदेव पाठद्वयं व्याख्यातमत आह * त्रयो ऽत्रेति * पाठत्रयविवेकार्थं पूर्वोक्तवाक्यशेषस्मरणायोत्तरो ग्रन्थः ।

गुणवादस्तु ॥ १० ॥

यदा शब्दार्थस्त्वप्रयोगभूत इत्यनेन श्रौतार्थाविवक्षोक्ता तदा गुणस्य वाद इति षष्ठीसमासाश्रयणादन्येन स्तुत्यर्थत्वं सिद्धान्तसूत्रोक्तं पूर्वसूत्रनैराकाङ्क्ष्याय स्मार्यते स्वार्थासत्यत्वे वा कथं स्तुतिरित्यपेक्षायां गुणाद्वाद इति पञ्चमीसमासाश्रयणेन स्वार्थसत्यत्वानादरो

ऽभिधीयते । यदा तु स्तुत्यर्थत्वमेव शब्दार्थस्त्वित्यनेनोक्तं तदा विधिस्तुत्योर्भिन्नविषयत्वे कथं विधायकानुग्रहार्थत्वमर्थवादस्येत्याशङ्कानिराकरणार्थमेतत्सूत्रमिति भाष्यकारेण व्याख्यातम् । तत्र भिन्नविषयत्वे स्तुत्यर्थत्वासम्भवपरिचोदनादेकविषयत्वे स्तुतिस्त्वं पूर्वपक्षिणो ऽभिमतमिति कस्य चिच्छङ्का स्यात्ततश्च सो ऽरोदीदित्यादिसम्भवचोद्यानुपपत्तिरित्याशङ्क्याभ्युपेत्य वादमात्रेणेतरत्राङ्गीकृत्य भिन्नविषयत्वे तावत्परिचोदनेति व्याचष्टे *यत्र तावदिति * गौण इति तद्धितं पञ्चमीसमासप्रदर्शनपरतया व्याचष्टे * गुणादिति * उपचारश्चात्र गुणशब्देनाभिप्रेतः यत्सम्बन्धिनीति सम्बन्धिशब्दः क्रियापेक्षः प्रकृत्यपेक्षो वेति द्वेधा व्याचष्टे * यत्क्रियाया इति * अभिजनसंस्तवेन चेत्यादिभाष्यार्थमाह * यत्रेति * अभिजायते अस्मादितिव्युत्पत्त्योत्पत्तिस्थानमभिजनशब्देनोच्यते। अश्मकशब्दो जनपदविशेषवाची । कीदृशी स्तुतिरित्यपेक्षामाह * एतस्यास्त्विति * वेतसशाखया ऽवकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचं शमयतीति श्रूयते । तत्र वेतसावकयोर्विधेयत्वेन स्तुत्यर्हत्वात्तदर्थे वापां स्तुतिप्रतीतेः शान्ताभिरिति सहयोगे तृतीयाश्रयणेनाद्भिः सहचरितः सम्बन्धो वेतसावकीरूपो विकारः प्रकृतिगुणयोगेन शान्तत्वादस्येति सर्वनामोपात्तस्य यजमानस्य कष्टापरपर्यायां शुचं शमयतीति वेतसावकयोरनेन प्रकारेण स्तुतिरित्यर्थः रोदनाद्युदाहरणत्रये केवलमेव गुणवादसूत्रं स्तुत्यसम्भवपरिहारार्थतया भाष्यकृता व्याख्यातम् । तस्य गुणवादप्रकारशेषानिरूपणेनासामर्थ्यमाशङ्क्याह * गुणवादेति * रोदननिमित्तस्य शब्दस्य दर्शनादित्यादिनोक्तस्तत्सिद्धिकरत्वादिः प्रकारविशेषो यावत्तत्सिद्धिसूत्रे वक्ष्यमाणतया नालोच्यते तावच्छुद्धैनेवेति तावच्छब्दस्यार्थः तेनाद्युदाहरणेष्वपि तर्हि सूत्रान्तरानर्थक्यं स्यादत आह * शेषेति * ननु तत्सिद्धिसूत्रेण गुणवादप्रकारविशेषनिरूपणे स्तेनाद्युदाहरणेष्वपि शुद्धस्य गुणवादसूत्रस्य स्तुत्यसम्भवपरिहारसामर्थ्यादनिरूपणे वा रोदनाद्युदाहरणेष्वप्यसामर्थ्यार्त्तिं कृतेयं व्यवस्थात आह * तत्रेति * यद्यपि तत्सिद्ध्यादीनां षण्णामेव गौणवृत्तिप्रकारत्वात्सर्वप्रकारविशेषनिरूपणं तत्र करिष्यते तथाप्यस्मिन्नुदाहरणे ऽयं प्रकार इति स्तुत्युदाहरणनिष्ठतया सूत्रेणानिरूपणार्त्तिं चित्सारूप्याद्युदाहृतानां स्तेनं मन इत्यादीनां संबन्धितयैवोच्यते स्वप्राधान्येन तु तत्र सर्वं गौणतानिमित्तं वक्ष्यतइति प्राधान्यवाचिना परशब्देनोक्तं गौणवृत्तिलक्षणकथनमात्रपरत्वात्तत्सिद्धिसूत्रस्येति

भावः । रोदनार्थवादे च गुणवादसूत्रयोजनार्थं विध्येकवाक्यत्वं विनार्थवादान्वययायोगात्पूर्वं विध्येकवाक्यत्वमेव साङ्क्षात्वे भाष्ये सो ऽरोदीदित्यादिना प्रश्नपूर्वकं भाष्यकृतोपपादितं तद्व्याचष्टे * सो ऽरोदीदिति * यद्यपि निन्दानिषेधयोरत्रैकवाक्यत्वं तथापि सर्वोदाहरणगतानामाकाङ्क्षाहेतुकविध्येकवाक्यत्वप्रतिपादकभाष्याणां साधारणो ऽयं व्याख्याग्रन्थ इति सूचयितुमुपलक्षणार्थं विधिस्तुत्योरित्युक्तं, प्रत्ययवयवमित्यनेन पदानामिति बहुवचनार्थो दर्शितः अन्यथा हि पुरास्य संवत्सराद्रुद्रो रोदनं भवतीत्यनेनैव निन्दासिद्धेः शेषपदानामानर्थक्यं स्यात् । अवान्तरपदवर्गाभिप्रायश्चात्र पदशब्दः । एतदर्थवादोपक्रमस्य देवासुराः सम्यन्ताआसन्ते देवा विजयमुपयन्तो ऽग्नौ वामं वसुसन्यदधतेदमुतो भविष्यति यदि नोजेष्यन्तीति तदग्निर्न्यकायत तेनापाक्रामत्ते देवा विजित्याबरुरुत्समाना अन्वायन् तदस्य सहसा दित्सन्तेत्यस्याप्येकवाक्यत्वसिद्ध्यर्थं रोदीदित्यादिभाष्यं व्याचष्टे * स इतीति * स इत्युक्ते तस्य प्रकृतस्य प्रत्ययादित्यर्थः । यद्वा स इत्यस्य सर्वनामस्वपाठात्कथं प्रकृतापेक्षत्वमित्याशङ्क्य सर्वनामतच्छब्दादेशेन स इत्यनेन स्थानिनस्तच्छब्दस्य प्रत्ययादित्यन्यथा व्याचष्टे * अथ वेति * तद्रजतमित्यस्य भाष्यकारेणानुपन्यासात्स्वयं तत्संबन्धं दर्शयति * एवमिति * उपपत्तिश्चेति भाष्यं व्याचष्टे * सर्वा चेति * उपरितनस्येत्युक्ते ऽप्युपरितनग्रन्थोपन्यासस्य प्रयोजनमाह * को ऽसाविति * हेतुत्वेनेति भाष्यं व्याख्यातुमाशङ्कते * केनेति * रजतदानस्य रोदनोत्पादकत्वे को हेतुरित्यर्थः । उत्तरत्वेन भाष्यं व्याचष्टे * तदुपपाद्यतइति * भाष्ये ऽयमिति पूर्वोक्तरोदनप्रभवत्वरूपार्थपरामर्शः । पूर्वोपन्यस्तस्य निषेधस्य पुनरुपन्यासे प्रयोजनमाह * तस्मादिति * कथं विधेरुपकुर्वन्तीति पृष्ट्वा गुणवादेनेत्यादिनोक्तत्वेन गुणवादसूत्रं भाष्यकृता योजितं तद्व्याचष्टे * निन्दयेति * दोषसङ्कीर्त्तनात्मकत्वान्निन्दाया गुणशब्दानुपपत्तिमाशङ्क्य तत्प्रतिषेधस्येत्यादिभाष्यकृतोक्तं कथं पुनरित्यादिना निरालम्बनस्तुत्यनुपपत्तिमाशङ्क्यालम्बनाभिधानपरतया पुनरेतदेव सूत्रं योजितं तद्व्याचष्टे * गुणवादश्चेति * अरोदीदित्यस्यालम्बनप्रतिपादनार्थं रुद्र इत्यादिभाष्यं व्याचष्टे * रुद्रशब्देति * रोदिते रोदनार्थत्वाद्रक्प्रत्ययस्य च कर्त्रर्थत्वाद्रोदनकर्तृवाची रुद्रशब्दो व्याकरणादवगम्यते तस्य च त्वमग्ने रुद्रो असुरो महो दिव इत्यादावग्नौ प्रयोगदर्शनाद्रुद्रो वा एष यदग्निरिति चार्थवाददर्शनाद्रुद्रमग्निं द्विजाः प्राहुरिति * चारण्यकपर्वणि

कुमारसम्भवोपाख्यानदर्शनात् * प्रस्तरे यजमानकार्यकर्तृत्ववत्तत्कार्यकारित्वेन रोदनकर्तृत्वकल्पनेत्यर्थः तैत्तिरीयकशाखागतार्थवादादर्शनादग्नौ रुद्रशब्दो ऽस्माभिर्व्याख्यातः। अन्येषां तु कपर्दिनीमं रुद्रशब्दं व्याचक्षाणानामभिप्रायं न विद्मः। अश्रुप्रभवत्वाभिधानालम्बनप्रतिपाद्यनार्थं वर्णसारूप्यादितिभाष्यं व्याचष्टे * अश्रुणश्चेति* यदि नामेत्यनेन द्रवत्वमात्रेण वैलक्षण्यमित्युक्तम् । अनेन चान्यत्र प्रकृतिविकारयोः सादृश्यदर्शनादिहापि सादृश्येन प्रकृतिविकारभावोत्प्रेक्षा दर्शिता । रोदनं भवतीत्यस्यालम्बनाभिधानार्थं निन्दन्नेवेति भाष्यं व्याचष्टे * धनत्यागेनेति * नन्वेवमपि मुख्यस्यार्थस्यासत्यत्वात्तल्लक्षिता निन्दाप्यसत्या स्यादत आह * एवमिति * नाविनाभावेनोपाख्यानादेर्मुख्यस्यार्थस्य स्तुतिनिन्दालक्षकत्वं किं तु विधिनिषेधापेक्षितस्तुतिनिन्दारूपार्थप्रतिपादनोपायमात्रत्वेनोपाख्यानाद्यर्थवादैः प्रतिपाद्यते। न चोपायमात्रत्वेनःकल्पितस्यासत्त्वं तदुद्वारार्थप्रतिपत्तेरसत्यत्वं प्रतिपादयति। किंवादेरसत्यत्वे ऽपि तदुद्वारस्य शब्दान्वाख्यानस्य सत्यत्वदर्शनादिति भावः । वपोत्खननार्थवादस्य विध्येकवाक्यत्वप्रतिपादनार्थं तथेत्यादिभाष्यं व्याचष्टे * एवमिति* कथं गुणवाद इत्यनेन कीदृशी स्तुतिरिति पृष्ट्वेत्थं नामेत्यादिना स्तुतिस्वरूपं भाष्यकृता दर्शितं तद्व्याचष्टे * आत्मेति * ईदृश्यपि स्तुतिर्भवतीति दर्शयितुं दृष्टान्तमाह * यथेति * कथं पुनरित्यनेनासदृवृत्तान्तान्वाख्यानानुपपत्तिमाशङ्क्योच्यतइत्यादिना किमसतार्थेन स्तुत्यसम्भवाभिप्रायेयमाशङ्का निरालम्बनान्वाख्यानासम्भवाभिप्राया वेति विकल्प्याद्ये कल्पे तावदपारमार्थिकस्याप्युपायत्वं किंवादिवत्सम्भवतीत्युक्तं तदुपपादयति * वृत्तान्तेति * अनेन चोपाख्यानानामसत्यत्वे ऽपि तत्रार्थवादानामतात्पर्यात्तात्पर्यगोचरीभूते च प्राशस्त्याप्राशस्त्यरूपे ऽर्थे सत्यत्वान्न तावदप्रामाण्यापत्तिरित्युक्तम् । कथं पुनरसत्यस्य पारमार्थिकस्तुतिनिन्दोपायत्वमित्याशङ्क्याह * शब्दभावनाङ्गं वेति * अयमाशयः धूमादेर्ज्ञानापेक्षत्वे ऽपि अर्थरूपेण कारणत्वात्तस्य चार्थाभावे ऽपि तद्विषयत्वरूपेण सत्यत्वाद्रज्जुसर्पज्ञानस्येव भयकारणत्वं युक्तमेवोपायत्वमिति । अर्थसत्तामपेक्षत्वप्रदर्शनायैव सा चेत्याद्युक्तम् * प्रवर्ते ऽहमिति * विज्ञानोत्पादे यः शब्दस्य व्यापारः स एव शब्दभावनाशब्देनोच्यते। एवं विधविज्ञानोत्पादकत्वमेव शब्दस्य प्रवर्त्तकत्वं न तु वाद्यादिवदौदासीन्यप्रत्यावकत्वम् । यथोक्तम् ।

प्रवर्ते ऽहमिति ज्ञानं येन शब्देन जन्यते ।

स चोदनोच्यते यद्वा प्रवर्त्तनफला मतिः ॥

इति तदेवाह प्रवृत्तिविज्ञानशब्देनोक्तम् । तन्मात्रेण शब्दभावनोपयुज्यते प्रवर्त्ते ऽहमिति विज्ञानं यावता प्रवर्त्यस्योत्पाद्यते तावन्मात्रेण पर्यवस्यति नातिरिक्तमपेक्षतइत्यर्थः । तच्चार्थसत्तानपेक्षात्प्राशस्त्यज्ञानमात्रात्सिद्ध्यतीति दर्शयितुं नार्थेनेत्युक्तम् । केचित्तु प्रकृतोपयोगानुसारेणैवं व्याचक्षते तत्प्रवृत्त्यङ्गभूतप्राशस्त्यविज्ञानमात्रेण सोपयुज्यते । प्रवृत्त्युत्पादे समर्थो भवतीति । नन्वेवं सत्युपाख्यानवत्स्वर्गयागादिसाध्यसाधनभावसङ्कीर्त्तनस्यापि प्रवर्त्तनोपायमात्रत्वापत्तेरसत्यता स्यादत आह * अर्थात्मिकायां त्विति * उपाख्यानानामपुरुषार्थोपयिकत्वेन वेदस्य तत्राव्यापारात्प्रमाणान्तरानुपलब्धेश्चासत्यत्वं ज्ञातं । साध्यसाधनभावे तु वेदस्य व्यापाराभावे निष्फलत्वापत्तेरतुल्यत्वम् । वेदप्रतीतस्यापि तु प्रत्यक्षविरोधे ऽसत्यता स्यान्न त्वसावस्तीत्यविसंवादग्रहणेनोक्तं शब्दभावनायामपीतिकर्त्तव्यताभूतप्राशस्त्यज्ञानोपायमात्रे कस्मिंश्चिद्विसंवादो न तु पुरुषप्रवृत्तिविधिज्ञानप्राशस्त्यज्ञानरूपे साध्यसाधनेतिकर्त्तव्यतांशे अर्थभावनायां त्वितिकर्त्तव्यतोपाये ऽपि द्रव्यदेवतादौ न विसंवाद इति सर्वत्रेत्यनेनोक्तम् । एतदेव प्रश्नपूर्वकं विवृण्वन्नाह * अथेति * उत्तरमाह * सुतरामिति * स्वार्थसत्यत्वेन तात्पर्यशङ्कायां स्तुतिपरत्वानिश्चयादितिभावः । एतदेवोपपादयति * कामामिति * इति ब्रवीतीतिकरणो ऽर्थवादगताभिधानप्रकारनिर्देशार्थः । अनेन वपोत्खननादिना प्रकारेण गुणवन्तमर्थं ब्रवीतीत्यर्थः । नन्वर्थसत्तानपेक्षप्राशस्त्यज्ञानमात्रात् । प्रवृत्तावनाप्तोक्तेनापि प्रवृत्तिः स्यात् अत आह * ततश्चेति * नन्विष्टानिष्टप्राप्तिपरिहारहेतुत्वाद्राजादेरनतिक्रमणीयत्वं स्यात् वेदस्य तत्कथमत आह * वेदश्चेति * इष्टानिष्टसाधनबोधकत्वाद्वेदो ऽप्यनतिक्रमणीय[1] इति भावः । ततः किमिति चेदत आह * तेनेति * येन कारणेन वेदः प्रमाणं तेन कारणेन तदनुरूपं व्यवहर्त्तव्यमित्यर्थः । प्राशस्त्याप्राशस्त्यज्ञानयोरसत्योपायकत्वेनासत्यत्वादनादरमाशङ्क्योपायासत्यत्वे ऽपि वेदकृतत्वेनानयोः सत्यत्वं दर्शयितुम् * प्रवृत्तीत्याद्युक्तम् * ये इह विधेयनिषेधार्थविषये प्राशस्त्याप्राशस्त्यज्ञाने भवतस्ते वेदेनोपादिते यस्मात्तस्मात्तदनुरूपमिति यस्माच्छब्दाध्याहारेण योज्यं ज्ञानोत्पत्तौ विप्रतिपत्तिं निराकर्त्तुम् * स्वसंवेद्यत्वमुक्तम् * वेदादरणीयत्वाय प्रवृत्तिनिवृत्त्यनुग्राहकत्वाभिधानम् ।

---

१ राजानतिक्रमणीय; र्यादिति २ पु० पा०

अनुग्राहकत्वोपपादनाय पुंग्रहणं न चैतदलौकिकमित्याह * लोके ऽपीति * प्रवर्त्योभिप्रेतसौभाग्याद्यपेक्षया वचामक्षणादि-क्रियाफलस्य मेधादेः फलान्तरत्वाभिधानम् । तदित्यव्ययं पञ्चम्यर्थो नियोगं परामृशति तस्मान्नियोगात्प्रवृत्तः क्रियाश्रयंतन्निमित्तं मेधादिफलं प्राप्नोतीत्यर्थः । ननु सौभाग्यादेरपारमार्थिकत्वे यो न जानाति स एव प्रवर्त्ततां यस्तु प्ररोच्यमानः स्वाभिप्रेतफलासत्यत्वं जानाति स कथं तदुद्देशेन प्रवर्त्ततइति तदाह * यद्यपि चेति * तदसत्यत्वे ऽपि आप्ताभिप्रेतफलानुमानेन,प्रवर्त्ततइत्यर्थः तत्प्रकृते योजयति * एवमिति * ननु यदि प्ररोचनावगतफलानुसारेण न प्रवृत्तिः किमुद्दिश्य तर्हि प्रवृत्तीति तत्राह * यस्त्विति * परस्मादनुष्ठानोत्तरकालं यत्फलं भविष्यति तत्विधेरुपगतमिति विध्याश्रयं तत्प्रमाणकमित्यर्थः उपसंहरति * तस्मादिति * प्रमाणान्तरेप्वपेक्षितार्थलाभेनोपायासत्यत्वं व्यवहारं दर्शयतीत्याह * न हीति * शुक्तिकायामदृष्टं सत्यं पारमार्थिकं रजतं येन स तथोक्तः विफलारम्भताभिसन्धानम् । अथालम्बनसद्भावात्तत्र व्यवहारसिद्धिस्तदत्रापि समानमित्याह * शुक्तिकावदिति * कथं पुनरनुखिन्नायामित्यस्यैव चोद्यस्येह निरालम्बनान्वाख्यानासम्भवाभिप्रायकत्वं कथं पुनर्निरालम्बनमन्वाख्यायतइत्यनेनाशङ्क्य नित्यः कश्चिदित्यादिना भाष्येण त्रिविधालम्बनाभिधानेन निराकृतं तद्व्याचष्टे * यथेहेति * यथेत्यनेनासत्वृत्तान्तान्वाख्यानं स्तुत्यर्थेनेत्यादेः परिहारस्य सर्वसदन्वाख्यानविषयत्वं सूचितम् । अत एव पूर्वफक्किकायां सर्वत्रेत्युक्तम् । वृष्ट्यादीनां वपात्वं मध्यवर्त्तिसारत्वलक्षणगुणयोगेनोपपादयति * वाय्वादीनामिति * वृष्ट्युत्पत्त्यवसानयोर्वायवायतत्वात्तन्मध्यवर्त्तित्वं सनेम्यश्वं मरुतो जुनन्त्रीत्यादौ च वृष्टिहेतुत्वेन वायुस्तुतौ तत्सारत्वं वृष्टेः । अवकाशाभावे वायोरवृत्तेस्तन्मध्यवर्त्तित्वं वायुरहितस्य चापवरकाद्याकाशस्योष्मदुःखोत्पादकत्वात् तत्सारत्वे रश्मेरादित्यावयवत्वात् । तन्मध्यवृत्तित्वं रश्म्यायत्तत्वाच्च प्रकाशकत्वस्य तत्सारत्वम् । तामग्नाविस्यादिभाष्यं व्याचष्टे * तामग्नाविति * वैद्युतस्याबिन्धनत्वप्रसिद्धेस्तत्र वृष्टेर्निक्षेपकल्पना । ऋचीशशब्दस्य शरीरवाचित्वात्तदन्तर्वर्त्यग्निरार्चीशो ऽभिधीयते तस्मिन्वायोर्निक्षेपकल्पनायामालम्बनमन्तश्चरत्वसामान्यमादित्यो वा ऽस्तं यन्नग्निमनुप्रविशतीत्यादिदर्शनात् स्वरूपेण स्वर्गस्थस्यादित्यस्य भूमिष्ठाग्निप्रवेशायोगाद्रश्मि-

१ वपरात्ति २ पु० मा०

प्रवेशकल्पना । बीजादिष्वजशब्दप्रयोगे निमित्तमाह * ततो ऽज इति * व्रीह्यादेरन्नस्योष्मणा विना प्ररोहादर्शनात्तस्य च तेजोगुणत्वाद्दाग्नेय्यो ह्योषधय इति च लिङ्गादग्न्युदकसंयोगजत्वावगतेस्तत्सामान्यात् वृष्टैवैद्युतसंयोगस्य कारणत्वाभिधानम् । जाठराग्निपाचितस्यान्नरसस्य व्यानाख्येन वायुविशेषेणार्बीजभूतेभ्यो विण्मूत्रादिभ्यो विविक्तीकृतस्य चरमधातुरूपेण परिणामाद्व्रायोर्बीजकारणत्वाभिधानं वीरुधादेर्व्रीह्यादिवदेव भौमाग्निजन्यत्वाग्निदाघकाले च प्ररोहदर्शनेनादित्यरश्मिजन्यत्वावगमाद्रश्म्यग्निसंयोगजन्यत्वं लभेः प्राप्तौ स्मरणात्। तदर्थतयोपयुज्येति पदं व्याचष्टे * तमालभ्येति * अन्नादिसेवनस्य प्रजापशूत्पत्तिकारणत्वाभिधानालम्बनमाह * सर्वप्रजानामिति * एतच्च व्याख्यानत्रयं वैकल्पिकं युगपद्दर्शितं तदू दूषयति * एतस्मिन्नित्यति * प्रक्रमो रीतिर्व्याख्यानप्रकार इति यावत् । एवशब्देन स्तुतिसिद्ध्यर्थसालम्बनत्वानुरोधेन प्रधानभूतस्तुतिबाधो ऽङ्गिगुणविरोधन्यायादयुक्त इति सूचितम् । स्वमतेन व्याख्यातुं प्रतिजानीते * अत इति * सृष्ट्यादिविषयमेतदुपाख्यानं व्याख्यातुं तदनङ्गीकारादनुपपत्तिमाशङ्क्याह * मन्त्रेति * वस्तुवृत्त्या सृष्टिप्रलयाभावे ऽपि मन्त्रादिव्याख्यालम्बनत्वेनोपायमात्रतया तदङ्गीकरणमिति भावः। व्याख्यानमाह * तत्रेति*आत्मनः पशुरूपनिर्माणशक्तिद्योतनार्थं योगिग्रहणं पुण्यकर्म्मणामेव मन्वादीनां सृष्ट्यादावुद्भवः पुराणादिष्वभ्युपगम्यते । यद्वा पुण्यस्यैव कर्म्मणः फलदानायोद्भवः ।

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
चतुष्पात्सकलो धर्म्मः सत्यं चैव कृतेयुगे ॥

इति स्मरणात् । ततो ऽजस्तूपर उदगादित्यत्र तत इति पञ्चम्यानन्तर्यप्रदर्शनार्थेति व्याचष्टे * तत इति * वपापुरोडाशाङ्गप्रचारात्मकत्वात्पशुयागस्य वपाप्रचारमात्रेणासमाप्तिः । आनन्तर्याभिधानस्य स्तुत्युपयोगमाह * ईदृशमिति * वपोखननाभिधानस्योपयोगमाह * एवं चेति * सालम्बनत्वाभिप्रायः सत्यशब्दः । प्रसङ्गाद्वृत्तान्तान्वाख्याने ऽपीत्याद्यधस्तनभाष्यं दूषयति * प्रतिसृष्टि चेति * दिङ्मोहोदाहरणे देवशब्दालम्बनमाह * कर्म्मस्त्विति * के त इत्यपेक्षायामृत्विजस्तइत्युक्तम् । दिङ्मोहशब्दालम्बनाभिधानार्थमप्राकृतस्येति भाष्यं व्याचष्टे * देवयजनेति * देवयजन यज्ञभूमिः दृष्टश्च लोके व्याकुलीभावे दिग्भ्रमव्यपदेश इत्याह * तथा चेति * अदितेर्ज्ञापकत्वाभिधानस्यालम्बनप्रतिपादनार्थमवधारणेति

भाष्यं व्याचष्टे * तत्रेति * कथमदितियागेनावधारणास्यावकाशो दीयते अत आह * यावद्धीति * दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेतिदर्शपूर्णमासानन्तरं सोमयागस्तस्य चापूर्वत्वाद्दर्शपूर्णमासयोरनङ्गस्तस्याङ्गजातस्योपस्थापनाद्वयामोहमात्रं प्रायणीयेष्टयापनीयते सा हि सोमस्याङ्गं दर्शपूर्णमासयोश्च विकार इति पूर्वाभ्यस्तदर्शपूर्णमासिकेकर्तव्यतानुष्ठानेन कारिष्यमाणेषु कर्मस्ववधानं भवतीति भावः[1] पथ्यां स्वस्तिमयजन्प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमदित्योर्ध्वामिति मोहापनयेन स्तुतिः।

रूपात्प्रायात् ॥ ११ ॥

अत्र भाष्यकारेण स्तेनानृतवादाद्यर्थवादस्य हिरण्यहस्तधारणपूर्वकग्रहणविधिशेषत्वमुक्त्वा निन्दाया विधिशेषत्वानुपपत्तिमाशङ्क्य निन्दावचनमित्याद्युक्तं तदुपपादयति * इहेति * ननु निन्दया निषेध एव कल्प्यतां किमित्यसावन्यस्तुतिपर्यन्तं नीयते Sत आह * या निन्देति * निषेधैकवाक्यत्वं विना निन्दात्वानवधारणान्न तद्बलेन निषेधकल्पनं युक्तम्। न चैवमानर्थक्यापत्तिः निन्दामात्रपर्यवसानाभावादिति भावः। कथमस्या विधिशेषतेत्याशङ्क्याह * तदुपपादनस्येति * वक्ष्यते च दशमे विधिसन्निधौ श्रुताया निन्दाया निषेधाकल्पनेन विधेयस्तुत्यर्थत्वमित्याह * यथेति * जर्तिलयवाग्वा वा जुहुयाद्वधिुकयवाग्वा वा जुहुयान्न ग्राम्यान्पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वैजर्तिलाश्च गवीधुकाश्च पयसा Sग्निहोत्रं जुहुयादिति विधेः अनाहुतिरिति च निन्दया निषेधानुमानाद्विधिनिषेधाविति प्राप्ते सिद्धान्तायिष्यते। न चेदन्य प्रकल्पयेत् प्रकल्पनार्थवादः स्यादानर्थक्यात्परसामर्थ्याच्चेति। शिष्ट्वा तु प्रतिषेधः स्यात् इति पूर्वाधिकरणसूत्रानुषङ्गेणेदं योज्यम्। न चेदन्यं विधिं प्रकल्पयेद्यद्यत्र प्रत्यक्षो विधिः सन्निहितो न स्यात्ततः षोडशिग्रहणवाक्यवदेकेन शिष्ट्वा परेण प्रतिषेधः स्यात् इह तु पयसा Sग्निहोत्रं जुहुयादिति विध्यन्तरस्य प्रकल्पितत्वात्तच्छेषभूतो Sयमर्थवादः स्यात्, अन्यथा निषेधैकवाक्यत्वं विना निन्दात्वानवधारणेनानाहुतित्वकीर्त्तनस्य निषेधकल्पकत्वासम्भवादानर्थक्यापत्तेः। कथं चित्कल्पितस्यापि वा निषेधस्य षोडशिग्रहणनिषेधवद्विकल्पार्थत्वात्तस्य चात्र पयः प्रभृतिद्रव्यान्तरविधानादेव सिद्धेरानर्थक्यापरिहारात् यवागूस्तुतिनिन्दयोः कथं पयःस्तुत्यर्थत्वमित्याश-

---

[1] षष्ठं पा० २ पु० ना०

कृष्य परस्तामर्थ्यादेत्युक्तं ग्राम्यारण्यपशुहिंसानापादकत्वेन प्रशस्तानामपि अग्निलगवीधुकानां पयःप्रयोगापेक्षया दुष्टत्वात्पयः प्रयस्तनरमिति परेण पयोविधिनान्वये सामर्थ्यादित्यर्थः । एवं चैकवाक्यत्वे सम्भवत्येनकाङ्क्षानुबन्धिवाक्यभेदापादकविधित्वाङ्गीकरणायोगात् जुहुयादिति लिङो ऽपि स्तुत्यर्थत्वसिद्धिः ।

दूरभूयस्त्वात् ॥ १२ ॥

धूमार्थवादस्य भाष्यकृता मिश्रालिङ्गमन्त्रविधिशेषत्वमुक्तम् । तदुपपादयति * तस्मादिति * उदाहृतयोर्मिश्रालिङ्गत्वं दूषयति * कथं पुनरिति * परमतेन समाधत्ते * केचिदाहुरिति * तद् दूषयति * तदयुक्तमिति * न केवलं प्रमाणाभावात् ज्योतिः शब्दस्याग्निसूत्रशब्दपर्यायत्वाभावः किं तु बाधकसद्भावादपीत्याह * अन्यतरेति * भाष्यानादरेण स्वयं मिश्रालिङ्गमन्त्रविधिशेषत्वमाह * तस्मादिति * अत्रैवार्थे भाष्यं योजयति * अस्मिन्नपि त्विति * अनेन च प्रातरितीतिकरणः काकुत्वेनैवं व्याख्यातः सत्यप्यस्मिन्प्रक्रमे यदग्नये च प्रजापतये च सायं जुहोति यत् सूर्याय च प्रजापतये च प्रातर्जुहोतीत्यग्निसूर्ययोः केवलयोर्देवतात्वेन विहितत्वात्केवलदेवत्यमन्त्रयोर्लिङ्गतो ऽपि प्राप्तिसम्भवे मिश्रालिङ्गमन्त्रविधिपर्युदस्तप्रतिप्रसवमात्रार्थत्वेन केवलदेवत्य मन्त्रविधानस्य स्तुत्यनाकाङ्क्षत्वान्नास्य तच्छेषतेति तत्पर्युदासेन मिश्रालिङ्गयोरपूर्वस्य विधानस्याकाङ्क्षितत्वात्तच्छेष इति । एवं भाष्यकारमतेन ब्राह्मणेनाप्यग्निसूर्यविधिमङ्गीकृत्य केवललिङ्गमन्त्रविधेस्तदर्थशास्त्रतादोषपरिहाराय प्रतिप्रसवमात्रार्थत्वात् स्तुत्यनाकाङ्क्षतोक्ता । इदानीमाधाराग्निहोत्राधिकरणे वाक्यभेदभयाद् ब्राह्मणे चाग्निसूर्यविधेर्निराकरिष्यमाणत्वाल्लिङ्गतः प्राप्त्यभावात् तदर्थशास्त्रत्वाभावेनापूर्वविधित्वात् स्तुत्याकाङ्क्षोपपत्तेरस्यैवायं शेष आह * अथ वेति * यद्यप्यनयोर्विध्योर्मध्ये पठितस्तथापि मिश्रालिङ्गविधेर्यदग्नये स्वायं जुहुयादासूर्याय वृश्चेत् यत्सूर्याय प्रातर्जुहुयादासूर्याय वृश्चेत देवताभ्यः सम । दन्दह्यादग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं होतव्यं सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातस्तयोरुभाभ्यां प्रातर्न देवताभ्यः सम दन्दह्यातीति देवताद्रोहापादकत्वेन केवलदेवत्यनिन्दापूर्वकस्य देवताद्रोहानापादकत्वलक्षणप्रशंसान्तरसद्भावेन निराकाङ्क्षत्वात्केवलदेवत्यविध्योरेषायं प्रशंसेत्यर्थः । भाष्यं चैवमस्मिन्नर्थे योज्यं, मिश्रालिङ्गयोरित्यनादरे षष्ठी सप्तमी वेयं

सतोरपि सन्निधौ मिश्रलिङ्गयोर्मन्त्रयोर्विहितयोः प्रशंसान्तरसद्भावेन तयोः स्तुत्यनाकाङ्क्षत्वादुद्दाहृतकेवललिङ्गमन्त्रविधानस्यैवेयमाकाङ्क्षितत्वाच्छेष इति । अस्मिन्पक्षे स्तुतिस्वरूपं दर्शयति * यस्माद्देवेति * व्यवस्थितशब्देनोभयोरित्यादिभाष्यं नक्तमग्नेर्दिवा च सूर्यस्य सन्निधाने व्यवस्थया होम इत्येवं व्याख्यातम् । जुहोतिचोदितस्याप्युद्देशांशे भागरूपे देवतान्वयमभिप्रेत्य यष्टव्यावित्युक्तम् । पूर्वव्याख्याने तूभयशब्दो मिश्रवचनः । दूरभूयस्त्वादित्यदर्शनाभिधानालम्बनप्रतिपादनार्थं भाष्यं प्रश्नपूर्वं व्याचष्टे * कथं त्विति * दूरस्थस्य भूयस्त्वेन यद्दर्शनं नाम दर्शनगतो ऽतिशयो ईक्षिणा लक्षितः स नञा निषिध्यते पशुशब्दलक्षितमिव प्राशस्त्यमपशुशब्देन अपशवो वा अन्ये गोअश्वेभ्य इत्यनेन नञेति भावः * केन चिदिति * दूरभूयस्त्वांशेनादर्शनं स्तुतेरालम्बनमित्यर्थः ।

स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् ॥ १३ ॥

न चैतद्विद्म इत्यस्य प्रवर प्रक्रियमाणे ब्रूयादित्येतद्विधिशेषत्वे भाष्यकृतोक्तम् । तत्र विध्यंशपूरणपूर्वकं स्तुत्युपयोगित्वमुपपादयति * प्रवरइति * अज्ञानवचनालम्बनाभिधानार्थं दुर्ज्ञानत्वादितिभाष्यं व्याचष्टे * ज्ञायमाने त्विति * दुर्ज्ञाने कथमज्ञानशब्दप्रवृत्तिरित्यपेक्षायामाह * यत्सुखेनेति * पूर्ववदत्रापि ज्ञानगतसौकर्यलक्षणो गुणो विदितो विदिलक्षितो नञा निषिध्यतइत्यर्थः । स्त्र्यपराधेनेति दुर्ज्ञानत्वोपपादनार्थत्वेन व्याचष्टे * तच्चेति * ननु स्त्र्यपराधे ऽपि बीजाधोनिर्बलीयसीत्यनेन न्यायेन मातृब्राह्मण्यमात्रेण क्षात्रिब्राह्मण्येन वा पुत्रे ब्राह्मण्यासिद्धेः कथं दुर्ज्ञानतेत्याशङ्कानिराकरणार्थतया कर्तुश्च पुत्रदर्शनेनेति भाष्यं व्याचष्टे * सत्यपि चेति * किं तत्कर्तुः, पुत्रदर्शनमित्यपेक्षयां माता भस्त्रा पितुः पुत्रो येन जातः स एव स इत्याद्युदाहृतम् । जनकब्राह्मण्यनिमित्ते ऽपि पुत्रब्राह्मण्ये कथं दुर्ज्ञानत्वमत आह * जनयितुश्चेति * साक्षात्कर्तृपुत्रदर्शनं स्वयमुदाहृत्य भाष्यकारीयमुदाहरणं द्योतकत्वेन योजयति * वेदे ऽपि चेति * उपपादितं स्तुत्युपयोगमुपसंहरति * तेनेति * दुर्ज्ञानत्वेनाब्राह्मण्यशङ्कासम्भवादब्राह्मणस्यापि प्रवरानुमन्त्रणाद् ब्राह्मण्यं भवतीत्येवंरूपा प्रशंसा युक्तेत्यर्थः । ननु ब्राह्मण्यस्य मातापितृसंबन्धनिमित्तत्वात्प्रवरानुमन्त्रणाजन्यत्वाभिधानं किमालम्बनमत आह * निरूढेति * निरूढं प्रसिद्धं ब्राह्मण्यं येषां प्रवराणां प्रक्रियमाणानां सङ्कीर्त्यमानानां तेषां

सङ्कीर्त्तनादित्यर्थः ।

आकालिकेप्सा ॥ १४ ॥

सूत्रं व्याचष्टे * यत्तदानीमेवेति * ईप्सापदव्याख्यानार्थं तत्येत्युक्तम् । न यच्चिरभावीत्यनेनाकालिकस्यैवाप्तुमिच्छेति साधारणत्वं दर्शितम् । अनेन चानवक्लृप्तिवचनमनभिमतत्वेनामुष्मिकं निन्दितुमित्युक्तं भवति । आमुष्मिकनिन्दाया विधेः स्तुतिपर्यवसानप्रतिपादनार्थं प्रत्यक्षफलत्वेन स्तुतिरितिभाष्यं व्याचष्टे * तस्मादिति * चिरभाव्यनभिमतत्वादित्यर्थः । अतीकाशाः छिद्राणि प्राग्वंशः पत्नीशाला स्तुतिस्वरूपमाह * तर्ह्यीति * अनवक्लृप्तिवचनालम्बनाभिधानार्थमनवक्लृप्तिवचनमिति भाष्यं व्याचष्टे * तदपेक्षया चेति * अत्रापि यदमुष्मिन् लोकइत्यामुष्मिकफलपरामर्शिना यच्छब्देन तद्वतमभिमतत्वं लक्षयित्वा तस्यानवक्लृप्तिः को वेदेत्यनेनोच्यते । भाष्ये च गौणग्रहणेन रूपात्प्रायादिति पञ्चम्युपात्तगुणवादनिमित्तत्वमनुकृष्याकालिकेप्सा गुणवादनिमित्तमित्येवं सूत्रं योजितम् । कामिनः काम्यमानफलाभिमतेरपि प्रत्यक्षत्वादनवक्लृप्तिवचनानुपपत्तिमाशङ्क्य तदपेक्षयेत्युक्तम् । यथा प्रत्यक्षफलं सर्वाभिमतं नैतत्तथेत्यर्थः । समानकालावाद्यन्तावस्येत्यर्थविवक्षायामन्वाख्यानादाकालिकपदात्तदानीमुत्पत्त्याख्यार्थालाभमाशङ्क्य विशिष्टे ऽर्थे त्वाख्यातमपीदं पदमेककालक्षणया प्रत्यासत्त्योत्पत्त्याख्यैककाल्यवाचीति दर्शयितुमाह * पाठे त्विति * आद्यन्तवचनइतीतिकरणेनोपक्रमोक्ताकालिकपदार्थपरामर्शाद्दीर्घपाठे तदानीमेवोत्पाद्यमानमनेन सूत्रेणाकालिकमन्वाख्यातमित्यर्थः । पाठान्तरमिति क चिद्वार्त्तिकपाठः । तत्र भाष्योपन्यस्तस्यापि दीर्घपाठस्य स्वानभिमतत्वसूचनार्थं पाठान्तरोक्तिः । पूर्वविवक्षितार्थलाभोपपादनाय ह्रस्वपाठव्युत्पत्तिं दर्शयितुमाह * अकालिकामिति चेति * ठस्येकादेशात्कालिकपदासिद्धिः ।

विद्याप्रशंसा ॥ १५ ॥

अनेन सूत्रेण यासौ गर्गत्रिरात्रवेदानुमन्त्रणाविद्या मुखशोभावाजिजन्महेतुत्वेनोक्ता सा गर्गत्रिरात्रवेदानुमन्त्रणयोः प्रशंसेत्युक्त इति गर्गत्रिरात्रविधेरित्यादिना भाष्येणोक्तम् । तत्र विद्यायाः केन चित्पारार्थ्यानवगमात्तद्विषयफलश्रुतेः कथं प्रशंसार्थतेत्याशङ्कानिराकरणपूर्वकं फलाभावसूत्रोक्तमनुपलब्धिविरोधं निराकरोति

* अध्ययनेनेति * अध्ययनविधिना ज्ञानस्याध्ययनफलत्वे वदता निष्प्रयोजनस्य फलत्वायोगात् कैमर्थ्यापेक्षायां सामर्थ्यात्कर्म्मानुष्ठानयोग्यपुरुषकरणार्थत्वेन तच्छेषावगमादित्यर्थः। स्वयं मुख्यया वृत्त्या मुखशोभावाजिमत्त्वानुवादमुपपाद्याधुना भाष्योक्तं गौणत्वमनुसरति * अथापीति * स्तुतिपरत्वादित्यनेन सूत्रोक्तस्य प्रशंसार्थत्वस्यानुपलब्धिविरोधपरिहारार्थत्वं दर्शितम्। घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनमित्याह। प्रसहस्रं पशूनां माप्नोत्यस्य प्रजा जायां वाजी जायते य एवं वेदेत्यत्र यज्ञपतिप्रथमवत् मन्त्राभिधानस्यार्थवादालम्बनत्वसम्भवे ऽपि मन्त्राभिधाने ऽप्यालम्बनाकाङ्क्षानिवृत्त्यर्थं कुले सन्ततेत्यध्ययनश्रवणादित्युक्तम्।

सर्वत्वमाधिकारिकम्॥ १६॥

फलवचनं स्तुतिरिति भाष्येण पूर्णाहुतिपशुबन्धयोः सर्वकामलोकफलत्ववचनमश्वमेधविद्यायाश्च मृत्युतरणादिफलत्ववचनं प्रशंसार्थत्वान्नानुपलब्धिविरुद्धमिति पूर्वसूत्रानुषङ्गेण सर्वत्वमिति सूत्रावयवो व्याख्यातः। तत्सिद्ध्यर्थं पूर्वोक्तमप्यर्थवादविषयत्वं स्मारयति * संस्कारेति * पूर्णाहुतिविद्ययोः संस्कारत्वात्पशुबन्धस्य चारादुपकारककर्म्मत्वादित्यर्थः। सर्वकामफलस्येति भाष्येण सर्वत्वमित्यवयवावृत्त्या सर्वकामावाप्तिवचनालम्बनाभिधानार्थत्वेनैतत्सूत्रं व्याख्यातं तद्व्याचष्टे * स्तुतिस्त्विति * उक्ते ऽर्थे सूत्रं योजयति * सूत्रं चेति * असर्वैषितिभाष्येण सर्वत्वानुपपत्तिपरिहारार्थत्वेन पुनरेतत्सूत्रं व्याख्यातं तदाशङ्क्यापूर्वं विवृणोति * ननु चेति * एकस्मै वा अन्ये यज्ञक्रतवः कामायाद्रियन्ते सर्वेभ्यो ज्योतिष्टोम इत्यधिकृतस्य ज्योतिष्टोमस्य सर्वकामसाधनत्वात्तदङ्गभूतस्य पशुबन्धस्य तद्द्वारा सर्वलोकसाधनत्वं स्तुत्यर्थमुपचारादुक्तमित्येवं सूत्रं योज्यं, विद्योदाहरणे तु पूर्वसूत्रागतविद्याशब्दानुषङ्गेण विद्याप्याधिकारिकीति विपरिणामेनाधिकृताश्वमेधफलं मृत्युतराणादि तदुपकारिण्यां विद्यायामश्वमेधस्तुत्यर्थमुपचारेणोक्तमिति योज्यम्।

फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात्॥ १७॥

अन्वारुह्य वचनस्य प्रयोजनमाह * तच्चैतदिति * दक्षिणापरिमाणसाम्ये ऽपि फलाधिक्यमन्तरेणासारद्रव्यदानेनापि क्रतुसिद्धौ सारद्रव्यदाने प्रवृत्त्ययोगात्सूत्रातिरेकेण भाष्ये सारग्रहणम्।

विशेषमुपपादयति * साधनेति * अत्राशङ्कते * इतिस्थित इति * परिहरति * तदभिधीयतेति * स्थानादपीयं व्यवस्था सिद्धेतीत्याह किं चेति श्लोकं व्याचष्टे * यथैवेति * कर्मगोचर इत्यादिना समुदायाभिप्रायः स्वगोचरशब्दः निर्द्धारणे च सप्तमी व्यवस्थाबचनश्च विभागशब्द इति व्याख्यातः।

ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः।
आभूतसंप्लवान्तं च फलमिष्टं तयोर्द्विज॥

इत्यादिस्मरणादपि व्यवस्थावसीयतइत्याह * स्मरणादपीति * यदग्निहोत्रं जुहोति अथ दशगृहमेधिन आप्नोत्येकया राज्या यदा दश संवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्णमासयाजिनामाप्नोति यदा दश संवत्सरान् दर्शपूर्णमासाभ्यां यजते ऽथाग्निष्टोमयाजिनामाप्नोतीत्याद्यन्यार्थदर्शनादपि व्यवस्थासिद्धिरित्याह * चातुर्मास्यसोमेषु चेति * चातुर्मास्यवत्सोमे ऽपीत्यर्थः।

अन्त्ययोर्यथोक्तम्॥ १८॥

अभागिप्रतिषेधपरिहारे स्तेयानृतवादार्थवादन्यायातिदेशार्थत्वेन यथोक्तपदव्याख्यानार्थं पृथिव्यादीनामिति भाष्यम्। तत्र हिरण्यं निधायेत्यनेन पृथिव्याधारस्यैव हिरण्यस्य विधेः पृथिवीनिन्दानुपपत्तिमाशङ्क्य व्याचष्टे * यथैवेति * एवमपि शुद्धपृथिवीनिन्दामात्रेण हिरण्यस्तुतिसिद्धेरितरनिन्दानर्थक्यादादिशब्दानुपपत्तिमाशङ्क्याह * नान्तरिक्षइति * एतदेव विवृणोति * यथेति * अनित्यसंयोगपरिहारार्थत्वेन यथोक्तपदव्याख्यानार्थं यच्चेति भाष्यं व्याचष्टे * अनित्यसंयोग इति * प्रकर्षेण वहतीति कर्त्तरि प्रावाहणिशब्दव्युत्पत्तिसम्भवात् बबरशब्दस्य च शब्दानुकृतित्वेन नित्यवायुपरत्वोपपत्तेर्नाप्रसिद्धप्रवाहणाख्यपुरुषकल्पनेन तदपत्यपरता नित्यानित्यसंयोगविरोधापादिका कल्पनीयेति भावः। ननु विध्युद्देशप्रामाण्यमात्रेणांशत्रयोपेतभावनानुष्ठानसिद्धेरनर्थवादप्रामाण्यचिन्ता निष्प्रयोजनेत्याशङ्क्याह * प्रयोजनमिति * एतच्चोपलक्षणार्थम्। अक्ताः शर्क्करा इत्यत्र सन्दिग्धनिर्णयस्याश्वप्रतिग्रहेष्टयां व्यवधारणकल्पनस्य वमनेष्टयां च वैदिकसोमवमननिमित्तकत्वस्याष्टावुपभृति गृह्णातीत्यत्र चतुष्टयकल्पनस्य ज्योतिष्टोमशब्दस्य सोमयागपरत्वस्य ध्याय्यानां च समिध्यमानवती समिद्धवत्यन्तरालनिवेशस्य सोमं विद्या प्रजानां चावश्यकत्वस्य द्वयोः प्रणयन्तीत्यस्य च

---

१ चाङ्गेनि पु० २ ना०

मध्यमपर्वद्वयविषयत्वस्यार्थवादप्रामाण्याधीनत्वात् ।

विधिर्वा स्यादपर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १९ ॥

विषयविवेकार्थमिहेतिभाष्यं व्याख्यातुमाह * एवमिति * आनर्थक्यमुपाख्यानम्। आदिशब्दोपात्तं चाद्दृष्टार्थत्वं प्रतियोगिविरोधि येषां तेष्वित्यर्थः । एतच्च पूर्वेणाध्यायषट्केण प्रत्यक्षविदितधर्मकेषु दर्शपूर्णमासादिषु व्याख्यातेषु इदानीमविहितेतिकर्त्तव्यताकेष्वैन्द्राग्नादिषु चिन्तयितुमिष्यतइति सप्तमाद्यभाष्यवत्सर्वेष्वर्थवादेष्वानर्थक्यादिप्रतियोगित्वेन व्याख्यातेषु यथासम्भवं केषु चिद्विधिप्रतियोगितेदानीं विचार्यतइति विशेषकपरं[1] व्याख्येयम् । पूर्णाहुत्याद्यर्थवादानां विद्धिवान्निगदार्थवादानामपि व्याख्यातत्वात्किमस्येति सन्देहभाष्यं पूर्वपक्षासम्भवेनाक्षिपति * कुत इति * सन्देहसमर्थं चतुर्द्धा पूर्वपक्षं सम्भावयति * पूर्वत्र हीति * श्रौतत्वमनेन विधित्वाङ्गीकरणे कारणमुक्तम् । अनन्यलभ्यत्वाच्च विधिरित्याह * विध्यंशश्चेति । इत्युक्तामिति * विध्युद्देशस्यैव द्वे शक्ती कल्पयिष्याम इत्यत्रेत्यर्थः।प्रधानत्वादपि विधिरित्याह *अपि चेति* विशेषणशब्देनाङ्गमुक्तम् । प्रधाने विशेषणे च यत्सम्भवति तत्रेत्यर्थः । प्राथम्यादपीत्याह * समाप्ते चेति * फलरूपश्चात्र भावनांशो विधेयो ऽभिप्रेतः तस्य च सर्वादौ निवेशः प्रथमाकाङ्क्षणादितरयोस्तु तादर्थ्येन तस्यैव प्राधान्यादित्याह * विशेषेण त्विति * आसामुपपत्तीनां सूत्रकाराभिमतत्वं दर्शयितुमाह *इत्यादीति* श्रौतस्यार्थान्तरपूर्वत्वाभावादनन्यलभ्यस्य चानन्यकारणकत्वात्प्रधानस्य विधेयान्तरापेक्षाभावादपूर्वशब्दे न लक्षणा, प्राथम्यं तु न विद्यते ऽस्मात्पूर्वमिति बहुव्रीहिणा बोध्यते । आदिशब्देन त्वर्थान्तरपूर्वत्वाभाव एवोच्यते । ननु स्तुतेरपि पूर्वाधिकरणे अर्थवत्त्वोपपादनादानर्थक्याभिधानमयुक्तमत आह * तदपेक्षयेति * पौनरुक्त्यमाशङ्क्ते * ननु चेति * एकस्यार्थस्याद्विरुक्त्यानर्थक्ये ऽप्यस्य प्राथम्यादपुनरुक्तेत्येकेषां समाधानमाह * तत्रेति * अस्याधिकरणस्य पौनरुक्त्याभावे ऽप्यानर्थक्यापरिहारे ऽप्याकुलीभावेन श्रोतृणामर्थानवधारणापत्तेर्विलम्बो ऽनुचित इत्येतत्समाधानं दूषयति * सत्यमेवमिति * श्रोतृचित्तसमाधानायापौनरुक्त्ये परिहार्ये प्राप्ते चतुरः प्रकारानुपन्यस्य दूषयति *तत्र* इत्यादिना पूर्वाधिकरणेनैवेत्यनेन फलविधिसरूपाणामपि पूर्वाधिकरणविषयत्वं दर्शितम् *तथा च* इत्यनेनैतदेवं पूर्वा-

---

१ विशेषणपरमिति २ पु० पा०।

धिकरणोदाहृतफलविधिसरूपार्थवादनिदर्शनेन स्फारितं पूर्वोक्तस्यार्थवादत्वस्य विसम्वादेनेहासम्भवादानर्थक्यपरिहाराय पर्णमय्यधिकरणानिराकृतस्य फलविधित्वस्य प्रतिप्रसवशङ्कं निराकर्त्तुमेतदधिकरणमिति प्रकारान्तरमुपन्यस्य निराचष्टे * के चिदिति * शरीरस्येन्द्रियाधिष्ठानत्वेन प्राधान्यादुपचारात्प्राधान्येनाधिकरणप्रतिपाद्यं शरीरशब्देनोक्तम् । तत्र पर्णमय्यधिकरणशरीरादभिन्नमित्यर्थः । अभ्युच्चयहेतुत्वे कारणं *विसम्वादो ऽपि च* इत्यनेनोक्तम् । सर्वविधिसरूपविषयत्वादस्य फलविधिसरूपमात्रविषयेण पर्णमय्यधिकरणेनापौनरुक्त्यम् । इति प्रकारान्तरमाशङ्कते * तस्मादिति * निरस्यतीहापीति । फलविधिसरूपांशेनास्यापि तेन गतार्थत्वमपरिहार्यमिति तावच्छब्देन सूचितम् । एतद्दोषपरिहारार्थं फलविधिसरूपव्यतिरिक्तानामेवात्रोदाहरणत्वमिति प्रकारान्तरमाशङ्कते * इति व्यवस्थेति * हेतावितिकरणत्वं निरस्यति * अत्र वदाम इति * ननूदाहरणभेदस्याधिकरणभेदाक्षेपकत्वादारभ्यमेवाधिकरणद्वयमित्यत आह * न हीति * किं तर्ह्यधिकरणभेदाक्षेपकमत आह * न्यायेति * न चास्य फलविधिसरूपव्यतिरिक्तसर्वविधिसरूपविषयतास्तीत्याह * द्रव्यादिविधयो ऽपीति * कुत्र विचारिता इत्यपेक्षायामाह * के चिदिति * एवं पौनरुक्त्येनाधिकरणारम्भे दूषिते पौनरुक्त्यं परिहर्त्तुमशक्नुवतां मतेनारम्भं तावत्समाधत्ते * अतश्चेति * यथैव चतुर्थे सह शाखया प्रस्तरं प्रहरतीति शाखाप्रहरणस्य प्रतिपत्त्यर्थकर्मत्वसन्देहे तृतीयया अर्थकर्मत्वे प्राप्ते सहयोगनिमित्तत्वात्तृतीयायां द्वितीयावगतप्राधान्यप्रस्तरसाहचर्याच्छाखाया अपि प्राधान्यावगतेः प्रतिपत्तित्वे सिद्धान्तिते द्वितीयायाः प्राधान्यव्यभिचारशङ्कापरिहारार्थयोरर्थे ऽपीति चेन्न । तस्यानधिकारात् । फलस्याधिकृतत्वादितिसूत्रयोः सकृत्वधिकरणगताभ्यां सूत्राभ्यां द्रव्योपदेश इतिचेन्न । तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वादितिसूत्राभ्यां पौनरुक्त्यमाशङ्क्य नातीव पुनरुक्तता महान् दोषो बहुकृत्वो ऽपि पठ्यं वदितव्यमिति परिहारं भाष्यकारो वक्ष्यति तथैवात्रापि वक्तव्यमित्यर्थः । स्वयमिदानीं चतुरः पौनरुक्त्यपरिहारप्रकारानाह *अथ वेति* एकस्यैव साध्यसाधनसम्बन्धाभावप्रतिपादनन्यायस्यात्र साधनांशस्तत्र साध्यांशः साध्यतइत्यर्थः । द्वितीयं प्रकारमाह * स्पष्टं चेति * सर्वविधिसरूपाणामिति फलविधिसरूपाणां पर्णोदुम्बराद्यर्थवादानां यजमानः प्रस्तर इत्यादीनां च द्रव्यविधिसरूपाणां विदग्धादीनां च गुणविधिसरूपाणां माषपाकादिविषयाणां च क्रिया-

विधिसरूपाणाम्। आग्नेयो वै ब्राह्मण इत्यादीनां देवताविधिरूपाणां केवलार्थवादनिरपेक्षविधिनिराकरणेनेत्यर्थः। फलादिसम्बन्धोत्तरकालमर्थवादान्वयात्पर्णोदुम्बरतादावार्थवादिकफलकल्पनमशक्यं पूर्वपक्षयितुमित्याशङ्क्यार्थवादकल्पिते विधावित्युक्तं कल्पूसामर्थ्य इति धातोर्घञन्तात्कृपो रो ल इति लादेशे कृते तत्करोति तदाचष्ट इति समर्थे करोतीत्यस्मिन्नर्थे णिचमुत्पाद्य निष्ठायां कल्पित इति रूपं तेनार्थवादेनाङ्गभूतेन विधौ प्रवृत्त्युत्पादनसमर्थे कृते विधिसामर्थ्येनार्थवादान्वयात्प्रागेवाक्षिप्तस्य फलस्यानिर्द्धारितविशेषस्य विशेषाकाङ्क्षावेलायामित्यर्थः। यथाध्ययनभावनायां फलाश्रवणे ऽपि विधिसामर्थ्यात्किं चित्समीहितं फलं भावयेदित्यनिर्द्धारितविशेषफलान्वये ऽवधारिते वेदाध्ययनरूपकरणान्वयोत्तरकालं योग्यतयार्थज्ञानरूपफलविशेषनिर्द्धारणमविरुद्धं तथात्रापीति भावः * अन्यार्थेति * विहितपर्णोदुम्बरतास्तुत्यर्थमित्यर्थः। फलविधित्वमपीत्यपिशब्देनौदुम्बराधिकरणसिद्धार्थवादत्वाङ्गीकरणेन तदाक्षिप्तफलविधिप्रतिपादनाद्विध्यर्थवादसमुच्चयेन पर्णमय्यधिकरणपूर्वपक्षइत्युक्तम् * अर्थवादत्वमेवेति * केवलार्थवादत्वेन सिद्धान्तो दर्शितः। निवीताद्यर्थवादानामपि सिद्धवत्कीर्त्तनान्यथानुपपत्त्या विध्याक्षेपकत्वात्समुच्चयेन पूर्वपक्षं कृत्वा विक्षेपे प्रकरणादुत्कर्षापत्तेः। तस्य च केवलार्थवादत्वेन प्रकरणानिवेशसम्भवोपपत्तेः। केवलार्थवादत्वेन सिद्धान्तो निवीताद्यधिकरणेषु करिष्यतइत्याह * एतेनेति * कृत्वा चिन्तात्वेन वा तेषां पुनरारम्भ इत्याह * अथ वेति * परकृतिपुराकल्पाधिकरणमपि कृत्वा चिन्तेत्याह * तथेति * इति हस्माहबटकुर्वाण्णिर्माषान्मे पचत न ह वा एतेषाऽ हविर्गृह्णन्तीत्येककर्त्तृकमुपाख्यानं परकृत्याख्यम्। उलमुकैर्हस्मपूर्वे समाजग्मुस्तानसुरा रक्षाऽसि निर्जघ्नुरितिचानेककर्त्तृकम्मुपाख्यानं पुराकल्पाख्यमुदाहृत्य किमिमौ माषपाकोल्मुकसंयोगविधी उतारण्याशनगृहपत्यग्निनिर्वापस्तुत्यर्थौ निन्दार्थवादाविति सन्दिह्यार्थवत्त्वाद्विधीति पूर्वपक्षमङ्गीकृत्य परकृत्युदाहरणे किं सर्वेषामेव दर्शपूर्णमासयाजिनाम्मौपवसथ्याहे माषभोजनं विधीयते वृष्णिगोत्राणामेव वेति चिन्तयिष्यते। तत्र वार्ष्णिशब्देन वृष्णिगोत्रविशेषसम्बन्धतया भोजनार्थं माषपाककीर्त्तनात्तदन्यथानुपपत्त्या विधिः कल्प्यमानो न सर्वविषयः कल्पयितुं शक्यतइति पञ्चावत्तवद्व्यवस्थेति प्राप्ते विशिष्टपुरुषाचरितत्वेन माषस्तुत्यर्थतया वार्ष्णिसम्बन्धकीर्त्तनोपपत्तेर्विशेषविधित्सायां वार्ष्णिवदुव्यतिरिक्तानां वृष्णिगोत्राणामपि विधानापत्तेः

सर्वेषामेव दर्शपूर्णमासयाजिनामारण्यभोजनादिना सह वैकल्पिकं माषभोजनं विधीयतइति पक्षान्तरमुक्त्वा तस्मादारण्यमेवाश्नीयादिति विध्यन्तरैकवाक्यत्वेनारण्यान्नस्य प्रशस्ततरत्वद्योतनार्थं जर्त्तिलयवाग्वादिवन्निन्द्यानामपि माषाणां स्तुतिरिति सिद्धान्तयिष्यते। पुराकल्पोदाहरणे ऽपि गृहपतेरेवाग्निषु निर्मन्थ्य निर्वपेरन्निति विध्यन्तरैकवाक्यत्वेन निर्म्मन्थिताग्निसंसर्गस्तुत्यर्थमुल्मुकससर्गे निन्द्योपपत्तेर्न निन्दाकल्पनिषेधबलेन प्रापकाविधिकल्पनं पूर्वमहर्ष्याचरितत्वेन वा पृथग्विधिकल्पनं युक्तमिति सिद्धान्तः करिष्यते । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति न्यायात्। पूर्वाचरितोपन्यासेन विधिकल्पनामित्येवंविधपूर्वपक्षसाम्यमात्रेणानयोरुदाहरणयोः साहचर्यं न तु पुराकल्पोदाहरणे कृत्वा चिन्ता का चिदस्ति तस्मात्परकृतिपुराकल्पयोर्मध्ये एकस्मिन्परकृत्युदाहरणे कृत्वा चिन्तेति निर्द्धारणे सप्तमी व्याख्येया । अथैकत्वजर्तिलाधिकरणयोः कथं निवेशो ऽत आह * एवमिति * सापि कृत्वा चिन्तेत्यर्थः । चिन्तान्तरस्य तत्राभावात् कृत्वा चिन्तानुपपत्तिमाशङ्क्याहबाधप्रसङ्गेनेत्युक्तम् । यद्यपि तत्र चिन्तान्तरं न कृतं तथापि सा मोहोपादूघातप्रसक्तानुप्रसक्त्या यदचा स्तुवतइति विधिरर्थवादो वेति चिन्तायाः करिष्यमाणत्वात्तदुपयोगितया विधिपक्षे किमतिदेशप्राप्तस्तुतिसाधनसामाधारतृचबाधेनैकर्गाधारत्वं विधीयते उताप्रगीतर्गेकत्वम् । तत्र पूर्वपक्षे योन्यव्युत्पन्नस्य साम्न उत्तरयोरगानादूहाप्राप्तारतरस्मिन् पक्षे साम्नस्तृचाश्रितत्वाबाधादूहोपपत्तेरिति चिन्तान्तरं कल्प्यं जर्त्तिलचिन्तायाश्च बाधप्रसङ्गेन करिष्यमाणत्वादथो खल्वाहुरनाहुतिर्वै जर्त्तिलाश्च गवीधुकाश्चेति अस्य निषेधार्थत्वे ऽपि किं जर्त्तिलगवीधुकानामनुकल्पत्वद्योतनार्थो ऽयं निषेधो विकल्पार्थो वेति चिन्तातरम् । अनुकल्पत्वपक्षे बाधानापादकत्वाद्विकल्पपक्षो तदापादकत्वात्कल्प्यमिति भावः । कृत्वा चिन्तात्वाभावे ऽपि चौदुम्बराधिकरणव्युत्पादितमप्यर्थवादत्वमुदाहरणविशेषेष्वाक्षिप्य समाधानाय सा चिन्तेत्येवं ग्रन्थो व्याख्येयः । अस्मिन् व्याख्याने षाष्ठस्यापि पुराकल्पोदाहरणविषयस्य विचारस्याननैव न्यायेन कृत्वा चिन्तात्वाभावे ऽपि पौनरुक्त्यं परिहृतं भवति । एवं शब्दश्च यथाधिकारप्रसङ्गेन षष्ठगता चिन्ता एवमेषापीत्यवगन्तव्या ॥ तत्सिद्धिसूत्रस्थाप्यपौनरुक्त्यमाह । तत्सिद्धिसूत्रे त्विति मीमांसाप्रक्रियामात्रेण विध्यर्थवादाचिन्तेति भावः । सर्वविधिसरूपाणामौन्दुबराधिकरणेनैवार्थवादत्वसिद्धौ पुराकल्पाद्युदाहरणेषु कृत्वाचिन्तानुपन्यासादाक्षेपहेतुत्वाभावाच्च पौनरु-

त्या परिहारेण परिहारितोषात्प्रकारान्तरमाह *अथ वेति * पृथक् फलपदसद्भावे ऽपि फलविधौ निराकृते तदभावे फलविध्याशङ्कया दूरनिरस्तत्वेनाऽपि अपरितोषाच्चतुर्थं प्रकारमाह * अथ वेति * परार्थनिर्ज्ञाने कारणमाह * अत्र हीति * स्वातन्त्र्येणेति जुहूसबन्धनैरपेक्ष्येणेत्यर्थः । एतदेवोपपादयितुं सामान्यन्यायान्तावदाह * सर्वत्र हीति * प्रकृते योजयति * तदिहेति * किं सबध्यतामित्यनाकाङ्क्षाधीतत्वेन पर्णमयीत्वस्य प्रकृताश्रयालाभादिति भावः। वाक्येनाश्रयदानमाशङ्क्य निरस्यति * जुहूरिति * अभ्युपगम्यापि जुहूसंबन्धं नैराकाङ्क्ष्यान्नास्तीत्याह * सापि चेति * अतः फले पर्णमयीत्वविध्ययोगाज्जुहूर्थत्वेन सिद्धो विधिरित्युपसंहरति * तस्मादिति * पर्णमयीत्वेन जुहूं भावयेदिति वचनव्यक्तिरितरशब्देनोक्ता । जुह्वनुवादेन पर्णमयीत्वस्य विधौ सिद्धे यथापारार्थ्यनिर्ज्ञातं भवति तथा दर्शयति । तत्र चेति । एवं निर्ज्ञातपारार्थ्यस्यापि पर्णमयीत्वस्यापाप्तश्लोकश्रवणात्मकफलश्रुतेः फलार्थतापि दध्यादिवदस्त्विति पर्णमय्यधिकरणे पूर्वपक्षं कृत्वा सकृच्छ्रुताया पर्णत्वजातेर्जुह्वङ्गत्वेन निराकाङ्क्षी कृताया ब्रह्मचर्यत्वायोगात्फलश्रुतिरर्थवादमात्रमिति सिद्धान्तः करिष्यतइत्याह * ततश्चेति * औदुम्बरत्वस्य तु सोमा पौष्णं त्रैतमालभेत पशुकाम इति विकृतपशुप्रकरणे श्रुतस्यातिदेशप्राप्तनिर्ज्ञातजातिविशेषयूपार्थत्वेन विध्ययोगात्पारार्थ्यानवगतेः पर्णमय्यधिकरणविषयत्वन्नास्तीत्याह * इह पुनरिति * एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * नन्वाश्रयालाभात्कथमस्य फलविधिराशङ्क्यते ऽत आह * यापि चेति * प्रकृतावग्नीषोमीये पशुनियोजनाख्यकर्मसंबन्धितया विहितस्य यूपस्यात्र चोदकप्राप्तस्यौदुम्बरजात्याश्रयत्वेन ग्रहणादित्यर्थः । कर्मसंबन्धाभिधानत्वमाश्रययोग्यताप्रदर्शनार्थमतः सिद्धं पर्णमय्यधिकरणेनापौनरुक्त्यमौदुम्बराधिकरणस्येत्याह * तेनेति * कः पुनरेतेषां चतुर्णां पौनरुक्त्यपरिहारप्रकाराणां मध्ये अभिमत इत्यपेक्षिते प्रथमोपन्यस्तस्यैकस्यैव न्यायस्य क चित्काश्चिदंशः शोध्यतइत्यस्यैवाभिमतत्वमाह * इदमिति * न विद्यते परमुत्कृष्टमस्मादित्यर्थः । उदुम्बरत्वजातेरपि प्रकृताश्रयत्वालाभाच्चोदकप्राप्तस्य निर्ज्ञातसाधनत्वेन नैराकाङ्क्ष्यात्तदर्थविहितसाधनान्तराग्राहकत्वाद् गुणफलसंबन्धायोगेनौदुम्बरत्वेन यूपं भावयेदितिवचनव्यक्त्याश्रयणात्पारार्थ्यावगतेः पर्णमयन्यायविषयत्वाच्चतुर्थो ऽपि प्रकारो न युक्त इति भावः । किं तदित्यपेक्षिते विवेचयितुमारभते * औदुम्बरवाक्यमिति * उदाहरणाभेदे

कथमपौनरुक्त्यमित्यपेक्षिते प्रश्नपूर्वकं परिहरति * कथमिति * ननु साध्यसाधनांशयोरन्योन्याविनाभावादेकसिद्ध्यैवेतरसिद्धेरंशद्वयविचारो ऽनर्थको ऽत आह * साध्येति * अस्यार्थस्य सार्वत्रिकत्वसूचनार्थस्तावच्छब्दः सर्वत्रैव तावदेवमित्यर्थः कः पुनरंशः क्व विचार्यतइत्यपेक्षायामाह * तत्रेति * ननु यदि द्वयोर्योग्यपदोपादानं विना साध्यसाधनसंबन्धो न युज्यते तर्हीकनिराकरणेनैवेतरानिराकरणसिद्धेरंशद्वयनिराकरणमनर्थकमत आह * यद्वेति * अनिराकृतो ऽशो ऽप्रतिषिद्धमनुमतं भवतीत्यनेन न्यायेनाङ्गीकृतः स्यादिति भवतिशब्देनोक्तं, तेनायमर्थः यत्साध्यं साधनं वा यदात्मना साध्यत्वेन साधनत्वेन वा निराकरणाभावात्प्रतिपादितं भवति तत्पदान्तरेणादिशब्दोपात्तेन सामर्थ्येन वोपात्तेन प्रतियोगिविशेषेण साधनेन साध्येन वा संबध्यतइति । एतदेव विभज्य कथयति * तत्रेति * औदुम्बराधिकरणे हि ऊर्गवरोधापापश्लोकश्रवणाद्यनिराकृतत्वात्साध्यमित्यवधृते तत्सन्निधौ श्रुतमौदुम्बरपर्णतादिश्रुतशब्दाङ्ग्योग्यत्वे ऽपि अर्थापत्त्या योग्यशब्दान्तरकल्पनया साधनं गम्यते एवं पर्णमय्यधिकरणे निराकरणाभावादुदुम्बरपर्णतादिसाधनावधारणे ऽपि तत्साध्यं गम्यत इति शेषः । एतदेवोपसंहरति * इति द्वावपीति * साधनस्य विधिविषयत्वं स्वरूपं साध्यस्य च कर्मपदोपात्तत्वमिति द्वयोरपि साध्यसाधनांशयोः स्वरूपान्निरूपयितव्यमित्यर्थः । नन्वस्याधिकरणस्य साधनांशमात्रनिराकरणार्थत्वे विधौ वाक्यभेदः स्यादिति साध्यांशनिराकरणं पर्णमय्यधिकरणस्य च साध्यांशमात्रनिराकरणार्थत्वे सत्युत्पत्तेश्चातत्प्रधानत्वादिति साधनांशनिराकरणमयुक्तं स्यादत आह * तदिहेति * भिन्नांशविषयत्वेन पौनरुक्त्ये परिहृते प्रकरणसङ्गतिमाक्षिपति * नन्विति * हेत्वधिकरणे ऽर्थवादविचारादसमाप्तमर्थवादाधिकरणं, न चास्य विचारस्य विध्यभावे श्रेयः साधनत्वबोधः सम्भवति उत नेत्येवं रूपत्वात्तेन सङ्गतिर्युक्तेत्यर्थः । अर्थवादाधिकरणेनेत्यधिकरणशब्देनाधिकारः प्रस्तावः प्रकरणमुक्तं विधिशेषत्वेनार्थवादानां धर्म्मप्रमोपयोगे प्रतिपादिते विध्यभावे ऽपि श्रेयः साधनत्वबोधसम्भवाद्विधेरेव धर्मोपयोगित्वाभावात्कथं तदद्वारेणार्थवादायामुपयोगितेत्यर्थवादाधिकरणसिद्धान्ताक्षेपेणैतदधिकरणपूर्वपक्षोत्थानाद्विध्युद्देशचिन्तात्वे ऽपि तत्सङ्गत्युपपत्तिः । यद्वार्थवादानां धर्म्मप्रयोगे प्रतिपादिते को ऽर्थवादः को वा नेति कोष्ठशोधनिकार्थत्वेनाधिकरणद्वयस्यार्थवादाधि-

१ अर्थवादाधिकरणेन सङ्गतिर्नैवयुक्तेत्यन्वयः ।

करणशेषत्वाऽभ्युपगमाद्विध्युद्देशचिन्तात्वे ऽपि तदसम्भवाशङ्क्येयम्। अधिकरणद्वयेन सर्वार्थवादाव्याप्तेः कथं कोष्ठशोधनिकेति चेदुच्यते आद्ये विध्येकवाक्यत्वेन स्तुत्यर्थत्वे ऽभिहिते सिद्धैकान्तिकाविध्येकवाक्यत्वानामपि येषां साध्यसाधनांशाभिधानाद्विध्युद्देशान्तर्गतिराभाति तेषां तन्निराकरणेन स्तुत्यर्थतेह स्थाप्यते, हेत्वधिकरणे ऽपि अन्वयवाक्यकल्पनेन द्रव्यादिसाधनांशाभिधानाद्विध्युद्देशान्तर्गत्या शङ्कैव निराक्रियते पृथग्विधित्वाशङ्कानिराकरणाधिकरणान्तरेषु भविष्यति तस्मादधिकरणान्तरनिराकृतपृथग्विधित्वाशङ्कानां सम्भवद्विध्येकवाक्यत्वानामसम्भवद्विध्युद्देशान्तर्गतानां सर्वेषामर्थवादत्वमिहैव स्थापितं भवति प्रकृतार्थवादत्वसिद्ध्यर्थत्वाद्विध्युद्देशचिन्ताप्यत्र नासङ्गतेति परिहरति * नैष इति * विध्युद्देशचिन्तावशेन प्रकृतार्थवादत्वरूपार्थपरिच्छेदादित्यर्थः। एतदेव विवृणोति * यदि हीति * साधनांशे विचार्यमाणइत्यत्र प्रकृतः साधनांशो ऽसाविति सर्वनाम्ना परामृश्यते एतदधिकरणपूर्वपक्षे च विध्युपयोगानभ्युपगमात् अज्ञातज्ञापनाभिप्रायं विधीयमानतयेति व्याख्येयं तेन यद्यसौ साधनांशो ऽज्ञातज्ञाप्यतया ऽपूर्वेण साधनांशप्रतिपादकेनौदुम्बरो यूपो भवतीत्यनेन वाक्यभागेनावगतस्ततो ऽपेक्षावशेनोर्ज्जो ऽवरुध्याइत्यस्य फलसमर्पकत्वान्नार्थवादत्वमित्यर्थः। पूर्वपक्षमाह * तत्रेति * ननूर्ज्जो ऽवरुध्याइति तादर्थ्यचतुर्थ्या साध्यावगमे ऽप्यापश्लोकश्रवणादेः साध्यत्वावगमाभावादुर्ज्जो ऽवरुध्याइत्यस्यापि च तैत्तिरीयादिशाखास्वश्रवणात्कथं साध्यसन्निधानइत्युक्तम्। उच्यते औदुम्बरत्वादेः प्राप्तयभावाद्विध्येकवाक्यत्वं च विनार्थवादत्वायोगादर्थवादाश्च विधिकल्पने ऽन्योन्याश्रयत्वापत्तेरवश्यविधेयत्वाद्विधेश्च भावनैकगोचरत्वाद्यूपादेश्चौदुम्बरत्वादिभवनस्य पुंव्यापाराधीनत्वात्पुंव्यापाराधीनकर्त्तव्यत्वप्रतिपादकपदकल्पनेन भवतिशब्दस्यैव वान्तर्नीतप्रयोजकव्यापारवचनस्य पञ्चमलकारकल्पनेन भावनाविधिप्रतितेः। भावनायाश्च भाव्यनिष्ठत्वाद्योग्यत्वेनोर्गवरोधापापश्लोकश्रवणादेः साध्यत्वावगतेः साध्यसन्निधानाभिधानं विध्यभावाभिधानं[3] चौदुम्बरत्वाद्युत्पत्तिविधानार्थं कल्पितस्य प्रत्ययस्यान्यत्र व्यापारासम्भवेन साधनत्वबोधकारणत्वाभावाभिप्रायं, ननु तृतीयां विना ऽपि योगस्य विधिसामर्थ्यात्साधनत्वं युक्तम्। इह तु

१ एकान्तविध्येकेति २ पु० पा०

२ उत्पत्तिविध्युपयोगानभ्युपगमादित्यर्थः।

३ तादर्थ्येचानुपपत्तिमित्यत्रार्थाद्विध्यभावाभिधानम्।

तच्छ्रवणात् उत्पत्तिसिद्ध्यर्थञ्च कल्पितस्य विधेरन्यत्राव्यापारात्कथं साधनत्वावगतिरत आह * तत्रेति * समभिव्याहारमात्रेण साध्यसाधनसंबन्धावगतिसम्भवान्न विधिना कश्चिदुपयोग इति भावः समभिव्याहारमात्रात्साधनत्वावगमे ऽपि पुरुषप्रवृत्तिसिद्ध्यर्थं विध्यपेक्षा भविष्यतीत्याशङ्क्य ते * पुरुषमिति * साधनत्वावगतौ सत्यामिच्छयैव प्रवृत्तिसिद्धेस्तदर्थमपि न विध्यपेक्षेति परिहरति * स चेति * यद्वा यूपानुवादेन विधीयमानस्यौदुम्बरत्वस्य यूपद्वारेण क्रत्वर्थत्वावगमात्तत्प्रयोगवचनेनैवानुष्ठानसिद्धेर्न तदर्थमिह विध्यपेक्षेत्याह * अथ वेति * क्रत्वर्थस्यापि समभिव्याहारावगतं फलार्थत्वमपि दध्यादिवदविरुद्धमिति भावः । उत्पत्तिविधिरेव वागत्या ऽनुष्ठापको भविष्यतीत्याह * पञ्चमी वेति * अर्थवादाद्वा प्रवृत्तिसिद्धेर्न तदर्थं विध्यपेक्षेत्याह * अर्थवादेति * ऊर्ज्जो ऽवरुद्ध्याइत्यस्य पूर्वपक्षे विध्युद्देशान्तर्गत्यभ्युपगमात्सिद्धान्ताभिप्रायेणैकदेशग्रहणं विधिनिरपेक्षस्यार्थवादस्य प्रवर्त्तकत्वानुपपत्तिमाशङ्क्य प्रत्योत्खातिवादिमतेनैतदुक्तामिति दर्शयितुमुक्तमेवेत्युक्तं सूत्रं व्याख्याय विधिवन्निगदेष्वित्यादिभाष्यं तात्पर्यतो व्याचष्टे * तस्मादिति * यस्माद्विध्यभावे ऽपि समभिव्याहारमात्रेण साध्यसाधनसंबन्धबोधः सम्भवति तस्मात्तस्मिन् फले औदुम्बरतायाः साधनतया विधिरज्ञातज्ञापनमित्यर्थः । प्रायेणैवङ्गामशब्देन फलसमर्पणादपि चेत्यादिभाष्योक्तं चतुर्थ्या फलसमर्पणमयुक्तमाशङ्क्योर्ज्जो ऽवरुध्याइत्याद्युक्तं फलविधिरित्यत्र विधिशब्दस्य शौण्डादिष्वपाठात्सप्तमीसमासानुपपत्तेः षष्ठीसमास एवायं स्यादित्याशङ्क्याह * नन्विति * विवक्षितार्थलाभायान्यथापि कल्पनं युक्तमिति भावः । भावार्थाधिकरणे फलविध्यनिषेधात् भावस्य भावनाख्यस्यार्थः प्रयोजनं फलं विधेयं न वेति यत्र चिन्त्यते लिप्सासूत्रस्याद्यवर्णकतद्भावार्थाधिकरणमिहोक्तम् । नन्वस्य फलपरत्वे स्तुत्यभावाद्विधिरवसीदेदत आह * ऊर्गुदुम्बर इति * पूर्वाधिकरणे लाक्षणिकस्तुत्युपयोगाभिधानादिहानर्थक्याभिधानमयुक्तमाशङ्क्याह * तस्मादिति * साध्यसाधनभावप्रतिपादनस्य प्रवृत्तिविशेषकरत्वेनार्थवत्तरत्वात्तदपेक्षया स्तुत्यानर्थक्यमिति भावः । यस्मादुक्तप्रकारेणौदुम्बरतायाः फले विधिः सम्भवति तस्मादित्यर्थः । अनेन च वादमात्रं ह्यनर्थकमित्यस्य स्तुतिवादस्य निष्प्रयोजनत्वाभिधानप्रतिपादनपरत्वप्रतिपादनार्थमितरथेति भाष्यं मुख्यार्थरहितत्वप्रतिपादनार्थं च न चेति भाष्यं तन्त्रेण व्याख्यातम् ।

लोकवदिति चेत् ॥ २० ॥

लौकिकस्यापि स्तुतिमात्रस्यानर्थक्यात्साध्यविकलत्वमाशङ्क्याह * लोके तावदिति * क्रेतव्येति भाष्यं व्याचष्टे * तत्र चेति * अस्यापि फलपरत्वाददृष्टान्तत्वमाशङ्क्याह * न चेति * तद्वदिति भाष्यं व्याचष्टे *एवमिति* लक्षणादोषं परिहरति *श्रुतीति*

न पर्वत्वात् ॥ २१ ॥

* नैतदेवेति * भाष्यं व्याचष्टे * नायमिति * लोके इति भाष्यं व्याचष्टे * स्तुतेरिति * अविदित इति भाष्यं द्वेधा व्याचष्टे * वेदे त्विति * पूर्ववचनादिवेति भाष्यं पूर्ववदेव द्वेधा व्याचष्टे * पूर्वेति * विदितत्वादेवेति भाष्यं व्याचष्टे * न चेति * वैदिकेष्विति भाष्यं जाताशङ्कत्वं द्विधोपपादयन् व्याचष्टे * वेदे त्विति * न लौकिकी स्तुतिर्विरुद्धा प्रमाणान्तरेणास्याविदितपूर्वत्वादिति वैदिक्याः स्तुतेः दार्ष्टान्तिकत्वनिराकरणपरतया सूत्रव्याख्यानार्थमपि चेति भाष्यं व्याचष्टे * अपि चेति * अधर्मशब्दवद्विरुद्धवचनेनासंवादशब्देन विसंवादो ऽभिप्रेतः। विसंवादोपपादनार्थमूर्ज्जो ऽविरुद्धा इति भाष्यं व्याचष्टे * वर्त्तमानेनेति * स्तुतौ स्वार्थसत्यत्वानादरत्वस्योक्तत्वाद्विसंवादे ऽपि स्तुतिनिर्वाहमाशङ्क्य विदितत्वादित्येतद्भाष्योक्तलौकिकस्तुतिविषयस्वार्थसत्यत्वादरन्यायेनात्रापि पूर्वपक्षे स्थित्वा तदादरमाह * तत्रेति * ऊर्गुदुम्बर इति भाष्यं व्याचष्टे * स्वरूपत इति * ऊर्क्शब्दाभिधेयमन्त्रत्वं भवत्पक्षे पक्षधर्मत्वेनाप्रसिद्धम्। तस्य चाप्रसिद्ध्या यूपप्रकृतित्वेनौदुम्बरो यूपो भवतीत्यप्रसिद्धम्। अन्वयाप्रसिद्धिमेवोपपादयति * न हीति * पक्षधर्मत्वसूचितहेतुत्वान्यथानुपपत्तिकल्पितं यद्यदन्नं स स यूप इत्यन्वयवाक्यमङ्गीकृत्यैतदुक्तं हेतुत्वाप्रसिद्ध्या साध्याप्रसिद्धिप्रतिपादनार्थं तस्मादिति भाष्यमूर्गुदुम्बर इत्यनृतवचनादन्यदप्यस्य यत्साध्यं यस्मादूर्गुदुम्बरस्तस्मात्तन्मयो यूपः कर्त्तव्य इति तदप्यमृतमिति सुयोजत्वान्न व्याख्यातं।विसंवादाभिधानस्य प्रकृतोपयोगमाह*तस्मादिति*

उक्तं तु वाक्यशेषत्वम् ॥ २२ ॥

अत्र भाष्यकृता वाक्यशेषत्वे विध्येकवाक्यत्वं हेतुमनुवदता शेषशब्दः स्तुतिद्वारोर्ज्जत्वाभिप्रायो व्याख्यातस्तत्रोर्ज्जं पशूनाप्नोतीत्येतदन्तेन स्तुतिसिद्धेरुर्ज्जो ऽविरुद्धाइत्यस्य,फलपरत्वमविरुद्धमित्याशङ्क्याह * ऊर्गुदुम्बर इति * उभयसम्भवे तर्हि फलपरतैव क-

स्मान्नेष्यते ऽत आह * तत्रेति * यद्यप्यौदुम्बरो यूपो भवेदिति लिङादिः स्यात्तथाप्यूर्गुदुम्बर इत्यादि कृत्स्नवाक्यशेषमर्थवादतयैव गृह्णीयान्न फलपरतयेति सावधारणं द्रष्टव्यं लिङादेर्विधायकत्वेनार्थवादापेक्षत्वात्सुतरामित्युक्तं फलाकाङ्क्षानिवृत्तिस्तु प्रकरणात् क्रत्वर्थत्वावगतेः सेत्स्यतीति वक्ष्यमाणो ऽभिप्रायः । भवतीति तु वर्त्तमानापदेशो न फलपरतया वाक्यशेषं ग्रहीतुं शक्त इत्याह * किमुतेति * विपूर्वस्य दधातेः करोत्यर्थवाचित्वादुत्पादनं विधिशब्देनाभिप्रेतं तेनायमर्थः । न तावद्यावच्छ्रुतस्य भवतीतिवर्त्तमानापदेशस्य फलाकाङ्क्षा तदन्यथानुपपत्त्या कल्पिते भावनाविधौ सत्यामपि फलाकाङ्क्षायामौदुम्बरत्वस्वरूपोत्पादनार्थे कल्पितस्य लिङादेः तन्मात्रोपरमान्न साधनत्वबोधे व्यापारो ऽस्तीति। नन्वौदुम्बरत्वकर्त्तव्यतार्थं कल्पितस्य विधेः फलपर्यन्तत्वानभ्युपगमे फलाभावादवसादः स्यादत आह * प्रकरणाच्चेति * वैकृतस्याप्यौन्दुम्बरत्वस्य प्राकृतयूपाख्याङ्गसम्बन्धित्वेनोत्पत्तेः पृषदाज्यादिवत्प्रकरणग्रहणाविरोधः, विधिरहितस्य समभिव्याहारमात्रस्य फलप्रतिपादकत्वमाशङ्क्याावाचकादित्युक्तम् । अवाचकमितिपाठे नास्तिवाचकं यस्योर्गवरोधादिनः फलस्य तदिति बहुव्रीहिः । समभिव्याहारात्मना वाक्येन फलार्थत्वावगमात् प्रकरणबाधमाशङ्कते * प्रकरणमिति * समभिव्याहारावगतस्य फलार्थत्वस्य वक्ष्यमाणनिराकरणाभिप्रायेण परिहरति * नेति * अबाधमेवोपसंहरति * तस्मादिति * कृत्स्नस्य च वाक्यशेषस्य फलपरत्वे विध्युद्देशस्यैव शक्तिद्वयकल्पनापत्तेर्गौरवं स्यादित्यर्थान्तरन्यासेनाह * प्ररोचनापि चेति * न च तत्कल्पनं विना विधिपर्यवसानमित्याह * अन्यत्रेति * अत्र तु प्ररोचनाकल्पनमप्यतिक्लेशेन निर्वोढव्यं विधेरपि कल्प्यत्वादित्याह* इह त्विति * विध्युद्देशातिगौरवपरिहारार्थं तर्हि प्ररोचनापि वाक्यशेषादेव भविष्यतीत्याशङ्क्य तन्निराकरणार्थं पर्णमय्यधिकरणन्यायमुपन्यस्यति * न चेति * अस्तिप्रयोजनसिद्धिरित्यनेन पारार्थ्यं दर्शितं काष्ठविशेषपरिच्छेदकत्वेन चौदुम्बरजातेर्लिङादपि पारार्थ्यमवसीयतइत्याह * जातिविशेषस्येति * ऐकान्तिककाष्ठाङ्गतया ऽक्रियारूपत्वेन फलार्थत्वयोग्यता निराकृता सत्यपि काष्ठाङ्गत्वे यूपाङ्गत्वं कथं सिद्ध्यतीत्यपेक्षायां यूपशब्दो ऽपि चेत्याद्युक्त पारार्थ्यसाधनस्योपयोगमाह *अतश्चेति*यत्तु पौनरुक्त्यपरिहारावसरे पारार्थ्याभावार्थं प्राकृतखादिरादित्यालाभान्नैराकाङ्क्ष्यमुक्तं तदनुभाष्य दूषयति*य त्विति*यथा श्येने यस्य शरमयं बर्हिरिति प्रत्यक्षोपदिष्टैः शरैरतिदेशप्राप्तानां कुशानां

बाधस्तद्वदत्रापीत्यर्थः । बाधप्रसङ्ग एव तर्हि दोषो ऽत आह * न चेति * वरं ऋत्वर्थत्वे समानविषयत्वाद् बाधो युक्ततर इत्याह * एतावांस्त्विति * प्रकृताश्रयालाभादप्यत्र गुणफलसम्बन्धो न युक्त इत्याह * न चात्रेति * तमेवोपपादयति * यो हीति * पशुविशेषणयागस्य सौमा पौष्णं त्रैतमालभतेति त्रिवर्णपशुद्रव्यकत्वेनौदुम्बरवृक्षद्रव्यसाध्यत्वायोग्यतोपपादनार्थम् । न चाप्रकृतस्यापि नियोजनस्यातिदेशप्राप्तस्याश्रयत्वं शङ्कनीयं, प्रकृतौ हि प्रत्यक्षोपदिष्टस्य होमप्रणयनादेः पश्वाशाधनापेक्षायां पयश्चमसादिवत्फलार्थस्यापि दधिगोदोहनादेराश्रयभूतसाध्यापेक्षादर्शनादुभयाकाङ्क्षावशात्साधनत्वमवसीयते । न चैतावताङ्गत्वप्रसङ्गः तादर्थ्येन विधानाभावात् अत एव गुणकामप्रयोगे प्रासङ्गिकोपकारिणा गोदोहनादिना सिद्धौ चमसादेरनङ्गत्वेन तदभावे वैगुण्याभावादनादरः विकृतौ त्वखण्डकरणोपकारमुखेन कल्पोपकारप्राकृतखादिरत्वादिविशिष्टस्यैव नियोजनस्यातिदेशात्साधनानाकाङ्क्षस्य परार्थे विहितसाधनान्तरग्राहकत्वन्न युक्तम् । अन्यतराकाङ्क्षाहेतुकस्य संबन्धस्येतराकाङ्क्षोत्थापनपूर्वकत्वाद्विधिमन्तरेणाकाङ्क्षोत्थापनायोगात् । ननु प्रकृतः पशुयागः साक्षादयोग्यो ऽप्यङ्गभूतयूपद्वारेणाश्रयो भविष्यत्यत आह * न चेति * एवं कल्प्यतइति प्रधानादवतीर्य तदङ्गाश्रयत्वेन कल्प्यतइत्यर्थः । वचनव्यक्त्यन्तरमित्यौदुम्बरत्वेनोर्गवरोधं भावयेदितिवचनव्यक्त्यपेक्षयौदुम्बरत्वेन यूपं भावयेदित्यभिप्रेतम् । न चावतरणमित्यचोदकाश्च संस्कारा इति वक्तुशब्दार्थे चशब्दः न त्ववतरणं सम्भवतीत्यर्थः । यद्वा तेनाभ्युपगम्यावतरणं होमसाधनत्वेन साक्षादङ्गभूतायां जुव्हां सम्भवाद्यूपे न सम्भवतीत्युच्यते । अस्मिन्व्याख्याने सम्मतं यूपे यदवतरणं तन्न सम्भवति न सिध्यतीति सम्मतवचनः सम्भवशब्दः । अनेकार्थत्वान्निपातनोपसर्गाणां सम्यगर्थस्य वा संशब्दस्य लक्षणयात्र सम्मतवचनत्वमेष्टव्यं यूपानवतरणे च यूपशब्दानर्थक्यप्रसङ्गो दोषः । ननु प्रकृताश्रयालाभे ऽपि वाक्येनाश्रयलाभो भविष्यत्यत आह * न चानेनेवेति * न केवलमनेकार्थविधिलक्षणो वाक्यभेदः किं तु वैरूप्यलक्षणो ऽपीत्याह * युगपच्चेति * यूपस्याश्रयभूतस्यौदुम्बरतोपकारित्वेन गुणभूततयोपादेयत्वात्तं प्रत्युदुम्बरताया उद्देश्यत्वादिति भावः । नन्वाश्रयस्यापि साध्यत्वेन प्रधानतयोद्देश्यत्वादवैरूप्यं स्यादत आह * अथेति * एवं सत्युद्देश्ययोः फलयूपयोर्गुणभूतौदुम्बरतावशीकाराभावेनान्योन्यनियमायोगादाश्रयालाभस्तदवस्थ एवेति

भावः । प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदो ऽपि चशब्देन सूचितः एवं पर्णमयीन्यायेन स्तुत्युपयुक्तस्य परावृत्त्य फलपरत्वायोगादूर्गुदुम्बर इत्यादेः फलपरत्वे प्ररोचनार्थत्वाभावाद्विध्युद्देशातिगौरवमपरिहार्यमिति प्रकृतोपयोगः । ननु समभिव्याहारादेव फलसाधनत्वावगतौ सत्यां विधिमन्तरेणेच्छयैव प्रवृत्तेर्न प्ररोचनया कार्यमत आह * यत्त्विति * साधनत्वप्रतिपत्तौ विधिव्यापारानभ्युपगमे भावनाया भाव्यापेक्षायामप्यौदुम्बरो भवतीत्यौदुम्बरत्वस्यैव भवनकर्तृत्वेन सन्निधावुपात्तस्य साध्यांशे निवेशापत्तेरुर्ज्जो ऽवरुध्या इति चतुर्थी व्यवधावुपात्तस्याप्यूर्गवरोधस्य तदवरुद्धायां भावनायां निवेशायोगाद्यूपविशेषणत्वापत्तेरपुरुषार्थौपयिकत्वान्नौदुम्बरत्वभावनायां बुद्धिपूर्वकारी कश्चित्प्रवर्त्तेतेत्यर्थः । नन्वौदुम्बरो यूपो भवतीत्युत्पत्तिविधेः फलसाधनत्वबोधे व्यापाराभावादप्रवर्त्तकत्वे ऽपि प्रयोगवचनात्प्रवृत्तिः सेत्स्यतीत्युक्तमत आह * यत्त्विति * संयोगपृथक्त्वाभावात्पुरुषार्थत्वे सति क्रत्वर्थत्वायोगादिति भावः । पञ्चमलकारत्वस्य चाडागमादिचिह्नाभावेनानिश्चयात्कल्प्यस्योत्पत्तिविधेर्विनियोगवत्प्रयोगे ऽपि व्यापारो न युक्त इत्याह * पञ्चमेति * फलसङ्कीर्त्तनस्यालम्बनं दर्शयन् सिद्धान्तमुपसंहरति * तस्मादिति * एतदाधिकरणव्युत्पाद्यं विधिरहितस्य श्रेयःसाधनत्वबोधासामर्थ्यं तस्माच्छब्देन परामृष्टं फलाभावसूत्रोक्तानुपलब्धिविरोधो वर्त्तमानफलाभिधायित्वादित्यनेन । चतुर्थे चेति प्रस्तुतसाधनांशनिराकरणहेतुत्वेन साध्यांशनिराकरणं वक्ष्यमाणमुक्तं सर्वेभ्यो दर्शपूर्णमासावित्यादौ चतुर्थ्या फलसमर्पकत्वाभ्युपगमात्समभिव्याहारमात्रस्य फलसमर्पकत्वनिराकरणपरमेवं कामशब्दरहितस्येति व्याख्येयम् । प्रधानफलमेवेदमित्यनेन फलकीर्त्तनालम्बनं दर्शितम् । सोमा पौष्णं त्रैतमालभेत पशुकाम इति पशूनामदनीयत्वेनोर्क्शब्दवाच्यन्नरूपाणां प्रधानफलत्वादङ्गे पूर्णाहुतिवदुपचारः । न पूर्वत्वादिति सूत्रं द्वितीयवर्णकोक्तस्य विसम्वादस्यानुभाषणं पूर्वं निराकरणार्थं ननूक्तमित्यादिभाष्यं व्याचष्टे * सर्वत्र चेति । गुणवादेनेति * गुणशब्देन फलसङ्कीर्त्तने सम्वादाभिधाने तावदङ्गे प्रधानगामिनि तत्फलोपचारो ऽभिमतः सम्पूर्णाहुतिन्यायेनोक्तप्रायत्वान्नेह भाष्यकृतोक्तः । पक्षधर्म्मतान्वयकीर्त्तनसम्वादाभिधाने त्वग्निमाणवकवत्साहश्यं गुणशब्देनाभिप्रेतम् । तत्र किं साहश्यमित्यादिप्रश्नपूर्वकं साहश्यप्रतिपादनार्थं भाष्यं व्याचष्टे * साधनत्वे ऽपि चेति * साधनशब्देन हेतुत्वमुक्तम् । अङ्गगतेन प्रीतिसाधनत्वेन तद्विशेषतृप्तिसाधनत्वेन

वा गुणेनोदुम्बरे ऽन्नशब्दाभिधेयत्वसम्भवात्साधने ऽपि सम्वाद इत्यर्थः। प्रीतिसाधनत्वमप्यौदुम्बरवृक्षस्याभक्ष्यत्वान्नास्तीत्याशङ्क्य प्रीतिसाधनौदुम्बरफलोत्पादनशक्तियुक्तं वृक्षं प्रशंसितुमुपचारात्प्रशंसावाचिना प्रीतिसाधनशब्देनोच्यते इत्युक्तम्। अनेन च नात्र यद्यदन्नं स स यूप इत्यन्वयवाक्यं कल्प्यते किं तु यद्यदन्नं तत्तत्प्रशस्तमित्येवं तच्च प्रसिद्धमेवेति सूचितम्।

विधिश्चानर्थकः क्व चित्तस्मात्स्तुतिः प्रतीयेत
तत्सामान्यादितरेषु तथात्वम् ॥ २३ ॥

अत्र भाष्यकृताप्सु योनिर्वा अश्व इत्यादीनामानर्थक्यापत्तेर्विधित्वं न सम्भवतीत्युक्तम्। तदयुक्तम्। फलविधिसरूपाणामेव पूर्वपक्षिणा विधित्वस्योक्तत्वादित्याशङ्क्याह * यदि चेति * विध्यन्तरैकवाक्यभूतानामपि विधिपरत्वाङ्गीकारे तुल्यन्यायात्सर्वत्राप्यापाद्य दूषणमुच्यतइत्यर्थः। सर्वग्रहणं वायुक्षेपिष्ठादीनामपि तर्हि कस्मान्न विधित्वमापद्यत इत्याशङ्क्यानिवृत्त्यर्थं क्व चिदुग्रहणं तर्हि सूत्रे किमत आह * तत्रेति। के चिदिति * निवीतं मनुष्याणामित्यादय इत्यर्थः। शमयित्रीभिरित्यादिभाष्यं स्तुतिस्वरूपप्रदर्शनार्थत्वेन व्याचष्टे * कीदृशीतिं * आक्षिपति * तत्रेति * अग्रन्थः प्रतिभातीति मत्वा समर्थयन्तइत्यर्थः। अग्रन्थत्वमेव वा समर्थयन्तइति। स्वयं समर्थयते * तत्र त्वियमिति * पूर्वव्याख्यायां व्याख्यातृणां समर्थनं दर्शयतीत्यवतारणीयं तत्रावकाशमयित्रीत्वानुपन्यासं तावत्प्रत्याचष्टे * वेतसेति * अश्वावकयोः सम्बन्धस्य तु भाष्यकारेणाकथितत्वादनुपन्यासो न दोषायेत्याह * न चायमिति * इह च वैतसे कटे अश्वं चिनोति अप्सु योनिर्वा अश्वो ऽप्सुजो वेतसः यं वैनं योनौ प्रतिष्ठापयतीत्यत्रावकानामद्भिः सम्बन्धाश्रवणे ऽपि वेतसशाखयावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचं शमयतीत्यत्र वेतसवत्तासामप्यद्भिः सम्बन्धस्य स्तुतिसिद्ध्यर्थं वाक्यत्वादप्सुजो वेतस इति अप्सुजत्वाभिधानम्मवकानामप्सुजार्थसाहचर्यादुपलक्षणमित्याभिप्रेत्यावकाग्रहणम्। ननु वेतसग्रहणेनोपलक्षितत्वादवकानामग्निविकर्षणसाधनत्वेन विहितानां स्तुत्यर्थं भवतु नाम भाष्ये ऽद्भिः सम्बन्धकथनं शमयित्रीत्वविशेषणत्वमपां किमर्थमत आह *तावता त्विति* यद्यपि स एवैनं योनौ प्रतिष्ठापयति इत्यप्सुजे वेतसे ऽश्वचयने कृते प्रकृतिविकारयोरभेदोपचारेण वे-

तत्प्रकृतिभूताश्वाप्सु चयनात्स्वयोनौ प्रतिष्ठापनं कृतं भवतीति स्तुतिः प्रतीयते, तथापि स्वयोनिप्रतिष्ठापनमात्रेण प्ररोचनाऽनुपपत्तेर्वेतसशाखयावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचं शमयतीति वाक्यान्तरगतार्थवादाभिहितमपां शमयित्रीत्वं यजमानकृशमनसाधनत्वोपपादनार्थं भाष्यकृतोक्तम् । अवकानां त्वप्सुजो वेतस इत्यनेन सहचरणलक्षणयाद्भिः सम्बन्धानभिधानेऽपि अत्राविधानादनपेक्षितस्तुत्यप्रतीतेर्वाक्यान्तरगतार्थवादेनापां शमयित्रीत्वेऽभिहितेऽप्यग्निविकर्षणसाधनत्वेन विहितयोर्वेतसावकयोः स्तुत्यप्रतितेस्तत्प्रशंसोपपादनार्थमाद्भिः संबन्धो भाष्यकृता कथितः अर्थवादान्तरापेक्षाप्रवृत्तानामित्यश्वविषये ऽर्थवादान्तरस्यापेक्षया प्रवृत्तानामिति षष्ठीसमासगर्भस्तृतीयासमासः । अवकाविषये त्वर्थवादान्तरेणेति तृतीयासमासगर्भः । अर्थवादान्तरमुदाहरति * आप इति * कथमस्यार्थवादान्तरस्याप्सुयोनिर्वा अश्व इत्यनेनापेक्षा कथञ्चानेनार्थवादान्तरेणाप्सुजो वेतस इत्यस्यापेक्षा इत्याशङ्क्याह * अनेन हीति * अश्ववेतसाभिजनभूतानामपां शमयित्रीत्वेन प्राशस्त्याभिधानेन तदभिजातयोरश्ववेतसयोः प्राशस्त्यावगमात् तदर्थमपेक्षेत्यश्वविषये अर्थः अवकाविषये त्वविधेयानामपां शमयित्रीत्वेन प्राशस्त्यमुच्यते न विधेययोर्वेतसावकयोरिति तत्प्राशस्त्यावगमायाप्सुजत्वाभिधानापेक्षेति व्याख्येयं, कीदृशीं स्तुतिं दर्शयतीत्यपेक्षायामाह * तत्रेति * कस्य चित्प्रसिद्धाप्संबन्धस्य वेतसावकस्याप्सुजो वेतस इत्यप्संबन्धमात्रकीर्त्तनादेवापो वै शान्ता इत्यर्थवादप्रतिपाद्या स्तुतिः सिद्ध्यति । अन्येषां त्वप्रसिद्धाप्संबन्धानामश्वादीनां वस्तुतोऽसन्नप्यप्संबन्धः प्राशस्त्यज्ञानार्थं कीर्त्यते । कीदृशं प्राशस्त्यमित्यपेक्षिते प्रसिद्धेत्याद्युक्तम् । प्रसिद्धः शान्तत्वेन सह संबन्धो यासामपां तास्तथोक्ता इति व्याख्येयम् । भाष्यमेवं योज्यम् । अश्वस्यावकानां चेति चकारेण वेतसग्रहणम् । तत्राश्वविषये अश्वस्य वेतसस्य च शमयित्रीभिरद्भिशान्ताभिरेवास्य शुचं शमयतीति सहयोगतृतीयान्तपदनिर्दिष्टाभिः सहसंबन्धोऽस्य शब्दनिर्दिष्टस्य यजमानस्य शुक्शब्दवाच्यं कष्टं शमयतीत्यर्थः । अवकाविषयत्वे ऽवकानां वेतसस्य चाद्भिः संबन्ध इत्यर्थः । स्वयमुदाहृतेष्वर्थवादान्तरेषु स्तुतिस्वरूपमाह * एवमिति * तत्सामान्यादिति सूत्रावयवव्याख्यानार्थं तथेतिभाष्यं व्याचष्टे * इति स्तुतित्वे इति * अनेन यावत्स्वर्थवादेषु अप्सु योन्याद्यर्थवादसमानप्रकारत्वं तावत्सु स्तुतित्वमिति व्याख्यातम् ।

प्रकरणे च सम्भवन्नपकर्षो न कल्प्येत विध्या-
नर्थक्यं हि तं प्रति ॥ २४ ॥

सूत्रतात्पर्यमाह * विधिपक्षे चेति * स्वयं यथाश्रुतवचन-व्यक्तिपक्षे सूत्रं योजयति * यदीति * अपकर्षणं स्यादित्यर्थकथन-मात्रं व्युत्पत्तिस्तु यथाभाष्यं कर्मण्येव । यद्वेयमन्यां देवतामुत्पत्ति-शिष्टामपकर्षतीति कर्तृव्युत्पन्नो ऽपकर्षशब्द इत्याह * इयं वेति * ननु विदाहादेर्नैमित्तकत्वेन निर्ऋत्यादेर्दैवतान्तरस्य नित्याग्न्यादिदे-वताबाधकत्वं युक्तमेवेत्याशङ्कानिराकरणार्थत्वेन प्रकरणे च सम्भव-न्निति सूत्रावयवं व्याचष्टे *तत्रेति । अभ्युदितेष्टिवदिति * यदामा-वास्याभ्रान्त्या चतुर्दश्यामन्वाधानं क्रियते तदामावास्यायामुषसि तन्त्रप्रक्रमविधानात्प्रक्रान्ते तन्त्रे चन्द्रोदये सति यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तान-ग्नये दात्रे पुरोडाशमष्टाकपालन्निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दध्नश्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय घृते चरुमिति तण्डु-लग्रहणोपलक्षितानां सर्वेषामोषधिदधिपयसां प्राकृतानां हविषां प्राकृताभ्यो देवताभ्यो विभजेदित्यनेनापनये विहिते तस्मिन्नेव प्र-क्रान्ते ऽसमाप्ते कर्मणि मध्यमादिवाक्यैर्दात्रादिदेवतान्तरविधिरिति षष्ठे वक्ष्यते साभ्युदयेष्टिः । अभ्युदितश्चन्द्रमा यस्यामिष्टौ साभ्यु-दितेष्टिरिति व्युत्पाद्या ऽमावास्येष्टिरेवोच्यते । यद्यपि विभजेदित्यपन-यनविधिना तत्र प्रकृतिगताग्न्यादिदेवताबाधो न देवतान्तरविधिना तथापि नित्यदेवतादिबाधेन नैमित्तिकदेवतान्तरविधिसाम्यात् दृष्टा-न्तता । भाष्यकृतातु यत्र नैर्ऋतस्तत्र विदग्धता नीयेतेति वदता यत्त-दोर्व्यत्ययः कृतस्तत्स्वाभिप्रायं व्याचष्टे * अथेति * विध्यानर्थक्यं हीति सूत्रावयवव्याख्यानार्थं दर्शपूर्णमासकर्मेतिभाष्यं स्पष्टत्वान्न व्याख्यातम् । सूत्रं चैवं पूर्वसूत्राद्विधिः क चिदिति पदद्वयमनुकृ-ष्य यथाभाष्यं योज्यं विधिः सन् क चिद्विदग्धादावप्रकृष्टः कल्प्येत। न चैतद्युक्तं कस्मान्न युक्तमित्यपेक्षिते प्रकरणे च सम्भवन्निति हेतुग-र्भं विशेषणम् । विध्यानर्थक्यं हि तं कर्मशेषं प्रतीत्यपकर्षकारणमु-क्तम् । यथा वार्त्तिकं तु कर्तृव्युत्पत्तिपक्षे क चिन्नैर्ऋतादावपकर्षः कल्प्येत विध्यानर्थक्यं हि तमाग्नेयादिपुरोडाशं प्रतीत्येतावान्विशे-षः । कर्मव्युत्पत्तौ त्वग्न्यादिरुत्पत्तिशिष्टे ऽपकृष्टः कल्प्येत निर्ऋ-

१ अपकृष्येति १ पु० पा०

स्यादिविध्यानर्थक्यं हि तमनपकृष्टः स्वदेवताकं पुरोडाशं प्रतीति ।

विधौ च वाक्यभेदः स्यात् ॥ २५ ॥

औदुम्बर इत्यादिभाष्यादौदुम्बरो यूपो भवतीत्यस्यापि प्राशस्त्यपरत्वं प्रतिभाति । तच्चायुक्तम् । विध्येकवाक्यत्वं विनार्थवादत्वायोगात् । सोमापौष्णविध्येकवाक्यत्वाभ्युपगमे त्वौदुम्बरो यूपः प्रशस्त इतिभाष्यानुपपत्तिप्रसङ्गादित्याशङ्क्याह * स्तुतित्वेनेति * न स्तुत्यर्थत्वेनेदमुपन्यस्तं किं तु स्तुत्यन्वयवशेनास्मिन्वर्त्तमानापदेशसन्दिग्धे पञ्चमलकारत्वनिश्चयात् विधावाश्रीयमाण इति स्तुतिनिश्चयेन विधित्वप्रतिपादनार्थमिति भावः * उपजनय्येति * निश्चाय्येत्यर्थः ।

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २६ ॥

अधिकरणविषयप्रदर्शनार्थमथेति भाष्यं व्याचष्टे * इहेति * पूर्वप्रकृतापेक्षित्ववाच्यथशब्दप्रतिपादितपूर्वाधिकरणसङ्गतिसूचनार्थं हिशब्दादिभिरित्युक्तम् । पूर्वत्र श्रेयःसाधनत्वप्रतिपादकविधिशब्दाभावेनौदुम्बरो यूपो भवतीत्यादीनां विधित्वे निराकृते तेन ह्यन्नं क्रियतइति हेतुत्वप्रतिपादकहिशब्दसद्भावेन हेतुत्वं भविष्यतीति पूर्वाधिकरणासिद्धान्तहेतुप्रत्युदाहरणरूपेणात्र पूर्वपक्षोत्थानात्सङ्गतिः । न च परमार्थहेतव इत्यनेन हेतुवदिति घतेर्व्यावर्त्त्यं दर्शितं चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानुयाजान् यक्ष्यन्भवतीत्यादयः परमार्थहेतवः । आतिथ्येष्टावनुयाजाभावे ऽपि अष्टावुपभृति गृह्णातीति प्रकृतौ विहितस्योपभृत्यष्टगृहीतस्य चोदकप्राप्तस्य निवृत्त्यर्थं चतुर्गृहीतत्वे विधीयमाने ऽनुयाजाभावस्य हेतुत्वाभिधानात् यत्र यत्रानुयाजाभावस्तत्र तत्राष्टगृहीताभाव इति ज्ञायते । प्रकृतौ चाष्टग्रहस्य चतुष्टवद्वयलक्षणार्थत्वद्योतनात्प्रयाजार्थे जुव्हां समानयने नियोगतो ऽर्द्धमेव समानेतव्यमिति ज्ञायते हेतुः स्यादिति पूर्वपक्षभाष्यं हेतुविध्यभिप्रायमनुवादाभिप्रायं वेति विकल्प्य विधिपक्षे तावदौदुम्बराधिकरणनिरस्तत्वादयुक्तमित्याक्षिपति * तत्रेति * यथा तत्र यदिह फलवचनं तदौदुम्बरस्य यूपस्येत्यादिना प्रत्यक्षस्य विधेरभावात्कल्पयस्य च कार्यविशेषसम्बन्धित्वेनैव कल्पयितुं शक्यतया कार्यान्तरं प्रत्यभावात्फलपरत्वे स्वरूपविधानाशक्तिप्रसक्तेः फलवचनानर्थक्यमुक्तं तथेहापि प्रत्यक्षविध्यभावात्कल्पयस्य च हेतुपरत्वे ऽन्नकरणमात्रस्य होमसाधनत्वविध्यनुमानेन शूर्पस्यापि प्राप्तिसम्भवाच्छूर्पहोमसम्बन्धविधानानुपपत्तेस्तत्र हेतुविध्यानर्थक्यम् ।

श्नन्नकरणमात्रस्य तु होमसम्बन्धं प्रति हेतुविधानमितरेतराश्रयापत्तेरनाशङ्क्यमेवेति शूर्पहोमसम्बन्धं प्रतीति काका द्योतितम् । अनुवादपक्षे त्वानर्थक्येन पूर्वपक्षः प्रसज्येत । तत्त्वर्थवादाधिकरणे निरस्तमित्याह * अथेति * ततश्च पूर्वपक्षासम्भावनया प्रधिकरणारम्भो न युक्त इत्याह * इतीति * समाधत्ते * उच्यतइति * अस्यार्थः नानेन शूर्पस्य होमसाधनत्वमुद्दिश्य तत्राश्नकरणत्वस्य हेतुत्वविधिराशङ्क्यते यः पूर्वन्यायेन निरस्येत यच्चाश्नाश्नकरणहेतुकन्दर्व्यादेर्होमसाधनत्वं विधेयमाशङ्क्यते तन्न याच्छ्रुतेन विधीयते येन गौरवापत्त्या निरस्येतेत्यनेनैवेत्येवकारेण सूचितम् । एतच्च केवलहेतुत्वेन पूर्वपक्षमङ्गीकृत्योच्यते । यदा तु शूर्पेण जुहोतीति विधिमङ्गीकृत्य तेन ह्यन्नं क्रियतइत्यस्य तच्छेषत्वेनार्थवादत्वमभ्युपगम्य तदालम्बसिद्ध्यर्थं हेतुविधिरपि दर्व्यादिप्राप्तिफलको भविष्यतीति हेत्वर्थवादसमुच्चयेन पूर्वपक्षः क्रियते तदा पूर्वन्यायनिरस्तत्वाशङ्कैव नास्तीति तावच्छब्देन सूचितम् । न चेत्यानर्थक्यपरिहारायोक्तम् । किं तर्ह्यस्य प्रयोजनमिति पृष्टे सिद्धवदुपदिष्टस्य हेतुत्वस्य यावत्यन्वयांशे प्रसिद्ध्या शङ्का तत्रांशे अर्थापत्तिलभ्याद्वचनात्सिद्धिरित्युक्तं हेतोरन्वयकल्पकत्वोपपादनाय प्रसिद्धिपूर्वकत्वादित्युक्तम् । न चात्र सिद्धवच्छब्दप्रयोगमात्रेण हेत्वनुवादाशङ्का । अप्राप्तानुवादायोगादुपदिष्टस्येति यस्य ते हेतुविधिरित्येतद्भाष्यव्याख्यायां च तव हेतुविधिर्वादित्वादित्यभ्युपेत्य वादे च यद्यपि हेतुविधानमिति स्पष्टं विधेयत्वाभिधानात्साधुशब्दाधिकरणे च व्याकरणास्या सन्देहप्रयोजनत्वनिराकरणावसरे तथा हेतुविधिर्हेत्वर्थवादो वेति हेत्वधिकरणविचार्ये स्वयमेव दर्शयिष्यति । अज्ञातज्ञाप्यत्वरूपस्य चात्र विधेयत्वस्यानुष्ठाप्यरूपविधेयत्वाभावप्रतिपादनार्थेन सिद्धवच्छब्देनाभिप्रेतत्वान्नाव्यापारत्वे हेतुत्वस्याविधेयत्वं वाच्यम् । गौरवं तु कल्पपदसहितैः श्रुतैः पदैर्हेतुविधिपूर्वकं तदन्यथानुपपत्त्या ऽन्वयकल्पनाभिधानात्परिहृतम् । ननु सर्वस्य विधिपरत्वे ऽर्थवादाभावाद्विधिरवसीदेदत आह * यापि चेति * कस्मादेतत्कर्त्तव्यमित्याशङ्कायामर्थवादाः संबन्ध्यते साचात्र हेतुनैव पूरितेति भावः । यद्यपि कथं भावापेक्षयार्थवादाः संबन्ध्यते तथापि कर्त्तव्यमित्युक्ते कस्मादिति या पुरुषस्यापेक्षा जायते सेह हेतुपूरणार्थत्वाय दर्शिता । यद्यपि चेयं प्राशस्त्यविषयापेक्षा तथापि साहश्यादुभयाविषयत्वभ्रमः पूर्वपक्षिण इति मन्यतइत्यनेन सूचितम् । यद्वा हेत्वर्थवादसमुच्चयेनायं पूर्वपक्षो न केवलहेतुत्वेनेत्याह * अथापीति *

तदर्थवादत्वमन्तर्निर्णीतं हेतुत्वमस्मिन्नित्यर्थः । भवतु तर्हि तेन ह्यन्नमित्यर्थवादस्तदुन्मीलितः शूर्पेण जुहोतीति विधिस्तथापि तेनेत्यर्थवादानुसाराद्दर्व्यादीनामपि शूर्पतुल्यता न तु व्यावृत्तिः अत एव शूर्पशब्देन लक्षणयाऽन्नकरणेन जुहोतीति विधीयते । अस्मिन्नर्थवादे सालम्बनत्वाय हेतुत्वेनाप्युपयोग इति हेतुरपीत्यपिशब्देन समुच्चयो दर्शितः । होमस्याविधेयत्वेन हेत्वनाकाङ्क्षत्वात्तं प्रति हेतुविधानमयुक्तमाशङ्क्य होमशब्दस्य संबन्धलक्षणार्थत्वमाह * संबन्धस्य चेति * नन्विति भाष्यस्य परेषां व्याख्यानं दूषयितुमुपन्यस्यति * नन्विति * अन्यत्राप्येवमेवोक्त्या भाष्यकृत्सम्मतिं प्रकटयति * तथा चेति * यद्धि यस्य कारणभूतं दृष्टं सिद्धे तच्चेत्साध्येऽपि[1] कारणभूतमवगतं भवेत् तत्तस्य साधनमिति भाष्ये वक्ष्यते दूषयति * तत्किति * स्वयं त्रेधा व्याचष्टे * अत इति * क्रियासामान्यवाचिना करोतिना ज्ञानाख्यक्रियाविशेषो लक्ष्यत इतिभावः शङ्कते * नन्विति * अङ्गभूतनियमरूपसंबन्धोपलक्षणत्वेनायमुपन्यस्तो नाङ्गत्वेनेति परिहरति * सत्यमिति * अनुमाने व्यवह्रियते * अनेनेति * नियमोऽनुमानव्यवहारशब्देनोक्तः । एवं तु लक्षितलक्षणाप्रसङ्गाद्गम्यगमकलक्षणार्थाभ्यां कार्यकारणशब्दाभ्यां परेण भावप्रत्ययेन कृत्तद्धितसमासेषु भावप्रत्ययेन संबन्धाभिधानमितिस्मरणात्, गम्यगमकसंबन्धाभिधानाद्गम्यगमकयोश्च नियमलक्षणस्य संबन्धस्य शक्तिरूपत्वात्तत्प्रतिपादनायैतदुक्तमिति पूर्वापरितोषाद्व्याख्यानान्तरमाह * यद्वेति * ननु शक्तिनिरपेक्षस्य हेतोर्व्याप्तिमात्रेण गमकत्वात्तत्प्रतिपादनं व्यर्थमत आह * ययोरेव हीति * ययोरेव सा शक्तिरवधृता तत्रैव तयोरेव मध्ये एकस्येतरत्प्रतिहेतुता तद्वेति निर्द्धारणे सप्तमीद्विवचनं गमकस्य चाधारत्वं गम्यस्य च विषयत्वं गम्यविषयागमकाधारेत्यर्थः । कीदृशी शक्तिरित्यपेक्षिते गम्यगमकसामर्थ्यात्मनेत्युक्तं तृतीयेत्थं भूतलक्षणे गम्यगमकसामर्थ्यरूपेत्यर्थः । तस्याः प्रतिपत्त्युत्तरकालत्वेनानङ्गत्वमाशङ्क्य * व्याप्तिग्रहणकाल * इत्युक्तं कार्यावसेयत्वाच्छक्तेः कथं ततः प्रागवधारणमित्याशङ्क्य कार्यकारणभावित्वेनेत्युक्तम् । अयमाशयः नियमलक्षणः संबन्धोऽनुमानाङ्गम् । न चासावविनाभावमात्रेण भवति सत्यप्यविनाभावे हिंसात्वाधर्म्मसाधनत्वयोर्नियम्यनियामकत्वाभावात् किं त्वाक्षेप्याक्षेपकभावेन यद्यस्मिन्स-

---

१ यद्धि वह्न्यादिः यस्य धूमादेः सिद्धे महानसे साध्येऽपि वह्नौ ऽर्थोऽर्थः ।

२ प्रतीत्युत्तरेति २ पु० पा०

त्यनेनावश्यं भवितव्यमिति यदाक्षेपकशक्तत्वेनावसीयते तदेव तेन नियन्तुं शक्यते स्वरूपप्रयुक्तं हि साहित्यं नियमः प्रयोजकत्वं चाक्षेपकत्वम् । एतच्च विस्तरेणाचार्यैरनुमानवादे ऽभिहितम् ।

व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्म्मः प्रयोजकः ।
अस्मिन्सत्यमुना भाव्यमिति शक्त्या निरूप्यते ॥
तस्माद्य एव यस्यार्थो नियतो ऽदृष्टशक्तितः ।
स एव गमकस्तस्य न प्रसङ्गान्वितो ऽपि यः ॥
साध्यहेतुत्वमर्थानां व्याप्तिशक्त्यनुरोधतः । इतिच ।

सा चाक्षेपशक्तिर्व्याप्तिग्रहणकालएवावधार्यते * तथा हि * धूमस्याग्निसाहित्यं नित्यं दृश्यते तस्य धूमस्वरूपप्रयुक्तत्वाभावे नित्यत्वायोगादर्थापत्त्या धूमस्वरूपस्य प्रयोजकत्वं कल्प्यते तत्र धूमत्वश्यामत्वोर्द्धगत्याद्यनेकसम्पाते धूमत्वमेवप्रयोजकं नान्यादिति व्यवस्था शक्त्या विनानुपपद्यमाना शक्तिं कलपयति अतो ऽनुमानाङ्गभूतनियमलक्षणसंबन्धसिद्ध्यर्थेयं शक्तिर्न गम्यगमकभावसिद्ध्यर्था येन तदुत्तरकालावसेया स्यात् सत्यां तु शक्तौ नियमवच्च तेन गम्यगमकभावो भविष्यतीति भाविनीं गम्यगमकतामालोच्य गम्यगमकशक्तिरित्युच्यते। तदेककार्यकारणभावित्वेनेति भविष्यत्कालवाचिगम्यादिपठितभाविशब्दप्रयोगेण दर्शितं कार्यकारणशब्दौ गम्यगमकपरौ व्याख्यातौ। यस्मिन्सामर्थ्ये सति नियामकमग्न्यादिगम्यं भविष्यति नियम्यं च धूमादिगमकं तत्कार्यकारणभाविसामर्थ्यं तस्य भावः कार्यकारणभावित्वं तेनेतीयमपि तृतीयेत्थं भूतलक्षणार्थैव । अनेन च भाष्यगतो भावशब्दो भवतेर्णिजन्तादेरजित्यच्प्रत्ययमुत्पाद्य भावनार्थो ऽगाख्यातः । भावनं चोत्पादनं तच्च शक्त्यधीनमिति कार्यकारणभावशब्देन गम्यगमकभावापादिका शक्तिरुक्ता भवति । एवमपि कार्यकारणशब्दयोर्लक्षणावृत्त्यपरिहाराद्भावशब्दस्य शक्तावप्रयुक्तत्वादपरितोषात्स्वमतेनान्यथा व्याचष्टे * अथ वेति * काणादा ह्यस्येदं कार्यं कारणं संयोगिसमवायि एकार्थसमवायिविरोधि चेति लैङ्गिकमित्यनुमानाङ्गभूताविनाभावोपाधित्वेन कार्यकारणभावादिच्छन्ति लोके ऽपि त्वेवमेव दृश्यते । इह चान्नकरणत्वेन दर्व्यादेर्होमसाधनत्वं विधीयमानमन्नकरणत्वकारणकमेव भवति । भाष्यगतहोमशब्दवच्चात्रत्यो ऽपि संबन्धलक्षणार्थः । आक्षेपभाष्यमुपसंहरति * तस्मादिति * हेतुव्यपदेशशब्देनैतदुक्तं हेतुर्हि प्रमाणान्तरप्रसिद्धः स व्यपदेश्यः सिद्धवत्कीर्त्तनीयो भवति न चायं तथेति न हेतुत्वं युक्तमिति । सत्यमिति समाधानभाष्यं व्याचष्टे * सत्यमिति *

अनेन च विधायिष्यते कार्यकारणभावो दृष्टान्तवचनेन कल्प्येतेति व्याख्यातम् । दृष्टान्तशब्देन दृष्टश्चासावन्तश्चेति समीपवचनान्त-शब्दाङ्गीकारेण सह दृष्टिरूपाख्या व्याप्तिरुक्ता कल्पिताया अपि व्याप्तेरशाब्द्याः शाब्देन हेतुना ऽनन्वयमाशङ्क्यान्वयसिद्ध्यर्थं वचने कल्पनमुक्तम् । सप्तमे ऽपि वचनं पुनर्द्विविधं प्रत्यक्षमानुमानिकं चेति वदता भाष्यकारेण श्रुतार्थापत्तेः शब्दकल्पकत्वमेव प्रकटितम् । शब्द-कल्पकत्वानङ्गीकारे चाग्नये जुष्टन्निर्वपामीत्यादेर्मन्त्रस्य विकृतावसन्निहिताग्न्यादिपदनिवृत्त्या साकाङ्क्षस्यापि सूर्यादिनार्थेन नैराकाङ्क्ष्यसिद्धेर्न सूर्यादिपदप्रक्षेपेणोहः सिद्ध्येत् सूत्रकृताप्यर्थाद्वा कल्पनैकदेशत्वादिति स्रुवेणावद्यतीत्यादिश्रुतवाक्यैकदेशादश्रुत इव द्रव्यमित्यादिपदकल्पनैवोक्ता । चतुर्थे ऽप्यश्रुतफलेष्वेकाहकाण्डपठितेषु विश्वजिदाद्दिषु चोदनायां फलाश्रुतेः कर्म्ममात्रं विधीयते न ह्यशब्दं विधीयतइति फलप्रतिपादकशब्दाभावान्निष्फलत्वं पूर्वपक्षयित्वापि वाम्नानसामर्थ्याच्चोदनार्थेन गम्येत अर्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते अर्थतो ह्यसमर्थानाम्मानन्तर्ये ऽपि असम्बन्धः तस्माच्छ्रुत्येकदेशः स इति श्रुतवाक्यैकदेशभूतस्वर्गकामादिपदकल्पनमेव वक्ष्यते । अर्थस्य शब्दैकदेशत्वायोगाच्छ्रुतार्थापत्तिमाहुर्ये शब्दस्याकाल्पिकामतः सूत्रभाष्यन्यायतन्त्रविरोधात्ते निराकृताः । कीदृशं दृष्टान्तवचनमित्यपेक्षिते दर्शयति * यद्यदिति * शूर्प्पेण होम इति भाष्यं हेतुः स्यादित्यनेन पुनरुक्तमाशङ्क्य उपसंहारार्थत्वेन व्याचष्टे * तेन चेति * शूर्प्पेण होम कर्त्तव्ये इति द्वितीयपूर्वपक्षाभिप्रायेणोक्तं प्रथमपूर्वपक्षे तु समस्तस्य वाक्यस्य केवलहेतुपरत्वात्तदर्थानुपपत्तिकल्पितसर्वान्नकरणसाधनत्वविधिप्राप्तत्वेन शूर्प्पस्य तच्छ्रुतेरवयुत्यानुवादत्वादुपलक्षणार्थं शूर्प्पग्रहणम् । शूर्प्पेणान्येन वा होमः कर्त्तव्य इत्यर्थः । किं प्रयोजनमिति प्रश्नभाष्यं व्याप्तिवचनकल्पनेन प्रयोजनस्योक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * किं प्रयोजनमिति * द्वितीये पूर्वपक्षे चैतदुक्तं तदा हि शूर्प्पेण जुहोतीति विधेस्तेन ह्यन्नं क्रियतइत्यर्थवादनिराकाङ्क्षत्वे सत्यपि शूर्प्पासम्भवे ऽनुकल्पभूतदर्व्यादिप्राप्त्यर्थं तेन ह्यन्नं क्रियतइत्यस्यापि परावृत्त्य हेतुपरतेष्यते । तत्र शूर्प्पगतान्नकरणत्वहेतुत्वमुच्यमानं न दर्व्यादेर्होमसाधनत्वमापादयितुं शक्नोतीति व्यर्थो परावृत्तिकल्पनेति प्रश्नाभिप्रायः । प्रथमपूर्वपक्षे तु शूर्प्पश्रुतेरुपलक्षणार्थत्वात्तेन ह्यन्नं क्रियतइत्यविशेषेणान्नकरणत्वमात्रस्य हेतुत्वप्रतिपादनान्न हेतुपरत्वे व्यवस्था लभ्यत इति श्रुतविधित्यागेनाश्रुतविधिकल्पनस्य किं प्रयो-

जनमिति प्रश्नाभिप्रायो व्याख्येयः । द्विविधमपि प्रश्नाभिप्रायनिराकर्त्तुमन्यदपीत्युत्तरभाष्यं व्याचष्टे * अपरस्त्वाहेति * शास्त्रस्य महाविषयत्वं पुरुषस्य चानुष्ठानसौकर्यमश्रुतविधिकल्पनस्य अनेन प्रयोजनमुक्तम् । अन्नकरणत्वाविशेषात्सर्वेषां होमसाधनत्वे ऽभिहिते कुत इति प्रश्नभाष्यनिराभिप्रायमाशङ्क्याह * कुत इति तेनेति * शूर्पपरामर्शितत्प्रातिपदिकात्परया तृतीयया शूर्पगतस्यैवान्नकरणत्वस्य हेतुत्वाभिधानात् कुतो दर्व्यादिप्राप्तिरिति यः सिद्धान्ताभिप्रायः यदि च हेतुरित्यत्र सूत्रे वक्ष्यते स एवात्र प्रश्ने ज्ञेय इत्यर्थः । अभिप्रायान्तरमाह * अथ वेति * अभिप्रायद्वयनिराकरणार्थत्वेन सौत्रार्थवत्त्वपदव्याख्यानार्थं तस्यापीति भाष्यं व्याचष्टे * इतरस्त्वाहेति * तृतीयोपात्तस्य करणत्वस्य हिशब्दोपात्तहेतुत्वविधावुद्देश्यत्वात्प्रातिपदिकान्वयलाभेन सूर्य्यगतत्वेन विशेष्टुमशक्यत्वात् अन्नकरणमात्रस्य हेतुत्वाद्दर्व्यादिप्राप्तिसिद्धिरित्याद्यभिप्रायार्थः । करणत्वं चार्थवत्त्वशब्देनाभिप्रेतं द्वितीये रूपयोगित्वं[1] दर्व्यादेः पाकद्यपेक्षया विप्रकर्षे ऽपि यदन्नक्रियायामुपयोगित्वं तदेवात्यन्तविप्रकृष्टलाङ्गलाद्यपेक्षया साधकतमत्वेन विवक्ष्यतइत्यर्थः । शक्यते चेति भाष्यं सौत्रोपपत्तिशब्दव्याख्यानार्थतया व्याचष्टे * शक्यते चेति * पौनरुक्त्यमाशङ्क्ते * पूर्वेण त्विति * परिहरति * तेनेति । कर्त्तुमिति * करोतिना अन्नक्रियाविषयाविवक्षा लक्ष्यते तेनान्नं क्रियतइति विवक्षितुं शक्यतइत्यर्थः वेदे वक्तृभावाद्विवक्षानुपपत्तेर्व्याचिख्यासात्र विवक्षाशब्देनाभिप्रेता । एतदेव व्याचष्टे * यदेव हीति * एवंचार्थवत्त्वपदोक्तोपयोगित्वे सत्यपि साधकतमत्वाभावात्करणत्वानुपपत्त्याशङ्कानिराकरणार्थत्वेनोपपत्तिपदस्य पौनरुक्त्यं परिहृतम् । पदार्थैकत्वशब्देन करणत्वनिर्देशालम्बनत्वमुक्तम् । उपपत्तिशब्देन तु क्रियतइति वर्त्तमानान्नक्रियत्वनिर्देशालम्बनमिति स्पष्टमेवापौनरुक्त्यमित्याह * अथ वेति * होमं प्रति साधनत्वानुपपत्तिमाशङ्क्यासौत्रेणोपपत्तिशब्देनोपपत्तिं भाष्यकृद्वदति * शक्यते चेति * ग्रन्थेनेत्यर्थः । तत्र शक्यइत्यनेन करोतेः शक्तिलक्षणार्थत्वमुक्तम् । लटो वा भूतभविष्यत्कालक्षणार्थत्वं चशब्देन सूचितम् । एतद्धीति भाष्यं साध्याहारं व्याचष्टे * तत्रेति * कथं चाकारि करिष्यते वेत्यभिधीयतइति अत्राप्यध्याहार्य्यं न हीत्युत्तरभाष्यं व्याचष्टे * वर्त्तमानेति * वर्त्तमानान्नक्रियस्य होमसाधनत्वासम्भवात्करोतिना

---

१ रूपयोगित्वमिति २ पु० ना०

२ यदर्थवत्त्वग्रहं नेति २ पु० पा०

वा शक्तिर्लक्ष्यते लटौ वा भूतभविष्यत्कालत्वमित्यर्थः । भाष्यमपि यस्मान्न वर्त्तमानान्नक्रियाकालः कश्चिद्धोमसाधनमस्ति तस्माल्लक्षणाश्रयणमिति योज्यम् । एतदेवोत्तरभाष्यमेकग्रन्थत्वेन व्याचष्टे * यद्वेति * लक्षणापत्तेरुभयपक्षसाम्येनादोषत्वप्रतिपादनार्थस्य व्यर्थे स्तुतिरन्याय्येति चेदिति वक्ष्यमाणसूत्रस्य सर्वपूर्वपक्षोपपत्तिसङ्कल्पनाय व्याख्यानार्थं यदि चेति भाष्यं व्याचष्टे * यदि चेति * क्रियावर्त्तमानत्वयोरेकपदोपादानादन्योन्यनिरपेक्षयोश्चानुपपत्त्यभावादैक्यमङ्गीकृत्योभयोरित्युक्तं वर्त्तमानत्वशब्देन च क्रियावर्त्तमानत्वमभिप्रेतं चोद्यसामान्यमात्रेण दोषत्वानपायात्सूत्रभाष्यापेक्षितपरिहारसाम्यमपि दर्शयति * तेनेति * हेताविति भाष्यं कथन्तर्ह्यपेक्षितमत आह * हेताविति* भाष्यकृतान्वर्थवत्वपदस्यैव श्रौतार्थवत्त्वपरतया व्याख्यातत्वात् सूत्रान्तरव्याख्यानार्थं यदि चेत्यस्मात्प्राक् पठितामित्यदोषः । तदिदानीं व्याचष्टे * स्तुताविति * न ह्यन्नकरणत्वाविशेषाद्द्रव्यादिवच्छूर्प्पस्य प्राप्तेः शूर्प्पेण जुहोतीत्यनर्थकं स्यादत आह * शूर्प्पेणेति * भाष्यकृद्व्याख्याने हेतुत्वप्रतिज्ञायां हेत्वनभिधानादर्थवत्त्वोपपतिहेत्वोश्च साध्यानभिधानात्सूत्रस्य न्यूनत्वापत्तेः । स्वयं व्याख्यानान्तरमाह * इत्थं वेति * विधिर्वा स्यादपूर्वादितिपूर्वाधिकरणपूर्वपक्षहेतोरत्राप्यनुषङ्गेण पूर्वपक्षप्रतिज्ञायां हेत्वपेक्षापूरणात् स्याच्छब्देन चान्वयवाक्यकल्पनया हेतुत्वायोगशङ्कापरिहारं मत्वान्वयव्याक्यस्य द्रव्यादिप्राप्तिफलत्वोपपादनार्थत्वेनार्थवत्त्वोपपत्योः साध्यकाङ्क्षापूरणात्सूत्रस्यान्यूनत्वं भाष्यकृतोऽभिप्रेतम् ।

स्तुतिस्तु शब्दपर्वत्वादचोदना च तस्य ॥ २७ ॥

अत्र भाष्यकृता ऽन्नकरणताया हेतुत्वस्य प्रमाणान्तरानवसेयत्वेन शब्दैकसमधिगम्यत्वाच्छब्देन च शूर्प्पेण होमकर्त्तव्ये ऽन्नकरणत्वस्य हेतुत्वाभिधानात्तस्य च शूर्प्पेण जुहोतीति विधिसिद्धत्वेन हेत्वनपेक्षतया स्तुतिमात्रार्थत्वावगतेः शूर्प्पस्यैव शब्दविहितत्वात्तद्वरुद्धे होमे द्रव्यादेरचोदनेत्येवं सूत्रं व्याख्यातं तद्विवृणोति * शूर्प्पेणेति * विरोधसिद्ध्यर्थं द्वारैक्यप्रदर्शनार्थं करणग्रहणं समर्थः पदविधिरिति पदमात्रविधौ सामर्थ्यापेक्षास्मरणाच्छूर्प्पस्य द्रव्यादिसापेक्षत्वे शूर्प्पप्रातिपदिकस्य विभक्त्यनन्वयप्रसङ्गान्निरपेक्षत्वं विभक्तिग्रहणेनोक्तम् । समुच्चयनिरासार्थं चैतद् द्वयम् । श्रुतिग्रहणं बलीयस्त्वाद् बाधविकल्पनिराकरणायोक्तम् । न केवलं विभक्त्य-

१ द्वारैक्ये सतिविरोधः विरोधे सति करणयोः समुच्चयासम्भवः ।

न्वयान्यथानुपपत्त्या शूर्पस्य द्रव्यांघनपेक्षत्वं स्यात्किं त्वसामर्थ्यादपीत्याह * होमश्चेति * ननु हेत्वपदेशान्वथानुपपत्त्याम्वयविधायिश्रुत्यनुमानावश्यंभावाद् बलाबलविशेषे ऽपि मुख्यानुकल्पव्यवस्थया विरोधपरिहारो भविष्यतीत्यत आह * अनुत्थितायामिति * अत्रैवाचोदना च तस्येति सूत्रावयवं योजयति * तेनेति * हेत्वपदेशान्यथा ऽनुपपत्तिनिराकरणार्थतया स्तुतिग्रहणं व्याचष्टे * हेत्वपदेशश्चेति * आद्यं पूर्वपक्षं निरस्यति * शूर्पश्रुतिश्चेति * किमालम्बनस्तर्हि हेतुनिर्देशो ऽत आह * तस्मादिति * वक्ष्यमाणपक्षापेक्षया यद्वाशब्दस्तेन विध्युद्देशेनानन्तरमाकाङ्क्षितमर्थेन विधिसामर्थ्येनोपप्लुतं हेत्वपेक्षं यत्प्राशस्त्यं तस्य हेतुरिति विग्रहः । न केवलं हेतुपरत्वासम्भवात् प्राशस्त्यपरत्वं किं त्वश्रुतान्वयवाक्यकल्पनानापादकत्वादपीत्याह * कल्पनेति * एतदेव सूत्रमन्नस्वरूपस्य होमसाधनतया कल्प्येन शब्देन चोद्यमानतयेष्टत्वाद्द्रव्यादेरकरणत्वादचोदनेत्यन्त्यप्रतीकेनावतात्पर्या ऽन्यथा व्याचष्टे * अचोदना चेति * भाष्यमप्यस्यां व्याख्यायामेवं योज्यं शब्दश्चान्नकरणहेतुरित्याह * तच्च शूर्पहोमेति * शूर्पेण जुहोतीत्येतद्वाक्यविधेयाङ्गीक्रियमाणे ऽस्य स्तुत्यर्थत्वात्प्रमाणान्तरानुसारेण गौणत्वाद्युज्यते द्रव्यादिहोमे ऽनुकल्पेन वाक्येन विधये ऽङ्गीक्रियमाणे तस्य करणत्वाभावान्न युज्यतइति । व्याख्यानान्तरस्य प्रयोजनमाह *एवं चेति*

व्यर्थे स्तुतिरन्याय्येति चेत् ॥ २८ ॥

एतत्सूत्रार्थस्य पूर्वमुक्तत्वादनुभाष्यतार्थतयैतत्सूत्रमिति पुनरर्थदुक्तमिति वदता भाष्यकृता व्याख्यातं तद्व्याचष्टे *यत्पुनरिति*

अर्थस्तु विधिशेषत्वाद्यथा लोके ॥२९॥

अर्थशब्दव्याख्यानार्थमस्मत्पक्षइति भाष्यं व्याचष्टे* अस्मत्पक्षइति * विधिशेषत्वादितिसूत्रावयवव्याख्यानार्थं वाक्येति भाष्यं व्याचष्टे * वाक्येति * सत्यपि विधिशेषत्वे कथमर्थसत्तेत्याशङ्कानिराकरणार्थं सम्बादश्चेति भाष्यं व्याचष्टे * तदा चेति * वर्त्तमानान्नक्रियत्वाभिधानोपपादनार्थं तदा चेति भाष्यं व्याचष्टे * अनेनेति * करोतेरपि शक्तिलक्षणार्थत्वमनेन भाष्येण वर्त्तमानमितीतिकरणेन अक्रियं वा स्तोतुं सत् क्रियमित्युपदिशन्तीत्यपि सूचनाद्दर्शितं भवतीति व्याख्यातुमाह * अथ वेति * अनेन चैवं भाष्यं व्याख्यातं कृतं करिष्यमाणं वा स्तोतुं क्रियतइति वर्त्तमानशक्तिकं

वा स्तोतुं क्रियतइत्युपदिशतीति । अर्थस्तु विधिशेषत्वादित्यस्य व्यतिरेकप्रदर्शनार्थं त्वत्पक्षइति भाष्यं व्याचष्टे * तव त्विति * वर्त्तमानशब्देन क्रियामप्युपलक्षयेति दोषापादनार्थं विधौ हीति भाष्ये प्रश्नपूर्वकं व्याचष्टे * किं कारणमिति * परशब्दार्थः प्रतीयतइत्यनेन वाच्यतया प्रतीतिरुक्तेति कथं चिद् भ्रान्तिः स्यात्तच्च जहत्स्वार्थतापत्तेरयुक्तमिति प्रयोजनपदप्रक्षेपेणोक्तार्थं योजयति *एतदिति* प्रयोजनपदप्रक्षेपे कारणमाह * परेति * न तु वाच्ये इति शेषः। कस्य शब्दस्यार्थं कः शब्दो ऽत्र कल्प्यतइत्यपेक्षायामाह *तदिहेति* भूतवाचिनो ऽकारोति लुङो भविष्यद्वाचिनो वा करिष्यतइति लृटश्चार्थं वर्त्तमानवाची शब्दः क्रियते इति लट् प्रत्ययः कल्पनीयः शक्तिवर्त्तमानतावाचिनो वा शक्यत इति शक्नोति स्वार्थे क्रियावाची शब्दः क्रियत इति करोति धातुः कल्पनीय इत्यर्थः। न चेति भाष्यं शङ्कापूर्वकं व्याचष्टे * अथेति * सक्रियमित्यप्यत्र द्रष्टव्यम् । अशक्यार्थत्वमेव दर्शयति * न हीति * तव तु विधिवादित्वादित्यारभ्य द्वितीयपूर्वपक्षदूषणमुक्तं तदुपसंहरति * तस्मादिति । उभयथेति* लाक्षणिकत्वे मुख्यत्वे च विधिवादिनः क्रियत इति विप्रतिषिद्धमित्यर्थः । दृष्टान्तव्याख्यानार्थमस्मत्पक्षइति भाष्यं व्याचष्टे* अस्मत्पक्षे त्विति * सत्यप्यन्यस्मिन्प्रकृष्टबले देवदत्तस्यापि बलसद्भावात्कथं गौणतेत्याशङ्क्य भूम्न्यतिशायने वे युक्तम् * स्मरन्ति हि *

संयोगे ऽस्तिविवक्षायां नित्ययोगे ऽतिशायने ।
भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः ॥

इति इह च यज्ञदत्तादीन्प्रसहतइति वाक्यशेषाद् भूम्न्यतिशायने चेति ज्ञायते दृष्टान्तदार्ष्टान्तिकयोरापेक्षिकातिशयसद्भावान्मुख्यत्वं शङ्कते * नन्वेवमिति * नानेन भाष्येण निकृष्टमात्रापेक्षया प्रयोगे गौणत्वमुक्तं किं तु सर्वापेक्षयोगे निकृष्टमात्रापेक्षया प्रयोगविषयस्य मुख्यस्यातिशयस्योपचारार्थमुपन्यास इति परिहरति * सत्यमिति * मुख्यत्वं चात्र सम्भवमात्रेणोच्यते न प्रकृतोपयोगितया परशब्दार्थग्रहणमित्युपक्रमात्। वर्त्तमानक्रियत्वस्य गौणत्वे देवदत्तः पचति यो ऽधुना भुङ्क्तइति दृष्टान्तो दातव्यः विधिपक्षे ऽपि तर्ह्यापेक्षिकं मुख्यमेव साधकतमं भविष्यतीत्याशङ्क्याह * भवतस्त्विति * वर्त्तमानक्रियत्वगौणत्वयोर्दृष्टान्तत्वेनात्रोपादानं यथा वर्त्तमानक्रियत्वोपादानवत्सर्वापेक्षसाधकतमत्वस्य क्रियां प्रत्युपादानात्तस्य च यथा वर्त्तमानक्रियत्वस्य गौणत्वे निमित्तं नास्ति तथा साधकतमस्य न्यूनापेक्षायां नि-

मित्तं नास्तीत्यर्थः ।

यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ ३० ॥

यद्यपि च भवेदित्यनुज्ञादर्शनाद्विधिपक्षोऽपि सम्मत इति कस्य चिद् भ्रान्तिः स्यात्तन्निवृत्त्यर्थमाह * अभ्युपेत्येति * अस्य च प्रयोजनं चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानुयाजानीति बहुवचनात्सर्वानुयाजाभावस्य हेतुत्वावगतेरवभृथे बर्हिरनुयाजमात्राभावेऽतिप्रसङ्गनिवृत्तिः तद्भाष्यं व्याचष्टे * यद्यपीति * अत्यन्तसाधकतमत्वाभावेऽप्यापेक्षिकसाधकतमत्वप्रदर्शनाय भाष्ये दार्विपिठरप्रकाराणामित्युक्तं निर्देशादित्येतत्सूत्रावयवव्याख्यानार्थं शब्दादित्यादिभाष्यं व्यवस्थाहेतुप्रश्नपूर्वकं व्याचष्टे * कुत इति * सत्यपि हेतोः शब्दोक्तत्वे कथं व्यवस्थेत्याशङ्क्य शब्दश्चेति भाष्येण शूर्प्पगतस्यैवान्नकरणत्वस्य हेतुत्वाभिधानादिति परिहृतं तदुपपादयितुमाह * सोऽपि चेति * शूर्प्पगतस्यैवान्नकरणत्वस्य हेतुत्वं शब्देनोक्तम् । इत्येतदेव कथमवगम्यत इत्याशङ्क्य तद्धि निर्दिश्यतइत्यादिभाष्यकृतोक्तं तस्याभिप्रायमाह * शूर्पे चेति * अनेन च निर्दिश्यतइति प्रतिज्ञाभिप्रायं व्याख्यातम् । प्रकृतशूर्प्पनिर्देशकसर्वनामपरया तृतीयया तद्गतस्यैवान्नकरणत्वस्याभिधानात्तस्यैवं हिशब्देन हेतुत्वमुच्यते इत्येवं च तद्भाष्यं व्याख्येयमिति दर्शयितुमाह * सन्निधेश्चेति * एकपदोपादानलक्षणा श्रुतिः सन्निधिशब्देनाभिप्रेता । ननु लोके व्याप्त्यविरोधेन सामान्यरूपस्यैव धूमादेर्हेतुत्वावगमात्तद्दृष्टान्तेनात्रापि तथात्वापत्तेः साध्यधर्म्मिणा विशेषणमयुक्तमित्याशङ्क्याह *लोकेऽपि चेति* वेदे तु हेत्वन्यथानुपपत्तिकल्पस्य दृष्टान्तवाक्यस्य सामान्यव्याप्तिविषयत्वायोगान्न तदनुरोधेन हेतोः सामान्यरूपतापत्तिरित्याह * वेदेति * कीदृशं तर्हि अत्र दृष्टान्तवाक्यं कल्प्यते इत्यत आह *तस्मादिति* शूर्प्पत्वैकार्थसमवायिनोऽन्नकरणत्वस्यैव हेतुत्वविधायकविधिवचनद्वारान्नकरणत्वावान्तरसामान्योपलक्षणार्थं शूर्प्पग्रहणं विशेषदृष्टसंज्ञकं चैतदनुमानं लोकेऽपि प्रसिद्धमित्याह * तदेतदिति * शब्देऽपि ज्ञाने गमेर्डोरिति गोशब्दव्युत्पत्तिनिमित्तत्वेनोपात्तस्य गमनस्य प्रतिपाद्येन सास्नादिमता विशेषणदर्शनात्तदृष्टान्तेनेहापि व्यवस्थासिद्धिरित्याह * यथा चेति * नन्वेवं तर्हि शूर्प्पेण जुहोतीत्येतावतैव सिद्धेर्हेत्वभिधानानर्थक्यं स्यादत

आह * तत्रेति । यथेति * दृष्टान्तभाष्यं व्याचष्टे * यथेति * उप-संहरति * तस्मादिति * प्रत्ययश्रुतिबलेन पदश्रुतिबाधात्सामान्य-मात्रस्य हेतुत्वाभिधानाय सामान्यादिति चेदिति सूत्रावयवव्याख्या-नार्थमर्थेति भाष्यं व्याचष्टे * यदि पुनरिति * आनर्थक्यापत्तेः प्र-त्ययश्रुतिबाधायाव्यवस्था विधीनां स्यादिति सूत्रावयवव्याख्यानार्थ-म्मव्यवस्थेति भाष्यं व्याचष्टे * तत इति * हेत्वनभिधाने ऽपि हि-शब्दानर्थक्यापत्तिशङ्कानिराकरणार्थम्मस्मत्पक्षे पुनरिति भाष्यं स्पष्ट-त्वान्न व्याख्यातं तस्मादित्युपसंहारभाष्यम्मसमर्थशून्यव्यावृत्त्यर्थं हे-त्वभिधानोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * तस्मादिति * अभ्युपेत्य-वादमात्रमेतत् वस्तुगत्या शून्यत्वापि मुख्यान्नकरणत्वाभावाद्विधौ च लक्षणायोगाद्धेतुत्वानुपपत्तिरितिभावः ।

तदर्थशास्त्रवाक्यनियमबुद्धशास्त्राविद्यमानव-
चनाचेतनार्थबन्धनार्थविप्रतिषेधस्वाध्यायवद-
वचनाविज्ञायानित्यसंयोगान्मन्त्रानर्थक्यम् ॥३१॥३९॥

ग्रन्थान्तरेष्वदृश्यैकं सूत्रं तत्सिद्धिसूत्रवत् व्याख्यायै खण्डशो ऽपाठि भाष्यकारादिभिस्त्विदं किमर्थवन्तो मन्त्रा उतानर्थका इति वृत्त्य-न्तरकारोपन्यस्तसन्देहत्यागेन भाष्यकारीयस्य सन्देहान्तरोपन्यासस्य कारणं परोपन्यस्तसन्देहस्य दुष्टत्वं वक्तुमुपन्यासं तावत् करोति * इहेति * मन्त्रानर्थक्यमित्यानर्थक्यश्रवणं भ्रान्तिकारणमुक्तं दू-षयति * तत्त्विति * समुद्रो वा महासत्वइतिवदिवार्थे वाशब्दः श्लोकं व्याचष्टे * सर्वत्र हीति * उत्तरानानुगुण्यादप्यनार्थक्येन पू-र्वपक्षो न युक्त इत्याह * न चेति * अविशिष्टस्तु वाक्यार्थ इति सिद्धान्तसूत्रेणाप्यर्थवत्त्वं सिद्धवद्वक्ष्यते तच्चार्थाभिधानानादरे पूर्व-पक्षीकृते तन्निराकरणे च उभयपक्षसम्प्रतिपन्नं हेतुत्वेन वक्तुं युज्य-ते आनर्थक्ये तु पूर्वपक्षीकृते अर्थवत्त्वमुत्तरं परं प्रति साध्यं स्यान्न च प्रतिज्ञामात्रेण साधयितुं शक्यमित्यर्थः । प्रतिज्ञामात्रेण साध्यमुत्त-रमेषामिति विग्रहः अतः पूर्वपक्षासम्भवेन परोपन्यस्तसन्देहस्यायु-क्तत्वात्तत्परित्यागेनान्यथोपन्यासो भाष्यकारस्येत्याह *तस्मादिति* वचनमर्थाभिधानं तत्किं कर्मकाले मन्त्रविधिना परिगृहीतन्न वेत्य-र्थः । एतदेवोत्तरभाष्येण विवृतं सतो ऽर्थस्याविवक्षाकारणमपश्य-न्निहापि विचारे पूर्वपक्षासम्भवमाशङ्कते * नन्विति * सतो ह्यर्थस्योच्चारणैदमर्थ्याभावेनाविवक्षाया दर्शनात्पूर्वपक्षसम्भावना-

ग्राह * नैष इति * ननूच्चारणस्यार्थपरत्वाभावे ऽर्थो ऽनभिधेय एव स्यादित्याशङ्क्य नान्तरीयकत्वेनार्थाभिधानमुपपादयति * उच्चारणेति * उच्चारणनान्तरीयकत्वं यदैकस्मादपूर्वं तदेतरत्तदर्थमित्यनेन न्यायेन दृष्टान्ततयोक्तं भाष्यकारीयसन्देहसमर्थनमुपसंहरति * इत्यस्तीति * भाष्यकृता ऽस्य विचारस्य प्रयोजनद्वारेण प्रमाणलक्षणसङ्गतिन्दर्शयितु यद्युच्चारणमात्रेणेत्यादिना विचारप्रयोजनमुक्तं तदाक्षिपति * कः पुनरिति * विचारस्वरूपवत्प्रयोजनस्यापि शेषलक्षणासङ्गतत्वान्नास्य विचारस्य प्रमाणलक्षणसङ्गतिरित्यर्थः । समाधत्ते * पूर्वमेवेति * आम्नायसूत्रोक्तमक्रियार्थत्वेनाप्रामाण्यमेव मन्त्रेष्वपि यथापूर्वपक्षस्तथापूर्वमेवार्थवादाधिकरणोपक्रमएव यानि त्वतिरिक्तान्यर्थवादमन्त्रनामधेयानुपात्तानि सो ऽरोदीदिषेत्वोर्जेत्त्वोर्द्विदेत्येवमादीनीत्यादिनोक्तमित्यर्थः । अनेनोच्चारणमात्रेणोपकारकत्वे बर्हिर्लवनं बर्हिर्देवसदनं दामीतिमन्त्रस्याप्रामाण्यमभिधानेनोपकारकत्वे सामर्थ्यालोचनेन प्रामाण्यमिति प्रामाण्याप्रामाण्यप्रयोजनत्वेन लक्षणसङ्गतिर्भाष्यकृता दर्शिता धर्मप्रमाणभूतविध्येकवाक्यत्वेनार्थवादप्रामाण्ये ऽभिहिते तदभावान्मन्त्राणामप्रामाण्यमित्यर्थवादप्रामाण्यहेतुप्रत्युदाहरणरूपेण पूर्वपक्षवादिनः प्रत्यवस्थानादर्थवादविचारसङ्गतिरथेदानीमिति वदता भाष्यकृतोक्ता को ऽर्थवादः को वा नेति कोष्ठशाधनेनाधिकरणद्वयस्यार्थवादाधिकरणशेषत्वाद्व्यवधायकत्वमिदानीं शब्देनोक्तं प्रकरणान्तरत्वेनानन्तराधिकरणसङ्गत्यभावो न दोषः ।ननु यद्यक्रियार्थत्वेनाप्रामाण्यमत्र पूर्वपक्षस्ततो नोच्चारणं पूर्वपक्षे ऽङ्गीकार्यम् । अर्थानभिधाने ऽपि कर्म्मकालोच्चारणस्यापि प्रयाजादिवदारादुपकारकत्वेन क्रियार्थत्वोपपत्तेरित्याशङ्क्याह * तदुत्तरेणेति * तस्याक्रियार्थत्वेनाप्रामाण्यस्य यदुत्तरं तुल्यसाम्प्रदायिकत्वं चकारादध्ययनविधिदृष्टार्थत्वं च तेनैव मन्त्रेष्वक्रियार्थत्वशङ्कानिवृत्तेर्न पुनरक्रियार्थत्वमभिहितमित्यर्थः। नैराकाङ्क्ष्यमुपपादयति * एवं हीति * क्रिया तत्संबन्ध्यनभिधायिनां तत्कालप्रयोज्यानामपि चार्थवादानां यत्र क्रिया संबन्धापादनं तत्र मन्त्रेषु क्रियाकालप्रयोज्येषु तत्संबन्धे कः सन्देह इत्यर्थः अतो ऽक्रियार्थत्वस्यात्र शङ्कितुमशक्यत्वात्किमुच्चारणमात्रेण क्रियार्थत्वमभिधानेन वेति तद्विशेषविचारो भाष्यकारीयो युक्त इत्याह * तस्मादिति * नन्वेवमपि लिङादिवद्विधायकत्वेनार्थवादवद्वा स्तावकत्वेन क्रियार्थत्वसम्भवात्किमित्युच्चारणेनाक्रियार्थत्वाङ्गीकरणमित्याशङ्क्याह * तत्रेति * स्वयमेव भाष्यकारो ऽपि वा प्रयोग-

सामर्थ्यान्मन्त्रो ऽभिधानवाची स्यादित्यत्र निराकरिष्यतीत्यर्थः । ननु मन्त्रत्वाविशेषात्सामान्यमपीहोदाहरणत्वप्रतीतेस्तेषां चावाचकत्वादर्थपरत्वानुपपत्तेरव्यापकः सिद्धान्तः स्याद्दत आह * सामसु त्विति * अर्थपरत्वाक्षराभिव्यक्तिपरत्वे सामनामपि तदुद्धारार्थपरत्वसम्भवात् किं तेषामात्मप्रयोगमात्रपरत्वमुताक्षरव्यक्तिपरत्वमित्येतद्विषयः सन्देहो भाष्यकृतोक्त इत्यर्थः । नन्वेवमपि श्रुत्यसंयुक्तानां बर्हिर्देवसदनं दामीत्यादीनामर्थपरत्वाभावे लैङ्गिकविनियोगासम्भवेन कर्मकालोच्चारणे प्रमाणाभावादव्यापकः पूर्वपक्षः स्यादिति शङ्कते * कथं पुनरित * परमतेन परिहरति * के चिदिति * का तर्हि सन्देहाविवरणभाष्यस्य गतिरत आह * अत इति * अतो नैवैतदञ्जसेत्यन्वयः । प्रयोजनभाष्यमपि गमयति * यदपीति * एवं त्वानर्थक्यापत्तेस्तस्य च सामान्योपयोगाभिधानेन प्रागेव निराकृतत्वाद्भाष्यानार्जवापत्तेश्चापरितोषान्मतान्तरमाह * अथ वेति * दर्शनं सम्प्रदायः समाचारः प्रसिद्धिरित्यनर्थान्तरं, ननु प्रसिद्धेः स्मृतिरूपत्वेन निर्मूलायाः प्रामाण्यायोगात्सदसन्मूलत्वेन तामविचार्य सिद्धवद्विशेषविचारो न युक्त इति शङ्कते * किमर्थमिति * स्मृत्यधिकरणवक्ष्यमाणप्रामाण्यायाः सदाचाररूपायाः याज्ञिकप्रसिद्धेरसन्मूलत्वाशङ्का न युक्तेति परिहरति * तत्रेति * स्मृतिन्यायेन शिष्टत्रैवर्णिकदृढपरिग्रहेणैषां मन्त्राणां प्रयोगित्वं दृढमवस्थितं तस्य चानेन विचारेण मूलविशेषनिरूपणमित्यर्थः । याज्ञिकप्रसिद्धिबलेन कर्म्मकाले मन्त्रोच्चारणाभ्युपगमे पूर्वपक्षे ऽपि बर्हिर्लवनादावेव बर्हिर्देवेत्यादीनामुच्चारणापत्तेर्न नियोगतो बर्हिर्देवसदनं दामित्येष बर्हिषां लवने विनियुज्यतेति भाष्यमयुक्तं स्यादित्यपरितोषात्स्वमतेनार्थपरत्वाभावे ऽपि कर्मकाले मन्त्रोच्चारणमुपपादयन्पूर्वपक्षमारभते * अथ वेति * नन्वदृष्टार्थत्वेनाप्यध्ययनविधिविहितस्याध्ययनस्य पुरुषार्थानुबन्धित्वोपपत्तेः कथं कर्म्मकाले मन्त्रोच्चारणाध्यवसानमत आह * तथा हीति * प्राकृताङ्गनिराकाङ्क्षायाविकृतेरुभयाकाङ्क्षालक्षणप्रकरणायोगात्तद्विषयं क्रमग्रहणं सर्वाङ्गसाधारणनामस्य न्यायस्य दर्शयितुं यावच्छब्दः अङ्गत्वप्रतिपत्त्युत्तरकालीनः फलेनोपकारत्वेन स्वीकारो ऽभिहितः । ननु श्रुत्ययुक्तानां मन्त्राणां क्रमप्रकरणपठितानां विध्यभावेन कैमर्थ्यानपेक्षणादध्ययनविधौ च कर्मासन्निधानाद्विश्वजिन्न्यायेन स्वर्गार्थत्वावसायात् गोदाहनादिवत्क्रमप्रकरणसंस्पर्शो ऽप्यङ्गत्वेन स्वीकारो न युक्त इत्याशङ्क्याह * मन्त्रेति * स्वीक्रियतइत्यनुषङ्गः वि-

ध्यर्थवादाध्ययनवदस्याप्यवैरूप्याय दृष्टार्थत्वाध्यवसानात्कर्म्मकालोच्चारणमात्रार्थत्वे ऽपि तदनपायात्साकाङ्क्षत्वेन क्रमिप्रकरणिभ्यां स्वीकारो युक्त इति भावः। ननु मन्त्रस्वरूपवत्प्रयाजादिवाक्यस्य स्वरूपस्यापि क्रमप्रकरणसंस्पर्शात्कर्मकालोच्चारणापत्तिरत आह * तत्रेति * कर्माङ्गभूतार्थाभिधानेन नैराकाङ्क्ष्यान्न तत्स्वरूपस्य क्रमप्रकरणसंस्पर्शेऽप्यङ्गत्वेन स्वीकार इति भावः। मन्त्राणां तु प्रयाजादिवाक्यवत्कर्माङ्गभूतार्थानभिधायकत्वात्प्रधानवाक्यवच्च कर्म्मविधायकत्वस्य तच्छेषवद्वा स्तावकत्वस्य च द्वितीये निराकरिष्यमाणत्वात् अनुतिष्ठासितार्थस्मृतेश्च ध्यानादिना सिद्धेः साकाङ्क्षत्वेन क्रमप्रकरणाभ्यां स्वरूपस्यैवाङ्गत्वावसायाद्ग्रहणमित्याह * मन्त्राः पुनरिति * एवं तावन्मन्त्रस्वरूपस्य क्रमप्रकरणाभ्यामङ्गत्वावसायात्तस्य च निर्व्यापारस्याङ्गत्वायोगादवश्यकल्पोच्चारणव्यापाराङ्गीकरणात्कर्मकालोच्चारणसिद्धिस्तावन्मन्त्रे पर्यवसानं चोक्तम्। इदानीमध्ययनविधिनापि क्रमप्रकरणपाठार्थवत्त्वाय कर्माङ्गत्वमाक्षिपतोच्चारणं विना तदयोगात्कर्म्मकालोच्चारणमात्रं कल्प्यते। तावन्मात्रत्वेन ग्रहणसंस्कार्यत्वोपपत्तेर्नार्थाभिधानपर्यन्तत्वं कल्पयितुं शक्यमित्याह * स्वाध्यायेति * प्रयाजादिवाक्यानां तु कर्म्माङ्गभूतपदार्थविधानार्थत्वात्तस्य च शास्त्रार्थावधारणकालीनत्वेन कर्मकालोच्चारणानपेक्षत्वादृष्टार्थोच्चारणकल्पनं न युक्तमित्याह * प्रयाजादीति * रूपग्रहणमेव प्रसक्तमित्यापातप्रतिभानमात्रेणोक्तं मन्त्राणां तु कर्म्मकालोच्चारणनिरपेक्षार्थानभिधायकत्वादवश्यम्भाविकर्म्मकालोच्चारणमित्याह * न त्विहेति * ननु कर्मकालप्रयोज्यानां मन्त्राणामर्थाभिधानार्थता प्रतीयमाना नापह्नोतुं शक्येत्याशङ्क्याह * शब्दे चेति * ध्यानादिनाप्यनुतिष्ठासितार्थस्मृतिसिद्धेरभिधानार्थत्वे कल्पनापत्त्यविशेषादुच्चारणाभिधानयोः किं विवक्षितमिति सन्देहप्राथम्यावश्यकत्वाभ्यामुच्चारणविवक्षैव न्याय्येति भावः। पूर्वपक्षमुपसंहरति * तस्मादिति * ननु भाष्यकृता तदेतदवगच्छाम उच्चारणमात्रेणोपकुर्वन्तीति पूर्वपक्षं प्रतिज्ञाय कुत इति प्रश्नपूर्वकं तदर्थशास्त्रादीनि कारणानि उक्तानि कस्मात्तत्परित्यागेन प्राथम्यावश्यकत्वादिकारणान्तरं भवतोक्तमत आह * तथा चेति * पूर्वोक्तन्यायेनाविवक्षितार्थत्वं सिद्धे तदर्थशास्त्रादीनि सूत्रभाष्यकाराभ्यां करणत्वेनोच्यन्ते लिङ्गमात्रत्वात्तेषां तस्य च न्यायप्राप्तार्थद्योतकत्वादिति भावः। परिहारसूत्रक्रमानुसारात्पश्चादुदाहार्य्यस्यादावुदाहरणमयुक्तमाशङ्क्या-

ह * परिहारेति * यथा साक्षदिति भाष्ये साक्षत्वमवास्तवमेव प्रतीतिमात्रेणोक्तमिति व्याचष्टे * यथेति * नन्वर्थवादार्थमिति भाष्यं विधिशेषत्वं विनार्थवादत्वायोगाद्युक्तमाशङ्क्य व्याचष्टे * नन्विति * न हि येनेतिभाष्यमभिमतविपरीतार्थत्वादयुक्तमाशङ्क्य छित्वा व्याचष्टे * न हीति * न चेति भाष्यं व्याचष्टे * प्रदेशान्तरस्थस्य त्विति * तथेत्युदाहरणभाष्यं व्याचष्टे * तथेति * देवस्त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण च्छन्दसादद ऽङ्गिरस्वदभ्रिरसि नारिरसि पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरं त्रैष्टुभेन च्छन्दसादद ऽङ्गिरस्वदभ्रिरसि नारिरसि त्वया वयं सधस्थे ऽग्निं शकेम खनितुं पुरीष्यं जागतेन त्वा च्छन्दसा ऽऽदद ऽङ्गिरस्वत् हस्तआधाय सविता बिभ्रदभ्रिहिरण्ययी तपाज्योतिरजसमिदमग्निं स्वान्वीनआभर आनुष्टुभेन त्वा च्छन्दसा ऽऽदद ऽङ्गिरस्वदित्येषां चतुर्णामपि मन्त्राणामाददइत्यभिधानसामर्थ्यादेवादाने प्राप्तत्वादित्यर्थः । भाष्यकृता चतुः संख्यालक्षणगुणविधानार्थं पुनः श्रवणमाशङ्क्यान्तरेणापि वचनं तेषु चतुःसंख्येत्युक्तं तदा दानाङ्गतया चतुःसंख्याविधानाभ्युपगमात्तादृप्येण चाप्राप्तेरयुक्तमाशङ्क्य व्याचष्टे * चतुःसंख्यापीति * अयमाशयः संख्या विधीयमाना योग्यत्वात्परिच्छेदकतया विधीयते मन्त्रपरिच्छेदिका चेहासौ प्रतीयते न क्रिया परिच्छेदिकेति कारणमाह * न हीति * आश्रितवचनो गुणशब्दः परिच्छेदार्थश्च गमिः नान्याश्रितो ऽन्यपरिच्छेदको भवतीत्यर्थः । क्रियाङ्गत्वमपि न सम्भवतीत्याह *न चेति* मन्त्राविधान्नात्रारुणैकहायनीन्यायः सम्भवतीति भावः । अतः क्रियाङ्गत्वासम्भवात् सम्भवतश्च मन्त्रपरिच्छेदकत्वस्य पाठादेव प्राप्तेर्वचनानर्थक्यमित्युपसंहरति * तेनेति * भाष्यकृता लिङ्गाद्विकल्पप्राप्तौ समुच्चयार्थं वचनमित्याशङ्क्य समुच्चयशब्दस्याभावादित्युक्तं तत्समुच्चयवाचिस्वशब्दाद्यभावे ऽप्यरुणैकहायनीवन्मन्त्रसंख्ययोः परस्परनियमात्समुच्चयसिद्धेरयुक्तमाशङ्क्य व्याचष्टे * क्रियेति * ननु विकल्पे मन्त्राणां प्रत्येकमेकत्वाच्चतुःशब्दानुपपत्तिः स्यादित्याशङ्क्य पूर्वपक्षे विकल्पाप्रसक्तेर्नैष दोष इत्याह * अस्मत्पक्षे पुनरिति * अश्वाभिधान्युदाहरणे भाष्यकृता रशनादाने प्राप्तत्वान्मन्त्रस्य विधानानर्थक्यमुक्तं तदादानविधाननार्थवत्त्वोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * उभयोरिति * नन्विति भाष्येण परिसंख्यार्थत्वमाशङ्कितं तदुभयप्राप्तावेकविधेः परिसंख्याशब्दवाच्यत्वाद् गर्दभरशनायाश्चात्राविधेयत्वादयुक्तमाशङ्क्य व्याचष्टे * परिसंख्येति *

प्रवर्त्तेऽहमिति ज्ञानं येन शब्देन जन्यते।
स चोदनोच्यते यद्वा प्रवर्त्तनफला मतिः॥

इति संख्याशब्दव्याख्याया बुद्धेरपि प्रवर्त्तनफलाया विधित्वाभ्युपगमात्परेश्च वर्जनार्थत्वाद् गर्दभरशनां वर्जनीयतया बोधयतीत्युक्तं भवतीति भावः। न शक्नोतीति परिहारभाष्यं व्याख्यातुमाह * सापीति * अश्वाभिधानीमादत्त इति वचनव्यक्तौ आदाने गर्दभरशनायाः परिसङ्ख्या इत्यश्वाभिधानीमितिवचनव्यक्तौ मन्त्रे रूपान्मन्त्रमर्थादादानमित्यर्थः। ननु परिसङ्ख्यानङ्गीकरणे वाक्यस्य का गतिरित्याशङ्क्याप्राप्तविधित्वात्पूर्वपक्षे न दोषः इत्याह * अदृष्टार्थत्वे त्विति * ननु परिसङ्ख्याया अपि वस्तुतो प्राप्तविधित्वान्न दोष इत्याशङ्क्याह * यदि चेति * अश्वाभिधानीत्येकः शब्द इतीति चापरः तयोः सम्बन्ध इति द्वन्द्वगर्भः षष्ठीसमासः मन्त्राश्वाभिधानीसम्बन्धे सति दोषपरिहारः स्यान्न त्वसौ युक्त इति भावः। अतो प्राप्तविधित्वे ऽप्यादानवच्च मन्त्रविध्यापत्तेस्तस्य चोद्देश्यत्वेनाश्वाभिधान्या विशेषणमशक्यवाल्लिङ्गप्राप्त्यवैलक्षण्यादपरिहार्य्यमानर्थक्यमित्याशङ्क्याह * तेनेति * आदानव्यक्तिभेदे ऽप्यश्वाभिधान्या विशेषणायोगादेकेत्युक्तम्। ऐकरूप्ये ऽपि प्रकरणसंयोगभेदे पिण्डपितृयज्ञं बर्हिर्वन्न धर्मान्वयः स्यात् प्रकरणसंयोगाविशेषे ऽपि वा भिन्नापूर्वसंयोगे सति आज्यौषधसान्नाय्यवन्न धर्म्मसाङ्कर्य्यं स्यात् न त्वेतदुभयमप्यस्ति प्रकृताग्न्यपूर्वसंयोगाविशेषादिति प्रकरणेत्युक्तम्। अतो न प्रमाणमिति भाष्यं यद्युच्चारणमात्रेणेत्यनेन पुनरुक्तमाशङ्क्य तस्योपक्रमगतत्वेन सङ्गत्यर्थत्वावधारणादस्य चोपसंहारगतत्वेन प्रयोजनकथनार्थत्वात्परिहरति * प्रयोजनमिति * इह च प्रमाणशब्दप्रयोगान्मन्त्रश्रमेयार्थान्तरसिद्धिरपि पूर्वपक्षे सूचिता तथा हि।

प्रयाजादिस्मृतिलिङ्गत्वमन्त्राणां वक्ष्यते ऽत्र यत्।
देवताकल्पनं यच्च मान्त्रं तस्माद्यजिश्च यः॥
मन्त्रवर्णाश्च यद्धोतुः पूर्वपानं वदिष्यते।
मे देहीत्यात्मवादित्वान्मन्त्राणां याजमानता॥
करणानामार्त्विजत्वे ऽप्यङ्गसाध्यफलस्य यत्।
स्वामिगत्वं क्रियार्थस्य कर्तृगत्वं च वक्ष्यते॥
मन्त्रक्रमानुरोधाच्च ब्राह्मणक्रमबाधनम्।
छागस्य नियमो यश्च पशावूहश्च मन्त्रगः॥
तदर्थपरतायां स्यात्सर्वं नैवान्यथा भवेत्।

सर्वसाधारणत्वेन विचारस्य प्रयोजनम् ॥
कर्मकाले नुसन्धेयो मन्त्रार्थो ऽर्थपरत्वतः ।
इषेत्वादिषु चोच्चार्य च्छिनद्मीत्यादिपूर्तये ॥
असावित्यादिशब्दस्य स्थाने यद्वादि नाम च ।
सिद्धान्ते मन्त्रलोपश्च प्रकाश्याभाव इष्यते ॥
यथाम्नानं प्रयोगस्तु केवलो ऽर्थाविवक्षणे ।
यदि त्वर्थपरत्वे ऽपि नैतावत् स्यात्प्रयोजनम् ॥
ततो धर्मप्रमाणत्वं मन्त्राणान्नैव सिद्ध्यति ।
लवनादिस्वरूपस्य प्रकाश्यत्वे हि धर्मता ॥
समीहिताङ्गताभावान्न कथं चित्प्रतीयते ।
अपूर्वसाधनत्वेन यद्यप्येतत्प्रकाश्यते ॥
विधिप्राप्तानुवादत्वान्न तथापि प्रमाणता ।
अपूर्वसाधनत्वाच्च लवनादौ समीहिते ॥
आत्मनो ऽङ्गत्वबोधेन मन्त्रः प्रामाण्यमश्नुते ।
अश्रुतद्रव्ययागादिकल्पनाच्च प्रमाणता ॥
स्फुटैवार्थपरत्वे स्यादिति सर्वमसूसुचत् ॥

नन्वर्थपरत्वाभावे विनियोजकप्रमाणाभावेनानङ्गत्वादप्रयोग एव स्यात्सद्भावे वा तद्वशात् तद्व्यवस्थापत्तेर्विनियोगाङ्गीकरणाद् बर्हिर्लवनसम्बन्धापह्नवो न युक्त इत्याशङ्क्याह * तदा हीति * लैङ्गिकविनियोगाभावेनाङ्गसंम्बन्धाभावे ऽपि प्राकरणिकप्रधानविनियोगात्तत्प्रयोगाबाहिर्भाववर्त्तित्वमात्रवसीयतइति भावः । कीदृशं तर्हि पूर्वपक्षे मन्त्रोच्चारणानुष्ठानं स्यादित्यपेक्षयामाह * पाठेति * श्रुत्यसंयुक्तमन्त्राभिप्रायं चैतत् इषेत्वादीनां छेदनादिषु विनियोगेनाङ्गकर्मानादरायोगात्सर्वशब्दो ऽप्येवमेव व्याख्येयः । सकृच्छ्रुत्वेन लवनाद्यावृत्तावप्यनावृत्तिरुक्ता पठित्वेति च मुखं व्यादाय स्वपितीतिवत्पूर्वकालत्वानादरेण समानकर्तृकत्वमात्राभिप्रायेणोक्तम् । सिद्धान्तासम्भवे हेतुत्वेन वाक्यनियमं व्याख्यातुं नियतेत्यादिभाष्यं व्याचष्टे * अग्निरिति * पूर्वपक्षसाधनत्वेनैतमेव हेतुं व्याख्यातुमथेति भाष्यं व्याचष्टे * यस्य त्विति * नन्वर्थपत्वे ऽपि नियमादृष्टसिद्ध्यर्थं पदक्रमनियमो ऽर्थवान्भविष्यत्यत आह * अथेति * प्रत्यायनक्रमनियमस्योच्चारणक्रमनियमाधीनत्वात्प्राथम्यावश्यकत्वाभ्यां तस्मादेवादृष्टं युक्तमिति भावः । नन्वित्यादिभाष्येणार्थपरेष्वपि क्रमनियमदर्शनान्न तेनार्थाविवक्षा साधयितुं शक्यतइत्याशङ्क्य विपर्यये ऽर्थप्रत्ययाभावात्

क्रमादर इत्युक्तम् । तदिन्द्राग्निपदे विपर्यये ऽप्यर्थप्रत्ययदर्शनादयुक्तमाशङ्क्योपलक्षणपरत्वेन व्याचष्टे *यस्त्विति* तुल्यन्यायत्वाद्व्याख्यानुपन्यस्तप्रकृतिप्रत्ययोपन्यासः । अथशब्दप्रसङ्गं विवृणोति *अजादीति* इन्द्रशब्दस्याजाद्यदन्तत्वनिमित्तः पूर्वनिपातो ऽजाद्यन्तमिति स्मर्यते नीलशब्दस्य विशेषणत्वाद्विशेषणं विशेष्येण बहुलमिति पूर्वनिपातः राजशब्दस्य च षष्ठ्यन्तत्वात्षष्ठीति प्रथमानिर्दिष्टं समासउपसर्जनमित्युपसर्जनं पूर्वमितिपूर्वनिपातः । चित्रशब्दस्य विशेषणत्वात्सप्तमीविशेषणे बहुव्रीहाविति पूर्वनिपातः । निःशब्दस्य निरादयः क्रान्ताद्यर्थे पञ्चम्येति प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात्पूर्वनिपातः । आदिशब्द उदाहरणान्तरस्यापि घिसंज्ञानिमित्तपूर्वनिपातप्रदर्शनार्थः अतो भवति विपर्यये प्रत्येकं पदसाधुत्वे ऽपि समासस्यापशब्दत्वमित्याह * तेनेतिं * इतिकरणः प्रभृत्यर्थः राजशब्दादेरप्युपसर्जनत्वादिनिमित्तपूर्वनिपातस्मरणात् । नीलोत्पलराजपुरुषचित्रगुशब्दानां क्रमविपर्यये विशेषणविशेष्यभावान्यथात्वापत्तेरर्थान्यत्वमपि स्यादित्याह * पुरुषेति * इतिकरणप्रकारवचनः निष्कौशाम्बिशब्दस्य क्रमविपर्यये निष्क्रान्तः कौशाम्ब्या इत्यस्यार्थस्याप्रतीतेरर्थान्तरे च समासास्मरणादसाधुत्वमानर्थक्यं च स्यादित्याह * कौशाम्बिनिरिति * कथं तर्हि क चिदग्नीन्द्रावितिप्रयोगो ऽत आह * यस्त्विति * ननु प्रकृतिप्रत्ययादिष्वपशब्दत्वापत्तेर्विपर्ययानाश्रयणादप्राप्यमन्त्रत्वापत्तेस्तदनाश्रयणं भविष्यतीत्याशङ्क्ते * नन्विति * अर्थपरत्वाभावे ऽवयवार्थासम्भवात्समुदायप्रसिद्ध्या विशिष्टक्रमकपदसमहात्मकवाक्यविशेषस्य मन्त्रत्वावधारणाद्विपर्यये युक्तममन्त्रत्वं सति त्वर्थपरत्वे ज्ञानार्थान्मन्यतेर्मनोतेर्वा गुपूविपतिवचियमिमनितनिसन्दिच्छदिभ्यस्त्रन्नित्यौणादिके त्रन् प्रत्यये कृते मन्त्रशब्दव्युत्पत्तेर्विपर्यये ऽप्यर्थज्ञापकत्वानपायान्मन्त्रत्वन्न नश्यतीति परिहरति * तदेवेति * एतमेव परिहारं सूत्रारूढं करोति *तेनेति* येन कारणेनार्थपरत्वे विपर्यये ऽपिमन्त्रत्वं न हीयते तेन मन्त्रत्वप्रसिद्धौ प्रयोजनभूतायां विशिष्टपदक्रमसमूहात्मकं वाक्यनियमादित्यपि सूत्रं योज्यमित्यर्थः । सूत्रैकदेशे तस्मादावर्त्तते सूत्रमितिवत्सूत्रशब्दप्रयोगो ग्रामैकदेशे ग्राम आयात इति प्रयोगदर्शनात् । यद्वाध्याहारानौचित्यमाशङ्क्य सूत्रत्वाददोष इति हेतुत्वेनोक्तम् । प्रसङ्गादपरं व्याख्यानत्रयमाह * अथ वेति * बुद्धशास्त्रव्याख्यानार्थं बुद्धेः खल्वपीत्यादिभाष्यं अविरुद्धहग्विषयप्रैषे ऽर्थवत्त्वसम्भवादयुक्तमाशङ्क्याह * न हीति * ज्ञाते च वाचनं न ह्यविद्वान्विहितो ऽस्तीति तृतीयाधिकरणवक्ष्यमाणन्यायेनाधिकृतो

याजमानवदार्त्विज्ये ऽप्यनधिकारादित्यर्थः । नन्वित्याशङ्क्याभाष्यं व्याचष्टे * अथेति एवमिति * परिहारभाष्यं स्मृतिहेतुसंस्कारोदबोधकाभिधानार्थत्वेन दृष्टार्थत्वस्योक्तत्वात्पूर्वपक्षानापत्तेरयुक्तमाशङ्क्यानभिमतमपि वचनशब्दस्योच्चारणार्थत्वे संस्कारशब्दस्यापूर्वार्थत्वमापाद्यैतदुक्तमिति व्याचष्टे * तदपीति * नन्वपूर्वात्मको ऽपि संस्कारो ऽर्थाभिधानाद्भविष्यतीति मन्त्रस्य दृष्टार्थत्वानपायात् कथं पूर्वापक्षापत्तिरत आह * यदि हीति * अविद्यमानवचनव्याख्यानार्थं यज्ञ इत्यादिभाष्यं व्याचष्टे * चतुःशृङ्गादीति * ननु गौण्यावृत्त्या चतुश्शृङ्गादिरूपस्य यागादेर्विद्यमानत्वात्कथमविद्यमानवचनत्वमत आह * यद्यपि चेति * तस्य गौणरूपस्यानुष्ठानाभावात्तत्प्रतिपादनमदृष्टार्थं स्यादित्यर्थः। यज्ञप्रकाशने च तस्य विततत्वेन प्रदेशविशेषानवधारणात्पाठक्रमानुरोधेनोच्चारणापत्तेः पूर्वपक्षसिद्धिः स्यादित्याह * न चेति * मामाहिंसीरित्यस्याचेतनवेदविषयत्वादचेतनार्थबन्धनोदाहरणत्वं युक्तं न त्वविद्यमानवचनोदाहरणत्वमहिंसनस्य विद्यमानत्वादीत्याशङ्क्याह * मामेति * प्रसक्त्यभावात्तदपेक्षस्य प्रतिषेधस्याविद्यमानतेत्यर्थः । अचेतनार्थबन्धनव्याख्यानार्थमचेतने खल्वपीत्यादिभाष्यमर्थशब्देन संबोधनं प्रेषणं वाभिप्रेतमिति प्रतिपादयेयुरिति वदन्नाहेति व्याचष्टे *औषध इति* अर्थविप्रतिषेधव्याख्यानार्थमर्थेत्यादिभाष्यं व्याचष्टे * द्युत्वमिति * अदितेर्देवतात्वात्तद्विपरीतमेकैकमपि रूपं विप्रतिषिद्धमितिस्वयमन्यथा व्याचष्टे * कथं चेति * ननु स्तुत्यर्थमविद्यमानस्यापि गुणस्योपचारेणाभिधानोपपत्तेरेकस्यानेकरूपत्वं देवतायाश्च देवतान्तररूपत्वमिति हेतुद्वयं परिहरिष्यत्यत आह * न चेति * स्वाध्यायशब्दवाच्यानि मन्त्राक्षराणि यथाध्ययनकाले ऽभ्यस्यन्ते नैवमर्थाभिधानमिति स्वाध्यायवदवचनव्याख्यानार्थं स्वाध्यायकालइत्यादिभाष्यमनभ्यासमात्रेणाविवक्षावगमस्याशक्यत्वादयुक्तमाशङ्क्य व्याचष्टे * स्वाध्यायेति * अभिधेयार्थासन्निधिनिमित्ताभिधानानादरशङ्कानिराकरणार्थं पूर्णिका ऽवहन्ति करोतीति भाष्यकृतोक्तम् । अपि चेत्यादिभाष्यमर्थविशेषानभिधायित्वेन मन्त्राणामविज्ञेयत्वप्रतिपादनार्थमम्यक्सात इत्यादिष्विन्द्रस्तुतिरूपवाक्यार्थज्ञानादयुक्तमाशङ्क्याह * के चिदिति * सामान्यतो वाक्यार्थज्ञाने ऽप्यम्यगादिपदार्थाज्ञानात्सकलस्य मन्त्रस्यार्थवत्त्वं न सिद्ध्यतीति भावः । सृण्येवेत्यादीनां तु वाक्यार्थो ऽपि न ज्ञायतइत्याह * केषां चित्विति * ननु श्रोतुरप्रतिपत्तावपि मन्त्रस्याभिधायकत्वन्न विरुद्ध्यते

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एक. स्तबको मुद्रयित्वा प्रकाश्यते ।
२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रज्ञप्रवरा विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयैः ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १
(६) भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरु भिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः) ३
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

The Chowkhamba Sanskrit Series, Benares.

This Monthly Magazine consists of very rare and invaluable ancient Sanskrit works on Vedic Literature, Hindu Philosophy, different sciences, general literature and Purânas &c. that have never been published before. The monthly issue of this Magazine dealing with one subject contains 100 pages of Demy octavo size, printed neatly in beautiful types on good thick paper, after being carefully corrected by the Pandits of the Government Sanskrit College Benares and other learned men.

The works included in the Magazine hitherto issued and those in course of preparation for publication are as follows:—

Names of Books,	*Fasciculus ready for Sale*
1. Sanskâraratnamâlâ, by Gopînâtha Bhatta.	(Sanskâra) 2.
2. Shabdakoustubha, by Bhattoji Dîkshita.	(Vyâkarana) 10.
3. Sloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Pârthasârathi Misra. (Complete)	(Mîmânsâ) 10.
4. The Vedânta-Tattvatraya, of Sri Lokacharyya along with Bhatta-Bhasha-Prakasha of Sri Narayana Tirtha. (Complete)	(Vedanta) 2.
5. Karana-Prakash, by Brahmadeva. (Complete)	(Jyotisha) 1.
6. Bhatta-Chintamani, of Gaga Bhatta.	(Mimansa) 2.
7. Nyaya-Ratna-Mala, of Sri Parthasarathi Misra.	(Do) 2.
8. Brahma Sutra, with Commentary called Viggyanamrita.	(Vedanta) 6.
9. Syadwâda Manjari, by Mallîshêna with a Commentary by Hêmchandra.	(Jaina Dars'ana) 2.
10. Siddhitrayam by Yamun Muni.	(Vedanta) 1.
11. Nyâya-Makarand, of Sri Anand-Bodh Bhattarkacharyya with annotations by Chit-Sukh Muni.	(Do) 1.
12. Vibhaktyartha-Nirnaya, By M. M. Sri Girdhara Upadhyaya.	(Nyaya) 3.
13. Vidhirasâyana, of Appaya Dîkshita.	(Mimansa) 2.
14. Nyayasudha, A commentary on Tantravartika, By Pandit Someshwara Bhatta.	(Mimansa) 1.

FOR INDIA, BURMA & CEYLON.

Annual subscription (in advance)	Rs 7	8 0
Single copy	„ 1	0 0

FOR FOREIGN COUNTRIES.

	£.	s.	d.
Annual subscription (in advance) ...	0	15	0
Single copy	0	1	3

Postage free.

To be had from:— H. D. GUPTA, *Secretary,*

THE

CHOWKHAMBA SÂNSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA,

BY

PANDIT SÔMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS II.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

LONDON:—OTTO HARRASSOWITZ, LEIPZIG.

Printed By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1901.

181·43
S 69 N
F 2.

Registered According to Act XXV. of 1867.

श्रीः

—※—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—४६

अन्धस्येव रूपाप्रतिपत्तावपि प्रदीपस्य प्रकाशकत्वादत आह * न चेति * यदेकान्तेन कर्तुं शक्यमुच्चारणं तदेव मन्त्राणां[1] कार्यमित्यर्थः। क चित्तु यदेकान्तेन कार्यमुच्चारणं तदेव शक्यमिति पाठः तत्र यदेकान्तेन पक्षद्वये ऽप्यनुष्ठेयमुच्चारणं तदेव मन्त्राणां कार्यमवधार्यते शक्यमिति कृत्वेति योज्यम्। अनित्यसंयोगव्याख्यानार्थमनित्यसंयोगः खल्वपीत्यादिभाष्यं कुसीदवृत्त्यादिनित्यार्थसम्भवादयुक्तमाशङ्क्याह * अर्थेति * यस्य मन्त्रस्य यो ऽर्थः स्वरसतः प्रतीयते स एव तेन कर्मकाले प्रकाशनीयो नोत्प्रेक्षामात्रकल्पित इत्यर्थः। अतो भवत्यर्थपरत्वे केषु चिन्मन्त्रेष्वनित्यसंयोग इत्याह * केचिच्चेति * अनित्यस्यार्थस्याकर्माङ्गत्वेन प्रकाशनानर्हत्वात्तत्संयोगस्यार्थाविवक्षाहेतुत्वोपपादनाय कर्माङ्गभूतैरित्युक्तम्। अनित्यसंयोगोदाहरणं व्याख्यातुमाह * यथेति * ना शिरं दुर्हे नयन्ति धर्मआनोभर प्रमगन्दस्य वेदो चैवाशाखं मच्चवत् रन्धयान इति मन्त्रशेषः ऋषिप्रत्ययाधीनत्वादर्थतश्च निर्णयस्यार्थकथनम्। अपहारसामर्थ्यद्योतनार्थं त्रैलोक्यैश्वर्यवचनं किं कृतेनेति वदन्त इति कीकटशब्दनिर्वचनम्। तप्त घृते पयोनिक्षेपेण निस्यन्दिते यच्छिष्टं तद्धर्मशब्देनोच्यते। भृञ्भरणइति भौवादिकस्य भृञो धात्वन्तरेणार्थकथनं व्याख्यानार्थम्। दुभृञ्धारणपोषणयोरिति जौहोत्यादिकस्य भृञो रूपं बिभृहीति दर्शितं यदीत्यनित्यसंयोगोपसंहारभाष्यं व्याचष्टे * यद्येतदिति * नत्वनित्यसंयोगपरिहारायार्थान्तरमस्य मन्त्रस्य वक्ष्यामो ऽत आह * न चेति * अर्थाविवक्षयाप्यनित्यसंयोगपरिहारसम्भवान्नाप्रतीयमानार्थकथनं युक्तमित्याशयः। मन्त्रानर्थक्यप्रतिज्ञाव्याख्यानार्थं तदेतैरिति भाष्यं व्याचष्टे * अत इति *

अविशिष्टस्तु वाक्यार्थः ॥ ४० ॥

सिद्धान्तसूत्रव्याख्यानार्थमविशिष्टस्त्विति भाष्यं प्रतीतिमात्रेण विवक्षानुपपत्तेरयुक्तमाशङ्क्योपपादयति * मन्त्रेति। अयमाशयः * मन्त्रोच्चारणस्य कर्माङ्गत्वं प्रयाजादिवत्साक्षाद्वाभ्युपगम्यते प्रोक्षणादिवद्वा मन्त्रद्वारेण साक्षादप्यङ्गत्वं प्रकरणेन वा स्यादध्ययनविधिसामर्थ्येन वा न तावत्प्रकरणेन कर्म्मप्रकरणे मन्त्रोच्चारणस्याविधानात् स्वाध्यायाध्ययनविधिना यथाम्नानवेदाध्ययनविधानात्कर्मप्रकरणपठितानां तत्रैवाध्ययनं विदधता कर्मप्रकरणा-

१ प्रोक्षणादीनामवघातादिद्वारायथा परम्परया कर्माङ्गता तद्वदिति।

ध्ययननियमार्थवत्त्वाय तदङ्गत्वमाक्षिपतोच्चारणं विनाङ्गत्वायोगात्कर्मकालोच्चारणविधिकल्पने कृते कैमर्थ्यापेक्षायामुच्चारणस्य कर्माङ्गत्वमाक्षिप्यतइति चेत् न । मन्त्राङ्गत्वनिर्वाहाय कल्पितस्योच्चारणस्य मन्त्राक्षराभिव्यक्तिमात्रेण निराकाङ्क्षस्य साक्षात्कर्माङ्गत्वायोगात् । नापि मन्त्रद्वारेणोच्चारणस्य कर्मागत्वं मन्त्राक्षराणामक्रियारूपत्वेन प्रकरणाग्राह्यत्वात् यथोक्तम् ।

नावान्तरक्रियायोगाद्हते वाक्योपकल्पितात् ।
गुणद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रियाः ॥

इति अध्ययनविध्याक्षिप्तस्याप्यङ्गत्वस्य स्वव्यापारं विनानुपपत्तेरुच्चारणस्य पुंव्यापारत्वेनाभिधानमन्तरेणानिर्वाहात्[1]। अत एव श्रुतिविनियुक्तानामपीषेत्वादीनामभिधानं विनाङ्गत्वानुपपत्तिः। न च पदार्थाभिधानव्यापारमात्रेणाङ्गत्वं कर्मानुष्ठानानौपयिकत्वेन तस्य वाक्यार्थमात्रप्रतिपादनमात्रे पर्यवसानात्[2]। अतः प्रकरणावधारिताङ्गभावानां मन्त्राणां कर्मानुष्ठानौपयिकवाक्यार्थप्रतिपादनव्यापारेणाङ्गत्वावसायात्कर्मकाले मन्त्रोच्चारणार्थस्यार्थाभिधानपर्यवसानसिद्धिरिति कर्मसमवेतानुष्ठास्यमानार्थस्मृतिफलत्वेनेति करणामन्त्राभिप्रायं क्रियमाणानुवादिनामनुष्ठीयमानार्थस्मृतिफलत्वात् । अनुमन्त्रणादीनां च कृताकृतप्रत्यवेक्षणायानुष्ठितार्थस्मृतिफलत्वात्प्रोत्साहनार्थानां चागन्मस्वः संज्योतिषा भूमेत्यादीनां यदेव श्रद्धया करोति तदेव वीर्यवत्तरं भवतीति वाक्यावधारितकर्माङ्गभूतश्रद्धाजननार्थमनुष्ठेयकर्मस्मृतिफलत्वात्स्तोत्रशस्त्रमन्त्राणां चारादुपकारकत्वं स्तुत्यर्थत्वेन कर्मसमवेतार्थप्रकाशनानियमात् । एवं च कर्मौपयिकार्थाभिधानार्थत्वेन प्रकरणपाठार्थत्वोपपत्तेर्नादृष्टकल्पना युक्तेत्याह * अतश्चेति * ननु प्रकारान्तरेणाप्यनुष्ठेयार्थस्मृतिसिद्धेर्मन्त्रनियमस्यादृष्टार्थत्वं त्वत्पक्षेऽपि कल्प्यमत आह * यद्यपि चेति * लिङ्गाच्च दृष्टार्थतावगतेर्न दुर्बलप्रमाणवशेनादृष्टार्थत्वं कल्पयितुं शक्यमित्याह *अवश्यं चेति* ननु प्रकरणबाधे सामान्यसंबन्धाभावात्तत्सापेक्षत्वेन लिङ्गस्याविनियोजकत्वं स्यादत आह * न चेति * नात्र प्रकरणावगम्यक्रतुसंबन्धाख्यसामान्यसंबन्धो बाध्यते विरोधाभावाद् द्वारविशेषसंबन्धे तु विरोधः तत्र च प्रकरणस्य शक्तिरूपलिङ्गसापेक्षत्वात्तदूबाध्यत्वं युक्तमेवेत्याशयः । दृष्टार्थत्वेनाविरोधान्न क्वस्य चिद् बाध इत्याह * तस्मादिति * अभिधानार्थत्वाभावे च निर्व्यापाराणां मन्त्राणां प्र-

---

१ उच्चारणेनाभिव्यक्तानामित्यर्थः ।

२ मन्त्रव्यापारत्वाभावात् अतो ऽर्थाभिधानलक्षण एव मन्त्रव्यापारः ।

करणाग्रहणायोगादुच्चारणं व्यापारद्वारेण प्रकरणग्रहणे तस्यानुष्ठानानौपयिकत्वेनाभिधानवत्कर्मविधिनानाक्षेपादविधानाच्चोच्चारणद्वारेण प्रकरणग्रहणं प्रकरणग्रहणाच्चोच्चारणमितीतरेतराश्रयापत्तेरुच्चारणविधिकल्पनं विना कर्मकालोच्चारणकर्त्तव्यतायां प्रमाणाभावाद्याङ्किकाचारदर्शनेनोच्चारणविधिकल्पने क्लेशः स्यादित्यर्थान्तरन्यासेनाह * एवं चेति * उपसंहरति * अत इति * नैवमित्याशङ्काभाष्यं व्याचष्टे नैवमित्यभिधानार्थत्वे ऽप्यसमवेतार्थप्रकाशनस्यादृष्टार्थत्वापरिहारात्तत्पर्यन्तत्वकल्पनं न युक्तमित्याशयः । तदुच्यतइति परिहारभाष्यं व्याचष्टे * तत्रेति * ततश्च वचनान्नैषामितरार्थं प्रयुज्येतेत्यसमवेतस्यापि समवेतविशेषणत्वेनाभिधानस्यानवमे वक्ष्यमाणत्वाद्विशिष्टरूपप्रकाशनस्यादृष्टार्थत्वापरिहारात्तात्पर्यपूर्वकमनुष्ठितमभ्युदयकारि भवतीति नियमादृष्टकल्पनेन चाभिधानार्थवत्त्वोपपत्तेः कामामित्युक्तं तस्मादस्तीत्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * नन्वस्तु श्रुत्यविनियुक्तानामुक्तेन न्यायेनार्थप्राधान्ये श्रुतिविनियुक्तानां त्वर्थप्राधान्ये ऽभ्यादानादिमन्त्राणां लिङ्गादेव विनियोगसिद्धेस्तदर्थशास्त्रानर्थक्यं स्यादत आह * तां चतुर्भिरिति * इतिकरणो ऽत्र मन्त्रविनियोजकश्रुतिमात्रपरिग्रहार्थः । चतुर्भिरितितृतीयया मन्त्राणां करणत्वे ऽभिहिते स्वव्यापारं विना तदयोगात् उच्चारणस्यात्तद्व्यापारत्वात्कर्मोत्पत्त्यनुपयोगित्वाच्च स्वव्यापारकर्मोत्पत्त्युपयोग्यभिधानव्यापारेण करणत्वाध्यवसायाच्चतुर्भिरभ्यादानमभिदध्यादिति वाक्यार्थावगमे ऽइति करणविनियुक्तानामर्थक्रियारूपत्वेन कथम्भावाग्राह्यत्वात् द्रव्यदेवतावाक्रियोत्पत्त्युपयोगित्वावगतेः कारकत्वावसायात्करणव्यतिरिक्तकारकत्वानुपपत्तेः करणत्वनिश्चये सति पूर्ववदभिधानार्थत्वसिद्धेः स्तोत्रशस्त्रमन्त्राणां च स्तौतिशंसतिभ्यामेवाभिधानार्थत्वावसायात्तां चतुर्भिरादत्तइत्यादिश्रुतिविनियोज्येष्वभ्यादानादिमन्त्रेषु तदर्थशास्त्रानर्थक्यप्रसङ्गायोगेनाप्यर्थप्राधान्यमविहतमित्यर्थः । अनेन च नन्वित्याशङ्काभाष्यस्य कामामित्युत्तरभाष्यं व्याख्यातं अथेत्याशङ्कानिराकरणार्थत्वेन ।

गुणार्थेन पुनः श्रुतिरिति ॥ ४१ ॥

सूत्रमवतारयितुं न हीति भाष्यं व्याचष्टे * वदामइति *

---

१ उत्पत्त्यपूर्वानुपयोगित्वात् द्रव्यदेवताप्रकाशकस्यैव कर्मोत्पत्त्यनुपयोगित्वमन्यस्य तु फलापूर्वोपकारित्वम् ।

नन्विति प्रोक्तामाशङ्कामनुभाष्य चतुःसंख्याविशिष्टमितिभाष्येण परिहृतं तदादानस्यापीष्टकामृच्चयनार्थमर्थात्प्राप्तेगुणार्थेनेति च सूत्रविरोधादयुक्तमित्याशङ्क्य व्याचष्टे * यद्यपीति * अर्थप्राप्ते चादाने संख्याविधौ भवत्यादानसंख्याविशिष्टतेत्यर्थः । विशिष्टादानविध्यभावादरुणैकहायनीन्यायानुपपत्तेः अर्थप्राप्तस्य चादानस्यानुवाद्यत्वेनैकविधावितरेण विशेष्टुमशक्यत्वाल्लिङ्गतश्चैकैकस्यैव मन्त्रस्य प्राप्तेः । संख्यानाकाङ्क्षत्वात्समुच्चयासिद्धेरपरितोषात् फलतो गुणार्थत्वप्रतिपादनपरत्वेनान्यथा व्याचष्टे * अथ वेति *

परिसंख्या ॥ ४२ ॥

अत्र भाष्यकृता परिसञ्चक्षाणे चेति पूर्वोक्तदोषत्रयमनुभाष्य लिङ्गाप्राप्तमन्त्रादानसम्बन्धविधानानर्थक्यापत्तेः । स्वार्थहानं स्यात् तदप्राप्तमन्त्राश्चाभिधानासम्बन्धविधानात्तु नैव दोषप्रसक्तिरिति नैवमित्यादिना स्वार्थहानिं परिहृत्य लिङ्गादित्यादिना श्रुतिपरिच्छिन्ने ऽर्थे लिङ्गस्याविनियोजकत्वाद्गर्दभरशनासम्बन्धाप्राप्तेन प्राप्तबाधः प्राप्त्यभावादेव च गर्दभरशनान्नेति प्रतिषेधायोगात्परार्थकल्पनाभाव इति दोषत्रयं परिहृतम् । तत्र प्राप्तबाधपरिहारभाष्यं तावदृजुत्वाद्व्याख्यातुमाह * यावद्धीति * नन्वप्रामाण्यापत्तेर्भा नाम रशनामात्रे मन्त्रविनियोजकश्रुतिः कल्प्यतां लिङ्गादेव तु विनियोगस्सेत्स्यत्यत आह * नचेति * उक्ते ऽर्थे भाष्यं योजयति * तदेतदाहेति * श्रुत्यभिप्रायो भाष्ये वाक्यशब्दः स्वार्थहानपरिहारभाष्यमिदानीं व्याचष्टे * यदपीति * गर्हार्थेनापिशब्देन क्लिष्टत्वमस्य भाष्यस्य सूचितं सामान्येनेत्यभिप्राय इति शाकपार्थिवादिवन्मध्यमपदलोपी समासः सामान्यशब्देन निर्विशेषणत्वमुक्तं नशब्देनादाने मन्त्रस्य सम्बन्धो विधीयते येन लैङ्गिकप्राप्तिः । सम्भवात्तदर्थशास्त्रानर्थक्यप्रसक्तेः स्वार्थहानं स्यादित्यर्थः । किमित्येवं व्याख्यायते इत्यपेक्षायां यतः क्रियायैव मन्त्रस्य सम्बन्धो युक्तः इत्यध्याहारेण योज्यम् । तदेव कुत इत्यपेक्षायां कारकाणां साक्षात्परस्परसम्बन्धाभावादित्युक्तं तेनादानसम्बन्धनिराकरणभाष्यस्यायमर्थो भवतीत्याह * तस्मादिति * का तर्हीत्यश्वाभिधानीमिति कारकसम्बन्धप्रतिपादकस्य भाष्यस्य गतिरत आह * किं तर्हीति * द्वितीयान्तेन कर्मशक्त्याक्षिप्तविशिष्टक्रियासम्बन्धविवक्षयेदमुक्तमिति भावः । एवं व्याख्यायमाने विशिष्टानुवाददोषापत्तेरपरितोषादश्वाभिधान्युद्देशेन

---

१ क्लिष्टत्वञ्च मन्त्राश्वाभिधान्योः कारकयोः संबन्धप्रतिपादनात् ।

मन्त्रविशिष्टादानविध्युत्तरकालं परस्परनियमलभ्यकारकसम्बन्धाभिप्रायेणान्यथा व्याचष्टे * अथ वेति * नन्वश्वाभिधानीविशिष्टेऽप्यादाने रशनादानत्वाविशेषेण लैङ्गिकमन्त्रप्राप्तिसम्भवात्तदर्थशास्त्रत्वमपरिहृतं स्यादत आह * सर्वथेति * परिसंख्याफलत्वेनायं दोषः परिहार्य इत्याशयः। नन्वश्वाभिधान्यां मन्त्रविशिष्टादानविधौ वर्जनबोधकत्वाभावान्न परिसंख्यात्वं स्यादित्याशङ्क्य ते * नन्वेवमिति * परिहरति * फलेनेति * न चैवमौपचारिकत्वापत्तिः फलत एव परिसंख्याव्यपदेशादित्याह * सर्वत्र हीति * प्रसङ्गान्नियमव्यपदेशोऽपि फलेनैवेति दर्शयितुं नियमग्रहणं परिसंख्या वर्जनबुद्धिस्तदर्थो नञादिः परिसंख्याशब्दः तस्माद्वा ब्राह्मणो न हन्तव्यो नेक्षेतोद्यन्तमादित्यमित्यादीनामेव श्रुत्या परिसंख्यात्वं निषेधपर्युदासव्यपदेशविशेषात्तु व्यवहारासिद्धेः न परिसंख्याव्यपदेशः सत्यमेव वदितव्यमित्यादीनामेवकाराच्छ्रुत्या नियमत्वम्। अन्यत्र तु फलेनैव नियमपरिसंख्याव्यपदेशः। ननु प्रोक्षणादावप्यौदासीन्यनिवृत्तिकर्त्तव्यतानियमदर्शनादवघातादौ चाप्राप्तप्रापणाद्दलनादिनिवृत्तिदर्शनादिमामगृह्णन्नित्यादावपि चाप्राप्तप्रापणकर्त्तव्यतानियमदर्शनात् फलतो व्यपदेश तत्सङ्कुरात् विध्यादीनां सङ्कुरप्रसङ्ग इत्यभिप्रायेण पृच्छति * कस्तर्हीति * फलासङ्कुराभिप्रायेणोत्तरमाह * उच्यतइति * श्लोकं व्याचष्टे * विधिरेव हीति * को ऽसौ विशेष इत्यपेक्षायामाह * तत्रेति * विधेयस्वरूपप्राप्तेरेवात्र फलत्वसम्भवान्न तत्र नियमौदासीन्यनिवृत्त्योर्विप्रकृष्टयोः फलत्वं युक्तमिति भावः। अवघातादौ तु नियमताफलत्वान्नियमव्यपदेशमाह * यत्र त्विति * ननु तत्रापर्यालोचनात् प्रागेव प्रत्यक्षेण विधिनावघातादेरप्राप्तस्यैव विधेः स्वरूपप्राप्तिरेव फलं स्यादत आह * तण्डुलेति * नन्वर्थतः प्राप्तिसम्भवान्माभूत्प्राप्तिमात्रस्य फलत्वम्। अप्राप्तांशपूरणवत्त्वन्यनिवृत्तेरपि प्रतीयमानायाः कस्मान्न फलत्वं स्यादत इत्याह * तदप्राप्तीति। अयमाशयः * अप्राप्तांशपूरणात्प्रागुपायान्तराक्षेपस्य निराकर्त्तुमशक्यत्वातन्निवृत्त्यनुपपत्तेः उत्तरकालं चानुनिष्पादितत्वेन सिद्धेर्न प्रयोजनापरपर्यायमन्यनिवृत्तेः फलत्वं युक्तमिति। प्रसिद्धनियमव्यपदेशहान्यापत्तेरपि नास्याः फलत्वमित्याह * न चेति * अविधेयगतत्वेन च विप्रकृष्टत्वाच्चान्यनिवृत्तिः फलमित्याह * प्रत्यासन्नं वेति * नन्वन्यनिवृत्तेः फलत्वाभावे विध्यनिवारितत्वादुपायान्तराणामप्याक्षेपः प्रसज्येतेत्यत आह * तत्प्रसक्तीति * अन्यनिवृत्तिं विना नियमानुपपत्तेर्नान्तरीयकान्यनिवृत्त्यवगतेरुपायान्तराक्षेपवारण-

मित्याशयः । यदि चाक्षिप्तेषूपायान्तरेष्वयं विधिः प्रवर्तेत ततः शास्त्रमन्तरेण प्राप्तोपायान्तरनिवृत्त्ययोगाच्छास्त्रस्येवान्यनिवृत्तावपि तात्पर्यफलपना स्यान्न त्वेतदस्ति श्रुतिकल्पनं विनार्थाक्षेपस्याप्राप्तत्वेन मन्थरत्वाच्छीघ्रप्रवृत्तेन प्रत्यक्षेण विधिनैवैकोपायनियमे नैराकाङ्क्ष्येणार्थाक्षेपानुपपत्तेः। प्रापकाभावादेवोपायान्तरनिवृत्तिसिद्धेर्न शास्त्रस्य तत्पर्यन्तं व्यापारः कल्प्यतइत्यभिप्रायेणाह * न चेति * उपसंहरति * सा चेति * उभयोस्तु नित्यप्राप्तौ पुनर्वचनस्य स्वरूपप्राप्तिनियमफलत्वायोगेनान्यनिवृत्तिफलत्वात्परिसंख्याव्यपदेश्यत्वमित्याह * यत्पुनरिति * प्राप्तइति सप्तम्यास्तत्र चान्यत्र चेति सप्तमीभ्यां वैयधिकरण्येनान्वये तत्र चान्यत्र च प्राप्नुयादित्यर्थो भवति सामानाधिकरण्ये तु तच्चान्यच्चेति । यथासंख्येनोभयत्रोदाहरणमाह * यथेति * चातुर्मास्येषु साकमेधपर्वणि पूर्वेद्युर्गृहमेधीयेष्टिं विधाय श्रुतमाज्यभागौ यजति यज्ञताया इत्युदाहृत्य दशमे ऽष्टधा चिन्तयिष्यते तत्रातिदेशप्राप्तयोराज्यभागयोरनुवादमात्रमेतदित्याद्यः पक्षः, द्वितीयस्त्वानर्थक्यपरिहारायोभयत्र विहितयोराज्यभागयोरिहाभ्युदयकारित्वकल्पनया प्रकृतिवदित्थं कर्त्तव्यमित्युपदेशातिदेशाभ्यां संहृत्य विधिरिति तृतीयस्तूभाभ्यां विधानस्यादृष्टार्थत्वापत्तेर्यज्ञताया इति च स्तुतिदर्शनात् प्रकृतगृहमेधीयस्तुत्यर्थमिति चतुर्थस्तु गृहमेधीयविध्येकवाक्यत्वाभावेन तत्प्रशंसार्थत्वायोगात् यज्ञताया इत्याज्यभागस्तुतिप्रतीतेरनन्यपरं पुनः श्रवणमाज्यभागधर्मैककर्मान्तरविधानार्थमिति। पञ्चमस्त्वाज्यभागशब्दस्य धर्मलक्षणार्थत्वापत्तेः कर्मान्तरविध्ययोगादतिदेशेनाज्यभागयोः प्रयाजादिषु च प्राप्तेष्वाज्यभागपुनःश्रवणमन्यपरिसंख्यार्थमिति सो ऽयमिह दर्शितः। षष्ठस्तु चोदकप्राप्तेः प्राथम्यात्फलतः परिसंख्यानुपपत्तेस्त्रिदोषत्वापरिहारादुपदिष्टाज्यभागवर्जमतिदेश इति सप्तमस्त्वखण्डकरणोपकारातिदेशद्वारेण युगपत्सर्वपदार्थप्राप्तेस्तद्वर्जनपक्षस्य तृतीये चोदनार्थकास्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थमित्यत्र निराकृतत्वादाज्यभागयोरेवातिदेशापसंहार इति । इममपि पक्षमतिदेशस्य क्रत्वर्थपदार्थविशेषगोचरत्वेन सामान्यविधिरस्पृष्टः संक्षिपेत विशेषत इत्युपसंहारायोग्यत्वान्निराकृत्य कल्पोपकारप्राकृताज्यभागनिराकाङ्क्षत्वेनातिदेशाभावाद् गृहमेधीयस्यापूर्वत्वज्ञापनार्थमिदं वचनमिति सिद्धान्तो वक्ष्यते। नन्वन्यनिवृत्तिफलत्वे परिस-

१ लिङ्गरूपसामर्थ्येनाक्षेपः ।

२ विधेः फलम् । नियमविधिफलम् ।

ङ्न्याया निवृत्तेः प्राप्तिपूर्वकत्वात्प्राप्तमन्त्रविषयत्वापत्तेः द्विरोषत्वं-मपरिहार्यं स्यादत आह * अत्रापि चेति * नन्वेवं सत्यानुमानिक-वाक्यप्रतिबन्धकफलत्वेनार्थवत्त्वोपपत्तेर्न गर्दभरशनानिवृत्तिफलत्वं स्यादत आह * सर्वस्येति * अप्राप्तविधित्वे ऽपि फलतः परिसं-ख्यात्वे विस्तरेणोक्तम् । सुखग्रहणार्थं सफलयति * तेनेति * परिसंख्यानिरूपणस्य तदर्थशास्त्रतापरिहारोपयोगितामाह * इत्य-पौनरुक्त्यादिति *

अर्थवादो वा ॥ ४३ ॥

* नन्विति * भाष्येण ब्राह्मणाम्नातस्य वाक्यस्य मन्त्रप्रदेशा-म्नातमन्त्रविशेषलिङ्गप्रकरणानुमितविधिशेषत्वाभावादर्थवादत्वं न युक्तमिति प्रागुक्तां शङ्कामनुभाष्य नायमित्यादिना मन्त्रस्तुत्यसम्भवे ऽपि प्रथमस्तुतिर्भविष्यतीति परिहृतं तद्व्याचष्टे *यद्यपीति* प्रथ-नस्यार्थप्राप्तत्वेनाविधेयत्वात् । स्तुतिरयुक्तेति शङ्कते * ननु चेति * परिहरति * नैतदिति * आनर्थक्यात्तर्ह्यविधेयं प्रथममत आह * विधाने त्विति * अस्तु वा नियोगतः प्राप्तिस्तथाप्यर्थाक्षेपात्प्रागध्व-र्युकर्तृकत्वासिद्ध्यर्थं विधिरर्थवान् भविष्यतीत्याह * एवं चेति * उपसंहरति * तस्मादिति * मन्त्रः पुनरिति भाष्यमवतारयितुमा-शङ्कते * एवमपीति * एतदाशङ्कानिराकरणार्थत्वेन व्याचष्टे * नेति * कथं मन्त्रोपादानेन प्रथनस्तुतिरित्यपेक्षायां स्तुति-प्रकारदर्शनार्थमित्थमिति भाष्यं व्याचष्टे * प्रथनमिति * प्रसङ्गाद्य-पतिप्रथनं पुरोडाशप्रथनस्य फलत्वेन कीर्त्यते स्तुत्यर्थं चेति जिज्ञा-सू किमेतदिति पृष्टं तद्व्याचष्टे * किमिति * फलत्वेन मन्त्रार्थ-त्वेनानुसन्धानमनेकयजमानकेषु च विकारेषु यजमानशब्दवद्यज्ञप-तिशब्दस्योह इति जिज्ञासाप्रयोजनम् । नेति ब्रूम इत्युत्तरभाष्यम-र्थवादाभिप्रायेण तावत् व्याचष्टे * नेत्याहेति * एवं तु मान्त्रवर्णि-कफलकल्पनसम्भवेन यज्ञपतिप्रथनस्य फलत्वानपायात्पर्णमय्याधि-करणे निराकृतत्वेन च जिज्ञासानुपपत्तेरपरितोषान्मन्त्राभिप्रायेण व्याचष्टे * मन्त्रो ऽपि त्विति * [1]करणविभक्तिनिर्देशाभावे ऽपि ममाग्ने वर्चो विहवेष्वस्त्वितिपूर्वमग्निं गृह्णातीत्यादिषु तृतीये किमृ-त्विग्गामितया वर्चःप्रभृतिफलमाशास्यं यजमानगामितया वेति वि-चारदर्शनेन फलकल्पनाभ्युपगमादिति करणावगतक्रियासंबन्धा-

१ यतो ऽत्रापि करणविभक्त्यैव विनियोगः ननु उरु प्रथस्वेति मयमपि करणमन्त्रः न कथात्प्राप्तेः ।

न्यथानुपपत्तिकल्पितकरणतान्वयसिद्ध्यर्थं श्रुतार्थापत्त्या करणविभक्तिकल्पनमभिप्रेत्य करणविभक्तिविनियुक्तानामित्युक्तम् । कथमित्यादिना भाष्यमाक्षिपति * कथमिति * कस्येति कर्मणि षष्ठी किंविषये इत्यर्थः । समाधानं प्रतिजानीते * उभयथा ऽपि त्विति * पुरोडाशप्रथनविषयत्वमङ्गीकृत्य प्रश्नं तावदुपपादयति * अस्तु तावदिति * सो ऽयं याज्ञिकमतानुसारीत्यर्थः * स्वसिद्धान्तेनेति* निष्प्रमाणकत्वं सूचितम् । उत्तरमुपपादयति * तत्रेति * यस्त्वयमध्वर्युकर्तृकः पुरोडाशविषयः प्रयोजकव्यापारात्मकः प्रथनरूपो ऽर्थो नास्तीत्युक्तः स यद्यपि पूर्वमेव कृतत्वादिदानीं नास्त्येव न वर्त्तते तथापि यथा सत्ता वर्त्तमानता भवति तथा मन्त्रेणोच्यतइत्यर्थः इत्थम्भूतलक्षणे सत्तयेति तृतीया । ननु पुरोडाशकर्त्तृकः प्रयोज्यव्यापारो मन्त्रेणानुष्ठेयतयोच्यते नाध्वर्युकर्त्तृकः प्रयोज्यव्यापारो वर्त्तमानतयेत्याशङ्क्योपपन्नः शब्दार्थ इत्युक्तम् । अनुष्ठातृरूपप्रयोजकव्यापारानभिधाने ऽपि प्रेषणात्मकप्रयोजकव्यापाराभिधानादुपपन्नः प्रथयतिशब्दार्थ इति भावः । अनेन च यश्चेत्यादिभाष्यं व्याख्यातं लिङ्गान्मन्त्रस्य प्रथनाङ्गत्वावगतेरभिमर्शनकाले प्रयोज्यत्वानुपपत्तेरपरितोषात्पुरोडाशप्रथनविषयएवान्यथाभाष्यं व्याचष्टे *अथ वेति * अस्मिन्पक्षे कथमसत्यनुक्ते पुरोडाशकर्त्तृके प्रयोज्यव्यापाररूपे प्रथने प्रयोजकव्यापारवाची प्रथयतीतिशब्द इति प्रश्नभाष्यार्थः । उत्तरभाष्यं व्याचष्टे * तदुपपादयतीति * प्रतीकेनैकदेशेन गृहीतो यो मन्त्रस्तेनोपात्तः प्रयोज्यव्यापारो यस्मिन्ब्राह्मणे तत्प्रथयतीति प्रयोजकव्यापारं विधत्तइत्यर्थः । यश्चेति भाष्यं प्रथस्वेति प्रेषणरूपे प्रयोजकव्यापाराभिधानेन प्रयोज्यव्यापाराभिधानानुपादानादस्मिन्पक्षे ऽनुपपन्नमाशङ्क्य प्रयोज्यव्यापारोपादानपरतया व्याचष्टे * यश्चेति * नन्वेतयान्नाद्यकामं याजयेदित्यादिषु प्रयोज्यव्यापारानुपादाने ऽपि प्रयोजकव्यापारोपादानदर्शनात्तत्पूर्वकत्वनियमो नास्तीत्युत्तरं कस्मान्नोक्तमत आह * यद्यपि चेति * अर्थक्रमानुसारिशब्दक्रमनियमादर्शनेनास्याभिप्रायस्यातितुच्छत्वात्प्रश्नोत्तरभाष्ययोश्चोभयोरप्यनार्जवापत्तेरपरितोषात्स्वमतेनार्थवादगतयज्ञपतिप्रथनप्रश्नविषयतया व्याचष्टे * अथ वेति * अत्रैवोत्तरभाष्यं व्याचष्टे * तदभिधीयतइति * नन्वस्मिन्पक्षे मन्त्रेणेत्यादिभाष्यं पुरोडाशप्रथनाभिधायित्वादयुक्तं स्यादत आह * मन्त्रेणेति * नन्वेवं तर्ह्यरु ते यज्ञपतिः प्रथतामिति ब्रवीति यश्चोरु ते यज्ञपतिः प्रथतामिति ब्रूत इति च वक्तव्यमत आह * प्रथस्वेत्ययमिति * तत-

श्चैवं भाष्याथा भवतीत्याह * यश्चैवमिति * यश्चोरु ते यज्ञपतिः प्रथतामिति शब्दोच्चारणेन यज्ञपतिं प्रथयतीत्यर्थः । कथं शब्दोच्चारणमात्रेण प्रथनकर्तृत्वं स्यादत आह * गुणवादादिति * प्रेषणरूपप्रयोजकव्यापारकर्तृत्वमुत्पादनरूपप्रयोजकव्यापारकर्तृत्वेनोपचर्यतइत्यर्थः । यद्वा तत्करोति तदाचष्टे इत्याख्याने ऽपि णिजुत्पत्तिस्मरणान्मुख्यवृत्तित्वेन प्रथनाख्यानात्प्रथयतिशब्दोपपतिरित्याह * अथ वेति * एवं व्याख्याने यज्ञपतिप्रथनस्य फलत्वाभावे निरालम्बना स्तुतिर्न युक्तेत्याशङ्क्योत्थानात्पूर्वग्रन्थसङ्गतिः समञ्जसेत्येतदेव व्याख्यानमभिप्रेतम् ।

अविरुद्धं परम् ॥ ४४ ॥

यदुक्तमिति भाष्येणार्थपरत्वे विशिष्टपदक्रमसमूहात्मकवाक्यनियमार्थक्याशङ्कानुभाषणार्थत्वेन परमिति सूत्रावयवं व्याख्याय कामामित्यादिना परिहारार्थत्वेनाविरुद्धमिति सूत्रावयवो व्याख्यातस्तस्य तात्पर्यमाह * दृष्टार्थेति * क्रमान्यत्वे ऽप्युच्चारणविशेषावगमाददृष्टान्तरं विनोच्चारणक्रमनियमानर्थक्यापत्तेरदृष्टद्वयकल्पनात्पूर्वपक्षे गौरवमित्याशयः । वाक्यनियमहेतोर्व्याख्यानान्तरेष्वप्येतदेव सूत्रं परिहारार्थत्वेन योजयति * एतेनेति * एतेन नियमादृष्टकल्पनायामपि दृष्टार्थस्याविरोधेनादृष्टार्थहेतुत्वेन मन्त्रत्वादिनियमो निराकृत इत्यर्थः । एतदेव विवृणोति * सत्स्वपीति *

सम्प्रैषे कर्मगर्हानुपालम्भः संस्कारत्वात् ॥ ४५ ॥

अथेति भाष्येण बुद्धशास्त्रानर्थक्याशङ्कानुभाषणार्थत्वेन सम्प्रैषे कर्मगर्हेति सूत्रावयवं व्याख्याय तन्नेत्यनेन च परिहारप्रतिज्ञार्थत्वेनानुपालम्भ इति सूत्रावयवं व्याख्याय कर्त्तव्यमित्यनेन च हेतुप्रतिपादनार्थत्वेन संस्कारत्वादिति सूत्रावयवं व्याख्याय पुनरुपायान्तरेणापि सा प्राप्नोतीत्यन्यथापि स्मृतिसिद्धेरानर्थक्यमाशङ्क्यानेनोपायेनेत्यनेन भाष्येणादृष्टसंस्कारत्वादित्यावृत्त्या स एव व्याख्यातस्तत्सर्वं तात्पर्यतो व्याचष्टे * येयमिति * संस्कारत्वादिति सूत्रावयवं स्वयमन्यथा व्याचष्टे * अथ वेति *

अभिधाने ऽर्थवादः ॥ ४६ ॥

चत्वारीत्यादिभाष्येणाविद्यमानवचनपरिहारार्थत्वेन तावदेतत्सूत्रं व्याख्यातम् । तत्र कस्य स्तुतिः किमर्था वेत्यपेक्षायामाह

* चत्वारिति * अस्मिंस्तु व्याख्याने प्रदेशविशेषापरिज्ञानान्मन्त्रस्याहृष्टार्थत्वापत्तेरपरितोषाद्विनियोगानुसारेण स्वयमन्यथा व्याचष्टे * होत्रे त्विति * हौत्रं प्रवचनमृग्वेदः तद्विहितानां मन्त्राणां नोत्साहकरत्वं यजुर्वेदविहितानामेव केषां चित्तथात्वदर्शनादिति वक्तुं हौत्रग्रहणं विषुवन्नामैकाहविशेषः तत्रातिदेशतश्च चत्वार्याज्यसंज्ञकानि शस्त्राणि होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकप्रयोज्यानि प्राप्तानि । तत्रान्येषामनाग्नेयत्वाद्धौतृविशेषणम् । ततः किमिति चेदत आह * तस्येति * आग्नेयं होताज्यं शंसतीति श्रुतिर्होतुराज्यस्याग्नेयत्वं सूर्यदेवत्यं ह्येतदहरिति श्रुतेर्विषुवत्संज्ञकस्याह्न आदित्यदेवतत्वमतिदेशप्राप्तानैन्द्रवाय्वादिदेवतात्वान्न वस्तुवृत्त्या ऽऽदित्यदेवतत्वमस्तीति कृत्वा संस्तवादित्युक्तं तेजस्त्वादिसामान्यं चादित्यधर्माणामग्नावुपचारस्यालम्बनं स्तोत्रशस्त्राणामदृष्टार्थत्वात्कर्मसमवेतदेवतानादरेणाव्यक्तलिङ्गत्वादस्य मन्त्रस्यास्येति च सर्वनामयुक्तत्वात्सन्निहिताग्निस्तुत्यर्थत्वावधारणं यज्ञसमृद्धयइत्यादिभाष्येण एतदेव सूत्रमचेतनार्थबन्धनपरिहारार्थत्वेनाप्यौषध्यादावचेतनचैतन्याभिधानेनार्थवादत्वं परिहार इत्यावृत्त्या व्याख्यातम् । तत्करणमन्त्राणामदृष्टसाधनस्तुत्यर्थत्वानुपपत्तेरयुक्तमाशङ्क्याह * एवमिति * अविद्यमानवचने यथा स्तुतित्वं परिहारः एवमचेतनार्थबन्धने ऽप्यनेन स्तुतित्वमात्रेण कर्मसाधनस्मृतिपरिहार इत्यर्थः । कर्मसाधनस्मृत्यर्थस्यापि मन्त्रस्य विशेषणांशे स्तुत्यर्थत्वोक्तिरिति भावः । सकलस्य तर्हि मन्त्रस्य कारणत्वं न सिद्धचेदित्याशङ्क्यास्ति तावदित्युक्तम् । करणमन्त्रोच्चारणे कर्मसाधनस्मृतिस्तावद्भवति । तत्राकर्मसमवेतार्थाभिधायिनामपि पदानां समवेतार्थपदशेषत्वेन स्मृत्यर्थत्वोपपत्तेः सकलस्य मन्त्रस्य करणत्वसिद्धिरित्याशयः ।

गुणादविप्रतिषेधः स्यात् ॥ ४७ ॥

यस्त्वर्थविप्रतिषेधः शङ्कितः स गौणत्वात्परिहर्त्तव्य इत्येवं सूत्रं व्याख्यातुमदितिरित्यादिभाष्यं व्याचष्टे * अदितिरिति * स्तुतिविषयत्वाद्गौणत्वस्य स्तुतित्वस्य चार्थवादाधिकरणाव्युत्पादितस्याप्यौदुम्बराधिकरणविधित्वशङ्कानिराकरणेन प्रतिष्ठानादौदुम्बराधिकरणवदित्युक्तम् ।

विद्यावचनमसंयोगात् ॥ ४८ ॥

यत्त्वित्यादिना भाष्येण विद्याकाले सन्निहितस्याप्यर्थस्य यद्वचनमनभिधानं तत्तस्य कर्मानङ्गत्वाद्युक्तमिति सूत्रं व्याख्यातम् ।

तदर्थस्य प्रागनुपन्यासादयुक्तमाशङ्क्याह * यद्यपीति * व्याचष्टे * यदि हीति * नन्वित्यादिना प्रागुपन्यस्ताभिधानानभ्यासाशङ्का ऽनुभाषणपूर्वकं परिहृता तद्व्याचष्टे * तदनभ्यासस्त्विति *

सतः परमविज्ञानम् ॥ ४९ ॥

सूत्रव्याख्यानार्थं विद्यमाने ऽपीति भाष्यं व्याचष्टे * यस्त्विति * लोकाप्रयुक्तपदार्थस्य केनापि ज्ञातुमशक्यत्वात्कथं सत्त्वावधारणेत्याशङ्क्य निगमेत्यादिभाष्यकृतोक्तं तद्व्याचष्टे * तत्र चेति * अर्थः सामर्थ्यं पदान्तरसामानाधिकरण्यादियोग्यता प्रकरणं प्रक्रमः तयोः सर्वत्र लोकवेदयोरर्थज्ञानोपायत्वं प्रसिद्धम्। सूक्तं देवताज्ञानमव्यक्तलिङ्गायामृचि देवताज्ञानहेतुत्वेनार्थज्ञानोपायः। आर्षज्ञानस्याहं मनुरभवं सूर्यश्चेत्यादावस्मदर्थज्ञानहेतुत्वेनार्थज्ञानोपायत्वं निगमादेरपि प्रसिद्धमेवार्थज्ञानोपायत्वम्। सूक्तदेवतादिस्मरणादर्शनाच्चैषामर्थज्ञानोपायत्वं विदुषामभिमतमिति निश्चीयतइत्याह * तेषां हीति * ननु स्वार्थज्ञानस्योपायत्वे भूतांशो नाम ऋषिर्जरामरणनिरासायाश्विनौ तुष्टावेत्येवमार्षस्योपाख्यानादनित्यसंयोगे नित्यत्वं वेदस्यापद्येतात आह * यथैवेति * ननु लोपविकारादीनामुपायमात्रत्वेनापारमार्थिकत्वात्पदानित्यत्वापादकत्वन्न जातमार्षे तु कथमित्याशङ्क्यार्षस्याप्युपायत्वेनाङ्गीकारेण तत्परिहारमाह * तत्रेति * पारमार्थिकत्वे ऽपि वा मन्त्राणामृषिकृतत्वाभावात्प्रयोगस्य च प्रवाहरूपेण सर्वदा सद्भावान्न वेदानित्यत्वापादकत्वमित्याह * अथ वेति * ननु वृद्धव्यवहारावगतपदार्थानुसारेणैव मन्त्रार्थावगतिसम्भवान्नास्मदादीनां ऋषिप्रत्ययबलेन मन्त्रार्थप्रतिपतिरित्याशङ्क्याह * प्रत्ययेति * आर्षस्मरणादेरदर्शनात् ऋषिसम्प्रदायानुसारेणैव मन्त्रार्थतत्त्वावधारणं भवति नान्यथेति भावः।सृण्येव जर्भरी तुर्फरीतु नैतौ शेव तुर्फरीपर्फरीका उदन्यजेव जेमना मदेरूता मेजरा स्वजरं मरास्विति मन्त्रार्थतत्त्वावधारणायार्षोपाख्यानं दर्शयति *तत्रेति* अत्या ऋचः सूक्तादित्वाभावात् उभा उ नूनं तद्विदर्शयेथे इत्यादिनैकादशर्चेन सूक्तेन सृण्येवेत्यादिनोपमानरूपेणाश्विनौ स्तुतवानिति व्याख्येयम्।भाष्यकारेण च द्विवचनान्तत्वादाश्विनोरभिधानानीत्युक्त्वा मित्रावरुणादिष्वपि द्विवचनोपपत्तेः कथमश्विपरत्वनिर्णय इत्याशङ्कानिराकरणायाश्विनोः काममित्युक्तं तद्व्याचष्टे * भूतांश इति* मन्त्रव्याख्यापरतया देवताभिधानानि चेत्यादिभाष्यं व्याख्यातुमाह * तत्रेति * चत्वारः पादा द्वौ दन्तौ शुण्डा च पुच्छं वेत्यष्टावङ्गा-

नि कस्य चिज्जन्तोः पिपासायामनुत्पत्तेस्तत्र जातावित्युक्तमाशङ्क्य चातकयोः पिपासाकालः प्रावृडिह लक्ष्यतइति प्रावृषि जातावित्युक्तं कथं जेमनशब्देनोदकवत्त्वमुच्यतइत्याशङ्क्योदकवाचिनो जेमशब्दस्य पामादिषु पाठाल्लोमादिपामादिपिच्छादिभ्यः शनेलच इति यथासंख्यन्यायेन पामादिभ्यः परो विहितो नप्रत्ययो जेमशब्दात्परो भवतीत्युक्तम् । मे इतिषष्ठ्याः शरीरसम्बन्धजनितत्वं दर्शयितुं मे शरीरमित्युक्तम् । पदार्थान्व्याख्याय वाक्यार्थं व्याचष्टे * तेनेति * एवं सर्वत्रेति भाष्येणोत्तरयोरपि मन्त्रयोः सूचितां व्याख्यां वक्तुमभ्यक्सात इन्द्रऋषिरस्मे सनेम्यश्वं मरुतो जुनन्ति अग्निश्चिद्धिष्मा ऽतसे शुशुक्वा नापो नद्यैर्यं ददति प्रयान्सीत्येतस्यां ऋच्यार्षोपाख्यानं तावद्दर्शयति * अभ्यगिति * मरुत्वतगुणकस्येन्द्रस्य देवतात्वं वक्तुं विनियोगं दर्शयतिं * इयं चेति * छन्दोमसंज्ञकानां त्रयाणामह्नां मध्ये द्वितीये ऽह्नि मरुत्वतीयसंज्ञके शस्त्रे महसि त्वमिन्द्र यत एतानीति सूक्तमिति श्रुत्या विनियुक्तेत्यर्थः । पदार्थांस्तावद्व्याचष्टे * तत्रेति * अकारस्य छान्दसवर्णव्यत्ययेनेकारादभ्यगिति रूपसिद्धिः चिच्छब्दस्येवार्थे प्रयोगादुपमानार्थत्वं हिस्मेतिपदयोः पदपूरणार्थत्वादर्थाकथनम् । नकारस्येवार्थत्वकथनायाप इवेत्युक्तम् । द्वीपं पुलिनम् । वाक्यार्थं व्याख्यातुमाह * वाक्यार्थे त्विति * द्वीपमन्नाद्यानि चेति चकारो ऽत्र कल्पः । एकया प्रतिधापि वत्साकं सरांसि त्रिंशतं इन्द्रः सोमस्य काणुकेत्यृचं व्याचष्टे * एकयेति * कान्तं प्रियं कमुदकं सोमं रसात्मकं येषु तानि कान्तकानि । सर्वत्र शब्दसूचितां मन्त्रान्तरव्याख्यां दर्शयित्वा भाष्यं व्याचष्टे * तदेवमिति *

उक्तश्चानित्यसंयोगः ॥ ५० ॥

यस्त्वनित्यसंयोगः शङ्कितः स परं तु श्रुतिसामान्यमित्यत्र सूत्रे प्रत्युक्त इति । सूत्रव्याख्यानार्थं परं त्विति भाष्यं व्याचष्टे *परमिति * श्रुतिसामान्यमात्रतां दर्शयति * यजमानस्तावदिति * प्रमगन्दनैवाशाखशब्दयो राजनगरविशेषसंज्ञत्वे सत्यनित्यसंयोगापत्तेरन्यथा व्याख्यानम् ॥

लिङ्गोपदेशश्च तदर्थवत् ॥ ५१ ॥

तदर्थशास्त्रादीनि पूर्वपक्षलिङ्गानि परिहृत्य सिद्धान्ते लिङ्गत्रयं दर्शयितुं सूत्रत्रयम् । तत्र तेषां मन्त्राणामर्थो यथा ऽस्ति तथा लिङ्गोपदेशो भवतीति सूत्रव्याख्यानार्थमाग्नेय्येति भाष्यं व्याचष्टे

* आग्नेय्येति * लिङ्गशब्दस्य सामर्थ्ये मीमांसकानां प्रसिद्धत्वात्तद्धितप्रतिपादिताग्निदेवत्यत्वकल्पितं देवताभिधानसामर्थ्यं लिङ्गशब्देन विवक्षितमिति व्याख्यानान्तरं लिङ्गशब्दस्योक्तं तृतीया चैत्थंभूतलक्षणार्था। नन्वविवक्षितार्थत्वे ऽप्यभिधानमात्रेणाग्निलिङ्गत्वमुपपत्स्यते ऽत आह * देवतेति * ननु देवतात्वमप्यभिधानमात्रेण सेत्स्यत्यत आह * यं चेति * एकदेवत्ये मन्त्रे त्वां हिमं द्रत मम कर्वशोकैरित्यादावनेकेन्द्रवाय्वादिदेवतान्तरपदप्रयोगे सत्यप्यनेकदेवत्यव्यपदेशाभावादित्यर्थः। नन्वस्तु नामात्राग्नेः प्राधान्येनाभिधानं तात्पर्यं तु नास्तीत्याशङ्क्याह * प्राधान्येति *

ऊहः ॥ ५२ ॥

भाष्यकारेणोहश्च तदर्थवदिति पूर्वसूत्रगतपदद्वयानुषङ्गेणेदं सूत्रमूहदर्शनं चेत्यनेन व्याख्याय वेदे क्व चिदूहः कार्य इत्यश्रवणात्किमूहदर्शनमिति पृष्टे न माता वर्द्धते न पितेत्यूहप्रतिषेधस्यैवाप्राप्तप्रतिषेधायोगेनोहप्रापकत्वात् मात्रादिविशेषोपादानसामर्थ्येन वा शब्दान्तरोहप्रतीतेरूहदर्शनमित्युत्तरे दत्ते मात्राद्यर्थस्येह वृद्धिप्रतिषेधात्कथं शब्दोहप्रापकत्वमित्याशङ्कानिराकरणार्थं वृद्धेः प्रत्यक्षत्वेन प्रतिषेद्धुमशक्यत्वाच्छब्दवृद्धिप्रतिषेध इति प्रत्यक्षमिति भाष्येणोक्तं तद्व्याचष्टे * ऊहदर्शनमिति * शब्दवृद्धेरपि वर्णान्तरोपजननादिनोपपत्तेः। तस्यार्थपरत्वे ऽपि वचनमन्तरेणाप्राप्तेर्न सिद्धान्तिलिङ्गत्वमिति प्रतिपादनार्थं का पुनरिति भाष्येण पृष्ट्वा यद् द्विवचनबहुवचनसंयोग इत्युक्तं तद्व्याचष्टे * तत्रापीति * वर्णान्तरोपजनने पदान्तरत्वापत्तेरपदत्वापत्तेर्वा तत्पदवृद्ध्यसम्भवात्स्थौल्यादेश्च नादधर्म्मत्वेन वर्णेष्वसम्भवाद् द्विवचनबहुवचनान्तत्वेनाधिकार्थद्वारा शब्दवृद्धिरूहात्मिकेह प्रतिषिद्ध्यतइत्यर्थः। ऊहदर्शनस्य सिद्धान्तलिङ्गत्वं भाष्योक्तमुपपादयति * स चेति प्रसक्तत्वादिति भावः। मात्रादिशब्दोहदर्शनस्य सिद्धान्तलिङ्गत्वमुपपाद्य शब्दान्तरोहदर्शनस्योपपादयति * या चेति * अर्थपरत्वे च कल्प्यते इत्यनुषङ्गः। नन्विडानिगदगतयज्ञपतिशब्देवन्मात्रादीनां पारार्थ्यादेपारार्थ्ये ऽपि चैकैकमात्रादिसंबन्धे पशुभेदो ऽपि मात्रादिशब्दोहस्यानाशङ्क्यत्वान्मात्रादिभेदे ऽप्येकपशुसंबन्धाभावात् संबन्धिभेदेनैव भेदसिद्धेः न्यायादेवानूहावगतेः प्रतिषेधायोगात्कथं तद्बलेनोहप्राप्तिरत आह

१ तस्येडासुत्यर्थलात्पारार्थ्यम्।
२ पश्वर्थलादित्यर्थः।

* यद्यपीति * न्यायसिद्धानुवादस्यापि प्रयोजनापेक्षायां न्यायरहितेषूहप्राप्तिरेव प्रयोजनमवसीयतइति भावः । अविवक्षितार्थत्वेन सिध्येदित्याह * अन्यथेति * ऊहदर्शने स्वयमुदाहरणान्तरमाह * तथेति * त्वं ह्यग्ने प्रथमो मनोतेति मनोता सूक्तस्य वायव्ये पशावतिदेशप्राप्तस्योहः प्रसक्तो ऽनेन वचनेन वार्यते । उदाहरणान्तरमाह * एवमिति * गवादिपशुके अतिदेशप्राप्तस्य छागस्य वपाया मेदसो ऽनुब्रूहीति मन्त्रस्योहप्रसक्तौ उस्रादिपदयुक्तस्यार्थपरत्वे छागपदस्थाने ऽस्य प्रयोगपाठः अपर्यायान्तरनिवृत्त्यर्थः । अर्थवान् भविष्यतीत्यर्थः । नन्वर्थपरत्वे ऽप्युस्रादिपदनियमस्यादृष्टार्थपरिहारात् केन विशेषेणाविवक्षितार्थता निराक्रियते इत्याशङ्क्याविवक्षितार्थे कल्पनागौरवमाह * इतरथेति *

विधिशब्दश्च ॥ ५३ ॥

भाष्यकारेण विधिशब्दश्च तदर्थवदिति पूर्वसूत्रगतपदानुषङ्गेण सूत्रं व्याख्याय शतं हिमा इति मन्त्रगतहिमाशब्दव्याख्यानार्थं शतं वर्षाणीत्यर्थवाद उदाहृतः । तत्र विधिशब्दानुपपत्तिमाशङ्क्याह * विधिरेवेति * सिद्धान्तमुपसंहरति * तस्मादिति *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिमाधवभट्टात्मजभट्टसोमेश्वरविरचितायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां तन्त्रवार्तिकटीकायां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

॥ न्यायसुधायाम् ॥

प्रथमाध्यायस्य तृतीयपादः

॥ अथ स्मृतिप्रामाण्याधिकरणम् ॥ १ ॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ॥ १ ॥

अत्र भाष्यकारेण सङ्गतिप्रदर्शनार्थमेवं तावदिति वृत्तमनुकीर्त्तितं तच्च नामधेयप्रामाण्यस्यानुक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * एवं तावदिति * अयमाशयः नामधेयानां विध्युद्देशान्तर्भावात् ६७।५ ऽयंश एव वेदः कृत्स्नश्चासावर्थवादाद्यनुपयोगनिराकरणेन प्रमाणतया साधितः । नामधेयाधिकरणे तु विधिस्तुतिस्मृतिवन्नामधेयत्वमपि प्रामाण्यद्वारं भवति वा न वेति चिन्तयिष्यते । नामधेयस्य धर्मप्रयोगाभावात्त्वानर्थक्येन पूर्वपक्षकरणं नामधेयं रूपाभिप्रायम् । गुणविधित्वेनापि उद्भिदादिपदानां दध्यादिपदवत्प्रामाण्योपपत्तेर्न स्वरूपेणाप्रामाण्यं शङ्कितुं युक्तम् । न चैवमुभयथापि प्रामाण्यसिद्धेः प्रमाणलक्षणासङ्गतिः शङ्कनीया । को धर्मः कथं लक्षणश्चेत्येकेनैव सूत्रेण व्याख्यातं चोदनालक्षणो ऽर्थो धर्म इत्यत्र कथमिति प्रकारवचने थालप्रत्ययप्रयोगेण प्रामाण्यप्रकाराविशेषनिरूपणस्यापि प्रतिज्ञासूत्रार्थत्वेनोक्तत्वात् । अन्यथा हि किंलक्षण एवावक्ष्यत् । अत एव स्मृतिविचारस्यापि सङ्गतिः । अनवगतस्वरूपस्य हि वेदस्य प्रामाण्यायोगात्स्वरूपावगतिः प्रामाण्यप्रकारः । तत्र किं प्रत्यक्षावगतिरेव प्रकारो ऽथ स्मृत्याचारद्वारेणाप्यवगतिरिति प्रामाण्यप्रकारविशेषनिरूपणरूपत्वास्मृतिविचारस्यापि सङ्गतिः सिद्धा । अतः स्मृत्याचारद्वारायाऽपि चावगतेः सत्याः प्रामाण्यप्रकारत्वस्य निराकर्त्तुमशक्यत्वात्सैव सम्भवति न वेति इह चिन्त्यते । यद्वा स्मृत्याचारावगतानामपि कर्मणां परिग्रहदार्ढ्यात् धर्मत्वावगतेश्चोदनैवेत्यवधारणाक्षेपेण सङ्गतिः तत्समाधानार्थमेव चेह चोदनामूलत्वमस्ति न वेति चिन्त्यते । चोदनाशब्दस्य वा प्रत्यक्षाप्रत्यक्षचोदनासाधारण्यादप्रत्यक्षचोदनानां च स्मृत्याचारोपन्यासं विना

प्रामाण्ययोगात् स्मृत्याचारप्रामाण्यमपि प्रतिज्ञातं भवतीति नासङ्गतिः । जिज्ञासासूत्रेण वा सकलधर्मप्रमाणजिज्ञासा कर्त्तव्यत्वाभिधानाच्चोदनासूत्रप्रतिज्ञातवेदप्रामाण्यप्रतिपादने पर्यवसिते प्रसङ्गादार्यप्रसिद्धादीनामपि प्रसिद्धं(प्रामाण्यं ययोः स्मृत्याचारयोः प्रसिद्धप्रामाण्ययोः स्मृत्याचारयोरपि) प्रामाण्यमिह चिन्त्यते। सर्वं चैतत्तावच्छब्देन सूचितम् । वेदस्य तावदुपयोगः साधित इत्युक्ते ऽन्यस्यापि साधयितव्य इति प्रतीतेः परतः प्रामाण्यादिद्वारा ऽप्रामाण्यस्य प्रथमपादएव निराकृतत्वे ऽपि प्रामाण्यप्रकारासम्भवेनाप्रामाण्यमाशङ्क्य प्रकारविशेषनिरूपणं द्वितीयपादेन कृतमित्युपयोगशब्देनोक्तम् । अथेदानीमिति भाष्येण वर्त्तिष्यमाणसङ्कीर्त्तनं कृतं तत्र वेदमूलकत्वनिबन्धनत्वात्स्मृतिप्रामाण्यस्य वेदप्रामाण्यविचारानन्तरं स्मृतिप्रामाण्यविचारसङ्गतिरथशब्देनोक्ता। प्रत्यक्षवेदगामिनामधेयविचारात्पूर्वं स्मृतिविचारानौचित्यमाशङ्क्य कस्याश्चित्स्मृतेर्नामधेयमूलत्वाभावेन तदनपेक्षत्वान्महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदित्यादिस्मृतेस्तु तद्यथैवादौ मनुष्यराजआगते ऽन्यस्मिन्वार्हत्युक्षाणं वा वेहतं वा ऋदन्त इत्याद्यर्थवादमूलत्वान्न पचेदन्नमात्मन इत्यादिस्मृतेश्च केवलाद्यो भवति केवलादीत्यादिमन्त्रमूलत्वात्तत्प्रामाण्ये प्रतिपादिते नामधेयविचारात्पूर्वं स्मृतिप्रामाण्यं वक्तुमुचितमिति सूचयितुमिदानीमित्युक्तम् । तद्विषयप्रदर्शनपरतया तावद्व्याचष्टे * इदानीमिति * पौरुषेयीष्विति वेदप्रामाण्यहेत्वभावो दर्शितः। स्मर्यमाणो ऽर्थो ऽवधिर्मर्यादा यासां नार्थमतिक्रम्य तस्य प्रमाणमपि विषयीकुर्वन्तीत्यस्मर्यमाणमूलत्वं स्मर्यमाणार्थविधिष्वित्यनेनोक्तम् । एतच्चाप्रामाण्ययोपयोगिविशेषणद्वयम् । अस्मर्यमाणार्थावधिष्वितिपाठे त्वितः प्रभृतीयं स्मृतिः प्रवृत्तेत्यस्मर्यमाणो ऽर्थस्यावधिर्यासामिति षष्ठीतत्पुरुषगर्भबहुव्रीहिः। सिद्धान्तोपयोगिविशेषणं मन्वादिप्रणीतो ग्रन्थो निबन्धनं यासामिति शिष्टप्रणीतत्वं मन्वादिप्रणीतनिबन्धनास्त्वित्यनेन प्रामाण्ययोपयोगिविशेषणमुक्तम् । आचारग्रहणेनाशब्दत्वपूर्वपक्षहेतुकर्त्तृसामान्यसिद्धान्तहेतुसाम्यादाचाराणामप्यधिकरणविषयत्वमुक्तम् । ननु यत्रेत्यादिभाष्येणैव विषयावगतिसिद्धेः तत्स्वरूपगतस्य च विशेषस्यात्राविचार्यत्वादृष्टकादिस्वरूपोदाहरणं व्यर्थमित्याशङ्क्याह * तत्रेति * स्वरूपगतविशेषाविचारे ऽप्युदाहरणविशेषं विना नैराकाङ्क्ष्यभावादृष्टकाद्युदाहरणमिति भावः । मन्वादिस्थानां स्मरणानाम-

१ ऋयं पा० २ पु० ना० ।

न्येन ज्ञातुमशक्यत्वात्कथं विचारविषयत्वमित्याशङ्क्य तदुग्रन्थस-
मर्पितानीत्युक्तम्। विषयप्रदर्शनार्थतया भाष्यं व्याख्याय सन्देह-
हेतुश्चानेन भाष्येणाभिधीयतइत्याह * सन्देहेति * कथमित्यपेक्षिते
पूर्वपक्षप्रतिभानार्थत्वेन यत्रेति भाष्यं व्याचष्टे * पारतन्त्र्यादिति *
सिद्धान्तप्रतिभानार्थत्वेनाथ वेति भाष्यं व्याचष्टे * अप्रामाण्येति *
श्लोकं विवृणोति * मन्वादीति * (शब्दानामर्थपरत्वे स्वतः प्रामाण्ये
च सत्यपि वक्तृज्ञानानुमानं विनार्थाभावव्युदासरूपपरिच्छेदाख्य-
विज्ञानानुत्पादकत्वादू ज्ञानमात्रस्य च प्रामाण्याभावाद्वक्तृज्ञानानु-
मानद्वारा विज्ञानोत्पादकत्वावगतेर्मन्वादिवचनस्य स्मृत्यपेक्षतोक्ता
भाष्यकृता। आचाराणामप्युदाहरणत्वसिद्ध्यै वाक्यानुदाहरणे ऽपि
पूर्वोत्तरपक्षहेतुसाम्यात्तेषामप्युदाहरणत्वोपपत्तिसूचनार्थं वचनो-
क्तिः[1])। तदुच्यतइति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * पूर्वविज्ञानं
मूलप्रमाणं तस्य यो विषयस्स एवास्येति पूर्वविज्ञानविषयविषय-
मित्येको ऽत्र विषयशब्दो लुप्तो द्रष्टव्यः। श्लोकं विवृणोति * सर्वेति * ननु शब्द एवात्र मूलप्रमाणं भविष्यत्य-
त आह * शब्दो ऽपीति * ननु प्रत्यक्षानुपलब्धो ऽपि कल्पयिष्य- ७०।२
त्यत[2] आह * प्रत्यक्षेति * प्रमाणशब्देन भावव्युत्पत्त्या कल्पनमभि-
प्रेतम। तदेव तावन्निष्प्रमाणकत्वात्कल्पाद्धर्मास्तित्वाद्विप्रकृष्टं दूरे
न तत्स्पृशतीत्यर्थः योग्यानुपलब्ध्यभावाद्धर्मास्तित्वकल्पनापेक्षया
ऽसन्निकृष्टं धर्मास्तित्वं शब्दास्तित्वस्य[3] योग्यप्रत्यक्षानुदयेनाभावनि-
श्चयात्तत्कल्पना विप्रकृष्टतरा। श्लोकं व्याचष्टे * शब्दस्य तावदि-
ति * अभ्युपगतमित्यनेन कल्पनार्थत्वेन प्रमाणशब्दो व्याख्यातः।
नन्वनुमानादिनापि शब्दावगतिसम्भवात्प्रत्यक्षमेव प्रमाणमित्ययुक्त-
मुक्तमत आह * न चेति * श्लोकं व्याचष्टे * यथैवेति * आगमं
निराकरोति * न चेति * कृतके नास्ति विश्रम्भ इत्येतद्व्याचष्टे * य-
द्यपीति * दुष्टैः प्रतारकैः पुरुषैराकुलितं भ्रामितं चेतो येषामस्मदा-
दीनामित्यर्थः। नित्यो नैवोपपद्यतइत्येतद्व्याचष्टे * नित्यस्य त्विति *
ननु धन्वन्निव प्रपेत्यादिमन्त्रलिङ्गानां प्रपादिस्मृतिमूलत्वदर्शनाद्वेद-
मूलत्वाभिधायिनां मन्वादीनां तदृदृष्टान्तेन सत्यवादित्वावगतेः कृतके
नास्ति विश्रम्भ इत्ययुक्तमत आह * न चेति * एवं तर्हि मूलान्त-
रसूचकत्वान्नित्यो नैवोपपद्यतइत्ययुक्तमत आह * न चेति * कर्त्तृ-

---

१ चयं पा० २ पु० ना०।
२ कल्पयितव्य इ० २ पु० पा०।
३ धर्मास्तित्वमिति १ पु० ना०।

व्यतानुवादे विधिसूचनं स्यात्स्वरूपमात्रानुवादस्तु यद्दच्छासिद्धप्रपादिविषयत्वेनोपपन्नो न विध्याक्षेपायालमित्याशयः । मन्त्रलिङ्गानां च स्मृतिमूलसूचकत्वनिराकरणेन नित्यानुमेयश्रुतिमूलत्वमपि निराकृतं भवति । अन्धपरम्परान्यायापत्त्या स्मरणेन नित्यानुमेयश्रुतिकल्पनस्य निराकरिष्यमाणत्वात् प्रत्यक्षश्रुतिमूलत्वे त्वैकरूप्यात्तस्यास्तन्मूलानां स्मृतीनामप्यैकरूप्यं स्यान्न त्वेतदस्ति ।

यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥

इत्यादिविगानदर्शनादित्याह * न चेति * ननूपलब्धश्रुतिमूलत्वे ऽपि विगीतानेकश्रुतिमूलत्वात् स्मृतिविगानमविरुद्धमत
७१।२ आह * न चेति * श्लोकं व्याचष्टे * यदि हीति * विधिरूपं वाक्यं मन्वादिभिर्निरूपितमुपलब्धमिति यदि विज्ञायेत ततः कापि विगीतानेकश्रुतिमूलत्वादिकल्पना स्यात् अर्थवादपरेष्वपि त्वद्यत्वे ऽपि स यदि हवा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत्सत्यस्य सत्यत्वं वेदेत्यादिषु मृषोद्याभ्यनुज्ञाभ्रान्तिदर्शनेन मन्वादिष्वपि भ्रान्तिशङ्काया निराकर्त्तुमशक्यत्वादेकश्रुतिमूलत्वे ऽपि भ्रान्त्यवसितानेकतात्पर्यविगाननिमित्तस्मृतिविगानोपपत्तेर्नानेकश्रुतिमूलत्वकल्पनोचितेति भावः । प्रलीनशाखामूलत्वं तर्ह्यस्त्वत आह * मृतेति * प्रासङ्गिकं परिसमाप्य प्रकृतमुपसंहरति * तस्मादिति * उपमानं निराकरोति * उपमानं त्विति * अर्थापत्तिं निराकरोति * अर्थापत्त्यापीति * श्लोकं व्याचष्टे * यदि हीति * सामान्यतो दृष्टग्रहणं दृष्टान्तार्थमतो निर्मूलत्वादित्युपसंहारभाष्यं निर्मूलस्मृत्यसम्भवेन कस्य चिद् भ्रान्त्यादेरवश्यकल्प्यत्वादयुक्तमाशङ्क्य व्याचष्टे * तस्मादिति * नन्विति भाष्यमर्वाचीनाभिप्रायेण तावद् द्वेधा योजयति * नन्विति * अर्वाचीनानां कर्त्तव्यत्वाज्ञानाद्ये विदुरित्ययुक्तमित्याशङ्कते * नन्विति * वदनानुमेयत्वात्परिज्ञानस्य वदन्तीत्युक्तं तेषामपि मन्वादिवाक्यश्रवणाद्भवति कर्त्तव्यत्वज्ञानमिति परिहरति * कथमिति * एवं कर्त्तव्यज्ञानात्कर्त्तव्यत्वाभिधानयोर्विप्रतिषेधप्रतिपादनपरत्वेन व्याख्याय न विदुषामुपदेशो नावकल्पतइत्यनेन न्यायेनोपदेशान्यथानुपपत्त्या मन्वादेः पूर्वज्ञानकल्पनाशङ्कार्थमेतद्भाष्यमित्यन्यथाचष्टे * अथ वेति * ये कर्तव्य इति न विदुः कथमिव ते वदिष्यन्तीत्यमसौ पदार्थः कर्त्तव्य इति व्यत्ययेनास्मिन्व्याख्याने भाष्यं योज्यम् । निषेधाभावेन त्वकर्त्तव्यत्वस्यानाशङ्क्यत्वात्कर्त्तव्यत्वाज्ञानमेवाकर्त्तव्यत्वज्ञानमुखेनाकर्त्तव्यो यस्मिन्नि-

त्यनेनोक्तम्। विवक्षितार्थलाभाय च व्यत्ययाङ्गीकरणमदोषः। स्मरणानुपपत्त्येति भाष्यमर्वाचीनानां स्मरणानुपपत्त्येत्येव कैश्चिद्व्याख्यातं तन्मन्वादिवाक्यश्रवणजनितस्यार्वाचीनानामष्टकादिकर्त्तव्यताज्ञानस्याकर्त्तव्यत्वाभिधानविरोधित्वेनोपन्यस्तस्य स्मृतित्वेनाशङ्क्य तत्वादयुक्तमित्यभिप्रायेण दूषयति * स्मरणेति * तदर्वाचीनानामष्टकादिकर्त्तव्यत्वज्ञानमाशङ्क्यावादिनैव तावन्न स्मृतित्वेनेष्टमतस्तस्य स्मृतित्वनिराकरणमयुक्तमिति तावच्छब्दस्यार्थः। ननु मन्वादीनामपि स्मरणं निराकर्त्तुमशक्यं तदभावे ग्रन्थरचनानुपपत्तेरित्याशङ्क्याह * मन्वादीनामपीति * तस्माद्व्याख्यानद्वयं ऽपि ७२।२
मन्वाद्यभिप्रायेणैवैतत्परिहारभाष्यं योज्यमिति भावः। तत्रार्वाचीनाभिप्रायशङ्काव्याख्याने मन्वादिवाक्योत्पन्नकर्त्तव्यत्वज्ञाना अप्यर्वाञ्चो मन्वादीनां स्मरणानुपपत्तिमालोच्याकर्त्तव्यत्वं वदन्तीति योज्यम्। द्वितीयव्याख्याने तूपदेशकल्प्यस्मरणस्य पूर्वविज्ञानकारणाभावेनानुपपत्त्या नोपदेशस्य तत्कल्पकत्वं सम्भवतीत्यसम्भवतो ऽर्थापत्त्या कल्पयितुमशक्यत्वादिति भावः। विदितपूर्वस्याप्यस्मृतस्योपदेष्टुमशक्तेः स्मरणद्वारेणोपदेशस्य ज्ञानकल्पकत्वात्स्मरणनिराकरणेन ज्ञानमेव निराकृतम्। वन्ध्यादौहित्रोदाहरणस्य प्रश्नपूर्वमभिप्रायमाह * कस्मात्पुनरिति * कारणाभावेन कार्याभावो ऽत्र दृष्टान्तो वाच्य इति दौहित्रस्य कारणभूतदुहित्रभावेनाभावो निदर्शनीयः। दुहितुस्तु वन्ध्याकारणमस्तीति न कारणाभाव इत्याशयः। उपदेशान्यथानुपपत्त्या मन्वादिस्मरणे ऽवश्यकल्पे सम्यक्त्वमात्रमिह निषेध्यमिति सूचयितुं दृष्टान्तभाष्ये सम्यग्ग्रहणम्। एवमपीत्याशङ्काभाष्यं पूर्वविज्ञानकारणाभावे स्मृतिप्रामाण्यानुपपत्तेरयुक्तमाशङ्क्य पूर्वविज्ञानकारणभूतवेदवाक्यानुमानाभिप्रायत्वेन व्याचष्टे * यथैवेति * एवं तर्हि नैतदेवमिति परिहारभाष्यं पूर्वविज्ञानकारणाभावे हेत्वप्रदर्शनादयुक्तं स्यादित्याशङ्क्यागृहीताभिप्रायत्वेन व्याचष्टे * इतरस्त्विति * एतदेव भाष्यमवयवशो व्याचिख्यासुर्वेदत्वस्मृतिप्रामाण्योपपत्तिप्रतिपादकं तावत् प्रत्यक्षेणेतिभाष्यावयवं व्याचष्टे * वेदः पुनरिति * ननु वर्णस्वरूपस्य प्रत्यक्षत्वे ऽपि तस्य वेदावेदसाधारण्याद्वेदत्वस्मृतिर्निर्मूलैव स्यादत आह * शब्देति * वेदशब्दवाच्यत्वमात्रमेव तत्राप्रत्यक्षं तदपि तु वृद्धव्यवहारावगम्यत्वान्न निष्प्रमाणकं ग्रन्थान्तरविलक्षणमेतत्स्वरूपं प्रत्यक्षमेवेति भावः। एतदेवोपपादयति * प्रागपि हीति * वेदशब्दस्योपलक्षणत्वात् ह्यग्वेदादिविशेषमन्त्रब्राह्मणोपन्यासः। ननु वेदशब्दा-

त्प्रागपि वेदादिस्वरूपप्रतीतौ वेदादिसंज्ञानां डित्थादिवत्पौरुषेयत्वानित्यप्रमाणकत्वं स्यादित्याशङ्क्याह * सर्वेषां चेति * नन्वेवमपि वेदादिशब्दोल्लेखावगतेर्वृद्धव्यवहाराधीनशब्दार्थसम्बन्धप्रतीत्युत्तरकालीनत्वात् प्रत्यक्षत्वं न स्यादत आह * इतीति * शब्दोल्लेखप्रतीतिनिर्देशार्थ इतिकरणः । संज्ञाद्वारेण तदुल्लेखेनोत्तरकालमपि गम्यमानानां प्रत्यक्षसूत्रे तत्र शब्दार्थसम्बन्धप्रमातुरित्यत्र प्रत्यक्षत्वं साधितमित्यर्थः । दार्ष्टान्तिके वैषम्यप्रतिपादनार्थमष्टकादिषु त्विति भाष्यावयवं व्याचष्टे * नन्विति * कुम्भकारक्रियास्विवेति वैधर्म्यदृष्टान्तः । एतदेवोपपादयति * यदीति * अन्धपरम्परान्यायेनेति व्याख्येयतयोपक्षिप्तस्यान्धपरम्परानिदर्शनस्य प्रयोजनं तावदाह * सर्वस्येति * वेदत्वस्मृतिवदष्टकादिस्मृतावप्यनादित्वात्प्रामाण्यप्रसिद्ध्यभिमानं निवर्त्तयितुमन्धपरम्परानिदर्शनमित्यर्थः । कथमनेन निदर्शनेन प्रामाण्यप्रसिद्ध्यभिमाननिवृत्तिरित्यपेक्षिते ऽस्मिन्निदर्शनेऽनादित्वस्याप्रामाण्यापादकत्वदर्शनादित्याह * वेदे हीति *
७३।१ एतदेव प्रश्नपूर्वमुपपादयन्निदर्शनभाष्यं व्याचष्टे * कथमिति * दार्ष्टान्तिके योजयति * तादृशं वेति * ननूभयविधदृष्टान्तोपलब्धौ कथमष्टकादिस्मरणस्यान्धरूपस्मृतितुल्यत्वं न तु वेदत्वस्मृतितुल्यतेति निर्णय इत्याशङ्क्य पूर्वविज्ञानकारणाभावादिति भाष्योक्तहेतुव्याख्यानार्थं पूर्वोक्तमेव चोदनामूलत्वनिराकरणं स्मारयति * न चेति * मूलसद्भावे प्रमाणं नास्तीत्युक्ता तदभाव एव तु स्मर्त्तव्यास्मरणं प्रमाणमस्तीत्याह * यदि चेति * अनेन चाप्तोक्तिनिबन्धनेषु व्यवहारेषु प्रामाण्यहेतुभूतस्य मूलस्य स्मरणेन व्याप्तत्वाद्व्यापकस्मरणाभावेन व्याप्यमूलाभावानुमानमुपन्यस्तमर्थापत्तिर्वा व्यवहारार्थिनां व्यवहारहेतुमूलविस्मरणानुपपत्तेर्दृश्यादर्शनवद्वा स्मर्त्तव्यास्मरणस्याप्यनवगतपूर्वातीताभावज्ञानकरणतायाः स्वरूपमात्रं दृष्टं च पश्चात्किञ्चित्स्मरन्नपि तत्रान्येनास्तितां[1] पृष्टस्तदेव प्रतिपद्यत इति वदद्भिराचार्यैरिष्टत्वादभावाख्यमेव प्रमाणमनेनोपन्यस्तम् । नन्वविच्छिन्नपारम्पर्यदृढस्मरणमात्रेण व्यवहारसिद्धिरवश्यस्मर्त्तव्यत्वविशेषणाभावादस्मरणमात्रस्य च चिरवृत्तेषु सत्स्वपि पदार्थेषूपलब्धेरभावात्साधकत्वान्नास्मरणेन मूलाभावसिद्धिरित्याशङ्क्ते * स्यादेतदिति * निर्मूलस्य स्मरणस्याप्रमाण्येन व्यवहारासाधकत्वान्मूलस्यावश्यस्मर्त्तव्यत्वं साधयति * तदयुक्तमिति * अवश्यसमर्पणीयासमर्पणादपि स्मृतिमूलभूतानां चोदनानामभावो ऽवसीयतइत्याह * अपि

१ तत्सत्तामस्तिवामिति २ पु० पा०

चेति * ननु स्वयंदृष्टस्य मूलस्यावश्यसमर्पणीयत्वं भवेत् मन्वादिभिस्तु स्मृतिमूलभूतानां चोदनानां स्वयमदृष्टत्वादशक्यं समर्पणमित्याशङ्क्याह * यदि हीति * एवमपि मन्वादिभ्यः पूर्वैराचार्यैः स्वयंदृष्टत्वे समर्पणीयत्वापत्तेरदृष्टत्वे वा नित्यानुमेयत्वापत्तेस्तस्य च निराकरिष्यमाणत्वान्निर्मूलत्वमेव बलादापद्यतेति भावः । ननु पूर्वाचार्यैः समर्पितमपि स्मृतेर्मूलं प्रलीनत्वेन मन्वादिभिः स्वयमदृष्टत्वान्न समर्प्यते ऽत आह * यदि त्विति * ननु मन्वादिभिः स्वयं दृष्टानामपि मूलानामन्यैरपि स्वयं दृष्टत्वादसमर्पणमित्याशङ्क्यास्मिन्पक्षे स्मृतिप्रणयनवैयर्थ्यमाह * अथेति * इतश्च वैयर्थ्यमित्याह * युक्ततरा चेति * किं चान्यैः स्वयंदृष्टानामपि वेदवाक्यानां तात्पर्याज्ञानेनेदमस्याः स्मृतेर्मूलमिति निर्णेतुमशक्यत्वात्तात्पर्यज्ञापनार्थं मन्वादिभिरवश्यं समर्पणं कर्त्तव्यमित्याह * न चेति * प्रमाणशून्यो मूलविशेषनिर्णयो ऽशक्य इत्यन्यथैव दृष्टान्तमाह * पश्येति * ननु

यः कश्चित्कस्य चिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वो ऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

इति मन्वादिभिः सामान्येन स्वस्मृतीनां वेदमूलत्वाभिधानाद्विशेषासमर्पणे ऽपि स्मृत्यनुरूपमूलविशेषनिर्णयो भविष्यत्यत आह * न चेति * अतो ऽनादर्त्तव्यमित्युपसंहारभाष्यं व्याचष्टे । तस्मादिति । ७४।१

अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ॥२॥

अत्र भाष्यकारेण प्रमाणं स्मृतिरिति सौत्रं प्रमाणशब्दं सिद्धान्तप्रतिज्ञानार्थत्वेन व्याख्याय विज्ञानं हि तत्किमित्यन्यथा भविष्यतीति करणव्युत्पन्नेन विज्ञानशब्देन विज्ञानोत्पादकत्वं हेतुत्वेनोक्तं तद्व्याचष्टे * सर्वथेति * पक्षद्वये ऽपि विज्ञानोत्पादकत्वं तावदविप्रतिपन्नमिति हेतुत्वोपपत्त्यर्थं दर्शयितुं * सर्वथेत्युक्तम् * मन्वादिस्थानां स्मरणानां पुरुषान्तरं प्रति ज्ञानोत्पादकत्वाभावमाशङ्क्य निबन्धनद्वारेण ज्ञानोत्पादकत्वं सूचयितुं * सन्निबन्धना इत्युक्तम * विद्यमाननिबन्धना इत्यर्थः । शोभनार्थेन वा सच्छब्देन साधुनिबन्धनत्वाभिधानादसाधुशब्दभूयिष्ठनिबन्धनत्वेन शाक्यादिवन्निबन्धुर्मन्वादेरप्रत्यायितत्वानुमानं प्रत्युक्तम् । स्मृतिशब्दस्य धर्मशास्त्रेष्वेव प्रसिद्धत्वात्पुराणादीनां प्रामाण्यमिह न प्रतिपाद्यतइति कस्य चिच्छङ्का स्यात्तन्निवृत्त्यर्थं वेदातिरिक्तसमस्तविद्यास्थानविषयत्वं

दर्शयितुं * शेषाणि च विद्यास्थानानि * इत्युक्तं भाष्यकारेण पूर्वविज्ञानमस्य नास्ति कारणाभावादिति कारणाभावेन स्मृतिमूलभूतविज्ञानाभावमप्रामाण्यहेतुं पूर्वपक्षोक्तमनुभाष्य तन्निराकारणार्थत्वेनानुमानं स्यादिति सूत्रावयवो ऽस्या एव स्मृतेरित्यादिना ग्रन्थस्त्वनुमीयतइत्यन्तेन व्याख्यातस्तदुपपादयितुमाह * मन्वादीनां चेति * प्रत्यक्षत्वे मन्वादीनां तत्स्मृतिमूलविज्ञानमूलस्य द्रष्टुं शक्यत्वाददृष्टकल्पनानुपपत्तेरप्रत्यक्षत्वादित्युक्तम् । ननु कल्पना नामादृष्टं विज्ञानकारणं तत्तु चोदनाख्यमेवेति कथमध्यवसीयते ऽत आह * तत्रेति * श्लोकं व्याचष्टे * सर्वत्रैवेति * भ्रान्तेस्तावद् दृष्टानुगुण्येनासाध्यत्वमाह * तत्रेति * सम्यङ्निबद्धाच्छास्त्राद्यदृष्टकादीनां धर्मत्वदर्शनं तद्विरोधापत्तिरित्यर्थः । मन्वादीनामिति कर्त्तरिषष्ठी । स्मृतिग्रन्थग्राहिणः पुरुषात्प्रति स्वज्ञानस्य भ्रान्तस्यापि भ्रान्तत्वपरिहारोपन्यासो मन्वादिकर्त्तृकः कल्प्यतइति शेषः । अनुभवस्याह * अनुभवे ऽपीति * पुंवाक्यस्याह * पुरुषेति * विप्रलम्भनस्याह *तथेति * अनुवृत्तिहेतोर्भ्रान्तत्वपरिहारोपन्यासस्यादिशब्देनोपादानं विप्रलम्भे न केवलमनेकादृष्टकल्पनाप्रसङ्गः किं तु दृष्टप्रामाण्यविरोधो
७५।१ ऽपीत्याह * उत्पन्नस्य चेति * चोदनायास्तु दृष्टानुगुण्येन साध्यत्वाज्ज्यायसी कल्पनेत्याह * तस्मादिति * ननु चोदनाकल्पने दृष्टानुगुण्यसाध्यत्वस्य हेतुत्वे कर्त्तुसामान्यादिति सौत्रं हेत्वभिधानमनर्थकं स्यादित्याशङ्क्य सम्भावनामात्रे ऽसौ हेतुर्न निर्णायक इति सूचयितुं मन्वादीनां विज्ञानस्य चोदनामूलत्वसम्भावनामाह * सम्भाव्यते चेति * एतमेवार्थं वक्ष्यमाणभाष्यारूढं करोति * तदर्थमेवाहेति * नन्वेवमप्यनेनैव हेतुना चोदनामूलनिर्णये सिद्धे किमसाधकेन सम्भावनामात्रहेतुनेत्याशङ्क्य म्लेच्छस्मृतिवैषम्यप्रदर्शनार्थः सम्भावनाहेतूपन्यास इति सूचयितुं म्लेच्छार्यस्मृत्योर्वैषम्यमाह * यानि पुनरिति * अनुभवपुंवाक्यपरम्परयोर्मिथ्यात्वहेतुनामापाद्य चतुष्टयोक्तिः । प्रत्यक्षानुपलब्धे चेति श्लोकोक्तं योग्यानुपलम्भविरोधं परिहर्तुमनुभाषते * यत्त्विति * परेषां परिहारं दूषयितुमुपन्यस्यति *तत्रेति* अनुच्चरितानामज्ञातत्वेनाबोधकत्वान्मूलत्वानुपपत्तिमाशङ्क्ते *कथमिति* मन्वादिभिरप्यस्मदादिवत्पूर्वाचार्यस्मरणान्यथानुपपत्त्यानुच्चरितानामपि ज्ञातुं शक्यत्वान्मूलत्वोपपत्तिरिति परिहरति * नैष इति * पूर्वाचार्याणामपि चोदनोपलम्भं विना कुतः स्मरणमित्याशङ्क्य पारम्पर्येणेत्युक्तम् । एवं सत्यनवस्थापत्तिमाशङ्क्य पाठविच्छेदवादित्युक्तम् । एकपुरुषपाठस्याविश्रम्भणीयत्वेन चोद-

नायाथात्म्यनिश्चायकत्वायोगात्पारम्पर्याविच्छेदेनैव निश्चायकत्वमङ्गीकार्यमनादित्वाच्चानवस्थादोषाभावः तद्वदत्रापीत्याशयः। एतदेव विवृणोति * यथैव हीति * प्रतिस्मर्तृपूर्वपूर्वाचार्यस्मरणान्यथानुपपत्त्या श्रुतिज्ञानं प्रतिज्ञातयेत्यर्थः। इमं परिहारं वृषयति * तत्त्विति * अयमाशयः यद्यप्यष्टकादिकर्त्तव्यत्वस्मरणस्य पूर्वविज्ञानायत्तत्वात्तस्य च श्रुतिज्ञानं विनानुपपत्तेर्मन्वादीनां श्रुतिज्ञानं कल्प्यते तथाप्यनुच्चरितानां प्रत्यक्षत्वायोगाद्व्याप्त्याद्यभावेन चानुमानाद्यप्रवृत्तेर्मूलप्रमाणासम्भवात्स्वप्नादिमूलापत्तेर्न श्रुत्यस्तित्वनिश्चयोपपत्तिरिति। दृष्टान्तवैषम्यमाह * लिङ्गादीनां त्विति * स्मृतेरनित्यत्वेन पूर्वज्ञानापेक्षत्वात्तस्य चानुच्चरितश्रुतिज्ञानासम्भवेनानुपपत्तेः पारिशेष्याद् भ्रान्त्यादिमूलत्वापत्तिसूचनार्थं लिङ्गादीनां नित्यत्वाभिधानम्। परिहारान्तरमाह * तेनेति * नित्यत्वव्याघातापत्तेरत्राप्यपरितोषसूचनार्थं वरमित्युक्तम्। अध्येतृपरम्पराविच्छेदाभावात्प्रलयानुपपत्तिमाशङ्क्याह * न चेति * अन्यत्रासक्तिः प्रमादस्तत्रानासक्तिरालस्यमादिशब्देन विघ्नयोगादिभिरध्यापकपुरुषक्षयाच्च स्वल्पो वेदाध्येतॄणां विषयो दृश्यतइत्यर्थ। सबीजत्वायास्य पक्षस्य पूर्वोक्तं दोषं परिहरति * न चेति * स्वमतमाह * यद्वेति * अस्मिन्मते ऽनुपलब्धिविरोधं परिहर्त्तुमनुभाषते * कथमिति * पारिहरति * उच्यतइति * नानादेशपठ्यमानानां शाखानां प्रमादिभिः पुरुषैस्तद्देशागमनाच्छ्रोतुमशक्तेस्तद्गतश्रुत्यनुपलब्धिसंभवः एकशाखागतानामपि श्रुतीनां नानाप्रकरणस्थानां तत्तत्कर्तृधर्मत्वबाधेन पुरुषधर्मत्वस्य प्रमादिभिर्निर्णेतुमशक्तेः स्मृतिमूलत्वनिरूपणानुपलब्धिसम्भव इत्यर्थः। स्मर्त्तव्यास्मरणस्याभावसाधनत्वेनोपन्यस्तस्य विस्मरणमप्युपपद्यतइति भाष्ये निराकरिष्यमाणत्वात्तदुपेक्ष्य समर्पणीयासमर्पणमभावसाधनत्वेनोपन्यस्तं निराकर्त्तुमनुभाषते * यत्त्विति * निराकरोतिः * सम्प्रदायेति * समर्पणैः सम्प्रदायविनाशापत्तिमुपपादयति * विशिष्टेति * यस्य वेत्येहनि पत्न्यनालम्भुका स्यात्तामवरुध्य यजेतेत्यवरोधवचनादर्शपूर्णमासयोरुदक्या संवादाप्रसक्तेर्न मलवद्वाससा सह संवदेदिति प्रतिषेधः प्रकरणादुत्कृष्यते ब्राह्मणावगोरणप्रतिषेधस्य ऋत्विगानमनार्थं प्रसक्तावपि (देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन् तेशंयुं बार्हस्पत्यमब्रुवन्निमन्नो यज्ञं स्वगाकुर्विति सो ऽब्रवीद्वरं वृणै ये देवा ब्राह्मणोक्तो श्रद्दधानो यजातै सनियज्ञस्याशीरसदिति तस्माद् ब्राह्मणोक्तो श्रद्दधानो यजते ७६।१

१ विघ्ननयोगः तैरिति २ पु० पा०।

शंयुमेव बार्हस्पत्यं यज्ञस्याशीर्गच्छत्वेतन्ममेत्यब्रवीत्किं मे प्रजाया इति यो ऽवगुराति तं शतेन यातयाद्योनिह तत्सहस्रेण यातयाद्यो लोहितं करवद्यावतः प्रस्कण्व पाऽ सून् संगृह्णात्तावतः संवत्सरान् पितृलोकं न प्रजानादिति तस्माद् ब्राह्मणो नावगुरेत्तेन निंहन्यान्नलोहितं कुर्यादेतावता हैनसा भवति[2]) इत्याद्यर्थवादात्सर्वेभ्यो वरदानावगतेरवगोरणाप्रतिषेधस्य ब्राह्मणमात्रविषयत्वावसायात्प्रकरणादुत्कर्षः *कर्मोपयिकमात्रं वेति* येन यत्कर्मानुतिष्ठासितं स तदौपयिकमात्रमधीयीतेत्यर्थः । स्वयमपठितत्वादप्यसमर्पणमुपपद्यतइत्याह * न चेति * स्वयमपाठितायाः श्रुतेः कथं मूलत्वमित्याशङ्क्याह * ते हीति * यत्त्वसमर्पणे मूलविशेषस्य निर्णेतुमशक्यत्वादवश्यं समर्पणीयत्वमुक्तं तन्निराकरोति * न चेति * असिद्धं चासमर्पणं सामान्येन वेदमूलत्वस्य समर्पितत्वादित्याह * अपि चेति* आत्मा वेदमूलाभिधायितया बध्वा नियम्यसमर्पित इत्यर्थः । यत्तु वेदमूलत्वाभिधानस्य लोकवञ्चनार्थत्वशङ्क्या मूलसमर्पणासामर्थ्यमुक्तं तन्निराकरोति * तच्चैतदिति * यथैव शिष्टत्रैवर्णिकदृढपरिग्रहान्यथानुपपत्त्या मन्वादीनां श्रुतिदर्शनं कल्प्यते तथैव तत्कालीनानां तद्ग्रन्थपरिग्रहीतृणामपि तत्कल्प्यमित्याशयः । सिद्धान्तमुपसंहरति * अत इति * एवं स्वमतेन दृष्टानुसाराद् दृष्टकल्पनालाघवं तर्कोपबृंहितशिष्टत्रैवर्णिकदृढपरिग्रहान्यथानुपपत्तिप्रसवयार्थापत्त्या वेदमूलत्वकल्पनेन स्मृतिप्रामाण्यं साधितं कर्तृसामान्यं तु चोदनामूलत्वसम्भावनहेतुत्वेन व्याख्यातम् । अन्यैस्तु व्याख्यातृभिः साक्षात् प्रामाण्यानुमाने वेदमूलत्वानुमाने वा लिङ्गत्वेन कर्तृसामान्यं व्याख्यातं मन्वादिस्मृतिप्रमाणम् । वेदार्थानुष्ठातृभिरनुष्ठीयमानार्थत्वात् वेदवत्, वेदमूला वा वेदवादिस्मृतित्वात्प्रत्यक्षवेदार्थस्मृतिवत् स्मृत्यर्थो वा श्रेयोहेतुर्वेदमूलो वा वेदार्थानुष्ठातृभिरनुष्ठीयमानत्वात् । प्रत्यक्षवेदार्थवदिति दूषयितुमुपन्यस्यति * यस्त्विति * स्वतन्त्रशब्देन सम्भावनानैरपेक्ष्यमुक्तम् । दूषयति
७७।१ * तस्येति * अनुमानस्य स्मृत्याचारयोस्तुल्यत्वादाचारग्रहणेन स्मृतिमप्युपलक्षयति पठ्यमानस्य तावद्वेदवाक्यस्य श्रूयमाणस्यैव श्रोतॄन्प्रति प्रमाजनकत्वमश्रोतुः प्रमानुपपत्तेर्लिङ्गादिकल्प्यस्यापि श्रूयमाणमन्त्रादिश्रुत्यधीनमेव प्रामाण्यं दृष्टमित्यव्यभिचारान्मन्वादिस्मृतेरपि श्रूयमाणश्रुत्यधीनमेवास्मदादीन्प्रति प्रामाण्यं प्रसज्यतेति साध्यधर्मविशेषविपरीतसाधनाद्विरुद्धत्वम् । न च मन्वादि-

---

१ यमं पा० २ पु० ना० किं तु किं मे प्रजाया इति पा० १ ।

भिः श्रूयमाणत्वात्सिद्धसाध्यताशङ्का तान्प्रति स्मृतेः प्रामाण्याभावात् प्रत्यक्षवेदार्थस्मृतौ चैवमेव, वेदवादिस्मृतित्वस्य श्रूयमाणश्रुतिमूलत्वलक्षणेन श्रुत्यधीनत्वेन सह व्याप्त्युपलब्धेर्धर्मविशेषविपरीतसाधनत्वम् । तदा च श्रूयमाणश्रुत्यधीनत्वापत्तेर्विरुद्धतेति योज्यम् । कथं तर्हि सूत्रभाष्ययोरनुमानशब्दो ऽत आह * तस्मादिति * एवमस्या एवेत्यादिभाष्योक्तं चोदनाकल्पनमुपपाद्यैतदेव भाष्यमवयवशो व्याचष्टे * अस्या एवेति * द्रढिम्न इति पञ्चमी षष्ठीवेत्यर्थः । कारणविशेषाकाङ्क्षायामनुपपत्तिमनुभवस्य कारणमुक्त्वा न हीत्यादिभाष्येणानुपपत्तिरुपपादिता तत्र मनुष्यग्रहणस्य कर्मफलसंबन्धानुसन्धानासम्भवकारणमरणधर्मकत्वप्रदर्शनमस्मिंश्च जन्मनि विश्वजिन्न्यायावगतां विमिश्रसुखात्मकस्वर्गाख्याष्टकादिफलोपभोगस्य मनुष्यशरीरेणासम्भवप्रदर्शनं प्रयोजनमिति च दर्शयितुं व्याचष्टे * न हीति * जन्मान्तरीयस्य कस्य चिदर्थस्यास्मरणान्निःशेषस्मृतिबीजसंस्कारनाशकत्वं मरणस्यावसीयते । जातमात्रस्य तु स्तन्यपाने प्रवृत्तिर्यादृच्छिकी प्रथमस्त्रीभोगप्रवृत्तिवत् । किं तर्हि कारणमनुमीयते इत्यपेक्षिते ग्रन्थस्त्वनुमीयतइत्युक्त्वा सौत्रहेतुव्याख्यानार्थकर्तृसामान्यात्स्मृतिवैदिकपदार्थयोरिति भाष्यकृतोक्तं तद्वेदानुमाने कर्तृसामान्यस्य हेतुत्वं दर्शयतीति भ्रान्तिं व्यावर्त्तयितुमाह * स्मृतीति * मन्वादीनां वेदसंयोगोपपत्त्यर्थं त्रैवर्णिकत्वं विशेषणत्वेनोपात्तमुपपादयितुं (स्मृतिवैदिकपदार्थयोः कर्तृसामान्यादित्युक्तम् । पदार्थशब्दः स्मृतिशब्देन स्मृतेः पदार्थ इति वैय्यधिकरण्येन संबद्ध्यते वैदिकशब्देन सामानाधिकरण्येन) वैदिकपदार्थकर्तृभिस्त्रैवर्णिकैः स्मार्त्तानां पदार्थानां क्रियमाणत्वात्तेषां चात्रैवर्णिकोक्तपदार्थानुष्ठातृत्वस्वभावदर्शनात्स्मृतिप्रणेतॄणां त्रैवर्णिकत्वं कल्प्यतइत्यर्थः । यद्वा स्मृतिकर्तॄणां मन्वादीनां वैदिकपदार्थकर्तॄणां चेदानीन्तनानां शिष्टानां त्रैवर्णिकत्वेन समानत्वादिदानीन्तनवन्मन्वादीनामप्युपपन्नो वेदसंयोग इत्यर्थः । सम्भवद्वेदसंयोगत्वप्रतिपादनप्रयोजनं च चोदनाख्यस्य मूलस्य सम्भावनापदलाभ इति * चोदनेत्यनेनोक्तम् * नन्विति भाष्येणानुपलब्ध्याविरोधाच्चोदनाकल्पनानुपपत्तिमाशङ्क्यानुपलभ्यमानो ऽपीत्यनेन विप्रकीर्णशाखानेकप्रकरणस्थत्वेनोपलब्ध्ययोग्यत्वापनुपलब्धिमात्रस्य चाभावासाधनत्वादविरोधमुक्त्वा विस्मरणमप्युपपद्यतइत्युक्तं तत्प्रलीनत्वनिमित्तानुपलम्भप्रतिपादनपरत्वेन तावत्सोपपत्तिकं व्याचष्टे * विस्मरण-

१ अयं पा० २ पु० ना० ।

मपीति * नित्यत्वव्याघातापत्तेस्त्वेतत् पक्षापरित्यागाद्विद्यमानशाखामूलत्वपक्षएव स्मर्त्तव्यास्मरणात्तदभावमाशङ्क्य सामान्यतो वेदमूलत्वस्याभियुक्तैः स्मरणाद्विशेषस्य त्वनौपयिकत्वेनावश्यस्मर्त्तव्यत्वाभावादस्मरणमात्रस्य चाभावासाधकत्वादविरोधप्रतिपादनपरतया स्वमतेन व्याचष्टे * यदा त्विति * तदुपपन्नत्वादित्युपसंहारभाष्यं मन्वादीनां त्रैवर्णिकत्वेन सम्भवद्वेदसंयोगतया पूर्वविज्ञानोपपत्तेरिदानीन्तनानां च त्रैवर्णिकानां स्मृतिमूलविशेषास्मरणस्यानुपलम्भस्य चोपपन्नत्वेनाभावासाधकत्वाद्ग्रन्थानुमानाविरोधोपसंहारार्थतया स्पष्टत्वान्न व्याख्यातं स्मृतिप्रामाण्ये लिङ्गदर्शनान्युपन्यस्याष्टकालिङ्गो मन्त्रो भाष्यकृतोदाहृतः ।

यां जनाः प्रतिनन्दन्ति रात्रिधेनुमिवायतीम् ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥

अष्टका यैस्तु राधसे स्वाहेति तस्याष्टकादेवतारात्रिप्रकाशकत्वादेषा वै संवत्सरस्य पत्नी यदष्टकेति संवत्सरपत्नीत्वसंस्तुताष्टकाप्रकाशकत्वाच्चाष्टकालिङ्गत्वं स्पष्टमेवेति तदपि न व्याख्यातम् । तथेति भाष्यं व्याचष्टे * तथेति * आक्षिपति * एतदिति* श्लोकं व्याचष्टे *न हीति* ननु धर्माप्रामाण्यमेवानेन प्रकारेणोक्तमिति शङ्कते *स्यादेतदिति* निराकरोति *तथा सतीति* वेदमूलत्वनिराकरणार्थस्तर्हि दृष्टार्थत्वोपन्यासो भविष्यतीत्यत आह *न चेति* वैदिकेष्वपि च सर्वत्र दृष्टार्थत्वस्योत्प्रेक्षितुम् शक्यत्वान्न
७८।२ तेनावैदिकत्वसिद्धिरित्याह * सर्वत्र चेति * लोकपंक्तिर्लोकोपसंग्रहस्तदुत्पादकत्वरूपादनादेर्दृष्टार्थताध्यापनादेः शिष्यादिसहायोपादानोत्पादकत्वरूपा सवनस्थक्षत्रियवैश्यवधे ब्रह्महत्येति यागस्यात्मरक्षणोत्पादकत्वरूपा कुटुम्बभरणस्य प्रीत्युत्पादकत्वरूपेत्यर्थः । पारमार्थिक्यपि दृष्टार्थता नावैदिकत्वसाधिकेत्याह * न चेति * दृष्टार्थत्वस्य वेदमूलत्वाविरोधित्वमुक्तमुपसंहरति * तस्मादिति * भवत्ववघातादीनां नियमादृष्टार्थाद्वेदमूलत्वं गुर्वनुगमनादीनां तु कथमित्याशङ्क्याह * अतश्चेति * निष्पन्नविद्यैरप्यनुष्ठीयमानस्य गुर्वनुगमनादेर्दृष्टार्थत्वायोगादवश्यकर्त्तव्यतान्यथानुपपत्तेरकरणनिमित्तप्रत्यवायपरिहार्यत्वावसायात्तस्य चानन्यप्रमाणकत्वाद्वेदमूलत्वसिद्धिरित्याशयः । यत्तु दृष्टार्थत्वं भाष्यकृतोक्तं तदानुषङ्गिकमित्याह * दृष्टं चेति * निष्पद्यतइत्यनेनानुषङ्गिकत्वं दर्शितं दृष्टार्थत्वे ऽपि वा नियमस्यादृष्टार्थत्वाद्वेदमूलत्वं सेत्स्यतीत्यभिप्रायेणाह * नियमाच्चेति * षष्ठे च सकृदसकृदनुष्ठानविचारात्सूत्रकारस्यापि

केवलदृष्टार्थत्वाभिप्रायो लक्ष्यतइत्याह * एवं चेति * गुरुगमनावृत्तौ तदनुगमनमावर्त्तनीयं न वेति सन्दिह्य गुरुगमनस्य निमित्तत्वाभावे ऽपि तदभावे ऽनुगमनस्यासम्भवात् तत्काले ऽनुष्ठेयत्वोपपत्तेर्निमित्तत्वे प्रमाणाभावात्सकृदनुष्ठानेन शास्त्रार्थसिद्धेरनावृत्तिप्राप्तौ वक्ष्यते आचारानुमितस्य विधेरधिकारिविशेषणापेक्षायामावश्यकत्वोपपत्तये गुरुगमनस्य निमित्तत्वेनाधिकारविशेषणत्वावसायाद्भेदेन होमादिवन्नैमित्तिकत्वाद् गुर्वनुगमनस्याप्यावृत्तिः सिद्धा कथं तर्हि दृष्टार्थत्वादेवेत्येवकारः ऽत आह * यत्त्विति * तथा चेति गुर्वनुगमनलिङ्गदर्शनभाष्यं तावदतिक्रम्य प्रपा इति भाष्यं न धर्मायेत्यदृष्टार्थत्वनिषेधेन प्रपादेर्गुर्वनुगमनादिवत् केवलदृष्टार्थत्वप्रतिपादकत्वेन बुद्धिस्थत्वाद्व्याचष्टे * सभेति * प्रपादिष्वपि स्मृत्यनुरूपानेकश्रुतिकल्पनौचित्यात् पूर्वभाष्यपदस्याप्यतिशयार्थत्वसूचनार्थं * यद्यपीत्युक्तम् * परोपकारश्रुतेः सर्वसाधारण्यप्रदर्शनार्थं समस्तग्रहणम् । अतिक्रान्तलिङ्गदर्शनं व्याचष्टे * तस्मादिति * प्रपालिङ्गमपि स्तुतिपरं मन्त्रावयवं व्याचष्टे * यथेति * स्थलयोदकम्परिगृह्णन्तीति जानपदकुण्डगोणस्थलेत्यादिसूत्रेणाकृत्रिमे स्थले ङीष्प्रत्ययविधानात्कृत्रिमे टाप्प्रत्ययानपवादप्रतीतेः स्थलाद्राष्ट्रस्य कृत्रिमतीरवाचित्वात्तडागलिङ्गं स्पष्टत्वान्न व्याख्यातम् । शिखाकर्मणो दृष्टार्थत्वप्रतिपादकं गोत्रचिह्नमित्यपि भाष्यमतिशयार्थमेवेति व्याचष्टे * गोत्रेति * चतुरवत्तस्य सामान्येन विहितस्य पञ्चावत्तं भृगूणामित्यपवादाच्चतुरवत्तपञ्चावत्तविभागं कर्माङ्गं वसिष्ठशुनकात्रिवाध्वश्वानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति द्वितीयप्रयाजविभागस्ताभिर्यथर्ष्यापाणीयादित्याप्रासूक्तविभागश्चादिशब्दोपात्तः । तदुपयोगित्वादौपचारिकी गोत्रस्य कर्माङ्गभूततोक्ता तस्याश्चार्षसंख्याशिखाविधानाच्छिखाकल्पस्त्रिशिखपञ्चशिखत्वादिरूपश्चिह्नमिति दर्शनं चेति भाष्यं कुमारा विशिखा इवेति नानाशिखत्वद्योतकशिखाकर्मलिङ्गदर्शनप्रतिपादनार्थतया स्पष्टत्वान्न व्याख्यातं तेनेत्युपसंहारभाष्यस्य तात्पर्यं व्याचष्टे * तेनेति * यद्यप्यत्र वेदमूलतया स्मृतीनां धर्मप्रामाण्यं प्रतिपाद्यं तथाप्यर्थकामविषयासु प्रमाणान्तरमूलत्वेन प्रामाण्योपपत्तेस्तत्प्रणेतृणामाप्तत्वावधारणाददृष्टविषयासु वेदमूलत्वं सुकल्प्यमिति दर्शयितुं सामान्यतः प्रयोजनवत्त्वाभिधानम् । अदृष्टार्थस्मृतिप्रामाण्यं प्राधान्येनेह प्रतिपाद्यमिति सूचयितुं व्युत्क्रमेण विवेककथनम् । धर्मविशेषस्यापि मोक्षस्य ब्राह्मणपरिव्राजकवद्भेदेनोपादानम् । भाष्ये तु कर्मव्युत्पत्त्या पदार्थ-

प्रामाण्याभिधानम् । अनेन च भाष्येण वेदातिरिक्तसकलविद्या-
स्थानप्रतिपाद्यानां पदार्थानां दृष्टादृष्टप्रयोजनभेदेन मूलविवेककथनं कृ-
तमिति दर्शयितुं पुराणेतिहासगतेषु दृष्टादृष्टोपदेशवाक्येषु तावद्धर्म-
शास्त्रोक्तं विवेकमतिदिशति * तथैवेति * ननूपाख्यानासत्यत्वेने-
तिहासपुराणप्रणेतृणामनाप्तत्वावसायात्कथमत्रोपदेशवाक्यानां मू-
७९।१ लप्रमाणकल्पनमित्याशङ्क्याह * उपाख्यानानि त्विति * तेषामप्यर्थ-
वादन्यायेन प्रयोजनत्वं प्रामाण्यं चोक्तमित्यर्थः । पृथिवी विभागक-
थनस्य कथं प्रयोजनत्वप्रामाण्ययोः सिद्धिरित्यपेक्षायामाह * यत्त्वि-
ति * धर्माधर्मसाधनप्रदेशो जम्बूद्वीपस्य भारतवर्षं तत्कथनं दर्श-
नपूर्वकं तदतिरिक्तफलोपभोगप्रदेशकथनं भारतवर्षस्य च धर्माध-
र्मसाधनत्वं वेदमूलम् । वंशानुक्रमणस्य प्रयोजनं मूलं चाह *वंशेति*

तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला ॥
हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम् ।
तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम् ॥

इतिदेशपरिमाणं निमेषकाष्ठाकलामुहूर्ताहोरात्रमासवर्षभेदेन
च कालपरिमाणं लोकव्यवहारसिद्ध्यर्थं ज्योतिःशास्त्रव्यवहारसि-
द्ध्यर्थं च दर्शनपूर्वकम् । चन्द्रसूर्यान्तरालादिदेशपरिमाणं युगादि-
कालपरिमाणं च ज्योतिःशास्त्रव्यवहारसिद्ध्यर्थं गणितविषयसम्प्र-
दायोत्थानुमानपूर्वकमित्याह * देशेति * कलावधर्मभूयिष्ठाः सर्वे
भविष्यन्त्यल्पीयसापि धर्मेण भूयानभ्युदयो भविष्यतीत्यादिभविष्य-
त्कथनस्य प्रयोजनं युगस्वभावनिबन्धनस्य धर्माधर्मानुष्ठानवैचित्र्यस्य
फलपाकवैचित्र्यस्य च ज्ञानं तत्कारणत्वेन वा धातागच्छान् उपबर्बृ-
हिवृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् इत्युत्तरार्द्धचः (आ घा
ता गच्छान् उत्तरा युगानि इति पदानि घ निश्चितम् । घा इति दीर्घछान्द-
सः । तानि उत्तराणि युगानि आगच्छान् आगमिष्यन्ति । यत्रः जामयः
बालिशाः अजामि अतिरिक्तानि शास्त्राविरुद्धानि कर्माणि कृण्वन्
करिष्यन्तीति नियमोक्तिः । अत्रेदं निरुक्तम् । आगमिष्यन्ति ता-
न्युत्तराणि युगानि यत्र जामयः करिष्यन्त्यजामि कर्माणि जाम्यतिरे-
कनामबालिशस्य वा समानजातीयस्य वोपजनउपधेहिवृषभाय बाहुम-
न्यमिच्छस्व सुभगे पतिं मदिति व्याख्यातं)मित्यादिर्वेदोमूलमित्याह *
भविष्यत्कथनमपीति * नित्यवेदविषयत्वाविरोधायानादिकालप्रवृ-

---

१ अथवा २ पु० ना० । धातागच्छानुत्तरायुगानियत्र जामयः कृणवन्नजामीत्यादिर्वे-
दोमूलमिति २ पु० पा० ।

स्तत्वं युगस्वभावस्योक्तम्। अङ्गानां मूलप्रयोजने विवेचयिष्यस्सामान्यतस्तावद्यथासम्भवं क्रत्वर्थप्रतिपादनं पुरुषार्थप्रतिपादनं च प्रयोजनं लोको वेदश्च मूलमित्याह * अङ्गेति * शिक्षायां वर्णादिस्वरूपकथनं लोकमूलं तद्विज्ञानपूर्वकस्य तूच्चारणस्य क्रत्वर्थपुरुषार्थत्वकथनं वेदमूलमित्याह * तत्रेति * अकारादयो वर्णाः संवृतादीनि करणान्युदात्तादयः स्वराः ह्रस्वादयः कालाः। कण्ठादिस्थानान्यादिशब्देनोक्तानि। कल्पेषु सूत्रेषु च क्रत्वर्थपुरुषार्थाङ्गप्रधानप्रतिपादनं प्रयोजनं वेदश्च मूलमित्याह * कल्पेति * अर्थवादमन्त्रमिश्राणां विधीनामुपसंहारो विविक्तीकरणं शाखान्तरविप्रकीर्णानानामेकत्र सन्निवेशो न्यायलभ्यानां तात्पर्यनिर्णयस्तत्तद्विधिरूपामित्यर्थः। ये तु कल्पसूत्रेष्वर्त्विगादीनां को यज्ञ इति प्रश्नोत्तरादिव्यवहारास्तेषामनुष्ठानसौकर्यादिमुखं प्रयोजनं दक्षिणा प्रश्नोत्तरादिव्यवहाराणां चार्थः प्रयोजनं लोकश्चाभयत्र मूलमित्याह * लोकेति * व्याकरणे शब्दान्वाख्यानं लोकमूलं साध्वसाधुप्रयोगयोस्स्वष्टानिष्टहेतुत्वकथनं वेदमूलमित्याह * व्याकरणे ऽपीति * निगमनिरुक्तयोर्लोकमूलपदार्थज्ञानप्रयोजनत्वस्य स्पष्टत्वादनुपन्यासः। छन्दोविचित्त्याङ्गायत्र्यादिविवेककथनं लोकवेदमूलं तद्विज्ञानपूर्वकस्य क्रत्वर्थपुरुषार्थत्वकथनं वेदमूलमित्याह * छन्दोविचित्यामपीति * प्रत्यक्षा चासौ श्रुतिरित्याह * तथा चेति * ज्योतिःशास्त्रे तिथ्यादिकथनं गणितानुमेयत्वाल्लोकमूलं ग्रहसौख्यादिनिमित्तेष्टानिष्टफलविपाकसूचनं तु वेदमूलमित्याह * ज्योतिःशास्त्रे ऽपीति * कल्पादावेकनक्षत्रे स्थिताश्चन्द्रादयः ततः प्रभृत्यात्मनो गतिविशेषेण शीघ्रमन्दत्वरूपेणान्यान्यन्यानि नक्षत्राण्युपसंक्रामन्ति तेषां च नक्षत्रचक्रे सञ्चरतां शीघ्रमन्दत्वविशेषेण गतिपर्यायवैलक्षण्यं भवति चन्द्रादित्यगतिविशेषावच्छिन्नस्य च कालस्य तिथिनक्षत्रव्यपदेश्यत्वाच्चन्द्रादित्यगतिविभागज्ञानेन तिथिनक्षत्रज्ञानं भवति एतावन्त श्चन्द्रादित्ययोर्गतिपर्याया एकस्मिन्युगे भवन्तीत्यवगतेषु तद्भागेषु संवत्सरादिष्विहेदानीं चन्द्रमा इहेदानीमादित्य इत्येवं चन्द्रादित्यादिगतिविभागज्ञानस्य तिथ्यादिज्ञानोपयोगित्वम्। एतावद्भिर्युगपर्यायैः एतावन्तश्चन्द्रादित्यगतिपर्याया इति च युगपरिवर्त्तपरिमाणद्वारेण चन्द्रादित्यादिगतिविभागो ज्ञायते एतावन्तो युगपरिवर्त्ता जाता इति ज्ञाते ऽस्य युगस्यैतावन्त्यहोरात्राण्यस्यैतावन्तीति समस्तातीताहोरात्रसंख्यानात्मकमहर्गणं कृत्वा ऽस्य ग्रहस्येदानीमीदृशी गतिवर्त्तते ऽस्येदृशीति ज्ञानं भवतीति युगपरिवर्त्तपरिमाणज्ञानस्य चन्द्रादित्यादि- ८०।१

गतिविभागज्ञानोपयोगित्वं यथा दिवसस्याष्टमो ऽयं मुहूर्त्तस्तेनास्मिन्मुहूर्त्ते नभोमध्ये सूर्य इति मुहूर्त्तसंख्यानेनादित्यस्य गतिविशेषज्ञानं भवतीत्यर्थः । यथा च प्रकृतिप्रत्ययादिप्रक्रिया साधुशब्दावधारणे लिङ्गं तथात्र गणितं तस्य चास्मिन् गणिते सत्यस्मिन्देशे चन्द्रादयो भवन्तीति प्रत्यक्षेणैव केन चिदभियुक्तेन व्याप्तिं गृहीत्वा ऽन्यस्मै गणितलिङ्गोपदेशे कृते तस्याप्याप्तोपदेशावगतान्वयस्यानुमाने जाते स्वप्रतिपत्तिवत्परस्यापि प्रतिपत्तिं कर्त्तुमुपदेश इति सम्प्रदायाविच्छेदान्न निर्मूलत्वाशङ्केति दर्शयितुमविच्छिन्नेत्युक्तं, ग्रहसौस्थित्यनिमित्तपूर्वकृतस्य शुभकर्मणः फलविपाकः ग्रहदौस्थित्यनिमित्तो ऽशुभस्य तद्वतशब्देन सौस्थित्यदौःस्थित्यविषयतोक्ता, ज्योतिःशास्त्रे ग्रहदौःस्थित्ये शान्तिविधानात्सौस्थित्ये चोपनयनादिविधानात्तस्य च वेदमूलत्वात्कर्मफलविपाकसूचनं वेदमूलमित्यर्थः। ज्योतिःशास्त्रन्यायं साधुमुद्राद्रिष्वतिदिशति * एतेनेति * पूर्वं शान्त्यादिविधानद्वारेण वेदमूलत्वमुक्तम् । यद्वा साक्षादेव तत्प्रतिपादका विधयो ऽनुमातव्या इत्याह * ईदृशा वेति * गृहसन्निवेशो वास्तुविद्याविषयः । शरीरसन्निवेशः सामुद्रविषयः । आदिशब्दोपात्तानां ग्रहाणां सौस्थित्यदौःस्थित्यरूपः सन्निवेशो ज्योतिःशास्त्रविषयः मीमांसाया धर्मज्ञानप्रयोजनत्वस्य प्रथमसूत्रेणैवोक्तत्वात्तदुपेक्ष्य लोको मूलमित्याह * मीमांसात्विति * कथं लोकात्प्रवृत्तेत्यपेक्षिते प्रत्यक्षानुमानादिभिरित्युक्तम् प्रत्यक्षादिसिद्धत्वे शास्त्रानर्थक्यमाशङ्क्याविच्छिन्नसम्प्रदायानां पण्डितानां व्यवहारो यैरित्युक्तम् । सम्प्रदायविच्छेदस्य प्रयोजनमाह * न हीति * मीमांसामूलप्रयोजने न्यायविस्तर ऽतिदिशति * एतेनेति * ननु प्रत्यक्षादिलक्षणपरस्य न्यायविस्तरस्य कथं धर्मज्ञानप्रयोजनत्वमित्याशङ्क्य वाक्यार्थधर्मप्रतिपत्त्युपायभूतपदार्थविवेकहेतुप्रत्यक्षादिविवेचनेति श्लोकद्वयेनाह*विषय इति * वेदस्वरूपावधारणद्वारेणार्थस्य धर्मज्ञानोपयोगित्वमाह * वेदो ऽपीति * प्रत्यक्षमात्रेण वेदावधारणसिद्धेरादिशब्दानर्थक्यमाशङ्क्य विप्रकीर्णात्मकेत्युक्तम् प्रतीकग्रहणेन मन्त्रशेषस्यानुमेयत्वात्स्वयमश्रुतस्यापि कस्य चिद्वेदभागस्याप्तवाक्यावसेयत्वाद्विश्वजिदादौ च ज्योतिष्टोमवदित्यादिवाक्यशेषस्योपमानाधीनावगतित्वात्स्वर्गकाम इत्यस्य वार्थापत्तिगम्यत्वाद्विचित्रप्रमाणगम्य इत्यर्थः । न्यायविस्तरस्य धर्मज्ञानोपयोगित्वं मनुनाप्युक्तमित्याह * तथा चेति * त्रयमित्युपलक्षणार्थमुक्तम् । ननु तर्कस्य धर्मज्ञानो-

पयोगित्वे बौद्धादितर्काणामपि धर्मज्ञानोपयोगित्वं प्रसज्येतेत्याशङ्क्य तेषामपि पूर्वपक्षप्रतिपादनार्थत्वेनोपयोगादानिष्टापत्त्यभावं दर्शयितुमाह * प्रायेण चेति * कुमार्गप्रवृत्तावधर्मवासितान्तःकरणत्वं हेतुः। निश्चितचन्द्रैक्यस्य दोषवशाद् द्विचन्द्रभ्रमोत्पादे ऽपि द्वित्वानध्यवसायाद्धर्मतत्त्वज्ञस्याधर्मवासनादोषात् कुमार्गप्रवृत्तावपि तत्राध्यवसायानुपपत्तिमाशङ्क्य * तत्त्वज्ञानप्रतिबद्धत्वमुक्तम् * स्वोत्प्रेक्षितत्वनिरासार्थं लोकादिमूलोपन्यासः। सर्वासां विरुद्धानां प्रतिपत्तीनां यानि मुखानि विषयास्तेषां प्रदर्शनं क्रियतइति शेषः। तेषां च मुखानामुपपत्तयः कथ्यन्तइति वक्ष्यमाणमाख्यातं विपरिणमय्यानुज्यते। तासां चोपपत्तीनां बलाबलसम्प्रधारणपूर्वकं तत्त्वनिश्चयस्य द्वारनियमे चोपपत्तिरिति कथ्यतइत्यर्थः। ननु स्वोत्प्रेक्षितेनापि तर्केण तत्त्वनिश्चयोपपत्तेः किं लोकादिप्रसूतैस्तर्कशास्त्रैरित्याशङ्क्याह * अन्यथा पुनरिति * भ्रान्त्युत्पादनशक्तिहेतुत्वेनोक्तं बहुजनवचनसम्मतत्वमुपपादयितु *मज्ञानबोधनादित्युक्तम्* न्यायविस्तरानभिज्ञत्वेनोपपत्तिबलाबलज्ञानरहितानां पुंसां बोधोत्पादनादित्यर्थः। ननु न्यायविस्तरस्योपदेशशास्त्रत्वाभावात्कथं तेन बलाबलावधारणमित्याशङ्क्याह * सर्वासु त्विति * स्वातन्त्र्येणेति* प्रत्यक्षादिप्रमाणानुसारेणेत्यर्थः। ननु धर्मप्रमाणनिरूपणार्थस्य तर्कस्योक्तेन प्रकारेणास्तु धर्मज्ञानोपयोगित्वं यस्तु सर्वं जगन्नित्यमेवेति सांख्यानां नित्यत्वैकान्तप्रतिपादनं बौद्धानां च सर्वं जगदनित्यमेव सर्वात्मना पृथग्भूतं चेत्यनित्यत्वपृथक्त्वैकान्तप्रतिपादनमद्वैतवादिनां च सर्वेषामेकत्वैकान्तप्रतिपादनं सामान्यविशेषयोश्च व्यतिरेकैकान्तप्रतिपादनमौलुक्यानामादिशब्दोपात्तं वा व्यतिरेकैकान्तप्रतिपादनं सांख्यानां तस्य कथं धर्मज्ञानोपयोगितेत्याशङ्क्य निष्कृष्टैकैकपदार्थांशनिरूपणार्थत्वेनोपयोगमाह * यदपि चेति * ननु संमुग्धेनापि वस्तुना वाहनदोहनादिव्यवहारसिद्धेः किमंशनिष्कर्षेणेत्याशङ्क्य वाक्यार्थप्रतिपत्तेः पदार्थप्रतिपत्तिहेतुकत्वात्पदार्थानां च वस्त्वंशविषयत्वात्तन्निष्कर्षो ऽवश्यकार्य इत्याह * अवश्यं चेति * एतदेव व्यतिरेकमुखेनोपपादयति * अन्यथेति * मन्त्रार्थवादी यः स्तुतिनिन्दालम्बननिरूपणार्थमप्येकान्तप्रतिपादनमवश्यकार्यमित्याह * मन्त्रेति * ननु यैषा सुखदुःखमोहात्मकसत्त्वरजस्तमोरूपं प्रधानं जगत्कारणमिति प्रक्रिया स्थितिसिद्धान्तापरपर्याया सांख्यैः पुरुष इति ब्रह्मविद्भिरीश्वर इति पातञ्जलीयैः परमाणव इत्यौलुक्यैरादिशब्दात्तत्तत्कार्यं जगदिति यथाक्रमं सांख्यादिभिः प्रतीताः प्रतिग ८१।२

ताः[1]प्रतिज्ञाताङ्गीकृताः किमासां सर्वासां मूलमित्याशङ्क्याह * याश्चैता इति * सृष्टिप्रलयादिरूपेणेति प्राधानादिभ्यो जगतः सृष्टिप्रलयादिरूपेणेति प्रधानादिभ्यो जगतः सृष्टिरुत्पत्तिस्तेष्वेव च प्रलय इत्युपादानकारणत्वमुक्तमादिशब्देनेश्वरस्य निमित्तकारणत्वमुक्तं तृतीयेत्थम्भूतलक्षणार्थो सूक्ष्माद्वटबीजात् स्थूलवृक्षोत्पत्तिदर्शनात्प्रधानादेः सूक्ष्मात् स्थूलं जगदुत्पद्यतइत्यनुमानमित्यर्थः । प्रयोजने सत्यपि वेदप्रामाण्ये स्वर्गयागादीनां साध्यसाधकत्वावबोधे कथं सूक्ष्मादपूर्वात्स्वर्गादेः स्थूलस्योत्पत्तिः सम्भवतीति हेतुकानां विचिकित्सानिवृत्तिरित्याह * प्रयोजनतेति * सृष्टिप्रलयाङ्गीकरणस्य प्रयोजनमाह * सर्गेति * यस्मात्सत्यसति वा पुरुषकारे तदूबलेन दैवबलेन कार्यं प्रवर्त्तते दैवोपरमे चोपरमति, सृष्ट्यादौ तु पुरुषकाराभावे ऽपि दैवमात्राज्जगदुत्पत्तेः प्रलयकाले च सत्यपि पुरुषकारे दैवोपरमे जगदुपरमते तस्माद्दैवस्याधिकः पुरुषकारात्प्रभावः सामर्थ्यमिति मत्वा श्रौतस्मार्त्तकर्मानुष्ठाने यतितव्यमिति सृष्टिप्रलयविषयस्यापि तर्कस्य धर्मोपयोगितेति भावः । विज्ञानमात्रादिप्रक्रियाणां मूलप्रयोजनं चाह * विज्ञानमात्रेति * निवर्त्तयितुं वादानामित्यन्वयः एवं बाह्यतर्काणामपि कथं चिद्धर्मज्ञानोपयोगसम्भवान्नानिष्टापत्तिरित्युक्त्वा प्रकृतं सकलं वेदातिरिक्तविद्यास्थानप्रामाण्यमुपसंहरति * इत्युपपन्नमिति * अतश्चोपसंहारभाष्ये इष्टाहष्टप्रयोजनभेदेन मूलविवेककथनं सर्वविषयमेव योजनीयमित्याह
८२।२ * सर्वत्र चेति * वृश्चिकविद्याग्रहणेनायुर्वेदोपलक्षणादादिशब्देन च नीतिशास्त्राद्युपसंग्रहात्त्रैवर्णिकपरिगृहीतानामर्थकामोपयोगिनामपि विद्यास्थानानां प्रामाण्यं सूचितं त्रैवर्णिकापरिगृहीतानां बौद्धादिग्रन्थानां प्रामाण्याभ्यनुज्ञानाशङ्क्या निषेत्स्यमानत्वात् ।

॥ अथ श्रुतिप्राबल्याधिकरणम् ॥ २ ॥

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ॥ ३ ॥

सङ्गतिमाह * स्मृतीति * कथमपोद्यतइत्यपेक्षिते सूत्रारूढं तत्स्वरूपमाह * विरोधे त्विति * कस्मिन्नसतीत्यपेक्षिते विरोधे वेदवाक्येनेत्युक्तं विरोधे ऽपि वैपरीत्यपरिच्छेदात्प्रागनुपसञ्जातविरोधित्वाच्छ्रुत्यनुमानसम्भवान्न प्रत्यक्षश्रुतितः प्रागनुमानं प्रवर्त्तते मन्थरत्वादित्युक्तं तेन चार्थेनाधिष्ठिते इति वेदवाक्येन स्मृत्यर्थे वैपरीत्येनापरिच्छिन्ने परिच्छेदात्प्रागित्यर्थः । सङ्गतिमुक्त्वा विषयप्र-

---

१ प्रतिगताइति २ पु० ना० ।

दर्शनपूर्वकं सन्देहमाह * यावतीति * सम्प्रधार्यतइत्यनेन यत्र तु श्रुतिविरोधस्तत्र कथमिति भाष्यगतः कथं शब्दः सन्देहप्रदर्शनार्थत्वेन व्याख्यातः। अकथिते च विषये सन्देहस्य वक्तुमशक्यत्वादेतदेव भाष्यं विषयकथनार्थमपीति वक्ष्यमाणोदादरणभाष्यानादरायोदाहृत्येत्यनेन सूचितम्। यावन्तीत्यादिना चानादरकारणमुक्तम्। पर्युदस्यतइत्यनेनापवादत्वं दर्शितम्। निषेधस्य विकल्पापादकत्वेनापवादत्वायोगात्। प्रश्नपूर्वकं सन्देहहेतुमाह * कुत इति * ननु कथं प्रतीयमानस्य विरोधस्य परिहारः कथं वा तस्मिन्सति बाधमन्तरेण गतिरित्याशङ्क्य सामान्यन्यायप्रदर्शनपूर्वकमुभयमुपपादयति * एकविषयेति * विचाराविषयत्वापत्तेर्विरोधपरिहारेण पूर्वपक्षो न युक्त इत्याशङ्क्य विरोधयोरपीत्युक्तम्। * केन चित्प्रकारेणेति * वेष्टनस्मृतेर्द्वित्र्यङ्गुलव्यतिरिक्तविषयत्वात्स्पर्शश्रुतेश्च तन्मात्रविषयत्वाद्राजक्रयाग्नीषोमीयावघ्रोश्चापद्विषयत्वादष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्मृतिकृष्णकेशाधानश्रुत्योश्च गार्हस्थ्यायोग्यायोग्यविषयत्वादित्यर्थः। विधेयप्रतिषेध्ययोर्वेत्यनेन सत्यप्येकविषयत्वे विरुद्धार्थोपसंहारित्वाभावादपि विरोधपरिहारः * सम्भवतीत्युक्तम् * राजक्रयादूर्ध्वं विधेयस्याभोजनसङ्कल्पस्य प्रतिषेध्यस्य च राजक्रयात्प्राग्भोजनस्य विरोधाभावेनैकस्मिन्नपि दीक्षितान्नरूपे विषये समुच्चयसम्भवादित्यर्थः। स्पर्शवेष्टनयोः कृष्णकेशाधानाष्टाचत्वारिंशद्वर्षब्रह्मचर्ययोरप्येकविधानेनार्थादितरप्रतिषेधमभिप्रेत्य वेष्टिताया अपि स्पर्शसम्भवात् कृष्णकेशत्वस्य चानवस्थितवयोवस्थां कालविशेषत्वेनाष्टाचत्वारिंशद्वर्षब्रह्मचर्योत्तरकालमपि कस्मिंश्चित्पुरुषे सम्भवाद्विरोधपरिहारो वक्तुं शक्यते सति वा तुल्यमूल इत्येतद्व्याख्यातुम् * एकप्रयोगेत्याद्युक्तम् * विकल्पाश्रयणेऽप्युभयप्रामाण्यमुपपत्स्यतइत्युक्ते विरोधिनोः समावेशायोगात्कथमुभयप्रामाण्यमित्यशङ्क्य * अत्यन्तविरोधाभावादित्युक्तम् * कथं विरोधाभाव इत्याशङ्क्योभयोः प्रामाण्याङ्गीकरणेनेत्युक्तम्। प्रामाण्यशब्देनात्रानुष्ठानलक्षणफलानपहारोऽभिप्रेतः समुच्चय एव तर्हि कस्मान्नेष्यतइत्याशङ्क्यैकप्रयोगगतत्वासम्भवादित्युक्तम्। कथं तर्हि फलानपहार इत्याशङ्क्य प्रयोगान्तरे चोभयानुग्रहः स्यादित्युक्तम् * प्रत्यक्षानुमेयश्रुत्योरतुल्यबलत्वाद्विकल्पासम्भवमाशङ्क्य * प्रक्षत्येत्याद्युक्तम् * समस्तफक्किकायोजनं त्वेवं यद्याशङ्कितविरोधयोरपि भिन्नविषयत्वेन व्यवस्था सिद्ध्येद्यदि वैकस्मिन्नपि विषये विधेयप्रतिषेध्ययोर्विरोधाभावेन समुच्चयासम्भवादुभयप्रामाण्यमुपपत्स्यते एकप्रयोगग-

तत्वासम्भवाद्विकल्पाश्रयणे ऽपि यद्युभयप्रामाण्यमुपपत्स्यते ततो विरोधविषये ऽपि स्मृतिप्रामाण्यमादर्त्तव्यमिति सिद्धान्तसम्भवाभिधानार्थं * बाधो वा तद्वि पर्ययादिति यदुक्तम् * तद्विवृणोति *

८३।१ * अथ त्विति * महान् बलाबलविशेष इति महच्छब्देन प्रत्यक्षश्रुतिविरुद्धाया श्रुतेरनुमानमेव नास्तीति सूचितम्। लौकिकप्रत्यक्षानुमानवदिति दृष्टान्तेन चैतदेव प्रकटितं प्रत्यक्षविरोधे त्वनुमानस्योत्पत्तिरेव प्रतिबद्ध्यते यथोक्तं मूले तस्य ह्यनुत्पन्नपूर्वेण विषयो हत इति। पूर्वपक्षमारभते * किं तावदिति * अन्यथा ह्यविरोधे ऽप्यप्रामाण्यप्रसङ्गे सत्यप्रामाण्येन विरोधमर्यादातिक्रमात्पूर्वाधिकरणसिद्धान्तः प्रत्युद्धियेतेत्यर्थः : एतदेवोपपादयति * अनाशङ्कितेति* अतिप्रसक्तिप्रदर्शनार्थं हेतुदर्शनाद्युपन्यासः । आदिशब्देन पूर्वानुभवपारतन्त्र्यमभिप्रेतम् । खिलानि परिशिष्टानि । शाखाश्च खिलानि प्रकरणानि वा आदिशब्दोक्तानि काण्डानि तेषां ये बहवो भेदास्तैर्भिन्ने त्विति विग्रहः लिङ्गादीत्यादिशब्देन समस्तोपदेशप्रामाण्याभिधानं नामादीत्यादिशब्देनातिदेशकवचनाभिधानं श्रुतिलिङ्गाद्यात्मकश्चोपदेशो नामादिद्वारश्चातिदेशस्तदात्मका विचित्राः प्रमाणभागा येषां वेदानामिति विग्रहः । ननु विरोधाशङ्कानिराकरणेनान्यत्र प्रामाण्यस्याध्यवसातुं शक्यत्वात्कथं सर्वत्र प्रामाण्यप्रतिघातापातिरित्याशङ्क्याह *तथा हीति* ननु त्वत्पक्षे कथं भ्रान्त्यादिमूलत्ववारणमत आह *एकेनेति* एवं तावत् (स्थिततदुपेक्षणे एकमूलव्यवस्थोपेक्षणे अप्रामाण्यनिवृत्त्यर्थं मूलान्तरनिराक्रिया न शक्येत्यन्वयः।सिद्धान्तिमते स्मृत्यधिकरणसिद्धान्तः[1]) । सिद्धान्तहानिभयाद्विरोधे ऽपि वेदमूलत्वं न निराकार्यमित्युक्तमिदानीं विरोधो मूलभूतवेदनिराकरणं कर्त्तुमपि न शक्नोत्यनैकान्तिकत्वादि-

८४।३ त्याह * किं चेति * श्लोकं व्याचष्टे * यदा त्विति * कल्पितस्यापि वचनस्य शाखान्तरीयत्वेनानादराशङ्का निराकर्त्तुं सर्वशाखाप्रत्ययकर्मव्यवहारिणामिति। यदुक्तं तद्व्याचष्टे * न चेति * न च प्रमाणाभावेनाकल्पनमिति यद् दृढस्मरणोपस्थापितशब्देनोक्तं तदुपपादयति * अध्ययनवच्चेति * न शोभतइत्यनेनोभयोरपि पक्षयोरन्वयः । एतदेवोपसंहरति * तस्मादिति * अर्द्धवैशसापत्तेरपि नेह श्रुतिमूलत्वं निराकार्यमित्याह * किं चेति * एकस्यां धर्मसंहितायामर्द्धमस्यार्धान्तरेण वैशसं विरोध इत्यर्थः । अतिक्रियालक्षणश्चास्मिन्पक्षे दोषः स्यादित्याह * मूलान्तरमिति *

---

१ अयं पा० २ पु० ना०

उचितां क्रियामतिक्रम्य क्रिया ऽतिक्रिया का पुनरुचिता क्रियेत्यपेक्षायामाह * तेनेति * एकस्मिंश्च धर्मशास्त्रे क्व चित्प्रामाण्यसिद्ध्यर्थं भ्रान्त्यादिमूलानामसम्भवः क्व चिच्च बाधसिद्ध्यर्थं सम्भवो ऽङ्गीकार्य इति विरुद्धसम्भवासम्भवापादकत्वादपि स्मृतिबाधो न युक्त इत्याह * किं चेति * विरोधपक्षे बाधो बाधपक्षः पक्षे चेदबाधो न युज्यते किन्तर्हि युज्यते ऽत आह * तेनेति * केन चित्पाशुपतेन सर्वजरत्या योषितो ऽनुपभोग्यत्वात्सर्वतरुण्याश्च वृद्धे ऽप्यरुचिप्रसङ्गादर्द्धजरत्यानयने दूतः प्रेषित इति लोकप्रवादो ऽर्द्धजरतीयशब्दे नात्रोपमानत्वेनोक्तः। अस्तु तर्ह्यैकरूप्याय सर्वासामप्रामाण्यमत आह *विरुद्धत्वं चेति* विशिष्टपुरुषप्रणीतत्वं प्रामाण्यकारणत्वेनोक्तं विरोधे ऽपि निराकर्त्तुमशक्यमित्याशयः। यच्चात्र हेतुदर्शनं स्मृत्यप्रामाण्यकारणमुच्यते तदपि स्थितसिद्धान्तहान्यापादकत्वादयुक्तमित्याह * गृह्यमाणेति * उत्प्रेक्षणीयो हेतुर्यस्य धर्मशास्त्रस्य तत्तथोक्तो लोभादेः सर्ववेष्टनादिस्मृतिहेतुत्वं न केन चित्प्रमाणेनावगतं किं तूत्प्रेक्षामात्रेणोच्यते सा चाष्टकादावपि शक्या कर्त्तुमित्याशयः। एतदेव प्रपञ्चयति * रागेति * रागः प्रीतिर्द्वेषो ऽप्रीतिः मदो गर्वः उन्मादो ग्रहावेशः प्रमादालस्ये त्वन्यासक्तचनासक्तचर्थे व्याख्याते लुब्धता लिप्सातिशयः प्रत्युत प्रामाण्यहेतुकल्पनमेव सुलभमित्याह * अदुष्टे न हीति * जिज्ञासुचित्तेन मन्वादिष्वदुष्टेन निराशङ्केनेत्यर्थः। यदि चोत्प्रेक्षामात्रकल्पितेन हेतुना प्रत्यक्षश्रुतिविरोधेन वा प्रामाण्यमपह्नूयते ततो वेदस्यापि सर्वस्याप्रामाण्यं प्रसज्येतेत्याह * का चेति * न चेयमुत्प्रेक्षास्माभिरेव श्रूयते किंत्वन्यैरेव सर्वाप्रामाण्यवादिभिः कृतेत्याह * लोकायतिकेति * उत्प्रेक्षाभिनिवेशे तेषां मूर्खत्वं मुग्धत्वं भ्रान्तत्वाख्यं कारणत्वेनोक्तम्। कर्मव्यवहारः कस्मादन्यदपेक्षिते यावत्किं चिदित्यादिना सार्द्धश्लोकेन तदर्शितम्। ८५।१

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविकेयं बृहस्पतिः॥

इत्यग्निहोत्रादीनां दृष्टार्थत्वं नास्तिकैरुक्तम्। अग्नीषोमीयादिहिंसाविधेश्च न हिंस्यात्सर्वाभूतानीति निषेधेन विरोधो योजितः। अतश्चैवंस्वभावानां लौकायतिकानामवकाशदानमशेषमेव धर्ममार्गं नाशयेदित्याह * तेभ्यश्चेह इति * ईषदर्शनामशब्दः। एतदेव दृष्टान्तत्वेनोपादयति * प्रसरमिति * ननु विरोधहेतुदर्शनकारणकमप्रामाण्यमुच्यमानंतदभावे कथं चार्वाकैरापाद्यते ऽत आह * क

चिदिति * धाम स्थानं तस्मात्तेभ्यो ऽवकाशो न क्व चिद्देय इत्याह *तस्मादिति* लोकायतं नास्तिकशास्त्रं तत्र तिष्ठन्तीति लोकायतस्थाश्चार्वाकाः धर्मो नाश्यते येन युक्तिजालेन तत्संपन्नाः ।

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

इति च निषिद्धत्वात्स्मृतिप्रामाण्ये विचिकित्सा न कार्येत्या-
८६। ह * यच्चादाविति * राजाद्याज्ञाया यत्कार्यत्वेन सिद्धं निश्चितं तद्भेदे विचारितमाज्ञासिद्धमुच्यते आज्ञासिद्धं प्रमाणत्वं यस्य पुराणादिचतुष्टयस्य तत्तथोक्तं कथमविचारितसिद्धतेत्यपेक्षायामादौ न्यायनिरूपणात्प्रागनादिकालमहाजनपरिग्रहदार्ढ्यप्रसवया श्रद्धया पुराणादिचतुष्टयमाज्ञासिद्धप्रमाणत्वरूपेण सिद्धमित्युक्तम् । न चैतावता न्यायशून्यत्वं शङ्कनीयमिति दर्शयितुं* पुनर्न्यायेन साधितमित्युक्तम् * विचिकित्सायां को दोषः स्यादित्यपेक्षायामाह * सर्वमिति * पराभवभयादपि नान्तरा श्लथयितव्यमित्याह *पक्षइति* एवं तावदुत्प्रेक्षामात्रकल्पितं दृष्टार्थत्वं न वेदमूलत्वनिराकरणायालमित्युक्तमिदानीं वास्तवमपि दृष्टार्थत्वं विरोधवदनैकान्तिकत्वान्न तन्निराकरणायालमित्याह * वेदश्चेति * श्रूयमाणविरोधि वेतीवार्थे समुद्रो वा महासत्त्वैत्वइति यद्वा शब्दः । अनैकान्तिकत्वं दर्शयति * यद्वा त्विति * ननु पुरुषार्थसाधनत्वलक्षणं दृष्टार्थत्वमिह हेतुः न चावघातादीनां तदस्ति क्रत्वर्थपुरोडाशनिष्पत्त्यर्थं तण्डुलीभावादिसाधनत्वादित्याशङ्क्योदाहरणान्तरमाह * ऋत्विग्भ्य इति * ऋत्विगभिमतदक्षिणालाभहेतुत्वेन दानस्य पुरुषार्थतापि वक्तुं शक्यतेति सूचयितुम् * ऋत्विग्भ्य इत्युक्तम् * तानूनत्वं परस्परमृत्विजां यजमानस्य चाव्यभिचारार्थं कर्मारम्भे शपथकर्म अतश्च सिद्धमनैकान्तिकत्वाद् दृष्टार्थत्वस्यासाधकत्वमित्याह * यदा चेति * तस्माद्विरोधहेतुदर्शनाभ्यां न वेदमूलत्वं निराकर्त्तुं शक्यमित्युपसंहरति * तेनेति * वेदमूलत्वानिराकरणाच्च न प्रामाण्यं निराकर्त्तुं शक्यमित्याह * तस्मादिति * पूर्वपक्षमुपसंहरति * अविशिष्टमिति * ईदृशं मूलश्रुत्यनुमानद्वारमविशिष्टं सामान्यतः सर्वासां स्मृतीनां यत्पूर्वन्यायेन प्रमाणत्वं प्राप्तं तदधुना विरुद्धश्रुत्यन्तरपर्यालोचनकाले सत्यपि विरोधे युक्तमित्यर्थः । साध्याहारं सूत्रं योजयत्सिद्धान्तमारभते * एवमिति * निर्मूलस्मृत्ययोगाद्वेदमूलत्वाभावे किमन्यमूलं स्यादित्याशङ्क्याह * यात्विति * स्पष्टग्रहणेनान्यपरश्रुतिमूलत्वे ऽप्यप्रापाण्यापपत्तेस्तात्पर्यमात्रापवादो ऽय-

मिति दर्शितम् । न च सत्यपि वेदमूलत्वे स्वातन्त्र्येण प्रामाण्यं भविष्यत्यत आह * स्वातन्त्र्येणेति * अस्तु तर्हि वेदस्यैवानुमानमत ८७।२
आह * वेदेति * ननु सत्यपि प्रत्यक्षश्रुतिविरोधे किमिति नानुमीयते sत आह * वेदेति * तस्यानुमेयस्य वेदवाक्यस्य यो sर्थ औदुम्बर्यादिस्तद्विषयं प्रत्यक्षं वेदवाक्यं यावन्नोपलभ्यतइत्यर्थः । अनुमानस्यासन्निकृष्टार्थविषयत्वात्सन्निकृष्टस्य च तादूप्यतद्विपर्ययपरिच्छेदयोस्तुल्यत्वाद्विपर्ययपरिच्छिन्नस्यानानुमेयत्वे तादूप्यपरिच्छिन्नं दृष्टान्तयति *न हीति* एतदेव विवृणोति *स्मृतीनामिति* निवारणे कारणमाह * तावदेवेति * ननु प्रत्यक्षेणानुमानस्योत्पत्तिप्रतिबन्धलक्षणो बाधो भवति स्मार्त्ते तु सर्ववेष्टनादिकर्त्तव्यताज्ञानं विरोधे sप्युत्पद्यमानं कथं बाध्यते न ह्युत्पन्नस्य ज्ञानस्य मिथ्यात्वलक्षणो बाधः सम्भवतीत्याशङ्क्याह * कृत्तमूला इति * मूलप्रमाणापक्षत्वात्स्मृतिप्रामाण्यं तदभावे इदं न सम्भवतीत्याशयः । एतदेवोपपादयति * न हीति * यतो वेदाख्यान्मूलात्स्मृतिप्रामाण्यं स्यात्तद्वेदाख्यं मूलं न विद्यतइत्यर्थः । किमिति न विद्यतइत्यपेक्षिते पूर्वोक्तमेव प्रत्यक्षशास्त्रेण मूलश्रुत्यनुमानप्रतिबन्धमुपपादयितुं स्मारयति * प्रत्यक्षेति * उपपादयति * नैराकाङ्क्ष्यादिति * अयमाशयः गृहीतव्याप्तिकस्याप्यजिज्ञासोर्धूमादिदर्शने sप्यग्न्यादिज्ञानानुपलम्भात्परोक्षार्थविषयज्ञाने जिज्ञासापि सहकारिकारणमवसीयते । स्पर्शश्रुत्या चावेष्टितत्वरूपेणौदुम्बर्याः परिच्छिन्नत्वात्कीदृश्यौदुम्बर्यङ्गमिति जिज्ञासा नास्तीति जिज्ञासैवात्राकाङ्क्षाशब्देनोक्ता । कथं नैराकाङ्क्ष्यमित्याशङ्क्याह * प्रमेयमिति * यत्पर्वतादिप्रमेयं केन चिदग्निमत्त्वादिरूपेण परिच्छेद्यं भवेत्तस्य पर्वतादेस्तेन रूपेण परिच्छेदात्सावकाशप्रमाणता स्यादित्यन्वयः । अवकाशः प्रमाणस्य प्रमेये प्रवर्त्तितुं मार्गो जिज्ञासोपलक्षणो sभप्रेतः । प्रमाणं तस्मिन्प्रमेये सावकाशं स्यादिति समासार्थः । नन्वसत्यामपि जिज्ञासायां किमित्यनुमानं न प्रवर्त्तते व्याप्यज्ञानं हि व्यापकज्ञाने कारणम् । यत्तु क्व चिद्व्याप्यज्ञाने sपि व्यापकाज्ञानं तद्व्याप्यस्मरणादप्युपपत्स्यते । द्रव्यत्वस्य चानौष्ण्यव्याप्तिस्मरणो sपि तेजस्यनौष्ण्यानुमानानुपपत्तिः प्रत्यक्षेणौष्ण्यावगतौ तेजसो विपक्षत्वे सति तद्वृत्तेर्द्रव्यत्वस्य व्याप्तिभङ्गादुपपत्स्यते इह तु स्पर्शश्रुत्या वेष्टनाभावावगमे sपि सर्ववेष्टनस्मरणस्य श्रुतिकल्पकस्य सद्भावाद्विरुद्धश्रुतिदर्शनस्य चानैकान्तिकत्वेन सर्ववेष्टनश्रुत्यभावानुमापकत्वायोगात्कथं श्रुत्य-

१ शास्त्रीयस्यज्ञानस्येति २ पु० पा० ।

नुमानानुपपत्तिरित्याशङ्क्याह * तादृप्येणेति * प्रत्यक्षावगते ऽग्नौ व्याप्तिस्मरणे सत्यपि धूमज्ञानस्याग्निज्ञानजनकत्वादर्शनादजिज्ञासैव तत्रानुमानानुत्पत्तिकारणमवसीयतइति भावः । नन्वेवमपि स्मृत्या परिच्छिन्ने श्रुतेरप्रवृत्तिरिति विपरीतं कस्मान्न स्यादित्याशङ्क्याह * भिन्नेति * भिन्नयोः सन्निकृष्टविप्रकृष्टत्वरूपेण विलक्षणयोः कक्ष्ययोः प्रकोष्ठयोः स्थिते प्रमाणे तत्रैकस्मिन्प्रमेये धावतइत्यर्थः । ननु प्रत्यक्षशास्त्रस्यापि पदपदार्थपर्यालोचनादिसापेक्षत्वेनार्थपरिच्छेदविक्षेपात्तद्विरोधात्पूर्वं मन्थरस्याप्यारब्धव्यापारत्वात्कथमप्रवृत्तिरित्या-
८८।२ शङ्क्याह * तद्धीति * एकमपीत्यपिशब्दो यद्यपि शब्दार्थे व्याख्येयः । यद्यपि तन्मन्थरं प्रमाणं दूरमपि प्राप्तं बहूनपि व्यापारान् कृत्तवत् एकमेवार्थपरिच्छेदाख्यं पदमगतमर्थपरिच्छेदमात्रं न कृत्तवदित्येवकाराध्याहारेण व्याख्येयम् । तथापीतरेणादौ गतेनार्थपरिच्छेदं कृतवता जीयतइति तथापि योत्वौशब्दो ऽत्राध्याहार्यः । मन्थरत्वाविशेषात्तर्ह्यविरोधे ऽप्यप्रामाण्यापत्तेर्मर्यादातिक्रमः स्यादित्याशङ्क्याह * यत्रेति * नन्वेवं सत्यर्द्धवैशसादिदोषपरिहारार्थं विरोधे ऽपि प्रामाण्यमिष्यतामित्याशङ्क्यार्द्धवैशसं परिहर्त्तुमारभते *न हीति * यस्मादेवमेकरूप्यनियमो नास्ति तस्माच्छीघ्रप्रमाणभावाभावयोर्मन्थरप्रमाणप्रवृत्त्यप्रवृत्तिव्यवस्था न विरुद्धेति हिशब्दयोजना । एतदेवोपपादयितुं सामान्यन्यायं तावद्व्युत्पादयति * सर्वमिति * मूलमेव निकृत्यते मुखं वा विरुद्ध्यतइति च पूर्वश्लोकोक्तस्य विरोधस्यैव द्वैविध्यमुक्तम । श्रुत्या हि लिङ्गादीनां मूलं विनियोगहेतुः श्रुतिरेव छिद्यते नास्तित्वेन बोध्यते लिङ्गादिभिस्तु वाक्यादीनां मुखं विनियोजकश्रुत्यनुमानस्य द्वारं लिङ्गादि प्रतिबध्यते श्रुत्यननुमापकत्वेन ज्ञाप्यते । न च रोधारोधव्यवस्थैव न युक्तेति वाच्यमित्याह * न चेति * अवाच्यत्वे कारणमाह * उत्सर्गश्चेति * कथं तर्ह्युत्सर्गापवादयोर्व्यवस्थेत्याशङ्क्याह * विषयाविषयाविति * उत्सर्गस्य विषयमपवादस्याविषयं ज्ञात्वा बाधाभावः । अपवादस्य विषयमुत्सर्गस्याविषयं ज्ञात्वा बाध इति विवेक इत्यर्थः । व्यवस्थानभ्युपगमे तु व्यवहारविरोधः स्यादित्याह * यो हीति * यस्तु कश्चिद्वैयात्यादेवमपि व्यवहर्त्तुमारभते तस्य लोकविरोधमाह * तावदेव हीति * अनुमानस्य च प्रत्यक्षविरोधाविरोधयोर्बाधाबाध-
८९।१ व्यवस्था लोकप्रसिद्धेवेत्याह * अनुमानमिति * सामान्यन्यायमुक्त्वा प्रकृते योजयति * एवमिति * न्यायलभ्यव्यवस्थाप्रतिपादनस्यार्द्धवैशसादिदोषपरिहारोपयोगितामाह * अत इति * अर्द्धवैशस-

ग्रहणमतिक्रयार्द्धजरतीयत्वयोरप्युपलक्षणार्थम् । कथं न्यायतो व्यवस्थेत्यपेक्षायामुक्तामेव व्यवस्थां सुग्रहणार्थमनुसन्दधाति * प्रमाणत्वाप्रमाणत्वइति * अतश्चैकरूप्यमेवायुक्तमित्याह * तस्मादिति * सिद्धान्तमुपसंहरति * तेनेति * ननु मृगतृष्णानुमानादेः सिद्धवस्तुविषयत्वेन वैकल्पिकतया विरोधपरिहारासम्भवाद् बाधो युक्तः। स्मृतेस्तु कार्यविषयतया विकल्पेनोभयानुग्रहसम्भवादत्यन्तबाधो न युक्त इत्याशङ्क्य ते * विकल्प इति * परिहरति * उच्यत इति * पूर्वार्द्धेनात्यन्तबाधादपि विकल्पः पापीयानित्युक्तमुत्तरार्द्धेन त्वङ्गीकृते ऽपि विकल्पे स्मृतेरत्यन्तबाधो ऽपरिहार्य इत्युक्तमिति विवेकः । विकल्पस्य सुखाभ्युपगम्यत्वाभावोक्त्या तुल्यबलयोरगत्या तदङ्गीकरणमिह तु स्मृतेरत्यन्तबाधेन गत्यन्तरसम्भवाद्विकल्पाङ्गीकरणमत्यन्तमन्याय्यमिति सूचितं तत्ताबद्वचाचष्टे * तुल्यबलेति * कक्षाभ्यां विलक्षणाभ्यामन्तरितेन विलक्षणीकृतेन श्रुतिस्मृत्योः प्रामाण्येन विषमत्वेन शिष्टयोरवगतयोः श्रुतिस्मृत्योर्विकल्प इति विग्रहः । किमुतेत्यनेनोक्तमतुल्यबलविकल्पस्यात्यन्तान्याय्यत्वमुक्तमुपपादयति * तथा हीति * न च स्मृतिरपि निरपेक्षा येन तुल्यबला स्यादित्याह * स्मृतेरिति * ननु सापेक्षत्वे ऽप्यनुमीयमानाया श्रुतेः प्रत्यक्षया सह तुल्यबलत्वाद्विकल्पो भविष्यत्यत आह * पराधीनेति * यदि विरोधे ऽपि श्रुतिरनुमीयेत ततः पराधीनप्रमाणत्वाच्छ्रुत्या बाधितापि पुनरुज्जीवितुं क्षमा स्यान्न त्वेतदस्तीत्युक्तम् * न प्रमाणपदे स्थितेति * श्रुत्याख्यं प्रमाणं पद्यते गम्यते ऽनेनेति श्रुत्यनुमानं प्रमाणपदं तत्त्वमस्थिता अननुमितश्रुतिकेत्यर्थः । विकल्पस्याष्टदोषत्वमुपपादयितुमारभते * तुल्यकक्ष्येति * तुल्या समाना कक्षा ययोस्ते तुल्यकक्षे तयोर्विकल्प इति विग्रहः व्रीहियवशास्त्रयोर्नियमार्थत्वेनान्यनिवृत्तिपर्यन्तत्वाद् व्रीहिशास्त्रप्रामाण्ये यवप्रयोगानुपपत्तेर्यवशास्त्रप्रामाण्ये च व्रीहिप्रयोगानुपपत्तेरितरेतराप्रामाण्यकल्पनं विना विकल्पो न युक्त इत्यर्थः । ततः किमिति चेदत आह * प्रमाणस्येति * कीदृशं दोषद्वयमित्यपेक्षायामाह * प्रमाणत्वमिति * प्रतीतप्रमाणत्वापह्नवः प्रतीतिविरोधादेव दोष इत्यर्थः। अप्रतीताप्रामाण्यकल्पनं च द्वितीयो दोष इत्याह * तथेति * सन्देहविपर्ययथोर्दोषजन्यत्वाद्वेदे च तदभावात्प्रामाण्याभावरूपमेवाप्रामाण्यं वाच्यं तस्मिंश्च प्रामाण्योपलम्भाभावः प्रमाणमिति तच्छब्देन दर्शितम् । तस्य प्रमाणस्याप्रमाणत्वमित्यर्थः । कथं न प्रामाण्योपलम्भस्याभाव इत्यपेक्षिते * प्रामाण्योपलम्भस्य भावे ९०।१

सतीत्युक्तम् * यत्परिकल्पत इति यच्छब्दस्य क्रियाविशेषणत्वात्सो ऽप्यप्रमाणत्वकल्पनरूपो दोषः स्यादित्यनेनान्वयः । प्रमेयवचनो ऽर्थशब्दः । प्रमाणप्रमेययोः प्रामाण्योपलम्भाभावात् प्रमाणत्वयोः परस्परं विपर्ययाद्विरोधादित्यर्थः । कल्पिताप्रामाण्यस्य च शास्त्रान्तरस्य प्रामाण्योपजीवनं विना तदर्थानुष्ठानायोगात्तदर्थानुष्ठानकाले तस्मिन्नेव शास्त्रान्तरे परं दोषद्वयं स्यादित्याह * अङ्गीकृत्यापीति * कीदृशमित्यपेक्षिते कल्पिताप्रामाण्यत्यागं तावद्दोषमाह * यदभावप्रमाणत्वमिति * प्रामाण्योपलम्भाभावः प्रभाणं यस्याप्रमाणत्वस्य तत्तथोक्तमेतस्याप्रमाणत्वस्येत्यर्थः । निराकृतप्रामाण्योपजीवनं च द्वितीयो दोष इत्याह * प्रत्यक्षमिति * शास्त्रान्तरवर्जनाश्रयणयोरुपपादितं दोषचतुष्टयमुपसंहरति * एवमिति * वाक्यान्तरे ऽप्येवं दोषचतुष्टयं योज्यमित्याह * एत एवेति * द्वितीये ऽपि वाक्ये प्रतीतप्रामाण्यापह्नवे ऽनुपलब्धे चाप्रामाण्ये कल्पितस्य चाप्रामाण्यस्य त्यागे निराकृतस्य च प्रामाण्यस्योपजीवने प्रकल्पितइत्यर्थः । यद्यष्टदोषो विकल्पः कस्माद् व्रीहियवादिष्वाश्रीयते ऽत आह * एवमिति * गत्यन्तराभावमेवोपपादयति * व्रीहीति * ततः किमितिचेदत आह * द्वाभ्यामिति * अश्वमुखीभ्यां किंनरीभ्यामित्यर्थः । एकस्मिन् श्रुत्यर्थे बुद्धिमुपसंहर्त्तुमपश्यन्तं श्रोतारं प्रत्युभयोः श्रुत्योरप्रामाण्यं प्रसज्यतेत्यर्थः । अस्तु तर्ह्युभयाप्रामाण्यमेवात आह * तत्रेति * किमत्र गत्यन्तरमित्यपेक्षायामाह * एकस्य चेति एकाप्रामाण्यमात्राद्धृतिसम्भवे न द्वयोरप्रमाणता युक्तेति साध्याहारं योज्यम। कस्मान्न युक्तेत्याशङ्क्याह * सिद्ध इति * एकं विनाशयितुं शीलं एषां चानेकन्तेषाम्मध्ये सर्वनाशे समुत्पन्ने ह्यर्द्धं त्यजति पण्डित इति अयं लोकप्रवादः प्रसिद्ध इत्यन्वयः । भवति च प्रस्तुतो ऽर्थो ऽस्य प्रवादस्य विषय इत्याह * सचायमिति * उभयोः श्रुत्योर्यावर्थौ तयोरपरिग्रहादित्यर्थः । ननु मिश्रैर्यागादुभयोरनुग्रहो भविष्यत्यत आह * मिश्रैर्वेति * अप्यर्थे वाशब्दः मिश्रैरपि यागं कुर्वाणस्योभयोः श्रुत्योर्नाश इत्यनुषङ्गः । ननु विधिस्त्वेकश्रुतित्वादित्यनेन न्यायेन सर्वाङ्गोपसंहारिणा प्रयोगवचनेन व्रीहियवयोः समुच्चयावगमात्कथं मिश्रविधेरदर्शनमत आह * नियमार्थे हीति * अप्राप्तविधिगोचरप्रयाजादिविषयो ऽसौ न्यायः । व्रीहियवयोस्तु नियमविधिगोचरत्वात्समुच्चयो न युक्त इत्याशयः । ननु समुच्चये ऽपि नियमफलस्य नित्यत्वस्य सिद्धेरविरोध इत्याशङ्क्याह * प्राप्ते चेति * पुरोडाशाक्षेपादेव प्राप्तेषु व्रीह्यादिषु द्रव्यान्तरप्रसक्तिनिमित्तानियत- ९।१।२

त्वनिवृत्त्यर्थनियतत्वफलस्य नियमस्य समुच्चयानुपपत्तिरित्याशयः। ननु श्रुतव्रीहियवातिरिक्तगोधूमादिनिवृत्त्यापि नियमोपपत्तेर्न व्रीहियवयोरितरेतरनिवर्त्तकत्वमित्याशङ्क्याह * व्रीहय इति * समर्थः पदविधिरिति पदमात्रविधेः सामर्थ्यापेक्षत्वाद् व्रीह्यादिप्रातिपदिकस्य च यवादिसापेक्षत्वेन व्याघातापत्तेर्विभक्त्यन्वययोगान्निरपेक्षाणामेव व्रीहियवानां तृतीयया करणत्वप्रतीतेर्मिश्रत्वं न युक्तमिति भावः। किं चादृष्टार्थत्वे सत्यनिर्णीतोपायपरिमाणत्वेन प्रधानस्यैकाङ्गविधानेन नैराकाङ्क्ष्याप्रतीतेः समुच्चयः स्यात् व्रीह्यादेस्तु प्रदेयप्रकृतित्वेन दृष्टार्थत्वादेकविधानेन नैराकाङ्क्ष्यावगतेः समुच्चयो न युक्त इत्यभिप्रायेणाह * नैवेति * यथाश्रुतैर्निरपेक्षतया प्रदेयप्रकृतित्वेन श्रुतेरित्यर्थः। तस्मादुभयार्थापरिग्रहवन्मिश्रयागे ऽप्युभयनाशः स्यादित्युपसंहरति * एवमिति * अप्रतिपत्तिरपरिग्रहः एकस्य चाप्रमाणत्वमित्यादिना पर्यायेणैकैकाप्रामाण्याश्रयणं नाम यद्गत्यन्तरमुपपादितं तदुपसंहरति * तेनेति * एतच्चैकैकाप्रामाण्यमसम्भवात् क्व चिदङ्गीक्रियते न तु दोष एव न भवतीति शङ्कनीयमित्याह * सेयमिति * येयमेकैकाप्रमाणता द्वयोरप्यनवस्थिता सात्यन्तमन्याय्येत्यर्थः। कथमन्याय्येत्यपेक्षायामाह * अव्यवस्थेति * अयुक्तत्वे हेतुमाह * सर्वत्रैव हीति * एवं तर्ह्यप्रतीयमानमपि गत्यन्तरं किं चित् व्रीहियववाक्ययोरपि मृग्यतां न त्वत्यन्तान्याय्यविकल्पाङ्गीकरणं युक्तमित्याशङ्क्याह * तदेतदिति * श्रुतिस्मृत्योस्त्वेकरूपत्वे व्यवस्थितं चिह्नमस्तीत्याह * श्रुतीति * किं तदित्यपेक्षायामाह * स्वरूपेणेति * ततः स्वरूपादित्यर्थः। अन्यशब्दस्य नित्यसापेक्षत्वात्समासाविघातः। कथमनयोर्व्यवस्थाकारणत्वमित्याशङ्क्याह * यो यस्येति * न च श्रुतेः स्वरूपाश्रयस्य प्रामाण्यरूपस्य धर्मस्य बलवत्कारणान्तरं बाधकमस्तीत्याह * न चेति * ततश्च स्मृतेः स्वरूपाश्रयस्याप्रामाण्यरूपस्य धर्मस्य बाधकं मूलश्रुत्यनुमानं प्रत्यक्षश्रुतिविरोधान्नास्तीत्यर्थादुक्तं भवति। अन्यापेक्षस्य तु स्मृतेः प्रामाण्यरूपस्य श्रुतिरेव बाधिकास्तीत्याह * स्मार्त्तस्येति * ततश्च श्रुतेरन्यापेक्षस्यास्याप्रामाण्यरूपस्य धर्मस्य कारणाभाव एव बाधको ऽस्तीत्येतदप्यर्थादुक्तं भवति। कथं श्रौतप्रत्ययस्य स्मार्त्तप्रत्ययाद् बलवत्त्वमित्याशङ्क्याह * प्रत्यक्षे चेति * सन्निकृष्टविप्रकृष्टार्थत्वादपि श्रुतिस्मृत्योर्बलाबलव्यवस्था प्रतीयतइत्याह * श्रुतिलिङ्गेति * ननु श्रौतप्रत्ययस्य समकालमेव स्मार्त्तप्रत्ययोदयात्कथं सन्निकर्षविप्रकर्षावित्याशङ्क्याह * स्मृत्येति * प्रतीतिमात्रं स्मृत्या तदा क्रियते न श्रुतिवत्प्रामि- ९२।१

तिरित्यर्थः । क चिद्विपरीतपाठस्तत्र । प्रमीयतइति भावे लकारः । यावत् स्मृत्या श्रुत्यनुमानेन प्रमाणीभूयते भवितुमारभ्यते तावच्छ्रुत्यार्थ एव प्रतीयतइत्यर्थः । नन्वर्थपरिच्छेदाय प्रकृता स्मृतिः पश्चादपि तावदर्थपरिच्छेदं करिष्यतीति किमिति विकल्पो न स्यादित्याशङ्क्यापवादसिद्ध्यर्थं जिज्ञासाविरहेणैकप्रमाणपरिच्छिन्ने ऽर्थे प्रमाणान्तराप्रवृत्तिं पूर्वोक्तामेव विकल्पनिरासार्थं स्मारयति * विरुद्धेति * प्रमेयाकाङ्क्षानिराकरणेन प्रमात्रा आकाङ्क्षैवं निराकृता तादृप्यपरिच्छिन्ने ऽपि मन्थरं न प्रवर्तते किमुत वैपरीत्यपरिच्छिन्नइत्याह * न चेति * ननु श्रुत्यर्थपरिच्छेदकाले यद्यपि स्मृत्यार्थो न परिच्छिद्यते तथापि श्रुतिस्तावदनुमीयते ततश्चानुमितायाः श्रुतेः प्रत्यक्षया सहाविशेषात्किमिति विकल्पो न स्यादित्याशङ्क्याह * स्मृत्या चेति * स्मार्त्तार्थपरामर्शमात्रं तदोत्पद्यते न श्रुत्यनुमानमित्यर्थः । नन्वन्यतः परिच्छिन्नो ऽप्यर्थो सत्यामपि जिज्ञासायां स्वसामर्थ्यस्मृत्यापि पश्चाच्छेत्स्यते ऽत आह * किं कर्त्तव्यमिति * यदि चैवमभविष्यत्ततः सन्निकर्षविप्रकर्षाविशेषाभावाद् बलाबलव्यवस्था नाभविष्यदित्याह * युगपदिति * यदि च श्रुत्यर्थपरिच्छेदसमकालमेव स्मृत्या स्वमूलं स्मृतिरनुमीयेत ततो ऽर्थविप्रकर्षे ऽपि श्रुत्यवष्टम्भात् बलाबलव्यवस्था न स्यान्न त्वेतदस्तीत्याह * यद्वेति * तस्मिन्नेव क्षणे मूलं यदि कल्पयेदिति यदिशब्दो ऽध्याहार्यः यद्वेति वा यच्छब्द एव यदिशब्दार्थे व्याख्येयः यतस्तु स्मृत्या गृहीते ऽप्यर्थे मूलान्तरनिषेधयुक्तिपर्यालोचनापेक्षत्वाच्चिरेण श्रुतिकल्पनेति तु शब्दाध्याहारेण व्याख्येयः । ननु श्रुत्यनुमानासम्भवे ऽपि स्वतन्त्रैव स्मृतिः प्रतिष्ठास्यतीति विकल्पो ऽपरिहार्य इत्याशङ्क्याह * स्मृतिरिति * अतो ऽस्ति श्रुतिस्मृत्योरेकरूपत्वे व्यवस्थितं चिह्नमित्युपसंहरति * तदपेक्षेति * ततश्चेत्यस्मिन्नर्थे पुनः शब्दः । एवं विकल्पस्याष्टदोषत्वान्न तावत्स्वाभ्युपेयतेति पूर्वार्द्धं व्याख्याय पाक्षिके चाप्रमाणत्वे स्मृतयः सुनिराकरा इत्युत्तरार्धं व्याख्यास्यन्विवेकार्थं पूर्वार्द्धोक्तं बाधप्रकारमुपसंहरति * एष तावदिति * उत्तरार्द्धं व्याचष्टे * द्वितीयेनेति * विकल्पपदवीं गतायाः स्मृतेरत्यन्तबाध इति द्वितीयः प्रकार इत्यर्थः । कथमित्यपेक्षायामापन्नापाक्षिकं बाधमित्युक्तम् । अत्रैवार्थे ऽनारब्धव्याख्यानमपि भाष्यं प्रसङ्गाद्विवेक्तुं योजयति * तदर्शयतीति * नासति व्यामोहविज्ञानइत्यादि भाष्येणैको बाधप्रकार उक्तः । विकल्पं त्वित्यादिना द्वितीय इति विवेकः । पाक्षिकबाधापत्तावपि कथमात्यन्तिको बाध स्याशङ्क्याह

९३।२

* तदा चेति * भाष्योक्तः श्रुतिप्रमाणपक्षस्तदाशब्देन परामृष्टः। किं तु तदानीं स्मृत्यप्रामाण्यकल्पनावेलायां सा स्मृतिरश्रुतिमूलावधार्यते यतस्तस्याः प्रमाणत्वं श्रुतिमूलत्वकारितमित्यन्वयः। ननु श्रुतिमूलत्वाभावे ऽपि स्वातन्त्र्येण प्रामाण्यसम्भवात्कथमत्यन्तबाध इत्याशङ्क्याह * श्रुतीति * विप्रलम्भादेर्निराकृतत्वात्कथमापत्तिरित्याशङ्क्य निराकृतेत्युक्तम्। स्वातन्त्र्यनिरासायाविगानेत्युक्तम्। नित्यत्वद्वारेत्यनेन नित्यत्वं विना स्वातन्त्र्यं न सम्भवतीत्युक्तम्। नन्वेवमपि प्रमाणान्तरमूलतया प्रामाण्यं भविष्यतीत्यत आह * श्रुतिमिति * स्मृतेरतीन्द्रियार्थविषयत्वात्प्रमाणान्तरं मूलं न सम्भवतीत्याशयः। श्रुतेरिवेति पूर्वोपन्यस्तं वैधर्म्यदृष्टान्तं विवृणोति * व्रीहीति * अयमाशयः सन्देहविपर्ययोस्तावद्दोषजन्यत्वाद्वेदे च तदभावादसम्भवः। विज्ञानानुत्पत्तिलक्षणमप्रामाण्यं संवेदनविरोधादयुक्तं, न च यथा सामान्यशास्त्रादेरापाततो विशेषशास्त्राद्यवरुद्धे ऽपि विषये प्रवृत्तिप्रतीतावपि विरोधपरिहारार्थापत्त्या विशेषशास्त्राद्यनवरुद्धे ऽर्थे तात्पर्यावसायात्तात्पर्यावधारणसहकृतेन सामान्यशास्त्रादिना तत्रैव विषये परिच्छेदफलात्मकविशिष्टज्ञानाख्यं विज्ञानमुत्पाद्यतइति विशेषशास्त्राद्यवरुद्धे ऽर्थे विज्ञानमुत्पत्तिलक्षणमप्रामाण्यं जातं तथात्रापि यवशास्त्रस्य यवव्यतिरिक्तद्रव्यमात्रनिवृत्त्यर्थत्वप्रतीतावपि व्रीहिशास्त्रपर्यालोचनया व्रीहिव्यतिरिक्तद्रव्यान्तरनिवृत्तौ तात्पर्यावसायात्तदवधारणसहकृतस्य यवशास्त्रस्य तत्रैव विज्ञानोत्पादकत्वाद् व्रीहिनिवृत्त्यंशे विज्ञानानुत्पत्तिलक्षणमप्रामाण्यं भविष्यतीति वाच्यम्। तथा सति मिश्रत्वस्य निराकर्तुमशक्यत्वात्। किञ्च व्रीहियवशास्त्रयोर्निरपेक्षव्रीहियवविधानत्वे ऽपि प्रयोगभेदेनोभयोर्निरपेक्षसाधनत्वोपपत्तेर्विनियोगावस्थायां विरोधाभावान्नैकस्याप्यप्रामाण्यं कल्प्यं प्रयोगावस्थायां त्वेकोपादानेनैव कार्यसिद्धेरितरोपादानानर्थक्याद्विरोधः स्यात्। न चानयोर्विनियोगविध्योः प्रयोगविधानार्थत्वमस्तीति विरोधाभावाद्वस्तुतो नास्त्येवाप्रामाण्यम्। प्रयोगविधेस्तु समस्ताङ्गप्रधानशास्त्रपर्यालोचनपूर्वकत्वेन व्रीहियवशास्त्रालोचनया व्रीहयो वा यवा वा प्रयोगभेदेनोपादेया इत्येवं रूपस्यैव कल्प्यत्वान्नाप्रामाण्यशङ्का तस्माद् व्रीहियवशास्त्रयोः प्रयोगविधानार्थत्वाभावे ऽपि स्वविषयानुष्ठापकत्वस्य सर्वविधिसाधारणस्य स्वरसतः प्रतीयमानस्य निराकर्तुमशक्यत्वान्निरपेक्षव्रीहियवानुष्ठापकत्वस्य चैकस्मिन्प्रयोगे विरोधादवश्यमेकस्यानुष्ठापकत्वे शास्त्रान्तरस्याननुष्ठापकत्वमङ्गीकार्यं दृष्टं चैकस्यापि विधेः सामर्थ्यो-

यपेक्षया देशकालपुरुषविशेषापेक्षमनुष्ठापकत्वमननुष्ठापकत्वं चेति न कश्चिद्विरोधः अतश्चानुष्ठापकयोरपि व्रीहियवशास्त्रयोरेकप्रयोगकाले शास्त्रान्तरस्यौदासीन्ये ऽनुष्ठानाख्यफलापहारादारोपितमेव प्रामाण्याभावरूपमप्रामाण्यमिति प्रयोगान्तरकाले वा स्तावनोज्जीवितेन तत्प्रामाण्येन बाधो युक्त इति । ननु स्मृतिप्रामाण्यस्यापि प्रयोगान्तरवेलायामुज्जीवनसम्भवात्कथमत्यन्त-
९४।२ प्रतीघात इत्याशङ्क्याह * नन्विति * ननु प्रयोगान्तरकाले तस्याः स्मृतेः श्रुतिमूलत्वं कल्पयिष्यते ऽत आह * न हीति * ननु प्रथमप्रयोगकाले स्मृतेर्भ्रान्त्यादिमूलकल्पने माभूत्प्रयोगान्तरकाले प्रामाण्योज्जीवनं प्रागगृहीतविरुद्धश्रुतिकेन तु श्रुतिमूलत्वकल्पनेन स्मृत्यनुसारात्प्रथमप्रयोगे कृते प्रयोगान्तरकाले विरुद्धश्रुतिग्रहणे ऽप्यनुमितायाः श्रुतेः प्रत्यक्षया सहाविशेषाद्विकल्पो दुर्वार इत्याशङ्कते * आहेति । एतस्येति * सर्वदा प्रतिघातस्येत्यर्थः । यदि तु सर्वैः श्रुतिरेव प्रथमं ग्रहीतव्या न स्मृतिरिति नियमः स्यात्तथापि पौर्वापर्यनिबन्धनः सर्वान्प्रति बलाबले विशेषः स्यान्न त्वेतदस्तीत्याह * न चेति * नन्वस्तु तर्हि प्रथमश्रुतिग्राहिपुरुषापेक्षो ऽयं स्मृतिप्रामाण्यापवाद इत्याशङ्क्य पौर्वापर्यस्य बलाबलकारणत्वाभावे दृष्टान्तमाह * आद्यइति * तत्प्रथतीति पाठे येन पुरुषजातेनेति वक्तव्यं स्वपरशाखाविहितानां च सत्यपि पौर्वापर्ये कल्पसूत्रकारैरेवं प्रातरूपोदयं व्युषित उदिते वेत्यादिवदद्धिर्विकल्पाङ्गीकरणात्पौर्वापर्यस्य बलाबलकारणत्वं नास्तीत्याह * स्वशाखेति * जैमिनेरपि न चैकं प्रतिशिष्यतइति सर्वशाखोपसंहाराभिधानात्पौर्वापर्यस्य बलाबलकारणत्वमनभिमतमित्यागमविरोधो भवत्पक्षे स्यादित्याह * स-
९५।१ र्वेति * पौर्वापर्यस्य बलाबलकारणत्वाभावमुपसंहरति * तस्मादिति * मातापितृप्रणीतोपदेशवत्पौर्वापर्यश्रवणमनाश्रित्य सर्वान्पूर्वश्राविणः पश्चाच्छ्राविणश्च पुरुषान्प्रति निर्विचिकित्समेव प्रामाण्यमान चैकं प्रतिशिष्यतइत्यनेन न्यायेन जिज्ञासुभिरभ्युपगन्तव्यमित्यन्वयः । पौर्वापर्यश्रवणानाश्रयणहेतुत्वेन बलाबलापर्यालोचनात्कोबलाबलहेतुत्वे हि सति पौर्वापर्यश्रवणमाद्रियेत तस्य तुनित्यावस्थितासु शाखासु वस्तुतः पौर्वापर्यरहितास्वात्मीयाशक्तिमात्रकारितत्वाद् बलाबलहेतुत्वं नास्तीत्यर्थः । आत्मीयाशक्तिमात्रकारितस्य पौर्वापर्यस्य बलाबलहेतुत्वाभावे दृष्टान्तत्वेनैकवाक्यगतपूर्वोत्तरवर्णवदित्युक्ते वर्णानां प्रत्येकमप्रत्यायकत्वेनार्थप्रतीत्यर्थतया तत्पौर्वापर्यस्याशक्तिमात्रकारितत्वाभावेनादृष्टान्तत्वात्पदवदिति दृष्टान्तान्तरमु-

"रूं, वेदवाक्यगतपदपौर्वापर्यस्य वेदो वा प्रायदर्शनादित्यत्र बलाबलहेतुत्वाभिधानाल्लौकिकवाक्यगतपदपौर्वापर्यमत्र दृष्टान्तः । वर्णपौर्वापर्यमपि बलाबलहेतुर्न भवतीत्येतावता दृष्टान्तितम् । पौर्वापर्यस्य च बलाबलहेतुत्वे तस्यानवस्थितत्वेन बलाबलस्यानवस्थितत्वेन प्रामाण्यानवस्थानं स्यादित्याह * अन्यथा हीति * पौर्वापर्यस्य च बलाबलकारणत्वाभावे स्रोत्प्रेक्षामात्रेण विकल्पभ्रान्त्यादिमूलत्वकल्पनया स्मृत्यप्रामाण्यमङ्गीक्रियमाणमर्द्धवैशसपरिहारार्थमविरोधे ऽप्यापादयेदित्याह * इत्थं चेति * ऐकरूप्यमेवोत्प्रेक्षितुं युक्तमित्याह * सर्वं वेति * प्रथमं स्मृतिग्रहणे ऽपि पश्चाद्विरुद्धश्रुतिदर्शनेन पूर्वोत्पन्नमूलश्रुत्यनुमानबाधाद्विकल्पे सर्वदा प्रामाण्यं प्रतिहन्येतेति परिहरति * उच्यतइति * अत्रैव दृष्टान्तमाह * यो हीति * द्वात्रिंशत्कृष्णलरजतपरिमाणं कार्षापणः कूटाकूटविलक्षणविवेकज्ञानेन जनिता व्युत्पत्तिः कूटत्वनिश्चयो यस्य स तथोक्तः । ननु श्रुत्यर्थपरिग्रहकाले मूलश्रुत्यनुमानबाधो ऽपि पूर्वं स्मृत्यर्थपरिग्रहकाले बाधाभावाद्विकल्पो भविष्यत्यत आह * न चास्येति * ननु द्वितीयप्रयोगे विरुद्धश्रुतिदर्शने ऽपि पूर्वोत्पन्नस्य मूलश्रुत्यनुमानस्य प्रतिबन्धायोगादनुमितायाश्च श्रुतेरत्यन्तबाधानुत्पत्तेर्दुर्वारो विकल्पः स्यादित्याशङ्क्ते * ननु चेति * अप्रमितस्यार्थस्यानुष्ठातुमशक्यत्वादेकप्रयोगकालोत्पन्नायाश्च प्रमितेः प्रयोगान्तरकाले विनष्टत्वात्तन्मूलस्य स्मरणस्यानुवृत्तावपि मूलप्रमाणालोचनं विना निश्चायकत्वायोगात्प्रतिप्रयोगमनुष्ठेयपदार्थविषयप्रमाणालोचनापेक्षणाद्वेष्टितौदुम्बर्यङ्गमिति प्रथमप्रयोगवेलायां स्मृतिमूलस्मृत्यनुमानान्निश्चिते ऽपि पुनः प्रयोगान्तरवेलायां क्रीद्दश्यौदुम्बर्यङ्गमित्याकाङ्क्षायां स्मृत्या श्रुतिमनुमिमानो विरुद्धश्रुतिदर्शनान्निवार्यतइत्यननुमितमूलायाः स्मृतेरत्यन्तबाधो विकल्पाङ्गीकरणे प्रसज्येतेति परिहरति * नैतदेवमिति * एतदेव याज्ञिकाचारेण द्रढयति *यदि हीति* ननु सङ्कर्षे व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेताव्रीहिभ्य इति वाक्यमुदाहृत्य किमनेनाग्रयणाभ्यासो विधीयते दर्शपूर्णमासयोर्वा द्रव्यनियम इति सन्दिह्याग्रयणप्रकरणे पाठाद्यजेस्तद्विषयत्वप्रतीतेर्व्रीह्याग्रयणेनेष्ट्वा पुनर्व्रीह्याग्रयणेन यजेतेत्याग्रयणाभ्यासविधिरयमिति व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्य इत्याग्रयणाभ्यासः प्रकरणादित्यनेन सूत्रेण पूर्वपक्षयित्वाभ्यासविधौ प्राप्ते कर्मण्यभ्यासद्रव्यरूपानेकगुणविधानेन वाक्यभेदापत्तेः कर्मान्तरविधौ च गौरवापत्तेः । प्रकृताग्र- ९६।१

यणप्रकृतित्वेनोपस्थापिते दर्शपूर्णमासाख्ये कर्मणि व्रीहियवयोर्विक*
ल्पेन प्राप्तयोर्यवव्रीह्याग्रयणावाधिव्यवस्थाविधानार्थमेतद्वाक्यमिति
दर्शपूर्णमासयोर्वान्तरालसंयोगान्न ह्यन्यत् प्रत्यक्षं विद्यतइति सूत्रेण
सिद्धान्तयिष्यमाणत्वात्कथं * यावज्जीवं तैरेव यजेतेत्युक्तम् * उ-
च्यते । अग्निहोत्री वै नानादयिता तस्याः पयसाजुहुयादित्याग्रयणे-
ष्टिस्थाने अग्निहोत्रस्थाने अग्निहोत्राविशेषविधानात्तत्पक्षाश्रयणेनेह
उक्तमित्यदोषः अव्यवस्थितविकल्पोऽपि व्रीहियवयोरकृताग्रयण-
विषयतयैव व्याख्येयः । एतदेवोपसंहरति * नेति * यद्यपि सम-
स्ताङ्गोपेतप्रधानविषयप्रयोगशास्त्रालोचनेनानुष्ठानं प्रवते तथापि
तस्य प्रत्येकपदार्थावधारणपूर्वकत्वात्तस्य च विनियोगशास्त्राधीनत्वा-
त्तदालोचनमिहोक्तम् । प्रयोगशास्त्रस्य त्वनुष्ठानमात्रफलत्वेनाङ्गाङ्गि-
भावे प्रमाणत्वाभावात्तदभिप्रायः प्रमाणशब्दो न युज्यते । यद्यात्य-
न्ताप्रामाण्यवादिमते पौर्वापर्यानवस्थानात्प्रामाण्यानवस्थानमुक्तं तद-
स्मिन्नपि विकल्पवादिमते प्रथमश्रुतिग्रहणे ऽत्यन्तस्मृत्यप्रामाण्या
ङ्गीकरणेन पर्यनुयोगसाम्याद्विकल्पवादिना वा पौर्वापर्यानादरेत्य-
न्ताप्रामाण्यवादिनापि तदनादरेण परिहारसाम्यादवाच्यमित्याह
* यद्येति * पर्यनुयोगसाम्यमुपपादयति * यदा हीति * ननु
पर्यनुयोगसाम्ये ऽपि प्रथमं स्मृतिग्रहणे विरोधादर्शनेन मूलश्रुतेर-
वश्यकल्प्यत्वात्कल्पनायाश्च श्रुतेरत्यन्तबाधायोगात्पौर्वापर्यानादरेत्य-
न्ताप्रामाण्यसिद्धेः परिहारसाम्यं नास्तीत्याशङ्क्याह * कालान्तरे
ऽपीति * कल्पनाया अपि श्रुतेर्विरुद्धश्रुतिदर्शने सत्यभावावधारणस्यो-
क्तत्वादत्यन्ताप्रामाण्यवादिमते ऽपि पौर्वापर्यमकारणं तदनङ्गीकृत-
मेव तु पौर्वापर्यस्य बलाबलहेतुत्वमापाद्य विकल्पवादिना निरस्त-
मित्याशयः । किं च प्रथमं स्मृतिग्रहणे ऽपि पुरुषान्तरदृष्टया
श्रुत्या तदानीमपि मूलश्रुत्यनुमानबाधाद्विकल्पो न युक्त इत्याह
पूर्वेति ननु पुरुषान्तरस्य विरुद्धश्रुतिदर्शने ऽपि स्वयमदर्शनात्क-
थं बाधो ऽत आह * पुरुषान्तरेति * एवं तर्हि व्रीहियवश्रुत्योरपि
पुरुषान्तरबाधेनाङ्गीकृतप्रामाण्यमपि पुरुषं प्रत्यप्रामाण्यापत्तेः । स-
र्वान्प्रत्यप्रामाण्यं प्रसज्येतेति शङ्कते * यवेति * श्रुतेरननुष्ठापक-
त्वमात्रमप्रामाण्यं, न च पुरुषान्तराननुष्ठापकत्वेन पुरुषान्तरं प्रत्यनु-
ष्ठापकत्वं बाध्यते । न चैवं पुरुषव्यवस्थया विकल्पानापत्तिः शङ्क-
नीया पठ्यमानत्वाविरोधेन प्रमाणीकृतयवश्रुतिकमपि पुरुषं प्रति
९७।२ कालान्तरे यवश्रुतेः प्रामाण्याभ्युपगमादिति परिहरति * उच्यत-
इति * प्रतियोगित्वेन व्रीहिश्रुतेरपि बुद्धिस्थत्वात्तयोरिति द्विवच-

नम् । ननु स्मृत्यनुमानाया अपि श्रुतेः पुरुषान्तरगतविरुद्धश्रुतिदर्शनेनानवष्टापकत्वरूपं निमज्जनमात्रं करिष्यते नाभावधारणमित्याशङ्क्याह * स्मृतिरित्यादि * सर्वेषां प्रथमस्मृतिग्रहणे निष्प्रतिबन्धानुमानसिद्धः पश्चाद्विरुद्धश्रुतिदर्शने सति निमज्जनमात्रकल्पनं भवेदपि केषां चित्तु प्रथमश्रुतिग्राहिणां स्मृतिमूलश्रुत्यभावावधारणे सत्येकस्याः श्रुतेः सदसत्त्वविरोधात्पुरुषान्तरगतमपि श्रुत्यनुमानं मिथ्येति निश्चीयतइत्याशयः । सर्वदा तावतां पुंसामभावात् न स्मृतिरप्रामाण्येन मुच्यतइत्याकारप्रश्लेषेणान्वयः । कर्त्तरीयन्तृतीया । अप्रामाण्यं स्मृतिमात्मनः सकाशान्न मुञ्चतीत्यर्थः । प्रामाण्येनेति तु पाठे यदि सर्वदा तावतां भावः स्यात्ततो न प्रामाण्येन मुच्यते न त्वेतदस्ति । प्रथमश्रुतिग्राहिणामपि केषां चिद्भावादिति व्यवधारणाकल्पनया योज्यम् । अभ्युपगमवादमात्रं चैतत्परमार्थतस्तु सर्वेषामपि प्रथमश्रुतिग्रहणे पश्चात्तेन विरुद्धश्रुतिदर्शनेन पूर्वोत्पन्नस्मृतिमूलश्रुत्यनुमानमिथ्यात्वनिश्चयाद्विकल्पो न युक्त इत्याह * अप्रामाण्यपदं चेति * पारतन्त्र्यमप्रामाण्यपदम् । ननु सत्यपि विरुद्धश्रुतिदर्शने विकल्पेनोभयप्रामाण्यसम्भवात्किमिति स्मृत्यनुमितायाः श्रुतेरभावो ऽङ्गीक्रियतइत्याशङ्क्याह * अध्यारोप्येतेति * गत्यन्तरसम्भवे ऽदृष्टदोषदुष्टविकल्पापादकश्रुत्यनुमानस्यायुक्तत्वात् स्मृत्यप्रामाण्यकल्पनमेव न्याय्यमित्याशयः । एतदेव विवृणोति * विरुद्धयोर्हीति * एवं च सति श्रुतिविरोधेऽप्यन्तदुष्टविकल्पपरिहारार्थं भ्रान्त्यादिमूलत्वकल्पनया स्मृत्यप्रामाण्याङ्गीकरणस्य न्याय्यत्वेनार्द्धवैशसानापादकत्वान्न तत्परिहारार्थमविरोधे ऽप्यप्रामाण्यमापादनीयमित्याह * नन्विति * यत्तु सर्वत्रैकरूप्योत्प्रेक्षैव युक्तेत्युक्तं तद्विरोधाविरोधाभ्यां सर्वत्र व्यवस्थादर्शनादयुक्तमित्याह * यथेति * नास्त्येकरूपतेत्यतः शब्दाध्याहारेणोपसंहारः । अधिकरणार्थं व्याख्याय भाष्यमनुसन्दधानस्तत्र यथेत्युदाहरणभाष्यं पूर्वाधिकरणप्रतिपादितश्रुत्यनुमानद्वारस्मृतिप्रामाण्यापवादार्थे ऽस्मिन्नधिकरणे प्रत्यक्षश्रुत्यर्थोपसंहारपरकल्पसूत्रकारवचनस्यानुदाहार्यत्वादयुक्तमित्याशङ्क्य समर्थयते * यद्यपीति * कल्पसूत्राधिकरणे स्वा- ९८।१
तन्त्र्यस्य निषेत्स्यमानत्वात्पौरुषेयत्वेन चैव वस्तुतो ऽप्यनुपपत्तेः कल्पसूत्रमूलभूतानामपि श्रुतीनां शाखान्तराधीतानामनुमेयत्वाविशेषात्प्रत्यक्षश्रुत्यर्थोपसंहारपरत्वलक्षणस्य वैलक्षण्यात्मकस्यान्तरस्याव्यापकत्वेनाऽपत्वाद्युक्तमुदाहरणत्वमित्याशयः । सर्वेष्टनस्मृतजामा

१ कल्पेति २ पु० ना० ।

दृष्टाद्याधानिग्राह्मणगतश्रुतिमूलत्वे ऽप्यस्मदादीनां मूलादर्शनाद-स्तूदाहरणत्वं क्रीतराजकभोज्यान्नत्वस्मृतिमूलस्य तु तस्माद्दीक्षितस्य विज्ञातस्य क्रीतराजकस्य भोज्यं भवतीत्यथर्ववेदे पठ्यमानस्या-स्मदादिप्रत्यक्षत्वेन निराकर्तुमशक्यत्वात् क्रीतराजको भोज्यान्न इत्युदाहरणाभाष्यमयुक्तमाशङ्क्य समर्थयते * क्रीतेति * बाध्यत्वा-सम्भवशङ्कानिरासस्साम्याद्यत्क्रमो न दोषः । तथापि स्मृतिपक्षे बा-ध्यत्वे निक्षेपादुदाहृियतइत्यन्वयः । अग्नीषोमीयसंस्थाधिभोजन-प्रतिषेधविरोधादिति बोध्यत्वे हेतुः विरोधे ऽपि कथं बाध इत्याश-ङ्क्य * अधिकृतानधिकृतेत्युक्तम् * अधिकृतानधिकृतविवेकार्थं त-स्येत्याद्युक्तं कथमधिकृतानधिकृतयोर्बलाबलविशेष इत्याशङ्क्य प्रक-रणविशेषादिति प्रकरणाधीतसामिधेनीपाञ्चदश्यानारभ्याधीतसा-म्नदृश्यबलन्यायोदाहरणं दीक्षितान्नभोजनस्यायज्ञाङ्गत्वेन यज्ञाङ्गो-चरन्यायाविषयत्वात्स्वासंमतिसूचनार्थम् * भाष्यकारेणेत्युक्तम् * भाष्यकृतश्चैषो ऽभिप्रायः त्रयीप्रतिपादितस्य दीक्षितान्नभोजनप्रतिषे-धस्यावध्यपेक्षायामथर्ववेदप्रतिपादितस्यावधेर्दूरस्थत्वेन विलम्बित-त्वादथर्ववेदप्रतिपादितस्य तु तस्माद्दीक्षितस्याविज्ञातस्याक्रीतराज-कस्याभोज्यं भवतीति प्रतिषेधस्य निर्ज्ञातावधित्वेनावध्यनपेक्षत्वाद्दौ-र्बल्यमिति अष्टाचत्वारिंशद्वर्षब्रह्मचर्योदाहरणमयुक्तम् । कृष्णके-शत्वस्यानवस्थितवयोवस्थाविशेषत्वेनानवस्थितवर्षसंख्यारूपकालविशे-षत्वेन चोत्तरकालमपि सम्भवात् । न च जातपुत्रो ऽग्नीनादधी-तेत्युत्तरकालं पुत्रजन्मप्रतीक्षणाद् बहुकालातिक्रमे सति कृष्णकेश-त्वापनयः शङ्कनीयः । जातपुत्रस्य पक्षान्तरत्वसम्भवेन समुच्च-यस्य संदिग्धत्वादित्याशङ्क्य समर्थयते * कृष्णकेशत्वं चेति * तथा-पि व्यक्त एव विरोधो दृश्यतइत्यन्वयः । कथमित्यपेक्षिते स्मरणप्र-काशितस्यार्थस्य यौवनावस्थारूपस्य जातपुत्रत्वकृष्णकेशत्वाभ्यां बा-ल्यवार्द्धकव्यवच्छेदेन परिग्रहादुपलक्षणादित्युक्तम् । कृष्णकेश-त्वजातपुत्रत्वयोः प्रत्येकमाधानाधिकारिविशेषणत्वे ऽष्टदोषविकल्पा-पत्तेर्विशेषणविशेष्यभावाप्रतीतेश्च समुच्चयायोगाद्दारपरिग्रहोत्तर-काले च कृष्णकेशस्य नियमेनाधानप्राप्तेः पलितकेशव्यावृत्त्यर्थतया कृष्णकेशत्वविशेषणत्वविशेषणस्य परिसंख्यार्थत्वापत्तेरजातपुत्रस्या-पि च हरिश्चन्द्रादेः पुत्रार्थयागोपाख्यानेनाहिताग्नित्वदर्शनेनाजात-पुत्रत्वस्य स्वरूपेण विशेषणत्वानुपपत्तेः । स्मृत्यनुसाराच्चोभयोर्यौ-वनावस्थोपलक्षणार्थत्वमवसीयतइति भावः । ननु यौवनावस्थायाः किं चिच्छेदे ऽपि स्मृत्यनुसारोपपत्तेर्विरोधः स्यादित्याशङ्क्य * अकृ-

तो वेत्युक्तम् * शतायुर्वै पुरुष इति श्रुतेः पञ्चाशद्वर्षस्यार्द्धं वयो भवति तावता यौवनावस्थासमाप्तिरित्याशयः। तथापि कथं विरोध इत्याशङ्क्य * अष्टाचत्वारिंशद्वर्षेत्याद्युक्तम् * पञ्चवर्षोपनयनपक्षे सातिरेकाणि द्विपञ्चाशद्वर्षाणि गर्भाष्टमपक्षे सातिरेकाणि चतुःपञ्चाशदिति। तत्प्रमाणमशक्यत्वादिति पूर्वपक्षसिद्धान्तभाष्ये स्पष्टत्वान्न व्याख्याते। वस्त्रान्तरितौदुम्बरीस्पर्शे ऽप्यौदुम्बरीं स्पृष्टेति बुद्ध्यनपायात् स्पर्शनसर्ववेष्टनयोरविरोध इति· कथमशक्यतेत्यविरोधाशङ्काभाष्याभिप्रायं व्याचष्टे * ननु चेति * नौपचारिकशब्दप्रयोगमात्रेणानुपलब्धिविरोधात् वस्त्रान्तरितौदुम्बरीस्पर्शानुभवकल्पना युक्तेति स्पर्शनविधानादित्यादिपरिहारभाष्याभिप्रायं व्याचष्टे * कथमिति * ननु व्यक्तिद्वारेणेव जातेर्वस्त्रद्वारेणौदुम्बर्याः स्पर्शो भविष्यतीत्याशङ्कां निराकर्त्तुमाह * न चेति * जात्योर्व्यक्त्योः स्पर्शयोश्चेति विग्रहः। औपचारिकस्पर्शाङ्गीकरणे तु विध्यानर्थक्यमित्याह * अथेति * अविरोधवादी स्वाभिप्रायं विवृणोति * नन्विति * बुद्ध्यवैलक्षण्यमेव व्यवहारेण द्रढयति * तथा हीति * परिहर्त्ता व्यवहारमन्यथोपपादयति * सत्यमिति * किं तु चण्डालस्पृष्टवस्त्रस्पर्शकारितामित्यर्थः। तद्वस्त्रं स्पृश्यमानमित्यध्याहारः। कथं तस्याशुद्धिकारणत्वमित्याशङ्क्याह * तथा चेति * नन्वशुचिस्पर्शो निषिद्धत्वादशुद्धिकारणं वस्त्रस्य च चाण्डालादिवत् स्वतो ऽशुचित्वाभावान्मनुष्यवच्च निषेधाधिकाराभावेन निषिद्धाचरणानिमित्ताशुचित्वाभावात्तत्स्पर्शस्याशुद्धिकारणत्वानुपपत्तेः पतितचण्डालसूतिकोदक्याशवस्पृष्टिवत्तत्स्पृष्टस्पर्शने सचैलो जलमाविशेदित्यस्य च मनुष्यमात्रविषयत्वोपपत्तेर्न चण्डालस्पृष्टवस्त्रस्पर्शे दोष कल्पनं युक्तमित्याशङ्कते * कथं पुनरिति * ननु सूत्यादिवदनिषिद्धो ऽपि वस्त्रस्याशुचिस्पर्शो शुचित्वमापादयिष्यतीत्याशङ्क्यानिष्टापादनेन प्रत्याचष्टे * कथं वेति * तत्स्पृष्टेषु स्पृश्यमानेष्विति विग्रहः। अनिष्टापत्तिं तावत्परिहरति * तदुच्यतइति * काष्ठादीनां चण्डालादिस्पर्शापादितस्याप्यशुचित्वस्य। ९९।१

अष्टाङ्गुलं भवेत्काष्ठं तृणमुष्टिर्यदा भवेत्।
मारुतेनैव शुद्धिः स्यादूर्ध्वं स्पृष्टिर्न दूष्यति॥
इति स्मृतेरादिशब्दोक्तानां च रथ्याकर्दमादीनां
रथ्याकर्दमतोयानि स्पृष्टान्यन्यश्ववायसैः।
मारुतेनैव शुद्ध्यन्ति पङ्क्तेष्टकचितानिति॥
स्मृतेर्वायुस्पर्शेनापनयात्तत्स्पर्शस्य च दोषकारणत्वं न

जातमशुचित्वानापादनादित्याशयः । ननु निर्वातस्थस्य काष्ठादेश्चण्डालादिस्पृष्टस्यापि शुद्ध्यन्तरास्मरणेन मारुतशुद्धिस्मृतेरशुचित्वानापत्तिप्रतिपादनपरत्वावसायान्न तावत्तत्साम्येन वस्त्रस्याशुचित्वापत्तिर्वक्तुं शक्यते न च प्रक्षालनशुद्धिस्मृतेर्वस्त्रस्याशुचित्वापत्तिर्वक्तुं शक्यते तस्याः गन्धलेपापकर्षणे शौचममेध्यस्येति लेपापकर्षणोपदेशाल्लिप्तविषयत्वप्रतीतेरित्याशङ्क्य ते *नन्विति* प्राक्तनलेपापकर्षणविषयत्वेनापि विध्युपपत्तेर्नाश्रुतालिप्तविषयत्वकल्पनं युक्तमिति परिहरति * नेति * तुशब्दः शङ्कानिवृत्त्यर्थः । यद्यपि केन चिदमेध्येन लिप्तस्येति लिप्तपदं प्रक्षिप्य पठ्यते तथाप्यभियुक्तबहुजनापठितत्वान्नासावार्षः पाठ इति चिरन्तनग्रहणेन सूचितम् । एवं तर्हि वस्त्रस्यामेध्यत्वाभावान्नानेन शुद्धिरुक्तास्यादित्याशङ्क्याह * चण्डालेति * आशङ्कावादी स्वाभिप्रायं प्रकटयति *ननु चेति * गवाश्वादितुल्यत्वावधारणहेतुः स्वाभाविकाशुचित्वनिषेधाधिकाराभावलक्षणः प्रागेवास्माभिरुक्तः । स्वाभाविकाशुचित्वनिषेधाधिकारयोरभावे ऽपि प्रक्षालनविधिसामर्थ्याच्चण्डालादिस्पर्शेन वस्त्रस्याशुचित्वापत्तिरवसीयतइति परिहारवादी स्वाभिप्रायं प्रकटयति * उच्यतइति * चण्डालस्पृष्टवस्त्रस्पर्शनिमित्तदोषप्रतिपादनस्य प्रकृतौदुम्बरीस्पृष्टवस्त्रस्पर्शनिमित्तौदुम्बरीस्पर्शबु- १००।२
द्ध्यभावोपयोगितामाह * अतश्चेति * शाखान्तरे चौदुम्बर्योद्गाता स्पृष्टव्य इति विधानात्तस्याश्चाचेतनत्वेन स्पर्शसंवेदनलक्षणस्पर्शायोगात्प्राप्तिमात्रवचनत्वेन स्पर्शश्रुतेः प्राप्तेश्च व्यवधाने ऽनुपपत्तेरविरोधाशङ्क्यैव नास्तीत्याह * यदा त्विति * ननु कस्यां चिच्छारवायामौदुम्बर्याश्रयत्वमात्रविधानाद्वस्त्रान्तरिताया अपि चौदुम्बर्याः पतनप्रतिबन्धकत्वेनाश्रयत्वोपपत्तेरविरोधो भविष्यतीत्याशङ्क्याह * अपाश्रयणेति * अस्पृष्टायाः संयोगाभावेनाश्रयत्वायोगादपाश्रयणहस्तसंयोगाद्यनेकोपायसाध्ये च स्पर्शे ऽपाश्रयणनियमार्थत्वेनापाश्रयणविधेरपाश्रयणेनैवोदुम्बरीं स्पृष्ट्वेत्येकवाक्यत्वावसायादस्त्येव विरोध इत्याशयः । ननु संयुक्तस्यापि वस्त्रस्य पतनप्रतिबन्धकत्वायोगात्संयुक्तसंयोगो नास्पृष्टाप्यौदुम्बर्येवाश्रयो भविष्यतीत्याशङ्क्याह * परेति* संयुक्तसंयोगमात्रेणाश्रयत्वाङ्गीकरणे विन्ध्यसंयुक्ताकाशसंयुक्तस्य हिमवतो ऽपि विन्ध्याश्रयत्वापत्तेर्वस्त्रस्यैवोदुम्बरीसंयोगलब्धस्थैर्यस्य पतनप्रतिबन्धकत्वं प्रसज्येतेत्यपाश्रयणस्पर्शयोर्विरोधो ऽस्तीत्याशयः । ननु सत्यपि विरोधे सर्वशब्दस्य कतिपयवेष्टने ऽत्यन्तबाधानापत्तेः । स्पर्शश्रुतेश्चौदुम्बरीसम्बन्धेनैवास्तु स्पर्शे ऽप्यौपचारि-

कत्वेनोत्पत्तेः कथं चिद् बाधमात्रेण चानुपपत्तिपरिहारसम्भवे ऽत्यन्तबाधायोगान्न सर्ववेष्टनस्मृतेर्व्यामोहत्वं युक्तमित्याशङ्क्य कथं चिद् बाधो ऽपि श्रुतेः कारणाभावादयुक्त इति तामुद्रायतेतिभाष्येणोक्ताः सर्वेत्यनेन स्मृतेर्बाधकारणत्वमाशङ्क्य नन्वित्यनेन निर्मूलत्वान्निराकृत्य वैदिकमित्यनेन श्रुतिमूलत्वमाशङ्क्य भवेदित्यादिना प्रत्यक्षश्रुतिविरोधान्मूलश्रुतिकल्पनासम्भवमुक्त्वा कथं न हीत्यनेन किं तर्हि मूलमिति पृष्ट्वा व्यामोहादित्युत्तरे दत्ते कथमित्यनेन व्यामोहमूलत्वे किं प्रमाणमिति पृष्ट्वा श्रौतेत्यनेन विरुद्धश्रुत्यवगता यथार्थत्वान्यथानुपपत्तिः प्रमाणमित्युक्तं, तत्सर्वं संक्षेपेण तात्पर्यतो व्याचष्टे *इति युक्तमिति * पूर्वोक्तबलाबलहेतुपरामर्शार्थो ऽयमिति करणः अथेत्याशङ्क्याभाष्यं श्रुतिमूलत्वस्य निराकृतत्वात्स्वातन्त्र्येण चाप्रामाण्यादविधित्वाच्चायुक्तमाशङ्क्य विकल्पाङ्गीकरणेन विरोधपरिहारसम्भवाच्छ्रुतिकल्पनोपपत्तिमङ्गीकृत्यैतदुक्तमिति व्याचष्टे * अथेति * नासतीत्यादितुल्यकारणत्वादित्यन्तं भाष्यं तात्पर्यतस्तावद्व्याचष्टे * नासतीति * (हसे हसने मृङ् प्राणत्यागे गृ निगरणे इण् गतौ वा गतिगन्धनयोः अम गतौ दम उपशमे लूञ् छेदने पूञ् पवने धुर्वी हिंसायाम् हस्नः करनक्षत्रयोः । मर्तः मूलोकः । गर्तः अवटः । एतः कर्बुरः । वातो वायुरोगश्च । अन्तः अन्ते ऽन्तिके च । दन्तः दशनम् । लोतः अश्रुवह्नयोः । पोतः बालवह्निश्वयोः । धूर्तः शठः[1])। औणादिके तत्प्रत्यये कृते गम्यते ऽसावित्यस्मिन्नर्थे ऽयमन्तशब्दः । एकेनाम्यते गम्यते प्राप्यते यो ऽसावैकान्तव्यामोहश्चासावैकान्तश्चेति तृतीयासमासगर्भः कर्मधारयः । विकल्पे ऽङ्गीक्रियमाणे पूर्वोक्तेनैव तुल्यकक्षविकल्पो ऽपीत्यादिना मार्गेण व्यामोहस्यैकविज्ञानगतस्य कल्पनामवश्यमापन्नां पूर्वोक्तेनैव द्वितीयेन प्रकारेणेत्यादिना मार्गेण स्मृतावेव नियच्छतीति प्रथमपादावृत्त्या योज्यम् एतदेव भाष्यमवयवशो व्याचिख्यासुर्व्यामोहविज्ञानसमासं द्वेधा विगृह्णाति * * व्यामोहेति * विकल्पं त्विति भाष्ये न पाक्षिकीत्यपाक्षिकत्वाभिधानमेकस्मिन्प्रयोगे ऽङ्गीकृतप्रामाण्याया अपि स्पर्शश्रुतेः प्रयोगान्तरे व्रीह्यादिश्रुतिवदप्रमाण्याङ्गीकरणोपपत्तेरयुक्तमाशङ्क्योपपादयति * विकल्पं त्विति * अपाक्षिकं चेति पाठे सर्ववेष्टनस्मरणं चेति भिन्नक्रमश्चाकारः । पक्षे तावदित्यादिपाक्षिकत्वोपपादनार्थमिति व्याचष्टे * एवमिति * यथाश्रुतिरपाक्षिकी तथा स्मरणमपीत्येवं

१ अयंपा० २ पु० ना० । २ हसिमृगरवाभिदमितमिलूपूमुधूर्वीभ्यस्तनित्यमीर्ग्त्यर्थस्येति २ पु पा० हस्यते तात्पर्यं लेकमेव प्रतिभाति ।

शब्देनाभिधानाद्विघ्नक्रमत्वं सूचितं पाक्षिकं चेति तु पाठे विकल्पे ऽङ्गीक्रियमाणे पाक्षिकत्वमेवात्यन्ताप्रामाण्यहेतुरिति व्याचष्टे * पाक्षिकं चेति * ततश्चाव्यामोहे तस्मिन्स्पर्शनविज्ञाने पक्षान्तरे ऽपीत्यध्याहृत्य भाष्यं योज्यम् । ननु पक्षान्तरे स्पर्शनश्रुतेर्व्यामोहत्वात्स्मृतिमूलश्रुतिकल्पनं भविष्यतीत्याशङ्कानिवृत्यर्थं न चासाविति भाष्यं व्याचष्टे * एकदापि चेति * यदेव हीत्यादिभाष्यं श्रुत्यपाक्षिकत्वोपपादनार्थतया व्याचष्टे * इति समर्थयमान इ-
१०१।१ ति * तस्याव्यामोहत्वस्य निरपेक्षप्रमाजनकत्वं मूलं तदपाक्षिकत्वात्तद्वशेनैव च स्मृतिव्यामोहत्वस्यापाक्षिकत्वात्सर्वदा निर्विचिकित्सश्रुतिप्रामाण्यसिद्धिरिति भाष्यार्थः । ननु पक्षान्तरे प्रमादपाठत्वान्निरपेक्षप्रमाजनकत्वं न सम्भवतीत्याशङ्कानिरासार्थं नासाविति भाष्यं व्याचष्टे * न हीति * स्मृतेः श्रुत्यादिमूलत्वं वैधर्म्यदृष्टान्तत्वेनोक्तम् । तेनेति भाष्यं श्रुत्यपाक्षिकं चोपसंहारार्थत्वेन तावद्व्याचष्टे * तेनेति * व्यामोहादिति हेतौ पञ्चमीत्यर्थः । अन्यपर्यायान्तरशब्दयोगनिमित्तपञ्चम्यङ्गीकरणेन वा तेन श्रुतिविरोधपरिहारासम्भवेन नैतत्स्मार्त्तविज्ञानं व्यामोहपक्षात्प्रामाण्यरूपं पक्षान्तरं संक्रान्तं किं तु दुःश्रुतादिविज्ञानं सर्वदा तस्य मूलमित्येवमेतद् भाष्यं योज्यमित्याह * यद्धेति * दुःश्रुतस्वप्नादिमूलत्वेनैकदाङ्गीकृतेन सर्वदापन्नेन हेतुना पक्षान्तरं न संक्रान्तमित्यर्थः । ननु सत्यपि विरोधे शिष्टत्रैवर्णिकदृढपरिग्रहस्य श्रुतिकल्पनहेतोर्भावात्किमिति श्रुतिर्न कल्प्यतइत्याशङ्क्य प्रमित्सानिरपेक्षपरोक्षार्थविषयप्रमाणानुत्पत्तेर्न विरोधे श्रुतिकल्पनं युक्तमिति प्रतिपादनार्थं न हीति भाष्यं किं कर्त्तव्यमिदानीं चेत्यनेन पूर्वमेव व्याख्यातप्रायत्वान्न व्याख्यातम् । तस्मादित्युपसंहारभाष्ये तुल्यकारणत्वं व्याचष्टे * श्रुतीति * विषमशिष्टत्वादपि विकल्पो न युक्त इति प्रतिपादनार्थमपि चेति भाष्यं प्रमाणायां स्मृतावित्यत्रोभयं प्रामाण्यविरोधविवरणदर्शनादयुक्तमाशङ्क्य विरोधप्रतिपादनपरतयैव तावद्व्याचष्टे * अपि चेति * इतरस्मृतिप्रामाण्यं श्रुतिप्रमाण्यं चेतरच्छ्रुतिप्रामाण्यं स्मृतिप्रामाण्यं वा नाश्रयतीति नञ्समासो नन्वयमकारो दीर्घ इत्याशयः । अन्यतो बलाबलपरिच्छेदाभावे तुल्यबलत्वावगत्या विकल्पः स्यात्सति तु तस्मिन्नदृष्टदोषविकल्पाङ्गीकरणं न युक्तमिति भाष्याभिप्रायः । क्व पुनरितरेतराश्रयविरोधे ऽन्यतः परिच्छेदो ऽदृष्ट इत्याशङ्क्याह * परस्परेति *

प्रतिज्ञा यत्र बाध्येत पूर्वोक्तैर्यस्य बाधकैः ।

तत्पराजयतः कार्यो निर्णयो बाधवर्जनात् ॥

इत्यत्रोक्तो विरुद्धाद्व्यभिचारिणो विरोधे ऽन्यतः परिच्छेदो दृष्टान्ततः । प्रमाणशब्दमाक्षिपति * प्रमाणशब्दस्येति * प्रमाणशब्दस्य स्मृतिसामानाधिकरण्यप्रयोगेण ज्ञानसामानाधिकरण्याभावात् स्मृतेश्चाप्रमितित्वेन भावोत्पन्नल्युडन्तत्वायोगान्नानेन कारणद्वयेन नपुंसकलिङ्गत्वसिद्धिरित्याशङ्क्य प्रमाणशब्दस्य वेदाः प्रमाणमित्यादिप्रयोगेण लोके नियतलिङ्गत्वावधारणात्, क्षरणसाधनत्वे ऽपि ज्ञानशब्दवत्सामान्यविवक्षया नपुंसकलिङ्गत्वात् भावे ल्युट् चेति ल्युट्प्रत्ययस्मरणात्तदाश्रयणेन नपुंसकलिङ्गत्वसमर्थनार्थं वेदाः प्रमाणमिति निदर्शनं ज्ञानसामानाधिकरण्येनेति च तस्य ज्ञानमुपदेश इति करणव्युत्पन्नस्यापि ज्ञानशब्दस्य नपुंसकलिङ्गत्वदर्शनाद्यदेव ज्ञानशब्दस्याधिकरणमभिधेयं नपुंसकलिङ्गं तदेवास्यापीति व्याख्येयं ज्ञानशब्दस्य च विषयाव्यभिचारिबुद्धिविशेषवाचित्वाद्ववयवार्थप्रत्यभिज्ञानेन च रूढित्वायोगाद् बुद्धिबोधादिसामानाधिकरण्याविशेषेण चानेकलिङ्गतापत्तेरव्युत्पन्नस्यैव प्रमाणशब्दस्य ज्ञानशब्दपर्यायत्वाभिप्रायं सामानाधिकरण्यव्याख्यानं कथं निर्वहतीति न विद्मः । भावव्युत्पत्तौ तु स्मृतिजन्यसर्ववेष्टनज्ञानलक्षणया स्मृतिशब्दस्य प्रमाणशब्दसामानाधिकरण्यं द्रष्टव्यम् । करणविशेषविवक्षायां वेति विशेषशब्देन पूर्वं सामान्यविवक्षा द्योतिता स्वमर्थनं प्रतिजानीते * तमिममिति * समर्थयते * प्रमाणमिति * मूलप्रमाणाश्रितायाः स्मृतेः श्रुत्या सह स्पर्द्धा भवति न स्वतन्त्राया इति प्रतिपादयितुं प्रमाणशब्दात्परात्रायगतावित्येष धातुर्भाष्यकृता प्रयुक्तो न शुद्धः प्रमाणशब्दः ततश्च प्रमाणमयनायां गच्छन्त्यां प्रमाणायां स्मृतौ स्पर्शनं व्यामोहो न तन्निरपेक्षायामिति भाष्यार्थो भवतीत्याशयः । योजना चैवम् । यतः स्मृतिः प्रमाणमयते तस्मात्प्रमाणोच्यते धात्वन्तरेण यतिधात्वर्थव्याख्यानार्थम् * यातीत्युक्तम् * किं तत्प्रमाणमित्यपेक्षिते * मूलभूतां श्रुतिमित्युक्तम् * नन्वयतेर्यकारान्तरत्वात्कथं प्रमाणेति रूपसिद्धिरित्याशङ्क्य क्विपो बलादित्वेन लोपोव्योर्वलीति यकारलोपे सत्येतद्रूपसिद्धिरिति सूचनार्थं * क्विबन्तादयतेरित्युक्तम् * ननु कृताकृतप्रसङ्गितयाः नित्यत्वेन क्विपो लोपस्य प्राथम्यात् वलः परभूतस्याभावे सति कथं यकारलोपः स्यादित्याशङ्क्य वलप्रत्ययपरत्वनिमित्तयकारलोपाभ्युपगमेनैव तावत्परिहरति * तत्रेति * प्रत्ययलोपे प्रत्ययलक्षणमितिस्मरणात्प्रथमं क्विपो लोपे ऽपि तत्कार्यसिद्धिरिति भावः । नन्विदं

वल्ग्रहणं वर्णविषयं तथा सति गोधाया अपत्यमित्यस्मिन्नर्थे गोधाया ढ्रगिति विहितढ्रक्प्रत्ययादिभूतढकारस्थायनेयीनिर्विषयः फढखछघां प्रत्ययादीनामित्ययादेशे कृते लोपोव्योर्वलीति यलोपाद्गौधेर इति रूपं सिद्ध्यति प्रत्ययविषयत्वे तु प्रत्ययमध्यगतस्य वलो रेफमात्रस्य प्रत्ययत्वाभावात्प्रत्ययमध्यगतयकारलोपनिमित्तत्वाभा-
१०२।१ वेन रूपसिद्धिः स्यादित्याशङ्क्याह * न चेति * वल्ग्रहणस्य वर्णविषयत्वेन प्रत्ययविषयत्वेन च द्वेधा वैयाकरणैर्व्याख्यानादिह लक्ष्यानुसारेण प्रत्ययविषयत्वाभ्युपगमेन वलादिप्रत्ययनिमित्तो ऽत्र यलोपः प्रत्ययलोपलक्षणेन युक्त इति भावः । माभूद्वा वल्प्रत्ययपरत्वनिमित्तो यकारलोपः तथापि यदि वा कानि चिदन्यान्यपि वर्णाश्रयाणि कार्याणि प्रत्ययलोपलक्षणेन भवन्ति तद्वदिदमपि भविष्यतीत्युक्ता ऽथ वैवं वक्ष्यामि लोपोव्योर्वलि ततः वेर्व्यन्तस्य व्योर्लोपो भवतीति भाष्ये पतञ्जलिना वेरपृक्तस्येति योगविभागाभिधानाद्विभक्तस्य वेरिति सूत्रस्य येनविधिस्तदन्तस्येति स्मरणेन व्यन्तस्येत्यर्थावगतेः कृताकृतप्रसङ्गित्वेन च नित्यत्वे ऽपि विलोपस्य प्रथमकरणे व्यन्तशब्दाभावेन वेरिति सूत्रस्यानवकाशापत्तेः सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवानिति विलोपप्राथम्यबाधेनास्य व्यन्तत्वानपायाल्लोपो व्योरिति पूर्वसूत्रगतपदद्वयानुवृत्त्या व्यन्तस्य वकारयकारयोर्लोप इति सूत्रार्थनिष्पत्तेर्व्यन्तत्वनिमित्तो यकारलोपो भविष्यतीति परिहारान्तरमाह * यद्वेति * वेरितीतिकरणाध्याहारेणैव योज्यं वेरिति योगविभागेन लोपो भविष्यतीत्युक्ते कथमित्यपेक्षायां व्यन्तस्य वकारश्च यकारश्च लुप्यत इत्येवमर्थावगमादिति न केवलं वल्परत्वनिमित्त एव वकारयकारयोर्लोपः किं तु व्यन्तत्वनिमित्तो ऽपीति चकारार्थः । ननु यकारलोपे ऽप्यकारस्य ह्रस्वस्य पिति कृति तुगिति तुगागमापत्तेरनित्यमागमशासनमिति स्मरणाद्वा तदकरणे ऽपि शुद्धस्याकारस्यादन्तत्वाभावात्प्रमाणपदसंहितायां वा दीर्घत्वापत्तेष्टाप्प्रत्ययाभावेन याडाप इति तन्निमित्तयाडागमाभावात्कथं प्रमाणायामिति रूपसिद्धिरित्याशङ्क्याह * यलोपे चेति * शुद्धग्रहणेन तुगागमदीर्घत्वापादके निराकृते शुद्धस्याप्यादन्तपदैकस्मिन्नित्यन्तवत्कार्यासिद्ध्या टाप्प्रत्ययोत्पत्तिसमर्थनार्थम् * तदन्तावधिकादित्युक्तम् * यः शुद्धः परिशिष्टाकारः स एवान्तरूपो विधिः स्वार्थे कप्रत्ययः । तस्मादन्तरूपावधिभूतादतः पश्चात् स्त्रियां विषये टाप् क्रियतइत्यर्थः । ननूपपदाकारसंहितायाः प्रथमातिक्रमकारणाभावेन

पूर्वकार्यत्वादीर्घत्वापत्तेष्टाप्रत्ययानुत्पत्तिः स्यात् पूर्वाकरणे वा प्राप्तावसरत्वेन पश्चादप्यकार्यत्वात्प्रमाणेतिरूपं न सिद्ध्येदित्याशङ्क्याह * अक इति * एकपदाकारसंहितायाः पदान्तरसंहितातः शीघ्रप्रतीतेर्दीर्घादीर्घयोश्चाधातुप्रत्ययाकारयोर्दीर्घादेशस्यान्तरतमत्वातिशयाद्धातूह्यस्वाकारह्रयदीर्घादेशाच्छीघ्रप्रतीतेः परयोर्धातुप्रत्ययगतयोरकाराकारयोरकः सवर्णदीर्घत्वं पूर्वं कृत्वा ततः पूर्वेणाप्युपपदाकारेण अकः सवर्णदीर्घत्वं कृत्वा प्रमाणेत्यनुगम्यतइति योज्यम्। तदितरेतराश्रयमित्युपसंहारभाष्यमपीतरेतरविरोधपरतया पूर्ववद्व्याख्यातं भवतीत्याह * तदेतदिति * उपक्रमोपसंहारानुरोधेन वा विवरणभाष्यमेवेतरेतराश्रयपरमध्याहारेण व्याख्येयमित्याह * यद्वेति * प्रमाणायामित्यत्र स्पर्शने व्यामोहे स्मृतिः प्रमाणमित्यध्याहारः स्पर्शनइत्यत्र स्मृतौ व्यामोहे स्पर्शनं प्रमाणमिति। (प्रमाणेत्याद्यमध्याहृतं भाष्यमिष्यमाणार्थत्वेन व्याख्यायते रुदित्युपसंहारभाष्यं श्रुतावारोप्यमाणाप्रामाण्यपरतया व्याख्यातम्। एवं तथेत्यादिना संहारभाष्यमावृत्त्या स्मृत्यप्रामाण्यसमानार्थत्वेन व्याख्यायेत्यध्याहृतं स्पर्शने प्रमाणे इत्यादिभाष्यं श्रुतिप्रामाण्यासमर्थनार्थत्वे व्याख्यातम्। एतच्छ्रुतिप्रामाण्यपक्षे ऽप्यन्योन्याश्रयस्य सुपरिहरत्वं स्मृतिप्रामाण्यपक्षे ऽन्योन्याश्रयस्य दुःपरिहरत्वं वक्ष्यमाणमभिप्रेत्योक्तम्[1])। तत्राद्यश्लोकेनेष्यमाणार्थतयाध्याहृतं भाष्यं व्याख्यायारोप्यमाणार्थतया पठितं व्याख्यातम्। द्वितीयेन समर्थ्यमानार्थतया पठितं व्याख्याय निश्चीयमानार्थतयाध्याहृतं भाष्यं व्याख्यातं, ननु श्रुतिप्रामाण्यगतमितरेतराश्रयं सिद्धान्तवादिनो ऽपि समानत्वाच्चोद्भावनीयमित्याशङ्क्याह * तदिदमिति * तस्यैकत्रैवेतरेतराश्रयं तच्च सुपरिहरमिति भावः। अन्यतः परिच्छेदप्रदर्शनार्थं तत्रेति भाष्यं तत्प्रदर्शनासमर्थत्वेनाक्षिपति * तत्रेति * तत्रेतरेतराश्रये ऽन्यतः परिच्छेदस्य प्रतिज्ञातत्वात् स्फुटमत्यन्तव्यतिरिक्तं हेत्वन्तरं वाच्यम्। भाष्यकारस्त्वेवमुक्त्वा तयोरेव श्रुतिस्मृत्योर्धर्ममेकं श्रुतिप्रामाण्यपरिच्छेदे कल्पमूलत्वं स्मृत्यप्रामाण्यपरिच्छेदे चैकं कल्प्यमूलत्वं हेतुमिह किं प्रमाणं किमप्रमाणमिति परिच्छेदवेलायामुक्तवानित्यर्थः। (श्रुतेः कल्पमूलं स्मृतेः कल्प्यमूलत्वं धर्ममुक्तवान् न च सधर्मिणो ऽन्यो धर्मधर्मिणोरभेदात् तेन नान्यतः परिच्छेदो ऽयमित्याशयः[2]) द्वितीयव्याख्याने तु श्रुतिप्रामाण्यगतेतरेतराश्रयस्य सुपरिहरत्वपरिच्छेदे

१ अयं पा० २ पु० ना०।
२ अयं पा० २ पु० ना०।

हेतुं कल्पतमूलत्वं स्मृतिप्रामाण्यगतेतरेतराश्रयस्य दुःपरिहरत्वपरिच्छेदे कल्प्यमूलत्वमिह किं सुपरिहरं किं दुःपरिहरमिति परिच्छेदवेलायामित्यर्थः । समाधत्ते * नैवेति * श्रुतिस्मृत्योर्विपरीतार्थत्वकृतमितरेतरविरोधित्वमितरेतराश्रयत्वं तु श्रुतिस्मृतिप्रामाण्याप्रामाण्ययोः स्वरूपकृतं समाहितं भाष्यं व्याचष्टे * स्वत इति * स्मृतिप्रमाण्यगतेतरेतराश्रयस्य दुःपरिहरत्वपरिच्छेदे कल्प्यमूलत्वस्य हेतुत्वमुपपादयति * ततश्चेति * नन्वात्मलाभाय स्मृतेर्मूलप्रमाणापेक्षत्वे ऽप्यर्थप्रतिपादने निरपेक्षतया पुरुषवाक्यवत्स्वतः प्रमाणत्वेन श्रुत्यप्रामाण्यानपेक्षत्वात्तत्परिग्रहपक्षे वैकल्पिकशास्त्रान्तरवच्छ्रुत्यप्रामाण्याध्याहारोपे ऽपीतरेतराश्रयानापत्तिरित्याशङ्क्याह * न चेति * न तुल्यबलयोर्विकल्पः सम्भवतीत्याशयः । दृष्टान्तेनैतदेवोपपादयति * बलवन्तमिति * स्मृतिप्रामाण्यगतेतरेतराश्रयस्य दुःपरिहरत्वमुपसंहरति * एवं तावदिति * श्रुतिप्रामाण्यगतेतरेतराश्रयस्य सुपरिहरत्वपरिच्छेदे कल्पतमूलत्वस्य हेतुत्वमुपपादयति * यदा त्विति * तदा पूर्वसिद्धस्मृत्यप्रामाण्यलिप्सायां पूर्वानुभवपारतन्त्र्यलक्षणस्मृतिस्वरूपाभ्रयमप्रमाणत्वमादितः सिद्धमेव प्राप्य श्रुतिः प्रामाण्यमश्नुतइत्यन्वयः । श्रुतेः स्वतः प्रामाण्यात्स्मृत्यप्रामाण्यलिप्सानुपपत्तिमाशङ्क्य तत्रापि श्रुतावपि निरपवादप्रामाण्यावधारणसिद्धेः * पराधीनत्वादित्युक्तम् * किं तत्परमित्यपेक्षिते * प्रतिपक्षेत्याद्युक्तम् * पर्यालोचनापेक्षानिवृत्त्यर्थं क्षणमात्रमपीत्युक्तम् उपसंहरति * तेनेति * अननुमितावस्थायामित्यनेनाद्ये पदक इति व्याख्यातम् । कल्पतकल्प्यमूलस्यान्यतः परिच्छेदहेतुत्वप्रतिपादनार्थत्वेन सो ऽसाविति भाष्यं व्याचष्टे * इतीति * सर्वमेव धा ततश्चेत्याद्येतद्भाष्यव्याख्यानार्थं ततः कल्पतकल्प्यमूलत्वादुक्तेन प्रकारेणान्यतः परिच्छेद इत्यर्थः । उक्तमेव प्रकारं कल्प्यमूलत्वादित्यादिभाष्यारूढं कर्तुं संक्षिप्य यथाक्रमं दर्शयति * तेनेति * उक्तेन प्रकारेणैकत्र स्मृतिप्रामाण्यगतेतरेतराश्रये श्रुतेराद्यस्य स्वतः सिद्धस्य प्रामाण्यस्यापवादासम्भवेनापेक्षितश्रुत्यप्रामाण्यालाभाद् दुःपरिहरत्वावसानं परिच्छेदो भवति अवसीयतइति भावे लकारः । अन्यत्र श्रुतिप्रामाण्यगतेतरेतराश्रये स्मृत्यप्रामाण्यस्यापेक्षितस्य लाभात्सुपरिहरत्वस्यावसानमित्यर्थः । नन्वेवं सत्यपेक्षितस्मृत्यप्रामाण्यलाभमात्रेण श्रुतिप्रामाण्यगतेतरेतराश्रयस्य सुपरिहरत्वपरिच्छेदसिद्धेः किमर्थं भाष्यकृता ऽनुपूर्वी दर्शितेत्याशङ्क्याह * कृत्वेति * अपेक्षितलाभालाभोपपादनार्थमुभयत्राप्यानुपूर्वी

१०३।२

दर्शनीयेत्याशयः। श्रुतिप्रामाण्यगतेतरेतराश्रयपरिहारायापेक्षितो यः स्मृत्यप्रामाण्यरूपो ऽर्थस्तमाद्ये क्षणे दृढसिद्धत्वेनावधिं कृत्वा विरोधे स्मृत्यप्रामाण्याच्छ्रुत्यबाधः श्रुत्यबाधाच्च तद्विरोधे स्मृतिमूलश्रुतिकल्पनानुपपत्तिर्यावत्तावद्गच्छेत्तावताह्यपरश्रुतिप्रामाण्यगतेतरेतराश्रयपरिहारसाध्यः श्रुतिप्रामाण्यरूपो ऽर्थः सिद्ध्यति । तथा स्मृतिप्रामाण्यगतेतरेतराश्रयस्यापरिहार्य्यत्वायापेक्षितो यः श्रुतिप्रामाण्यरूपो ऽर्थस्तमाद्ये क्षणे दृढसिद्धत्वेनावधिं कृत्वा विरोधे श्रुतिप्रामाण्यात् स्मृतिमूलश्रुत्यकल्पनं तदकल्पनाच्च स्मृतेर्भ्रान्त्यादिमूलत्वकल्पनं यावत्तावद्गच्छेत् तावता ह्यपरः स्मृतिप्रामाण्यगतेतरेतराश्रयापरिहार्यत्वसाध्यः स्मृत्यप्रामाण्यरूपो ऽर्थः सिद्ध्यतीत्यर्थः । ननु भाष्यकृतैकविधानुपूर्वीकथनादानुपूर्वीद्वयाभिधानं भाष्यव्याख्यानानुपयोगित्वादनर्थकं स्यादित्याशङ्क्याह * तदेकेनेति * उपलक्षणार्थमेकानुपूर्वीकथनमित्याशयः। कीदृशी तर्हि द्वितीयानुपूर्वी दर्शनीयेत्यपेक्षायामाह * द्वितीयेति * स्वयं पूर्वोक्तस्याप्यस्य मार्गस्य भाष्योक्तापेक्षया द्वितीयत्वम् । नन्वित्याशङ्क्यापूर्वकं तुल्यबलविकल्पोपपत्तिप्रतिपादनार्थं भाष्यं व्याचष्टे * व्रीहीति * तस्माद्युक्तमिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * अत इति *

॥ अथ दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम् ॥ ३ ॥

हेतुदर्शनाच्च ॥ ४ ॥ १०४।१

सूत्रव्याख्यानार्थं लोभादित्यादिभाष्यं सर्ववेष्टनादिस्मृतीनां लोभकृन्नपुंसकत्वप्रच्छादनप्रयोजनमूलत्वे प्रमाणाभावादयुक्तमाशङ्क्य श्रुत्यतिरिक्तसम्भवे मूलमात्रोपलक्षणार्थतया व्याचष्टे * इतश्चेति* विरोधो व्यभिचारशब्देनोक्तः । श्लोकं व्याचष्टे * श्रुतीति * ननु सत्यपि विरोधे भ्रान्त्यादिमूलत्वं विना बाध्यत्वायोगाद् बाध्यत्वेनैव भ्रान्त्यादिमूलकल्पनायामितरेतराश्रयं स्यात् इत्याशङ्क्याह * स्मृतेश्चेति * विरोधपरिहारायाधश्याङ्गीकार्ये ऽन्यतरस्य बाध्यत्वे स्मृतेरेव भ्रान्त्यादिमूलत्वसम्भवेन बाध्यत्वोपपत्तेर्बाध्यत्वनिश्चयेन भ्रान्त्यादिमूलत्वनिश्चयापत्तेरितरेतराश्रयपत्तिरित्याशयः । उपपन्नतरं चैतदिति वक्ष्यमाणवर्णकभाष्यमिहापि योज्यमिति सूचयितुमाशङ्क्योत्तरत्वेन व्याचष्टे * यथैवेति * भाष्यकृतास्यैव सूत्रस्याधिकरणान्तरविषयत्वेन वर्णकान्तरं कृतं तत्पूर्वापरितोषविषयव्याप्तिव्यतिरेकेण क चिद्वर्णकान्तरस्य प्रयोजनान्तरा दर्शनात्तयोश्चापरितोषकारणविषयान्तरादर्शनेनासम्भवादयुक्तमित्याक्षिपति * सर्वेति * न

च तयोर्मध्ये ऽन्यतरदप्यत्रास्तीति शेषः । समाधातुमपरितोषकारणं तावन्मन्दप्रयोजनत्वमाह * अपरितोषस्तावदिति * विषयव्यापिरप्यत्राविरुद्धस्मृतिविषयत्वादस्तीत्याह * विरोधेन चेति * सत्यप्यस्याविरुद्धस्मृतिविषयत्वे कारणान्तरेणापि केन चिदपवादान्तरोपपत्तेः कथं विषयव्यापिरित्याशङ्क्य कारणान्तरासम्भवान्नापवादा * न्तरोद्भव इत्युक्तम् * वैसर्जनहोमीयमित्यादिविषयप्रदर्शनार्थं भाष्यं व्याचष्टे * वैसर्जनहोमीयमिति * श्रुत्यविरुद्धानामपि स्मृतीनां लोभादिमूलत्वसम्भवेनाप्रामाण्याङ्गीकरणे दायधर्मादिस्मृतीनामप्यप्रामाण्यं स्यादित्याशङ्क्य मन्वादिमहर्षिनिबन्धनस्य वेदमूलत्वकल्पना हेतोरविरोधे कल्पकत्वप्रतिबन्धाभावान्मूलान्तरकल्पनानुपपत्तावप्यविरुद्धानामाचारानुमितानामर्वाचीनमनुष्यस्मृतीनां दृष्टमूलासम्भवेनैव वेदमूलत्वस्यापि वा कारणाग्रहप्रयुक्तानि प्रतीयेरन्नित्यत्र वक्ष्यमाणत्वातत्सम्भवे ऽपवादविषयत्वोपपादनार्थं मुक्तकमेवैतदित्युक्तम् तत्कर्तृसामान्यादिति पूर्वपक्षसिद्धान्तभाष्यद्वयमेकहेलयाँ व्याचष्टे * तत्रापीति * इदानीं धर्मबुद्ध्यानुष्ठाने १०५।४
ऽपि पूर्वप्रवृत्तिकाले लोभादिमूलत्वसम्भवप्रदर्शनार्थं पूर्वग्रहणम् । लोभस्य मूलत्वसम्भवः पूर्वं कालान्तरे यस्मिन्कर्तृसामान्ये तस्मादिति हेतुगर्भं विशेषणम् । लोभमूलत्वसम्भवमुपपादयति * ऋत्विजो हीति * आशङ्काशब्देन लोभमूलत्वानिश्चये ऽपि वेदमूलत्वनिश्चयस्तावन्नास्तीति सूचितं, ननु वेदमूलत्वस्यापि सम्भवात्कथमप्रामाण्यनिश्चय इत्याशङ्क्य निराकरणार्थमुपपन्नतरं चेदिति भाष्यं व्याचष्टे * पूर्ववच्चेति * ननु वेदमूलत्वाभावनिश्चयाभिधानपरत्वे ऽस्य भाष्यस्य पूर्वलोभमूलत्वनिश्चयाभिधानपरत्वेन योजनमयुक्तं स्यादित्याशङ्क्याह * इदं चेति * दृष्टे सम्भवत्यदृष्टकल्पनमयुक्तमिति न्यायस्य वेदमूलत्वाभावान्यमूलत्वयोर्निश्चयकारणस्य तुल्यत्वादुभयत्रापि योजितामित्यर्थः । यथाभाष्यमधिकरणद्वयं व्याख्याय दूषयितुं प्रतिजानीते * एतावत्त्विति * सर्ववेष्टनस्मरणस्य लोभमूलत्वनिराकरणेन तुल्यन्यायतया यूपहस्तिदानादिस्मरणस्यालोभमूलत्वनिराकरणाद्धर्मबुद्ध्या चेदानीमनुष्ठीयमानानां दृष्टमूलत्वकल्पनासम्भवाद् * अधिकरणद्वये ऽपीत्युक्तम् * प्रत्यक्षश्रुतिविरोधे हि स्मृतिमूलश्रुत्यभावः साधकाभावाद्वा स्याद् बाधकसद्भावाद्वा तत्र त्रैवर्णिकदृढपरिग्रहादरस्य स्मृतिमूलश्रुतिसाधकस्य विरोधे ऽप्यनपायात्साधकाभावस्तावन्नास्तीत्याह * स्मृतीनामिति * यच्च जिज्ञासां विना प्रमाणाप्रवृत्तेः साधकाभाव इत्युक्तं तदेवं परिहर्तव्यं

यद्यपि परिच्छिन्ने प्रमेये तत्परिच्छेदार्थं श्रुत्यनुमानं न प्रवर्तते तथापि किमियं स्मृतिः प्रमाणमप्रमाणं वेति जिज्ञासायां तत्परिच्छेदार्थं श्रुत्यनुमानप्रवृत्तिर्न वारयितुं शक्यते। प्रमाणान्तरपरिच्छिन्नेऽपि शङ्खशौक्ल्ये शङ्खितपित्तोपघातस्य किं मे चक्षुर्दुष्टमदुष्टं वेति जिज्ञासया चक्षुर्विस्फुरणदर्शनात्परमाणवादौ च कदा चिदनुपलब्धत्वाद्व्यवहारानुपयोगित्वाच्च जिज्ञासिते ऽप्युपलब्धस्थूलादिकार्यानुपपत्तिपरिहारार्थं प्रमाणप्रवृत्तिदर्शनान्न जिज्ञासादरः। किं च स्मृतेर्मूलप्रमाणोपस्थापनमात्रेण कृतार्थत्वान्नौदुम्बरी प्रमेया तत्प्रमेयायाः श्रुतेः प्रत्यक्षश्रुत्यविषयत्वेन तया परिच्छेत्तुमशक्यत्वान्नानुमानप्रतिबन्धो युक्त इति। बाधकं तु स्मृतिमूलश्रुत्यभावव्याप्तं लिङ्गं विरुद्धश्रुतिदर्शनस्यानैकान्तिकत्वप्रतिपादनेन पूर्वपक्षवेलायामेव निरस्तम्। अनुपलब्धिस्त्वस्मदादीनां विप्रकीर्णशाखान्तरगतश्रुत्युपलम्भाशक्तेः स्मर्तृप्रत्यक्षस्य च स्मृत्यधिकरणसाधितत्वेनेदानींतनपुरुषान्तरप्रत्यक्षत्वस्य चोपनयादिस्मृतिमूलश्रुतिदृष्टान्तेनानुमानोपपत्तेः। सर्वान्प्रत्यसिद्धत्वान्नाभावसाधनायालमित्याह * शाखान्तरेति * न च स्मर्तृपुरुषाधीनप्रत्ययत्वमात्रेणानुमेयश्रुतिष्वनाश्वासः अध्यापकपुरुषाधीनप्रत्यक्षत्वेनेतरास्वप्यनाश्वासापत्तेरित्याह * तत्रेति * नन्वग्निहोत्रादिश्रुतीनां प्रत्यक्षत्वान्न तास्वनाश्वासापत्तिरित्याशङ्क्य वर्णस्वरूपस्य प्रत्यक्षत्वे ऽप्यनादिसम्प्रदायागतत्वस्य पुरुषाधीनत्वात्तुल्यतामाह * वेदो हीति * न च स्मरणार्थत्वेन १०३।४
पूर्वदृष्टघटादिवन्नित्यत्वानवधारणं शङ्क्यमग्निहोत्रादिश्रुतिष्वप्यविशेषादित्याह * अनुच्चारणकालेति * उपसंहरति *तेनेति* ननु वेदविरोधेन स्मर्तुरनाप्तत्वान्न मूलश्रुत्यनुमानं सम्भवतीत्याशङ्क्य प्रत्यक्षवेदमूलोपनयनादिस्मृतिप्रणेतृत्वेनावधारितत्वान्नाप्तभावस्य सत्त्वादेकदेशविरोधे ऽप्यनाप्तत्वकल्पनं न युक्तमित्याह * स्मृतीति * किं च नित्यानुमेयायाः श्रुतेर्न्यायेन बाधो युज्येतापि शाखान्तरपठितश्रुतिबाधे तु प्रत्यक्षविरोधाशङ्का दुःपरिहरेत्याह * बाधिता चेति * उपरिष्टात्तं इति शब्ददर्शनात्त्वया न्यायविदा भूत्वेत्यध्याहारेण योज्यम्। न चिरादित्यव्ययान्वये ऽपि नञो विभाषाधिकारे नञ्समासस्मरणान्न होतारं वृणीतइतिवदसमासान्नलोपाभावो न दोषः। प्रत्यक्षविरोधाशङ्क्या च त्वदुक्तस्य न्यायस्य सम्यक्त्वानवधारणान्न्यायाभासेन मूलश्रुत्यनुमानबाधाङ्गीकरणे मर्यादातिक्रमादिसर्वं पूर्वोक्तमपरिहार्यं स्यादित्याह *बाधेति* न्यायं

१ चवधारितत्वात्तस्य मन्वादेरिति २ पु० पा०।

दूषयित्वोदाहरणानि दूषयन्नाद्यं तावदुदाहरणं तामूर्ध्वदशेन वा
ससा परिवेष्टयन्तीति प्रत्यक्षश्रुतिमूलत्वात् दूषयति * यच्चैतदिति *
एतच्छान्दोग्यानुपपदे जैमिनिकृते सूत्रग्रन्थे जैमिनिनैवौदुम्बरीप्रक-
रणे चेत्यादिना दर्शयतीत्यन्तेन ग्रन्थेन शाट्यायनिब्राह्मणगतश्रुति-
मूलत्वेनान्वाख्यातमित्यन्वयः । शाट्यायनिनां शाखिनामौदुम्बरीप्रक-
रणे तामूर्ध्वदशेनेति श्रुतिरुभयत्र विष्टुत्यामौदुम्बर्यौ च वाससी द-
र्शयतीति जैमिनिग्रन्थस्यार्थः । उभयत्र शब्दः किं विषय इत्यपेक्षायां
वैष्टतइत्याद्युक्तं स्तोत्रीयपरिगणनार्थानामौदुम्बरीणां प्रादेशमात्राणां
कुशानां विष्टुतिशब्दवाच्यानां स्थापनार्थं वासो वैष्टुतमुच्यते । त-
स्मिन् श्रीर्वै वासः श्रीः सामेत्यर्थवादपुरः सरं प्रत्यक्षश्रुतिमूलत्वेन
दर्शिते तत्प्रसङ्गेनौदुम्बरीवेष्टनवाससा ऽपि प्रकाशश्रुतिमूलत्वमेवा-
न्वाख्यातं तामूर्ध्वदशेनेति प्रकृतौदुम्बरीपरामर्शिप्रतीकोपन्यासेनेत्य-
१०७।२ र्थः । उपसंहरति * ततश्चेति * अविरोधादपीदं नोदाहरणं यु-
क्तमित्याह * विरुद्धत्वे चेति * औदुम्बरी परिवेष्टयितव्येत्येतावन्-
मात्रं सूत्रकारेणोक्तं न सर्वेति तत्र यथोपनेष्यमाणमहतेन वाससा
छादयन्तीति चक्षुर्मुखानाच्छादने ऽपि शास्त्रार्थसम्पत्तिः प्रसिद्धा
तथात्रापि भवतीत्याशयः । ननु सर्वशब्दाभावे ऽपि परिशब्देनापि स-
र्वशब्दार्थसम्पत्तेर्विरोध इत्याशङ्क्याह * यदीति * औदुम्बर्यावुत्त-
रदेशे पृष्टेन तां स्पृशतोदङ्मुखेनोपविष्टेनोद्गातव्यं तेन चौदुम्ब-
रीमध्यस्योत्तरभागे द्वित्राङ्गुलमात्रं स्पृश्यते तदनुरोधेन चोत्तरभा-
गतो मध्ये द्वित्राङ्गुलं विमुच्यते सर्ववेष्टने ऽपि परिशब्दार्थसम्पत्तेर-
विरोध इत्यर्थः । एतदेव श्लोकद्वयं यथाक्रमं श्लोकद्वयेन विवृणोति
* सर्वेति * भाष्यकारेण गौरवात्कस्मिंश्चित्सूत्रे कल्पे वा सर्वश-
ब्दो भविष्यतीति कल्पनां निराकर्तुं * न हीत्युक्तम् * सर्ववेष्टन-
वचने हि कर्णयोर्वेष्टनं कृत्वा वंशो निधयो मूलं च वेष्टयित्वा निखा-
तव्यं स्यान्न चैवं याज्ञिकाः कुर्वन्ति परिशब्दस्तु समन्तार्थः सर्वतो
देशवेष्टनं ब्रूते । न कृत्स्नाया इत्यौदुम्बरीमध्योत्तरभागा द्वित्राङ्गुलव-
र्ज्जितसर्वौदुम्बरी वेष्टने ऽप्यर्थवानित्यर्थः । हेतुदर्शनोदाहरणत्वम-
प्यस्य न सम्भवतीत्याह * लोभमूलं चेति * यदि तर्हि शब्दार्थयो-
र्यत्तदित्यन्वये मूलाग्रयोश्च वंशाधारयोः कर्णयोः परिधाने वेष्टने
दीर्घवासोलाभाल्लोभमूले तदनुष्ठाने याज्ञिकाचारविरोधः स्यादित्यर्थः
. अयं चापरो ऽचारविरोधो लोभमूलत्वे प्रसज्येतेत्याह * अन्तरीयेति *
पूर्वापरकाययोरन्तरस्य मध्यस्य परिधानार्थमधोवासो नान्तरीयैकदे-
शस्य कल्पयित्वान्तरीयतामाचामेदिति प्रयोगदर्शनादन्तरीयशब्देनो-

च्यते।अधरीयोत्तरीये हीत्यपि पाठे तदेवाक्तम्। कोशेयस्य गुणाभावात्कार्पासस्य गुणराहित्यम्। लोमभूलत्वे च कुशवेष्टनपूर्वकत्वोर्ध्वदेशत्वनियमो न स्यातामित्याह *प्राक्चेति* उदाहरणान्तरमपि दूषयति * किं चेति * अष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्य चाष्टाचत्वारिंशद्वर्षे सर्वे वेद ब्रह्मचर्यामित्यादि अथ सर्ववैदिकविहितत्वादनुदाहरणता चकारसूचिता पूर्वोक्तबलाबलविशेषं निराकरोति * यदीति * किं तदर्थान्तरमित्यपेक्षयामाह * शान्तीति * न चास्यानारभ्याधीतन्यायेन दौर्बल्यम् । तस्य कल्प्यक्रतुसम्बन्धमनारभ्याधीतं फलसं क्रतुसम्बन्धात्प्रकरणाधीतादू दुर्बलं· क्रतुसम्बन्धविप्रकर्षादित्येवंरूपस्य क्रत्वङ्गविषयत्वादस्य च क्रत्वङ्गविषयत्वाभावादित्याह * न चेति * एतदेवोपपादयति * न हीति * विरोधपरिहारस्तर्हि कथ- १०८।१
मित्यपेक्षयामाह * वाक्यान्तरैरिति *

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक्सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च ॥

इत्याशौचच्छेदकालानां यथा व्यवस्थितो विकल्पस्तथेहापि भविष्यतीति व्यवस्थितविकल्पसूचनाय दृष्टान्ताभिधानं परत्वाशौचकालानाम् ।

एकाहाच्छुद्ध्यते विप्रो यो ऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु·द्विहीनो दशभिर्दिनैः ॥

इति वचनान्तरेण (दन्तजातपदेन वर्द्धमानोपलक्षकः कुमारादनुजातपदेन वध्वोपलक्षकः क्रतचूडपदेन वर्षत्रयोपलक्षकः ।[1])

दन्तजाते ऽनुजाते च क्रतचूडे च संस्थिते ।
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥

इत्युपक्रमानुसारेण वा व्यवस्थावगमान्न तदूदृष्टान्तेनेह विकल्पाङ्गीकरणे युक्तमित्यगृहीताभिप्रायः शङ्कते * ननु चेति * अग्निवेदसमन्वितस्य दशाहाशौचानुवृत्तावुभयसाध्यहोमजपादिलोपाद्भूयसी धर्मपीडा स्यात्केवलवेदस्य तन्मात्रसाध्यजपादिलोपादल्पा द्विहीनस्याल्पतरेति धर्मपीडाल्पत्वमहत्वापेक्षया आदिशब्दाज्जातदन्ताद्यपेक्षया चाशौचकालो ऽपि व्यवस्थितविषय इत्यध्याहारेण योज्यम् । उभयत्र समविकल्पानाश्रयणे कारणं पक्षयोरसाम्यं तावदाह * यस्य हीति * यस्तु विरोधं चापरं विकल्पानाश्रयणे कारणं दृष्टान्ते तावदाह * एकरात्रइति * दार्ष्टान्तिके ऽप्याह * एवमिति * ननु यो ऽल्पेन कालेनाहं

१ अयं पा० २ पु० ना० ।

शुद्धः स्यामिति सङ्कल्पयति तस्याल्पेन कालेन शुद्धिः बहुकालसङ्कल्पे तु बहुनेति परिग्रहव्यवस्थया ऽशौचकालानामविरोधः । यश्चाहमक्षीतराजकस्य दीक्षितस्यान्नं न भोक्ष्यइति सङ्कल्पयति तं प्रति तावत्कालमभोज्यान्नता पशुसंस्थावधिसङ्कल्पे तावत्कालमित्युभयत्रापि वस्तुविरोधपरिहारमाशङ्कते * स्यादेतादिति * यथा यः प्रागुदये सूर्योदयोत्तरकाले ऽग्निहोत्रं होष्यामीति सङ्कल्पयति तं प्रत्युदयोत्तरकालो ऽग्निहोत्राङ्गं यस्तूर्ध्वोदये सूर्योदयात्प्राक्काले होष्यामीति सङ्कल्पयति तं प्रत्यसाविति परिग्रहाव्यवस्थाया प्रागूर्ध्वोदययोः कालयोरविरोधस्तथेहापीत्यर्थः । प्रागूर्ध्वं चोदयो याभ्यामिति विग्रहः । सर्वेष्वपि वैकल्पिकेषु व्रीहियवादिषु परिग्रहव्यवस्थायै वाविरोध इति समविकल्पत्वाविघातः । आशङ्कितो विकल्पे इमं परिहारं दूषयति * युक्तमिति * परिग्रहव्यवस्थया वस्तुविरोधपरिहारो वाभिप्रेतो ऽनुष्ठानविरोधपरिहारो वा तत्र वस्तुस्वरूपस्य पुरुषेच्छाधीनत्वान्न तद्वशेन वस्तुविरोधपरिहारः सम्भवति उदितानुदितहोमयोस्त्वनुष्ठानात्मकत्वाद्वस्तुविरोधो नास्त्यनेन श्लोकेनोक्तम् । अथानुष्ठानविरोधपरिहारः परिग्रहव्यवस्थयानेन दृष्टान्तेनोच्यते तदप्ययुक्तं पक्षद्वयस्य हि साम्ये सति पुरुषेच्छावशाद्विकल्पेनोभयानुष्ठानं युज्येत दृष्टान्ते च पक्षद्वयसाम्यात्तद्युक्तमित्याह * न चेति * क्लेशः शरीरायासः क्षयो न्यूनद्रव्यत्वं व्ययो ऽत्यन्तनाशः । आदिशब्दात्तत्कालीनलौकिककार्यान्तरबाधः । दार्ष्टान्तिके तु सिद्धे वस्तुनि सदसत्त्वविरोधस्यापरिहार्यत्वाद्विकल्पो * न सम्भवतीत्युक्तम् * न च दीर्घकालस्य परिग्रहः सम्भवत्याशौचाहवृद्धेर्निषिद्धत्वादित्याह
१०९।१ * इह त्विति * न केवलं सदसत्त्वविरोधान्निवार्यते किं त्वनेनापि मनुवचनेनेत्यपिशब्दार्थः । ननु दीक्षितान्नभोज्यत्वस्य दीर्घकालत्वनिषेधाभावात्परिग्रहव्यवस्थयानुष्ठानविरोधपरिहारो भविष्यतीत्याशङ्क्योभयत्राप्यल्पकालनिरोधेन कृतार्थस्य बहुकालनिरोधे प्रवृत्त्यसम्भवाद्दीर्घकालवाक्ययोरानर्थक्यमेवापद्येतेत्याह * कुशेति * उभयत्रापि समविकल्पासम्भवमुपसंहरति * तेनेति * वस्तुविरोधात्पक्षयोश्चासाम्याद्विषयान्यत्वमेव विरोधपरिहाराय वाच्यं न तु विकल्पो युक्त इत्यर्थः । स चान्यो विषयो दृष्टान्ते दर्शित इत्याह * स चेति * ननु यस्यापि धर्मपीडा नास्ति तस्याप्याशौचाहवृद्धेर्निषिद्धत्वान्नेयं विषयव्यवस्था युक्तेत्याशङ्क्य निषेधो ऽपि तद्विषय एवेत्याह * तत्र चेति * धर्मपीडाद्यपेक्षयेत्यादिशब्दसूचितमाशौचकालानां व्यवस्थान्तरमाह * दन्तेति * आहिताग्न्यादिपाठा-

ज्जातशब्दस्य परनिपातः। मानवीयानुदात्तपदस्यानुपश्चाज्जातमपत्यं यस्मादिति व्याख्यानार्थो ऽन्यशब्दप्रक्षेपः। चितिक्रियाशब्दश्चतुरहोपलक्षणार्थः चितिक्रियाऽन्यहैकाहा ये विहितास्ते दन्तजातादिविषया इत्यर्थः। पारिशेष्याद्दशाहं कृतचूडे चेति चकारसूचितोपनीतविषयो ऽवगम्यते। कथमेषा व्यवस्था प्रतीयतइत्यपेक्षायां * क्रमादित्युक्तम् * दन्तजातादिषु संस्थितेष्वशुद्धा बान्धवा इत्युक्ते कस्मिन्संस्थिते कियन्तं कालमशुद्धतेत्यपेक्षायां दशाहादीनामुक्तत्वात्स्मृत्यन्तरपर्यालोचनया प्रातिलोम्यक्रमेणेयं व्यवस्था प्रतीयतइत्यर्थः। अस्मिंश्च पक्षे वृद्धिनिषेधो ऽप्येकशास्त्रगतत्वादेतद्विषय एवेत्याह * तत्र चेति * नन्वस्तु प्रातिलोम्यक्रमेणैकाहादीनां दन्तजातादिविषयत्वं धर्मपीडाल्पत्वविषयत्वे तु किं कारणं दक्षवचनाच्चाग्निवेदसमन्वितादिमात्रविषयत्वं प्रतीयते, न चाग्निवेदसमन्वितत्वं धर्मभूयिष्ठत्वेन नियतं दाम्भिकादौ व्यभिचारदर्शनादित्याशङ्क्य दक्षवचनस्य धर्मपीडाविषयत्वद्योतनार्थं गौतमवचनमुदाहरति *तथेति* कार्यशब्दस्य धर्मविषयत्वात्तत्साहचर्येण च स्वाध्यायशब्दस्यापि स्वाध्यायसाध्यजपादिधर्मविषयत्वप्रतीतेस्तद्विघातार्थं सद्यः शौचं विदधतालपाशौचस्य धर्मपीडापरिहारार्थत्वद्योतनान्महत्यामापद्यग्निवेदसाध्यकर्मानुष्ठानं विना प्रतीकारासम्भवे ऽनुष्ठात्रन्तराभावे वा तत्प्रतीकारार्थकर्मानुष्ठानमात्रविषयाशौचाभावप्रतिपादनपरमेकाहाच्छुद्ध्यते विप्र इति दक्षवचनं व्याख्येयमिति भावः। यथास्माभिर्दक्षवचनस्य धर्मपीडापरिहारार्थत्वाङ्गीकरणेनाल्पाशौचकालानां * तद्विषयत्वमुक्तम् * गौतमेनापि तथोक्तं द्योतितमित्यर्थः। नन्वेवं सति तत्कालमात्राशौचाभावप्रतिपादनपरत्वेनोत्तरकालानुवृत्तेरनुज्ञातत्वाज्ज्ञातदन्तादिविषयाणां चाशौचकालानां भिन्नविषयत्वेन वृद्धेरप्रसक्तत्वान्निषेधो न युक्त इत्याशङ्क्य विषयान्तरमाह * अथ वेति *

अन्तर्दशाहात्स्यातां चेत्पुनर्मरणाजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम्॥

इति पूर्वाशौचासमाप्तावाशौचान्तरनिमित्तसन्निपाते पूर्वाशौचकालशेषेण मनुना शुद्धिमुक्त्वा निमित्तावृत्तौ नैमित्तिकाशौचानावृत्तिरन्याय्येत्याशङ्कानिराकरणार्थं पूर्वाशौचपरिच्छेदार्थप्रवृत्तेन दशाहादिना प्रसङ्गेनान्तः पतितस्याशौचान्तरस्यापि परिच्छेत्तुं शक्यत्वादाशौचानावृत्तेर्न्याय्यत्वं न वर्द्धयेदहानित्यनेनोक्तामिति भावः। एतदेव विवृणोति *न वर्द्धयेदिति* प्रसङ्गन्यायमात्रं योजयति *अ-

वृत्त इति * नन्वसमाप्तेनापि दशरात्राद्यवधिना शौचान्तरस्यैकदेशवर्त्तिनः कथं व्याप्तिरित्याशङ्क्याह * वितत्येति * नात्राह्नामाशौचपरिच्छेदकत्वं किं तु संख्यायाः तस्याश्च व्याप्यवृत्तित्वेनान्त्ये ऽहन्युपजायमानायास्तत्कालवर्त्तित्वाविशेषात्पूर्वापरीभूतानेकाशौचापरिच्छेदकत्वमविरुद्धमित्याशयः । नन्वेवं तर्हि पूर्वाशौचकालशेषेण तदन्तःपात्याशौचान्तरनिवृत्तेर्न्यायसिद्धत्वाद्वचनान्तरानर्थक्यं स्यादित्याशङ्क्याह * शुद्धीति * अयमाशयः । शब्दैकसमधिगम्यो ऽर्थो न स न्यायस्य विषयः तथा सत्यपेक्षाबुद्धिहेतुकत्वेनैकत्वातिरिक्तसंख्यायाः संख्येयाहर्विशेषसमूहापेक्षत्वात्तस्य च जातमृतबन्धुभेदेन जन्ममरणावधिभेदेन भेदाज्जन्ममरणसामान्यविवक्षायां शावेन सूतिशुद्धेरसम्भवादाशौचनिमित्तसामान्यविवक्षायां वा सूत्यापि शावशुद्ध्यापत्तेः । यत्तु न वर्द्धयेदधाहानीत्यनेन शेषाहः शुद्धेर्न्यायमूलत्वदर्शनं तच्छुद्धिप्रतीक्षिजातोष्टिमासिकादिमात्रविषयशेषशुद्ध्यभिधानशङ्कानिवृत्त्यर्थमिति । नन्वेवं तर्ह्याशौचकालवद्दीक्षितान्नकालयोरपि व्यवस्थैवास्तु व्यवस्थितः कल्पो विकल्प इति तु व्युत्पत्त्या व्यवस्थामेव विकल्पशब्देनाभिप्रेत्याशौचच्छेदकालवदित्युक्तमित्याशङ्क्याह * नन्वेवमिति * अस्मिन्विषये अयमवधिरिति विषयव्यवस्थितौ ऽवधिर्विषयावधिरिति मध्यमपदलोपीसमासः तस्य कारणं विषयविशेषावधिव्यवस्थापकं कारणं भोजनान्वये ऽप्यवधेर्नित्यमवधिसापेक्षत्वात्कारणशब्दसमासाविघातः।तस्माद्दार्ष्टान्तिके विकल्पव्यवस्थयोर्द्वयोरप्यसम्भवाद्विरोधपरिहाराशक्तेर्दीर्घावधेश्चाल्पावधिबाधं विनात्मलाभायोगादल्पावधेर्बाध इत्याशङ्किता स्वाभिप्रेतसिद्धिमुपसंहरति * तत्रेति * एवमाशङ्किते विरोधपरिहारवादी स्वाभिप्रायं प्रकटयति * तस्मादिति * यस्मादल्पावधेरपि वैदिकत्वात् बाधो न युक्तः तस्मादशौचच्छेदकालवदिहापि भोजनावधिद्वये वैषम्यस्य व्यवस्थाया हेतुर्विषयभेदो वाच्यो न तु कस्य चिद् बाध इत्यर्थः । कीदृशो विषयभेद इत्यपेक्षायामाह * अत्रापीति * अनापद्यपि वा दीक्षितनियुक्तपुरुषान्तरदत्तान्नस्य राजक्रयोत्तरकालं भोज्यत्वमिति परिहारान्तरम् * दीक्षिते वेत्युक्तम् * अत्र सत्रिणो ह्यन्यैः प्रदापयेदन्नं भोज्यं तद्द्विजसत्तमैरिति स्मृतिपर्यालोचनया सूतकादिसन्निपातभयान्मासादिपर्यन्तं ब्राह्मणभोजनार्थमन्नमुपकल्प्यान्यमन्नं दानाय नियुञ्जते अग्नीषोमीयोत्तरकालं तु दीक्षितदत्तान्नभोजनमप्यदुष्टमित्याशयः । एतच्च परिहारान्तरं दीक्षितो ददातीति निषेधेन अग्नीषोमीयोत्तरकालमपि दी-

क्षितस्यान्नदानायोगादापातप्रतिभानमात्रेणापारमार्थिकमेवोक्तमित्यपिशब्देन सूचितम्। नन्वन्नान्तरासम्भवे ऽपि निषिद्धान्नभोजनं न कार्यमित्याशङ्क्याह * आपद्धर्मइति * ननु करिष्यमाणप्रायश्चित्तबलेनापत्काले ऽप्यनुष्ठितस्य निषिद्धस्य निर्दोषत्वाभावादनुज्ञाशास्त्रमप्रमाणमित्याशङ्कते * हन्तैवमिति * आपद्यपि निषिद्धानुष्ठानस्य दोषत्वोपपादनायेतिहासमुदाहरति * जग्धवानिति * स च दोषं प्राप्तवानितिशेषः। श्वमांसभक्षणास्यानन्नज्ञानात्सदोषत्वं क्रीतराजकान्नभोजनस्य त्वनुज्ञानान्निर्दोषत्वमिति परिहरति * उच्यतइति * विशेषरूपेणानुज्ञानस्यात्यन्तनिर्दोषत्वसूचनार्थम् * महानित्युक्तम्। नन्वापत्काले निषिद्धान्नभोजनस्य। ११०।२

जीवनात्ययमापन्नो यो ऽन्नमत्ति यतस्ततः।
आकाश इव पङ्केन न स पापेन लिप्यते॥

इति सामान्येन मनुनानुज्ञातत्वाद्विशेषानुज्ञानर्थिकेत्याशङ्क्याह * सामान्येनेति * अनुज्ञासाफल्यप्रदर्शनार्थः स्तोकशब्दः। सामान्यानुज्ञातानुष्ठानस्य अल्पदोषत्वं कथमवगम्यतइत्यपेक्षायामाह * तथा चेति * विशेषानुज्ञातादन्येषां निषिद्धानां पापत्वे ऽपि तानि शेषाण्यल्पानीति अल्पवाची शेषशब्दः अन्ते शौचं भविष्यतीत्यापद्धर्मगतं प्रत्युक्तमितीतिकारणाध्याहारेण योज्यम्। मनुवचनमुदाहरति * कर्मणेति * ननु कथं धर्ममाचरेदित्यस्य शौचविधानार्थतावसीयतइत्यपेक्षायामाह * धर्मश्चेति * फलार्थस्य धर्मस्य वाक्यान्तरविहितत्वेन विध्यानर्थक्यादापत्कालीनस्य वा कार्यकरणस्य निर्दोषत्वे धर्माधिकारनिवर्त्तकत्वायोगात्प्रतिप्रसवार्थमपि विध्यनुपपत्तेः सदोषत्वे वा प्रायश्चित्तं विना धर्माधिकाराभावात्प्रायश्चित्तविधानार्थमेवेदं वचनमिति भावः। अतो विशेषानुज्ञानस्यात्यन्तनिर्दोषत्वज्ञापनार्थत्वान्नानर्थक्यमित्युपसंहरति * यत्त्विति * ननु क्रीतराजकान्नभोजनस्यात्यन्तनिर्दोषत्वे द्वितीयो ऽधिरनर्थकः स्यादित्याशङ्क्यानापदि सदोषत्वात्तद्विषयो ऽसाविति दर्शयितुमाह * तत्रापि त्विति * एवमाशौचच्छेदकालवदापदनापद्विषयत्वेनावधिद्वयस्य व्यवस्थामुपपाद्याशौचकालानां जातदन्तादिविषयत्वपक्षे तत्साम्यार्थमन्यथा व्यवस्थामाह * यदि वेति * कालवैषम्यात्समविकल्पत्वाभावे ऽप्यविरोधो ऽवधार्यतइत्यपि शब्दाध्याहारेण योज्यम्। कथमित्यपेक्षायाम् *अर्थभेदव्यवस्थानादित्युक्तम्* तस्माद्दीक्षितस्याविज्ञातस्य क्रीतराजकस्याभोज्यं भवतीत्यार्थर्ववैदिकस्य दीक्षिताभोजननिषेधो ऽर्थस्तस्य तस्माद्दीक्षितस्य विज्ञातस्य क्रीत-

राजकस्य भोज्यं भवतीत्याथर्ववैदिको ऽवधिर्न दीक्षितस्याश्नीयादिति त्रयीगतस्याभोजनसङ्कल्पविधिरर्थः । तस्य त्रयीगतोवधिरिति त्रय्यथर्ववेदगतयोर्वाक्ययोरर्थभेदेन तद्विषयतया विधिद्वयस्य व्यवस्थानादविरोध इत्यर्थः अर्थभेदं दर्शयति * दीक्षितान्नमिति * नित्यत्वप्रदर्शनार्थम् * ध्रुवमित्युक्तम् * न भोक्ष्यइति भोजनविषयो मनोव्यापारः सङ्कल्पो विधीयतइत्यर्थः नन्वभोजननियमस्यापि भोजननिषेधार्थत्वात्तत्करणे दोषापत्तेः क्रीतराजकस्याप्यभोज्यान्नत्वं स्यादित्याशङ्क्य फलार्थं वर्ज्जनीयस्यानुष्ठानं न दोषापादकमिति दर्शयितुं दृष्टान्तद्वयमाह * यथैवेति * श्राद्धभोजनमांसभक्षणयोरपि निषिद्धत्वेन दोषवत्त्वात्साध्यविकलत्वाशङ्कानिराकरणार्थं न * सर्वत्र निषिध्यतइत्युक्तम् * क्व निषिद्धता क्व वा नेति विवेकापेक्षायामाह * श्राद्धमिति * सदेति सपिण्डीकरणात्प्रागूर्ध्वं चेत्यर्थः । सपिण्डीकरणोत्तरकालमप्येकोद्दिष्टमप्यन्येषां स्मर्तॄणां मतेनानिषिद्धमिति द्योतना * यैकेषामित्युक्तम् * प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थात्सपिण्डीकरणात्प्राक् पार्वणस्याविधानेन सपिण्डीकरणानन्तरभाविपार्वणश्राद्धस्येत्यादिप्रेतश्राद्धस्याभावात्पित्र्यशब्देनाभिधानम् । मांसभक्षणे ऽपि विवेकमाह * तथेति * एतदेव मनुवचनेन द्रढयति * यथाहेति * श्राद्धभोजनमांसभक्षणाभ्यां दीक्षितान्नभोजनस्य वैषम्यमाशङ्क्ते * ननु चेति * निःश्रेयसेन कारणेन प्रयोजनेनेति चतुर्थ्यर्थे तृतीया निःश्रेयसार्थं नियमयतीत्यर्थः । न दीक्षितस्याहनीयादित्यस्याथर्ववैदिकवच्छ्रुतशब्दसामानाधिकरण्यविकल्पप्रसक्तिरूपपर्युदासकारणाभावान्निषेधार्थत्वप्रतीत्यविशेषेण स्वरूपभेदे ऽप्यर्थैकत्वमभिप्रेत्य वाक्यैकत्वाभिधानम्।अन्यत्राव्युत्पादितमप्यवधिद्वयान्यथानुपपत्तेः पर्युदासकारणत्वं न्यायोपेतत्वादिहाङ्गीकार्यमित्यभिप्रायेण परिहरति * स्यादिति * प्रत्यक्षस्यापि वाक्यद्वयस्याभिन्नार्थत्वं न्यायकलपमभिप्रेत्य * कल्पितमित्युक्तम् * कथमवधिद्वयेन भिन्नार्थत्वकलपनेत्यपेक्षायामाह * यः पूर्वइति * यः प्रतिषेधः स क्रीतराजके स्थितो निवृत्तः कथं निवृत्ततावसीयत इत्यपेक्षिते * पूर्वइत्युक्तम् * अक्रीतराजकस्येति क्रयप्राग्भावावगमात्प्रतिषेधस्योत्तरकालं व्यापाराभाव इत्यर्थः। ततश्च तस्य केवलप्राग्भावित्वेनैकरूपत्वाद्वितीयो ऽवधिर्नावकल्पतइत्येकत्वादित्यनेनोक्तम्। यदि ह्यसौ प्रतिषेधो राजक्रयात्प्रागुत्तरकालं च व्याप्रियेत ततस्तस्यैवापदनापद्वियत्वेनावधिद्वयमवकल्पेत । अतो ऽन्यथानुपप-

१ तत्सर्वत्र त्युक्तमिति २ पु० पा० ।

स्याथर्ववैदिकादन्यस्य त्रयीगतस्य पर्युदासार्थत्वं कल्पनीयमित्याह * द्वितीयेति *नन्वभोजनविधित्वे ऽपि तत्र कालविशेषाश्रवणात् क्रीते त्वभोजनं नामेति निष्प्रमाणमित्याशङ्क्य * अथान्तरालिकइत्युक्तम् * निषेधेनैव प्राग्वर्जनसिद्धेः पर्युदासानर्थक्याद्राजक्रयाग्नीषोमीयान्तरालकालविशेषवत्त्वमपि निश्चीयतइति भावः। दृष्टान्तं विवृणोति * यथेति * देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति निर्वापमन्त्रे सवित्रश्विपूषशब्दानामसमवेतदेवताप्रकाशनार्थत्वायोगादन्यदेवत्यायां विकृतावनूहे प्रतिपादिते किमर्थस्तर्हि सवित्रादिशब्दप्रयोग इत्याशङ्क्य सवित्रादिशब्दानां यजमानपरत्वात्प्रसवशब्दस्य चानुज्ञार्थत्वाद्यजमानानुज्ञाप्रकाशनार्थत्वे ऽभिहिते यजमानबहुत्वे तर्ह्यूहो भविष्यतीत्याशङ्क्य पूर्वानुज्ञातत्वेनेदानीं तत्प्रकाशनानर्थक्यान्निर्वापस्तुत्यर्थत्वेन तत्प्रकाशनस्य पारार्थ्याद्यज्ञपतिशब्दवदनूह इति निगमसिद्धो दृष्टान्तः। ननु निर्वापकाले ऽपि यजमानहविर्निर्वप्स्यामीत्यध्वर्युणानुज्ञायां पृष्टायामों निर्वपेति यजमानेनानुज्ञानात्तदनुसन्धानार्थं निर्वापमन्त्रे प्रकाशनं भविष्यतीत्याशङ्क्यानिरासार्थं * तदानीन्तनेत्युक्तम् * पूर्वमेवानुज्ञातत्वान्न निर्वापस्तुत्यर्थमिति भावः। दार्ष्टान्तिके योजयति * तथेहेति * उभयथापि सम्भवे तर्हि कथं पर्युदासत्वावधारणेत्याशङ्क्य न होतारं वृणीतइति तद्विकल्पप्रसक्त्यैव पर्युदासत्वावधारणमाह *प्रतिषिद्धेति * क्रयोत्तरकालमर्थप्राप्तदीक्षितान्नभोजनप्रतिषेधे पूर्वप्रतिषेधगतस्याक्रीतराजकस्येति विशेषणस्यानर्थक्यापत्तेः शास्त्रानुज्ञातप्रतिषेधस्याभ्युपगमनीयत्वाद्विकल्पप्रसक्तिरित्यर्थः। उपसंहरति * दीक्षितान्नेति * ननु माभूदनुज्ञाग्नीषोमीयोत्तरकालं दीक्षितान्नभोजनस्य विधिरयं भविष्यतीत्याशङ्क्य दृष्टार्थस्यादृष्टार्थत्वायोगाद्विशिष्टविधौ च गौरवापत्तेः फलाश्रवणात्प्रकृताश्रयालाभादनेकगुणोपादानाच्च फले गुणविध्ययोगाद्विधित्वं युक्तमित्याह * अदृष्टार्थेति * न दीक्षितस्याश्नीयादित्यस्य त्वदृष्टार्थतोभयसाधारण्याददूषणम्। द्वितीयानुपपत्त्या च पर्युदासत्वं न्याय्यमेवेति भावः। को ऽनयोः पक्षयोर्मध्ये सम्मत इत्यपेक्षायामापद्विषयत्वे ऽनुकल्पत्वेन स्वरसावगततुल्यकल्पत्वबाधापत्तेरथर्ववैदिकस्य च निषेधस्यावध्यनपेक्षत्वेन तस्मादीक्षितस्य विज्ञातस्य क्रीतराजकस्य भोज्यं भवतीत्यस्यावधिसमर्थकत्वायोगाच्छ्रेयो ऽर्थमयं यजते न प्रायश्चित्तार्थमित्येवं विज्ञातस्य क्रीतराजकस्यान्नमदुष्टमेवेत्यवध्यन्तरदर्शनजनितदोषाशङ्कानिराकरणार्थत्वप्रतीतेर्द्वितीयस्य पक्षस्य सम्मतत्वं दर्शयितु- ११२।१

माह * एवमिति * ऐतरेयब्राह्मणगतस्य त्वशितव्यं वपायां हुतायामित्यस्याग्नीषोमीयसंस्थावधिवाक्यवत्पर्युदस्तदीक्षितान्नभोजनानुज्ञानार्थत्वे ऽपि बह्वल्पफलगुरुलघुकलप्त्वेनावधिद्वयव्यवस्थानादविरोध इत्येवंशब्देन सूचितम् । पर्युदस्तानुज्ञानार्थत्वसाम्येन चैतदवधिद्वयमेकीकृत्यावधिद्वयोपन्यासः अष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्मृत्युदाहरणमपि दूषयति * अष्टेति * स्मार्त्तत्वेन तुल्यत्वाद्विकल्पेनाविरोधं वक्तुं * स्मृतावेवेत्युक्तम् * स्मार्त्तत्वाविशेषे ऽपि पक्षाणामसाम्याद्विकल्पानुपपत्तेरपरितोषाद्विषयव्यवस्थां वक्तुमाश्रयान्तरेत्युक्तमिति विवेकः । कीदृशानि पक्षान्तराणीत्यपेक्षिते मनुवचनं तावदुदाहरति * तथा हीति * अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेदित्युत्तरार्द्धं तत्र द्वेधा विषयव्यवस्थामाह * सामर्थ्येति * यो ऽल्पेन कालेन बहून्वेदानध्येतुं समर्थस्तं प्रति बहुवेदपक्षो ऽसमर्थं प्रत्यल्पवेदपक्ष इति सामर्थ्यमङ्गीकृत्यगार्हस्थ्याश्रमायोग्यं प्रति बहुवेदपक्षस्तद्योग्यं प्रत्यल्पवेदपक्ष इत्याश्रमयोग्यत्वमङ्गीकृत्यापेक्ष्यैतन्मनुनोच्यतइत्यर्थः ।

इह षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवैदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥

इति मनुनैवोक्तत्वात् ग्रहणान्तिकपक्षे सामर्थ्यापेक्षावर्षसंख्यापक्षे त्वाश्रमयोग्यत्वापेक्षेति विवेको ऽवसीयते ।अष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्मर्त्रा गौतमेनापि पक्षान्तरमुक्तमित्याह*गौतमेनापीति*तत्राप्यष्टाचत्वारिंशत्पक्षो गार्हस्थ्याश्रमायोग्यविषय इत्याह * तत्रैवमिति * नन्वाश्रमान्तरं तान्प्रति कस्मान्न विधीयतइत्याशङ्क्य तेषां बहुक्लेशत्वादविरक्तानधिकाराच्चाल्पक्लेशबहुफलोपकुर्वाणकत्वेनैव बहुकालक्षपणायैतद्विधानमित्याह * नैष्ठिकेति * उपकुर्वाणको ऽध्ययनार्थं गुरूकुलवासी ब्रह्मचारिविशेषः । गमिष्यतीत्येतदुच्यतइत्यन्वयः । स्वाध्यायमात्रेणेष्टगतिप्राप्त्युपपादनार्थं द्वैपायनवचनमुदाहरति * द्वैपायनादयश्चाहुरिति * ब्रह्मयज्ञफलातिशयोपयोगितापि स्वाध्यायतदर्थज्ञानभूयस्त्वस्यास्तीत्याह * यानि चेति * प्रतिदिनं प्रतिदिनं प्रयुज्यमानैर्ऋगादिभियों ब्रह्मयज्ञः तन्निमित्तानि यानि यं यं क्रतुमधीयित तस्य तस्याप्नुयात्फलमिति क्रतुसाध्यानि फलानि क्रत्वधिकृतेभ्यो गृहस्थवानप्रस्थेभ्यो निवृत्तत्वादनधिकृतविषयत्वेनावतिष्ठन्तइत्यर्थः । ब्रह्मयज्ञस्याग्निहोत्रादिवन्नित्यकाम्योभयरूपत्वाद्यथायोगं व्यवस्था न विरुद्धेत्याशयः । द्वादशवर्षपक्षो ऽपि गौतमीयेनैव शीघ्रवेदग्रहणसमर्थविषयेण ग्रहणान्तं वेति पक्षान्तरस्मरणेन

११३।२

स्वविषयाद्यावर्त्तितत्वान्न सर्वैरुद्देश्यविषय इत्याह * यो वेति * वाशब्दो ऽष्टाचत्वारिंशत्पक्षविषयः पूर्वपक्षीकृतौ स्वविषयाद्यावर्तितावित्यर्थः उपसंहरति * इतीति * भाष्यमङ्गमुपसंहरति *तेनेति * स्वयं द्वेधा सूत्रद्वयं व्याचष्टे * तेनात्रेति * ननु न्यायनिष्ठत्वान्मीमांसायाः प्रयोगनिरूपणमयुक्तमित्याशङ्क्य प्रयोगार्थत्वाश्रयस्य तत्साम्ये ऽपि यत्र प्रयोगवैषम्यं तत्र तन्निरूपणीयमित्याह * एतद्धीति * किं प्रतिपाद्यतदित्यपेक्षायामाह * यावदिति * ननूभयोः प्रामाण्ये कथं नियमेनैकार्थानुष्ठानामित्याशङ्क्याह * व्रीहीति * व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्य इत्याग्रयणे ऽवधिव्यवस्थया व्रीहियवव्यवस्थाविधानादग्निहोत्री वै नानादयित्वात्तस्याः पयसा जुहुयादित्येतत्पक्षाश्रयणाविषयो ऽत्रत्यो यावज्जीवशब्द इति प्रागेवोपपादितं श्रुत्या सह तुल्या कक्षा यस्याः सा तथोक्ता अनुष्ठाननियमे कारणमाह * यानीति * ११४।१
वेदवचनस्य विश्रम्भणीयत्वं वदता स्मृतेर्यथाश्रुतमूलानिश्चयेनाविश्रम्भणीयतार्थादुक्ता । कथमस्मिन्नर्थे सूत्रं योज्यमित्याशङ्क्याह * सूत्रार्थो ऽपि चेति * यकाररहितः पूर्वपाठः तत्सहितो द्वितीयः तावच्छब्दाध्याहारे कारणमाह * तदानीन्तनेति * तावत्कालीनव्यवहारप्रतिपादनार्थत्वाङ्गीकरणे प्रयोजनमाह * ततश्चेति * आशङ्काशब्दो यथाश्रुतमूलानिश्चयाभिप्रायः मात्रशब्दव्यावर्त्त्यमाह * यदा त्विति * ननु प्रामाण्यस्य तुल्यत्वे ऽपि केन चिद्विशेषेणैकार्थादरे भिन्नशाखागतयोरुदितादिश्रुत्योरपि पठितत्वविशेषेणैकार्थादरापत्तेरेवं प्रातरूपोदयं व्युषिते उदिते वेत्याश्वलायनस्य समाविकल्पाभिधानं विरुद्ध्येतेत्याशङ्क्ते * नन्विति * स्मृतेर्विध्याक्षेपकमन्त्रार्थवादमूलत्वस्यापि सम्भवान्नैकस्यै बहवः सह पतय इत्यर्थवादाक्षिप्तस्य च निषेधविधेर्नैका बहून्पतीन्विन्देतेति श्रुतिनिषेधविध्यनुसारेणाविवक्षितसाहित्यानेकपतिमात्रनिषेधपरतया व्याख्यानदर्शनादुच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येणेति मन्त्राक्षिप्तस्य चाश्वदानफलविधेर्न केसरिणो ददातीति श्रुतनिषेधानुसारेण साक्षाद्विहिताश्वदानाविषयत्वेन व्याख्यानदर्शनात्तन्मूलानां स्मृतीनां प्रत्यक्षश्रुत्यनुसारेणान्यथाव्याख्यानसम्भवात्प्रत्यक्षमूलादर्शने यथाश्रुतमूलानिश्चयादनादरो न वैलक्षण्यमात्रमित्यभिप्रायेण परिहरति * सत्यमिति * अभिप्रायं विवृणोति * अतश्चेति * विप्रलम्भमूलत्वाभावान्नात्यन्तबाध्यत्वं यथाश्रुतमूलानिश्चयाच्च नात्यन्ततुल्यतेत्यर्थः । एवं च वदता यथाश्रुतमूलानिश्चया-

भिप्रायेणाऽऽसति ह्यनुमानमिति सूत्रावयवस्य हेतुदर्शनसूत्रस्य च यथाश्रुतमूलत्वानिश्चयानिश्चयरूपविशेषस्यात्यन्तातुल्यत्वहेतोर्दर्शनादित्येवं व्याख्या सूचिता। भाष्यं च यथाश्रुतार्थप्रामाण्याभावाभिप्रायत्वेन समाहितम्। उदाहरणभाष्यमप्यदृष्टमूलावस्थास्मृतिविषयत्वेन नेतव्यामिति सर्वमदुष्टम्। द्वितीयव्याख्यानं प्रपञ्चयति * यद्वेति * यान्येतानि सांख्यादिपरिगृहीतानि तैर्विपरीतगृहीतयोर्द्धर्माधर्मयोर्निबन्धनानि यानि च बाह्यान्तराणि म्लेच्छाचारस्य बहुसमाहतैकदेशामिश्रान्नभोजनाचरणस्य निबन्धनानि-तेषामेवैतदनपेक्षणीयत्वं प्रतिपाद्यतइत्यन्वयः। न च तदप्रामाण्याङ्गीकरणे पूर्वोक्तमर्यादातिक्रमादिदोषापत्तिः शिष्टत्रैवर्णिकपरिग्रहादरस्य स्मृतिप्रामाण्यहेतोस्तेष्वसम्भवादिति त्रयीविद्भिर्न परिगृहीतानीत्यनेनोक्तम्। त्रयीवित्परिग्रहाभावे ऽप्यहिंसासत्यवचनादिवाक्येषु वेदमूलत्वदर्शनेन वाक्यान्तरेष्वपि वेदमूलत्वानुमानसम्भवात्कथमप्रामाण्यमित्याशङ्क्य किं चित्त्रयीमिश्रस्य धर्मकञ्चुकस्य छायायां पतितानित्युक्तम्। यथा नर्त्तकी स्वाङ्गवैकृत्यं कञ्चुकेन छादयति तथा लोकवचनार्थं चैत्यवन्दनादिवाक्यानां मिथ्यात्वं छादयितुं क्व चिद्वेदमूलार्थाभिधानं न सर्वत्र तथात्वानुमानायलमित्याशयः। किं तेषां लोकवचनं प्रयोजनमित्यपेक्षायां लोकोपसंग्रहादिप्रयोजनपरत्वमुक्तम्। कस्मात्पुनः क्व चिद्वेदमूलत्वदर्शनेनान्यत्र तथात्वानुमानं न सम्भवतीत्याशङ्क्यानिराकरणार्थम् * त्रयीत्युक्तम्* त्रय्यप्रामाण्यापादकत्वात्तद्विपरीतेनात एवातन्मूलत्वात्तदसम्बद्धेन दृष्टशोभाभिप्रायेण तत्प्रधानेन ततमूलेनोपनिबद्धानीत्यर्थः। प्रत्यक्षादिमूलत्वस्य प्रागेव निरस्तत्वात्प्रत्यक्षाद्याभासेष्वेव पराभिमानात्प्रत्यक्षादिशब्दप्रयोगः। एवं तर्हि प्रामाण्याशङ्कानुपपत्तेस्तन्निराकरणमयुक्तमित्याशङ्क्य * विषचिकित्सेति * पूर्वपक्षबीजमुक्तम् * विषचिकित्सादिसमर्थानां कतिपयमन्त्रौषधीनां या कादाचित्कासिद्धिस्तन्निदर्शनबलेन जीविकाप्रधानस्यार्थान्तरस्योपदेशकानीत्यर्थः। ननु विषचित्सादिदृष्टान्तेन प्रामाण्याध्यवसाने जीविकाप्राधान्याच्चानुष्ठानादरे सत्यपि धर्मत्वाध्यवसाने किं कारणमित्याशङ्क्य
११५।१ *अहिंसादिश्लोकार्थगन्धवासितत्वमुक्तम्* ननु प्रत्यक्षादीनां धर्मप्रामाण्यनिराकरणेन प्रत्यक्षसूत्रएव तन्मूलानां बाह्यस्मृतीनां प्रामाण्यस्य निराकृतत्वात्पुनरुक्तमेतत्स्यादित्याशङ्क्याह * न चैत दिति * वेदमूलत्वं पूर्वमनिराकृतमिह निराकार्यमित्याशयः। ननु वेदमूलत्वस्य परैरनङ्गीकृतत्वेन तन्निराकरणमतिप्रसिद्धत्वान्न

कार्यमित्याशङ्क्याह * न चेति * मीमांसकातिरिक्तैः सामवायिकार्थप्रतीत्यभ्युपगमेन कस्मिंश्चिच्छब्दे वाचकत्वानङ्गीकरणाद्गाव्यादिशब्दवाचकत्वस्य परैरनङ्गीकृतस्यापि निराकरणं लोके वाचकविवेकस्याप्रसिद्धत्वाद्यथायुक्तं नैवं बाह्यस्मृतीनां वेदमूलत्वनिराकरणं युक्तमतिप्रसिद्धत्वादिति वैधर्म्यदृष्टान्तः। यद्वा यथा गाव्यादिशब्दानामवाचकत्वे प्रामाण्यस्यातिप्रसिद्धत्वादनादरे लौकिकानां वाचकावाचकेषु समदृष्टित्वापत्तेस्तत्कथनं साधुशब्दाधिकरणे करिष्यते तथा बाह्यत्वधर्माधर्मनिबन्धनाप्रामाण्यस्याप्यतिप्रसिद्धत्वादनादरेणाकथने लौकिकानां मन्वादिनिबन्धनेषु बाह्येषु च समदृष्टित्वापत्तेस्तत्कथनीयमित्युत्तरशेषः साधर्म्यदृष्टान्तः । यद्वा शोभादिविशेषवशेन कलिकालवशेन वा ऽधर्मप्राबल्याद् बाह्येष्वेव श्रद्धाविशेषापत्तेः श्रौतस्मार्त्तार्थस्यैव त्यागः प्रसज्येतेत्याह * शोभेति * सन्तु वा लौकिकाः परीक्षकाणामपि सम्भवद्वेदसंयोगत्रैवर्णिकप्रणीतत्वाविशेषात्समदृष्टित्वापत्तिरित्याह * ब्राह्मणेति * बाह्यस्मृत्यप्रामाण्यस्यावश्यप्रतिपाद्यतामुपसंहरति * तेनेति * पूर्वपक्षमाह * महाजनेति * (आदिपदेनानुपलब्धिविरोधपरिहाराय मूलश्रुतेरपि द्वीपान्तरवर्तित्वमुपादीयते[1])ननु विरोधे का गतिरित्याशङ्क्याह * तत्रेति * विरोधे ऽप्युक्तेन न्यायेन मूलश्रुत्यनुमानाविघाताद्व्यवस्थाविकल्पो वा भविष्यतीत्याशयः। मूलानुमानस्य चानुपलब्धिविरोधः प्रत्यक्षश्रुतिमूलत्वपक्षे तु विरोधशङ्कैव नास्तीत्याह * यैश्चेति * अस्मिन्पक्षे यस्मै यद्रोचते तत्प्रमाणीकुर्यादिति पूर्वोक्तं दूषणं परिहरन्नुपसंहरति * ततश्चेति * सूत्रेण सिद्धान्तमाह * अत आ- ११६।१
हेति * ननु पारतन्त्र्ये सति विरोधे मूलानुमानासम्भवेनानपेक्षत्वं स्याद्वेदवत्तु स्वातन्त्र्यसम्भवे मूलानुमानासम्भवे ऽपि न किं चिद् दूष्यतीत्याशङ्क्याह * पारतन्त्र्यं तावदिति * अतो वेदमूलत्वमात्रं निराकार्यं तच्चापसिद्धान्तापत्तेर्बौद्धादिभिर्वक्तुं न शक्यतइत्याह * वेदमूलत्वं पुनरिति * यदि तु तावदेकदेशी कश्चिदभ्युपगच्छेत्तं प्रत्यनेन सूत्रेण निराकरोति * अन्यश्चेति * वेदविरुद्धस्यापि मन्वादिवाक्यस्य वेदमूलत्वाभ्युपगमान्न तेन वेदमूलत्वं निराकर्त्तुं शक्यमित्याशङ्क्य समस्तविद्यास्थानविरुद्धत्वमुक्तम्। ग्रन्थकाराणां वानेन सूत्रेण वेदविरोधो ऽभिधीयतइत्याह * त्रयीमार्गेति * वेदविरुद्धाचरणानां तन्मूलोपदेशानुपपत्त्या वेदमूलानुमानस्य बाध इत्याशयः। वेदविरोधिभ्यश्च समर्प्पणं वेदविरोधिनां वेदमूलोप-

[1] चर्व पा० २ पु० ना०

वेदपरिग्रहानुपपत्तेर्वेदमूलानुमानस्य बाधकमित्याह *अथो बाह्येभ्यश्चेति * चतुर्थवर्णः शूद्रः । निरवसितो वर्णाश्रमाचाररहितः । परिग्रहीतृणामपि वेदविरोधो वेदमूलानुमानस्य बाधको ऽनेन ग्रन्थेनोक्तो भवति । आत्मविरुद्धाचरित्वेन च शाक्यादेर्लोकहितैषित्वस्य दूरनिरस्तत्वात्तदुपदेशस्य प्रमाणमूलत्वानुमानं न युक्तमित्याह * स्वधर्मेति * एतदेवाभियुक्तवचनेन द्रढयति * उक्तं चेति * मनोस्तु क्षत्रियस्यापि प्रवर्तकत्वे यद्वै किं चिन्मनुरवदत्तद्भेषजमिति वेदानुज्ञातत्वादविरुद्धमित्याशयः । स्वधर्मातिक्रम एवालङ्कारामिमानादत्यन्तमूढत्वं प्रतीयतइत्याह *बुद्धादेः पुनरिति* तद्ग्रन्थपरिग्रहीतृणामपि न शूद्राय मतिं दद्यादित्यादिप्रतिषेधातिक्रमसामर्थ्येन ब्राह्मणनिन्दां तत्कारित्वेन च शाक्यस्तुतिं कुर्वतामत्यन्तमूढत्वमाह * स किलेति * तद्ग्रन्थविहिताचरितृणां च वेदविरोधो वेदमूलत्वस्य बाधक इत्याह * तदनुशिष्टेति * षट्स्वप्यर्थेषु
११७।१ सूत्रं योजयति * तेनेति * बाह्यग्रन्थजातं वेदविरोधादनपेक्ष्यमिति प्रथमव्याख्याने ऽर्थः । ग्रन्थकारिणां वेदविरोधात्तत्कृतं ग्रन्थजातमनपेक्ष्यमिति द्वितीये परिग्रहीतृणां वेदविरोधात्तेभ्यः समर्पकाणां ग्रन्थकारिणां सम्बन्धिग्रन्थजातमपेक्ष्यमिति तृतीये परिग्रहीतृणां वेदविरोधात्तत्परिगृहीतं ग्रन्थजातमनपेक्ष्यमित्यर्थोक्ते चतुर्थे ग्रन्थकारिणामात्मविरुद्धाचरित्वात्तत्कृतं ग्रन्थजातमनपेक्ष्यमिति पञ्चमे । आचरितृणां वेदविरोधात्तदनुस्मृतं ग्रन्थजातमनपेक्ष्यमिति षष्ठे वेदविरोधाभावे ऽप्यनुपलब्धिविरोधेन पठितश्रुत्यनुमानायोगान्नित्यत्वबाधापत्तेश्च प्रलीनशाखागतश्रुत्यनुमानायोगाद् बाह्यग्रन्थप्रामाण्यबाधमित्याह * न चेति * ननु मन्वादिस्मृतिवद्विप्रकीर्णशाखागतश्रुतिमूलत्वेनानुपलब्धिविरोधपरिहारो भविष्यतीत्याशङ्क्य तासां क चित्सम्वाददर्शनात् तदृष्टान्तेनान्यत्रापि वेदमूलत्वानुमानं युक्तमिति इह तु क चिदपि सम्वादाभावाद्वैषम्यमित्याह *न हीति * अहिंसादिवचनस्यापि विषयविशेषानवच्छिन्नस्य विहितव्यतिरिक्तविषयहिंसादिनिषेधश्रुत्या सम्वादो नास्तीत्याशयः । ननु श्रुतिमूलत्वात्सम्भवे ऽपि प्रमाणान्तरमूलत्वेन प्रामाण्योपपत्तेर्ग्रन्थप्रामाण्यं बाधनं न युक्तमित्याशङ्क्याह * मूलान्तरेति * अत्रैव हेतुदर्शनायेतिसूत्रं योजयति * लोभादीति * किं चात्रोत्प्रेक्षणीयलोभादिविषयतया हेतुशब्दव्याख्यानेन युक्त एव हेतुशब्दाभिधेया धर्माधर्मोपदेशमूलत्वेन तैरुपन्यस्ताः प्रत्यक्षं दृश्यन्ते इत्याह * शाक्यादयश्चेति * ननु याज्ञवल्क्यादिभिरपि ।

यदुच्यते द्विजातीनां क्षुद्राद्यरोपसंग्रहः ।
न तन्मम मतं यस्मात्तन्नात्मा जायते स्वयम् ॥

तेन पुनरित्यादिहेतुदर्शनपूर्वकं धर्माधर्मोपदेशनान्न तन्मात्रेण वेदमूलत्वनिराकरणं युक्तमित्याशङ्क्य वेद एव द्विजातीनां निःश्रेयसकरः परः इत्यादिना तैः प्राधान्येन वेदमूलत्वादिभिधानात्तेन ह्यत्र क्रियतइतिवदर्थवादार्थं हेत्वभिधानं विज्ञायते । ननु शाक्यादिभिर्वेदमूलत्वं क चिदुक्तमित्याह * न चेति * हेतुमूलत्वेनैव तर्हि प्रामाण्यं भविष्यत्यत आह * हेतवश्चेति * हेत्वाभासास्तेन सम्यग्घेतव इति भावः । हेतुकत्वेन वा शाक्यादीनामनपेक्ष्यत्वप्रतिपादनार्थैतत्सूत्रमित्यर्थान्तरन्यासेनाह * एत एव चेति *

पाषण्डिनो विकर्मस्थान्वैडालव्रतिकाञ्छठान् ।
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥

इति स्मरणाद्वाङ्मात्रेणापि येषामर्चनं न कार्यन्ते शाक्यादय एवेत्यर्थः । पाखण्डित्वं विकर्मस्थत्वं च प्रसङ्गादुक्तम् । हेतुदर्शनाच्चेति चकारसूचितं वा । अस्यैव सूत्रस्यानपेक्षत्वहेतोर्वेदबाह्यत्वस्य कुदृष्टित्वस्य च दर्शनादिति चतुर्थं व्याख्यानमाह * एतदर्थेति * स्वाभिप्रेतं सिद्धान्तमुपसंहरति * तस्मादिति *

॥ अथ पदार्थप्राबल्याधिकरणम् ॥ ४ ॥

शिष्टाकोपेऽविरुद्धमिति चेत् ॥ ५ ॥

अत्र भाष्यकारेणाचमनादीन्युदाहृत्य किमेतानि श्रुतिविरुद्धानि न कर्त्तव्यान्युताविरुद्धानि कार्याणीति विचाररूपं दर्शितं, तच्छ्रुतिविरुद्धस्मृत्यर्थाकर्त्तव्यत्वस्य पूर्वाधिकरणे सिद्धत्वादविरुद्धार्थकार्यत्वस्य चाद्याधिकरणसिद्धत्वादनर्थकं भोजनादिनिमित्तस्य चाचमनस्य शुद्ध्यर्थत्वेन पुरुषार्थस्य यज्ञोपवीतस्य च हिरण्यादिवत्पुरुषार्थरूपेण नित्यधार्यतया विहितस्य दक्षिणाचारत्वस्य च भोजनादौ पुरुषार्थतया विहितस्याचाशङ्क्य विरोधत्वेन पूर्वपक्षासम्भवादयुक्तमाशङ्क्य व्याचष्टे * एवं तावदिति * उक्तेन न्यायद्वयेन यद्यपि सर्वासां पुरुषार्थानां क्रत्वर्थानां च स्मृतीनामाविरोधाविरोधयोः प्रामाण्याप्रामाण्ये निरूपिते, यद्यपि च तावन्मात्रेण पुरुषार्थानामाचमनादिस्मृतीनामनाशङ्क्य विरोधत्वेन पर्यवसितं निरूपणं तथापि सम्प्रति क्रत्वर्थानां यज्ञोपवीतादिस्मृतीनां विरोधाविरोधमात्रमेव विचार्यतइत्यर्थः । ननु क्रत्वर्थस्मार्त्तपदार्थानुष्ठानस्य श्रौतपदार्थपरिमाणाविरोधाविरोधशङ्कास्तु नाम न तु किं विघ्नाद्याधिक्येन पूर्वाङ्गा- ११८।३

दिकालविरोधशङ्का । न च सर्वादावनुष्ठीयमानस्य क्रमविरोधशङ्केत्याशङ्क्य बहुश्रुत्यर्थेत्युक्तम् । श्रौतपदार्थानां बहुत्वेन सकलपूर्वाह्णादिव्यापित्वात्किं चिदाधिक्ये ऽपि कालातिक्रमापत्तिस्तन्मध्ये च स्मार्त्तपदार्थानुष्ठानक्रमबाधापत्तिरित्याशयः । ननु विरोधाविरोधमात्रस्य विचार्यत्वे कार्याकार्यशब्दावनर्थकौ स्यातामित्याशङ्क्य विचारप्रयोजनप्रतिपादनार्थत्वेन तयोः साफल्यमाह * तन्निर्णये त्विति * नन्वाचमनादीनां निषेधाश्रवणे विरोधोऽस्ति श्रवणे विरोध इति सन्देहानुपपत्तिमाशङ्क्ते * कथं पुनरिति * नात्र निषेधश्रवणाश्रवणाभ्यां सन्देहः किन्तु स्मार्त्तपदार्थानुष्ठाने श्रुत्यर्थवैगुण्यापत्त्यनापत्तिसन्देहादिति परिहरति * श्रुत्यर्थेति * एतदेव विवृणोति * यदीति * प्रकृतिमनुप्रवेश्यमानानि प्रयोगवचनेन निराक्रियन्ते तन्निराकृतानि च सामिधेनीसाप्तदश्यवद्विकृतिमनुप्रवेश्यमानानि प्राकृताङ्गनिराकाङ्क्षत्वाच्चोदकेन न परिगृह्यन्तइत्यर्थः । यद्वा नात्र विरोधाविरोधामात्रं विचार्यते किं तु सत्यपि विरोधे किमाचमनादीनां धर्मित्वेन बलीयस्त्वादबाधः प्रमाणदौर्बल्याद् बाध इति विरोधाधिकरणापवादार्थं विचार्यतइत्यन्यथा सन्देहभाष्यं व्याख्यातुमाह * अन्यत्विति* सन्देहः किं कर्त्तव्यान्युताकार्याणीत्येवं रूप इति शेषः । अस्मिन्पक्षे सिद्धान्तवचनव्यक्तिप्रतिपादकमुताविरुद्धानि कार्याणीति भाष्यमविरुद्धानि विरुद्धान्यपि वा धर्मितया बलीयस्त्वेनाबाधितत्वात्कार्याणीति द्विविधसिद्धान्तप्रतिपादकतया व्याख्येयम् । यद्वा श्रौतैः क्रमकालपरिमाणैर्विरोधे ऽपि तदीयैः पदार्थैरविरुद्धत्वात्कार्याणीत्येकरूपसिद्धान्तप्रतिपादकतयेति । यद्यपि शाखान्तराधिकरणसमाप्तावपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेतेति सूत्रेण क्रमकालपरिमाणविरोधाच्छाखान्तरीयपदार्थानुपसंहारमाशङ्क्य विरोधेनार्थसंयोगादैकधर्म्ये तत्संयोगाद्विधीनां सर्वप्रत्यय इति सूत्रेण पदार्थानां क्रमादिबाधकत्वं वक्ष्यते तथापि स्मार्त्तानां पदार्थानां प्रमाणदौर्बल्याद् बाध्यत्वाशङ्का न विरुध्यते तत्रत्यस्यैव प्रमेयबलाबलस्य प्रमाणबलाबलबाधायात्रोपन्यासात्तस्यापि नानेन पौनरुक्त्यं शङ्कनीयम् । यद्यपि च पिकनेमाधिकरणे स्वरूपबलाबलेनाश्रयबलाबलस्य बाध्यत्वं वक्ष्यते तथाप्यनादित्वेन लब्धात्मकत्वात्समुदायप्रसिद्धेराश्रयदौर्बल्ये ऽपि क्लृप्तत्वेन स्वरूपबलीयस्त्वादलब्धात्मकावयवप्रसिद्धिबाधकत्वे ऽपि प्रमाणदौर्बल्ये प्रमेयस्यात्मलाभायोगादलब्धात्मकस्मर्तृप्रमेयबाधकत्वं युक्तमित्याशङ्क्यात्र न विरुद्ध्यते । आश्रयदौर्बल्येन त्वात्मलाभायोगाशङ्का तत्र निराकरिष्य-

तदिति विवेकः । प्रत्यक्षश्रुतिविरोधे तु स्मृतिमूलश्रुत्यनुमाने स्मार्त्तपदार्थानामात्मलाभायोगाद्विरोधे ऽपि श्रुत्यनुमानमङ्गीकृत्य यथाश्रुतमूलानिश्चयात्प्रत्यक्षश्रुत्यनुरोधवृत्तित्वप्रतिपादनपरतया नात्यन्तमेव बाध्यत्वं, न चाप्यत्यन्ततुल्यतेत्यनेन यत्पूर्वाधिकरणस्य व्याख्यानं कृतं तदभिप्रायेण पूर्वाधिकरणोक्तस्य श्रुत्यनुरोधवृत्तित्वस्यापवादार्थमेतदधिकरणमिति योजयितुम् * अन्यदर्शनमित्युक्तम् * एतदेव विवृणोति * तथा हीति * कथं धर्मिणां बलवत्त्वेत्यपेक्षायां द्वादशाधिकरणन्यायमुदाहरति * वक्ष्यति हीति * यथा य इष्ट्वा पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां वेति दक्षिणीयेष्ट्यादीनामङ्गानां प्रधानस्य च सोमस्य बहुदिनव्यवधानेनोभयोः पर्वकालत्वसम्पादनाशक्तेः किं पर्वणि सोमो पर्वणि दीक्षा विपरीतं वेति सन्दिग्धे प्राथम्यात् दीक्षायाः पर्वकालत्वे प्राप्ते प्रधानसादगुण्यार्थत्वादङ्गानुष्ठानस्य प्रधानस्यैव पर्वकालतेति वक्ष्यते तथेहापि प्रधानस्याचमनादेर्यथाश्रुतस्यानुष्ठानक्रमादेस्तनुरोधेनान्यथाकरणं प्रतीयतइत्यर्थः । सूत्रं च मुख्यं वा पूर्वचोदनालोकवदिति-पूर्वाधिकरणसूत्रात्प्राथम्यार्थं मुख्यशब्दं प्राधान्यार्थत्वेनानुषज्य विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् स्वधर्मत्वमिति तत्पूर्वसूत्राच्च स्वधर्मत्वशब्दं मुख्यशब्दान्वयाय भावप्रत्ययलोपेनानुषज्य प्रधानगुणस्याङ्गगुणेन सह विरोधे मुख्यं प्रधानं स्वधर्मकं कार्यं प्रधानार्थत्वादङ्गगुणस्येति योज्यं, नन्वस्तु क्रमपरिमाणयोर्द्धर्मरूपत्वाद्दौर्बल्यं कालस्य स्वतन्त्रद्रव्यत्वेन धर्मिरूपत्वात्कथं दौर्बल्यमित्याशङ्क्याह * न चेति * अनुष्ठेयपदार्थावच्छेदकत्वेन कालस्यापि विधेयत्वात्स्वतन्त्रविधेयत्वस्य धर्मित्वेन विवक्षितस्याभावाक्रमपरिमाणवद्धर्मत्वनिश्चय इत्याशयः । नन्वस्तु प्रमाणाप्रमेयबलाबलयोर्विसम्वादः कथं त्वाचमनादीनामकर्त्तव्यत्वं कथं वा कार्यतेत्यपेक्षायामाह * तत्रेति * सिद्धान्तोपक्रमार्थत्वेन सूत्रं व्याख्यातुमिति चेदिति भाष्यं व्याचष्टे * किं युक्तमिति * द्वितीयविचारे ऽपि ११९।२
सिद्धान्तद्वैविध्ये क्रमादिविरोधे ऽपि वा पदार्थैः सहाविरोधाद्विरोधाभावाभिधानमविरुद्धम् । नन्वविरोधे ऽपि शीघ्रप्राप्तैः श्रौतैरेवाङ्गैर्निराकाङ्क्षत्वेन मन्थराणां स्मार्त्तानामङ्गानां क्रत्वपूर्वैरग्रहणान्नानुष्ठानं सिद्ध्यतीत्याशङ्क्य क्रत्वपूर्वाणामनिर्ज्ञातोपायपरिमाणतया श्रौताङ्गमात्रेण नैराकाङ्क्ष्याभावाल्लिङ्गादिगम्याङ्गवत्स्मृत्याचारप्राप्ताङ्गानामपि ग्रहणमित्याह * यथैवेति * भावनाभिर्भाव्यैरपूर्वैरशेषिकथम्भावेन प्रार्थिताः सन्तस्ते सर्वे ऽनारभ्यवादाधीतैः सह य-

येच्छंभावेन गृह्यन्ते तथैव स्मृत्याचारार्पिता अपि गृह्यन्तइत्यन्वयः । स्मृत्याचारार्पितानामवैदिकत्वेनापूर्वग्राह्यत्वाशङ्कानिराकरणार्थम् * साधनांशवदित्युक्तम् * यथाष्टकादयः साधनांशाः स्मृत्याचारार्पिता अप्यपूर्वैर्गृह्यन्ते तथेतिकर्त्तव्यतांशा अपीत्यर्थः । एतदेव विवृणोति * कथम्भावेति * उपसंहरति * तस्मादिति *

न शास्त्रपरिमाणत्वादिति ॥ ६ ॥

पूर्वपक्षसूत्रमवतारणपूर्वकं व्याचष्टे * इतीति * नाचमनादिपदार्थः कर्त्तव्यो भवेदिति नञर्थव्याख्या । अभ्यधिकत्वापत्तेरिति शास्त्रपरिमाणत्वादित्यस्य विरोधोपपादनार्थत्वेन व्याख्या । न तु सत्यपि विरोधे प्रमेयबलाबलानुसारेणाचमनाद्यनुष्ठानं भविष्यतीत्याशङ्क्य प्रमाणाधीनत्वात्प्रमेयसिद्धेः प्रमाणबलाबलस्य तस्मादू बलीयस्त्वाभिधानार्थं शास्त्रशब्दं व्याचष्टे * शास्त्रितामिति * ननु सूत्रकृता परिमाणशब्देनेयत्ताबाधापत्तेरुक्तत्वात् शास्त्रपरिच्छिन्नं हीत्यादिक्रमकालबाधापत्त्यभिधानभाष्यमयुक्तमित्याशङ्क्य नेयतावचनः परिमाणशब्दः किं तु परिच्छेदश्चात्रैतक्रमका एवैतत्संख्याका एवैतत्काला एवेति त्रिविधावधारणरूपान्तराचमनाद्यनुष्ठाने बाध्येत्याह *शास्त्रेण हीति* आशुनिर्माणशब्देन प्रधानप्रत्यासत्तिः पूर्वाह्लाद्यनतिक्रमः प्रयोगशैघ्र्यं चेति त्रिविधा कालावच्छिन्नतोक्ता । समासश्चात्र शास्त्रेण परिमाणं येषां पदार्थानामिति बहुव्रीहिरभिमतः कथं शास्त्रेण क्रमेयत्ता कालावगतिः । किं च तेषां बाधकमित्यपेक्षायामाह * द्राक्ष्यामिति * प्रयोगविधिश्रुत्याङ्गप्रधानाविशिष्टभावनाविधानेन युगपदनुष्ठानाक्षेपादत्यन्तयौगपद्याशक्तेश्च प्रधानप्रत्यासत्तिलक्षणप्रयोगप्राशुभावलक्षणश्च कालो ऽवगम्यते । पूर्वाह्लादिकालः पूर्वाह्लादिश्रुत्याङ्गान्तरविनियोजकैः श्रुतिलिङ्गादिभिः प्रचयशिष्टाङ्गसंख्यावगम्यते । क्रमनियामकैः श्रुत्यर्थादिभिः क्रमस्तेषां श्रौतपदार्थेषु प्रविशन्तः स्मृत्याचारप्राप्ताः पदार्था बाधका इत्यर्थः । प्रयोगवचनावगतस्य प्रधानप्रत्यासत्तिलक्षणस्य च शेषरूपप्रत्यासत्तिलक्षणस्य च कालस्य पूर्वाह्लादिविनियोजकश्रुत्यवगतस्य च पूर्वाह्लादिकालस्य स्मृत्याचारप्राप्तपदार्थानुष्ठाने बाधापत्तिं विवृणोति * सर्वे हीति * अनेन च भाष्यकारीयस्य दक्षिणाचारप्रधानकालयोर्विरोधोपन्यासस्योपलक्षणार्थत्वं दर्शितम् । प्रयोगवचनावगम्यस्य प्रत्यासत्तिलक्षणस्य च कालस्योपपाद्यत्वेनाभ्यर्हितत्वात्पूर्वं तद्बाधप्रसङ्गापादकभाष्यव्याख्येति व्युत्क्रमदोषाभावः । क्रमबाधप्रसङ्ग-

भाष्ये प्रकृतोदाहरणविषयं श्रुतिग्रहणं क्रमप्रमाणमात्रोपलक्षणार्थमाचमनग्रहणं च प्रयोगमध्यपातियज्ञोपवीतकरणोपलक्षणार्थमिति व्याचष्टे * क्रमश्चेति * ननु वेदवेद्यन्तरालाचमनविध्यभावात्सर्वादौ च क्रियमाणस्य क्रमविरोधाभावात्कथमन्यथात्वप्रतिपत्तिरित्याशङ्क्य * श्रुतादिनिमित्तेत्युक्तम् * ननु श्रुतादिनिमित्ताचमनप्रसक्तौ तावदाश्रयः क्रमो भविष्यतीत्याशङ्क्य * विज्ञातेत्युक्तम् * यस्याश्रयणं प्रमाणानां च परिमाणमेतावत्त्वं विज्ञातं स तथोक्तः कीदृशमाश्रयपरिमाणमित्यपेक्षिते यावन्तो वैदिकाः पदार्थास्तावन्त एवेति *वैदिकेत्यनेनोक्तम् * प्रमाणपरिमाणं तु श्रुत्याद्यनुक्रमणेन ज्ञातमेवान्तराले यज्ञोपवीतस्य नैमित्तिकस्याप्यप्राप्तेः कथं क्रमान्यथात्वापादकत्वमित्याशङ्क्याह * यासेत्युक्तम् * नन्वन्तराले स्मृत्याचारप्रमाणकपदार्थप्राप्त्यभावे वैदिकमात्राश्रयत्वे ऽपि तत्प्राप्तावधिकाश्रयत्वं भविष्यतीत्याशङ्क्याह * यो हीति * प्रमाणान्तरं तर्हि कल्पयिष्यते ऽत आह * उक्तेति * अङ्गपरिमाणप्रमाणस्येति पाठे त्वञ्चुगतिपूजनयोरिति गत्यर्थादञ्चतेरकर्त्तरि च कारके संज्ञायामिति को भवता दायो दत्त इत्यादिषु संज्ञाव्यभिचार्यत्वाच्च कारकस्यासंज्ञायामपि कर्मणि घञमुत्पाद्य चञोः कुधिण्यतोरिति कुत्वेन गतशब्दार्थे गमिति रूपानुसारेणावगतपरिमाणस्येत्यर्थः । नन्वियत्तायाः केन चिच्छास्त्रेणाविधानात्तदूबाधे ऽपि न शिष्टकोपापत्तिरित्याशङ्क्य तस्या अपि शास्त्रीयतामाह * तथेति * किं कश्चित्पदार्थो विस्मृतः कृतं वा सर्वमिति सन्देहस्यानुष्ठेयपदार्थसंख्यासम्पत्तिपर्यालोचनं विना निराकर्त्तुमशक्यत्वात्प्रयोगवचनेनेय तावधारणमप्यर्थादाक्षिप्यते । अज्ञातस्य परिमाणस्यानुष्ठानकाले ऽवधारणासम्भवमाशङ्क्य श्रुत्याद्यवगतानां पदार्थानां प्रचयशिष्टमित्युक्तम् । ननु विस्मरणे ऽपि सकलवैदिकपदार्थानुष्ठाने कृते सम्पूर्णफलप्राप्तेर्न कश्चिद्दोष इत्याशङ्क्याह * ततश्चेति * यतश्च पदार्थपरिमाणमवधारणीयं ततश्च स्मार्त्तपदार्थानुष्ठानेन न्यूनफलला[1]प स इत्यन्वयः । अपूर्वदौर्बल्येनेति न्यूनत्वकरणम् । अपूर्वदौर्बल्ये किं कारणमित्यपेक्षायामनिवृत्ते वैगुण्याशङ्क्येति हेतुगर्भं विशेषणं किं कृतं किं वा नेति कृताकृतनिश्चयो वैगुण्याशङ्काकारणम् । कृताकृतनिश्चयकारणं पूर्वावधारणद्वारः । कथं तस्यानिश्चयकारणत्वमित्यपेक्षिते सम्यक्कृतत्वदार्ढ्यनिमित्तसंस्कारपाटवाभावादित्युक्तम् । सम्यग्घ्येतत्कृतमिति स्मृतिदार्ढ्यस्य यन्निमित्तं संस्कारपाटवं तस्या- १२०।१

[1] प्रचयमिष्टज्ञातमिति २ पु० पा० ।

भावादित्यर्थः । अनुष्ठानात्पूर्वं ह्येतावन्तो ऽनुष्ठेया इत्यवधारिते यावन्तो ऽनुष्ठेयास्तावतामनुष्ठानोत्तरकाले ऽनुष्ठितत्वावधारणात्तत्प्रसूतसंस्कारपाटवेन सम्यक्कृतत्वस्मृतिदार्ढ्यात्कृताकृतसन्देहो निवर्त्तते नान्यथा । ननु सहेयत्तायाः पूर्वमवधारणात्कथं स्मार्त्तपदार्थानुष्ठाने पूर्वावधारणभ्रंश इत्याशङ्क्य प्रथमेत्युक्तम् । प्रयोगवचनस्य श्रुत्याद्यवगतपदार्थमात्रपर्यवसायित्वेन स्मार्त्तेष्वव्यापारात्प्रथमं प्रयोगवचनव्यापारवेलायामियत्ताश्रयत्वेनापरिकल्पितस्य पश्चात्तद्व्यापारपर्यवसानोत्तरकालं स्मृतिवशादागतस्य प्राप्तस्य पदार्थस्यानुष्ठानेन पूर्वस्य प्रयोगविधिव्यापारकालीनस्येयत्तावधारणस्य भ्रंशादित्यर्थः । वैदिकस्य सुभेदेन होमादेर्नैमित्तिकस्यापि प्रयोगविधिव्यापारवेलायामेवानुष्ठेयत्वावधारणान्न तदनुष्ठाने पूर्वावधारणभ्रंशापत्तिः वैगुण्याशङ्कायां चापूर्वातिशयहेतुश्रद्धाविरहादपूर्वदौर्बल्यमात्रं भवति न तु सर्वथानुपपत्तिः । तदुत्पादकसमस्ताङ्गप्रधानानुष्ठानस्य निष्पन्नत्वाच्छ्रद्धायाश्चापूर्वातिशयहेतुत्वं यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यतिशयवाचितरप्रत्ययप्रयुक्तया श्रुत्या ।

श्रद्धयेष्टं च पूर्त्तं च नित्यं कुर्यादतन्द्रितः ।
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः ॥

इति स्मृत्या चाक्षयहेतुत्वं श्रद्धाया वदन्त्यार्थान्तरभावे क्षीणत्वप्रतिपादनादवसीयते । ननु किं चित्फललाभे ऽपि विधेरर्थवत्त्वान्न शिष्टकोपापत्तिरित्याशङ्क्याह * तच्चेति * विधिसिद्धप्रवर्त्तनातिशयार्थेनार्थवादेन प्रवर्त्तनातिशयावसेयफलातिशयवसायात्तत्फलं सर्वं समग्रमतिशयवच्चार्थवादसहिताद्विधेरवगतमिति कृत्वा न्यूनत्वासहिष्णुतया फलातिशयहेतुश्रद्धाविरहवैगुण्याशङ्कापादकपदार्थान्तरविधायकत्वेन विरुद्धामाचमनादिस्मृतिं बाधतइत्यर्थः । इयत्ताविरोधएव सूत्रं योजयति * परिमितेति * अङ्गशास्त्राणां यत्परिमाणं तदेवाङ्गज्ञानामित्यर्थः । क्रमकालेयत्तासाधारणपूर्वव्याख्यानापेक्षो वा शब्दः प्रयोगविधिप्रमितप्रधानप्रत्यासत्त्याक्षिप्तप्रयोगशैघ्र्यविरोधं प्रधानप्रत्यासत्तिविरोधाभिधानेनार्थादुक्तमपीदानीं प्रयोगविधिना साक्षादपि प्रयोगशैघ्र्यावगमात्पदार्थान्तरानुष्ठाने तद्विरोध इति प्रकारान्तरेणाह *सहेति* उपसंहरति *तस्मादिति*

अपि वा कारणाग्रहे प्रयुक्तानि प्रतीयेरन्निति ॥७॥

अत्रमवधिद्वयेन पूर्वपक्षनिराकरणार्थतयावतारयति * तदु-

च्यतइति* पूर्वपक्षोक्तविरोधाङ्गीकरणेन प्रमाणबलाबलात् प्रमेयबलाबलबलीयस्त्वमात्रेण सिद्धान्ते पूर्वा ऽवधिः पूर्वा समाप्तिः विरोधाभावसिद्धान्ते द्वितीयेति व्यवस्थार्थो वाशब्दः । ननु भाष्यकृतास्योत्तरसूत्रावयवत्वेन पठितत्वात्कथमेतत्सूत्रशेषत्वमित्याशङ्क्याह * अनन्तरेति * विप्रतिपत्तिशब्दोपात्तस्य विरोधस्यैतदवगताया १२१।१
अभावोक्तेर्विरुद्धत्वेनानन्तरसूत्रे ऽनुपयुज्यमानत्वाद्विरोधाभावसिद्धान्तपक्षे चेह सूत्रे पूर्वपक्षसूत्रोक्तविरोधाभावस्यावश्यवचनीयत्वादित्यर्थः । ननूत्तरसूत्रे ऽपि यवादिशब्दानां साधारणत्वे प्रियङ्ग्वादिद्रव्यकार्ये विकृतावनाहितयवादिशब्दप्रयोगाविरोधप्रतिपादनार्थत्वेनोपयोगो भविष्यतीत्याशङ्क्याह * उपयोगेति * सकृत्पठितस्यापि व्याख्यानवेलायामुच्चारणानुकृतिरनुषङ्गः । सकृदुच्चरितस्यैवोभयशेषतया व्याख्याने तन्त्रत्वम् । आद्यावधिना विरोधे ऽपि प्रमेयबलाबलबलीयस्त्वेन सिद्धान्तप्रतिपादनार्थमपि चेत्यादिभाष्यं व्याचष्टे * अपि चेति * प्रयुक्तानि प्रतीयेरन्निति सूत्रावयवस्य शिष्टैरनुष्ठितानाचमनादीनाद्रियेरन्नित्येवं व्याख्यानार्थं प्रमाणपदमुत्तरार्द्धेन व्याख्यातम् । विरुद्धताशब्देन बाध्यतोक्ता । श्लोकं व्याचष्टे * विरोधेति * प्रमाणबलाबलबलीयस्त्वाभिप्रायं नन्वित्यादिशङ्काभाष्यं व्याचष्टे * इयत्तेति * प्रमेयबलाबलबलीयस्त्वाभिप्रायं नैष दोष इति सिद्धान्तभाष्यं व्याचष्टे * पदार्थेति * पूर्वपक्षाभिप्रायं विवृणोति * उच्यतइति * श्लोकं व्याचष्टे * प्रमेयेति * नन्वापाततः प्रतीयमानमपि प्रमेयबलाबलं प्रमाणाधीनत्वात्प्रमेयसिद्धेः पश्चादालोच्यमानेन प्रमाणबलाबलेन बाधिष्यतइत्याशङ्क्याह * येषामिति* १२२।१
ननु श्रुतिविरोधिन्याः स्मृतेर्भ्रान्त्यादिमूलत्वेनाप्रामाण्यादाचमनादेस्तत्प्रमेयत्वानुपपत्तेः कथं बलीयस्त्वमित्याशङ्क्याह * नित्यमेवेति * विरोधे ऽपि श्रुत्यनुमानप्रतिबन्धाभावेन भ्रान्त्यादिमूलत्वायोगाद् बलवद्विरोधापेक्षमुपक्रमविरुद्धोपसंहारवत्तदनुरोधवृत्तित्वेनायथाश्रुतत्वमात्रं स्मृतेरप्रामाण्यं, न चाचमनादिस्मृतेर्बलवद्विरोधो ऽस्ति बलवत्प्रमेयावष्टम्भेन स्मृतेर्दौर्बल्याभावादित्याशयः । इममेवाभिप्रायं विवृणोति *न चेति* हिशब्दार्थे चशब्दः । ननु श्रुतिप्रमेयक्रमादिबाधे श्रुतिबाधापत्तेः तस्माच्छ्राप्रमादपाठत्वेन बाधायोगादगत्या स्मृतिरेव बाधनीया स्यादित्याशङ्क्याह *न चेति* अबाधे कारणमाह * तावतेति * न हि प्रमेयबलीयस्त्वमात्रेण स्मृतिः । श्रुतिं बाधितुं शक्नोति श्रुतिकल्पनव्याक्षेपेण गततेजस्त्वादित्यर्थः । प्रमेयबलीयस्त्वस्य तर्हि क उपयोग इत्यपेक्षायामाह * एतदेवेति *

प्रमेयबलीयस्त्वेन स्मृतेरबाध्यत्वमात्रं भवति न तु श्रुतिबाधकत्वमित्यर्थः । द्वितीयावधिना विरोधाभावसिद्धान्तप्रतिपादनार्थमपि चेत्यादिभाष्यं तात्पर्यतस्तावद्व्याचष्टे * युगपदिति * नन्वयुगपत्प्राप्तानामपि श्रुतिलिङ्गादिविनियोज्यानां पदार्थानां विरोधप्रदर्शनान्न युगपत्प्राप्तिरेव विरोधे हेतुरित्याशङ्क्य तुल्यकार्ययोरित्युक्तम् । इह तु करणोपकारसाधनपदार्थप्रयोगावच्छेदकत्वेन क्रमादीनां पदार्थगुणत्वाभिधानेनैव तुल्यकार्यत्वं निरस्तं, युगपत्प्राप्तिरप्यत एव न सम्भवतीति द्वयमपि *नास्तीत्युक्तम्* ननु वैदिकपदार्थप्राप्त्युत्तरकालीनानामपि क्रमादीनामाचमनादिभिः स्मार्तैः पदार्थैः सह यौगपद्याद्विरोधो भविष्यतीत्याशङ्क्याह * कालेति * प्रयोगावस्थायां क्रमाद्यपेक्षा स च सकलपदार्थप्राप्त्युत्तरकालभावीत्याशयः । इदानीमवयवशो भाष्यं व्याचिख्यासुः क्रमविरोधनिरासभाष्यं तावद्व्याचष्टे * प्राप्तेषु हीति * इयत्तावधारणस्याविहितत्वेनोपायान्तरेणाविस्मरणसिद्धावनादरणीयत्वात्तद्बाधे वेदविरोधशङ्का मन्दत्वाद्भाष्यकृतोपेक्षितेति स्वयंशब्देन सूचयत्स्वयमियत्ताविरोधं परिहरति * परिमाणमिति * इयत्तायाः क्रमवत्पदार्थाश्रितत्वसूचनार्थस्तदनन्तरं विरोधपरिहारः । कालस्य तु स्वतन्त्रत्वात्पदार्थप्रयोगावच्छेदकत्वमात्रेण पदार्थधर्मत्वाभिधानं श्लोकं व्याचष्टे * न केन चिदिति * यदिशब्देन ध्यानाद्युपायान्तरसम्भवः सूचितः
तथेति कालविरोधपरिहारभाष्यं व्याचष्टे * कालो ऽपि चेति *
१२३।४ ननु यद्यपि प्रधानसाहित्यं शैघ्र्यं च स्मार्तैः सह यादृशं सम्भवति तादृशाङ्गीकरणादविरोधस्तथापि पूर्वाह्णादिकालातिक्रमो भूयिष्ठाङ्गानुष्ठाने दुर्वार एवेत्याशङ्क्याह * कालो हीति * प्रधानस्यैव साक्षाद्धितः कालः स च प्रयोगाङ्गत्वात्प्रयोगस्य च साङ्गप्रधानविषयत्वात् प्रधानद्वाराङ्गेषु प्राप्नोतीति प्रधानस्य स्वकालसम्पादमाह-स्याङ्गेषु यथासम्भवं सम्पाद्यमानो न विरुद्ध्यतइत्याशयः । साहित्यसम्पत्तिं विवृणोति * अङ्गैरिति * आशुत्वमपि सर्वाङ्गसहितस्यैवेति तुल्यन्यायत्वादुक्तं भवति । उपसंहरति * तस्मादिति * विरोधनिरासे तेष्विति सूत्रावयवं द्वेधा योजयति * इतीति * क्रमादीनामाचमनाद्यनपेक्षत्वे ऽप्याचमनादेः स्वतन्त्रपदार्थत्वाभावेनाव्यवधायकत्वात्तद्विरोधाभावप्रतिपादनार्थमपि चेति भाष्यं व्याचष्टे * अपि चेति * आचान्तेन कर्त्तव्यमित्यादिकर्त्तव्यमात्रोद्देशेन विधानात्सर्वस्याचमनादेरङ्गप्रधानार्थतेत्याशयः । न चाङ्गस्य व्यवधायकत्वमस्त्यतुल्यकक्षत्वादित्याह * अतदङ्गेन हीति * अव्यव-

धानमेव दर्शयति * वेदामिति * कृत्वेत्यनेन।

क्षुते निष्ठीविते सुप्ते परिधाने ऽश्रुपातने।
कर्मस्थ एषु नाचामेदक्षिणं श्रवणं स्पृशेत्॥

इति स्मृतिपर्यालोचनया पदार्थमध्ये ऽनाचमनं सूचितं कथमाचमने कृते वेदिः कृता भवतीत्याशङ्क्याह * वेदिरेवेति * नन्वङ्गप्रधानार्थस्याप्याचमनस्य हस्तावनेजनादिवत्सर्वादौ सकृत्कृतस्य सर्वोपकारकत्वात्कथमन्तरानाचमने वैगुण्यमित्याशङ्क्यानिरासार्थत्वेन भाष्यगतं शौचशब्दं व्याख्यातुं शुद्ध्येत्युक्तं शुचिना कर्त्तव्यमिति शुद्धेरपि कर्माङ्गत्वेन विधानात् क्षुताद्यापादिताशुद्ध्यनिवृत्तौ वैगुण्यं स्यादिति भावः। नन्वल्पकालत्वेनाप्यव्यवधायकत्वोपपत्तेः प्रधानार्थत्वमात्रेण निराकाङ्क्षस्याङ्गार्थतापि किमित्यङ्गीकृतेत्याशङ्क्य नाल्पकालत्वमात्रेणाव्यवधायकत्वं भवतीत्यभिप्रायेण परिहरति * इममेवेति * तस्मादित्युपसंहारभाष्यमविरोधसिद्धान्ताभिप्रायेण व्याचष्टे * तस्मादिति * एवं यथाभाष्यमधिकरणं व्याख्यायोदाहरणानि प्रत्यक्षश्रुतिदर्शनेन दृश्यात * नन्विहेति * आदिशब्दो दर्शपूर्णमासविकृतिष्वस्य विधेरतिदेशतः प्राप्तत्वार्थः। नन्वस्योत्तरीयवासोविन्यासविशेषविधानार्थत्वात् त्रिसूत्रनवतन्तुकत्रिवृद्ब्रह्मयज्ञोपवीतविधायकत्वं नास्तीत्याशङ्क्य वाक्यान्तरं दर्शयति * तथेति * स्वकर्मार्थत्वायानारभ्यविधित्वोपन्यासः। आचम- १२४१
नविधिं दर्शयति * तथेति * नन्वस्य ब्रह्मयज्ञप्रकरणपाठाद्दर्शपूर्णमासादिष्वाचमनविधायकत्वं न सम्भवतीत्याशङ्क्याह * यद्यपीति * ब्रह्मयज्ञे पूर्वगृहीतस्वाध्यायाध्ययनस्य कल्पसूत्राधिकरणे कर्माभ्यासानुसन्धानं विध्यर्थश्चानुगम्यतइत्यत्र प्रयोगप्राशुभावोपयोगिकर्मानुसन्धानप्रयोजनकत्वस्य वक्ष्यमाणत्वेन तदनुसन्धानस्य च लोकावगतशक्त्यनुसारेणाध्ययनसंस्कृतैरक्षरैः क्रियमाणस्यादृष्टार्थाचमनाद्यनपेक्षत्वादाचमनस्य नापूर्वलक्षणार्थं प्रकरणापेक्षास्तीति प्रकरणानादरेण वाक्यात्स्वाध्यायाध्ययनमात्राङ्गत्वप्रतीतेः। सर्वयज्ञेषु च मन्त्ररूपस्वाध्यायाध्ययनसद्भावात्तद्द्वारेणाचमनस्य सर्वयज्ञाङ्गत्वमवसीयते अध्ययनस्य त्वदृष्टार्थत्वे ऽपि तत्संस्कार्याणामक्षराणां ऋत्वपेक्षितनियमाद् दृष्टोपयोगिवेदत्वसम्पत्त्यर्थक्रमस्वरविशेषवदाचमनाद्यपेक्षा न विरुध्यते यथैव प्रत्यक्षस्यापि यूपादेरदृष्टोपयोगिरूपं प्रमाणान्तरागोचरत्वात्तदर्थविहिततक्षणादिसकलसंस्कारसमुदायजन्यत्वेनावसीयमानमेकसंस्कारवैकल्ये ऽपि नोत्पद्यते तथा वेदस्याप्यदृष्टोपयोगिरूपम्।

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥

इत्यादिवाक्यपर्यालोचनया तदर्थविहितसकलधर्म्मसम्पाद्यमवसीयते ऽतो ऽलौकिकरूपानभ्युपगमे च वेदवाक्यानामपि लौकिकत्वानपायाल्लौकिकवैदिकव्यपदेशभेदो निरालम्बनः स्यात् तस्मादाचमनस्य वेदत्वसम्पादनार्थत्वाद्वाक्येन प्रकरणं बाधित्वा सर्वस्मिन्वेदकार्ये प्राप्तिरिति श्रौतत्वान्न स्मार्तोदाहरणत्वमिति भावः । तावच्छब्देन च दर्शपूर्णमासप्रकरणे पठितः स वै व्रतमुपैष्यन्नन्तराहवनीयं च गार्हपत्यं चोपविश्याप आचामतीत्याचमनविधिः ऋत्वङ्गाचमनविधानार्थः सूचितः । नन्वस्तु नामेदं सर्वयज्ञाङ्गमाद्यमाचमनं प्रयोगान्तःपाति तु नैमित्तिकमिह क्रमविरोधित्वेनोदाहर्त्तव्यं तच्च प्रत्यक्षश्रुतिविहितं नास्तीत्याशङ्क्य प्रयोगान्तः पातिनैमित्तिकाचमनप्रापकं लिङ्गं दर्शयति * तथा चेति * दक्षिणाचारत्वप्रापकस्यापि वैदिकस्य लिङ्गस्य दर्शनात्तदपि नेहोदाहर्त्तव्यमित्याह * दाक्षिणेति * साक्षाद्विधिना यत्र विषये सव्यस्याङ्गत्वेवा चोदना तस्मादेव विषयाद्दक्षिणाचारत्वं निवर्त्तेत अन्यत्र तु विषये तद्दक्षिणाचारत्वस्य निवर्त्तनं नाशङ्क्यते ऽपीत्यर्थः किमिति नाशङ्क्यते इत्यपेक्षिते मनसि कृतं लिङ्गमुद्भावयति * यथा वा इति * प्रागुदक्प्रवणं देवयजनं प्रत्यक् दक्षिणाप्रवणं स्मशानकरणं यथा वै दक्षिणतः पाणिरेव देवयजनं यथा वै सव्यस्तथा स्मशानकरणमिति देवयजनस्य यज्ञभूमेः प्रागुदक्प्रवणत्वं विहितमौचित्येन स्तोतुं दक्षिणः पाणिरुपमानं कृतं तदेव यजनवद्दक्षिणस्य पाणेर्यज्ञाङ्गत्वे सत्यवकल्पते नान्यथेत्यर्थः । नन्वनारभ्य विहितस्यापि यज्ञोपवीतस्यायज्ञरूपेषु दर्विहोमादिषु प्राप्तेस्तेष्वपि वा कथं चिद्यज्ञत्वेन मन्त्रोच्चारणवत्त्वेन वा प्राप्तिसम्भवे ऽप्यानुषङ्किकप्रयोगप्राशुभावोपयोगिकर्मानुसन्धानप्रयोजनत्वे ऽपि ब्रह्मयज्ञस्याहरहःस्वाध्यायमधीयीतेति नित्यत्वश्रुतेरकरणे च प्रायश्चित्तस्मरणाददृष्टार्थत्वावधारणेनादृष्टार्थोपायापेक्षित्वात्तत्प्रकरणपठितस्याचमनस्यान्यत्राप्राप्ते वाक्येन कथं चित्प्राप्तावपि प्रयोगारम्भे कृतस्य तत्प्रयोगान्तवर्त्तिसमस्तमन्त्रोच्चारणोपकारकत्वेन प्रतिमन्त्रमनावृत्तेरन्तराले प्राप्त्यभावेन क्रमादिविरोधित्वान्न सोमेनोच्छिष्टा भवन्तीत्यस्य च स्मृतिप्राप्ताचमनप्रतिषेधार्थत्वेनाप्युपपत्तेर्यथा वै दक्षिणः पाणिरित्यस्य च यज्ञाङ्गभूतदक्षिणहस्तविध्याक्षेपकत्वे यथासव्यस्तथाश्मशानकरणमित्यस्यापि प्रेतकर्माङ्गभूतसव्यहस्तविध्याक्षेपकत्वापत्तेराचारविरोधप्रसङ्गात्स्मृत्याचार-

प्राप्तदक्षिणहस्तोपमार्थत्वोपपत्तेर्विध्याक्षेपकत्वाभावात् क्रमादिविरोधे प्रत्यक्षाचमनादिविध्यभावान्नोदाहरणदूषणं युक्तमित्याशङ्क्याह * तेनेति * क्रमादेः प्रयोगाङ्गत्वात्प्रयोगस्य चाचारपर्यन्तप्रमाणप्रापितपदार्थविषयत्वात्सकलपदार्थप्राप्त्युत्तरकालभावित्वेन विरोधपूर्वपक्षायोगात्स्मृतेश्च यथाश्रुतमूलानिश्चये प्रामाण्याभावेनाचमनादेस्तत्प्रमेयत्वायोगान्निश्चये वा प्रमाणदौर्बल्यानुपपत्तेः प्रमेयबलावलेन प्रमाणबलाबलबाधासिद्धान्तायोगादनुदाहरणेत्याशयः। नन्वेवं तर्ह्यग्रवन्ति प्रागग्राण्युदगग्राणि वापवर्गवन्ति प्रागपवर्गाण्युदगपवर्गाणि वेत्याद्युदाहरणं भविष्यतीत्याशङ्क्य तत्राप्युक्तदोषसाम्याद् द्विविधस्यापि विचारस्यानुपपत्तेरधिकरणान्तरमेवेदं न भवतीत्याह * तस्मादिति * का तर्हि सूत्राणां गतिरित्यपेक्षायामाह * सूत्राणि त्विति * बाह्यस्मृतिविषयस्य विरोधाधिकरणस्याक्षेपपरिहारार्थं सूत्रद्वयं तृतीयं तु स्मृत्यधिकरणोक्ताचारप्रामाण्याक्षेपपरिहारार्थमिति विवेकः। आद्यं सूत्रं विरोधाधिकरणाक्षेपे योजयति यत्तर्हीति द्वितीयं परिहारे पठित्वा योजयति * परिमितान्येव हीति * १२५।२

पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश॥

इति स्मृत्यैव चतुर्दशानां धर्म्मप्रमाणत्वमुपपादितं च स्मृत्यधिकरणे अथ।

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं च विद्याह्यष्टादशैव तु॥

इति स्मृत्या पूर्वैः सह संख्यानेनायुर्वेदादीनामपि क्रत्वर्थाज्यावेक्षणादिसङ्ख्यर्थचिकित्सादिग्विजयार्थं शास्त्रविद्यागानौपयिकषड्गादिद्रव्यार्जनोपयोगिनीति द्वारेण धर्म्मप्रमाणत्वं तथापि बौद्धादिग्रन्थानां तन्मध्यपातामावान्न धर्म्मप्रामाण्यमित्यर्थः। आयुर्वेदधनुर्वेदगन्धर्ववेदास्त्रय उपवेदाः मीमांसान्यायविस्तरौ द्वे तूपाङ्गे साधारणीविशेषविषया च द्विविधा शिक्षा तत्र साधारण्याद्वेदाङ्गत्वेन धर्म्मप्रामाण्येऽपि कात्यायनादिप्रणीताया विशेषविषयायाः प्रतिवार्क्यं प्रतिपदं चोच्चारणं नियच्छन्त्या धर्मप्रमाणत्वाभावशङ्कानिराकरणार्थं पृथगुपादाने ऽपि शिक्षात्वेनैक्यान्नातिरेकापत्तिः। दण्डनीतिरर्थशास्त्रम्। ननु परिमिते विद्यास्थानबाह्यत्वे ऽपि तत्संवादिनां बौद्धादिग्रन्थानां कस्मान्न धर्म्मप्रामाण्यमित्याशङ्क्याध्ययनविधिवशाद्वेदादेवावगम्यानुष्ठितं कर्म्म श्रेयः साधयतीति नियमप्रतीतेर्बौद्धादिग्रन्थादवगम्यानुष्ठितस्यापि वेदार्थस्य श्रेयःसाधनत्वाभा-

वाद्वेदादिपूर्व्वशास्त्रार्थस्य गोचरस्य बुद्धादिकृतस्य वाक्यस्य धर्मे-
प्रामाण्यं नास्तीत्याह * प्रतीतिं * एतदेव व्यवहारेण द्रढयति *
तथा चेति * नन्वेवं सति मन्वादिग्रन्थानामप्यप्रामाण्यं स्यादित्या-
शङ्क्याह * वेदेनैवेति * मन्वादीनां धर्मप्रवक्तृत्वस्य वेदानुज्ञां दर्श-
यति * तथा चेति * नन्वनादेर्वेदस्यादिमन्मन्वादिपुरुषविशेषाभि-
धायित्वायोगाच्छ्रुतिसामान्यमात्रेण मन्यते ज्ञायते तेनेति व्युत्पत्त्या
मनुशब्देन वेदाभिधानान्नानेन वाक्यशेषेण मनोः प्रवक्तृता ऽनुज्ञा-
यतइत्याशङ्क्याह * न चैतिदिति * ननु मनोः प्रवाहनित्यत्वे ऽपि
तत्स्मृतेरनित्यत्वान्न वेदेन प्रामाण्यानुज्ञानं सम्भवतीत्याशङ्क्याह *
प्रतीति * ननु कल्पान्तरे मनूनामभावात्तद्वाक्यप्रामाण्यपरत्वे वे-
दस्यानित्यत्वं स्यादित्याशङ्क्याह * स्थिताश्चेति * दृष्टान्तं विवृणो-
ति * प्रतियज्ञमिति * मन्वादेः प्रवाहनित्यता कथमवगम्यतइत्यपे-
१२६।२ क्षिते मनुवचनमुदाहरति * उक्तं चेति * दृष्टान्तान्तरमाह * इति-
हासेति * उपसंहरति * तेनेति * कथं पुनर्वेदातिरिक्तानामपि
तन्मूलानां ग्रन्थानां धर्मप्रमाङ्गत्वमतन्मूलानां च तत्संवादिनामप्य-
नङ्गत्वमित्यवगम्यतइत्यपेक्षायामुभयद्योतकं लिङ्गं दर्शयति * तथा
चेति * वेदमूलानां धर्मप्रमाङ्गत्वद्योतकत्वमस्योपपादयति * अन्य-
था हीति * बाह्यानां धर्मप्रमानङ्गत्वद्योतकमुपपादयति * यदि
चेति * वेदमुलग्रन्थनिबन्धनानां धर्मप्रामाण्यं न बाह्यानामिति
यदि नाश्रीयते तथा सति बाह्यानां विज्ञातप्रत्यक्षातिमूलत्वान्नैवावि-
ज्ञातमूलं किं चिदित्यर्थः । अतः साक्षात्परम्परया वा वेदादवग-
म्यानुष्ठितो ऽर्थः श्रेयःसाधनमिति शास्त्रार्थावधारणद्वेदार्थस्यापि
बाह्यस्मृत्यवगतस्य श्रेयःसाधनत्वं नास्तीत्यप्रामाण्याभिधानाभिप्रायं
प्रकटयति * तस्मादिति * एतदेव दृष्टान्तद्वारेण विवृणोति *
यथैवेति* अतिक्रान्तं वेदोक्तं यथा मर्यादया तया व्यवहारिणामिति
विग्रहः धर्मविप्लावकत्वाच्च शाक्यादीनामश्रद्धेयवचनत्वमित्याह
१२७।१ * स्मर्यते चेति * ननु विसंवादिशाक्यादिवाक्यानामग्राह्यत्वे ऽपि
संवादिनामहिंसादिवाक्यानां ग्राह्यत्वं भविष्यतीत्याशङ्क्याह * यथे-
ति * परपीडात्मकात्कर्मणस्तदनुरूपमात्मनः पीडात्मकं फलम्भव-
तीति कर्मानुरूप्योपमानं वैदिक्यपि हिंसा लौकिकीवदधर्म इति
सामान्यतो दृष्टदुःखोपभोगस्य पापफलत्वान्नादुःखोपभोगात्पा-
पक्षयो भवतीत्यर्थापत्तिः तद्बलाच्छाक्याद्यभिप्रायकल्पितानां ध-
र्माभासानांमध्ये पतितमित्यर्थः। संवादोत्तरकाले तर्हि ग्रहीष्यतइत्या-
शङ्क्याह * यदेति * सिद्धान्तमुपसंहरति *तस्मादिति * तृतीयं

सूत्रं स्मृत्यधिकरणोक्ताचारप्रामाण्याक्षेपपरिहारे योजयितुमुपक्रमते * यत्त्वेतदिति * धर्मजिज्ञासाधिकारे ऽप्यर्थकामाचाराणामपि दृष्टप्रमाणमूलत्वेन प्रसङ्गान्प्रामाण्यसिद्धिमभिप्रेत्य त्रिवर्गग्रहणं स्मृतिन्यायसिद्धस्याचारप्रामाण्यस्याक्षेपानुपपत्तिमाशङ्क्य तत्समर्थनार्थं सन्देहहेतुप्रदर्शनपूर्वकं पूर्वपक्षमाह * तद्विपरीतेति * त्रिवर्गविपरीतैरधर्मानर्थदुःखसाधनैरात्महननादिभिराचारैः सङ्कीर्णो व्यवहारो येषामिति विग्रहः वैद्यश्चासावातुरश्चेति कर्मधारयं कृत्वा पूर्वपदेन कर्मधारयः कार्यः अत्यन्तविलक्षणानन्ताचारमूलभूतैकश्रुत्ययोगात्प्रत्याचारं च मूलकल्पने ऽनन्तश्रुतिकल्पनापत्तेर्नाचारमूलश्रुतिकल्पनं सम्भवतीति वक्ष्यमाणप्रकारेणाचाराणां श्रुतिकल्पकत्वासम्भवमभिप्रेत्याशब्दत्वोक्तिः विरोधं दर्शयति * सदाचारेषु हीति * लोभाद्यभिभवात्सन्निहितानर्थादर्शनेनाधर्माचरणं धर्मव्यतिक्रमः । दृष्टस्याप्यनर्थस्य बलदर्पेणानादरादधर्माचरणं साहसं वहता व्यतिक्रमं साहसं च यथासम्भवं दर्शयति * प्रजापतेस्तावदिति * इन्द्रस्यापि गौतमभार्यागमनेनागम्यागमनरूपादधर्माचरणाद्धर्मव्यतिक्रम इत्यनुषङ्गेण योज्यम्। इन्द्रे ब्रह्महत्याभयादपक्रान्ते नहुषः स्ववीर्येणेन्द्रपदमाधिष्ठाय तद्भार्यां शचीमभिगन्तुं यत्नं चकार वसिष्ठपुत्रे शक्तौ राक्षसैर्भक्षिते तच्छोकान्मर्त्तुकामो जलं प्रवेष्टुमारेभे विश्वामित्रः क्षत्रियमपि त्रिशङ्कुं ब्राह्मणकन्याहरणकुपितस्य पितुः शापाच्चाण्डालत्वमापन्नं याजयामास । उर्वशीवियोगशोकात्पुरुरवा मर्त्तुमियेष विचित्रवीर्ये ऽनपत्यएव मृते तद्भार्यायामम्बिकायां धृतवाष्ट्रमम्बालिकायां पाण्डुमम्बिकाप्रेषितायां दास्यां विदुरं कृष्णद्वैपायनो जनयामास विधवानियोगो ऽपि ब्रह्मचारिणो ऽनुचित इति गृहीतेत्यनेन सूचितं, नियोगविधेरप्येकापत्यविषयत्वादनेकोत्पादनानौचित्यं प्रसङ्गशब्देन सूचितम् । भीष्मस्यानाश्रमित्वमपत्नीकस्य च स एष भीष्मः कुरुवंशकेतुर्येनाहुतास्त्रिंशतो वाजिमेधाः क्रतुप्रयोग इति धर्मव्यतिक्रमद्वयम्, रामवदित्यनेन तस्यापि पत्नीत्यागेनैकाकिनः क्रतुप्रयोगाद्धर्मव्यतिक्रमः सूचितः धृतराष्ट्रस्यान्धत्वेनानधिकृतस्य यागकरणाद्धर्मव्यतिक्रमः । अन्धस्य निरंशत्वेन धनाभावाद्यागासम्भवमाशङ्क्य ।

तस्य वीरस्य विक्रान्तैः सहस्रशतदक्षिणैः ।
अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥

इति दर्शनात्पाण्डवर्जितैर्धनैरित्युक्तम् । सुहृदश्चापि धर्मात्मा धनेन समतर्पयदिति च पाण्डुना धृतराष्ट्रादिभ्यः स्वार्जितधन-

समर्पणान्नापहारः शङ्कनीयः । पाण्डवार्जितधनोपजीवनं ज्येष्ठस्य धृतराष्ट्रस्यानुचितमिति व्यतिक्रमान्तरं चानेनोक्तम् ।

इदं सज्जं धनुः कृत्वा सज्जेनानेन सायकैः ।
अतीत्य लक्ष्यं यो वेद्धा स लभेत सुतामिमाम् ॥

इति द्रुपदेनोद्घोषिते तथाकृतवते ऽर्जुनाय द्रौपदी निवेदिता तया च विद्धेन य इमं लक्ष्यं तं वृणीष्व वरानने इति भ्रातृवचनाल्लक्ष्यवेधानन्तरमेवार्जुनो वृत इत्यपरिणयने ऽपि वरणे च जायात्वप्रकर्षादन्यस्य विशेषतो भ्रातुःकनीयसश्च जायायाः परिणयनादेको युधिष्ठिरस्य धर्मव्यतिक्रमः तथा द्रोणो ब्राह्मणो युधिष्ठिरादीनां धनुर्वेदाचार्यो त्यक्तशस्त्रो न हन्तु शक्यो ऽश्वत्थाम्नि च पुत्रे हते शस्त्रं त्यक्ष्यतीति मत्वा वध्यत्वाय शस्त्रं त्याजयितुमश्वत्थामा हत इत्यनृतं युधिष्ठिरेणोक्तमित्यपरः वासुदेवेन मातुलदुहिता रुक्मिणी परिणीता ऽर्जुनेन सुभद्रेत्येकस्यार्द्धर्मव्यतिक्रमः । उभौ मध्वासवक्षीबौ दृष्टाविति केशवार्जुनाविति च सुरापानादपरः। अन्य-
१२८।१ तनानां व्यतिक्रमं दर्शयति * अद्यत्वे ऽपीति * अश्वाश्वतरखरोष्ट्राणां न केसरिणो ददाति निषेधविषयत्वार्थं केसरित्वाविशेषणं नोभयदतः प्रतिगृह्णातीति निषेधविषयत्वायोभयदत्तं विक्रयस्तु व्रीहियवाजात्यश्वभूमिधेन्वनडुहश्चैक इत्यश्वस्य गौतमेन निषिद्धः। बौधायनेन उभयतो दर्द्धिन व्यवहार इति सर्वेषां न केवलं श्रुतिस्मृतिविरोधेनैवं जातीयकानामाचाराणामनपेक्षणीयत्वं किं तु परस्परविगानलक्षणाद्विरोधाद्धेतुदर्शनाच्चेत्याह * सर्वत्रेति * इतरेतराश्रयापत्तेरपि नाचाराणां धर्मप्रामाण्यमित्याह * किं चेति * ननु मन्वादिस्मृतिप्रामाण्यस्य साधितत्वात्तैश्च वेदो ऽखिलो धर्ममूलं स्मृतिशीले च तद्विदामाचारश्चैव साधूनामिति श्रुतिस्मृतिवदाचारप्रामाण्यस्यापि स्मृतत्वात्तन्निराकरणमयुक्तमित्याशङ्क्ते * नन्वि-
१२९।१ ति * अतिप्रसङ्गापादनेनैतद् दूषयति * आत्मतुष्टिरिति * नन्वसावप्यस्तु प्रमाणमित्याशङ्क्याह * धर्म इति * यद्यसौ धर्म एव व्यवस्थितः स्यात्ततो भवेत्प्रमाणं नन्वेतदस्तीत्याशयः । अनवस्थितत्वमुपपादयति * यथाभ्यासं हीति * वैचित्र्यं प्रपञ्चयति * तथा हीति * अत्यन्तकारुण्याच्छाक्यानां पशुहिंसादर्शने पीडा भवति। ननु साध्यात्मतुष्टेः प्रामाण्यस्मरणाच्छाक्यादीनां चासाधुत्वान्न तदीयान्यतुष्टयन्यथात्वेन किं चिद् दुष्यतीत्याशङ्क्य साधुत्वसम्मतानां वेदवादिनामथात्मतुष्टेर्वैचित्र्यमाह * तथेति * स पापेन मनसापि तन्मातुलसुतापापणं न कुर्वत इत्यपिशब्दाध्याहारे-

ण व्याख्येयम। का तर्ह्युभयप्रामाण्यस्मृतेर्गतिरित्याशङ्क्याह *तत-
श्चेति * श्रुतिस्मृतिसम्बाद्याचारात्मतुष्टिविषया स्मृतिरित्याशयः।
किं चाचारमूलभूता श्रुतिर्मन्वादिभिर्दृष्टान वा तत्र तैरदर्शनैवारचीनानां दर्शनस्यासम्भवनीयत्वान्निर्मूलत्वापत्तेराचारप्रमाण्यस्मृतेरन्यपरतैवाङ्गीकार्येत्याह * स्वयमिति * श्रुत्यभावे च स्मृतिपारतन्त्र्याच्छिष्टानां तदाचारप्रामाण्याभिधानं स्मृतिकाराणां न शोभतइत्याह * स्मृतीति * आचारमूलश्रुतिदर्शनं तु मन्वादेर्न कल्पयितुं शक्यं तदर्थानिबन्धनादित्याह * न चेति * यदि ह्याचारमूलभूता श्रुतिर्मन्वादिभिर्दृष्टा स्यात्ततः परोक्षापि स्वरूपेणासमर्पिताप्युपनयनादिश्रुतिवदर्थद्वारेण स्मर्येत तदर्थो निनिबध्येतेत्यर्थः। पूर्वपक्षमुपसंहरति * तस्मादिति * सिद्धान्ते सूत्रं पठित्वा योजयति * इति प्राप्तइति * दृष्टं फलमनुष्ठानकारणत्वेनाचरितृभिर्नाश्रितं येषु कर्मसु तानि दृष्टकारणहीनानि धर्मबुद्ध्या यानि क्रियन्ते
इत्यर्थः विशेषणस्य व्यावर्त्यमाह * शरीरेति * अस्मिन्सूत्रे हेत्व- १३०।२
नभिधानात्स्मृत्यधिकरणासिद्धान्तसूत्रोक्तं हेतुं योजयितुमाह * धर्मत्वेनेति * तान्युदाहरति * प्रदानानीति * शक्रध्वजमहः शक्रध्वजोत्सवः महेति पाठे शक्रध्वजे महायात्रेति सप्तमीसमासः देवतायतनेष्वित्यत्र महायात्रेत्यनुषङ्गः। सर्ववर्णसाधारण्यार्थे *सर्वासामित्युक्तम् * उदाहरणान्तराण्यपि दर्शयत्कारणाग्रहणमुपपादयति * प्रदीपेति * प्रदीपानां कार्त्तिकशुक्लप्रतिपदि दानं मोदकादिश्चतुर्भिर्द्रव्यैः तत्साध्यानि दानभक्षणादीनि लक्ष्यन्ते। माघसप्तमीपौर्णमासीभ्यां तत्कालानुष्ठेयं कर्म लक्ष्यते। फाल्गुनीपौर्णमास्यनन्तरायां प्रतिपदि वसन्तनिमित्त उत्सवः। स्मृतितोऽपि सदाचारप्रामाण्यमधसीयतइत्यतिप्रसङ्गदोषाभावं वक्ष्यमाणमभिप्रेत्याह * स्मृतिकाराश्चेति * सर्वाचारसाधारण्यप्रदर्शनार्थः सामान्यशब्दः उत्सवात्मकस्याचारस्य द्योतकं स्मृत्यन्तरमुदाहरति * तथेति * वैदिकमप्युत्सवलिङ्गमुदाहरति * वेदेऽपि चेति * सिद्धान्तमुपपाद्य धर्मस्य शब्दमूलत्वादिति पूर्वपक्षहेतुं साभिप्रायाविवरणमनुभाष्य निराकरोति * यत्त्विति * इहाचारेष्वनन्तेषु परिमितशास्त्रमूलत्वासम्भवादशब्दत्वेनानपेक्षत्वं यदुक्तं तद्।

भ्रान्तेरनुभवाच्चापि पुंवाक्याद्विप्रलम्भनात्।
दृष्टानुगुण्यसाध्यत्वाच्चोदनैव लघीयसी॥

इति पूर्वोक्तेन प्रकारेण वेदमूलत्वानुमानात्प्रत्याख्येयमित्यर्थः। आचारप्रामाण्यप्रतिपादिकायाश्च स्मृतेर्निर्मूलत्वयोगा-

दाचारमूलश्रुतिकल्पनमवश्यं भावीत्याह * न चेति * नन्वनन्ता-
चारमूलभूतानां श्रुतीनामानन्त्यात्पठितुमशक्तेरपठितानां च मूल-
त्वायोगान्नित्यमूलत्वमपरिहार्यमित्याशङ्क्याह * विस्तरेति * कथमन-
न्तानां संक्षेपवचनमूलत्वमित्याशङ्क्याह * शङ्क्यं चेति * ननु स्मृ-
त्यनुरूपाश्रुतिः कल्प्या कल्प्यमाना साध्वाचरणेनैवोपलक्षितानां
धर्मत्वप्रतिपादिका कल्प्येत तत्र शास्त्रव्यापारात्प्रागाचरणसिद्धौ
शास्त्रानर्थक्यमसिद्धौ वा शास्त्रादाचरणं तदुपलक्षणेनैव च शास्त्र-
प्रवृत्तिरितीतरेतराश्रयं स्यादित्याशङ्क्याह * तथा हीति * श्लोकं
१३१।१ विवृणोति * न हीति * ननु व्यापाररूपत्वात्प्रदानादीनां यागादि-
वत् स्वरूपेणापि शास्त्रगम्येन भवितव्यमित्याशङ्क्याह * यागादि-
ष्वपि चेति * पूर्वसिद्धत्वादेव च नेतरेतराश्रयमित्याह * अत
इति * ननु यदि शास्त्रप्रवृत्तिमनुपलभ्यैव शिष्टप्रवृत्तिस्ततः स्वयमे-
वानुष्ठितप्रदानादेर्भोजनादिवत्फलसाधनत्वसिद्धेः शास्त्रानर्थक्यम-
परिहृतं स्यादित्याशङ्क्यानिराकरणार्थम् * क्वाचित्कत्वेत्युक्तम् *
शिष्टप्रवृत्त्युत्तरकालं तर्हि शास्त्रस्य प्रवृत्तेरादिमत्त्वं स्यादित्याशङ्क्य
* सर्वकालं त्वित्युक्तम् * ननु शिष्टाचारस्यापि मातुलदुहित्युद्वा-
हादिषु विगानदर्शनात्कथमुपलक्षणत्वमित्याशङ्क्याह * तेषां चेति *

यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥

इति मनुना सदाचारशब्दार्थस्य निर्णीतत्वादितिभावः । स्मृति-
बलाच्च श्रुतिरपि विशिष्टविषयैव कल्प्येत्याह * वेदेनापीति *
सरस्वत्या विनशनं तिरोभावः । सारस्वतसत्रारम्भदेशस्योपलक्षणं
तस्या एव प्लक्षात्प्रस्रवणं सारस्वतसत्रोत्थानदेशस्योपलक्षणं सदा-
चारस्वरूपावधारणे यत्पूर्वमितरेतराश्रयत्वमुक्तं तदेव शिष्टप्रयोज्य-
त्वस्योपलक्षणत्वे योजयन्परिहारायानुभाषते * नन्विति * परिह-
रति * श्लोकं विवृणोति * प्रत्यक्षेति * ननु साक्षाद्धितकारित्व-
निबन्धनस्यापि शिष्टत्वस्य वेदाधीनत्वाद्वैदिके विधौ आत्माश्रयापत्ते-
र्नोपलक्षणत्वं सम्भवतीत्याशङ्क्य वैदिकत्वाभेदोऽपि विशेषरूपेण
भेदान्नात्माश्रयापत्तिरिति दृष्टान्तेनोपपादयति * तद्यथेति * यद्य-
प्यध्ययनविध्याक्षिप्तत्वाद्वेदाङ्गमीमांसाव्याकरणादिश्रवणवेदार्थज्ञा-
नयोरध्यापनविधिविहितत्वाच्चाध्यापनस्य शुश्रुवान्विद्याननूचानश्च
वैदिको वेदविहितश्रवणज्ञानप्रवचननिमित्तत्वाद्वेदाधीनस्तथापि य
एवं विद्वान्स्वाध्यायमधीयीत तत्र यो वै गतश्रियः शुश्रुवान् ग्रा-
मणी राज्यन्य इति गतश्रियं लक्षयित्वा गतश्रीरजस्रमग्नीन्धारये-

त्कामं यो ऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यादिति वेदविहितेष्वध्ययनादिषु तेनैव तल्लक्षितस्तेन शुश्रुवत्त्वादिना कृत्वा लक्षित इति तथापि शब्दार्थं पुनः शब्दमङ्गीकृत्य व्याख्येयम् । नन्वेवमपि वेदप्रवृत्तौ सत्यां साक्षाद्विहितकारित्वलक्षणं शिष्टत्वं तस्मिंश्च सति शिष्टप्रयोज्यत्वोपलक्षिताचारप्रामाण्यप्रतिपादकवेदप्रवृत्तिरितीतरेतराश्रयं स्यादित्याशङ्क्याह * तेनेति * यत्तु स्वयमज्ञातमूलाश्रेत्यादिना मन्वादिभिराचारमूलश्रुत्यदर्शने ऽन्येषां दर्शनस्य दूरोत्सारितत्वादभाव एव प्रसज्येत दर्शने चोपनयनादिश्रुत्यर्थवदाचारमूलश्रुत्यर्थो ऽपि निबन्धनीयः स्यादित्युक्तं तन्मन्वादीनामपि सर्वशाखाध्यायित्वनियमाभावात्तददर्शनमात्रेणाभावकल्पनानुपपत्तेर्दर्शनेऽपि वा सदाचारः प्रमाणमिति सामान्याभ्यनुज्ञानमात्रेण सिद्धेर्ग्रन्थगौरवभयाद्विशेषरूपेणानिबन्धनोपपत्तेर्भविष्योत्तरादौ च होलाकाद्याचाराणां निबद्धत्वात्परिहृतमित्याह * स्मृतिरपीति * वेदविहितकारिणां धर्मबुद्ध्याचरणस्य वेदमूलत्वं विनानुपपत्तेराचाराद्वेदमनुमायापि स्मर्तृप्रणयनमुपपन्नमित्यभिप्रेत्या * चारमित्युक्तम् * ननु विस्तरवचनानामपीत्यनेन प्रत्येकमाचारामूलश्रुतिकल्पनमुक्तं किमुत संक्षेपवचनस्येत्यनेन स्मृत्यनुरूपसामान्यश्रुतिकल्पनं तत्को ऽनयोः पक्षयोः सम्मत इत्यपेक्षायामुभयथापि दोषाभावप्रतिपादनार्थं पक्षद्वयोपन्यासः । परमार्थतस्त्वश्रीरातनूर्भवति रुशती जाययामुया पतिर्यदूबद्धो वाससा स्वमङ्गमभिधित्मतइत्याद्यानां स्त्रीवासोपरिधानाद्याचारमूलभूतानां बह्वीनां श्रुतीनां दर्शनात्प्रत्येकश्रुतिकल्पनपक्ष एव ज्यायानिति सूचयितुमाह * इत्यदोष इति * हेतुदर्शनमनुभाष्य परिहरति * यत्त्विति * एतदेव विवृणोति * वेदे ऽपि हीति * ननु दृष्टार्थत्वसम्भवे ऽपि वेदमूलत्वक- १३२।२
ल्पने धर्माचारस्यार्थकामाचाराभ्यां विवेको न स्यादित्याशङ्क्याह * यानि त्विति * ननु म्लेच्छादिसाधारण्यात्कृष्यादेर्धर्मत्वानभ्युपगमे देवपूजादेरपि धर्मत्वाभावापत्तेर्दानन्दयादमः क्षान्तिः सर्वेषां धर्मलक्षणमित्यादिस्मृतिविरोधः स्यादित्याशङ्क्याह * किं त्विति * ननु सर्वसाधारणस्य कथमसाधारण्येन शिष्टाचारगतत्वमुच्यते इत्याशङ्क्य शूद्रादिभिरपि शिष्टत्वायैव धर्मबुद्ध्याचरणादसाधारण्यसिद्धिरिति परिहरति * लोके हीति * अतो ऽस्ति विवेक इत्युपसंहरति * तत्रेति * यत्त्वात्मतुष्टेरपि प्रामाण्यापत्तेर्न स्मृतेराचारप्रामाण्यप्रतिपादनपरतेत्युक्तं तदात्मतुष्टेरपि प्रामाण्योपपादनेन दूषयति * एतेनेति * वेदविहितकार्याचारस्य वेदमूलत्वं विनानु-

पपत्तेर्वेदमूलतयाचारप्रामाण्यप्रतिपादनेन वेदजन्यानन्तधर्मधीसंस्कृतान्तःकरणानामात्मतुष्टेरपि वेदमूलत्वं विनानुपपत्तेः सन्दिग्धधर्मनिर्णयार्थत्वेन प्रामाण्यं वेदएव प्रसिद्धमित्यर्थः। शुद्धिशब्देन निर्णयो ऽभिहितः। श्लोकं विवृणोति * तथैवेति * वेदतदर्थज्ञानस्याव्यवस्थितत्वनिराकरणार्थं तथैवेत्युक्तम्। प्रसिद्धिं दर्शयितुमित्याश्रित्योच्यतइति वेदवाक्यगतार्षशब्दव्याख्यानार्थं वेदएव सम्भवतीत्युक्तम्। एतदेव दृष्टान्तेनोपपादयति * तथा हीति * सन्दिग्धार्थनिर्णायकत्वमात्मतुष्टेर्द्रढयितुमभियुक्तसम्मतिमाह * एवं चेति * प्रसिद्ध्युपपादनायविद्वद्ग्र * चनादित्युक्तम् * निरूपणं दर्शयितुं कालिदासवाक्यमुदाहरति * सतां हीति * दुष्यन्तेन शकुन्तलेयं मम परिणेतुमुचिता न वेति सन्दिह्यासंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मन इत्यात्मतुष्टयौचित्यं निश्चित्य कथमात्मतुष्टिमात्रेण निश्चय इत्याशङ्क्य सतां हीत्युक्तम्। अस्यैव वाक्यस्याभिप्रायमाह * बहुदिनेति *एवं तावच्छिष्टात्मतुष्टेर्वेदनियतमार्गानुसारित्वात्स्मृत्याचारवद्धर्मप्रतिज्ञापकहेतुत्वमुक्तमिदानीमात्मतुष्ट्या स्वविषयस्य कस्य चिच्छ्रुत्याद्यविरुद्धस्य कर्मणः श्रेयःसाधनशक्तिरूपं धर्मत्वमुत्पाद्यत इति कारकहेतत्वमाह * यद्धेति * वचनादेवेत्यात्मनस्तुष्टेरवेत्यत्रानुपज्यमानस्य धर्मोत्पादकत्ववाचित्वमभिप्रेत्योक्तम् * धर्मतेति * अथ चोपरिष्टात्तथाचारात्मतुष्ट्यादिधर्ममिति तस्मै हितमित्युपकारार्थं यत्प्रत्ययदर्शनाद्धर्मोपकारिता धर्महेतुतेत्यर्थः। स्वभावभिन्नानामप्येकोपधियोगादेकशक्त्याविर्भावः सम्भवतीति दृष्टान्तेनोपपादितं यथा भिन्नानामपि देवदत्तादीनामेकपुण्यक्रियायोगाद्ध्यायमानानां श्रेयःसाधनत्वं तथा भिन्नानामपि कर्मणामेकशिष्टात्मतुष्टियोगात् श्रेयःसाधनत्वमित्यर्थः। तस्माच्छब्देन पुण्यकृद्ध्यानस्याश्रयः साधनत्वे प्रमाणं पार्षं ध्यात्वा पुण्यकृतो ऽध्यापयेति वचनं परामृष्टम्। आचारे ऽपीमं परिहारमतिदिशति * आचारेष्वपीति * आचारश्चैव साधनमित्यनेनापि श्रुतिस्मृत्यविरुद्धं यत् किं चिच्छिष्टैः क्रियते तत् श्रेयःसाधनमित्युच्यतइत्यर्थः। अत्रैव दृष्टान्तान्तरमाह * यथा चेति * भिन्नानामपि मन्त्राणामुच्चारयितृयोगादोषधीनां नकुलदंष्ट्रायोगाद्ध्रुवां पुण्यकृद्योगाद्येकशक्त्याविर्भावो यथेत्यर्थः। दार्ष्टान्तिके योजयन्नुपसंहरति * तथेति * धर्मव्यतिक्रममनुभाष्य परिहरति। यत्विति * प्रजापतौ तावच्छ्रुतिसामान्यं विवृणोति * प्रजापति-

---

• तदिति २ पु० ना०

स्तावदिति * इन्द्रे विवृणोति * एवमिति * नहुषे श्रुतिसा- १३४।१
मान्यमात्राद्धेति वाशब्दसूचितं सदाचारत्वाभावं विवृणोति * न-
हुषेण पुनरिति * सदाचारस्य प्रमाणत्वेनाभ्युपगतस्य व्यभिचा-
रः परिहर्त्तव्यः नहुषाचारस्य त्वनन्तरमेवाजगरत्वप्राप्त्या सदाचा-
रत्वाभावनिश्चयाद्व्यतिक्रमे ऽपि धर्मबुद्ध्या क्रियमाणस्याचारस्य
व्यतिक्रमाभावान्न दोष इत्याशयः। परदाराभियोगोक्त्याभियुज्यमा-
नायां शच्यामपि शङ्कितं व्यतिक्रमं निराकर्त्तुमाह * शच्याश्चेति *
वशिष्ठाचारस्यापि पुत्रशोकजनितव्यामोहनिमित्तत्वारव्यानाद्धर्मबु-
द्ध्या क्रियमाणत्वाभावात्सदाचारत्वाभावनिश्चय इत्याह * व-
शिष्ठस्यापीति * श्लोकं व्याचष्टे * यो हीति * विश्वामित्रे
तेजोबलवशेनेति परिहारं विवृणोति * तेनेति * स हि व्यामो-
हाभावे ऽप्यापदि मत्कुटुम्बं भृतवतस्त्रिशङ्कोः प्रत्युपकर्त्तव्यं मयेति
प्रत्युपकर्त्तव्यं मयेति प्रत्युपकारेच्छया चण्डालमपि वा सशरीरं
स्वर्गं नयामीति स्वप्रभावव्यापनेच्छया त्रिशङ्वेष्टरि वशिष्ठे द्वे-
षाच्च तपोबलेन पापं नाशयामीत्यध्यवसाय चण्डालं याजयामा-
स। येन कारणेन कामादिहेतुकस्याचारस्य धर्मादर्शनं नास्ति तेन
कारणेन विश्वामित्रचरितमपि न धर्मादर्शत्वं प्रतिपद्यतइत्येवं तेन
शब्दो योज्यः सर्वं बलवतः पथ्यमित्येतमेव न्यायं प्रकृते योजयितु
माह * महान्ति चेति * द्वैपायने गर्हानिरासार्थं यथा वा न विरुद्धत्व-
मिति परिहारमुपक्रम्यापरितोषात्तेजोबलवशेन वेत्येतमेव परिहारं
दर्शयति * द्वैपायनस्यापीति * कथं पराशरपुत्रस्य द्वैपायनस्य शन्त-
नुपुत्रो विचित्रवीर्यो भ्रातेत्याशङ्क्य मातृसम्बन्धवचनम्। सत्यव-
त्यामनूढायां पराशराद् द्वैपायनो जातः शन्तनुना पश्चादूढायां वि-
चित्रवीर्यः। एवमपि।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः॥

इति नियोगस्य वाग्दत्ताविषयत्वादम्बिकाम्बालिकयोश्च वि-
चित्रवीर्येण परिणीतत्वादास्याश्च भ्रातृजायात्वाभावाद् ब्रह्मचारिण-
श्च मैथुनस्य निषिद्धत्वादपरितोषेण प्राक्कृतेत्युक्तम्। रामभीष्म-
योर्यथा वा न विरुद्धत्वमिति परिहारं विवृणोति * रामेति * र-
तिपुत्रार्थत्वनिरासाय मातृशब्दः * नन्वेवं सति *

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति।
तस्या रजसि तं मासं पितरस्तस्य शेरते॥

इति विहितातिक्रमात्प्रत्यवायः स्यादित्याशङ्क्य स्नेहपितृ

* भक्तिवशादित्युक्तम् * रामेण सीतास्नेहाद्भार्यान्तरागमनव्रतग्रहणाद्भीष्मेण च शन्तनवे सत्यवतीं तत्पितरं याचता त्वयि महाबले राज्यभिलाषुके तिष्ठत्येतस्याः पुत्राणां राज्यालाभान्नेमां ददामीति तत्पित्रा प्रत्याख्यातेन राज्यं नाहं करिष्यामीति प्रतिज्ञाते त्वय्यनिच्छत्यपि त्वत्सन्ततिभयान्नैतस्याः सन्ततौ राज्यभागिनी स्यादिति तत्पित्रा पुनः प्रत्याख्यातेन ।

अपत्यहेतोरपि च करोम्येतद्विनिश्चयम् ।
अद्य प्रभृति मे दारा ब्रह्मचर्यं भविष्यति ॥

इति पितृभक्त्या ब्रह्मचर्यव्रतग्रहणान्नैमित्तिकेन च व्रतेन नित्यस्यर्त्तुकालगमनस्य बाधाद्धर्ममात्रार्थमहं भार्यां पार्रणेष्यामीति परिभाष्य परिणीतायामगमने ऽप्यदोष इत्याशयः । एवमप्यनपत्यत्वेन पितृणामपाकरणात्प्रत्यवायः स्यादित्याशङ्क्य * साक्षादित्युक्तम् * साक्षादपत्याभ्यां कुशलवाभ्यां कृतपित्रा ऽनृण्यो रामः व्यवहितैर्विचित्रवीर्यस्यापत्यैर्धृतराष्ट्रादिभिः कृतपित्रानृण्यो भीष्मः । ननु रामस्य धर्मार्थदारान्तरसद्भावे यज्ञे यज्ञे प्रकुरुते सीतां पत्नीं हिरण्मयीमिति हिरण्मयीसीताकरणमनर्थकं स्यादित्याशङ्क्याह * हिरण्मयीति * अपवादभीत्या त्यक्ता या सीता तद्व्रतं तद्विषयं यदानृशंस्यमनैष्ठुर्यं तदभावाशङ्कानिरस्यवृर्थमित्यर्थः। रावणापहारदूषितां सीतां रामो भजतइति लोकापवादभयमात्रेणासौ त्यक्ता न सीतायां दुष्टत्वात् नापि रामस्य सीतायां नैष्ठुर्यादिति द्योतयितुं लोकापवादभीतिं प्रति त्यागस्य नित्यसापेक्षत्वदर्शनाय त्यक्तशब्दस्य सीताशब्देन सह सापेक्ष्यसमासः कृतः । कथं व्यवहितापत्यकृतपित्रानृण्यता भीष्मस्येत्यपेक्षायामाह
१३५।१ * भीष्मश्चेति * ननु तयोर्द्धर्ममात्रार्थदारसद्भावः क्व चिदपि पुराणेतिहासयोरनुक्तः केवलप्रमाणेनावगम्येतेत्याशङ्क्याह * केवलेति * अपिशब्देनापत्यहेतोरद्य प्रभृतीति च विशेषणसामर्थ्यादप्येवमवगम्यतइति सूचितं, ननु मोहादप्यनुष्ठानोपपत्तेर्नैकान्ततो ऽर्थापत्तिः सम्भवतीत्याशङ्क्य ।

श्राद्धकाले मम पितुर्मया पिण्डः समुद्यतः ।
तं पिता मम हस्तेन भित्त्वा भूमिमयाचत ॥
नैष कल्पविधिर्दृष्ट इति निश्चित्य चाप्यहम् ।
कुशेष्वेव तदा पिण्डं दत्तवानविचारयन् ॥

इति भीष्मस्यात्यन्तनैपुण्यान्मोहासम्भवं दर्शयितुमाह * यो वेति*धृतराष्ट्रे ऽप्येतमेव परिहारं दर्शयति*धृतराष्ट्रो ऽपीति * हतेषु

पुत्रेषु शोकार्तेन धृतराष्ट्रेण सकृत्पुत्रदर्शनं प्रार्थितं व्यासेन योगबलात्सम्पादितमित्याश्चर्यपर्वणि कथापरिहारवैभवाय प्रकारान्तरेणाविरोधमाह * यद्वेति * नन्वेवं सत्यश्वमेधशतैरीजे धृतराष्ट्रो महामखैरित्यश्वमेधशब्दानुपपत्तिमाशङ्क्यौपचारिकत्वेनोपपादयति *क्रतुफलेति * युधिष्ठिरग्रहणेन पञ्चानामप्येकपत्नीत्वलक्षणस्य धर्मव्यतिक्रमस्य सूचितत्वात्तत्र मनुष्यप्रतिषेधाद्वेति परिहारं दर्शयितुमाह * या चेति * प्रतिकूलतयापादितागमिता निराकृतेत्यर्थः। द्वैपायनीयमुपपादनप्रकारमाह * यौवनेति *

कुमारी चैव तन्वङ्गी वेदिमध्यात्समुत्थिता।
श्यामा पद्मपलाशाक्षी पीनोन्नतपयोधरा ॥ १ ॥
द्रौपद्येषा हि सा जज्ञे सुता ते देवरूपिणी।
पञ्चानां विहिता पत्नी कृष्णा पार्वत्यनिन्दिता ॥ २ ॥
स्वर्गस्त्रीपाण्डवार्थाय समुत्पन्ना महामखे

इत्यादिबहुप्रकारममनुष्यत्वोपपादनादविरोध इत्याशयः।नन्वमनुष्यत्वात्तस्या निषेधाभावे ऽपि पाण्डवानां मनुष्यकुन्तीमाद्रीयोनिजत्वेन मनुष्यत्वान्निषेधो भविष्यतीत्याशङ्क्याह * सा चेति * लक्ष्मीश्चैषा पूर्वमेवोपदिष्टा भार्या चैषां द्रौपदी दिव्यरूपा कथं हि स्त्री कर्मणोऽन्ते महीतलात्समुत्तिष्ठेदन्यथा दैवयोगादिति द्वैपायनेनैव तस्याः स्त्रीत्वव्युत्पादनाच्छ्रिया सर्वसेव्यत्वादनिषेध इत्यर्थः। द्वैपायनीयस्य वेदिमध्योद्भवत्वाद्यभिधानस्यानिषिद्धत्वायामनुष्यत्वोपपादनार्थतामभियुक्तवचनेन द्रढयितुमाह * अत एव चेति *

यदि मे पतयः पञ्च वरमिच्छामि याचितुम्।
कौमारमेव तत्सर्वं सङ्गमे सङ्गमे भवेत् ॥

इति पूर्वजन्मनि तया च पञ्चकृत्वः पतिं मे देहीति याचितेनेश्वरेण पञ्च ते पतयो भविष्यन्तीत्युक्ते पुरुषसंयोगजयोनिक्षताभावरूपं कौमारं प्रार्थितमित्यभिधानात्प्रत्यहमक्षतयोनित्वरूपं कन्यात्वं तस्याः सूचितमिति मत्वा जगाद विप्रर्षिः कृष्णद्वैपायन इत्युक्तम्। कृष्णेनापि कर्णं भेदयितुं पाण्डवास्त्वामेव मातृसम्बन्धाज्ज्येष्ठं भ्रातरं मत्वा राज्ये ऽभिषेक्ष्यन्तीत्यादिप्रलोभयित्वा षष्ठे च त्वामहनि द्रौपद्यागमिष्यतीत्यभिधानादमनुष्यत्वेनानिषिद्धत्वं तस्याः सूचितमित्याह * अत एव चेति * यस्त्वश्रद्दधानतयेममागमिकमपि परिहारं नानुमन्यते तं प्रत्येकपत्नीत्वमेव पञ्चानामसिद्धमिति दर्शयन्नन्यथा परिहारद्वयमाह * अथ वेति * निश्छद्मत्वायापारमार्थिको ऽपि साधारण्यव्यवहारः पाण्डवानां नीतिशा- १३६।१

स्वानुसारात्सम्भवन्तीति दृष्टान्तेनोपपादयन्नाह * यथेति * रजस्वलायाः स्वयं सभागमनस्यात्यन्तमसम्भवाद् दुःशासनस्य चाप्रभुत्वाद्धृतराष्ट्र एव मामानयतीति ख्यापयितुं रजस्वलावेषं कृतवतीत्यर्थः । आनायनख्यापनप्रयोजनं सपुत्रकस्येत्युक्तं दुःशासनस्यानेतृत्वख्यापनेनायशो ऽतिशयोत्पादनं चशब्देन सूचितम् । अन्याय्यमानमिति पाठे दुःशासनो मां प्रत्यन्याय्यं करोतीत्यस्मिन्नर्थे ऽन्याय्यप्रातिपदिकात्तत्करोति तदाचष्टइति णिचमुत्पाद्यातो लोप इत्यकारलोपे कृते कर्मणि लडादेशे शानचि परे सार्वधातुके यगिति यकि कृते णेरनिटीति णिलोपाद्रूपसिद्धिः स्वापमानख्यापनप्रयोजनं च पाण्डवानां कोपातिशयोत्पादनं श्रीत्वदर्शनप्रयोजनं श्रीपतेर्नारायणस्यैवांशा वयमिति शत्रून्प्रति ख्यापनं परिहारवैभवमात्रार्थमस्य परिहारद्वयस्य सूचयितुमादिशब्देनानवक्लृप्त्यभिधानं दुराचारत्वाभ्युपगमेन धर्मबुद्ध्यानाचरणादसङ्कर इति परिहारवैभवार्थमेव रागेति परिहारान्तरं दत्तम् । युधिष्ठिरस्याचार्यब्राह्मणवधार्थानृतभाषणे रागादिकृतत्वमेव परिहार इति प्रायश्चित्तकरणेन दर्शयति * तथा चेति * ननु कामतो ब्राह्मणवधे निष्कृतिर्न विधीयतइति स्मृतेः कामकृते प्रायश्चितं नास्तीत्याशङ्क्य कामकृते ऽप्येक इति स्मृतिरुदाहृता । अन्ते ऽपीत्यपिशब्देनास्य दुराचारत्वेनापि युद्धान्ते प्रायश्चित्तकरणान्नातिगर्हणीयो युधिष्ठिर इत्युक्तम् । कृष्णार्जुनयोर्मद्यपानमातुलदुहितृपरिणयने यथा वा न विरुद्धत्वमित्येतं परिहारमाह * यस्त्विति * ननु सर्वा न पेया ब्रह्मवादिभिरिति वेदाध्ययनयोगात्त्रैवर्णिकमात्रस्य त्रिविधसुरानिषेधावधारणेन ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति सामान्यशब्दस्यापि त्रिविधसुराविषयत्वनिश्चयान्न सुरा वै मलमन्नानामिति वाक्यशेषानुरोधेन पैष्टीमात्रविषयत्वं युक्तमित्याशङ्क्याह * मधुसीध्वोस्त्विति * सीधुर्गौडी । त्रिविधसुराव्यतिरिक्ताडादिप्रभवमद्यमात्रनिषेधो गौतमीये यथा केवलब्राह्मणविषयः तथा मानवीयो ऽपि त्रिविधसुरानिषेधो ब्रह्मवादिशब्दस्य ब्राह्मणमात्रविषयत्वात्केवलब्राह्मणविषय इत्यर्थः । को ऽसौ मानवीयो निषेधः केवलब्राह्मणविषय इत्यपेक्षायामाह * यदपीति * एतदपि मनुवचनं गौतमवचनवत्केवलब्राह्मणविषयमिति विपरिणमतानुषक्तेन पूर्वेण समापनीयं कथमस्य केवलब्राह्मणविषयतेत्यपेक्षायामाह * ब्रह्मेति * ननु ब्रह्मवचनशील-
१३७।१ त्वादेरपि त्रिष्वपि वर्णेषूपपत्तेस्तन्निमित्तत्वे ऽपि कथं ब्राह्मणमात्रविषयतेत्याशङ्क्याह * प्रवचनेति * वदतेरुच्चारणमात्रार्थत्वे त्रया-

णामपि तच्छीलत्वादिसम्भवात्ताच्छील्यादिवचनस्य णिनेरविशेषकत्वेनानर्थक्यापत्तेः। शूद्रानिवृत्तेश्च कर्तृमात्रवचनतृजादिप्रत्ययप्रयोगमात्रेण सिद्धेः प्रवचनार्थे वदत्याश्रयणेन यस्यैव प्रवचनमध्यापनमस्ति स एवाध्यापनरूपब्रह्मवदनप्रवृत्तिस्वभावत्वात् ब्रह्मवदनशीलस्तस्यैवाध्यापनं स्वधर्म इति ब्रह्मवदनधर्मा स एवाभ्यासवशेनास्खलिताध्यापनशक्तत्वाद् ब्रह्मवदनसाधुकारी वा ब्रह्मवादिशब्देन विवक्षितो भवतीत्यर्थः। कथं वदतेः प्रवचनार्थतेत्याशङ्क्य ब्रूञ्वदत्योरे * कार्थत्वादित्युक्तम् * प्रवचनमपि वर्णत्रयसाधारणं कस्मान्न भवतीत्याशङ्क्य च प्रब्रूयाद् ब्राह्मणस्तेषां नेतराविति निश्चय इति स्मृतिरुपन्यस्ता उपसंहरति * तस्मादिति * केवलब्राह्मणविषयत्वमेवास्य वचनान्तरे ब्राह्मणग्रहणेन द्रढयति * तथा चेति * न तु पैष्टीनिषेधस्य वर्णत्रयविषयत्वाभ्युपगमाद्यथैवैका तथा सर्वेति सुरामात्रनिषेधस्य वर्णत्रयविषयत्वप्रतीतेर्न केवलब्राह्मणविषयत्वं युक्तमित्याशङ्क्यैतद्वचनं ब्राह्मणविषयत्वे योजयति * तस्मादिति * ननु मद्यान्तरनिषेधवत्सुरान्तरनिषेधस्यापि ब्राह्मणमात्रविषयत्वशङ्कानिवृत्त्यर्थं पदद्वयमप्यर्थवद्भविष्यतीत्याशङ्क्य पूर्वोदाहृतेन मानवीयेनैव श्लोकेनैतच्छङ्कानिवृत्तेरानर्थक्यं समर्थयते * श्लोकान्तरेति * नन्वेवमपि कृष्णार्जुनयोः क्षत्रियत्वात्पैष्टीपानं विरुद्धमेवेत्याशङ्क्य तयोर्माध्वीपानस्मरणान्न पैष्टीपानशङ्कास्तीति परिहरति * तेनेति * केशवार्जुनयोर्मध्वासवपानस्याविरुद्धत्वमेव द्रढयितुं वेदवाक्यमुपन्यस्यति * तथा चेति * क्षत्रियस्य मधुसीधुनिषेधाभावेनाभ्यनुज्ञानार्थक्यादन्यार्थदर्शनमेवेदम् अथापि केन चित्सामान्यवचनेन क्षत्रिये ऽपि निषेधः प्रसज्येत तथाप्यनेनानुज्ञातत्वाददोष इति वाशब्देन सूचितम्। सत्यपि तु निषेधे प्रतिषिद्धाभ्यनुज्ञायाः विकल्पापादकत्वेन दुष्टत्वान्नायं पक्षविकल्पार्थो वाशब्दः। ननु नैव सुरा पीता हिनस्तीति सामान्याभिधानात्पैष्टीपानमपि क्षत्रियस्याविरुद्धं स्यादित्याशङ्क्याह * मध्विति * सुरा वै मलमन्नानामिति मनुना पैष्टया वर्णत्रये निषेधादस्याश्च श्रुतेरन्यार्थदर्शनमात्रत्वादित्याशयः। मातुलदुहितृपरिणयने विरोधाभावमनुभाषणपूर्वकं दर्शयति * यस्विति। अयमाशयः * नार्जुनमातुलस्य वसुदेवस्यात्मजा सुभद्रेति क्व चिदाख्यायते किं त्वनुजा वासुदेवस्य सुभद्रा वरवर्णिनीत्यादिव्यवहारदर्शनात्कल्प्यं स त्वन्यथाप्युपपत्तेर्नैकान्ततः सुभद्राया वसुदेवात्मजात्वं कल्पयितुं शक्नोतीति। एतदेव विवृणोति * यद्यपीति * ननु बलदेवस्य रोहिणीसुतत्वाद्वासुदेवस्य च देव-

कीसुतत्वादेकानंशायाश्च यशोदाकन्यात्वात्त्रयाणामपि निजत्वं नास्तीत्याशङ्क्योत्पत्ताविति्युक्तम् ।

सप्तमो देवकीगर्भो यों ऽशः सो ऽन्यो ममाग्रजः ।
स संक्रामयितव्यस्ते प्रथमे मासि रोहिणीम् ॥

इति देवकीगर्भसम्भूतस्यैव बलदेवस्य रोहिणीगर्भसङ्कर्षणे निद्राया विष्णुना प्रेरितत्वात्तया च तथाकृतत्वादेकानंशायाश्च ।

अष्टमे मयि गर्भस्थे कंसो यत्नं करिष्यति ।
या तु सा नन्दगोपस्य दयिता कंसगोपतेः ॥
यशोदा नाम भद्रं ते भार्यागोपकुलोद्वहा ।
तस्यास्त्वं नवमो ऽस्माकं कुले गर्भो भविष्यसि ॥

इति यशोदागर्भसम्भूताया अप्येकानंशाख्यायां निद्राया नवसंख्यापूरणेन विष्णुनैव निजत्वान्वाख्यानादेवकया ऽपि दारिका मम जातेति कंसं प्रोवाच देवकीति स्वगर्भसम्भूतत्वान्वाख्यानान्निजत्वमित्याशयः । सुभद्रा तु यद्यपि रोहिणीदुहितृत्वेनान्वाख्यायते तथापि वसुदेवात्मजातत्वे तद्भागिनेयस्यार्जुनस्य परिणयनविरोधाद्वासुदेवस्य सापत्नमातू रोहिण्याः स्वसुः सुभद्रा दुहिता रोहिण्या एव वा पितृष्वस्रीयाया लाटादिषु भगिनीशब्दाभिलप्यत्वेन प्रसिद्धा या दुहिता तत्सपत्नीसुतस्य वासुदेवस्य भगिनीति व्यपदिश्यत इति यथासम्भवं व्यवधानं कल्पनीयमित्यर्थः । न त्वर्जुनमातुः पृथाया वसुदेवभगिन्याः पित्रा शूरेण कुन्ति भोजाय दुहितृत्वेन दत्तत्वात्पिण्डगोत्रे जनयितुर्न भजेदित्रिमः क चिदितिवचनात्सापिण्ड्यनिवृत्तेर्वसुदेवाङ्गजाताया अपि सुभद्रायाः पृथात्मजस्यार्जुनस्य परिणयनविरोधपरिहारसम्भवाद्व्यवधानकल्पनमनर्थकमित्याशङ्क्याह * वसुदेवेति * कुन्तिभोजदुहितृत्वनिमित्तः पृथायां कुन्तीव्यपदेशः यद्यप्यर्जुनः कुन्तीभोजदत्तायाः पुत्रस्तथापि ऊर्द्धसप्तमात्पितृबन्धुभ्यो बीजिनश्चेति निषेधाद्वसुदेवाङ्गजातस्यापरिणेयेत्याशयः । ननु विरुद्धो ऽप्ययमाचारो वासुदेवेनार्जुनप्रीत्या प्रवर्त्तित इत्यपि परिहारोपपत्तेरनुक्तव्यवधानकल्पना न युक्तेत्याशङ्क्याह * येन हीति * एतमेव विरोधपरिहारन्यायं रुक्मिणीपरिणयने ऽप्यतिदिशति * एतेनेति * अद्यतनाचाराणापपि श्रुतिस्मृतिविरोधाविरोधाभ्यां प्रामाण्याप्रामाण्यव्यवस्थासिद्धेरसङ्कर इति परिहारं वक्तुमनुभाषणं तावत्करोति * यत्त्विति * परमतेन परिहारान्तरमुपन्यस्य दूषयितुमाह * तत्रेति * विरुद्धानामप्याचाराणां देशव्यवस्थया प्रामाण्यमिति परिहारान्तरमुपन्यस्यति * अन्ये त्विति *

१३८।

आपस्तम्बवचनं प्रपञ्चयति * येषामिति *(एतदेव परिहारं मनुवचनेन दृढयन्नाह *तथेति*[1]) एतमपि परिहारं देशाचारकुलधर्माम्नायैरविरुद्धाः प्रमाणमिति गौतमवचनबलेन निराकरोति * ननु चेति * एतत् परिहारवादी स्वाभिप्रायमाशङ्कते * आहेति * निराकरोति * न त्विति * प्रयोगं दर्शयति * स्मार्त्तेति * एतदेव १३७।१
व्याचष्टे * ग्रन्थेति * मन्वादयो ये ग्रन्थकारास्तद्गतायाः स्मृतेर्मूलाद्यो मन्वादिकृतो ग्रन्थ आम्नायशब्दवाच्यः स स्मृतिग्रन्थाध्यायिनां तस्या एव मन्वादिगताया एव स्मृतेग्रन्थमूलत्वेनानुमेयाया धारणार्थत्वेनोक्त इत्यर्थः। अनेन च य आम्नायः स स्मृतिधारक इति शङ्खलिखितवाक्यस्य वचनव्यक्तिर्दर्शिता ततश्चार्थाद्यः स्मृतिधारको ग्रन्थः स आम्नाय इत्युक्तं भवति। यद्वा यः स्मृतिधारकः स आम्नाय इति वचनव्यक्त्या स्मृतिधारणार्थत्वेन य आम्नायः स किं गतायाः स्मृतेः किं रूपः केषां चेत्यपेक्षिते * ग्रन्थकारेत्याद्युक्तम् * अविभक्तिकाम्नायशब्दपाठे त्वाम्नायेन स्मृतिधारको ग्रन्थ इत्युक्ते किं गतायाः स्मृतेः को ग्रन्थः केषां चेत्याकाङ्क्षानिवृत्त्यर्थत्वेनैतद्व्याख्येयं स्मार्त्तधर्माधिकारादल्पाच्तरत्वेन ध्यन्तत्वेन च स्मृतिशब्दस्य पूर्वनिपातोपपत्तेर्न द्वन्द्वसमासाशङ्का। स्वमतमुपसंहरति * ततश्चेति * नन्वापस्तम्बवचनस्य तर्हि का गतिरित्याशङ्क्याह * आपस्तम्बेति * पञ्चधा विप्रतिपत्तिर्दक्षिणतोऽनुपतीतेन भार्यया च सह भोजनं पर्युषितभोजनमुच्छिष्टभोजनं पितृष्वस्टमातुलदुहितृपरिणयनमिति तथोत्तरतः पञ्चधा ऊर्णाविक्रयः सीधुपानमुभयतो दद्भिर्व्यवहार आयुधीयकं समुद्रयानमितीति बौधायनेन स्मृतिविरुद्धदृष्टाचारोदाहरणानि दत्वेतर इतरस्मिन्कुर्वन्दुष्यति नेतरस्मिन्देशप्रामाण्यव्यवस्थया प्रामाण्यमापस्तम्बनेनोपन्यस्यति * मिथ्यैतदिति* गौतम उभयन्त्वेतन्नाद्रियते शिष्टस्मृतिविरोधादिति निराकृतत्वादापस्तम्बस्यापि मन्वादिवद्धर्मशास्त्रप्रवक्तृतया याज्ञवल्क्येन स्मरणात्तद्वचनस्य मिथ्यात्वायोगे ऽपि गर्हानिराकरणमात्रपरतया तद्व्याख्येयमित्याशयः। मनुवचनं तु तेन यायात्सतां मार्गमिति विशेषणादविरुद्धकुलधर्मविषयत्वेनाविरुद्धं, ननु विरुद्धाचाराणामापस्तम्बवचनस्य वा श्रुतिमूलत्वं विना कथं प्रवृत्तिरित्याशङ्क्याह * दृष्टेति * ननूपादेयगतत्वेन सुरापाननिषेधे पुंस्त्वस्य विवक्षितत्वान्न ब्राह्मणानां सुरापानं निषिद्धमित्याशङ्क्ते * आहेति * अनुवाद्यगतत्वेनाविवक्षामभिप्रेत्य परिहरति * उच्यतइति * आशङ्किता स्वा-

---

१ षयं पा० २ पु० ना०।

भिप्रायमाह * नन्विति * पार्श्वस्थो हननप्रतिषेधे ऽपि भूतभाव्युपयोगित्वाभावेनासंस्कार्यत्वाद् ब्राह्मणस्यानुपादेयपञ्चकव्यतिरिक्तत्वेनानुद्देश्यत्वमभिप्रेत्यातिप्रसङ्गद्वयमापादयति * उच्यतइति * एकत्वविवक्षाप्रसङ्गे को दोष इत्यपेक्षायामाह * आह त्वेति* पूर्ववच्छब्देन निषेधानतिक्रमलक्षणकृतार्थतोक्ता । आशङ्किता द्वितीयातिप्रसङ्गगतं दोषं तावत्परिहरति *आहेति* यद्यपि जातेर्वधपानायोग्यत्वेन ब्राह्मणशब्दस्य व्यक्तिपरत्वात्तदुगतमेकत्वमत्रोच्यते तथाप्येकैकस्या एव व्यक्तेर्वधपानप्रसक्तेर्बहुवधपाने ऽपि प्रत्येकमेकत्वसम्बन्धान्निषेधातिक्रमापरिहारान्निषेधानतिक्रमलक्षणकृतार्थत्वदोषो नास्ति त्वत्पक्षे तूपादेयार्थत्वेन ब्राह्मणशब्दस्य प्रकृतव्यक्तिविशेषाभावेन जातिपरत्वात्तस्यां चैकत्वसंख्यासम्भवे लक्षणाकारणाभावाद् बहुवधपाने ऽप्येकत्वानपायात्कृतार्थत्वलक्षणो दोषः परिहार्य एवेत्यर्थः । बहुवधपाने ऽपि प्रत्येकं व्यक्तेरेकत्वसम्बन्धाज्जातेर्वैकत्वसम्बन्धादेकत्वविवक्षागतं यदनेकवधपाने निषेधानतिक्रमापत्तिलक्षणं दूषणमुच्यते तन्न दूषणमिति योज्यम् ।एतदेव विवृणोति* एकैकस्या एव हीति* व्यक्तिविशेषणत्वेन विवक्षितुमारभ्यमाणमप्येकत्वं नित्यप्राप्तत्वेनानूद्यमानत्वापत्तेः प्रतिषेध्यायां वधपानक्रियायामव्यभिचाराद्विशेषणत्वासम्भवेन प्रतिषेधे ऽपि विशेषणत्वासम्भवान्निष्फल्यापत्तेर्न विवक्ष्यते जातौ तु व्यावर्त्यसंख्यान्तराभावात्तद्विशेषकत्वेन विवक्षाशङ्कैव नास्तीत्यर्थः । प्रथममतिप्रसङ्गं वैषम्योपपादनेन परिहरति * आहेति * पुंस्त्वविवक्षातिप्रसङ्गे ऽपि स एव शङ्किता परिहारमाहेत्याहशब्दो योज्यः । वधनिषेधे ब्राह्मणस्यानुपादेयपञ्चकव्यतिरेके ऽपि तव्यद्वितीयाभ्यां कर्मत्वनिर्देशाच्छब्दवृत्तेर्नोद्देश्यत्वमुपपादयितुं * कर्म भूतस्येत्युक्तम्*सुरापाननिषेधे च ब्राह्मणस्य प्रत्यवायव्यावृत्त्यानुग्राह्यत्वात् स्वर्गकामादिवदुद्देश्यत्वे ऽपि निषेध्ये सुरापाने प्रथमातृतीया-
१४०।१ भ्यां कर्तृत्वनिर्देशेनोपादेयत्वं वक्तुं *सुरापाने चेत्युक्तम्* यथा स्वर्गकामस्य यागविधौ उद्देश्यत्वाल्लिङ्गाविवक्षौदुम्बरीसम्माने यजमानस्योपादेयत्वाद्विवक्षा तथेहापीत्यर्थः । वधनिषेधे ब्राह्मणस्योद्देश्यत्वेनाविवक्षितलिङ्गत्वं प्रकटयति * तथा हीति * यस्माद् ब्राह्मणमुद्दिश्य हननस्य प्रतिषेधस्तस्माद् ब्राह्मणे लिङ्गं न विधीयते अन्यत्वेनार्थान्तरत्वेनावृत्तिप्रसङ्गादित्याशयः । यस्माद् ब्राह्मणहननमिति चोपरिष्टाद् वधोद्देश्यस्यापि वक्ष्यमाणत्वात्तस्मिन्पक्षे यस्माद्धननमुद्दिश्य तस्य प्रतिषेधस्तस्माद्धनने कर्मव्युत्पन्नेन प्रतिषेधशब्देनोक्ते लिङ्गं न विधीयतइति योज्यम् । हननमितिपाठे हननं प्रतिषेधतो वाक्यस्य

न लिङ्गं विधेयमित्यर्थः यद्वा यो ब्राह्मण इति यच्छब्दं नपुंसकलिङ्गत्वेन विपरिणतमनुषज्य यद्धननमित्युक्ते तत्प्रतिषेधतो वाक्यस्येति योज्यम्। ये तु प्रवर्त्तनावाचित्वेन क्लृप्तशक्तिकस्य लिङो नञश्चाभाववाचित्वेन क्लृप्तशक्तिकस्य निवर्त्तनावाचित्वायोगान्निषेधाधिकारे ऽपि नञर्थस्य प्रागभावरूपस्य सिद्धत्वे ऽपि रागाद्युपजनने विनाशोत्पत्तौ तत्परिपालनस्य प्रयत्नापाद्यत्वेन विधेयत्वोपपत्तेः प्रवर्त्तनैव लिङर्थ इत्येतन्मताभिप्रायमेतत् श्लोकं व्याचक्षते तन्मते नैवं योज्यं यो ब्रह्मण इति ब्राह्मणमुद्दिश्य पूर्ववच्च ब्राह्मणोद्देशाभिधानस्योपलक्षणार्थत्वाद् वधं चोद्दिश्य यो ब्राह्मणहननाभावस्तं कुर्यादिति च वचनव्यक्त्यन्तरस्यापि सम्भवाद् ब्राह्मणवधाभावं चोद्दिश्य हननस्य प्रतिषेधादभावादन्यल्लिङ्गं ब्राह्मणे प्रतिषेधशब्दवाच्ये वा ऽभावे वा शब्दाद् वधे वा न विधीयतइति हननमिति पाठे प्रतिषेधत इति प्रथमार्थे तमङ्गीकृत्य यो ब्राह्मणो यद्धननं यः प्रतिषेध इत्युक्ते ब्राह्मणतद्वधतदभावानामुद्देश्यत्वात्तद्विशेषणं लिङ्गमन्यत्वापत्तेर्न विधीयतइति योज्यम्। परिपालनीयत्वरूपेण च विधेयस्याप्यभावस्य स्वरूपेणोद्देश्यत्वमविरुद्धम्। ननु वधोद्देश्यपक्षे ब्राह्मणस्याप्युद्देश्यविशेषणाविवक्षायामविवक्षा प्रसज्येतेत्याशङ्क्यं निराकुर्वत् श्लोकं व्याचष्टे * प्रतिषेधेति * नान्तरिक्षे न दिवीत्यादिवन्निषेधानुवादाशङ्कानिराकरणार्थो विधिशब्दः निर्विषयवधाप्रसक्तेर्मृष्यामहे हविषा विशेषणमित्यनेन न्यायेनोद्देश्यान्तर्गत्यङ्गीकारेण ब्राह्मण्यविवक्षायुक्तेत्याशयः। सकृच्छ्रुतप्रत्ययस्यानेकार्थाविधिपरत्वायोगान्निर्विषयस्य च लिङ्गस्य विधातुमशक्यत्वाद्यो ब्राह्मणस्तं न हन्यात्तं च ब्राह्मणयुग्मं स मेति ब्राह्मणलिङ्गविधौ ब्राह्मणपदप्रत्ययोरावृत्तिः यद्ब्राह्मणहननं तन्न कुर्यात्तं च पुंसो हननमिति वधलिङ्गविधौ हन्तिप्रत्ययोरावृत्तिरिति विवेकः। प्रतिषेधशब्दो ऽपि कर्मव्युत्पत्त्या वधपर एव प्रतिषेधे वध इत्यर्थः। अविभक्तिकवधशब्दपाठे वधश्चासौ प्रतिषेधश्चेति कर्मधारयावृत्तिग्रहणमुपलक्षणार्थम्। द्वितीयव्याख्याने तु प्रतिषेधविधिपरो हि प्रतिषेधशब्देनाभावो ऽभिप्रेतः। शुद्धवधासम्भवात्तद्विशेषणब्राह्मण्यविवक्षाप्रतियोगिनिरूपणाधीनत्वेन शुद्धस्याभावाख्यस्य प्रतिषेधस्यासम्भवात्तद्विशेषणवधविवक्षाप्रतिषेधे वेति यो ब्राह्मणहननाभावस्तं कुर्यात्तं च पुंसोभावमित्यभावलिङ्गविधौ नञ्प्रत्यययोरावृत्तिरुक्ता एवं तावन्नञुपहितस्य लिङो निषेधकत्वे प्रवर्त्तनाप्रतीत्यभावेन तदाक्षिप्तसाध्याभावाद् ब्राह्मणस्यानुपयोगित्वेनासंस्कार्यत्वादनुपादेयपञ्चकव्यतिरेकेण

वास्तवोद्देश्यत्वाभावे ऽपि शब्दवृत्तेर्नोद्देश्यत्वादविवक्षितलिङ्गतोक्ता । यदा तु नञ्मात्रेण निषेधसिद्धेर्द्वेषाद्यर्थप्राप्तप्रवर्त्तनानुवादार्थत्वं लिङो ऽङ्गीक्रियते तदा प्रवर्त्तनाक्षिप्तवैरनिर्यातनादिसाध्यासिद्धयुपयोगिहननसंस्कार्यत्वोपपत्तेर्वस्तुतो ऽप्युद्देश्यत्वात्सुतरां लिङ्गाविवक्षेत्याह * येषां त्विति * प्रवर्त्तनात्मकनिषेधवचनत्वासम्भवप्रतिपादनार्थं * मत्यन्तभिन्नाविति युक्तम् * वाक्यार्थभावनाविषयत्वेन विधिवन्निषेधस्यापि सर्वपदार्थान्प्रतिप्राधान्यात्तद्वाचिनो नञो ऽपि प्रत्ययानुग्राह्यत्वोपपादनायोपचारा * द्वाक्यार्थाविति युक्तम् * नानाख्यातार्थस्यापि प्राधान्ये वाक्यार्थाव्यवस्था स्यादित्याशङ्क्य भावनैव सर्वपदार्थानुरञ्जनसहत्वात्सर्वत्र वस्तुतो वाक्यार्थस्तद्विषयत्वेन तूपचाराद्विधिनिषेधयोर्वाक्यार्थत्वं, न चान्यस्य भावनाविषयनास्तीति सूचयितुं * द्वावेवेत्युक्तं * तेषां मते श्रूयमाणमपि लिङ्गं प्रतिषेधं प्रत्यनुपयुज्यमानत्वात्तेनापरिगृहीतत्वादविवक्षितमित्यन्वयः तदुपपादनार्थं * नञिति * युक्तम् * पूर्वमतापेक्षयास्मन्मते विध्यर्थनिषेधाधिक्याल्लिङ्निषेधे गौरवातिशयद्योतनार्थो विध्यर्थमपीत्यपि शब्दः ब्राह्मणाविशिष्टेन हननेन विशिष्टं विध्यर्थं प्रतिषिध्य चरितार्थत्वान्न लिङ्गं ब्राह्मणे वधे विधौ वा कर्त्तव्यतारूपे नञि निषेद्धुं शक्नोति यद्ब्राह्मणं हन्यात्तं च ब्राह्मणं पुमांसं नेति नञ्ब्राह्मणपदयोरावृत्त्यापत्तेः ब्राह्मणं न हन्यादित्यत्र च ब्राह्मणहननं न कुर्यादित्येव विगृह्यार्थप्रतीतेस्तच्च पुंसो हननं नेति वधे लिङ्निषेधेन नञ्हन्त्योरावृत्त्यापत्तेः । विधौ च लिङ्निषेधे तच्च पुंसः कर्त्तव्यं नेति नञ्प्रत्यययोरावृत्त्यापत्तेरित्यर्थः । ननु विशिष्टविधिवद्विशिष्टनिषेधेनापि विशेषणानामर्थाक्षेपोपपत्तेर्नोच्चारणावृत्त्यापत्तिरित्याशङ्क्या * नूदितमित्युक्तम * विधेयस्य यागादेरन्यतो सिद्धस्यापि विधितः स्वरूपावधारणसम्भवेन स्वरूपानुवादानपेक्षत्वात्पश्चैकत्वाधिकरणन्यायेन विशेषणाविवक्षा युक्ता । निषेध्यस्य त्वन्यतो सिद्धौ निर्विषयनिषेधायोगेनानुवादापेक्षावश्यम्भावाद्बहाधिकरणन्यायेन विशेषणाविवक्षेति भावः । नन्वेवं सति ब्राह्मणहननयोरप्यविवक्षा स्यादित्याशङ्क्य * पूर्वोक्तेत्युक्तम * सर्वव्यवहारनिरोधापादकत्वे कर्त्तव्यमात्रस्य निषेध्यत्वायोगाद् वधस्य च निर्विषयस्याप्रसक्तेः प्रतिषेध्यत्वासम्भवस्य पूर्वमेवोक्तत्वात् ब्राह्मणविशिष्टस्यैव विध्यर्थस्योद्देश्यत्वेनोभयोरपि ब्राह्मणहननयोरुद्देश्यान्तर्भावात्(यस्योभयं हविरार्त्तिमार्च्छतीत्यत्र यस्य कस्य चिदार्त्तौ सत्यां निर्विषयकनिमित्तकयागस्याप्राप्तेः हविःशब्दस्य विवक्षा

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एक स्तवको मुद्रयित्वा प्रकाश्यते ।
२ एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।
३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयैर्ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तवकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः-

		मुद्रिताः स्तवकाः
(१)	संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः)	२
(२)	शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्)	१०
(३)	श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा)	१०
(४)	भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः)	२
(५)	करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः)	१
(६)	भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)	२
(७)	न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा)	२
(८)	ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त)	६
(९)	स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्)	२
(१०)	सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरु भिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त)	१
११	न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः)	१
(१२)	विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः। (न्यायः)	३
(१३)	विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा)	२
१४	न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा)	२

न्यादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

श्रीः

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—४७

तद्विशेषणीभूतोभयशब्दस्य प्राप्तानुवादकत्वात्तद्विधाने वाक्यभेदापत्तेः तस्मादुभयशब्दस्याविवक्षेति हविरार्त्यधिकरणराद्धान्तः[1]) हविर्वैद्विवक्षायुक्तेत्याशयः । विध्यभावादू वधकर्त्तव्यत्वस्याप्राप्तेरनुवादासम्भवमाशङ्क्य * द्वेषादीत्युक्तम् * नन्वाख्यातयोगित्वेनास्य नञो नास्तीत्यादिवदभावमात्रवाचित्वान्निवर्त्तनार्थत्वं न युक्तमित्याशङ्क्य * प्रत्ययेत्युक्तम् * य एवं विद्वान्पौर्णमासीं यजतइत्यादावनुवादार्थेनापि यजिना सामानाधिकरण्यात्पौर्णमास्यादिशब्दस्य यागवाचित्ववदनुवादार्थेनापि प्रत्ययेन सम्बन्धान्नञो ऽर्थान्तरवाचित्वेनानुपपन्नमिति सूचयितुं सम्बन्धग्रहणम् । यदा तु नञ्युक्तेष्वपि वाक्येषु नञो विषयसमर्पकत्वात्प्रवर्त्तनार्थ एव लिङादिरित्येतन्मताश्रयणेन पूर्वग्रन्थो व्याख्यायते । तदा येषां त्विति ग्रन्थस्य तन्निराकरणार्थत्वाद्भावेवेत्येवकारेणैकत्वं निराकृतम् । विधिवच्च निषेधस्यापि वाक्यार्थरूपा भावना विषय एव न तु धात्वर्थस्येव विषयिणीति * वाक्यार्थशब्देनोक्तम् * अत्यन्तभिन्नावित्यनेनैकत्वनिराकरणार्थं विपरीतस्वभावतोक्ता तथा हि ।

फलबुद्धिप्रमेयाधिकारिबोधकभेदतः ।
पञ्चधात्यन्तभिन्नत्वाद्भेदो विधिनिषेधयोः ॥
विधिरिष्टफलो ऽनिष्टपरिहारफलो परः ।
प्रेरितो ऽस्मीति धीः पूर्वं चारितो ऽस्मीति चापरे ॥
विधेयस्येष्टहेतुत्वं विधिना च प्रमीयते ।
निषेधेन निषेध्यस्य प्रत्यवायनिमित्तता ॥
विधिश्चाधिकरोत्यन्यकारणेनाप्रवर्त्तितम् ।
रागादिना प्रवृत्तं तु निषेधस्तद्विलक्षणम् ॥
नञ्वर्जितो लिङादिश्च विधिबोधस्य कारणम् ।
लिङाद्यनुगृहीतस्तु नञ् निषेधस्य बोधकः ॥
एतदेवाभिप्रेत्य बृहत्टीकायामुक्तम् ।
अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः ।
दृश्यते तादृगेवेदं विधानप्रतिषेधयोः ॥

इति । शेषं समानम् । अस्मिन्नेव पक्षे स्पष्टीकरणार्थं वचनव्यक्तिमाह * एषा हीति * तव्ययुक्तवाक्यान्तराभिप्रायो वचनव्यक्त्यन्तरोपन्यासः । पूर्वस्मिन्पक्षे कीदृशी वचनव्यक्तिरित्यपेक्षायामाह * विध्येकत्वे पुनरिति * विधिशब्दस्य लिङादेरनुवादार्थत्वाभावान्नञा सहैकीकृतस्य तत्सहितस्य निषेधपरत्वं युक्तं, द्वितीये व्या-

१ अय पा० २ पु० ना०

ख्याने तु विधिरेवैकः सर्वत्र न क्व चिन्निषेधो ऽस्तीति विध्येकत्वं एकपदोपात्तयोर्धातुप्रत्ययार्थयोरुद्देश्योपादानविभागस्य शब्देन वक्तुमशक्यत्वे ऽप्यर्थमात्रविवक्षया वधस्याप्यविधेयत्वादुद्देश्यत्वमाश्रित्य यद्ब्राह्मणहननमित्युक्तम् शब्दव्यापारपर्यालोचने ब्राह्मणमात्रोद्देशः । विधिशब्दो न पृथिव्यामग्निश्चेतव्य इत्यादिनिषेधानुवादशङ्कानिराकरणार्थः । द्वितीयव्याख्याने प्रतिषेधशब्देनाभावो ऽभिप्रेतः । न कुर्यादिति चाख्यातयोगिनो नञो ऽभावत्वनत्वादभावं कुर्यादित्यथः न हन्यादित्युक्ते प्रधानभूतेनाख्यातेनैवान्वयात्स एवार्थः । हननव्यतिरिक्तं वा प्रागभावपरिपालनं विधीयते यो ब्राह्मणहननाभावत्नं कुर्यात्पालयेदित्यपि वचनव्यक्त्यन्तरमिह द्रष्टव्यम् । वचनव्यक्तिभेदप्रपञ्चस्य प्रयोजनमुपसंहरति * सर्वथेति * सुरापाने वैषम्यमाह * ब्राह्मण इति * व्यतिरेकोपपादनायैकत्वेत्युक्तं ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्यत्राख्यातप्रत्ययोपात्तक्रियागुणभूतत्वेनोपादीयमानस्य संख्याया परिच्छेद्यत्वयोग्यस्य साधनांशस्य कर्तुर्विशेषणत्वेनोपादानान्न पेया ब्रह्मवादिभिरित्यत्र च गुणभूतत्वेनोपादीयमानत्वप्रतीतेरित्यर्थः । श्रुतावपीमं न्यायमतिदिशति * तस्मादिति * एवंस्थस्यापादितमतिप्रसङ्गदुष्टं परिहृत्य ब्राह्मणानां सुरापानप्रतिषेधाभावशङ्कामुपसंहरति * अतश्चेति * सुरापाने ब्राह्मणस्यानुद्देश्यत्वे ऽप्यनुवाद्यत्वाद्विशेषणाविवक्षेति परिहरति * नैतदिति * नन्वनुवाद्यत्वे ऽप्युपादेयत्वाद्विशेषणविवक्षा भविष्यतीत्याशङ्क्याह * नोपादेयत्वमिति * उद्देश्यविशेषणविवक्षायां वाक्यभेदापत्तेस्तत्परित्यागेनैवान्योपादेयत्वस्य विवक्षाकारणत्वे ऽप्यविधेयविशेषणस्य विधेया स्पष्टुमशक्यत्वाद्विधेयत्वमेव प्रधानं कारणमित्यर्थः । शुक्रान्वारम्भणादौ प्रकरणप्राप्तस्यापि यजमानस्य कर्तृत्वेन विधानाद्विशेषणविवक्षा युक्तेति भावः । नन्वनुवाद्यत्वे ऽपि ब्राह्मणस्य क्रियाविशेषणत्वाभ्युपगमाच्छुद्धब्राह्मणविशिष्टक्रियानुवादवत्सुरापानविशिष्टब्राह्मणविशिष्टक्रियानुवादे ऽपि यत्पुमान् ब्राह्मणः सुरां पिबेदित्येवंप्रसरोपपत्तेरावृत्तिलक्षणवाक्यभेदाभावादेकक्रियावशीकारेण चाकर्णाकहायनीवत्परस्परनियमोपपत्तेः । प्रत्युद्देश्यवाक्यपरिसमाप्तिलक्षणस्यापि वाक्यभेदस्याभावात्किमिति विशेषणाविवक्षेत्याशङ्क्याह * अनूद्यमान इति न केवलं प्राधान्येनानूद्यमानस्य प्राप्त्यपेक्षत्वं किं त्वनुवाद्यविशेषणत्वेनाप्यनूद्यमानस्येति सर्वशब्देन सूचितं, तत्रानुवादस्य प्राप्त्यपेक्षत्वे सत्यनूदितस्य सुरापानस्य स्त्रीपुंसकर्तृत्वेन प्रागेव प्रतीतेर्लिङ्गविशेषणस्यानाकाङ्क्षितत्वाद्विधेये

१४१।४

ऽप्यकर्तृकपानाप्रसक्तेरनुवाद्यपानविशेषणत्वेनाज्ञातज्ञाप्येभ्यो ब्राह्मणादिभ्यो ऽन्यलिङ्गं न विधीयते नानुवाद्यविशेषणत्वेनाज्ञातं ज्ञाप्यत इत्यर्थः। नन्वप्राप्तनिषेधायोगान्निषेध्यप्राप्त्यर्थं ब्राह्मणः सुरां पिबेदित्यवान्तरवाक्यार्थपर्यवसानवेलायां विधेयविशेषणत्वेन लिङ्गादिविवक्षाप्रसक्ता पश्चान्निषेधान्वये ऽपि न केन चिद् बाध्यतइत्याशङ्क्याह तावत् * यदि हीति * तत्र किमप्राप्तस्य पानस्य निषेधायोगादन्यतश्चाप्राप्तेरर्थाद्विधेयत्वं कल्प्यते किं वा वाक्यस्वरसादेय विधिपरत्वं प्रतीयते इति विकल्प्याद्यं तावत्पक्षं दूषयति * यतस्त्विति * द्वितीयं दूषयति * प्रतिषेधेति * यदा च पानं न विधीयते तदा तत्र ब्राह्मणादेः सत्यपि गुणवादे ऽनुवाद्यत्वात्प्रतिषेधे चाक्रियात्मनि गुणत्वायोगात् प्रत्युत प्रत्यवायव्यावृत्त्यानुवाद्यत्वेन प्राधान्याद्विधानं न सम्भवतीत्याह * तेनेति * भेदवादिमते नाद्यवचनव्यक्तो पानस्य कर्तव्यत्वेनानूदितस्य प्रतिषेधः। विधेयत्ववादिमतेन द्वितीयवचनव्यक्तो पानं स्वरूपेणानूद्य प्रतिषेधेन विधीयमानेनेति कर्मव्युत्पन्नस्य विधिशब्दस्य प्रतिषेधशब्देन सह कर्मधारयः द्वितीयव्याख्याने प्रतिषेधस्याभावस्य विधिनेत्यर्थः। एवं सत्यपि यदि स्त्रीकर्तृकं पानं लोके न प्राप्नुयात्ततस्तन्निषेधेन न त्वेतदस्तीत्याह * लोके चेति * एवमनूद्यमानः सर्वो हीति पूर्वोद्धृक्तमर्थं प्रकृते योजयित्वा तत्रानाकाङ्क्षितमित्युत्तरार्धार्थं योजयति * न चेति * नन्वेवं तर्हि यो ब्राह्मणः पिबेत्स पुमानिति बाह्यप- १४२।१
दोपात्तनिषेधपरित्यागेनानुवादपदान्तर्गतसन्निकृष्टब्राह्मणपदोपात्तलिङ्गसम्बन्ध एव केवलो विधीयतामत आह * न चास्मिन्नि * निषिद्धश्रुतिवैय्यर्थ्यापत्तेरिति भावः। उपसंहरति * ततश्चेति * प्रासङ्गिकाशङ्काशेषनिराकरणावतारायो * भयत्रापीत्युक्तम् * ननु वधनिषेधे लिङ्गाविवक्षायां ब्राह्मणवधे ऽपि ब्रह्महत्यापत्तेर्महापातकनिमित्तकर्महान्यादिप्रसङ्गः स्यादित्याशङ्काशेषमाह * नन्विति * अत्र कुशावस्था अस्तीत्यत्रेयी गर्भिणी। अभ्युपगमेनैव परिहरति * ब्राह्मणेति * न च महापातकत्वे प्रायश्चित्तालपत्वं विरुद्ध्यते पुंब्राह्मणवधे ऽपि रहस्ये प्रायश्चित्तालपत्वदर्शनादित्याह * न चेति * उपसंहरति * तस्मादिति * सुरापानस्य तु स्त्रीकर्तृकत्वापि प्रायश्चित्तान्तरानाम्नानान्निः सदिग्धं महापातकमित्याहेच्छन्ब्राह्मणीसुरापानस्य स्मृतिविरोधो दुःपरिहर इत्याह * सुरापाने पुनरिति * नन्वापस्तम्बेन देशव्यवस्थया विरुद्धाचारप्रामाण्याभिधानाद्देशान्तरनिवासिब्राह्मणीविषया सुरापाननिषेधस्तृतिः कल्पयिष्यत इत्या

शङ्क्याह * यापि चेति * स्मृतिविरोधे ऽद्यतनाचाराप्रामाण्यं विस्तरेणोपपाद्योपसंहरति * इतीति * एवमुत्सूत्रं पूर्वपक्षं कृत्वा सदाचारप्रामाण्यप्रतिपादनपरतया ऽपि वेति सूत्रं व्याख्यायेदानीं सूत्रारूढं पूर्वपक्षं कर्त्तुं न शास्त्रपरिमाणत्वादिति पूर्वाधिकरणसिद्धान्तसूत्रमाचाराधिकरणपूर्वपक्षे ऽप्यावृत्त्या योजयितुमुपक्रमते * अथ वेति * पूर्ववर्णके दुराचारसङ्करेण पूर्वपक्षाभिधानाय सर्वदेशनिवासिशिष्टाचारोदाहरणात्तद्व्यावृत्त्यर्थमार्यावर्त्तनिवासिशिष्टाचाराणामेवोदाहरणत्वमाह * इहेति * अर्थकामाचारव्यावृत्त्यर्थं धर्माचाराणामेवोदाहरणत्वं दर्शयन्सन्देहमाह * धर्मबुद्ध्येति * दुराचारसङ्करस्याप्रामाण्यहेतोरायावर्त्तनिवासिधर्माचारेष्वसम्भवात् सन्देहहेतुं प्रश्नपूर्वकमाह * कुत इति * नन्विदं कर्त्तव्यमिदं कर्त्तव्यमिति सदाचाराणां विशेषरूपेणानिबन्धने ऽपि सदाचारः
१४३।१ प्रमाणमिति सामान्यतो निबन्धनमस्तीत्याशङ्क्ते * ननु चेति * स्मृत्यधिकरणसाधितात्स्मृतिप्रामाण्यादेवाचारप्रामाण्यं सिद्धमित्यर्थः । अष्टकादिस्मृतीनां मूलश्रुत्यदर्शने ऽपि तदभावे हेत्वदर्शनादविरुद्धं श्रुत्यनुमानम् । आचारप्रामाण्यस्मृतौ तु मूलश्रुत्यभावसाधनस्य हेतोराचारमूलत्वलक्षणस्य स्मृत्यन्तरेभ्यो ऽतिरिक्तत्वात्स्मृत्यन्तरन्यायेनाचारप्रामाण्यस्मृतिप्रामाण्यासिद्धेर्न स्मृतिबलादाचारप्रामाण्यसिद्धिरिति परिहरति * नेति * एतदेव विवृणोति * शाखान्तरेति * आचारदर्शनमात्रप्रवृत्तमेवोपपादयितुं प्रतिजानीते * यथैव चेति * उपपादयति * यदि हीति * अतो न्यायमूलत्वात्स्मृतेर्न्यायसाध्वसाधुतैव विचार्येत्याह * इतीति * सन्देहमुपपाद्य पूर्वपक्षसूत्रगतनञर्थव्याख्यानार्थं सिद्धान्तेनोपक्रमते * तत्रेति * विरोधाधिकरणे विरुद्धस्मृतिप्रामाण्यापवादेनाविरुद्धस्मृतिप्रामाण्यं निरपवादमुक्तमिति मत्वा द्वयबलेनेत्युक्तं प्रतिज्ञानमुपक्रमः घञन्तात्करोतेः कारशब्दं व्यापारवचनं व्युत्पाद्य सो ऽस्यास्तीति मत्वर्थीयेनिप्रत्ययान्तस्य कारिशब्दस्य कर्तृवचनत्वाच्छौतस्मार्तैस्तुल्याः कर्त्तार एषामिति विग्रहः कार्यः । मन्वादिभिश्चाचारमूलश्रुतिदर्शने ऽपि तदर्थस्य शिष्टव्यवहारादेव सुज्ञानत्वेनानिबन्धनोपपत्तेः स्मृतितो ऽप्याचारप्रामाण्यं सिध्यतीत्याह * स्मृतिकारेति * उपक्रान्तसिद्धान्तनिराकरणार्थत्वेन पूर्वपक्षसूत्रमवतार्य व्याख्यातुमध्याहारेण पूरयति * तदिति * व्याचष्ट * शास्त्रेति * तृतीयासमासाभिप्रायं कर्मव्युत्पत्तिप्रदर्शनं बहुव्रीहौ तु भावव्युत्पत्तिरेव षष्ठीसमासेन चाविद्याज्ञानातिरिक्तत्वेन शाक्यादिग्रन्थवदाचारा-

णामप्यनेनाप्रामाण्यमुच्यतइत्यन्यथा व्याचष्टे * परिमितानि चेति* १४४।२
ननु शब्दात्मकानामेव शास्त्राणामियत्तानियमादशब्दात्मकस्यापि सदाचारस्य पुरुषहितबोधकत्वाच्छास्त्रत्वं भविष्यतीत्याशङ्क्य स्वरसेन त्वेषां धर्मबोधकत्वमाचारश्चैव साधूनामिति स्मृत्यनुसाराद्वेति विकल्प्याद्ये पक्षे स्वरूपेण तावदाचारस्य क्रियारूपस्याबोधकत्वाच्छास्त्रत्वमनाशङ्क्यमेवेत्याह * न चेति * ननु स्वरूपेणाबोधकत्वे ऽपि शिष्टानुष्ठानदर्शनादस्मदादीनां धर्मबुद्ध्युत्पत्तेस्तद्द्वारेण शास्त्रत्वं भविष्यतीत्याशङ्क्याह * नापीति * शिष्टानुष्ठानान्यथानुपपत्त्यानुष्ठेयस्योत्सवादेर्धर्मत्वं कल्प्यं भ्रान्त्यादिनापि त्वनुष्ठानोपपत्तेर्नैकान्ततः शिष्टैरनुष्ठीयमानस्याचारस्यास्मदादिभिर्दर्शनं शिष्टाचारानुष्ठानं वा धर्मत्वं कल्पयितुं शक्यं विशेषतश्च दर्शनस्यानुष्ठानमात्रानुविधायित्वेनात्यन्तपरायत्तत्वादनुष्ठानस्य च प्रमेयत्वादबोधकत्वादित्यर्थः। द्वितीयपक्षे दूषणमाह * स्मृतेस्त्विति * तृतीयप्रकारेण व्याख्यातुं विकल्पयति * किं चेति * एकश्रुत्यनुमानासम्भवं तावदुपपादयति * न तावदिति * अनेकश्रुत्यनुमानासम्भवमपरिमितानां पाठाशक्तेरपठितानां च मूलत्वासम्भवेनोपपादयति * यावदाचारं हीति * तुशब्दार्थे हिशब्दः। ननु सर्वाचाराणामेकश्रुतिमूलत्वासम्भवे ऽप्येकदेशादिगतानां भिन्नानामप्येकमूलत्वोपपत्तेरनेकश्रुत्यनुमाने ऽप्यल्पत्वान्न वेदसम्मितिश्रुतिकल्पनापत्तिरित्याशङ्क्याह * एकस्य त्विति * एकदेशादिगतानामप्यनेकेषामेकोपलक्षणाभावान्नैकमूलत्वोपपत्तिरिति भावः। अभ्युपगम्याप्यल्पत्वेन शक्यपाठत्वमनिबन्धनामूलदर्शनाभावो ऽवसीयतइत्याह * न चेति * ननु प्रत्यक्षोपलम्भाभावे ऽप्याचारदर्शनादेव तत्तदाचारमूलभूताः श्रुतीरनुमायान्येषामपि तथैव श्रुत्यनुमानसिद्ध्यर्थं सामान्यमात्रेणाचारप्रामाण्यमुपनिबद्धमित्याशङ्क्याह * न चेति * मूलत्वेनाचारस्य बलवत्त्वोपपत्तेर्मूलित्वेन च स्मृतेर्दौर्बल्यापत्तेर्वक्ष्यमाणं स्मृतिबलीयस्त्वं विरुध्येतेत्याशयः। मूलमूलिभावस्य बलाबलभावस्य च विपर्ययप्रसङ्गादिति वा योज्यम्। अस्मिन्नेवार्थे शास्त्रस्य परिमितस्य स्तोकस्यैवानुमातुं शक्यत्वादितिसूत्रं योजयति * अत इति * ननु बहूनामप्याचाराणामेकैव स्मृतिः सरूपाश्रुतिर्मूलभूतानुमास्यते ऽत आह * न चेति * न केवलमाचाराणां श्रुतिमूलत्वाभावप्रसङ्गः किं तु श्रुतेरेवाचारपूर्वकत्वापत्तेर्विपर्ययो ऽपि प्रसज्येतेत्यर्थः। एतदेवोपपादयति * शिष्टाचार इति * एतमेवार्थमर्थान्तरन्यासेन दर्शयितुं शास्त्रशब्दे शास्त्रीयमर्थं लक्षयित्वा तस्य

१४५।१ परिमितत्वादल्पत्वादिति चतुर्थं व्याख्याप्रकारमाह * शास्त्रेति * यद्वा शास्त्रीयस्यार्थस्य परिमितत्वात्कतिपयत्वान्मानान्तरागोचरत्वादिति वदतानेन सूत्रेण परिमिते मानान्तरागोचर एवार्थे शास्त्रं प्रवर्त्तते सदाचाराणां तु शिष्टव्यवहारादेव सिद्धत्वेन मानान्तरगोचरत्वान्न शास्त्रविषयत्वं सम्भवतीत्युक्तमिति पञ्चमं व्याख्याप्रकारमाह * परिमितेति * एतमेवार्थमुपपादयितुं गृहस्थादिकर्मणामशास्त्रीयत्वप्रतिपादनार्थस्याशास्त्रा रूपसम्प्राप्तिः शास्त्रं स्यादप्रकल्पकं तस्मादर्थेन गम्येताप्राप्ये शास्त्रमर्थवदित्यस्य षष्ठाध्यायगतस्य सूत्रस्यैकदेशं पठति * अप्राप्ते इति * मानान्तरगोचरत्वमेवार्थे सुखाङ्गत्वेन द्रढयति * दृश्यमानेति * अर्थसुखाङ्गानां धर्मत्वाभावे दृष्टान्तमाह * वैश्यानामिति * पूर्वपक्षमुपसंहरति * तस्मादिति * शीलात्मतुष्टिग्रहणेन तयोरपि तुल्यन्यायत्वाद्विचारविषयत्वं दर्शितं स्वभावरचितं शीलं निषेधस्याश्रौतत्वे नञो सामञ्जस्यापत्तेरपरितोषात् सिद्धान्तोपक्रममपि सूत्रारूढं कर्तुमुपक्रमते * यद्वेति * अस्मिंश्च पक्षे शिष्टाकोपसूत्रमप्यावृत्त्या वेदाविरुद्धशाक्यादिवाक्यविषये पूर्वपक्षसूत्रत्वेन शिष्टाचारविषये च सिद्धान्तोपक्रमार्थत्वेन योज्यं द्वितीयवर्णकवदत्राप्यार्यावर्त्तनिवासिशिष्टाचारणामेवोदाहरणत्वमनिबन्धनत्वकर्तृसामान्यरूपधर्मद्वयदर्शनं च सन्देहकारणं सूत्रयोजनामात्रमतिरिक्तमिति दर्शयन् सिद्धान्तोपक्रमं सूत्रारूढं करोति * इहेति * तत्राकोपाविरुद्धशब्दयोः पौनरुक्त्यमाशङ्क्याद्यनाविरोधो ऽभिहितो द्वितीयेन प्रामाण्यमिति स्वरूपतस्तावद्व्याचष्टे * तथा हीति * नन्वविरोधे ऽप्याचाराणां विद्यास्थानातिरिक्तत्वाच्छाक्यादिग्रन्थवदप्रामाण्यं भविष्यतीत्याशङ्क्य स्मृतिकारानुज्ञानेनातिरेकस्यादोषत्वं दर्शयितुं विरोधे सत्येवाप्रामाण्यं स्यान्नान्यथेत्येवं परतया व्याचष्टे * यदीदि *

॥ शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम् ॥ ५ ॥

समा विप्रतिपत्तिः स्यात् ॥ ८ ॥

शिष्टाकोपाधिकरणे पूर्वपक्षोक्तं विरोधमभ्युपेत्य प्रमेयबलाबलीयस्त्वमात्रेण सिद्धान्ते विरोधादर्शनस्यावक्तव्यत्वात्तेष्वदर्शनादिति सूत्रावयवस्य पूर्वशेषत्वानुपपत्तेरुत्तरसूत्रशेषत्वं तस्मिन्पक्षे ऽङ्गीकार्यमित्याह * तेष्विति * अत्र भाष्यकृता सौत्रविप्रतिपत्तिशब्दव्याख्यार्थं यवमयश्चरुरित्यादिवाक्यगतान्येव वराहवेतसशब्दानु-

१ तेष्वदर्शनाविरोधस्येति उपक्रमं सूत्रं वेति वार्त्तिकम् ।

दाहृत्य वाच्यविषयप्रयोगे विप्रतिपत्तिरुक्ता तत्रास्य विप्रतिपत्त्यभिधानस्य किं प्रयोजनं का च विचारसङ्गतिरित्यपेक्षिते साधितप्रामाण्यशिष्टाचारबलाबलविचारात्मकत्वेन सङ्गतिं सूचयन्विचारविषयप्रदर्शनप्रयोजनमाह * शब्देति * शब्दस्यार्थविषयः प्रयोगः स चासौ शिष्टाचारश्च तस्मिन् विप्रतिपत्ताविति विग्रहः भाष्यकृद्व्याख्याने ऽपि स्मृत्यधिकरणएवाचारप्रामाण्यस्यापि व्युत्पादितत्वाद्विरोधाधिकरणे तस्यापि स्मृतिवद्वेदविरोधविषये प्रामाण्ये ऽपोदिते शिष्टाकोपाधिकरणे च क्रत्वङ्गपदार्थविषयाचाराणां क्रमाद्यविरोधाद्विरोधे ऽपि वा प्रमेयबलीयस्त्वादनपवादे ऽभिहिते सम्प्रत्याचारयोरेव परस्परविरोधे किं बलाबलविरोधो ऽस्तु न वेति चिन्तासङ्गतैवेत्याचारशब्देन सूचितम्। व्युत्पादितप्रामाण्यस्य शिष्टाचारस्यैव बलाबलचिन्ता युक्ता नाव्युत्पादितप्रामाण्यस्य म्लेच्छाचारस्येति मत्वोद्घाष्यमपि शिष्टाचारविषयत्वं चिन्तायाः शिष्टशब्देन सूचितं कीदृशः सन्देह इत्यपेक्षायामाह * एकशब्दमिति * एकः शब्दो ऽस्मिन्ननेकार्थो ऽस्मिन्निति द्वावाप बहुव्रीही। आचर्यतइति भावोत्पन्नलकारान्तेनाचरणं क्रियतइत्युक्तम्। आचरणमन्यपदार्थः। अक्षादिशब्दवैलक्षण्यप्रतिपादनार्थविप्रतिपत्तिशब्दव्याख्यानार्थम् * विगानेनेत्युक्तम् * को ऽर्थ इति किं द्वावप्युतैक एवेत्यर्थः। ननु शास्त्रानुसारिशिष्टव्यवहारावगतस्यैव वाच्यत्वनिर्णयात्सन्देहो न युक्त इत्याशङ्क्याह * यवेति * अविद्यमानप्रयोगारोपसूचनार्थः १४६।२
किलशब्दः वाच्यवाचकसम्बन्धे शास्त्रस्याव्यापारसूचनाय * अनिरूपितेत्याद्युक्तम् * समेति पूर्वपक्षप्रतिपादनार्थसूत्रावयवव्याख्यानार्थं तत्रेति भाष्यं व्याचष्टे * तत्राहेति * भाष्ये च विकल्पशब्देन प्रतिज्ञानार्थत्वमुभयथेत्यनेनास्यैवावृत्त्या हेत्वर्थत्वं व्याख्यातमिति सूचयितुम् * तुल्यत्वादित्युक्तम् * सर्वलोकस्थानां प्रयोगिणामित्यर्थः। तुल्यत्वमेवोपपादयति * यत्रेति * नन्वेवमपि देशव्यवस्थया वाच्यव्यवस्थोपपत्तेः समविकल्पो न युक्त इत्याशङ्क्याह * तस्माच्चेति * तस्मिन्सर्वगामित्वे न्यायो युक्तिर्यस्याः शक्तेरस्ति सा तन्न्याया तद्भावस्तन्न्यायत्वम्। कीदृशो न्याय इत्यपेक्षायामाह * नैकेषामिति * एकस्यैव वस्तुनः सदसत्त्वविरोधादित्याशयः। एवं तर्हि सर्वान्प्रत्यसत्त्वमेवास्त्वित्याशङ्क्य सत्त्वे कस्य चिद्दर्शनानुपपत्तेर्निराकरोति * केषां चिद्वेति * सर्वेषामपि पुसां वाचकशक्तिर्न विद्यतइत्येतदपि नास्तीत्यर्थः। ननु सदसत्त्ववदेकस्य ज्ञाताज्ञातत्वंविरोधो ऽपि स्यादित्याशङ्क्य ज्ञानव्याप्यत्वाव्याप्यत्वोपा-

धिकत्वादज्ञाताज्ञातत्वयोर्ज्ञानस्य च पुरुषाश्रितत्वेन तद्भेदे सदसत्त्वाविरोधान्निराकरोति * ज्ञातेति * शक्तेः सर्वगामित्वमुपपादितमुपसंहरति * तस्मादिति * नन्वष्टदोषविकलपापादकमनेकशक्तिकल्पनमन्याय्यमेवागृह्यमाणविशेषत्वेनागत्या क्व चिदङ्गीक्रियते इह तु प्रयोक्तुरल्पत्वबहुत्वविशेषग्रहणान्नानेकशक्तिकल्पनं युक्तमित्याशङ्क्याह * न चेति * दृष्टान्तं व्याचष्टे * बिभीतक इति * एकदेशप्रयुक्तानामपि शब्दानां सर्वगामित्वं निरुक्तकृद्वचनेन द्रढयति * तथा चेति * प्रकृतय एवैकेषु जनपदेषु प्रयुज्यन्ते विकृतय एवैकेष्वित्युपक्रम्य निरुक्तकृता शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते विकारमस्यार्या भाषन्ते शवतात्युक्तं तदर्थतः पठितं कम्बोजेष्वेव जनपदविशेषेषु शवतिर्धातुर्गतिवाची दृष्टः गच्छतीत्यस्मिन्नर्थे शवतीति प्रयोगात् । आर्यास्तु जनपदविशेषाः ऋदोरबित्यप्प्रत्ययान्तत्वेन विकारापन्नं शवतिधातुं न गतौ युञ्जते । शवशब्देन मृतस्याभिधानादित्यर्थः । महाभाष्यकृता तु विकारापन्नमार्या भाषन्तइति पाठान्तरमुदाहृतम् । तत्र मृतावस्था विकारशब्देनोक्ता न केवलं शवतिरेव देशविशेषे व्यवस्थितः किं त्वन्येऽपि बहवो धातवो नामशब्दाश्च व्यवस्थिता एव प्रयुज्यन्ते * इत्यादीति * प्राच्येषु हि जनपदेषु दातिर्धातुर्लवनार्थो दृश्यते लुनातीत्यस्मिन्नर्थे द्यतीति प्रयोगात्तमेव दात्रमिति ष्ट्रन्प्रत्ययान्तत्वेन विकारापन्नमुदीच्याः प्रयुञ्जते ।

प्राच्येषु गच्छतीत्यर्थे मध्यमेषु वरं हति ।
हन्ततिश्च सुराष्ट्रेषु गमिस्त्वार्येषु भाष्यते ॥
महाभाष्यकृतैते ऽन्ये प्रतिदेशे व्यवस्थिताः ।
उदाहृता धातवो ऽतो त्रादिशब्दस्तदाशयः ॥

पूर्वपक्षमुपसंहरति * तस्मादिति * तेष्वदर्शनादित्युपक्रमसूचनं समेत्यस्य प्रतिज्ञामात्रार्थत्वादुभयशब्दार्थावगम इत्यनेन तेष्विति सूत्रावयवो हेत्वर्थेन योजितः तद्व्याचष्टे * एवं चेति * प्रकृतिवदिति हि चोदकेनार्षे समाम्नायावगतमेव मन्त्ररूपमतिदिश्यते कार्यप्राधान्यात् तदसम्भवे व्रीह्यादिशब्दस्थाने नीवारादिशब्दोहेनान्यथात्वं कल्प्येत साधारणशब्दे च न तत्कल्पनापत्तिरित्यर्थः । किमिति विकृतिविषयत्वेनायं सूत्रावयवो व्याख्यात इत्यपेक्षिते प्रकृतौ विप्रतिपत्तिदर्शनेनाविरोधायोगादिति कारणमाह * तेष्विति * एतदुपक्रमत्वस्यानभिमतत्वद्योतनार्थं पूर्वोपक्रमाभिप्रायेण समेत्यस्यैवावृत्त्या हेत्वर्थत्वं दर्शयन्नुपसंहरति * तस्मादिति * शा-

स्था वा तन्निमित्तत्वादिति सिद्धान्तसूत्रं स्वयं तावदवतारणपूर्वकं व्याचष्टे * इतीति * वाशब्देन साम्यं निराकृत्य पूर्वसूत्रगतस्याच्छब्दानुषङ्गेण शास्त्रस्था स्यादित्युक्ते तस्या एव बलीयस्त्वमर्थादुक्तं भवतीति मत्वा * बलीयसीत्युक्तम् * शास्त्रानुसारावगतशब्दार्थगतगुणायोगनिमित्तत्वेनाप्यर्थान्तरप्रतीत्युपपत्तेर्नोभयत्र शक्तिः कल्प्येत्येवमर्थत्वेन तन्निमित्तत्वादिति सूत्रावयवं व्याख्यातुम् * लौकिकीत्युक्तम् * एतदेव विवृणोति * नानेति * भाष्यकृता त्वेकस्यापि वाच्यत्वे तत्साहश्येनेतरप्रतीत्युपपत्तेर्नोभयोः साम्यं कल्प्यमिति वाशब्दं व्याख्याय कः पुनरित्यादिना शास्त्रस्थेति तिष्ठत्यावृत्त्या शिष्टपरत्वेन शास्त्रस्थशब्दो व्याख्यातः तन्निमित्तत्वादिति च तेषां शिष्टानां श्रुतिस्मारणवच्छब्दार्थस्मृतिधारणवच्छब्दार्थस्मृतिधारणनिमित्तत्वादित्येवं तेषामित्यादिना व्याख्याय शास्त्रनिमित्तत्वाच्छिष्टगतायाः प्रतिपत्तेरिति तस्यैवावृत्त्या[1]'ते चैवमित्यादिना व्याख्यानानन्तरं तत्र शास्त्रस्थशब्दव्याख्यानार्थं तावद्भाष्यं व्याचष्टे * शास्त्रस्थाइति * तेषामित्यादिभाष्यं व्याचष्टे * सप्रत्ययेति * सप्रत्ययतरत्वं तेषामुपपादयति * शास्त्रार्थैरिति * शिष्टानां प्रत्ययिततरत्वोपपादनस्य प्रकृतोपयोगमाह * तस्मादिति * नन्नु शिष्टप्रतिपत्तेर्बलीयस्त्वे ऽप्यविरोधादर्थान्तरस्यापि वाच्यत्वे भविष्यतीत्याशङ्कानिराकरणार्थत्वं द्योतयितुं यवशब्द इत्यादि वाशब्दव्याख्या भाष्याभिप्रायमिदानीं व्याचष्टे * अनवस्थितेति * ते चैवमित्यादिभाष्यं व्याचष्टे * अविप्लुतश्चेति * ननु वाक्यशेषकृतस्य निर्णयस्य यवमयश्चरुरित्यादिषु वाक्यशेषरहितेष्वसम्भवात्प्रस्तुतोदाहरणगतशब्दार्थनिर्णयो न सम्भवतीत्याशङ्क्याभिधेयनिर्णयस्यैकत्र कृतस्याविशेषात्सर्वत्र निर्णायकत्वं वक्ष्यमाणमभिप्रेत्य परिहरति * तत्रेति * भाष्यकारीयस्य करम्भविधिशेषत्वाभिधानस्य विध्यन्तरशेषत्वव्यावृत्त्यर्थत्वशङ्कानिराकरणार्थं विध्यन्तरं दर्शयति * यवमतीभिरिति * दीर्घशूककानिति भाष्यमुपपादयति *फाल्गुन इति* तस्माद्वराहमित्यादिवराहवेतसशब्दार्थनिर्णयार्थं वाक्यशेषान्तरोपन्यासभाष्यं व्याचष्टे * एवमिति * त्रिवृदादिशब्दाभिप्रायं बहुवचनम् । व्युत्पादितप्रामाण्यस्य शिष्टाचारस्यैव परस्परविरोधे साम्यवैषम्यचिन्ता युक्ता । नाव्युत्पादितप्रामाण्यस्य म्लेच्छाचारस्य न क्व चित् शिष्टदेशे यवादिशब्दः प्रियङ्ग्वादिषु प्रयुज्यत इति मत्वोदादरणानि दूषयति * नन्वेतानीति *

१४७।१

१४८।१

१ तस्यैवाव्यवेति २ पु० ना०

तन्वेतंदुदाहरणासम्भवे ऽप्युदाहरणान्तरेषु न्यायस्य फलवत्त्वोपपत्तेरुदाहरणदूषणमयुक्तमित्याशङ्क्याह * अध्यारोप्येति * उदाहरणान्तरसम्भवे तदेवोदाहार्यं न त्वसदध्यारोपो युक्त इत्याशयः । न चोदाहरणान्तरे ऽप्ययं न्यायो व्युत्पाद्यान्यत्र व्युत्पादयिष्यमाणत्वादित्याह * संन्दिग्धेषु चेति * न केवलं यवाद्युदाहरणानि न कार्याणि किं तु विचारणापि न कार्येत्यपि शब्दो योज्यः । यद्वोदाहरणाभावात्तावन्न कार्या पौनरुक्त्यादपीति । ननु तत्रोपादानानिर्णयाद्वाक्यशेषबलाच्चैकत्वं घृतोपादानानिर्णये ऽन्यत्र वाक्यशेषाभावे ऽपि तदेवोपादेयमिति नियमाभावादिह त्वभिधेयनिर्णयादेकत्र चाभिधेयत्वेन निर्णीतस्यान्यत्रापि तादृप्यत्यागायोगात्सर्वत्राभिधेयत्वनिर्णयः इत्यपौनरुक्त्यमाशङ्क्य न्यायफलवैषम्ये ऽपि विधिस्तुत्योरेकविषयत्वनियमात्स्तुत्यस्यैव विधेयत्वमिति व्युत्पाद्य न्यायस्वरूपैक्यादपरिहार्यं पौनरुक्त्यमित्याह * यद्यपीति * ननु नात्र दीर्घशूककादीनां यवादिशब्दवाच्यत्वसन्देहो निराक्रियते किं तु दीर्घशूककादिवत्प्रयङ्ग्वादीनामपि प्रतीतिप्रयोगान्यथानुपपत्त्या प्रसक्तावाच्यता गौणत्वेनापि प्रतीतिप्रयोगोपपादनेन निराक्रियते नासावन्यत्र निराकृतेत्याशङ्क्याह * तत्सिद्धिसूत्रे चेति * गौणत्वसम्भवे ऽपि प्रतीतिप्रयोगमात्रेण प्रसिद्धार्थत्यागेनाप्रसिद्धार्थकल्पने जहत्स्वार्थाभिधायित्वं स्यात्तस्य च तत्सिद्धिसूत्रे निराकरिष्यमाणत्वात्तेन सह पौनरुक्त्यं स्यादित्याशयः । एव शिष्टाचारयोरेव परस्परविरोधे वाक्यशेषानुसारिणः शब्दार्थविषयप्रयोगरूपस्य शिष्टाचारस्य प्रामाण्यमितरस्य गौणत्वेनाप्युपपत्तेरप्रामाण्यमिति भाष्यार्थे मत्वोदाहरणाभावात्पौनरुक्त्यापत्तेश्च दूषयित्वेदानीमार्यम्लेच्छाचारयोरिह साम्यवैषम्यचिन्ता वाक्यशेषनैरपेक्ष्येण च निर्णय इत्यभिप्रेत्य समाधत्ते * तस्मादिति * वाक्यशेषनैरपेक्ष्यद्योतनार्थमन्यग्रहणं न तु यवादिशब्दोदाहरणनिराकरणार्थम् । अनन्तदेशाग्रहणेन सर्वदेशप्रयोगाभावस्य केनापि निश्चेतुमशक्यत्वाद्भाष्यकृद्वचनाच्चार्यदेशप्रयोगाभावे ऽपि म्लेच्छदेशे क्वापि प्रयोगो ऽस्तीति निश्चयोपपत्तेः । पूर्वं वा व्युत्पादितप्रामाण्यस्यापि म्लेच्छाचारस्यानन्तराधिकरणे शब्दार्थविषये व्युत्पादयिष्यमाणप्रामाण्यस्य वक्ष्यमाणालोचनेन विचारोपपत्तेर्भाष्यकृतापि शास्त्रस्थशब्दं शिष्टाभिप्रायं व्याचक्षाणेनार्थम्लेच्छप्रयोगयोरेवात्र साम्यवैषम्यचिन्तेति सूचितमित्यविरोधः । वाक्यशेषोपन्यासस्त्वतिशयार्थः । तत्सिद्धिसूत्रस्य च गौणवृत्तिलक्षणमात्रपरत्वान्न तेनापि पौनरुक्त्याशङ्केत्यनवद्यम् । ननु म्लेच्छाचारस्य प्रा-

मणवाभावाच्च साम्येन पूर्वपक्षः सम्भवतीत्याशङ्क्याह दृष्टार्थव्यवहारेष्वार्यम्लेच्छयोर्विशेषाभावान्निराकुर्वन्पूर्वपक्षयति * समेति * प- १४९।।
तदेव विवृणोति * आर्यास्तावदिति * आर्यम्लेच्छानां प्रयोगिणामिति विग्रहः। तुल्यत्वोपपादनायोत्तराधिकरणासिद्धं शब्दार्थविषये म्लेच्छाचारस्यापि प्रामाण्यं दर्शयति * सर्वो हीति * आर्यप्रयुक्तवत् म्लेच्छप्रयुक्तस्यापि शब्दस्यार्थप्रत्ययाङ्गत्वप्रदर्शनार्थः सर्वशब्दः। ननु गाव्यादिशब्दस्याचाचकस्याप्यर्थप्रत्ययकत्वदर्शनान्न तन्मात्रेण म्लेच्छप्रसिद्धेरर्थान्तरे यवादिशब्दानां वाचकत्वशक्तिः कल्पयितुं शक्येत्याशङ्क्याह * तत्रेति * शक्तेः कारणाश्रितत्वादर्थप्रत्ययकारणस्य च गाव्यादिशब्दस्यादिमत्त्वेनानादिशक्त्याश्रयत्वायोगादवाचकत्वं युक्तं यवादिशब्दस्य तु यादृशस्यार्यैः प्रयोगस्तादृशस्यैव म्लेच्छैरित्याविशिष्टत्वेनानादित्वावधारणेनानादिशक्त्याश्रयत्वोपपत्तेर्नाविद्यमानशक्त्यारोपकल्पनाक्लेशो युक्त इत्याविशिष्टशब्देन सूचितम्। नन्वनादित्वे ऽपि यवादिशब्दार्थसम्बन्धानवस्थितत्वादिदोषापत्तेरेकस्थाने ऽनेकशक्तिकल्पनायोगान्न म्लेच्छप्रसिद्धे ऽर्थे ऽनादिसामर्थ्यकल्पनमित्याशङ्क्याह * यथैव हीति * अगृह्यमाणाविशेषत्वादक्षादिशब्दवदगत्याऽप्यनेकशक्तिकल्पनं युक्तमित्याशयः। अविशिष्टत्वमेवोपपादयति * नेति * ततश्च प्रयोगावध्यदर्शनादार्यम्लेच्छप्रसिद्धार्थविषययोः शब्दशक्त्योरनादित्वात्कथं विशेषो ऽवगम्यतामित्यर्थः। न च म्लेच्छसम्बन्धमात्रं शक्त्यभावे कारणमिति दृष्टान्तेनोपपादयति * यथैवेति * म्लेच्छैः स्वार्थे प्रयोगात्तस्मिन्नप्यर्थे शब्दो वाचकः परीक्षकाणामिष्ट इति योज्यं मुख्यत्वेनैव प्रयोगाद्गौणत्वशङ्कानिवृत्त्यर्थः स्वशब्दः पूर्वपक्षमुपसंहरति *तस्मादिति* वाक्यशेषनैरपेक्ष्यप्रदर्शनार्थमुदाहरणान्तरं, ननु यवाद्युदाहरणव्यावृत्त्यर्थमित्युपपादितमेव। उत्तरसूत्रेण सिद्धान्तमाह * इतीति * शास्त्रस्थाः पुरुषायेवेति भाष्यानुसारिव्याख्याभिप्रायः पूर्ववच्छब्दः। वाक्यशेषस्त्वतिशयार्थं भाष्यकृतोक्तो न निर्णायकत्वेनेत्यविरोधः। शब्दापभ्रंशवच्चार्थापभ्रंशस्याप्युपपत्तेर्न प्रतीतिप्रयोगमात्रेणैकान्ततः सर्वेषामर्थानामेकस्माच्छब्दात्प्रतीयमानानां वाच्यत्वनिर्णयः सम्भवतीति कल्पनालाघवादेकस्यैव वाच्यत्वे निर्णीते कस्यैकस्येत्यपेक्षायां शास्त्रस्थानामभिधेयाभियोगविशेषात्तत्प्रयोगवशेन वाच्यत्वावधारणमिति व्याख्यान्तरमाह * चेति* यथा गाव्यादिपूर्वमवृद्धेन प्रमादेनाशक्त्या वोच्चारितेषु साध्वनुरूपत्वात्तदनुमानेन साधुवाच्यमर्थं मध्यमवृद्धस्य प्रतिपादयत्सुव्युत्पित्सोर्वाचकत्वभ्रा-

न्तिर्जायते तथा म्लेच्छैर्गौरयावृत्त्या भ्रान्त्या वा हस्त्याद्यर्थे पीलवादिशब्देन प्रतिपादिते व्युत्पित्सोर्वाक्यत्वाभ्रान्तिर्जायतइत्यर्थः । एतदेव विवृणोति * शब्देति * उपसंहरति * अत इति * अस्यां च व्याख्यायामार्यप्रयोगयोरपि परस्परविरोधे ऽभियुक्ततरबलीयस्त्वं सिद्ध्यतीत्यादि * एतेनेति * इदानीं भाष्यमनपेक्ष्य स्मृत्याचारयोर्विरोधे किं द्वयोस्तुल्यत्वमाचारो वा बलीयान्स्मृतिर्वेति त्रेधा सन्दिह्य साम्यपक्षे समा विप्रतिपत्तिः स्यादित्येतावत्सूत्रं योजयति * स्मृतीति * पक्षद्वयोद्देशार्थो वैषम्यशब्दः । तेष्वदर्शनादित्युपक्रममाचारबलीयस्त्वे योजयति *यद्वेति* अयमाशयः । शिष्टपरिग्रहदार्ढ्येनोभयोर्भ्रान्त्यादिमूलत्वासम्भवान्मिथ्यात्वलक्षणस्तावद्बाधो न युज्यते किं तु यथा प्रत्यक्षश्रुतिविरोधे यावदेकं श्रुतौ कर्मेत्यादिना स्मृतेरनुष्ठानाख्यफलापहारमात्रलक्षणा बाधो मूलश्रुतिदर्शनं यावदुक्तस्तथात्रापि वाच्यः । न चानुष्ठानात्मकस्याचारस्यासौ सम्भवतीति । मन्वाचारस्यापि स्मृतिवच्छ्रुत्यनुमानेनैव प्रामाण्यं न स्वातन्त्र्येण । न च स्मृत्याचारानुमितयोः श्रुत्यैर्बलाबलविशेषो ऽस्तीत्याशङ्क्याह * श्रुतिरिति * स्मृतेर्वाक्यात्मकत्वेनानेकरूपार्थप्रतिभाने प्रत्यक्षश्रुत्यविरुद्धार्थप्रतिपादनपरश्रुतिकल्पनेन यथाश्रुतार्थत्यागलक्षणो बाधो युक्तः आचारस्य त्ववाक्यात्मकत्वेनान्यथात्वकल्पनायोगाद्यथाशिष्टैरनुमीयते तथैवानुष्ठेयमित्यनुष्ठानाख्यफलनिष्ठैव श्रुतिः कल्प्यतइत्याशयः । एतदेव विवृणोति * यावच्छ्रीति * अस्मिन्पक्षे तेष्वाचारेषु स्मृतिमूलश्रुत्यनुमानात्प्राग्विरोधादर्शनात्प्रतिष्ठितेषु बाधासम्भवाद् बलीयस्त्वमेव तावदुक्तं तदनङ्गीकरणे घरं साम्यमस्तु न त्वाचारस्य दौर्बल्यमिति सूत्रं योज्यं, द्विविधमपि पूर्वपक्षमुपसंहरति *तेनेति* शास्त्रस्था वेति सूत्रेण सिद्धान्तमाह * स्मृतीनां वेति * स्मृत्यभिप्रायः शास्त्रशब्द इत्याशयः । तन्निमित्तत्वादिति शास्त्रत्वसामान्येन प्रकृतत्वाद्वेदाख्यं शास्त्रं तच्छब्देन परामृश्य श्रुतिमूलत्वं हेतुरुच्यते तत्रोभयोः स्मृत्यधिकरणे प्राप्तं विरोधे पुनरुच्यमानमाचाराणां श्रुतिमूलत्वपरिसंख्यार्थं तत्रोभयोः श्रुत्यनुमापकत्वाविशेषे विरोधे ऽपि स्मृतेरेव श्रुतिमूलत्वं नाचारस्येति कथमवसीयतइत्यपेक्षायामाह * उभयोरिति * असाम्यमुपपादयति * सप्रत्ययेति * प्रत्ययशब्देन ज्ञानं विश्वासो वा ऽभिधीयते ऋषित्वाच्च मन्वादेः साक्षात्कृतधर्माण ऋषय इति स्मृतेः सकलधर्मतत्त्वज्ञानसम्पन्नत्वावसाया दाचार्यवच्चः प्रमाणमिति च श्रुतेर्धर्मप्रवक्तृत्वेनावधारिताचार्यत्वस्

मन्वादेः सत्यवादित्वावगमादप्रतारकत्वेन विश्वास्यत्वात्तत्प्रणीतायाः स्मृतेर्वेदविरोधे ऽपि श्रुतिमूलत्ववारणाशक्यत्वस्योपपादितत्वादाचारविरोधे का कथेत्याशयः। अर्वाचीनानां तु सकलधर्मतत्त्वज्ञानाभावात्प्रमादादिसम्भवाच्च तदाचारस्य श्रुतिमूलत्वकल्पने श्रुतिस्मृतिविरोधो विघ्नकारीत्यर्थादुक्तं लिङ्गवाक्यवच्च सन्निकर्षविप्रकर्षविशेषादपि स्मृत्याचारयोर्बलाबलविशेषो ऽवसीयतइत्याह * आचाराच्चेति * च शब्दार्थे तुशब्दस्मृतेर्वा साक्षाच्छ्रुतिकल्पनत्वद्योतनार्थः। ननु स्मृतिवदाचारस्यापि साक्षाच्छ्रुतिमूलत्वोपपत्तेः किमन्तरा स्मृतिकल्पनयेत्याशङ्क्याह * न हीति * अयमाशयः तदानीन्तनानां मन्वादिवत्सकलवेदार्थतत्त्वज्ञानमस्ति यतस्तदाचारस्य साक्षाच्छ्रुतिमूलत्वं सम्भाव्यतएवं सत्यपि यद्येकैव काचिच्छ्रुतिः सर्वाचाराणां मूलभूता स्यात्ततस्तस्याः कथं चित्तात्पर्यावधारणसम्भवात्साक्षादिदानीन्तनपुरुषाचारमूलत्वं सम्भाव्येत न त्वसौ * सम्भवतीत्युक्तम् * यद्यपि सदाचारः प्रमाणमिति स्मृत्यनुरूपैका श्रुतिः कल्प्येत तथापि तस्याः सिद्धाचारानुवादेन प्रामाण्यप्रतिपादनमात्रपरत्वेनाचारप्रवर्त्तकत्वाभावान्मूलत्वं न सम्भवतीति दर्शयितुम् * प्रवर्त्तिकेत्युक्तम् * यत्तु यद्वाशिष्टात्मतुष्टीनामित्यादिनाशिष्टानुष्ठानमात्रेणाचारादीनां श्रेयःसाधनत्वाश्च विधायकश्रुत्यपेक्षेत्युक्तं तच्छ्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणमिति वशिष्ठवचनपर्यालोचनया मानवीयस्यापि वेदो ऽखिलो धर्ममूलमिति स्मृत्याचारादिष्वनुषक्तस्य धर्ममूलशब्दस्य।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥

इति लक्षणशब्दस्य च प्रमाणपरत्वावसायात्प्रौढिमात्रमित्यवगम्यते। भिन्नानामप्याचारमूलभूतानां श्रुतीनां मिलितानामेकत्र पाठे तात्पर्यावधारणं सम्भाव्यते तासां तु नानाप्रकरणस्थानां विध्यन्तरशेषत्वेन पठितानां पुरुषधर्माचारविधिपरत्वस्याल्पप्रज्ञैरिदानीन्तनैर्निर्णेतुमशक्यत्वाच्छिष्टाचारपारम्पर्यस्मृत्यैव कस्य चिद् बहुवेदविदः प्रज्ञातिशयसम्पन्नस्याचारमूलश्रुतितात्पर्यावधारणमासीदिति कल्पयित्वेदानीन्तनशिष्टप्रवृत्तिर्भवति स्मृत्या व्यवायः श्रुतिकल्पनस्येति विप्रकीर्णत्वमुपपादयति * नेति * विध्यन्तरशेषत्वेन स्तुतिमात्रत्वेनावभासमानस्यापि सिद्धवत्सङ्कीर्तनान्यथानुपपत्तिप्रापकविध्याक्षेपकत्वकल्पनाक्लेशः कथं चिच्छब्देनोक्तः। आचारमूलश्रुतीनां तात्पर्यावधारणक्लेशप्रदर्शनायैवोदाहरणानि दर्शयन्पात्र १५११

धारणपूर्वकभोजनाचारमूलभूतां तावच्छ्रुतिमुदाहरति * तद्यथेति * क्रत्वर्थत्वशङ्कासूचनार्थः प्रकरणोपन्यासः स्तुतिमात्रशङ्कासूचनार्थं विध्यन्तरशेषत्वोपन्यासः । एकेन परिगृह्येतरेणात्तीति श्रुत्यर्थः । कथं तर्ह्याचारपरविधिपरत्वनिर्णय इत्याशङ्क्य * सत्यपीत्याद्युक्तम् * नन्वन्नस्कन्दनशङ्कापरिहारार्थत्वेन पात्रधारणस्यार्थप्राप्तस्यानुवादोपपत्तेर्नात्र विधिः कल्पनीयो ऽत आह * न चैतदिति सम्यक्पात्रप्रतिष्ठापनेनाप्यन्नस्कन्दनशङ्कापरिहारोपपत्तेर्नियमार्थो विधिः सम्भवतीत्याशयः । स्वभावात्प्रयोजनवशाद्वार्थिकी नियता प्राप्तिः स्यान्न त्वेतदुभयमप्यत्रास्तीति दर्शयितुं वैषम्यदृष्टान्तद्वयम् । दक्षिणहस्तभोजनाचारमूलभूतां श्रुतिमुदाहरति * एवमिति * स्त्रीणां पूर्वं सव्याक्ष्यं जनाचारमूलमुदाहरति * तथेति * शेषिभूतविध्यन्तरोपन्यासस्य प्रयोजनमुक्तम् । स्त्रीणां पत्यन्तरवर्जनाचारस्य मूलमुदाहरति * तथेति * रजस्वलाचारमुदाहरति * तथेति * विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदिति प्रकृत्य तस्य वज्रमादाय शीर्षाण्यच्छिनदितीन्द्रस्य त्वाष्ट्रवधनिमित्तब्रह्महत्याप्राप्तिमुक्त्वा स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रत्यगृह्णात्यादिपृथिव्यादीनां ब्रह्महत्याविभागमुपक्रम्य स स्त्रीसंसदमुपासीददस्यै ब्राह्महत्यायै तृतीयं प्रतिगृह्णातीन्द्रप्रार्थितानां स्त्रीणां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्निति ब्रह्महत्यायास्तृतीयस्य विभागस्य प्रतिग्रहं तन्निमित्तं च मलवद्वाससत्वमुक्त्वा न मलवद्वाससा सह संवेदन्नास्या अन्नमद्यादिति तदुपगमनं निषिध्य यां मलवद्वासमभिसम्भवति यतस्ततो जायते सो ऽभिशस्तो यामरण्ये तस्यै तस्यै स्तेनो यां परार्चीं तस्यै ह्रीतस्य मुख्यप्रगल्भा इत्युपगमननिषेधशेषभूतां निन्दामुक्त्वा तत्प्रस्तावेनागतानां रजस्वलाव्रतानां या स्नाति तस्या अप्सुमारुका याऽभ्यङ्क्ते तस्यै दुश्चर्मायाप्रलिखते तस्यै खलति रपमारी याङ्के तस्यै काणो पादतो धावते तस्यै श्यावदन्ता या नखानि निकृन्तते तस्यै कुनखी या कृणति तस्यै कलीषो या रज्जुं सृजति तस्या उदूबन्धको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदितिस्नानादिनिन्दाद्वारेणोक्तानामग्नीषोमीयपुरोडाशयागविधिशेषत्वेन प्रतीयमानानां प्रकरणातिक्रमेण स्त्रीधर्मत्वावधारणमाचारपरम्परास्मृत्या विना न शक्यमित्याशयः । अतो नानाप्रकरणस्थत्वेन पुरुषधर्मविधिपरत्वकल्पनविक्षेपलक्षणाद्विप्रकीर्णत्वाच्छिष्टाचारपारम्पर्यस्मृत्या विनैकार्थे तात्पर्योपसंहारो न सम्भवतीत्युपसंहरति * एवं चेति * ततश्चाचारप्रामाण्यस्य सिद्धान्तस्मृत्यन्तरितत्वमित्या-

ह * तेनेति * सिद्धान्तमुपसंहरति * तस्मादिति * लोकवेदगत- १५२।१
योर्वाशब्दार्थप्रसिद्ध्योर्विरोधे साम्यवैषम्यविचारार्थं तेष्वदर्श-
नादित्यादिसूत्रद्वयमिति वर्णकान्तरमाह * त्रिवृदिति * एकस्यापि
वाच्यत्वे सादृश्येनेतरत्र प्रतीतेः प्रयोगोपपत्तिशङ्कानिराकरणार्थम *
विलक्षणइत्युक्तम् * एकेति लौकिक्येव वैदिक्येव वेति पक्षद्वयमु-
क्तम्। त्रिवृच्छब्दे विप्रतिपत्तिं दर्शयति * लोके तावदिति* स्तोत्रीया-
गतनवको विवक्षितः। कथं वेदे स्तोत्रीयानवकार्थत्वप्रसिद्धिरि-
त्यपेक्षायामाह * त्रिवृदिति * उपास्मै गायता नरो दिवि द्युतत्या
रुचा पवमानस्य ते कव इति तृचत्रयानुक्रमणान्नवभिः स्तुवन्तीति
स्तुत्यन्तरदर्शनात्स्तोत्रियां नवकविषयत्वं त्रिवृच्छब्दस्यावसीयतइ-
त्यर्थः। चरुशब्दे विप्रतिपत्तिं दर्शयति * तथेति * याज्ञिकप्रसि-
द्धिं दर्शयति * अनवस्रावितेति * भक्तव्यावृत्त्यर्थमनवस्रावित-
विशेषणं वैषद्यानपेक्षपाकमात्रनिमित्तत्वदर्शनार्थमन्तरूष्मपक्वग्र-
हणं वेदे प्रसिद्धिं दर्शयति * तथेति * आदित्यं चरुं विधाया-
ज्यस्यैनं चरुमभिपूर्य चतुराज्यभागान्यजति पथ्यां स्वस्तिमिष्ट्वा ऽग्नी-
षोमौ यजति अग्नीषोमाविष्ट्वा सवितारं यजत्यादितिमोदनेनेनेति क्र-
मपरे वाक्ये सिद्धवदनुवादादोदनवाचिता चरुशब्दस्य ज्ञा-
यते। आश्वलावशब्दे विप्रतिपत्तिं दर्शयति * एवमिति * वेद-
प्रसिद्धिं दर्शयति * एवं हीति * ऐक्षवीशब्दे ऽप्यादिशब्दोपात्तां वि-
प्रतिपत्तिं दर्शयति * ऐक्षव्याविति * विषयं दर्शयित्वा साम्यपक्षे
तावत्सूत्रं योजयति * एवमादिष्विति * आदिशब्दः स्तोमशब्दाभि-
प्रायः। भाष्यकृद्व्याख्याने कः पुनरत्र निश्चय इति सिद्धान्तवेला-
यां प्रश्नदर्शनाद्विप्रतिपत्तिशब्दस्य सन्देहार्थत्वप्रतीतेस्तद्व्यावृत्त्यर्थं
विपर्ययार्थत्वे विप्रतिपत्तिशब्दं व्याख्यातुम् * प्रतिपत्तिविपर्ययइत्यु-
क्तम् * हिशब्दः पादपूरणार्थः। तेष्विति सूत्रावयवव्याख्यातुमा-
शङ्कते *ननु चेति * सूत्रावयवेनाशङ्कां निराकरोति *नैतदिति*
अनेन च तेषु पदार्थेषु वाक्यार्थवदतीन्द्रियत्वाभावेन लोकविषय-
त्वविरोधस्यादर्शनादिति सूत्रावयवो व्याख्यातः। साम्यपक्षमुप-
संहरति * तस्मादिति * लौकिकप्रसिद्धिबलीयस्त्वपूर्वपक्षमप्य-
नेनैव सूत्रेणाह * यदि चेति * लौकिकप्रसिद्धिबलीयस्त्वहेतुत-
या तेष्विति सूत्रावयवेनोक्तमनुपसञ्जातविरोधित्वं साधयितुम्
* पूर्वभावित्वादित्युक्तम् * पूर्वभावित्वमुपपादयति * वेदेति * १५३।१
नन्वेवं सति वेदस्य पदार्थावधारणोपायत्वाभावेन क्व चिदपि वैदि-
कप्रसिद्ध्यभावाद्विचार एवायं नोपपद्यतेत्याशङ्क्याह * तत्रेति *

अत्रैव सूत्रं योजयति * तेष्विति * तेष्वदर्शनाद्विरोधस्येति सूत्रावयवस्य तेष्वेवादर्शनाद्विरोधस्येत्यभिप्राय इत्यन्वयः । उभयत्राविरोधसाम्यापत्तिशङ्कानिवृत्त्यर्थमवधारणम् । किमस्मिन्वर्णके तच्छब्देन परामृष्टमित्यपेक्षिते तेष्विति व्याख्यातम् । पूर्वभावित्वं चाविरोधकारणं पूर्वोक्तमभिप्रेतमर्थवादानां चेत्यादिना कारणान्तरमुक्तम् । अर्थवादानां न पदार्थप्रतीत्यङ्गत्वमधसीयतइत्यन्वयः । हेत्वपेक्षायां संज्ञासंज्ञिसम्बन्धस्य कारणे व्युत्पादने च व्यापाराभावादित्युक्तम् । तद्धेतुत्वेनान्यपरत्वे ऽभिहिते किं परतेत्यपेक्षायां प्ररोचनाशेषत्वमुक्तम् । कथं प्ररोचनेत्यपेक्षिते गुणेत्युक्तम् । वायुक्षेपिष्ठादौ श्रुतिप्रवृत्तिसम्भवात्प्रायग्रहणम् । आदित्यो यूपो यजमानः प्रस्तरः स्वर्ग आहवनीय इति वचनत्रयं दृष्टान्तः । एवं तर्हि पदार्थे प्रत्यौदासीन्येन वाक्यशेषेष्वपि विरोधादर्शनादवधारणानर्थक्यमित्याशङ्क्य पदार्थप्रतिपादनपरत्वाश्रयणे विरोधापादनेनावधारणमुपपादयति * तदाश्रयणे चेति * विरोधस्यैवेत्यवधारणेन वा शास्त्रस्य प्रसिद्ध्यानुगुण्यमेवानेन सूत्रावयवेनोच्यत इत्याह * तथेति * रक्षारम्भकेषु तन्तुषु नवसंख्यासद्भावे ऽप्युपवीतारम्भकायारक्षास्त्रैगुण्यविधानार्थं त्रिवृच्छब्दः । अस्मिन्पूर्वपक्षे समशब्दानुपपत्तिमाशङ्क्य काका योजयति * तस्मादिति * वैदिकप्रसिद्धिबलीयस्त्वे सिद्धान्तसूत्रं योजयति * इतीति * न केवलं श्रेयःसाधनात्मकं धर्मस्वरूपमेव शास्त्रं प्रमाणकं किं त्वङ्गमपि फलं च स्वर्गादीति वक्तुम् * साधनेत्युक्तम् * यत्त्वर्थवादानामन्यपरत्वात्पदार्थप्रतीत्यनङ्गत्वमुक्तं तत्रान्यपरत्वे ऽपि विधिस्तुत्योरेकविषयत्वनियमात्स्तुतिविषयस्यार्थस्यान्यथानुपपत्त्या विधिविषयत्वप्रतीतेस्तस्य चोपसंहारगतस्यापि विध्युद्देशेनाग्रहणं निरालम्बनत्वेनार्थवादानर्थक्यापत्तेरानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायाद् बलीयस्त्वमित्याह * अर्थवादेति * अपिशब्देन बहिष्पवमाने च तृचत्रयानुक्रमणस्य स्तोत्रीयाविधानार्थत्वान्नार्थवादतेत्यपि सूचितम् । नन्वर्थवादावगतस्यार्थस्य विध्युद्देशेन ग्रहणे त्रिवृदादिशब्दानां स्तोत्रियानवकादिवाचित्वेन वृद्धव्यवहारादनवगते विधौ गौणत्वं स्यादित्याशङ्क्याह * गौणो वेति * प्रमाणाभावेनान्यत्र विधौ गौणत्वं १५४।१
नाश्रीयते इह तु वेदप्रमाणकत्वाद्गौणत्वमप्यदुष्टमित्याशयः । परमार्थतस्तु त्रिवृदादिशब्दानां स्तोत्रीयानवकादिष्वपि गुणयोगासम्भवान्मुख्यत्वमेवाभिमतम् । नन्वेवमपि तृचत्रयानुक्रमणेन नवभिः स्तुवन्तीति वचनेन बहिष्पवमाने स्तोत्रीयानवकप्राप्तेस्त्रिवृद्ग्रहणमनर्थ-

कमित्याशङ्क्य तृचत्रयानुक्रमेण नवकवचनयोरभावे ऽपि त्रिवृदग्निष्टोम इत्यादौ नवकासिद्धिरस्य विचारस्य प्रयोजनमिति दर्शयितुमाह * त्रिवृच्छब्द इति * एतदेवास्य विचारस्य प्रयोजनं दशमे त्रिवृदग्निष्टोम इत्युदाहृत्य किमग्निष्टोमसाधनमात्रगतसंख्याविकारिकेयं त्रिवृत्संख्या स्तोमगतसंख्याविकारिका वेति सन्दिह्य त्रिवृद्रज्जुरित्यादौ लोके त्रिवृच्छब्दस्य त्रैगुण्यमात्रवाचित्वदर्शनाद् बहिष्पवमानवच्च तृचत्रयानुक्रमणादेः स्तोत्रीयानवकावगतिकारणस्यात्राभावात् त्रिवृत्त्वस्य च संख्यात्वसामान्येन संख्यामात्रकार्ये विनियोगप्रतीतेः सर्वसंख्याविकारिका त्रिवृत्संख्येति त्रिवृत्संख्यात्सर्वसंख्याविकारः स्यादिति सूत्रेण पूर्वपक्षयित्वा त्रिवृद्बहिष्पवमानमित्युक्ता स्तोत्रीयानवकाम्नामात्रयाश्चिकपालाः त्रिवृता स्तोमेन सम्मिता इति च नवानां कपालानां त्रिवृत्ता स्तोमेन समानवचनात्त्रिवृच्छब्दस्य स्तोत्रीयानवकवाचित्वप्रतीतेरत्रोभयसम्भवे ऽपि वैदिकत्वसामान्येन स्तोत्रीयानवकविषयत्वावधारणात्स्तोमगतैव पञ्चदशत्वादिसंख्या त्रिवृत्संख्यया बाध्यतइति स्तोमस्य वा तल्लिङ्गत्वादितिसूत्रेण सिद्धान्तं यदतोपपादयिष्यते। प्रसङ्गादादिशब्दोपात्तस्य स्तोमशब्दस्य लोकप्रसिद्धसमुदायमात्रवचनत्वातिक्रमेण स्तोत्रीयासमुदायवचनत्वं वेदयाज्ञिकव्याकरणप्रसिद्धिबलेनाहैवमिति। तथाप्यवश्यमेव त्रिवृदादिषु द्रष्टव्य इत्यध्याहृत्य योज्यं, लौकिक्याः समुदायमात्रवचनत्वप्रसिद्धेः का गतिरित्यपेक्षायां * लोकेत्युक्तम् * ननु त्रिवृच्छब्दस्य स्तोत्रीयानवकवचनत्वे विप्रस्योर्ध्ववृतं त्रिवृते त्रिवृता ग्रन्थिनैकेनेति मनुवचनमयुक्तं स्यादित्याशङ्क्य पौरुषेयवाक्येषु लोकवेदप्रसिद्ध्योस्तुल्यबलत्वेन यथासम्भवं प्रसिद्ध्यनुसारोपपत्तेरिह त्रैगुण्यवाचित्वमाश्रित्य परिहरति * यत्त्विति * उपवीतारम्भिकाया वा रक्षानवतन्तुकारब्धत्वात्तस्या एव च ग्रन्थ्यारम्भकत्वाद्वैदिकप्रसिद्ध्यनुसारेणैव मनुवचनं युज्यतइत्याह * यद्वेति * ननु वेदे ऽपि त्रिवृद्भवतीति रशनात्रैगुण्यप्रयोगदर्शनाल्लौकिकीप्रसिद्धिराश्रितैत्याशङ्क्य तत्रापि प्रौढ्या याज्ञिकप्रसिद्ध्यनादरेण वैदिकप्रसिद्ध्यनुसारान्नवगुणत्वं भविष्यतीत्याह * तथेति * अयं तु पक्षः स्तोत्रीयाव्यतिरेकेणान्यत्र नवकसंख्यायां त्रिवृच्छब्दप्रयोगाभावादयुक्त इति वेदप्रसिद्धस्तोत्रीयागतनवकसंख्यारूपार्थासम्भवाद्रशनादौ वेदविरोधाभावाल्लोकप्रसिद्धं त्रैगुण्यमेव ग्राह्यमित्याह *यद्वेति* ननु स्तोत्रीयागतनवकवाचित्वेन शोणादिवन्नवकत्वावान्तरजात्यभावादाकृत्यधिकरणविरुद्धं विशिष्टवाचित्वं प्रसज्येतेत्याशङ्क्य यथेवेत्युक्तम्।

यत्र विशेषणमात्रे शक्तौ कल्पितायां[1] तद्विनाभावाद्विशेष्ये प्रतीतिर्युज्यते तदेवाकृत्यधिकरणस्य विषयः । अविनाभावाभावे तु स्तुवादिशब्दानां पुत्राभार्याभावे यांचादिविशिष्टवाचित्वमिष्यतएव । वृद्धव्यवहारावसेये चार्थे अन्वयव्यतिरेकाभ्यां निकृष्टे शक्तिः कल्प्येतेह तु त्रिवृद्बहिष्पवमानमित्युक्त्वा स्तोत्रीयानवकानुक्रमणान्नवसंख्यायास्त्रिवृच्छब्दवाच्यत्वं कल्प्यमानं स्तोत्रीयागताया एव कल्पयितुं शक्यं न शुद्धायाः प्रमाणाभावादित्याशयः । स्तोत्रीयाविशिष्टस्य नवकत्वस्य वाच्यत्वात्तदेकदेशस्य नवकत्वस्य गौणत्वमभिप्रेतम् । आश्रयबलाबलानाद्दरेण स्वरूपबलाबलवशात्पदार्थनिर्णयमभिप्रेत्य * उत्तरसूत्रइत्युक्तम् * चरुशब्दस्य त्वोदनसम्बन्धेनैव स्थाल्यां प्रयोगोपपत्तेर्लोकप्रसिद्धे ऽर्थे शक्तिर्नैव कल्प्येत्याह * तथेति * सौर्यं चरुं निर्वपेदित्यादौ वाक्यशेषाभावे ऽप्योदनो वा प्रयुक्तत्वादित्यत्र चरुशब्दस्य वेदयाज्ञिकप्रसिद्धिभ्यामोदनमात्रवाचित्वावसायादोदनस्यैव ग्रहणमिति दशमे वक्ष्यमाणं चरुशब्दो ऽपीत्यपिशब्देन सूचितम् । अन्यत्राप्योदनविषय एवेत्यर्थः । अस्मिंश्च वर्णके दाशमिकयांस्त्रिवृच्चर्चाधिकरणयोः एतदधिकरणप्रयोजनप्रतिपादनार्थत्वान्न पौनरुक्त्यम् । याज्ञिकशब्दस्य पूर्वनिपातेन वेदप्रसिद्धिनिरपेक्षस्य याज्ञिकवृद्धव्यवहारस्य वाच्यवाचकभावावगमे साक्षात्कारणत्वेनाभ्यर्हितत्वं सूचितम् । आश्ववालैक्षवीशब्दयोस्तु समुदायप्रसिद्धेर्बलीयस्त्वेनापि दुर्बललौकिकावयवप्रसिद्धिबाधेन काशतन्मूलवाचित्वमेवाबसीयतइत्याह * आश्ववालेति * ननु दीर्घश्लक्ष्णपत्राणां काशानामश्वकेशैः सादृश्यादश्ववालशब्दस्य काशेषु गौणप्रयोगोपपत्तेर्न समुदायस्य शक्त्यन्तरकल्पनं युक्तमित्यलब्धात्मिकायाः समुदायप्रसिद्धेः कथं बलीयस्त्वमित्याशङ्क्याभ्युपगम्यापि गौणत्वं वेदकल्पत्वाद् बलीयस्त्वमाह * अथापीति * यथा श्येनेनेन यजेतेति विहिते यागे सामानाधिकरण्याच्छ्येननामत्वेन प्रसिद्धेनैकशक्तिकल्पनाभयाद्वाच्यवाचकभावानभ्युपगमे ऽपि यथा वै श्येनो निपत्यादत्तएव मयं द्विषन्तं भ्रातृव्यं निपत्यादत्तइत्यर्थवादावगतनिपत्यादायकत्वसादृश्येन श्येनपक्षिजात्योपमिते गौणत्वद्वारेणावाप्तप्रसिद्धिः । श्येनशब्दः पुनरिषुयागे धर्मातिदेशाय समानामितरच्छ्येनेनेति प्रयुज्यमानो गौणो ऽपि वेदकल्पत्वाद्यागविषयत्वेनैवाश्रीयते तथाश्ववालशब्दो ऽप्यश्ववालः प्रस्तर इत्यत्र वाक्यशेषात्काशविषयत्वेन प्रतीयमानो ऽनेकशक्तिकल्पनाभयात्तद्वाचकत्वानभ्यु-

[1] कल्पितायामिति २ पु० पा० ।

पगमे ऽपि दीर्घलक्षणत्वादिसादृश्याद्गौणत्वद्वारेण काशेष्वेवास्तप्रसिद्धिर्वाक्यशेषाभावे ऽपि वेदकल्पत्वात् काशविषयत्वेनैवाश्रीयतइत्यर्थः। नन्वश्ववालशब्दस्य गौणत्वाभ्युपगमे गौणतायाः पदान्तरसामानाधिकरण्यसापेक्षत्वेनासामर्थ्यापत्तेराश्ववाल इति तद्धितानुत्पत्तिप्रसङ्गान्नाश्ववालशब्दस्य गौणत्वं युक्तमित्याशङ्क्याभ्युपगमवादमात्रत्वमस्य प्रकटयितुमाह * अथापीति * यद्यपि गौणत्वं न च ते वालाः काशतां प्राप्ता इति काशरूपेणाश्वस्य वालानां परिणामाभिधानात्प्रकृतिविकारयोश्च सादृश्यसम्भवाच्छब्दावगतप्रकृतिविकारभावमात्रेणोत्प्रेक्षितं न वास्तवमिति शब्दग्रहणेन सूचितम्। वेदस्य सम्बन्धिदृष्टमवगतं चेन्न केनापि वार्यते स्वतन्त्रत्वेनापौरुषेयत्वेन वेदे दोषाशङ्कानुपपत्तेरित्यर्थः। ननु धर्मातिदेशादिव्यवहारसिद्ध्यर्थं केन चिद् गुणयोगेन श्येनशब्दस्य यागविशेषनामत्वाङ्गीकरणमर्थवत्पुरोडाशानलं कुर्वित्यादौ च लाघवार्थं पुरोडाशशब्देन धानादिहविःपञ्चकलक्षणार्थे वेतीह तु मुख्येन काशशब्देनैवं प्रस्तरविधिसिद्धेर्गौणलाक्षणिकाश्ववालशब्दानर्थक्यापत्तिः मुख्यत्वे त्वाश्ववालः प्रस्तरः कार्यः काशाश्चाश्ववालशब्देनोच्यन्ते इत्यनेकार्थपरत्वापत्तेर्वाक्यभेदः प्रसज्येतेत्याशङ्क्याह * गौणमिति * १५५।
काशाश्ववालशब्दयोर्वाच्यवाचकत्वाभावे निरालम्बनवाक्यशेषापत्तेरगत्या वाक्यभेदो ऽपि वेदाङ्गीकृतत्वान्न दोषमावहति परमार्थतस्तु विधिस्तुत्येकवाक्यत्वान्यथानुपपत्त्यैवात्र वाच्यवाचकत्वप्रतीतेर्न वाक्यभेदो ऽस्तीति वाशब्देन सूचितम्। ननु वाक्यशेषबलेन त्रिवृदादिशब्दार्थनिर्णये पूर्वोक्तमेव पौनरुक्त्यं स्यादित्याशङ्क्याह * न चात्रेति * अस्मिन्दिग्धत्वमेव विवृणोति * लौकिकीति * एतद्वर्णकसिद्धान्तमुपसंहरति * बाधतइति * सुखग्रहणार्थं वर्णकन्यायसिद्धान्तं सङ्क्षिपति * तस्मादिति * आद्ये वर्णके शास्त्रशब्देन शास्त्रानुसारित्वादार्या विवक्ष्यन्ते। द्वितीये स्मृतिः। तृतीये वेदः। मुक्तकानां नियमशून्यानां म्लेच्छानामाचारैरित्याद्यवर्णके ऽर्थः। मुक्तकैरनिबद्धैरितीतरयोः सदाचाराणां स्मृतिव्यवधानाद्धर्मविप्रकर्षः * इतरेषां त्वसम्बन्धादेव *

॥ अथ म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम् ॥ ६ ॥

चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ ९ ॥

अत्र भाष्याच्छास्त्रस्थम्लेच्छप्रसिद्ध्योर्बलाबलचिन्तेति प्रतिभाति तच्च म्लेच्छाचारप्रामाण्यस्य प्रागव्युत्पादितत्वादयुक्तमाशङ्क्य

शब्दार्थविषये म्लेच्छाचारप्रामाण्याप्रामाण्यचिन्तापरत्वेन सन्देहभाष्यं व्याचष्टे * ये शब्दा इति * म्लेच्छप्रसिद्धार्थाग्रहणे ऽपि कादिशब्दानर्थक्यमाशङ्क्य भाष्यकृता धातुतो ऽर्थः प्रकल्पयितव्य इत्यादिभिधानादार्यप्रसिद्ध्यभावे ऽपि म्लेच्छप्रसिद्धार्थो न ग्राह्य इति पूर्वपक्षवचनव्यक्तिः सूचितेत्याशयः । किमत्र सन्देहकारणमित्यपेक्षायामाश्रयस्वरूपबलाबलविसवादं सन्देहकारणं दर्शयितुमाह * तथेति*प्रकृतचिन्तासिद्ध्यर्थम् । एतदर्पि चिन्त्यते इति तथाशब्दार्थः । निरुक्तव्याक्रियाद्वारेत्यनेन शास्त्रस्थत्वमवयवप्रसिद्धित्वं सूचितं समुदायप्रसिद्धिर्वा बलीयसीत्यनुषङ्गः । ननु षष्ठे वचनाद्रथकारस्याधानस्य सर्वशेषत्वादित्यत्राधिकरणे समुदायप्रसिद्धेरवयवप्रसिद्धितो बलीयस्त्वस्य वक्ष्यमाणत्वात्समुदायावयवप्रसिद्ध्योर्बलाबलचिन्ता पुनरुक्तेत्याशङ्क्य * म्लेच्छस्यैवेत्युक्तम् * शास्त्रस्थप्रसिद्धिबलीयस्त्वे समुदायप्रसिद्धिम्लेच्छेष्वेव तिष्ठति नार्यगामिनी भवति नार्यान्प्रत्यात्मानं लभतइत्यर्थः । अथ वावयवप्रसिद्धित्वेन तस्या दौर्बल्यात्समुदायप्रसिद्धिराचार्यानपि प्रति भवेदात्मानं लभतइत्यर्थः । समुदायप्रसिद्धेरेवात्र प्रामाण्याप्रामाण्यरूपात्मलाभसद्भावसिद्ध्यर्थं निरुक्तादिद्वारप्रसिद्धिबलाबलविचारः क्रियतइत्याशयः । यद्वा किं निरुक्तादिद्वारा प्रसिद्धिः शास्त्रस्थत्वाद् बलीयसी म्लेच्छस्यैव वा समुदायप्रसिद्धित्वादित्येकं विचारप्रकारमुक्त्वा किं निरुक्तादिद्वारावयवप्रसिद्धिर्वा म्लेच्छस्थत्वादिति प्रकारान्तरसूचनार्थत्वेन वाप्यथवा शब्दो योज्यः । यद्वा शास्त्रस्थम्लेच्छप्रसिद्ध्योः का बलीयसीत्येवं प्रकारमुक्त्वा म्लेच्छस्थैव वा किं म्लेच्छस्थत्वाद् दुर्बला समुदायप्रसिद्धित्वाद् बलीयसीत्येवं विचार्या भवेदिति प्रकारान्तरप्रतिज्ञानार्थो ऽथवा शब्दः म्लेच्छस्थैव प्रसिद्धिर्विचार्या भवेदित्युक्ते कथं विचार्येत्यपेक्षायां विचारस्वरूपं सोपपत्तिकं दर्शयति * म्लेच्छस्थप्रसिद्धिरिति * पूर्वव्याख्यानयोरप्येतदेव प्रकारान्तरमप्रतिज्ञातमेवानेन ग्रन्थेन प्रतिपाद्यतइति विशेषः । निरुक्तादिद्वारैव वा प्रसिद्धिः किं शास्त्रस्थत्वाद् बलीयसी अवयवप्रसिद्धित्वाद्वा दुर्बलेति प्रकारान्तरमाह * तथेति * भाष्ये ऽपि निगमनिरुक्तव्याकरणवशेनेत्यनेनावयवप्रसिद्धेः शास्त्रस्थत्वं बलीयस्त्वकारणमुक्तम् । कल्पयितव्य इति कल्पनीयत्वं दौर्बल्यकारणम् । म्लेच्छा इति च समुदायप्रसिद्धेर्म्लेच्छस्थत्वं दौर्बल्यकारणमुक्तम् । आचरन्तीति कल्पत्वं बलीयस्त्वकारणमिति विवेकः । शिष्टाचारस्येत्यादिपूर्वपक्षभाष्यं सन्देहभाष्यव्याख्यानोपसंहारपूर्वकं व्याचष्टे

* एवमिति * म्लेच्छप्रसिद्धौ प्रयोक्तृदौर्बल्यं स्वरूपबलीयस्त्वमि- १५६।१
तरत्र प्रयोक्तृबलीयस्त्वं स्वरूपदौर्बल्यमित्युपपत्तिचतुष्टयान्म्लेच्छ-
प्रसिद्धिप्रामाण्याप्रामाण्यसन्देहे सिद्ध इत्यर्थः। पूर्वापवादत्वेनानन्त-
रसङ्गतिसूचनार्थं सूत्रोपन्यासः। पिकादिशब्दार्थप्रसिद्धेः शास्त्रस्थाना-
मसिद्धत्वात्कथं बलीयस्त्वमित्याशङ्क्य *कल्प्यापीत्युक्तम्* नावकल्-
प्तायाः स्वरूपेणैवासत्त्वात्कथं बलीयस्त्वमित्याशङ्क्य साधुमूलबलेना-
सिद्धाया अपि साधयितुं शक्यत्वादिति परिहरति * तन्मूलस्येति *
ननु समुदायप्रसिद्ध्यावयवप्रसिद्धिबाधात्कथं प्रामाण्यमित्याशङ्का-
निराकरणार्थं नाशिष्टस्मृतेरिति भाष्यावयवं व्याचष्टे * न सिद्ध-
मपीति * म्लेच्छप्रसिद्धे ऽर्थे वैदिकानां शब्दानां समुदायप्रसिद्धेरा-
त्मलाभासम्भवान्नावयवप्रसिद्धेर्बाधकमस्तीत्याशयः। सिद्धमप्य-
सन्मूलं न प्रमाणमिति लुप्तभावप्रत्ययप्रमाणशब्दानुषङ्गेण योज्यम्।
ननु शब्दार्थसम्बन्धस्य वृद्धव्यवहारमात्रप्रमाणकत्वान्म्लेच्छव्यवहा-
रस्यापि तत्र प्रामाण्योपपत्तेः कथमाश्रयदोषेण दुष्टत्वमित्याशङ्क्या-
भ्युपगम्यापि तावन्म्लेच्छव्यवहारस्य शब्दार्थसम्बन्धे प्रामाण्यं वै-
दिकशब्दानां म्लेच्छप्रसिद्धार्थाभिधायित्वं न सम्भवतीत्याह * क-
थमिति * गृहीतसम्बन्धस्य श्रुतस्य शब्दस्यार्थाभिधायकत्वान्म्लेच्छा-
नां च सम्बन्धग्रहणसम्भवे ऽपि वैदिकशब्दश्रवणाभावात्तच्छ्राविणां
चार्याणां म्लेच्छसम्भाषणनिषेधेन तत्प्रसिद्धार्थसम्बन्धग्रहणासा-
म्भवान्नार्यान्प्रति समुदायप्रसिद्धेरात्मलाभः सम्भवतीत्याशयः।
म्लेच्छप्रसिद्धार्थग्रहणे च निगमादीनामानर्थक्यापत्तेस्तद्ग्रहणं न
युक्तमिति प्रतिपादनार्थं निगमादीनां चेति भाष्यं म्लेच्छप्रसिद्धा-
र्थाभावे निगमादीनामर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * एवं
चेति * म्लेच्छप्रसिद्धेः प्रमाणत्वे सतीत्यर्थः। ननु सर्वम्लेच्छदेशा-
न्वेषणे ऽपि यस्यार्थस्याप्रसिद्धिः स निगमादीनां विषयो भविष्य-
तीत्याशङ्क्याह * अनन्तेति * शङ्कामेवोपपादयति * अनन्तेषु
हीति * को ऽर्थः क्व देशे सिद्ध इत्यर्थः। सर्वम्लेच्छदेशान्वेषणे तु
बाधशङ्का दुष्परिहरेत्याह * निगमादीति * अस्मत्पक्षे त्वार्यावर्त्तदे-
शस्याल्पत्वेन सर्वान्वेषणसम्भवात्तदप्रसिद्धो ऽर्थो निगमादीना वि-
षयो भविष्यतीत्याह * म्लेच्छाचारेति * उपसंहरति * तस्मा-
दिति * म्लेच्छव्यवहारस्य शब्दार्थसम्बन्धे प्रामाण्यमभ्युपगम्य १५७।१
वैदिकशब्दार्थावधारणं म्लेच्छव्यवहाराच्च * सिद्ध्यतीत्युक्तम् *
परमार्थतस्त्वनाभियुक्तत्वान्म्लेच्छानां न तद्व्यवहारः शब्दार्थसम्ब-
न्धे प्रमाणमिति प्रतिपादनार्थमनाभियोगश्चेत्यादिभाष्यं व्याचष्टे *

धर्मे चेति * नन्वपभ्रष्टस्य शब्दस्यार्थतत्त्वानवधारणे ऽपि संस्कृतस्य शब्दस्य म्लेच्छव्यवहारादप्यर्थतत्त्वावधारणं भविष्यतीत्याशङ्क्याह * न चेति * न म्लेच्छभाषां शिक्षेतेति तद्भाषानिषेधसूचनायाप भाषणमित्युक्तम् ननु पिकादिशब्दानां वेदतदभियुक्तप्रयुक्तत्वेन संस्कृतानां म्लेच्छभाषायां दृष्टत्वादसत्त्ववचनमयुक्तमित्याशङ्क्याह* संस्कृतेति * अविभक्तिकत्वात्संस्कृतसदृशास्तैः प्रयुज्यन्ते न च सादृश्यमात्रेण शालाशब्दस्येव मालाशब्दार्थवाचकत्वं युक्तमित्यर्थः । यवादिशब्दानां ऽचार्थान्तरे प्रयोगान्न म्लेच्छव्यवहारेणार्थतत्त्वाध्यवसाय इति द्योतनायार्थान्तर * इत्युक्तम् * संस्कृतप्रतिरूपेभ्यश्च म्लेच्छप्रयुक्तेभ्यः । संस्कृतशब्दकल्पने अनेकविधोत्प्रेक्षासम्भवान्न व्यवस्थितशब्दार्थावधारणं सम्भवतीत्याह * आर्याश्चेति * कथं पदान्ताक्षरोपेतं कल्पयन्तीत्यपेक्षिते कदा चनेति * प्रकारद्वयमुक्तम् * यन्म्लेच्छैरधिकाक्षरं प्रयुक्तं तदूनाक्षरं कल्पयन्ति । यत्तु तैश्चोरित्यादिन्यूनाक्षरं प्रयुक्तं तत्र स्वराद्यधिकमक्षरं प्रक्षिपन्तीत्यर्थः । एतदेव विवृणोति * तद्यथेति * आदिशब्दो ऽनुस्वारलोपमत्वर्थीयप्रत्ययाभिप्रायः । स्वरान्तत्वकल्पनामुदाहरति * तद्यथेति* स्वरान्तत्वविभक्त्यन्तत्वकल्पनयोरुदाहरणमाह * पन्थानमिति * स्वरान्तानुस्वारलोपकल्पनयोरुदाहरणमाह * तस्वेति * स्त्रीप्रत्ययकल्पनामुदाहरति * एवमिति * मत्वर्थीयप्रत्ययकल्पनामुदाहरति * वैरशब्दं चेति * विशेषतः प्रत्यन्तवासिम्लेच्छभाषायां व्यवस्थितशब्दार्थावधारणं न सम्भवतीत्याह * तद्यदेति * किं शब्दस्वरूपं स्वभाषानुरूपमुत्प्रेक्ष्य किमर्थरूपं प्रतिपत्स्यन्तइत्यर्थः । उपसंहरति * तस्मादिति * विविधं कल्प्यतइत्यर्थः । तस्मादित्युपसंहारभाष्यं व्याचष्टे * निरुक्तेति* निरुक्तादिभ्यो ऽनेकार्थप्रतिभाने ऽप्यक्षादिशब्दवत्प्रकरणादिना विशेषावधारणं तद्भावे ऽप्यसम्भवद्व्युत्पत्तिपदार्थव्यावृत्त्या सम्भवद्व्युत्पत्तिपदार्थविशेषरूपेणावधारणं भविष्यतीत्याशयः । सूत्रव्याख्यानार्थमेवं प्राप्तइत्यादिसिद्धान्तभाष्यं शब्दाविप्लुत्यभावेनार्थविप्लुतिशङ्कानिराकरणाशक्तेरयुक्तमाशङ्क्य शब्दान्तरेषु विप्लुतिशङ्कानिराकरणशक्तावपि पिकादिशब्दानां वेदादिशास्त्रप्रयुक्तत्वेनाविभक्तिकम्लेच्छप्रयोगे ऽपि प्रातिपदिकाविप्लुतिनिश्चयान्मुख्यार्थान्तराप्रसिद्धेश्च गौणत्वायोगादनादिम्लेच्छव्यवहारान्यथानुपपत्त्या वाचकत्वकल्पनं युक्तमित्यभिप्रायेण व्याचष्टे
१५८।१ * एवमिति * पिकादिशब्दस्वरूपस्य शिष्टैरप्यवगतत्वाद्गौणत्वासम्भवप्रतिपादनार्थं शिष्टानवगतिविशेषणानुपपत्तिमाशङ्क्यार्थ इत्युक्तं

तीयेतेत्यस्य न्यूनत्वाशङ्कानिराकरणार्थम् * तथैवेत्युक्तम् * विध्यनुवादविवेकार्थौ यत्तच्छब्दौ । अविरोधत इति तसिला यत्प्रमाणेनेति यच्छब्दो यस्मादित्यर्थे व्याख्यातः । तदवगम्यमानमिति भाष्यावयवं विप्लुतिशङ्कानिराकरणार्थत्वेन व्याख्यातुम् * पिकेत्युक्तम् * यथाभाष्यं सूत्रपदानामन्वयं कृत्वा पदार्थान्व्याचष्टे * चोदितं हीति * हिशब्दो ऽलङ्कारार्थो न तद्धर्मप्रमाणेनेत्यत्र चाकृष्य व्याख्येयः । म्लेच्छप्रयुक्तस्यार्थस्यार्यान्प्रत्यप्रसिद्धिमाशङ्क्य * अवधृतमित्युक्तम्*विरोधाभावाभिप्रायेणाविरोधपदं व्याख्यायांधर्मपदवद्विरोधविपरीतानुसाराभिप्रायेण व्याचष्टे * अपि चेति * अस्मिन्व्याख्याने ऽवगम्यमानमित्यवशब्दो ऽनेकार्थत्वान्निपातोपसर्गाणामनुशब्दार्थे व्याख्येयः । स्वयमन्यथा द्वेधा सूत्रं योजयति * पिकादाविति * म्लेच्छप्रसिद्धस्यार्थस्यार्यैरपेक्षणे दृष्टान्तमाह *यथैवेति * तेषामप्युदाहरणत्वादृष्टान्तत्वमाशङ्क्य विशस्तपश्ववयवविभागाविकारेण सामान्यतः पश्ववयवत्वज्ञानाद्विशेषमात्रापेक्षायां निरुक्तादिना निर्धारितविशेषावधारणासम्भवात् पश्ववयवत्वसामान्यांशे ऽथ म्लेच्छप्रसिद्धेः सम्वादाभावादगत्या म्लेच्छप्रसिद्धार्थग्रहणे सिद्धेर्दृष्टान्तत्वमुपपादयितुम् * पश्ववयवा इत्युक्तम् * द्रव्यान्तरमिश्रं हिरण्यं कूटमिति कूटशब्दवाच्यज्ञाने ऽपीदं शुद्धमिदं मिश्रमिति विवेकाय तदभियुक्तापेक्षा प्रसिद्धेवेति दृष्टान्तान्तरमाह * यथा चेति * दार्ष्टान्तिके योजयन्स्वयमेव तृतीयं व्याख्याप्रकारमाह * तथेहेति * सूत्रेण म्लेच्छाचारप्रमाणकसमुदायप्रसिद्धिसद्भावमुपपाद्य शास्त्रस्थप्रसिद्धेर्बलीयस्त्वेन तद्बाधस्य पूर्वपक्षितस्य निराकरणार्थं यत्तु शिष्टाचार इति भाष्यं व्याचष्टे * यत्त्विति * एवमनुभाष्य स्वयं तावच्छब्दार्थव्यवहारे ऽपि पूर्वाधिकरणन्यायेन शास्त्रस्थप्रसिद्धिबलीयस्त्वमङ्गीकृत्य विरोधाभावेनाबाधमाह * नेति * नन्वविरोधे ऽपि शाक्यादिग्रन्थवच्छिष्टापरिगृहीतत्वान्म्लेच्छव्यवहारस्याप्रामाण्यं भविष्यतीत्याशङ्क्याह * यदेवेति * या वेदबाह्याः स्मृतय इत्यादिना वेदबाह्यस्मृतीनां निष्फलत्वस्मरणाच्छाक्यादिग्रन्थावगतस्य श्रुत्यादिसम्वादिना ऽपि श्रेयःसाधनत्वाभावप्रतीतेरदृष्टार्थेषु वेदबाह्यानां विरोधाभावे * ऽप्यप्रामाण्यं युक्तम् * दृष्टार्थे तु शब्दार्थव्यवहारे म्लेच्छानामपि प्रतीतिप्रयोगान्यथानुपपत्तिप्रभवाच्यवाचकभावविषयार्थापत्तिज्ञानस्य निराकर्तुमशक्यत्वादप्रतिहतं प्रामाण्यमित्याशयः । एतदेव पूर्वाधिकरणव्युत्पादिताभियुक्त- १९९।२

तरार्यप्रसिद्धिबलीयस्त्वेन द्रढयति * अत एवेति * यत एवाविरोधे दुर्बलस्यापि ग्राह्यत्वमत एव वैदिकवाक्यार्थे ये ऽभियुक्ततरा आर्या याज्ञिकां ये च स्वविषयप्रयुक्तपदार्थमात्रे ऽभियुक्ततरा वैद्यास्तेषामितरार्येभ्यो बलीयस्त्वमन्यथा शास्त्रापेक्षया तत्प्रसिद्धेरपि दौर्बल्यादग्राह्यत्वं स्यादित्यर्थः । नन्वार्यान्तरेभ्यो ऽप्यभियुक्ततरार्याणां बलीयस्त्वे म्लेच्छेभ्यः सुतरां स्यादित्याशङ्क्याह * प्रसिद्धाविति * श्लोकं विवृणोति * अष्टकादिषु हीति * अष्टकाद्यर्थेषु मन्वादीनां शाक्यादिभ्यो बलीयस्त्वं पदस्वरूपज्ञानेषु वैयाकरणानामितरेभ्यः पदार्थज्ञानेषु याज्ञिकानां वैद्यानां च पिकादिषु तु म्लेच्छप्रयोगेभ्यो ऽर्थनिर्णये सति न किं चिद्विरुद्धं प्रत्युताकाङ्क्षितं पदार्थज्ञानं सेत्स्यतीत्यन्वयः । ननु विप्लुतिभूयिष्ठत्वेन म्लेच्छप्रयोगेभ्यः शब्दस्य स्वरूपस्यैवानवगतेः कथं चिद् बाह्यस्वरूपावगमे ऽपि स्तोभाक्षरवदवाचकत्वस्यापि सम्भवात् कथं पदार्थज्ञानाकाङ्क्षेत्याशङ्क्यार्थेत्युक्तम् । वेदादौ प्रयोगात्स्वरूपावगमः वाक्यान्वयान्यथानुपपत्त्या च वाचकत्वावगमः वाच्यविशेषज्ञानमपि तर्हि आर्येभ्य एव भविष्यतीत्याशङ्क्य * वाच्येत्युक्तम् । ननु म्लेच्छप्रयोगान्निर्मूलान्नार्थनिर्णयो युक्त इत्याशङ्क्य * पदवदित्युक्तम् * म्लेच्छानामपि भूलप्रमाणसम्भवो दृष्टग्रहणेनोक्तः अनादित्वेन दोषनिरासः पदे यथाप्रत्यक्षत्वान्म्लेच्छैरपि लब्धाप्रसिद्धिः एवं दृष्टो यः कोकिलादिरर्थः तत्प्रतिपत्त्यर्थो यो ऽनादिः पिकादिशब्दप्रयोगः । तेन लब्धशब्दार्थसम्बन्धविषया प्रसिद्धिर्यैर्म्लेच्छैस्ते तथोक्ताः । नन्वार्यप्रसिद्ध्यभावे ऽपि निगमादिभ्यो ऽर्थनिर्णये सिद्धेर्म्लेच्छप्रसिद्धिबाधः स्यादित्याशङ्क्याह * निगमेति * ननु निगमादिभिर्निधारितरूपार्थविशेषानुदाहरणे ऽप्यवयवव्युत्पत्त्या कश्चिदर्थविशेषो ज्ञाप्यते ऽत आह * काल्पनिक इति * अनेन च सत्यपि विरोधे समुदायप्रसिद्धेरेव रथकाराधिकरणन्यायेनावयवप्रसिद्धितो बलीयस्त्वादबाध इत्युक्तं भाष्यकृता त्वदृष्टार्थेष्वेव शिष्टाचारस्य म्लेच्छाचारादू बलीयस्त्वं न लौकिकेष्वित्ति तत्प्रत्यक्षानवगतेष्वति परिहारः कृतः तद्व्याचष्टे * आश्रयाणां चेति * म्लेच्छानामनभियुक्तत्वात्तदाचारस्य शब्दार्थसम्बन्धाप्रामाण्यं पूर्वपक्षोक्तं यस्त्वभियुक्ता इत्यनुभाष्याभियुक्ततरा इति भाष्येण परिहृतं तद्व्याचष्टे * तस्मादिति * वाच्यनिर्णये म्लेच्छानां प्रामाण्याभावे कौशलमात्रस्याप्रयोजकत्वात् दृष्टार्थेषु शिष्टम्लेच्छयोः प्रामाण्येन तुल्यत्वमनन्तरोक्तं तस्माच्छब्देन परामृष्टम् । यत्तु शब्दस्वरूपवन्म्लेच्छप्रसिद्धे ऽर्थे ऽप्यविश्वास इत्यु-

क्तं तत्परिहरति * शब्देति * शिष्टाचारे निबन्धनेनाश्वासो न स्व- १६०।२
रूपप्रयुक्त इत्याशयः । किं च पिकादिशब्दवाच्यानां कोकिलादीना-
मर्थे देशसद्भावात्पिकादिशब्दवाच्यत्वरूपेणार्याणामप्रसिद्धावपि स्व-
रूपेण प्रसिद्धिसम्भवान्न तत्स्वरूपज्ञाने म्लेच्छापेक्षा पत्रोर्णादिश-
ब्दवाच्यानां तु स्वरूपज्ञाने ऽपि म्लेच्छापेक्षणादवश्यं तत्प्रसिद्धिरा-
दरणीयेत्याह * पत्रोर्णेति * पत्रोर्ण धौतकौशेयं वारमोषधिरसपा-
वनसाधनविशेषः । वाणो वाद्यविशेषः । कञ्चुकं वा । तथा चैकमेवे-
दं वारवाणपदमाकथं चिच्छब्दार्थे नेमशब्दः । यदपि म्लेच्छप्रसिद्धा-
र्थाङ्गीकरणे निगमाद्यानर्थक्यमुक्तं तत्स्वयं तावद्धिन्नविषयत्वेन प-
रिहरति * निरुक्तादेश्चेति * अर्थप्रतिपादनपरत्वाभावे निर्विषय-
निमित्तादिमात्रप्रतिपादनानुपपत्तिमाशङ्क्यान्यतः सिद्धे ऽर्थइत्यु-
क्तम् । ननूतत्वः पश्यन्न ददर्श वाचमित्यादौ त्वादिशब्दानामेका-
द्यपूर्वार्थप्रतिपादनस्य निरुक्ते दर्शनात्कथं निमित्तमात्रे व्यापार उ-
च्यते व्याकरणे च सधिर्हिंसायामित्यादौ साध्यादेर्हिंसाद्यपूर्वार्थप्र-
तिपादनदर्शनात्कथं शब्दस्वरूपान्वाख्यानमात्रे व्यापार उच्यते इ-
त्याशङ्क्य स्वरूपत इत्युक्तम् । स्वेनात्मीयेनार्थप्रतिपत्तिशेषत्वेन रूपे-
णेति व्युत्पत्त्या तात्पर्येणेत्यस्यार्थः । श्लोकं व्याचष्टे * निरुक्तेन ता-
वदिति * भाष्यकृता तु म्लेच्छानामप्यप्रसिद्धे ऽर्थे निगमादीनाम-
र्थवत्तेति । यत्तु निगमेत्यादिनानुभाष्येण पूर्वमानर्थक्यं परिहृतं
तद्व्याचष्टे * यस्य चेति * सर्वं नाशधातुर्जामित्यर्थकल्पनाद्वारं नि-
रुक्ते प्रदर्शितम् । यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च त-
दूह्यामिति व्याकरणे म्लेच्छदेशानन्त्ये ऽपि देशान्तरगतपुरुषवार्त्तापर-
म्परया सर्वदेशप्रसिद्ध्यभावनिश्चयः सम्भवतीत्याशयः । काम-
मित्यनेनानावश्यकत्वं दर्शितमुपपादयति * विक्षितेति * प्रकृतिप्र-
त्ययार्थयोरेकत्रान्वारव्यानाद्विक्षितत्वं क्लेशहेतुत्वेनोक्तम् । अने-
करूपप्रकृतिप्रत्ययार्थान्वाख्यानादद्भुतरूपत्वं सन्देहहेतुत्वेनोक्तम् । न-
न्वपूर्वार्थप्रतिपादनपरत्वाभावे निमित्तमात्रप्रतिपादनेन प्रयोजना-
भावादानर्थक्यं स्यादित्याशङ्क्याह * न चेति * षडङ्गाद्वेदाद्यद्वेदा-
र्थविज्ञानं ज्ञानं च तत्पूर्वायाः कर्मणः क्रियाकरणमनुष्ठानं ततो हि
फलं भवतीत्यर्थः । निरुक्तजन्यस्य शब्दप्रवृत्तिनिमित्तत्वज्ञानस्य त-
त्पूर्वकानुष्ठानद्वारेणादृष्टोपयोगित्वे व्यासवचनं सिद्धं दृष्टान्तं तावद-
दाह * यथेति * निर्वचनज्ञानमात्रात्सर्वपापक्षयसिद्धौ भारता-
द्यध्ययनतदर्थानुष्ठानानर्थक्यापत्तेः प्रधानफलमेवेदमङ्गस्तुत्यर्थं की-

१ चार्थादेशेति २ पु० पा० ।

१६१।१ त्तितमित्याशयः दार्ष्टान्तिके योजयन् श्लोकं व्याचष्टे * एवमिति * वेदमात्रात्कर्मावबोधसिद्धेर्निरुक्ताद्यानर्थक्यमाशङ्क्याव्युत्पन्नरूपे चेत्युक्तम् । निरुक्तादावगतो यो धात्वर्थपूर्वको नामार्थस्तद्ज्ञानद्वारा या वाक्यार्थप्रतिपत्तिस्तपूर्वकादनुष्ठानादित्यर्थ ॥

॥ अथ कल्पसूत्राऽस्वतः प्रामाण्याधिकरणम् ॥ ७ ॥

प्रयोगशास्त्रमिति चेत् ॥ १० ॥

अत्र भाष्यकृता कल्पसूत्रेषु प्रामाण्याप्रामाण्यसन्देहमुपन्यस्य प्रामाण्यं पूर्वपक्षयित्वा सिद्धान्ते निराकृतं, तत्स्मृत्यधिकरणव्युत्पादितसकलविद्यास्थानप्रामाण्यविरुद्धत्वादयुक्तमाशङ्क्य पूर्वपक्षवचनव्यक्तिगतं प्रामाण्यशब्दं स्वतःप्रामाण्याभिप्रायत्वेन द्वेधा व्याचष्टे * कल्पेति * म्लेच्छाचाराणामपि केषां चिदनादित्वेन शिष्टाचारतुल्यतया स्वतःप्रामाण्ये ऽभिहिते वेदातिरिक्तविद्यास्थानानामप्यध्येतृस्मरणानादितया वेदत्वेन वेदतुल्यतया वा स्वतःप्रामाण्योपपत्तेर्न वेदमूलत्वं तद्विरोधिनां वा प्रामाण्यं युक्तमित्यनन्तराधिकरणव्युत्पादितस्वतःप्रामाण्योपजीवनेन स्मृतिविरोधाधिकरणद्वयाक्षेपादनन्तरसङ्गतिं प्रकृतसङ्गतिं च सूचयितुं सम्प्रतीत्युक्तम्। विचार्यतइति विचारार्थं पूर्वपक्षवचनव्यक्तिर्द्वैधोपन्यस्यतइत्यर्थः । ननु मन्वादिस्मृतिवदेषामपि पौरुषेयत्वेन पारतन्त्र्यावगमात्स्वतः प्रामाण्यशङ्का न युक्तेत्याशङ्क्याह * वैदिकेति * मन्वादिस्मृतीनां तिरोहितप्रायवेदार्थनिबन्धनादर्थवत्त्वं कल्पसूत्राणां तु स्पष्टवेदार्थविषयत्वात्प्रणयनानर्थक्यापत्तेरपौरुषेयत्वावगमात्स्वतः प्रामाण्यशङ्का युक्तेत्याशयः । कल्पसूत्रशब्दयोरेकार्थत्वाद् द्वयोरुपादानमनर्थकमिति मन्यमानः पृच्छति *आहेति* कार्यतस्तावद्भेदमाह *सिद्धरूप इति* अवयवव्युत्पत्त्या भेदमाह * कल्पनार्द्धीति * स्वरूपतो भेदमाह कल्पा इति * प्रतिक्रतुप्रयोगाणां प्रतिपादकतया पाठत एव सिद्धा न तु स्वसंज्ञाभिर्व्याख्यानापेक्षा इत्यर्थः । एतत्तीर्थमित्याचक्षते इत्यादिभिः स्वसंज्ञाभिर्ऋचं पादग्रहणमित्यादिभिः स्वपरिभाषाभिर्यत्सिद्धमित्यनीतसिद्धशब्दनिःकृष्टविपरिणतानुपङ्गेण योज्यम । ये यजामहे। यच्चागूर्याज्यादिरित्यायुत्सर्गवदनुयाजवर्जमित्याद्यपवादवद्भक्षयेयुरिति गाणगारितत्संस्कारत्वादित्यादिहेतुमत्सम्प्रैषवदादेशान्पशुवन्नि (पातानिति यथाध्वर्युः सम्प्रैषं दद्यात्तद्वद्धोता आदेशान् द्रव्यादेशान् कुर्यात् । छागपदेन प्रैषे छागपदे ऽनादेशाः । आज्येन चाज्यपदेन भेद उद्धृतं पार्श्वतः श्रोणित इत्यादयः शब्दाः

पश्ववयववाचिनः निपाता इत्युच्यन्ते। तान् पशुवक्रियायां पशुवद् द्रव्यान्नान्यथेत्यर्थः। यस्मिन् क्रतावग्नीषोमीयस्थाने सवनीयस्थाने वा पश्वेकादशिनी कृता तत्र शालामुखीये त्वाष्ट्रेण पशुना यजेत। तस्य पर्याग्निकरणान्तं कृत्वोत्सर्गः पूर्वमुक्तः। पर्याग्निकृत्वोत्सृजत्यपुनरायनायेति तस्य तावत्येव समाप्तिः आज्येन शेषं संस्थापयेदिति वा आज्येन समापने मन्त्रेषु छागशब्देन निगमाः कार्या इत्येकः पक्षः। आज्यस्य प्रतिनिधित्वेन स्थानिवद्भावात् द्रव्यान्तरत्वे त्वाज्यशब्देन निगमाः कार्याः इत्यन्यः पक्षः। तत्र प्रयोगमाह। यदि त्वध्वर्यव आज्येन समाप्नुयुस्तथैव होता कुर्यात्सम्प्रैष वदादेशा पशुवन्नि(१)यात्यादिदृष्टान्तवत् पुरस्ताल्लक्षणा पुरा ऽनुवाक्ये इत्यादिलक्ष्यव्यापि लक्षणं तत्सूत्रमित्यर्थः। लक्ष्यव्यापिलक्षणां यस्मिन्निति सप्तमीबहुव्रीहिः। ननु स्वसंज्ञापरिभाषादियोगे पौरुषेयत्वापत्तेः कथं स्मृतिवैलक्षण्यमित्याशङ्क्याह * तत्रेति * सकलपुरुषप्रत्यक्षवेदप्रति- १६२।१
पाद्यार्थविषयग्रन्थप्रणयनवैयर्थ्यापत्तेरपौरुषेयत्वावसायात्सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्तीत्यादिवदन्यपरसंज्ञादीनीति पूर्वपक्षी मन्यते इत्याशयः। एवं कल्पसूत्राणामपि स्मृत्यधिकरणे वेदमूलत्वं प्रतिपादितमित्यभ्युपेत्य तदाक्षेपेण प्रत्यवस्थानमुपपादितमिदानीमशब्दत्वेन तत्र पूर्वपक्षकरणात्कल्पसूत्रेषु च तदसम्भवादेषां स्मृत्यधिकरणविषयत्वाभावादिह विचारो न विरुद्ध इति परिहारान्तरमाह * अप्रामाण्यमिति *: अशक्यत्वमुपपादयति * प्रत्यक्षेति * तत्र स्मृत्यधिकरणपूर्वपक्षे ऽपगतशब्दता शब्दशून्यतोक्ता सा कल्पसूत्रेष्वशक्या वक्तुमित्यर्थः। न केवलं पूर्वपक्षासम्भवादेषां स्मृत्यधिकरणाविषयत्वं किं तु भूलभूतवेदानुमानेन तत्र सिद्धान्तकरणात् प्रत्यक्षवेदमूलेषु कल्पसूत्रेष्वनुमानायोगात् सिद्धातासम्भवेनाप्येषां स्मृत्यधिकरणविषयत्वं नास्तीत्याह * स्मृत्यधिकरणे चेति * यत्र न वैदिकं शब्दमुपलभ्यन्ते इति च सम्भवदशब्दत्वलक्षणपूर्वपक्षहेतुकानामेव तत्रोदाहृतत्वादुदाहरणभाष्यपर्यालोचनयाप्येषां स्मृत्यधिकरणाविषयत्वं प्रतीयतइत्याह * एतानि चेति * इदं तु परिहारान्तरमनुपलभ्यमाने मूलस्मृतिप्राण्यसाधने प्रत्यक्षमूलानां कल्पसूत्राणामविचारितस्यापि प्रामाण्यस्य तुल्यन्यायसिद्धत्वादन्यथा च विरोधाधिकरणे सर्ववेदनस्मृत्युदाहरणानुपपत्तेः शिष्टाकोपाधिकरणे च ऋत्वर्थस्मृत्युदाहरणानुपपत्तेरयुक्तमित्यपरितोषात्पूर्वमेव परिहारमनुसन्दधाति * न चेति * यद्यप्येषामिहाधिकरणे

१ अय २ पा० २ पु० ना०।

पूर्वपक्षे प्रामाण्यप्रतिपादनमाभाति तथापि सिद्धान्ते स्वरानियमवाक्यशेषाभावाभिधानेन वेदवैलक्षण्यप्रतिपादनात्स्वतःप्रामाण्यनिराकणप्रतीतेर्न प्रामाण्यं पूर्वपक्षे प्रतिपाद्यं येनेह तन्निराकरणात्स्मृत्यधिकरणविरोधः स्यादित्यर्थः । परमार्थतस्तु कल्पसूत्राणामपि विप्रकीर्णानेकशाखागतश्रुत्यर्थनिबन्धनेन स्मृतितुल्यत्वात्स्मृत्यधिकरणविषयत्वमस्त्येवेत्यपरितोषात्स्वमतेन सर्वेषां वेदार्तिरिक्तविद्यास्थानानां स्मृत्यधिकरणप्रतिपादितवेदमूलत्वमाक्षिप्येह समाधीयतइति परिहारमाह * यद्वेति * स्वातन्त्र्यलक्षणेनातिशयेन प्रामाण्यमतिप्रामाण्यं, ननु स्मृतीनां प्रत्यक्षवेदार्थोपनिबन्धनाभावेन वेदवैलक्षण्यात्कथं स्वतःप्रामाण्याशङ्क्यापेक्षायां पौरुषेयत्वाङ्गीकरणेन प्रामाण्याभ्युपगमे कल्पनागौरवापत्तेस्तत्परिहारायापौरुषेयत्वमेवोचितमिति सन्देहोपपादनाय पूर्वपक्षं सम्भावयति * यदीति * विषयव्याप्त्यर्थं षडङ्गस्यैतद्विचारविषयत्वमाह * यद्वेति * न्यायवशात्स्वातन्त्र्यलक्षणप्रयोगशास्त्रत्वसम्भवे वेदशब्दवाच्यत्वस्याभियुक्तप्रयोगाधीनत्वात्तदभावे वेदत्वशङ्कानुपपत्तिमाशङ्क्य * षडङ्गेऽपीत्युक्तम् * एतदेव विवृणोति * मन्त्रेति * विरोधाधिकरणस्य शाक्यादिग्रन्थविषयत्वे तदाक्षेपसमाधानार्थं तेषामप्येतदधिकरणविषयत्वं सम्भवतीत्याह * यद्वेति * ननु विरोधाधिकरणं विषयान्तरासम्भवादनङ्गीकृतमपि केन चिच्छाक्यादिग्रन्थस्य वेदमूलत्वसम्भावनामात्रेणाशङ्क्य तन्निराकरणार्थत्वेन व्याख्यातमिदं तु विषयान्तरसम्भवात्किमित्यनङ्गीकृतवेदत्व-
१६३।२ निराकरणार्थत्वेन व्याख्यायते ऽत आह * शाक्यादयो ऽपि हीति * कथं वदन्तीत्यपेक्षायामुत्पादाद्वेति शाक्यग्रन्थमुदाहरति *यथेति* उत्पादादिति प्रवाहनित्यत्वमभिप्रेतम् अनुत्पादादिति कूटस्थनित्यत्वम् । तथागता बौद्धाः । धर्मनित्यत्वस्य तत्प्रतिपादकागमनित्यत्वमन्तरेणायोगात्तन्नित्यताप्त्यनेनोक्तेत्याशयः । एतदेवोपसंहरति * ततश्चेति * वाशब्दो ऽत्राध्याहार्यः । एवमपि किमर्थं विचार्यमित्यपेक्षायामाह * चोदनेति * ननु शाक्याद्यागमस्य वेदमूलत्वे निराकृतं वेदत्वं वेदतुल्यत्वं वा दूरादेवापास्तम् । कथमत्राशङ्कत इत्याशङ्क्य रूपकद्वारेणाशङ्कामुपपादयति * काममिति * शाक्यादिचोरः स्वागमप्रामाण्यग्रामं प्रत्यक्षादिमूलत्वेन वेदमूलत्वेन वा द्वारेण प्रवेष्टुमुद्यतो ऽतीन्द्रियार्थदर्शनासामर्थ्यवेदमार्गबाह्यत्वलक्षणन्यायदण्डपाणिभिर्मीमांसकैर्वारितो वरं न प्रविशेत्सम्प्रति तु मीमांसकानुमतेनापौरुषेयत्वेन महापथेन प्रकटं प्रवेष्टुमिच्छतीत्यर्थः ।

सर्वेषामपि विचारविषयत्वं स्वाभिमतं द्योतयितुं भाष्यकारीयोदाहरणस्योपलक्षणार्थतामाह * एवमिति * पूर्वपक्षसूत्रव्याख्यानार्थं प्रयोगस्येति भाष्यं व्याचष्टे * का गतिरिति * पूर्वार्द्धेनेति चेदिति सूत्रावयवौ व्याख्यातः प्रयोगशास्त्रशब्दव्याख्यानार्थं सत्यवाचामिति भाष्यं द्वेधा व्याचष्टे * वेदत्वमिति * पौरुषेयस्य विधायकोपस्थापनमात्रचरितार्थत्वेन साक्षादनुष्ठानविधायकत्वाभावात्प्रयोगशास्त्रशब्देनापौरुषेयत्वलक्षणं स्वातन्त्र्यमुक्तमित्याशयः। भाष्यकृता कथमवगम्य तदिति पृष्ट्वा वैदिकैरेषां संवादो भवतीत्युक्तं तदपौरुषेयत्वे संवादानपेक्षत्वादयुक्तमाशङ्क्य वेदसंवादेन प्रामाण्यनिश्चयात्पौरुषेयत्वे च पुरुषतन्मूलप्रमाणवेदतान्नित्यत्वकल्पनेन गौरवापत्तेरपौरुषेयत्वेन प्रामाण्योपपादनार्थतया व्याचष्टे * वेदेनैवेति * ननु माशकादिसमाख्यया पौरुषेयावगमात्तेषां वेदत्वं वेदतुल्यत्वं वा न युक्तमित्याशङ्कते * ननु चेति* प्रवचनयोगेनापि समाख्यव्यपपत्तेर्न तद्बलेन पौरुषेयत्वसिद्धिरिति परिहरति * नैतेषामिति * वेददृष्टान्तसूचितमर्थं प्रकटयति * माशकादीति * ननु कल्पादिशब्दानां (चरणशब्दो ऽप्येतत्पुरुषवाची[1]) चरणविशेषवाचित्वाच्चरणानां चानादित्वात्तन्निमित्ततादिसमाख्या युक्ता माशकादिशब्दानां त्वेकपुरुषाभिधायित्वात्तत्समाख्यातग्रन्थनित्यत्वेन युक्तमित्याशङ्क्याह *यथैवेति * मशकादिव्यक्तीनां वेदसमाम्नानान्यथानुपपत्त्या नित्यत्वं भविष्यतीत्याशयः। वेदसमाम्नातेन मशकादिना समाख्यातस्य ग्रन्थस्य नित्यतेत्यर्थः। ननु न समाख्यामात्रेणैषां पौरुषेयत्वं ब्रूमः किं तु मशकेनेदं कृतमित्यादिदृढविच्छिन्नाध्येतृस्मरणेनेत्याशङ्क्याह * यथा चेति * मशकादीनामृषित्वप्रसिद्धेर्ऋषिगताविति धातोरिन्नित्यधिकृत्येगुपधात्किदित्यौणादिके इन्प्रत्यये कृते ऋषिशब्दव्युत्पत्तेर्गमेश्च ज्ञानार्थत्वाद् दृषिदर्शनादिति च स्मरणाद् ऋषिशब्दस्य दर्शननिमित्तत्वप्रतीतेः। करोतेश्चानेकार्थत्वाद् गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ इति स्मृतिपर्यालोचनया वा प्रकथनार्थत्वाद्दर्शनाभिप्रायं कथनाभिप्रायं वा मशकादिकर्तृस्मरणमित्याशयः। एतदेव विवृणोति * तथा हीति * प्रयोक्तृग्रहणं दर्शनमप्युपलक्षयति। नित्यविधिविषयत्वान्यथानुपपत्त्यापि कल्पसूत्राणां नित्यत्वमित्याह * ब्रह्मयज्ञेति *पुराणेतिहासानामप्येतेनैव सामान्येनापौरुषेयत्वाभ्युपगमान्न तैरनैकान्तिकत्वाशङ्क्येत्याशयः। पुरुषकृतानामित्यनेनार्थशब्दो नित्याभिप्रायो व्यतिरेकमुखेन व्याख्यातः। १६४।५

१ अत्र पा० २ पु० ना०।

ऋषिणा दृष्टं प्रोक्तं वेत्यस्मिन्नर्थे तद्धितोपपत्तेरसतश्च दर्शनप्रवचनायोगात्कालानवच्छेदेन सर्वदा सत्त्वप्रतीतेरार्षशब्दस्य नित्यपर्यायत्वसिद्धिः। नन्वर्थवादाद्यभावाद्वेदमुद्रारहितत्वेनैषामवेदत्वं प्रतीयतइत्याशङ्क्याह * अरुणेति * प्रत्युत वेदतुल्यतैवावसीयतइति दर्शयितुम् * सर्वयाज्ञिकश्चेत्याद्युक्तम् * आर्षत्वप्रसिद्ध्यापि तुल्यकल्पत्वं प्रतीयतइत्याह * आर्षमिति * न केवलं न्यायमात्रेण तुल्यकल्पत्वं प्रतीयेत किं तु सूत्रकारवचनादपीत्याह * लाटेति * सूत्रकाराऽप्यामपि ब्राह्मणविहितादप्यार्षकल्पाविहितगरीयस्त्वमङ्गीकृत्य तत्प्रत्यक्षविहितां त्वितीदमुक्तमित्यन्वयः।को ऽत्रार्षः कल्पो विवक्षित इत्याकाङ्क्षायाम् * माशकमपेक्ष्येत्युक्तम् * ननु ब्राह्मणस्यापि स्वतःप्रामाण्यात्कथं तस्मात्कल्पगरीयस्त्वमित्याशङ्क्य दृढकल्पप्रामाण्यापेक्षयेत्युक्तम् । कल्पप्रामाण्यं निश्चितमभिप्रेत्यातिशयमात्रं गरीयस्त्वाभिधानमित्याशयः । कात्यायनेनापि कल्पगरीयस्त्वमङ्गीकृतमित्याह * कात्यायनेन चेति * यज्ञविषयाणां ब्राह्मणगतानां स्तोत्रसाधनसामविशेषापेक्षिणां सामविशेषलक्षणार्थं वाक्यशेषे कर्त्तव्ये यथा माशकं मया लक्षणं करिष्यतइति कात्यायनवचनस्यार्थः।न केवलं प्रतिज्ञामात्रं किं तु कृतमपि तथैवेत्याह * तथा चेति * गवामयनिकस्य प्रथमस्याहः प्रायणीयसंज्ञकस्याग्निष्टोमस्तोत्रसाधनसामविशेषापेक्षायां यद्ब्राह्मणेनाग्निष्टोमसाधनत्वेन जरा बोधीयं विहितम् । तत्कात्यायनेनाभेवपवमानाख्यस्तोत्रान्तरसाधनेषु सप्तसु सामसु लक्ष्यमाणेषु तदीयात्प्रथमाद्गायत्राख्यात्साम्नस्तृतीयत्वेन लक्षितं जरासादिति सूत्रेणेत्यर्थः । कथमनेन सूत्रेण जराबोधीयमार्भवीयगायत्रतृतीयत्वेन लक्षितमित्यपेक्षायामाह * आर्भवीयेति* माध्यन्दिनपवमाने ऽपि गायत्रसद्भावात्तद्व्यावृत्त्यर्थमार्भवीयविशेषणं प्रकृतार्भवपवमाने संहितस्य गायत्रानन्तरत्वात्तस्यैव सर्वत्र समिति संज्ञा माभूदिति गायत्रेणोपलक्षणं यत्रार्भवपवमाने गायत्रानन्तरं साम तत्र तस्य समिति संज्ञेत्यर्थः। परशब्देन सादिति पञ्चमी परयोगेन व्याख्याता कथं जराशब्दस्य जराबोधीयवाचितेत्यपेक्षायां पदैकदेशइत्युक्तम् । न केवलमन्यत्र विनियोगाद् ब्राह्मणानादरः किं त्व-
१६५।२ ग्निष्टोमसामत्वेनाविनियोगादपीत्याह * ढेशब्देन चेति * अग्निष्टोमसाम्नो ढेयज्ञायज्ञीयमितिसूत्रेण प्रायणीयाग्निष्टोमसामत्वेन यज्ञायज्ञीयमेव नियतमित्यर्थः । नन्वार्भवीयगायत्रतृतीयत्वेन पञ्चविंशदूब्राह्मणे सामन्तराविधानान्न जराबोधीयस्य तत्र विनियोगे ब्राह्मणविरोधः नाप्यग्निष्टोमसामत्वेन यज्ञायज्ञीयनियमे ब्राह्मणे ना-

प्यथो खल्वाहुर्यज्ञायज्ञीयमेवाग्निष्टोमसामकार्यामिति तस्य नियतत्वादित्याशङ्क्याह * यदि चेति * यज्ञायज्ञीयनियमे जरावोधीयविध्यानर्थक्यापत्तेरेवकारस्य च यदेव प्रकृतौ तदेवात्रापीत्येवं परत्वेनोपपत्तेर्विकल्पपरमेव ब्राह्मणमित्याशयः। एवं तर्हि कात्यायनवचनं प्रत्यक्षविरोधाद्ग्राह्यं स्यादित्याशङ्क्याह * वह्निति * यद्यपि कात्यायनसूत्रं पौरुषेयं तथापि तस्य वेदोत्थापिनां न्यायानामध्येयं सम्यङ्न्यायो ऽयं न्यायाभास इति विवेककुशलत्वान्नाकुशलैर्मिथ्यावादित्वमध्यवसातुं शक्यमित्यर्थः। परमार्थतस्त्वस्मिन्पूर्वपक्षे सर्वेषामपौरुषेयत्वान्न कस्य चिद् बाध इत्येतावानाशयः। करोतिप्रणयत्यादिप्रयोगास्तु प्रवचनाभिप्रायेण दर्शनाभिप्रायेण वा व्याख्येया इत्युक्तमेव। श्रुतिबलादप्येवं वेदतुल्यत्वमवसीयत इति प्रतिपादनार्थमाचार्यवचनइतिभाष्यं व्याचष्टे * आचार्यवचनानां चेति * ननु प्रामाण्यस्य स्वतस्त्वात्तत्प्रतिपादनपरा श्रुतिरनर्थिका स्यादित्याशङ्क्य स्वतःसिद्धस्यापि प्रामाण्यस्यापवादशङ्कानिरासाय प्रमाणान्तरापेक्षायां तादर्थ्येन प्रामाण्यश्रुतिसाफल्यप्रतिपादनार्थं प्रत्यक्षत इत्यादि भाष्यं व्याचष्टे * यथा चेति * श्लोकाभिप्रायं विवृणोति * यान्यपीति * अनाप्तवाक्येष्वपि सम्वादेनापवादाशङ्का निवर्त्तते किमुतापौरुषेयेष्वित्याशयः। एतदेवोपसंहरति * सत्यवाचां चेति * तुल्यकल्पत्वएवोपपत्त्यन्तरप्रतिपादनार्थं वेदवाक्यैश्चेति भाष्यं व्याचष्टे * अपि चेति * तुल्यत्वोपपादनार्थंवातिशयोक्तिः। याज्ञिककर्तृकादरार्थतया व्याख्याय ब्रह्मयज्ञविधिकृतादरार्थतयैतदेव व्याचष्टे *तुल्यं चेति* सम्प्रदायो ऽध्ययनं तद्विधायकं य एवं विद्वान्स्वाध्यायमधीतइति ब्रह्मयज्ञविधिवाक्यं तद्वेदवाक्यैः सह कल्पसूत्राणां तुल्यमित्यर्थः। अध्येतृकर्तृको वादरो ऽनेन भाष्येणोक्त इति तृतीयं व्याख्यानमाह * अथ वेति * यत्नतुल्यत्वमेव दर्शयति * अनुयोगेष्विति * वेदकौशलजिज्ञासार्थं तत्तद्वेदभागचिह्नलेख्यानि घटिकायां कुम्भाध्यायां निरीक्ष्य तत्तद्वेदभागपरीक्षाकाले तान्याकृष्याकृष्टलेख्यचिह्नितं वेदं पठत्यध्येतारो न युञ्जतइति घटिकामार्गवर्त्तिनो ऽनुयोगाः; तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * एतमेव न्यायं विद्यास्थानान्तरेष्वतिदिशति * एतेनेति * स्मृतीनां च धर्मशास्त्रव्यपदेशादपि स्वातन्त्र्यलक्षणा प्रयोगशास्त्रतावसीयतइत्याह * धर्मेति * तुल्यवच्च विद्यास्थानत्वव्यपदेशात्सर्वेषां तुल्यतेत्याह * अपि चेति * वैदिकमन्त्रप्रकाश्यप्रकाशकत्वादप्येषां वेदत्वमवसीयतइत्याह * किं चेति * नन्ववेदत्वे ऽपि १६६।१

स्मृतीनां वेदमूलत्वेन तत्प्रतिपाद्यानामष्टकादीनां वैदिकत्वाद्वैदिकमत्र प्रकाश्यं च युक्तमित्याशङ्क्याह * एवं चेति * कल्पनागौरवापत्तेर्वेदमूलकत्वकल्पनातो वेदत्वकल्पनैव ज्यायसीत्यर्थः । ननु नित्यत्वपक्षे तस्य चाप्रामाण्यस्य च कल्प्यत्वाद्वेदत्वपक्षे च तस्यापि तृतीयस्य कल्प्यत्वाद्गौरवं स्यादित्याशङ्क्याह * सिद्धानामिति * नित्यत्वे सति निर्दोषत्वेनैव प्रामाण्यसिद्धेर्नित्यतैवैका साध्या सा चाध्यस्मरणेनैव सुसाधा वेदता च वेदार्थविषयत्वात्प्रकल्प्यतइत्यर्थः। एतदेवोपसंहरति * तस्मादिति * किं तु यान्येवेत्युत्तरश्लोको योज्यः । वेदमूलत्वे च तत्समर्पणक्लेशाधिक्यापत्तेरेषामेव वेदत्वं
१६७॥ युक्तमित्याह * मन्वादिभिरिति * मूलसमर्पणक्लेशाङ्गीकरणेऽप्येषां प्रति कञ्चुकत्वादग्राह्यत्वं स्यादित्याह * के हीति * प्रतिकञ्चुकानामग्राह्यत्वं दृष्टान्तेनोपपादयति * यथा चेति * ननु वेदमूलत्वेऽपि सम्प्रदायविनाशभयेनासमर्पणीयत्वान्न क्लेशापत्तिर्नाप्यग्राह्यत्वापत्तिरित्याशङ्क्याह * सम्प्रदायेति * एतदेव विवृणोति * वेदेति * अवेदत्वे च तद्विज्ञातस्यार्थस्य श्रेयःसाधनत्वाभावापत्तेः शास्त्रप्रणयनवैयर्थ्यं स्यादित्याशङ्क्याह * वेदादेव चेति * नन्वस्तु तर्हि वेदवाक्यानामेव विप्रकीर्णानामेकत्र सन्निवेशस्य मन्वादिभिः कृतत्वात्पौरुषेयतेत्याशङ्क्याह * न चेति * एतदेव विवृणोति * ईदृगिति * ननु मूलान्तराणामेकत्र कल्पना रचना युज्यते सम्प्रदायविनाशापत्तेरिति योज्यम् । उपसंहरति ननु पौरुषेयत्वेऽपि वेदमूलत्वेन धर्मप्रामाण्योपपत्तेः कथं तदभ्युपगमे नित्यत्वापत्तिरित्याशङ्क्याह * चोदनेति * इष्टसाधनत्वमात्रेण धर्मत्वे कृष्यादेरपि धर्मत्वापत्तेर्विध्यनुष्ठापितत्वेन धर्मत्वाद्विधेश्च पौरुषेयेषु पुरुषाभिप्रायप्रतिपादकत्वेनासम्भवाद्धर्मप्रामाण्यासम्भव इत्याशयः । स एव ब्राह्मणस्याप्यवेदत्वे चोदनात्वाभावे ऽर्थवादरूपस्य विध्येकवाक्यत्वाभावे धर्मप्रामाण्यं नास्तीति वदता विवृतः । एतदेवोपसंहरति * तेनेति * ननु मूलभूतचोदनाकल्पनैनेषां धर्मप्रामाण्यं भविष्यत्यत आह * वदन्तीति * चोदनाकल्पने तन्मात्रेणोपक्षीणानां धर्मप्रतिपत्तावव्यापारादप्रामाण्यापत्तिरित्याशयः । यावदुक्तं शब्देन विषयीकृतं तावत्येव शब्दः प्रमाणं येषां तैरित्यस्मिन्नर्थे ऽव्ययीभावगर्भो बहुव्रीहिः । ननूक्तार्थान्यथानुपपत्त्यानुक्तकल्पनमपि युक्तमेवेत्याशङ्क्याह * उक्तमिति * उक्तं धर्मरूपमर्थमादौ परित्यज्यानुक्तं वेदवाक्यं तावत्प्रतीयते कल्प्यते अनुक्तेन च वेदवाक्येन सपूर्वपरित्यक्तो ऽर्थो ऽपि पश्चात्प्र-

तीयतइति यत्कल्पनं तत्कथानुपपत्त्येत्यर्थः। विद्यास्थानान्तरेषु पूर्वपक्षमुक्तमर्थमुपसंहरति * तस्मादिति * शाक्यादिग्रन्थानां वा नित्यत्वमनेन सूत्रेणोच्यतइत्याह * शाक्यादीति * शाक्यादिग्रन्थनित्यत्वे को न्याय इत्यपेक्षायामाह * येनैवेति * नन्वेवं सत्याप्तत्वलक्षणगुणाभावात्कथं प्रामाण्यसिद्धिरित्याशङ्क्य स्वतस्त्वाङ्गीकरणेन परिहरति * बोधकत्वादिति * कथमकृतकमित्यपेक्षायाङ्कर्तृ * स्मरणवर्जनादित्युक्तम् * ननु सामाख्यानिकं कर्तृस्मरणमस्तीत्याशङ्क्याह * बुद्धेति * यथाक्रमं दृष्टान्तद्वयम्मनुपलब्धिविरोधादिदूषणमपि वेदवत्परिहर्त्तव्यमित्याह * यावदेवेति * उपसंहरति * तेनेति * नासन्निधमादिति सिद्धान्तसूत्रं स्वयं तावद्व्याचष्टे * एवमिति * यदेतत्सर्वेषामविशेषेण नित्यत्वं वेदत्वं स्वतःप्रमाणत्वं ततकारणं च कर्तृस्मरणवर्जनाद्युक्तं न तस्य किं चिन्नित्यं निबन्धनं नियतं कारणमागमो न्यायो वास्तीत्यर्थः। अनेन चासन्निधमादिति हेतुर्निबन्धनाभावादित्येवं व्याख्यातः। सर्वेसाम्योक्तेरसन्निबन्धनत्वमेवोपपादयितुं चतुर्द्धा वैलक्षण्यमाह * इहेति * वेदतदङ्गधर्मशास्त्रशाक्यादिग्रन्थरूपेषु तुल्यत्वेनोपन्यस्तेषु अर्थेषु मध्ये वेदेषु या वेदत्वनित्यता बुद्धिः सा वेदस्वरूपदर्शनादेव जायते बाधकाभावाच्च पारमार्थिकी तदङ्गेषु तु कल्पसूत्रेषु शिक्षादिषु च वैदिकग्रहेष्टकाद्यर्थप्रबन्धान् षडङ्गमक इतिस्मृतेश्च वेदत्वनित्यत्वबुद्धिर्जायमाना दृढकर्तृस्मरणान्मन्त्रब्राह्मणयोर्वेद इति नामधेयमिति बहुमतिविरोधाच्च भ्रान्तिर्द्धर्मशास्त्रेषु वैदिकग्रहाद्यर्थनिबन्धलिङ्गाभावाद्वेदत्वास्मरणाच्च वेदत्वनित्यत्वबुद्धिरजायतैव शाक्यादिग्रन्थेषु त्वतीन्द्रियार्थनिबन्धनेन स्थितेवेयं धर्मनित्यतेत्यादिपर्यालोचनया च वेदत्वनित्यत्वबुद्धिर्जातापि स्वसिद्धान्तविरोधाद् दुष्यतीत्यर्थः। ननु शाक्यादिग्रन्थेषु स्वसिद्धान्तविरोधात्कथं वेदत्वानित्यत्वबुद्धिर्जायते इत्याशङ्क्याह * परेणेति * उक्तिप्रत्युक्तिरूपं वाक्योवाक्यम्। प्रतिभाने किं कारणमित्यपेक्षायां परवाक्येभ्यो ऽवगतानां नित्यत्वोपपत्तीनां स्वागमेष्वारोपः। प्रतिभानकारणत्वेनोक्तः। ननु स्वसिद्धान्तज्ञाने परोक्तोपपत्त्यां ऽरोपो न सम्भवतीत्याशङ्क्याह * छायामिति * स्वागमप्रामाण्यप्रतिज्ञाहान्या पराजयान् मुखच्छायां नश्यन्तीं रक्षयितुमित्यर्थः। यद्यप्यात्मीयं सिद्धान्तं जानन्तीत्यध्याहृत्य तथापिशब्दो योज्यः। एतदेवोदाहरणनिष्ठमाह * यथेति * ननु वेदमूलत्वेनापि स्वागमप्रामाण्यसिद्धेर्नित्यत्वाभिधानमनर्थकमित्याशङ्क्याह * प्रद्वेषादिति * ननु स्वानङ्गीकृतनित्यत्वाभिधानादसत्यवादित्वं स्या- १६९।१

दित्याशङ्क्याह * तन्मात्रे ऽपि चेति * नित्यत्वाभिधानाद[1]सत्यवादित्वाभावे ऽपि स्वागमप्रामाण्याभिधानविषये सत्यवादिता सेत्स्यतीत्यर्थः । नन्विहिंसादेर्वेदमूलस्याभिधानात्कथं तेषां वेदमूलत्वे प्रद्वेष इत्याशङ्क्याह * भूयसामिति * शाक्यैरप्यहिंसादि वेदवत् स्वातन्त्र्येणैव विधीयते न वेदादुपलभ्येत्यर्थः । नित्यत्वप्रतिपादने किं तेषां प्रयोजनमित्यपेक्षायामाह * ततश्चेति * वेदनित्यत्ववागाभाभासैर्विमोह्यते विभ्राम्यते विप्रतीयीक्रियते निवार्यतइत्यर्थः । ननु तैर्नित्यत्वस्याप्तत्वलक्षणवाक्यप्रामाण्यकारणगुणाभावापादकत्वेन वेदप्रामाण्यबाधकत्वादभ्युपगन्तव्यं वेदत्वाभिधानेन नित्यत्वाभिधानेन वा स्वागमाप्रामाण्यं विमोह्यतइत्याशङ्क्याह * यादृशेति * यादृशं परैरुक्तं तादृशमविचार्यैव ये मन्यन्ते यादृशतादृशा अनिपुणाः । तैरप्यतीन्द्रियविषये पुरुषवचनप्रामाण्यस्य निराकर्त्तुं शक्यत्वान्निरुत्तरीकृताः परवाक्यान्यनुकुर्वन्तः स्वागमनित्यत्वमाहुरित्यन्वयः । ननु चक्षुरादीनामतीन्द्रियार्थग्रहणासामर्थ्ये ऽपि भावनादेरतीन्द्रियार्थग्रहणसामर्थ्यस्य तैरुपपादितत्वाकथं निरुत्तरत्वमित्याशङ्क्य * बालेत्याद्युक्तम् * अनेन चोपपत्तिवाक्येन स्वागमप्रामाण्यं साधयामो ऽनेन वेति यद्यपि हृदयं व्याकुलयन्ति तथापि प्रक्षीणकुहेतुवचनजालत्वेन तद्वाक्यानां बालानुकरणवाक्यसदृशत्वान्न स्वपक्षसाधनक्षमतास्तीत्यर्थः । ननु नित्यत्वे ऽपि वाक्यप्रामाण्यकारणाप्तलक्षणगुणाभावात्प्रामाण्यानुपपत्तेः परवाक्यानुकरणमनर्थकमित्याशङ्क्य * अपौरुषेयत्वेत्युक्तम् * मीमांसकोपपादितस्वतःप्रामाण्यनिराकरणाशक्तेरित्याशयः।परवाक्यानुकरणे मूर्खवरस्य गोत्रप्रश्नविषयमुत्तरं दृष्टान्तः । कीदृशमुत्तरमित्यपेक्षायाम् * यदेवेत्युदाहरणम् * ननु शाक्यादीनामागमनित्यत्वोक्तावपसिद्धान्तापत्तिः स्यादित्याशङ्क्याह *अस्मदीयमिति* आगमनित्यत्वप्रतिपादकं यद्भवतां वाक्यं तदस्मदीयमिति मीमांसकैरुदिताः शाक्यादयो ऽस्माकमेवैतद्वाक्यं मीमांसकैः श्रुत्वा हतमिति जल्पन्तीत्यर्थः । कथमेवं ते मिथ्यावदन्तीत्याशक्याह * त्यक्तलज्जमिति * क्रियाविशेषणत्वान्नपुंसकनिर्देशः एवं शाक्यादिग्रन्थेषु वेदत्वनित्यत्वबुद्धेर्जन्मोपपाद्य दूषणमाह * तत्रेति * कथं क्षणिकवादित्वप्रसिद्धिस्तेषामित्याशङ्क्याह *धर्म इति* केन ग्रन्थेनायं धर्मः शाक्येनोपदिष्ट इत्यपेक्षायां तदीयं ग्रन्थं पठति * क्षणिका इति * सर्वेषां संस्काराणां संस्कृतानां कृतकानां क्ष-

१७०।१

[1] अभिधानाभ्र० २ पु० पा०

णिकत्वेनास्थिरत्वाक्रियाकालं यावत् स्थायित्वाभावान्न क्रियाव्यापारः कुतः सम्भवतीति क्रियापदार्थे निषेधता शाक्येन सर्वस्य संस्कृतस्य कृतकस्यानित्यत्वलक्षणो धर्मोऽभिहित इत्यर्थः। नन्वकृतकानां प्रतिसंख्यानिरोधव्योम्नां शाक्यैर्नित्यत्वाभ्युपगमात्तन्न्यायेनागमस्यापि नित्यत्वं तेषामभिमतं भविष्यतीत्याशङ्क्याह * बुद्धीति * मुद्गरप्रहाराद्युत्तरकालीनस्य घटाद्यभावस्य प्रतिसंख्यानिरोधाख्यस्य व्योम्नश्चावरणाभावरूपस्यावस्तुत्वात्कृतकत्वादिधर्मयोगासम्भवेऽप्यागमस्य वस्तुत्वात्कृतकत्वं क्षणिकत्वं च शाक्यानामभिमतमेवेत्याशयः। वस्तुत्वं चार्थक्रियाकारित्वलक्षणं बुद्धेर्ग्राहकशक्तियोगाद् बोध्यस्य च ग्राह्यशक्तियोगान्नेतरस्येति दर्शयितुम * बुद्धिबोध्यत्वमित्युक्तम् * विशेषतश्च पदाद्यनित्यत्वाभिधानादागमनित्यत्वं शाक्यानामनभिमतमिति ज्ञायतइति तदीयग्रन्थोपन्यासेनैव दर्शयति * तथेति * शब्देनाभिव्यक्तिर्युज्यते सा हीन्द्रियसंस्काराद्वा स्याद्विषयसंस्काराद्वा द्वेधापि दोषोऽस्ति। कथमित्यपेक्षायां बुद्धेर्नियमादित्युक्तं कश्चिदेव शब्दः केन चिदेव युज्यते इति द्विविधो बुद्धिनियमो दृश्यते स चेन्द्रियसंस्कारपक्षे गोशब्दाभिव्यक्त्यर्थं संस्कृतेन श्रोत्रेण सर्वगतत्वेन तत्समानदेशस्याप्युपलम्भापत्तिर्विषयसंस्कारपक्षे स्रुघ्नसंस्कृतस्य शब्दस्य पाटलिपुत्रेऽप्युपलम्भापत्तेर्न युज्यते इति शाक्यग्रन्थार्थः। ननु पदाद्यनित्यत्वेऽप्यागमनित्यत्वमवध्यस्मरणादिना सेत्स्यतीत्याशङ्क्याह * यस्तन्त्रेति * पदसङ्घातात्मकस्यागमस्य पदाश्रितत्वात्तदनित्यत्वे नित्यत्वं न युज्यतइत्याशयः। आगमनित्यत्वसिद्ध्यर्थं चोपकल्पिते पदादिनित्यत्वे शाक्यैर्निराकृतमागमनित्यत्वमिति रूपकद्वारेणाह * यावदिति * आगमनित्यत्ववेश्मार्थं यावत्पदनित्यत्वादिदारूपकल्पितं तस्मिन्निच्छाक्योक्तैर्हेत्वाभासाग्निर्निर्दग्धे तदागमनित्यत्वरूपं वेश्म दुष्करमित्यर्थः। ननु कूटस्थनित्यत्वासम्भवेऽपि व्यवहारनित्यत्वं प्रवाहनित्यत्वापरपर्यायं भविष्यतीत्याशङ्क्याह * व्यवहारेति * अर्थप्रतिपादनलक्षणक्रियानित्यत्वमिह व्यवहारनित्यत्वं वाच्यम्। न चाश्रयनित्यत्वं विना तदाश्रितक्रियानित्यत्वं युक्तमित्यर्थः। नन्वाश्रयस्य पदादेः कूटस्थनित्यत्वाभावेऽपि प्रवाहनित्यत्वात्तदाश्रितक्रियानित्यत्वं भविष्यतीत्याशङ्क्याह * न चेति * पदावयवभूतानां वर्णानामपि क्षणिकत्वाभ्युपगमाच्च पदार्थनित्यत्वस्यापि जातितो व्यक्तितो वाऽनुपपत्तेर्न पदादेः प्रवाहनित्यतापि शाक्यपक्षे सम्भवतीत्याशयः अतः स्थितैवैषां धर्मनित्यतेति वचनाच्छाक्यागमे वेदत्वनि-

स्यत्वबुद्धिर्जातापि सर्वक्षणिकसिद्धान्तविरोधाद् दुष्यतीत्युपसंहर-
१७१।१ ति * स्थितैवेति * किं च क्षणिकत्वे पूर्वोपलब्धाया धर्मताया नि-
र्देशकाले विनष्टत्वादेषेति सर्वनामनिर्देश एव तावन्न युक्तः चिरावि-
नष्टत्वाद्धैषेत्यस्य तदेकवाक्यतात्यन्तमयुक्तेत्याह * एषेति * अत्रैव
सूत्रं योजयति * तेनेति * असत्त्वस्य क्षणिकत्वस्य सर्वपदार्थेषु
विशेषतश्च पदादिषु नियमान्निबद्धत्वादभ्युपगतत्वादागमानित्यत्वा-
नुपपत्तिं प्रतिपाद्यमालोच्य प्रागसतश्च कृत्रिमस्यातीन्द्रिये ऽर्थे स्वात-
न्त्र्यलक्षणं प्रयोगशास्त्रत्वाभावं प्रतिपाद्यमालोच्यैतत्सूत्रमित्यर्थः ।
असाधुशब्दाभिप्रायो वायमसच्छब्दो व्याख्येय इत्याह * असाध्वि-
ति * पूर्वार्द्धं व्याचष्टे * मागधेति * मागधभाषागता असाधवः
शब्दा मागधाः दाक्षिणात्यभाषागता दाक्षिणात्याः । तदुभयापभ्रं-
शप्रायाश्चासाधवो ये शब्दास्तैर्निबन्धनं येषामागमानामिति विग्रहः
मागधदाक्षिणात्या एव तावदसाधवः शब्दाः तदपभ्रंशास्त्वसाधुतरा
इत्याशयः।ममापि भिक्षवः कर्म वर्त्ततएवाशरीरपातादित्याद्यागमार्थः
उत्क्षिप्ते लोष्ठे उत्क्षेपे प्रति कारणं पतने नास्ति कारणमस्त्युद्भवे
च कारणम् इमे च संस्कृता धर्माः सम्भवन्ति सकारणा अ-
कारणा विनश्यन्ति । उत्पत्तिमनुकारणमपेक्षन्तइत्याद्यागमान्त-
रार्थः उत्तरार्द्धं व्याचष्टे * ततश्चेति * नन्ववध्यस्मरणं ऽप्यसाधुश-
ब्दभूयिष्ठत्वादिना शाक्याद्यागमानां कृतकत्वापादनं वेदस्यापि पद-
सङ्घातात्मकत्वादिहेतुना कृतकत्वमापद्येतेत्याशङ्क्यं निराकुर्वन्निहैका
परमार्थेनेतिश्लोकस्य पूर्वार्द्धं व्याचष्टे*वेदेषु हीति * आदिमात्रदर्श-
नाद्भेदे पौरुषेयत्वभ्रान्तिर्निवर्त्ततेकिमुत समस्तवेददर्शनादित्याह*आ-
दिमात्रमिति*कथमित्यपेक्षिते पौरुषेयत्वे ऽप्यवैलक्षण्यं दर्शयितुं पौरु-
षेयग्रन्थानां तावत्प्रमाणान्तरानुसारिपदवाक्यनिषिद्धत्वमाह*इष्टार्थे-
१७२।२ ष्विति * वेदानां तद्वैलक्षण्यात्पौरुषेयत्वासम्भवं दर्शयन्नृग्वेदस्य तावद-
लौकिकप्रायनियतस्वरकपदनिबद्धत्वात्पौरुषेयत्वासम्भवमाह *प्र-
पाठकेति * आदिमात्रदर्शनेनाप्यृग्वेदस्यापौरुषेयत्वनिश्चीयतइत्याह
* अग्निमिति * कथमस्य पौरुषेयत्वं न सम्भवतीत्याशङ्क्याह *
किमालोच्येति * यजुर्वेदस्याप्यादिमात्रदर्शनेनापौरुषेयत्वं निश्चीय-
तइत्याह * इषे त्वेति * प्रसङ्गादेतमन्त्रविनियोजकस्य ब्राह्मणस्या-
पि विनियोगरूपदर्शनादेवापौरुषेयत्वं निश्चीयतइत्याह * शाखे-
ति * द्वितीयमन्त्रविनियोजकस्याप्यपौरुषेयत्वनिश्चयमाह * एव-
मिति * ऊर्जयित्यमितिवक्तव्ये श्लोकाक्षरातिरेकापत्तिभीत्या ज्ञा-
तारः सन्ति मेत्युक्त्वेति मानवीयश्लोकवदिकारो न युक्तः । तृती-

यमन्त्रविनियोजकस्याप्याह * वायवस्थेति * एकशो विनियोगे
कानुपपत्तिरित्याशङ्क्याह * वायुशब्देनेति । सामवेदस्याप्यादिमा-
त्रश्रवणेनापौरुषेयत्वनिश्चय इत्याह * सामवेद इति * कथं पौरुषे १७३।२
यत्वे निराभिप्रायत्वापत्तिरित्याशङ्क्याह * को नामेति * अर्थाभि-
धानपराणामृगक्षराणामित्यनादरे षष्ठ्यौ । अनवगतपूर्वं विकुर्या-
दिति क्रियाविशेषणम् । अक्षरान्तरेष्वपि विकारः पौरुषेयत्वेन
युज्यतइत्याह * तथेति * वेदे पुरुषप्रदर्शनमात्रेणापौरुषेयत्वनिश्चय-
मुपसंहरति * तेनेति * ननु लौकिकवाक्ये विलक्षणरूपदर्शनाद्वे-
दस्यापौरुषेयत्वे सूर्य एकाकी चरतीत्यादीनां तत्सादृश्यात्पौरुषेय-
त्वापत्तिरित्याशङ्क्य तत्रापि स्वरादिनियमाद्विलक्षण्यमाह * किं चि-
दिति * अतो निरपवादसिद्धं वेदस्य रूपदर्शनेनापौरुषेयत्वमित्युप-
संहरति * एवं चेति * ननु रूपदर्शनमात्रेणापौरुषेयत्वनिश्चये
मीमांसकानां न्यायप्रतिपादनक्लेशो ऽनर्थकः स्यादित्याशङ्क्याह
तावता त्विति सानुभवरूपा दृढा प्रतीतिरनवच्छिन्नप्रतीतिप्रवाह-
वाचकत्वाद्भावनेत्युच्यते । इतिकरणो हेतौ । बाह्यतार्किकपरामर्शी तच्छब्दः । शाक्यादिग्रन्थेषु रूपदर्शनमात्रेण पौरुषेयत्वनिश्चयो
भवतीति व्यतिरेकमाह * शाक्यादीति * प्रज्ञप्तिविज्ञप्तिशब्दयो-
र्जानातेर्णिजन्तत्वाभावे युगागमस्यासाधुत्वं णिजन्तत्वे तु ण्यास-
श्रन्थो युजिति विशेषविहितेन युच्प्रत्ययेन स्त्रियां क्तिन्निति सामा-
न्यविहितस्य क्तिन्प्रत्ययस्य बाधादसाधुत्वम् शिति प्रत्यये परभूते दृशेः
पश्यादेशविधानात्पश्यनाशब्दस्यासाधुत्वम्। ननु भिक्षुशब्दगतस्य क्ष-
कारस्य प्राकृतव्याकरणे स्तुरवकारं इति खकारादेशविधानात्तस्य
च शेषादेशयोर्द्वित्वमनादाविति द्वित्वविधानात्कथमत्र दृष्टतरत्वमि-
त्याशङ्क्याह * द्वितीयेति * इदुदृभ्यां शसोणो इति स्मरणाद्भिक्षूनि-
त्यस्य स्थाने भिक्षुणो इति प्राप्ते रेकान्तत्वायोगाद्भिक्षणं भिक्षुशब्दाद्
द्वितीयाबहुवचनस्य शसोण इति णेकारादेशविधानाद्भक्ष इति भिक्ष-
इति घञन्तं भिक्षशब्दं व्युत्पाद्य भिंक्षुं वाति गच्छति प्राप्नोतीत्य-
स्मिन्नर्थे वा गतिगन्धनयोरित्यस्माद्धातोरातोनुपसर्गे क इति कप्र-
त्ययोत्पादनेनाकारान्तभिक्षुशब्दमभ्युपेत्यैकारान्तम् * दृष्टमित्यु-
क्तम् * आदिशब्दोक्तं शब्दान्तरापभ्रष्टतरत्वं दर्शयति * संस्कृते-
ति * स्वयमेव च शाक्येनात्र डकारापत्तिर्निषिद्धेत्याह *सो ऽय- १७४।२
मिति * नासन्नियमादिति सूत्रस्यासाधुशब्दनिबन्धनाभिप्रायं व्या-
ख्यानमुपसंहरति * इतीति * व्याकरणानुगतशब्दनियमाभावा-

१ खकार० २ पु० पा०।

दिति तृतीयं व्याख्यानं कर्तुमर्थं तावदाह * यावांश्चेति * उक्ते ऽर्थे सूत्रं व्याचष्टे * असन्नियमादिति चेति * प्रागविद्यमानस्य ग्रन्थस्य निबन्धनादिति चतुर्थं व्याख्यानमाह * क्षणिकत्वेति * स्वसिद्धान्तप्रसिद्धसर्वक्षणिकत्वनिराकृतेन स्थिते चेयं धर्मनित्यतेत्युक्तेन धर्मप्रतिपादकागमनित्यत्वेन सिद्धमनित्यत्वं यस्य ग्रन्थस्य स तथोक्तः अत एव निबन्धनात्प्रागत्यन्ताविद्यमानस्य निबन्धनाभ्युपगमादित्यभिप्रायेणेति योज्यम् । अविद्यमानानां क्षणभङ्गादीनां निबन्धनादिति पञ्चमं व्याख्यानमाह * असतो वेति * असाधुभिर्हेतुभिर्निबन्धनादिति षष्ठं व्याख्यानमाह * असद्भिश्चेति * ननु क्षणभङ्गादीनामविद्यमानानां हेत्वाभासैर्निबन्धने ऽपि धर्माधर्मनिबन्धनानां कथमप्रामाण्यमित्याशङ्क्याह * तदेककर्तृकेति * एवं तावदसाधारणैर्हेतुभिः शाक्याद्यागमानां पौरुषेयत्वमुपपादितमिदानीं वेदातिरिक्तविद्यास्थानसाधारणेन कर्तृस्मृतिदार्ढ्येनापपादयति * कर्त्रिति । अनेनैव हेतुना वेदातिरिक्तविद्यास्थानानामपि सर्वेषां पौरुषेयत्वमित्याह * एवमिति * अनेन चापौरुषेयत्वहेतोः कर्तृस्मरणस्य धर्मशास्त्रेष्वभावाद्वेदत्वबुद्धिर्न जायतइत्यभिधानादजातापि त्वन्येति श्लोकावयवो व्याख्यातः । ननु कल्पसूत्रेष्वितरेषु च वेदाङ्गेषु च वैदिकार्थप्रबन्धात्षडङ्गमेक इति च स्मृतेर्वेदत्वबुद्धिर्जाता केन हेतुना बाध्यते इत्याशङ्क्याह * तेनेति * अङ्गत्वाविशेषे ऽपि कल्पसूत्रेषु वैदिकार्थप्रबन्धाधिक्यात् कल्पसूत्रग्रहणे प्रतीयमानापि स्वतन्त्रता कर्तृस्मरणेन प्रत्याख्यातेति वदता ऽन्या भ्रान्तिरिति श्लोकावयवो व्याख्यातः । ननूभयत्र हेतुसद्भावे कथं पौरुषेयत्वस्यैव निश्चय इत्याशङ्क्याह * येनेति * स्मर्त्तव्यास्मरणमेव दृश्यादर्शनवत्कर्त्रभावे प्रमाणं,तच्च कल्पसूत्रे नास्ति वैदिकार्थप्रबन्धस्तु वेदमूलत्वेनाप्युपपत्तेर्न वेदत्वसाधनायालम् । अध्येतृणां चाङ्गेषु वेदत्वस्मृत्यभावात् षडङ्गमेक इत्यपस्मृतिरित्याशयः । नन्वीश्वरप्रणीतो वेद इति तार्किकाणां कर्तृस्मरणे सत्यपि वेदस्य नित्यत्वमुक्तं तथाङ्गेष्वपि भविष्यतीत्याशङ्क्याह * यथैव हीति * अनध्येतृस्मृतेरनभियुक्तगतत्वेनाप्रामाण्यान्न वेदे कर्तृसिद्धिः।कल्पादिषु त्वध्येतृणामेव कर्तृस्मृतेः पौरुषेयत्वमित्याशयः। अत्रापि प्रागसतां वेदा-
१७५।१ तिरिक्तविद्यास्थानानां निबन्धनादित्येवं सूत्रं योजयति*ततश्चेति * नन्वत्र माशकादिसमाख्यानिमित्ताध्येतृणां कर्तृस्मृतिर्वाच्या सा च प्रवचनयोगेनाप्युपपत्तेर्न कर्तृसाधनमित्याशङ्क्याह * न चेति * मशकादिशब्दानां च कठादिशब्दवदनादिचरणानभि-

धायित्वान्नानादिसमाख्याव्युत्पत्तिनिमित्तत्वं सम्भवतीत्याह * यथा चेति * अत्राप्यर्थे माशकादिसमाख्यायाः प्रागविद्यमानग्रन्थविषयत्वादित्येवं सूत्रं योजयति * अतश्चेति * स्वसम्वेद्यालौकिकरूपाभावादिति तृतीयं व्याख्यानमाह * वदेति * अनध्यायनियमाभावादिति चतुर्थं व्याख्यानमाह * कामं त्विति * भाष्यकृता तत्सूत्रं स्वरनियमाभावाभिप्रायेण व्याख्यतवदिष्टविघातकारित्वादयुक्तमित्याह * यत्त्विति * समाधत्ते * तस्मादिति * प्रपाठकचतुःषष्टीत्यादिना यत्स्वसम्वेद्यमलौकिकं वेदरूपमुक्तं तस्य कल्पसूत्रेष्वभावो ऽत्र भाष्ये प्रयोगशास्त्रत्वाभावकारणं विवक्षितम। स्वरग्रहणरूपलक्षणार्थमित्यर्थः * अवाक्यशेषात् * अनेनसूत्रेणार्थवादरहितत्वात्कल्पसूत्राणामवेदत्वमुक्तमिति प्रतिभाति तदप्यरुणपराशरशाखाब्राह्मणस्य वसन्ताय कपिञ्जलानालभतइत्यादीनां चार्थवादरहितत्वेनावेदत्वापत्तेरयुक्तमित्याशङ्क्याऽलौकिकवेदरूपाभावापेलक्षणार्थत्वेन व्याचष्टे * अतश्चेति * तच्छब्देन स्वसम्वेद्यरूपाभावः परामृष्टः वाक्यशेषाणामलौकिकरूपत्वमुपपादयति * बहव इति * श्लोकं व्याचष्टे * बृहस्पतिरिति * नन्वर्थवादानामपि विध्येकवा- १७६।१
क्यत्वेनानुष्ठानोपयोगित्वात्प्रणयनमर्थवदित्याशङ्क्याह * नित्यत्वे सतीति * नित्यत्वे पर्यनुयोगासम्भवात्कथं चिद्गतिः कार्या प्रणयनं तु क्लिष्टार्थस्य मूढतामापादयतीत्यर्थः। वाक्यशेषाणामलौकिकरूपत्वमुपपाद्य कल्पादिषु तदभावान्नापौरुषेयत्वमिति सूत्रार्थसिद्धिमाह * न चेति * भाष्यकृता तु विधानार्थाच्छिषेः शिष्यते विधीयते ऽनेनेत्यस्मिन्नर्थे घञुत्पत्तेर्विधायकवचनं शेषशब्दमङ्गीकृत्य विधायकवाक्यरहितत्वादित्येवं तावत्प्रथमं सूत्रं व्याख्यातं तस्य साध्यप्रयोगशास्त्रत्वाभावोपयोगितामाह * विधीति * ननु वर्त्तमानापदेशस्यापि समिधो यजतीत्यादेर्विधित्वाङ्गीकरणान्न तेन विध्यभावः शक्यो वक्तुं वचनानामित्याशङ्क्य वाक्यशेषान्वयान्यथानुपपत्त्या तत्र विधिपरत्वं कल्प्यते न तु कल्पादिष्वसावस्तीत्येवं परतया पुनरेतत्सूत्रव्याख्यानार्थं।न चात्रेति भाष्यं व्याचष्टे * वर्त्तमानेति * विधित्वे ऽङ्गीकृते तत्प्ररोचकत्वेनार्थवादान्वयोपपत्तेस्तदुपपादकत्वेन विधिकल्पनमभिप्रेत्यार्थवादप्ररोचितइत्युक्तम् । ननु विध्येकवाक्यत्वं विना लाक्षणिकप्ररोचनार्थत्वं युक्तमिति प्रागेवोपपादितम्। ननु वसन्ताय कपिञ्जलानालभतइत्यादौ वाक्यशेषाभावे ऽपि वर्त्तमानापदेशस्य विधित्वदर्शनात् कल्पादिष्वपि तथा भविष्यतीत्याशङ्क्याह * पञ्चमेनेति * छन्दसीत्यधिकृत्य लिङर्थे ले-

डिति स्मृतेर्नान्यत्र पञ्चमलकारो ऽस्तीत्याशयः । ननु छन्दःशब्दस्य वेदविषयत्वात्पूर्वपक्षे च कल्पादीनामपि वेदत्वाभ्युपगमात्पञ्चमलकारो युज्यतएवेत्याशङ्क्याह * यद्यपीति * यथैव छन्दःशब्दस्य गायत्र्यादिछन्दोयोगाद्गमात्रविषयत्वप्रतीतावपि मन्त्रान्तरेषु ब्राह्मणे ऽपि छन्दोनिमित्ता यस्य पादिविधिदर्शनात्तद्विषयताप्यवसायत तथैव मन्त्रब्राह्मणव्यतिरेकेण वेदशब्दाभिलप्ये ऽपि तर्के छन्दोनिमित्तविध्यदर्शनान्मन्त्रब्राह्मणमात्रविषयत्वावसायान्न वेदमात्रविषयश्छन्दःशब्द इत्याशयः । एतदेव विवृणोति * यथैव हीति * विधिर्ब्राह्मणं विधेयो मन्त्रः तर्को मीमांसा यद्यप्यध्येतृभिर्मीमांसायां वेदशब्दाप्रयोगात्तदनपेक्षया चैतया स्मृत्या विध्यादीनां वेदत्वोक्ता श्रुत्या विध्युद्देशस्यैव विधिशब्दवाच्यत्वे नार्थवादमन्त्रोपनिषदामवेदत्वापत्तेर्विषयत्वतर्कत्वाभ्यां चाग्निहोत्रादिन्यायविस्तरादीनामपि वेदत्वापत्तेर्नानया स्मृत्या तर्कस्य वेदत्वमुच्यते किं तु कश्चिद्वेदभागो विधायकः कश्चिद्विधेयः कश्चिच्च स एष नेति नेत्यादिरनित्यशरीरादिव्यतिरेकेण नित्यात्मप्रतिपादनादिरूपतर्कानुरूपत्वात्तर्क इति त्रैविध्यं वेदस्योच्यते तथापि विध्यादित्रयस्य वेदत्वप्रतिपादनार्थेयं स्मृतिरिति परमताभ्युपगमेनायं दृष्टान्त इति सूचनार्थमेतस्मिन्दर्शने सतीत्युक्तम् । भाष्यकृता कल्पसूत्राणां वेदवाक्यैस्तुल्यादरत्वं पूर्वोक्तं यश्चादर इत्यनुभाष्य स नान्तरीयकत्वादिति परिहारमुक्त्वा कथं नान्तरीयकत्वमित्यपेक्षायां शाखान्तरगतकर्माङ्गभूतमन्त्ररूपवेदवाक्यमिश्राणां कल्पसूत्राणां पाठान्मन्त्रकौशलार्थे घटिकादिष्वादरे नान्तरीयकः कल्पसूत्रादर इत्युक्तं तदतिस्पष्टत्वान्न व्याख्यातम् । ब्रह्मयज्ञविधिविषयत्वतुल्यताभिप्रायेण तुल्यादरभाष्यव्याख्याने स्वयमनुभाषणपूर्वकं परिहारमाह *गात्विति * कल्पसूत्राण्येवात्रोदाहरणमित्यभिमानेनानैकान्तिकत्वोपन्यासः । अतो ऽनैकान्तिकत्वान्न विधेयत्वमात्रेणाकृतकत्वनिश्चय
१७७।२ इत्याह * तस्मादिति * प्रवाहनित्यत्वाच्च नित्यानित्यसंयोगविरोधपरिहार इत्याह * वेदार्थेति * ननु प्रवाहनित्यत्वे ऽप्यपूर्वस्य ग्रन्थस्य कल्पसंज्ञाकरणान्नित्यसंयोगविरोधः प्रसज्येतेत्याशङ्क्याह * वेदार्थेति * यौगिकेयं संज्ञा न ग्रन्थव्यक्तिनिबन्धनेत्यर्थः । प्रयोगप्राशुभावोपयोगिकर्मानुसन्धानप्रयोजनत्वाच्चास्य विधेस्तस्य च येन केन चित्प्रयोगकल्पनात्मकेन शब्देनोपपत्तेर्ग्रन्थाविशेषस्य विधिविषयत्वाभावान्न नित्यतापत्तिरित्याह * कर्मेति * कर्मणो ऽप्यासेनानुसन्धानं विधिप्रयोजनमित्यर्थः । प्रयोजनवचनो ऽर्थशब्दः

यद्वा नात्र कल्पाख्यग्रन्थाध्ययनं विधेयं किं त्विक्स्मरणइत्यस्य धातोरधीतइति रूपमङ्गीकृत्य कर्मणो वेदार्थस्याहरहरभ्यासेन स्मरणं विधेयमिति। परिहारान्तरमनेनोच्यते चशब्दो वाशब्दार्थः। ऋक्तादौ वेऽध्ययनइत्येतद्धातुरूपत्वेनावधारितस्याधीतइत्यस्य कल्पानित्यत्रानुषक्तस्य धात्वन्तररूपत्वायोगादन्वाचयोपपत्तित्वसूचनार्थः । वैदिकार्थप्रबन्धस्य वेदत्वहेतोर्भाष्यकारेणापरिहृतत्वात्स्वयमनुभाषणपूर्वकं परिहारमाह * पुनरिति * अत एव स्वातन्त्र्यमपि नसम्वादात्सिध्यतीत्याह * तदर्थेति * ननु षडङ्गमेक इति कल्पादीनां वेदत्वस्मृतेः किमित्यन्यथा सम्वादो नीयतइत्याह * वेदेति* षडङ्गे ऽध्येतृभिर्वेदशब्दाप्रयोगादपस्मृतिरेषेत्यर्थः ततश्चैतन्न सिद्धान्तभाषितमित्येवं चशब्दो योज्यः। यच्च कल्पसूत्राणां वैदिकार्थानुवादत्वं तदर्थानुगमाच्चेत्यनेनोक्तम् तदुपपादयति * संवादे चेति * ननु शाखान्तरन्यायेनैषामपि विधित्वमविरुद्धमित्याशङ्क्याह*न चेति * एतदेव विवृणोति * सर्वेति * किं च होतुर्वषट्कारे चमसा नीयन्ते उद्गातुर्ब्रह्मणो यजमानस्येति भक्षणार्थं नयनमुक्त्वा केनादौ भक्षणीयमित्यपेक्षायां तेषां होताग्रे भक्षयेदिति प्रतिज्ञाय तस्य वषट्कारान्वयत्वादित्यादिभिर्वषट्कर्तुः प्रथमभक्ष इत्यादिब्राह्मणोत्थैर्हेतुभिर्व्याख्यानदर्शनात्कल्पसूत्राणां ब्राह्मणोक्तार्थानुवादकतावसीयतइत्याह * विवृण्वन्तश्चेति * तथा प्राश्य घृतं शंसेद्यथा चाह वा इदमनो वा रथो वाक्तो वर्त्ततएवं हैवाक्तो वर्त्तते इत्यादिभिर्घृतप्राशनादिविधिशेषभूतैर्ब्राह्मणैर्नाचामेद्भिशदिति विवायते देवरथो वा यद्धोता नाक्षमद्भिः करवाणीत्यादिवाक्यैराचमनाभावादिज्ञापनादनुवादकत्वनिश्चय इत्याह * अन्यार्थैरिति * उपसंहरति * अर्थेति * आचार्यवचः प्रामाण्यं श्रुत्यैवोक्तमिति पूर्वोक्तस्य यत्त्वित्याद्यनुभाषणपूर्वकं परिहारभाष्यं व्याचष्टे * आचार्येति * वेदवचः प्रमाणमित्येवमन्यार्थताभाष्यकृतोदितेत्यर्थः। अव्युत्पन्नो वा ऽयमाचार्यशब्दो व्याख्यात्रध्यापयितृविषयो न तु कल्पसूत्रकारविषय इति परिहारान्तरं यद्वेति भाष्येणोक्तं तद्व्याचष्टे * व्याचक्षाणस्येति * शिष्याणां स्वप्रत्यये संवादनैरपेक्ष्यप्रदर्शनार्थं स्वयम्प्रमाणतेत्युक्तम्। अयमेवपरिहारः स्मृत्यानुगुण्याद्युक्त इत्याह * आचार्येति * नन्वाप्तवाक्यप्रामाण्यस्य लोकप्रसिद्धत्वाद्वचनमनर्थकमित्याशङ्क्याह * वेदेति * अनेन भाष्येण यत्प्रमाणमाचार्यवचनं तदपेक्षेयं श्रुतिरित्युक्त्वा कतर दितिपृष्टे यत्प्रमाणगम्यमित्यभिधानात् व्याख्यातृवचनमध्यापकवचनमपि वा सम्भवन्मूलप्रमाणकमेव सत्यं १७८।१

न सर्वमित्युक्तं तदुपपादयति * न चेति * अनृतवादिनी वागिति-श्रुतेः प्रायाभिप्रायत्वेन रूपात्प्रायादित्यत्र व्याख्यातत्वात्प्रायादित्युक्तम् । श्रुत्यन्तरमुदाहरति * अन्यत्रापीति * यदि च वेदसंवादात्कल्पसूत्राणां वेदत्वं वेदतुल्यत्वं वोच्यते ततः क्व चिद्विसंवादाद्वैपरीत्यमपि शक्यं वक्तुमित्येतदर्थत्वेन सर्वत्र च प्रयुक्तत्वात्सन्निधानशास्त्राच्चेति सूत्रं यच्चोक्तमिति भाष्येणावतारितं तद्व्याचष्टे * वेदादेवेति * यज्ञायज्ञीयमेव प्रायणीयाग्निष्टोमसामकार्यमित्यादेः पञ्चविंशब्राह्मणे जरावोधीययज्ञायज्ञीययोः प्रायणीयाग्निष्टोमसामकार्यवैकल्पिकविधानेन साक्षाद्वेदेन विसंवाददर्शनादपि वा नानागोत्राः स्युरित्यादस्तनूनपात्राराशंसकल्पाद्यवैगुण्याय समानकल्पानामेव सत्रेष्वधिकार इति वेदोत्थेन न्यायेन विसंवाददर्शनात्कल्पसूत्रकारवाचां वेदादेवानृतत्वावगतिरित्यर्थः । इह च यच्चोक्तमिति सूत्रावतारणार्थानुभाषणभाष्ये च शब्दप्रयोगात्तुल्यादराचार्यवचःप्रामाण्यश्रुत्योः परिहारौ सर्वत्र चेति सौत्रेण चशब्देन सूचितौ कल्प्येते । यद्वा पूर्वमेव सूत्रं नञमपनीय व्यवधारणकल्पनया वा तस्मिन्परिहारद्वयं योज्यम् । शेषस्य शेषिमिश्रत्वेन लक्षणाया वेदवाक्यमिश्रत्वप्रतीतेरर्थवादे च वाक्यशेषशब्दस्य प्रसिद्धत्वाद्यद्ययं न वाक्यशेषः स्यादेतच्छङ्काद्वयमिति च व्यवधारणकल्पनयापि व्याख्योपपत्तेर्नोत्सूत्रत्वाशङ्का । उक्ते ऽर्थे सूत्रं योजयति * सर्वत्र चेति * पूर्वेण सूत्रावयवेन विसंवादविषयोदाहरणे उत्तरेण विसंवादाभिधानमित्यर्थः । अतिशयार्थो ऽभ्यासः अत्र भाष्यकृता सर्वत्र तिथिषु कल्पसूत्रकारैः पौर्णमास्यामावास्याख्यकर्मणः प्रयुक्तत्वादनुष्ठापितत्वादित्येवं सूत्रावयवं व्याचक्षाणेन शुक्लपक्षे यस्यां कस्यां चित्तिथावमावास्याख्यं कर्म कार्यमिति कल्पसूत्रकारवचनत्वेनोदाहृतं तदूदूषयति * तत्रेति * यदूवृत्तिकारेणोदाहरणं दत्तं तदनादृत्य इत्यन्वयः । अत्यन्तासिद्धस्याध्यारोपेण कल्पसूत्रकाराणामभिभवः कार्य इत्यभिप्रायेण युक्तत्वादिति हेतुः । किमत्यन्ताभूतमध्यारोपितमित्यपेक्षायां दर्शेत्युक्तं दर्शपूर्णमासयोश्चरकं गमकं तद्विषयं कल्पसूत्रकारवचनं चेत्यसदेवाध्यारोपितमित्यर्थः । नन्वमावास्यापौर्णमासीशब्दयोर्दर्शपूर्णमासयोर्दर्शनात् कथं तद्विषयस्यासत्त्वमित्याशङ्क्य पार्वणेत्युक्तम् । गृह्यकारवचनत्वेन श्रवणादिति तद्विषयत्वे हेतुः । गृह्यशब्दस्योपासनाग्न्यधिकरणकर्मविषयत्वेन तत्प्रतिपादनाधिकृतानां वैतानिककर्मप्रतिपादनस्यानुचितत्वादिति भावः । एतदेव दृष्टान्तेनोपपादयति * गृह्येति * प्रदोषान्तो होम-

कालः सङ्कल्पान्तः प्रातस्तमतिनीय चतुर्गृहीतमाज्यं जुहुयादित्यग्निहोत्रस्य स्वकालातिक्रमे प्रायश्चित्तस्मरणादपस्मृतेस्तद्विषयत्वाभावनिश्चयादू दृष्टान्तत्वम्। गृह्यकारवचनत्वेन स्वयंदृष्टत्वाद्भाष्यकारोदाहृतसमानविषयमुदाहरणान्तरमुक्तम्। किं तर्ह्यत्रोदाहरणमित्यपेक्षायामाह * तस्मादिति * सर्वाणि हवींषि पर्यग्निकरोतीति १७९।४
कल्पसूत्रकारैः पर्यग्निकरणस्य सर्वत्र हविःषु प्रयुक्तत्वात्तद्विरुद्धस्य च पुरोडाशं पर्यग्निकरोतीति शास्त्रस्य सन्निधानादित्येवं व्याख्येयमित्यर्थः।

॥ अथ होलाकाधिकरणम्[1] ॥ ९ ॥ सामान्यश्रुतिकल्पनाधिकरणम् ॥

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् ॥ १ १॥

अनुमानादित्यादिभाष्यात्स्मृत्याचाराणां किं व्यवस्थया प्रामाण्यमव्यवस्थया वेति चिन्ता प्रतिभाति तत्र प्रमाणस्य तावदालोकवत्सर्वपुरुषसाधारण्यान्न व्यवस्थाशङ्कोपपतिमती अथ स्मृत्याचारमूलभूता श्रुतिः किं व्यवस्थितविषया सर्वविषया वेत्यभिप्रायः। तथा ऽप्यष्टकादिस्मृतीनां प्रदीपाद्याचाराणां च व्यवस्थितविषयमूलाशङ्का निर्बीजैव मूलविशेषविषयचिन्तात्वाच्च स्मृत्यधिकरणानन्तरं सङ्गच्छेत तस्माद्धोलाकादयः प्राच्चैरेवेत्यादिभाष्यात्त्वधिकारिव्यवस्था सदसद्भावाचिन्ता सा च प्रमाणेन लक्षणेन सङ्गतेत्याशङ्क्याह * देशधर्मानिति * व्यवस्थिताव्यवस्थितमूलचिन्तैवेयमधिकारव्यवस्था सदसद्भावप्रयोजनेत्याशयः। सा च देशाचारमात्रविषया न सर्वस्मृत्याचाराविषयेति देशधर्मानित्यनेनोक्तम्। पूर्वाधिकरणे च स्वातन्त्र्यनिराकरणेन वेदमूलत्वे दृढीकृते तद्विशेषविचार इति सम्प्रतिशब्देनोक्तम्। तत्र किं कल्पकानामाचाराणां व्यवस्थादर्शनात्तदनुसारेण व्यवस्थितिविषयमेव मूलं कल्प्यं व्यवस्थितमूलासम्भवाद्वा तदनुसारेणाचाराणां सर्वधर्मता कल्प्येति। कल्प्यकल्पकविप्रतिपत्तेः सन्देहकारणत्वं दर्शयितुमप्रतियोगिभूतवचनव्यक्तिद्वयोपन्यासः। नन्वनुष्ठेयानामेव भाष्यकृतोदाहृतत्वात्कथमविशेषेण देशधर्माणामुदाहरणत्वमुक्तमित्याशङ्क्योपलक्षणार्थं भाष्यमित्याह * विध्यर्थेति * विषयवचनो ऽर्थशब्दः। विधिनिषेधयोराचारकल्पत्वात्के विधिविषयभूताः के वा निषेधविषयभूता इति कथं ज्ञेयमित्यपेक्षायां क्रियेत्युक्तम्। करणं विधिविषयचिह्नं

१ वार्त्तिकव्याख्यानभूते ऽस्मिन् ग्रन्थे वार्त्तिकाभिमता एव तत्तत्सूत्रेष्वङ्का निर्विशिता इति कुत्र चित् स्खले भाष्यपुस्तकस्थाङ्कतो वैलक्षण्यमस्ति।

वर्जनं निषेधविषयचिह्नमित्यर्थः । एतदेव प्रपञ्चयति *प्राच्या इति* नन्वाचाराणामेवोदाहरणत्वे स्मृतेराचाराणां चेति भाष्ये स्मृतिग्रहणमनर्थकं स्यादित्याशङ्क्याह * आद्येति * सूत्रान्तराणां देशाचारमात्रविषयत्वात्सर्वसूत्रव्यापिविचारविषयप्रदर्शनार्थं देशधर्मानित्युक्तमित्याशयः । सूत्रशब्दो धर्मशास्त्रविषयः । सर्वेषां गृह्याणां गौतमादिप्रणीतानां च धर्मशास्त्राणां किं व्यवस्थोत सर्वगामितेत्यर्थः । एतदपि प्रपञ्चयति * पुराणेति * प्रामाण्यस्यानुष्ठातृननुष्ठातृञ्च प्रति साधारण्याद्ग्राह्यत्वाभिप्रायः प्रमाणशब्दः किं यानि यैः पठ्यन्ते तानि तैरेव ग्राह्याण्युत सर्वाणि सर्वैरित्यर्थः । इह च नानागृह्यविहितानामपि स्थालीपाकादीनां शाखान्तरन्यायेनाभेदात्तदङ्गानामपि व्यवस्थानुपपत्तेः पूर्वपक्षे ऽपि सर्वधर्मत्वावधारणाद्यदेव किं चित्पुरुषधर्मत्वेन गृह्यादौ क्व चिदेव विहितं तदेव पूर्वपक्षे व्यवस्थयानुष्ठेयम् । यथा कपालं भगालमिति ब्रूयादिति गौतमीये पूर्वपक्षछन्दागतं वा ऽनुष्ठेयं सिद्धान्तछन्दागतं वा । उपनयनोपाकरणादीनां वेदाध्ययनाङ्गतत्तच्छाखाध्ययनानुग्राहकोपकारभेदसिद्ध्यर्थेतिकर्त्तव्यताभेदापेक्षोपपत्तेः

बह्वृप्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

इत्यादिवचनानां चात्यन्तानर्थक्यापत्तेः । सिद्धान्ते ऽपि सर्वधर्मत्वान्नोदाहरणत्वमनुमानादित्यादिपूर्वपक्षसूत्रव्याख्यानार्थं भाष्यं व्यवस्थितविषयमूलप्रतिपादनपरत्वेन व्याचष्टे * किं
१८०।२ तावदिति * किं व्यवस्थितमूला इति सन्देहावसरे पूर्वपक्षवचनव्यक्त्युपन्यासात्स्मृत्याचारमूलानां व्यवस्थितविषयत्वेन व्यवस्था पूर्वपक्षार्थः । पाठग्रहणेनाचारो ऽप्युपलक्षितः पाठादाचाराद्वा व्यवस्थिताद्व्यवस्थितविषयैव श्रुतिः कल्प्येतेत्यर्थः । अनेन चानुमापकस्य कल्पकस्य पाठस्याचारस्य वा व्यवस्थानाद्व्यवस्थितविषयोपपदसंयुक्तं मूलप्रमाणं स्यादिति सूत्रं योजितं भवति । ननु मूलश्रुत्यनुमानेन स्मृत्याचारप्रामाण्याद्येनैव श्रुत्यनुमानेन हेतुना स्मृत्याचाराः प्रमाणं तेनैव व्यवस्थितविषयश्रुत्यनुमानेन हेतुना व्यवस्थितविषयमेव स्मृत्याचारप्रामाण्यमिति वदता भाष्यकृता व्यवस्थितविषयमूलत्वस्यैव स्मृत्याचारप्रामाण्यव्यवस्थायां हेतुत्वाभिधानाद्विपरीतहेतुमद्बाधाभिधानं भाष्यविरुद्धं स्यादित्याशङ्क्याह * अ-

१ पूर्ववपक्षे छन्दोगैरेवानुष्ठेयम् ।
२ सिद्धान्ते ऽपछन्दोगैरपि सर्वैः ।

नुमीयते ऽनेनेति * मूलव्यवस्थायाः कल्पत्वेन हेतुत्वायोगात्प्रामाण्यस्य च सर्वपुरुषसाधारण्याद्व्यवस्थानुपपत्तेर्नेदं व्यवस्थितमूलत्वेन स्मृत्याचाराणां धर्माधर्मौ प्रति व्यवस्थितप्रामाण्यप्रतिपादनपरं भाष्यं किं तु व्यवस्थितत्वाद्व्यवस्थितविषयामेव श्रुतिं प्रति प्रामण्याप्रतिपादनपरमिति भावः । तेनैवं भाष्यं योज्यम् । अनुमापकत्वेन स्मृत्याचाराणां मूलं प्रति प्रामाण्याद्येनैवान्यथानुपपत्तिलक्षणेन हेतुना तेषां मूलश्रुतिं प्रति प्रामाण्यं तेनैव व्यवस्थितत्वात्तादृशीमेव प्रतिप्रामाण्यमिति । कल्पकाभिप्रायो वार्त्तिके लिङ्गशब्दः । व्यवस्थितस्य स्मृत्याचाररूपस्य कल्पकस्य व्यवस्थितविषयश्रुतिकल्पकत्वौचित्यमुक्त्वा दृष्टान्तद्वारेण प्रकृते योजयति * तच्चेति * श्लोकं व्याचष्टे * अन्येति * न चादृष्टधूमादिति दृष्टान्ततयोक्तम् । यथा नादृष्टस्य लिङ्गत्वमेवमपक्षधर्मस्यापीत्यर्थः । ननु लिङ्गस्य पक्षधर्मत्वेन गमकत्वाद्व्यवस्थितलिङ्गानुमापकत्वं युक्तं स्मृत्याचाराणां त्वनुपपत्त्या कल्पकत्वात्तस्याश्च तद्विषयश्रुतिकल्पनमात्रेण परिहाराद्विनियतकर्तृकल्पना निष्प्रमाणिकेत्याशङ्क्याह * यथेति * यथाग्निहोत्रादीनां नियतकर्तृकाधानोपनयनमन्यानि विद्यासाधनकत्वान्यथानुपपत्त्या नियतविषयत्वं कल्पितं तथात्रापि नियतकर्तृविषयश्रुतिकल्पनं विना नियतकर्तृत्वानुपपत्तेर्नियतकर्तृविषयैव श्रुतिः कल्प्येत्याशयः । दृष्टं च . केषां चित्स्मृत्याचाराणां नियतकर्तृविषयश्रुतिकल्पकत्वमिति प्रतिपादनार्थं यथेति भाष्यं व्याचष्टे * यथा चेति * जातयो ब्राह्मणाद्यास्तद्भेदा गोत्रचरणानि तदवान्तरभेदाः कुलानि । ननु तत्र जात्यादिवाचकोपपदसम्भवाद्व्यवस्था युक्ता होलाकाद्यनुष्ठातृवाचकोपपदासम्भवान्नेह व्यवस्था युक्तेत्याशङ्क्याह *यदि स्यादिति* अत्राप्यनुपपत्त्या किं चिदुपपदं कल्प्यमिति भावः । एवं व्यवस्थितविषयोपपदरहितश्रुतिकल्पनमात्रेणानुपपत्तेरपरिहारादुपपदमपि कल्प्यमित्युक्तमिदानीं सर्वविषयश्रुतिकल्पने प्रमाणमेव नास्तीत्याह * अन्यथेति * श्लोकं व्याचष्टे * यस्मादिति * व्यवस्थितविषयस्य नियतश्रुतिकल्पकत्वं दृष्टान्तेनोपपादयति * तथा चेति * १८।१
अनुमानशब्दस्य स्मृत्याचारविषयत्वं प्रमाणशब्दस्य च श्रुतिविषयत्वं दर्शयन्पूर्वपक्षमुपसंहरति * अनुमानेति * अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्येति सिद्धान्तसूत्रं व्याचष्टे * अपि चेति * तस्य सर्वधर्मत्वस्योपपादको न्यायो विधेः सर्वविषयत्वं यस्मिन्क-

१ बाच्चीकी ६० २ पु० पा० ।
२ बाच्चीकी ६० २ पु० पा० ।

ल्पे विधाने विधायके वाक्ये ऽस्ति तत्तन्न्यायं तस्य भावस्तन्न्याय त्वम् । कथं कल्पे विधायके वाक्ये सर्वविषयविधित्वन्याय इत्य-पेक्षायाम् * शक्तेत्युक्तम् * यस्माच्छक्तमात्रं पुरुषं विधायकवा-क्यमधिकरोति नातिरिक्तं विशेषणमपेक्षते तस्मात्तस्य सर्वविषयवि-धित्वं न्याय्यमित्यर्थः । ननु कर्तृविषयज्ञानं विना नैराकाङ्क्ष्याभावा-त्कथं विधेः प्रवृत्तिरित्याशङ्क्य साध्यसाधनेतिकर्त्तव्यताविशिष्टभा-वनाविधानमात्रेण भावनाक्षेपादेव तन्निष्पादनसमर्थकर्त्रवगमसि-द्धेर्नैराकाङ्क्ष्यं वक्तुं यावता विना नैराकाङ्क्ष्यं न भवति तावद्-र्शयति * इहेति * भावना च नाम विशेषणव्यवच्छिन्नो यागा-दिधात्वर्थविशेषश्च स्वर्गादिफलं च द्रव्यदेवतादिकारकं च यावद्-ष्टेतिकर्त्तव्यता च तद्विधायको विधिश्च श्रुतिष्वनुमीयमानास्वनुमी-यतइत्यन्वयः । अवश्यमित्येतावतामनुमाने कारणत्वमुक्तम् । तदेव कुत इत्यपेक्षायाम् * कारणानुविधार्यीत्युक्तम् * कारणात्तथावि-धत्वं विना कार्यतथाविधत्वानुपपत्तिः । कार्यानुरूपकारणानुमाने हेतुरित्यर्थः । निषेधे कियता नैराकाङ्क्ष्यमित्यपेक्षायामाह * एव-मिति * नन्वेतावत्यनुमिते ऽपि निरधिकारयोर्विधिनिषेधयोरप्रवृत्ते-रधिकारिविशेषोपादानं विना नैराकाङ्क्ष्यं न सम्भवतीत्याशङ्क्या-ह*तावता चेति*अशक्यविधानानुपपत्तेरसमर्थव्यावृत्त्यवगमाच्छ-क्तमात्रस्य कर्तृत्वावधारणात्कर्तृत्वस्य चाधिकारं विनानुपपत्तेः।कर्तृ-विशेषेणैवाधिकारिविशेषावधारणसिद्धेर्न होलादौ दिग्देशपरिच्छि-न्नस्यैव कर्तृविशेषस्याधिकार इति नियता प्रतिपत्तिर्लभ्यतइत्यर्थः। ननु शक्तस्यापि विधिमन्तरेणाप्रवृत्तेस्तस्य चाचाराचारकल्पत्वात्तदानुरू-प्येण दिग्देशपरिच्छिन्नकर्तृविशेषविषयत्वप्रतीतेः कथं तन्निराकर-णमित्यभिप्रायेण पृच्छति * कुत इति * उत्तरमाह *त्रिधैवेति* स्वर्गकामो यजेतेत्यविशेषश्रवणे ऽप्यग्निविद्यारहितत्वेनायोग्यस्य शूद्रादेः कर्तृत्वासम्भवाद्योग्यत्वेन त्रैवार्णिकः कर्त्ता विशेषरूपेण ज्ञायते पतितषण्ढयोर्द्विजातिकर्मभ्यो हानीरिति निषेधात्तद्वर्जितो प्रतिषिद्धत्वेन ज्ञायते । राजा राजसूयेन यजेतेति विशेषापादकत्वे येन क्षत्रियः कर्त्ता विशेषरूपेण ज्ञायते । न त्विहैषां मध्ये किं चि-द्दिग्देशपरिछिन्नकर्तृविशेषज्ञानकारणमस्तीत्याशयः । यत्र योग्य-त्वस्य तावदविशिष्टत्वान्न दिग्देशपरिच्छिन्नकर्तृविशेषज्ञानकारणता-स्तीत्याह * तादिहेति * श्रावयेच्चतुरो वर्णानित्यादिश्रुतिपर्यालो-चनया शूद्राणामपि वैदिकमन्त्ररहितेषु स्मृत्याचारप्राप्तेषु कर्मस्वधि-कारो ऽस्तीति समस्तशब्देनोक्तं, सर्वधर्मबहिष्कृतत्वस्मृत्या म्लेच्छा-

नां धर्मानधिकारावगमादार्यावर्त्तनिवासिग्रहणं निषेधाधिकारे त्वविशेषात्सर्वाधिकारोपपत्तेराचारकल्प्यत्वाद्विधेयस्याचारस्य यावद्भिर्वर्णैराश्रमिभिर्म्लेच्छादिभिर्वानुष्ठानं दृश्यते तावतां तस्मिन्नाचारेऽधिकार इति प्रतिपादनायानवक्लृप्तिरुक्ता । अप्रतिषिद्धत्वस्य कर्तृविशेषज्ञानकारणत्वं पूर्वोपन्यस्तमप्युपपदनिराकरणाधीननिराकरणत्वादुपेक्ष्योपपदं तावन्निराकरोति * न त्वत्रेति * यथा चात्र १८२।१
यः कर्तृविशेषः कल्पः तद्वाचकत्वेन तदनुसारियदुपपदमनुमीयते तन्न सम्भवतीत्यर्थः । प्राच्याद्युपपदशङ्कानिराकरणार्थम् * देशश्चेत्युक्तम् * गृह्यादौ त्वाचारशब्दपाठोपलक्षणार्थमङ्गीकृत्य नात्र गृह्यगौतमीयादौ यथापाठं छन्दोगादिकर्तृविशेषानुसार्युपपदं किंचिदुपात्तं यत्तन्मूलभूतायां श्रुतावनुमीयेतेति योज्यम् । प्रतिषेध्यवाच्युपपदासम्भवेनाप्रतिषिद्धत्वमपि कर्तृविशेषज्ञानकारणं नेह सम्भवतीत्याह * ये ऽपि चेति * आचारानुरूपकर्तृविशेषवाच्युपपदासम्भवं न तस्याकृतिवचनतेति भाष्यांकेन मार्गेणोपपादयितुमुपक्रमते * योग्यत्वेनेति * प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याख्यातुमाकृतिवाच्युपपदासम्भवं तावत्प्रपञ्चयति * न तावदिति * व्यक्तिवाच्युपपदासम्भवं प्रपञ्चयति * व्यक्तिवाचित्विति * एतदेवोपपादयति * न हीति * नन्वनन्तभेदानामपि पुरुषव्यक्तीनां शुक्लो होतेतिवदेकेन केन चिद् गुणेनैष्टव्यो विवक्ते इति वद्वा कया चिदेकया क्रिययोपलक्षितानामेकमभिधानमवकल्पिष्यतइत्याशङ्क्याह * एतेनेति * आचारानुरूपविशेषणानुपपत्तिरेतच्छब्देन परामृष्टा गुणस्य क्रियाया वा विशेषरूपेणानेकपुरुषव्यक्त्युपलक्षणशक्त्यसम्भवाज्जातिग्रहणम् । एतदेवोपपादयति * न हीति * ननु व्यक्त्याकृतिवाच्युपपदासम्भवे ऽप्यर्थान्तरवाचिकिञ्चिद्भविष्यतीत्याशङ्क्याह * व्यक्तीति * उक्ते ऽर्थे न तस्याकृतिवचन- १८३।२
तेति भाष्यं योजयति * एतदेवेति * विधानपरामर्शिनस्तच्छब्दात्परा षष्ठी विधानविशेषणार्थोपपदव्यतिरेकजनितेत्याशयः । विधानविशेषणार्थस्योपपदस्य व्यक्त्याकृतिवचनत्वासम्भवेनोपपादनार्थं न चेति भाष्यं हि शब्दार्थे च शब्दमङ्गीकृत्य व्याचष्टे * न हीति * व्यक्तिवाचित्वनिराकरणे ऽनुष्ठातृविशेषाणां यदेकं सामान्यं साधारणमुपलक्षणं न तन्निमित्तानुष्ठातृविशेषाणां वाचको ऽस्तीति तस्योपलक्षणार्थत्वेन सर्वेषां शब्द इति शब्दव्यतिरेकजनितषष्ठ्यङ्गीकरणेन योज्यम् । नन्वर्जितपाठान्तरमाकृतिवाच्युपपदासम्भवादयुक्तमाशङ्क्योपन्यासपूर्वकंव्याचष्टे * केषाञ्चित्त्विति * स्वर्गकामो यजेते-

त्याख्यातोपात्तभावनाक्षिप्तकर्तृविशेषणोपादेयार्थे स्वर्गकामपदे पुल्लिङ्गनिर्देशात्स्त्रिया नाधिकार इति पूर्वपक्षं कृत्वा कर्तृविशेषणत्वेनाप्यन्वितस्य स्वर्गकामस्य विध्यन्यथानुपपत्त्या प्राधान्यावगतेरुद्देश्यत्वाद्विशेषणाविवक्षेति षष्ठे सिद्धान्तयितुं यथा विशेषणाविवक्षाभिप्रायेण जातिशब्दः प्रयुक्त इति नैव वयं ब्रूमो जातिवचन इह शब्दोऽधिकारक इति किं तर्हि स्वर्गकामशब्देनोभावपि स्त्रीपुंसावधिक्रियेते इत्यविवक्षितं पुल्लिङ्गमिति भाष्ये वक्ष्यते तथात्रापि विशेषणाविवक्षाभिप्रायेणाकृतिशब्दः प्रयुक्त इत्यर्थः । अस्मिंश्च पाठे ननु दिद्देशपरिच्छिन्नकर्तृविशेषमात्रवर्त्यवान्तरजातिवाच्ये च तर्ह्युपपदं कल्पयिष्यतइत्याशङ्क्यानिराकरणार्थत्वेन न चेति भाष्यं स्वार्थचशब्दकं योज्यं, पूर्वस्मिन्नेव पाठे वैयाकरणगन्धिनो मीमांसकस्य व्याख्यानं दूषयितुमुपन्यस्यति * कश्चित्पुनरिति * शब्दान्तरानाख्येयार्थत्वेनाख्यातशब्दमनेन भाष्येणोपवर्णयन्नेवमाहेत्यन्वयः । किमाहेत्यपेक्षिते भावइति तदीयो ग्रन्थः पठितः । तस्यार्थो भावाख्यो यो लिङाद्यर्थः।सो ऽतो लिङादिशब्दजनिताद्भानादन्येन शब्दान्तरजनितेन ज्ञानेनानाख्येयः । तृतीयान्तमन्यादित्यव्ययम् । भावादिशब्दैराख्यातदर्शनाच्छब्दान्तरानाख्येयत्वानुपपत्तिमाशङ्क्य स्वधर्मेण पूर्वापरीभावेन कालत्रयासंसृष्टत्वेन लिङ्गसम्बन्धायोग्यत्वेन च शब्दान्तरेण *नाख्यायतइत्युक्तम् * यद्वा शब्दान्तरानाख्येयत्वकारणम् *स्वधर्मेणेत्यनेनोक्तम् * शब्दान्तरेण ह्याख्यायमानो ऽर्थः सामान्यरूपेण विशेषरूपेण व्याख्यायते न च लिङाद्यर्थस्य सामान्यरूपता विशेषरूपता वा स्वधर्मः तस्याव्यपदेश्यत्वेनानुवृत्तिव्यावृत्तिप्रत्ययगोचरत्वाभावादित्याशयः । यथा कारकं क्रियायां व्याप्रियमाणत्वरूपेण स्वधर्मेण द्वितीयादिविभक्तितो ऽन्येन शब्देन नाख्यायते तथा भावो ऽनाख्यातादन्येन शब्देन स्वधर्मणाख्यायतइति दृष्टान्तार्थः । नन्वाकृतिवचनत्वस्यात्र न्याय्यत्वाभिधानात्तस्याश्च सत्त्वरूपत्वेन शब्दान्तरैराख्यातुं शक्यत्वान्नेदं भाष्यं शब्दान्तराख्येयत्वनिराकरणसमर्थमित्याशङ्क्येदमित्युक्तम् । ननु पूर्वपाठे ऽप्युक्तेन प्रकारेणोपपदस्याव्यक्त्याकृतिवाचित्वनिराकरणप्रतीतेर्नाख्यातार्थोपवर्णनसामर्थ्यमित्याशङ्क्य *सूत्रेत्युक्तम्*सूत्रगतस्याख्यातवाचिनो विधानशब्दस्य यावच्छ्रुतस्य स्वसम्बन्ध्युपपदप्रतिपादनानपेक्षस्य व्याख्येयत्वेन प्रकृतत्वान्न तस्य विधायकस्याख्यातस्य कर्तृविशेषव्यवस्थापकव्यक्त्याकृतिवचनता न्याय्या। न चान्यो ऽपि कश्चिच्छब्दः सर्वेषामनुष्ठातॄणां व्यवस्थापकस्य सामान्यस्य वाचको ऽस्तीति भाष्यार्थभ्रान्तिर्जायतइ-

त्यर्थः । सूत्रगतेन यावच्छ्रुतेन विधानशब्देन जनिता भ्रान्तिर्यस्येति विग्रहः । नन्वेवमपि विधायकाख्यातार्थस्य विधेः शब्दान्तरानाख्ये यत्वं वाच्यं न भावशब्दाभिधेयाया भावनाया इत्याशङ्क्य * विधीत्युक्तम् * ननु भावार्थाधिकरणे यज्यादयश्चातो ऽवगम्यते भावयेदिति चेति भाष्ये विध्यर्थातिरिक्तभावनाव्युत्पादनादभेदाङ्गीकरणं न युक्तमित्याशङ्क्योभयत्युक्तम् । क्रियारूपत्वे भावनाया धात्वर्थादभेदापत्तेः कार्यरूपता वाच्या ततश्च कार्यरूपाद्विधेर्विलक्षणं कीदृशं तस्याः स्वरूपमिति निरूपणीयामित्येवं रूपान्पर्यनुयोगस्तेन भावार्थाधिकरणसिद्धान्तो नाशित इत्यर्थः । नन्वेवं सति को लिङाद्यर्थ इति पृष्टे कीदृशमुत्तरं देयमित्याशङ्क्याह * तेनेति * आख्यातशब्दो लिङाद्यभिप्रायः । भावनाशब्दो विध्याभिप्रायस्तं प्रति कुर्याच्छब्द उत्तरं दास्यतइत्यन्वयः । यथा कः पिक इति पृष्टे कोकिल इत्युत्तरं दीयते तथा को विधिरिति पृष्टे कुर्यादित्युत्तरं देयमित्यर्थः । ननु करोतेः क्रियासामान्यवाचित्वात्तदर्थस्य शब्दान्तराख्येयत्वं प्रसज्येतेत्याशङ्क्य लिङादीत्युक्तं करोत्युच्चारणं तर्हि किमर्थमित्याशङ्क्य केवलेत्युक्तम् । ननु धात्वन्तरेण प्रत्ययानुग्रहसिद्धेः करोतिनियमः किमर्थ इत्याशङ्क्य * सर्वेत्युक्तम् * सर्वविधिव्याप्त्यर्थः । करोतिप्रयोग इत्याशयः । शब्दान्तरानाख्येयत्वे कोपपत्तिरित्यपेक्षायां भाष्योक्तामेवोपपत्तिमाह * सर्वश्चेति * अत्रैव भाष्यं योजयति * तदेव चेति * किलेत्यपारमार्थिकत्वं द्योतितं विधानेत्यादिना भाष्यस्य सामर्थ्यं दर्शितम् । व्यक्त्याकृतिवचनत्वाभावमुपपादयति * कुर्यादिति * करोतीति कार्यतामात्रं प्रपद्यते ऽङ्गीकरोति न तु विधेः सामान्यरूपतां व्यक्तिरूपतां वावगच्छतीत्यर्थः । विध्यतिरिक्तभावनावादिमते तस्या अपि विधायकाख्यातात्कार्यतया च प्रतीतेः सिद्धरूपत्वाभावेनानुवृत्तिव्यावृत्तिप्रत्ययगोचरत्वासम्भवात्सामान्यविशेषरूपत्वप्रतीत्यसम्भवं दर्शयितुम् * भावनाया वेत्युक्तम् * दूषयति * तदिदमिति * तदिदमन्यार्थमेव सदन्यस्मिन्नेवार्थे योजितमित्यन्वयः किमर्थमित्यपेक्षायाम् * भाष्यकारेत्युक्तम् । अयमेवाभिप्रायः कस्माद्भाष्यकृतो ऽभिप्रेतो न भवतीत्याशङ्क्य * असम्बद्धत्वानुपपत्तिकत्वाभ्यामित्युक्तम् * कथं तर्ह्यत्र योजितमित्यपेक्षिते श्रुतीत्युक्तम् । यथा चत्वारि शृङ्गेति मन्त्रो विषुवति होतुराज्ये विनियोगादादित्यरूपेणाग्नेः स्तुत्यर्थो ऽन्यत्रापि विनियोगाद्यङ्गमात्रस्तुत्यर्थो वैयाकरणैर्नामाख्यातोपसर्गनिपाताः शब्दा ब्रह्मणः चत्वारि शृङ्गेति भूतभविष्यद्वर्त्तमानकालवाचिनः प्रत्यया १८४।२

उदात्तानुदात्ता स्वरिता वा स्वराश्रयः पादाः. वर्णनादात्मकौ शब्दौ प्रकृतिप्रत्ययौ च ह्रे शीर्षे नामिक्यो विभक्तयः सप्त हस्ताः उर. कण्ठ-शिराश्च नाभ्युरः कण्ठेषु वा त्रिधा बद्धः स्वर्गादिसाधनकर्मविधान-द्वारेण वर्षणाद्वृषभः शब्दात्मकत्वाद्रोरवीति सर्वगतत्वान्महत्सर्व-व्यवहारसाधनत्वादेव मनुष्यैरुच्चार्यमाणत्वान्मर्त्यानाविवेशेति नि-योगानपेक्षेण श्रुतिसामान्यमात्रेण शब्दप्रतिपादनरूपे ऽर्थे योजित इति दृष्टान्तार्थः । कथं पूर्वोक्तस्यार्थस्य भाष्यकारानभिप्रेतत्वामित्या-शङ्क्याह * देशेति * परव्याख्यानस्यासम्बद्धत्वं निरुपपत्तिकत्वं च पूर्वोक्तमुपपादयितुं विवृणोति * यदि त्विति * न प्रकृतेन सू-त्रव्याख्यानेन सम्बन्ध्यते नापि सर्वधर्मत्वोपपत्तिं प्रत्युपयुज्यतइत्य-सम्बद्धत्वाद् द्वेधा व्याख्यातं तत्रासम्बद्धत्वं तावदुपपादयति * त-था हीति * एतदेव विवृणोति * यदि नामेति * निरुपपत्तिकत्वं त्वन्यानाख्येयार्थत्वमुक्त्वा स्वयमेव च लिङाद्यर्थस्य पर्यायान्तरैरा-
१८५।२ ख्यानात्स्पष्टीकृतमित्याह * अनाख्येयत्वामिति * एतदेव विवृणोति * विधीति * विध्युपदेशशब्दयोः पर्यायत्वे ऽपि कर्त्तव्यताशब्दस्य विधिविषयत्वरूपाभिधायित्वाद्भावनाशब्दस्य च पुंव्यापाराभिधा-यित्वादत्यन्ताविद्यमानपर्यायत्वारोपाभिधानमतीव स्थापितमित्युप-हासः । ननु नानेन ग्रन्थेन भावनाख्यस्य विध्याख्यातार्थस्य व्यक्त्या-कृतिरूपेणानभिधानात्सर्वधर्मत्वं साध्यते किं त्वनेन दृष्टान्तेन कर्त्तु-राख्यातार्थत्वेन व्यक्त्याकृतिरूपेणानभिधानाद्व्यक्त्याकृतिद्वारकर्तृ-व्यवस्थाशङ्कानिरासेन सर्वधर्मत्वसिद्ध्यर्थमन्यानाख्येयत्वोपपत्तिमि-षेण व्यक्त्याकृतिवाचित्वनिराकरणं नासम्बद्धमित्याशङ्क्याह * य-द्यपि तावदिति * व्यक्त्याकृतिरूपेण कर्त्तुराख्यातवाच्यत्वे ऽपि कृ-दन्तयजमानपदोपात्तकर्तृवदुपपदं विना व्यवस्थानुपपत्तेः । कर्त्रधि-करणे चाख्यातवाचित्वनिराकरणात्कर्तृव्यक्त्याकृतिवाचित्वनिराक-रणमनुपयोगीति भावः । ननु माभूत् कर्तृव्यक्त्याकृतिवाचित्वस्य व्यवस्थानापादकत्वान्निरासः किं तु स्वरूपमात्राभिधाने विशेषाभा-वेन सर्वधर्मत्वसिद्ध्यर्थमित्याशङ्क्याह * यदि चेति * ननु राज-सूयादीनामप्याख्यातवशात्सर्वधर्मत्वं प्राप्नोति च किं तूपपदं विशे-षणापोदितमिह त्वपवादाभावान्नतत्सिद्धिरित्याशङ्क्ते *अथेति* ए-वमप्यपवादनिरासं विना सर्वधर्मत्वासिद्धेराख्यातार्थनिरूपणं व्य-र्थमिति परिहरति * एवं तत्रापीति * अतो ऽस्मदीयमेव पाठद्वये व्याख्यानं युक्तमित्युपसंहरति * तच्चेति * उत्तरसूत्रसङ्गत्यर्थ-मपि उपपदनिरासार्थतयैवायं ग्रन्थो व्याख्येय इत्याह * तद्यथा

चेति * तन्न्यायत्वादिति सूत्रावयवव्याख्यानार्थं 'तस्मादिति' भाष्यं सर्वधर्मत्वस्यैव साध्यत्वाद्धेतुत्वानुपपत्तेरयुक्तमाशङ्क्य सर्वधर्मत्वसाधकसर्वाधिकारन्यायत्वादित्येवं व्याचक्षाणाः सर्वधर्मत्वप्रतिज्ञायां योजयति * तस्मादिति *

दर्शनाद्विनियोगः स्यात् ॥ १२ ॥

एतत्सूत्रावतारणार्थमथेत्यनुभाषणभाष्यं व्याचष्टे * यस्त्वेति * आर्षेयपञ्चार्षेयगोत्रव्यवस्थया शिक्षाकल्पव्यवस्थादर्शनाद् गोत्रविशेषवाच्युपपदानुमानेन कर्तृविशेषविनियोगः स्यादित्येवं सूत्रव्याख्यानार्थं गोत्रेति भाष्यं व्याचष्टे * तत्रेति * श्लोकं व्याचष्टे * यथैवेति * वसिष्ठादिगोत्रस्यान्वयतो नाराशंसो व्यतिरेकस्तनूनपादित्युपलक्षणतेत्यर्थः। १८६।१

लिङ्गाभावाच्च नित्यस्य ॥ १३ ॥

श्यामादिचिह्नविशेषवाच्युपपदानुमानाशङ्कानिरासार्थमेतत्सूत्रमिति प्रतिपादनार्थं वेदमिति भाष्यं व्याचष्टे *व्यक्तीति * एतदेव विवृणोति * व्यक्तीति * नित्यस्य व्यवस्थिताचारान्नियतस्य कर्तुरुपलक्षणभूतस्य लिङ्गस्याभावात्तद्वाच्युपपदानुमानानुपपत्तेः। सर्वधर्मतेति लिङ्गीभूतकर्तृविशेषणनित्यशब्दाङ्गीकरणेन स्वयं सूत्रं व्याचष्टे *लिङ्गेति* नियमाभावमुपपादयदन्ये ऽपीति भाष्यं व्याचष्टे * यच्चिह्नमिति * अन्वयव्यभिचारार्थं भाष्यं व्याख्याय नैवं लिङ्गा इति व्यतिरेकव्यभिचारार्थं भाष्यं व्याचष्टे * दृष्टमिति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * ननु नास्ति तन्नित्यमेषां लिङ्गमिति भाष्यान्नित्यशब्दस्य लिङ्गविशेषणत्वप्रतीतेः। कर्तृविशेषणत्वेन व्याख्यानमयुक्तमित्याशङ्क्याह * यस्त्विति * नित्यकर्तुरुपलक्षणाशक्तिप्रदर्शनार्थं लिङ्गस्य नित्यत्वं भाष्यकृता निराकृतम्। ननु सौत्रो नित्यशब्दो लिङ्गविशेषणत्वेन व्याख्यात इति मन्यते इति काकवा सूचितम्। नित्यशब्दसापेक्षत्वाल्लिङ्गशब्दस्याभावशब्देन सह * असमासप्रसङ्ग इत्युक्तम् * ननु राजपुरुषः शोभन इति पुरुषशब्दस्य शोभनशब्दसापेक्षस्यापि राजशब्देन सह समासो दृष्ट इत्याशङ्क्य * उपसर्जनीभूतेत्युक्तम् * भवति हि प्रधानस्य सापेक्षस्यापि समास इति स्मृतेः। पुरुषस्य राजानं प्रतिप्राधान्याद्युक्तः समासः। लिङ्गस्याभावं प्रत्युपसर्जनत्वात् वृद्धस्य राज्ञः पुरुष इति वदयुक्त इत्याशयः। ननु नित्यशब्दस्य प्रतिपाद्यं नियतत्वं विना लिङ्गशब्दार्थस्य लिङ्गत्वानुपपत्तेर्लिङ्गशब्दार्थेनैव नित्यश-

ब्दार्थाक्षेपाच्छब्दस्यान्यत्र व्यापाराभावेन सामर्थ्याविघातादुपसर्जनसापेक्षत्वे ऽपि देवदत्तस्य गुरुकुलमितिवन्नित्यसापेक्षत्वात्समासाविरोध इत्याशङ्क्ते * नन्विति * यदि हि सम्बन्ध्यन्तरस्य नित्यशब्दस्यार्थो नियतत्वं लिङ्गशब्दार्थेनैव स्वार्थसम्बन्धितया समभिव्याहारान्यथानुपपत्त्याक्षिप्येत ततो ऽन्यत्र व्यापृतत्वात्तावत्सम्बन्धाक्षेपे ऽसामर्थ्यं स्यालिङ्गशब्दार्थेनैव तु हेतुत्वेन नित्यशब्दार्थाक्षेपान्न तेन लिङ्गशब्दस्याभावात् शब्दं प्रति सामर्थ्यं विहन्यतइत्यर्थः । गुरुशब्दस्य सम्बन्धिशब्दत्वाच्छिष्यसम्बन्धिरूपं विना स्वार्थप्रतिपादनाशक्तेस्तादृतप्यमन्तरेण स्वार्थाभिधानापर्यवसानादपर्यवसितस्वार्थाभिधानएव शब्दान्तराभिधानसंयोगात्स्वार्थाभिधानवेलायामेव सम्बन्ध्यन्तरशिष्यमात्रप्रतीतौ निर्विशेषसामान्यानुपपत्तेस्तद्विशेषापेक्षायामपि पर्यवसितस्वार्थाभिधानव्यापारस्य शब्दस्य सम्बन्ध्यन्तरान्वयसिद्धौ[1] व्यापारान्तराभावेन सामर्थ्याविघातात्समासो युक्तः लिङ्गशब्दस्य तु सम्बन्धिशब्दत्वाभावात्सम्बन्ध्यन्तरमनपेक्ष्यैव पर्यवसिते स्वार्थाभिधाने ऽर्थापेक्षया प्रतीतस्यापि सम्बन्ध्यन्तरस्याशाब्दत्वेनान्वयात्पर्यवसितव्यापारस्यापि शब्दस्यैव सम्बन्ध्यन्तरापेक्षाकल्पनायामभावशब्देन सहैकार्थलक्षणं व्यपेक्षालक्षणं वा सामर्थ्यं न
१८७।२ सम्भवतीत्यभिप्रायेण परिहरति * नैतदिति * सम्बन्धिशब्देषु हि सम्बन्ध्यन्तरापेक्षां विना शब्दप्रवृत्त्यसम्भवाच्छब्दप्रवृत्तिनिमित्तत्वेन सम्बन्ध्यन्तरापेक्षा सम्भवति इह तु तदभावाच्छब्दकृतापेक्षातो ऽपेक्षान्तरेणार्थकृतेन लिङ्गशब्दस्य नित्यशब्देन सह सङ्गतेर्नैतल्लिङ्गशब्दस्य नित्यशब्दसापेक्षत्वमनेन गुरुशब्दस्य देवदत्तशब्दसापेक्षत्वेन तुल्यमित्यर्थः । एतदेवोत्तरार्थत्वेन तूपपादितं लिङ्गत्वं चेन्नित्यत्वमेव प्रति सतां लभते यथा भार्या त्वं पतिमेव पति न स्त्री त्वामिव सर्वसाधारणं ततो लिङ्गशब्दः स्वार्थस्य लिङ्गशब्दस्य नित्यापेक्षां विनात्मलाभायोगात्तदपेक्षेत न त्वेतदस्ति । तथा हि । नित्यशब्दो ऽयं नियताभिप्रायो वा स्यात्तद्धर्मनियतत्वाभिप्रायो वा तत्राग्न्यादिनियामकमेव प्रतिधूमादेर्लिङ्गत्वदर्शनान्नियतापेक्षा तावदनाशङ्कनीयैव नियतत्वेन तु विना यद्यपि लिङ्गत्वं नास्ति तथापि नियतत्वप्रतियोगिकत्वाभावान्न तत्प्रत्येव लिङ्गत्वस्य सत्ता साधारणसत्तानिबन्धनापेक्षिकत्वाभावेन तत्प्रतिपादकस्य लिङ्गशब्दस्य स्वार्थाभिधानकाले नित्यशब्दप्रतिपाद्यार्थान्तरापेक्षा निरस्ता तत्पर्यवसितस्वार्थाभिधानव्यापारस्यार्थान्तरान्वयसिद्धेर्व्यापारान्तरापत्तेः सामर्थ्यविघात इ-

१ सिद्धाविति २ पु० ना० ।

ल्याशयः । दृष्टान्तं तावद्वैधर्म्यपरत्वेन व्याचष्टे * गुरुशब्दस्य हीति * गुरुशब्दार्थस्य गर्भाधानादिपूर्वकवेदाध्यापनस्य शिष्यापेक्षात्मकलाभत्वमुपचाराच्छब्दे ऽभिहितं देवदत्तशब्देन षष्ठ्यन्तेनोपात्तो यः शिष्यसम्बन्धः सो ऽनतिरेकेण स्वार्थसत्तालाभादनाधिक्येनान्तर्णीतो यस्य गुरुशब्दस्य स्वार्थः स तथोक्तः तस्य भावस्तत्त्वम् । ननु लिङ्गत्वस्यापि गुरुत्ववत्सर्वान्प्रत्यसत्त्वेनासाधारणसत्तानिबन्धनापेक्षिकत्वसद्भावात्तद्वाचकस्य लिङ्गशब्दस्यापि गुरुशब्दवत्सम्बन्धिशब्देन नित्यसापेक्षत्वात्सामर्थ्यविघात इत्याशङ्क्याभ्युपगम्य तावत्सम्बन्धिशब्दत्वं * लिङ्गचपेक्षया न तु नित्यशब्दार्थापेक्षयेति परिहरति * ननु नित्यशब्दार्थनियतत्वं विना लिङ्गत्वायोगादस्त्येव तदपेक्षापीति कथमुच्यते लिङ्गचपेक्षयैव लिङ्गत्वं न नित्यापेक्षयेत्याशङ्क्याह * यद्यपि चेति * लिङ्गेनैव प्रतिलिङ्गत्वस्य सत्ता लिङ्गशब्दस्य सम्बन्धिशब्दत्वाय लिङ्गशब्देन विवक्षिता । न च नित्यत्वप्रतियोगिकी लिङ्गत्वस्य सत्ता प्रतीयते यथा परिणयनं विना भार्यात्वाभावे ऽपि न परिणयनं प्रति भार्यात्वस्य सत्ता किं तु पतिमेव प्रतीत्याशयः । गम्यगमकयोर्नियमलक्षणे सम्बन्धे सतीत्यर्थः । यद्वाक्षेपकस्यैवाक्षिप्यमाणेन नियतत्वादाक्षेप्याक्षेपकाभिप्रायौ गम्यगमकशब्दौ । यथा यद्यपि गुर्वादिशब्दः स्वसम्बन्धिना विना प्रवर्त्तते तथापि शिष्यादिसम्बन्धापेक्षाकृतगुर्वादिशब्दप्रवृत्तिनिमित्ता गुर्वादिशब्दस्य सम्बन्धिशब्दत्वप्रसिद्धिः तथास्य लिङ्गशब्दस्य न नियमलक्षणसम्बन्धापेक्षा कृतशब्दप्रवृत्तिनिमित्ता सम्बन्धिशब्दत्वप्रसिद्धिरित्यर्थः । ननु सम्बन्धिशब्दत्वाभावे ऽपि यौगिकत्वाद्यथा लिङ्गिशब्दस्य शब्दप्रवृत्तिनिमित्तभूतयोगसिद्ध्यर्थं प्रतियोगिलिङ्गापेक्षा तथा लिङ्गशब्दस्यापि यौगिकत्वाच्छब्दप्रवृत्तिनिमित्तभूतयोगापेक्षेति तयोर्योगश्च सम्बन्धः स च लिङ्गत्वोपायिको नियमरूप एवेति नित्यशब्दवाच्यनियमापेक्षासिद्धेः सामर्थ्ये विघात इत्याशङ्क्याह * लिङ्गीति* अयमाशयः यद्यप्यवयवयोगेन प्रवृत्तेरुभयोर्यौगिकत्वं तुल्यम। तथापि लिङ्गिशब्दस्य तद्धितान्तत्वात्प्रातिपदिकाच्च तद्धितोत्पत्तेः प्रातिपदिकार्थलिङ्गापेक्षा लिङ्गशब्दस्य तु कृदन्तत्वात्तस्य च धातोरुत्पत्तेर्द्धात्वर्थलिङ्गेन क्रियायोगनिमित्तत्वाच्छब्दप्रवृत्तिनिमित्तभूतस्य योगस्य प्रतिसम्बन्धिधात्वर्थमात्रेण सिद्धेर्नान्यापेक्षेति ॥ ननु लिङ्गशब्दस्य सम्बन्धिशब्दत्वाभावाल्लिङ्गियोगनिमित्तत्वाभावाच्च लिङ्गिनो लिङ्गचनपेक्षणे लिङ्गदर्शनमित्यभियुक्तप्रयोगो नोपपद्यतइत्याशङ्क्याह * लिङ्गचत इति * सम्बन्धिशब्दानां गुर्वादीनां समुदा-

यशक्त्यैवाध्यापनादिक्रियाजन्याद् व्याप्याद्यवच्छिन्नाध्यापयित्रादिगतातिशयवाचित्वादवयवार्थयोगनिमित्तप्रवृत्तिस्वलक्षणयौगिकत्वानुपपत्तिर्लिङ्गेन क्रियायोगनिमित्तत्वेन यौगिकस्य लिङ्गशब्दस्य सम्बन्धिशब्दत्वासम्भवे ऽपि ज्ञानाख्याया लिङ्गनक्रियाया ज्ञेयलिङ्गनिरूपणाधीननिरूपणत्वाच्छब्दप्रवृत्तिनिमित्तभूतयोगप्रतिसम्बन्धिज्ञानापरपर्यायलिङ्गनाख्यधात्वर्थनिरूपणाय ज्ञेयलिङ्गचपेक्षा सदास्तीति सामर्थ्याविघात इत्याशयः सबन्धिशब्दवच्च वाच्यासाधारण्यनिबन्धनापेक्षा नितरां प्रतिसम्बन्धिधात्वर्थनिरूपणवेलायामेव नित्यं तदपेक्षा नान्यदेति सूचयितुकाममित्युक्तमपिशब्देन क्रमः सूचितः। नन्वेवं सति नित्यशब्दाभिधेयस्य नियमलक्षणसम्बन्धस्यापि लिङ्गनक्रियासिद्ध्युपयोगित्वेन तत्कारकतया लिङ्गेनैव नित्यमपेक्षणात्तत्सापेक्षत्वे ऽपि सामर्थ्याविघातः स्यादित्याशङ्क्याह * नित्यत्वं पुनरिति * नियमाधीनत्वे ऽपि लिङ्गनक्रियायास्तदधीननिरूपणत्वाभावान्नित्यत्वनिरपेक्षेणैव लिङ्गशब्देन स्वार्थे लिङ्गलब्धे लिङ्गत्वस्य नियतत्वं विना ऽनुपपत्तेरर्थेन स्वसिद्ध्यर्थं नित्यत्वमपेक्षितं न शब्देनेत्यर्थः। लब्धेन स्वार्थेन लिङ्गेनापेक्षितमिति विग्रहः । नन्वेवं तर्हि शब्दस्य नैरपेक्ष्यात्सामर्थ्यस्याविघातः स्यादित्याशङ्क्याह * तद्धर्मतयेति * विगृहीतया षष्ठ्या लिङ्गधर्मतया नित्यत्वं लिङ्गस्य समर्प्यते लिङ्गेनान्वीयतइत्यन्वयसिद्ध्यर्थं लिङ्गस्य नित्यत्वे * सम्बन्धापेक्षायामित्युक्तं * तस्माद्भाष्यकृतो ऽपि कर्तृविशेषणमधिकारिविशेषणं वा नित्यशब्दो ऽभिमतो न लिङ्गविशेषणमित्याह * तस्मादिति * उभयत्रापि सूत्रं योजयति * नियतस्येति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति *

आख्या हि देशसंयोगात् ॥ १४ ॥

अथेत्यादिभाष्येणेदमपि सूत्रं पदोत्तरत्वेन व्याख्यातं,प्राच्यादिसमाख्याकर्तृविशेषणत्वेनाशङ्किता तत्र संस्यादिवत्समाख्याया अपि व्यभिचारदर्शनात्केन चिद्विशेषेणोपन्यास इत्याशङ्क्याह * इदानीमिति * ननु देशान्तरादागत्य प्राद्देशे वसतां प्राच्यत्वे सत्यपि होलाकाद्यनुष्ठानादर्शनात्प्राद्देशाच्च निर्गत्य देशान्तरे वसतां प्राच्यत्वाभावे ऽप्यनुष्ठानदर्शनात्कथं समाख्याया अप्यत्यन्तानुवृत्तिरित्याशङ्क्याह * सर्वे हीति * नेयं देशनिमित्ता समाख्या किं तु जात्यादिनिमित्ता ऽभिमानमात्रनिमित्ता वेत्युत्तरसूत्रे वक्ष्यमाणो ऽभिप्रायः। एतदेव पूर्वपक्षिणो विशेषणमभिमतामिति सूचयितुमत्रैवार्थे

१८८।१

ऽनुमानव्यवस्थानादिति पूर्वपक्षसूत्रं योजयति * तस्मादिति * सूत्रव्याख्यानार्थं नैतदेवमिति भाष्यं व्याचष्टे * तत्रेति * सर्वप्राच्यादिसमाख्यातपुरुषव्यक्तिवर्त्तिनस्तदसमाख्येभ्यश्च व्यावृत्तस्य जात्यादेरदर्शनान्निर्मूलस्य चाभिमानस्यायोगादित्याशयः। देशविशेषणत्वे को दोष इत्यपेक्षायां नैतदेवमिति भाष्येण सूचितं तावद्दोषमाह * देशश्चेति * ननु दिगुपानवस्थाने ऽपि विन्ध्यापेक्षया निरूढोदीच्यादिदेशव्यवस्थादर्शनान्न देशविशेषणत्वे ऽपि कश्चिद्दोष इत्याशङ्कानिराकरणार्थं दक्षिणादित्यादिभाष्यं व्याचष्टे * न चेति * देशविशेषणत्वाभिधानाभिप्रायविवरणपूर्वकं श्लोकं व्याचष्टे * समाख्यायास्तावदिति * उभयशब्दोऽन्वयव्यतिरेकाभिप्रायः।

न स्यादेशान्तरेष्विति चेत् ॥ १५ ॥

इत्याशङ्कासूत्रं पूर्वपक्षानौपयिकत्वेनायुक्तमाशङ्क्य देशनिमित्तायाः समाख्यायाः व्यभिचारित्वेन विशेषणत्वायोगादव्यभिचारिनिमित्तान्तरकल्पनार्थत्वेन पूर्वपक्षोपयोगितां दर्शयन्नवतारयति * परस्त्विति * यथैव देशसंयोगव्यभिचारलक्षणयोपपत्त्या तन्निमित्तायाः समाख्यायाः व्यभिचारो ऽभिहितः तथैव देशनिमित्तत्वायोगान्न देशव्यभिचारेण समाख्याव्यभिचार इत्यस्ति यस्य समाख्याविशेषणत्वं पक्षस्योपपत्तिलब्धपूर्वपक्षिणेत्यर्थः। कीदृशं प्रत्यवस्थानमित्यपेक्षायामाह * यदीति * सूत्रव्याख्यानार्थमिति चेदित्यादिभाष्यं व्याचष्टे * सतीति * किं तर्ह्यतन्निमित्तमित्याशङ्क्याह * तस्मादिति * अनौपाधिकसन्तानविशेषव्यवस्थितप्राच्यादिव्यवहारान्यथानुपपत्त्या ब्राह्मण्यादिवत्प्राच्यत्वादिजातिरपि कल्पयितुं शक्यते तदसम्भवे ऽपि वा सन्तानविशेषएव प्राच्यादिशब्दवाच्यो भविष्यतीत्याशयः। निमित्तान्तरासम्भवे ऽपि प्राच्यादिशब्दप्रयोगपरम्परामूलाभिमानमात्रनिबन्धना भविष्यतीत्याह * अस्तु वेति * ननु शब्दप्रयोगपरम्परैव किं निमित्तेत्याशङ्क्याह * लब्धेति * लब्धं प्राच्यादिसमाख्याख्यमाचारनिमित्तं यैरिति विग्रहः। नो ऽस्माकमित्यन्यपदार्थः। सूत्रतात्पर्यप्रदर्शनार्थं तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * १८९।१

स्याद्योगाख्या हि माथुरवत् ॥ १६ ॥

इति सूत्रमाशङ्कानिराकरणार्थत्वेनावतारयति * इत्युक्त इति * देशसंयोगनिमित्तायामित्यादिभाष्येण देशसंयोगविशेषव्य-


भिचारे ऽपि देशसंयोगमात्रस्याव्यभिचाराच्चिमित्तत्वाभिधानार्थत्वेनैतत्सूत्रं व्याख्यातं तत्र भूतादिशब्ददर्शनात्कालाविशेषावच्छेदेन देशसंयोगस्य विशेषणरूपत्वोक्ता प्रतिभाति सा च देशसंयोगनिमित्तानां तद्धितानां कालविशेषविषयत्वेनास्मृतेरयुक्तेत्याशङ्क्याह * सम्बन्धैरिति * भूतशब्देन तदागमनहेतुकः सम्बन्धो ऽभिप्रेतः । वर्त्तमानशब्देन निवासहेतुकः । गर्भसम्भवलक्षणभवहेतुकस्य प्रसवलक्षणजातत्वहेतुकस्य चोभयरूपतोक्ता । भविष्यच्छब्देन बहुशब्दः सूचितः प्रस्थानहेतुको ऽभिप्रेतः । श्लोकं व्याचष्टे * सो ऽस्यति * नन्वेवं सति देशसंयोगमात्रनिमित्ता समाख्याप्यव्यभिचाराच्छक्रोत्येव कर्त्तारं विशेषुमित्याशङ्क्याह * न चैनामिति * चिरनिर्गतस्य पुरुषस्य पुत्रादीनां पूर्वदेशगर्भसम्भवस्याप्ययोगादित्याशयः । अनेन यस्य त्वतो ऽन्यतमः सम्बन्धो नास्ति न स माथुर इति दृष्टान्तभाष्यं सूचितम् । यस्य चिरनिर्गतपुरुषपुत्रादेरतो ऽन्यतम सम्बन्धो नास्ति न स प्राच्यसमाख्यो ऽथ च होलाकादीन्करोतीति समाख्याव्यभिचारप्रतिपादनं विवृतम् । तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति * ननु मथुरामभिप्रस्थित इति भाष्यं किमित्युपेक्षितमित्याशङ्क्याह * यस्त्विति * नन्वेवं दूतविषयत्वेन कस्मान्न व्याख्यातमित्याशङ्क्याह * अप्रत्ययितेति * प्राङ्मगधाभिप्रस्थितो दूतः प्राच्यो ऽनेन दृष्टान्तेनापाद्येत न दौत्ये व्यापृतस्य होलाकाद्यनुष्ठानं दृश्यतइत्याशयः ।

कर्मधर्मो वा प्रवणवदिति ॥ १७ ॥

सूत्रं कर्माङ्गदेशविशेषणवाच्युपपदशङ्कार्थत्वेनाथेत्यादिभाष्येण व्याख्यातं तथा मन्वादिकर्तृविशेषणवत् कृष्णमृत्तिकाप्रायत्वादेर्देशविशेषणस्यापि व्यभिचारेण निरस्तत्वात्प्राच्यादिवच्च प्राक्त्वादेरपि निरस्तत्वात्केन विशेषेणोपन्यस्यतइत्याशङ्क्याह * इदानीमिति * कर्तृणामानन्त्यादसम्भवे प्राक्त्वादेरपि देशस्यैक्यादेव विशेषणोपपत्तेरित्येतावानाशयः । भाष्ये कृष्णमृत्तिकाप्रायग्रहणं प्राक्त्वादेरुपलक्षणार्थं प्राचीनप्रवणोदाहरणं च प्रागुदक्प्रवणस्यापीति व्याचष्टे * प्रागिति * तुल्यं तु कर्तृधर्मेणेति सूत्रमव्यवस्थितत्वाभिप्रायेण व्यभिचारतुल्यत्वाभिप्रायेण व्याचष्टे * तुल्यं त्विति दिक् * कृष्णमृत्तिकाप्रायप्रभृति यत्तस्य देशस्य चिह्नं तदाचारानुमेयश्रुतिगतोपपदवाक्यत्वेनाशङ्कितं तदनवस्थितत्वाद्व्यभिचाराच्च कर्तृधर्मेण प्राच्यत्वादिना श्यामत्वादिना च तुल्यमित्यर्थः ।

दिशस्तावद्देशविशेषचिह्नत्वासम्भवमुपपादयति * प्राङ्देशादिति * कृष्णमृत्तिकादेरनवस्थितत्वं यथेत्यादिभाष्योक्तमुपपादयति * मृत्तिकाद्यपीति * तत्र दाक्षिणदेशे ऽन्यत्र च देशान्तरे तत्सममित्यर्थः । व्यभिचारानवस्थितत्वयोरितरेतरनैरपेक्ष्ये ऽप्युपपादननिराकरणार्थत्वं दर्शयितुं तस्मादित्युपसंहारभाष्यं तावद्व्याचष्टे * होलाकादीति * कृष्णमृत्तिकाप्रायेणापीति व्यभिचार [illegible] * पुरुषापेक्षयेति * अत्राप्युपसंहारभाष्यमाकृत्या योजय [illegible] स्मादिति * कर्तृविशेषवद्देशो ऽपि होलाकादिव्यवस्थाकरण न भवतीत्यर्थः ॥ १९०।१

इति श्रीमन्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तोभयाभिभट्टमाधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां प्रथमाध्यायस्य तृतीयस्मृतिचरणपूर्वार्द्धम् ॥



न्यायसुधायाम् ।

प्रथमाध्यायस्य तृतीयपादस्य उत्तरार्धो भागः ।

॥ साधुपदप्रयोगनियमाधिकरणम् ॥ ९ ॥

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात्॥ १८॥

अत्र भाष्यकृता गोगाव्यादिशब्दानुदाहृत्य किमेते सर्वएव सास्नादिमतोऽर्थस्य वाचकाः सन्तो वाक्यार्थे प्रमाणम् उत एक एवेति सास्नादिमतो वा पदार्थस्य कार्यायां वाक्यार्थप्रमायां कारणं किमेते सर्व एवोत एक एवेति सन्देहमुपन्यस्य प्रयोगभेदेनाविरोधात्सर्वेषां व्रीहियवादिवद्विकल्पेन प्रामाण्योपपत्तेः । सिद्धान्ताभावेन सन्देहानुपपत्तिमाशङ्क्य किमत्रेति भाष्येण शक्त्या विना शब्दस्यार्थप्रत्यायकत्वं सम्भवत्युत नेति सन्देहकारणमुक्त्वा सर्वइत्यादिना भाष्येण पूर्वपक्षः कृतः । तत्र यववराहाधिकरणे शास्त्रस्थप्रयोगबलेन लौकिकप्रयोगबाधस्योक्तत्वात्पूर्वपक्षानुपपत्तिमाशङ्क्याह *एकस्मादिति * व्यवस्थितशास्त्रस्थप्रयोगबलेनाव्यवस्थितलौकिकप्रयोगबाधमङ्गीकृत्य यवादिशब्दानां दीर्घशूकाद्यर्थनिर्धारणं यत्प्रतिपादितं तद्विकल्पदोषभयादनेकादृष्टशक्तिकल्पनाप्रसङ्गाद्गौणमुख्यविभागाश्रयणाच्चेति योज्यम् । एतत्कारणत्रयोपपादनायैकस्मादित्युक्तं, यवैर्यजेतेत्येकस्माद्यवपदाद्दीर्घशूकैर्वा यष्टव्यं प्रियङ्गुभिर्वेत्यनेकार्थप्रतीतेर्विकल्पोऽनेकशक्तिकल्पना ह्येकस्य शब्दस्यापद्येत एकस्मिन्नर्थे शब्दस्य शक्तौ कल्पितायां गौणत्वेनेतरत्र प्रयोगोपपत्तेर्नानेकशक्तिकल्पनं युक्तम् इह तु गोशब्दश्रवणात्ततोऽर्थप्रतीतिर्गवीशब्दश्रवणे तस्मादिति व्यवस्थोपपत्तेर्न तावच्छक्तुर्विकल्पापत्तिः । चक्तुरप्ययमेव शब्दः प्रयोज्य इति नियमाभावात्प्रसज्यमानोऽपीच्छया विकल्पेन दोषमावहति यत्र च कारणात्कार्यदर्शनं तत्र शक्तेरस्तित्वं सम्प्रतीयतइति न्यायेन शक्तेः कारणाश्रितत्वेन शब्दसमवेतत्वात्तद्भेदे युक्त एव भेदो गाव्यादीनां चार्थान्तरे मुख्यगौणाभावात्सास्नादिमति गौणत्वायो-

गात् शब्दसादृश्यमात्रेण शब्दस्य शब्दान्तरार्थप्रत्यायकत्वे शालाशब्दस्यापि मालाशब्दार्थप्रत्यायकत्वापत्तेर्मुख्यत्वमवश्यं प्रतीयतइति वैषम्यं, प्रियङ्गुदीर्घशूकयोश्चैकपदोक्त्यार्विकल्पे तस्यैव यवपदस्य युगपदेकार्थापेक्षया प्रामाण्यमर्थान्तरापेक्षया चाप्रामाण्यमित्यत्यन्तविरोधं वक्तुम् * एकस्मादित्युक्तम् * केषां चिद्दीर्घशूकेषु प्रयोगो ऽन्येषां प्रियङ्गुष्वित्यनेकार्थप्रतिभानकारणमुक्तम् । यववराहाधिकरणन्यायमुक्त्वा तद्वैषम्यमत्रैव दर्शयन् पूर्वपक्षयति * यत्र पुनरित्यादिना * साधुत्वेनावधार्यन्तइत्यन्तेन तत्र सत्यप्येकविषयानेकशब्दत्वे ऽर्थसाधनत्वात्साधुत्वेनावधार्यन्तइति वक्ष्यमाणसाध्यालोचनेन शक्तिभेदोपपत्तेरविरोधादिति च पञ्चमीद्वयं योज्यं, शब्दाश्रितत्वाच्छक्तेस्तद्भेदे शक्तिभेदौचित्यं समवायिशब्देनोक्तम् । अर्थविशेषावच्छिन्नशब्दाश्रितैकशक्तिकल्पनामात्रेणोभयनियमोपपत्तेरनवच्छिन्नशक्तिकल्पने वा शक्तिद्वयकल्पने ऽप्यर्थस्य सर्वशब्दवाच्यत्वापत्तेः शब्दस्य च सर्वार्थवाचकत्वापत्तेरर्थाश्रितशक्त्यभावात् अर्थैक्ये ऽप्येकस्यानेकशक्तिकल्पनादोषो नास्तीत्याशयः । यवादिविधेश्च शास्त्रस्थप्रयोगेण दीर्घशूकादिविषयत्वावधारणात्तद्विरुद्धलौकिकप्रयोगावगतप्रियङ्ग्वादिविषयत्ववाचोदाहृतगवादिशब्दप्रयोगमात्रेण गाव्यादिशब्दानामप्रयोगत्वावगमात्सर्वपर्य्यायप्रयोगानियमाच्चाविरोधान्न शास्त्रस्थप्रयोगेण लौकिकप्रयोगबाध इति शास्त्रस्थेत्यस्यार्थः । अस्यैव पूर्वपक्षहेतुद्वयस्य यववराहाधिकरणन्यायवैषम्यप्रतिपादनार्थत्वप्रदर्शनार्थं सत्यपि विरोधे शास्त्रस्य साध्वसाधुत्वप्रतिपादनव्यापाराभावाच्छास्त्रस्थप्रयोगस्य निर्मूलत्वेन लौकिकप्रयोगाबाधकत्वादपि सर्वे साधुत्वेनावधार्यन्तइति उत्तरोपपत्तिर्वक्ष्यमाणसाध्यव्यवधायकरूपेण पदपूर्वकत्वाच्चेति स्वोपपादकोपन्यासपूर्वमुपन्यस्ता अनेन व्याकरणस्मृत्यप्रामाण्येन पूर्वपक्षकरणाद्विचारस्य पादाध्यायसङ्गतिदर्शिते। अनन्तराधिकरणसङ्गतिस्त्वीदृगसम्भवप्रतिपादनार्थमेव वेत्यत्र होलाकाधिकरणोक्तव्यक्त्याकृत्यादिवाच्युपपदासम्भवोपजीवनेनात्र पूर्वपक्षोत्थानाद्वक्ष्यते व्याकरणशास्त्रव्यापारस्य पदपूर्वकत्वोपपादनार्थं वाक्यात्मकत्वं विशेषणम् । अनेन च व्याकरणशास्त्रस्य लोकप्रसिद्धपदप्रयोगादुत्पत्तेः। साध्वसाधुव्यवस्थायाः शास्त्राविषयत्वायोगादित्येवम्प्रयोगोत्पत्त्यशास्त्रत्वादिति सूत्रावयवो व्याख्यातः । लोकप्रसिद्धसाधुशब्दवशात् व्याकरणशास्त्रं प्रवर्त्तते तस्माच्च लौकिकशब्दानां साध्वसाधुत्वनिर्णय इतीतरेतराश्रयोपपादनार्थम् * तथा हीत्युक्तम् * शब्दरूपश्चासावर्थश्चेत्येवं वस्तुव-

चनत्वेनार्थशब्दो व्याख्येयपदार्थज्ञानाय वा शब्दशास्त्रस्य पदरूपशब्दापेक्षाप्रदर्शनार्थो ऽर्थशब्दः । नन्वेवमप्यर्थप्रतिपादकत्वेन गोगाव्यादिशब्दानां लोके प्रसिद्धत्वात्साधुत्वं भेर्यादिशब्दानां त्वर्थप्रतिपादकत्वाप्रसिद्धेरसाधुतेति व्यवस्थोपपत्तेः शब्देषु न व्यवस्था स्यादित्ययुक्तमित्याशङ्क्य * अत इत्युक्तम् * लोकप्रयुक्तेष्वेव गोगाव्यादिषु साध्वसाधुत्वव्यवस्थानिरासार्थमेतदित्याशयः । नन्वेवं सत्याचारेण स्मृतिबाधः स्यात्स च पूर्वोक्तस्मृतिबलावलीयस्त्वविरुद्ध इत्याशङ्क्य * वाक्यार्थेषु हीत्युक्तम् * तत्र आचारानपेक्षायाः स्मृतेस्ततो बलीयस्त्वमिह तु स्मृतेराचारापेक्षत्वेन विपरीतबलाबलक्रमत्वाल्लोकादेव साध्वसाधुता निर्णेतव्येत्याचारेण स्मृतिबाधो युक्त एवेत्याशयः । ननु लोकस्य सङ्कीर्णव्यवहारित्वात्साध्वसाधुत्वनिर्णायकत्वं न युक्तमित्याशङ्क्य * वाचकेत्युक्तम् * अर्थप्रत्यायको यो गोगाव्यादिशब्दः स साधुरप्रत्यायको भेर्यादिशब्दश्चासाधुरिति व्यवस्था लोकसिद्धेवेत्यर्थः । ध्वनिमात्राणीत्यनेनैतदेव विवृतम् । मात्रिका वर्णसमाम्नायः । ननु वेदादिविद्यास्थानप्रयुक्तेष्वेव गवादिशब्देषु साधुत्वप्रसिद्धेर्गाव्यादिशब्देषु च तत्राप्रयुक्तेष्वसाधुत्वप्रसिद्धेर्लोके चैवंविधव्यवस्थानुपलम्भेन ततो निर्णयः सम्भवतीत्याशङ्क्य साध्वसाधुशब्दयोरर्थप्रत्ययसाधनत्वासाधनत्वनिमित्तत्वेन रूढित्वाभावाल्लोके च भेर्यादिशब्दानामप्रत्यायकत्वनिश्चयात् । गोगाव्यादिशब्दानां प्रत्यायकत्वनिश्चयात्सिद्धैव व्यवस्थेति * तेनेत्यादिनोक्तम् * अपशब्दत्वमप्यर्थप्रत्ययापगमनिमित्तत्वाद्भेर्यादिशब्देष्वेव व्यवस्थितमित्यनर्थकत्वादित्यनेनोक्तम्। नन्वेकेनैवार्थप्रत्ययसिद्धेः कथम्मेकस्मिन्नर्थे अनेकेषां साधुतेत्याशङ्क्य गवादिदृष्टान्तेन निरस्ता एवं वाचकशक्तिभेदोपपत्तिरविरोधादिति च पञ्चमीद्वयान्वयायैतावद्ग्रन्थतात्पर्यमेकवाक्यतया व्याख्यातम्। यद्वा तत्र वाचके शक्तिभेदोपपत्तिप्रतिरोधत्वं पर्यालोच्य यो निर्णयो भवति सर्वेषां साधुत्वमित्येवंरूपः स्वीकार्यः । न तु शास्त्रस्थप्रयोगबलेन लौकिकप्रयोगबाधं पर्यालोच्येति लुप्तलोपे पञ्चमीद्वयमङ्गीकृत्य पूर्वफक्किकागतनिर्णयशब्दानुषङ्गेण वैषम्यप्रतिपादनार्थत्वेनाविरोधादित्यन्तं ग्रन्थं व्याख्याय ननु वाचकशक्तिभेदोपपत्तौ शास्त्रस्थप्रयोगाविरोधे च सत्यपि व्याकरणशास्त्रेण गवादिशब्दानामेव साधुत्वान्वाख्यानेनेतरेषामसाधुत्वप्रतिपादनान्न तद्विरुद्धाचारबलेन सर्वेषां साधुत्वं युक्तमित्याशङ्कानिराकरणार्थतयोत्तरग्रन्थो व्याख्येयः । अत्र भाष्यकृता सर्व इति ब्रूम इत्यनेन शब्देषु न व्यवस्था स्यादिति सूत्रा-

वयवं सर्वशब्दानादित्वपूर्वपक्षप्रतिज्ञानार्थत्वेन व्याख्याय कुत इत्यादिनार्थप्रत्ययान्यथानुपत्त्या गाव्यादिशब्दानामपि सास्नादिमतार्थेन सह वाच्यवाचकसम्भवं प्रश्नपूर्वमुपपाद्याशक्तिजत्वेनापभ्रंशत्वशङ्कामबाध्यस्मृत्या निराकृत्य कर्त्रस्मृत्या च सामयिकत्वाशङ्कां सम्बन्धग्रन्थे निराकृतामुक्त्वा तस्मात्सर्वे साधव इत्युपसंहृत्य सर्वेषामर्थवत्त्वात्सर्वैर्भाषितव्यमिति पूर्वपक्षप्रयोजनमुक्त्वा तेन सर्वेषां दृष्टार्थसाधनत्वाविशेषे ऽप्यदृष्टार्थो गवादिशब्दनियमो भविष्यतीत्याशङ्कानिरासार्थत्वेन प्रयोगोत्पत्तेरुच्चारणानियमस्याशास्त्रीयत्वादित्येवं प्रयोगोत्पत्त्यशास्त्रत्वादितिसूत्रावयवो व्याख्यातः। तत्र भाष्यतात्पर्यविवेकार्थं दृष्टार्थत्वे साधनत्वाद् गाव्यादिशब्दानामसाधुत्वा-
१९१।६ सम्भवमुपपादितमुपसंहरति * ततश्चेति * न च दृष्टार्थसाधनत्वनिबन्धनत्वात् साधुशब्दस्य गाव्यादिशब्दानां तदभावात्साध्वसाधुव्यवस्था भविष्यतीत्याशङ्कते * अदृष्टेति * साध्वसाधुव्यवस्थेत्यर्थः। यद्वा श्रेयोरूपादृष्टसानधत्वनिबन्धना साधुता प्रत्यवायरूपादृष्टसाधनत्वनिबन्धनात्वसाधुतेत्यर्थः साधूनामेवादृष्टसाधनत्वमदृष्टसाधनत्वमेव वा साधुत्वमित्युभयथापि व्यवस्था वेदाधीना न च सा वेदवाक्यैर्निर्दिष्टा अदृष्टसाधनत्वं वान्यप्रमाणविषय एव न भवतीति निराकरोति * वेदवाक्यैरिति * न च दृष्टसाधनत्वस्य प्रमाणान्तराविषयत्वे ऽपि तद्धेतुभूतयोः साध्वसाधुत्वयोः प्रमाणान्तरावगतयोर्वेदेनादृष्टसाधनत्वबोधो भविष्यतीत्याशङ्क्याह * प्रत्यक्षेण तावदिति * उपमानस्य सादृश्यमात्रविषयत्वेनानाशङ्कनीयत्वादर्थप्रत्यायन्यथानुपपत्तेश्चान्यार्थापत्त्या सर्वेषां वाचकत्वप्रतीतेर्व्यवस्थापकत्वस्य दूरनिरस्तत्वादनिराकरणम्। ननु प्रमाणान्तरासम्भवे ऽपि वेदवाक्यं साधुत्वासाधुत्वग्राहकं भविष्यतीत्याशङ्क्याह * वेदेति * साध्वसाधुत्वयोः शब्दावान्तरजातिरूपत्वे वस्तुस्वरूपान्वाख्यनपरमेते साधवस्त्वन्य इत्येवं रूपं वाक्यं कल्प्यं धर्मान्तरत्वे साधुत्वगुणान्वाख्यानपरमसाधुत्वदोषान्वाख्यानपरं तस्य च पुरुषार्थानुबन्धित्वाभावेनानर्थक्यापतेरध्ययनविधिना तात्पर्यानवधारणात्प्रामाण्यं न युक्तमित्याशयः। आत्मस्वरूपप्रतिपादकानां तूपासनादिविध्यपेक्षितार्थाभिधानात्सरस्वतीविनशनादिना वाक्यानां सारस्वतसत्रादिकर्म्मविशेषौपयिकत्वानामानर्थक्यापत्तिरिति वैषम्यसूचनार्थं विधीत्युक्तम्। अस्तु तर्हि विधिनिषेधरूपमेव वाक्यं साध्वसाधुत्वप्रतिपादकमित्याशङ्क्याह * न वेति * ननु माभूत्स्वरूपेण विधिनिषेधविषयत्वं

साधुभिरभिदध्यादसाधुर्भिर्नेत्यभिधानकरणत्वेन तु भविष्यतीत्याशङ्कते * अभिधेति * गोशब्देनाभिदध्यादश्वशब्देनाभिदध्यान्न गावीशब्देनाभिदध्यान्न गोणीशब्देनाभिदध्यादित्यादि स्वरूपा प्रत्येकं वा विधिनिषेधा कल्प्यन्ते साधुभिरभिदध्यादसाधुर्भिर्नेति द्वावेव वा तत्रानन्त्यापत्तेराद्यं पक्षं तावद् दूषयति *नेति * कथं कल्पनानुपपत्तिरित्यपेक्षायां व्याकरणस्मृतिमूलत्वेन कल्प्यत्वादनन्तानां चाध्येतुमशक्यत्वादनुपपत्तिरित्याह * यो हीति * यो हि व्याकरणप्रणेता तद्गुणतया य एव पदानां प्रतिपत्तौ प्रतिपदं पाठ इति महाभाष्यकारोक्तन्यायेन साधूनां प्रातिपदं पाठन्नाध्यवस्यतीत्यर्थः। स एकैकस्य शब्दस्य गावीगोण्याद्यनेकापशब्ददर्शनात्तेषां विशेषमाह*अपशब्दाश्चेति*कलञ्जादिवदिति वैधर्म्यदृष्टान्तं विवृणोति *व्रीह्यादीनि हीति*कलञ्जादिग्रहणेन तुल्यन्यायतया व्रीह्यादीनां विधेयत्वसम्भवसूचनार्थं व्रीह्यादिग्रहणम्। अनन्तरोक्तव्यतिरेकमुखेन द्वितीयपक्षं निराकरोति * न त्विति * सर्वानुगतैकधर्म्ममात्रोपलक्षणार्थो जातिशब्दः तत्र एकोपलक्षणत्वाभावेनैकविधिनिषेधविषयत्वासम्भवमुपपादयति * न तावदिति * अयमाशयः न तावच्छब्दत्वाति- १९२।१
रिक्ता सर्वसाधुशब्दानुयायिन्यासाधुभ्यो व्यावृत्ता विलक्षणैकाकारप्रत्ययवेद्या साधुत्वजातिरसाधुत्वजातिर्वा साधुशब्दानुगता साधुभ्यो व्यावृत्तोपलभ्यते न वान्यो ऽपि कश्चिद्धर्मः साध्वसाधुशब्दाभिधेयः सम्भवति तथा हि न तावच्छब्दव्यतिरिक्तस्येन्द्रियलिङ्गादेः शब्दस्यापि वा वक्तृज्ञानविवक्षाविषयप्रत्यायकत्वं साधुत्वं कस्य चिदिष्टम्। न च शब्दस्यार्थप्रत्यायकत्वं साधुत्वं गाव्यादिशब्देष्वप्यापत्तेः। न च शब्दस्य शक्त्यर्थप्रतिपादकत्वं साधुत्वं गङ्गायां घोषो ऽग्निर्माणवक इत्यादौ गङ्गाग्निशब्दयोस्तीरमाणवकादिषु शक्त्यभावे ऽपि तत्र साधुत्वप्रसिद्ध्यर्थान्तरविषयशक्त्या अर्थान्तरविषयसाधुत्वाभ्युपगमे गोणीशब्दस्याप्यावपनविषयशक्तिसद्भावात् सास्नादिमति साधुत्वापत्तिः देवदत्तादिशब्दानां च संस्कृतेनार्थप्रतिपादनं, न च शब्दस्यार्थप्रत्यायकत्वं साधुत्वं गाव्यादिशब्देष्वप्यापत्तेः। न च शब्दस्य शक्त्या अर्थप्रतिपादकानां शक्त्यभावादसाधुत्वापत्तिः। स्नुषादिशब्दानां पुत्रभार्यादिवाचिता पुत्राद्यनभिधाय तद्विशिष्टभार्याद्यभिधानशक्तेः पुत्रादौ शक्तिसद्भावात्साधुत्वापत्तिः। अर्थविषयानादिप्रयोगत्वे तु साधुत्वलक्षणे गाव्यादिशब्दानामपि सास्नादिमदर्थविषयप्रयोगावश्यस्मरणेनानादित्वावगमात्साधुत्वमशक्यं निराकर्तुं स्वाभाविकार्थपरत्वमपि प्रतीतिप्रयोगाविशेषा-

द्रवादिशब्दवद्गाव्यादिशब्देष्वपि तुल्यं लक्षणानुगमो ऽपि च सिद्धेरुभयानर्थक्यमाशङ्क्य चम्पतीत्यादिशब्देषु वृद्धाप्रयुक्तत्वेनासाधुतया ऽभिमतेषु भावान्न साधुत्वलक्षणमिति न कथं चित् साधुत्वं निरूपयितुं शक्यमनेनैव मार्गेणासाधुत्वमपि निराकार्यमिति एतदेव विवृणोति *अविभक्ता हीति* अतश्चैकोपलक्षणाभावात्सामान्यरूपेण साध्वसाधूनां विधिनिषेधविषयत्वानुपपत्तेः । व्यक्तिरूपेण विधिनिषेधविषयत्वानुपपत्तेः । पूर्वोक्तमेव विधिनिषेधानन्त्यप्राप्तमित्युपसंहरति * तेनेति * ननूपलक्षणान्तरासम्भवे ऽपि स्वाभाविकार्थपरत्वलक्षणसाधुत्वतद्विपर्ययलक्षणासाधुत्वोपलक्षणयोगेन विधिनिषेधविषयत्वं भविष्यतीत्याशङ्क्याह * न चेति* अर्थप्रत्यायनोद्देशेन सर्वेषां प्रयोगदर्शनेनार्थप्रत्यायनार्थत्वावसायादर्थप्रत्ययनार्थत्वलक्षणस्य वाचकत्वस्याव्यावर्त्तकत्वात्तद्विपर्ययलक्षणस्य वा वाचकत्वस्यासत्वान्नोपलक्षणत्वं सम्भवतीत्याशयः। ननु गाव्यादिशब्दाव्यावर्त्तकत्वे ऽपि प्रसिद्धावाचकत्वभेर्यादिशब्दव्यावर्तकत्वाद्वाचकत्वस्य विधेयशब्दोपलक्षणत्वोपपत्तेरवाचकत्वस्य निषेध्यभेर्यादिशब्दोपलक्षणतोपपत्तेस्तन्निबन्धनौ विधिनिषेधौ भविष्यत इत्याशङ्क्याह * वाचकैरिति * प्राप्ताप्राप्ततया विधिनिषेधविषयत्वाभावे दृष्टान्तमाह * न हीति * द्रवदव्यमात्रोपलक्षणार्थमुदकग्रहणम् । ननु विधिनिषेधरूपश्रुतिमूलानपेक्षव्याकरणपरम्परामात्रेण साध्वसाधुविवेकसिद्धेर्विधिनिषेधनिराकरणमनर्थकं मूलश्रुत्यपेक्षायामपि वा साध्वनुशासनात्मकत्वेन व्याकरणस्य साधुविधिमात्रापेक्षत्वादसाधुनिषेधनिराकरणमनर्थकमित्याशङ्क्याह * अवश्यं चेति * निर्मूलत्वे अन्धपरम्परान्यायापत्तेर्न साध्वसाधुविवेकसिद्धिरित्याशयः । साधुविधानेनासाधुवर्जनसिद्धेरसाधुनिषेधेन वा साधुप्रयोगसिद्धेरुभयानर्थक्यमाशङ्क्य * संयोगेत्युक्तम् * विधेयेष्टसंयोगो विधेः फलं निषेध्यानिष्टसंयोगो निषेधस्येत्यर्थः । ननु उपलक्षणमूलत्वे निषेधमूलसाध्वनुशासनं न युक्तमित्याशङ्क्याह * त्रिष्वपि चेति*साधूनामसाधुभ्यो ऽल्पत्वाद्बहुवस्थितत्वाच्च सौकर्यम् । एतदेव विवृणोति * यदीति * यथा पञ्चनखानाम्मध्ये पञ्चैव शशादयो भक्ष्या इति नियमे कृते ततो ऽन्येषां श्वादीनामभक्ष्यत्वं गम्यते तथा गवादय एव साधव इति नियमे कृते ऽन्येषामसाधुत्वावगतिरित्यर्थः । एतदेवोपसंहरति * स एष इति * प्रासङ्गिकं व्याकरणस्य त्रिविधश्रुतिमूलत्वे ऽपि साध्वनुशासनमात्रात्मकत्वसम्भवमुपसंहृत्य प्रकृतं मूलश्रुत्यनुमानासम्भवमुपसंहरति * नन्वि-

ति * मूलासम्भवमेव द्रढयितुं व्यवस्थापकोपपदासम्भवं पूर्वाधिकरणोक्तमत्रापि योजयन्नाह * इदमिति * एवमेकोपलक्षणासम्भवेन विधिनिषेधासम्भवमुक्त्वा विधिविषयासम्भवादपि विध्यसम्भवमाह * अथ प्राप्तश्चेति * अनेन च शब्दप्रयोगस्य लोक- १९३।४
व्यवहारार्थत्वेनैवोत्पत्तेः। सिद्धेरशास्त्रविषयत्वादित्येतत्सूत्रावयवो व्याख्यातः। नन्वत्र महावार्त्तिककारेण सिद्धे शब्दार्थसम्बन्धे लोकतो ऽर्थे प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्म्मनियमो यथा लौकिकवैदिकेष्विति व्यवहारलक्षणेनैवार्थेन साध्वसाधुशब्दप्रयोगे आक्षिप्ते धर्म्मार्थं शास्त्रेण साधुनियमः क्रियते यथा लोके क्षुत्प्रतीघातार्थं प्राप्ते भक्षणे भक्ष्याभक्ष्यनियमो वेदे वा पयोव्रतं ब्राह्मणस्येत्यादिवदिति नियम इति वदता समाधानमुक्तमित्याशङ्कते * अथेति * धर्म्मजिज्ञासापद्धवेन धर्म्मस्य नियम इति षष्ठीविग्रहे ऽपि सम्बन्धमात्रोत्पन्नायाः षष्ठ्यास्तादर्थ्यलक्षणविशेषनिष्ठत्वसन्दर्शनार्थं धर्मायेति चतुर्थीनिर्द्देशः। साधूनां नियमाविषयत्वासम्भवेनैतन्निराकरोति * तदिति * नित्यप्राप्तस्य नियमाविषयत्वासम्भवे हेतुमाह * यस्य हीति * ननु गाव्यादिभ्यो ऽप्यर्थप्रत्यय सिद्धेस्तत्प्रसक्तौ गवादिशब्दस्य पाक्षिकत्वापत्तेर्गाव्यादिनिवृत्त्यर्थो नियमो भविष्यतीत्याशङ्क्याह * यस्यापीति * गाव्यादिशब्दानां साध्वसाधुत्वपक्षद्वये ऽपि व्यावर्त्यत्वायोगादित्याशयः। एतदेवोपपादयितुं विकल्पयति * कीदृशश्चेति * उभयत्र दोषमाह * यदीति * न च साधूनामप्यर्थप्रत्ययहेतुत्वादस्तिप्रसक्तिरित्याशङ्क्याह *यदि हीति* शब्दव्यापारसाध्यमर्थप्रतिपादनं, भाषणं नार्थप्रतिपादनमात्रं शब्दस्य च मुख्यार्थे साक्षाद्व्यापारो गौणलाक्षणिकयोस्त्वभिधेयसादृश्याविनाभावद्वारा गाव्यादीनां तु कथं चिद्व्यापारालाघवशब्दव्यापारसाध्यार्थप्रतिपादनात्मके भाषणे हेतुतास्तीत्याशयः। ननु साधूच्चारणायैव प्रवृत्तस्य प्रमादेनाशक्त्या वा प्रसज्यमानस्यासाधोर्निवृत्त्यर्थो नियमो भविष्यतीत्याशङ्कते * अथेति *प्रमादाशक्तिजानां दोषाणां परिहर्त्तुमशक्यत्वात्तन्निवारणमनर्थकमिति परिहरति * तदसदिति * नन्वव्यग्राणां शक्तानामपि १९४।१
च गाव्यादिशब्दप्रयोगदर्शनादप्रयुक्ताभिधानमयुक्तमित्याशङ्कते * दृष्ट इति * मत्पक्षे गाव्यादिशब्दानामप्यर्थप्रतिपादने व्यापारसद्भावाद्युक्ता प्रसक्तिः। त्वत्पक्षे तु तेषां कथं चिद्व्यापाराभावान्न तावच्छब्दव्यापारसाध्यार्थप्रतिपादनात्मके भाषणे प्रसक्तिः। यथा कथं चिदर्थप्रतिपादने तु प्रसक्तस्य गाव्यादेर्निवृत्त्यर्थं नियमाभ्यु-

पगमे अक्षिनिकोचादेरपि प्रसक्तेस्तन्निवृत्त्यर्थो नियमः कल्प्यः, ततश्च शब्दव्यतिरिक्तसर्वप्रमाणोच्छेदः स्यादित्यभिप्रायेण परिहरति * उच्यतइति * निवृत्त्यर्थत्वे च नियमत्वं व्याहन्येतेत्याह * न चेति* साध्वसाध्वोश्च द्वयोर्नित्यप्राप्त्यभावात्परिसंख्या युक्तेत्याह * नियमेति * किं चादृष्टार्थस्य यागादीष्टसिद्ध्यर्थं पुरोडाशादिद्रव्यनियमस्तत्प्रकृतित्वादिनियमस्तदपेक्षितावघातादुपायनियमश्च युक्तः। शब्दप्रयोगस्य तु परप्रतिपत्त्यर्थत्वेन दृष्टार्थत्वान्न तत्साधनसाधुनियमो युक्त इत्याह * न चेति * नन्वेकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति शब्दप्रयोगस्य स्वर्गसाधनत्वावगमात्तदन्यथानुपपत्तिरस्त्येवापूर्वकल्पनायां प्रमाणमित्याशङ्क्याह * परार्थत्वाच्चेति * ननु यथा दृष्टार्थस्यापि भोजनादेः आयुष्यं प्राङ्मुखो भुङ्क्तइत्यदृष्टार्थः । प्राङ्मुखत्वनियमस्तथा दृष्टार्थस्यापि शब्दप्रयोगस्यादृष्टार्थः साधुनियमो भविष्यतीत्याशङ्क्याह * न चेदमिति * शब्दादीनां विषयाणां गोचरे समुदाये तन्मध्यइत्यर्थः। शब्दस्य तावन्नियमजन्यादृष्टाश्रयत्वस्य सम्भवमुपपादयति * शब्दस्येति * कर्तृत्वेन परार्थस्यापि स्वर्गकामादेः कर्म्मफलभोक्तृत्वेन प्राधान्यस्यापि भावेनापूर्वाश्रयत्वदर्शनात्तद्वैषम्यप्रदर्शनार्थम् * अत्यन्तग्रहणम् * यत्पुनः परार्थस्याप्याहवनीयादेस्सम्मार्गादिजन्यापूर्वाश्रयत्वप्रदर्शनात् * दृष्टार्थग्रहणम् * नन्वर्थस्य भाषणं प्रति प्राधान्यादपूर्वाश्रयत्वं भविष्यतीत्याशङ्क्याह * सत्यपि चेति * क्रत्वङ्गभूतानामप्यर्थानामर्थाक्षिप्तस्याभिधानस्यापि वैधत्वेन केवलदृष्टार्थत्वान्नापूर्वेणोपयोग इत्याशयः । ननु श्रोतुरनुष्ठेयादृष्टार्थक्रियाफलभोक्तृत्वयोग्यताधानायापूर्वापेक्षणात्तदाश्रयत्वं भविष्यतीत्याशङ्क्याह * श्रोतुः पुनरिति * शब्दार्थविषययोस्तु श्रोतृबुद्ध्योः क्षणिकत्वान्नापूर्वाश्रयत्वशङ्केत्याह * बुद्ध्योश्चेति *वक्तुरपि बुद्धिवदगुणभूतत्वान्नापूर्वाश्रयतेत्याह*वक्तेति*ननु कामधुक्शब्देन शब्दप्रयोगस्य फलसाधनत्वावगमात्प्रयोक्तुः फलभाक्त्वात्प्राधान्यं भविष्यतीत्याशङ्क्याह * नेति * स्वर्गकामादिशब्दात्काम्यौपयिकत्वावगतेस्तदनुरोधेन क्रियाफलभाक्त्वावगतिः। इह तु साधुशब्दप्रयोगस्य फलसाधनत्वमात्रं प्रतीयते तच्चार्थवादमात्रत्वेनोपपत्तेर्न प्रयोक्तुः फलभाक्त्वमाक्षिपतीत्याशयः । यदि वात्र वक्तुः कामधुगीति षष्ठी स्यात्ततः सप्तदश वैश्यस्येत्यादिवत् षष्ठ्युक्तसम्बन्धसामान्यस्यापेक्षावशात्स्वस्वामिलक्षणविशेषरूपत्वप्रतीतेः प्राधान्यं स्यान्न त्वसा-
१९५।१ वस्तीत्याह * न चेति * ननु यथा कामिपदाद्यभावे ऽपि प्राङ्मुखो

ऽन्नानि भुङ्क्षीतेत्याख्याताक्षिप्तस्य भोक्तुर्गुणभूतस्य दिङ्नियमापूर्वाश्रयत्वं तथात्रापि साधुशब्दप्रयोगाक्षिप्तस्य प्रयोक्तुः। साधुनियमापूर्वाश्रयत्वं भविष्यतीत्याशङ्क्याह * यत्विति * क्रमिपदाद्यभावे ऽपि भोजनं प्रति भोक्तुर्लोकादेव प्राधान्यावगतेरपूर्वाश्रयत्वं युक्तमिति भावः। अपूर्वाश्रयत्वमुच्चारणस्यानाशङ्क्यमेवेत्याह * स्वरूपेण पुनरिति * अतो विषयाभावाद्व्यवस्थाभावाददृष्टार्थत्वाभावाच्च नियमानुपपत्तेस्साधुनियमार्थस्य व्याकरणस्य वेदमूलत्वायोगाच्छास्त्रेण धर्म्मनियम इति यन्महावार्त्तिककारेणोक्तं तदयुक्तमित्युपसंहरति * एवं चेति * अनेन च साधुशब्दप्रयोगाणामुत्पत्तिरस्मादिति व्युत्पत्त्या व्याकरणं प्रयोगोत्पत्तिशब्देनाभिप्रेत्य तस्याः शास्त्रमूलत्वाच्छब्दव्यवस्थानियमो न प्रयोजनमिति सूत्रं योजितम्। ननु स्वयमेवैतस्य वेदवच्छास्त्रत्वं भविष्यतीत्याशङ्क्याह * न चेति * अत्रापि प्रयोगोत्पत्तेर्व्याकरणस्य शास्त्रत्वाभावादिति योज्यं, साधितं चास्य स्वातन्त्र्यं कल्पसूत्राधिकरणइत्याह * तदुक्तमिति * एतदेव विवृणोति * न हीति * यद्वा पौरुषेयत्वात् व्याकरणस्य वक्त्रभिप्रायमात्रपर्यवसानेनार्थपरत्वाभावात्साधुप्रयोगनियमं प्रत्यशास्त्रत्वादिति षष्ठेन प्रकारेण योज्यमित्याह * सर्वत्र हीति * स्मृतिशास्त्रान्तरसम्वादाभावादिति सप्तमीं योजनामाह * न चेति * एतदेव विवृणोति * प्रायेणेति * अस्तु तावत्स्मृत्यन्तरेणासम्वादः परस्परमपि व्याख्येयव्याख्यानग्रन्थानां न सम्वादो ऽस्तीत्याह * परस्परेण चेति * सूत्रवार्त्तिकभाष्येषु ये पाणिनिकात्यायनपतञ्जलय आचार्यास्ते विगीतवचना इत्यर्थः। कीदृशं विगानमित्यपेक्षायां निःप्रयोजनं व्याकरणं सूत्रकृतो ऽभिप्रेतं, साधुशब्दप्रयोगद्वारेण धर्म्मप्रयोजनत्वं वार्त्तिककृतः, साधुशब्दज्ञानद्वारेण भाष्यकारस्येति विगानं दर्शयितुमाह * न तावदिति * तेन तस्य प्रयोजनाभावाभिप्रायो लक्ष्यतइति भावः। ननु विस्मृत्याप्यनुक्त्युपपत्तेः। कथं प्रयोजनाभावाभिप्रायो लक्ष्यतइत्याशङ्क्याह * कथं चेति * एतावत्त्वेन वह्वायासत्वमभिप्रेतम्। एतदेव विवृणोति * येष्विति * मोक्षाणामिति निर्द्धारणे षष्ठी न चानादरेणानुक्त्युपपत्तिरित्याह * न चेति * सुज्ञानत्वेनापि नोपपत्तिरित्याह * सुज्ञानत्वं पुनरिति * यद्यपि वार्त्तिककृता शास्त्रेण धर्म्मनियम इति धर्म्मप्रयोजनत्वं व्याकरणस्योक्तं तद्व्याकरणे धर्म्मस्याप्रतिपाद्यमानत्वादयुक्तमित्याह * धर्म्मश्चेति * ननु न साक्षाद् धर्म्मप्रयोजनत्वं व्याकरणस्याभिप्रेतं किं तु तदनुगतशब्दप्रयोगद्वारेण ज्ञानद्वारेण वेत्याशङ्क्या- १९६।५

ह * धर्म्मत्वमिति * एतदेव विवृणोति * शास्त्रार्थो हीति * किं पुनः शब्दस्य ज्ञाने धर्म्म आहो स्वित्प्रयोगइति सन्दिग्धो वार्त्तिककृता ज्ञाने धर्म्म इति चेत्तथाधर्म्म इत्यनेन साध्वसाधुविवेककारिणो व्याकरणवत्साधुत्वज्ञाने ऽर्थान्तरो लक्षणरहितानामसाधुत्वाज्ञानापत्तेस्तस्य च न म्लेच्छभाषां शिक्षेतेत्यादिनिषेधपर्यालोचनेनाधर्म्मसाधनत्वावसायादधर्म्मः प्रसज्येतेत्युक्त्वा प्रयोगे तर्हि धर्म्मो भविष्यतीत्याशङ्क्य तस्मिन्पक्षे व्याकरणानभिज्ञानामपि साधुशब्दप्रयोगात् धर्म्मोत्पत्तेर्व्याकरणानर्थक्यमिति। प्रयोगे सर्वलोकस्येत्यनेनोक्त्वा दोषद्वयभयाच्छास्त्रपूर्वके प्रयोगे ऽभ्युदयस्तस्य च वेदशब्देनेत्यनेन व्याकरणजनितज्ञानपूर्वकसाधुशब्दप्रयोगो धर्म्मसाधनं यथा वेदशब्दपूर्वको ऽग्निष्टोमादिर्वेदजनितज्ञानपूर्वकमनुष्ठितो धर्म्मसाधनं यथा वा वेदरूपः शब्दो नियमपूर्वमधीतो धर्म्मसाधनमित्युक्तं भाष्यकृता तत्सर्वं व्याख्यायाथ वा पुनरस्तु ज्ञानं धर्म इत्युक्तम्। न चैवमव्यवस्थितशास्त्रार्थावधारणं युक्तमित्यर्थः। ननु सम्यग् ज्ञातः सुप्रयुक्त इत्युभयोर्ज्ञानप्रयोगयोरेकवाक्योपादानात्समुच्चितयोर्धर्म्मित्वं भविष्यतीत्याशङ्क्याह * सम्बद्धयोश्चेति * एकवाक्योपात्तयोरप्याख्यातनामार्थयोः समुच्चयः प्रतिपदमपूर्वाणि एकपदे एवापूर्वमित्यधिकरणं यदैकस्मादपूर्वं तदतरत्तदर्थमित्येतदित्यर्थः प्रतिपदाधिकरणे निराकरिष्यतइत्याशयः। सामान्यन्यायमुक्त्वा प्रकृते योजयति * तदिहेति * एकस्मिन्वाक्ये साधनद्वयविध्ययोगात्सति ज्ञाने साधुशब्दप्रयोगो ऽप्यनुषङ्गान्निष्पद्यतइत्येवं ज्ञानस्तुत्यर्थत्वेन सुप्रयुक्तस्तु शब्दो ज्ञानस्य धर्म्मसाधनत्वपक्षे व्याख्येयः। प्रयोगपक्षे तु ज्ञातमात्रो ऽपि साधुशब्दः स्वर्गं साधयति किमुत प्रयुक्त इति प्रयोगस्तुत्यर्थत्वेन सम्यग्ज्ञानशब्दो व्याख्येयः। ततश्च ज्ञानधर्म्मत्वे प्रयोगस्य धर्मत्वायोगात् लोकसिद्धस्यैव ज्ञानानुनिष्पादित्वेन सत्यामपि व्याकरणादुपकारनिर्वृत्तौ व्याकरणं प्रति प्रयोजकत्वाभावान्न भावाभिप्रेतद्वारेण व्याकरणस्य धर्म्मप्रयोजनत्वं युक्तं प्रयोगस्य तु धर्म्मत्वे यदैकस्मादपूर्वं तदेतरत्तदर्थमितिन्यायेन ज्ञानस्य प्रयोगाङ्गत्वेन पारार्थ्यज्ञानात्फलश्रुतेः सुप्रयुक्त इतिवत्सम्यग्ज्ञात इत्यनेनाप्यन्वये कल्प्यमाने ऽर्थवादत्वावसायेन ज्ञानस्य धर्मत्वायोगात्तद्द्वारेणापि व्याकरणस्य धर्म्मप्रयोजनत्वं न युक्तमित्यर्थः। आदिमध्याद्व्याकरणानुगतशब्दप्रयोगस्यानादिशास्त्रविषयत्वाभावादित्यष्टमीं योजनामाह * किं चेति * व्याकरणपूर्वकज्ञा-
१९७।१ नप्रयोगयोरित्यर्थः। एतदेव विवृणोति * यन्नामेति * मन्त्रार्थवा-

दगतस्यानित्यसंयोगस्य परिहारो यो न्यायो नित्यानित्यसंयोगविरोधरूपस्तेनेत्यर्थः । न च व्याकरणस्यापि नित्यत्वं शङ्कनीयमित्याह * न चेति * ननु व्याकरणस्य कूटस्थनित्यत्वाभावे ऽपि प्रवाहनित्यत्वाद्वेदिकविधिविषयत्वं भविष्यतीत्याशङ्क्याह * अथापीति * उक्तमीमांसकसूत्रे ऽध्येतृणामस्मरणादिभिश्शब्दपूर्वत्वमिति वेदाधिकरणसिद्धान्तसूत्रोक्तेन न्यायेन सर्वपुरुषेभ्यो वेदस्य प्राथम्यान्न पौरुषेयग्रन्थविषयत्वं युक्तमित्यर्थः । ननु व्याकरणत्वजातेः कूटस्थनित्यत्वाद्वेदविषयत्वं भविष्यतीत्यत आह * न चेति * ननु व्याकरणस्य सूत्रमिति षष्ठ्यर्थस्य भेदं विनानुपपत्तेः सूत्रमात्राच्छब्दाप्रतिपत्तेः । व्याकरणाच्छब्दान्प्रतिपद्यामहइति प्रयोगानुपपत्तेः । न सूत्रस्य व्याकरणत्वं युक्तं नापि शब्दस्य व्याक्रियन्ते शब्दा अनेनेति व्याकरणमिति ल्युडर्थानुपपत्तेर्योगस्य च शब्दवत्त्वाभावाद् व्याकरणे भवो योगो वैयाकरण इति भवतद्धितानुपपत्तेः । शब्दस्य च पाणिन्यादिभिरप्रोक्तत्वेन पाणिनिना प्रोक्तं पाणिनीयमिति प्रोक्ततद्धितानुपपत्तेरिति वार्तिककारेण व्याकरणशब्दस्य सूत्रपरत्वशब्दपरत्वरूपे पक्षद्वये इत्यर्थः । पक्षद्वये ऽपि दूषिते भाष्यकारेण शब्दपक्षे तावद् दोषपरिहारार्थं प्रस्कन्दनं प्रपतनमित्यपादानादिष्वपि दर्शनेन करणाधिकरणयोरेव ल्युट्प्रत्ययनियमाभावाद् व्याक्रियत इति व्याकरणमिति कर्मव्युत्पत्त्या लुडर्थोपपत्तिमुक्त्वा भवप्रोक्तादितद्धितोपपत्त्यर्थं लक्ष्यलक्षणे व्याकरणमिति लक्ष्यलक्षणयोः शब्दसूत्रयोः समुदितयोर्व्याकरणत्वाभिधानात्सूत्रात्मकस्य व्याकरणस्य कृत्रिमत्वे ऽपि शब्दात्मकस्य नित्यत्वाद्वेदविषयत्वं युक्तमित्याशङ्कते * अथेति * लक्षणनिरपेक्षाणां शब्दानामानन्त्याद्विधिविषयत्वानुपपत्तिर्न तु गवादिगाव्यादीनां जातिरूपेण व्यक्तिरूपेण वा विधिप्रतिषेधौ उपपद्यते इत्यादिनोक्तेन परिहरति * तदिति * ननु यथा यदितिहासपुराणानि कल्पानीति ब्रह्मयज्ञविधिविषयत्वान्यथानुपपत्त्या कल्पसूत्राणां कर्तृस्मृतिदार्ढ्यात्कूटस्थनित्यत्वाभावे ऽपि प्रवाहनित्यत्वमुक्तं तथात्रापि, तस्मादेषा व्याकृता वागुद्यतइति व्याकरणानुगताया अर्थवाचो वादितव्यत्वश्रुतेर्व्याकरणस्य नित्यत्वं भविष्यतीत्याशङ्कते *ननु वेदेति * तद्ग्रन्थस्याध्येतव्यत्वायोगाद् ग्रन्थनित्यत्वं कल्पितम् । इह तु श्रुतिसामान्यमात्रेणापि व्याकृतशब्दव्याख्यानोपपत्तेर्न ग्रन्थनित्यत्वकल्पने प्रमाणमस्तीति परिहरति * नैतदिति * ननु वैदिक्या वाचः स्वराद्यविप्लुतरूपेणानिरूपिताकारत्वरूपस्य व्याकृतत्वस्य प्राप्तत्वाद्विध्यानर्थक्यमित्याशङ्क्य कर्म-

काले स्वाध्यायकाले वोच्यमाने *इयमनूदितेत्युक्तम् * श्लोकं व्याचष्टे * अव्याकृताया हीति * अस्य च व्याख्यामेकः शब्दः इत्येषापि श्रुतिर्वैदिकस्यैव शब्दस्य स्वराद्यविप्लुतिरूपेण ज्ञानप्रयोगयोर्द्धर्मत्वप्र-
१९८।२ तिपादनार्थतया व्याख्यातुं शक्येति सूचयितुमाह * तस्याश्चेति * नन्वेकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वित इत्यत्र शास्त्रशब्दस्य ग्रन्थविषयत्वाद्व्याकरणग्रन्थस्य वेदविषयत्वप्रतीतेर्नित्यत्वकल्पना भविष्यतीत्याशङ्क्याह * यदपि चेति * प्रशंसार्थत्वमेवोपपादयति * अहरहरिति * शास्त्रशब्दस्तर्हि कथमत आह * शास्त्रेति * लोकव्युत्पत्त्या शिक्षणात्मकशासनवाचिना शास्त्रशब्देन ग्रहणाध्ययनकालीनः स्वस्यात्मीयस्य गुरोरध्यायः शिक्षणार्थः पाठो विवक्षितो ग्रन्थ इत्याशयः । ननु सुप्रयुक्तशब्दस्तर्हि पुनरुक्तः स्यादित्याशङ्क्याह * सम्यगिति * उपनयनमाचार्यकर्तृको माणवकसंस्कारः उपसदने सुश्रूषे माणवककर्तृके त्रयं वै तद्ब्रह्मणाध्ययनकालीनमपि विशिष्टेतिकर्तव्यताकग्रहणं संस्कृतस्य तस्यैव वेदस्य ब्रह्मयज्ञोपयोगित्वादुपन्यस्तम्। ननु तस्माद् ब्राह्मणेन न म्लेच्छितवै म्लेच्छो हवा एष यदपशब्द इत्येषा श्रुतिर्गाव्यादिपशब्दनिषेधार्थत्वाच्छब्दापशब्दविवेकस्य च व्याकरणाधीनत्वाद्व्याकरणापेक्षा भविष्यतीत्याशङ्क्याह * यदपि चेति * कृत्यार्थे तवैकेनूकेन्यत्वन इति कृत्यार्थे छन्दसि तवैप्रत्ययस्मरणात् कृत्यानां च प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्रैषार्थत्वस्मरणादप्राप्तप्रेषणस्य च विधित्वान्नञ्योगेन निषेधार्थतोक्ता। कथं वैदिकविषयत्वावगतिरपशब्दनिषेधस्येत्यपेक्षायां वैदिकशब्दापेतत्वरूपव्युत्पत्तिसम्भवं सुज्ञानत्वं च कारणद्वयमाह * वैदिकाच्चेति * सर्वेभ्यः शब्देभ्यो ऽपेत इति च व्युत्पत्तिः शब्दस्य अशब्दत्वयोगान्न सम्भवतीत्याह * न चेति* ननु नायमभाववचनो ऽपेत्युपसर्गः किं तु वर्जनवचनः अतो गाव्यादीनां सत्यपि शब्दत्वे शास्त्रकारैर्वर्जितत्वादपशब्दत्वं भविष्यतीत्याशङ्क्याह * अथापीति * वर्जने ऽर्थे बर्बरादिभाषाशिक्षणस्य स्मृत्या निषिद्धत्वाच्छ्रुतौ चापशब्दत्वस्य म्लेच्छितशब्दसामानाधिकरण्येन निर्देशाद् बर्बरादिभाषागतस्य शब्दस्यापशब्दत्वज्ञानादित्यर्थः । म्लेच्छितत्वशब्देन म्लेच्छ व्यक्तायां वाचीत्यव्यक्तोच्चारणार्थस्य म्लेच्छशब्दस्य म्लेच्छो व्यक्तोच्चारित इत्यर्थो दर्शितः । किं चान्येषामपि बर्बरादिसम्बन्धिनामाचाराणां निषिद्धत्वाच्छब्दप्रयोगरूपस्याप्याचारस्य तत्सम्बन्धिन एव निषेधो ऽवसीयतइत्याह * युक्तं चेति * गाव्यादीनां तु प्रसिद्धम्लेच्छबर्बरादिसम्बन्धित्वे-

नाव्यक्तोच्चारणत्वेन वा म्लेच्छतिधात्वर्थानुगमाभावादार्यप्रयुक्तशब्दायत्तत्वाभावाद्वा नापशब्दतेत्याह * नन्विति * यथावृत्तादार्याचारादपेतत्वात्तदपवृत्तमित्युच्यते नैवं गाव्यादिष्वार्यप्रयुक्तशब्दापेतत्वमस्ति तेषामप्यार्यैः प्रयुक्तत्वादिति वैधर्म्यदृष्टान्तार्थं, नन्वाहिताग्निरपशब्दं प्रयुञ्ज्येति श्रुतेर्म्लेच्छशब्दसामानाधिकरण्याभावाद् व्याकरणानुगतशब्दापेतत्वनिमित्तलब्धापशब्दव्यपदेश्यत्वगाव्यादिप्रयोगनिमित्तप्रायश्चित्तविधानार्थत्वाद् व्याकरणापेक्षा भविष्यतीत्याशङ्क्याह * यदपि चेति * निषिद्धाचरणनिमित्तत्वात्प्रायश्चित्तस्य गाव्यादीनां च शिष्टावर्जितत्वेनानिषिद्धत्वावसायाद्यथासम्भवमन्यविषयतैवेयं श्रुतिर्भवेदित्याशयः । व्याकरणानुगतव्यतिरिक्तशब्दाविषयत्वासम्भवमुपपादयति * तथा हीति * गाव्यादिशब्दप्रयोगलक्षणस्य कार्यस्य सर्वशिष्टपरिगृहीतत्वेनापरिहरणीयत्वमीदृशशब्देनोक्तं श्लोकं विवृणोति * प्रायेण हीति * ननु सर्वस्यापि व्याकरणानुगतशब्दप्रयोगनियमो न दृश्यतइत्याह * न चेति * एतदेव प्रपञ्चयितुमाह * कल्पेति * कल्पकारस्यापशब्दमुदाहरति * समानमिति * छान्दोग्यसूत्रकारस्योदाहरति * सूत्रेति * बह्वृचसूत्रकारस्यापशब्दद्वयमुदाहरति * तथेति * कल्पादिग्रहणस्योपलक्षणार्थत्वात् शिक्षाकारस्यापशब्दमुदाहरति * तथेति * स्मृतिकारस्योदाहरति * मनुनापीति * स्मृतिग्रन्थकारेणापि साक्षिणः सन्ति मेत्युक्त्वा वदेत्युक्त्वा वदेत्तु य इत्यत्र मेशब्दस्येतीकारे परभूते संहितायामेचोऽयवायाव इत्ययादेशे कृते लोपः शाकल्पस्येति च यकारलोपे कृते म इतीतिव्याकरणानुगतां संहितामनपेक्ष्यान्यथा कृतेत्यर्थः । मीमांसाकारस्यापशब्दद्वयमुदाहरति * तथेति * सम्वत्सरसत्रेषु गवामयनिकविध्यन्तातिदेशप्रतिपादनायाष्टमे गवामयनोत्तरकालविहितेष्वादित्यानामयनप्रभृतिषु गवामयनस्य विध्यन्तः प्रवर्ततइति वक्तव्ये तस्य विकारावयवे च प्राण्योषधिवृक्षेभ्य इत्यधिकृत्य गोपयसोर्यदिति विकारावयवयोर्विहितो यत्प्रत्ययो ऽर्थवादावगतगोकर्तृकत्वमात्रनिमित्तप्रयुक्तः । न चैवाग्नीषोमीयप्रकरणाधीतः स्यादिति मासामुमोक्ते तानिति बहुवचनान्तस्यापि मन्त्रस्य प्रातिपदिकार्थसमवायाद् बहुवचनस्य प्रातिपदिकार्थलक्षितावयवबहुत्वाभिधानार्थत्वेनोपपत्तेरनुत्कर्ष इति सिद्धान्तिते द्यावापृथिव्योरहं देवयज्ययोभयोर्लोकयोर्ऋद्ध्यासमित्यादीनां दर्शपूर्णमासप्रकरणाधीतानां द्यावापृथिव्याद्यनुमन्त्रणानामपि केन चिद्गुणयोगेन दर्शपूर्णमासदेवताप्रकाशकत्वोपपत्तेरनुत्कर्ष इ- १९९।१ २००।१

त्याशङ्क्यार्थं सूत्रे सरूपाणामेकशेषः इत्याद्येकशेषलक्षणहीनं द्यावोरित्युक्तमित्यर्थः । गृह्यकारेणापि जिघ्राणामिति ल्युडन्ताजिघ्रादेशः घ्राद्यादिसूत्रेण शित्येव प्रत्यये परभूते घ्रातेर्जिघ्रादेशमन्वाख्यातमनपेक्ष्यैव कुत इत्याह * तथेति * व्याकरणसर्वस्वे निरुक्ते ऽपि व्याकरणाननुगताः शब्दाः सन्तीत्याह * कात्स्न्र्यइति * आर्द्धधातुके परभूते ब्रुवो वच्यादेशस्याभिधानात्तदकरणं हीनलक्षणमित्यर्थः ।एतदेव विवृणोति *सम्वत्सरमिति* पुराणेतिहासहास्तिशिक्षादिकारिणस्तु नात्यन्तं व्याकरणमार्न्द्रियन्तइत्याह * अन्तइति* हस्तिशिक्षादिग्रन्थकारिणो ये उभाभ्यादिरूपा अपशब्दास्तेषामन्तो नास्तीत्यर्थः । एतदेव विवृणोति * युगपदिति * वेदप्रयुक्तानां च शब्दानामपशब्दत्वाशङ्कानुपपत्तेर्निश्चितसाधुत्वानामनन्वाख्यानादव्यापकं लक्षणं स्यादित्याह * वेदेष्वपीति* सामान्यं छन्दसि भाषायां च साधारणं चातुर्वर्ण्यादिवत्स्वार्थे तद्धितः । ननु व्यत्ययो बहुलमिति बहुलग्रहणेन विकरणवत्सुबादीनामपि व्यत्ययसूचनाद् बहुलं छन्दसीति च लोपाद्यनियमविधानादस्ति सर्वशब्दानां छान्दसं लक्षणमित्याशङ्क्याह * न हीति *

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सो ऽपि च सिध्यति बाहुलकेन॥

इति वचनान्नियतविषय एव व्यत्ययविधिः दक्षिणायामिति हि प्राप्ते धुरि दक्षिणाया इति सुपो व्यत्ययः । तक्षन्तीति प्राप्ते ये अश्वयूपाय तक्षतीति तिङः स्रुवन्तीति प्राप्ते सामगाः स्रुवत इत्युपग्रहस्य इन्द्रः सोमस्य कामुक इति प्राप्ते कामुकेति लिङ्गस्य । ममृवां आवाहाइत्यत्रावाहादिति प्रथमपुरुषप्राप्तौ आवाहाइति पुरुषस्य । अग्निमद्यहोतारन्यमवृणीतेत्यत्राद्यतनकालवाचिनि लकारे प्राप्ते अनद्यतनकालवाचिलङ्प्रयोगात्कालव्यत्ययः । काण्डकेत्यत्र कामुकेइति प्राप्ते णकारप्रयोगाद्धलव्यत्ययः । अभ्यक्सात इत्यत्रामेत्याकारे प्राप्ते अभ्यगिति संहितादर्शनेनाकारप्रयोगादच्व्यत्ययः । अश्वावतीर्गोमतीरित्यत्रान्तोदात्तत्वे प्राप्ते ऽश्वावतीरित्याद्युदात्तत्वात्स्वरव्यत्ययः । कर्तृशब्दस्य कारकोपलक्षणत्वाद्द्विर्ददातीत्यत्र सम्प्रदानस्य दातृत्वेन प्रत्युपकारार्थदानकरणत्वाभिधानाद्दद्भ्य इति प्राप्ते ददद्भिरितिकर्तृव्यत्ययः यङ्शब्दस्य प्रत्याहारत्वेन योगाद्यङन्तविकरणप्रत्ययग्राहित्वाद्वृत्रं हनतीत्यत्र हन्तीतिप्राप्ते हनतीति यङ्व्यत्ययः । बहुलं छन्दसीति च आदिप्रभृतिभ्यः शप इत्याद्यधिकारविशेषेण शबादिविषयमेवावसीयते न सर्वविषयमित्यर्थः । तत्रोदा-

विकारेषु कार्यातिदेशतो गता * इत्युक्तम् * प्राकृतकार्यनिरपे- २०६।१
क्ष्येण पदार्थातिदेशे शास्त्रातिदेशे वा कार्यान्तरकल्पना युज्येत वै-
कृतभावनाकाङ्क्षावशात्तु करणोपकारलक्षणकार्यद्वारस्यैवातिदेशस्य
दशमाद्ये वक्ष्यमाणत्वान्न कार्यान्तरकल्पनेत्याशयः। कार्यद्वारातिदेशे
ऽपि कार्यान्तरार्थे व्रीह्यादौ व्रीहीणां मेधेत्यादिमन्त्रप्रयोगस्यैवाभा-
वात्प्राकृतकार्यार्थत्वे ऽप्यर्थान्तरत्वाभावेनाविकृतस्यैव प्रयोगोपपत्ते-
रूहाभावात्प्राकृतकार्यतापत्तेश्च * अर्थान्तरेष्वित्युक्तम् * कथं
कार्यापत्त्यवगतिरित्यपेक्षायाम् * पञ्चधेत्युक्तम् * नैवारश्चरुरिति
विकारतद्धितेन नीवाराणां चरुप्रकृतित्वाभिधानात्प्रत्यक्षविधिना
प्रदेयप्रकृतित्वलक्षणव्रीहिकार्यापत्तिरवसीयते सांस्थते षडहे म-
ध्वाशयेद् घृतं वेति मधुघृताशनयोः षडहाभावे विधानात्प्रत्यक्षवि-
धिना षडहकार्यापत्तिः सत्रायावगूर्य विश्वजिता यजेतेति वा स-
त्राभावे विश्वजितो विधानात्सत्रकार्यापत्तिः। नैवारश्चरुर्नखावपू-
तानामिति वैतुष्यलक्षणविकारफलकानिर्लुच्छनापरपर्यायावपनाङ्ग-
त्वेन नखानां विधानाद्विकारेण वैतुष्योत्पादनलक्षणोलूखलमुसल-
कार्यापत्तिः। परिधीं पशुं नियुञ्जन्तीति परिधेर्नियोजनेविधानात्स्व-
शब्देन विनियोजनलक्षणरूपकार्यापत्तिः। न गिरागिरेति ब्रूयादेरं
कृत्वोद्धेयमितीरापदविध्येकवाक्यतया गिरापदस्य निषेधानुवादाव-
गतेरेकार्थत्वाभावे चेरापदेन गिरापदवाधायोगान्निषेधानुवादानुप-
पत्तेर्निषेधानुवादेन गिरापदकार्यापत्तिरिति पञ्चप्रकारत्वम्। प्र-
त्यक्षविधिना भावे विधानेन विकारतः स्वशब्दाच्च निषेधानुवा-
दात्तत्कार्यकारितेति संग्रहश्लोकः। ननु व्रीह्यादिकार्याय तेष्वपि
नीवारादिषु व्रीह्यादिप्रकाशनार्थानां मन्त्राणां व्रीह्यादिस्वरूपस्या-
भावेनाप्राप्तेर्नोहः स्यादित्याशङ्क्य * अपूर्वार्थद्वारेणेत्युक्तम् * स्व-
रूपप्रयुक्तत्वनिराकरणेनापूर्वप्रयुक्तत्वस्य नवमाद्ये वक्ष्यमाणत्वान्नी-
वारादिषु व्रीह्यादिस्वरूपाभावे ऽपि व्रीह्यादिलक्षितापूर्वार्थत्वसद्भा-
वात्तद्द्वारेणास्ति प्राप्तिरित्याशयः। नन्वर्थान्तरेष्वप्यूहेन मन्त्राणां
प्रयोगोपपत्तौ याज्यानुवाक्ययोरनुपदेशे गायत्र्यादिना लक्षणेनानु-
वाक्यकल्पनवचनं त्रिष्टुबादिना च लक्षणेन याज्याकल्पनवचनं ता-
दृशलक्षणयोश्चासम्भवेन असञ्ज्ञकयोर्निमामश्ट्णुधीर्हवं स्तीर्णं बर्हि-
रानुषासवेतदित्यनयोरिरागमवचनमनर्थकं स्यादित्याशङ्क्य * अनि-
पिद्धोहा इत्युक्तम् * पूयति वा एतद्यो ऽक्षरं यदेतदूह इति त-
स्माद्यं नोहेदित्यादावूहनिषेधान्न देवतान्तरत्वात्यां विकृतौ प्राकृत-
योर्याज्यानुवाक्ययोः प्राप्तिः सम्भवतीत्याशयः। न माता वर्द्धते न

पितेति तु यज्ञपतिन्यायप्राप्तनिषेधानुवादत्वान्नोदाहरणमेवम्भूतस्य वोहोपपत्तिकलापस्य मीमांसागम्यत्वादस्माकमेवोहः सिद्ध्यति न वैयाकरणानामिति * न इत्यनेनोक्तम् * न त्ववघातादिसस्कार-विषयस्य दृढादृढप्रहारादिरूपस्योहस्य सामविषयस्य वोत्तराकृता वृद्धतालव्याश्रितापि भावरूपस्य व्याकरणानपेक्षत्वे ऽपि मन्त्रोहस्य वैयाकरणाधीनत्वेन महाभाष्यकृतोक्तस्य शब्दरूपत्वाद्वैयाकरणापेक्षा भविष्यतीत्याशङ्क्य व्रीह्यादिसम्बन्धित्वेनावगतानां धर्माणां नीवारादिसम्बन्धित्वापादकरूपपरिवर्तकरणात्मकस्योहरूपस्य मन्त्रविषये ऽप्यूहे साम्याद्वितर्कणायाश्च मीमांसाधीनत्वान्न वैयाकरणापेक्षेति * मन्त्रशब्देनोक्तम् * ननूह्यानूह्यविभागस्य मीमांसकाधीनत्वे ऽप्यूह्यपदस्वरूपज्ञानं वैयाकरणापेक्षं भविष्यतीत्याशङ्क्याह * एतावतीति * ननु कथं साध्वसाधुशब्दविवेकानभिज्ञस्य योग्यपदलाभ इत्याशङ्क्याह * वेद एव हीति * यत्किञ्चिच्छब्दोहेनापि वा मन्त्रवाक्यनैराकाङ्क्ष्यसिद्धेर्न योग्यपदादरो युक्त इत्याह * अथ वेति * एतच्च देवतापदव्यतिरिक्तविषयमुक्तं तेषां विधिगतव्यतिरेकेण साधूनामप्यप्रयोज्यत्वादिति दर्शयंश्लोकं व्याचष्टे * देवतेति * आग्नेयादियागाङ्गभूतेष्वावाहनादिषु निगमनस्थानेषु किं येन केन चित्पर्यायेण देवताभिधेयार्थविधिगतेनैव शब्देनेति सन्दिह्य येन केन चिदर्थसिद्धेरनियमे प्राप्ते देवतायाः प्रतिग्रहादिव्यापाराभावात्स्वरूपेण कर्म्मसमवायानुपपत्तेः शब्देनाग्निमुद्दिश्य हविस्त्यजेदिति विध्यर्थावगमात्केन शब्देनेत्यपेक्षायां बुद्धिस्थाग्निशब्दातिक्रमे कारणाभावादग्निशब्देनैवाग्निमुद्दिशेदिति विधिगतेनैव शब्देन देवतात्वविधानान्मन्त्रकार्ये तस्यैवोच्चारणं कार्यमिति विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदनेति सूत्रोक्तदार्शमिकन्यायेन विधिगतप्रयोगानुसारेणैव विकृतौ देवतापदान्यूह्यमानानि प्रयोक्ष्यन्तइत्यर्थः । ननु सौर्यं चरुमिति विधौ प्रातिपदिकमात्रश्रवणादग्नये जुष्टमिति चतुर्थ्यन्ताग्निपदस्थाने सूर्यपदं कीदृशं प्रयोज्यमिति व्याकरणं विना न ज्ञायतइत्याशङ्क्य * तद्वाक्यशेषेत्युक्तम् * तस्य विधिवाक्यस्य शेषे वाक्यान्तरे वा महोदेवाय सूर्याय शंसतेत्यादौ यदधिगतमर्थाभिधानमित्यन्तेनेत्यर्थः । नन्वेवं सति शब्दव्यवस्थायामपि प्रयोगोत्पत्तिशास्त्रत्वदर्शनात्कथं तेनाव्यवस्थासिद्धिरित्याशङ्क्य *तेषु हीत्युक्तम्* किं विषयं तर्ह्यव्यवस्थितोह्यपदप्रयोज्यत्वाभिधानमित्यपेक्षते * यानीत्युक्तम् * पौण्डरीके बर्हिषि दर्भैस्तृणीत हरितैः सुपर्णैरित्यतिदेशप्राप्ते मन्त्रे दर्भपदस्थाने पुण्डरीकैरिति द्रव्यपद-

मादिशब्दात्सुपर्णपदस्थाने पुण्डरीकावयववाचिपदम्। एवं व्रीहीणां मेधः सुमनस्यमान इत्यादौ यथासम्भवं नीराणामित्यादीनि यथासम्भवं द्रव्यादिपदान्युदाहार्याणि। ननु नीवारादिपदव्यतिरिक्तानां तत्पर्यायाणां साध्वसाधूनां मानाप्राप्तत्वेनाप्रतीतरूपाणां प्रयोगविधिविषयत्वाभावात्प्रयोगानुपपत्तेर्नाव्यवस्था युक्तेत्याशङ्क्य*सन्निहितेत्युक्तम्। सन्निहितेन नीवारादिविधित. प्रतीतेन नीवारादिनार्थेन पर्युपस्थापितानि समस्तानि पर्यायभूतानि साध्वसाधूनि रूपाणि येषामिति विग्रहः। पूर्वमेव तर्हि नीवाराद्यर्थस्य स्मृतत्वान्नीवारादिपदोहो ऽनर्थकः स्यादित्याशङ्क्य *असन्निहितेत्युक्तम् * असन्निहितार्थस्य व्रीह्यादिपदस्य निवृत्त्या हेतुभूतया न्यूनत्वात्साकाङ्क्षं यद्व्रीहाणां मेध्यादिमन्त्रवाक्यं तस्य निराकाङ्क्षीकरणायेति विग्रहः। द्रव्यादेर्हि श्रुतिसमवायित्वाभावेन विधिगतशब्दप्रयोगनियमाभावात्कर्म्मविधानार्थस्यैव शास्त्रस्य शब्दप्रयोगोत्पत्तिशास्त्रत्वानुपपत्तेर्मन्त्राम्नानरूपेण वा शास्त्रेण प्रयोगोत्पत्तेः शास्त्रवत्त्वं वाच्यं व्याकरणाख्येन वा तत्र मन्त्राम्नानं तावद्विकृतौ नास्तीत्याह * प्रकृतौ हीति * व्याकरणस्य च सम्भाव्यमानमूलशास्त्रत्वात्कृतकत्वादिदोषग्रस्तत्वात्पौरुषेयत्वेन चानादियज्ञगतशब्दविषयत्वायोगान्न प्रयोगोत्पत्तिशास्त्रत्वं युक्तमित्याह * व्याकरणस्यार्षेति * कृतकत्वस्यानाप्तप्रणीतत्वाशङ्कापादकत्वेन दोषत्वं व्याकरणानुगतशब्दप्रयोगानियामकत्वाभावेन * अविधायकत्वस्योक्तम् * इत्युपसंख्यानानामादिशब्दोपात्तानां च वक्तव्यानामाचार्य्यसूत्राणां च दीर्घीवेवीटामित्यादीनां प्रत्याख्यानं सूत्रवार्तिकभाष्याणां परस्परविरोधे विशेषाग्रहेण इदमेव प्रमाणमित्यनिश्चयादनवस्थितं प्रमाणत्वं विकरणस्य के चित्प्रकृत्यन्तर्भावमिच्छन्ति, अन्ये प्रत्ययान्तर्भावमिति, यथारुचि कल्पितं प्रकृतेः प्रत्ययस्य वा परिमाणं धातुप्रातिपदिकादिलक्षणदूषणान्यादिशब्देनोपात्तानि सत्यप्याप्तप्रणीतत्वे नित्यानित्यसंयोगविरोधेनानादियज्ञगतशब्दविषयत्वं निराकृतम्। ऊहस्यान्यतः सिद्धेर्व्याकरणप्रयोजनत्वमसम्भवमुपसंहरति * तेनेति * प्रकृति- २०७।१
विकृतिविभागज्ञानं कर्म्मज्ञानं प्रकृतौ द्रव्यदेवतामन्त्राणां विकृतौ द्रव्यदेवतान्तरस्य प्राकृतानां च मन्त्राणां ज्ञानं कर्म्माङ्गज्ञानं प्रकृतावपूर्वप्रयुक्तत्वं कार्यातिदेशेन च विकृतिगमनं वैकृतानां चाङ्गानां प्राकृतकार्यापत्तिज्ञानं वाक्यार्थज्ञानं तेषु कौशलैः कर्तव्यतया लोकवेदप्रयोगाच्च स्वरूपेणोहसिद्धेर्व्याकरणानर्थक्यमित्यर्थः। व्याकरणतः सिद्धेरप्यूहस्य तत्प्रयोजनत्वं न यु-

क्तमित्युपपादयितुं व्याकरणपर्यालोचनया कर्त्तव्यत्वेनावगतस्योहस्य मीमांसानुसारेणापवादः कल्पसूत्रव्याख्यातृभिः कृत इत्याह *अपि चेति * देव्याः शमितार आरभध्वम् इत्यादिः पशुविशसनप्रैषमन्त्रः अध्रिगुशब्दवत्त्वेनाध्रिगुरुच्यते तत्र पुराणन्यायादीन्यङ्गानि अस्त्वेत्वेनं मातेत्यादीनि ज्ञातिनामानि श्येनमस्येत्याद्या उपमाः सूर्यं चक्षुरित्यादीनीन्द्रियाणि यज्ञपतिशब्दवत्पाराशर्य्येणैषामन्यैरूहविषयैर्वैषम्याज्ञाध्रिगावूह्यते इत्यर्थः । यथागमः खल्वपीत्युपक्रम्य ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ऽध्येयो ज्ञेयश्चेति स्मरणमावश्यकधर्म्मज्ञानार्थं षडङ्गवेदाध्ययनविधानार्थं व्याकरणाध्ययनप्रयोजनत्वेनोपन्यस्तं तत्प्रयोजनं प्रयोजनिभाववैपरीत्येन दूषयति * आगम इति * यथा वेदाध्ययनं प्रति प्रयोजनभूतानां कर्म्मणां नाध्ययन प्रयोजन तथा षडङ्गवेदाध्ययनविधायकमागमं प्रति प्रयोजनभूतस्य व्याकरणाध्ययनस्य नागमप्रयोजनमित्युपालम्भार्थः । न त्वागमप्रयोजनत्वप्रतिपादकं भाष्यमनुष्ठापकत्वाभिप्रायं व्याख्यातृभिर्व्याख्यातं तत्कथं फलपरत्वं प्रयोजनशब्दस्यारोप्य दूषणमुक्तमित्याशङ्क्यानिराकरणार्थः फलपदप्रयोगः । रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति सकृच्छ्रुतस्य प्रयोजनशब्दस्य रक्षादौ फलपरत्वमागमे ऽनुष्ठापकपरत्वं न युक्तमित्याशयः । एतदेव विवृणोति * सर्वस्य हीति * न चागमप्रयोजनत्वाभिधानेन लक्षणया धर्मज्ञानाख्यमागमोक्तं प्रयोजनमभिमतमित्याशङ्क्याह * अर्थाति * षडङ्गवेदाध्ययनवद्धर्म्मज्ञानस्याप्यनुष्ठेयत्वमनेनागमेनोक्तं न प्रयोजनत्वमिति मत्वा परिहरति * तदपीति * नन्वेकस्मिन्वाक्ये विधिद्वयायोगाद्धर्म्मस्य ज्ञेयत्वाभिधानं प्रयोजनत्वेनैव व्याख्येयमत आह * निष्कारणतयेति * श्रेयःसाधनत्वेन धर्म्मस्य निष्प्रयोजनत्वायोगान्निष्कारणशब्दस्य षडङ्गशब्देनैवान्वयात्पौरुषेयेषु च वाक्यभेदस्यादोषत्वादित्याशयः । एतदेव विवृणोति * निष्कारणेति * कार्यते ऽनुष्ठाप्यते ऽनेनेति व्युत्पत्त्या प्रयोजनवचनो ऽयं कारणशब्द इति वक्तुं निष्प्रयोजनत्वशब्दः । अवेदत्वाच्चास्यागमत्वं नास्तीत्याह * आगम इति * नन्ववेदत्वे ऽपि वेदमूलत्वेनागमत्वं भविष्यतीत्याशङ्क्याह * कथं चेति * नन्वेवं तर्हि तस्याः स्मृतेर्वेदमूलत्वाभावे वेदाध्ययनस्यावैधत्वं स्यादित्याशङ्क्याह * तस्मादिति * न च केवलवेदविषयस्य विधेर्नित्यानित्यसंयोगविरोधो ऽस्तीत्याह * उपपन्नं चेति * ननु व्याकरणादेरपि प्रवाहनित्यत्वान्नित्यविधिविषयत्वं न विरोत्स्यतइत्यत आह * व्याकरणादीति * प्रत्यक्षश्रुतीवषय-

त्वं मति तदन्यथानुपपत्त्या प्रवाहनित्यत्वं कल्प्येत तदभावे ऽप्यपस्मृतित्वेनाप्युपपत्तेर्न कल्पनागौरवाश्रयणं युक्तमित्याशयः । न चास्य वेदत्वेन तत्तुल्यत्वेन वा स्वयमागमत्वं सम्भवति कल्पसूत्राधिकरणे निरस्तत्वादित्याह * न चेति * किं च प्रधानं च षडङ्गेषु व्याकरणमिति भाष्येण वेदाङ्गत्वाद्व्याकरणस्यैतदागमप्रयोजनत्वमुक्तम् । अङ्गशब्दश्च तादर्थ्यवाची वा स्यादवयववाची वा नोभयथापि व्याकरणस्याङ्गतास्तीत्याह * न चेति * उभयरूपाभावमुपपादयति * श्रुतीति * कस्तर्ह्यस्याः स्मृतेरर्थ इत्यपेक्षायामाह * तस्मादिति * लिङ्गादेरशब्दरूपत्वे ऽपि तत्कल्प्या- २०८।१
नां श्रुतीनां वेदावयवत्वं भविष्यतीति भावः । अभिधानसमर्थानां वा मन्त्राणां लिङ्गत्वमङ्गानां सापेक्षवाक्यार्थप्रतिपादकवाक्यसमुदायस्य प्रकरणत्वम् । सन्निधिपठितानां वाक्यानां क्रमत्वम् । यौगिकस्य शब्दस्य समाख्यात्वमभिप्रेत्य * अवयवत्वमुक्तम् * एवं विधषडङ्गवेदाध्ययनस्य वान्वयव्यतिरेकाभ्यां धर्मज्ञानहेतुत्वावगमाद्धर्मो ज्ञेय इत्यस्य तत्प्रयोजनत्वाभिधायकत्वोपपत्तेर्नानेकविधानं निमित्तवाक्यभेदापत्तेरिति सूचयन्नाह * तैः षड्भिरिति * नन्वेवं सति वेदाध्ययनेनैव तदवयवाध्ययनसिद्धेः विशेषणानर्थक्यापत्तिं शङ्कते * नन्विति * प्रविभक्तरूपश्रुत्यादिज्ञानार्थत्वेन विशेषणसाधुत्वमाह * उच्यतइति * श्रुतेर्विनियोजकत्वे हेतुर्मुख्यं गौण वा सामर्थ्यं तेन विना विनियोजकत्वस्यासम्भवाद्विनियोजकाक्षरश्रवणरूपं व्यर्थं लक्षिते पूर्वं साधनांशे विनियोगः फलं सामान्यसम्बन्धाख्यः क्रतुसम्बन्धो लिङ्गस्य विनियोजकत्वे हेतुः सामर्थ्ये रूपं मुख्ये ऽर्थे विनियोगः फलं समभिव्याहारान्यथानुपपत्तिर्वाक्यस्य विनियोजकत्वे हेतुः । सन्निहिताकाङ्क्षितयोग्यपदार्थप्रतिपादकपदसमुदायो रूपं पूर्वापरपदाविरोधेन विनियोगः फलं प्रकरणस्य विनियोजकत्वे फलसंयोगाभावो हेतुः साकाङ्क्षफलवत्सन्निधानं रूपं फलवति विनियोजकत्वे सादृश्यं हेतुः । निराकाङ्क्षफलवत्सन्निधानं रूपं फलवत्याकाङ्क्षोत्थापनेन विनियोगः फलं सामान्यतः प्राप्तिः समाख्याया विनियोजकत्वे हेतुः यौगिकशब्दत्वं रूपं प्रतियोगिनि विनियोगः फलमिति । पृथग्भूतैर्हेतुरूपफलैः प्रविभक्तरूपेण श्रुत्यादिज्ञानं मीमांसानिरपेक्षाद्वेदाध्ययनमात्रान्न सिध्यतीत्याशयः । ज्ञात्वेति च ज्ञास्यामीत्यध्यवसायेत्येवमग्निष्टोमसाम कृत्वेतिवद्व्याख्येयं विधेरर्थमित्यनेन षडङ्गो वेदो ऽध्येयो ज्ञेयश्चेत्यागमस्य वेदः पठितव्यः स च परस्परवि-

विक्तश्रुत्यादिषडङ्गरूपेण ज्ञेय इत्यर्थः । सूचितं मीमांसाधीनत्वं चास्यार्थस्य न इत्यस्मदा सूचितम् । ननु ज्ञेयशब्दस्य षडङ्गशब्दान्वये धर्मशब्दस्यानन्वयापत्तेर्नानेन श्रुत्यादीनां चोक्तरूपेण ज्ञानं विधियतइत्याशङ्क्य अध्ययशब्दस्यैवेण् गताविल्येतद्धातुरूपत्वाङ्गीकरणेन ज्ञानविधायकतेति व्याख्यानान्तरमाह * अधीति * अकारप्रश्लेषरहितेन वामेन ध्यानं विधीयतइति तृतीयं व्याख्यानमाह * ध्यायतेरिति * अध्ययनविधित एव नान्तरीयकतयाध्ययनसिद्धेर्विधानानर्थक्यमित्याशङ्क्य श्रुत्याद्युपायकार्थप्रतिपादकत्वरूपेण षडङ्गस्य वेदस्य ध्यानं विवक्षितं न स्वरूपेण तस्यापि च वेदार्थावधारणकालसिद्धत्वात्पश्चादप्यनुष्ठेयत्वसिद्ध्यर्थं विधानमिति दर्शयितुमाह * श्रुत्यादीति * एवं च मीमांसाध्ययनानुष्ठापकतैवास्यागमस्यावसीयते न व्याकरणाध्ययनानुष्ठापकतेत्यनुष्ठापकत्वेनागमस्य व्याकरणप्रयोजनत्वाभिधानं न युक्तमित्याह * ततश्चेति * अनुष्ठानार्थत्वाद्वा विधिवाक्याध्ययनमात्रेण स्वाध्यायविध्यर्थसिद्धेरर्थवादान्तर्गतव्याकरणाद्यङ्गसहितवेदाध्ययनविधानार्थत्वेनास्यागमस्य न पाणिन्यादिप्रणीतग्रन्थाध्ययनानुष्ठापकतास्तीति चतुर्थीं व्याख्यां तामाह * वेद इति * श्लोक व्याचष्टे * तद्दध्न इति * तदेनमधिनोत्तद्दध्नो दधित्वमिति धिनोतेः प्रीणातिकर्मणो दाधित्वशब्दनिर्वचनादेतन्निरुक्तादाहरणं तदाहुर्यदन्यो जुहोत्यथ योऽनुवाहयति तं च कस्मान्न होतेत्याचक्षतइति पृष्टे यद्भाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तं देवहोतुर्होतृत्वमिति व्हयतेः कृतसम्प्रसारणस्यैतद्रूपं न तृजन्तं जुहोतेरिति प्रकृतिविशेषान्वाख्यानान्न व्याकरणोदाहरणम् आदिशब्दोपात्तस्य छन्दोविचित्यादेरष्टाक्षरा गायत्रीत्याद्युदाहरणं यथासम्भवं मृग्यम् । अस्तु वा निरुक्तादिग्रन्थानां षडङ्गाध्ययनस्मृतिविषयत्वम् । ननु व्याकरणस्य प्रातिशाख्यैः संख्याः पूरयिष्यतइति पञ्चमीव्याख्यामाह * प्रातिशाख्यानि वेति * यानि प्रातिशाख्यान्यध्येतारो ऽधीयते तेष्वेव षट्संख्यापूरणार्थं सङ्गतं न व्याकरणेष्वित्येवकारार्थं द्वितीयो वाशब्दः गृह्यमाणं लिङ्गेन स्वाध्यायार्थत्व ह्येषामिति हेत्वर्थः वेदसंहिताध्ययनानुगतस्वरसन्ध्याद्यनुसाराभिधानार्थः । स्वाध्यायत्ववदिति वतिः स्वाध्यायानुगतस्वराद्युच्चारणनियामकत्वरूपं प्रयोगशास्त्रत्वं तादर्थ्यग्रहणहेतुतया स्वाध्यायवदित्यनेनोक्तमुपपादयति * यानि हीति * तदुपपादितं गृह्यमाणतदर्थत्वं व्याचष्टे * तेष्विति * अतस्तेष्वित्यध्याहारेण योज्यम् । एवकारार्थस्य वाशब्दस्य व्याव-

र्थमाह * नन्विति * ननु कतिपयानामपि तावद्वैदिकशब्दानामुच्चा- २०९।१
रणनियामकत्वात् व्याकरणानामपि प्रयोगशास्त्रतास्तीत्याशङ्क्याह
* प्रातिशाख्यानीवेति * अन्वाख्यायमानेष्वपि वैदिकशब्देष्व-
ध्ययनानुगतस्वरसन्ध्यादियुक्ते रूपे व्यापाराभावान्नैषां प्रयोगशा-
स्त्रतास्तीति नियामकत्वाद्व्याकरणानामपि प्रयोगशास्त्रतास्तीति प-
रिहरति * नेति * प्रातिशाख्यानां वेदस्वरूपे व्यापारं विवृणोति
* प्रातिशाख्यैः पुनरिति * उदात्तपूर्वापर्यत्वे तयोर्मध्ये कालः
स्वरसन्धिः सर्वानुदात्तपदसंहितिः प्रयतिः असंहिता विवृतिः
स्वरितस्योदात्तो ऽशः पूर्वाङ्गः, अनुदात्तः पराङ्गः आदिशब्दे-
नाङ्गाद्युक्तम् । एवं तावद्व्याकरणाध्ययनाविधायकत्वान्नास्यागमस्य
व्याकरणं प्रत्यनुष्ठापकत्वरूपप्रयोजकत्वान्नास्य किमपि प्रयोजनत्वम्
सम्भवतीत्युक्तम् इदानीमस्यागमस्य व्याकरणाध्ययनविधायक-
त्वे ऽपि निष्कारणशब्देनाध्ययनमात्रपर्यवसानावसायादर्थज्ञाननिर-
पेक्षेणाध्ययनमात्रेण शब्दानामनुशासितुमशक्यत्वाच्छब्दानुशासन-
स्य रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति पूर्वोक्तेन प्रतिज्ञानेन तव
प्रयोजनत्वेनाभिमतस्यागमस्यानुसन्धानसंवादो नास्तीत्याह * पूर्वो-
क्तेनेति * यो ह्ययमागमस्त्वया प्रयोजनत्वेनोपन्यस्तः सो ऽध्ययन
नं प्रति तन्मात्रे पर्यवस्यति न शब्दानुशासनपर्यन्तं गच्छति प्राक्-
शब्दानुशासनमागमप्रयोजनत्वेन प्रतिज्ञातमित्यध्याहारेण योज्यम् ।
अस्माच्चागमादध्ययनमात्रे धर्म इति प्रतीतेर्महाभाष्यकृता ज्ञाने-
धर्म्म इति वक्ष्यते शास्त्रपूर्वं प्रयोगेपूदय इति च वार्तिककृता तदु-
भयमप्यागमविरुद्धं स्यादित्याह * ब्राह्मणेनेति * यच्च लाघवा-
र्थं चाध्येयं व्याकरणमित्यादिभाष्येण लघुनोपायेन शब्दज्ञानं व्याक-
रणस्य प्रयोजनमित्युक्तं तदत्यन्तक्लिष्टत्वेन व्याकरणस्य लघूपायत्वा-
योगप्रयोजनातिक्लिष्टव्याकरणाध्ययनमध्येतुर्लाघवं मन्दबुद्धित्वमा-
पादयतीत्यध्येतृलाघवमेवास्य प्रयोजनमित्येवं व्याख्येयमित्युपहसति
* यदपि चेति * उपहासान्तरमाह * यदि वेति * श्लोकं व्याचष्टे
* लोकप्रसिद्धानामेवेति * धातुशब्देन धातुपाठो विवक्षितः गण-
शब्देन गणपाठ उणादिशब्देन दशपादी पञ्चपादी वा सूत्रशब्देनाष्टा-
ध्यायी आदिशब्देन वार्त्तिकादीनां तेषां पाठतो ऽर्थतश्च क्लिष्टत्वाद-
त्यन्तवैषम्यं विशेषणं क्लिष्टार्थत्वोपपादनायोत्तरवदत्रापि विग्रहद्व-
यम् । अलौकिकीभिर्वृद्धिरादैजित्यादिभिः संज्ञाभिरिकोगुणवृद्धी-
त्याद्याभिश्च परिभाषाभिर्निबद्धा प्रक्रिया येषां धात्वादीनामिति
प्रथमविग्रहः द्वितीयस्त्वनवस्थितौ स्थापनाक्षेपौ यस्य सिद्धान्तस्य स

सिद्धान्तो यस्य विचारस्य स विचारो येषु धात्वादिष्विति द्वन्द्वगर्भबहुव्रीहिगर्भो बहुव्रीहिः । तद्यथा सिद्धे शब्दार्थसम्बन्धे इति शास्त्रारम्भवार्त्तिके भाष्यकृता सिद्धे शब्दे ऽर्थे सम्बन्धे चेति विग्रहं कृत्वा नित्यपर्यायवाचित्वेन सिद्धशब्दं व्याख्याय कं पुनः पदार्थं मत्वैष विग्रहः क्रियत इति विचारमुपक्रम्याकृतिमित्याहेत्याकृत्यभिप्रायत्वं प्रतिज्ञायाकृतिर्हि नित्या द्रव्यमनित्यमिति हेतुमुक्त्वा ऽथ वा द्रव्यपदार्थ एष विग्रहो द्रव्यं हि नित्यमाकृतिरनित्येति द्रव्यातीन्द्रियत्वमुक्त्वा पुनराकृतावपि पदार्थएष विग्रहो न्याय्य इत्युक्त्वा नित्याकृतिरेकद्रव्यविनाशे ऽपि द्रव्यान्तरे प्रत्यभिज्ञानादिति चाक्षेपं परिहृत्य कूटस्थनित्यत्वाभावे ऽपि वा पट्टकुटीवद्विनष्टा वा अथाकृतेर्द्रव्यान्तरभावे ऽयमिति तत्त्वप्रतिज्ञानान्नित्येति परिहारान्तरमुक्त्वा ऽथ वा किं न एतेन इदं नित्यमिदमनित्यमिति यन्नित्य ते पदार्थे मत्वैष विग्रहः क्रियतइति पदार्थविचारसिद्धान्तस्थापनाक्षेपानवस्थितहेतूपन्यासेनानवस्थितौ कृतं एवमत्यन्तविषमैर्धात्वादिभिर्लोकप्रसिद्धानामेव शब्दानां क्लेशेनान्तं गत्वा यथावस्थितानुवादमात्रकरणान्निष्फलश्रमापत्तिरित्यर्थः । तत्रापि चेत्यनेन यथावस्थितशब्दज्ञानमपि सर्वप्रतिपत्तृणां न भवतीत्युक्तम् । स्तुत्यर्थमित्यन्तासम्भाविता स्तुतिरपि न सम्भवतीति सूचितम् । ननु भाष्यकृता न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुमिति लघूपायान्तराभावाभिधानाद् गुरोरप्यस्य प्रतिपदपाठात्मकगुरुतरोपायापेक्षया लघुत्वं भविष्यति एतदेव चान्यैरुपपादितमित्याशङ्क्यानुभाषणपूर्वकमुपसहरति * यदपीति * तत्त्वावबोधो रूपादेर्नास्ति व्याकरणादितइत्याद्यपि वक्तव्यमित्यर्थः । ननु रूपादेः प्रत्यक्षगम्यत्वान्न व्याकरणापेक्षा तत्साध्वसाधुशब्दविवेकस्य तु व्याकरणमन्तरेणाज्ञानान्नोपहासो युक्त इत्याशङ्क्यार्थप्रतीतिसाधनत्वात्सर्वेषां गोगाव्यादिशब्दानां साधुत्वे तेषां च श्रोत्रेन्द्रियागम्यत्वान्न व्याकरणापेक्षेत्यभिप्रायेण परिहरति * को हीति * प्रमाणान्तरागोचरार्थावपयत्वं शास्त्रस्य स्वभावः प्रमाणान्तरगृहीतार्थानुवादित्वं लोकस्य इतिकरणार्थवाची इदृशशब्दप्रयोगात्तत्त्वावधारणमिति प्रथमा कीदृशं तर्ह्यर्थप्रवृत्तितस्यानां शब्दा एव नियन्धनमिति श्लोकस्योत्तरार्द्धं वक्तव्यमित्यपेक्षायामाह * अत इति * यद्यप्यसन्देहार्थं चाध्येयं व्याकरणमित्यादिभाष्येण वेदार्थगतसन्देहनिवृत्तिप्रयोजनत्वं व्याकरणस्योक्तं तदपि दूषयति * असन्देहश्चेति * पदार्थगतस्य चासन्देहस्य निवृत्तिर्व्याकरणस्याप्रयोजनं वाक्या- २१०।२

र्थमन्तरा वा उभयथाप्यन्यतः सिद्धत्वात् व्याकरणाच्चासिद्धेर्न व्याकरणप्रयोजनमित्यर्थः। पदार्थसन्देहनिवृत्तेरन्यतः सिद्धिमुपपादयति * पदार्थेति * व्याकरणेन चासिद्धिमुपपादयति * व्याकरणेन पुनरिति * नन्वीदृशं पदमस्मिन्नर्थे साध्वित्यर्थविशेषावच्छिन्नस्यैव पदस्वरूपस्यान्वाख्यानादर्थज्ञानमपि व्याकरणात्सम्भवतीत्याशङ्क्य शब्दान्वाख्यानोपायमात्रकेन व्याकरणे ऽर्थकथनं न तात्पर्येणेति निदर्शयितुमाह * तथा हीति * व्याकरणाद्धि सर्वनाम्नां धातुत्वेन क्रियायोगनिमित्तता प्रतीयते न च वृद्धव्यवहारे तथा प्रतीतिरित्यर्थः। अत्रैवोदाहरणमाह * गमेरिति * अनेन सूत्रेण गत्यर्थात् गमेर्धातोरौणादिके डोप्रत्यये विहिते डित्करणाच्च टिलोपे कृते कर्त्तरि कृदिति गन्तरि गोशब्दव्युत्पादनार्थान्वाख्यानादरे लोके सिद्धा जातिवाचिता हीयेत लोकमूलत्वाच्च व्याकरणस्य नैतद्युक्तमित्यर्थः (उदाहरणान्तरमाह * तथा चेति* कुशला दातरि कुशलशब्दस्य दातरि च दारशब्दस्य व्याकरणे ऽनुगमः। लोके च प्रवीरा ये कुशलशब्दस्य दातृमहत्त्वयो वाश्च दारशब्दस्येत्यर्थः।[1]) अकृदन्तेष्वपि कृदन्तत्वान्वाख्यानात् व्याकरणस्य लोकविरोधमुक्त्वा समासाभावे ऽपि समासान्वाख्यानात्सर्वविरोधमाह * अथवेति * अतद्धितान्तेष्वपि तद्धितान्तवद्व्याख्यानाद्विरोधमाह * एवमिति * वेदविरुद्धार्थान्वाख्यानाद्यङ्व्याघाताशङ्कापत्तेर्न व्याकरणस्यार्थे तात्पर्यमित्याह * तथेति * अत्रैवोदाहरणद्वयमाह * कलेरिति * आपो वा ऋत्वियमार्ङ्क्तासां वायुः पृष्ठेत्यवर्त्तते ततो वसुवामं समभवत्तस्मिन्मित्रावरुणौ पर्यपश्यतां तावब्रूतां वामं मर्याइदं देवेष्वाजनीति तस्माद्वामदेव्यमिति वामदेवेष्विति समभिव्याहृतशब्दद्वयोच्चारणनिमित्तवामदेव्यशब्दव्युत्पत्तिः कलनक्रियानिमित्तकालेयशब्दव्युत्पत्तिश्च वैदिकीं वैयाकरणीं दर्शननिमित्ततां बाधतइत्यर्थः। कल्पसूत्रकारैश्च कृष्णशम्बास इति कृष्णशशब्दस्य व्याकरणाननुगतदकारापगमेन कृष्णदशब्दवाचितया व्याख्यानात्कृष्णवलक्षे अजिने इति च वलक्षशब्दस्य लोकव्याकरणानवगतशुक्लत्ववाचितया व्याख्यानाद्यूपादिशब्दानां च व्याकरणमनादृत्यैव व्याख्यानान्न व्याकरणस्य पदार्थनिश्चायकत्वमस्तीत्याह * तथेति * नन्वस्तु नाम पदान्तरेषु व्याकरणानपेक्षो ऽर्थनिर्णयः। २११।४
यत्तु भाष्यकृता स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेत्यत्र किं स्थूला चासौ पृषती चेति कर्मधारयः। स्थूलानि पृषन्ति यस्याः सेयं

१ भय पा० २ पु० ना०।

स्थूलपृषतीति बहुव्रीहिर्वेति सन्देहनिवृत्तिर्नावैयाकरणस्य भवतीत्युक्तं तत्र कः परिहार इत्याशङ्क्याह * यथा चेति * पदार्थसन्देहनिवृत्तेर्व्याकरणप्रयोजनत्वं निराकृत्य वाक्यार्थसन्देहनिवृत्तिरपि निराकरोति * किं चेति * ननु वाक्यार्थसन्देहनिवृत्तिप्रयोजनत्वं भाष्यकृतानुक्तत्वान्न निराकार्यमित्याशङ्क्य प्रसङ्गापादनार्थं तन्निराकरणमित्याह * यदीति* किं चिदित्यक्रियार्थत्वमभिमतम् । औदुम्बराधिकरणस्य साध्यांशविचारार्थत्वाभावे किमौदुम्बरत्वस्य फलसमभिव्याहारः साधारणत्वप्रतिपत्त्यर्थः । प्रशंसार्थो वेति व्याख्येयं प्रमाणान्तरेणाज्ञकरणत्वस्य होमसम्बन्धहेतुत्वमज्ञातं ज्ञाप्यतइत्यज्ञातज्ञापनाभिप्रायो विधिशब्दः हेतुद्वारो ऽर्थवाद इति शाकपार्थिववन्मध्यमपदलोपी समासः इष्टार्थत्वशब्देनार्थतात्पर्यमात्रं सर्वमन्त्रसाधारणं मन्त्राधिकरणे व्युत्पादितं न स्मारकत्वं स्तोत्रशस्त्रादिमन्त्रव्यापकत्वादिति दर्शितं व्याकरणानपेक्षोदाहरणान्युक्तैकत्वविवक्षायामेकवचनस्मृतेर्व्याकरणेनैकत्वविवक्षाप्रतीतेर्विरोधो ऽप्यस्तीति दर्शयितुम् * अहेत्युक्तम् * न त्वनन्यलभ्यस्य प्रयोजनवदर्थवादत्वादिनिर्णयस्य च मीमांसासिद्धत्वान्न व्याकरणप्रयोजनत्वोपपत्तिरिति स्वयमेवाशङ्क्याह *अथेति * स्थूलपृषत्यादिशब्दार्थस्यापि कल्पकारादिव्याख्यानान्निर्णयः सेत्स्यतीत्याशयः । ननु मूलप्रमाणानिरपेक्षस्य व्याख्यानमात्रस्य निर्णायकत्वं न युक्तमित्याशङ्क्य त्वया ऽपि व्याख्यानिर्णायकत्वाभ्युपगमान्नेदं दूषणमित्याह * अपि चेति * लक्षणोत्थसन्देहे व्याख्यानस्य निर्णायकत्वप्रतिपादकं भाष्यं वेदोत्थसन्देहेन योजयितुमाह * व्याख्यानत इति * भाष्यकृता हि शास्त्रारम्भवार्त्तिकगतस्य सिद्धशब्दस्य (एकपरिहार्युक्तानि सार्थत्वमुपपाद्य चतुर्थः परिहारो ऽभिहित इत्यन्वयः सिद्धशब्दस्य[1]) कः पदार्थ इति पृष्ट्वा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति नित्येषु प्रयोगान्नित्यपर्यायवाची सिद्धशब्द इत्युक्त्वा सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति कार्येष्वपि प्रयोगात्कथं निर्णय इत्याशङ्क्य संग्रहे तावत्कार्यप्रतिद्वन्द्विभावप्रसिद्धामिति भाष्येण संग्रहाख्ये वार्त्तिककारकृते ग्रन्थान्तरे किं कार्यः शब्दः सिद्धो वेति कार्यप्रतियोगित्वेन नित्यार्थत्वावसायादिहापि तादर्थ्यनिर्णय इत्येकं परिहारमुक्त्वा ऽथ वा सन्त्येकपदान्यप्यवधारणानीति भाष्येणाब्भक्षो वायुभक्ष इतिवत्सिद्ध एव न साध्य इत्यवधारणेन नित्यार्थत्वमुपपाद्याथ वा पूर्वपदलोपो ऽत्र द्रष्टव्यः । अत्यन्तसिद्धः सिद्ध इति

[1] अय पा० २ पु० ना० ।

तद्यथा देवदत्तो दत्त इति सत्यभामा भामेति भाष्येणात्यन्तत्वविशेषणेन नित्यार्थत्वमुपपाद्याथ वा व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणामिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्याम इति भाष्येण चतुर्थः परिहारो ऽभिहितः । ननु लक्षणोत्थसन्देहनिवृत्तिलक्षणकारिपुरुषकृतव्याख्यानपरम्परयोपपद्यते वेदे तु कर्तृभावेन तत्कृतस्य व्याख्यानस्य मूलत्वायोगात् व्याकरणं वेदव्याख्यापरम्पराया मूलं भवतीत्याशङ्क्याह * न चेति * कल्पादि- २१२।१
ष्यो वेदार्थाग्रहणं व्याकरणमात्रेण व्याख्यानाशक्तेः कल्पादीनामेव मूलत्वं युक्तमित्याशयः । वेदवद्ज्ञानादित्वात् व्याख्यानपरम्परा न मूलान्तरमपेक्षतइत्याह * यथेवेति * ननु भाष्यकृता यदि पूर्वपदप्रकृतिस्वरत्व ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति भाष्येण बहुव्रीहौ प्रकृत्या पूर्वपदमिति बहुव्रीह्याद्यस्य पदस्य प्रकृतित्वाभिमताद्युदात्तस्वरत्वस्मृतेरुदाताधिकारे चान्तोदात्त इत्यतो ऽन्त इत्यनुवर्त्तमाने समासस्येति सूत्रेण समासविशेषनिर्णयान्तरेणोत्सर्गः अन्तोदात्तत्वस्मृतेरनुदात्तं पदमेकवर्जमिति च विहितस्वरवर्जनमुदात्तत्वस्मृतेर्बहुव्रीहि विना आद्यपदोदात्तत्वायोगाद्व्याकरणस्य समासविशेषनिर्णयद्वारार्थविशेषनिर्णायकत्वाभिधानाद्व्याकरणस्य निर्णायकत्वाभिधानाद्व्याकरणाधीनादध्यतृप्रसिद्धाद्युदात्तत्वाद् बहुव्रीहित्वेन स्थूलपृषत्यादिशब्दव्याख्येत्याशङ्क्याह *न चेति * श्लोकं व्याचष्टे *बहुव्रीहेति * वेदे तु स्वरविवेके सत्यप्यर्थविशेषण सह स्वरविशेषस्य सम्बन्धग्रहणाभावान्न स्वरविशेषं कृत्वार्थविशेषव्यवस्था युज्यतइत्याह *यत्र त्विति*ननु वेदे सम्बन्धग्रहणाभावे ऽपि लोकतो ऽनेकार्थतया ऽवगतस्य पदस्य वेदे श्रवणात्सन्देहे सत्यर्थप्रकरणादिभिर्निर्णयो ऽभ्युपगम्यते तत्र चार्थद्वयसाधारणस्य पदस्यैकत्रैवार्थे कथं वृत्तिरित्यपेक्षायां स्वरविशेषश्रवणात्तत्स्वरयुक्तस्यैव पदस्यासावर्थविशेषनिर्णयोपायत्वं स्वरस्याप्यस्तीत्याशङ्क्याह * तत्रापीति * साधारणस्यापि शब्दरूपस्य लोकावधारितार्थप्रकरणादिनिर्णयोपायवशेनैव एकार्थपरत्वावधारणोपपत्तेर्न लोकानवगतस्य स्वरस्याप्यर्थनिर्णायसामग्रीमध्ये निवेशकल्पना युक्तेत्याशयः । ननु स्वरस्याभिधानङ्गत्वे ऽनर्थकः पाठः स्यादित्याशङ्क्याह * तेनेति * न कदाचिददृष्टार्थतास्तीति दर्शयितुम् * सर्वदेत्युक्तम् * ब्रह्मगवेषु ज्योतिष्टोमादिषु ये जपमन्त्रास्ते ऽप्यङ्गमिति निष्कृष्य योज्यम् । जपन्यूङ्खसामव्यतिरेकेण यज्ञकर्मण्येकश्रुत्यस्मृतेश्चकारेण न्यूङ्खसाम्नामुपादानम् । एवं च व्याकरणेन स्वरानुगमो ब्रह्मयज्ञाङ्गपयो-

गित्वेनार्थवानस्तु न त्वर्थनिर्णयार्थतेत्याशङ्क्याह * व्याकरणेति * अलौकिके ऽर्थे सम्बन्धग्रहणासम्भवेनावश्यकत्वाज्ज्ञानात् * लौकिकेत्युक्तम् * न वर्णवद्वाचकत्वेन लोके स्वरः प्रयुक्तो नाप्यानुपूर्व्यादिवद्वाचकसहकारिता * इत्यत्यन्तशब्देनोक्तम् * ननु लोकाप्रयुक्तेष्वप्युणादिशब्देषु वाचकत्वोपलक्षणाल्लोकप्रयोगादेव वाचकत्वज्ञानमिति नियमायोगाद्व्याकरणादपि स्वरविशेषस्यार्थविशेषं प्रतिवाचकत्वज्ञानं भविष्यतीत्याशङ्क्याह * न चेति * शास्त्रारम्भभाष्ये ऽथ शब्दानुशासनमिति शब्दान्वाख्यानार्थत्वाख्याने तात्पर्याभावान्न व्याकरणस्य प्रामाण्यमित्याशयः । अत्रैव सूत्रावयवं योजयन्नसन्देहप्रयोजनत्वासम्भवमुपसंहरति * तस्मादिति * रक्षादीनामपि पूर्वोक्तप्रयोजनत्वासम्भवोपसंहारार्थो ऽपिशब्दः । एवं मुख्यानि पञ्चप्रयोजनान्युपन्यासपूर्वकं दूषयित्वा ते ऽसुराः दुष्टः शब्दः यदधीतं यस्तु प्रयुङ्क्ते अविद्वांसः विभक्तिं कुर्वन्ति यो वा इमां चत्वारि उत त्वः सक्तुमिव सारस्वतीं दशम्यां पुत्रस्य सुदेवो असि वरुणेत्यानुषङ्गिकाण्यपि त्रयोदश संक्षेपतस्तावत् दूषयति * ऽन्यानि चेति *

अम्लेच्छत्वमदुष्टोक्तिर्विज्ञानं फलभागिता ।
अस्त्रीसाम्यं विभक्तयुक्तिः सप्तमं चार्त्विजीनता ॥
मनीषिवत् सम्मतत्वं देवेन महताष्टम् ।
वाक्स्वरूपप्रकटनं लक्ष्म्या वाचि निधापनम् ॥
अप्रायश्चित्तभाक्तं च द्वादशं पुत्रनाम च ।
त्रयोदशं सुदेवत्वमुक्तं भाष्ये प्रयोजनम् ॥
प्रथमं च द्वितीयं च सप्तमं चाप्रयोजनम् ।
दशमैकादशौ चेति व्याक्रिया न ह्यपेक्ष्यते ॥
तृतीयादीनि चत्वारि नवमद्वादशे अपि ।
प्रयोजनवदाभान्ति किं तु नान्येन सिद्धितः ॥
सुदेव इति मन्त्रस्य चत्वारीति द्वयोरपि ।
असामर्थ्यं न चरममष्टमं वा प्रमाणकम् ॥

मुख्यप्रयोजनैश्च प्रयोजनवत्त्वासम्भवेनानुषङ्गिकेष्वाशा युक्तेत्याह * अपि चेति * नद्या वेगेन नीयमानो यस्तीरगतं वृक्षमप्यवष्टभ्य स्थातुं न शक्नोति तस्य यथा कुशावष्टम्भनं काशावष्टम्भनं चानर्थकं तथैतदपीत्यर्थः । पूर्वोक्तमेव प्रपञ्चयितुं प्रत्येकमुपन्यस्योपन्यस्य दूषयति * तत्रेति * भाष्यकृता ते ऽसुरा हे ऽलयो हे ऽलय इति ब्रुवन्तः पराबभूवुस्तस्माद् ब्राह्मणेन न म्लेच्छितवै २१३।१

म्लेच्छो हवा एष यदपशब्द इत्यपशब्दनिषेधवाक्यमुपन्यस्य म्लेच्छा माभूमेत्यध्येयं व्याकरणमिति भाष्येण म्लेच्छरूपापशब्दप्रयोगात्प्रयोक्तुर्म्लेच्छत्वापत्तेरज्ञातस्यापशब्दस्य वर्जनायोगाच्छब्दापशब्दविवेकज्ञानार्थम् * व्याकरणमित्युक्तम् * यस्मादसुरा अरय इति रेफस्थाने लकारप्रयोगेण हैहेप्रयोगे हैहेयोरित्येतत्सूत्राविहितप्लुतप्रयोगेण प्लुतप्रगृह्या अचीति च प्रकृतिभावविधानाद्धे अरय इति प्रयोक्तव्ये हे ऽलय इति त्रिविधापशब्दभाषणरूपम्लेच्छनात्पराभवं प्राप्तास्तस्माद् ब्राह्मणेन न म्लेछितव्यं नापभाषितव्यमिति समभिव्याहारेणापशब्दनिषेधस्यापराभवार्थत्वप्रतीतेर्म्लेच्छा माभूमेति म्लेच्छत्वपरिहारस्य प्रयोजनत्वं भाष्यकारोक्तमयुक्तमाशङ्क्य पराभवाख्यानस्यापभाषणफलप्रदर्शनार्थत्वे प्रतीते म्लेच्छो हवा एष यदपशब्द इत्यस्यानर्थक्यापत्तेरपशब्दस्य म्लेच्छशब्दप्रयोक्तुर्म्लेच्छत्वं भवतीत्यपशब्दम्लेच्छत्वाभिधानार्थवादस्य फलपरत्वसूचनायोपन्यस्यार्थवादतोक्ता निषेधस्य तु प्रयोजनत्वमागमवत्प्रयोजकत्वेनाक्षेपकत्वेनोक्तं स निषेधो यथा गुरुसम्प्रदायागतवैदिकशब्दविषयो म्लेच्छभाषाविषयो वा न तु गाव्यादिशब्दविषयग्रन्था यदपि च तस्माद् ब्राह्मणेनेत्यादिग्रन्थेन प्रागुक्तमित्यर्थः। ततश्च व्याकरणानपेक्षत्वान्न तत्प्रयोजनत्वयोग्यतेत्याशयः। यच्च भाष्यकृता।

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
सं वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो ऽपराधाद्॥

इति श्लोकमुपन्यस्य दुष्टाँश्शब्दान्माप्रयुङ्क्ष्महीत्यध्येयं व्याकरणमिति भाष्येण दुष्टशब्दवर्जनं व्याकरणप्रयोजनमुक्तं तदपि मन्त्रविनाशविषयत्वस्य च व्याकरणानपेक्षत्वान्न व्याकरणप्रयोजनत्वयोग्यमित्यर्थान्तरन्यासेनाह * दुष्ट इति * अत्रापि पूर्ववद्व्याकरणानपेक्षत्वात्तत्प्रयोजनत्वयोग्यतेत्यपिशब्देन सूचितम्। ननु दुष्टादुष्टशब्दज्ञानस्य व्याकरणाधीनत्वात्कथं तदनपेक्षेत्याशङ्क्य दुष्टः शब्द इति पाठे भवेद् व्याकरणापेक्षा न त्वीदृशःपाठो ऽस्तीति दर्शयितुमाह * वाग्घीति * मन्त्रो हीनः स्वरतो वर्णतो वेति बहुजनप्रसिद्धस्य शिक्षाकारपठितस्य मन्त्रपदस्योद्धारेण पदान्तरप्रक्षेपः स्वपक्षानुरागमात्रेण कृतो न वस्तुत इत्यर्थः। मन्त्रविनाशविषयत्वे चास्य वाक्यस्य श्रुतिमूलत्वं भविष्यतीत्याह * दुष्टेति * दुष्टपदप्रक्षेपे ऽपि मन्त्रदोषविषयत्वेनोपपत्तेर्व्याकरणापेक्षानापादकत्वात्पाठान्तरोत्प्रेक्षानर्थक्यसूचनार्थो दुष्टशब्दः शब्दमात्रदोषविषयत्वे ऽस्य वाक्यस्य निर्मूलत्वसूचनार्थस्तुशब्दः उदाहरणपर्यालोचनयापि मन्त्रविनाश-

विषयतैवास्य श्लोकस्यावसीयतइत्याह * तथा चेति * स यज्ञवैशसं कृत्वा प्रासहाया ममापि च तस्य यदशिष्यत तत्त्वष्टाहवनीयमुपप्रावर्त्तयत्स्वाहेन्द्रशत्रुर्वर्द्धस्वेति यदवर्तयत्तद् वृत्रस्य वृत्रत्वं यदब्रवीत्स्वाहेन्द्रशत्रुर्वर्द्धस्वेति तस्मादस्येन्द्रःशत्रुरभवदित्याद्युदात्तेन्द्रशत्रुपदप्रयोगेणेन्द्रो यस्य शत्रुरिति बहुव्रीह्यर्थसम्पत्तेस्त्वष्टुः पुत्रस्य वृत्रस्येन्द्रः शातयिता हिंसिता जात इत्याद्युदात्तत्वलक्षणस्वरदोषेण वृत्रशत्रोरिन्द्रस्योद्यत्वादिन्द्रवधसमर्थपुत्रोत्पादनार्थं यागं कुर्वाणस्य त्वष्टुर्यजमानस्याभिप्रेतार्थासिद्धिलक्षणा हिंसा जातेति स्वरापराधलक्षणमन्त्रविनाशानिमित्तयजमानगामिदोषोदाहरणं कृतमित्यर्थः । इन्द्रशत्रुरिति मन्त्रपदं स्वरापराधात् यथा यजमानं हिनस्तीत्युदाहरणार्थः । तस्मादिन्द्रस्य शत्रुर्भूत्वा वर्द्धस्वेति तत्पुरुषार्थविवक्षायां मन्त्रोदाहृतमिदं प्रयोज्यमित्याशयः । यच्च नाम भाष्यकृता ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हि चित् ॥

इति श्लोकमुपन्यस्य तस्मादविज्ञातमनर्थकमाधिगीष्महीत्यध्येयं व्याकरणमिति वेदाध्ययनसाध्यं वेदार्थज्ञानं व्याकरणप्रयोजनत्वेनोक्तं तद्व्याकरणप्रयोजनत्वेनाभासमानमप्यन्यतः सिद्धेर्न व्याकरणप्रयोजनमित्याह * यत्त्विति * अध्ययनविधेर्दृष्टार्थत्वाभिधानान्मीमांसाप्रयोजनत्वेनैतद्युक्तं भवतीत्याशयः । ननु मीमांसावद्व्याकरणमपि वेदार्थज्ञानसाधनं भविष्यतीत्याशङ्क्याह * नन्विति * शब्दानुशासनार्थत्वेनार्थपरत्वाभावः सूत्रावयवयोजनया सूचितः । नन्वर्थविशेषविषयशब्दानुशासननान्तरीयकत्वेनार्थानुशासनमपि सेत्स्यतीति स्वयमेवाशङ्क्योत्तरं सूत्रावयवं परिहारे योजयति * शब्देति * नन्वर्थगतसन्देहविपर्ययनिरासमात्रस्य मीमांसासाध्यत्वाद्वेदार्थस्वरूपज्ञानं व्याकरणाद्भविष्यतीत्याशङ्कां निरस्यन्नुपसंहरति * तस्मादिति * यच्च

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले ।
सो ऽनन्तमाप्नोति फलं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥

इति श्लोकेन शब्दव्यवहारकाले ऽर्थविशेषे सम्यक्शब्दप्रयोगस्य पारलौकिकफलप्राप्तिहेतुत्वाभिधानात्तत्सिद्धिर्व्याकरणस्य प्रयोजनमिति भाष्यकृतोक्तं तदप्यन्यथा व्याख्यातुं शक्यत्वात्प्रयोजनाभासमित्याह * यस्त्विति * गुरुसम्प्रदायागते स्वरादिविशेषे कुशलः सन्वेदाध्ययनादिव्यवहारकाले वैदिकांश्छब्दान्प्रयुङ्क्तइति व्याख्येयमित्याशयः । ननु मन्त्रब्राह्मणेष्वपशब्दाभावात्तद्विषयत्वे दुष्य-

ति चापशब्दैरित्ययुक्तं स्यादित्याशङ्क्याह * यथेति * कथं वैदिकशब्दविनाशविषयता ऽस्या ऽवसीयतइत्यपेक्षायामाह * स्वाध्याय इति * पौरुषेयत्वेनास्य प्रमाणान्तरावगतदोषानुवादत्वावसायादुदाहृतेन वचनेन यजनयाजनगतवेदशब्दविनाशहेतुकदोषावगतेरादिशब्दाच्चेतिकरणसूचितेन च ।

हस्तहीनं तु यो ऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥

इति स्मृत्यनुमितेन वचनेनाध्ययनाध्यापनगतवेदशब्दविनाशहेतुकदोषावगतेस्तद्विषयत्वनियम इत्याशयः । यद्यप्येषामृगादिशब्दानामुपक्रमानुरोधेन वेदपरत्वं तृतीये वक्ष्यते तथापि ऋग्वेदादिविहितमन्त्रविषयाया अप्यार्तेर्विनाशाख्यायाः 'पदार्थान्तरार्तिवत्सामान्यशब्देनोपपादानादविरोधः । ननु प्रकृतिप्रत्ययरूपयोर्वाचोर्योगं सम्बन्धं वेत्तीति व्युत्पत्त्या वाग्योगविच्छब्देन वैयाकरणाभिधानात्तत्समभिव्याहारेणास्य वाक्यस्य व्याकरणानुगताननुगतशब्दप्रयोगविषयतावगम्यतइत्याशङ्क्य त्रेधा परिहरति * वागिति * वाचः प्रतियोगितयाक्षिप्तेनार्थेन यो वाचं वेत्तीति प्रथमे परिहारे निगमनिरुक्तादिकुशलो वाग्योगवित् द्वितीये तु वाचो वचनस्य योगं पदार्थावयवविशेषरूपां व्यक्तिं ब्राह्मणवाक्येषु मन्त्रेषु च वाचो भासनस्य प्रकाशनस्य योग्यं योगमर्हं वेत्तीति मीमांसको ऽभिधीयते चोदितत्वेनावगतस्य स्वार्थत्वात्प्रकाशनार्हत्वम् अनूदितत्वेनावगतस्य परार्थत्वात्प्रकाशनानर्हत्वं वेत्तीति समासार्थः । निर्वापमन्त्रे त्वग्नेश्चोदितत्वेनानुष्ठानाय स्मर्त्तव्यत्वात्प्रकाशनार्हत्वं सवित्रादीनां वा चोदितत्वेन निर्वापकस्तुत्यर्थत्वात्प्रकाशनानर्हत्वं प्रसिद्धं विदेर्विचारणार्थत्वसूचनार्थं प्रकाशनानर्हत्वं प्रतियोगितयोक्तं वैयाकरणस्य वाग्योगवित्त्वोत्सम्भवोपपादनायास्य पदस्यान्येनार्थेन प्रकृष्टो योगः स्वाभाविकसम्बन्धो ऽस्य वचनस्यैवम्भूतपदान्वयरूपाव्यक्तिरस्य वा मन्त्रस्यायमर्थः प्रकाशनयोग्य इत्येवं 'विविधप्रयोगोत्पत्तिं प्रति व्याकरणस्याशास्त्रत्वादिति त्रेधा' सूत्रावयवं तन्त्रेण योजयति * वैयाकरणस्येति * यच्च २१४।५

अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेदू ॥

इति श्लोकमुपन्यस्य स्त्रीवन्माभूमेत्यध्येयं व्याकरणमिति भाष्येण स्त्रीसाम्यपरिहारो व्याकरणप्रयोजनमित्युक्तं तदपि प्रयोजनाभासमित्याह * यदपीति * तत्प्लुतस्येति तच्छब्दो ऽयं तत्रेत्य-

र्थे तस्मिन् विषये तद्व्याकरणं प्लुतप्रयोगोत्पत्तिं पूज्यशास्त्रप्लुतस्वरूपस्य लोकसिद्धत्वान्नामान्ते च प्लुतप्रयोगस्य मन्वाद्युपदिष्टत्वादित्यर्थः । ऊकालो ऽज्झ्रस्वदीर्घप्लुत इत्येतत्सूत्राधीनत्वं प्लुतस्वरूपज्ञानस्य ह्युपगम्य प्रकृतिप्रत्ययान्वाख्यानाद्वाशब्दापशब्दविवेकार्थस्य नैकसूत्रमात्रसाध्यं प्रयोजनं युक्तमितिशब्देषु न व्यवस्था स्यादित्युत्तरसूत्रावयवयोजनया दर्शयति * न चेति * शब्दविषया व्यवस्था या व्याकरणेन न क्रियते सा न कर्त्तव्या स्यादित्येवं सूत्रावयवो ऽनेन योजितः । यच्च विभक्तिं कुर्वन्तीत्युपक्रम्य याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कर्तव्या इति न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्त्तुमिति भाष्येण विभक्तिज्ञानं व्याकरणप्रयोजनमुक्तं तदपि प्रयोजनाभासमित्याह * एवमिति * तदित्यव्ययं तत्रेत्यर्थे तत्रापि व्याकरणमशास्त्रमित्यपिशब्दाध्याहारेण योज्यं कस्मादित्यपेक्षिते सौत्रं प्रयोगोत्पत्तिपदं समासान्निष्कृष्य हेत्वर्थत्वेन त्रिविधोपपत्तिपूर्वकं याज्ञिकेत्यादिना योजितं समिधः समिधो ऽग्नआज्यस्य व्यन्तु तनूनपादग्निमग्न आज्यस्य वेतु इडोग्निमग्नआज्यस्य व्यन्तु बर्हिरग्निरग्नआज्यस्य वेत्विति याज्ञिकदोषोद्देशेन सम्बुद्धिद्वितीयातृतीयाप्रथमानां विभक्तीनां प्रयाजेषु सिद्धत्वाच्छान्दोग्यब्राह्मणे च षडर्हाविभक्तिर्नानारूपेत्युपक्रम्याग्नइति प्रथमस्याह्वारूपमग्निमिति द्वितीयस्याग्निनेति तृतीयस्याग्निरिति चतुर्थस्याग्नेरिति पञ्चमस्याग्नइति षष्ठस्येति परस्परविभक्तसम्बुद्धिद्वितीयातृतीयाप्रथमाषष्ठीसम्बुद्ध्याख्यविभक्तिप्रयोगदर्शनान्मन्त्रेषु चाग्निर्वृत्राणीत्यादिषु विभक्तविभक्तिप्रयोगदर्शनात्प्रयोगदर्शनाभावे ऽपि वा सिद्धशब्दानुक्रमाख्यवैभक्तिकग्रन्थमात्रालोचनेनापि विभक्तिप्रयोगसिद्धेरित्यर्थः । यच्च यो वा इमां पदशः स्वरशो ऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवतीति श्रुतिमुपन्यस्यार्त्विजीनाः स्यामेत्यध्येयं व्याकरणमिति भाष्येणार्त्विज्यार्हत्वं व्याकरणप्रयोजनमुक्तं तदगुरुसम्प्रदायसिद्धत्वाद्व्याकरणप्रयोजनत्वं योग्यमेव न भवतीत्याह * यो इमामिति * चत्वारि शृङ्गेत्यृचं महाभाष्यकृता पूर्वोपन्यस्तामपि मन्त्राधिकरणे ऽन्यविषयत्वेन व्याख्यातत्वादुपेक्ष्यापर आहेत्युपक्रम्य चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीत्यृचमुपक्रम्य चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति भाष्येण ये ब्राह्मणास्तानि विदुस्ते मनीषिण इत्यर्थाश्रयणेन पदचतुष्टयज्ञानसाध्यं मनीषित्वं व्याकरणप्रयो-

जनमुक्तं तदस्या ऋचो ऽन्यपरत्वादप्रमाणकमित्याह * तथेति * निरुक्ते यान्योङ्कारो भूर्भुवः स्वरिति महाव्याहृतित्रयं वेति चतुष्टयमादिशब्दाद्वेदचतुष्टयं मृगपक्षिसरीसृपमनुष्याः वाक्चतुष्टयमनपायिनी पश्यन्ती मध्यमा वैखरीति सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलरूपावस्थाभेदभिन्नवाक्चतुष्टयमिति चतुष्टयबाहुल्यरूपप्रयोजनानुसारेण चत्वारि पदजातानि प्रपञ्चितानि तन्न व्याकरणस्य व्यापार इत्यर्थः। एतच्च पदनिर्वचनसामर्थ्ये ऽपि तद्विषये सचार्यसंख्यामात्रसामान्यादुक्तं न प्रामाणिकमित्यर्थः। अप्यक्षरेति निरुक्ताकारवचनोपन्यासेन सूचितं, ननु वैयाकरणाभिमतं नामादिचतुष्टयमपि निरुक्तैरुक्तं तद्व्याकरणापेक्षं भविष्यतीत्याशङ्क्याह * यत्त्विति * परमार्थतस्तूत्तरार्द्धविरोधान्नैतद्विषयताप्यस्या ऋचः सम्भवतीत्याह * एतद्विषयत्वे चेति कस्तर्ह्यस्या ऋचः पारमार्थिको ऽर्थः पूर्वापरार्द्धविरोधीत्यपेक्षायामाह * तस्मादिति * अस्मिन् व्याख्याने वागिति ११९॥
पदं षष्ठ्यन्तत्वेन विपरिणमयितव्यं प्रवो देवायाग्नयइति शंसतीति प्रतीकविधिप्रभवमवयवान्तरानुमानं विश्वाजिता यजेतेत्याम्नायचोदनात्वरूपप्राकृतवाक्यसारूप्यसम्भवं ज्योतिष्टोमवदिति पदोपमानं विधिप्रत्ययावगतफलव्यतिरेकेणानुपपद्यमानयागकर्तृत्वप्रभवा स्वर्गकामपदकल्पिकार्थापत्तिः दध्नेन्द्रियकामस्येत्यत्र सारूप्याभावे ऽपि सन्निधानमात्रेणाग्निहोत्रवदिति पदोपमानसूचनायादिशब्दः ननु प्रमाणषट्कस्य प्रथमपादे व्युत्पादितत्वाच्चतुष्टवं प्रमाणानां न युक्तमित्याशङ्क्याह * पञ्चेति * अपोद्धारे कारणमाह * अभावस्तावदिति * न चैरं कृत्वोदगेयमित्यागमाद्यज्ञायज्ञीयस्येरापदवत्त्वागतेरागमस्याप्यागमप्रामाण्यमस्तीत्याशङ्क्याह * प्रत्यक्षेति * स्वरूपोपादानेनात्र प्रत्यक्षत्वसम्भवान्नागमगम्यतेत्याशयः। ननु नामादिपदचतुष्टयविषयत्वे भाष्यकृता पूर्वं चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवा मर्त्यां आविवेशेतीयमृगुपन्यस्ता सा किमित्यपेक्षितेत्याशङ्क्याह चत्वारीति * ननु भाष्यकृता चत्वारि शृङ्गेति चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयो अस्य पादा भूतभविष्यत्वर्त्तमाना द्वे शीर्षे शब्दात्मनौ नित्यः कार्यश्चेति सप्त हस्ता सो अस्य सप्त विभक्तयः त्रिधा बद्धो वृषभो रोरवीति त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति वृषभो वर्षणात् रोरवीति शब्दं करोति महोदेवो मर्त्यां आविवेश महान्देवः शब्दः मर्त्यान्मरणधर्माणो मनुष्यानाविवेशेति व्याख्याय महता देवेन नः साम्यं स्यादित्यभ्येयं

व्याकरणमिति भाष्येण शब्दब्रह्मसाम्यं व्याकरणप्रयोजनमुक्तं का तत्रानुपपत्तिरित्याशङ्क्याह * यस्त्विति * विनियोगनिरपेक्षं मन्त्रस्यार्थतात्पर्यावधारणमशक्यमित्याशयः । संख्यासामान्यमात्रेण च विनियोगनिरपेक्षमन्त्रयोजनायां वैशेषिकादिष्वपि तन्त्रेषु योजयितुं शक्यत्वादव्यवस्था स्यादित्याह * तादृशं चेति * पार्थिवाप्यतैजसवायवीयान्यवयविद्रव्याणि चत्वारि शृङ्गाणि त्रयो अस्य लोकस्य पादा महत् कार्यारम्भकाणि द्व्यणुकानि द्वे शीर्षे प्रधानाप्रधानपुरुषौ सप्त हस्ता द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षड्भावरूपाः सप्तमश्चाभावः त्रिधा बद्धः । समवाय्यसमवायिनिमित्तकारणैर्बद्धः । वृषभो भोगहेतुः रोरवीति शब्दवान्महो देवो घोतनात् मर्त्यानाविवेश मर्त्यैर्भोग्य इत्येवमादियोजनोपपत्तेरतिप्रसक्तिः स्यादित्याशयः । यच्च भाष्यकृतोत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं विसस्रे जायेव पत्यउशती सुवासा इत्यृचमुपन्यस्याप्येकः पश्यन्नपि न पश्यति शृण्वन्नपि न शृणोत्येनामिति पूर्वार्द्धर्चमविद्वांसमाहार्धमिति भाष्येणाविद्वांसमर्धं पूर्वार्द्धं वा वदतीत्यभिधानादवेदार्थाविद्विषयत्वेन व्याख्यायोतो त्वस्मै तन्वं विसस्रे तनुं विवृणुते जायेव पत्यउशती सुवासाः तद्यथजाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते एवं वाग्वाग्विदे स्वमात्मानं विवृणुतइत्युत्तरार्द्धर्चं व्याख्याय वाङ् नो विवृणुयादित्यध्येयं व्याकरणमिति भाष्येण वाक्प्रकाशनं व्याकरणप्रयोजनमुक्तं तदन्यतः सिद्धेः प्रयोजनाभासमित्याह * उतत्व इति * यत्तु भाष्यकृता सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचीत्यृचमुपन्यस्य सक्तुः सचतेर्दुर्द्रावो भवति कसतेर्वाविपरीताद्विकसितो भवतीति तितउ परिपवनं ततवद्वा तुन्नवद्वा धीरा ध्यानवन्तः मनसा प्रज्ञानेन वाचमकृषत अत्र सखायः सन्तः सख्यानि जानते क एष दुर्गो मार्गः एकगम्यो वाग्विषयः के पुनस्ते वैयाकरणाः कुत एतत् भद्रैषां लक्ष्मीर्निहिताधिवाचि भद्रा ह्येषां लक्ष्मीर्निहिता भवति क्व अधिवाचि लक्ष्मीर्लक्षणाल्लाञ्छनाद्वा परिवृढा भवतीति व्याख्यानेन लक्ष्मीनिधानं व्याकरणप्रयोजनमुक्तं तद्गुरुसम्प्रदायसिद्धत्वात् व्याकरणप्रयोजनत्वयोग्यं न भवतीत्याह * एवमिति * यच्च सारस्वतीमित्युपक्रम्य याज्ञिकाः पठन्त्याहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति श्रुतिमुपन्यस्य प्रायश्चित्तीया मा-

भूमेत्यध्येयं व्याकरणमिति भाष्येण प्रायश्चित्ताभाजनत्वं व्याकरणप्रयोजनमुक्तं तदपि वैदिकशब्दविनाशविषयत्वात् व्याकरणप्रयोजनत्वयोग्यं न भवतीत्याह * आहिताग्निरिति * यच्च दशम्यां पुत्रस्येत्युपक्रम्य याज्ञिकाः पठन्ति दशम्युत्तरकालं पुत्रस्य जातस्य पिता नाम विदध्यात् घोषवदाद्यान्तरस्थमवृद्धं त्रिपुरुषानूकमनरि प्रतिष्ठितं तद्धि सुप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा कृतं कुर्यान्न तद्धितमिति न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुमिति भाष्येण पुत्रनामज्ञानं व्याकरणप्रयोजनमुक्तं तदन्यतः सिद्धेः प्रयोजनाभासमित्याह * यदपीति * घोषवन्तो वर्गतृतीयाद्या वर्णा आदौ यस्य नाम्नस्तद्घोषवदादि अन्तस्था यरलवा अन्तर्मध्ये यस्य तदन्तरं तस्य घोषवदादेरन्तरस्थस्य द्व्यचतुरादिवर्णस्य कृदन्तस्य नाम्नः परिग्रहस्तद्धितस्य वर्जनं वा तयोर्यन्नामकरणे वचनं तत्र न व्याकरणं नामप्रयोगोत्पत्तिशास्त्रत्वेनापेक्षणीयमिति तत्कृत्तद्धितसञ्ज्ञयोरिति तदित्यव्ययं लुप्तसप्तमीकमङ्गीकृत्य योज्यं तदुपपादनार्थं कृत्तद्धितसञ्ज्ञयोरित्याद्युक्तम् । यच्च भाष्यकृता सुदेवो असि वरुण यस्य ते सप्तसिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिवेत्यृचमुपन्यस्य सुदेवो असि वरुणसत्यदेवो यस्य ते सप्तसिन्धवः सप्तविभक्तयः अनुक्षरन्ति काकुदं तालुकाकुर्ज्जिह्वासास्मिन्नुद्यतइति काकुदं सूर्म्यं सुषिरामिव तद्यथा सूर्म्यं सुषिरामग्निरनुप्राविश्य तदन्तर्गतं मलमपहन्ति एवं सप्तसिन्धवः तालवनुक्षरन्ति तेनासि सत्यदेव इति व्याख्याय सत्यदेवाः स्यामेत्यध्येयं व्याकरणमिति भाष्येण सत्यदेवत्वप्राप्तिर्व्याकरणप्रयोजनमुक्तं तन्नास्या ऋचः सङ्ख्यासामान्यमात्रेण विभक्तिविषयत्वमभ्युपगम्यान्यतः सिद्धत्वान्नातीव व्याकरणापेक्षेति तावदाह * सुदेव इति* २१६।६
परमार्थतस्तु सिन्धुशब्दस्य नदीवाचित्वेन प्रसिद्धत्वान्नद्य एवात्र सप्त विवक्षिताः । अथापि वरुणशब्देन यज्ञमृत्विजं यजमानं वाऽभिप्रेत्य तत्प्रशंसापरेयमृगिष्यते तथापि होत्रीयाप्रशास्त्रीयाब्राह्मणाच्छंसीयापोत्रीयानेष्ट्रीयाच्छावाकीयाग्नीध्रीयाख्यहोत्रागताः सप्तवाचः षड्ऋषभगान्धारमध्यमपञ्चमधैवतनिषादाख्यसामस्वरगता वा प्रस्तावप्रणवोद्गीथहिङ्कारप्रतिहारोपद्रवनिधनाख्यसामभक्तिगता वा वाचः सप्तेत्यन्यपरत्वात् व्याकरणप्रयोजनत्वं निष्प्रमाणकमित्याह * यदा पुनरिति * नदीरैतिहासिकगोचरापन्नत्वादितरासां याज्ञिकगोचरापन्नत्वादित्यर्थः । एवं महाभाष्योक्तमुख्यानुषङ्गिकप्रयोजननिराकरणेन न चाभिनवप्रतिपदपाठानां वैदिकानां

लक्षणेन कार्यमित्यादिग्रन्थोक्ते व्याकरणस्य निष्प्रयोजनत्वे समर्थिते यदि कश्चित्तस्मादव्याकृता वागुद्यतइति श्रुतिपर्यालोचनेन व्याकरणासंस्कृतानां शब्दानामदृष्टसाधनत्वलक्षणसाधुत्वावगमात्साधुत्वसिद्धिर्व्याकरणप्रयोजनं वदेत्तं प्रत्याह * संस्कृतानां चेति * श्लोकं व्याचष्टे * व्याकरणेनेति * शब्दत्ववर्णत्वतद्व्यक्तितत्समुदायावयविस्फोटगोशब्दत्वक्रमग्रहणोच्चारणतत्साधनपुरुषाणां मध्ये किं वस्त्विति कस्येत्यस्य व्याख्या । उत्पत्त्यादीनां चतुर्णां मध्ये कः संस्कार इति को वेत्यस्य शब्दत्ववर्णत्वजातिव्यक्तिपक्षेषु तावद्दोषमाह * न तावदिति*जातिपक्षे तावदुभयत्र प्रसङ्गं विवृणोति * शब्दत्वइति * वर्णव्यक्तीनां तु संस्कारः प्रत्येकं वा स्यात्समुदितानां वा तत्र प्रत्येकपक्षे ऽतिप्रसङ्गं विवृणोति * एतेनेति * समुदायाभावात् समुदितानामपि संस्कारो न भवतीत्याह * समु-
२१७।१ दायस्त्विति* किं च नित्यानां वर्णव्यक्तीनां संस्कारः स्यादनित्यानां वा । तत्रानित्यपक्षे तावद्विनष्टानुत्पन्नानामसंस्कार्यत्वादुत्पन्नानामपि संस्कारक्षणं यावदनवस्थानान्न संस्कारः सम्भवतीत्याह *येषां तावदिति * संस्कारक्षणं यावदवस्थानाभ्युपगमे ऽपि व्यवहारकाले विनष्टत्वेन कार्यानुपयोगित्वात्संस्कारो न तु युक्त इत्याह * न चेति * एतदेव विवृणोति * यथैवेति * ननु भाष्यकृता किं पुनर्नित्यः शब्दः आहो स्वित्कार्य इति पृष्ट्वा सङ्ग्रहएतत्प्राधान्येन परिक्ष्यते नित्यो वा स्यात्कार्यो वेति भाष्येण सङ्ग्रहाख्ये वार्त्तिककारकृते ग्रन्थान्तरे तात्पर्येणैतद्विचार्यते नात्र तेन विचारेण प्रयोजनमित्युत्तरे दत्ते कथं तर्ह्यत्र लक्षणप्रवृत्तिरित्याशङ्क्य यद्यपि नित्यो ऽथापि कार्य उभयथापि लक्षणं प्रवर्त्स्यमित्युक्त्वा कथमनित्यपक्षे संस्कारानुपपत्तिरित्याशङ्क्याह * ततश्चेति * अत्यन्तविरुद्धत्वाच्च नित्यानित्यत्वयोरनियमाभिधानं न युक्तमित्याह * अदूरेति * कार्यत्वे च शब्दस्योत्पत्तिलक्षणः संस्कारः स्यात्तत्र च नित्यस्य वेदस्यानित्यशब्दव्युत्पत्तिविषयत्वायोगेन व्याकरणस्य वेदमूलत्वासम्भवादनित्यशब्दोपयुक्तत्वेन च नित्यवेदाङ्गत्वाभावादुभयविधमपि शास्त्रत्वं हीयेतेत्याह * उत्पादश्चेति * श्लोकं व्याचष्टे * व्याकरणेति * वेदोत्पादकत्वेन तु व्याकरणस्य वेदाङ्गत्वे वेदो ऽप्यप्रमाणं स्यादि-
२१८।१ त्याह * अथेति * कार्यत्वे च शब्दस्य संस्कारो ऽशक्यो ऽनर्थकश्चेति दोषद्वयं पूर्वोक्तमप्यनियमनिरासायाह * शब्दश्चेति * नित्यत्वे तु शब्दस्य विक्रियाख्यो ऽपि शब्दादुत्पत्त्याख्यश्च तावत्संस्कारो न सम्भवतीत्याह * तस्मादिति * न च ज्ञानरूपप्राप्तिलक्षणः सं-

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एक. स्तबको मुद्रयित्वा प्रकाश्यते ।
२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रहृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षायै ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १
(६) भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरु भिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः) ३
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ३

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

श्रीः

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—४९

स्कारः शब्दस्य व्याकरणेन क्रियते श्रोत्रजन्मत्वात्तस्येत्याह * वि-
नेति * अविहितत्वाच्च व्याकरणस्य नापूर्वसाधनसामर्थ्याधानल-
क्षणसंस्कारार्थता युक्तेत्याह * अदृष्टार्थस्त्विति * शब्दानां च
दृष्टार्थत्वेनापूर्वसाधनत्वाभावान्न तत्सामर्थ्याधानलक्षणेन संस्का-
रेण प्रयोजनमस्तीत्याह * दृष्टार्थेषु चेति * ननु लोकव्यवहारा-
र्थानां शब्दानां दृष्टार्थत्वात्संस्कार्यत्वायोगे ऽपि क्रत्वर्थानां व्रीहि-
यववन्नियमापूर्वार्थत्वात् संस्कार्यत्वं भविष्यतीत्याशङ्क्याह * कर्मे-
ति *किं च व्याकरणक्रियायाः पौरुषेयग्रन्थाधीनत्वे ऽनादिविधिवि-
षयतैव न युज्यते प्रकरणाम्नानं दूरनिरस्तमित्याह * हन्त्यादीति*
ननु तस्मादेषा व्याकृता वागुद्यतइत्यनारभ्याधीतः प्रत्यक्षो विधिः
कथमपह्नूयतइत्याशङ्क्याह * तेनेति * नित्यानित्यसंयोगविरोध-
प्रसङ्गान्नास्यैतत्परतास्तीति प्रागेवोक्तमित्याशयः। व्याकरणक्रियाया-
विधेयत्वाभ्युपगमे ऽपि प्रकरणाभावेन क्रत्वर्थत्वाभावान्न क्रत्वर्थश-
ब्दसंस्कारत्वं युक्तमित्याह * अनारभ्येति * नन्वनारभ्याधीत-
स्यापि खादिरादर्दर्शपूर्णमासार्थतादृष्टेत्याशङ्क्याह * ऐकान्तिकं
हीति * ननु यथाफलकल्पनालाघवायाश्वप्रतिग्रहेष्टौ वैदिकाश्वदा-
नविषयत्वं तृतीये वक्ष्यते तथेहापि वैदिकशब्दविषयत्वं व्याकरण-
क्रियाया भविष्यतीत्याशङ्क्याह * लोकेति * लौकिकवैदिकशब्दानां
भेदस्य निराकरिष्यमाणत्वान्न संस्कार्यासंस्कार्यव्यवस्था युक्तेत्याश-
यः। उपसंहरति * अत इति * किं च श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः
प्रयोगेणाभिलक्षितः आकाशदेशः शब्द इति वदद्भिर्वैयाकरणैः शब्द-
स्याकाशाश्रितत्वाभ्युपगमान्नित्याश्च शब्दा इति च नित्यत्वा-
भ्युपगमादमूर्त्तत्वाच्चाकाशाश्रितविभुत्वदृष्टान्तेन संस्कार्यत्वं वा-
रणीयमित्याह * आकाश इति * विभुत्वस्य ज्ञान-
विषयत्वलक्षणप्राप्तिसम्भवे ऽपि गां दोग्धीत्यादौ स्वरूपप्राप्तेः सं-
स्कारत्वेन प्रसिद्धायाः वारणीयत्वेनात्रेष्टत्वान्न साध्यविकलत्वम्।अ-
इउणित्यादिचतुर्दशसूत्रात्कृताणादिसंज्ञात्मकप्रत्याहारमात्रेण वर्ण-
व्यक्तिसंस्कारसिद्धेः शेषग्रन्थानर्थक्यं स्यादित्याह * वर्णेति *
जातिव्यक्तिसंस्कारपक्षौ दूषयित्वा समुदायसंस्कारपक्षं दूषय-
ति * समुदायस्त्विति * नन्वनेकेषां गकारौकारविसर्जनीयानामे- २१
कगोशब्दबुद्धिविषयत्वलक्षणः समुदायो लोकसिद्धत्वान्नापह्नवम-
र्हतीत्याशङ्क्याह * प्रत्येकं चेति * यथा नवमे हिरण्यशकलसहस्रे
णाग्निं प्रोक्षतीत्यग्निबुद्धिविषयभूतानामिष्टकानां धर्म्मः प्रोक्षणादिः
प्रतीष्टकमावर्त्तनीय इति पूर्वपक्षे वक्ष्यते तथात्रापि गकारादिवर्ण-

समुदायसंस्कारपक्षे प्रतिवर्णं संस्कारावृत्तिः प्रसज्येतेत्यर्थः । ननु पूर्वपक्षस्यास्थायित्वान्न दृष्टान्तता युक्तेत्याशङ्क्याह * न चेति * अयमाशयः इष्टकाव्यतिरिक्तावयव्यभावेनाग्निशब्देष्टकासमुदायमात्रवाचित्वात्समुदायसंस्कारत्वाभ्युपगमेन पूर्वपक्षिते स्थलाख्यस्यावयविनो ऽग्निशब्दवाच्यस्येष्टकाभिरारम्भोपपादनेन संस्कार्यद्रव्यैक्यात्संस्कारानावृत्तिरिति पूर्वपक्षन्यायानुपमर्देन सिद्धान्तकरणाद् युक्तं दृष्टान्तत्वं, न चात्र गकारादिभिः एको गोशब्दा ऽवयव्यारभ्यते येनाग्निधर्म्मसिद्धान्तन्यायो न स्यात् ।

विच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि ।
व्यतिरिक्तपदारम्भो वर्णैर्नात्रोपपद्यते ॥

इति श्लोकेन स्फोटवादे निराकृतत्वादिति स्फोटगोशब्दगत्वादीनामप्यवयविवन्निराकृतत्वान्न संस्कार्यत्वं सम्भवतीत्याह * स्फोटेति * समुदायसंस्कारपक्षे च सर्ववर्णसमुदायो वा संस्क्रियेत कतिपयवर्णसमुदायो वा तत्राद्ये पक्षे सर्ववर्णसमुदायस्यार्थाभावादर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति वार्त्तिकमयुक्तं स्यादित्याह * सर्वेति * कतिपयवर्णसंस्कारपक्षे ऽपि केचिदेव वर्णाः । संस्क्रियन्त नान्यइति व्यवस्थाहेत्वभावेन स्वरूपतः कतिपयत्वायोगात्कति चिदेवं संस्क्रियन्तइति संख्यात. कतिपयत्वं वाच्यं, तत्र संख्यां विना वर्णानामसंस्कार्यत्वेनान्वयव्यतिरेकाभ्यां वर्णसंख्यायाः संस्कार्यत्वात्साधुत्वं स्यात्तच्च गाव्यादिपदेषु अपि समानमित्याह * अथेति * गवादिपदगतैव वर्णसंख्या संस्कार्या न गाव्यादिपदगतेति व्यवस्थाशङ्कानिरासार्थम् * पदेपदइत्युक्तम् * क्रमसंस्कारपक्षं दूषयति * संस्क्रियेतेति * शब्दधर्मत्वाभावेन तत्संस्कारे ऽपि शब्दस्य साधुत्वं न सिध्यतीत्युक्तं ग्रहणोच्चारणद्वारौपचारिकशब्दधर्मत्वाभ्युपगमे ऽपि गाव्यादिष्वप्यानुपूर्व्याः सम्भवात्साधुत्वं प्रसज्येतेत्यर्थः । ग्रहणोच्चारणसंस्कारपक्षौ दूषयति * ग्रहणेति * कोपरिष्टादित्यपेक्षायामाह * वक्ष्यति हीति * यथाभिक्रामं जुहोतीत्यभिक्रमणस्य होमसाधनत्वासम्भवो ऽभिक्रमाधिकरणपूर्वपक्षे वक्ष्यते । तथा ग्रहणमुच्चारणं वा प्रतिव्याकरणक्रियायाः साधनत्वं न भवतीत्यर्थः । ननु साक्षात्साधनत्वाभावे ऽपि यथाभिक्रमणस्य कर्तृप्रत्यासत्तिजननद्वारा होमसाधनत्वं सिद्धान्ते वक्ष्यते तथोच्चारणसाधनतालवादिसंस्कारद्वारोच्चारणसाधनत्वं ग्रहणसाधनश्रोत्रसंस्कारद्वारा वा ग्रहणसाधनत्वं व्याक्रियाया भविष्यतीत्याशङ्क्याह * तालवादीति * अस्तु तर्ह्युच्चारयितुः पुरुषस्य संस्कारद्वारा तन्मनः

संस्कारद्वारा वोच्चारणसाधनत्वं ग्रहीतृपुरुषसंस्कारद्वारा तन्मनः संस्कारद्वारा वा ग्रहणसाधनत्वमिति स्वयमेवाशङ्क्याह *मनोवेति* यच्छास्त्रारम्भे भाष्यकृता ऽथ शब्दानुशासनमित्युक्त्वा अथेत्ययं शब्दो ऽधिकारार्थः प्रयुज्यते शब्दानुशासनं शास्त्रमधिकृतं वेदितव्यमिति स्वयमेव व्याख्यातं तद्वचर्थं स्यादित्यर्थः । इतश्च शब्दानुशासनं व्यर्थमित्याह * शिष्येति * किं च वैयाकरणैः स्फोटात्मकः शब्दो ऽभ्युपगतः तस्य च निरवयवत्वात्प्रकृतिप्रत्ययान्वाख्यानरूपः संस्कारो न युक्त इत्याह * स्फोटेति * स्फोटपक्षे न केवलं वर्णा एवासन्तः किं तु प्रकृतिप्रत्ययावपीत्यर्थः वाक्यस्फोटापेक्षायां च स्वरूपेणापि पदस्फोटस्यासत्त्वात्संस्कार्यत्वं न युक्तमित्याह * वाक्येति * २२०।१
नन्वसतामेव नामादीनां निष्कृष्य कल्पनया संस्कारो भविष्यतीत्याशङ्क्याह * अपोद्धारेणेति * कल्पनाप्यसतो न सम्भवतीत्याशयः। ननु निरवयवो ऽपि पदस्फोटस्तत्तद्ध्वनिसहकृतश्रोत्रवशात्पूर्वं गकारादिरूपेण प्रतीयते ततस्तदाकारमिथ्याज्ञानसहकृतेन श्रोत्रेण गौरित्येकं पदमिति स्फुटं पदतत्त्वज्ञानं जन्यते रत्नतत्त्वपरीक्षायामिवानेकमिथ्याज्ञानसहकृतेन चक्षुषा स्फुटारत्नतत्त्वप्रतीतिः एवं वाक्यस्फोटो ऽपि पूर्वं गोपदाकारेण शुक्लपदाकारेण च प्रतीयते ततः पदाकारमिथ्याज्ञानसहकृतेन श्रोत्रेण गौः शुक्ल इत्येकं वाक्यमिति स्वरूपेण वाक्यस्फोटः प्रतीयते । ततश्च ध्वनयो यत्स्थानकरणवशादेकस्मिन्पदस्फोटे वाक्यस्फोटे वा यद्वर्णाकारं यत्पदाकारं वा ज्ञानं जनयन्ति पदवाक्यस्फोटान्तरे ऽपि तत्स्थानकरणवशात्तद्वर्णाकारं तत्पदाकारं वा ज्ञानं जनयन्तः सादृश्यनिमित्तभ्रान्तिवशात्स एवायं वर्णस्तदेवेदं पदमिति प्रत्यभिज्ञानं जनयन्तीत्यन्योन्यविलक्षणेषु गौः शुक्लो गौः कृष्ण इत्यादिषु सादृश्याध्यवसितैकत्वानां नामादीनामपोद्धारो भविष्यतीत्याशङ्क्याह * अन्येति * अन्यस्य वाक्यस्फोटस्यावयवानामन्यस्य वाक्यस्फोटस्यावयवैः सारूप्यादित्यर्थः । सादृश्यमप्यसतो न सम्भवतीत्याशयः । ननु ।

गवये नरसिंहे वाप्येकज्ञानादृते यथा ।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ॥

इत्यादिस्फोटवादिभिरसतामप्यवयवानां सादृश्यसम्भवे निदर्शनमुक्तं तत्कथमसत्त्वे सादृश्यानुपपत्तिरित्याशङ्क्याह * गवयादिष्विति* लेख्यादिकृतेषु गवयादिषु ये ऽवयवास्तेषां मुख्यगवयादिगतैः कर्णखुरादिभिरवयवैः सारूप्यं यन्निदर्शितं तत्तेषां सत्यत्वा-

त्स्वावयवसामान्ययोगाच्चोपपन्नं तथा इहापि वाक्यस्फोटे तथात्वे ऽवयवानां सत्यत्वे स्वावयवसामान्ययोगे च सति सारूप्यं स्यात् ततश्च निरवयवस्फोटसिद्धान्तहानिरित्याशयः । विस्तरेण चैतत्पूर्वं निरस्तमित्याह * वाक्येति * उपसंहरति * तेनेति * नामादीनामपोद्धारेण प्रकृतिप्रत्ययान्वाख्यानरूपस्य संस्कारस्य कल्पनेत्यर्थः । अप्रामाण्यापत्तेश्चासतामपोद्धारो न युक्त इत्याह * अन्वाचक्षीतेति * यच्च शब्दानुशासकत्वेन शास्त्रत्वं व्याकरणस्योक्तं तत्पदविषयं वा स्याद्वाक्यविषयं वा तत्रासत्यत्वेन पदानामनुशास्यत्वाद्वाक्यानुशासनस्य च व्याकरणेनाकृतत्वान्नोभयथापि युक्तमित्याह * अशिष्यत्वादिति * युक्तं तु वाक्यस्यैवानुशासनं लोकतो ऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्म्मनियम इति वार्त्तिककृतार्थप्रयुक्तानां शब्दानामनुशास्यत्वाभिधानाद्वाक्यस्यैव चार्थप्रयुक्तत्वेनेष्टत्वादित्याह * अर्थेनेति * ननु सूत्रकारादिभिः पदपदार्थानामनिराकरणात्कथमुच्यते वाक्यमेवंविधं चेष्टमित्याशङ्क्य टीकाकृतैवमुक्तमिति दर्शयितुमाह * ब्राह्मणार्थ इति * यथा ब्राह्मणशब्दे ब्रह्मशब्दार्थो नञर्थश्च णकारार्थ एव वा ज्ञानाख्यो ऽनिरुपाख्यश्च नास्ति कम्बलशब्दे च कंशब्दार्थो बलशब्दार्थो वा नास्ति तथा देवदत्तादयः शब्दा वाच्ये ऽनर्थकाः स्युरिति टीकाकारश्लोकार्थः । एवमादिना ग्रन्थेन बहुप्रपञ्चमुक्त्वा पदानामर्थव्यभिचाराभिधानाद्व्यभिचारिणामपि केवलाप्रयोगित्वेनार्थपरत्वनिराकरणाद्वाक्यान्वाख्यानार्थत्वेन व्याकरणव्याचिख्यासा टीकाकाराणामवसीयते पश्चात्तु तदनाश्रयणात्पूर्वापरविरुद्धार्थाभिधानेनाप्रामाण्यं व्याकरणस्य सूचितं भवतीत्यर्थः । सूत्रकृतो जनिकर्त्तुरित्यादिनिषिद्धमासकरणात्पूर्वापरविरुद्धाभिधानं दृष्टान्तितं सन्ति यदृच्छाशब्दा न सन्तीत्यादिवार्त्तिककृतः । आकृतिर्नित्या द्रव्यमनित्यं द्रव्यं नित्यमाकृतिरनित्येत्यादिभाष्यकृतः । सूत्रकारादिवदेव वाक्यान्वाख्यानानाश्रयणादिति वा बोध्यम् । पूर्वपक्षमुपसंहरति * अत इति * आचार्याणां परस्परं विप्रतिपत्तेर्विगानभूयिष्ठत्वं स्वयमेव पूर्वापरविरुद्धाभिधानात् विरुद्धत्वम् । एकानेकमूलश्रुतिकल्पनायोगान्निर्मूलत्वम् । मुख्यामुख्यप्रयोजनासम्भवान्निष्फलत्वं सर्वैर्भाषितव्यमिति भाष्यात्कर्मस्वाध्यायकालवैदिकशब्दप्रयोगेष्वव्यवस्थाशङ्का कस्य चित्स्यात्तन्निवृत्त्यर्थ-
२२१।२ माह * ततश्चेति * यस्तूपपादितमर्थं तार्किकत्वाभिमानी साधनप्रयोगमन्तरेण न बुध्यते तं प्रति साधनप्रयोगा वक्ष्यन्तइत्याह * अत्रेति * सर्वेषामर्थप्रत्यायनशक्तत्वलक्षणे वाचकत्वे तावत्प्र-

योगमाह * गावीति * गौणलाक्षणिकानामादिशब्दोपादानाशङ्का-निवृत्त्यर्थं प्रकृतग्राहीसर्वशब्दः गोणीशब्दस्यापनवाचित्वात्सिद्ध-साध्यतामाशङ्क्य * गोत्वस्येत्युक्तम् * उस्रादिशब्दैरनैकान्तिकत्वं तत्र शब्देन निरस्तं गाव्यादिशब्दैर्वृद्धशब्देन अर्थप्रत्यायनाङ्गत्वलक्षणे साधुत्वे प्रयोगमाह * एवमिति * अत्रापि गोणीशब्दे सिद्धसाध्यतापरिहारार्थं गोत्वे साधुत्वमिति विशेषणीयं साधनशब्दोक्तस्य प्रत्यायकत्वस्य गाव्यादिशब्दैरनैकान्तिकत्वमाशङ्क्यार्थस्यैव साधनादिति मध्यमपदलोपिसमासाभ्युपगमेन मूलशब्दोपन्यासनिरपेक्षार्थप्रत्यायकत्वरूपहेतुसूचनार्थो ऽर्थशब्दः। अपभ्रंशरूपापशब्दत्वायोगाच्छब्दत्वाभावरूपमपशब्दत्वं गाव्यादीनां वाच्यमित्यापाद्य तन्निराकरणे प्रयोगमाह * श्रौत्वादिति * अत्रापि प्रयोगद्वये दृष्टान्तः स एवेत्याह * पूर्वेति * अनादित्वे प्रयोगमाह * अनादित्वं चेति * अवध्यनवधारणस्य चिरन्तनकूपादिभिरनैकान्तिकत्वादवध्यभावावधारणादिति हेत्वर्थः। तत्सिद्ध्यर्थम् * वक्तुरित्युक्तम् * गवादिशब्दसम्बन्धे सर्वो ऽन्यस्मात्प्रपद्यते। महत्तद्व्यवहारित्वादिति सम्बन्धानादित्वन्यायेन सर्वेभ्यो वक्तृभ्यः पूर्वं विद्यमानत्वादित्यर्थः। साधुभाषणस्यादृष्टार्थत्वात्प्रयोगमाह * साधुभिरिति * अत्रैव साध्ये हेतुदृष्टान्तान्तरमाह * अशास्त्रेति * बुद्धोक्तैश्च शब्दैरर्थाभिधानवदित्यर्थः। हेतुसिद्ध्यर्थं संस्कृतव्याकरणस्याशास्त्रत्वे प्रयोगमाह * शास्त्रं नेति * संस्कृतव्याकरणत्वमित्यध्याहारः। साक्षाच्छास्त्रत्वाभावे ऽपि वेदमूलतया प्रामाण्यात्तद्विहितस्य साधुभाषणस्याष्टकादिवददृष्टार्थत्वं भविष्यतीत्याशङ्क्य तदभावे प्रयोगमाह * वेदेति * वेदाङ्गत्वाभावे प्रयोगमाह * शास्त्राङ्गमपीति * हेतुसिद्ध्यर्थमतादर्थ्ये प्रयोगमाह * अतादर्थ्यमिति * कथादिरेव दृष्टान्तः वेदानङ्गत्वे ऽपि शब्दप्रयोगाङ्गत्वात्प्रयोगोत्पत्तिशास्त्रत्वं भविष्यतीत्याशङ्क्य तदभावे प्रयोगमाह * न चेति * एतदेव व्याचष्टे * यथा हीति * अशास्त्रत्वादिसाधनस्य पूर्वपक्षोपयोगमाह * तस्मादिति * यदाचारेणैषां प्रयोज्यत्वमवगतं न तच्छास्त्रस्थैर्वारितमित्यर्थः। २२।२

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २२ ॥

अत्र भाष्यं कृता महता प्रयत्नेनेत्यादिना सूत्रं व्याख्यायते * अपराधादित्यादिना * गाव्यादिशब्देष्वपराधसम्भावनामात्रे सूत्रस्य तात्पर्यमुक्तं तत्सम्भावनामात्रेण सिद्धान्तासिद्धेरयुक्तमाश-

ङ्क्ष नेदं सिद्धान्तसूत्रं किं तु पूर्वपक्षदूषणार्थमित्याह * अनैकान्तिकता तावदिति * निर्णयवचनादेकान्तशब्दात्तस्मै प्रभवति सन्तापादिभ्य इति ठक्प्रत्यये कृते ऽनैकान्तिकशब्दव्युत्पत्तेरनिर्णायकत्वमनैकान्तिकता एवं न कस्य चिच्छब्दस्य वाचकत्वं स्यादित्याशङ्क्याह * वाचकत्वादिति * परपक्षसन्देहापादनस्य स्वपक्षनिर्णयानुपयोगित्वादानर्थक्यमाशङ्क्याह * संशयेति * एतदेव व्याचष्टे * दृढेति * पूर्ववाचकत्वानिश्चयार्थत्वेनैतत्सूत्रं व्याख्यातमिदानीमनादित्वानिश्चयार्थत्वेन व्याचष्टे * अथ वेति * श्लोकं व्याचष्टे * यदि हीति * ननु विविधाँश्छब्दानभिव्यनक्तीति भाष्येण कस्मै न सौत्रो निष्पत्तिशब्दो ऽभिव्यक्त्यर्थत्वेन व्याख्यात इत्याशङ्क्य शब्दाधिकरणे शब्दोत्पत्तेर्निषिद्धत्वादित्याह * प्रयत्नेति * यथाभाष्यं द्वेधा सूत्रं व्याख्याय स्वयमकारप्रश्लेषेणाप्रयत्नेनापि निष्पत्तेरिति मध्यमपदलोपिसमासाङ्गीकरणेन तावदन्यथा व्याचष्टे * अपर-
२२३।१ इति * विधानशब्दः प्रकारवचनः निष्पत्तिशब्दस्य चोत्पत्त्यर्थत्वेन षष्ठ्यन्तत्वेन च प्रयत्नस्य निष्पत्तेरिति च षष्ठीसमासाश्रयणेनैतत्सूत्रं व्याख्येयमित्याह * अथ वेति * अपराधव्यतिरेकजनितेयं षष्ठीति प्रकटयितुं तस्यामिति सप्तमी। ननु प्रयत्ननिष्पत्तेरपराधभागित्वे शब्दस्य किमायातमित्याशङ्क्य तद्गतस्यापराधस्य शब्दे सञ्चारप्रतिपादनार्थत्वेन शब्द इति सूत्रावयवं व्याचष्टे * यश्चेति * यद्वैकोपलक्षणाभावात्साध्वसाधूनां विधिनिषेधविषयत्वासम्भवाभिप्रायेण साधुभिर्भाषितासाधुभिर्नेति प्रयोगोत्पत्तेरुच्चारणनियमस्याशास्त्रीयत्वादिति यो हेतुरुक्तः तस्यासिद्धत्वप्रतिपादनार्थमेतत्सूत्रमित्यन्यथा व्याख्यातं साध्वसाधुत्वव्यवस्थां तावदाह * अतश्चेति *

ग्रस्तं निरस्तं निहतावलम्बिते अम्बूकृतं ध्मातमथोविकम्पितम्।
संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः ॥

इत्यादिस्मृत्यवगतग्रस्तत्वादिदोषवर्जितनियतह्रस्वादिकालाभिव्यङ्ग्यथालक्षितक्रमग्राह्येषु वर्णेष्वभियुक्तो साधुशब्दप्रयोगात्तद्विपरीतेषु चासाधुशब्दप्रयोगादवश्यं तदालम्बनं किंचित् व्यवस्थितं वक्तव्यं तत्र चानित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति सूत्रे साधुत्वेनाभिमतानां नित्यानां शब्दानामर्थप्रत्यायनाङ्गत्वस्योक्तत्वात्तस्य च फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गता निष्फलत्वेन शब्दस्य योग्यत्वादवसीयतइति वार्त्तिकेनोपपादितत्वादर्थप्रत्यायनाङ्गत्वं साधुत्वमवगम्यते। तच्च वाचकवृत्त्या लक्षणावृत्त्या गौणीवृत्त्या वेति त्रिविधम्। गाव्यादिशब्दानां मुख्यार्थान्तराभावाद्गौणलाक्षणिकत्वे तावदनाशङ्क्य नी-

ये । वाचकशक्तिकल्पनं त्वन्यथाप्युपपत्तेर्निषिद्धं न च प्रार न्तरेण शब्दस्यार्थप्रत्ययाङ्गत्वं सम्भवतीत्यव्याप्तयतिव्याप्तयभावादेतदेव साधुत्वलक्षणं युक्तं तच्चानपभ्रष्टेष्वेव शब्देषु नापभ्रष्टेष्वित्यनपभ्रंशापभ्रंशकृता साध्वसाधुव्यवस्था सेत्स्यतीत्यर्थः । दृष्टं चानपभ्रष्टेष्वेव सुवर्णादिषु व्यवहाराङ्गत्वलक्षणं साधुत्वं नापभ्रष्टेषु कूटेष्वित्याह * लोके ऽपि चेति * इदमेव वानपभ्रष्टत्वं साधुत्वमपभ्रष्टत्वं चासाधुत्वं तयोश्च सम्यक्त्वासम्यक्त्ववाचिभ्यां सत्यासत्यशब्दाभ्यां वक्तुं शक्यत्वात्सत्यं वदेदनृतं न वदेदिति विधिनिषेधाविषयत्वोपपत्तेर्धर्माधर्मोपयोगो ऽस्तीत्यन्यथा साध्वसाधुव्यवस्थामाह * यद्वेति * एतदेव विवृणोति * धर्मेति * नन्वर्थतथात्वातथात्वविषयत्वादनयोर्विधिनिषेधयोर्न शब्दतथात्वातथात्वविषयता युक्तेत्याशङ्क्याह * अर्थसत्यामिति * एतच्चार्थे सत्यासत्यत्वयोः सत्त्वासत्त्वरूपत्वाच्छब्दे चानपभ्रष्टापभ्रष्टरूपत्वात्सकृच्छ्रुतयोश्च सत्यानृतशब्दयोरुभयपरत्वायोगादेष हवै सत्यं वदन् सत्ये जुहोति यो ऽस्तमिते सायं जुहोत्युदिते प्रातः प्रातः प्रातरनृतं ते वदन्ति पुरोदयात् जुह्वति ये ऽग्निहोत्रमित्यादिश्रुतिपर्यालोचनया चार्थपरत्वावसायाच्छब्दपरत्वानुपपत्तेर्गाव्यादिशब्दस्य च शिष्टैरगर्हितत्वात्प्रौढिमात्रेणोक्तम् । उक्तेन च प्रकारेण साध्वसाधुत्वयोर्व्यवस्थायां सत्यां विधिनिषेधविषयत्वोपपत्तेः प्रयोगोत्पत्त्यशास्त्रत्वादित्यसिद्धं हेतुरित्याह * एवमिति * अपराधभागित्वेन चासाधुत्वेनानियमेनाप्राप्तेरसाधूनां च प्रसक्तेर्नियमनिषेधविषयत्वसम्भवात् प्रयोगोत्पत्त्यशास्त्रत्वादित्यस्य हेतोरसिद्धत्वमनेन सूत्रेणोच्यतइत्यन्यथा व्याचष्टे * अथ वेति * धर्माद्व नियमो धर्माप्रसक्त्या वा नियमो २२४।१
नास्तीत्यर्थः । एतदेव विवृणोति * यदि हीति * नियमशास्त्रशब्देन निषेधशास्त्रमप्युपलक्षितं साधुनियमकारिशब्देनासाधुनिषेधकारिणोऽप्युपलक्षणम् । ननु गाव्यादिशब्दस्य सास्नादिमदर्थाप्रतिपादकत्वे प्रसक्त्ययोगात्प्रसक्तिसिद्ध्यर्थमवश्यं सास्नादिपर्यायतुल्यं वाचकशब्दान्तरत्वमेष्टव्यमित्याशङ्क्याह * एक एवेति * पूर्व प्रत्ययादिति पूर्वपक्षभाष्येणार्थापत्तिः सर्वेषां वाचकत्वे प्रमाणमुक्तेत्यभिप्रेत्यान्यथाप्युपपत्तिलक्षणदूषणाभिधानार्थत्वेनैतत्सूत्रं व्याख्यातम् । इदानीमनुमानोपन्यासार्थं तद्ग्राह्यमित्यभिप्रेत्यानैकान्तिकत्वलक्षणहेतुदूषणप्रतिपादनार्थत्वेनैतत्सूत्रं व्याचष्टे * किं चेति * अनेन च देवदत्तादिशब्दे बालैः प्रयुक्ते ऽप्यपटुकारणत्वेनाप्रयत्ननिष्पत्तेसत्तादिरूपेण नाशात् कठोरबुद्धिभिरपि बालप्रयुक्तशब्दानुकरणप्रयत्ननि-

प्पत्तेस्तत्तादिरूपेण नाशादपराधभागित्वं दृष्टं ततश्च प्रत्ययादितिभाष्योक्तस्य शब्दश्रवणानन्तरभाष्यार्थप्रत्ययलक्षणस्य वाचकत्वहेतोस्तदुपलक्षितस्य चार्थविषयशब्दप्रयोगलक्षणस्यानैकान्तिकतेति सूत्रं योजितम् । श्लोकं व्याचष्टे * तत्तेति * गाव्यादिशब्दैरप्यनैकान्तिकाविमौ हेतू इत्याह * अपभ्रंशाश्चेति * ननु तेषामपि पक्षत्वान्न विपक्षतेत्याशङ्क्याह * कतिषु चिदेवेति * एवमपराधभागिन्यवाचके ऽपि शब्दे हेतोर्दर्शनादनैकान्तिकत्वभूतमपशब्दापराधप्रतिपादनार्थमेव तत् *सूत्रमित्युक्तम्* हेतोरेव चानैकान्तिकत्वलक्षणाप-
२२५।२ राधभागित्वम् अनेन सूत्रेणोच्यतइत्याह * ततश्चेति * एवमपि सूत्रयोजना सम्भवतीत्यपिशब्दार्थः । यद्वा यथा शब्दे अन्यथोच्चारणादपभ्रंशलक्षणापराधभागित्वं तथा हेतोरनैकान्तिकत्वाद्धेत्वाभासत्वलक्षणापराधभागित्वमित्येवमनैकान्तिकत्वप्रतिपादनार्थतयैतत्सूत्रं योज्यमित्याह * अन्यथेति * एवमपि सूत्रयोजना सम्भवतीति चशब्दार्थः सन्देहापादनार्थत्वं सूत्रस्योक्तमुपसंहरति * तस्मादिति * नन्यत्र सर्वेषां वा शब्दानां वाचकत्वमेकस्यैव चेति एवं द्वावेव पक्षौ तत्र सर्ववाचकत्वपक्षे सन्देहापादनेन निरस्ते पारिशेष्यादेकस्यैव वाचकतेति निर्णयसिद्धेरन्येन निर्णयाभिधानमयुक्तमित्याशङ्क्याह * संशयेति * किन्तूत्तरसूत्रमित्यपेक्षायाम् ।

अन्यायश्चानेकशब्दत्वमिति ॥ २३ ॥

अत्र भाष्यकृता न चैष इत्यादिनैकस्यार्थस्यानेकशब्दत्वमयुक्तमित्येवं सूत्रं व्याख्याय हेत्वपेक्षायां प्रत्ययमात्रेत्याद्युक्तं तदन्यथाप्युपपत्तिमात्रप्रतिपादकत्वेन पूर्ववत्सन्देहमात्रापादनादनिर्णायकं तत्प्रकारनिरूपणं च तदशक्तिश्चेत्यत्र वक्ष्यमाणत्वापुनरुक्तमित्युपेक्ष्य स्वयं प्रश्नपूर्वं पञ्चहेतूनाह * कथं पुनरिति * कारकयोः साक्षात्सम्बन्धात् क्रियासम्बन्धे सत्येककक्रियावशीकारात्परस्परनियमसम्बन्धो ऽभिधीयते । यथोक्तम् ।

प्रतिपत्तावुपादानात्साहित्ये च विवक्षिते ।
नियम्येत यदेकस्यां सम्बन्धः सो ऽर्थशब्दयोः ॥

इति स च वाच्यवाचकानेकत्वे स्वरूपान्नियमलक्षणाद्धीयतइत्यर्थः । वाच्यवाचकत्वयोः कर्मकरणरूपकात्मकत्वाच्छक्तेरेव कारकत्वमभिप्रेत्य सामर्थ्यशब्दः । क्रियाव्यापृतत्वरूपस्य तु कारकत्वमभिप्रेत्य तद्व्यवस्थासिद्ध्यार्थादृष्टातिशयरूपशक्त्यभ्युपगमे वा वाच्यावच्छिन्नवाचकाश्रितैकशक्तिमात्रेणोभयव्यवस्थोपपत्तेरनवच्छि-

त्वे वा शक्तिद्वयकल्पने ऽपि व्यवस्थानुपपत्तेर्वाच्यावच्छिन्नस्य वाचकाश्रितस्य सामर्थ्यस्याभिधायां नियमो यः सम्बन्धशब्दाभिधेय इति योज्यम्। श्लोकं व्याचष्टे *एकेति * योग्यार्थोपस्थानुदयादप्यनेकवाचकशक्तिकल्पनमन्याय्यमित्याह * किं चेति * श्लोकं व्याचष्टे * अत्यन्तेति * आनर्थक्यादप्यनेकशब्दत्वमन्याय्यमित्याह *नाम चेति*विकल्पापत्तेरप्यन्याय्यमित्याह*किं चेति* अर्थभेदापत्तेरप्यन्याय्यमित्याह * नामान्तरइति * ननु हस्तकरादिष्वनेकशब्दत्वदर्शनात्कथमन्यायतेत्याशङ्क्य हस्त इत्यादिभाष्येणाभियुक्तोपदेशाभावे सत्यन्याय्यतेति परिहृतं तद् गाव्यादिष्वपशब्देष्वप्यभियुक्तोपदेशस्य पूर्वपक्षिणेष्टत्वादयुक्तमाशङ्क्य गत्यन्तराभावसूचनार्थत्वेन व्याचष्टे * यत्त्विति * दृढस्मरणेनेत्यभियुक्तोपदेशो ऽनन्यागतिकत्वोपपादनार्थत्वेन व्याख्यातः । तदुपलक्षितमसादृश्यं चकारेण सूचितं सम्प्रत्युपेक्षितं भाष्यं गाव्यादिशब्देषु गत्यन्तरसम्भवसूचनार्थत्वेन व्याचष्टे * एकेति * गोशब्दोच्चिचारयिषायामशक्त्या केन चिद्गावीत्युच्चारिते श्रुतगावीशब्दसादृश्यं गोशब्दस्योपमानेनावगम्य गावीशब्दोच्चारणस्य गोशब्दोच्चिचारयिषामूलत्वानुमानाद् गोशब्दत्त्वानुसारेण गावीशब्दादप्यर्थप्रत्ययोपपत्तेर्न गावीशब्दस्य शक्त्यन्तरकल्पनमित्यर्थः । अनेकशब्दत्वस्यान्याय्यत्वं पञ्चधोपपादितमुपसंहरति * तस्मादिति * स्वरूपं नियमरूपतासम्बन्धः सामर्थ्यलक्षणः शब्दो नामार्थो नामान्तरे ऽप्यभिन्न इत्येषां चतुष्टयोपसंहारः । निरूपणशब्दव्यवस्थार्थत्वेनावर्त्य विकल्पप्रसङ्गलक्षणोपपत्त्युपसंहारः । सर्वशब्दमध्ये एकैकस्यैव गवाश्वादिशब्दस्य वाचकत्वनियमादितिं वीप्सार्थः । यद्वैकस्यैव शब्दस्य वाचकत्वनियमादेकस्यैव चार्थस्य वाच्यत्वनियमादिति यववराहाधिकरणोक्तो वाच्यैकत्वनियमो दृष्टान्तत्वेन वीप्सयोक्तः कथं पुनरुपमानानुमानाभ्यामेकशक्त्यनुसारेण गतिसम्भव इत्याशङ्क्याह * यथा चेति * सिद्धान्तमुपसंहरति * तेनेति *

तत्त्वमभियोगविशेषात्स्यादिति ॥ २४ ॥

भाष्यकृता पदोत्तरत्वेन सूत्रं व्याख्यातुं कथं पुनरित्याशङ्कितं तद्व्याचष्टे * तुल्येति * ततश्च पुनरपि अगृह्यमाणविशेषत्वात् सर्वेषां वाचकत्वमापद्येतेत्याशयः । शक्यमित्याहेति भाष्येणैतदाशङ्कानिरासार्थत्वेनैतत्सूत्रमवतारितं तद्व्याचष्टे * अत आहेति * अत्रार्थिनो ऽभियुक्ता भवन्तीत्यादिभाष्यादृष्टार्थिनामार्याणां शब्दार्थ- २२६।२

विषयादरविशेषात्तदुपदेशे वाचकत्वावधारणकारणमित्याभाति तच्च गाव्यादिशब्देष्वप्यार्योपदेशतुल्यत्वादयुक्तमितिमत्वार्थविशेषप्रतिपिपादयिषया पृच्छति*कःपुनरिति* अभियोगतद्विशेषशब्दयोः प्रकृतोपयोगिनमर्थमाह * तदुच्यतइति * शब्दपरो ऽभियोग इति निर्देशः लक्षणस्य व्याकरणस्य यच्छ्रवणं तदभ्यासनिमित्तस्तं वा विषयीकृत्याभियोगशब्दः प्रवर्त्तते लक्षणश्रवणाभ्यासो ऽत्राभियोगशब्देनोक्त इत्यर्थः । यल्लक्ष्यमुदाहरणीकृत्य लक्षणश्रवणमभ्यस्तं तद्व्यतिरिक्तानान्तुल्यन्यायानां लक्ष्याणां तेन लक्षणश्रवणाभ्यासेन ज्ञानमभियोगविशेषः फलेन तद्धेतोरभ्यासतिशयस्य लक्षणाल्लक्षणश्रवणाभ्यासातिशयो ऽभियोगविशेष इत्युक्तं भवति। ननु प्रतिपदपाठेनैव वाचकत्वनिरूपणसिद्धेर्न लक्षणश्रवणाभ्यासातिशयापेक्षेत्याशङ्क्यां निरस्यंस्तृतीयस्य प्रश्नस्योत्तरमाह * प्रतिपदेति * ननु प्रतिपदपाठस्याशक्यत्वे ऽपि वेदान्नो वैदिकाः सिद्धाः लोकाच्चैव हि लौकिकाः । अनर्थकं व्याकरणमिति न्यायेन लौकिकवैदिकप्रयोगसिद्धत्वाद्वाचकतत्त्वनिरूपणस्य न व्याकरणापेक्षेत्याशङ्क्याह * तस्मादिति * वाचकसामस्त्याज्ञानत्वावाचकत्वनिश्चयो ऽपि न सम्भवतीत्याह * तत्सामस्त्येति * ननु वाचकसामस्त्यज्ञाने ऽपि कथमवाचकनिश्चयः स्यादित्याशङ्क्याह * लक्षणेति * सूत्रार्थमुपसंहरति * तेनेति * सूत्रं व्याख्याय पूर्वपक्षोक्तानि दूषणानि परिहरिष्यन्पदपूर्वकत्वाच्च वाक्यात्मकशास्त्रव्यापारसिद्धेरित्यादिनोक्तमितरेतराश्रयमनुभाषणपूर्वकं परिहरति * यस्त्विति * प्रयोगोत्पत्त्यशास्त्रत्वादित्यनेन लक्षणशास्त्रस्य तन्मूलशास्त्रस्य वा लोकप्रसिद्धपदप्रयोगादुत्पत्तेः प्रयोगनियामकत्वासम्भवादितरेतराश्रयत्वं यदुक्तं तद्यदि तावन्निर्णीतवाचकत्वैः पदैरन्वाख्यानम् अन्वाख्यानाच्चः वाचकत्वनिर्णय इत्येवं रूपमभिप्रेतं ततो वाचकत्वानिर्णये ऽपि प्रतिपादकत्वमात्रेणान्वाख्यायकत्वोपपत्तेः सुपरिहरमित्यर्थः । ननु च कुत्वं कस्मान्न भवतीत्यादिलक्षणानुगमदर्शनाद्व्याकरणावयवभूतेष्वपि पदेषु साधुत्वनिर्णयेन भाव्यमित्याशङ्क्य * पुनस्तैरपीत्युक्तम्* अथ लक्ष्याणां शब्दानां साधुत्वे सत्यन्वाख्यानमन्वाख्यानाच्च साधुतेतीतरेतराश्रयमभिप्रेतं तत्राह * यदीति * न त्वेतदस्तीति शेषः । ननु व्याकरणात्प्रागेव साधुत्वज्ञाने व्याकरणानर्थक्यं स्यादित्याशङ्क्याह * निर्ज्ञानेति * श्लोकं व्याचष्टे * तेनेति * ननु लौकिकशब्दानां सङ्कीर्णत्वाद्भवत्वन्वाख्यानमर्थवद्वैदिकानां त्वसङ्कीर्णत्वादनर्थकमित्याशङ्कते * वेद इति * अनेन च

२२७।

नवाश्रितप्रतिपदपाठानां लक्षणं न कार्यमित्यादिनोक्तमानर्थक्यं प्रसङ्गात्परिहारायानुभाषितं सर्वसाधुशब्दानां वेदे प्रयोगे सति व्याकरणानर्थक्यं स्यात्कृत्स्नसाधुशब्दविषयत्वाभावात्तु वेदस्य तदनुगतशब्दान्वाख्यानार्थं व्याकरणं भविष्यतीति परिहरति ।

नाकृत्स्नविषयत्वात् ॥ २५ ॥

भाषायामित्यधिकृत्यानुगतातां लोकविषयत्वाच्छन्दसीत्यधिकृत्यानुगतानां च वेदविषयत्वान्न वेदस्य कृत्स्नविषयतेत्युपपादयति;*केचिदिति * तेन लोकव्यवस्थितानां तावल्लक्षणमर्थवदित्याशयः । कृत्स्नसाधारणसाधुशब्दविषयत्वस्याप्येकस्यां शाखायामभावात्सर्वशाखागतानां चाध्ययनाशक्तेः शाखान्तरगतसाधारणशब्दानामप्यपभ्रंशेभ्यो विवेकाय लक्षणमर्थवदित्याह * सर्वेति * एतदेव विवृणोति * यथैवेति * अशक्तावानन्त्यं कारणमाह *प्रकृतीति * इत्थं निर्णीतवाचकत्वैः पदैरन्वाख्यानमन्वाख्यानाच्च वाचकत्वनिर्णय इत्येवं रूपे लक्ष्याणां शब्दानां साधुत्वे सत्यन्वाख्यानमन्वाख्यानाच्च साधुतेत्येवं रूपं वा लक्षणगते ऽन्योन्याश्रये परिहृते यदि कश्चिद्व्याकरणमूलभूतो वैदिको विधिर्व्याकरणाश्रयो वेदविद्धयाश्रयं च व्याकरणमित्येवं रूपं तस्मान्न ब्राह्मणेन म्लेच्छितवाइत्यादिलक्षणमूलगतमितरेतराश्रयं ब्रूयात्तत्राह * एतेनेति * पुरुषार्थे यत्स्वर्गे लोके कामधुग्भवतीति प्रतिपादितमदृष्टं साध्यं क्रत्वर्थं च ब्राह्मणेन न म्लेच्छितवाइतिज्योतिष्टोमप्रकरणाधीतवाक्यकल्पव्याकृता वागुद्यतइत्यनारभ्याधीतवाक्यकल्पं वा यत्साध्यं यच्च साधुशब्दप्रयोगाख्यं साधुशब्दज्ञानाख्यं वा साधनं तयोर्यत्साध्यसाधनभावविधायकं वाक्यं तद्गतानां शास्त्रान्वितादिपदानां वा या व्याक्रिया तस्याश्च या पूर्वप्रसिद्धविधिवाक्यमूलत्वकल्पना त्वयेष्टा तस्याश्च तद्वाक्यमूलत्वे वेदविधितः प्राक्सिद्धत्वकल्पनापत्तेस्तदाश्रयो वेदविधिः तस्याश्च तन्मूलत्वकल्पना तदाश्रया सेतीतरेतराश्रयत्वस्य यः प्रसङ्गः शक्यते एतेन प्रासङ्गिकानर्थक्यपरिहारसमाधानस्यावुद्धिस्थेन लक्षणगतेनेतरेतराश्रयत्वपरिहारन्यायेन प्रत्युक्त इत्यर्थः।एतदेव व्यतिरेकदर्शनपूर्वकं विवृणोति *यदिहीति* अन्वाख्यानं प्रकृत्यादिविभागेनाख्यानम् अन्वाख्येयाः साधुशब्दाः अन्वाख्याातानां ऽविधिर्व्याकृता वागुद्यतइत्यादिप्रयोगो व्यवहारकालइति चतुष्टयं साधुशब्दविषयं ब्राह्मणेन न म्लेच्छितवाइत्यनन्वाख्यातानां प्रतिषेधः व्यवहारकाले वर्जनं चेत्यसाधुविषयं द्वयमिति षट्कस्याप्य-

नादित्वे सति सर्वेषामन्वाख्यानादीनां सर्वदानवगतपूर्वापरविभागसम्बन्धे सति यदात्यन्ताहृष्टार्थत्वमात्रमेषां शास्त्रीयप्रत्ययाधीनं न स्वरूपं तदा सर्वकालव्याक्रियमाणत्वेन विद्यमानस्य शब्दस्य यो नियमविधिस्तस्येत्यर्थः । निषेधो ऽपि विधिशब्देनोपलक्षितः तयोरनादित्वे ऽवगम्यमानश्चासौ वेदविधिश्चेति वेदविधित्वेनावगम्यमानत्वं हेतुः । इतरेषामवगम्यमानो वैदिको विधिर्मूलं येषामित्यवगम्यमानवेदविधिमूलत्वं वैदिकस्य विधेरनादित्वाक्षेपकत्वे वेदादीनां स्वरूपविधयः कार्यविधयः साधनविधयश्च दृष्टान्तिताः । ध्वनिमात्राण्यसाधूनीत्यादिना गाव्यादीनामवाचकत्वस्य लोकविरुद्धत्वं यदुक्तं तत्परिहारायानुभाषते * यस्त्विति * भेर्यादिशब्दश्च मातृकाक्षपाठश्च प्रसिद्धानि च न्यूनवर्णान्यतिरिक्तवर्णानि विपर्यस्तवर्णानि च यानि पदानि तद्व्यतिरिक्ता ये प्रसिद्धा गाव्यादयः शब्दा-
२२९।४ स्तेषां मध्यइत्यर्थः परिहरति * तत्रेति * एकार्थविषयेषु सदृशशब्देष्वेकस्य शक्तौ क्लृप्तायामितरेभ्यस्तदशक्तिजत्वेनापि प्रतीत्युपपत्तेरेकस्यैव शक्तिरिति निर्णीते ऽपि कस्यैकस्येत्यनिर्णयात्संमुग्धवाचके लोके सत्यविरुद्धो लक्षणाद्वाचकनिर्णयः । यदि तु लक्षणमनादृत्यागृह्यमाणविशेषत्वात्सर्वेषां वाचकत्वं कश्चिद्वदेत्तं प्रति स्मृत्याचारबाधो वाच्य इत्यर्थः । श्लोकं व्याचष्टे * लोकेति * नन्वेवं सत्यवाचकत्वप्रतिज्ञाया लोकाविरोधः प्रथमपादे कथमुक्त इत्याशङ्क्याह * तर्केणेति * सम्बन्धग्रहणात्पूर्वं यस्मान्न गमयत्यतः गवादेर्नाभिधाशक्तिर्देवदत्तपदे यथेत्यनुमानस्य लोके ऽपेक्षितवाचकावाचकविवेकहेतुत्वाभावाल्लोकविरोधः । स्मृतेस्तु तदपेक्षितविवेकहेतुत्वादविरोध इत्याशयः । दृष्टान्तं विवृणोति * यथैवेति * वर्णविवेकावधारणस्य प्रत्यक्षत्वेनोक्तत्वात्स्मरणादेवेत्यवधारणं सहकार्यन्तरमात्रनिवृत्त्यर्थं लोकविरोधाभाव इत्यनेन स्मर्यमाणस्य तु वाचकावाचकविवेकस्य ब्राह्मणादिविवेकस्येव न लोकविरोध इति नञध्याहारेणोत्तरार्द्धं योजितं, विपरीतबाधप्रतिपादकत्वं नाध्याहारं विना स्मर्यमाणेन विरोधो बाध इत्येवमन्यथा व्याचष्टे * यथा चेति * स्मृत्या बाध इति विग्रहः । ननु निर्मूलत्वात् स्मृतेर्न बाधकत्वं युक्तमित्याशङ्क्याह * आदितश्चेति * प्रमाणमूलत्वेन स्मृतेर्बाधकत्वोपपादनायादितः * स्मृतेरित्युक्तम् * कुतः सिद्ध इत्यपेक्षिते * प्रत्यक्षेणेत्युक्तम् * नन्ववैयाकरणैरनवगमान्नास्य प्रत्यक्षता युक्तेत्याशङ्क्य * कुशलैरित्युक्तम् * यथा मातापितृसम्बन्धस्मृतिकुशलैर्ब्राह्मणादिभिर्ब्रह्मभेदो ऽवगम्यते तथा

प्रकृतिप्रत्ययाख्यानकुशलैः साध्वसाधुविभाग इत्यर्थः । यद्यप्यर्थप्रत्यायनाङ्गत्वलक्षणं साधुत्वं लिङ्गावगम्यं तथापि तदाश्रयस्यानपभ्रष्टशब्दरूपस्य प्रत्यक्षताभिप्रेता एवमसाधुत्वमुपन्यस्यापभ्रष्टरूपस्येत्यदोषः ।

अर्थबोधानपेक्षा तु नानपभ्रष्टरूपता ।
साधुत्वमेकवर्णे ऽपि प्रसङ्गादिति वर्णितम् ॥

ननु स्मृतीनां शास्त्रमूलत्वस्योक्तत्वात्तदाविरुद्धं व्याकरणस्मृतेः प्रत्यक्षमूलत्वाभिधानमित्याशङ्क्याह * यो नामेति * फलोत्पत्तेरनियतकालत्वात्सम्बन्धस्यानियतकालत्वं साध्वसाधुविवेकस्य तु प्रत्यक्षग्राह्यत्वोपपत्तेस्तदपह्नवे न केवलं स्मृत्या बाधः किं तु प्रत्यक्षेणापीत्याह * यस्य त्विति * सङ्गीतशास्त्रे स्वरगतरागविवेकप्रकीर्णकप्रबन्धतालवाद्यनृत्ताख्याः सप्ताध्यायाः तत्र । २३०।२

आत्मा विवक्षमाणो ऽयं मनः प्रेरयते मनः ।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥
ब्रह्मग्रन्थिस्थितः सो ऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कण्ठमूर्द्धास्येष्वाविर्भावयति ध्वनिम् ॥
नादो ऽतिसूक्ष्मः सूक्ष्मश्च पुष्टापुष्टश्च कृत्रिमः ।
इति पञ्चाभिधावन्तः पञ्चस्थानस्थितीः क्रमात् ॥
व्यवहारे त्वसौ त्रेधा हृदि मन्द्रो ऽभिधीयते ।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
स्यातां निषादगान्धारौ द्विश्रुती धैवतर्षभौ ॥
त्रिश्रुती वेदश्रुतयः षड्जमध्यमपञ्चमाः ।
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ॥
गर्दभः सप्तषड्जादिक्रमादुच्चारयन्त्यमी ।

इत्यादिलक्षणैः षड्जादीनां विवेके द्वितीयेन रागविवेकसञ्ज्ञकेनाध्यायेन कृते तदभ्याससंस्कृतेन श्रोत्रेण यथा षड्जो ऽयमृषभो ऽयं गान्धारो ऽयं मध्यमो ऽयं पञ्चमो ऽयं धैवतो ऽयं निषादो ऽयमिति स्वरविवेकज्ञानं जायते तथा यस्य व्याकरणस्मृतिजानिते साध्वसाधुविवेके पूर्वं जाते पश्चाद्व्याकरणश्रवणाभ्याससंस्कृतश्रोत्रस्य साध्वसाधुविवेकविषयं प्रत्यक्षं जायते तं प्रति साध्वसाधुसङ्कुरं साधयतः प्रत्यक्षबाधो ब्राह्मणादिवर्णसङ्कुरसाधनवद्भवतीत्यर्थः । अतस्तत्पक्षस्यैव प्रमाणविरोधो नास्मत्पक्षस्येत्युपसंहरति * तेनेति * प्रत्यक्षग्राह्यत्वे सति तत्पूर्वक-

स्यानुमानादेरपि सम्भवात्समस्तशब्दः । यच्चाहदृष्टविषयवच्छब्दानां साध्वसाधुतेत्यादिना साध्वसाधुविवेकस्याप्रामाणिकत्वेन विधिनिषेधविषयत्वायोगान्न धर्माधर्मसाधनत्वरूपापि साध्वसाधुतेत्युक्तम् । तदपि साध्वसाधुविवेकस्य सप्रमाणकत्वाभिधानं परिहृतं भवतीत्याह * तेनेति * ननु

साधुत्वं नेन्द्रियग्राह्यं लिङ्गं वास्य न विद्यते ।
शास्त्रस्यैव विषयो नैष प्रयोगेऽप्यस्य सङ्गरः ॥

इत्यन्यैरुक्तं तस्य कः परिहार इत्याशङ्क्याह * यस्त्विति * इन्द्रियग्राह्यत्वं विवृणोति * ग्रस्तेति * ग्रस्तमविभक्तिकोच्चारणं निरस्तं विश्लेषिनसयोगम् अम्बूकृतं सनिष्ठीवितं संवृतकलप्रगीतोपगीतश्विण्णरोमशादीनामादिशब्देनोपादानं दोषवर्जितानां नियतह्रस्वादिमात्रकालाभिव्यङ्ग्यानां यथावृद्धव्यवहारं लक्षितेन क्रमेण ग्राह्याणां वर्णानामिन्द्रियग्राह्यत्वमित्यर्थः । नन्वेवमप्यर्थप्रत्यायनाङ्गत्वलक्षणस्य साधुत्वस्येन्द्रियग्राह्यत्वं नास्तीत्याशङ्क्य वाचकत्वस्य साधुत्वस्याविनष्टत्वेन निरूप्यत्वात्तद्विषयस्य ज्ञानस्य श्रोत्रजन्यत्वेनेन्द्रियग्राह्यत्वं नास्तीति वक्तुम् *अविनष्टेत्युक्तम् *प्रकृतिप्रत्ययान्वाख्यानस्मृतिसहकृतस्य च श्रोत्रस्याविनष्टरूपविषयज्ञानहेतुत्वादवैय्याकरणस्याज्ञानं युक्तमिति *स्मर्यमाणशब्देनोक्तम्* यथोदात्तादिरूपज्ञानश्रोत्रं स्मृतिमपेक्षते तद्वदविनष्टरूपज्ञाने ऽपीति दृष्टान्तार्थः । लिङ्गग्राह्यत्वं विवृणोति * तदुत्तरेति * प्रत्यक्षेण साध्वसाधुविवेकग्रहणोत्तरकालं यत्प्रवृत्तं लक्षणं तद्गतं प्रकृतिप्रत्ययलोपादिसाधुत्वाव्यभिचारितया लक्षणेनावगतत्वादुदाहृतशब्दे दृष्टान्तेन शब्दान्तरे साधुत्वानुमानाय लिङ्गं भवतीत्यर्थः । वृद्धप्रयोगगम्यो हि शब्दार्थस्सर्व एव न इत्यनेन न्यायेन शब्दार्थस्य वृद्धप्रयोगमात्रावसेयत्वावधारणात् भवन्तीत्यादिषु शब्देषु वृद्धाप्रयुक्तत्वेनार्थप्रत्यायकत्वाभावात्साधुत्वरहितेष्वपि प्रकृतिप्रत्ययान्वाख्यानदर्शनात् व्यभिचारमाशङ्क्य व्यवहारगतार्थप्रतिपत्तिसहितत्वं विशेषणं कृतम् । अस्मादेव विशेषणादर्थप्रत्यायनार्थत्वं साधुत्वलक्षणं वार्त्तिककृतो ऽभिप्रेतमिति ज्ञायते । शास्त्रविषयत्वं विवृणोति * शास्त्रस्य चेति * श्रुतिस्मृतिरूपत्वेन क्रत्वर्थपुरुषार्थसाधनत्वप्रतिपादकत्वरूपेण विधिनिषेधनिबन्धनार्थानर्थज्ञापकत्वरूपेण कार्यस्वरूपज्ञापकत्वरूपेण चेति चतुर्द्धा द्वैविध्यं विवृतं साधुत्वमिन्द्रियग्राह्यमिति साधुत्वशब्देनासाधुत्वस्याप्युपलक्षितत्वादनर्थज्ञानार्थनिषेधशास्त्रविषयत्व (मसाधुत्वस्य दर्शितम् । अयं साध्वसाधुत्वरूपो विषय इत्यर्थः । ननु साध्वसाधु-

शब्दप्रयोगयोरिष्टानिष्टसाधनत्वज्ञापने साध्यसाधनभावविषयत्वाच्छास्त्रस्य साध्वसाधुविषयत्वं न स्यादित्याशङ्क्यैवंविध एवान्यो ऽपीत्युक्तम्। अन्यो ऽपि यागादिरेव विधिरेव विषय इत्यर्थः। द्विविधशास्त्रविषयत्वमेवोपपादयति * अविनष्टैरिति * साधुशब्दप्रयोगस्य स्वर्गसाधनत्वम्। एकः शब्द इत्यस्य कामधुक्शब्दयुक्तस्य शास्त्रस्य विषयः। यज्ञोपकारसाधनत्वव्याकृता वागुद्यतइत्यनारभ्याधीतस्याप्यश्वप्रतिग्रहेष्टिन्यायेन व्याकृतत्वस्य लौकिकवैदिकवाग्वदनविषयकत्वे क्रत्वर्थपुरुषार्थत्वलक्षणावैरूप्यापत्तेर्लौकिकमात्रविषयत्वे ऽपि फलकल्पनागौरवापत्तेर्वैदिके कर्मणि या वागुद्यते सा व्याकृतेत्यर्थावधारणात् विषयः। अपशब्दभाषणस्य प्रतिषिद्धाचरणनिमित्तक्रतुवैगुण्यरूपानर्थसाधनत्वं ब्राह्मणेन न म्लेच्छितवाइति निषेधशास्त्रस्य ज्योतिष्टोमप्रकरणाधीतस्य विषयः। अस्य निषेधस्यानृतवदननिषेधवत्प्राकरणिकं क्रत्वर्थत्वं याज्ञे कर्मणि स नियमो ऽन्यत्रानियम इत्यादिना महाभाष्यकृता ऽप्युक्तमिति सूचयितुम् * याज्ञे कर्मणीत्युक्तम् * वाग्योगवित् दुष्यति चापशब्दैरिति स्मृत्यापि वाचैव हि मनसा च यज्ञो वर्त्ततइत्यादिलिङ्गदर्शनाद्वाग्योगशब्दस्य यज्ञपरत्वावगतेर्वाग्योगविच्छब्दस्यर्त्विग्यजमानविषयतया व्याख्यातुं शक्यत्वाद्यज्ञविषयत्वमपशब्दनिषेधस्यावसीयतइति सूचयितुम् * यथोक्तमित्युक्तम् * यच्च प्रतिशब्दं विधिनिषेधवाक्यानुमानकल्पनानुपपत्तेर्न साध्वसाधुतयोर्विधिनिषेधविषयत्वं सम्भवतीत्युक्तं तत्परिहरति * द्वाभ्यामेवेति * क्रत्वर्थपुरुषार्थविध्योर्भेदे ऽपि विधित्वेनैक्यं मत्वा * द्वाभ्यामित्युक्तम् * ननु वेदवचनं पुनर्वस्तुस्वरूपतद्गतगुणदोषान्वाख्यानपरं विधिप्रतिषेधानपेक्षं नैव किं चित्प्रमाणत्वेन सम्भवतीत्यनेन वेदस्य स्वरूपपरत्वनिषेधात्कथं स्वरूपज्ञानार्थशास्त्रविषयता साध्वसाधुत्वयोरुक्तेत्याशङ्क्याह * न चेति * यावदेकाहेनाश्वो याति तावदाश्वीनं ननु तत्राप्यविनाशी वा अरे ऽयमात्मा ज्ञातव्य इत्येवंविधिपरस्यैव शास्त्रस्य स्वरूपज्ञानार्थत्वान्न तन्निरपेक्षस्येत्याशङ्क्याह * अथापीति * अत्रापि तर्ह्यर्थप्रत्यायनाङ्गत्वविशिष्टलक्षणानुगतत्वरूपैकोपलक्षणोपपत्तेर्ये ऽर्थप्रत्यायनाङ्गभूताः शब्दा लक्षणानुगतास्ते साधवो ऽन्ये चासाधवः प्रत्येतव्या इत्येवं ज्ञात्वा शास्त्रावधारितप्रयोजनान् साधुशब्दान्प्रयोक्तुमिच्छेन्नानर्थप्रत्यायनाङ्गभूताः शब्दा लक्ष- २३१।१

णेनानुगतास्ते साधवो न वा लक्षणेनाननुगतानित्येवं विधिनिषेधपरयोः शास्त्रयोः साध्वसाधुस्वरूपज्ञानार्थत्वं भविष्यतीत्याशयः । यावद्रूपमित्यनेन द्वयोरेव विधिनिषेधयोरेकेनोपलक्षणेन * सर्वशब्दापशब्दव्यापित्वमुक्तम् * शास्त्रस्य विषयो ऽप्येष इत्यपिशब्द सूचितमुपमानादिप्रमाणविषयत्वं दर्शयन्नुपमानं तावद् द्विविधमाह * निः सन्दिग्धेति * यो ह्यविनष्टत्वेन निःसन्दिग्धो वृद्धप्रयुक्तो देवदत्तशब्दो यश्च विनष्टत्वेन निःसन्दिग्धो बालप्रयुक्तस्तत् शब्दस्तत्सादृश्यं यच्च पटुकरणाभिव्यङ्ग्यत्वादिधर्मसामान्यभूतस्वरूपं गोशब्दादेरुपमानेनावगम्य पटुकरणाभिव्यङ्ग्यत्वस्य विनष्टाविनष्टरूपत्वेन देवदत्तादिशब्दे व्याप्तिदर्शनाद्गोशब्दादौ विनष्टाविनष्टरूपत्वानुमानं सम्भवतीत्युपमानपूर्वकानुमानाविषयत्वं साध्वसाधुत्वयोरूपचारादुपमानविषयत्वेन विवक्षितमिति * शक्यशब्देन सूचितम् * सङ्कीर्णसाधुविषयं चेदमुपमानं लक्षणानुगतवैदिकशब्दसादृश्यं लक्षणानुगतत्वस्याविनष्टत्वेन वैदिकेषु व्याप्तिदर्शनात् लौकिकेष्वविनष्टत्वानुमानमित्येतदप्युपमानपूर्वकमेवानुमानमसङ्कीर्णसाधुत्वविषयमिति * दर्शयितव्यमित्यनेन सूचितम् * सङ्कीर्णसाधुत्वविषयांस्तावदर्थापत्तिमाह * तथेति * लक्षणनैरपेक्ष्याभिप्रायो लौकिकशब्दः वृद्धव्यवहारनिबन्धनेनार्थप्रत्ययेन योत्थापिता वाचकत्वविषयार्थापत्तिः तया विनष्टस्य स्वाभाविकार्थाभिधानशक्तत्वरूपवाचकत्वानुपपत्तेरविनष्टरूपं साधुत्वं गाव्यादिशब्दसङ्कीर्णं निश्चीयतइत्यर्थः । असङ्कीर्णसाधुत्वविषयामर्थापत्तिमाह *तत इति * अन्यासक्तिनिमित्तं तदनासक्तिनिमित्तं स्पष्टुत्वादिकरणवैगुण्यनिमित्तं वा यत्सम्भवत्यपभ्रष्टं रूपं तद्वर्जितस्य केवलस्य साधोर्यल्लक्षणेनान्वाख्यानं तदन्यथानुपपत्त्या गोशब्दादेरेव साधुतेति सिद्धं, गवादिशब्दनियतमसङ्कीर्णसाधुत्वज्ञानमित्यर्थः । गाव्यादिशब्दानां लक्षणाभावस्यासाधुत्वं विनानुपपत्तेरभावपूर्विकयार्थापत्त्या साधुत्वाभावनिश्चयात्तद्द्वारेणाभावस्यापि साध्वसाधुत्वनिर्णयो वि-
२३२।१ षय इत्याह * अपभ्रंशेष्विति * ननु प्रत्यक्षादित्रयविषयत्वाभिधानमात्रेण परोक्तश्लोकप्रतिकञ्चुकसिद्धेरुपमानादित्रयविषयत्वाभिधानं किमर्थमित्याशङ्क्याह * इतीति * व्यापारशब्देनाभावोपमानयोः साक्षात्साध्वसाधुत्वनिर्णायकत्वाभावे ऽपि व्यापारसद्भावात्तद्विषयतेति सूचितम् । प्रयोगे ऽप्यस्त्यसङ्कर इत्येतद्विवृणोति * यद्यपीति * मातापितृसम्बन्धकुशलानां ब्राह्मणादिविवेकवत्प्रकृतिप्रत्ययान्वाख्यानकुशलानां साध्वसाधुशब्दविवेको ऽस्तीत्यर्थः । किं

च साधुत्वं नाम दोषवर्जितत्वं तच्चान्यत्रापि परीक्षकगम्यं दृष्टमित्याह * यथा चेति * रत्नतत्त्वपरीक्षका यथा पद्मरागादीनि विवेकेन जानन्ति तथा परे शब्दनामदोषवर्जितत्वं तच्चान्यत्रापि परीक्षकतत्त्वपरीक्षकाः साधुत्वं विवेकेन जानन्तीत्यर्थः । लक्षणस्य च साध्वसाधुविवेकोपायता रत्नपरीक्षायामेव दृष्टेत्याह * यथेति * एवं च साध्वसाधुविवेकस्य प्रत्यक्षादिनावगतिसम्भवे तन्निराकरणाच्च तत्पूर्वकपुरुषवचननिराकियापि सिद्धेति यदुक्तं तदपि प्रतिहतं भवतीत्याह * पौरुषेयेति * ननु व्याकरणानुगतसाधुत्वानन्तरं प्रत्यक्षेणासङ्कीर्णसाधुत्वदर्शने माभूदन्धपरम्परान्यायापत्तिः । सङ्कीर्णस्य तु साधुत्वस्य पूर्वदृष्टस्य व्याकरणमात्रात् विवेकज्ञाने तदापत्तिरपरिहार्येत्याशङ्क्याह * यावानिति * अयमाशयः न तावदृष्टसाधनत्वलक्षणसाधुत्वविवेके ऽन्धपरम्परान्यायापत्तिः विधिनिषेधमूलत्वादविनष्टरूपसाधुविवेके ऽपि न तदापत्तिर्वेदादिविद्यास्थानप्रयोगमूलत्वादिति । यच्चार्थप्राप्तश्च यो ऽर्थः स्यादित्यनेनार्थप्राप्तत्वात्साधुविधानानुपपत्तिरित्युक्तं तदनुभाषणपूर्वकं परिहरति * यत्त्विति *यथा चतुर्थे समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत दर्शपौर्णमासयोश्चत्वार ऋत्विज इत्युपात्तानामपि देशादीनामर्थप्राप्तत्वादविधानमिति पूर्वपक्षयित्वा पक्षप्राप्तानामपि नियमार्थो विधिरिति नियमार्था श्रुतिरुच्येत्तदिति-सूत्रेण सिद्धान्तयिष्यते तथात्रापि नियमार्थो विधिर्भविष्यतीत्याशयः । यच्चात्यन्तावाचकत्वादित्यनेन व्यावर्त्यासाध्वप्रसक्तेरसाधुनिवृत्त्यर्थस्य नियमस्यानुपपत्तिरित्युक्तं तदप्यनुभाषणपूर्वकं परिहरति * यत्त्विति * यत्त्वया ऽन्यनिवृत्तिफलो विधिर्नियम इत्युक्तः स नियमः परिसंख्या वेत्यनेन किं नादौ परस्तान्नियमः किन्तु परिसंख्येत्याशयः । सा चात्यन्तव्यावृत्त्याद्विना नेष्यते यस्तु परमार्थतो नियमः स नित्यतामात्रकारीति किमिति व्यावृत्त्याद्विना न लभ्यतइत्यर्थः । ननु भाषणे साधूनां नित्यप्राप्तत्वान्नियमो ऽनर्थकः स्यात् भाषणनियमे तु मौने दोषः प्रसज्येतेत्युक्तं तत्राह * सतीति* द्विधा परस्यार्थः पुरुषेण ज्ञाप्यते स्वाभिप्रायप्रकाशनद्वारेण वा तन्निरपेक्षमुख्यगौणलाक्षणिकैव त्रैरूप्यादिस्मरणमात्रे वा । तत्र स्वाभिप्रायप्रकाशनद्वारार्थज्ञापनामिह त्रैरूप्यस्मारणादिद्वारार्थप्रकाशनव्यावृत्त्यर्थभाषितव्यशब्देन लक्षणयोक्तम् । अनेन च पूर्वपक्षोक्तं दूषणद्वयमपि परिहृतम् । शब्दव्यापारद्वारार्थज्ञानरूपे हि भाषणे साधुव्यतिरिक्तोपायाप्रसक्तेः साधुनियमानर्थक्यमपरिहार्यम् । अर्थ-

ज्ञापनमात्रे तु साधुनियमे त्रैरूप्याद्युपन्यासः शास्त्रकाराणां विरुद्ध्येत । स्वातन्त्र्येण तु सर्वदा साधुभाषणनियमे मौने दोषो ऽपरिहार्यः स्वाभिप्रायप्रकाशनद्वारार्थज्ञापनं मौनिनाक्षिनिकोचादिना क्रियमाणं न श्रेयःसाधनमित्याक्षिनिकोचादिव्यावृत्त्यभिधानेनैव सूचितम् । अतश्च भोजनादौ मौनविधाने शाकादेर्भाषणनिवारणादि हस्तसंज्ञादिना न कार्यं शिष्टाचारविरोधापरिहारार्थं वा मौनविध्यभावविषयत्वं साधुभाषणनियमस्य कल्पनीयं भाषणानुवादेन साधुनियामकत्वं कल्प्यं साधुभाषाशब्दस्त्वस्मिन्पक्षे विशेषणाशयः । नन्वन्यानिवृत्त्या शिष्टाचारविरोधपरिहारार्थं वा मौनविध्यभावं विना नित्यत्वायोगान्नियमे ऽप्यन्यनिवृत्तिरवश्यं कल्प्येत्याशङ्क्याह * यद्य-
२३३।४ पि चेति * साधुस्मृत्या व्यवहितानामसाधूनां तदर्थप्रतिपादकत्वोपपत्तेरपभ्रंशकाले प्रयोगः सम्भवतीति विप्रकर्षाभिधायिकालशब्दोक्तानां स्मर्यमाणावधिदीर्घकालप्रयोगरूपरूढशब्दोक्तम्लेच्छभाषणविलक्षणसाधुसादृश्यरूपात्मककारणद्वयजन्यया भ्रान्त्या वाचकत्वेनार्वाचीनैर्गृहीतानामिदानीन्तनकाले प्रयोगः सम्भवतीत्यर्थः । गाव्यादिशब्दानामविवेकिलोकप्रसिद्धशब्दान्तरत्वमङ्गीकृत्य प्रसक्तिर्दर्शिता । परमार्थतस्तु तेषां गवादिशब्दापभ्रंशमात्रत्वेन शब्दान्तरत्वाभावाद्विनाशनिवृत्तिमात्रं नियमफलमित्याह *अथ वेति* मा कश्चिद्विनीनशदित्येकवचनान्वयायाध्याहार्यं विनाशनिवृत्त्यर्थत्वं नियमस्य दृष्टान्तपूर्वकमुपपादयति * तद्यथेति * तस्माद् ब्राह्मणेनेति प्रतिषेधस्तस्मादेषेति च त्रिविधिरविनष्टप्रयोगनियमार्थ इत्यन्वयः म्लेच्छितधात्वर्थव्याख्यार्थत्वापभाषितत्वादिति महाभाष्यकृत्प्रयुक्तं धात्वन्तरं दर्शितं विनाशनिवृत्त्यर्थत्वोपपादनाय दुष्टः शब्द इति स्मृत्युपन्यासः । किं चिद्विनष्टस्यापि भग्नशृङ्गगोन्यायेन शब्दत्वानपायात्कथमपशब्देत्याशङ्क्य * प्रमादादिनिमित्तेन विनाशेनेत्याद्युक्तम् * अयमित्यनेनापशब्दत्वं परामृष्टम् । विनष्टस्यापि गवादिशब्दस्य म्लेच्छैरप्रयोगात् किन्निमित्तो म्लेच्छशब्द इत्याशङ्क्य प्रकृतिप्रत्ययान्वाख्यानरूपव्यक्तयभावेनाव्यक्तोच्चारणत्वनिमित्तता स्मरणेन सूचिता प्रत्यक्षविधिनिषेधोपन्यासेन नात्र साधुभिर्भाषेतासाधुभिर्नेति विधिनिषेधौ कल्प्यौ येनोक्तदोषद्वयापत्तिः स्यादिति सूचितम् । ननु प्रमादादेरभावे विनाशस्याप्रसक्तेर्भावे वा परिहर्तुमशक्तेर्निषेधो न युक्त इत्याशङ्कते * ननु चेति * विनाशकारणनिषेधद्वारेण विनाशनिषेधो भविष्यतीति परिहरति * उच्यत-इति * अशक्तेः प्राग्भावरूपायाः स्वभावसिद्धत्वात् निषेधो न श-

कथ इत्याशङ्क्य * सामर्थ्यायेत्युक्तम् * प्रमादाशक्यभावे ऽपि च त्रेधा प्रसक्तिः सम्भवतीत्यन्यथा परिहरति * अन्यथेति * उपसंहरति * तत्कथं नामेति * यत्किं चित्प्रमादाशक्तिरूपक्लेशो वा २३४।९
दाक्षिण्याद्यनुवर्त्तनं वा ऽनभियुक्तसंव्यवहारो वापभ्रंशकारणं तत्परिहारार्थमविनष्टशब्दप्रयोगविषयापन्नो नियम्यतइत्यर्थः।यच्च न चादृष्टार्थतापि तस्येत्यनेन दृष्टार्थत्वाच्छब्दप्रयोगस्यादृष्टार्थो * नियमो न युक्त इत्युक्तम् * तत्क्रियास्वरूपस्य नैराकाङ्क्ष्ये ऽपि तदूगतस्य नियमस्यादृष्टार्थत्वं विनानर्थक्यापत्तेरयुक्तमित्यभिप्रायेणानुभाषणपूर्वकं परिहरति * यत्त्विति * ननु फलासिद्ध्यर्थत्वादपूर्वकल्पनस्यात्र तदभावान्नापूर्वकल्पना युक्तेत्याशङ्क्य क्रतूपकाररूपं पुरुषार्थरूपं च फलं दर्शयितुमाह * क्रत्वर्थमिति * एतदेवोपपादयितुमेकस्य उभयत्वं संयोगपृथक्त्वमिति चातुर्थिकं सूत्रं साध्याहारमुपन्यस्यति *एकस्य त्विति* ननु तत्रःदध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयादिति वाक्यद्वयश्रवणात् तस्मात्स्वगुणानां च परार्थत्वादसंबन्धः समत्वात्यादित्यनेन न्यायेन परस्परासङ्गतेरेकेन विहितस्य दध्नो परेण फलबोधायोगात्परस्परनिरपेक्षवाक्यद्वयेन युक्तोभयरूपता। नन्विह तथाविधं वाक्यद्वयं श्रूयतइत्याशङ्क्याह * तच्चेहेति * ब्राह्मणेन न म्लेच्छितवाइति प्राकरणिकेन निषेधेनासाधुभाषणस्य क्रतुवैगुण्यापादकत्वावगतेरर्थात्साधुभाषणनियमस्य क्रत्वर्थतावसीयते। एकः शब्दः सम्यक्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग् भवतीति चानारभ्यवादेन शास्त्रशब्दस्य रूढ्या विद्यास्थानवाचित्वात्सम्प्रदायपरतया व्याख्यानानुपपत्तेर्व्याकरणशास्त्रानुगतसाधुशब्दभाषणनियमस्य स्वर्गसाधनत्वावगतेः पुरुषार्थतावसीयतइत्यर्थः। ननु भाषणस्यार्थप्रतिपत्त्यर्थत्वेन जुह्वादिवत्पारार्थ्यादपापश्लोकश्रवणवत्स्वर्गे लोके कामधुगिति फलश्रुतेरर्थवादत्वात्पर्णमयीत्विनियमादृष्टवत्साधुनियमादृष्टस्यापि पुरुषार्थता न युक्तेत्याशङ्क्याह * तत्रेति * यदि क्रत्वर्थस्य भाषणस्योपायनियमरूपफलश्रुतिरेषा स्यात्ततो भवेदर्थवादस्यानारभ्यविहितस्य तु भाषणस्य क्रत्वर्थत्वे प्रमाणाभावाद् दृष्टार्थव्यवहारहेतुत्वेन शुद्धपुरुषार्थत्वावगतेस्तस्य च नियमं विनापि सिद्धेरदृष्टफलाकाङ्क्षिणि नियमे फलनिर्देशात्फलमेवावसीयतइत्यर्थः एतदुपपादनार्थं फलमात्रेयो निर्देशादिति सूत्रोक्तं चतुर्थन्यायं दर्शयितुम् * आत्रेयेत्युक्तम् * श्लोकं व्याचष्टे क्रत्वर्थे हीति * पुरुषार्थोशइत्यनवधारितक्रत्वर्थत्वमात्राभिप्रायेण नियमस्य पुरुषार्थतोक्ता। अनेन च क्रत्वर्थस्यांश इति क्रत्वर्थशब्दे वि-

ग्रहः सूचितः । यच्च न चेदं नियमापूर्वमित्याश्रयासम्भवेनेह * अपूर्वकल्पना न युक्तेत्युक्तम् * तदनुभाष्य परिहरति * यत्त्विति * पूर्वार्धेन क्रत्वर्थशब्देन साधुभाषणनियमस्यानृतवदनवर्जनवच्छुद्धक्रतुधर्मत्वाभिधानात्तस्य च क्रतुसंयुक्तपुरुषधर्मविषयब्राह्मणसंयुक्तवाक्यविषयत्वायोगात्तस्मादेषा व्याकृता वागुद्यतइत्यनेन वाक्येन या वागुद्यते साव्याकृतेति वाग्वदनानुवादेन व्याकरणानुगतत्वविधिप्रतीतिरनारभ्याधीतस्यापि चैषेति सर्वनाम्ना सन्निहितवैदिकवाग्वदनविषयत्वप्रतीतेर्लौकिकविषयत्वे च फलकल्पनागौरवापत्तेर्वैदिककर्माङ्गभूतव्रीह्यादिपदार्थव्यवहारार्थं लौकिकशब्दे प्रयोक्तव्ये व्याकरणानुगतशब्दनियमात्तज्ज्ञन्यं यदवघातादिनियमजन्यापूर्ववत् शुद्धक्रत्वर्थमपूर्वं तदङ्गभूतेष्वेव व्रीह्यादिष्वाश्रितं, यत्तु न ब्राह्मणेन म्लेच्छितवाइति ज्योतिष्टोमप्रकरणाधीतापशब्दनिषेधसामर्थ्यलभ्याद्यङ्गमध्यगतमुक्तभाषणविषयात्साधुशब्दनियमादपूर्वं तङ्गभ्यमानन्यायेनापशब्दवर्जनस्य क्रतुयुक्तपुरुषधर्मत्वावधारणेन क्रतुसाधनीभूतपुरुषाश्रितमित्यर्थः । क्रत्वङ्गभूतानामपि पदार्थानामङ्गत्वरूपेण यदभिधानं तदर्थं तद्विषयं यन्न भवतीत्यनङ्गत्वाभिधानार्थमित्युक्तम् । अपूर्वहेतोर्नियमस्याभिधानविषयत्वमुपचारेणापूर्वे ऽभिहितम् । यद्वाङ्गभूतस्यापि यस्यानङ्गत्वेन प्राप्तत्वेनाभिधानं यस्य स अनङ्गत्वाभिधानो यजमानः तदर्थमित्यर्थः । उत्तरार्द्धे व्याचष्टे *प्रकरणेति* ननु जङ्गभ्यमानाधिकरणन्यायेन क्रतुयुक्तपुरुष- २३५।१
संस्कारत्वसिद्धावपि ऋत्विजामपि संस्कारोपपत्तेः कथं यजमानसंस्कारत्वावधारणेत्याशङ्क्य न्यायान्तरमुक्तं शुद्धक्रत्वङ्गधर्मत्वेन क्रतुयुक्तपुरुषधर्मत्वेन च क्रत्वर्थस्य साधुभाषणनियमापूर्वस्याश्रयमुक्त्वा पुरुषार्थस्याह * पुरुषार्थेति * पुरुषार्थवाक्ये ऽपि प्रयोक्ताश्रितं साधुभाषणनियमापूर्वमित्यन्वयः । कथमित्यपेक्षायां सम्यगित्यनेन सन्निधिः प्रमाणत्वेनोक्तः ज्ञानपूर्वकस्य प्रयोगस्यापूर्वहेतुत्वसूचनाय ज्ञातृग्रहणम् । अपूर्वजनिकायाः साधुभाषणक्रियायाया जन्यस्य च स्वर्गस्य फलस्य च तदाश्रितत्वौचित्यदधीननिरूपणस्यापूर्वस्यापि तदाश्रितत्वं युक्तमिति योग्यतोक्ता यथा प्रधानयागसाध्यमादिशब्दोपात्तत्वमारादुपकारकाङ्गसाध्यमपूर्वं प्रयोगक्राश्रितमनुष्ठात्राश्रितमिति दृष्टान्तार्थः । ननु वक्ता तु भाषणे सर्व इत्यनेन ब्राह्मणेनेति तृतीयया सुप्रयुक्त इति चोक्तक्रियाया वक्तुर्गुणत्वावगमात्संस्कार्यत्वं निषिद्धमत आह * तृतीयेति * दृष्टान्तं विवृणोति * यथैवेति * यथा तृतीयानिर्दिष्टस्यापि शेषस्य भूतोपयो-

गित्वाद्यविषु क्षारणेन प्रतिपत्तिरूपः संस्कारः शेषधारणार्थपात्रान्तराप्रयोजकत्वाय चतुर्थे वक्ष्यते। तथेहापि ब्राह्मणस्य ज्योतिष्टोमसाध्यफलोपभोगलक्षणकार्योपयोगित्वाद्वपनादिनेव फलग्रहणयोग्यतारूपः संस्कारो भविष्यतीत्यर्थः। यद्वा वर्जनीयाया म्लेच्छनक्रियाया वपनादिवदेव यजमानकर्तृकत्वे सिद्धे तृतीयायाः कर्तृविधानार्थत्वायोगेनानुवादमात्रार्थत्वात्तस्य चान्यतः सिद्ध्यपेक्षत्वात् यागकर्तृत्वस्यैव च प्रकरणसिद्धत्वात्तद्विषयत्वेनेयं तृतीयाङ्गमेव प्रतिवक्तुर्गुणत्वं ब्रुते न म्लेच्छत्वं प्रतीत्याह * यदि वेति * पुरुषार्थवाच्ये तु कमिपदादेव स्वर्गकामादिवत्प्राधान्यलाभ इत्याह * कामधुगिति * गोदोहनादिवदधिकृताधिकारशङ्कानिवृत्त्यर्थो बहिःशब्दः पूर्वार्द्धं व्याचष्टे * नैवेति * कथं तर्हि म्लेच्छतिनान्वय इत्याशङ्क्याह * कुर्वतेति * यागगुणत्वं च व्रीह्यादिवत्संस्कार्यत्वस्यानुकूलमेवेत्याह * याग इति * यागोपयोगिना ब्राह्मणेन संयुक्तस्य म्लेच्छनस्यारादुपकारित्वायोगात्संस्कारत्वमेव युक्तमित्यर्थः। ननूपयोगित्वे ऽपि ब्राह्मणस्य व्रीह्यादिवत्प्राधान्यावेदकद्वितीयाद्यभावात्कथं प्राधान्यावगतिरित्याशङ्क्याह * तच्चेति * उपयोगितैव शेषस्वीकारसामर्थ्यात्प्राधान्याक्षेपिकेत्याशयः। उत्तरार्द्धं व्याचष्टे * बाह्येति * साधुशब्दप्रयोगस्य फलसाधनतैवावगम्यमाना प्रयोक्तुः फलभाक्त्वमाक्षिपतीत्याशयः। अनेन वानप्रस्थपदं चात्र विद्यतइति परिहृतम्। यच्च न वेदोच्चारणमुच्चारयित्रर्थमित्यनेनोच्चारणस्य पुरुषार्थापूर्वद्वारता न युक्तेत्युक्तं तत्परिहरति * यद्यपि चेति * अन्यार्थाश्रितस्य निषेधस्यान्यार्थत्वे तदहर्मांसमैथुने वर्जयेदिति दर्शपूर्णमासप्रकरणाधीतं निषेधमुदाहरति * तथा हीति * नियमस्यान्याश्रितस्यान्यार्थत्वे खादिरं वीर्यकामस्य यूपं कुर्यादित्युदाहरणमाह * क्रत्वर्थादिति * ननु संयोगपृथक्त्वान्न २३६।६
क्रत्वर्थत्वेनानुष्ठितस्य खादिरत्वस्य पुरुषार्थनियमाश्रयतास्तीत्याशङ्क्योदाहरणान्तरमाह * भोजनाद्येति * खादिरत्वरूपेणैक्यमभिप्रेत्य पूर्वोदाहरणं समर्थनीयमुपसंहरति * अतश्चेति * एवं चावेदमूलत्वादित्युपसंहारं दूषयति * अतश्चेति * यत्तु न चास्याः शास्त्रता स्वयमित्युक्तं तदपि दूषयति * यच्चेति * नासन्नियमादिति सूत्रोपन्यासेन कृतकत्वमशास्त्रत्वे हेतुरुक्त इत्यभिप्रेत्य * कृत्रिमत्वेनेत्युक्तम् * प्रसिद्धिं दर्शयति * शास्त्रेति * यौगिकत्वे ऽपि प्रसिद्धिमुपपादयति * अथापीति * किं च शब्दार्थस्य वृद्धप्रयोगैकसमधिगम्यत्वेन तर्कविषयत्वाभावान्न तर्केण शास्त्रत्ववा-

रणं युक्तमिति प्रसङ्गापत्तेरित्याह *प्रसिद्धमपीति * श्लोकं व्याचष्टे * यथैव हीति * वेदातिरिक्तविद्यास्थानानां चाशास्त्रत्वमप्रामाण्यं वोच्यमानमङ्गीकृतप्रामाण्यवेदमूलत्वेन वार्येत वेदस्यैव त्वशास्त्रत्वमप्रामाण्यं वोच्यमानं कथं वार्येतेति सोपहासं दृष्टान्तेन दर्शयितुमाह * यो हीति * शुक्लं निष्ठुरं ननु पूर्वव्युत्पादितेनेष्टानिष्टप्राप्तिपरिहारसाधनोपदेशकत्वेन परतः प्रामाण्याद्यप्रामाण्यकारणनिरासेन च वेदस्याप्रामाण्यं वारयिष्यतइत्याशङ्क्यानिराकरणं सूचयितुं मातापित्रोर्निष्ठुराभिधायिनोर्वारकान्तराभावे ऽपि तावेव वा-
२३७।१ रकौ भविष्यत इत्याशङ्कां निरस्यति * परत्रेति * वेदवदितरविद्यास्थानानामपि प्रामाण्यस्य व्युत्पादितत्वान्न तदनादरेणेदं प्रत्यवस्थानम् । तदवस्थितन्यायानादरे कश्चित्प्रतीकार इत्याशयः । दृष्टान्तेन सूचितमर्थं प्रकटयति * तथेति *व्याकरणस्य वेदाङ्गत्वाद्धर्मशास्त्रादिभ्यो ऽतिशयं सूचयितुं * साङ्गेनेत्युक्तम् * ननु व्याकरणमात्रस्याप्रामाण्यं मयोच्यते न वेदस्य तेनायं वृथोपहास इत्याशङ्क्याह * करुद्ध इति * न चाङ्गीकृतेतरविद्यास्थानप्रामाण्यो व्याकरणमात्रस्याप्रामाण्यं वक्तुमर्हत्यविशेषादित्याह * श्रुतीति * यच्च न च स्मृत्यन्तरं किं चिदित्यनेन स्मृत्यन्तरसंवादाभावाद्व्याकरणाप्रामाण्यमुक्तं तदनुभाषणपूर्वकं परिहरति *यत्त्विति* ननु वर्णाश्रमधर्मोपदेशित्वाभावे व्याकरणस्य स्मृतित्वाभावान्न तन्न्यायेन प्रामाण्यं स्यादित्याशङ्क्याह * स्मृतित्वं त्विति * पूर्वानुभवपारतन्त्र्यनिमित्तस्मृतिशब्दो न वर्णाश्रमधर्मोपदेशित्वनिमित्त इत्याशयः । स्मृतित्वाभावे ऽपि वा तत्तुल्यत्वस्मरणशास्त्रत्वप्रामाण्ययोः सिद्धिरित्याह * अथापीति * न्यायतुल्यत्वादपि तत्सिद्धिरित्याह * अपि चेति * न च मूलासम्भवात्स्मृतिन्यायाभावः मूलस्योपपादितत्वादित्याह * प्रमाणेति * दृष्टार्थप्रत्यायनफलत्वरूपेण सर्वप्रमाणमूलत्वम् । अदृष्टफलत्वरूपेण तु शास्त्रमूलतेति विवेकः । मूलप्रमाणसम्भवे च व्याकरणान्तरमूलतापि न दु-
२३८।१ ष्यतीत्याह *एकस्य चेति* ननु पुंवाक्यमूलत्वे ऽन्धपरम्परान्यायः स्यादित्याशङ्क्याह * असम्भावितेति * यच्च परस्परेण चाचार्या इत्यादिना ऽन्योन्यविगानादप्रामाण्यमुक्तं तदप्यनुभाष्य परिहरति- * यत्त्विति * श्रुतीनां च विगीतत्वे तन्मूलश्रुतीनामविगानमेवाप्रामाण्यमापादयेदित्याह * विगीतेति * न चान्योन्यसंवादः प्रामाण्यकारणं येन तदभावादप्रामाण्यं स्यादित्याह * मूलेति * उपसंहरति * परस्परेति * सिद्धे वस्तुनि विकल्पा-

योगाद्यथासम्भवविषयं विकल्पाभिधानं त सर्वविगीतव्याकरणस्मृतिविषयं विगानं च धर्माधर्मसाधनत्वविषयं वा स्यादन्वाख्यानविषयं वा सूत्रप्रत्याख्यानसमाधानरूपं वा इष्ट्युपसंख्यानावापरूपं तत्र सूत्रकृतो ऽपि प्रयोजनाभावाभिप्रायाभावमभिप्रेत्य धर्माधर्मसाधनत्वे तावद्विगानं नास्तीत्याह * धर्मेति * यत्तु

सम्बोधने तूशनसस्त्विरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥

इत्याद्यन्वाख्यानविगानं तत्र ब्रूमः यदात्मानः सर्वेष्वेतेषु भिद्यन्तइति तद्भूताधिकरणोक्तेन न्यायेन लक्ष्याणां सान्तनान्तादिशब्दानां भेदादविरुद्धमित्याह * अन्वाख्यानेति * सूत्रप्रत्याख्यानसमाधानयोश्च तर्कमूलत्वात्तस्य चोद्यावचपुरुषबुद्धिप्रभवत्वेनानेकत्वरूपत्वोपपत्तेर्न व्याकरणाप्रामाण्यापादकतेत्याह * पुनरुक्तत्वादिना हीति * हिशब्दो ऽप्यर्थे वैदिकत्वाच्च मूलत्वे तस्यैकरूपत्वेनानेकरूपप्रत्याख्यानाद्यानुपपत्तिः स्यान्न त्वेतदस्तीत्यर्थः । इष्ट्युपसंख्यानयोरपि व्याकरणान्तरमूलत्वादधिकोपसंख्यानस्य च मूलोपसंख्यानाप्रामाण्यप्रसङ्गकत्वान्न व्याकरणाप्रामाण्यापादकतेत्याह * ये चापीति * अल्पविषयत्वमात्रस्याप्रामाण्यकारणत्वाभावं दृष्टान्तेनोपपादयति * तद्यथेति * ननु सूत्रकारस्य प्रयोजनानभिधानात्तदभावाभिप्रायावगतेर्वार्त्तिककारादिभिश्च प्रयोजनाभिधानाद्विगानमुक्तं तस्य कः परिहार इत्याशङ्क्यान्यानुभाषणपूर्वकं परिहारमाह * यस्त्विति * वार्त्तिककृता शास्त्रेण धर्म्मनियम इति वदता साधुशब्दप्रयोगद्वारा धर्मसिद्धिः परं प्रयोजनमुक्तं भाष्यकृता चाथ शब्दानुशासनमिति वदता साधुशब्दज्ञानं साक्षात्प्रयोजनमुक्तं तत्र यस्तावद्वार्त्तिककारोक्तप्रयोजनानभिधाननिमित्तः सूत्रकारस्योपालम्भः कृतः स चोपालम्भनत्वस्यानर्हो समर्थः श्रुतिस्मृतिसिद्धत्वनिबन्धनत्वात्प्रयोजनानभिधानस्य भाष्यकारोक्तस्य च लक्षणश्रवणानन्तरमेव स्वसंवेद्यत्वेन सुज्ञानत्वादित्यर्थः । एकैकसूत्रेण शब्दाज्ञानात् * ग्रन्थान्तरइत्युक्तम् *धर्म्मसिद्धेः श्रुतिस्मृतिसिद्धत्वं विवृणोति * सत्येति * कामधुगादिश्रुतेर्वर्त्तमानापदेशत्वेन फलपरत्वस्य दुर्ज्ञानत्वात्साधुशब्दप्रयोगविधिपरत्वेनानभिमतापि सत्यवचनविषया श्रुतिः स्मृतिश्चोपरिक्षिप्ता । ननु सत्यशब्दस्य लोकवेदयोरर्थविषयत्वाप्रसिद्धेः शब्दविषयता न युक्तेत्याशङ्क्य प्रौढिवादेन पूर्वोक्तमेवोभयविषयत्वं स्मारयति * सत्यं चेति * नानृतं वदेदित्यभिधानार्थत्वाद्वदतेरर्थाभिधानकालपत्वासाधुभाषणं प्रत्य- २३९।२

धायहेतुर्नान्यदेति विनियोगकालविशेषणेनोक्तम् । साधुशब्दज्ञानस्यानुभवसिद्धत्वं विवृणोति * शब्दसाधुत्वेति * उपसंहरति * तस्मादिति * शास्त्रेण सर्वशब्दान्वाख्यानस्य प्रयोजनं यत्स्वयं सूत्रकृता नोक्तं तद्विज्ञायमानत्वान्नाभावाभिप्रायादित्यर्थः । नित्यसापेक्षत्वेनान्वाख्यानशब्दस्य समासाविघातः । यच्च सुज्ञानत्वनिरासाय सुज्ञानत्वं पुनरीदृशं येनाद्यापि विवदन्तइत्युक्तं तदसिद्धमित्याह * न चेति * ननु मुख्यामुख्यप्रयोजनासम्भवेन निष्प्रयोजनत्वस्य पूर्वपक्षे ऽभिधानाद् विवादो ऽस्त्येवेत्याशङ्क्याह * स एव त्विति * प्रयोजनप्रस्तावे तीर्थिकान्तराविप्रतिपत्तावपि सूत्रकाराभिप्रेतत्वे विप्रतिपत्त्यभावान्न सूत्रकारस्य स्वतीर्थिकैः सह विगीतवचनत्वं भवतीत्याशयः । यच्च धर्म्मश्च फलसम्बन्धमित्यनेन धर्म्मस्य वार्त्तिककृता प्रयोजनत्वेनोक्तस्य व्याकरणे ऽनुपदेशान्निष्प्रयोजनत्वं व्याकरणस्योक्तं तत्परिहरति * धर्म्मायेति * नियमः प्रयोजनत्वेनोक्तो न धर्म्मस्वरूपमित्यर्थः । ननु नियमो ऽपि धर्मार्थं साधुशब्दा एव प्रयोक्तव्यास्त एव वा श्रेयःसाधनमित्येवं रूपो न व्याकरणेन क्रियतइत्याशङ्क्याह * वेदेति * एत एव साधव इत्येवं रूपो नियमो व्याकरणाधीन इत्यर्थः । नन्वाचारे नियम इत्यादिवार्त्तिकपर्यालोचनया प्रयोगनियमो ऽत्र विवक्षितो गम्यते न स्वरूपनियम इत्याशङ्क्याह * नियमेति * प्रयोगनियमनिरपेक्षस्य स्वरूपनियमस्यानर्थक्याच्चन्निरपेक्षस्य चेतरस्य सिद्धेर्नियमद्वयमपि व्याकरणस्य प्रयोजनमित्यर्थः । तत्राद्यो वेदासिद्धत्वान्न व्याकरणेन क्रियतइत्याह * साध्विति * तदा च शास्त्रेण धर्म्मनियम इति वार्त्तिककृतः शास्त्रशब्दो वेदविषयतया व्याख्येय इत्याह * अतश्चेति * इतरस्तु व्याकरणाख्येन शास्त्रेण क्रियतइत्याह * तथेति * धर्म्मशब्दश्चास्मिन्पक्षे श्रेयःसाधनत्वात्साधुशब्दप्रयोगविषय इत्याह * तेनेति * येन कारणेन व्याकरणाद्विना साधुस्वरूपनियमो न सिध्यति तेन वेदावगतः सम्यग्ज्ञातस्य साधोः शब्दस्य प्रयोगात्मको यो धर्म्मस्तदर्थत्वेनायमेव नित्यो वाचकः शब्द इति नियतस्वरूपज्ञानं क्रियतइत्यर्थः । नियमे कारणीभूतस्य शास्त्रस्येतिकर्त्तव्यपेक्षायां व्याकरणगता प्रकृतिप्रत्ययान्वाख्यानप्रक्रियेतिकर्त्तव्यतोक्ता यद्वा व्याकरणेन स्वरूपनियमः किमर्थं क्रियते का वेतिकर्त्तव्यतेत्यपेक्षायामियं फक्किकावतारणीया तदा च तेन व्याकरणेनेत्यर्थः । यदपि धर्म्मत्वं यच्च विज्ञानशास्त्रपूर्वप्रयोगयोरित्यादिना ऽनवस्थितशास्त्रार्थाभिधानं व्यवस्थिताभिप्रायत्वे च भाष्यवार्त्तिकयोर्विगा-

नमुक्तं तदप्यनुभाषणपूर्वकं परिहरति * यच्चेति * यच्च ज्ञाने धर्म्म इति चेदिति वार्त्तिकेन शब्दसाधुज्ञानस्य धर्म्मत्वपक्षमुपन्यस्य तथाधर्म्म इत्यनेन दोषमभिधाय शास्त्रेत्यनेन शास्त्रपूर्वस्य प्रयोगस्य श्रेयःसिद्धयुपायत्वे कात्यायनेनावधारिते भाष्यकारेण तदेव व्याख्याय पुनः परावृत्य अथ वा पुनरस्तु ज्ञाने धर्म्म इति यदुक्तं तदभ्युपेत्य वादमात्रमुक्तमित्यन्वयः । विगानावस्थिताभिधानयोरप्यनुवादद्योतनार्थं यच्च यत्पुनरिति यच्छब्दद्वयं को दोष इत्यपेक्षायामपशब्दानामपि ज्ञानादधर्मापत्तेर्दोष इति द्वेषेण वार्त्तिकव्याख्योक्ता यथा व्याकरणाच्छब्दज्ञानं भवत्येवमपशब्दज्ञानमपीत्यपिशब्दो योज्यः अधर्म्मत्वापत्तिरिति च शब्दार्थं न विदुमः । शब्दानुशासनार्थाद्व्याकरणात्कथमपशब्दज्ञानमित्याशङ्क्य साध्वसाधुविवेकार्थत्वे व्याकरणस्य तन्त्रेण साध्वनुशासनमात्रार्थत्वे * प्रसङ्गेनेत्युक्तम् * किमर्थो ऽभ्युपेत्यवाद इत्यपेक्षायाम् * पूर्वोक्तेत्युक्तम् * अत्र भाष्यकृता नैष दोषः शास्त्रप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्च शब्दज्ञाने धर्म्ममाह नापशब्दज्ञाने अधर्म्मं यच्च पुनरशिष्टाप्रतिषिद्धत्वान्नैव दोषाय भवति नाभ्युदयाय तद्यथा हिक्किंतहसितकण्डूयितानि नैव दोषाय भवन्ति नाभ्युदयायेति भाष्येणापशब्दज्ञानस्यानिषिद्धत्वान्न म्लेच्छाभाषां शिक्षेतेति निषेधस्य बर्बरादिभाषाविषयत्वान्नाधर्म्मापत्तिरित्येकं परिहारमुक्त्वा ऽथ वा भ्युपाय एवापशब्दज्ञानस्येत्यादिभाष्येणासङ्कीर्णशब्दज्ञानस्य प्रतियोग्यपशब्दज्ञानस्येत्यादिभाष्येणासङ्कीर्णशब्दज्ञानस्य प्रतियोग्यपशब्दज्ञानाधीनत्वात् धर्मसाधनतैवेति परिहारान्तरमुक्त्वा ऽथ वा कूपखानकवदेतद्भविष्यतीति तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु सञ्जातासु तत एव तदुगुणमासादयति येन स च दोषो निर्हृष्यते भूयसा चाभ्युदयेन युज्यते एवमिहापि यद्यप्यपशब्दज्ञाने ऽधर्म्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्म्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यतीति भाष्येणोत्पन्नस्याप्यधर्म्मस्य साधुशब्दज्ञानजनितधर्म्मेण निर्घाताददोष इति तृतीयपरिहाराभिधानात् पूर्वोक्तस्य दोषस्य परिहारत्रयसामर्थ्यप्रदर्शनार्थं च ज्ञायत इत्यर्थः । ननु परमार्थत. शब्दज्ञानस्य धर्म्मे हेतुत्वाभावात्परिहारत्रयमप्येतदनर्थकमित्याशङ्क्य * कृत्वा चिन्तान्यायेनेत्युक्तम् * नन्वयमपि पक्षो ऽभिमतः कस्मान्न भवतीत्याशङ्क्याह * परमार्थतस्त्विति * ज्ञानमात्रस्य श्रेयोहेतुत्वे तत्पूर्वकस्य प्रयोगस्यानर्थक्यप्रसङ्गेन ज्ञानस्य च स्वभावतो विज्ञानेन पारार्थ्येना- २४०।२

प्रादितस्तथैवादत्वं यस्याः फलश्रुतेः सा तथोक्ता अर्थवादत्वादिति पाठे त्वापादितार्थवादत्वादिति कर्म्मधारयः । सदृष्टान्तमन्यानर्थक्यप्रसङ्गमुपपादयति * यथेति * किं तर्ह्यालम्बनं फलश्रुतेरित्याशङ्कां निराकुर्वन् प्रकृतमुपसंहरति * तस्मादिति * देवो ऽत्र वर्षति तण्डुलानित्यत्र यथावर्षणसाध्यस्य निष्पत्त्यादिकार्यपरम्परागततण्डुलफलत्वं वृष्टावुपचर्यते तथात्रापि प्रयोगफलं तत्कारणे ज्ञानइत्यर्थः । ननु सम्यग्ज्ञात इति प्रथमश्रुतत्वेन ज्ञानस्यैव फलवत् प्रतिपत्तेः सुप्रयुक्तपदस्य च सुष्ठु प्रयोगार्हो यथा सम्यग्ज्ञात इत्येवं सम्यक्त्वाव्याख्यानार्थत्वेनाप्युपपत्तेः फलपरत्वाभावादानर्थक्यप्रसङ्गो नास्तीत्याशङ्क्य कारणान्तरमुपन्यस्तं विवृणोति * द्रष्येति * द्रव्यादित्रयविषयाया एव फलश्रुतेः पारार्थ्यहेतुकार्थवादत्वाभिधानाच्छब्दज्ञानस्य क्वान्तर्गतिः संस्कारान्तर्गतावपि कस्य संस्कार इत्याशङ्काद्वयं निराकर्त्तुं ज्ञातुः पुरुषस्य ज्ञेयस्य वा * शब्दस्य संस्कार इत्युक्तम् * शब्दज्ञानस्य संस्कारत्वं पारार्थ्यं चोपपादयितुमाह * सर्वत्रैव हीति * संस्कारस्यापि चूडाकरणाधानादेः संस्कार्यसाध्यकर्मार्थत्वाभावात्तेन च विना फलश्रुतेरर्थवादत्वाभावात् * पराङ्गं चेत्युक्तम् * पुरुषार्थस्यात्मज्ञानस्य पराङ्गत्वाभावात् * ततो ऽन्यत्रेत्युक्तम् * इतिकरणः संस्कारत्वपारार्थ्यत्वभावत्वपरामर्शार्थः संस्कारत्वपारार्थ्यत्वभाव्यावधारणाद्यस्मात्सर्वत्र ज्ञानं संस्कारत्वेन पराङ्गत्वेनावगम्यते तस्माच्छब्दज्ञानमपि तथेति हिशब्दो योज्यः । ननु सम्बन्धग्रन्थे कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यतइत्यत्रादर्थवादाधिकरणे च कृत्वर्थकर्तृप्रतिपादनेनोपनिषदान्नैराकाङ्क्ष्यमित्यत्रात्मज्ञानस्य कृत्वर्थाभिधानात् किमित्यत्र वर्जनमित्याशङ्क्याह * आत्मज्ञानं हीति * अविनाशी वा अरे अयमात्मा ऽनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति मात्राशब्देन भूतेन्द्रियधर्माभिधानात् शरीरादिव्यतिरिक्तसंसारीकर्तृभोक्तृनित्यात्मप्रतिपादनपूर्वकस्यात्मा वा अरे द्रष्टव्य इत्यात्मज्ञानविधेः कैमर्थ्याकाङ्क्षायां फलश्रुतेर्दृष्टसम्भवे चादृष्टकल्पनानुपपत्तेर्योग्यतया कर्म्मप्रवृत्तिसिद्ध्यर्थत्वावसायादनारभ्याधीतस्यापि च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुत्योपनिषच्छब्दवाच्यस्यात्मविज्ञानस्य कृत्वर्थत्वं युक्तम् । अत एवात्मा ज्ञातव्य इत्येतन्मोक्षार्थं, न च चोदितमित्येतच्छब्दप्रयोगेण संसारिरूपात्मज्ञानस्यैव मोक्षार्थत्वनिरासेन कर्मप्रवृत्तिहेतुनोक्ता असंसारिरूपात्मज्ञानस्य तु कर्म्मप्रवृत्त्यर्थत्वायोगात्पुरुषार्थतैव युक्तेत्याशयः । नन्वात्मनो लो-

कवेदसाधारण्येन क्रत्वव्यभिचाराभावात्कथं तज्ज्ञानस्य क्रत्वर्थत्वावसाय इत्याशङ्क्याह * तेन विनेति * अयमाशयः लौकिककर्माङ्गत्वव्यावृत्त्यर्थं क्रत्वव्यभिचारोद्धारस्याकाङ्क्षत्वेनादृष्टार्थं लौकिककर्म्मप्रवृत्तेश्च शरीरादिव्यतिरिक्तनित्यात्मज्ञानं विनापि सिद्धेः साकाङ्क्षान्वयसम्भवे च निराकाङ्क्षान्वयायोगाल्लौकिककर्माङ्गत्वव्यावृत्तिरैकान्तिकद्वाराभावे ऽपि सिध्यति अत एव परलोकफलकर्म्मविध्यन्यथानुपपत्त्या सामान्यसम्बन्धस्य क्लृप्तत्वाल्लौकिकविनियोगाविरोधः यद्वोपकारकत्वमात्राभिप्रायको ऽर्थवादः। अत एव निषिद्धकर्म्मनिवृत्त्यर्थत्वसूचनार्थो निवृत्तिशब्दो घटते निषिद्धकर्माङ्गत्वे त्वात्मज्ञानस्यानात्मज्ञेन कृतं ब्रह्महत्यादिकं वैगुण्यान्न प्रत्यवायं जनयेत् इति इह तु पुरुषार्थत्वं कर्तृत्वभोक्तृत्वादिसंसारिरूपात्मज्ञानस्योच्यते तस्य च क्रत्वर्थत्वायोगादाकाङ्क्षावशेनार्थवादिकफलकल्पना युक्तैवेति दर्शयितुमाह * तथेति * पापजरामृत्युशोकक्षुत्पिपासाराहित्यकाम्यमानफलप्राप्तिप्रयत्नापेक्षसङ्कल्पमात्राधीनसिद्धिरूपगुणविशिष्टात्मप्रतिपादनपूर्विकया ऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुत्या वेदान्तवाक्यार्थविचारणात्मकजिज्ञासासहितस्य तदवधारितात्मरूपार्थानुचिन्तनाख्यान्वेषणात्मकस्यापहतपाप्मत्वादिगुणविशिष्टात्मज्ञानस्य विधानं, यच्च मन्तव्यो बोद्धव्य इति श्रुत्या न्यायविमर्शनात्मकमननसहितस्य तन्निर्द्धारितात्मरूपसाक्षात्काराख्यबोधात्मकस्य सगुणात्मज्ञानस्यैव विधानं यद्यात्मानमुपासीतेति श्रुत्या केवलनिर्गुणात्मविषयावबोधपर्यन्तस्य स्पष्टस्यापरोक्षरूपस्यात्मतत्त्वज्ञानस्य विधानं तदपेक्षितस्य वाक्यान्तरोपात्तस्य द्विविधस्याभ्युदयरूपस्य निश्रेयसरूपस्य च फलस्य सम्बन्धः कामवादलोकवादवचनविशेषैर्ज्ञायतइत्येवं क्रत्वर्थ पुरुषार्थत्वेन ज्ञायतइत्येतत्फक्किकागतपदानुषङ्गेण योज्यं श्रुतिभेदज्ञापनार्थः पुनस्तथाशब्दः। सगुणात्मज्ञानविध्यपेक्षिताभ्युदयरूपफलं सम्बन्धज्ञापकं कामवादं तावदुदाहरति * स सर्वांश्चेति * लोकावाप्तेः कामोपभोगार्थत्वेनैकवाक्यत्वायाभिधानात्कामवादो ऽयमभिप्रेतः तद्विषयमेव लोकवादमुदाहरति * तथेति * पितृलोकेन मातृलोकेन भ्रातृ- २४१।४
लोकेन स्वसृलोकेन सखिलोकेन गन्धमाल्यलोकेन यानलोकेन सङ्गीतवादित्रलोकेन स्त्रीलोकेन सम्पन्नो महीयतइति जनकादिभिः सुखसाधनयोग्यत्वेन लोकशब्दवाक्यैः सम्पत्त्यभिधानात् लोकवादो ऽयमभिप्रेतः एतच्च जनकादिसम्पत्तिवचनं यं कामं कामयते सो ऽस्य सङ्कल्पादेव समुत्तिष्ठतीत्युप-

संहारादष्टगुणैश्वर्यसिद्ध्यभिप्रायं न स्वर्गकामादिश्रुतिवन्नियतफलपरमिति दर्शयितुम् * योगजन्येत्युक्तम् * योगबलात्परमाणुवदतिसूक्ष्मता पर्वतवन्महत्त्वं सूर्यरश्म्यवलम्बनादिरूपं लाघवं करेण चन्द्रस्पर्शादिरूपप्राप्तिः । अप्स्विव भूमावुन्मज्जनम्मित्यादीच्छाद्यनभिघातः । प्राकाम्यं भूतभौतिकाज्ञापयितृत्वरूपमीशित्वम् । भूतभौतिकानां तदाज्ञप्ताचरणं वशित्वं अनाज्ञप्तानामेव तदिच्छानुरोधवृत्तित्वं कामावसायितेत्यष्टौ गुणाः अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमित्यपि ईशित्वं च वशित्वं च यत्र कामावसायितेति स्मृताः सगुणात्मज्ञानफलप्रतिपादकं कामवादं लोकवादं चोदाहृत्य निर्गुणात्मज्ञानविध्यपेक्षितानिश्रेयसरूपफलप्रतिपादकं वचनविशेषमुदाहरति * तथेति * लोकात्मकब्रह्मप्राप्तिरूपस्य फलस्याक्षयत्वाभिधानाद्वचनविशेषो ऽयमभिप्रेत इत्यपुनरावृत्त्यात्मकपरमात्मप्राप्त्यवसायस्य फलस्य वचनमित्यनेन सूचितं स्थानविशेषात्मकलोकप्राप्तेर्जन्यत्वेनाक्षयत्वानुपपत्तिमाशङ्क्य परमात्मैव ब्रह्मशब्दवाच्यः परमानन्दोपभोगे हेतुत्वात्कर्म्मधारयसमासाश्रयणेन लोके विवक्षितः तत्प्राप्तेश्च शरीरसम्बन्धोपाधिककर्तृभोक्तृत्वात्मकसंसारिरूपावस्थापरित्यागेनाकर्तृभोक्तृत्वात्मकासंसारिरूपनिजावस्थात्मकत्वेनाजन्यत्वाद्युक्तमक्षयत्वमिति सूचयितुम् * परमात्मेत्युक्तम् * अनौपाधिकरूपाभिप्रायः परमशब्दः पूर्वकृताशेषबन्धहेतुकर्म्मक्षयाद्वा संसारिरूपप्राप्तौ कर्तृत्वाभावेन कर्म्मान्तरानुपपत्तेः पुनर्भवासम्भवेनापुनरावृत्तेः प्राप्तायाः अनुवादात्तत् फलं तदक्षयत्वरूपार्थद्वयाभिधाननिमित्तवाक्यभेदापत्तिरिति सूचयितुमपुनरावृतेर्ब्रह्मप्राप्तितो भेदनिरासायापुनरावृत्त्यात्मकतोक्ता कामवादलोकवचनविशेषजिज्ञासामनःसहितेति पाठेत्वेवं व्याचक्षते कामः सत्यकामत्वं वादः सत्यवादः लोकः सूर्यमण्डलाद्युपासनस्थानं वचनविशेष उपदेष्टृत्वं कामादिभिर्मनःपर्यन्तैः सहितस्यात्मनो ज्ञानमित्यवान्तरसमासार्थः।केन वाक्यान्तरेणाभ्युदयरूपं फलमुपात्तमित्यपेक्षायां वाक्यद्वयमुदाहृतं निश्रेयसरूपं केनोपात्तमित्यपेक्षायां स ब्रह्मोपासको यावदायुषमेवं विधां वृत्तिमाचरन् कुर्वेल्लोकात्मकं ब्रह्माभिसम्पद्यतइतिवाक्यमुदाहृतम्।नन्वासां फलश्रुतीनां पर्णमयीन्यायेनार्थवादत्वस्य सम्बन्धग्रन्थे ऽभिहितत्वान्न फलसमर्पकत्वं युक्तमित्याशङ्क्याह * अप्रकरणगतेति * अयमाशयः पारार्थ्ये निर्ज्ञाते फलश्रुतेरर्थवादत्वं भवति प्रकरणाच्च यदङ्क्ते वज्र एव भ्रातृव्यस्य अङ्क्तइत्यञ्जनस्य पारार्थ्ये निर्ज्ञातं यस्य खादिरः स्रुवो भवति छन्दसामेव रसेनावद्यतीति च क्र-

त्वर्थव्यभिचारिस्तुवादिद्वारा खादिरत्वादेः। न चात्मज्ञानं प्रकरणगतं, न चात्मनो द्वारभूतस्यैकान्तिकः स्वाभाविकः क्रतुसम्बन्धोऽस्ति शरीरसम्बन्धोपाधिकत्वात्कर्तृत्वस्याशरीरिरूपात्मज्ञाने तदभावादिति। न च संसारिरूपात्मज्ञानस्य मोक्षसाधनत्वे तस्मिन्सति कर्म्मसु प्रवृत्त्ययोगाद्यद् बृहट्टीकायां ननु निःश्रेयसज्ञानात् बन्धहेतोर्न कर्म्मण इत्याशङ्क्य नैकस्मादपि तत् किं तु * ज्ञानकर्म्मसमुच्चयादित्युक्तम् * तद्विरुद्धेतेत्याशङ्क्याह * न चेति * सत्यपि ज्ञाने नित्यनैमित्तिककर्म्मानुष्ठानं विना पूर्वकृतदुरितक्षययायोगादकरणनिमित्तानागतप्रत्यवायपरिहारायोगाच्च तत्फलोपभोगार्थं बन्धप्रसक्तेर्मोक्षायोगात्कर्म्मनाशार्थत्वेन च(ज्ञानविध्यनुपलब्धेर्ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ऽर्जुनेत्यादिस्मृतेश्चौपचारिकत्वेनोपपत्तेः सम्बन्धग्रन्थे ज्ञानस्य कर्मनाशकत्वनिषेधात्र) ज्ञानस्य मोक्षसाधनतया विधानेन कर्मणो मोक्षसम्बन्धो वार्यते। न चासंसारिरूपात्मज्ञानपरिपाकात् प्राक्कर्तृभोक्तृत्वाभिमाननिवृत्तौ कर्मसु प्रवृत्त्यनुपपत्तिरिति विधानशब्देन सूचितम्। परिपक्वेन ज्ञानेनात्मनः कर्म्मसम्बन्धः कर्तृत्वं वार्यते विधानावस्थायाङ्कर्तृत्वाभिमाननिवृत्तौ नियोज्यत्वासम्भवाद्विधानानुपपत्तिरित्याशयः। एतदेव विवृणोति * प्रत्याश्रमेति * नन्वेवमपि।

मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया॥

इत्यनेन न्यायेन काम्यनिषिद्धवर्जनात्तत्फलोपभोगार्थं शरीरानुत्पत्तेर्नित्यनैमित्तिकानुष्ठानाच्च तदकरणनिमित्तप्रत्यवायफलोपभोगार्थं शरीरानुत्पत्तेर्ज्ञानवाक्यानां चौपचारिकव्याख्यानोपपत्तेः कर्म्मणा ज्ञानं बाध्यतां तुल्यबलत्वाद्वा विकल्पोऽस्तु, विरोधपरिहाराय चाङ्गाङ्गीभावः कल्प्यतां न तु निरपेक्षविहितयोः समुच्चयो युक्त इत्याशङ्क्याह * न चेति * अयमाशयः अवान्तरकार्यैक्ये सति बाधो विकल्पो वा स्यादिह तु कर्म्मणां पूर्वकृतपापनाशावश्यविहिताकरणनिमित्तपापपरिहारप्रयोजनत्वान्निर्गुणात्मज्ञानस्य च तत्त्वप्रकाशनप्रयोजनत्वान्नावान्तरकार्यैक्यमस्ति। न च बन्धहेतुकर्म्मक्षयान्मोक्षसिद्धेस्तत्त्वप्रकाशनानर्थक्यं शङ्क्यं सत्यपि पूर्वकृतकर्मक्षये कर्तृत्वभोक्तृत्वाभिमाननिवृत्तौ निर्व्यापारत्वानुपपत्तेरवश्यं कस्य चिद्बन्धहेतोः कर्म्मणः प्रसङ्गात्तं निवृत्त्यर्थं कर्तृत्वभोक्तृत्वाभिमाननिवृत्तेरपेक्षितायास्तत्त्वप्रकाशनं विनानुपपत्तेः। एतदेवाभिप्रेत्य बृ-

१ अयं पा० २ पु० ना०।

हट्टीकायामुक्तम् ।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयन् ॥
वैराग्यात्पक्वविज्ञानः कैवल्यं भजते नरः ।

इति अतो ऽवान्तरकार्यभेदान्न तावद् बाधविकल्पौ जीवानादिनिमित्तवतश्च कर्म्मस्वधिकारान्मुमुक्षोश्च ज्ञानाधिकारादधिकारिभेदलक्षणाद्भिन्नमार्गत्वान्नाङ्गाङ्गीभावः सम्भवतीति पारिशेष्यात्समुच्चय एव युक्त इति। नन्वात्मज्ञानवच्छब्दज्ञानस्यापि फलसम्बन्धः कस्मान्नेष्यते अत आह * शब्देति * यच्चादिमत्त्वाच्च धर्म्मत्वं नैतज्ज्ञानप्रयोगयोरित्यनेनादिमद्व्याकरणाधीनस्य ज्ञानस्य तत्पूर्वकस्य वा प्रयोगस्यानादिना वेदेन फलसाधनत्वं वक्तुं न शक्यमित्युक्तं तदप्यनुभाषणपूर्वकं परिहरति *यत्त्विति*व्याकरणपरम्परानादित्वं वा अनादिवेदविषयत्वान्यथानुपपत्त्या कर्तृस्मृत्या च पौरुषेयत्वावगतिरवसीयतइत्याह * तस्मादिति * यत्तु व्याकृता सम्प्रदायेन वाणी नित्यैव वैदिकीत्युक्तं तन्निराकरोति * न चेति * वैदिक्या वाचो ह्युच्चारणार्थत्वाव्यवच्छेदायोद्यतइत्येतावद्वक्तव्यम् । अव्याकृतत्वाप्रसक्तेस्तु व्याकृत्वोक्तिर्निष्फला स्यादित्यर्थः ।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियाश्च यजानाश्च विज्ञेयाः पङ्क्तिपावनाः ॥

इति च मनुप्रोक्तवेदत्वस्य पूर्वोक्तत्वाद्यश्च मीमांसते ऽध्वरमिति च यज्ञमीमांसनस्य पश्चादुक्तत्वाद्यश्च व्याकुरुते वाचमिति व्याकरणस्य पङ्क्तिपावनत्वापादकत्वाभिधानं प्रकृतिप्रत्ययान्वाख्यानरूपव्याकरणविषयं न तु स्वरवर्णमात्रा कर्मविप्लुतिरूपवैदिकशब्दव्याकरणविषयम् । नाप्युद्दिश्यमानोपादीयमानगुणप्रधानादिरूपवचनव्यक्तिव्याकरणविषयमित्यवधारणात्तस्य च वेदपूर्वत्वान्नित्यानित्यसंयोगपरिहाराय नित्यत्वं व्याकरणस्याध्यवसीयतइत्याह * यदपि चेति * तदशक्तिश्चानुरूपत्वादिति सूत्रं भाष्यकृता ऽथ यदुक्तमित्यादिभाष्येण गाव्यादिशब्दस्य शक्त्या विना कथमर्थप्रतिपादकतेति शङ्कानिराकरणार्थत्वेन व्याख्यातं तच्च यथाप्रकृतिसारूप्यद्वारेणापभ्रंशाः प्राकृतामेव शक्तिमाविर्भावयन्तो ऽर्थप्रतिपत्तावुपयोगं गच्छन्ति तथा तदशक्तिश्चानुरूपत्वादित्यत्र वर्ण इष्यते इत्यनेनैव प्रतिपादनप्रकारविशेषाभिधानार्थतया व्याख्यातत्वान्नेह व्याख्यातम् । एकदेशत्वाच्च विभक्तिव्यत्यये स्यादिति सूत्रान्तरमप्यत एवेत्यादिभाष्येणैवं गाव्यादिशब्ददर्शनादिति दार्ष्टान्तिके योजना-

द्राव्यादिशब्दस्य साधुशब्दानुस्मारणेनार्थप्रतिपादकत्वे दृष्टान्ताभिधानार्थतया व्याख्यातमिति प्रतीतेः स्पष्टत्वान्न व्याख्यातम् ।

॥ लोकवेदयोः शब्दार्थैक्याधिकरणम् ॥ १० ॥

॥ आकृतिशक्त्यधिकरण वर्णकान्तरारम्भश्च ॥

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ २६

अत्र भाष्यकारेणाथ गौरित्येवमादयः शब्दाः किमाकृतेर्वाचकाः सन्तो वाच्यार्थे प्रमाणमुत व्यक्तेरिति गवादिविशेषणोपादानान्न सर्वशब्दानामेतद्विचारविधेयतेति सूचितं तत्र केषां शब्दानां व्यावृत्तिविवक्षितेत्यपेक्षायां जातिशब्दानामेवोदाहरणत्वमङ्गीकृत्य तद्व्यतिरिक्तानां व्यावृत्तिरिति दर्शयितुमाह * इहेति * आख्या- २४२।२
तशब्दार्थस्य द्वितीयाद्ये विचारयिष्यमाणत्वान्निपातोपसर्गाणां च स्वतन्त्रार्थाभिधायकत्वाभावान्नामान्येवेहोदाहरणत्वेन गृह्यन्ते तेषामपि षड्विधानां मध्ये शुक्लादिगुणानामेतयैव दिशा वाच्या शुक्लादेरपि नित्यतेत्यादिवार्त्तिकोक्तन्यायेनावान्तरभेदाभावेन गुणशब्दानां जातिवाचित्वायोगात् क्रियाणामप्यर्थप्रत्यक्षे नित्य एवेति भाष्येणावान्तरभेदस्य संख्याभावसूत्रे निराकृतत्वेन यागादिशब्दानामपि जातिवाचित्वायोगात्पाकाद्येकोपाधियोगेन वा ऽनेकत्र पाचकत्वाद्येकाकारे प्रत्ययोपपत्तेः । पाचकत्वादिजात्यभावेन तच्छब्दानामपि जातिवाचित्वायोगाद्देवदत्तादिशब्दानां च सङ्केतितार्थविशेषवाचित्वात्सर्वनामशब्दानां च सन्निहितार्थविशेषवाचित्वाज्जातिशब्दानामेवात्रैवमादय इति सादृश्यवचनेनैव शब्देनैवोदाहरणत्वं सूचितमित्यर्थः । परमतेन चैतदुक्तं स्वमते तु ततः शुक्लादिद्रव्यक्रियागुणेषु प्रतितिष्ठतीत्यादिना गुणकर्म्मणाप्यवान्तरभेदाभ्युपगमाख्यातार्थं विना पौनरुक्तस्य चोत्तरप्रस्थाने परिहरिष्यमाणत्वात् गुणक्रियाशब्दानामप्याख्यातानामपि चोदाहरणत्वमस्त्येव तथाचोपसंहारभाष्यव्याख्याने गवादिशब्दग्रहणं सर्वनामाख्यातशब्दानामन्तर्भावार्थमिति वक्ष्यति । नन्वेवं सति जातिशब्दा इत्येव स्पष्टत्वादुदाहरणनिर्देशः कार्यो गोशब्दोदाहरणं तु किमर्थमित्याशङ्क्य पूर्वाधिकरणे गोशब्दस्य गाव्यादिशब्दव्युदासेन साधुत्वाभिधानात्कस्मिन्नर्थे तस्य साधुतेति प्रासङ्गिकी, सङ्गतिसूचनार्थं तदुदाहरणमिति दर्शयितुमाह * तेषामपीति * गोशब्दमुदाहृत्य यद्विचार्यते तत्पूर्वाधिकरणोदाहरणेन सहैतदधिकरणोदाहरणस्यैकत्वं सङ्गतिसूचनाय दर्शयितुमित्यर्थः । ननु पदार्थानुपदप्रामाण्यस्य शब्दे निरा

कृतत्वात्किमाकृतेः प्रमाणमित्ययुक्तमित्याशङ्क्यावाचकव्यतिरेकजनिते षष्ठ्या विनैव प्रामाण्यव्यतिरेकजनिते इति व्याख्यातुमाह * किं पुनरिति * किमाकृतेर्वाचकाः सन्तो वाक्यार्थे प्रमाणमथ व्यक्तेरिति व्याख्या अनेनोक्ता व्यक्त्याकृतिवाचित्वसन्देहमुपन्यस्योच्यत इत्यादिभाष्येण मध्ये चिन्तान्तरं कृतं तत्किमर्थमित्याशङ्क्य प्रकृतिचिन्तोपोद्घातार्थत्वमाह * तत इति * न निर्णयार्थं विना क्वापि चिन्ता कर्तुं शक्या न च निष्फला प्रतितिष्ठति लौकिकवैदिकशब्दार्थभेदे च वैदिकशब्दार्थचिन्ता निरुपाया लौकिकशब्दार्थचिन्ता च निष्फला स्यादित्याशयः । नन्वेवं सति प्रतिपदाधिकरणादिवत्प्रकृतचिन्तामनुपक्रम्यैवोपोद्घातचिन्ता कस्मान्न कृतेत्याशङ्क्यानन्तराधिकरणासङ्गतिप्रसङ्गादिति दर्शयितुम् * तत इत्युक्तम् * प्रतिपदाधिकरणादौ तु नानन्तरसङ्गत्यपेक्षाध्यायादित्वादित्याशयः ततो व्यक्त्याकृतिवाचित्वसन्देहोपन्यासानन्तरं वक्ष्यमाणं पूर्वपक्षादिसांन्यासिकं त्यागार्हं कृत्वा सम्प्रतीदं तावद्विचार्यतइत्यन्वयः । त्यागार्थात्सन्न्यासप्रातिपदिकात्तदर्हतीत्यस्मिन्नर्थे ठगुत्पत्तेः सान्न्यासिकपदव्युत्पत्तिः अहिताशङ्कानिराकरणार्थस्तुशब्दः । किं यएवेतिं शब्दविषयं किं तएवेति चार्थविषयं सन्देहभाष्यद्वयं तन्त्रेण व्याख्यातुम् * किं यएवेत्युक्तम् * उपायफलसिद्ध्यर्थत्वं प्रश्नपूर्वं विवृणोति * आहेति * शब्दग्रहणमर्थानामप्युपलक्षणार्थम् । ननु व्यक्त्याकृतिविचारफलोपाययोर्भिन्नविषयत्वे ऽपि लौकिकवैदिकशब्दार्थैकत्वे यत्नः किमर्थ इत्यपेक्षायामाह * यदीति * एतस्या व्यक्त्याकृतिसन्निधानचिन्ताया इति हेतौ पञ्चमी एतच्छब्दो वेदविषत्वद्योतनार्थः । निर्णयोपायव्याख्यानार्थम् * वृद्धेत्युक्तम् * जातेरभिधेयत्वं व्यक्तेरनभिधेयत्वमिति निर्णयः नान्यथेति शेषः । नन्वन्यत्वे ऽपि लोकविषयैषा चिन्ता भविष्यतीत्याशङ्क्याह * प्रयोजनं त्विति * शङ्कानिराकरणार्थस्तुशब्दः प्रयोजनाभावमुपपादयति
२४३।२ * सम्मूर्छितेति * आशङ्काभिप्रायमनूद्य निराकरोति * यदीति * नन्वेवं तर्हि वेदविषयैव चिन्तान्यत्वे ऽपि यूपादिशब्दनिर्णयोपायसम्भवात्सेत्स्यतीत्याशङ्क्याह * स्यादिति * वृद्धव्यवहारस्थाने क्व प्रयोगानुसरणमेवाकृतिवाचित्वनिर्णयोपायो न यूपादिवद्वचनव्यक्तिविपर्ययाश्रयणादित्याशयः । अतः शब्दार्थान्यत्वे एकाङ्गविकलत्वाच्चिन्तेयमनारभ्या स्यादित्याह * तेनेति * ननु शब्दार्थानन्यत्वे फलोपाययोर्भिन्नविषयत्वेनैकाङ्गवैकल्याविषयः स्यादित्याशङ्क्याह * अभेदे इति * शब्दार्थान्यानन्यत्वचिन्तायाः प्रकृतचिन्तोपोद्घात-

त्वोपसंहारपूर्वकं पूर्वपक्षमाह * तेनेति * अनेन च तत्रान्यपूर्वपक्षप्रतिज्ञाभाष्यं व्याख्यातं अत्र व्यपदेशभेदाद्रूपभेदाच्चेति हेतुद्वयं भाष्यकृतोक्तं तत्र व्यपदेशभेदस्य भाष्यकृतैव व्याख्यातत्वाद्रूपभेदं व्याचष्टे * नियतेति * वैदिकेषु पदेषु नियतः स्वरो लौकिकेष्वनियतः वैदिकेषु च छन्दोविषयतया विहितस्य प्रकृतिप्रत्यययोर्लोपस्यागमस्य वा वर्णविकारस्य वा सद्भावो लौकिकेष्वसद्भावः तत्कृताद्रूपभेदादित्यर्थः । नन्वेवं सति छान्दोग्यब्राह्मणेषु स्वरनियमाभावाद्वादिशब्देषु च प्रकृतिलोपाद्यभावान्न भेदः सिद्ध्येदित्याशङ्क्य धर्म्मभेदाभिप्रायेण रूपभेदं व्याख्यातुमाह * अध्यायेति * अधीयते ऽस्यामिति व्युत्पत्त्याध्ययनतिथिरध्यायो द्वितीयादिरष्टम्याद्यनध्ययनतिथिरनध्यायः वेदवाक्यान्यध्याययज्ञोपवीतेनैव त्रैवर्णिकेनैव च प्रयोज्यानि लौकिकान्यनध्याये ऽप्यनुपनीतेनापि चातुर्वर्ण्येनापि च प्रयोज्यानि अप्रयोज्यत्वेनाप्रेष्यत्वेन च हेतुना परिचर्यया प्रसादितो यो गुरुस्तदुच्चारणपूर्वकं वेदवाक्यानि प्रयुक्तानि यदृच्छया प्रयुक्तानि लौकिकानीति धर्म्मभेदाद्यथा लौकिकवैदिकवाक्यानामन्यत्वं तदन्यत्वाच्च वाक्यार्थान्यत्वं तथा पदानां धर्म्मभेदात्पदार्थानां च पदभेदाद्भेद इति पूर्वपक्षं प्रतिज्ञायान्वयः । धर्म्मभेदमात्रेण कथं पदभेदः कथं च पदभेदमात्रेण पदार्थभेद इत्याशङ्क्याद्वयनिराकरणार्थं हेतुगर्भविशेषणसहितदृष्टान्तोपादानम् । शब्दाभेदे धर्मव्यवस्थावैय्यर्थ्यापत्तेस्तत्साफल्याय शब्दभेदः कल्प्यते । तद्भेदे चौत्सर्गिको ऽर्थभेदः संज्ञा चोत्पत्तिसंयोगादित्यनेन सेत्स्यति पदादृष्टार्थप्रतिपत्त्यर्थस्य शब्दस्यादृष्टार्थेन धर्म्मेण प्रयोजनाभावादर्थप्रतिपत्त्यर्थमेव धर्मापेक्षेत्यर्थप्रतिपादनसामग्र्यतिरेकाद्वाचकभेदो जराराजेति क्रमभेदादिवेत्याशयः । ननु वैदिकपदानां लौकिकेभ्यो ऽन्यत्वे सम्बन्धग्रहणाभावेनार्थानवधारणादर्थान्यत्वेन पूर्वपक्षो न युक्त इत्याशङ्क्याह * यदीति * लौकिकार्थासम्भवएवानर्थक्येन वेदाप्रामाण्यापादनायान्यत्वमिष्टेन पूर्वपक्षिणो वक्तुमभिप्रेतः निर्विषयत्वाच्च प्रकृतचिन्तानारम्भायैव वेदाप्रामाण्योपपादनायोच्यत इत्यविरोध इत्याशयः । अग्निर्वृत्राणि जङ्घनदित्यन्यदिदं रूपमिति भाष्यं न्यूनाधिकक्रमान्यत्वाद्यभावेन रूपभेदानुपलब्धेरयुक्तमाशङ्क्य व्याचष्टे * स्वरेणेति * लौकिकस्यानियतस्वरत्वात्स्वरानपेक्षस्यार्थप्रतिपादकत्वं वेदे तु स्वरनियमात्सो ऽपि सहकारीति सामग्रीभेदादू गौर्गौर इति वर्णातिरेकवत्स्वरातिरेकात्पदान्यत्वेत्याशयः । धर्म्माभिप्रायो वा रूपशब्द इति व्याख्यान्तरमाह * अध्यायेति * कर्म्म-

व्युत्पन्नावध्यायानध्यायशब्दौ यदा कदा चिद्येन केन चिद्यथा कथं चिदध्येयो न वैदिक इत्यर्थः । यद्वा अग्निर्वृत्राणि जङ्घनदिति वैदिकस्याग्निशब्दस्य वृत्रहननसमर्थवस्तुवाचित्वावगमो लौकिकः व्युत्पन्नाग्निशब्दवाच्यस्य च ज्वलनस्य तदसामर्थ्यादर्थान्तरे चाव्युत्पन्नस्यैव शक्त्यन्तरकल्पने गौरवापत्तेर्गत्यर्थस्य गिधातोः शोर्निर्नलोपश्चेति सूत्रेणौणादिके निप्रत्यये कृते ऽग्निशब्दव्युत्पत्त्यवधारणान्न प्रकृतिप्रत्ययान्वाख्यानभेदेनाव्युत्पन्नाल्लौकिकादग्निशब्दाद् व्युत्पन्नस्य वैदिकस्याग्निशब्दस्य रूपान्यताभिप्रेतेति व्याख्यान्तरमाह * वृत्रेति * शब्दान्यत्वाच्चेति पदान्यत्वेन पदार्थान्यत्वप्रतिपादकं भाष्यं स्पष्टत्वान्न व्याख्यातं अपि चेत्यादिभाष्यं लोकसिद्धानामेव गवां देवसम्बन्धनिमित्तोत्तानवहनात्मकधर्मविशेषप्रतिपादकत्वेनास्य वाक्यस्य अन्यार्थत्वलिङ्गत्वाभावादयुक्तमाशङ्क्योपपादयितुमाह * विदग्धेति * यथा यो विदग्धः स नैर्ऋत इति स्वरसतो विन्दग्धोद्देशेन नैर्ऋतत्वविधिः प्रतीयमानो व्युत्पत्तिशिष्टदेवतावरुद्धे देवतान्तरविध्ययोगाद्यो नैर्ऋतः स विदग्ध इतिवचनव्यक्त्यन्तराङ्गीकरणेन प्रकरणे सम्भवन्नपकर्षो न कल्प्येतेत्यत्र भाष्यकृता भग्नः तथात्र वषट्कर्तुः प्रथममक्ष इतिवत् समासान्निष्कृष्य गोमात्रस्योद्देशायोगात् देवगवानां चोत्तानवहनवदसिद्धत्वाविशेषात् कथं चित् सिद्धेश्चोत्तानवहनस्यापि सम्भवाच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणामित्यनेन न्यायेन प्राथम्योपात्तोत्तानवहनोद्देशप्रतीतेस्तदुद्देशेन गोशब्दवाच्यत्वविध्याश्रयणात्स्वरसतः प्रतीयमानस्य देवगवोद्देशेनोत्तानवहनविधौ भङ्गः कृत इत्यर्थः । नन्वेवं सति य उत्ताना वहन्ति ते देवानां गोशब्दवाच्या इति वेदवाक्यगतपदपौर्वापर्यालोचनेनालौकिकस्याप्यर्थस्य यूपादिवत्प्रतीतिसिद्धेर्लौकिकवैदिकशब्दार्थान्यत्वे ऽपि व्यक्त्याकृतिचिन्तोपपत्तेरुपोद्घातो ऽनर्थकः स्यादित्याशङ्क्याह *सर्वेषां चेति* नन्वर्थावगत्यभावे कथमस्यार्थान्यथावेदकतेत्याशङ्क्यापातप्रतिभानेन लिङ्गमेतत्पूर्वपक्षिणोक्तं परमार्थतस्तु शब्दान्यत्वमेवार्थान्यहेतुरिति दर्शयितुमाह *ग्राह्यत्वादीति* स्वाध्यायोपनीतेनैव त्रैवर्णिकेनैव शुश्रूषासाधितगुरुसम्प्रदायेनैव च ग्राह्यत्वं वैदिकानां धर्म्मः यदा कदा चिद्येन केन चिद्यथा कथं चित् न ग्राह्यत्वं लौकिकानामिति धर्म्मभेदः। आदिशब्दो नियतानियतस्वराद्यभिप्रायः नियतैः पदैर्वाक्यरचना वेदे लोके त्वनियतैः तद्द्वारा वैदिकानीमानि पदानि लौकिकानीति व्यपदेशभेदः । वाक्यभेदनिबन्धनत्वात् व्यपदेशभेदस्य न पदभेदापादकतेत्याशङ्कानिराकर-

णार्थम् * नियतेत्युक्तम् * पदरचनात्मकत्वात् वाक्यानां पदभेदं २४४।१
विना तद्भेदायोगाद्वाक्यभेदनिबन्धनत्वे पदभेदस्येतरेतराश्रयत्वाप-
त्तेः स्वरादिनियमानियमकृतपदस्वरूपदभेदनिबन्धनएव व्यपदेश-
भेद इत्याशयः। धर्मभेदव्यपदेशभेदाभ्यां शब्दानां भेदस्तद्भेदाच्चार्था-
नामित्यर्थः। भिन्नानां वर्णानामेकार्थप्रतिपादननिबन्धनत्वेनैकपद-
त्वस्यार्थभेदनिबन्धनत्वात्पदभेदस्य पदभेदनिबन्धनत्वे ऽर्थभेदस्येत-
राश्रयं स्यादित्याशङ्क्यानिराकरणार्थं पदभेदे कारणान्तरस्य पूर्वोक्त-
स्यांपन्यासः। वनस्यते हिरण्यपर्णेति सामानाधिकरण्यनिर्देशे लोक-
सिद्धस्य वनस्पतेर्हिरण्यपर्णत्वस्यानुपलब्धिविरोधेन वक्तुमशक्य-
त्वादलौकिकस्य वस्त्वन्तरस्य हिरण्यपर्णस्य वनस्पतिशब्दवाच्यत्व-
प्रतीतेर्घृतस्य च मधुशब्दवाच्यत्वप्रतीतेर्वाक्यस्वारस्यादेव स्पष्टत्वा-
न्न तत्प्रतिपादकं भाष्यद्वयं व्याख्यातम्। सिद्धान्ते यथाभाष्यं सु-
योजमपि सूत्रमाकृत्याधिकरणपूर्वपक्षे ऽन्यथा योजयिष्यमाणत्वाद्वि-
वेकार्थं योजयति * प्रयोगेति * तेष्विति लौकिकवैदिकशब्दार्थेष्वि-
त्यर्थः। अविभागादिति सूत्रावयवावतारणार्थम् * तस्मादित्युक्त-
म्। यएवेतिभाष्येण प्रयोगचोदनाभावादित्यकारप्रश्लेषं विना
व्याख्यायेतरथेत्यनेनाकारप्रश्लेषेण व्याख्यानान्तरं कृतं तत्रैकत्वे ऽने-
कत्वे चोभयत्र भावप्राप्तावेकत्वे सति पुनर्वचनस्य परिसंख्यार्थत्वा-
पत्तेर्द्वितीयमेव व्याख्यानं सम्मतमिति सूचयितुमादौ व्याचष्टे *
भेदे सतीति * आद्यव्याख्यानं व्याचष्टे * एकत्वे सतीति * त-
स्मादेकशब्दत्वमिति भाष्यं सौत्रमर्थपदं शब्दस्याप्युपलक्षणार्थमिति
दर्शयितुं द्वेधार्थैकत्वपदं व्याचष्टे * अर्थैकत्वमिति * एतदेव प्रप-
ञ्चयति * शब्देति * ननु प्रयोगचोदनाभावादित्यनेनैव शब्दार्थैक-
त्वसिद्धेरविभागादित्यनर्थकं हेत्वन्तराभिधानार्थत्वे वा शब्दैक्यमात्र-
विषयत्वेनाव्यापकतया दौर्बल्याद् बलवति हेतौ प्रयुक्ते दुर्बलोपन्या-
सः क्लिष्टो भवतीत्यनेन न्यायेन पूर्वमुपन्यस्येतेत्याशङ्क्योच्यतइति
भाष्येण पूर्वस्य प्रयोजनाभिधानार्थत्वादेतदेव हेत्वभिधानमित्युक्त-
माभाति * तस्मादिष्टापत्तिरूपहेत्वभिधानप्रतीतेरयुक्तमाशङ्क्याह *
प्रयोगेति * लिङ्गदर्शनबलेनात्रैको वेदवादी पूर्वपक्षी रूपभेदादिना-
न्यः शुष्कतार्किकः तत्र पूर्वं प्रतिहेतुरेव पूर्वः शुष्कतार्किकस्य त्विदं
प्रत्यवस्थानमित्याशयः। अत इति लप्लोपे पञ्चमी इदमभिप्रेत्याहेत्यर्थः
अविभागं पञ्चधा व्याचष्टे * तदुच्यतइति * स एवायं गोशब्दइति
प्रत्यभिज्ञानरूपप्रत्ययस्य लौकिकवैदिकशब्देष्वविभागादित्यर्थः। रू-
पाविभागादित्यनेन विलक्षणरूपाप्रतीतेरित्युक्ते घटपटयोरप्रायमा-

नत्वावस्थायां वैलक्षण्याप्रतीतावैक्याभावात्तन्मात्रेणैक्यासिद्धिमाशङ्क्य *ज्ञायमानयोर्लौकिकवैदिकशब्दयोरित्युक्तम् * साहश्यनिमित्तभ्रान्त्यध्यवसितैकत्ववशेनापि वैलक्षण्याप्रतीत्युपपत्तिमाशङ्क्य ज्ञायमानयोरर्थयोरवश्यं कथं चिद्वैलक्षण्येन भाव्यं तदभावात्त्विह भेदो नास्तीत्याशयः । वाक्यतत्समूहमात्रनिबन्धनस्य पदवर्णानां तदन्तर्गतत्वादयं न पदवर्णविषयत्वस्यैते लौकिका इमे वैदिका इति व्यपदेशस्य वस्तुतः पदवर्णेषु विभागाभावादित्यर्थः । वस्तुतो वाक्यनिबन्धनस्तत्समूहनिबन्धनो वा ऽयं व्यपदेशः तदन्तर्गतनिमित्तया तु भ्रान्त्या पदवर्णविषयत्वमनेनोपात्तमित्यौपाधिकत्वान्नासौ पदवर्णानां भेदमापादयतीत्याशयः । शब्दानां प्रतिनियतविलक्षणाभिव्यञ्जकाभिव्यङ्ग्यत्वनियमात्तदाभावो वात्राभेदहेतुरुक्त इति * तथेत्यनेनोक्तम् * लक्षणेत्यनेन लक्षणाभेदो लक्ष्याभेदे*हेतुरुक्त इत्युक्तम् * छन्दसि भाषायां वेति विशेषणेन भिन्नलक्षणलक्षितानां सिद्धान्तिनापि भेदाभ्युपगमात्तद्व्यावृत्तिसूचनार्थम् * बहुतरेत्युक्तम् * अत इत्युपसंहारभाष्यं व्याचष्टे * प्रत्यक्षेति * तांश्चेति भाष्यं चकारेण शब्दैक्यमर्थैक्ये हेतुं सूचयतीति व्याचष्टे * एकेति * यच्चोक्तमिति भाष्येण लिङ्गदर्शनान्यनुभाष्य नास्तिवचनमित्यादिनोत्तानवहनानुवादेन गोशब्दवाच्यत्वविधित्वमस्य निराकृत्य गवानुवादेनोत्तानवहनविधित्वमुक्तं तद्व्याचष्टे * यथाश्रुतेति * गोमधुवनस्पतिशब्दानां यार्थान्तरद्योतिका श्रुतिरुपन्यस्ता सा न्यायसिद्धार्थैकत्वाविरोधेन प्रयोजनेनोत्तानवहनादिगुणमात्रा नातः परा व्याख्येयेत्यर्थः । अनन्तरोक्तार्थैकत्वसाधकशब्दैकत्वलक्षणन्यायपरामर्शार्थं यथाश्रुतत्वं लोकसिद्धत्वं विशेषणमुक्तम् । न च गुणमात्रान्यत्वेनार्थान्यत्वं भविष्यतीति दृष्टान्तपूर्वकमाह * यथा
२४५।१ हीति * अस्तु वा गुणान्यन्वेन देवसम्बन्धिनां गोमधुवनस्पतीनां भेदः तथाप्यगृहीतसम्बन्धत्वेन तेषां वाच्यत्वायोगाद्यौदिकानामपि गवादिशब्दानां लौकिका एवार्था इति मत्वाह * न चेति * दक्षिणादिसाधनत्वेन च विहितानां गवां देवसम्बन्धिनामस्त्वेन दातुमशक्यत्वान्मनुष्यसम्बन्धितैव निश्चीयतइत्याह * मनुष्येति* देवसम्बन्धिनश्च वनस्पतेर्मेरुगतस्य गुणान्यत्वेन लौकिकवनस्पतितो भेदे ऽपि कर्मभूमिगतयज्ञसाधनत्वायोगाद्यौदिकस्यापि वनस्पतिशब्दस्य लौकिक एवार्थ इत्याह * एवमिति * लौकिकस्य च घृतस्य देवसम्बन्धान्मधुत्वेन लौकिकान्मधुतो भेदे ऽपि देवसम्बन्धापादितरसवीर्यविपाकात्पूर्वं घृतस्य मधुत्वाभावेन मधुपर्कादिसाध-

नत्वायोगाद्वैदिकस्यापि मधुशब्दस्य लौकिक एवार्थ इत्याह * यस्त्वि-
ति * सर्वेषां च वैदिकशब्दार्थानामन्यत्वे सत्युत्तानादिशब्दार्थाना-
मप्यज्ञानान्न तदनुवादेन गवादिशब्दवाच्यत्वं विधातुं शक्यमिति
प्रतिपादनार्थं यदि चान्य इति भाष्यं व्याचष्टे * न चेति * मधुगुण-
मात्रान्यतापरत्वे कार्योपयोगाभावाद्वाक्यानर्थक्यं स्यादित्याशङ्का-
निराकरणार्थं न चेति भाष्येण स्तुत्यर्थत्वमुक्तं तत्र निरालम्बनस्तु-
त्यनुपपत्तिमाशङ्क्यालम्बनमाह * अत इति * लौकिकानामेव
गवादीनां यज्ञादौ विनियुक्तानामिह स्वर्गं वै त्वालोकं गमयिष्याम
इत्यादिदर्शनेन स्वर्गलोकप्राप्तेर्देवसम्बन्धप्रभावादुत्तानवहनाद्यलौ-
किकगुणान्तरप्राप्तिर्भविष्यतीत्याशयः। स्वर्गगमनाभावे ऽपि वा भू-
मिगतानामेव गवां देवाश्च याभिर्यजते ददाति च वा ज्योगित्ताभिः
स च ते गोपतिः सहेत्यादिदर्शनाद्देवोद्देशेन त्यक्तानां दुःखसागर-
तारणार्थत्वावगतेरुत्तानवहनत्वादिगततारणगुणयोगेनोत्तानवहनप्र-
तिपादनमित्यालम्बनान्तरमाह * अथ वेति * यद्वोत्तानवहनाभावे
ऽपि देवानां तथा प्रतीतेस्तदालम्बनमुत्तानवहनप्रतिपादनमित्यालम्ब-
नान्तरमाह * पृथिवीति * दृष्टिवशाद्वोत्तानवहनप्रतिपादन-
मित्यत्राप्यतीतेनान्वयः कथं देवानामुत्तानवहनदृष्टिरित्यपेक्षा-
यां * पृथिवीगोलकत्रैलोक्यभ्रमणादिनेत्युक्तम् * पृथिवीगोलक-
स्य भ्रमणे किं प्रमाणमित्यपेक्षायां * पुराणोक्तेनेत्युक्तम् * ननु
सत्यपि भ्रमणे कथमुत्तानवहनदर्शनमित्यपेक्षायामाह * यथैवेति *
अधोदेशस्योपरिदर्शनं परिवर्त्तनं विप्रतीपीभावं विना न युक्तमिति
भूमेर्विप्रतीपीभावात्तद्गतानां गवामुत्तानवहनदर्शनमुपपन्नमित्यर्थः।
तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * यदेति प्रकृत-
विचारानुसन्धानभाष्यं व्याचष्टे * इतीति * श्रोतृबुद्धिप्रथनाय
पक्षान्तराण्यपि दर्शयितुमौचित्यप्रतिज्ञां तावत्करोति * द्वौ चेति *
यद्यपीत्यनेन भाष्यकारो ऽपि पदोच्चारणानर्थक्यं तत्र व्यक्तिरर्थो-
ऽन्यत्राकृतिरिति भाष्येणोभयपक्षमस्तु विशेषणत्वेनाकृतिं वक्ष्यति
विशेष्यत्वेन व्यक्तिमित्यनेन चाकृतिविशिष्टायामाकृतौ वर्त्तेतेत्य-
नेन च व्यक्तिविशिष्टाकृतिपक्षं दर्शयिष्यतीति सूचितं तानि दर्शयितुं
जातिव्यक्त्योस्तावदुपपक्षीमुद्दिश्यते * नियोगेनेति * नियोगश-
ब्देन च नियमं विना पक्षद्वयं विशिष्टावेत्यनेन च पक्षद्वयमुक्तम्
एतेषामेवाष्टानां पक्षाणां परस्परव्यतिकरेणापरान् षण्णवतिपक्षान्
सूचयितुमाह * एत इति * जातिव्यक्त्योरेवोद्दिष्टानां नियमादि- २४६।१
पक्षाणां लिङ्गादिसिद्धित्रियोगेन संहतात्मभिरसंहतात्मभिश्च सह

सम्प्रधारणो विविक्तोद्देशेन परस्परव्यतिकरेण चापरांश्चतुर्दश चतुःशतानि च पक्षान् वक्तुं योजना कार्येत्याह * लिङ्गेति * नियोगेनेति श्लोकं व्याचष्टे * प्रथमं तावदिति * एते पक्षा इति श्लोकार्धं व्याख्यातुं षण्णवतिपक्षानाह * तथेति * द्वाभ्यामित्यनेन विशेषणविशेष्यभावनिरपेक्षाभ्यां व्यक्तयाकृतिभ्यां समुच्चिताभ्यां विशिष्टः सम्बन्धो गोशब्दस्यार्थ इति चतुर्थः पक्षो लाघवायान्ते दर्शित इत्येकाष्टपक्षी। किमाकृत्यैव विशिष्टसमुदायः किं व्यक्त्यैवाथाकृत्या व्यक्त्या वाथ सम्बन्धेनार्थाकृतिविशिष्टया व्यक्त्याथ व्यक्तिविशिष्टयाकृत्या अथ व्यक्त्याकृतिभ्यां परस्परविशिष्टाभ्यामथ विशेषणविशेष्यत्वनिरपेक्षाभ्यां समुच्चिताभ्यां व्यक्त्याकृतिभ्यां परस्परविशिष्टाभ्यामथ विशेषणविशेष्यत्वनिरपेक्षाभ्यां समुच्चिताभ्यां व्यक्त्याकृतिभ्यामिति द्वितीया किमाकृत्यैव विशिष्टः सम्बन्ध एव गोशब्दस्यार्थः अथ समुदाय एवाथ सम्बन्धो वा समुदायो वाप्यसम्बन्धश्च समुदायश्च उत व्यक्त्यैव विशिष्टः सम्बन्ध एवाप्यसमुदाय एव अथ विकल्पोऽथ समुच्चयविशिष्टयाकृत्या किं व्यक्तिः अथाकृत्या ऽथ वा विशिष्टः सम्बन्ध एव । अथ समुदाय एव अथ विकल्पोऽथ समुच्चयः । अथ एवं समुदायेन विशिष्टः सम्बन्ध एवाथ सम्बन्धेन विशिष्टः समुदायएवाथ विकल्पोऽथ समुच्चयः किमाकृतिविशिष्टया व्यक्त्या विशिष्टः सम्बन्ध एवाथ समुदाय एवाथ विकल्पोऽथ समुच्चयः। अथोभाभ्यां परस्परविशिष्टाभ्यां विशिष्टः सम्बन्ध एवाथ समुदाय एवाथ विकल्पोऽथ समुच्चयः। अथोभाभ्यां स्वतन्त्राभ्यां विशिष्टः सम्बन्ध एवाथ समुदाय एवाथ विकल्पोऽथ समुच्चय इति चतस्रोऽष्टपक्ष्यः सम्बन्ध एवेत्येवकारेण प्रतियोगिभूतेन समुदायेन सह नियोगविकल्पसमुच्चयरूपपक्षचतुष्टयसूचनात् पूर्वोक्ताभ्यां सह षड् भवन्ति सम्बन्धवत्समुदायमपि प्रत्याकृत्यादेर्विशेषणत्वपक्षः पूर्ववत्सम्बन्धविशिष्टसमुदायपक्षमात्रातिरिक्तत्वेन योज्या इत्यर्थः । किं सम्बन्धविशिष्टसमुदायपक्षमात्रातिरिक्तत्वेन योज्य इत्यर्थः । किं सम्बन्धेनैव विशिष्टाकृतिरित्याकृतिग्रहणस्य व्यक्त्युपलक्षणार्थत्वात्किं सम्बन्धेनैव विशिष्टा व्यक्तिर्गोशब्दार्थोऽथ समुदायेनैव विशिष्टाथ विकल्पमानाभ्यामुत समुच्चिताभ्यामित्यपरपक्षचतुष्टयीसूचनेन सप्तम्यष्टपक्ष्युक्ता तथैतद्विशिष्टापीत्येतच्छब्देन सम्बन्धसमुदाययोः परामर्शादष्टम्युक्ता किमाकृतिविशिष्टसमुदायविशिष्टा व्यक्तिरेवाथ व्यक्तिविशिष्टसमुदायविशिष्टाकृतिरेवाथ विकल्प उत समुच्चय इति

सम्बन्धवत्समुदायमपि व्यक्त्याकृत्योर्विशेषणविशेष्यभावयोजनात् नवम्युक्ता सम्बन्धवत्समुदायस्यादिविशेषणत्वयोजनाद्दशमी सम्बन्धवत्समुदायमपि प्रत्यादिविशेषणयोर्व्यक्त्याकृत्योर्नियोगादिपक्षचतुष्टययोजनादेकादशी विशेष्यविशेषणयोर्व्यक्त्याकृत्योर्नियोगादिपक्षचतुष्टयकल्पनायाम् आदिविशेषणत्वेन सम्बन्धवत्समुदायस्यादिविशेषणत्वयोजनाद् द्वादशी इति परस्परव्यतिकरेण षण्णवत्यष्टपक्ष्या सह चतुः शतं पक्षा भवन्ति लिङ्गकारकसंख्याभिरित्यनेन सूचितानपरांश्चतुर्दश चतुःशतानि पक्षी संक्षेपेण दर्शयति*एवं जातिलिङ्गयोरिति * किं लिङ्गमेव गोशब्दार्थोऽथ लिङ्गं वाथ जातिर्वाथ लिङ्गं च जातिश्च अथ जातिलिङ्गयोः सम्बन्धोऽथ समुदायोऽथ लिङ्गविशिष्टा जातिः। अथ जातिविशिष्टं लिङ्गमित्याद्यामष्टपक्षीं दर्शयित्वा किमाकृत्यैव विशिष्टः सम्बन्धो लिङ्गेनैव वेत्यादिव्यक्तिस्थाने लिङ्गं प्रक्षिप्य परस्परव्यतिकरेण षण्णवतिपक्षयोजनया चतुःशतं रचयितव्यम्। कारकस्य जात्या सम्प्रधारणे द्वितीयं चतुःशतम्। संख्यायास्तृतीयम्। लिङ्गस्य व्यक्त्या सह सम्प्रधारणे चतुर्थं कारकस्य पञ्चमं संख्यायाः षष्ठं लिङ्गसंख्यायुगलस्य जात्या सह सम्प्रधारणात् सप्तमं लिङ्गकारकयुगलस्य अष्टमं संख्याकारकयुगलस्य व्यक्त्या सह सम्प्रधारणे दशमं लिङ्गकारकयुगलस्यैकादशम्। संख्याकारकयुगलस्य द्वादशम्। लिङ्गादित्रयस्य जात्या सह सम्प्रधारणे त्रयोदशं व्यक्त्या सह चतुर्दशमितिन्यायेन चतुःशतेन सह पञ्चदश चतुःशतानि। षष्ट्याधिकं सार्द्धपक्षसहस्रं भवति ग्रन्थस्त्वेवं योज्यः। जातिव्यक्तिविषयैर्नियोगादिभिरष्टभिः पक्षैर्विकल्पिताः परस्परव्यतिकरेण कल्पिता ये ऽन्ये षण्णवतिः पक्षास्तेषामाद्यैरष्टभिः सह समुच्चितानां प्रत्येकं लिङ्गादीनां जात्या सह सम्प्रधारणायामुत्थानं दर्शयित्वा व्यक्त्या सह दर्शयितव्यं तथा लिङ्गसंख्यादियुगलानि व्यतिकरेण कल्पयित्वा लिङ्गादिसहितैकैकजाव्यक्तिविषयापेक्षया विकल्पा दर्शयितव्याः। लिङ्गादीनां कियतां जात्या व्यक्त्या वा सम्प्रधारणेत्यपेक्षायां प्रत्येकमेकैकेन द्वाभ्यां युगलीभूताभ्यां त्रिभिश्च लिङ्गादिभिः सहिताया एकैकस्या जातेर्व्यक्तेश्च * विकल्प्य इत्युक्तम् * ननु लिङ्गादीनां प्रत्ययार्थत्वात्प्रातिपदिकवाच्यत्वेन चिन्ता न युक्तेत्याशङ्क्य * त्रियोगेत्युक्तम् * स्त्रियां यत्प्रातिपदिकं वर्त्ततइति व्याख्यादर्शनाद्वैयाकरणैस्तावज्जातिव्यक्तिवल्लिङ्गस्यापि प्रातिपदिकार्थतेष्टेति त्रिकप्रातिपदिकार्थवाचित्वात्ते त्रियोगाः निपातोपसर्गवत्प्रत्ययस्यापि द्योतकमात्रत्वेन २४७।५

वाचकत्वाभावात्संख्याकारकयोरपि प्रातिपदिकार्थत्वं ये ऽभ्युपगच्छन्ति ते पञ्चकप्रातिपदिकार्थवाचित्वात्पञ्चयोगास्तन्मताश्रयणेनेमे विकल्पा इत्यर्थः । सम्बन्धसमुदायानपेक्षत्वे वा लिङ्गादित्रयेण सह जातिव्यक्त्योर्योगस्तदपेक्षत्वे पञ्चभिरिति व्यवस्थया विकल्पविषयप्रदर्शनं, ये तु वैयाकरणाः शब्दस्वरूपस्यापि वाच्यत्वमिच्छन्ति तन्मतेन तस्यापि जातिव्यक्तिसम्बन्धसमुदायलिङ्गकारकसंख्याभिःसंहतासंहतात्मभिः सह सम्प्रधारणेन त्रिषष्ठ्यष्टपक्षीभिश्चतुरुत्तराणि पञ्चशतानि पक्षान्सूचयितुमाह * एवमिति*षट्कैः सहेति द्वितीयेन सहशब्देन सप्तकसाहित्यं विवक्षितं जात्यादिभिः सप्तभिरेकैकशो द्विकैस्त्रिकैश्चतुष्कैः पञ्चकैः षट्काभ्यां चेत्येतैः सप्तकेन सहितैः सह शब्दस्वरूपस्य विकल्पनेत्यर्थः । किं जातिरेव गोशब्दार्थो ऽथ गोशब्दस्वरूपमेवाथ जातिर्वा शब्दस्वरूपं वाथ जातिश्च शब्दस्वरूपं च अथ सम्बन्धो ऽथ समुदायो ऽथ जातिविशिष्टस्वरूपं स्वरूपविशिष्टा वा जातिरित्येवमेकैकशः सप्ताष्टपक्षीर्दर्शयित्वा जातिव्यक्तिजातिसम्बन्धजातिसमुदायजातिलिङ्गजातिकारकजातिसंख्याद्विकैः षड्भिर्व्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिसंख्याद्विकैः पञ्चभिः सम्बन्धसमुदायसम्बन्धलिङ्गसम्बन्धकारकसम्बन्धसंख्याद्विकैश्चतुर्भिस्समुदायलिङ्गसमुदायकारकसमुदासंख्याद्विकैस्त्रिभिर्लिङ्गकारकलिङ्गसंख्याद्विकाभ्यां कारकसंख्याद्विकेनैकेनैकविंशतिरष्टपक्ष्यो दर्शयितव्याः । जातिव्यक्तिसम्बन्धजातिसम्बन्धसमुदायजातिसमुदायलिङ्गजातिलिङ्गकारकजातिकारकसंख्यात्रिकैः पञ्चभिः व्यक्तिसम्बन्धसमुदायव्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गकारकव्यक्तिकारकसंख्यात्रिकैश्चतुर्भिः सम्बन्धसमुदायलिङ्गसम्बन्धलिङ्गकारकसम्बन्धकारकसंख्यात्रिकैस्त्रिभिः समुदायलिङ्गकारकसमुदायकारकसंख्यात्रिकाभ्यां द्वाभ्यां लिङ्गकारकसंख्यात्रिकेनैकेन पञ्चदशजातिव्यक्तिसम्बन्धसमुदायजातिसम्बन्धसमुदायलिङ्गजातिसमुदायलिङ्गकारकजातिलिङ्गकारकसंख्याचतुष्कैश्चतुर्भिर्व्यक्तिसम्बन्धसमुदायलिङ्गव्यक्तिसमुदायलिङ्गकारकव्यक्तिलिङ्गकारकसंख्याचतुष्कैस्त्रिभिः सम्बन्धसमुदायलिङ्गकारकसम्बन्धलिङ्गकारकसंख्याचतुष्काभ्यां द्वाभ्यां समुदायलिङ्गकारकसंख्याचतुष्केनैकेन दश जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसम्बन्धसमुदायलिङ्गकारकजातिसमुदायलिङ्गकारकसंख्यापञ्चकैस्त्रिभिर्व्यक्तिसम्बन्धसमुदायलिङ्गकारकसंख्यापञ्चकाभ्यां द्वाभ्यां सम्बन्धसमुदायलिङ्गकारकसंख्यापञ्चकेनैकेन षट्जातिव्यक्ति-

सम्बन्धसमुदायलिङ्गकारकजातिसम्बन्धसमुदायालिङ्गकारकसंख्या-षट्काभ्यां द्वाभ्यां व्यक्तिसम्बन्धसमुदायलिङ्गकारकसंख्याषट्केनै-केन तिस्रः सप्तकेन वैकेति षट्पञ्चाशदष्टपक्ष्यः प्रथमाभिः सप्ताभिः सह त्रिषष्टिरष्टपक्ष्यश्चतुरुत्तराणि पञ्चशतानि पक्षाः पूर्वगणितेन ष-ष्ट्यधिकेन सार्द्धेन पक्षसहस्रेण सह चतुःषष्ट्यधिकं पक्षसहस्रद्वयं भवति । परस्परव्यतिकरादेतेषां बहवोऽपराः सम्भवन्तोऽपि नो-च्यन्ते ग्रन्थगौरवभीतितः । नन्वेतेषां पक्षाणां विशेषणविशेष्यभा-वसंहतान्यत्वेऽपि स्वरूपनिष्कर्षाभावेन भेदेनाभावान्न भेदेनोपन्या-सो युक्त इत्याशङ्क्याह * एते चेति * यथा जात्यादीनां निष्कर्षा-भावेऽप्यन्वयव्यतिरेकप्रसूतया भेदबुद्ध्या भेदस्तथैषामपि पक्षाणां स्वरूपभेदाभावान्निष्कर्षाभावेऽपि विशेषणविशेष्यभावाद्यन्वयप्रसू-तभेदबुद्ध्या भेदो भविष्यतीत्यर्थः । ननु सत्यपि भेदे प्रत्यक्षादि नैतावतां भेदानामग्रहणात्कथं तत्पूर्वकशब्दविषयतैतावतां भेदानां विचार्यते इत्याशङ्क्याह * सर्वत्रेति * प्रत्यक्षेणेन्द्रियसंयुक्तद्रव्य-धर्म्मतत्समवेतजातिगुणक्रियातत्समवेतगुणत्वादिसामान्यग्रहणाद-नुमानेन च स्वव्यापकाग्नितद्गतौष्ण्यभास्करत्वादिग्रहणादनेका-त्मकवस्तुप्रतीतेर्विवेकाभावात्स्तोकभेदप्रतीतिः शब्दस्य तु स-र्वात्मकवस्तुविषयतायामेकेनैव गोशब्दादिना सर्वात्मकवस्तु-प्रतीतिसिद्धेः शुक्लादिशब्दानर्थक्यापातादेकैकांशनिष्कृष्टशक्ति-कत्वेनांशान्तराणां लक्षणात्सिद्धज्ञानत्वादवाच्यत्वावगतेः सू-क्ष्मांशविवेचकतया सर्वभेदबोधकत्वं युक्तमित्याशयः । ननु सामा-न्यविशेषबाधादेर्जातिर्व्यक्तिवाच्यत्वविचारमात्रासिद्धेः पक्षान्तरा-णि निष्प्रयोजनत्वान्न कार्याणीत्याशङ्क्याह * पदादिति * शङ्क्य-मानसर्ववाच्यान्तरविप्रतिपत्तिनिरासं विना वाच्यतत्त्वानवधारणा-न्न पदार्थावधारणपूर्वकवाच्यार्थावधारणसिद्धिरित्याशयः । सौ-कार्यार्थं पूर्वोत्तरपक्षविभागमाह * अत्र चेति *नन्वेतावतां पक्षाणां विद्यमानत्वेन सप्रयोजत्वेन च भाष्यकारानुपन्यासे किं कारणमित्या-शङ्क्याह*व्यक्ताविति * अन्वयव्यतिरेकावगम्यसामान्यमात्रशक्त्य-पर्यालोचननिबन्धनत्वसाम्यात् व्यक्तिपक्षे दर्शिते सबन्धादीनामपि वाच्यत्वं कस्मान्न स्यादित्याशङ्क्योत्थानात्तात्पर्यालोचनेन च व्यक्ति-पक्षे निराकरणसिद्धेर्न भाष्यकृतोपन्यस्ता इत्यर्थः।नन्वनुपन्यासाद्भा-ष्यकृतो सत्त्वाभिप्रायो निष्प्रयोजनत्वाभिप्रायो वा कस्मान्न कल्प्य-तइत्याशङ्क्याह*नचेति * सद्भावप्रयोरुक्तत्वान्नानयोरभिप्राययोर्म-ध्ये कश्चित्सम्भवतीत्याशयः । एतस्माद्भाष्यकाराप्रदर्शनात्कारणा-

२४८।१ दित्यर्थः । नन्वेवं सति व्याख्यातृभिरुपपत्तयो ऽपि सर्वेषु पक्षेषु प्रत्येकमुपन्यस्योपन्यस्य निराकार्या इत्याशङ्क्याह * दर्शितेष्वपीति * शब्दशक्त्यपर्यालोचनस्य पूर्वपक्षबीजस्य सर्वेषु तुल्यत्वादियाशयः । का पुनरिति भाष्येणाकृतिव्यक्त्योः प्रश्नपूर्वकं स्वरूपनिरूपणं कृतं तस्य प्रयोजनमाह * ततश्चेति * विषयावधारणं विचारमुखं, ननु सम्बन्धादीनामपि विचारविषयत्वात्किमिति स्वरूपं न निरूपितमित्याशङ्क्य प्राधान्येनाकृतिव्यक्त्योरेव विचारविषयत्वमनन्तरोक्तं ततश्चेत्यनेन कारणतया परामृष्टम् । आकृतिस्वरूपनिरूपणस्य पौनरुक्त्यमाशङ्कते * नन्विति * परिहरति * सत्यमिति * मात्रशब्दं सर्वसामान्यव्याप्त्यर्थत्वेन व्याख्यातुं भाष्यपाठपूर्वकं सामान्यानि विभजति * द्रव्येति * प्रथमशब्देन परशब्दः कुतश्चिदव्याकृतत्वात्सर्वसामान्योक्तत्वाभिप्रायेण व्याख्यातः । गुणत्वकर्मत्वयोरादिशब्देनोपादानं द्रव्यत्वावान्तरसामान्यानि विभजति * पुनरिति * वायुत्वादीनां भिन्नतेत्यर्थः । पृथिवीत्वस्य तद्भेदघटत्वादिसामान्योक्त्या ज्ञातुं शक्यत्वादनुपन्यासः । मनोभेदस्य चात्मभेदाधीनत्वादात्मत्वसामान्योक्त्यैव मनस्त्वसामान्यसिद्धेरनुपन्यासः । पृथिवीत्वावान्तरसामान्यान्यवधिभेदेन विभजति * पृथिवीत्वादिति * पृथिवीत्वात्परं पाश्चात्यं घटत्वं घटव्यक्तिषु समाप्य एतेषु घटत्वं तद्व्यक्तिष्वन्यं सामान्यमित्यर्थः । घटत्वादीन्यन्यानि पृथिवीत्वावान्तरसामान्यानि घटत्वेनैव व्याख्यातानि वृक्षत्वात्तु पृथिवीत्वावान्तरसामान्यात्परं शिंशपात्वाद्येवान्त्यं सामान्यमित्याह * वृक्षत्वादिति * शरीरत्वात्परं गोत्वादीत्याह * शरीरत्वाच्चेति * मनुष्यत्ववाची पुंस्त्वशब्दः गोत्वात्परस्य सामान्यस्याभावात्तत्त्यागेनाश्वत्वात्परं वाजिकत्वाद्यन्त्यं सामान्यमित्याह * वाजिकत्वादि चेति * ननु कर्कत्वशोणत्वादेरप्यवान्तरसामान्यस्य भावान्न वाजिकत्वादेरन्त्यतेत्याशङ्क्य * कर्कादिस्त्विति * अश्वत्वैकार्थसमवायिशुक्लावान्तरसामान्यं कर्कत्वं रक्तावान्तरसामान्यं शोणत्वमित्यर्थः । हस्तित्वात्परा भद्रादिजातयो ऽन्त्या इत्याह * हस्तित्वादिति * आदिशब्देन मृगजात्युपादानं ताश्च दिङ्नागकुलजातास्वेव हस्तिव्यक्तिषु वर्त्तन्तइति दिङ्नागकुलशब्देनोक्तम् । मनुष्यत्वात्परो ऽवान्तरसामान्यभेदो ब्राह्मणत्वं ग्राह्यतात्वसामान्यावान्तरभेदात्कौण्डिन्यत्वादौ सामान्ये समाप्यतइत्याह * पुंस्त्वादिति * द्रव्यावान्तरसामान्यानि विभज्य गुणकर्मावान्तरसामान्यानि विभक्तुमाह * तथेति * गुणत्वस्य रूपतादि यदवान्तरसामान्यं

कर्मत्वस्य च जन्मतादि ततः परं यच्छुक्लत्वादिरूपावान्तरसामान्यं तच्छुक्लत्वादिसामान्यव्यक्तिभूतेषु भास्वरधूसरादिषु गुणेषु प्रतितिष्ठतीति समाप्यते। शुक्लत्वादेः परं सामान्यं नास्तीत्यर्थः। ये तु शुक्लत्वाद्यवान्तरसामान्यस्य कर्कत्वादेर्व्यक्तिभूता गुणास्तेषु शुक्लत्वादि न प्रतितिष्ठतीति विशेषसूचनार्थस्तच्छब्दः। असिद्धस्य कर्तुः स्वात्मलाभफलकव्यापारसामान्यं जन्मत्वं सिद्धस्य कर्तुरनात्मलाभफलकव्यापारसामान्यं * यागत्वादिशब्देनोक्तम् * कर्मत्वावान्तरसामान्यस्य जन्मत्वस्यावान्तरसामान्याभावात्तत्त्यागेनान्यात्मलाभफलकसिद्धकर्तृव्यापारात्मककर्मावान्तरसामान्यानि यागत्वादीनि विभजति * कर्मणामपीति * कर्म्मावान्तरसामान्यं यागत्वादि यजतिददातीत्यादिभिर्धातुभिर्विभागेनोक्तमित्युक्तेन यजदेवपूजासङ्गतिकरणदानेषु हूदानादनयोर्डुदाञ्दानइति त्रयाणामपि दानवाचित्वेन पर्यायतया स्मृतत्वात्कथं विभागार्थहेतुतेत्याशङ्क्यापर्यायेत्युक्तं प्रक्षेपपरस्वत्त्वापादनवाचित्वेन लोकतो ऽर्थभेदावगतेर्व्याकरणस्य शब्दान्वाख्यानमात्रार्थत्वेनार्थतात्पर्याभावात्स्वत्त्वनिवृत्त्यंशोपलक्षणमात्रार्थत्वेन च यजिजुहोतिस्मृत्योर्दानशब्दोपपत्तेर्दानपर्यायस्मृत्योत्सारणमिव त्यागत्वादेरप्यवान्तरविभागो ऽभ्यासादिभिः क्रियतइत्याह * प्रविभज्यतइति * विधानशब्देनासकृद्विधिरभ्यासो * नासकृच्छ्रुतिमात्रमित्युक्तम् * संख्योत्पत्तिगता द्व्यादिका संख्या ऽप्यन्यलिङ्गमेव गुणो पूर्वसंयोगार्हः अनुपादेयसम्बन्धसचिवो सन्निधिः प्रकरणान्तरं। ननु यागत्वादिजात्यभ्युपगमे यजत्यादीनामपि विचारविषयत्वोपपत्तेर्जातिशब्दा एव चिन्त्यतइति किमित्युक्तमित्याशङ्क्याह * अन्ये त्विति * कर्म्मणामेव यागहोमादिरूपेण भेदो न यागादीनां ज्योतिष्टोमदर्शपूर्णपासादिरूपेणेति येषां मतं तदभिप्रायेण जातिशब्दानामेवोदाहरणतोक्तेत्याशयः। किं तेषां यागादिभेदाभावभ्रान्तौ कारणमित्यपेक्षायामपि वा व्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्म्यं स्यान्नामधेयं च सत्त्ववदिति षष्ठाधिकरणसिद्धान्तसूत्रगतमैककर्म्म्यशब्दं भ्रान्तिकारणं दर्शयितुमाह * अपि चेति * ऐकशब्दोक्तस्य प्रत्यभिज्ञानस्य सादृश्यनिमित्तत्वाशङ्कानिवृत्त्यर्थं देवतोद्देशपूर्वकद्रव्यत्यागात्मकरूपाभेदात्तत्प्रतिपादकयज्यादिशब्दाभेदाच्च कर्म्मभेदे प्रमाणाभावान्न सादृश्य * निमित्तता युक्तेत्युक्तम् * द्रव्यान्तरेण नीवारादिना कृतस्य कर्म्मणो व्रीह्यादिद्रव्यकादर्शपूर्णमासादेर्यागान्तरेदापत्तेर्न प्रतिनिध्युपादानं युक्तमिति प्रतिपादनार्थेन क्रियाणामाश्रितत्वाद् द्रव्यान्तरे वि- २४९।१

भागः स्यादिति पूर्वपक्षसूत्रेणोक्तमाश्रयभेदेन भेदं निराकर्त्तुं गोत्व-वदिति दृष्टान्ततं यथा सत्त्वस्य गोत्वादेः पदार्थस्य गौरित्याद्यभिन्नं नामधेयमभेदापादकं तथा प्रतिनिधिनिष्पादिते ऽपि कर्म्मणि दर्श-पूर्णमासादिनामधेयं याज्ञिकैः प्रयुक्तमभेदापादकमिति युक्त्यन्तरम। प्रत्यभिज्ञानेनैवैक्ये सिद्धे ऽभ्युच्चयमात्रत्वान्नेहोपन्यस्तम् । प्रतिनिधि-निष्पादितकर्मविषयस्याप्यस्य न्यायस्य विध्यन्तरविहितेष्वपि तुल्य-त्वं मन्वानानामभिप्रायेणैतदुदाहृतम् । एवं सामान्यानि वि-भज्य सर्वव्याप्त्यर्थत्वेन भाष्यं व्याचष्टे * एवमिति * नन्वा-कृतिशब्दस्य संस्थानवाचित्वमक्षपादाद्युक्तं परित्यज्य जातिवाचि-त्वं किमित्युक्तमित्याशङ्क्यात्मादिषु द्रव्येषु गुणकर्मसु चाभावा-दित्याह * नेति * क्व पुनः संस्थानमस्ति क्व वा नेत्यपेक्षायामाह * सर्वेषु हीति * पार्थिवेषु स्वाभाविकं संस्थानम् अग्नेर्ज्वलनादिन्धन-संस्थानानुसारिसंस्थानभेददर्शनत्तोयस्य चाधारभूतपात्रसंस्थानानुसा-रिसंस्थानभेददर्शनाद् घटाद्यवच्छिन्नाकाशस्य चावच्छेदकघटादिसं-स्थानानुसारिसंस्थानभेदर्शनात् वायोश्च घटाद्यवच्छिन्नाकाशसंञ्चारि-णो घटादिसंस्थानानुसारिसंस्थानभेददर्शनादौपाधिकं यद्यपि क्व चि-द् वृष्ट्युदकोर्ध्वगतज्वालादौ पार्थिवद्रव्यपरिग्रहाभावे ऽप्याकारः संस्थानापरपर्यायः प्रतीयते तथापि विलक्षणाकारस्याप्यग्नितोयव्य-क्तिष्वग्नितोयशब्दप्रयोगान्नैकशब्दवाच्यत्वयोग्यः सर्वाग्नितोयव्य-क्त्यनुवृत्तैक आकारश्च पद्यरचनात्मकसंस्थानशब्दवाच्यो यो ऽभिधे-याकृतिलक्षणः स्यादित्यनुवृत्तिशब्देन सूचितम् । कल्प्येतेत्यनेनौपा-धिकत्वं दर्शितम् । दिगादीनां तु न स्वाभाविकं संस्थानं भाव्यौपा-धिकमित्यर्थः । नन्वनुगतैकाकारप्रत्ययवेद्यत्वाज्जातिरप्याकाराभावे न सम्भवतीत्याशङ्क्याह * सामान्येति * संस्थानाख्याकाराभावे ऽप्येकाकारप्रत्ययवेद्यः सर्वस्वव्यक्त्यनुगतो विजातीयेभ्यो व्या-वृत्तो निरालम्बनबुद्ध्ययोगाद् ब्राह्मण्यादिवन्नापन्होतुं शक्य इत्या-शयः । सवषु स्वविशेषेष्वनुवृत्तिरेव रूपं यस्येति विग्रहः उपसं-हरति * तस्मादिति * नन्वाकृत्यादिषु संस्थानासम्भवे ऽपि गवा-षु सङ्गावाद् गवादिशब्दानां संस्थानात्मकाकृतिवाचित्वं भविष्यती-त्याशङ्क्याह * संस्थानस्य चेति * नानाव्यक्त्यनुगतनित्यसा-मान्याभ्युपगमात्संस्थानस्याकृतित्वे सामान्यं वाच्यमिति व्यवहारो न युज्यतइत्यर्थः । संस्थानसामान्यस्य त्वाकृतिलक्षणत्वेन गोत्वाद्या-कृतीनां वैलक्षण्यं सिद्ध्येदित्याह * अथेति * नन्ववान्तरसंस्थान-सामान्यस्याकृतित्वाभ्युपगमान्न सङ्करापत्तिरित्याशङ्क्याह * न

चेति * गोशब्दालम्बनत्वासम्भवे कारणमाह * तस्य हीति * नन्वेवं सति संस्थानस्याकृतित्वशङ्काकारणाभावात् किं तन्निराकरणार्थेन सर्वसामान्यानामाकृतित्वाभिधानेनेत्याशङ्क्याह * तेनेति * येन संस्थानस्याकृतित्वं न युक्तं तेन निराकृतामिति तेनेत्यस्य योजना शङ्कोपोद्बलनाय दृष्टान्ताभिधानम्। ननु सामान्यशब्देनैव संस्थानशङ्कानिवृत्तिसिद्धेः सर्वसामान्यव्याप्त्यर्थो मात्रशब्दो ऽनर्थक इत्याशङ्क्याह * अतश्चेति * सर्वं सामान्यमाकृतिरित्याभिप्रेत्य यो मात्रशब्दः प्रयुक्तः सो ऽतः शङ्काव्यावर्तनात् कारणाच्छङ्काव्यावृत्त्यर्थमिति यावदिति योज्यम्। ऊहितशङ्कानिवृत्त्यर्थश्चकारः व्यक्तौ च सर्वशब्दानां वाच्येहाकृतित्वेन विवक्षिता न सामान्यान्तराणीति शङ्कान्तरनिराससूचनार्थो वा व्यक्तिस्वरूपनिरूपणार्थस्यासाधारणेति भाष्यस्थान्येषां व्याख्यानं दूषयितुमुपन्यस्यति * असाधारणेति * गौर्गौरित्येकाकारप्रत्ययस्य सामान्याख्यानुवृत्ताकारविषयत्वाच्छाबलेयो बाहुलेय इति अनेकाकारप्रत्ययस्य च विशेषाख्यव्यावृत्ताकारविषयत्वान्न तद्व्यतिरिक्ताकारिभूतवस्तुसद्भावे प्रमाणमस्तीति व्यक्तिशब्दस्य विशेषसमूहवाचित्वेन वृक्षा वनमितिवद्वचनभेदे दोषाभावाद्वृक्षाणामाश्रयो वनमितिवच्चाश्रय (विशेषाणामाश्रयो व्यक्तिरिति अग्नेरुत्तानाभाष्यस्तु व्यवहारस्य वृक्षाणामाश्रयो वनमितिवदुपपत्तेरित्यर्थः[1]) व्यपदेशोपपत्तेः कर्म्मधारय एव युक्त इत्याशयः। २५०।१

आविर्भावतिरोभावधर्म्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद् भवेद्॥

इत्यनेन न्यायेन प्रत्यक्षसूत्रावयवानुवृत्तव्यावृत्तव्यतिरिक्तस्य धर्म्मिणः साधितत्वात्तदपह्नवो न युक्त इत्यभिप्रायेण दूषयति * तत्त्विति * साधारण्यत्वविशेषाणां नासाधारणव्यक्त्यात्मकत्वं युक्तमित्याह * खण्डेति * एतदेव व्याचष्टे * खण्डेति * अन्यो ऽपीत्यनेनान्तरशब्दो शाबलेयवर्णे ऽपि शबलापत्य इत्येवं व्याख्यातः शबलाशब्देन च तच्छब्दः वार्त्तिकश्लोकस्थ इत्यर्थ'। शाबलेयशब्दप्रकृतिभूतशबलाप्रातिपदिकपरामर्शार्थत्वेन व्याख्यातः। एतच्चेत्यनेनादिशब्दोक्तं शबलाख्यविशेषस्य साधारण्यं व्याख्यातम्। एतदेव शबलेति नामान्यत्रापि व्यक्तौ वर्त्ततइत्यर्थः। कथमित्यपेक्षिते प्रकारद्वयमुक्तं यादृच्छिकत्वासिद्धौ * सङ्केतवशादित्युक्तम् * नामशब्देनावास्तवो ऽपि वर्णद्वयशून्यो ऽयं विशेषः प्रोक्तव्य इति सू-

१ अयं पा० २ पु० ना०।

खितम् । यादृच्छिकशबलापत्ये साधारण्यार्थं तदपत्ये वेति पुनर्वचनं शाबलेय इति नाम वर्त्ततइत्याद्यनुषङ्गेण योज्यम् । ननु साधारण्ये ऽपि व्यक्तिमात्रलक्षणार्थत्वेनादोषो भविष्यतीत्याशङ्क्याह * असाधारणेति * दोषान्तराभिधानार्थं चेदमुक्तम् । दोषान्तरमाह * विशेषेति * व्यक्तिशब्दस्य समुदायवाचित्वाभावान्न वृक्षा वनमित्येतत्तुल्यतेत्याशयः । स्वमतेन व्याचष्टे * तस्मादिति * दोषसाम्यमाशङ्कते * नन्विति * या व्यक्तिः सौत्रं लक्षणेति लक्षणत्वेनोपादीयमानानां विशेषाणां समुदायेनासाधारण्येन च विशेषणाद्युक्तमसाधारण्यं परमते तु विशेषव्यतिरिक्ताया व्यक्तेरभावेनोद्देश्यत्वायोगाद्ये विशेषास्ते व्यक्तिशब्दवाच्या इत्युद्देश्यानां विशेषाणामविशेषेण व्यक्तिविशेषशब्दयोः पर्यायत्वापत्तेस्तान्निवृत्त्यर्थं मृष्यामहे हविषा विशेषणमितिवदेकस्मिन् विशेषणे कृते ऽर्थसिद्धेर्विशेषणान्तरस्य विवक्षितुमशक्यत्वाच्छ्रुतेनासाधारण्येन विशेषितानां व्यक्तिशब्देनेत्यर्थः । समुदायेन विशेषणानुपपत्तेः प्रत्येकमेव विशेषाणां व्यक्तिशब्दवाच्यत्वप्रसङ्गाद्वैषम्यमभिप्रेत्य परिहरति * उच्यतइति * ननु विशेषसमुदायाश्रयत्वमात्रेण व्यक्त्युपलक्षणसिद्धेः । किमसाधारणविशेषणेनेत्याशङ्क्याह * प्रविभक्ता हीति * पिण्डात्मना समुदायात्मना साधारणत्वेनेत्यर्थः । विशिष्टा व्यक्तिर्गवादिशब्दवाच्यत्वेनाभिमता नासाधारण्यं विनोपलक्षयितुं शक्येत्याशयः । नन्वेवं सत्यत्यन्तसदृशव्यक्तिगतस्य खण्डादिविशेषसमूहस्यासाधारण्याभावान्नोपलक्षणत्वं स्यादित्याशङ्क्याह *न चेति * ननु प्रतिव्यक्त्यपूर्वविशेषाभ्युपगमे विशेषानन्त्यापत्तेरदृष्टकल्पना-
२५२।१ गौरवं स्यादित्याशङ्क्याह * अनन्तेति * ननु खण्डत्वादीनामनेकव्यक्तिसाधारण्ये कथं विशेषव्यपदेश्यतेत्याशङ्क्याह * परेति * व्यक्तेर्विशेषेभ्यो ऽन्यत्वं पूर्वोक्तं भाष्यकृद्वचनेन द्रढयति * एतेति * सामान्यस्य व्यक्तिपारतन्त्र्याद् व्यक्तेः सामान्याश्रयत्वं मुख्यं समुदाय्याश्रयत्वं तु वृक्षाश्रयो वनमितिवत् समुदायस्य तन्मध्ये समुदायिप्रतीतेरौपचारिकं, न च सकृच्छ्रुतस्याश्रयशब्दस्योभयरूपता युक्तेत्याशयः । व्यक्तिभाष्यस्य परव्याख्यादूषणेनाकृतिभाष्यस्य द्रव्याद्यनुगतसत्तासामान्यमेवाकृतिर्न गोत्वाद्यवान्तरसामान्यमिति सत्तावाच्यत्ववादिनां व्याख्यां बुद्धिस्थां दूषयितुं तन्मतं तावदुपन्यस्यति * तत्रेति * उपन्यासार्थस्तद्र शब्दः सर्वशब्दानां पर्यायत्वशङ्कानिवृत्तये शब्दस्वरूपेण गोत्वादिना वा व्यवच्छेदाभिधानम् । अत्रार्थे तदीयं श्लोकं पठति *यथाहुरिति* अस्तीत्येवं रूपः

सत्तासामान्यरूपः सर्वशब्दानामर्थ इतीदं प्रत्याय्यस्य वाच्यस्य लक्षणमाहुः । तस्य गवादिपदेष्वपूर्वादिपदैः सह तुल्यत्वादित्यर्थः । अपूर्वादीनां हि शब्दैकगोचरत्वात्तेन च विशेषाप्रतीतेरस्ति किंचिदित्येतावन्मात्ररूपेण प्रतीतेरपूर्वादिशब्दानां सत्तावाचित्वावधारणात्तद्दृष्टान्तेन गवादिशब्दानामपि सत्तावाचिता ऽनुमीयतइत्यर्थः । एतच्च सत्त्वप्रधानानि नामानि प्रातिपदिकार्थः सत्तेत्यादिदर्शनान्नामविषयमेवेति सर्वशब्दस्तद्विषयतया सङ्कोचनीयः दूषयति * तत्त्विति * कक्ष्याशब्दः कोष्ठवाची द्रव्यत्वगुणत्वकर्मत्वान्येकस्यां सत्तावान्तरसामान्यकक्ष्यायां वर्त्तन्ते । पृथिवीत्वादीनि द्रव्यत्वावान्तरसामान्यकक्ष्यायां रूपत्वादीनि गुणत्वावान्तरसामान्यकक्ष्यायामित्येवमादिः कक्ष्याणां विभागः । तत्र द्रव्यशब्देन द्रव्यत्वसत्तयोर्निश्चयं प्रतीतिर्भवति । पृथिवीत्वादिषु सन्दिग्धा प्रतीतिर्गुणत्वादिषु त्वप्रतीतिरेव गुणशब्दाद् गुणत्वसत्तयोर्निश्चयप्रतीतिः । रूपत्वादिषु सन्दिग्धप्रतीतिः । द्रव्यत्वादिष्वप्रतीतिरेवेत्यादिकक्ष्याविभागेन सामान्यानां प्रतिपादनात्सर्वशब्दानां च सत्तावाचित्वे द्रव्यशब्दाद् गुणत्ववद् द्रव्यत्वस्याप्यप्रत्ययापत्तेः । सत्ताद्वारेण वा प्रत्यये पृथिवीत्वादिवत् सन्दिग्धप्रतीतिप्रसङ्गाद् गुणत्वादावपि च तादृक्प्रतीतिप्रसङ्गात् सत्तावान्तरसामान्यविषयाणां द्रव्यादिशब्दानामेव तावत् सत्तावाचित्वमयुक्तं तत्रैवं सति दूरान्तरितार्थानां गवादिशब्दानां सुतरां सत्तावाचकत्वे शक्तिर्नास्तीत्यर्थः । श्लोकं व्याचष्टे * प्रतिनियतेति * ननु द्रव्यादिशब्दानां द्रव्यत्वाद्यवच्छिन्नशब्दवाचित्वाद्व्यवस्था भविष्यतीत्याशङ्क्यानिराकरणार्थं विशिष्टाभिधानपक्षं निराकरिष्यन्परानभिमतमपि शुद्धाभिधानं विशिष्टाभिधाने निराकृते यदि कश्चिदङ्गीकुर्यात्ततस्तदपि निराकार्यमिति मत्वा विकल्पयति तावत्सत्तामिति आद्यं तावत्पक्षं निराकरोति * शुद्धेति * ननु देशाद्यपेक्षया घटादिवत्सत्तायां नास्तित्वाभिधानं न विरोत्स्यते ऽत आह * देशेति * आदिशब्दो वस्त्वभिप्रायो यथा- २५२।१
काशस्य कूपपूरणोपलम्भप्रतिबन्धात्प्रतीयमानावस्थापेक्षया नास्त्याकाशमित्युच्यते तथात्रापीत्याशङ्कानिराकरणार्थः । मूर्त्तद्रव्यावष्टम्भो ह्याकाशोपलम्भप्रतिबन्धको ऽन्वयव्यतिरेकाभ्यामवगम्यते न तु सत्तायाः किञ्चिदुपलम्भप्रतिबन्धकमस्तीत्याशयः । व्यक्तिमात्रगतत्वे ऽपि जातेराकाशादिव्यक्तीनां विभुत्वात् सत्ताया विभुत्वसिद्धिः सत्ताशब्दस्य लौकिकव्यवहारे च जातिवाचित्वाभावात् सर्वशब्दानां महासामान्यवाचित्वे ऽपि सत्तावाचित्वाभिधानं न युक्त-

मित्याह * रूढीति * लोकदृष्टेत्यनेन गवादिशब्दवत् सत्ताशब्दस्य लौकिकव्यवहारे प्रयोगाभावाज्जातिवाचित्वनिषेधस्य लोकविरोधः परिहृतः । किं तर्हि सत्ताशब्दवाच्यं युज्यतइत्यपेक्षायामाह * य एव हीति * यो ऽस्तिशब्देन द्वितीयो भावविकार उच्यते स एव सत्तेत्येतद्युज्यतइत्यर्थः । अनेन चास्तिशब्दो ऽपि न वस्तुत्वापरपर्यायमहासामान्यवाचीति सूचितम् । द्वितीयभावविकारवाचिनो ऽस्तेर्धातोः शत्रन्तात्तलि कृते सत्ताशब्दव्युत्पत्तेरित्याशयः । ननु वस्तुशब्दस्यापि द्वितीयभावविकारवाचित्वात्सत्तास्तिशब्दयोर्वस्तुशब्दपर्यायत्वमविरुद्धमित्याशङ्क्याह * जायमानेति * प्रथमो भावविकारो जायमानत्वं विपरिणामस्तृतीयः । आदिशब्देन वृद्ध्यपक्षयौ चतुर्थपञ्चमावुपात्तौ विनश्यता षष्ठः । सर्वशब्देन भावविकाररहितेष्वपि नित्येष्वाकाशादिषु वस्तुत्वप्रतीतेर्न वस्तुशब्दो भावविकारवाचीति सूचितम् । ततश्चास्तिशब्दो ऽपि न वस्तुत्ववाचीति पूर्वसूचितमर्थं प्रकटयन्नस्त्यर्थ इति पाठं दूषयति * तेनेति * लौकिकप्रयोगाभावाच्चासमुदायप्रसिद्ध्यात्मलाभाभावे क्लृप्तावयवार्थत्यागेन समुदायस्य शक्त्यन्तरकल्पनंप्रोक्षिणवादिशब्दवन्न युक्तमित्याह * न चेति * सत्ताशब्दप्रकृतित्वात् सन्शब्दस्योपन्यासः । तस्माद्यौगिक एव सत्ताशब्दो न रूढिरित्युपसंहरति * इतीति * यथा भवतीत्याख्यातस्यार्थे भवन्निति भवच्छब्दो धात्वर्थविशिष्टकर्तृवाचित्वाद्यौगिकः तथास्तीत्याख्यातस्यार्थे सन्निति शब्दो ऽपि । ततश्च सतो भाव इत्यस्मिन्नर्थे सच्छब्दात्तलप्रत्ययोत्पत्त्या सत्तेति प्रवर्त्तमानो यौगिक एव । ननु सत्ताशब्देन जातिः प्रतिपत्तव्या वैशेषिकपरिभाषैव हि तत्प्रतिकारणं नान्यत्किं चिदित्यर्थः । कीदृशी परिभाषेत्यपेक्षिते काश्यपीयं सूत्रं पठितम् । इतिकरणो बुद्ध्युपलक्षणार्थः । यतो वस्तुत्वान्महासामान्याद् द्रव्यादिषु सदिति बुद्धिर्भवति सा सत्तेति सूत्रार्थः । परिभाषाशब्ददर्शनात् परिभाषासूत्रत्वशङ्कां निवर्त्तयितुं लक्षणसूत्रमेवेदं स्वोत्प्रेक्षितत्वद्योतनार्थन्तु परिभाषात्वाभिधानमिति लक्षणशब्देन सूचितम् । किं पुनर्वैशेषिकाणां सत्ताशब्दस्य जातिवाचित्वप्रसिद्धौ कारणमित्यपेक्षामाह * सेयमिति * वस्तुपर्यायेण क्रमेण वक्तीति वस्तुपर्यायवाची वस्तुत्ववाचीत्यर्थः । भवच्छब्देन सह साधारणो द्वितीयभावविकाररूपो ऽर्थो ऽस्येति भवसाधारणार्थः । घटो भवति इत्यादिषूत्पत्त्याख्यप्रथमभावविकारवाचित्वेनापि प्रसिद्धस्य भवतेर्भूसत्तायामिति सत्ताख्यद्वितीयभावविकारवाचित्वस्मृतिबलाद्भवत्साधारणार्थत्वमव्ययसंज्ञक-

स्यास्तिशब्दस्योक्तेः । भवतिधात्वर्थमात्रवाचित्वे ऽपि अव्ययास्तिशब्दस्य प्रकृत्यनुग्रहार्थं शतृप्रत्ययोपादानाद्वस्तुत्वद्वितीयं भावविकाररूपार्थद्वयवाचिना अव्ययसंज्ञकेनास्तिशब्देनेयं प्रसिद्धिरुपपादितेत्यर्थः । क्व पुनरव्ययास्तिशब्दो वस्तुत्ववाची दृष्ट इत्यपेक्षायामाह * अस्तित्वमिति * दिग्योगनिमित्ता पञ्चमी यस्मादस्तिशब्दात्परौ त्वतलौ दृश्येते स वस्तुत्ववाचीत्यर्थः । आख्यातप्रतिरूपक इत्याख्यातत्वभ्रान्तौ कारणमुक्तम् । नन्वाख्यात (शब्द एवायं कस्मान्न भवतीत्याशङ्क्याह * अप्रातिपदिकत्वाद्धीति * भवत्साधारणार्थत्वमुपपादयन्नामाख्यातत्वे कारणान्तरमाह * अस्तीति * तेनास्ति) शब्देन सह समासाभ्युपगमादनाख्यातत्वं तस्य च सन्शब्दवाच्यद्वितीयभावविकारवाचित्वावगमात् भवत्साधारणार्थतेत्यर्थः । एतदेव व्याचष्टे * अस्तीति * अस्तिपदेन सह यो बहुव्रीहिः सो ऽव्ययसंज्ञकेन नाख्यातसंज्ञकेन तस्यासुबन्तत्वेन समासायोगादित्युक्तेः नन्वव्ययस्यापि सुब्लोपान्वाख्यानेनासुबन्तत्वादव्ययीभाववच्चाहत्य बहुव्रीह्यविधानात्कथं समासः स्यादित्याशङ्क्य प्रत्ययलोपे प्रत्ययलक्षणमिति स्मृतेः प्रत्ययलक्षणद्वारेण सुबन्तत्वमुक्तम् । ननु सुबुत्पत्तेः प्रागसुबन्ततास्तीत्याशङ्क्यावश्यम्भावित्वेन सुबुत्पत्तेः प्राथम्यमुक्तम् । आवश्यकत्वोपपादनार्थं प्रातिपदिकत्वेन योग्यतोक्ता । ननु यथा पठतितमामित्यप्रातिपदिकादपि तद्धितो जातस्तथात्र तिङन्तस्यापि समासो भविष्यतीत्याशङ्क्य तिङन्तेत्युक्तम् । तिङश्चेति सूत्रेणाहत्य विधानात्तत्र तद्धितो जातः तिङन्तस्य तु समासत्वेनोपसंख्यानमपि नास्तीत्यर्थः । सदर्थवचन इत्यनेन सद्वाचिनः सच्छब्दस्यार्थपरत्वं व्याख्यातम् । कथमव्ययशब्देनेयं प्रसिद्धिरुपपादितेत्यपेक्षायामाह * ततश्चेति * वस्तुनि महासामान्ये सति च द्वितीये भावविकारे सत्संज्ञकमस्तिशब्दं प्रयुज्यमानमुपलभ्य तदीयद्वितीयं भावविकाराख्यार्थानुसरणेन च कृत्वाव्ययास्तिशब्देन सह प्रत्यासन्नमदूरान्तरार्थं कर्तृप्रतीत्या विनेति द्वितीयभावविकारवाचितयास्त्यर्थं सच्छब्दमुपलभ्य महासामान्यमप्यव्ययास्ति (शब्दवाच्यः सच्छब्दवाच्या सत्तेत्येवं कल्पितमित्यर्थः । नन्वव्ययास्तिशब्दवाच्यस्य द्वितीयभावविकारस्य सच्छब्दवाच्यत्वे ऽपि कथं महासामान्यस्य सच्छब्दवाच्यत्वकल्पनमाशङ्क्याव्ययास्तिशब्दवाच्यत्वहेतुना द्वितीयभावविकारदृष्टान्तेन तस्यापि सच्छब्दवाच्यत्वानुमानसूचनार्थं तार्किकैरित्युक्तम् । न-

---

२ अयं पा० २ पु० ना० ।

न्वेवमपि तत्प्रत्ययाधिक्या सत्ता)शब्दस्य कथं महासामान्यवाचितेत्याशङ्क्य देवात्तलितिस्मृतेर्यथा देवतेति तत्प्रत्ययः स्वार्थिकस्तथायमपीत्युक्तम् । ननु द्वितीयभावविकारे कृत्सञ्ज्ञकशतृप्रत्ययोपात्तकर्तृविशेषणतया सच्छब्दवाच्यत्वेन सहाव्ययास्तिशब्दवाच्यत्वेन सहाव्ययास्तिशब्दवाच्यत्वस्य व्याप्तेर्महासामान्यस्यापि कर्तृविशेषणतयैव सच्छब्दवाच्यतानुमितसामान्यस्य बाधकर्तृकत्वान्न तथानुमानं सम्भवतीति धर्मविशेषविपरीतसाधनात् विरुद्धो हेतुः
२५३।२ स्यादित्याशङ्क्य * इहापीत्युक्तम् * यथा ऽव्ययास्तिशब्दवाच्ये द्वितीये भावविकारे कर्तृविशेषणत्वप्रतीतिर्नास्ति तथेह सच्छब्दवाच्ये द्वितीयभावविकारे भवतीमपि कर्तृप्रतीतिं सक्षीरेति समासोपपत्तये सुबन्तत्वयोग्यप्रातिपदिकत्वयोग्यप्रातिपदिकत्वसिद्ध्यर्थं कृत्सञ्ज्ञकशतृप्रत्ययोच्चारणोपपत्तेरतन्त्रीकृत्य कर्तृनिरपेक्षधात्वर्थमात्रवाची सच्छब्दस्तत्समानार्थत्वाच्च सत्ताशब्दो ऽपीत्यर्थः । ननु स्मृत्यभावाच्छब्दपरस्य तत्प्रत्ययार्थस्य स्वार्थिकं तत्त्वमविवक्षाहेत्वभावाच्च कर्तृप्रतीतेरतन्त्रीकरणमयुक्तमित्याशङ्क्यापारमार्थिकाभ्युपगममात्रद्योतनार्थम् * गृहीत्वेत्युक्तम् * स्वार्थिकं तलं गृहीत्वा धात्वर्थमात्रवचनौ च सच्छब्दसत्ताशब्दौ गृहीत्वेत्यन्वयः । नन्वनेन न्यायेनाख्यातसञ्ज्ञकस्याप्यस्तिशब्दस्य द्वितीयभावविकारवाचित्वान्महासामान्यवाचितापि प्रसज्येतेत्यनिष्टापत्तिशङ्कानिराकरणायाख्यातप्रत्ययोच्चारणास्यानन्यार्थत्वेन कर्तृसंख्याकालादिप्रतीतेरतन्त्रीकर्त्तुमशक्यत्वात्कर्तृसंख्याकालादिनिरपेक्षशुद्धधात्वर्थमात्रवाचित्वमाख्यातास्तिशब्दस्य नास्तीति सूचयितुमेवकारः । ततश्चाख्यातास्तिशब्दवाच्यद्वितीयभावविकारदृष्टान्तेनाव्ययत्वे ऽस्तिशब्दवाच्यत्वहेतुता वस्तुत्वस्याख्यातास्तिशब्दवाक्यमिहानुमीयमानं कर्तृसंख्यादिविशिष्टत्वेनैवानुमीयेत यदव्ययास्तिशब्दवाच्यं तत्कर्तृसंख्यादिविशिष्टत्वेनाख्यातास्तिशब्दवाच्यमित्याख्यातास्तिशब्दवाच्ये द्वितीयभावविकारे व्याप्तिदर्शनादित्याशयः । ननु वस्तुत्वजातेः सच्छब्दवाच्यता तार्किककल्पिता पदवाक्यार्थतत्त्वज्ञैर्निराक्रियमाणा कथं प्रसिद्धिं यायादित्याशङ्क्याह * तदुक्तेति *

यावद्यावद्विवादाय मुक्तकं दीयते मनः ।
अनवस्थादिदोषेण तावत्तावद्विहन्यते ॥

इत्यनेन न्यायेन चिरनिखाततडागादिगतशैवालवच्छुष्कतर्कस्याप्रतिष्ठितत्वेन निराकृतस्यापि पुनः पुनरुद्भवेन समापयितुमशक्य-

१षष्ठ पा० २ पु० का० ।

त्वात्तार्किकोक्तस्यान्तगमने समापने अनादरादभियुक्तैरुपेक्षितत्वात्प्रसिद्धं, सदिमां युक्तायुक्तत्वविचारावस्थां प्राप्तमित्यर्थः।प्रसिद्ध्याभासं चेदं न परमार्थतो नियुक्तानामेवं प्रसिद्धिरस्तीति चशब्देनोक्तम्। किं तदित्यपेक्षायामाह * येनेति * येन सत्ताया वस्तुत्वापरपर्यायमहासामान्यात्मकत्वेन गवादिशब्दवाक्यत्वेनापि संज्ञा सम्भाव्यते। तत्सत्ताया महासामान्यरूपत्वमिमामवस्थां प्राप्तमित्यर्थः। यद्वा युक्तायुक्तत्वविचारस्य कः प्रस्तुतोपयोग इत्यपेक्षायामिदमुक्तं, येन कारणेन सत्ताथाः सामान्यरूपत्वे सति गवादिशब्दवाक्यत्वेनापि न सत्ता सम्भाव्यते तेन तन्निराकरणार्थं रूढिशब्दश्च नैवायमित्यादिर्न सत्ताशब्दस्य जातिवाचिता निराकृतेत्यर्थः। परमार्थतस्तु वस्तुत्वस्य जातिरूपस्यापि गवादिशब्दवाच्यत्वं नास्ति किमुत सत्तायाः। जात्याख्याद्धर्माद्धर्म्मान्तरत्वेन द्वितीयभावविकारत्वेन वर्त्तमानत्वादित्याह * नन्विति * ननु वस्तुशब्दस्यापि निवासार्थाद्वसेर्धातोर्वसेस्तुन्निति सूत्रेणौणादिके तुन्प्रत्यये कृते व्युत्पत्तिसम्भवादनेकत्र नितरां प्रत्येकमेकमेव वसतिवर्ततइत्यवयवार्थयोगेन सत्तादिषु सामान्यं सामान्यमित्येकाकारप्रत्ययालम्बनस्यानेकेष्वेकस्य प्रत्येकवृत्तित्वलक्षणस्याभिधानादयौगिकत्वेन जातिवाचित्वं न युक्तामित्याशङ्क्यं निराकुर्वन्नर्थगम्यत्वं विवृणोति * वस्तुशब्दो हीति * व्यक्तेः प्रत्येकवृत्तित्वाभावादेवंविधयोगनिमित्तत्वे वस्तुशब्दस्य व्यक्तौ प्रयोगानुपपत्तिप्रसङ्गाद्यौगिकत्वासम्भवाभिधानार्थं व्यक्त्याश्रितत्वं वस्तुत्वसामान्यस्योक्तम्। जातेर्जात्याश्रितत्वाभावाद्वस्तुशब्दस्य जातिवाचित्वे जातौ प्रयोगानुपपत्तिमाशङ्क्य निःसामान्यानि सामान्यादीनीति वैशेषिकपरिभाषायाः प्रतीतिविरोधेनायुक्तत्वाज्जातेरपि जात्याश्रयत्वं सम्भवतीति दर्शयितुं जात्यन्ताश्रितत्वमुक्तम्। नन्वेवं सति वस्तुत्वेऽपि वस्तुत्वप्रतीतेर्जात्यन्ताश्रयणायान्तरशब्दः। यथैव गोत्वरूपेण शाबलेयादौ गवाकारप्रत्ययसिद्ध्यर्थं गोत्वमङ्गीकृतं न गोत्वे तत्र गवाकारप्रत्ययस्य स्वरूपनिबन्धनोपपत्तेः। तथा जात्यन्तरे व्यक्तौ च वस्त्वाकारप्रत्ययसिद्ध्यर्थं वस्तुत्वं जातिरिष्यते तत्र स्वरूपनिबन्धनत्वेनैव वस्त्वाकारप्रत्ययोपपत्तेर्नापरा वस्तुत्वं जातिरङ्गीकार्येत्याशयः। शुद्धाभिधानपक्षस्य द्रष्टृत्वोपसंहारपूर्वकं विशिष्टाभिधानपक्षस्य दुष्टत्वं प्रतिजानाति तावत् * शुद्धेति * दूषयति * यदेवेति * एतदेव प्रपञ्चयितुं विकल्पयति * गोसत्तां चापीति* आद्ये कल्पे दोषमाह * तत्रेति * एतदेवोपपादयति * विशेषणमिति * गोव्यक्तिर्विशिष्टसत्ताभि-

२५४।२ धाने ऽप्येतमेव दोषमतिदिशति * तथेति * कल्पनागौरवापत्तेश्च केवलव्यक्त्यभिधानपक्षवद्विशेषणभूतव्यक्त्यभिधानपक्षो ऽप्ययुक्त इत्याह * अनित्येति * अनित्यः सम्बन्धस्तस्य चान्वयव्यतिरेकाभ्यां विना ऽपि ज्ञानमनन्ताश्च शब्दशक्तयो यस्मिन्व्यक्त्यभिधाने प्रसज्यन्ते तत्तथोक्तम्।दृष्टान्तं साध्यविकलत्वेन दूषयितुमनुभाषते*यत्त्विति*दूषयतिश्लोकं* तत्रेति*श्लोकं व्याचष्टे * केचिदिति * श्रुतार्थापत्त्या पर्युपस्थापितस्यार्थविशेषस्य वचना वाचका इति पूर्वपदसमासान्निष्कृष्य योज्यं पर्युपस्थापनस्य नित्यपर्युपस्थापकसापेक्षत्वात्पर्युपस्थापितशब्दस्य श्रुतार्थापत्तिसापेक्षत्वे ऽप्युत्तरपदसमासाविघातः श्रुतार्थापत्त्या अपूर्वं पर्युपस्थाप्यते । स्वर्गो देवताश्च वाच्यशेषैरर्थवादैर्वाक्यान्तरैश्च मन्त्रोपनिषदादिभिरुपस्थाप्यन्ते । ननु यद्यपि श्रुतस्वर्गयागसाध्यसाधनसम्बन्धान्यथानुपपत्त्या यागजन्यः स्वर्गोत्पादनसामर्थ्यातिशयविशेषः कल्प्यते । तथापि समस्तवैदिकादृष्टार्थकर्म्मजन्यातिशयानुगतमपूर्वशब्दवाच्यं सामान्यं न सत्तातो ऽन्यत्प्रमाणान्तरेण लभ्यते । एवं सवनीयसूक्तादिमहेन्द्रादिदेवताविशेषावगमे ऽपि सर्वदेवतानुगतं सामान्यं देवताशब्दवाच्यं न सत्तातो ऽन्येन लभ्यते ये हि जनाः पुण्यकृत इत्यादिवाच्यशेषाच्च नक्षत्रलोकादिस्वर्गविशेषावगमे ऽपि न च वै स्वर्गलोका इत्यादिवाक्यशेषेभ्यो ऽनेकस्वर्गावगतेः सर्वानुयायिस्वर्गशब्दवाक्यं सत्तातो ऽन्येन लभ्यते इति बलात्सत्तैवापूर्वादिशब्दवाच्या स्यादित्याशङ्क्याह * कार्येति * सामान्येनेतीत्थम्भूतलक्षणे तृतीया । सामान्यरूपमप्यपूर्वादिसत्तातो ऽन्यदेव लभ्यतइत्येवकारार्थे तुशब्दः । किं तदित्यपेक्षिते सर्वातिशयानुवर्त्तिस्वर्गादिकार्योत्पादनसामर्थ्यसामान्यमपूर्वशब्दवाच्यं सर्वेन्द्रादिदेवतानुवर्त्तिदीव्यतिधात्वर्थयोगित्वसामान्यं देवताशब्दवाच्यम् । सर्वस्वर्गानुवर्त्तित्वदुःखमिश्रसुखनिष्ठसुखसङ्गतिसामान्यं स्वर्गशब्दवाच्यमित्युक्तम् । श्लोकं व्याख्यातुमपूर्वशब्दस्य तावत्सत्तातिरिक्तसामान्यवाचित्वमुपपादयति * सर्वेति * ननु लौकिकसाधनगतानां सामर्थ्यानां कार्यार्थापत्तिगम्यत्वे ऽप्यपूर्वशब्दवाच्यत्वाभावात्तद्वाच्यानां च वैदिकयागादिजन्यानां सामर्थ्यानां विशेषतः श्रुतार्थापत्तिगम्यत्वे ऽपि सर्वकर्मसामान्यविध्यभावेन सामान्यतः प्रमाणान्तरेणानवगमात्सम्बन्धग्रहणासम्भवेन कथमपूर्वशब्दाभिधेयतेत्याशङ्क्य * यागादीत्युक्तम् * कल्पावयवसमार्थ्यानुसारेणैवापूर्वशब्दस्य सत्ता वैदिककर्मजन्यातिशयविशेषवर्त्यवान्तरसामान्याभिधायकत्वोपपत्तेर्न पृ-

थक्सम्बन्धग्रहणापेक्षेति भावः । देवताशब्दस्य सत्तातिरिक्तसर्वदेवतावर्त्यवान्तरसामान्यवाचित्वमुपपादयति * तथेति * दिवु-क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्विति सप्तस्वर्थेषु स्मृताद्दीव्यतेर्धातोर्घञि कृते देयशब्दव्युत्पत्तेः । सर्वेन्द्रादिदेवानुगतस्य क्रीडादिदीव्यत्यर्थयोगस्य सामान्यस्य सत्तातिरिक्तस्य सङ्गावात्सुज्ञानो देवशब्देन सह देवानां सबन्ध इत्यर्थः । सत्ताव्यावृत्त्यर्थो विशेषशब्दोपाधिकत्वाद्वा देवशब्दस्यापूर्वशब्दवदेव जातिवाचित्वनिराकरणार्थः । ननु क्रीडादिदीव्यत्यर्थयोगस्य प्रमाणान्तरेण देवेष्वनवगमात्कथं तद्योगनिमित्तेन देवशब्देन सह सम्बन्धज्ञानमित्याशङ्क्याऽर्थान्तरानवगमे ऽपि द्युत्यादेर्दीव्यत्यर्थस्य चन्द्रादौ प्रत्यक्षेणोपलम्भाद्देवशब्दप्रवृत्तिनिमित्तत्वं भविष्यतीति दर्शयितुम *द्योतन्ते वेत्युक्तम् * ग्रहशब्देनैव चन्द्रादित्योपादाने सिद्धे ऽपि द्युत्यतिशयात्तयोः पृथगुपादानं चन्द्रतारकेभ्यो नक्षत्राणां द्युत्यतिशयात्पृथगुपादानं रूपेणेतीत्थम्भूतलक्षणे तृतीया योजना तु दीव्यन्तीति व्युत्पत्त्या क्रीडादिदीव्यत्यर्थयोगात्सर्वे देवाश्चन्द्रादिरूपेण गगने स्थिता द्योतन्तइति दिव्यत्यर्थः । द्युतियोगाद्देवाः वायवः सततगत्या दीव्यत्यर्थगतियोगाद्देवाश्च शब्दोपात्ताश्चेतरे सर्वे ऽपि वा स्तूयन्तइति दीव्यत्यर्थस्तुतियोगाद्देवा इति प्रकारवचनमितिकरणं निरावर्त्यं कार्यं गत्येत्यत्र तु तृतीययैवेतिकरणार्थस्य लब्धत्वान्नेति करणापेक्षा आर्थवादिकीनां स्तुतीनां विधिशेषत्वेन देवता(स्वरूपपरत्वाभावान्मन्त्रैरित्युक्तम् । अस्य च ग्रन्थस्य क्रमेण श्लोकगतेन्द्रादिपदोपात्तार्थविवरणत्वावगमात्सर्वेन्द्रादिदेवतागतदेवतां) त्वसामान्यपरमिन्द्रादिपदमवसीयतइति कृत्वा तथास्माभिर्व्याख्यातम् । स्वर्गशब्दस्य सत्तातिरिक्तार्थवाचित्वमुपपादयितुं नक्षत्रदेशो वा मेरुपृष्ठं वा विशेष एवं स्वर्गशब्दवाच्यो न सामान्यामिति प्रकारद्वयं तावदाह * तथेति * वैदिकेन प्रकृष्टेन स्पष्टेन वादेन तन्मूलेन च पौराणिकानां मातलयर्ज्जुनसम्वादादिगतेन दर्शनेन याज्ञिकानां धाइ गन्मस्तुवः संज्योतिषा भूमेत्यादिप्रोत्साहनमन्त्रार्थानुसन्धानरूपेण दर्शनेनेत्यर्थः । वैदिकप्रवादद्वयं यथा वेद इत्युपक्रम्योदाहृतम् । ननु न च वै स्वर्गलोका इत्यादिदर्शनेनानेकस्वर्गानुगतसामान्यं स्वर्गशब्दवाच्यमङ्गीकार्यं न वा तत्सत्तातो ऽन्यत्सम्भवतीत्याशङ्कानिराकरणार्थत्वेन निर्मिश्रसुखसङ्गतिरित्येतद्व्याचष्टे * अथ वेति * केवलमेव सुखं स्वर्गशब्देनोच्यतइत्यनुष- २५५।१

१ अयं पा० २ पु० ना० ।

ङ्गः । सुखस्य केवलं दुःखामिश्रत्वमुपपादयितुं दुःखाभावे ऽप्यलम्पातदुःखासङ्गावे ऽपि च व्यतिरेकाद् * दुःखाद्विभक्तमित्युक्तम् * नन्वेवं सति कियत्कालं केवलसुखस्येहापि दर्शनात् स्वर्गस्यामुष्मिकत्वं न स्यात् इत्याशङ्क्य * यदित्युक्तम् * सर्वसुखसाधनसम्पन्नस्यापि पिपासादिदुःखाभावे स्वादूदकपानाद्यप्रवृत्तेः कं चित्कालं दुःखस्यापरिहार्यत्वादिष्टवियोगादिदुःखस्य चापरिहार्यत्वाच्चिरकालं केवलसुखोपभोगस्यास्मिन् देशे ऽनुपपत्तेः । परलोकभोग्यत्वादल्पकालस्य च केवलसुखस्य स्वर्गशब्दानभिधेयत्वात्पारलौकिकता सिद्धेत्यर्थः । ननु चिरकालोपभोग्यस्य केवलसुखस्य प्रमाणान्तरेणानवगमात्कथं सम्बन्धग्रहणमित्याशङ्क्यं निराकुर्वन्स्वर्गादिशब्दार्थनिरूपणस्य प्रकृतसत्तावाचित्वनिराकरणोपयोगित्वमुपसंहरति * तच्चेति * यागादिजन्यस्य चिरकालकेवलसुखस्य प्रमाणान्तरेणाग्रहणे ऽपि लौकिके एव सुखे ऽन्वयव्यतिरेकाभ्यां दुःखामिश्रात्सुखाभिष्कृष्टे गृहीतसम्बन्धः स्वर्गशब्दो ऽल्पकाले सुखे तद्विना प्रत्यासत्तिजन्यदुःखापरिहारेणामिश्रत्वायोगात्कैवल्येनैव चिरकालताक्षेपाद्विशिष्टमेवालौकिकं प्रतिपादयतीत्याशयः । स्वर्गशब्दस्य सत्तावाचित्वनिराकरणोपसंहारेणेतरयोरपि तुल्यन्यायसिद्धत्वात्पृथगनुक्तिः अतश्चापूर्वादिशब्दभोग्यं गवादिशब्दानां स्वार्थाभिधानेन मन्त्रागमकतया ऽस्मत्पक्षे ऽप्युपपन्नमित्याह * तेनेति * परपक्षनिराकरणमुपसंहरति * अतश्चेति * नन्वेवं तर्हि गोत्वादेरश्वादिभ्यो व्यावृत्तत्वेन विशेषरूपत्वादाकृतिवाच्यत्वपक्षो ऽनुपपन्नः स्यादित्याशङ्क्याह * गोत्वेति * अश्वादिभ्यो व्यावृत्तत्वे ऽपि शाबलेयादिष्वनुवृत्तेः सामान्यरूपताप्यस्तीत्याशयः । कुत इति संदेहे तु प्रश्नभाष्यं द्वयोः प्रतीतिरेकाभिधानेनैवाविनाभावादितरप्रतीतिसिद्धेः सन्देहहेतोः स्पष्टत्वादयुक्तमाशङ्क्य व्यक्तिपक्षनिश्चयाभिप्रायत्वेन व्याचष्टे * कुत इति * सन्देहहेतुप्रतिपादनार्थं गौरिति भाष्यं प्रत्ययस्य व्यक्त्याकृत्योस्तुल्यत्वादयुक्तमाशङ्क्य प्रत्ययहेतुशब्दशक्तिलक्षणार्थप्रत्ययशब्दाङ्गीकरणेन व्याचष्टे * उच्यतइति * प्रत्ययशब्दस्यानार्जवं द्योतयितुं व्युत्क्रमेण व्याख्यातम् । नन्वेवं सति विरुद्धाव्यभिचारित्वापत्तौ केनान्येन निर्णय इत्याशङ्क्याह * शक्तीति * नात्रान्येन निर्णयः किं त्वनयोरेव बलाबलावधारणेनेति भावः । प्रयोगचोदनाभावादितिसूत्रं लोकवेदाधिकरणसिद्धान्ते ऽन्यथा योजितत्वाद्विवेकायाकृत्यधिकरणपूर्वपक्षे ऽप्यावृत्त्या योजयति * किं तावदिति * लौकिक एवार्थो वेदे ऽपीत्युक्तम् * को

ऽसावित्यपेक्षायां प्रयोगचोदनाभावं पर्यालोच्य यो युक्तः स इत्येवं व्यक्तिवाच्यत्वप्रतिज्ञावगतेः * व्यक्तिर्वाच्येत्युक्तम् * अर्थैकत्वमिति सूत्रावयवं द्वयोः प्रतीयमानत्वाद्व्यक्तिमात्रवाच्यत्वं न युक्तमित्याशङ्कानिराकरणार्थत्वेन व्याख्यातुम् * नन्वित्युक्तम् * एकस्य वाच्यत्वं द्वयप्रतीतिः कथमित्याशङ्क्य द्वयप्रतीत्युपपादनार्थत्वेनाविभागादिति सूत्रावयवो व्याख्यातः । ननु शक्त्यनुसारेण शब्दानां वाचकत्वाच्छक्तेश्चान्वयव्यतिरेकाभ्यां जातावेव ज्ञातुं शक्यत्वात्कार्ययोगाभावे ऽपि तस्या एव वाच्यत्वं युक्तं न व्यक्तेरित्याशङ्क्याह * नित्यमिति * वाक्यार्थप्रतिपादनात्मकप्रयोजनकाले शब्दानामुच्चारितानां वाक्यार्थप्रत्यायनार्थत्वानुसारेणैतद्वाक्यार्थप्रतिपादनोपयोगिपदार्थप्रतिपत्तिरेवंविधेन शब्दविभागेन भवतीति ज्ञात्वा तथाविधशब्दविभागावधारणम्।शब्दविभागसन्देहाभावे ऽपि वाक्यार्थविशेषोपयोगिशब्दार्थविशेषावधारणं तद्यथा श्वेतो धावतीत्यत्रार्थप्रकरणादिना गौरो निर्णेनक्ति इत्येवं वाक्यार्थपरत्वावधारणे श्वेत इत्येकपदत्वं धावतेश्च निर्णीजनार्थतावधार्यते । अस्मादेशाच्छीघ्रं गच्छतीत्यनद्वाक्यार्थपरत्वे ऽश्वा इति पदाद्विद्वं गत्यर्थत्वं च धावतेर्निश्चीयते । एवं यथा येन प्रकारेण जातिवाच्यत्वनिरूपणरूपेण व्यक्तिवाच्यत्वनिरूपणरूपेण वा पदार्थानां वाक्यार्थप्रत्ययार्थता भवति तथा पदार्थानां जात्याख्यस्य व्यक्ताख्यस्य वा रूपस्य निरूपणं कार्यं न शक्त्यनुरोधेन कार्यावसेयत्वेन तस्यास्तदानुगुण्येन कल्प्यत्वादितिभावः । प्रयोगचोदनाभावव्याख्यानार्थमालम्भनेति भाष्यं व्याचष्टे * आकृतिरिति * ननु देवतोद्देशपूर्वकत्यागसङ्कल्पमात्रत्वाद्यागस्याकृतावप्युपपत्तिरित्याशङ्क्य * नेत्युक्तम् * निष्क्रयत्वेनाकृतेर्यथेष्टविनियोज्यत्वलक्षणमत्तायोगात्स्वत्वनिवृत्तिरूपत्यागो न सम्भवतीत्याशयः । आदिशब्दोपात्तमवघाताद्ययोग्यत्वमुपपादयितुमाह * अमूर्त्ता हीति * अवघाताद्युत्तरकालं वा व्रीह्यादेस्त्याज्यत्वादाकृतेश्चावघाताद्ययोग्यत्वात् त्यागानुपपत्त्युपपादनार्थो ऽयं ग्रन्थः श्लोकद्वयं व्याचष्टे * व्रीहीनिति * यावन्तो ऽवघातादयः संस्कारा विनाशिमूर्त्तिमद्द्रव्यविषयत्वादाकृतौ न युज्यन्ते ये चावेक्षणादयो विनाशिमूर्त्तिमद्द्रव्यविषयत्वाभावे ऽपि यागापूर्वाख्यप्रयोजनसिद्ध्यर्थत्वादाकृतेश्च यागसाधनत्वाभावान्न तत्र युज्यन्ते । तेषां सर्वेषां या प्रयोगचोदना तस्या आकृतावभावाद् व्यक्तौ च भावाद्विधिविषयत्वयोग्यो यो व्यक्त्याख्यः पदार्थस्तत्कल्पनमवश्याङ्गीकर्त्तव्यमित्यन्वयः । कथं व्यक्तेर्विधिविषयत्वयोग्यतेत्यपेक्षिते * वा- २५६।१

क्यार्थेत्युक्तम् * ननु विधिविषयत्वायोग्यत्वे ऽप्याकृतेः सम्बन्धग्रहणवशाद्वाच्यत्वं भविष्यतीत्याशङ्क्य * कार्येत्युक्तम् * कार्योपयोगिन्येवार्थे सम्बन्धग्रहणसम्भवो नेतरत्रेत्याशयः । कथमित्यपेक्षायाम् * विध्यधीनत्वाच्चेत्युक्तम् * शब्दश्रवणानन्तरभाविन्या हि प्रयोज्यवृद्धप्रवृत्त्या तद्विषयज्ञानमनुमाय तत्कारणत्वं शब्दस्य कल्प्यमानं प्रवृत्तेर्विध्यधीनत्वात्तद्विषयज्ञानकारणत्वमेव कल्पयितुं युक्तमिति भावः । एतच्च पूर्वोक्तमेव विवरीतुं भाष्यव्याख्यावसरे ऽभिहितमिति न पौनरुक्त्यम् । आकृतेर्निषेधविषयत्वासम्भवमुपपादयति * तथेति * उपसंहरति * तस्मादिति* यद्यप्यन्वयव्यतिरेकनिष्कृष्टशक्तिवशेनाकृतेस्तत्त्वतो वाच्यतावधारयितुं शक्या । तथापि कार्यानौपयिकत्वेनास्याः पदार्थकल्पनात्तत्स्वज्ञानमात्राददृष्टसिद्ध्यर्थं स्यात्प्रयोगचोदनाविरोधित्वात्त्वसावयुक्तेत्यर्थः। अर्थैकत्वमिति सूत्रावयवावतारणार्थं यत्रेत्याशङ्काभाष्यं व्याचष्टे *स्यादिति * एतदाशङ्कानिराकरणार्थत्वेन सूत्रावयवव्याख्यानार्थमुक्तमिति भाष्यं व्याचष्टे * तदिति * केन न्यायेनेत्यपेक्षायामन्यायश्चानेकशब्दत्वमितिसूत्रं भाष्यकृता ऽन्यायश्चानेकार्थत्वमित्यूहित्वा पठितमिति व्याचक्षाणः सूत्रोक्तं न्यायत्रयमाह *अनवस्थितेति * यववराहाधिकरणोक्तन्यायपरामर्शार्थं वेदं भाष्यमितिव्याख्यानान्तरार्थं तत्र न्यायमाह * सम्बन्धानां चेति * यथैव सदृशानां प्रियङ्गुदीर्घशूकादीनामेकाभिधानेनैवेतरप्रतीतिसिद्धेर्यवादिशब्दानामर्थैक्यं स्थितम् । तथैव सम्बन्धानामप्येकाभिधानेनैवेतरत्र प्रतीतिसिद्धेरन्याय्यानेकार्थतेत्यर्थः । कथमित्याशङ्काभाष्यं व्याचष्टे * कथं तर्हीति * सादृश्यवत्सम्बन्धादप्येकाभिधानेनेतरप्रतीतिसिद्धावुक्तायामपि किमिह सादृश्यादेकाभिधानेनेतरप्रतीतिसम्बन्धाद्वेति विशेषजिज्ञासयोरन्वयः प्रश्नपूर्वव्याख्याने तु समञ्जस एव । व्यक्तिपदार्थकस्येत्यादिभाष्यमेतत्प्रश्नासम्बन्धत्वादुपेक्ष्य स्वयमविभागादिति सूत्रावयवमेतत्प्रश्नायाकरणार्थत्वेनावतारयति * अत आहेति * इह च प्रश्नोत्तरएव सम्बन्धाद्भाष्यकृतः शून्यहृदयाभिधानापत्तेरेतदाशङ्कापरिहारासामर्थ्याच्च शुद्धव्यक्त्यभिधानपक्षत्यागादाकृतिविशिष्टव्यक्त्यभिधानपक्षपरिग्रहार्थत्वेनोत्तरभाष्यव्याख्याने प्रतिज्ञासंन्यासाख्यनिग्रहस्थानापत्तेर्विभागादिति च सूत्रावयवेनैव सुपरिहरत्वेनासामर्थ्ययोगात्सूत्रावयवव्याख्योपेक्षाकारणाभावाच्चैतत्सूत्रावयवव्याख्यानार्थं व्यक्तिसम्बन्धादित्युत्तरभाष्यं, कथं व्यक्त्यन्तरेण प्रयोग इति चाशङ्कान्तर-

भाष्यं भाष्यकृतोक्तमपि लेखकैः प्रमादान्न लिखितं लिखितमपि प्रलीनमिति प्रतिभाति । अवतारितं सूत्रावयवं व्याचष्टे * यतस्त्विति * शङ्कानिराकरणार्थस्तुशब्दः । एतच्च यत्र हि शुक्ल इति वा कृष्ण इति वा गुणः प्रतीतो भवति भवति खल्वसावलङ्गुणवति प्रत्ययमाधातुमिति तद्भूताधिकरणभाष्येण तुल्यन्यायत्वादुक्तं भवतीत्याह * तदुक्तमिति * नन्वालम्भादिचोदनासु व्यक्त्योर्वाच्यत्वं इयेनचितादिचोदनासु त्वाकृतेरेव क्रियार्थत्वाल्लुक्षितायाश्राशाब्दत्वेन धूमगम्याग्निवच्छाब्दक्रियान्वययोगात्तस्या एव वाच्यताङ्गीकार्येत्याशङ्क्याह * यस्य त्विति * शङ्कानिराकरणार्थस्तुशब्दः गौणलाक्षणिकत्वयोः शब्दस्य शक्त्यभावे ऽपि तात्पर्यसद्भावाच्छवशुराल्लज्जते स्नुषेत्यादौ च पुत्रविशिष्टभार्यादिवाचिनः सुखादिशब्दस्य विशेषणभूतपुत्राद्यनभिधाने विशेष्यभूतभार्याभिधाना शक्तेः स्नुषादिशब्दाभिहितस्यापि पुत्रादेर्लज्जादिक्रियान्वयादर्शनेन तात्पर्यवृत्तेरेव पदार्थान्वयकारणत्वावसायाल्लाक्षणिका ऽप्याकृतिः क्रियात्वं प्रतिपत्तुं शक्तेत्याशयः । तस्य पदस्य तत्रस्थस्य तत्रैवार्थे वर्त्तमानस्येत्यर्थः । नन्वेवं सति व्यक्तेरपि लाक्षणिक्याः क्रियान्वयोपपत्तेर्जातिवाचितैव कस्मान्नेष्टेत्याशङ्क्याह * इत्यपि चेति * इति २५७।१
करणो ऽयमेवशब्दार्थे एवमपीत्युक्तं भवति यद्यप्युभयथापि क्रियान्वयो युज्यते तथाप्याकृतेर्व्यक्तिविशेषनिश्चायकत्वाभावाद्व्यक्तेश्चाकृतिविशेषनिश्चायकत्वसद्भावादाकृतेरेव लाक्षणिकत्वं युक्तं न व्यक्तेरित्यर्थः । उपसंहरति * तस्मादिति * ननु विकल्पादिपक्षान्तरसम्भवान्नायमुपसंहारो युक्त इत्याशङ्क्याह * न चेति * अद्रव्यशब्दत्वादितिसूत्रं स्वयं तावद्व्याचष्टे * अपि चेति * पूर्वस्मिन्नेव पक्षे ऽयमपि हेतुरित्यपि च शब्दस्यार्थः । जातिपक्षे द्रव्यशब्दत्वाभावापत्तेर्व्यक्तेरेव वाच्यतेत्युक्ते तदापत्तौ को दोष इत्यपेक्षायाम् * सामानाधिकरण्यं हीत्युक्तम् * ततश्चेत्यर्थे हिशब्दः श्लोकं व्याचष्टे * गोशब्दादीनामिति * एतदेवोपपादयति * गोत्वस्येति * ननु गोत्वस्य शुक्लादिगुणैः सहैकार्थसमवायलक्षणः सम्बन्धो ऽस्तीत्याशङ्क्याह * न हीति * व्यक्तिद्वारस्यैकार्थसमवायस्य व्यक्त्यनभिधाने रूपरसादिशब्दवत्सामानाधिकरण्यानापादकत्वात्साक्षात्सम्बन्धेन भाव्यं न चासावस्तीति भावः । ननु व्यक्तिपक्षे गोशब्देन जातिविशिष्टायास्तदुपलक्षितायाः वा व्यक्तेरभिधानाच्छुक्लशब्देन च गुणविशिष्टायास्तदुपलक्षितायाः वा ऽभिधानात्तयोश्चैकत्वे प्रमाणाभावात्कथं सामानाधिकरण्यमित्याशङ्क्याह * मम हीति *

व्यक्तिपक्षे सर्वव्यक्त्यभिधानाद्गोशब्दस्य शुक्लायामपि गोव्यक्तौ वृत्तेः शुक्लशब्दस्य च गोजातीयायामपि शुक्लव्यक्तौ वृत्तेरैकार्थ्यसिद्धिः । जातिपक्षे तु व्यक्तेः शब्देनानुक्तत्वाल्लक्ष्यमाणायाश्चैकत्वे प्रमाणाभावाद्गवाश्वशब्दयोरिव भिन्नार्थतेति भावः । (मम हि व्यक्तीति व्यक्तिशब्दः । न बलत्वद्रव्येति द्रव्यशब्दः । उत्तरार्धे पूर्वार्धस्य विपर्ययेणाव्यक्तिशब्दत्वादिति वक्तव्ये द्रव्यशब्दव्यतिकरेण मिश्रणेन गुणशब्दस्य गुणवचनशब्दस्य शुक्लादिशब्दस्य गुणवचनशब्दस्य शुक्लादिशब्दस्य गुणोपलक्षितद्रव्यवाचित्वमेव न तु गुणवाचित्वमिति व्यक्त्यभिधानपक्षे पूर्वपक्षमते सूचितमित्यन्वयः । व्यक्तिद्रव्यशब्दव्यतिकरेण इति सूचितमित्यन्वयः । मम हि व्यक्तीति व्यक्तिशब्दः न बलत्वद्रव्यशब्देति च द्रव्यशब्दः तयोः झटित्यन्वयव्यतिरेकयोरेकविषयत्वोपस्थित्यै व्यक्तिशब्दस्य द्रव्यशब्दस्यैव वा उभयत्र प्रयोज्यत्वौचित्ये ऽपि तयोः व्यतिकरः भिन्नरूपयोः प्रयोगः तेन गुणशब्दस्य गुणवचनसंज्ञकशब्दस्य गुणव्यक्तिवाचित्वशङ्काया व्यक्तिवाचित्वपक्षे प्रसक्ता सा[1]) गुणशब्दस्य गुणोपलक्षितद्रव्यवाचित्वं न तु गुणव्यक्तिवाचित्वं जातिपक्षोक्तदोषसाम्यादिति सूचितम् । श्लोकं व्याचष्टे * जातीति * ननु गोशब्देन कृष्णादिव्यक्तीनामप्यभिधानाच्छुक्लशब्देन चाश्वादिव्यक्तीनामप्यभिधानात्कथं सामानाधिकरण्यमित्याशङ्क्य * तच्चेत्युक्तम् * द्रव्यान्तराभिधाने ऽपि तस्यापि तावदभिधानात्सा(मानाधिकरण्यसिद्धिरित्यपिशब्दार्थे चशब्दः नन्वाकृतिपक्षे ऽपि तर्हि जातिगुणाभ्यां लक्षितस्य द्रव्यस्यैकत्वमपि सम्भवतीति पाक्षिकं सा[2])माधिकरण्यं स्यादेत्याशङ्क्य * एवंविधमपीत्युक्तम् * व्यक्तिपक्षे भिन्नव्यक्तिवाचित्वे ऽप्येकव्यक्तिवाचित्वं नित्यमस्ति। जातिपक्षे तु भिन्नार्थत्वसङ्कीर्णमप्येकार्थत्वं नास्तीत्यर्थः । अद्रव्यशब्दत्वादित्यस्याकृतिपक्षे लक्षणयाप्येकद्रव्यशब्दत्वाभावप्रसङ्गादित्येवं साक्षात्सामानाधिकरण्याभावप्रसङ्गाभिधानपरत्वेन व्याख्यानान्तरमाह * इतीति * ननु द्रव्याश्रयस्येति भाष्येण द्रव्यशब्दस्य लक्षणया गुणपरत्वमुक्त्वा न भवेदिति नञो भवतिनान्वयः कृतः तत्किमित्यन्यथा भवता व्याख्यातमित्याशङ्क्याह * यत्त्विति * कथं द्रव्यशब्देन गुणलक्षणेत्यपेक्षायां * तत् द्रव्यमाश्रयो ऽस्येत्युक्तम् * भेदाधिष्ठानत्वाच्चाश्रयाश्रयिभावस्य यत्र पदस्य युक्त इति व्यधिकरणत्वेन निर्दिष्टस्य गुणस्य प्रयो-

१ अयं पा० २ पु० ना० ।
२ अयं पा० २ पु० ना० ।

गस्तदर्हत्वमप्यनेनैवोपपादितम् * अतिक्लिष्टत्वोपपादनार्थमप्रधानभूतगुणविपरीतार्थेन प्रधानभूतार्थेन द्रव्यशब्देन लक्षणा। नञश्च भवत्यर्थसापेक्षस्य द्रव्योपसर्जनत्वेनासमर्थस्य द्रव्यशब्देन * समासाङ्गीकरणमुक्तम् * यद्यपि क्रिया न स्यादिति चेदर्थान्तरे विधानं द्रव्यमिति चेदित्यनुभाषणसूत्रगतो द्रव्यशब्दः षडादिशब्दस्य द्रव्यवाचित्वाभावादगत्या गुणलक्षणार्थो व्याख्यायते तथापीह द्रव्यशब्देनैव गुणस्य वक्तुं शक्यत्वात्तल्लक्षणाश्रयणं युक्तमित्याशयः। किमेवं सत्ययुक्तमिदं भाष्यमित्याशङ्क्याह * तत्रापि चेति * नात्र द्रव्यशब्देन समस्तस्य नञो भवत्यन्वयो विवक्षितः। किं त्वकारप्रश्लेषेण गुणशब्देनाद्रव्यशब्दएव सौत्रे व्याख्यानायोक्तः। जातिशब्दस्याप्यद्रव्यशब्दत्वोपपत्तेः कथं गुणशब्दस्यैवाद्रव्यशब्दतेत्याशङ्कानिराकरणार्थं द्रव्यत्वेन नापर्युदस्ते तदन्यापेक्षायां द्रव्यैकाश्रयत्वाद् गुण एव शीघ्रमुपतिष्ठते जातिस्त्वनेकद्रव्यगुणकर्माश्रयत्वान्न शीघ्रमुपतिष्ठतइत्यद्रव्यशब्देन गुणाभिधानाद् गुणशब्द एवाद्रव्यशब्द इति * द्रव्याश्रयस्येत्युक्तम् * नन्वेवं सति नकारा- २५८।१
न्तराभावान्न द्रव्याश्रयवचन इति भाष्यं कथमित्याशङ्क्याध्याहारेण योजयितुम् * स आकृतेरित्युक्तम् * स्वरूपेण शब्दस्य निषेदुधुमशक्यत्वाद्यस्याकृतिः शब्दार्थ इति चानन्तरमभिधानादाकृतिवाचिशब्दसम्बन्धिनश्चेदित्यर्थलाभं मत्वा * एकवाक्यसम्बन्धमित्युक्तम्। नन्वेवं सत्यन्याय्यलक्षणासमर्थसमासदोषपरिहारादक्षरार्थमात्रस्य सम्भवेनैषा योजनेति किमित्युक्तमित्याशङ्क्याह * सामानाधिकरण्यमिति * षड्गावो देया इति समानाधिकरणनिर्दिष्टगुणशब्दोदाहरणाद्गोशब्दस्याकृतिवाचित्वे तत्सामानाधिकरण्यं षडादिशब्दानां न युज्येतेति पूर्वपक्षिणः सिद्धान्तबोधं प्रतीयते। तच्च भेदाधिष्ठानाश्रयाश्रयिभावोक्तेर्निष्कृष्टगुणवचनस्याद्रव्यशब्दत्वावसायात्तस्य च व्यक्तिपक्षे ऽपि गुणव्यक्तिपर्यवसायित्वेन द्रव्यव्यक्तिपरत्वाभावाविशेषात्तदानीमपि क्लेशेनाक्षरार्थयोजनायामप्यनुपपन्नमेवेत्यर्थः। का तर्हिसूत्रस्य गतिरित्याशङ्क्याह *इतीति *यास्माभिर्व्यक्तिद्रव्यशब्दव्यतिकरेण व्यक्तिपक्षे गुणोपलक्षितद्रव्यव्यक्तिवाचित्वं गुणशब्दानां सूचयित्वा जातिपक्षे द्रव्यशब्दत्वाभावात्सामानाधिकरण्यं न सम्भवतीति व्याख्या कृता सैव युक्ता न तु या भाष्यकृता गुणशब्दस्य व्यक्तिपक्षे गुणव्यक्तिवाचित्वमभिप्रेत्य कृता तस्मिन्व्याख्याने सामानाधिकरण्याभावप्रसङ्गत्योभयवादिसाम्येनाचोद्यत्वापत्तिरित्यर्थः। अन्यदर्शनाच्चेति पूर्वपक्षसूत्रान्तरगतभाष्यं स्पष्टत्वादुपेक्ष्याकृतिस्तु क्रियार्थ-

त्वादिति सिद्धान्तसूत्रव्याख्यानार्थं वचनमाकृतौ सम्भवतीति भाष्यं दुष्टत्वसामान्येन बुद्धिस्थमपाठित्वैव दूषयति। * किं चेति * न केवलमेतदेव भाष्यमुपेक्षितव्यं किं त्वन्यदपीति किं चशब्दार्थः यद्वा कस्मै देवाय हविषा विधेमेत्येकशब्दार्थे किमो व्याख्यानादेकशब्दस्य चापो भूयिष्ठा इत्येको अब्रवीदित्यन्यार्थदर्शनादन्यच्च भाष्यमुपेक्षितव्यमित्यर्थलाभः। किमित्युपेक्षितव्यमित्यपेक्षायाम् * नैवेत्युक्तम् * नैवाकृतिस्तु क्रियार्थत्वादिति वदता सूत्रकृतेष्टकाभिराकृतिसम्पादनमभ्युपगतं येन च यत्र साकृतौ सम्भवतीत्येवं सूत्रव्याख्या युज्येतेत्यर्थः किमिति नाभ्युपगतमित्याशङ्क्याह * यत इति * स्वरूपेण जातेर्नित्यत्वात्स्वव्यक्तिभूतद्रव्यसमवायित्वेन सम्पादनं वाच्यं। तदपि नित्येष्वात्मादिषु नित्यसिद्धत्वान्न सम्पादनमपेक्षते। कृतकेष्वप्यारम्भकहेतुस्वभावादेव तदारब्धे द्रव्ये जातिसमवायाच्छ्येनत्वजातीयव्यक्त्यनारम्भिकाभिरिष्टकाभिः श्येनत्वजातिसम्पादनमयुक्तमित्येवं रूपस्योपालम्भस्य दोषस्येष्टकाभिः श्येनत्वाकृतिसम्पादनाभ्युपगमे प्रसङ्गान्नेदमभ्युपगतमित्यर्थः। क स्तर्हि श्येनवचनचोदनार्थ इत्याशङ्क्याह * पिष्टेति * अमी पिष्टपिण्डाः सिंहाः कार्या इत्युक्ते पिष्टपिण्डेन सिंहाकृतिव्यक्त्योः सम्पादनाशक्तेर्यथा पिष्टपिण्डानामेव सिंहाकृतिसादृश्यसम्पादनं चोदनार्थस्तथात्रापीत्यर्थः। प्रयोज्यव्यापारवाचिना सम्पत्तिशब्देन प्रयोजकव्यापारः सम्पादनं लक्ष्यते। नन्वाकृतेर्नित्यत्वे सम्पाद्यत्वात्तद्वाचित्वे श्येनशब्दस्य सादृश्यपरत्वेन गौणत्वापत्तेस्तत्परिहाराय व्यक्तिपक्ष एवात्राश्रीयते श्येनव्यक्तेश्च यत्नेनानुत्पाद्यत्वे ऽपि श्येनस्त्रीपुंसयोर्योगेनोत्पादयितुं शक्यत्वात्प्रथमश्रुतश्येनशब्दानुरोधेन च पश्चाच्छ्रुतस्य चिनोतेस्तल्लक्षणार्थतया व्याख्यातुं शक्यत्वादित्याशङ्क्य * पक्षद्वये ऽपीत्युक्तम् * श्येनस्त्रीपुंसयोर्योगेनोत्पादिताया अपि श्येनव्यक्तेरग्न्याधारत्वायोगेनाग्न्याधारानुपपत्तेः। कर्मण्यग्न्याख्यायामिति स्मृतिबाधप्रसङ्गादृष्टार्थत्वापत्तेश्च तत्परिहाराय गौणत्वाश्रयणमप्युचितमित्याशयः। नन्वेवं सति व्यक्तिसादृश्यस्यापि सम्पादयितुं शक्यत्वात्कथमस्य श्येनशब्दस्याकृतिवाचित्वेन निश्चय इत्याशङ्क्याह * सा त्विति * सा सादृश्यसम्पत्तिः श्येनाकृत्यास्या आकृत्यन्तरमात्रविलक्षणत्वात्तस्य च कतिपयविशेषोपादानेन सम्पादयितुं शक्यत्वात् सकलव्यक्त्यन्तराविलक्षणेन श्येनविशेषेण व्यक्तिशब्दाभिलप्येन सादृश्यसम्पादनं सकलविशेषोपादानेन स्यान्न चेष्टकाभिरत्यन्तकुशलेनापि सम्पादयितुं शक्यामिति भावः।

अथ सामान्यविशेषाश्रयभूतमसाधारणं व्यक्तिशब्देनाभिप्रेतं तत्स्वस्यैवंविधमिति निरूपणरूपविकल्पगोचरत्वाभावान्नानेन सह विकल्पगोचरस्य सादृश्यसम्पादनं कथं चिच्छक्यामित्यर्थः। ननु यद्यपि सामान्यविशेषाश्रयस्य व्यक्त्याख्यस्यासाधारणस्य रूपेणैवंविधामिति विकल्पागोचरत्वात्सादृश्यप्रतियोगित्वं न सम्भवतीति विशेषावच्छिन्नेन च तेन सादृश्यमिष्टकाभिरशक्यसम्पादं सामान्यावच्छिन्नेन च सादृश्यमुच्यमानं विशेषणे पूर्वनिपातात्सामान्येनैवोक्तं स्यात्तथापि सामान्यविशेषाभ्यामन्यदित्येवंरूपविकल्पगोचरत्वोपपत्तेरसाधारणशब्दाभिलप्यया व्यक्त्या सह सादृश्यं सम्पादयिष्यतइत्याशङ्क्यानिर्धारितविशेषया यया कया चिद्व्यक्त्या सादृश्यं (विधीयेत निर्धारितविशेषया वा यया कया चिदिति विकल्पाद्यपक्षे तावद् दूषणमाह * सामान्येति * सामान्य विशेषावच्छेदकत्वेन यन्नापेक्षते सादृश्यं[1]) तत्तथोक्तम्। तच्च व्यक्तिमात्रे ऽपि नित्यप्राप्तं सर्वस्य येन केन चित्सादृश्यावश्यं भावादित्यर्थः। श्येनव्यक्त्या यया कया चिदिति तु विशेषणे श्येनत्वाकृतिव्यतिरिक्तस्य श्येनव्यक्तिमात्रस्याभावाच्छ्येनत्वाकृतिसादृश्यमेवोत्पद्यते इति भावः। द्वितीयपक्षे तु यद्व्यक्तिसादृश्यं विहितं तद्दर्शिभिस्तत्सादृश्यस्याशक्यसम्पाद्यत्वाद्व्यक्त्यन्तरसादृश्यस्य चाविहितत्वात्सर्वपुरुषविषयत्वं शास्त्रस्य व्याहन्येतेत्याह * एकेति * सूत्रार्थमुपसंहरति * तस्मादिति * ननु चेति भाष्येण श्येनव्यक्तेश्चयनोत्पाद्यत्वायोगे ऽपि चयनोत्पादकत्वेन विधिः सम्भवति एकव्यक्त्यनुत्पाद्यत्वे ऽपि चयनस्य बह्वीभिरुत्पादयितुं शक्यत्वादित्याशङ्क्य न साधकतम इत्यनेन श्येनशब्दार्थस्येष्सिततमत्वावगतेः साधनत्वेन विधिर्न सम्भवतीत्युक्तं तदुपपादयति *न हीति* यद्यप्ययं कर्मशब्दः क्विप्प्रत्ययवाच्यविशेषणत्वान्नोपपदविशेषणं तथापि कर्मणि हन इत्यतः सूत्रादनुवर्त्तमानस्य कर्मशब्दस्योपपदविशेषणत्वान्न शब्दार्थस्य कर्मतावसीयतइत्याशयः। अतश्चयनेनेति विध्यर्थप्रतिपादकं भाष्यं व्याचष्टे * श्येनमिति * ननु श्येनाकृतिव्यक्त्योश्चयनेनोत्पादयितुमशक्यत्वात्कथमेष विध्यर्थः स्यादित्याशङ्क्योक्तमेव सादृश्यलक्षणार्थत्वं भाष्यकाराभिप्रेतत्वप्रदर्शनार्थं पुनराह * तत्रापीति * श्येनसदृशं चीयमानमिष्टकासमूहं चयनेन भावयेदिति विध्यर्थो ऽनेन दर्शितः चयनमाकृतौ सम्भवतीत्याद्यस्यापि भाष्यस्य सादृश्यविषयत्वेन समर्थनोपपत्तेर्यथाश्रुतस्यैव पूर्वोक्तं दूषणं दर्शितम। उभयत्रेत्यादिना

१ श्यं पा० २ पु० ना०।

क्रियार्थत्वस्योभयत्र साम्येनानिश्चायकत्वमाशङ्क्य किं पुनरत्रेत्यनेन पूर्वपक्षहेतोरनिश्चायकत्वापादनायैवाकृतेः क्रियार्थत्वमुक्तं नाकृतिवाच्यत्वनिश्चायेति सूचितम् । तत्स्पष्टत्वादव्याख्याय कथं तर्ह्याकृतिवाच्यत्वनिश्चय इत्यपेक्षायामाकृतित्विति तुशब्दसूचितोपपत्तिप्रदर्शनार्थमाकृतिरित्यादिभाष्यमाकृतिवाच्यत्वं प्रतिज्ञाय व्यक्तिवाच्यत्वपारिशेष्यादनिराकरणादयुक्तमाशङ्क्य संक्षेपेण व्याचष्टे * असाधारण इति * व्यक्त्याकृत्योर्मध्ये का वाच्येति विचारणायां व्यक्तिवाच्यत्वे निराकृते पारिशेष्यादाकृतिवाच्यत्वं निश्चीयतइति भावः । ग्रन्थस्त्वेवं योज्यः असाधारणे व्यक्त्याख्ये यदा शब्दप्रवृत्तिर्न सम्भवति तदा पारिशेष्यादाकृतिः शब्दार्थ इति परिग्रह इति पूर्वग्रन्थगतं परिग्रहपदमनुवक्तव्यं शब्दार्थपदं चाध्याहार्यं कथं व्यक्तौ शब्दस्य प्रवृत्त्यसम्भव इत्याशङ्कानिराकरणार्थत्वेन यदितिभाष्यं व्याख्यातुमसाधारणे वाच्ये ऽङ्गीक्रियमाणे शब्दस्य प्रभूतेष्वनेकेष्वर्थेषु वृत्त्यसम्भवादित्येतदेवावृत्त्या योज्यम् । असाधारणत्वाच्च व्यक्तेरेकस्यामपि शब्दप्रवृत्तिर्न सम्भवतीति भाष्यसूचितार्थप्रदर्शनायासाधारणशब्दः । सर्वसामान्यविशेषवियुक्ता हीत्यनेनैकापि व्यक्तिर्न शब्दार्थ इत्युक्तामिति व्याख्यानार्थत्वेन चैतद्योज्यं किं चिद्धि सामान्यरूपं किं चिद्धि विशेषरूपं वावलम्ब्य शब्देन प्रवर्त्तितव्यं तद्वियुक्ते रूपं कथं प्रवर्त्तेतत्याशयः । ननु सामान्यविशेषरूपशब्दप्रवृत्तिनिमित्ताभावे ऽपि तदुभयरूपरहितत्वमेव निमित्तं भविष्यति । न च तदेवसामान्यम् वस्तुरूपत्वादिति नैष दोष इत्यादिना न हि तत्सामान्यमित्यन्तेन भाष्येणाशङ्क्य सामान्यविशेषरूपरहितत्वस्य तदाश्रयाव्यपदेश्यत्वापरपर्यायस्याश्वादिव्यक्तिष्वपि भावाद्गोशब्दप्रवृत्तिः प्रसज्येतेति प्रतिपादनार्थं यदीति भाष्यं व्याख्यातुम् *अव्यपदेश्यत्वेन चेत्युक्तम् *ननु सामान्यविशेषवियुक्तत्वाविशेषे ऽप्यृगादिशब्दवत्प्रयोगतो व्यवस्था भविष्यतीत्याहेतिभाष्येणाशङ्क्य तथा सत्यद्यजातायाङ्गव्यदृष्टप्रयोगत्वात्प्रथमः प्रयोगो न स्यादिति यदीत्यनेन दूषणमुक्त्वा कथं चित्प्रयोगसम्भवे ऽपि व्यवहारकालीनस्य प्रयोगस्य निर्द्धारितैकव्यक्तिविषयत्वेनानेकव्यक्तिसाधारण्याभावाद्गौर्न पदा स्पृष्टव्येत्यादौ शाबलेया बाहुलेया वेति विकल्पबुद्धिः स्यान्न गोमात्रमिति सामान्यबुद्धिरित्येतदर्थप्रतिपादकं सामान्यप्रत्ययश्चेति भाष्यं व्याख्यातुम् * सामान्याकारेण वेत्युक्तम् * गौर्न पदा स्पृष्टव्येत्यादौ यत्र सामान्याकारेण व्यक्तिविशेषमनाश्रित्य शब्दः प्रयुज्यते तत्र विकल्पः प्रसज्येतेत्यर्थः । ननु व्यक्तिवाचिनो ऽपि शब्दादभिधेया-

विनाभावेन सामान्यप्रत्ययोपपत्तिरित्याशङ्क्य * व्यापकेत्युक्तम् * गोत्वैकार्थसमवायिनां शाबलेयत्वाद्यवान्तरसामान्यरूपाणां विशेषाणां गोत्वव्याप्यत्वाश्ववव्यापकगोत्वापेक्षामात्रेणेतरत्र तदाश्रयभूतमसाधारणं व्यक्तिशब्दाभिलप्यं नैव गोत्वापेक्षं भवति । इतरेति पाठे त्वसाधारणशब्देनोक्तत्वात् व्यक्तिः परामृश्यते । ननु विशेषाणां गोत्वापेक्षत्वे तदाश्रयस्यासाधारणस्याप्यव्यभिचाराद्गोत्वापेक्षाबलादापद्येतेत्याशङ्क्य व्याप्यस्य धूमत्वसामान्यस्य व्यापकाग्न्यपेक्षत्वे ऽपि तदाश्रयस्यासाधारणस्याग्न्यपेक्षा नास्ति वाक्यादिभावेन सन्दिग्धे धूमे असाधारणनिश्चये ऽप्यनिश्चयादिति प्रतिपादयितुम् * व्याप्यसामान्यस्य नैवं विशेषव्याप्यापेक्षयेत्युक्तम् * नन्वसाधारणरूपेण व्यक्तेः शब्दार्थत्वासम्भवे ऽपि शाबलेयत्वाद्यवान्तरसामान्यात्मकविशेषावच्छिन्नत्वरूपेण शब्दार्थत्वोपपत्तेः । कथं पारिशेष्यादाकृतेः शब्दार्थत्वावधारणेत्याशङ्क्याह * तत्रेति * तत्रैवं साधारणरूपेण शब्दप्रवृत्त्यसम्भवे सति विशेषावच्छिन्नत्वरूपेण व्यक्तेरभिधेयं वाच्यं तस्मिंश्च पक्षे सम्बन्धकथनासम्भवादयो दोषाः स्युरित्यर्थः । वाच्यवाचकनियमहानिः सम्बन्धानित्यत्वापत्तिर्विकल्पप्रसङ्गः शेषव्यक्त्यानवनापत्तिः । नित्यबहुवचनप्रसङ्गः शुक्लादिशब्दसामानाधिकरण्यासम्भवश्चादिशब्देनोपात्ताः । एतेनैव व्यक्त्यभिधानपक्षे सर्वव्यक्त्यभिधानपक्षे च यथासम्भवं योज्याः । अनिश्चीयमानत्वादपि न विशेषाणां वाच्यतेत्याह * न चेति * नन्वेवमपि विकल्पसमुच्चयाद्यनेकपक्षसम्भवान्नाकृतेः पारिशेष्यसिद्धिरित्याशङ्क्य स्वतन्त्रयोर्विशेषणविशेष्यभावरहितयोस्तावद्व्यक्त्याकृत्योर्विकल्पेन समुच्चयेन वाभिधाननिरासेनैव निरस्तमित्याह * एतेनेति * व्यक्तिविशिष्टाकृतिपक्षो ऽपि व्यक्तेर्विशेषणत्वेन पूर्वाभिधानापत्तेस्तन्निरासेनैव निरस्त इत्याह * व्यक्तीति * एतेन प्रयुक्त इत्यनुषङ्गः । आकृतिरिति पाठे प्रयुक्तेति विपरिणतानुषङ्गः सम्बन्धसमुदायाभिधानपक्षैर्निराकर्त्तुमाह * सम्बन्धेति * सम्बन्धसमुदाययोरपि वाच्यत्वाभ्युपगमे ऽवश्यवाच्यभूतसम्बन्धिसमुदायिविशेषणता ऽभ्युपगन्तव्या भवतीत्यन्वयः । कस्मादित्यपेक्षिते * स्वरूपेत्युक्तम् * सम्बन्धो ऽयं समुदायो ऽयमिति स्वतन्त्ररूपेणाप्रतीतेः सम्बन्धिसमुदायिनिरपेक्षस्य सम्बन्धसमुदायानिरूपणास्यादावविभागेन सर्वशब्दानां पर्यायत्वापत्तेरित्यर्थः । तथा सति को दोष इत्यपेक्षायामाह * तत्रापीति * व्यक्त्यंशे च व्यक्त्यभिधानपक्षोक्ताः सर्वे दोषाः स्युरित्याह * व्यक्त्यंशे चेति * समुदा-

यस्य स्पर्द्धमानैककार्यपरार्थविषयत्वात्साक्षात् क्रियानिष्पत्तिक्रियासाधनविशेषणात्मकाभिन्नकार्ययोर्विशेषणत्वेन विशेष्यत्वेन वा स्पर्द्धमानयोर्व्यक्त्याकृत्योर्नास्त्येवेत्याह * न चेति * जातिव्यक्त्योश्चात्यन्तभेदाभावादुभावपि न स्त इत्याह * अ-
२५९।२ नन्त्यन्तेति * आकृतिविशिष्टव्यक्तिपक्षे ऽपि व्यक्तिविशिष्टो वाकृतिविशिष्टो वाच्यो व्यक्तिमात्रं च विकल्प्याद्यपक्षं तावद् दूषयति * आकृतीति * द्वितीयपक्षे त्वाकृतिव्यतिरिक्तद्विशिष्टव्यक्तिमात्राव्यक्त्यभावात्सिद्धान्तापत्तिरिति स्वयमेवाशङ्क्याह * व्यक्तीति * एवमाकृतिव्यतिरिक्तायास्सन्नपक्ष्या निरस्तत्वात्तन्निरासेनैव च व्यतिकीर्णपक्षनिरासस्सिद्धेर्लिङ्गकारकसंख्यानां च प्रत्ययार्थत्वेन प्रातिपदिकवाच्यत्वासिद्धेः शब्दस्वरूपस्य च प्रत्यक्षसिद्धत्वेनावाच्यत्वस्य नात्मानमभिधत्ते हिशब्दः कश्चित्कदा चनेति शून्यवादवार्त्तिकपाठनिरस्तत्वात्पारिशेष्यादाकृतिवाच्यत्वसिद्धिरित्युक्तम् * इदानीम् *

तत्र प्रयोगबाहुल्यात्तद्विशेषेषु सत्स्वपि ।
प्रयोगात्परसामान्ये सति वाप्यप्रयोगतः ॥
सास्नाद्यर्थसम्बन्धिगोत्वमात्रस्य वाचकः ।
गोशब्द इति विज्ञानमन्वयव्यतिरेकजम् ॥

इत्यनेन न्यायेनान्वयव्यतिरेकाभ्यामपि गोत्वस्यैव गोशब्दवाच्यतावसीयतइत्याह *नानेति* गोत्वाकारविषयैव गोशब्दस्य वाच्येन सह सम्बन्धे वाचकत्वरूपे शक्तिरन्वयव्यतिरेकाभ्यां गम्यतइत्यर्थः कृत्तद्धितसमासैः सम्बन्धाभिधानं भावप्रत्ययेनेति स्मृतेः । सम्बन्धवाची वाच्यत्वशब्द' शब्दशक्तिजन्यज्ञानकर्म्मत्वमेव वा शक्तिशब्देनाभिप्रेत्य गोत्वाकाराश्रितैव गोशब्दं प्रति वाच्यत्वरूपा शक्तिरितियोज्यम् । ननु वृद्धव्यवहारावसेयत्वाच्छक्तेः तस्य च सन् द्विष्ठवस्तुविषयत्वात् कथं निष्कृष्टैकाकारविषया शक्तिरवसीयतइत्याशङ्क्य * तद्भेदेत्युक्तम् * सर्वात्मकवस्तुविषयत्वे शब्दशक्तेरेकेनैव गोशब्दादिना सर्वात्मकवस्तुप्रतीतिसिद्धेः शुक्लादिशब्दानर्थक्यप्रसङ्गात्तद्भेदाद्वस्तुगतान् भिन्नाकारांश्शब्दशक्तयो ऽनुसरन्तीत्यर्थः । भिद्यन्तइति भेदाइति व्युत्पत्त्या वस्तुगता भेदा इति विग्रहीतव्यं वस्तुगतभिन्नाकारानुसाराभावेनैकशब्दव्यक्त्यानर्थक्यप्रसङ्गाद् बहुवचनेन सूचितः । निरंशवस्तुवादिनं निराकर्त्तुं *नानाकारेष्वित्युक्तम् * नानेकाकारेष्वति पाठे व्यावृत्तानुवृत्ताकारेष्वित्यर्थः । ननु गोत्वमात्रविषयत्वे गोशब्दशक्तेः कथं गोशब्दात्पशुत्वप्रा-

णित्वपार्थिवत्वद्रव्यत्वसत्त्वावगतिः । एकार्थसमवायमात्रेण तन्निश्चयाभ्युपगमे शाबलेयत्वादीनामपि निश्चयः स्यादित्याशङ्क्याह *तदेकेति* सामान्यान्तरावगतिर्निश्चयस्तैः सामान्यान्तरैर्गोशब्दार्थस्य गोत्वस्य व्याप्तैर्विशेषैश्च साहचर्ये सत्यप्यव्याप्तैस्तेषां सन्देहनिवृत्तयेऽन्यतोऽवधारणाकाङ्क्षेत्यर्थः । एवं सिद्धान्तमुपपाद्य पूर्वोक्तान् दोषान्परिहर्त्तुमाह*अनित्यन्तेति* आदिशब्दानित्यत्वम् । ननु वस्तुतोऽत्यन्तव्यतिरेकाभावे ऽपि शब्दान्निकृष्टावगतेः कथं दोषप्रसङ्गाभावोऽत आह * सा हीति * केवल्याभिप्रायो निकृष्टशब्दो न स्वनिष्ठत्वाभिप्रायः । यद्यप्याकृतिः शब्दाच्छुद्धा प्रतीयते तथापि क्रियान्वयस्यापि प्रतीतेस्तदन्यथानुपपत्त्या व्यक्तितादात्म्यावगमात्सम्भवत्येव क्रियान्वय इत्यर्थः । प्रोक्षणादि तु व्यतिरेके ऽपि सम्भवतीत्याह * प्रोक्षणेति * क्षरणार्थसिञ्चतिधात्वर्थवाचित्वाद्क्षतेः क्षार्यस्य चोदकादेरूर्ध्वाधोदेशविभागसंयोगमात्रेण सिद्धेराभिमुख्यमात्रेण क्षरणसिद्धिराभिमुख्यमात्रेण च जातेरपि द्रव्यवत्कर्म्मत्वोपपत्तेः । सिच्यमानस्योदकादेः कर्मीभूतव्रीह्यादिसंयोगानपेक्षणात्पुञ्जीकृतेषु च व्रीह्युपरिस्थितव्रीहितिरोहितानामधःस्थितानां व्रीहीणां सिच्यमानोदकसंयोगाभावे ऽपि शास्त्रार्थनिष्पत्तिप्रसिद्धेः व्रीह्यादिसंयोगापेक्षायामनुपपत्तेः प्रोक्षणमाकृतेः स्वतोऽपि सम्भवति अवेक्षणं चाकृतेश्चक्षुःसंयुक्तद्रव्यसमवायात्प्रसिद्धमेव आदिशब्देन ध्यानोपादानं किमर्थं तर्ह्यव्यतिरेकोपन्यास इत्याशङ्क्याह * विशसनादीति * प्रतीतिसिद्धत्वाकृतेर्विशसनादियोगो न स्वमनीषिकामात्रकल्पित इत्याह * तथा हीति * पश्वादिष्वपनीताङ्गेषु विच्छिन्नावयवेषु या विशसनादिविशिष्टा बुद्धिः सामान्यविषयैव विभक्तैरवयवैः सामान्यमात्रानुमानोपपत्तेः । न तु व्यक्तिविषया व्यक्तिविशेषानुमानासम्भवे तत्तद्बुद्ध्यभावादित्यर्थः । नन्वाकृतेर्विशसनादियोगे सत्यत्वप्रसङ्गादनिष्टापत्तिः स्यादित्याशङ्क्ते * नन्विति * विनष्टव्यक्त्यात्मकरूपेणाकृतेरपि विनाशाभ्युपगमान्नानिष्टापत्तिरिति परिहरति * तेनेति * नन्वेवं सत्याकृतिपक्षे ऽपि सम्बन्धनित्यत्वं न सिद्ध्येदित्याशङ्क्याह * आश्रयान्तरेति * अत्यन्तव्यतिरेकवादिनाप्यन्तराले ऽनुपलम्भात् स्वपिण्डमात्राश्रिताकृतिरेष्टव्या तस्या आश्रयविनाशे स्थातुमशक्तेरन्यत्र च गमनायोगादवश्याङ्गीकरणापत्तेराश्रयान्तराविनाशादेव नित्यत्वमेष्टव्यमिति * सर्वैरित्यनेनोक्तम् * एतदेव विवृणोति * तेनेति * नन्वत्यन्तव्यतिरेके ऽप्याकृतिलक्षितव्यक्तिद्वारेण प्रयोगचोदनोपपत्तेरित्यत्यन्तक्लिष्टभेदाभे-

दपक्षाश्रयणमित्याशङ्क्याह * अत्यन्तेति * अव्यवस्थामुपपादयितुमाह * न चेति * ननु पशुनोपलक्षितं द्रव्यं पशुं विशास्तीत्यादिधर्म्मविधीनां विषयो भविष्यत्यत आह * तदुपलक्षितं त्विति * द्रव्यरूपताया द्रव्यत्वप्रतिपादनं विना प्रतिपादयितुं शक्तेस्तदेव प्रतिपाद्यं स्यात्तत्र च स एव दोष इत्यर्थः । ननु द्रव्यत्वप्रतिपादनद्वाराप्याश्रयोपलक्षणोपपत्तेर्नामूर्त्तत्वदोषापत्तिरित्याशङ्क्याह * आश्रयेति * ननु पशुत्वेन स्वाश्रयोपलक्षणाद्वाक्छलमात्रेण द्रव्यत्ववदाश्रयपक्षदोषात्तत्वनिर्णायफलवादेन युक्तमित्याशङ्क्य पशुत्वाश्रयमात्रोपलक्षणे तस्य पश्वाकृतितोऽन्यत्वेनानिरूपणादाकृतेरेव बलाद्धर्माविषयत्वापत्तेराश्रयविशेषस्योपलक्षणं वाच्यं तत्त्वव्याप्ते न सम्भवतीत्याह * विशेषस्त्विति * परानभ्युपगतत्वादनाशङ्क्यत्वाच्च द्रव्यत्वस्येति दृष्टान्ततया व्याख्येयम् । अगम्यो ज्ञातुमशक्य इत्यर्थः । आगमगम्य इति पाठस्त्वव्यापकत्वेन लक्षयितुं शक्यत्वाद्यदि परमागमगम्यः स्यान्न चासवस्तीत्युपहासार्थत्वेन व्याख्येयः । ननु निर्विशेषसामान्यानुपपत्तेः कस्य चिद्विशेषस्यावसायाद्धर्म्मविधिविषयत्वं भविष्यत्यत आह * न वेति * प्रत्येकरूपेण निर्द्धारितरूपेणानवगतं विधिना न सम्बन्ध्यतइत्यर्थः । ननु पशुत्वाश्रयो यो विशेष इत्येवं निर्द्धारणाद्विधिविषयतोपपत्स्यतइत्याशङ्क्याह * न चेति * पशुत्वाश्रयाणामनेकत्वात्सर्वेषां चोपादानाशक्तेरयं वोपादेयो ऽयं वेति सन्देहानिवृत्तेर्न निर्धारणोपपत्तिरित्याशयः । ननु सामान्यमात्रे पर्यवसिते ऽपि शास्त्रे ऽनुष्ठानवेलायां विशसनादेस्तत्रासम्भवात्तदाश्रयविशेषे प्रत्यक्षोपनयनेन निर्द्धारिते ऽनुष्ठानं भविष्यतीत्याशङ्क्याह * न चेति * यस्मादन्यत्रोक्तो धर्म्मस्तत्रासम्भवमात्रेणान्यत्र न कार्यतया शास्त्रेणानुज्ञातस्तस्मान्न सामान्ये कृतो विहितो विशेषेषु कर्त्तुं युक्त इत्यर्थः । किं च प्रत्यक्षैकसमधिगम्यस्यासाधारणस्य शब्दव्यवहाराविषयत्वाच्छुक्लादिरूपो विशेषो वाक्यस्तस्य चामूर्त्तत्वात्पशुत्ववदेव विधिविषयत्वासम्भव इत्याह * विशेषा इति * उपसंहरति * तस्मादिति * अत्यन्तव्यतिरेकपक्षे च गौः शुक्ल इति सामानाधिकरण्यं पशुनेति लिङ्गकारकसंख्यान्वयश्च लक्षणया स्यात्सा च लोके मुख्यत्वप्रसिद्धेरयुक्तेत्याह * सामानाधिकरण्यादि चेति * ननु यदि पशुं विशास्तीत्यादावन्यत्सव्यतिरेकपक्षे धर्म्मविधिविषयत्वयोग्या व्यक्तिर्न प्रतीयते कथं तर्हि भाष्यकृताकृतिर्व्यक्त्या नित्यसम्बन्धा सम्बन्धिन्यां च तस्यामवगतायां सम्बन्ध्यन्तरमवगम्यतइति व्यतिरेकमभ्युपगम्य

२६०।२

तदेतदात्मप्रत्यक्षं शब्द उच्चरिते व्यक्तिः प्रतीयतइति वदताकृतिवाचिशब्दोच्चारणे व्यक्तिप्रतीतिरुक्तेत्याशङ्क्याह * भाष्येति * व्यतिरेकाभ्युपगमे ऽनया व्यक्तेर्गतिः प्रतीतिरुक्ता साश्रयत्वमात्रेण न विशेषरूपेण न हि विशेषरूपा व्यक्तिः शब्दात्प्रतीयतइत्यर्थः । अभ्युपगमशब्देन परमताभ्युपगममात्रेण व्यतिरेको ऽभिहितो न स्वमताभिप्रायेणेति सूचितम् । ननु व्यतिरेकस्यानभिमतत्वे थो ऽर्थ. सामान्यस्य विशेषाणां स्वाश्रयः सा व्यक्तिरित्याश्रयाश्रयिभावोक्तिर्न युज्येतेत्याशङ्क्याह * यो ऽपीति * नन्वाकृतिः प्रतीता सती प्रोक्षणाश्रयं विशेक्ष्यतीति भाष्याद्विशेषलक्षणप्रतीतेः कथमाश्रयमात्रगतिरुक्तेत्युक्तमित्याशङ्क्याह * सामान्याच्चेति * सामान्याद्विशेषस्य लक्षणं यद्भाष्यकृतोक्तं तत्राश्रयितव्यम् आश्रयणमादरणं न कर्त्तव्यमिति भावे कृत्यं व्युत्पाद्य व्याख्येयम् । लक्षणानाश्रयितव्येति पाठे सा ऽनादर्त्तव्या आक्षेपमात्रस्य भावाद्विशेषस्य त्वाक्षेप्यस्य गम्यस्याव्यभिचारिलिङ्गाभावेनाभावादित्यर्थः । यद्वा यच्छब्द उच्चरिते व्यक्तिः प्रतीयतइत्ययं प्रपञ्चो न व्यक्तिप्रतीतिसद्भावविषयः किं तु किंशब्दादाकृतेर्वैत्येतद्विचारविषयत्वेन यथा सिद्धव्यक्तिः प्रतीत्यनुवादो ऽयमित्याह *अथ वेति * प्रसङ्गादादितः सो ऽन्ययव्यतिरेकाभ्यामिति भाष्यं व्याचष्टे *अन्वयेति * शब्दव्यतिरेके ऽप्याकृत्यन्वयं व्यक्तिप्रत्ययान्वयप्रतिपादनार्थमन्तरेणापीति भाव्यमुदाहरणानिष्ठतया[1] व्याचष्टे * यो हीति * आकाङ्क्षाशब्देन निर्विशेषसामान्ययोगात् कश्चिदत्र तीक्ष्णमन्दादिरग्निर्विशेषः स्यादिति प्रमाणतो विशेषनिर्धारणाकाङ्क्षा भवतीत्येवम्परत्वेनाबुद्ध्यैवासौ व्यक्तिमिति भाष्यं व्याख्यातं शब्दान्वये ऽप्याकृतिव्यतिरेके व्यक्तिप्रत्ययव्यतिरेकप्रतिपादनार्थं यस्त्विति भाष्यं मनो वै यग्न्यो च्छब्दार्थसम्बन्धात्स्मृतौ सहकार्यभावाच्छब्दस्यापि व्यतिरेकापत्तेः स्मृतौ वा मनो वै यग्न्याभावादाकृतेरप्यन्वयापत्तेरयुक्तमाशङ्क्य द्वेधा व्याचष्टे * मानसादिति * निष्कृष्टाकृतिवाचित्वनिश्चयात्सामर्थ्यात्मकजाड्यरूपेणापचारेण सम्बन्धस्मृताव याकृत्यप्रतीतिः शीघ्राप्रतीतिर्वा विवक्षितेति भावः । ननु यदि गोशब्दात्स्वतन्त्राकृतिः प्रतीयते ततः केन हेतुना गोशब्दस्य शाबलेयादिशब्दसामानाधिकरण्यं प्रतीयते न गोत्वशब्दस्येत्याशङ्क्ते * केनेति * गोत्वमित्यत्र प्रातिपदिकवाच्यया जातेर्भावप्रत्ययेन व्यतिरेकांशस्य विवक्षितत्वात्सामानाधिकरण्याप्रतीतिः । गोरित्यत्रान्वयव्यतिरेकांशस्य विवक्षितत्वात्सामानाधिकरण्य-

---

१ चत्वायुदं प्रतिभाति ।

प्रतीतिरिति विशेषहेतुमाह * व्यतिरेकांशस्येति * ननु भावप्रत्ययेन व्यतिरेकांशस्य विवक्षायां गोत्ववाँश्छाबलेय इत्यपि सामानाधिकरण्यं न स्यादित्यशङ्क्याह *गोत्ववानिति * यद्यप्यत्र स्फुटो व्यतिरेको विवक्षितस्तथापि प्रकृतिप्रत्ययविभागोपपत्तेर्मतुप्प्रत्ययेन जातिमदभिधानात्तद्वाचिना शाबलेयादिशब्दस्य सामाधिकरण्यं युक्तमिति भावः । गोत्ववाचिनि स्फुटमितिपाठे स्फुटमिति क्रियाविशेषणं स्फुटं निष्कृष्टत्वेन गोत्ववाचिनि गोत्वशब्दे यत्र परतो मतुप्प्रत्ययो भवति तत्र तेन जातिमदभिधानमित्यर्थः । ननु मतुप्प्रत्ययेनापि व्यक्त्यभिधाने व्यक्त्यभिधानपक्षोक्ताः सम्बन्धानाख्यातादयो दोषाः प्रसज्येरन्नित्याशङ्क्याह * सामान्यस्य वेति * जातिमदभिधाने प्रमेयान्तर्गतत्वेन व्यावर्त्तकत्वाज्जातेर्विशेषणत्वे ऽपि विशिष्टवाचिना प्रत्ययेनानुपादानादुपलक्षणत्वोक्तिः । ननु गौरित्यत्राव्यतिरेकांशविवक्षायां जातिव्यक्त्योरभेदात् व्यक्तेर्वा गोशब्दो वाचको जातेर्वेति चिन्ता न युज्येतेत्याशङ्क्याह * भेदानामिति * अयं विचार्यत्वेन प्रकृतो गोशब्दः पक्षद्वये भेदानां व्यक्तीनामेव वाचकः । सामानाधिकरण्याद्यन्यथानुपपत्तेरिष्यते । स्वरूपेण व्यक्तिर्वाच्या नान्यात्मना वेत्यतावांस्तु विचारार्थः । व्यक्तिवाचित्वे ऽपि व्यक्त्यन्तरे प्रयोगोपपादनार्थम् * सर्वेषामित्युक्तम् * नन्वेवं सत्यानन्त्यात्सम्बन्धग्रहणानुपपत्तिरित्याशङ्क्य * प्रत्येकमित्युक्तम् * समुदितानां वाच्यत्वे सम्बन्धग्रहणासम्भवः स्यान्नान्योन्यनिरपेक्षाणां वाच्यत्वे जात्यात्मना चैकेन नित्येन रूपेण वाच्यत्वान्न शक्त्यानन्त्याद्यापत्तिरिति भावः । ननु गोशब्दोच्चारणे व्यक्तिविशेषानिर्धारणान्न व्यक्तेर्वाच्यत्वं युक्तमित्याशङ्क्याह * यस्त्विति * व्रीहीन्प्रोक्षतीत्यादावुद्दिश्यमानेषु व्रीह्यादिषु प्रकृतापूर्वसाधनव्यक्तिविशेषनिर्णयान्न सन्देहाशङ्का व्रीहिभिर्यजेतेत्यादावुपादीयमानत्वे ऽप्यन्यजातीयव्यक्तिभ्यो व्रीहिजातीयानां व्यावृत्तिप्रतीतेर्व्रीहिजातीयैव व्यक्तिरित्यस्यैव निर्णयः । सर्वासां तूपादानायोगात्कियतीनामुपादेयतेति संख्याश्रयमात्ररूपसन्देहो न व्यक्तिरूप इत्यर्थः । अधिकरणोपक्रमे जातिशब्दा एवात्र विद्यन्तइति यदुक्तम् । तत्परमतेनेति द्योतयितुं तस्माद् गौरश्व इत्येवमादय इत्युपसंहारभाष्यं स्वमतेन नामख्यातरूपद्विविधपदविषयत्वेन व्याचष्टे * गवादीति * गुणक्रियाशब्दोपसंग्रहार्थः सर्वशब्दः विचारप्रयोजनमाह*प्रयोजनमिति * पूर्वपक्षविशेषणसामर्थ्यात् सिद्धान्ते बाध इत्युक्तं भवति वर्णकान्तरत्वाभावे ऽपि पूर्वव्याख्याप्रकारे केन चिद्व्याक्षेपदोषेणाप्रसन्नाभिधानाच्छु-

ष्यक्लेशापत्तेः । सुखप्रतिपत्त्यर्थं प्रकारान्तरमारभते * एवं वेति * प्रासङ्गिकत्वेन तावत्सङ्गतिमाह * गौरिति * विचारविषयं बोधयति * चतुर्विध इति * संशयोत्पत्तेरित्यनेन यावकादिद्रव्यशब्दानां देवदत्तादियदृच्छाशब्दानां सर्वादीनां च सर्वनामशब्दानां व्यक्तिवाचित्वेन निश्चयात्संशयानुत्पत्तेर्निपातोपसर्गवद्विचारविषयत्वमस्तीति सूचितं निपातोपसर्गयोर्जातिव्यक्तिवाचित्वसंशयानुत्पत्तौ हेतुमाह * तयोरिति* अभ्युपगम्यापि वाचकत्वमन्वित्यादिपूपसर्गेषु २६१।२
पश्चादित्यादिषु च निपातेषु पदान्तरान्वयात् पूर्वं कस्य चिद्वार्थस्याप्रतीतेः पदान्तरान्वये च विशेषस्यैव प्रतीतेः । सन्देहानुत्पत्तिमाह * वाचकत्वे ऽपीति * पाश्चात्यशब्दान्तर्गतः पश्चाच्छब्दो ऽत्रोदाहरणं संशयेन ज्ञाप्यते न विषयीक्रियतइत्यर्थ, । एतदेव विवृणोति * यदीति * ननु पौनरुक्त्यापत्तेर्नेहाख्यातं विचार्यमित्याशङ्क्ते * आख्यातस्यापीति * ननु द्वितीयाध्यायाद्ये ऽधिकरणे द्रव्यादिशब्देभ्यो ऽपूर्वं भावशब्देभ्यो वेति विचारान्नाख्यातार्थविचारणेत्याशङ्क्याह * कः पुनरिति * अन्यार्थे ऽप्यधिकरणप्रसङ्गाद्भाष्यकृताख्यातार्थनिरूपणात्पौनरुक्त्यं भवतीत्याशयः । तत्र प्रत्ययार्थचिन्तेव प्रकृत्यर्थचिन्तेति परिहरति*प्रत्ययार्थस्येति * आशयं तु प्रत्ययार्थविचारे पौनरुक्त्यं परिहर्त्तुमशक्नुवतां परिहारे इत्यपरितोषादन्यथा स्वमतेन परिहरति * प्रकृत्यर्थेति * प्रत्ययार्थस्य प्रकृत्यर्थाद्विवेकायेह सिद्ध एव प्रकृत्यर्थस्तत्र वक्ष्यतइत्यर्थः । ते च यागदानहोमसम्बद्धा इत्यादिना प्रकृत्यर्थस्य यागस्य भाष्यकृता स्पष्टीकृतत्वात् * भाष्यकारेणेत्युक्तम् * ननु सूत्रकारानुक्तिसूचनार्थं तेनापि कर्म्मशब्दपदेन प्रकृत्यर्थस्योक्तत्वात् अयमपि विषयभेदं वक्तुमशक्नुवतां परिहार इत्यपरितोषात्स्वमतेनान्यथा परिहरति * युज्यार्थे ऽपि वेति * सामान्यविशेषयोर्मध्ये इति निर्धारणे षष्ठी प्राप्तेतीहावसरप्राप्त्युक्त्या तत्रासङ्गतत्वात्सामान्यविशेषविचाराभावः सूचितः । प्रासङ्गिककथया चैतत्पौनरुक्त्यं परिहृतं प्रधानचिन्तया तु पौनरुक्त्यशङ्कैव नास्तीत्याह * अपूर्वमिति * अतो ऽत्र युक्ता द्विविधस्य पदस्यार्थचिन्तेत्युपसंहरति * नामेति * गोसदृशो गवयः इति जातौ गोशब्दप्रयोगाद्गौरानय इति च व्यक्तौ प्रयोगान्न गोशब्दोच्चारणाच्चोभयप्रतीतेर्वृद्धव्यवहारस्योभयत्र तुल्यत्वं शब्दलक्षणे महाभाष्यकारेण किं पुनराकृतिः पदार्थ आहो स्विद् द्रव्यमिति पृष्ट्वोभयमित्याहेत्याकृतिपक्षवद्व्यक्तिपक्षस्याप्यभिधानान्न शास्त्रस्याप्युभयत्र तुल्यतेति द्वेधा सन्देहहेतुमाह * प्रयोगस्येति *

भाष्योक्तसन्देहहेतुनिरासार्थमस्माद्धेतुद्वयादेव * संशयो नः प्र-
२६२।१ तिभातीत्युक्तम् * ननु यदि सामान्यप्रत्ययाद्वचक्तौ च क्रियासम्भ-
वात्सन्देहः स्यात्ततः प्रतीयमानाया आकृतेरक्रियार्थत्वात् क्रिया-
र्थायाश्च व्यक्तेरप्रतीतेर्वाक्यार्थौपयिकपदार्थासम्भवाद्वचक्तिवाच्य-
त्वपूर्वपक्षस्याकृतिवाच्यत्वासम्भवप्रतिपादनमात्रपरत्वात्पूर्वपक्षे वे-
दाप्रामाण्यं सिद्धान्ते चाकृतेरपि क्रियार्थत्वाद्वाक्यार्थौपयिक-
त्वोपपत्तेर्वेदप्रामाण्यमिति प्रामाण्याप्रामाण्यफलत्वात्प्रामाण्यलक्ष-
णासङ्गतेयं चिन्ता स्यात् व्यक्त्याकृत्योस्तु प्रतीतिप्रयोगतुल्यत्वे प-
क्षद्वये ऽपि प्रामाण्याविशेषात्कथं तल्लक्षणसङ्गतिः । प्रतीतिप्रयो-
गतुल्यत्वेनैव च व्यक्तिवाच्यत्वस्मृतेरपि समूलत्वोपपत्तेरेतत्पाद-
गतेन स्मृतिमूलविकारेणापि कथं सङ्गतिः स्यादित्याशङ्कते * क-
थमिति * पादानामैकार्थ्यनियमाभावान्नावश्यं सर्वत्र पादसङ्गति-
रपेक्षणीया एकप्रकरणगतानां त्वधिकरणानां प्रकरणप्रातिपाद्यैका-
र्थ्यान्वयाय प्रकरणसङ्गतिरवश्यापेक्षणीयेति मत्वा * प्रकृते-
न वेत्युक्तम् *स्मृतिमूलविचारो ह्यस्मिन्पादे प्रकरणार्थः तथा हि।

स्मृतीनां श्रुतिमूलत्वं विरोधे भ्रान्तिमूलता ।
उक्तोपवीतस्मृत्यादावविरोधं निरूप्य च ॥
आर्यैर्विरोधे म्लेच्छानां शब्दार्थविषयस्मृतेः ।
भ्रान्तिर्मूलमसत्त्वे ऽस्य पिकादौ लोकमूलता ॥
मूलापेक्षां च कल्पादेरव्यवस्थितगोचरम् ।

होलाकादिस्मृतेर्मूलमुक्तं शब्दस्मृतेरपि तत्प्रामाण्यमूल-
त्वप्रासङ्गिकत्वेनास्याश्चिन्तायाः पूर्वचिन्ताया लक्षणप्रकरणसङ्ग-
त्यैवास्या अपि तदूद्वारेण सङ्गतिलाभान्न पृथक्सङ्गत्यपेक्षेति
परिहरति * द्वयमिति * ननु यदि कस्मिन्नर्थे गोशब्दस्य साधुते-
त्यनेन प्रसङ्गेनास्य विचारस्यावान्तरस्तुतेरर्थनिरपेक्षस्य साधुत्वस्य
निरूपयितुमशक्यत्वाद्वचक्त्याकृतिचिन्तैव पूर्वं प्रसज्येतेत्याशङ्कते
* वक्तव्य इति * सास्नादिना शब्दस्य साधुवाच्ये इत्येतावति ज्ञाते
व्यक्त्याकृतिविवेकाज्ञाने ऽपि साधुत्वं निरूपयितुं शक्यमिति परिह-
रति * अनिश्चिते ऽपीति * एतदेव विवृणोति * वाच्येति *
पूर्वापवादत्वेन चास्य सङ्गतिरिति परिहारान्तरसापेक्षत्वे ऽपि किं
विचार्यतइत्यपेक्षायामाह * व्यक्तिरिति * अस्मिंश्च पक्षे त्रिवि-
धापि सङ्गतिः साक्षादेवेत्याह * स्मृतेरिति * प्रयोजनाभावेना-
धिकरणानारम्भमाशङ्कते * ननु चेति * शब्दार्थशब्देनाकृतिर्विव-
क्षिता प्रोक्षणादेः क्रिया ब्रह्महत्यादेश्चाक्रिया पक्षद्वये ऽप्याकृतावस-

म्भवाद्व्यक्तावेवेत्यर्थः । वेदे प्रयोजनाभावे ऽपि लोके प्रयोजनं भविष्यतीति तावत्परिहरति * यद्यपीति * किं फलमित्यपेक्षायामाह * व्यक्तीति * लोकव्यवहारस्य प्रमाणान्तरानुसारित्वात्तदर्थं शब्दार्थतत्त्वचिन्तानर्थक्यापत्तेर्वेदार्थनिर्णयानौपयिकत्वाच्च शास्त्रसङ्गत्यभावापत्तेरपरितोषात्स्वमतेन प्रयोजनमाह * वेदे ऽपि चेति* हेत्वपेक्षायामुदाहरणद्वयमाह * व्रीहीति * भेदो विशेषः आद्योदाहरणे विशेषं विवृणोति * प्रोक्षणमिति * सन्निधिरूपं क्रमं बाधि- २६३।२
त्वेत्यर्थः । द्वितीयोदाहरणं विवृणोति * एवमिति * यदाहवनीये जुहोति पदे जुहोतीत्यादिसामान्यविशेषशास्त्रयोः पूर्वपक्षे विकल्पः सिद्धान्ते सामान्यशास्त्रस्य विशेषशास्त्रेण बाध इत्याद्यपि प्रयोजनमित्याह * सोपपत्तिकमिति * उपसंहरति * कर्त्तव्येति * पौनरुक्त्यमाशङ्कते * नन्विति * गौरिति शब्द आदिर्यस्य तस्य गौरित्यस्य शब्दस्य को ऽर्थ इत्यस्य भाष्यस्य तस्मिन्निति यर्थः आदचपादस्थे भाष्ये विचारितमित्यर्थः । तत्र प्रतिज्ञायामिहानुपपत्तिरिति तावत्परिहरति * आकृतेरिति * यथा चाकृतिशब्दार्थस्तथाकृतिस्तु क्रियार्थत्वादित्यत्र निपुणतरमुपपादयिष्याम इत्याकृतिवादान्ते भाष्यकृताप्येवमेवोदितमित्याह * यथा चेति * विषयप्रदर्शनार्थत्वात्प्रतिज्ञाया हेतुं विनानर्थक्यापत्तेरिहापि चाकृतिः शब्दार्थ इति प्रतिज्ञायाः पौनरुक्त्यापत्तेरेतत्परिहारेष्वपरितोषात्स्वमतेनान्यथा परिहरति * यद्वेति * नन्वेवं सत्याकृतेः शब्दार्थत्वोक्तिस्तत्र त्या कथमित्याशङ्क्य सद्भावप्रतिपादनायैव प्रकृतानुपयोगप्रसङ्गान्न साक्षाद्वाच्यत्वोपक्रमस्तत्रेत्याह * या त्विति * चिन्ताविषयत्वेन नोक्तेत्यर्थः । प्रतिज्ञामात्रेणाकृतिवाच्यत्वासिद्धेरनभिमतमपि परिहारान्तरं विभवार्थमाह * उक्ते वापीति * व्यक्त्याकृतिचिन्तामुपक्रम्य भाष्यकृता लौकिकवैदिकशब्दार्थभेदाभेदचिन्ता कृता तस्याः प्रकृतोपोद्घातार्थत्वेन सङ्गतिमाह * एतदिति * ननु संख्याभावादित्यनेन न्यायेनाभेदस्य सिद्धत्वात्पुनः को ऽयं विचारः स्यादित्याशङ्क्य लौकिकशब्दाभेदे ऽपि वैदिकानां रूपभेदाद्व्यपदेशभेदाच्च भेदशङ्कोपपत्तेस्तन्निराकरणार्थो ऽयमारम्भ इति संशय्यते अस्मिन्नित्यधिकरणव्युत्पत्त्या संशयविपर्ययप्रतिपादकेन * संशयशब्देनोक्तम् । उपोद्घातत्वमेव विवृणोति * एकत्वे सतीति * लौकिकवैदिकयोः शब्दयोर्वाच्ययोश्चैकत्वे सति लोकव्युत्पन्नाद्गौदिकाद् गोशब्दाद्व्यक्त्याकृतिरूपत्वादिपदार्थप्रत्ययोत्पत्तौ को ऽर्थो वाच्यः को वा गम्य इति सन्देहाद्विचारः कार्यः भेदे व्युत्पत्त्यभावेन वैदिकाच्छ-

ब्दादर्थप्रतीतेः सन्देहाभावान्न चिन्तावसर इत्यर्थः । ननु लोके सन्देहसम्भवाच्चिन्ता भविष्यतीत्याशङ्क्याह * शब्दार्थेनेति * वेदे तु शब्दविषये ऽर्थविषये च य एव लौकिकः शब्दो ऽर्थश्च स एवायमिति प्रत्यभिज्ञाने सति लोकव्युत्पन्नाद्वैदिकाच्छब्दादर्थप्रतीतेः को ऽर्थो वाच्यः को वा गम्य इति विवेक्तुं शक्यम् । अलौकिके तु वैदिके शब्दे ऽर्थे वाचकरूपाज्ञानाद्वाच्यविषयः सन्देह एव न स्यादिति
२६४।२ पूर्वोक्तमेव विवृणोति * वेदे त्विति * उपसंहरति * तेनेति * संशयशब्दसूचितं पौनरुक्त्यपरिहारं वक्तुमाशङ्कते * तावत्संख्येति * न हेत्वन्तराभिधित्सया पुनरारम्भस्तस्यानुक्तत्वादित्याह * अभेदेति * ननु न प्रयोगचोदनाभावादिति हेत्वन्तरमप्युक्तमित्याशङ्क्याह * अन्यस्त्विति* शङ्कामुपसंहरति *तेनेति* परिहरति*लौकिकेष्वेवेति*ननु वैदिकेषु काधिका शङ्कित्यपेक्षायामाह*व्यपदेशादीति* रूपभेदो लिङ्गं चादिशब्देनोपात्तम् । अर्थभेदाभेदचिन्तायास्तु पौनरुक्त्याशङ्कैव नास्तीत्याह*एकत्वे ऽपि चेति*न च शब्दैक्यमात्रेण प्रकृतचिन्तासिद्धिर्येनार्थैक्यमचिन्त्यं स्यादित्याह * अर्थेति * शब्दाभेदे सत्यपि यद्यर्थाभेदः स्यात्ततो व्यक्त्याकृत्योर्द्वयोर्मध्ये कस्य वाच्यतेतीयं चिन्ता घटते न शब्दैक्यमात्रेणेत्यर्थः । सन्देहहेतुमाह * व्यपदेशादीति * उभयविषयप्रतिज्ञापूर्वकं शब्दभेदाभावहेतूनाह * किं प्राप्तमिति * आख्यायाः शब्दस्य यल्लक्षणं तस्य भाषायां छन्दसीति चोपबन्धेन भिन्नत्वादित्यर्थः । अर्थभे-
२६५।२ दे हेतुमाह * अश्वबालादीति * नन्वग्निर्वृत्राणीति भाष्ये वृत्रहननादिक्रियाभेदो हेतुः प्रतीयते स किमित्युपेक्षित इत्यपेक्षायामर्थभेदे हेतुत्वं तावन्न सम्भवतीत्याह * अग्न्यादीनां चेति * नन्वग्निस्वरूपाभेदे ऽपि वृत्रहन्तृत्वविशिष्टस्य वैदिकाग्निपदवाच्यत्वादर्थभेदो भविष्यतीत्याशङ्क्याह * हन्तीति * वृत्रहन्तृत्ववैशिष्ट्यस्य वाक्यार्थत्वेनाशब्दवाच्यत्वान्न वैदिकाग्निशब्दवाच्यता युक्तेत्यर्थः । हन्तृत्वे च प्रमाणाभावान्न तेनापि रूपेणान्यत्वं युक्तमित्याह * हननमिति * न च यो वृत्रहन्ता सो ऽग्निरिति वचनव्यक्त्यार्थान्यत्वसिद्धिर्वृत्रशब्दार्थस्य जङ्घनादिति च क्रियाशब्दस्यालौकिकत्वेनैवंविधवचनव्यक्त्यसम्भवादित्याह * अपूर्व इति * देवतायाश्च विग्रहाभावस्य नवमे वक्ष्यमाणत्वेन क्रियया वृत्रहननायोगान्मन्त्रस्य स्तुतिमात्रार्थत्वावगतेर्न वृत्रहन्तृत्वानुवादेनाग्निशब्दवाच्यत्वविधिर्युक्त इत्याह * स्तुतीति * कथमक्रियतेत्यपेक्षायाम् * भाष्योक्तैरित्युक्तम् * कानि तानि वाक्यानीत्यपेक्षायां नावमिकदे-

धताधिकरणोक्त*युक्तिपरामर्शार्थमितीत्युक्तम्* अतो ऽश्वबालादि-
शब्दानां स्पष्टार्थान्तरदर्शनादित्येषैवार्थान्यत्वे युक्तिरित्युपसंहरति *
तेनेति*शब्दभेदहेतुत्वं तु क्रियाभेदहेतुत्वे ऽप्यनाशङ्क्यमेवेत्याह*यच्चे-
ति*अथ भेदकारितो ऽपि शब्दभेदो न भवति किमुत तद्गुणभेदका-
रित इत्यर्थः । भाष्यस्य तर्हि का गतिरित्यपेक्षायां भाष्योक्तं रूपा-
न्यत्वं स्वरादिभेदाभिप्रायं व्याख्येयमित्याह * तेनेति * पूर्वपक्षो-
पसंहारपूर्वकं सिद्धान्तप्रतिज्ञां करोति * तस्मादिति * प्रतिज्ञा-
क्षिप्तमेव तावद्धेतुमाह * वेदस्येवेति * प्रसज्यतामित्येवं वादिनम्
* प्रति प्रसज्येतेत्युक्तम् * प्रयोगचोदनाभावादिति सौत्रं हेतुं प्र-
योगस्य चोदनायाश्चाभावादित्येवं व्याचष्टे * प्रयोगस्येति * चो-
दनायाः कथमभाव इत्यपेक्षायाम् * प्रत्ययार्थस्येत्युक्तम् * अर्था- २६६।१
न्तरे शब्दप्रयोगविषयायाश्चोदनाया विधेरभावादित्येवमन्यथा व्या-
चष्टे * अर्थान्तरे चेति * कस्माद्धेदेनार्थान्तरे शब्दप्रयोगो न वि-
धीयते इत्यपेक्षायां गुणाद्वाप्यभिधानं स्यात् सम्बन्धस्य शास्त्रहेतु-
त्वादित्यैन्द्र्यधिकरणसूत्रावयवो ऽर्थतः पठितः वचनान्वयार्थमैन्द्री
स्यादिति सूत्रेणैन्द्र्या गार्हपत्यमुपतिष्ठतइति श्रुतिबलेनैन्द्र्या गार्हप-
त्योपस्थानाङ्गत्वे विहिते श्रुत्याप्यशक्तविनियोगासम्भवात्कथमिन्द्र-
शब्देन गार्हपत्याभिधानमित्यपेक्षायां गुणयोगेनेति पूर्वावयवेनोक्त-
म् । नन्विन्द्रशब्दस्य गार्हपत्याभिधानशक्तिप्रदर्शनार्थमेवैतद्वचनं क-
स्मान्न भवतीत्याशङ्क्य शब्दार्थसम्बन्धस्य वृद्धव्यवहारावसेयत्वेन
शास्त्रहेतुकत्वाभावादित्यनेनोक्तम् । अविभागादिति सूत्रावयवो
न तेषामेषां विभागमुपलभामहइति भाष्येण शब्दप्रत्यभिज्ञाभिधाना-
र्थत्वेन तांश्चार्थानवगच्छाम इत्यनेन चार्थप्रत्यभिधानार्थत्वेन व्या-
ख्यातः । तदुभयमपि यथाक्रममनुसन्धत्ते * किं चेति * शब्द-
लक्षणाविभागादित्येवं स्वयमन्यथा व्याचष्टे * लक्षणस्येति * ननु
कातिपयलक्षणाविभागे ऽपि भाषायां छन्दसीत्युपबन्धेनोक्तानां ल-
क्षणानां भेदात्कथं सर्वशब्दैक्यसिद्धिरित्याशङ्क्याह * सर्वथेति *
भिन्नलक्षणकानां शब्दानामश्वबालाद्यर्थानां च भेदस्य सिद्धान्तिना
ऽपीष्टत्वादितरशब्दार्थानामैक्यं साध्यं तेषां चोक्तैर्हेतुभिर्न भेदः श-
क्यो वक्तुमित्यर्थः । याज्ञिकानां च गवादिविधौ लौकिकैरेव सा-
स्नादिमदाद्यर्थैर्व्यवहारान्मीमांसायां च लोकव्युत्पत्त्यनुसारेण वेदा-
र्थनिर्णयादुभयानुग्रहार्थं लौकिकवैदिकशब्दार्थानामैक्यमाश्रयणीय-
मित्याह * एकत्वेति * मीमांसा चानुगृह्यतइत्यनुषङ्गः । अवि-
भागशब्देनोक्तं प्रत्यभिज्ञानमेव पूर्वपक्षोक्तानां हेतूनां कालात्ययाप-

दिष्टत्वलक्षणदोषाभिधानार्थत्वेन व्याचष्टे * व्यपदेशादीति * आदिशब्देनाख्यालक्षणस्वरोपादानम् । ननु व्यपदेशादिभेदेन तदवच्छिन्नात्मनां भेदस्यावश्यम्भावात्कथं न भेदानुमानामित्याशङ्क्यान्यरूपतेत्युक्तम् रूपिणः स्वरूपतोऽन्यता रूपान्यता अत्र भेदानुभेदविचारे यो व्यपदेशादिभेदैरैक्यरूपतालक्षणो भेदोऽनुमीयते स तु न युक्तः वैदिकशब्दे प्रत्यक्षप्रत्यभिज्ञानादित्यर्थः । भेदादेरिति पाठे द्वितीयेनादिशब्देन लोपागमव्यत्ययोपादानम् । अन्यनिबन्धनत्वादपि व्यपदेशभेदो रूपभेदो वा न भेदानुमानायालमित्याह * व्यपदेशादीति * नन्वेवमपि पदावधारणोपायत्वट्कृतिनिछन्दतिसूत्रयः[1] क्रमन्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीत्यनेन न्यायेनाचारादिभेदेन च भेदो भविष्यतीत्याशङ्क्य आह * स्वरादयश्चेति * अभिधानाङ्गभूतस्वरादिभेदो ऽभिधायकपदभेदहेतुत्वेन तत्रोक्तः अग्निर्वृत्राणि जङ्घनदित्यादिषु तु स्वरानियमस्य व्योमन्नित्यादिषु च वर्णलोपस्य देवास इत्यादिषु आगमस्यागृभ्णन्नित्यादिषु विकारस्य स्वाध्यायविध्यपेक्षितवेदत्वसिद्ध्यर्थं त्वदृष्टार्थोपयोगितयाभिधानाङ्गत्वाभावान्नाभिधायकभेदावधारणोपायतास्तीत्यर्थः । यत्तु स्वरुयूपादिस्पष्टभेदशब्दसाहचर्यं गवादिशब्दे भेदहेतुत्वेनोपन्यस्तं तन्निराकरणार्थं विभागशब्दोक्तशब्दप्रत्यभिज्ञानं योजयति * स्वर्वीति * अनध्यायादिधर्मभेदस्य शूद्रोच्चारणवर्जनस्य च वाचनिकत्वेनाप्युपपत्तेर्न भेदहेतुतेत्याह * वचनादिति * उच्चारणधर्मत्वादप्येषां न भेदहेतुतेत्याह * धर्मावीति * यस्त्वाश्वबालादिशब्दानां स्पष्टार्थान्तरदर्शनादगवादिशब्दानामपि भिन्नार्थतेत्युक्तं तन्निराकरणे ऽप्यविभागशब्दोक्तमर्थप्रत्यभिज्ञानं योजयति * अश्वबालादीति * वाक्यशेषात्मकवचनवशात्तत्रार्थभेदे जाते ऽपि प्रत्यभिज्ञायमानार्थेषु गवादिशब्देष्वर्थान्यत्वद्योतकत्वाभावान्नार्थान्यता युक्तेत्यर्थः । नन्विहाप्युत्तानवहनादियचनकारितो र्थभेदो भविष्यतीत्याशङ्क्याह *उत्तानानां चेति * उत्तानवहनासिद्धेस्तदनुवादेन गोशब्दवाच्यत्वविध्ययोगात्सर्वेषां च वैदिकानामन्यत्वे सम्बन्धज्ञानाभावेनैकस्यापि पदार्थस्याग्रहणाद्वाक्यार्थानवगतेर्नातो वाक्यादर्थान्यत्वावसाय इत्यर्थः । किमर्थं तर्ह्युत्तानवाक्यम् इत्यपेक्षायामाह * विधेरिति *
२६७।२ सिद्धान्तमुपसंहरति * तस्मादिति * प्रकृतविचारमनुसन्धत्ते * यद्वा चेति * अतो ऽधुना क्रियतइत्यध्याहारेण योज्यं पक्षान्तराणामप्यभिधानं प्रतिजानाति * बहव इति * अभिनवे पक्षे केन

---

१ चत्वारश्च इति० ।

चिदुपन्यस्ते निराकरणोपपत्त्या ज्ञानाच्छिष्याणां व्यामोहापत्तेस्तन्नि-वृत्त्यर्थं सर्वे ऽभिधेया इत्यर्थः । बहुपक्षप्रतिभाने कारणमाह * गौ-रिति * शब्दस्वरूपस्य प्रत्यक्षग्राह्यत्वेन तद्विषयाभिधानशक्तिकल्प-नानुपपत्तेर्नेव्यानभिधानो हिशब्दः कश्चित्कदा चनेति शून्यवादे बृ-हट्टीकायां स्वरूपाभिधानस्य निरस्तत्वाच्छब्दवाच्यत्वशङ्कानुपपत्ति * सूचनार्थं तइत्युक्तम् * सप्तवस्तुप्रतिभाने ऽपि कथं बहुपक्षप्रति-भानमित्याह * तेषामिति * पक्षानुद्दिशति * किं जातिरेवेति * जातिव्यक्त्योः सामानाधिकरण्यबुद्धिहेतुभूतस्य ।

आश्रयी येन भिन्नो ऽपि सम्बन्धेनाश्रये धियम् ।
स्वानुरूपां सदा कुर्यात्समवायः स कीर्त्यते ॥

इत्येवं लक्षणसमवायाख्यस्य सम्बन्धस्य जात्या सा-हाधाराधेयसम्बन्धसद्भावाज्जातिसम्बन्धयोः सच्छब्दवद्यः सम्ब-न्धः शब्दार्थ इत्यस्यापि पक्षस्योपपत्तेर्वस्तुगतस्य जात्या-ख्याया अनुवृत्ताकारस्य व्यावृत्ताकारस्य च व्यक्तित्वेनाभिप्रेतस्यै-व वस्तुगतत्वादेकदेशस्थवृक्षवद्यः समुदायस्तस्याकारद्वयाकारद्व-याधारे धर्म्मिभूते वस्तुनि प्रतीतेस्तदाश्रितया जात्या सहैकवस्तु-गतत्वादेव समुदायोपपत्तेः । सर्वत्राष्टपक्षीसम्भवः । यथा जातेर्व्य-क्त्यादिभिः षड्भिः सह प्रत्येकमष्टौ पक्षाः कृतास्तथा व्यक्त्यादेर-प्येकैकस्येतरैः सह कार्या इत्याह * एवमेकैकस्येति * ननु व्य-क्त्यादिभिः सह सम्प्रधारितया जात्या सह व्यक्त्यादेः सम्प्रधारणे पक्षभेदो नास्तीत्याशङ्क्य * उक्तवदित्युक्तम् * एकाद्वित्रिचतुःपञ्चष-ट्कैः सह विकल्पनेत्युक्तद्विकादिप्रकारभेदात्पक्षविवेक इत्याशयः । ततश्च व्यक्तिसम्बन्धयोर्व्यक्तिसमुदाययोर्व्यक्तिलिङ्गयोः व्यक्तिका-रकयोः व्यक्तिसंख्ययोः सम्बन्धसमुदाययोः सम्बन्धलिङ्गयोः सम्बन्धकारकयोः सम्बन्धसंख्ययोः समुदायलिङ्गयोः समुदाय-कारकयोः समुदायसंख्ययोर्लिङ्गकारकयोः लिङ्गसंख्ययोः कारक-संख्ययोः पञ्चदशाष्टपक्षीः पूर्वाभिः षड्भिः सहैकविंशतिं कृत्वा जातेर्व्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिस-ङ्ख्यासम्बन्धसमुदायसम्बन्धलिङ्गसम्बन्धकारकसम्बन्धसंख्यास-मुदायलिङ्गसमुदायकारकसमुदायसंख्यालिङ्गकारकलिङ्गसंख्याका-रकसंख्याद्विकैः पञ्चदश । व्यक्तेर्जातिसम्बन्धजातिसमुदाय-जातिलिङ्गजातिकारकजातिसंख्यासम्बन्धसमुदायसम्बन्धलिङ्गसंब-न्धकारकसम्बन्धसंख्यासमुदायलिङ्गसमुदायकारकसमुदायसंख्या-लिङ्गसंख्याकारकसंख्याद्विकैः पञ्चदशसम्बन्धस्य जातिव्यक्ति-

जातिसमुदायजातिलिङ्गजातिकारकजातिसंख्याव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिसंख्यासमुदायलिङ्गसमुदायकारकसमुदायसंख्यालिङ्गकारकालिङ्गसंख्याकारकसंख्याद्विकैः पञ्चदशसमुदायस्य जातिव्यक्तिजातिसम्बन्धजातिलिङ्गजातिकारकजातिसंख्याव्यक्तिसम्बन्धव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिसंख्यासम्बन्धलिङ्गसम्बन्धकारकसम्बन्धसंख्यालिङ्गकारकसंख्याद्विकैः पञ्चदश लिङ्गस्य जातिव्यक्तिजातिसम्बन्धजातिसमुदायजातिकारकजातिसंख्याव्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिकारकव्यक्तिसंख्यासम्बन्धसमुदायसम्बन्धकारकसम्बन्धसंख्यासमुदायकारकसमुदायसंख्याकारकसंख्यायुगलैः पञ्चदशकारकस्य जातिव्यक्तिजातिसम्बन्धजातिसमुदायजातिलिङ्गजातिसंख्याव्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिसंख्यासम्बन्धसमुदायलिङ्गसम्बन्धसख्यासमुदायलिङ्गसमुदायसंख्यालिङ्गसख्याद्विकैः पञ्चदश संख्याया जातिव्यक्तिजातिसम्बन्धजातिसमुदायजातिलिङ्गजातिकारकव्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकसम्बन्धसमुदायसम्बन्धलिङ्गसम्बन्धकारकसमुदायलिङ्गकारकाद्विकैः पञ्चदश जातेर्व्यक्तिसम्बन्धसमुदायव्यक्तिसमुदायलिङ्गकारकव्यक्तिकारकसंख्यासम्बन्धसमुदायलिङ्गसम्बन्धलिङ्गकारकसंख्याममुदायलिङ्गकारकसमुदायकारकसङ्ख्यालिङ्गकारकसङ्ख्यात्रिकैर्दश व्यक्तेर्जातिसम्बन्धसमुदायसङ्ख्याजातिसमुदायलिङ्गजातिलिङ्गकारकजातिकारकसङ्ख्यासम्बन्धसमुदायलिङ्गसम्बन्धलिङ्गकारकसम्बन्धकारकसंख्यासमुदायलिङ्गकारकसमुदायकारकसंख्यात्रिकैर्दश सम्बन्धस्य जातिव्यक्तिसमुदायजातिसमुदायलिङ्गजातिलिङ्गकारकजातिकारकसंख्याव्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गकारकव्यक्तिकारकसंख्यासमुदायलिङ्गकारकसमुदायकारकसंख्यालिङ्गकारकसंख्यात्रिकैर्दश । समुदायस्य जातिव्यक्तिसम्बन्धजातिसम्बन्धलिङ्गजातिलिङ्गकारकजातिकारकसंख्याव्यक्तिसम्बन्धलिङ्गव्यक्तिलिङ्गकारकव्यक्तिकारकसंख्यासम्बन्धलिङ्गकारकसम्बन्धकारकसंख्यात्रिकैर्दश,लिङ्गस्यःजातिव्यक्तिसम्बन्धजातिसम्बन्धसमुदायजातिसमुदायकारकजातिकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकव्यक्तिकारकसंख्यासम्बन्धसमुदायकारकसम्बन्धकारकसंख्यासमुदायकारकसंख्यात्रिकैर्दश कारकस्य जातिव्यक्तिसम्बन्धजातिसम्बन्धसमुदायजातिसमुदायलिङ्गजातिलिङ्गसंख्याव्यक्तिसम्बन्धसमुदायव्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गसंख्यासम्बन्धसमुदायलिङ्गकारकव्यक्तिसम्बन्धसमुदा-

यव्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गकारकसम्बन्धसमुदायलिङ्गसम्बन्धलिङ्गकारकसम्बन्धलिङ्गकारकसंख्यासमुदायलिङ्गकारकसंख्याचतुष्कैः षट् । व्यक्तेः जातिसम्बन्धसमुदायलिङ्गजातिसमुदायलिङ्गकारकजातिलिङ्गकारकसंख्यासम्बन्धसमुदायलिङ्गकारकसम्बन्धलिङ्गकारकसंख्यासमुदायलिङ्गकारकसंख्याचतुष्कैः षट् । सम्बन्धस्य जातिव्यक्तिसमुदायलिङ्गजातिसमुदायलिङ्गकारकजातिलिङ्गकारकसंख्याव्यक्तिसमुदायलिङ्गकारकव्यक्तिलिङ्गकारकसंख्यासमुदायलिङ्गकारकसंख्याचतुष्कैः षट् । समुदायस्य जातिव्यक्तिसम्बन्धलिङ्गजातिसम्बन्धलिङ्गकारकजातिव्यक्तिसम्बन्धसमुदायजातिसम्बन्धसमुदायकारकजातिसमुदायकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकव्यक्तिसमुदायकारकसंख्यासम्बन्धसमुदायकारकसंख्याचतुष्कैः षट् । कारकस्य जातिव्यक्तिसम्बन्धसमुदायजातिसम्बन्धसमुदायलिङ्गजातिसमुदायलिङ्गसंख्याव्यक्तिसम्बन्धसमुदायलिङ्गव्यक्तिसमुदायलिङ्गसंख्यासम्बन्धसमुदायलिङ्गसंख्याचतुष्कैः षट् । संख्याया जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसमुदायजातिसमुदायलिङ्गकारकव्यक्तिसम्बन्धसमुदायलिङ्गव्यक्तिसमुदायलिङ्गकारकसंख्यासमुदायलिङ्गकारकचतुष्कैः षट् । जातेः व्यक्तिसम्बन्धसमुदायलिङ्गकारकव्यक्तिसमुदायलिङ्गकारकसंख्यासम्बन्धसमुदायलिङ्गकारकसंख्यापञ्चकस्त्रिंशः । व्यक्तेर्जातिसम्बन्धसमुदायलिङ्गकारकजातिसमुदायलिङ्गकारकसंख्यासम्बन्धसमुदायलिङ्गकारकसंख्यापञ्चकैस्त्रिंशः । सम्बन्धस्य जातिव्यक्तिसमुदायलिङ्गकारकसंख्याव्यक्तिसमुदायलिङ्गकारकसंख्यापञ्चकैस्त्रिंशः । समुदायस्य जातिव्यक्तिसम्बन्धलिङ्गकारकजातिसम्बन्धलिङ्गकारकसङ्ख्याव्यक्तिसम्बन्धलिङ्गकारकसंख्यापञ्चकैस्त्रिंशः । लिङ्गस्य जातिव्यक्तिसम्बन्धसमुदायकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकजातिसम्बन्धसमुदायकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकसंख्यापञ्चकैस्त्रिंशः । कारकस्य जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसम्बन्धसमुदायलिङ्गसंख्याव्यक्तिसम्बन्धसमुदायलिङ्गसंख्यापञ्चकैस्त्रिंशः । संख्यायाः जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसम्बन्धसमुदायलिङ्गकारकव्यक्तिसम्बन्धसमुदायलिङ्गकारकपञ्चकैस्त्रिंशः। जातेर्व्यक्तिसम्बन्धसमुदायलिङ्गकारकसंख्याषट्केनैका व्यक्तेर्जातिसम्बन्धसमुदायलिङ्गकारकसंख्याषट्केनैका सम्बन्धस्य जातिव्यक्तिसमुदायलिङ्गकारकसंख्याषट्केनैका समुदायस्य जातिव्यक्तिसम्बन्धलिङ्गकारकसंख्याषट्केनैका लिङ्गस्य जातिव्यक्तिसम्बन्धस-

मुद्रायकारकषट्कैणैकेति पञ्चचत्वारिंशदधिकं शतद्वयमष्टपक्ष्यः पूर्वयैकविंशत्या षष्ट्यधिकं शतद्वयं कार्या इत्यर्थः । विपूर्वस्य यजेर्दधातिसमानार्थत्वाद्विपूर्वस्य दधातेः करोत्यर्थे प्रयोगदर्शनान्नियोक्तव्यशब्देन कार्य्यतोक्ता एवं चैतेषां षट्षष्ट्यधिकाष्टपक्षीशतद्वयगतानामष्टाविंशतिसहितशताधिकसहस्रद्वयसंख्याकानां पक्षाणां पूर्वप्रस्तावोक्तप्रकार एव परस्परव्यतिकरेणैकैकस्या अष्टपक्ष्याश्चतुःशतपक्षोत्पत्तेश्चतुःषष्टिसहितषट्शताधिकसप्तविंशतिसहस्रपक्षसम्पत्त्या तावतां झटिति सङ्कलनाशक्तेरानन्त्यं भवतीत्याह * एवमिति *

इह पक्षसहस्राणां मिलिताः सप्तविंशतिः ।
शतानि षट् चतुःषष्टिश्चापरा वस्तुसप्तके ॥
शीघ्रसङ्कलनाशक्तेरुपचारात्तथापि तु ।
आनन्त्यवचनं यद्वा लिङ्गाद्याधिक्यकारितात् ॥
विशेषणविशेष्यत्वप्रकाराधिक्यतो ऽधिकाः ।
पक्षाश्चतुःशतात्पूर्वं गणितादित्यनन्तता ॥

ननु भाष्ये किमाकृतिः शब्दार्थो व्यक्तिरिति पक्षद्वयस्यैवोपन्यासाद्व्याख्यातृणामेतावत्पक्षोपन्यासो न युक्त इत्याशङ्क्याह * पूर्वपक्षे ऽपीति * यत्राऽऽचारणानर्थक्यं तत्र व्यक्तिरर्थो ऽन्यत्राकृतिवचन इति भाष्ये पूर्वपक्षवेलायां द्वयवाच्यत्वपक्षस्यापि व्यक्तिपक्षवदुपन्यासादपिशब्दाच्च सिद्धान्तवेलायामथ किं विशेषणत्वेनाकृतिं वक्ष्यति विशेष्यत्वेन व्यक्तिमित्याकृतिविशिष्टव्यक्तिपक्षोपन्यासान्न तु व्यक्तिविशिष्टायामाकृतौ वर्त्तेत इति च व्यक्तिविशिष्टाकृतिपक्षोपन्यासादुपलक्षणार्थः सन्देहवेलायां पक्षद्वयोपन्यास इत्याशयः । नन्वेवं सति सर्वेषामेवोपन्यासनिराकरणे कस्मान्न कृति इइत्याशङ्क्याह * उपन्यासेन चेति * सन्देहवेलायामपि पक्षद्वयोपन्यासो ऽत एवेत्याह * तेनेति * भाष्योक्तसन्देहहेतुमुपन्यासपूर्वकं दूषयति * भाष्यकारेण चेति * अतः प्रयोगस्य प्रतीतेश्च तुल्यत्वाच्छब्दलक्षणे व्यक्तिपक्षाविधानाच्चेत्यस्मदुक्त एव द्वेधा सन्देहहेतुरित्याह * तेनेति * का पुनराकृतिरिति प्रश्नभाष्यं प्रथमपादेन त्वाकृतिः साध्यास्ति वा न वेत्याशङ्क्य न प्रत्यक्षा सती साध्या भवितुमर्हतीत्यादिना रुचकादिद्रव्यात्मकवस्तूदाहरणेनाकृतिसद्भावस्य निरूपितत्वादयुक्तमित्याशङ्क्ते * का पुनरिति * तदश्राविणो ज्ञानाभिप्रायेण तावत्प्रश्नमुपपादयति * नैष दोष इति * प्रथमपादाश्राविणस्तृतीयपादश्रवणे ऽनधिकारज्ञानाभिप्रायायोगादुक्ते ऽपि द्रव्याकारे वस्तुनि को व्यक्त्याकारः को वा ऽऽकृत्याकार इत्यविवे- २६८।१

कात्सन्देहाभिप्रायेणोपपादयति * सन्देहाद्वेति * इयेनादिमध्याशङ्कानिराकरणेनानुगताकारस्याकृतित्वनिश्चयात् सन्देहानुपपत्तेरुक्ताप्याकृतिर्व्यक्तिव्यतिरेकेणानुपलम्भान्न सम्भवतीति विपर्ययाभिप्रायेणोपपादयति * वैपरीत्येन वेति * युक्तिविशेषस्योत्तरे ऽनभिधानेनोक्ताक्षेपाभिप्रायेण प्रश्नायोगात्स्वमतानुगताकारस्य व्यक्तितो ऽत्यन्तभेदाभावेनाविचार्यत्वान्नातो ऽत्यन्तभिन्नाकृतिर्वाच्या न चासावस्तीत्येवं विपर्ययाभिप्रायेणोपपादयति * अथ वेति * द्रव्येत्युत्तरभाष्यमज्ञानसन्देहनिरासार्थत्वेन तावदवतारणपूर्वकं व्याचष्टे * तत्राहेति * अत्यन्तभेदे सति व्यतिरेकानुपलम्भादभावः स्याद्भिन्नाभिन्नयोस्तु न भेदानुपलम्भमात्रेणाभावो भवतीत्युक्ताक्षेपनिरासार्थत्वेन व्याचष्टे * यस्त्विति * ननु प्रथमपादोक्तन्यायेनैवाकृतिसिद्धावयं ग्रन्थो ऽनर्थकः स्यादित्याशङ्क्याह * न चेति * एतदेवोपपादयति * तेनैवेति * विवेककथनार्थत्वाभावे स्वरूपक- २६९।१
थनस्य सामान्यमित्येनावतैव सिद्धेर्मात्रशब्दो ऽनर्थकः स्यादित्यर्थः । अत्यन्तभेदाभावे ऽपि कथं चिद् भेदाद्विचार्यत्वं भवतीति द्वितीयविपर्ययाभिप्रायनिरासार्थत्वेन व्याचष्टे * यदपीति * यथाचायं मात्रशब्दो ऽत्यन्तभेदनिरासार्थस्तथा सर्वसामान्यव्याप्त्यर्थो ऽपीति दर्शयितुं तदभावे सत्तामात्रमेव द्रव्यत्वादित्रयमात्रमेव वा निर्दिष्टः स्यादिति पक्षद्वयं तावदाह *द्रव्यादीनां चेति* एतत्पक्षद्वयनिरासे मात्रशब्दं योजयितुमाह * अथ वेति * असाधारणविशेषेतिसामान्यं पराभिमतकर्मधारयत्वनिरासेन बहुव्रीहितया व्याचष्टे * असाधारणेति * कस्मादित्यपेक्षायां यो ऽर्थः सामान्यस्य विशेषाणां चाश्रयः सा व्यक्तिरित्युपरिष्टादभिधानाद् द्रव्यगुणकर्मणां सामान्यविशेषवत्त्वं साधर्म्यमिति च वैशेषिकतन्त्रे द्रव्यगुणकर्मव्यक्तीनां सामान्यविशेषाधारत्वस्मृतेश्चेत्याह * उपरिष्टादिति * अन्त्यविशेषाणां वा नित्यद्रव्यवृत्तित्वस्मृत्या सामान्यतो विशेषाणां द्रव्यवृत्तित्वं स्मृतं न भवतीति मत्वा * स्मृतेश्चेत्युक्तम् * कुतः प्रश्नपूर्वकस्य व्यक्त्याकृतिविवेकाभिधानस्य प्रस्तुतोपयोग इत्याशङ्क्य व्यक्त्याकृतिवाच्यत्वविचारानुपपत्तिशङ्कानिरासार्थत्वं सूचयितुमाह * तेनेति * प्रयोगचोदनाभावादितिसूत्रमावृत्त्यैतद्विचारपूर्वपक्षे ऽपि योजयति * किं प्राप्तमिति * अनेनैव सूत्रावयवेनाक्षिप्तानि हेत्वन्तराण्याह * संख्येति*एतदेव विवृणोति * यदि हीति * प्रयोगचोदनादिसिद्ध्यर्थं व्यक्तिलक्षणायां लक्षणैव दोषः स्यादित्याह * लाक्षणिकेति * ननु लक्षणापि शब्दवृत्तिप्रकारत्वा-

२७०।१ न्न दोषमित्याशङ्क्याह * तथा चेति * ततश्च श्रुतिलक्षणाविवेको न स्यादिति भावः । मुख्यसामानाधिकरण्यसिद्ध्यर्थमपि व्यक्तेरेव शब्दार्थतेत्याह * व्यक्तीति * पशुचोदनाक्षिप्तहृदयादिव्यवहारासिद्ध्यर्थमपि व्यक्तेरेव शब्दार्थतेत्याह * पशुमिति * अपेक्षितविधिसिद्ध्यर्थमपि सैव शब्दार्थ इत्याह * कर्मभिश्चेति * सर्ववादिसिद्धत्वाच्च सैव वाच्येत्याह * सिद्धेति * अर्थैकत्वमिति सूत्रावयवमवतारयितुं शङ्कते * किमितीति * प्रयोगप्रतीत्युपपत्तेर्जातिर्वाच्या क्रियोपपत्तेश्च व्यक्तिरित्यर्थः । सूत्रावयवेनेमां शङ्कां निराकरोति * नेति * अविभागादिति सूत्रावयवावतारणाय शङ्कते * सामान्येति * एतदाशङ्कानिराकरणार्थत्वेन सूत्रावयवं व्याचष्टे * व्यक्तीति * अर्थैकत्वमिति सूत्रावयवावतारणार्थं यत्रेति शङ्काभाष्यं निरुपपत्तिकमाशङ्क्योपपादयति * यत्रैवेति * सूत्रावयवव्याख्यानार्थत्वमुक्तमिति भाष्यमुपपादयति * नेति * आदिशब्देन विकल्पोपादान गौरिति एकपदोच्चारणे क्रियाविशेषानवधारणेन तत् सम्भवासम्भवसन्देहादुच्चारणानर्थक्यसन्देहे संशयोत्पत्तिः कथमिति प्रश्नभाष्यं व्यक्तपदार्थकस्येत्युत्तरानुरूपत्वादुपेक्ष्योत्तरानुरूपं स्वयं प्रश्नान्तरं करोति * व्यक्तीति * एतत्प्रश्नापाकरणार्थत्वेनोत्तरभाष्यं व्याचष्टे * आकृतीति * ननु कथं सामान्यावगतिरित्येतत्प्रश्नोत्तरभाष्यस्य प्रश्नानन्तरापाकरणार्थत्वेन व्याख्या न युक्तेत्याशङ्क्य यथाश्रुतस्य दूषणमाह * भाष्यकारास्त्विति * का तर्हि भाष्यस्य गतिरित्यपेक्षायामाह * तेनेति * अविभागादिति सूत्रावयवावतरणार्थो ऽयं प्रश्न इति भावः । एवं भाष्यकृतः शून्यहृदयतापत्तेरन्यथा व्याचष्टे * यद्वेति * ननु विशिष्टाभिधाने पूर्वपक्षिणोऽभिमते कथं सामान्यावगतिरितिप्रश्नानुपपत्तिः शुद्धाभिधाने तु पक्षान्तरपरिग्रहे प्रतिज्ञान्तराणां निग्रहस्थानं स्यादित्याशङ्क्य व्यक्तिः शब्दार्थः इति पूर्वपक्षप्रतिज्ञाया द्वैविध्यं दर्श-
२७१।२ यितुमाह * तेनेति * अद्रव्यशब्दत्वादिति सूत्रं सङ्क्षेपेण व्याचष्टे * तथा चेति * तस्मान्नाकृतिवचन इति उपसंहारभाष्यं व्यक्तिः शब्दार्थ इति इति प्रतिज्ञानुरोधात् व्यतिरेकमुखेन व्यक्त्यभिधानोपसंहारार्थमेवेति सूत्रयितुं तथा चेत्युक्तम् । अन्यदर्शनाच्चेतिसूत्रमन्वयमुखेन तावत्स्वयं व्याचष्टे * अन्यमिति * यद्याकृतिवचन इति व्यतिरेकमुखेन भाष्यकारीयव्याख्यानमनुसन्धत्ते * अन्यथेति * पूर्वपक्षमुपसंहरति * तस्मादिति * आकृतिस्तु क्रियार्थत्वादिति सिद्धान्तसूत्रमुभयत्र क्रियासम्भवादुभयाभिधान-

प्रतिपादनार्थम् कस्य चिद् भ्रान्तिः स्यात्तन्निवृत्त्यर्थं जातिमात्राभिधानप्रतिपादनार्थत्वेन व्याचष्टे*इतीति*नन्वाकृतेरपि व्यक्तिवच्चयनेनानुत्पाद्यत्वात्कथमाख्याश्रवणादाकृतेः पदार्थत्वविज्ञानमित्याशङ्क्याह *अत्र हीति*अत्र हि श्येनमिव चितं चयनेन निर्वर्त्तयेदिति वाक्यार्थ इत्यन्वयः । श्येन इव चीयतइति श्येनचिच्छब्दस्य कर्मव्युत्पत्तिप्रदर्शनार्थः स्थलशब्दः क्विप्प्रत्ययस्याग्न्याख्यात्वापाधिकत्वप्रदर्शनार्थो ऽग्निशब्दसादृश्यवाचिशब्दाश्रवणात् कथं सादृश्यलाभ इत्याशङ्क्य * परिशेषादित्युक्तम् * ननु श्येनव्यक्तिभिः स्थलस्य चेतुं शक्यत्वात् कथं सादृश्यलाभ इत्याशङ्क्य श्येनशब्दार्थकरणत्वस्य निषेध्यमानत्वात्कर्म्मतैव वाच्येति दर्शयितुम् * वाक्यार्थद्वयमुक्तम् * नन्वेवमपि न सादृश्यलाभ इत्याशङ्क्यैतद्वाक्यार्थद्वयदूषणार्थं * यावदित्याद्युक्तम् * चयनेन श्येनव्यक्तिं कुर्यादित्येतद्यावन्नोपपद्यते तथाकृतिं कुर्यादित्येतदपि यावन्नोपपद्यते तावत्परिशेषात्सादृश्यलाभ इति यस्मादर्थं यावच्छब्दावृत्तिः तस्मादर्थं तावच्छब्दोत्कर्षेण योज्यं चयनेन श्येनव्यक्तिं कुर्यादित्येतत्कस्मान्नोपपद्यतइत्यपेक्षायाम् * इष्टकाभिरित्युक्तम् * स्नाय्वादिभिस्तर्हि श्येनव्यक्त्यन्तरादुद्भूतैः क्रियतामित्याशङ्क्य स्नाय्वादिभिः *अपीति हेतुद्वयमुक्तम् * ननु स्त्रीपुंसमैथुनेन तर्हि क्रियतामित्याशङ्क्य तेन निष्पन्नाया अपि श्येनव्यक्तेरग्निधारणाशक्तत्वात्तादर्थ्यासम्भवेन प्रयोजनान्तरकल्पनापत्तेर्मैथुने च चिनोतेरप्रसिद्धत्वादमुख्यार्थत्वापत्तेरग्न्याधारत्वासम्भवेनैव चाग्न्याख्यानुपपत्तेरग्नाख्यानिमित्तक्विप्प्रत्यय * स्मृतिपरित्यागापत्तेश्चेत्युक्तम् * इष्टकाबाधश्चात्रापि तुल्यः । चयनेनाकृतिं कुर्यादिति वाक्यार्थानुपपादनार्थम् * आकृतेरपीत्युक्तम् * ननु सादृश्यमपि श्येनव्यक्त्या सह करिष्यतेऽत आह * ततश्चेति * एकया वा श्येनव्यक्त्यन्तरविलक्षणाया श्येनव्यक्त्या सहाग्न्याख्यस्थलस्य सादृश्यं सम्पद्येत सर्वाभिर्वा तत्रानिर्द्धारितरूपैकव्यक्तिसादृश्यस्य व्यक्तिनिरपेक्षजातिसादृश्यासम्भवेन जातिसादृश्यव्यतिरेकापत्तेर्निर्द्धारितरूपव्यक्त्यन्तरविलक्षणैकव्यक्तिसादृश्यं वाच्यं न चेष्टकाभिस्तत्सुसम्पादम् । सर्वव्यक्तिसादृश्यं तु तासां परस्परवैलक्षण्यादतीतानागतानां चाग्रहणेन तत्सादृश्याग्रहणादनाशङ्क्यमेवेत्याशयः।ननु चेत्याशङ्क्याभाष्यं व्याचष्टे * अथेति * न साधकतम इत्युत्तरभाष्यमनुवादपूर्वकमाक्षिपति * तत्रेति * यद्यपि सिंहं देवदत्तमानयेति सिंहशब्दवच्छ्येनं चितमिति द्वितीयान्तः श्येनशब्दः स्यात्तथापि तावत्सादृश्यविशे-

षणार्थत्वेन मुख्यार्थत्वाभावान्मुख्यार्थत्वे ऽपि वा श्येनमानयेति गो-
शब्दवत्परविशेषणार्थत्वेन स्वप्रधानभूतार्थप्रतिपादकत्वाभावान्न मु-
ख्यश्येनशब्दार्थस्य करणत्वेनाशङ्क्यिनस्येप्सिततमत्वाभिधानायालम्
अयं च द्वितीयान्तवत् भवति तस्याः श्येनशब्दानन्तर्याभावादित्य-
र्थः । क्विप्प्रत्ययान्तः शब्दो ऽत्रेप्सिततमत्वनिर्देशको ऽभिमतो न द्वि-
तीयेतिभाष्यं समाधत्ते * तेनेति * स्मृतिपर्यालोच्येति ल्यब्लोपे
पञ्चमी कथमेतत्स्मृतिपर्यालोचनया श्येनशब्दार्थस्य करणत्वनिषेधो
२७२।१ ऽत आह * कर्म्मणि हीति * नन्वेवमपि प्रत्ययार्थमात्रस्य कर्म-
त्वावगतेर्नोपपदार्थस्य कर्मत्वं सिद्ध्येदित्याशङ्क्याह * यदीति *
नन्वेवमप्युपपदस्य किमायातमित्याशङ्क्याह * न चेति * निरुपप
दस्य चिनोतेरग्नौ प्रयोगादर्शनेनाग्न्याख्यात्वाभावात्प्रसिद्ध्यग्न्याख्या-
निमित्तत्वाच्च क्विप्प्रत्ययस्मृतेः सोपपदस्यैव चिनोतेरग्न्याख्यात्वं ग-
म्यत इत्यर्थः । ननु कर्म्मणीति वाच्यसप्तम्या चिच्छब्दमात्रस्य क-
र्मवाचित्वावगतेरुपपदस्य कर्मवाचित्वनियमाभावात् कथं सकल-
स्यैकार्थत्वमित्याशङ्क्याह * तेनेति * केवलस्य चिनोतेरग्न्याख्या-
नुपपदापेक्षया कर्मणि हन इत्येतत्सूत्रगतस्योपपदविशेषणस्य कर्मश-
ब्दस्यावश्यानुवर्त्तनीयत्वादुपपदस्यापि कर्मवाचित्वावगतेर्न श्येन श-
ब्दस्य कर्मवाचिना चिच्छब्देन सह वैय्यधिकरण्यमित्यर्थः । उपसं-
हरति * ततश्चेति * तृतीया तत्कृतार्थेन गुणवचनेनेत्यादितृती-
यासमासलक्षणाभावादपि न श्येनशब्दार्थः करणमित्याह * यदि
वेति * यद्यसौ करणं स्यात्ततस्तृतीयासमासो वाच्यः स चा-
नुपपन्नो लक्षणाभावादित्यर्थः । नन्वश्रुततृतीयाकल्पनं चास्मि-
न्पक्षे स्यादित्याह * तृतीया चेति * काम्यत्वेन च श्रुताभिः
श्येनव्यक्तिभिर्नित्यानामिष्टकानां बाधो ऽस्मिन्पक्षे स्यान्न चा-
बाधपक्षसम्भवो बाधपक्षव्याप्य इत्याह * श्रुतेति * विश्व-
जिति तत्परत्वान्निषिद्धानुष्ठानं प्रसज्येतेत्याह * सत्यां चेति *
अत इत्याशङ्कानिराकरणोपसंहारभाष्यं व्याचष्टे * तेनेति * त-
थाकृतिवचनत्वे विकल्पतइति पुनरुक्तं भाष्यं चयनमाकृतौ सम्भ-
वतीत्यनेन पुनरुक्तं भासमानं सूत्रार्थोपसंहारार्थत्वेन व्याख्यातुमाह
* अतश्चेति * उभयत्रेत्याक्षेपभाष्यस्य तात्पर्यमाह * नैतदिति *
व्यतिरेकमुखेन तात्पर्यं तु योगसाध्यं भाष्यकारोक्तं दृढयितुमन्वयमु-
खेन स्वयमुक्तं पर्यनुयोगं सामान्ये ऽपि व्यक्तिपक्षस्य ज्यायस्त्व-
सिद्ध्यर्थम् * बहुत्वाच्चेत्युक्तम्*परिहारसाम्यप्रतिपादनार्थं यद-
प्युच्यतइति भाष्यं व्याचष्टे *अथेति * परिहारसाम्ये ऽपि व्यक्ति-

पक्षस्य ज्यायस्त्वसिद्ध्यर्थं विशेषमाह * युक्ता चेति * व्यक्तेरेव वाचकरूपत्वेन क्रियायोगसिद्ध्यर्थमनन्वाख्यातो ऽपि तृतीयासमासो ऽङ्गीकारिष्यतइत्याह * अगत्या चेति * व्यक्तिपक्षे ऽन्यो ऽपि विशेषो ऽस्तीत्याह * संख्येति * किं पुनरत्र ज्याय इति काङ्क्षा सूचितमाक्षेपतात्पर्यं व्याचष्टे * तेनेति * आकृतिः शब्दार्थ इति समाधानभाष्यसूचिताः पर्यनुयोगपरिहारसाम्ये ऽप्याकृतिपक्षस्य ज्यायस्त्वसाधिका युक्तीर्वक्तुं स्वरूपतस्तावत् व्याचष्टे * इतीति * प्रश्नपूर्वकं युक्तीराह * कुत इति * आद्यां युक्तिं व्याचष्टे * गोशब्दोच्चारणे हीति * गौरित्युक्ते सजातीयव्यक्त्यन्तराव्यवच्छेदेन विजातीयव्यक्तिमात्रव्यवच्छेदप्रतीत्या सामान्यप्रतीतेः पूर्वभावमुपपादयितुम् * तदाकारेत्युक्तम् * एवमपि कथं जातिवाचित्वनिश्चयो ऽत आह * अतश्चेति * द्वितीयां व्याचष्टे * यदीति * तृतीयां २७३।१
व्याचष्टे * गामिति * ननु व्यक्तिपक्षज्यायस्त्वे युक्तीनामुपन्यस्तत्वात्कथमन्यतरपक्षावधारणेत्याशङ्क्य व्यक्तिपक्षं दूषयितुं त्रेधा विकल्पयति * व्यक्तीति * सर्वव्यक्त्यभिधानपक्षे तावत्कल्पना गौरवसम्बन्धानित्यत्वापत्तिव्यवहारद्वयैकवचनशुक्लादिसामानाधिकरण्यानुष्ठानासम्भवरूपदोषषट्कमाह * तत्रेति * व्यक्तिसमुदायाभिधानपक्षे ऽप्येतानेवं दोषानतिदिशति * एवमिति * अतिदेशमुपपादयति * तत्रापि हीति * विशेष्यांशे ऽपि व्यक्तिव्यतिरिक्तसमुदायकल्पनाभिधानानर्थक्यसम्बधानित्यत्वप्रसङ्गाद्विवचनबहुवचनसामानाधिकरण्यानुष्ठानासम्भवरूपदोषषट्कमाह * व्यक्तीति * एकव्यक्त्यभिधानपक्षे ऽपि सम्बन्धानित्यत्वव्यवहारसामान्यधीद्विवचनबहुवचनप्रत्युत्तरकालप्रयोगासम्भवविशेषहेत्वभावरूपं दोषषट्कमाह * अर्थेति * भाष्यांकता युक्तीर्व्याख्यातुं प्रतिजानाति * अत इति * वक्ष्यतइति शेषः । यदीति
भाष्यं व्याचष्टे * यदि चेति * एकव्यक्त्यभिधानविषयत्वं भा- २७४।१
ष्यांकतं दोषाणां द्योतयितुम् * एकेत्युक्तम् * सर्वसामान्यविशेषविनिर्मुक्ता हीति कस्मिन्नर्थे हेतुरित्यपेक्षायां केन चित्साम्येन व्यक्त्यन्तरं प्रयोगो भविष्यतीत्याशङ्कानिराकरणहेतोरत्यन्तवैलक्षण्यस्योपपादनार्थे ऽयं हेतुरिति दर्शयितुमाह * अत्यन्तेति * गोत्वादिना हि सामान्येन खण्डमुण्डादिना च विशेषेण व्यक्तेर्व्यक्त्यन्तरेण साम्यं स्याद्न व्यक्तेः सामान्यरूपता विशेषरूपता वास्तीत्यर्थः । ननु ऐषां तर्हि साम्यं न भविष्यतीत्याशङ्क्याह * न चेति * नैष दोष इत्याद्याशङ्काभाष्यं व्याचष्टे * ननु चेति *

यदीति परिहारभाष्यं व्याचष्टे * यद्येवमिति * न इत्युच्यत-इत्याशङ्काभाष्यं व्याचष्टे * पूर्वपक्षेति * नेत्युच्यतइतीतिं-करणव्याख्यानायैवं शब्दः व्यक्त्यन्तरे सर्वसामान्यविशेषविनि-र्मुक्त एव वर्त्तिष्यतइत्यनेन सामान्यविशेषविर्निर्मुक्तत्वं निमि-त्तीकृत्य व्यक्त्यन्तरे वर्त्ततइति नोच्यतइत्येवं भाष्यं व्याख्यातुम् * सामान्यविशेषविनिर्मुक्तत्वादित्युक्तम् * यस्यैकस्यां व्यक्तौ सामान्यविशेषविनिर्मुक्तत्वं निमित्तीकृत्य वर्त्तते तथैव व्यक्त्यन्त-रे इत्येवकारसूचितार्थकथनार्थं * व्यक्ताविति्युक्तम् * किं त्त-र्हि उच्यतइत्यपेक्षायां यो ऽर्थ इति भाष्यवाच्यव्यक्त्युपलक्षणत्वे-न सामान्यविशेषविनिर्मुक्ततोच्यतइत्येतदर्थप्रतिपादनार्थतया व्या-ख्यातुमाह * किं त्विति* नन्वन्यापोहवती सामान्यविशेषाभावोप-लक्षिता चेद्व्यक्तिर्वाच्यत्वेन कथ्यते ततस्तदाश्रयत्वोक्तिर्विरुद्धये-तेत्याशङ्क्य सामान्यविशेषव्यतिरिक्तत्वं सामान्यविशेषरूपत्वा-भाववाच्चिना विनिर्मुक्तशब्देनोच्यते नाश्रयत्वाभाव इति * व्य-तिरेकशब्देनोक्तम् तृतीयेत्थम्भूतलक्षणा * सामान्यविशेषनि-र्मुक्तइत्युक्तम् * इति नेयं निमित्तसप्तमी किं तु व्यक्त्यन्तरइति-वदियमपि विषयसप्तमीत्याशयः । निमित्तत्वोक्तिनिराकरणस्य सि-द्धान्त्युक्तानिष्टापत्तिपरिहारोपयोगितां दर्शयितुमाह * तत्रेति * व्याख्याते ऽर्थे भाष्यं योजयितुमाह * यो ह्यर्थ इति * तेनेत्याश-ङ्क्योपसंहारभाष्यं व्याचष्टे * ततश्चेति * अनेन च तेनापशब्द-लक्षितेन व्यतिरिक्तत्वेनोपलक्षणेन व्यक्त्यन्तरे वृत्तिर्युक्ता । न चै-तावता सामान्याभिधानापत्तिर्दोषो व्यक्त्यन्तरस्य सामान्यरूपत्वाभा-वादित्येवं भाष्यं व्याख्यातम् । यदीति परिहारभाष्यं गोत्वशाबले-यत्वादिसामान्यविशेषाश्रयत्वैकार्थसमवायिनः सामान्यविशेषवि-निर्मुक्तत्वस्योपलक्षणत्वाभ्युपगमाच्छुद्धस्यापि चोपलक्षणत्वे ऽपि पिङ्गाक्षत्वाद्युपलक्षितस्य देवदत्तशब्दवाच्यत्वोक्तावपि सर्वस्मिंस्तदु-पलक्षिते प्रयोगादर्शनेनोपलक्षणसद्भावे सर्वत्र प्रयोगानियमा-भावादयुक्तमाशङ्क्य यदि व्यक्त्यन्तरेष्वपि सर्वसामान्यविशेषवि-निर्मुक्तत्वं निमित्तीकृत्य गोशब्दो भवति ततः शब्दप्रकृतिनिमित्त-त्वात्सामान्यमेव वाच्यमापद्येतेति । यदि सामान्यविशेषविनि र्मुक्तत्वाद्व्यक्त्यन्तरं शब्दप्रवृत्तिविषयस्तर्हि सामान्यरूपमेव तद्व्य-क्त्यन्तरं वाच्यं स्यादित्यनेनैवोक्तम् । यदि तु सर्वसामान्यविशेषवि-निर्मुक्तत्वरूपं सामान्यं निमित्तं न भवति तदोपलक्षणमात्रस्यानै-कत्र शब्दप्रवृत्तिहेतुत्वाभावाद्व्यक्त्यन्तरे वृत्तिरदोषो न भवति किं

तु दोष एव । यदि तु निमित्ताभावे ऽपि व्यक्त्यन्तरेषु शब्दो भवति
ततो ऽश्वव्यक्तावपि वर्त्ततइत्यनुषङ्गेणावृत्त्या वा योजयितुमाह*सि-
द्धान्तेति * आहेत्याशङ्काभाष्यं व्याचष्टे * नैवमिति * यदीति प- २७५।२
रिहारभाष्यं व्याचष्टे * यद्येवमिति * सामान्यप्रत्ययश्चेति भाष्यं
प्रकृतासङ्गतत्वादपकृष्य यदि व्यक्तिः शब्दार्थो व्यक्त्यन्तरे न प्रयु-
ज्येतेत्येतस्मादनन्तरं व्याख्येयमित्याह * यत्त्विति * भाष्यकृता
त्वेकनिमित्तशून्ये ऽक्षशब्दस्यानेकत्र प्रयोगे ऽक्षत्रयानुगैतकसामान्यप्र-
त्ययादर्शनादिहाप्येकनिमित्ताभावे प्रयोगमात्रेणानुगतैकाकारप्रत्ययो
न स्यादितिसङ्गतिं मत्वा प्रोक्तम्।एवं तर्हीत्याशङ्काभाष्यं व्याचष्टे*श-
क्त्या तर्हीति * नैवमिति परिहारभाष्यं व्याचष्टे * नैवमपीति *
गोत्वमित्याशङ्काभाष्यं व्याचष्टे * जात्येति * एवं तर्हीति परिहा-
रभाष्यं गोत्वविशिष्टा व्यक्तिर्गौशब्दवाच्यतया प्रतीयेतेत्यस्य सिद्धा-
न्तिनो ऽप्यनिष्टत्वादयुक्तमाशङ्क्याकृत्यभिधानापादनार्थत्वेन व्याचष्टे
* सत्यमिति * अस्तीत्याशङ्काभाष्यं प्रतिज्ञान्तराख्यनिग्रहस्थानाप-
त्तेरयुक्तमाशङ्क्य पूर्वपक्षान्तरपरिग्रहार्थत्वेन व्याचष्टे * पूर्वपक्षे-
ति * नैतदेवमिति परिहारभाष्यं व्याचष्टे * इतर इति * नन्वक्षा- २७६।२
दिशब्देष्वनेकार्थप्रत्ययस्यानेकशक्तिकल्पनाहेतुतया कल्पस्येहापि
भावादस्त्यनेकशक्तिकल्पनायां प्रमाणमित्याशङ्क्याह * नचेति *
परस्परासम्बन्धार्थत्वेनागत्या तत्रानेकशक्तिकल्पनासामान्यविशेष-
योस्तु परस्परान्वयादेकाभिधानेनेतरप्रतीतिसिद्धेरस्ति गतिरित्याश-
यः । तदेतदिति भाष्येण शब्दाकृतिप्रत्ययसन्निधाने व्यक्तिप्रत्यय-
स्याकृतिप्रत्यय एव हेतुर्न शब्द इति कथं निश्चय इत्याशङ्क्यान्वय-
व्यतिरेकाभ्यां निश्चय उक्तः तद्व्याचष्टे * अन्वयेति * अनन्तरक-
रिष्यमाणपक्षान्तरशङ्कोत्थापनार्थं सिद्धान्तमुपसंहरति * तेनेति *
ननु भवत्वाकृतिः शब्दार्थः तथापि व्यक्तिधर्मत्वेन तस्यास्तन्निरपे-
क्षायाः प्रतीत्ययोगाद्व्यक्तिविशिष्टैवाकृतिः शब्दार्थो भविष्यतीति प-
क्षान्तरशङ्कार्थं नन्वितिभाष्यं तस्माच्छब्द आकृतिप्रत्ययस्य निमित्त-
मित्यन्वयव्यतिरेकसाधितविभागोपसंहारस्य ननु गुणभूतेति चाकृ-
तिविशिष्टव्यक्त्यभिधानशङ्काशेषनिराकरणस्य च वक्ष्यमाणत्वात्पू-
र्वोपन्यस्तपक्षापर्यवसानावगतेर्मध्ये पक्षान्तरोपन्यासस्यासङ्गतत्वाद-
युक्तमाशङ्क्य समर्थयते * साम्प्रतमिति * तस्माच्छब्द इत्यस्य व्य-
क्तिविशिष्टाकृतिपक्षनिराकरणोपसंहारार्थत्वेनापि व्याख्यातुं शक्य-
त्वान्न गुणभूतेत्याशङ्कायाश्चोभयसाधारण्योपपत्तेः पक्षान्तरोप-
न्यासान्यथानुपपत्त्यैव पूर्वोपन्यस्तपक्षपर्यवसाननिश्चयात्पक्षान्तरो-


पन्नासावसरोपपत्तिसूचनार्थम् * सम्प्रत्युक्तम् * इति साम्प्रतमितीतिकरणोपक्रमो वायं ग्रन्थः । यस्मात्पूर्वोपक्रान्तः पक्षः समाप्तस्तस्मात्साम्प्रतं पक्षान्तरोपन्यासो युक्त इतीति करणो हेत्वर्थः । पूर्वं ग्रन्थशेषत्वे ऽनुसमाप्तयर्थः । पक्षान्तरकरणबीजमाह * तदेतदिति * आदावेव वाशब्दप्रयोगेणास्य व्याख्यानस्य परमतत्वं सूचितम । व्यक्तिविशिष्टाकृतिपक्षनिरासस्य विस्तरोक्त्यभावेनोपसंहारानर्थक्यात्तस्माच्छब्द इत्यस्य वाङ्मात्रेण तदर्थाप्रतीतेः । ननु गुणभूतेत्यस्य चाकृतिर्गुणभावेन विवक्षितेत्येतदनुभाषणार्थत्वावगतेः साधारण्यायोगात्सिद्धान्तोपसंहारं च विनास्य पक्षस्यानवतारादश्रुतोपसंहारापत्तेरिति स्वमतेन व्याचष्टे * यद्वेति * व्यक्तिधर्मत्वेनाकृतेस्ततः प्राक् प्रतीत्ययोगादन्वयव्यतिरेकाक्षेपार्थत्वेन सङ्गतिरित्याशयः । ननु व्यक्तिविशिष्टाकृतिपक्षोपन्यासात् कथं शुद्धाया व्यक्तेः शब्दार्थत्वं सिद्ध्येदित्याशङ्क्याह * अनेनेति * आकृतेः शब्दार्थत्वं मदभिमतमनेन पूर्वपक्षिणाप्युपगतमेव क्रियासम्भवश्च व्यक्तिविशेषणाद्भविष्यतीत्यभिप्रायेण सिद्धान्ते व्यक्तेरपि गुणत्वेनाभिधानमिच्छति ततो ऽहं पूर्वं शुद्धव्यक्त्यभिधानं साधयिष्यामीत्यनेनाभिप्रायेणेदमुच्यतइत्यन्वयः । व्यक्तिविशिष्टायां तदिति परिहारभाष्यं व्याचष्टे * इतरस्मिंस्त्विति * व्यक्त्यभिधानपक्षोक्तसर्वदोषोपलक्षणार्थत्वमस्य दर्शयितुमाह * यदीति * तस्मादिति ग्रन्थं पूर्वोक्तान्वयव्यतिरेकसाधितव्यक्तिप्रत्ययनिमित्तविभागोपसंहारार्थत्वेन स्पष्टत्वादव्याख्यायात्र ग्रन्थपातनिकार्थं शुद्धाकृतिपक्षं सिद्धान्त्युक्तमुपसंहरति * तेनेति * पूर्वव्याख्यानेन शब्दः शुद्धाकृतिप्रत्ययस्य निमित्तं व्यक्तिप्रत्ययस्य त्वाकृतिप्रत्यय एवेत्युपसंहारभाष्यव्याख्यानार्थो ऽयं ग्रन्थः । नन्वाकृतेर्व्यक्तिधर्मत्वाच्छुद्धाया वाच्यत्वं न युक्तमित्याशङ्क्यार्थे नन्विति भाष्यं व्याचष्टे * नन्विति * न तु
२७२।१ गुणीभाव इति परिहारभाष्यं व्याचष्टे * नैवमिति * वस्तुतो व्यक्तिधर्म्मत्वे ऽप्याकृतेः शब्दतः स्वरूपमात्रेण प्रतीतेः शुद्धाभिधानाविरोध इत्याशयः । व्यक्त्यभिधाने ऽप्याकृतेरुपलक्षणत्वाद्व्यक्त्यन्तरप्रयोगो व्यवस्था वोपपन्नेति पूर्वपक्षिणोक्ते यत्सिद्धान्तिते एवं तर्हीत्यादिनोपलक्षणत्वे सत्याकृतेरपि विशेषणत्वेनाभिधानम् * प्रसज्येतेत्युक्तम । तदाक्षेपार्थं ननु चेत्याशङ्काभाष्यं व्याचष्टे * नन्विति * भाष्यकारीयदण्डशब्दोदाहरणमाक्षेप्तुमुपन्यस्यति * भाष्येति * द्वेधा ऽक्षिपति * नन्विति * आद्यमाक्षेपं परिहरति * यत्विति * विशेषणोपलक्षणशब्दयोर्व्यावर्त्तकत्वापरपर्यायविशेषणत्वात्स्वतन्त्रस्यै-

व व्यावर्त्तकस्योपलक्षणत्वादस्त्येव भेद इत्याशङ्क्य परिहारान्तरमाह * यद्वेति * किं तत्समान्यमित्यपेक्षिते यथा दण्डो विशिष्टवाचिना प्रत्ययेनानभिधेयस्तथाकृतिरपि तदुपलक्षितव्यक्तिवाचिना गोशब्देनेत्यनभिधेयैव ! यथा दण्डो व्यावर्त्तकस्तथाकृतिरपीति विशेषवत्त्वेन वेति सामान्यद्वयमुक्तम् आकृतिर्विशिष्टेति वास्मिन्परिहारे तदुपलक्षितामिप्रायमुपचाराद्व्याख्येयम् । समाधानमुपसंहरति * ततश्चेति* ननूपलक्षणत्वे ऽप्याकृतेः सामान्यप्रत्ययश्च न प्राप्नोतीति दूषणं परिहर्त्तुमशक्यम् । उपलक्षणस्योपलक्ष्ये स्वानुरक्तप्रत्ययजनकत्वादर्शनात् न ह्येकापवरकस्याक्षत्रयस्य यदिदानीमस्मिन्नपरवके ऽस्ति तदक्षशब्दवाच्यमित्येकापवरकत्वमुपलक्षणीकृत्य केन चित्सम्बन्धकथने कृते ऽपि व्यवहारकाले ऽक्षशब्दोच्चारणादेकापवरकस्त्वाकारेण नाक्षः .प्रतीयते किं त्वक्षमात्रं तेनोपलक्षणत्वे ऽपि गवाकारप्रतीत्ययोगात्सामान्यप्रत्ययो न स्यादेवेत्यनर्थकमुपलक्षणत्वाङ्गीकरणमित्याशङ्क्याह * एवं चेति * एतद्दोषापरिहारोत्तरदोषपरिहारार्थोपलक्षणत्वोक्तिरित्याशयः । नैतदितिपरिहारभाष्यं व्याचष्टे * तदेतदिति * यथोपलक्षणाभावे ऽश्वव्यक्तावपि गोशब्दो वर्त्ततइत्यतिप्रसक्तिरुक्ता तथा चातो ऽप्युपलक्षणस्याप्रतीतस्याविशेषकत्वात्प्राप्नोतीत्यर्थः । नन्वेवं सति मत्वर्थीयेभ्यो ऽपि विशेषणांशाभिधानद्वारेण तदविनाभावाद्विशिष्टा प्रत्ययोपपत्तिस्तेषामपि न विशिष्टवाचिता स्यादित्याशङ्क्यानिराकरणार्थं न च यथेति भाष्यं व्याचष्टे * न चेति * प्रकृत्यर्थस्य दण्डस्य प्रत्ययेन विशेषणत्वोक्तौ २७८।२
विशेषणत्वान्यथानुपपत्त्या विशिष्टप्रतीतिसम्भवे ऽपि मत्वर्थीयप्रत्ययस्य विशेषणे प्रयोगाभावाद्विशिष्टवाचितेष्टा तद्वज्जातिशब्दानामप्याकृतौ प्रयोगाभावे सति विशिष्टवाचिता स्यान्न चासावस्ति इत्येनच्चिच्छब्दे जातिशब्दस्याकृतौ प्रयोगदर्शनादित्यर्थः । यदा च केवलाकृत्यभिधायिइत्येनशब्दो दृष्टस्तदान्वयव्यतिरेकाभ्यामप्याकृतिवाचितां निश्चीयते व्यक्तिसम्बन्धाभावे ऽप्याकृतौ प्रयोगादाकृतिसम्बन्धं विना क्वचिदपि व्यक्तावप्रयोगादिति प्रतिपादनार्थं तदेवमिति भाष्यं व्याचष्टे * अन्वयेति * व्यक्तेरशाब्दत्वे ऽन्वयव्यतिरेकौ पूर्वमुक्तौ शब्दस्याकृतिवाचितायामधुनेति विवेकः तस्मादित्युपसंहारभाष्यं व्यक्त्यभिधाने विरस्ते ऽपि सम्बन्धाभिधानादिपूर्वपक्षाणामनिरस्तकत्वात्परिशेषासिद्धेरयुक्तमाशङ्क्य समर्थयते * एवमिति * न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमितिचेदिति सूत्रं प्रथमं वेति चेदिति सूत्रावय-

वेनाकृत्यभिधानपक्षपरामर्शादाकृतिवाचितावामालम्भनादिक्रिया न स्यादन्यं तद्गुणं तद्वयसमालभेतेति चार्थान्तरे आलम्भविधानं न स्यात् षड् देया इति च द्रव्याश्रयस्य संख्यालक्षणस्य वाचकः षडिति शब्दो न स्यादिति पूर्वपक्षसूत्रार्थानुभाषणार्थत्वेनाथ यदुक्तमित्यादिभाष्येण व्याख्याय तत्परिहारार्थत्वेन तदर्थत्वात्प्रयोगस्याविभाग इति सूत्रं व्याख्यातुं सङ्गेपेणानुसन्धत्ते * ये त्विति * भाष्यकृतेदं सूत्रं न्यायेन शब्दस्याकृत्यर्थत्वावधारणादालम्भादिक्रियाया द्रव्ये प्रयोगस्यानुष्ठानस्य षडादिसंख्यायाश्च द्रव्ये प्रकर्षकत्वेन विशेषकत्वेन योगस्यान्वयस्योपाकृतपशुना सैव प्रतिनिहिते द्रव्यान्तरे प्रयोगस्यानुष्ठानस्याविभागो द्रव्यस्याकृत्या सम्बन्धः कारणं जातिवाचिनोऽपि शब्दस्य लक्षणया व्यक्तिपरत्वादविरोध इत्याशय इत्येवं व्याख्यातं तत्स्पष्टत्वाद्व्याख्याय स्वयमन्यथा व्याचष्टे * तदर्थत्वादिति * प्रयुज्यमानक्रियाप्रयोजनत्वेनानिर्दिष्टमप्यपूर्वं बुद्धिस्थत्वात्तच्छब्देन परामृश्यापूर्वार्थत्वादालम्भनादेराकृतिपक्षेऽपि प्रयोगस्यानुष्ठानस्याविशेष इति व्याख्येयमित्यर्थः । नन्वाकृतिपक्षे तस्या एवापूर्वसाधनत्वावगतिः कथं पक्षद्वये प्रयोगस्य विशेष इत्याशङ्क्याह * द्रव्यं चेति * यागद्वारा पश्वादेरपूर्वसाधनत्वं न चाकृतिर्निष्क्रियत्वात्त्यक्तुं योक्तुं शक्येत्यर्थः । किमर्थं तर्ह्याकृत्यभिधानमत आह * तदभिधानं त्विति * नन्वदृष्टार्थत्वेनैव तर्ह्याकृतेः प्रोक्षणादिवदपूर्वसाधनत्वं भविष्यतीत्याशङ्क्य क्रियारूपाया जातेस्तद्द्वारमन्तरेणादृष्टसाधनत्व-*अप्रतीतेरित्युक्तम् * नन्वाकृतेः साधनत्वाभावे पशुना यजेतेत्यादिकरणनिर्देशा न युज्यन्तइत्याशङ्क्याह *यदपीति* अनुपात्तस्य द्रव्यस्य क्रियासाधनाशक्तेरनवधारितविशेषस्य चोपादानायोगादाकृत्या च विना द्रव्यविशेषानवधारणाद् द्रव्यविशेषावच्छेदकत्वेनैवाकृतेः करणत्वं न साक्षादित्यर्थः । अत्रादिसूत्रं योजयति * तेनेति * न द्रव्यमित्यनुभाषणसूत्रगतेन द्रव्यशब्देन बुद्धिस्थं द्रव्यं तच्छब्देन परामृश्यतइति भावः । प्रयोगस्याविभाग इतिसूत्रावयवव्याख्यानार्थं द्रव्ये वेत्युक्तं तमेवावतारणपूर्वकं व्याख्यातार्थं योजयति * तदा हेति * आकृतिपक्षेऽपि प्रयोगस्याविशेष इत्येवमेव वात्राप्यपूर्वार्थत्वादिति पूर्वव्याख्याभवदुत्तरावयवो योज्य इत्याह * अथ वेति * व्यक्त्याकृत्योस्त्वभेदविवक्षायां भेदानामेव वायं प्रत्येकं सर्वेषां वाचक इति पूर्वप्रस्थानोक्तन्यायेन पक्षद्वयेऽपि व्यक्त्यभिधानाविशेषात्स्वरूपेणैवासौ वाच्या ज्यात्यात्मना वेत्येताव- २७९।१

न्मात्रस्य विचारार्थत्वात्सिद्धान्ते ऽपि क्रियाद्युत्पत्तेस्तुल्यत्वाद्यदि परं जात्यात्मना व्यक्त्यभिधानपक्षे निर्द्धारितविशेषव्यक्त्युपादानासम्भवात् क्रियाद्यनुपपत्तिर्वाच्या तच्च स्वरूपेणाप्येकव्यक्त्यभिधाने तदुत्पत्तेः प्रागुत्तरकालं च क्रियानुपपत्तेः सर्वव्यक्त्यभिधाने च सर्वोपादानाशक्तेः कदा चिदपि क्रियानुष्ठानासम्भवेनानिर्धारितविशेषव्यक्त्यभिधानस्यावश्याङ्गीकार्यत्वात्तुल्यमित्येतदर्थप्रतिपादनायान्यथासूत्रं व्याचष्टे * यद्वेति * द्रव्यशब्दवाच्याया व्यक्तेरुभयरूपत्वे ऽपि व्यावृत्ताकारतात्र व्यक्तिरूपशब्देनाभिमता पक्षविकल्पार्थौ कदाचिच्छब्दौ अस्मिन्नपि व्याख्याने पूर्वप्रकृतद्रव्यपरामर्शिनं तच्छब्दमभिप्रेत्यानुवृत्तव्यावृत्तोभयरूपवदनिर्धारितविशेषद्रव्यार्थत्वाच्छब्दस्य पूर्वपक्षे ऽपि प्रयोगस्यानुष्ठानस्य निर्द्धारितविशेषव्यक्तिविषयत्वायोगान्न विभागो व्याहशतेति योजयितुम् * शब्दस्येत्युक्तम् * यद्वा जातिश्च व्यक्तिश्च तामस एवार्थ इत्येवं तदर्थत्वादिति सूत्रावयवेनैव जातिव्यक्त्योरत्यन्तभेदाभावो ऽभिधीयते ततश्चाकृतौ विहितस्या लम्भादिप्रयोगस्य विभागो निष्कृष्टाकृतिविषयता नास्तीति न क्रियानुपपत्त्यादिदोषापत्तिरिति चतुर्थीं व्याख्यामाह * जातेर्वेति * भेदे ऽपि व्याकृतिर्व्यक्त्या न क्रिया स्यादित्यनुभाषणसूत्रनिर्दिष्टां क्रियां तच्छब्देन परामृश्याप्याकृतावनवच्छिन्नव्यक्त्युपादानाभावेन आकृतिनिरपेक्षया व्यक्त्या साधनत्वायोगेन उभयोरन्योन्यापेक्षयो र्यागापूर्वसाधनत्वावसायात्साधनत्वापेक्षायाः शक्तेरपि साधनशक्तत्वाच्च। धर्म्माणां कर्मसम्बन्धे च शेषिसाहित्यस्याविवक्षितत्वेनैकत्रापि कृतानामुपकारकत्वोपपत्तेरपूर्वसाधनव्रीहिष्विव विहितानां धर्माणां यवेष्वाकृतावपि विहितानां व्यक्तावनुष्ठानोपपत्तेर्व्यक्त्याकृत्योर्द्वयोर्यागापूर्वार्थत्वाच्चाकृतौ विहितस्यालम्भादिप्रयोगस्य व्यक्तिविषयत्वाद्विभागो भेदो नास्तीति नाकृत्यभिधानपक्षे क्रियानुपपत्तिरितिसूत्रं व्याख्येयमित्याह * यद्वेति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * सास्नाद्येकार्थसम्बन्धिगोत्वमात्रस्य वाचकः गोशब्द इति विज्ञातमन्वयव्यतिरेकिणामित्यनेन न्यायेनान्वयव्यतिरेकबलेनैवाकृत्यभिधानस्याविचारितसिद्धत्वात्प्रयोगचोदनाद्यनुपपत्तेस्तदसम्भवाच्छङ्कामात्रं निराकर्त्तुमेतदधिकरणमिति सूचयितुम् * आकृतिपक्षे ऽपीत्युक्तम्*

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः।



॥ न्यायसुधायाम् ॥

प्रथमाध्यायस्य चतुर्थः पादः

॥ अथ उद्भिदादिशब्दानां यागनामताधिकरणम् ॥ १ ॥

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्॥ १॥

अत्र भाष्यकृतोद्भिदादिशब्दा गुणविधयो नामधेयानि वेति चिन्ता कृता । सा किमुद्भिदादिशब्दानांधर्मप्रमोपयोगसिद्ध्यर्थं वा वाक्यार्थव्याख्यानाय वा तत्राध्ययनाविधिसामर्थ्यात् सकलवेदप्रामाण्यस्य विधिना त्वेकवाक्यत्वादिति तुशब्देन तुल्यं च साम्प्रदायिकमित्यनेन वा सूत्रेण प्रागेवोक्तत्वात् न तावदाद्यः पक्षः नाप्युत्तरः सन्दिग्धार्थनिर्णये वाक्यशेषसामर्थ्ययोः प्रामाण्यस्य वक्ष्यमाणत्वात् । द्वितीयाध्यायोपक्रमे च प्रथमे ऽध्याये प्रमाणलक्षणं वृत्तमिति भाष्येण सकलस्यैवाध्यायस्य प्रमाणलक्षणत्वाभिधानात् असमाप्ते प्रमाणलक्षणे मध्ये वाक्यार्थव्याख्यानस्यासम्बद्धत्वापत्तेरित्याक्षिपति * एवं स्मृतिसहितस्येति * सकलवेदप्रामाण्यासिद्धौ २८०।५
स्मृतिविचारायोगात्स च न सम्भवति ततश्च तत्सिद्धयुपोद्बलनाय स्मृतिसाहित्योक्तिः । तेजो वै घृतं स्रुवेणावद्यतीत्यादेः सन्दिग्धार्थनिर्णये व्यापाराभावे ऽपि स्रुतिविध्यर्थत्वेन प्रामाण्यसिद्धेस्तद्विचारात्प्रागपि सकलवेदप्रामाण्यसिद्धिरविरुद्धेति सूचनार्थम् * वाक्यार्थइत्युक्तम् * वाक्यार्थव्याख्यानावसरत्वादेव च गुणविधिरयं प्रतीयते स च न सम्भवति ततश्चाप्रमाणमित्यप्रामाण्याशङ्का यैवात्र गुणविधित्वशङ्केत्यप्ययुक्तं सिद्धे ऽपि प्रामाण्ये कस्यार्थस्य प्रमाणमिति विषयविशेषविचारात् प्रमाणलक्षणसङ्गतिरित्यन्येषां समाधानमुपन्यासपूर्वकं दूषयति *केचिदिति* पूर्वपक्षाभिधानार्थत्वेन चाद्यसूत्रव्याख्या न युक्तेत्याह*ये ऽपि चेति* विधिना त्वेकवाक्यत्वादिति हि तुशब्दोक्तेन तुल्यं च साम्प्रदायिकमित्यनेन वा क्रियार्थत्वेन हेतुना यदुद्भिच्चित्रादिशब्दानां विध्यादिवायान्तर्भाववः

चनमनेन सूत्रेण क्रियते तत् सिद्धान्तिनो नानिष्टमित्यर्थः । स्वमतेन समाधत्ते * तस्मादिति * आद्ये अधिकरणे विचारस्वरूपमाह * तत्रेति * यद्यप्यध्ययनविधिसामर्थ्यादेवोद्भिचित्रादिशब्दानामर्थानर्थक्यं निराकृतं द्वेधापि च प्रामाण्योपपत्तेर्न द्वाराभावेन प्रत्यवस्थानं युक्तं, मत्वर्थलक्षणादेश्चानर्थक्याज्ज्यायस्त्वान्न तद्भयेनानर्थक्याङ्गीकरणं युक्तम् । आनर्थक्यासम्भवाच्चाप्रसिद्धस्याप्युद्भिच्चित्रादिशब्दस्य तृतीयागतकरणत्वबलात् करणत्वयोग्यद्रव्यविशेषवाचित्वस्य नामधेयत्वाभावे ऽवश्यङ्गुल्यत्वाच्च । न पौष्णं पेषणं विकृतौ प्रतीयेतास्याचोदनात् प्रकृतौ इत्यादिवदुत्तरविवक्षायाः प्राप्त्यर्थं सामान्यन्यायसिद्धस्यैव क्रियार्थत्वस्यानेकविचारान्तरितस्य स्मरणं क्रियतइति वाच्यं, तत्र ह्यग्निष्टोमप्रकरणादुत्कृष्टं सन्तर्दनं प्रथमप्रयोगाच्चोत्कृष्टः प्रवर्ग्यः सर्वत्रान्यत्र भवतीत्युक्ते तद्वत्पेषणमपि दर्शपूर्णमासप्रकरणादुत्कृष्टं किमविशेषाच्चरौ पशौ पुरोडाशे च भवत्युत चरावेवेत्युपस्थितस्य विचारस्यान्यत्र सङ्गत्यभावादिहैव वाक्यप्रकरणविरोधाविरोधचिन्ताप्रस्तावेन अवश्यकर्त्तव्यत्वात् तत्प्राप्त्यर्थं पेषणस्योत्कर्षाभिधानं युक्तम् । द्रव्यसंस्कारस्यापि च बर्हिर्लवनादेरङ्गप्रधानेषु समानविध्ये विचारिते स्वयं कर्तृकताप्यङ्गप्रधानेषु समाना न वेति विचारेण प्राप्तानामृत्विजां विनियोजिकायाः समाख्यायाः लिङ्गप्रकरणाभ्यां विरोधो ऽस्ति न वेति विचारिते ऽन्यत्रापि समाख्यायाः पूर्वैः सह विरोधाविरोधविचारे समाप्ते यत्प्रसक्त्या यो विचारस्तत्समाप्तौ स एव बुद्धिस्थो भवतीति बर्हिर्लवनादिविचारप्रसक्तानुप्रसक्तिसमाप्त्या बुद्धिस्थस्य बर्हिर्लवनादिविचारस्य यूपावटस्तरणबर्हिषि लवनमस्त्युत नेति शेषलक्षणसङ्गतोत्तरविवक्षया स्मरणं युक्तं, गुणविधिनामधेयाचिन्तायास्तु लक्षणा ऽसङ्गतत्वेनेह कर्त्तव्यत्वाभावात् भावार्थाधिकरणे चोद्भिच्चित्रादिशब्दानां फलपदान्वयनिरासेन यज्यन्वये ऽभिहिते किं गुणविधित्वेनैषान्तदन्वयो नामधेयत्वेन वेति प्रसङ्गादुभयथापि यज्यन्वयासम्भवे बलात्फलपदान्वयापत्तेस्तन्निरासार्थं भावार्थाधिकरणशेषत्वेनैव विचारोपपत्तेस्तत्समाप्तौ चैवमप्यपूर्वाभावाद्भावशब्देभ्यो ऽपूर्वे नामपदेभ्यो वेति चिन्ता न युक्तेति प्रकृताचिन्ताक्षेपेणापूर्वविचारस्यापि सङ्गत्युपपत्तेस्ताद्विवक्षयोद्भिदादिप्रामाण्यस्मरणमयुक्तं प्रामाण्यस्मारणेनैव प्रसक्तत्वाल्लक्षणासङ्गतस्यापि विचारस्य कर्त्तव्यत्वोक्तौ स्मारणात्कर्त्तव्यत्वं कर्त्तव्यत्वे च सति तत्सङ्गतिसि-

१ उत्तरविचारीति २ पु० पा० ।

द्ध्यर्थं स्मारणमितीतरेतराश्रयापत्तिरत एव च टुपिकायां के चिदानर्थक्येनोत्सूत्रं पूर्वपक्षं कुर्वन्ति सूत्रेण तत्परिहारमित्येतन्मतमुपन्यस्य तत्रानर्थक्यस्य पूर्वमेव सर्ववेदविषयस्य निराकृतत्वादिति स्वयमेव दूषितम्। तथापि नामधेयत्वे सति उद्धिच्चित्रादिशब्दानां धर्मप्रमोपयोगो ऽस्त्युत नेती चिन्ता क्रियमाणा न विरुध्यते। को धर्मः कथं लक्षण इति हि प्रकारवाचिना थमुप्रत्ययेन प्रामाण्यप्रकारो ऽपि लक्षणार्थत्वेनाभिहितः। यथोक्तम् * बृहट्टीकायाम् *

चोदनासूत्रनिर्दिष्टो यः प्रमाणपरिग्रहः।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः॥

इति। किं प्रत्यक्षश्रवणमेव वेदस्य प्रामाण्यप्रकारो ऽथ मन्वादिस्मरणेनोपस्थापनमपीति सामग्रीगतप्रकारे तृतीयपादेन चिन्तिते किमप्रवृत्तप्रवर्त्तनस्तुतिविहितार्थप्रकाशनान्येव प्रामाण्यद्वाराण्युत नामधेयतापीति अवान्तरव्यापाररूपप्रकारान्तरचिन्तार्थो ऽयमारम्भो लक्षणपूर्वपादाभ्यां सङ्गच्छते। प्रामाण्यस्वरूपविषयत्वे त्वस्याश्चिन्तायाः प्रत्यक्षवेदविषयत्वात्स्मृतिविचारात्प्रागेव कार्यतापत्तेर्न स्मृतिपादानन्तरमारम्भो युक्तस्तस्मान्नामधेयानां धर्मप्रमोपयोगो ऽस्ति न वेति इह विचारार्थः। तत्सिद्ध्यर्थं चैषां विध्यादित्रयान्यतमान्तः पातो ऽस्त्युत नेति चिन्तनीयम्। ऽयंशवेदातिरिक्तत्वे नामधेयानामनुष्ठानानौपयिकत्वेन धर्मप्रमायोगानुपपत्तेरिति नामधेयानर्थक्ये ऽप्याम्नायस्येति सूत्रं योजयन् पूर्वपक्षमाह * किं तावदिति[1] * ननु सर्ववेदविषयस्यानर्थक्यस्याध्ययनविधिबलेन तत्रैव सिद्धान्ते निराकृतत्वान्नामधेयानर्थक्ये ऽप्युद्धिच्चित्रादिशब्दानां गुणविधित्वेनापि प्रामाण्योपपत्तेर्मन्त्रार्थवादवत् पुनः प्रत्यवस्थानायोगात् नानर्थक्याशङ्का युक्तेत्याशङ्क्य नोद्धिच्चित्रादिशब्दानां स्वरूपेणानर्थक्यं विवक्षितं किं तु नामधेयत्वे सतीत्येतमर्थं दर्शयितुं वृद्धवाक्यमुदाहरति * आह चेति * यद्युद्धिच्चित्रादिपदं नामधेयत्वेन ऽयंशाद्वेदादधिकमतिरिक्तमिष्यते ततो धर्मानुपयुक्तार्थाभिधायित्वादानर्थक्यं प्रपद्यतइत्यर्थः। अनुपयुक्तं सदितिपाठे नामधेयत्वेन ऽयंशाद्वेदादधिकं सदानर्थक्यं प्रपद्यतइत्यर्थः। ननु ऽयंशवेदातिरेके ऽपि नामधेयत्वेनैव धर्मप्रमोपयोगो भविष्यतीत्याशङ्क्य * ऽयंशेत्युक्तम् * ननु नामधेयत्वे ऽप्युद्धित्संज्ञको यागः कार्य इति विध्युद्देशान्तर्गतिसम्भवात् फलोद्देदनिमित्तोद्धित्संज्ञकत्वात् प्रशस्तो ऽयं याग इति चार्थवादान्तर्गत्युपपत्तेः संज्ञात्वेन

१ किं प्रामर्मिति २ पु० पा०।

द्यानुष्ठेयसंज्ञियागप्रकाशनसामर्थ्यान्मन्त्रकार्योपपत्तेः कथमतिरेका-
२८१।२ पत्तिरित्याशङ्क्याह * न हीति * यागानुष्ठेयताया यजेतेत्येतावता सिद्धेरेतद्विधेयत्वेनैव च यागविशेषावधारणसिद्धेः साध्यांशाद्यभिधानेनैव विध्युद्देशान्तर्भावो वाच्यो न च नामधेयत्वे ऽन्यतमांशाभिधानं सम्भवतीत्याह * साध्येति * संज्ञायाः संज्ञिस्वरूपनिर्देशार्थत्वेन प्राशस्त्यपरत्वाभावास्तुतिबुद्ध्यनुत्पादकत्वेनार्थवादातिरेकमुपपादयति * स्तुतीति * स्वरूपनिर्देशार्थत्वेनैव च कृतार्थत्वात् प्रयोगार्हरूपाभावेन कर्मकालप्रयोज्यत्वाभावात् विभुत्वेन च कर्मणः क्वांशे[1] प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वायोगात् कर्माङ्गभूतस्य चोद्भिदादिसंज्ञकस्य प्रकाशनार्हस्याभावान्न मन्त्रान्तर्गतिरित्याह * कर्मेति[2] * उद्भिच्चित्रादिपदेषु अध्येतृभिर्मन्त्रशब्दाप्रयोगात् मुख्यमन्त्रत्वशङ्कानुपपत्तेस्तत्कार्यकारित्वमात्रेण मन्त्रान्तर्गतिर्वाच्येति सूचयितुं कार्यशब्दः । ननु विध्यादित्रयातिरेके[3] ऽपि नामधेयस्य गुणफलोपबन्धोपयोगित्वेनार्थवत्त्वं भविष्यतीत्याशङ्क्याह * न चेति * विधित एव यागविशेषावधारणसिद्धेर्गुणफलोपबन्धो-ऽपि सेत्स्यतीत्याशयः । उपसंहरति * इतीति * सूत्रोक्तं सिद्धान्तमाह * अत्रेति * उक्तेनाध्ययनविधिसामर्थ्यलक्षणेन हेतुना सर्वस्य वेदस्य ऽर्थशत्वावधारणात् यदुद्भिच्चित्रादिशब्दस्य नामधेयत्वे सत्यंशत्रयातिरेकापत्तेरप्रामाण्यं पूर्वपक्षिणोक्तं तन्न सिध्यति नामधेयस्यापि वेदत्वेनांशत्रयान्तःपातावसायात् इत्यर्थः । एतेन श्लोकेनोक्तमस्माभिरित्याद्यन्यतमस्मै प्रयोजनाय भवेयुरित्यन्तं भाष्यमाद्यसूत्रव्याख्यानार्थमिति सूचितम् । नामधेयप्रामाण्यविचारसिद्धान्ताभिधानार्थमप्येतत्सूत्रं गुणविधिनामधेयविचारपूर्वपक्षे ऽध्याहारेण शक्यं योजयितुमिति प्रदर्शनायादौ भाष्यकृता द्वितीयविचारोपक्रमः कृतः । वार्त्तिककृता त्वध्याहाररहितस्य सूत्रस्य पूर्वपक्षाभिधानासामर्थ्यमुक्तम् उभयाभिधानशक्तस्यापि सूत्रस्य वाक्यभेदापत्तेरुभयत्र तात्पर्यासम्भवमभिप्रेत्य द्वितीयाधिकरणपूर्वपक्षस्यानुमितत्वोक्तिरिति भाष्यवार्त्तिकयोरविरोधः तन्न तावदित्यादिभाष्यं नामधेयस्य मन्त्रार्थवादान्तर्भावशङ्कानिराकरणार्थं तदन्तर्गतावप्यन्यतमांशान्तर्गतिसिद्धेरतदर्थकमित्याह * यदेति * निर्द्धारितरूपांशविशेषान्तर्गतिं विनान्यतमांशान्तर्गत्यनिर्वाहात् । यदा

१ अस्मात् अधिकं २ पु० पा० ।
२ कर्माङ्गभूतेति २ पु० पा० ।
३ अधिके ऽपीति २ पु० पा० ।

यस्मात्कारणात् तन्नामधेयं विध्याद्यर्थत्रयान्यतमार्थमित्युक्तमपि विशेषानिरूपणात् निर्वाहमगत्वैव स्थितं तदा तस्मात्कारणात् किमर्थमिति विशेषविचारः कर्त्तव्य इत्यर्थः । न त्वेकस्मिन्विचारे पर्यवसिते विचारान्तरारम्भोक्तिरेषा तथा सत्यधिकरणत्रयापत्तेर्द्वयोरधिकरणयोरित्यनुपपत्तिप्रसङ्गात् तन्न तावदिति भाष्यं व्याचष्टे * न तावदिति * एतदेवाक्षेपपूर्वकमुपपादयति * कथं पुनरिति * नावयववाच्ययं शेषशब्दः किं तूपयुक्तेतरवाची वायव्यं श्वेतमित्यादेर्हि स एवैनं भूतिं गमयतीत्यन्तस्यैकस्य वाक्यस्य मध्ये भूतिकामान्तेभ्यः साध्यादिप्रतिपादनेन विधेयार्थाभिधानोपयुक्तेभ्यः पदेभ्यः परिशिष्टानां वायुर्वै क्षेपिष्ठेत्यादीनामर्थवादतेष्यते । ननु विधिवाक्यावयवत्वरूपैकवाक्यत्वमात्रेण भूतिकामादिपदानामप्यर्थवादत्वापत्तेर्नामधेयानां च विधिविषयविशेषावधारणार्थत्वेन विधेयार्थाभिधानोपयुक्तत्वात् न परिशिष्टतास्तीत्यर्थः । ननु विधिविशेषादेव विधेयविशेषावधारणसिद्धेर्नामधेयानां तादर्थ्यासम्भवात् परिशिष्टता भविष्यतीत्याशङ्क्याह * तदिति * उत्पत्तिवाक्ये विधेयविशेषावधारणस्यान्यतः सिद्धावपि समे यजेतेत्यादौ दर्शपूर्णमासादिनामधेयं विना विशेषावधारणासिद्धेर्वक्ष्यमाणत्वात् विध्युद्देशान्तर्गतिस्तावत्सम्भवत्येव न च तत्सम्भवे स्तुत्यर्थत्वाङ्गीकरणं युक्तमिति प्रधानं विधिरङ्गं स्तुतिस्तत्र प्रधानविशेषणसम्भविनस्तदगामित्वमेव न्याय्यमित्यत्रोक्तमित्यर्थः । गुणगुणिसम्बन्धकीर्त्तनात्मकत्वाच्च स्तुतेर्न गुणमात्रैकवाचिनैकेन पदेनोपपत्तिरित्याह * न चेति * ननु संज्ञया गुणिभूतस्य संज्ञिनोधातूपात्तस्योपस्थापनोपपत्तेः स्तुतिः सेत्स्यतीत्याशङ्क्याह * न चेहेति * संज्ञायाः संज्ञिव्यवहारार्थत्वेन स्तुतिपरत्वायोगान्नेह नामधेये स्तुतिप्रतिपत्तिः सम्भवतीत्यर्थः । ननु नामधेयस्यापि फलोद्देदनादिगुणयोगनिमित्तत्वात् सहस्राक्षादिवत्स्तावकत्वोपपत्तिरित्याशङ्क्याह * यदपीति * संज्ञायाः संज्ञिव्यवहारार्थत्वेन कृतार्थायाः संज्ञायाः स्तुत्यर्थत्वमेव तावत्स्वमनीषिकामात्रेण कल्प्यं न तु युक्तियुक्त कथं चित्कल्पितमप्येतत्फलोद्देदनस्य कर्त्तेति धातूपपदप्रत्ययार्थसमुदायस्य तृतीयायान्यार्थत्वप्रतीतेः प्रातिपदिकार्थप्राधान्यविघातात् बाध्येतेत्यर्थः । न मन्त्र इति । मन्त्रान्तर्गतिशङ्कानिराकरणार्थं भाष्यं व्याख्यातुं न्मन्त्रस्वरूपनिराकरणे तावत्प्रायिकस्यास्यन्तत्वादिलक्षणस्याभिधानचोदकत्वस्य चाध्येतृप्रयोगस्य च व्यापकस्याभावं सूचयितुं हेतुमाह

१ निरासार्थमिति २ पु० वा० ।

* न चास्येति * ननु स्वरूपतो मन्त्रत्वाभावे ऽप्यूहप्रवरनामधेयवत् प्रयोजनाकाङ्क्षायां प्रयोजनान्तरायोगेनानुष्ठेयस्मारकत्वावगमान्मन्त्रकार्यकरत्वेनौपचारिकं मन्त्रत्वं भविष्यतीत्याशङ्क्य स्वयं तावन्निराकरोति * न चेति * पदार्थमात्रस्यानुष्ठेयत्वात् प्रयोजनत्वानुपपत्तेर्वाक्यार्थस्यैवानुष्ठेयत्वेन प्रयोजनत्वादेकस्य च पदस्य वाक्यार्थप्रतिपादनासामर्थ्यात् प्रयोजनाकाङ्क्षैव तावन्नास्ति सत्यामपि वा प्रयोजनाकाङ्क्षायां स्मारकत्वं न युक्तं करणत्वप्रतीत्या स्मरणार्हत्वापादकप्रातिपदिकार्थप्राधान्यबाधादित्यर्थः । एतच्च ब्राह्मणेनैकवाक्यीभूतस्य कर्मकाले स्वतन्त्रप्रयोज्यत्वाभावान्मन्त्रकार्यकारित्वानुपपत्तेर्मन्त्रकार्यकरत्ववादिनेद्धिदादिनामधेयानां स्वातन्त्र्यमवश्याभ्युपगन्तव्यम् इत्यापाद्यैकपदत्वमुक्तम् । वस्तुतस्तु धातुसामानाधिकरण्यं विना नामधेयत्वायोगात् भिन्नवाक्यत्वे प्रकारान्तरेणोपयोगानुपपत्तेरानर्थक्यस्यापरिहार्यत्वादिष्टमेवैकवाक्यत्वम् । अत एव सिद्धवद्वायुक्षेपिष्ठादिवदेकवाक्यतावगम्यतइत्युक्तम् । अनङ्गीकृतनामधेयत्वस्य तूद्धिदादिपदस्वरूपस्यार्थवादत्वनिराकरणे सत्यसावेकवाक्यत्वशङ्का तदङ्गीकारेण च विध्युद्देशान्तर्गत्या परिहारो न कथं चिद्युज्यते । यदा च मन्त्रकार्यकरत्वाङ्गीकरणे ब्राह्मणैकवाक्यत्वानुपपत्तेः स्वतन्त्रैकपदता पद्यते तदा सामानाधिकरण्याभावेन नामधेयत्वायोगात् तदभिधेयस्य चार्थस्य वाक्यान्तरेण कर्मणविधानात् प्रयोगसमवेतार्थाभावात्स्मारकत्वं न युक्तमित्याह * न चैतदिति * अनेन चैवं जातीयकस्येति भाष्यमुद्धिच्चित्रादिशब्दानां नामधेयत्वे तद्वाच्यस्य प्रधानकर्मण एव प्रकाशनीयस्य सद्भावादयुक्तमाशङ्क्यापाद्योक्त्या व्याख्यातं यद्वा कर्मणो विभुत्वेनास्य क्वांशे प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वानुपपत्तेःकर्माङ्गप्रकाशनार्थत्वं वाच्यं न चैतदभिधेयः कर्माङ्गभूतो ऽर्थो ऽस्तीत्याशयः । नन्वसमवेतार्थत्वे ऽपि स्तोत्रशस्त्रमन्त्रवदङ्गत्वं भविष्यतीत्याशङ्क्याह * न चेति * स्तोत्रादिसाधनत्वेन विधानाभावात् प्रकरणपाठेनैषां कर्माङ्गप्रकाशनेनैव विनियोगो वाच्यः । न चासौ सम्भवतीत्याशयः । ननूद्धिदादिशब्दवाच्यस्य खनित्रादेर्मन्त्रवर्णात् कर्मणि समवायः कल्पयिष्यते ऽत आह * मान्त्रवर्णिकेति * चित्राग्निहोत्रादिशब्दानां द्रव्यवाचित्वानाशङ्क्यानुपलक्षणार्थो द्रव्यशब्दो द्रष्टव्यः श्रुत्यविनियुक्तत्वाच्चास्य स्वार्थसमवायकल्पकत्वं नास्तीत्याह * न चेति * सम्भवत्यपि नामधेयत्वे कर्मस्वरूपप्रका-

शनार्थत्वे च ब्राह्मणाद्विच्छिन्नस्यैकपदमात्रस्य मन्त्रत्वानाशङ्कनात् तादृशस्य चाख्यातान्वयं विना नैराकाङ्क्ष्याभावान्न कर्मकालप्रयोज्यत्वं सम्भवतीत्याह * न चेति नन्वध्याहारेण निराकाङ्क्षीकृत्य कर्मकालप्रयोज्यत्वं भविष्यतीत्याशङ्क्य निराकुर्वन् कर्मकालाप्रयोज्यत्वमेवोपसंहरति * अतश्चेति * अतः साकाङ्क्षत्वेनाप्रयोगार्हत्वान्न कर्मकाले प्रयोगः सम्भवति न चाध्याहारेण निराकाङ्क्षीकृत्य प्रयोगो ऽविनियुक्तत्वेन प्रत्यक्षविनियोगान्यथानुपपत्तिकल्प्याध्याहारायोगादित्यर्थः । नामधेयत्वेन च प्रत्यक्षब्राह्मणैकवाक्यत्वप्रतीतेर्न श्रुताध्याहारेण निराकाङ्क्षीकरणं युक्तमित्याह * स्फुटं चेति * मन्त्रानन्तर्गतिमुपसंहरति * इतीति * पारिशेष्यादिति २८२।२
भाष्यं मन्त्रार्थवादान्तर्गत्यसम्भवे ऽपि नामधेयत्वोपपत्तेः पारिशेष्याद् गुणविध्यसिद्धेरयुक्तमाशङ्क्य समाधातुमाह * तस्मादिति * नामधेयस्य विध्युद्देशान्तर्गतिमात्रं पारिशेष्येणाभिमतं गुणग्रहणं तूत्तराधिकरणापातनिकार्थमित्याशयः । विध्युद्देशान्तर्गतस्यैव नामधेयस्य गुणविधिर्नामधेयं वेत्येवं विचारः क्रियतइति भावे लकारः विधेयाङ्गसमर्पकत्वाभिप्रायो गुणविधिशब्दः नामधेयस्य च विध्युद्देशान्तर्गतेर्न नामधेयं विधायिष्यतइत्येतद्भाष्यव्याख्याने विस्तरेणोपपादयिष्यमाणत्वात् तदवष्टम्भेनेह सिद्धवदभिधानम्।उद्भिदादिशब्दानां च नामधेयत्वं याज्ञिकप्रसिद्ध्यैव सिद्धं स एष यज्ञः पञ्चविधो ऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादिलिङ्गदर्शनैश्चावधारितम् इत्यविचारितसिद्धमङ्गीकृत्य नामधेयत्वस्य धर्मप्रामाण्यप्रकारता ऽस्त्युत नेत्याद्येनाधिकरणेन विचारिते क्वास्ति नामधेयं क्व वा नेति कोष्ठशोधनिकार्थमुत्तरः प्रपञ्चः । सो ऽपि वाक्यार्थव्याख्यानत्वेन प्रमाणलक्षणासङ्गतिप्रसङ्गान्नोद्भिदादिशब्दो गुणविधिर्नामधेयं वेत्येवं रूपः। किं तु यथा सर्ववाक्यशेषाणाम् आनर्थक्यनिराकरणेनार्थवादत्वे ऽर्थवादाधिकरणेनैव सिद्धे तत्दृढीकर्तुं विधित्वाशङ्कानिराकरणायोत्तराधिकरणद्वयं तथोद्भिदादिशब्दानां याज्ञिकप्रसिद्ध्यवधारितेन नामधेयत्वेन धर्मप्रमोपयोगे साधिते प्रसिद्ध्यादिहेतुकेन गुणविधित्वेनैव धर्मप्रमोपयोगसिद्धेः किं क्लिष्टेन नामधेयत्वेनेत्याशङ्क्य नामधेयत्वमेव दृढीकर्तुं गुणविधित्वाशङ्कानिरासायोत्तराधिकरणचतुष्टयं। ततो वाजपेयाधिकरणे तन्त्रसम्बन्धेन विशिष्टविधिसम्भवाद् गुणविधिपक्षोक्तमत्वर्थलक्षणादिदोषपरिहारेण प्रत्यवस्थानमाशङ्क्य वैरूप्यात्तन्त्रसम्बन्धानुपपत्तेर्दोषपरिहारासम्भवेन गुणविधित्वनिराकरणे दृढीकृते विशिष्टवि-

धावाख्यातोपपदार्थयोर्द्वयोर्विधानात्सन्निकृष्टविध्यसम्भवनिबन्धनत्वाच्च विप्रकृष्टविधेर्युगपत्सम्भवासम्भवविरोधान्न क्वापि विशिष्टविधिः सम्भवतीत्याशङ्क्याग्नेयाधिकरणे विशिष्टविधौ व्युत्पादिते बर्हिरादिशब्दाः संस्कारनिमित्ताः जातिनिमित्ता यौगिका वेत्यधिकरणत्रयेण प्रसङ्गाद्विचारिते प्रासङ्गिकसमाप्तया बुद्धिस्थस्य विशिष्टविधिव्युत्पादनस्य प्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं वैश्वदेवशब्दस्य गुणविधित्वशङ्कानिराकरणार्थं व्युत्पाद्याष्टाकपालादिशब्दानामेकवाक्यगतत्वेनोत्पन्नोत्पन्नशिष्टत्वाविभागाभावाद् गुणविधित्वमाशङ्क्याष्टत्वादीनां परस्परविरोधित्वेनैकवाक्यविधानायोगाद् बलाद्वाक्यभेदप्रसक्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादिविध्ययोगादष्टाकपालादिशब्दैर्गुणावृत्त्या द्वादशकपालस्तुतिरिति वैश्वानराधिकरणे ऽभिहिते प्रसङ्गाद् गुणवृत्तित्वलक्षणं तत्सिद्धिसूत्रेणोक्ता यथा विध्युद्देशान्तर्गतस्यापि उद्भिदादिपदस्य नामधेयरूपेण प्रकारान्तरेण धर्मप्रमोपयोगित्वं तथा वाक्यशेषस्यापि स्तावकत्वातिरेकेण सन्दिग्धनिर्णायकत्वेनेत्युक्ताधिकरणेनोक्ते स्रुवाधिकरणे वाक्यशेषवत् सामर्थ्यस्यापि सन्दिग्धनिर्णायकत्वेन धर्मप्रमोपयोगव्युत्पादनात् सकलस्य पादस्य प्रमाणलक्षणसङ्गत्यविघातः । भाष्यानुसारेणोद्भिदादिशब्दानां गुणविधित्वेन धर्मप्रमोपयोगित्वं नामधेयत्वेन वेत्युभयथा प्रामाण्यमङ्गीकृत्य प्रकारविशेषव्युत्पादनार्थापि गुणविधिनामधेयचिन्ता प्रकारस्यापि लक्षणार्थत्वात् न लक्षणसङ्गतिं विहन्ति प्रामाण्यविषयविशेषनिरूपणार्थेयं गुणविधिनामधेयचिन्ता नप्रकारविशेषनिरूपणार्थेति परव्याख्यादूषणार्थस्तु वार्त्तिककारीयो यत्न इति सर्वमनवद्यम् ॥ उद्भिदगुणतेत्यादिद्वितीयाधिकरणपूर्वपक्षभाष्यं तात्पर्यतो व्याचष्टे * तत्र तावदिति * ननूद्भिदादिशब्दानां लोके खनित्रादावप्यप्रसिद्धत्वादवयवव्युत्पत्त्या तु कर्मण्यपि प्रवृत्तिसम्भवात् कथं प्रसिद्ध्या गुणविधित्वानिश्चय इत्याशङ्क्य * बलवत्त्वेनेत्युक्तम्*उच्छब्दस्योर्द्धत्वे भिदेश्च विदारणे लोकव्याकरणयोः प्रसिद्धत्वादुद्भिच्छब्दस्य खनित्रेऽवयवप्रसिद्धिर्बलीयसी[1] प्रकाशनार्थतायास्त्वप्रसिद्धत्वाद्यागस्य चाबोधकत्वेन प्रकाशकत्वाभावात् उत्पादकत्वेनापि प्रकाशकत्वोपचारे सर्वकर्मणां स्वफलोत्पादकत्वेनोद्भिच्छब्दवाच्यतापत्तेर्याग प्रसिद्धिर्दुर्बलेति भावः । गुविधौ त्विति भाष्यमभ्यधिकमर्थं विदधतइत्यवयवत्वेन प्रवृत्तिविशेषकरत्वमुक्तमर्थवन्तो भविष्यन्तीत्यनेन च प्रयोजनवत्त्वमित्येवं

१ बलवतीति २ पु० पा० ।

ख्यातुं प्रयोजनवशेन चाधिकत्वात् * प्रवृत्तेश्चेत्युक्तम् * विधुद्देशान्तर्गतस्योद्भिदादिशब्दस्य गुणरूपमङ्गरूपं वाच्यमित्यनुषङ्गाभ्याहाराभ्यां योज्यम् । किमर्थं तदुच्यतइत्यपेक्षायामाख्यातेन विधातुमिति * विधीयत * इत्यनेनोक्तं भाष्यमप्युद्भिदुगुणतां यागस्याख्यातेन विधातुमुद्भिदादिशब्दो विधेयगुणसमर्प्पक इत्येवं योज्यं धातूपसर्गरूपावयवशक्त्यनुसारेण तावदुद्भिच्छब्दस्योर्द्धेविदारणसाधनद्रव्यवाचित्वमुपपादयति * प्रातिपदिकमिति[1] * द्रव्यविषयायाः प्रसिद्धेर्बलीयस्त्वोपपादनार्थं नचैषामिति भाष्यावयवं व्याचष्टे * न चेति * भिदिर्विदारणइतिवत् प्रकाशने स्मृत्यभावाद्यागस्याप्रकाशकत्वादौपचारिकप्रकाशकत्वे सत्यप्यतिप्रसङ्गापत्तेरवयवप्रसिद्ध्योद्भिच्छब्दस्य यागार्थत्वायोगात्समुदायप्रसिद्ध्या तदर्थता वाच्या न चासावस्तीति सूचनार्थः समुदायशब्दः । ननु लोकप्रसिद्ध्यभावे ऽपि यजिसामानाधिकरण्याद्यागार्थतावगम्यतइत्याशङ्क्यानिराकरणार्थं न चेति भाष्यावयवं सामानाधिकरण्यावगतस्यार्थस्य पारिभाषिकत्वाभावात् अयुक्तमाशङ्क्य व्याचष्टे * न चेति * वैय्यधिकरण्येनापि यजिसम्बन्धोपपत्तेः सामानाधिकरण्येन यागार्थत्वस्यावगन्तुमशक्यत्वादलौकिकार्थकल्पना पारिभाषिकी आपद्येत सा च सम्बन्धस्याशास्त्रहेतुत्वादित्यैन्द्र्यधिकरणसूत्रावयवेन निरस्तत्वादयुक्तेत्याशयः । तृतीयया चोद्भिच्छब्दार्थस्य करणत्वावगतेर्द्रव्यस्यैव च करणत्वोपपत्तेस्तदनुसारेणापि उद्भिच्छब्दस्य द्रव्यवाचितावसीयतइत्याह * तृतीयापि चेति * ननु यागस्यापि फलोद्भेदनहेतुत्वात्फलभावनाकरणत्वाच्च तद्वाचित्वे ऽप्यवयवप्रसिद्धिस्तृतीया च न विरोत्स्यतइत्याशङ्क्याह *न चेति[2] * यागस्योर्द्ध्वंविदारकत्वं प्रकाशकत्वं वा तावन्नास्त्येव करणत्वं तु विधिसामर्थ्यगम्यमपि कर्तृव्यापारव्याप्यत्वरूपकर्मत्वापेक्षत्वेन ततो दौर्बल्यात्तेनाभिभूतं सन्न तृतीयोत्पादनक्षममिति प्रसिद्धशब्देन प्रकृष्टत्वेन कर्मत्वात् बलीयस्त्वेन न सिद्धं यतस्तेनाभिभवितुं न शक्यतइत्यभिधानात्सूचितम्।कुठारादीनां तु छेदनादौ करणत्वात् उद्यमनादौ च कर्मत्वाद्भिन्नविषयत्वेनाविरोधादनभिभूतं करणत्वं तृतीयोत्पादनक्षममित्याशयः । नन्वर्थवन्तो भविष्यन्ति इतिभाष्यावयवेनार्थवत्त्वस्य तृतीयोपपत्तित्वेनोक्तत्वात् प्रयोजनवशेन चेति द्वितीयोपपत्ति-

---

१ प्रातिपादक तावदिति २ पु० पा० ।

२ न च यागस्येति पु० पा० ।

त्वेन व्याख्या न युक्तेत्याशङ्क्याह * अर्थवत्त्वादितिं * प्रवृत्तिविशेषकरत्वोपपत्तित्वद्योतनार्थं तृतीयया युक्त्या प्रागस्य व्याख्येत्याशयः । प्रवृत्तिविशेषकरत्वं व्याचष्टे * विधायकेति * द्रव्यविशिष्टक्रियाविषयप्रवृत्तिहेत्वभिधाने ऽपि विधेयसमर्पणे द्रव्यविशिष्टक्रियानुष्ठाने च यथाक्रमं प्रवृत्तौ विशेष इत्यर्थः । ननु नामधेयत्वे ऽपि संज्ञाविशिष्टे कर्मणि प्रवृत्तेराधिक्यरूपो विशेषो ऽस्तीत्याशङ्क्याह * अन्यथा हीति * विधिविशेषादेव यागविशेषसिद्धेर्नामधेयस्यानतिरिक्तार्थत्वात् । अनुच्चारिते तस्मिन्यावती विधायकादीनां प्रवृत्तिस्तावत्येवोच्चारिते ऽपि स्यादित्यर्थः । उद्भित्पदस्यानुच्चरितस्य प्रवृत्त्ययोगे ऽप्याधिक्याभावं त्रयाणां तुल्यं वक्तुमेषामिति बहुवचनम् प्रसिद्धेर्वार्थवत्त्वोपपत्तित्वसूचनार्थं प्रागर्थवत्त्वव्याख्येत्याह * अथ वेति * प्रसिद्धस्यापि लोष्टादेर्निःप्रयोजनत्वात् प्रसिद्धेः प्रयोजनवत्त्वोपपत्तित्वासम्भवमाशङ्क्याभिधेयवाचित्वेनार्थशब्दव्याख्यानम्मुद्भित्पदस्य गुणे प्रसिद्धत्वात् विधेयगुणसमर्पकस्य सतो ऽर्थवत्त्वमित्यर्थः । अस्मिंस्तु व्याख्याद्वये गुणविधौ हेतुद्वयापत्तेः प्रसिद्ध्यादिभिः पूर्वपक्ष इति श्येनाधिकरणभाष्ये बहुवचनानुपपत्तिप्रसङ्गेनापरितोषाद्धेतुभेदे ऽपि प्रवृत्तिविशेषकरत्वे ऽपि प्रयोजनातिरेकस्यैवोपपत्तित्वं सूचयितुं प्राक् व्याख्येति पारमार्थिकम् । व्युत्क्रमव्याख्याभिप्रायं दर्शयितुमाह * अथ वेति * नन्वेवं पृथगस्य हेतुत्वे अर्थवत्त्वेनैवोद्भित्पदस्य प्रवृत्तिविशेषो दर्शितः । किमपरमस्य प्रवृत्तिविशेषोपन्यासेनेति * आह ततश्चेति * स्वात्मनि क्रियाविरोधादौपचारिकभेदाश्रयणेनोद्भित्पदमात्मनः प्रवृत्तिविशेषकरम्प्रागुक्तमित्यपरितोषादिह विधिपुरुषयोरित्युक्तम् । नामधेयानर्थक्यप्रतिपादकं यदि चेति भाष्यमाक्षिपति * नन्विति * समधत्ते * नैतदिति * श्लोकं व्याचष्टे * यदेति * किमपरमित्यनेन धातूक्तैव यागव्यक्तिर्नाम्नाभिधेया ततश्चानर्थक्यमित्येवं सा चेति व्याख्यातम् । अर्थेत्यनेन जातिश्चेद्धातुनाश्रिता ततः सामानाधिकरण्यात्तन्नामतैव प्रसज्येत सा चानिष्टेत्युत्तरावयवो व्याख्यातः विशेषस्यान्यत सिद्धिसिद्धान्तिनो ऽप्यभिमतां दर्शयति * सिद्धत्वादेव चेति * विशेषस्यान्यतो ऽसिद्धौ तत्प्रतिपत्त्यर्थं नामधेयस्यावश्यविधेयत्वापत्तेस्तन्निरासो न युज्येत इत्याशयः। ननु विशेषसिद्धेर्नामधेयाधीनत्वे ऽप्यवयवशक्त्यनुसारेणैव कर्मणयपि प्रवृत्तिसिद्धेः । संज्ञासंज्ञिसम्बन्धविधिनिरासार्थं तद्भाष्यमित्याशङ्क्याह * यदा चेति * संज्ञासंज्ञिसम्बन्धविधिशून्येन लौकिकेनावयवशक्त्यनुसाररूपेणापि प्रका-

२८३।१

विज्ञप्तिः ।

एस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः
ीसकाक्षरैरुत्तमेषु पत्रेषु एक स्तबको मुद्रयित्वा प्रकाश्यते ।
कस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
ाचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण,
र्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्यच्च
शास्त्रदृश्वानो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयैः ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं
वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १
(६) भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
न्यायमकरन्द । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(११) वेभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः (न्यायः) ४
(१२) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१३) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ४

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

THE CHOWKHAMBA SANSKRIT SERIES, BENARES.

This Monthly Magazine consists of very rare and invaluable ancient Sanskrit works on Vedic Literature, Hindu Philosophy, different sciences, general literature and Purânas &c. that have never been published before. The monthly issue of this Magazine dealing with one subject contains 100 pages of Demy octavo size, printed neatly in beautiful types on good thick paper, after being carefully corrected by the Pandits of the Government Sanskrit College Benares and other learned men.

The works included in the Magazine hitherto issued and those in course of preparation for publication are as follows:—

Names of Books,	*Fasciculus ready for Sale*
1. Sanskâraratnamâlâ, by Gopînâtha Bhatta. (Sanskâra)	2.
2. Shabdakoustubha, by Bhattoji Dikshita. (Vyâkarana)	10.
3. Sloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Parthasârathi Misra. (Complete) (Mîmânsâ)	10.
4 The Vedânta-Tattvatraya, of Sri Lokacharyya along with Bhatta-Bhasha-Prakasha of Sri Narayana Tirtha. (Complete) (Vedanta)	2.
5. Karana-Prakash, by Brahmadeva. (Complete) (Jyotisha)	1.
6. Bhatta-Chintamani, of Gaga Bhatta. (Mimansa)	2.
7. Nyaya-Ratna-Mala, of Sri Parthasarathi Misra. (Do)	2.
8. Brahma Sutra, with Commentary called Viggyanamrita (Vedanta)	6.
9 Syadwâda Manjarî, by Mallîshêna with a Commentary by Hêmchandra, (Jaina Dars'ana)	2.
10. Siddhitrayam by Yamun Muni. (Vedanta)	1.
11. Nyâya-Makarand, of Sri Anand-Bodh Bhattarkacharyya with annotations by Chit-Sukh Muni. (Do)	1.
12. Vibhaktyartha-Nirnaya, By M. M. Sri Girdhara Upadhyaya. (Nyaya)	4.
13. Vidhirasâyana, of Appaya Dikshita. (Mimansa)	3.
14. Nyayasudha, A commentary on Tanravartika, By Pandit Someshwara Bhatta. (Mimansa)	4.

FOR INDIA, BURMA & CEYLON.

Annual subscription (in advance)	Rs	7	8 0
Single copy	„	1	0 0

FOR FOREIGN COUNTRIES.

	£.	s.	d.
Annual subscription (in advance) ...	0	15	0
Single copy	0	1	9

Postage free.

To be had from:—

THE

CHOWKHAMBA SÂNSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA.

BY

PANDIT SÔMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS V.

PUBLISHED AND SOLD BY THE SECRETARY,

VKHAMBÂ SANSKRIT BOOK-DEPOT.

BENARES.

:—OTTO HARRASSOWITZ, LEIPZIG

d By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

181.43
S69N
F5.

Registered According to Act XXV. of 1867.

श्रीः

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—५०

रेणोद्भिदादिपदानां विशेषवाचित्वाभ्युपगमे तत एव विशेषसिद्धेर्धात्वानर्थक्यं प्रसज्येत न च सामान्योक्त्या तस्यार्थवत्त्वं विशेषान्तर्भावेनैव सामान्यसिद्धेरित्यर्थः । ननु यागविधिवाक्ये गुणस्यापि विधौ गौरवं स्यादित्याशङ्क्याह * लाघवं चेति * हेतुत्रयसङ्कलनार्थं तत्प्रतिपादकान् भाष्यावयवान् यदि गुणविधिरित्यादिभाष्यापेक्षणेन व्याख्यायोपक्षिपति यदीत्यादिभाष्येण तद्व्याचष्टे * यद्येवमिति* नेति ब्रूम इति परिहारभाष्यमाक्षेप्तुमवतारयति * अत आहेति * आक्षिपति * नन्विति * कर्मविध्यभावे गुणविध्ययोगादवश्यं कस्मिंश्चित् कर्मविधाने ऽभ्युपगन्तव्ये ज्योतिष्टोमवाक्यस्यन्निधाविति कर्त्तव्यताम्नानात् तस्याश्च कर्त्तव्यत्वलिङ्गत्वात् भूयस्त्वेनाभयश्रुतीत्यनेन न्यायेनास्य कर्मविधित्वं भविष्यतीति समाधत्ते *गत्यभावादिति * नन्वेवं सति ज्योतिष्टोमपदस्य का गतिरित्याशङ्क्य द्वेधा गतिमाह * तद्व्यावृत्तेर्चेति * नन्वेवमपि तद्विकारभूतकर्मान्तराभावात् प्रकृतिशब्दो न युक्त इत्यन्यथाक्षिपति * नन्वेवमिति * समाधत्ते * सिद्धान्तेति * प्रस्तुताधिकरणसिद्धान्ते प्रकृतित्वानभिधानादव्यक्तासु तु सोमस्येत्यत्र वक्ष्यमाणस्य चोद्भिदादियागप्रकृतित्वस्योद्भिदादिशब्दानां गुणविधित्वाभिधानविरोधित्वेनानुद्धाव्यत्वादपरितोषेणान्यथा समाधत्ते * अथ वेति * कथं दूरस्थे ज्योतिष्टोमे गुणविधिरित्याशङ्क्य * ताण्डके * ज्योतिष्टोमानन्तरमुद्भिदाद्यामनानाद् गुणविधित्वेन चासम्बद्धपदाव्यवायाभावात् सर्वत्र ज्योतिष्टोमस्य प्रकृतत्वोपपत्तेस्तत्र गुणविधित्वमसम्भवः प्रकृतित्वाभिधानेनोक्त इति भावः । यदा त्वर्थेष्व ज्योतिरित्यादिवर्ज्जमुदाहरणमिति ह्येनाधिकरणवक्ष्यमाणन्यायेन ज्योतिरादिशब्दानां गुणविधित्वाशङ्कापि विषयत्वं नेष्यते तदा तेष्वपि गुणविध्युपपत्तेर्ज्योतिष्टोममात्रे गुणविधानाभिधानमयुक्तमित्याशङ्क्य प्रकृतौ वा द्विरुक्तत्वादिति न्यायं सूचयितुं तदपेक्षया प्रकृतित्वाभिधानमित्याह*अथ वेति*अव्यापारस्य व्यापारावच्छेदं विना विधेयत्वायोगात्तस्य च व्यापारवाच्याख्यातान्वयाधीनत्वात् कारकविभक्तिं च विनाख्यातान्वयायोगात् लोकसिद्धस्यैव च गुणस्य कारकविभक्तिविनियोज्यत्वात् न स्वरूपज्ञापनार्थप्रातिपदिकार्थप्रधानप्रथमानिर्दिष्टस्य विधेयत्वं सम्भवतीत्याशयः । नन्वेवमपि ज्योतिष्टोमपदस्य नामधेयत्वं तद्वाक्येन फलसम्बन्धे व्यापृतेनापेक्षितायाः कर्मोत्पत्तेः सोमेन यजेतेत्यनेन करणादुत्पत्तिशिष्टेन सोमेन गुणविधित्वे वा तस्य प्राप्ते कर्मणि गुणफलसम्बन्धरूपानेकार्थविधाने वाक्यभेदा-

पत्तेर्ज्योतिष्टोमवाक्यस्यैव कर्मोत्पादकत्वात् उत्पत्तिशिष्टेन ज्योतिषां द्युतिमतामग्न्यादिद्रव्याणां स्तोमेन समुदायेन ज्योतिष्टोमशब्दावयवशक्त्यनुसारावगतेनावरोधाज्ज्योतिष्टोमे गुणविधानं न युक्तमित्यन्यथाक्षिपति * नन्विति * फलपदानुरोधात् फले गुणविधिप्रतीतेर्ज्योतिष्टोमाश्रितस्य गुणस्य फले विधानं भाष्यकृतोक्तमिति मत्वा तावत्समाधत्ते * काम्यत्वादिति * एवं तावदुद्भिदादिद्रव्येण यागमभिनिर्वर्तयेदिति सन्देहहेतुभाष्यस्योद्भिद्गुणता यागस्येति च पूर्वपक्षभाष्यस्याविहिते च कर्मणि तत्र गुणविधानमनर्थकमित्याशङ्क्याभाष्यस्य चानुपपत्तिप्रसङ्गात्सर्वकाम्यप्राप्तपश्वादिफलानुवादकत्वेन च फलपदोपपत्तेरपरितोषादन्यथा समाधत्ते * अथ वेति * यद्यपि गुणविशिष्टं विहितं कर्मोत्पत्तिकेन गुणेन नैराकाङ्क्ष्यान्न तद्विरुद्धं वाक्यान्तरोपात्तं गुणान्तरं ग्रहीतुं शक्नोति तथापि यजिना गुणरहितं स्वरूपमात्रं निष्कृष्याकाङ्क्षोत्थापनेन गुणान्तरं विहितं सन्नौत्पत्तिकाद्विशिष्यतइत्यध्याहृत्य यदि तथाशब्दकारापि शब्दावृत्त्या योज्यम् ।

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् ॥ २ ॥

पूर्वसूत्रे श्रुत्यार्थाद्धा गुणविधित्वस्यानुक्तत्वादशाब्दस्य च शाब्दनिराकरणानन्वयात्तन्निरासार्थापि वा शब्दासामञ्जस्यं व्याख्योपेक्षया सूचितं भाष्यकृता त्वाकृत्यधिकरणाद्यसूत्रवन्नामधेयाधिकरणसिद्धान्ताभिधानार्थस्यापि सूत्रस्यावृत्त्या ततश्चान्यथाक्रियार्थत्वासम्भवात्पारिशेष्याद् गुणविधिरित्यध्याहारेणैतदधिकरणपूर्वपक्षेऽपि योजना शक्येति मत्वा तन्निरासार्थत्वेनापि वाशब्दो व्याख्यातः । यथा सर्वमुद्भिच्चित्रादिनामधेयमपि क्रियार्थं स्यादित्युक्ते नामधेयस्य विध्युद्देशान्तर्गतत्वेन श्रुतिस्मृत्यर्थत्वायोगात् प्रवृत्तिविशेषकरत्वाभावेन च विध्युद्देशेऽनुपयोगादानर्थक्यं स्यादित्याशङ्कामुपस्थितां निराकर्त्तुमपि वा नामधेयं स्यादिति सूत्रावयवः शेषं तु यौगिकानां कर्मसामानाधिकरण्यानिर्दिष्टानां गुणविधिनामधेयत्वविचारे सिद्धान्ताभिधानार्थमिति व्याख्येयम् । एतदेव व्याख्यानमभिप्रेत्य यदा तदर्थत्रयान्यतमार्थमिति स्थितं तदा विचार इत्याद्यधिकरणशेषभूतं विचारान्तरं कृतम् । आद्याधिकरणशेषत्वाच्चास्य विचारस्य द्वयोरधिकरणयोरित्यविरुद्धं तस्मान्नामधेयमपि क्रि-

यार्थमेव स्यादिति पूर्वसूत्रगततदर्थशब्दानुषङ्गेणैव शब्दार्थे वाशब्दाङ्गीकारेण चाद्याधिकरणशेषतया व्याख्यानस्य स्पष्टत्वात् एतदधिकरणशेषत्वाभावाच्चाव्याख्यानामिति सर्वं समञ्जसं यदुत्पत्तावपूर्वमिति सूत्रावयवमधिकरणविषया ऽभिधानार्थतया तावत्स्वयं व्याचष्टे * यदुत्पत्ताविति * प्रथमेत्यनेनोत्पत्तिशब्दस्य सामा- २८४।१
नाधिकरण्यप्राग्भाववाचितया व्याख्यानाद्वचधिकरणानिर्दिष्टेष्वग्निहोत्रादिशब्देषु तत्प्राग्भावविशेषणानर्थक्यात् अग्निहोत्रादिशब्दव्यावर्त्तकत्वं सूचितम्। अर्थान्तरेत्यनेनापूर्वशब्दस्यार्थान्तरानिरूढचित्रादिशब्दव्यावर्त्तकत्वं सूचितम्। सामानाधिकरण्यात् प्रागर्थविशेषा ऽनिश्चयोक्त्या सामानाधिकरण्यस्य नामधेयत्वनिश्चायकत्वं सूचितमिति दर्शयितुम् * सामानाधिकरण्यादित्युक्तम् * भाष्यकृता तु यस्माच्छब्दार्थं यादित्यव्ययमभिप्रेत्यापूर्वशब्दो नामधेयत्वहेतुप्रतिपादनार्थत्वेनैवमिति भाष्येण व्याख्यातः तदनुसन्धत्ते *अथ वेति * नामधेयत्वस्य सामानाधिकरण्येनैव यागविषयत्वनिश्चयात्तदनाश्रयणे वा नामधेयत्वस्यैवायोगाद् द्रव्यनामत्वे च द्रव्यस्य विधेयत्वापत्तेर्गुणविधिप्रतियोगिनो नामधेयशब्दस्य प्रधानकर्मनामधेयविषयत्वावगमात्कस्य नामधेयमिति सन्देहानुपपत्तेरपूर्वनिष्पादकत्वस्य च नामधेयनिमित्तत्वाभावाद्धोमादिसाधारण्याच्चोपलक्षणत्वानुपपत्तेरनभिमतमपि व्याख्यानान्तरं विभवार्थमाह * अथ वेति * अविधायकत्वादिति सूत्रावयवं स्वव्याख्याने हेत्वभिधानार्थत्वेनावतारणपूर्वकं व्याचष्टे * किं कारणमिति * नामधेयत्वे प्रतिज्ञाते गुणविधित्वनिराकरणहेत्वभिधानेनाद्याधिकरणसिद्धं नामधेयत्वानां सर्वेषां गुणविधिमात्रशङ्कानिराकरणार्थान्युत्तराधिकरणानीति सूचितम्। कथं न युज्यतइत्यपेक्षायां फले तावद् गुणविधौ पञ्चदोषानाह * फलमिति * यजिपरेणाख्यातेनोद्दिदा पशून्भावयेदिति परपदयोः सम्बन्धविधानम् उद्दिदा यजेत पशुकाम इति च व्यवधानेनाम्नातयोः सम्बन्धकल्पना धातोर्विध्यनुपयोगित्वेन प्रत्ययानुग्रहमात्रार्थत्वात् पारार्थ्यं काम्यत्वाच्च नित्यस्य सोमेन यजेतेत्युत्पत्तिवाक्यविशिष्टस्य सोमस्य बाधः कृशरादिवच्च यागसाधनत्वेनाप्रसिद्धेनाभक्षेण याग इत्यर्थः ।ज्योतिष्टोममात्रे गुणविधौ फलपदानर्थक्यं सोमेन सह विकल्प इति द्वौ दोषौ फलविशिष्टे तु ज्योतिष्टोमे गुणविधौ वाक्यभेदः सामान्यशिष्टस्य च सोमस्य विशेषशिष्टेन खनित्रादिना बाध इति द्वौ दोषौ परपदार्थविधानात् प्रत्ययव्यापारस्य विप्रकर्षः ! धात्वर्थे च गुणविधानात् धातोः पारार्थ्यं अभक्ष्येण च

याग इति दोषत्रयम् । द्वयोस्तुल्यमिति द्वेधा यागे गुणविधिं विकल्प्य पञ्चदोषानाह * तथेति * विशिष्टविधावपि विशिष्टस्यापदार्थत्वेन सर्वेषां नामधात्वाख्यातानां तत्समर्पणार्थत्वात् पाराथ्यं विशेषणविधिं च विना विशिष्टविध्ययोगादनेकविधिशक्तिकल्पना उद्भिच्छब्दस्य च द्रव्यविशिष्टयागपरत्वान्मत्वर्थलक्षणाविधिसामर्थ्याच्च तृतीयान्तधात्वर्थावगतेस्तुल्यविभक्तित्वेनावगम्यमानस्यैकार्थवृत्तित्वस्य त्यागो ऽभक्ष्ययागश्चेति पञ्चदोषानाह * तथेति * उपसंहरति * तस्मादिति * एतच्च नामधेयत्वसिद्ध्यर्थं गुणविधित्वनिराकरणं भाष्यकृतापि मत्वर्थलक्षणादोषोपन्यासेन कृतत्वान्नास्माकमसम्बद्धाभिधायितामापादयतीत्याह * तदिति * श्रुतिश्चेति भाष्येण सौत्रमुत्पत्त्याख्याद्यभावविकारगतप्राथम्यलक्षणगुणयोगेन श्रुतिवृत्तिपरं व्याख्याय तद्व्यतिरेकप्रतिपादनार्थत्वेन गुणविधौ मत्वर्थलक्षणोपन्यासान्नामधेयत्वोपपादनार्थेनोत्पत्तिशब्देनैवार्थाद् गुणविधौ मत्वर्थलक्षणोक्तेति सूचितमिति न भाष्यस्याप्युत्सूत्रभिधानोपालम्भः विधानायोद्भिदादिश्रुतिः खनित्रादीन् वक्ष्यति यजिसामानाधिकरण्यार्थं च तद्वतो यागान् लक्ष्येदिति युगपत् श्रुतिलक्षणापत्तिरित्यर्थः । एवं त्वाख्यातद्वयान्वयार्थं चकाराध्याहारापत्तेः शत्रन्तं पाठान्तरमुक्तं यागेनेत्यादि भाष्यस्य श्रुतिश्चेत्यादिना सह पौनरुक्त्यमाशङ्क्य विवेकमाह * प्रातिपदिकेति * समुच्चयवाचिचशब्दाभावात् युक्त्यन्तरत्वं न युक्तमित्याशङ्क्य किं च शब्दाध्याहारेण यागेन कुर्य्यादिति व्याचष्टे * किं चेति * ननु यागानुवादेनात्र गुणविधानस्य पूर्वपक्षत्वाद् गुणविधौ च तस्य साध्यत्वेनानुवादान्न करणतेत्याशङ्क्य *अनुवादे वे त्युक्तम्* अनुवादो ऽप्यपूर्वसाधनांशे गुणं विधातुं यद्यागेन कुर्यादित्येवमेव स्यादित्याशयः । नन्विति-भाष्येणोद्भिच्छब्दस्यावयव्युत्पत्त्योर्ध्वविदारणसमर्थद्रव्यवाचित्वप्रसिद्धेस्तत्त्यागेनाप्रसिद्धकर्मवाचित्वकल्पना निष्प्रमाणिका तृतीयानिर्देशस्य व्रीह्यादिषु कर्मवाचित्वाभावे ऽपि दर्शनेन साधकत्वादित्याशङ्क्योच्यतइत्यनेन कोकिलः पिक इत्यादौ लोके प्रसिद्धसामानाधिकरण्येनाप्रसिद्धार्थनिर्णयदर्शनाद् व्रीह्यादिवच्च बाधकबलाद्विपरीतप्रसिद्ध्यभावात् तृतीयानिर्देशो ऽप्यत्र प्रामाणमेवेत्यभिप्रायेण परिहारमुक्त्वा कथं तृतीयानिर्देशात्कर्मवाचितावगम्यतइति
२८५।२ पृष्टे करणवाचिनो हीत्युत्तरं दत्तं तदाक्षिपति * यदिति * इह गुणाश्रमरुणिमानममूर्त्तं सन्तं क्रियायाः करणमिति शब्द आह यत्करणाभिधायिन्या तृतीयया विभक्त्या संयुज्य निर्देशात्करणायेत्या-

दिभाष्यान्तरविरुद्धं प्रातिपदिकस्य करणवाचित्वाभिधानमित्यर्थः । करणशक्त्यधिष्ठानलक्षणार्थो ऽयं करणशब्द इति परिहरति * नैष इति * करणशब्दार्थविषयो वायं करणशब्द इति परिहारान्तरमाह * अथ वेति * करणशब्दवदुद्भित्प्रातिपदिकस्य करणशक्तिविशिष्टद्रव्यानभिधायित्वाद्यादृशतादृशशब्दौ द्रव्यरूपत्वमात्राभिप्रायौ व्याख्येयौ करणशब्दो यादृशरूपमर्थं ब्रवीति तादृशस्य द्रव्यरूपस्य प्रातिपदिकं वाचकमित्यर्थः। ननु करणशब्दे ऽपि करोतिना क्रियाभिधानात् ल्युटा च करणशक्त्यभिधानात् न द्रव्यवाचितास्तीत्याशङ्क्याह * कृदन्तेनेति * द्रव्योपसर्जनत्वेन करणशक्तिर्ल्युटोच्यते न तृतीयावन्निष्कृष्येत्यर्थः । एतदेवोपपादयति * तथा चेति * कथं कारकान्तरयोगमात्रेणाप्राधान्यं करणशक्तेरित्यपेक्षायामाह * अन्यथा हीति * कारकप्राधान्येन तदुपसर्जनत्वात् द्रव्यस्यैकेन कारकेण वशीकाराद्यथा घटमानयेति कर्मकारकेण वशीकृतस्य घटस्य घटेनेत्यादिपदान्तरोपात्तेनापि द्रव्यस्य कारकान्तरेण योगो न भवति तथा ल्युट्प्रत्ययोपात्तं करणकारकं प्रत्युपसर्जनस्य करणशब्दवाच्यस्यापि द्रव्यस्य कारकान्तरयोगो न स्यादित्यर्थः । ननु द्रव्योपसर्जनत्वात् कारकान्तरयोगासम्भवे ऽपि ल्युट्प्रत्ययोक्तस्य करणकारकस्यैव कारकान्तरयोगो भविष्यतीत्याशङ्क्याह * शक्तेस्त्विति * कारकं हि शक्तिस्तस्याश्च प्रतिकार्यं व्यवस्थिताया एव कल्पितत्वात् न व्यवस्थासिद्धये शक्त्यन्तरकल्पना युक्तेत्याशयः। एतमेव परिहारमुपसंहरति * तस्मादिति * शक्तिरुपसर्जनमस्येति विग्रहः । एतदेव भाष्यं व्याचष्टे * तेनेति* तृतीयानिर्देशाभावात्कथं यागस्य करणतेत्याशङ्क्य भावार्थाधिकरणवक्ष्यमाणतोक्ता नैतद्युक्तमित्याशङ्क्याभाष्यं तात्पर्यतो व्याचष्टे * ननु चेति * करणभूतयागैकवाक्यत्वविशिष्टतृतीयान्तत्वस्य हेतोर्यागवाचित्वे साध्ये नैकान्तिकत्वप्रदर्शनार्थत्वेन व्रीहिसोमवदिति दृष्टान्तं व्याचष्टे * यथैवेति * कर्तृव्यापारव्याप्याधीनत्वात्करणत्वस्य तदाक्षिप्तकर्तृव्यापारव्याप्यत्वरूपानीप्सितकर्मत्वापेक्षया व्रीह्यादिशब्दानां यजिना सह वैय्यधिकरण्ये भिन्नार्थत्वे ऽपि यथा करणभूतयागैकवाक्यत्वविशिष्टं तृतीयान्तत्वमविरुद्धमेवमत्रापीत्यर्थः । हठशब्दं व्याचष्टे * हठ इति * ननूद्भिच्छब्दस्य यागवाचित्वं लौकिकाप्रसिद्धमपि अत्र नैव वाक्येन विधास्यतइत्याशङ्कानिरासार्थमपि चेति भाष्यं स्पष्टत्वान्न व्याख्यातं नोद्भिच्छब्दस्याप्रसिद्धमेव यागनामधेयत्वं करणभूतयागैकवाक्यत्व-

विशिष्टतृतीयान्तत्वेनाज्ञातं ज्ञाप्यते किं तु द्रव्ये यागे वावयवव्युत्पत्तितुल्यत्वात्सन्देहे सति सामानाधिकरण्येन लोकनिर्णीतयोपायेन निर्णीयतइति परिहाराभिधानार्थं न नामधेयं विधायिष्यतइति भाष्यमर्थतो व्याचष्टे * तदुच्यतइति * उद्भिच्छब्दस्यावयवव्युत्पत्त्यपर्यालोचने द्रव्यवाचित्वस्याप्यज्ञानात् पर्यालोचने वा सन्देहादुभयोपादाने ऽपि क्रादिपदमर्थविशेषवाचित्वेनाज्ञातं सन्दिग्धं चाक्षादिपदं कोकिलः पिको ऽधिदेवनो ऽक्ष इत्यर्थविशेषवाचित्वेन प्रसिद्धेरपृथक्श्रुतिसामानाधिकरण्यनिर्दिष्टं सदर्थविशेषवाचित्वेन निर्णीयमानं लोकं दृष्टमित्युद्भिदादिपदमपि तथा निर्णीयते । यत्त्वर्थविशेषवाचित्वेन निरूढं नियतं तत्प्रसिद्धिपदसामानाधिकरण्ये ऽपि स्वार्थान्नापनीयतइत्यर्थः । अनेन चानिरूढत्वविशेषणाद्धेतोरपि व्यभिचारः परिहृतः । श्लोकं व्याचष्टे * व्रीह्यादयो हीति * ननूद्भिच्छब्दस्य स्मृत्यनुसारेणोदूर्ध्वं विदारणसमर्थद्रव्यवाचित्वावधारणात् प्रकाशनार्थत्वे तु स्मृत्यभावादतुल्यत्वेन सन्देहाभावात् कथं सामानाधिकरण्यान्निर्णय इत्याशङ्क्याह * प्रधानं चेति * किमुद्भित्प्रातिपदिकस्यावयवार्थानुसारात् द्रव्यवाचितास्तु तृतीयानुसाराद्वा यागवाचितेति सन्देहे ऽवयवार्थस्य गुणत्वात् तदबाधेन प्रधानभूततृतीयार्थानुसाराद्यागवाचितैव न्याय्येत्याशयः * अपि चेति * भाष्योक्तवाक्यभेदाशङ्कानिरासार्थमध्ये तदेवं भाष्यम् उद्भित्सञ्ज्ञकेन यागेन पशुन्भावयेदित्येवं नामधेयस्यापि यज्यर्थविशेषणत्वेन विधेयत्वात् अयुक्तमाशङ्क्य धूम एवाग्नेर्दिवा ददृशे नार्चिरितिवद्यथा गुणविधौ बहुविधानं नैवं नामधेयपक्षे ऽस्तीत्यौपचारिकार्थत्वेन व्याचष्टे *किं चेति * शङ्कान्तरनिरासार्थं भाष्यावृत्तिसूचनार्थः किंचशब्दः यश्च नामधेयपक्षे वाक्यभेदः शङ्कितः सो ऽप्ययुक्तः प्रत्युत तस्मिन्नेव पक्षे विधिलाघवेन गुणविधिपक्षवद् गौरवलक्षणवाक्यभेदाभावान्नामधेयविशिष्टयागभावनारूपैकार्थविधेश्चावृत्तिलक्षणवाक्यभेदस्यानाशङ्क्यत्वादित्यर्थः । ननु यथा नामधेयपक्षे प्रातिपदिकस्य यज्यर्थविशेषकत्वेन विधिसम्बन्धे सत्याख्यातावगतयोः संख्याकारकयोर्विभक्त्यानुवादोपपत्तेर्लाघवं तथा गुणविधिपक्षे ऽपि यागोद्देशेन विहितस्य द्रव्यस्य योग्यतया करणत्वावगमात् प्राथम्येन चैकत्वावगतेरनुवादो भविष्यतीत्याशङ्क्याह * त्वत्पक्षे हीति * कारकान्वयं विना प्रातिपदिकार्थस्य क्रियान्वयासम्भवेन विधेयत्वायोग्यत्वात् श्रुतायाश्च संख्यायाः कारकाङ्गत्वाभावात् तत्रैकत्वमयज्ञाङ्गभूतमित्यनेन न्यायेनाविवक्षापत्तेः प्रातिपदिकार्थैकत्वविशिष्टं करणत्वमेव

२८६।३

गुणपक्षे विधेयं स्यादित्याशयः। ननूद्भिच्छब्दस्य भाष्यकारोक्ते प्रकाशने स्मृत्यभावात् कर्मणश्चाप्रकाशकत्वात् अवयवद्वारेणापि कर्मण्यप्रसिद्धेर्नामधेयत्वायोगात् अगत्या गौरवाश्रयणमदोषमित्याशङ्क्याह * तस्मादिति * उक्तेन यजिसामानाधिकरण्यप्रश्नानानुरोधवृत्तिविधिलाघवलक्षणेन हेतुत्रयेण कर्मनामधेयत्वावधारणे प्रवृत्तिनिमित्तं विना तदनिर्वाहाद्यथासम्भवे कस्मिंश्चिन्निमित्ते नामधेयत्वनिर्वाहायान्विष्यमाणे भूविदारणस्य भूनिखातनिध्यादिप्रकाशनहेतुत्वाद्विदारणवाचिनो भिदेर्लक्षणया तत्कार्ये प्रकाशने प्रवृत्युपपत्तेरज्ञाते च वस्तुनि केन चित्प्रकाशिते ऽनेनेदमुद्भेदितमिति प्रयोगदर्शनादुत्पादकस्य च कर्मणः प्रकाशनहेतूत्पत्तिकारणत्वेनोपचारात्प्रकाशकत्वव्यपदेशोपपत्तेर्युक्ता पशुप्रकाशनस्योद्भिच्छब्दप्रवृत्तिनिमित्ततेत्याशयः। या भाष्यकृतावयवद्वारेण कर्मण्यपि प्रसिद्धिरुक्ता सा तस्मादनन्तरोक्ताद्धेतुत्रयान्नामधेयत्वावधारणे सति तदन्यथानुपपत्तिलभ्यत्वादप्युपपन्नेति योज्यम्। न च सुराणां वै बलस्त मसा प्रावृतो स्माभिधानमासीत्तस्मिन् गव्यं वस्त्वन्तरासीत् तं देवा नाशक्नुवन् भेत्तुं ते ततो बृहस्पतिमब्रुवन्निमाश्च उत्सृजेति स उद्भिदेव बलं व्यच्यावयत्तं बलभिदाभिनदित्यन्वाख्यानावगतगोयुक्तबिलविवरापरपर्यायबलच्यावनद्वारस्य तद्विदारणद्वारस्य वा पशुप्रकाशनस्य निष्प्रमाणकत्वात् मुख्यवृत्त्योद्भिद्बलभिच्छब्दप्रवृत्तिनिमित्तत्वानुपपत्तेः पशुकामपदावगतपश्वाख्यफलोत्पादनं लक्षणयोद्भिद्बलभिच्छब्दप्रवृत्तिनिमित्तं वाच्यं तस्य च ज्योतिष्टोमादावपि तुल्यत्वेनातिप्रसङ्गापत्तेर्नोद्भिद्बलभिच्छब्दप्रवृत्तिनिमित्तत्वं सम्भवतीत्याशङ्क्ते * ज्योतिष्टोमादेरिति * समुदायशक्त्यैव यागविशेषवाचित्वात् नातिप्रसङ्ग इति परिहरति * नेति * सामानाधिकरण्येनैवावधारितैतद्वाक्यविहितयागाख्यविषयविशेषस्योद्भिच्छब्दस्य गवादिशब्दवद्व्युत्पत्तिनिमित्तमात्रत्वेनावयवान्वाख्यानादित्यर्थः। सम्बन्धस्याशास्त्रहेतुत्वाद्वैदिकसामानाधिकरण्यरूपप्रयोगमात्रेण समुदायशक्तिकल्पनानुपपत्तेर्न व्युत्पत्तिनिमित्तमात्रता फलोद्भेदनस्य युक्तेत्यपरितोषात्परिहारान्तरमाह * अथ वेति * यथा पङ्कजशब्दस्य विशिष्टविषयप्रयोगान्यथानुपपत्त्या पङ्कत्वैकार्थसमवेतपङ्कजननविशेषनिमित्तत्वावधारणात् व्यवस्था तथोद्भिच्छब्दस्याप्येतद्यागगतोद्भेदनविशेषनिमित्तत्वावधारणाद्व्यवस्थेत्यर्थः। गोशब्दस्य जातिनिमित्तस्यापि व्याकरणे ऽवयवान्वाख्यानात् दृष्टान्तत्वेनोपादानम्। ननु यद्यत्र भाष्ये कर्मण्यप्युद्भिच्छब्दस्य प्रसिद्धिः

सामानाधिकरण्याधीननिर्णयोपपादनार्थं विवक्षिता ततो न नामधेयं विधायिष्यतइति किमर्थमुक्तमित्याशङ्क्याह * अविधायकत्वादिति * नैतद्युक्तमित्यादिभाष्योक्तामप्रसिद्धकल्पनाशङ्कामनेन सूत्रावयवेन निरस्तां दर्शयितुमेव मुक्तमित्याशयः । यदि तु तदुच्यतइत्यादिना स्वयमाशङ्कापरिहारमुक्त्वा इदानीमेवैतद्भाष्यमेतत्सूत्रावयवव्याख्यानार्थत्वेन व्याख्यायते ततः स्वयमुद्भावितशङ्कापरिहारानभिधानात् भाष्यकृतः शून्यहृदयतापद्येतात एव टुप्पिकायामेतद्भाष्यव्याख्यानार्थं क्रियायोगेन प्राप्तत्वादिति द्वयोरपि परिहारावित्युक्तम् । वाक्यभेदशङ्कापरिहारे मुख्यवृत्त्यैतद्भाष्यं योजयितुमाह* सञ्ज्ञेति * यदि हि यागेन पशून्भावयेत्तस्य च यागस्योद्भित्सञ्ज्ञेति साध्यसाधनसम्बन्धसञ्ज्ञासञ्ज्ञिसम्बन्धरूपौ द्वावर्थौ विधीयेतां ततो वाक्यभेदः स्यात् सञ्ज्ञासञ्ज्ञिसम्बन्धस्य त्वननुष्ठेयत्वेन सामानाधिकरण्यावयवप्रसिद्धिभ्यामेव च सिद्धेरविधेयत्वान्न वाक्यभेदापत्तिरित्यर्थः । नन्वविधेयत्वे नामधेयस्य विध्युद्देशान्तर्भावो न स्यादित्याशङ्क्याह * नन्विति * नामधेयस्वरूपाविधाने ऽप्युद्भित्सञ्ज्ञकेन यागेन पशून् भावयेदिति तदर्थविधानाद्विध्युद्देशान्तर्भावोपपत्तिरित्याशयः। ननु विहितविधानासम्भवेनैतद्विधिर्विहितस्य यागस्य विध्यन्तरयागेभ्यो भेदावगमाद्धातुत एवानुष्ठेयत्वयोग्ययागविशेषसिद्धेरनर्थको नामधेयार्थविधिरित्याशङ्क्याह *तदधीनत्वात्वादिति * अप्रवृत्तप्रवर्त्तनात्मकविधिविषयत्वान्यथानुपपत्तिपर्यालोचनया धातोर्यागविशेषपरत्वावगमे ऽपि को ऽसौ यागविशेष इति निर्द्धारणस्य स्वरूपोक्तिमन्तरेणाशक्त्यत्वाद् द्रव्यदेवतस्य चेहाश्रवणात् नामधेयार्थविधानधीनैव निर्द्धारितविशेषसिद्धिरित्याशयः। नन्विह सामानाधिकरण्येन विशेषणविशेष्यभावस्येष्टत्वात्तस्य च भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणस्य संज्ञासंज्ञिनोरसम्भवात्तुल्यविभक्तिकनिर्देशमात्रस्य सामानाधिकरण्यस्य तु गौरश्व इतिवत्विशेषणविशेष्यभावानापादकत्वात्कथं संज्ञया संज्ञिविशेषसिद्धिरित्याशङ्क्याह *इह हीति* सामानाधिकरण्याभावे ऽपीह विशेषणविशेष्यभावान्न भेदो नान्यथात्वं किं तु विशेषणविशेष्यभाव एवेति भावे लकारः कथमित्यपेक्षायामात्मरूपेत्युक्तम् । अर्थद्वारे विशेषणविशेष्यभावे भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणसामानाधिकरण्यापेक्षा संज्ञायास्तु स्वरूपेणैव संज्ञान्तरविशेषात्स्वविषयव्यावर्त्तकत्वान्नैवं रूपसामानाधिकरण्यापेक्षेत्याशयः । ननु संज्ञयात्मविशिष्टयागाभिधाने विशेषणत्वादात्माप्यभिधीयेतेत्याशङ्कते * नन्विति *

२८७।१

प्रमाणान्तराधगतस्यापि काकनिलयानादिवद्व्यवर्त्तकत्वोपपत्तेर्नात्माभिधानापत्तिरिति परिहरति * प्रत्यक्षेति * कथं तर्हि जातिविशिष्टव्यक्त्यभिधाने जात्याभिधानापत्तिरित्याशङ्क्याह * सर्वत्रेति * शाब्दे हि व्यवहारे जातेः प्रत्यक्षेणाग्रहणात् अभिधानापत्तिरिति भावः। ननु संज्ञाया विशेषणत्वे स्वानुरक्तबुद्धिजनकत्वलक्षणत्वात्तस्य स्वरूपस्य संज्ञिन्यारोपापत्तिरित्याशङ्क्याह * न चेति * यद्यंशविशेषा गोत्वादयोऽर्थे वस्तुनि न विद्यन्ते ततो गवादिशब्दस्यैव स्वानुरूपबुद्धिजनकत्वेनार्थेऽध्यासः स्यात्तेषां तु विद्यमानानामेव गवादिशब्दैरुद्धरणमात्रं निष्कर्षमात्रं क्रियते इत्यनन्तधर्मके धर्मिण्येकधर्मावधारणे शब्दोऽभ्युपायमात्रं स्यान्नात्माध्यारोपकारणमित्यत्र प्रत्यक्षसूत्रेऽभिहितमित्यर्थः। स्वानुरूपबुद्धिजननं विना कथं शब्देनांशविशेषोद्धरणमित्याशङ्क्य तदनुवेधेनेत्युक्तम्। एतच्छब्दवाच्योऽयमित्यवधारिते यस्तेन शब्देनानुबन्धः स्ववाच्यस्य शब्दान्तरवाच्येभ्यो व्यवच्छेदस्तेनेत्यर्थः। एवं तावद्यत्राप्यनन्यपरविधिपुनःश्रवणान्यथानुपपत्त्या विध्यन्तरविहितेभ्यो यागेभ्यः स्वविषयस्य भेदसिद्धिस्तत्रापि निर्द्धारितरूपविशेषप्रतीतिर्नामधेयाधीनेत्युक्तम्। उद्भिदादिवाक्ये तु विधिपुनःश्रवणस्य फलाद्यर्थत्वसम्भवेनाभेदकत्वादनुपादेयसम्बन्धसहकृता सन्निधिलक्षणेन च प्रकरणान्तरेण दूरस्थेभ्यो भेदावगमेऽपि प्रकृताङ्गयवधायकाभावेन सन्निहिताज्ज्योतिष्टोमान्नामधेयं विना भेदासिद्धेर्नामधेया अर्थो स्वइयं विधेय इत्याह * नाम्नैवेति * भेदं विना प्रकृतिविकारभावायोगाद्विशेषणानर्थक्यापत्तेश्च प्रकृतौ ज्योतिष्टोमे इति भाष्यगतप्रकृतिशब्दवदयमपि प्रक्रियतइति व्युत्पत्त्या प्रकृतवचनः। यद्वा देवतोद्देशपूर्वकद्रव्यत्यागरूपत्वं निमित्तीकृत्य यजिप्रवृत्तेः पशूद्देदनहेतुत्वं च निमित्तीकृत्योद्भिच्छब्दप्रवृत्तेर्भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणसामानाधिकरण्यनिबन्धनैव विशेषणविशेष्यता सम्भवतीत्याह * अथ वेति* यथारुणैकहायन्यादौ सामानाधिकरण्यनिबन्धनाविशेषणविशेष्यता नद्वदेवात्रापीत्यर्थः एतच्च यजेत पशुकाम इत्येतावतासिद्धत्वात्पशूद्देदनहेतुना यागेन पशून् भावयेदिति नामधेयार्थविध्यानर्थक्यापत्तेः प्रौढिमात्रेणोक्तम[2]। एवमाकृतेरविधेयत्वादिति पूर्वपक्षवार्त्तिकोक्तं नामधेयानर्थक्यं परिहृत्य यदा च लौकिकेनापि प्रकारेणेत्यनेनोक्तम्। नामधेयार्थविधौ यज्यानर्थक्यं प-

१ ह्यर्थे इ० २ पु० पा०।

२ त्येत्युक्तमिति २ पु० पा०।

रिहरति * न चेति * अवयवव्युत्पत्तिपर्यालोचनयोद्भिच्छब्दस्यान्योत्पादानुकूलस्वभावविध्यन्तरविहितकर्मव्यावृत्तकर्मविशेषनामत्वावगमे ऽपि यागरूपता कर्मणो यज्यधीनेति दर्शयितुं यागशब्दः । नन्वेवं सतीतरेतराश्रयत्वं शङ्कनीयं परस्परसन्निधानलभ्यत्वेनान्योन्यनियमस्यैकैकाधीनत्वानभ्युपगमादित्याह * परस्परेति * ननु विधानायोग्यत्वेनैव सामान्यव्यावृत्तिसिद्धेर्न तदर्थं नामधेयसन्निधानापेक्षा इत्याशङ्क्य प्रकृतस्यैव फलाद्यर्थं पुनःश्रुत्युपपत्तेर्न तद्व्यावृत्तिर्नाम्ना विना सिध्यतीति दर्शयितुं प्रकृतौ वेत्युक्तम् । एतदेवोपसंहरति * तस्मादिति * ननूभयविधाने वाक्यभेदापत्तेर्नामधेयस्यानुवादताङ्गीकार्येत्याशङ्क्याह * विशिष्टेति * वाक्यभेदं विनाप्युभयविध्युपपत्तेर्न तद्भयेनानुवादताभ्युपगन्तव्येत्यर्थः । नामधेयार्थस्य विधेयत्वे नामधेयत्वस्य गुणविधिप्रतियोगित्वे ऽपि विधित्वमात्रप्रतियोगित्वाभावात् तद्भयेन परेषां विध्यादित्रयातिरेकवर्णनमयुक्तमेवेत्याह * एवमिति * यस्त्वित्यादिभाष्येणोद्भिदादिशब्दो नामधेयत्वे सत्यप्रवृत्तिविशेषकरत्वादनर्थकः स्यादिति पूर्वपक्षोक्तं नामधेयानर्थक्यमनुभाष्य गुणफलोपबन्धेनार्थवत्त्वमुक्तं तस्योपलक्षणार्थत्वं दर्शयितुमाह * अशेषेति *

संज्ञायाः कर्मभेतृत्वं द्वितीये यद्वदिष्यते ।
यच्चेष्टौ यागषट्कस्य फलवत्त्वं वदिष्यते ॥
सोमयागस्य च ज्योतिष्टोमे ऽध्याये चतुर्थके ।
यश्चाग्निहोत्रधर्माणां प्रवेशः कौण्डपायिने ॥
सप्तमे वक्ष्यते सर्वं तन्नाम्ना फलमिष्यते ।
वाक्यान्तरोत्पादिते च कर्मण्यङ्गं विधीयते ॥
फलं वा यत्र तत्रास्मान्नर्त्ते कर्मविशेषधीः ।
द्रव्यदेवतशून्यायां यागोत्पत्तौ च नामतः ॥
विना निर्द्धारणाभावाद्विशेषस्याविधेयता ।
धर्मप्रमोपयोगित्वमप्यस्येत्थं च सिध्यति ॥
यागेनानेन यक्ष्ये ऽहं तेन याजय मामिति ।
नाम्ना विनैवमादिश्च व्यवहारो न सिध्यति ॥
मीमांसाविधिवाक्यार्थज्ञानानुष्ठानलक्षणे ।
त्रिविधे व्यवहारे ऽस्मिन्सर्वस्मिन्नामकारणम् ॥

ननु विधायकवाक्यनिर्देशनाप्यर्त्विग्वरणादिषु यागविशेषाख्यानासिद्धेः कथं नाम्नामशेषव्यवहाराङ्गतेत्याशङ्क्याह * न हीति * विधिवाक्यं पठित्वानेन विहितो यो याग इत्याख्याने गौरवापत्तेर्ना-

मेधेयादन्यो लघुराख्यानोपायो नास्तीत्यध्याहारेण योज्यम । भा- २८८।१
ष्याभिप्रेतमर्थमुक्त्वा स्वरूपतो व्याचष्टे * दर्शपूर्णमासाविति *
तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * एवं जातीयक-
शब्देन सौत्रोत्पत्तिशब्दसूचितं सामानाधिकरण्यनिर्दिष्टत्वम् अपू-
र्वशब्दसूचितं च यौगिकत्वं विवक्षितम् ॥ १ ॥

॥ चित्रादिशब्दानां यागनामताधिकरणम् ॥ २ ॥

यस्मिन् गुणोपदेशः प्रधानतो ऽभिसम्बन्धः ॥३॥

इत्युदाहरणमितीतिकरणेन भाष्यकृता गुणविधौ प्रसजद्वा-
क्यभेदानां वाक्यानामुदाहरणत्वं यस्मिन् गुणविधौ प्रसजद्वाक्यभे-
दानां वाक्यानामुदाहरणत्वं यस्मिन् गुणोपदेश इति सूत्रावयवसू-
चितं दर्शितं तदिहापि कर्मसामानाधिकरण्येनैव गुणविधित्वनिरा-
ससिद्धेः । कारणान्तरोपन्यासानर्थक्यात् अयुक्तमाशङ्क्य सामा-
नाधिकरण्यहेतुकनिर्णयाविषयत्वं दर्शयितुमाह * इदानीमिति *
अयौगिकशब्दव्याख्यानार्थं लोकरूढेष्वित्युक्तं कस्मिन्नर्थे लोके रूढा
इत्यपेक्षायां जातीत्युक्तम् । आज्यशब्दो घृतजातौ रूढः पृथुशब्दः
शरीरावयवजातौ चित्राशब्दो गुणे पवमानशब्दो ऽपि पवनक्रियायो-
गनिमित्तत्वात्सर्वत्र यौगिकैर्द्रव्यमेवाभिधीयतइति न्यायात्पावनक्रि-
याकर्त्तरि रूढः । अनेन च यदुत्पत्तावपूर्वमिति सूत्रावयवनिर्दि-
ष्टस्य सामानाधिकरण्यनिर्देशान्निरूढत्वविशेषणद्वययुक्तस्य पूर्वाधि-
करणविषयस्यात्रानिरूढत्वविशेषणाभावेनाभावात् पूर्वाधिकरणप्र-
त्युदाहरणरूपेण पूर्वस्मिन्प्रत्यवस्थानादनन्तरसङ्गतिरप्युक्ता भवति
एतच्च न चैते कर्माणि प्रसिद्धा न च यौगिका इत्यत्र भाष्ये स्पष्टयि-
ष्यते । ननु निरूढार्थत्वेनाज्ञातसन्दिग्धत्वाभावात्सामानाधिकर-
ण्यानिर्णयत्वे ऽपि प्रधानभूतकरणत्वानुरोधात्कर्मवाचित्वानुमानं भ-
विष्यतीत्याशङ्क्याह * न हीति * प्रसिद्धिद्वयस्यापि कल्प्यत्वे प्र-
धानाश्रितयेतरा बाध्यते न तु कल्पनायाः प्रधानाश्रितयापि क-
ल्प्यया बाधो युक्त इत्याशयः । आज्याद्युहरणान्याक्षिपति * न-
न्विति * ननु चित्रावाक्यवदनुत्पत्तिवाक्योदाहरणे ऽपि न दोष
इत्याशङ्क्याह * तथा हीति * उत्पत्तिशब्देनेह कर्मनिर्देशो विव-
क्षितः । तदभावे च निर्विषययोर्गुणनामधेययोरवधारणासम्भवा-
न्न व्यवहारङ्गत्वं स्यादिति भावः । अतः सैवोदाहरणाय क्षमा यु-
क्तेत्यर्थः । नातिप्रयत्नेनेति समाधानमाह * सा त्विति * उदाह-
र्तव्याप्युपपत्तिर्यत्रोदाहृता तत्सूत्रकृता गुणवाक्यस्योदाहरणायाश्रि-

तत्वादित्यर्थः । सूत्रकारस्यापि पर्यनुयोगसाम्येनैतत्समाधानं दूषयति * अथेति * तेषामेव परिहारमाह * यत्रेति * उत्पत्तिवाक्योदाहरणे फलविशेषस्योक्तत्वादेतत्परिहारापरितोषेण परिहारान्तरमाह * पूर्वपक्षेति * उत्पत्तिवाक्ये पक्षद्वयोपपादकहेतुसद्भावे तत्रैव पूर्वोत्तरपक्षौ विचार्य पक्षद्वयबलाबलनिर्णयार्थं वाक्यान्तरगतेनापि वाक्यभेदेन पूर्वपक्षनिराकरणोपपत्तेरत्राप्यपरितोषात्स्वमतेनान्यथा परिहरति * अथ वेति * नामधेयत्वे तावदन्यतः सिद्ध्यपेक्षामुपपादयति * घृतेति * निरूढार्थत्वात्सामानाधिकरण्यमत्रानिर्णायकमित्याशयः । किं च न नामधेयं विधायिष्यतइत्यनेन न्यायेन नामधेयार्थविधाने ऽपि सञ्ज्ञासञ्ज्ञिसम्बन्धस्यानुवाद्यत्वात् अन्यतः सिद्धिरपेक्षणीयेत्याह * यान्याज्यानीति * ननूद्भिदादिवदुत्पत्तिवाक्यगतकर्मसामानाधिकरण्येनैव कर्मसंज्ञात्वसिद्धेर्नान्यतः सिद्ध्यपेक्षेत्याशङ्क्य * सहापीत्युक्तम् * समानाधिकरणकर्मनिर्देशस्योत्पत्तिशब्देन विवक्षितत्वात्सत्यपि सामानाधिकरण्ये प्रवृत्तिनिमित्तं विना कर्मनामत्वानिर्वाहात् पशुकामादिवच्चेहोत्पत्तिवाक्ये प्रवृत्तिनिमित्तद्योतकशब्दाभावादन्यतः सिद्ध्यपेक्षेत्यर्थः । सहैव दशभिः पुत्रैर्भारं वहति गर्दभीतिवत्सहयोगिन्या तृतीयया सप्तम्यर्थलाभः । ननु सामानाधिकरण्येनावधारिते नामधेयत्वे कथमनेनाभिधीयतइति प्रवृत्तिनिमित्तापेक्षायां तद्बलेन कस्य चित्कल्पयितुं शक्यत्वात्तदर्थं च वाक्यान्तरोदाहरणे ऽर्थवादस्योदाहार्यत्वापत्तेरपरितोषात्स्वमतेन रूढिपरित्यागायान्यतः सिद्ध्यपेक्षामाह * उत्पत्तीति * उत्पत्तिवाक्ये सामानाधिकरण्यात्स्तुतिनामधेयतया स्थितमवगतमाज्यादिपदं बाधकरूढित्यागेन स्तुतिनामत्वनिर्वाहायान्यतः सिद्ध्यपेक्षमित्यर्थः । यद्वोत्पत्तिवाक्यस्थस्य आज्यादिपदस्याविचार्यत्वं पूर्वमुक्तम् । इदानीमुत्पत्तिवाक्यस्थमेवाज्यादिपदं विचारयितुमुपायत्वेन गुणवाक्यस्थमेवाज्यादिपदं विचारयितुमुपायत्वेन गुणवाक्यस्थाज्यादिपदविचार्यतोच्यतइति विवेकः । गुणविधित्वे ऽन्यतः सिद्ध्यपेक्षामुपपादयति * गुणेति * आज्यशब्देन तत्प्रकाशकान्मन्त्रालुक्षयित्वा तेषां स्तोत्रसम्बन्धकारिवाक्यमाज्यप्रकाशकैर्मन्त्रैः स्तोतव्यमित्येवंविधमपेक्षणीयमित्यर्थः । नन्वाज्यैः स्तुवतइत्यत्रैवाज्यशब्दलक्षितानां मन्त्राणां स्तुतिकरणत्वेन विध्युपपत्तेर्न वाक्यन्तरापेक्षेत्याशङ्क्याह * इहेति * ननु वाक्यान्तरप्राप्तस्तोत्रमन्त्रसम्बन्धानुवादे ऽपि मत्वर्थलक्षणा तुल्येत्याशङ्क्याह * अनुवादत्वे त्विति * प्रमाणान्तरानु- २८९।१

सारित्वादनुवादे प्रसज्यमानापि लक्षणा न दोष इत्यर्थः । नन्वा-
वाचकत्वे ऽपि घृतस्य सन्निधानमात्रेण स्मारकतया स्तुत्यु-
पयोगित्वाद्रथवोपेण माहेन्द्रस्तोत्रमुपाकरोतीतिवत्करणत्वोप-
पत्तेर्नाज्यशब्देन मन्त्रलक्षणापत्तिरित्याशङ्क्याह * तेनेति *
येन करणेन विधौ मत्वर्थलक्षणादोषो नानुवादे तेन
कारणेन स्तोत्राणामाज्यलक्षितमन्त्रवत्तावदाज्यवत्ताप्यन्यत एव
लब्धव्येत्यर्थः । पक्षद्वये प्यन्यसापेक्षत्वमुपसंहरति * तदिति *
तस्मादित्यर्थे तदित्यव्ययम् । आज्यादिशब्दार्थानिर्णयं तर्ह्युत्पत्तिवा-
क्यस्य कीदृशो ऽर्थ इत्यपेक्षायामाह *ततश्चेति * गुणवाक्योदाहर-
णकारणमुपसंहरति * इतीति * उत्पत्तिवाक्यस्थस्यैवाज्यादिशब्द-
स्यान्यतो ऽर्थनिर्णयार्थे गुणवाक्योदाहरणमित्यर्थः । पवमानशब्दो-
दाहरणं पूर्वन्यायसिद्धत्वेनाक्षिपति * पवमानशब्दस्त्विति * यौ-
गिकत्वे ऽपि पवनक्रियाकर्त्तरि निरूढत्वात् स्तोत्रस्य च पवमान-
क्रियाकर्तृत्वासम्भवान्न पूर्वन्यायेन सिद्धिरिति परिहरति * अ-
परे त्विति * ननु पवमानशब्दवाच्यसोमप्रकाशकमन्त्रसाध्यत्वात्
स्तोत्रे ऽपि पवमानशब्दप्रसिद्धेः सन्देहे सत्यस्त्येव पूर्वन्यायविषय-
तेत्याशङ्क्याह * सोमो हीति * तत्रावयवप्रसिद्ध्यभावाल्लक्षितल-
णा स्यात् सा च मत्वर्थलक्षणातो दुर्बलेति सामानाधिकरण्येन नाम-
धेयत्वासिद्धेर्न पूर्वन्यायसिद्धान्त इत्यर्थः। नन्वेवं सति मत्वर्थलक्ष-
णाप्रसङ्गेनात्र गुणविधित्वनिरासासिद्धेः । केन हेतुना निरास इ-
त्याशङ्क्य * वाक्यभेदेन वेत्युक्तम् * अनेनं गुणविधौ प्रसङ्गाद्वाक्य-
भेदानामिहोदाहरणत्वं वाक्यभेदपरिहारसम्भवासम्भवाभ्यां च
सन्देह इत्यपि सूचितम् । प्रसिद्धेरिति पूर्वपक्षभाष्यं व्याचष्टे *तत्रे-
ति * प्रवृत्तिविशेषकरत्वे ऽर्थवत्त्वं हेतुः वाक्यवत्त्वरूपे वार्थवत्त्वे
प्रसिद्धिर्हेतुः त्रयो ऽपि वा गुणविधित्वे साक्षाद्धेतव इति व्याख्या-
त्रयं पूर्वशब्देनातिदिष्टं विज्ञातत्वान्न यागविधिरिति विशिष्टविधिनि-
रासात् गुणे फलकल्पनायामित्यनेन च फले गुणविधिनिरासात्
कर्मणि चित्राशब्दो गुणविधिरिष्टः स कस्मिन्कर्मणीत्यपेक्षायामाह
* चित्रेति * ननु दधिमधुपयोघृतन्धाना उदकं तण्डुलास्तत्संसृष्टं
प्राजापत्यमिति प्रकृतप्राजापत्येष्टित्यागेनाग्नीषोमीये गुणविधिर्भा-
ष्यकृतो ऽभिप्रेत इति कथं ज्ञायतइत्यपेक्षायां चित्रो गुणो विधीयमा-
नः स्त्रीलिङ्गनिर्देशात्स्त्रीद्रव्यके यागे विधीयेत न चासौ स्त्रीपुंपशु-
द्रव्यके यागे ऽग्नीषोमीये ऽस्मिं पशुकामपदोपादानात् । पशुकामक-
र्तृके विधीयेत सो ऽपि पशुकामः कर्त्ता नाग्नीषोमीये ज्योतिष्टो-

माधिकारिकर्तृके ऽस्तीत्युत्तरपक्षे निरासेन द्योतनादित्युक्तम्। प्रकृतकर्मत्यागेनाप्रकृते गुणविधिः कस्मादिष्ट इत्याशङ्क्याह * अत्रेति * चित्रत्वस्यात्रैकपदोपात्तेन स्त्रीत्वेन योगो ऽवगम्यते स्त्रीत्वयोगश्च प्राणिजातावेव सम्भवति तेन कारणेनैते चित्रत्वस्त्रीत्वे प्राणिद्रव्यकस्य यागस्याङ्गमित्यर्थः। स्त्रीत्वयोगनिमित्तं चित्रत्वस्य प्राणियागाङ्गत्वं वक्तुं द्विवचनम्। नन्वप्राणिन्यपि रवट्वादौ स्त्रीप्रत्ययदर्शनान्न स्त्रीत्वस्य प्राणित्वाव्यभिचारितेत्याशङ्क्य स्वभावत इत्युक्तम्। खट्वादौ त्वविद्यमानमेव स्त्रीत्वं टाबादिप्रत्ययदर्शनेनारोप्यतइति भावः। ननु प्राणियागाङ्गत्वे ऽपि मेष्यां चित्रमात्रविधियुपपत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्य * प्रकृतिमित्युक्तम्* प्राकृतेन कृष्णसारङ्गादिना गुणान्तरेण निराकाङ्क्षत्वान्न मेष्यामनारभ्यविधिना चित्रत्वं विधातुं शक्यं प्रकृतौ त्वाकाङ्क्षावशाच्छक्यमित्याशयः। कथमग्नीषोमीयस्य सर्वप्राणियागप्रकृतितेत्याशङ्क्य दैक्षस्य चेतरेष्वित्याष्टमिकन्यायं सूचयितुं यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति दीक्षायागयुक्तवाक्यविधाननिमित्तो ऽग्नीषोमीये दैक्षशब्दः प्रयुक्त.। श्लोकं व्याचष्टे* स्त्रीत्वादिति*सर्वप्राणियागेषु कस्मान्न विधीयतइत्याशङ्क्य तार्तीयन्यायोपन्यासः। सौत्यस्यैकादशिनीप्रकृतित्वादैकादशिनीनां च पशुगणप्रकृतिनिमित्तत्वात्कथं दैक्षस्य सर्वप्राणियागप्रकृतितेत्याशङ्कानिरासार्थः परमशब्दः। नन्वग्नीषोमीयक्रमाम्नातेन कृष्णसारङ्गादिना गुणेन उत्पत्तिवाक्यशिष्टेन पुंस्त्वेन च बाधापत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्याह * तत्रेति*कृष्णसारङ्गादेरुत्पत्तिवाक्यशिष्टत्वाभावादुत्पत्तिवाक्यशिष्टं पुंस्त्वं क्रमाम्नातं कृष्णसारङ्गादिगुणान्तरं चेति व्यवहितान्वयः कृष्णसारङ्गो ऽग्नीषोमीय इति सामानाधिकरण्यनिर्देशाभिप्रायो वोत्पत्तिशब्दः। फले विधावुद्भिदेव सोमस्य बाधो यागे तु विधौ विकल्प इति पूर्ववच्छब्दार्थ.। नन्वनारभ्याधीतत्वाच्चित्रत्वस्त्रीत्वयोरेव प्रकरणविशेषात्तु विकृतौ विरोधः स्यादिति तार्त्तीयिकन्यायेन बाधः स्यादित्याशङ्क्याह * साम्नदर्शेति * सामिधेनीमात्रसंयोगेन श्रुतस्य साम्नदृश्यस्याऽकृत्स्नक्रतुसंयोगत्वात् पाञ्चदृश्येन प्रकरणकृत्स्नक्रतुसंयोगेन बाधो युक्तः चित्रत्वस्त्रीत्वयोस्तु क्रतुसंयोगेनैव श्रवणात्तद्विशेषाग्नीषोमीये सम्बन्धो यथा कृष्णसारङ्गादेः पशुसंयोगश्रुतस्य क्रमात्तथानयोः सामर्थ्यानुगृहीतात् प्रकृतौ वेति न्यायादिति तुल्यत्वात् साम्नदृश्यपूर्वपक्षे यथाभयोः सामिधेनीसंयोगाविशेषाद्विकल्पः तथात्रापीत्याशयः। नन्वग्नीषो-

मीये चित्रत्ववत् स्त्रीत्वस्याप्यप्राप्तेरनेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह * एकेति * परस्परासम्बद्धानेकार्थविधौ वाक्यभेदस्यापरिहार्यत्वात् विशेषणविशेष्यभावसिद्ध्यर्थम् एकपदोपादानमुक्तम् । ननु चित्रत्वस्त्रीत्वयोर्द्रव्याश्रितत्वेनान्योन्यविशेषणविशेष्यत्वायोगान्नैकपदोपादाने ऽपि न तत्प्रतीतिः सम्भवति इत्याशङ्क्यैककारकेत्युक्तम् । चित्रत्वस्त्रीत्वविशिष्टमेकं तृतीयोपात्तं कारकं विधीयतइति भावः । ननु चित्रत्वस्त्रीत्वयोरेकपदोपात्तत्वाद्वाक्यभेदानापादकत्वे ऽपि पशुकामपदोपात्तफलसम्बन्धविधानाच्चित्रापदोपात्तगुणसम्बन्धविधानाच्च वाक्यभेदः स्यादित्याशङ्क्याह * पशुकामेति * स्वतन्त्रकर्मविधौ कमिपदस्य फलपरत्वाभावे नैष्फल्याद्विधानानर्थक्यापत्तेः । फलपरत्वे ऽपि फलवज्ज्योतिष्टोमाङ्गभूते अग्नीषोमीये गुणविधौ साक्षात्फलाभावे ऽपि ज्योतिष्टोमफलेन परम्परया फलवत्त्वोपपत्तेरयं पशुकामशब्दो न पशुयागफलं प्रतिपादयतीति शेषः । ननु अफलस्य काम्यत्वायोगात्कामशब्दोपबन्धे आसाधकं तु तादर्थ्यादिति स्वर्गकामाधिकरणसिद्धान्तन्यायेन फलपरो ऽयमित्याशङ्क्यानुवाद इत्युक्तम् । पशोरिहाफलत्वेन मुख्यवृत्त्या भविष्यतीति भावः । कथं प्राप्तिरित्याशङ्क्यार्जनाङ्गत्वादित्युक्तम् । अनर्जितानुपात्तेन पशुना यष्टुमशक्यत्वादकाम्यस्य चोपादानायोगादुपादानाङ्गत्वेन प्राप्ता कामनानूद्यतइत्यर्थः । ननु पशुकामशब्दात्पशोः साधनत्वाप्रतीतेः कथं तदुपादानाङ्गत्वेन कामना प्राप्नुयादित्याशङ्क्य स्वर्गेत्युक्तं स्वर्गकामादिबहुव्रीह्यर्थस्य पुरुषस्य भावनाक्षेपलभ्यत्वात् एकादशाद्यभाष्योक्तन्यायेन स्वर्गकामादिशब्दस्य लोहितोष्णीषादिवत् विशेषणपरत्वावगतेस्तदुपात्तस्य स्वर्गादेर्यागं प्रति गुणत्वेनान्वयः प्राधान्येन वेति सन्दिह्य द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्ध इति षष्ठाद्यस्वर्गकामाधिकरणपूर्वपक्षसूत्रे भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यतइति न्यायात् भूतस्य स्वर्गपश्वादेर्द्रव्यस्य भव्यं कर्म प्रति गुणत्वेनान्वयस्य वक्ष्यमाणत्वात् पशुकामशब्दात्पशोः साधनत्वावगतिसिद्धिरित्यर्थः । नन्वेवमपि पशुकामपदोपात्तसाधनभूतपशुविधानाच्चित्रापदार्थविधानाच्च वाक्यभेदः स्यादित्याशङ्क्य निरस्यन्नर्ज्जनाङ्गत्वेन कामनाप्राप्तिं विवृणोति * न हीति * पशुसाधनतागग्नीषोमीयस्योत्पत्तिवाक्यादेवावगतेति वदता पशुयागशब्देनाशङ्का निरस्ता । चित्रया यजेतेति गुणविधौ विशिष्टविधिनिमित्तगौरवशङ्कानिरासार्थं भाष्यं मध्यप्रतीकेनावतार्योपपादयति * यागेति * श्लोकं व्याचष्टे * यावदिति * नन्वेवं २९०।२

सति न क्व चिद्विशिष्टविधिः स्यादित्याशङ्क्याह * आगत्या त्विति * एवं तर्ह्यत्रापि प्रकृते प्राजापत्ययागे तत्र साधनेषु दध्यादिषु चित्रत्वापादनाशक्तेः स्त्रीत्वयोगाभावाच्च चित्रात्वस्य विधातुमशक्यत्वादग्नीषोमीयस्य च दूरस्थत्वादगत्यैव विशिष्टविधिर्भविष्यतीत्याशङ्क्याह * अस्ति चेति * दूरस्थोऽपि स्त्रीत्वेनोपस्थापितोऽनुवदितुं शक्यते इत्याशयः । फले गुणविधिनिरासार्थं गुणे फलकल्पनायामिति भाष्यमाक्षिपति * गुणेति * नातिप्रयत्निनां समाधानमाह * सिद्धान्तेति* प्राधान्यप्रतिपक्षं तु गुणशब्दं मत्वा नाना समाधानमाह * अपरे त्विति * अत्र ह्यस्य गुणशब्दस्य प्राधान्यप्रतिपक्षत्वाभावादेतद् दूषयति * तदयुक्तमिति * गुणविधित्वस्य प्राधान्यप्रतिपक्षत्वाभावे भाष्यकृतः संमतिमाह * तथा चेति * कथमनेन भाष्येण गुणविधेः प्राधान्यप्रतिपक्षत्वाभावो द्योत्यतइत्याशङ्क्याह * फलेति * चित्रादिपदं वा फलपदेन सम्बन्ध्यतामाख्यातपदं वेति विचारे दर्शितेा ननु चित्रादिपदस्य फलपदसम्बन्धे तदर्थस्य फलसाधनत्वलक्षणात् प्राधान्यात्तस्य च निर्व्यापारस्य फलसाधनत्वायोगाद्यागं कुर्वता चित्रादिना फलं भावयेदिति वैयधिकरण्येन यज्यन्वयापत्तेः सामानाधिकरण्यानिमित्तनामधेयत्वासम्भवादेकान्तेन गुणविधित्वापत्तेर्गुणविधिनिरासेनैव फलपदसम्बन्धनिरासेनैव पदसम्बन्धस्य निरस्तत्वात्पूर्वपक्षासम्भवेनायं विचारो न युक्त इत्याशङ्क्यं निराकुर्वता स्थित एतस्मिन्निति भाष्येण गुणविधेः फलसम्बन्धे सत्येकान्तकत्वसूचनादत्र प्रधानप्रतिपक्षता द्वयोः सूचितेत्याशयः । स्वयं समाधत्ते * तेनेति * विशिष्टविधावपि याग एव गुणविधेस्तुल्यत्वं मत्वा त्रयइत्युक्तम् । एकैकस्येति कर्त्तरि षष्ठी तुच्छत्वद्योतनार्थं चास्य पक्षस्य निरासो वादिद्वयसम्मतोऽपि पूर्वपक्षावसरएव कृत इत्याह * तत्रेति * धातुपारार्थ्यप्रसङ्गादित्यनेन यजतेरविवक्षेति भाष्यावयवो धातोर्विध्यनुपयोगित्वेन प्रत्ययानुग्रहमात्रार्थत्वाभिप्रायो व्याख्यातः । एवं चैक एव पूर्वपक्षोऽवतिष्ठतइत्याह * अतश्चेति * ननु विधानवदनुवादेऽपि यागस्य करणत्वाच्चित्रयेति करणतया निर्दिष्टस्य गुणस्य चित्रावता यागेनेति मत्वर्थलक्षणां विना तदन्वयायोगादयमपि पूर्वपक्षो दुर्बल इत्याशङ्क्याह * करणेति * कुठारादिषु करणत्वस्योद्यमनादिकर्तृव्यापारव्याप्यत्वापेक्षादर्शनात्करणत्वेनार्थाक्षिप्तस्य साध्यांशस्यानुवादेन गुणविधौ न मत्वर्थलक्षणेत्यर्थः । ननूत्पत्तिवाक्यपरिहारेणेतरवाक्यानां परस्परान्वयाभावान्न गुणविधौ प्रयोगवाक्यावग-

तकरणत्वाक्षिप्तस्य साध्यांशानुवादो युक्त इत्याशङ्क्योत्पत्तिवाक्ये ऽपि विधिबलात् करणत्वावगमो ऽस्तीति सूचयितुम् * उत्पक्षेत्युक्तम् * पूर्वोत्तरपूर्वपक्षभाष्यसन्देशेनास्यापि पूर्वपक्षभाष्यत्वावगतेः साधारणत्वायोगात् पूर्वपक्षभाष्यमेवैतदिति स्वमतमाह *गुणेति * भाष्योक्तस्य धातुपारार्थ्यस्य परपदसम्बन्धविधानव्यवहितकल्पनौत्पत्तिकगुणबाधोपलक्षणार्थत्वं सूचयितुम् * पूर्वाधिकरणेत्युक्तम् * आज्याद्युदाहरणेषु पूर्वपक्षाभिधानार्थे तथेति भाष्यमश्रुतं भवत्यध्याहारादयुक्तमाशङ्क्याह * तथेति * अस्तिर्भवन्तीति परः प्रथमपुरुषे ऽप्रयुज्यमानो ऽप्यस्तीति स्मृत्यास्तिधातुर्भवन्तीशब्दवाच्यवर्त्तमानार्थलड्विभक्तिपरः प्रथमपुरुषे समानाधिकरयुष्मदस्मद्वचत्तिरिक्तोपपदे सत्यप्रयुज्यमानो ऽप्यस्तीत्यनुशासनात् अस्तिभवत्योश्चैकार्थत्वाद्भवत्यध्याहारेण सत्तायाः स्तोत्रसमीपे कल्पनं रचनं पूर्वपक्षिणो ऽभिमतामिति शेषः। नन्वेवमपि विधायकाश्रवणाद् गुणविधित्वं न युक्तमित्याशङ्क्याह * प्रयोगेति * ननु उप्रत्ययान्तस्य पञ्चदशादिशब्दस्य स्तोत्रीयसंख्यावाचित्वात्तत्समानाधिकरणयोराज्यपृष्ठशब्दयोर्घृतशरीराङ्गवाचिता न युक्तेत्याशङ्क्ते * ननु चेति * कस्मान्नायं संख्यामात्रवाचीत्याशङ्क्य स्मृतिं पठति * स्तोम इति * कथमनया स्मृत्या संख्यामात्रवाचित्वं वार्यतइत्याशङ्क्याह * न हीति * स्तुतेर्मानं स्तोम इति स्मृतेः स्तोत्रीयसंख्यावाचित्वावधारणादित्याशयः। स्तुतेः साधनद्वारेण संख्यात्मकमानपरिच्छेद्यत्वात् स्तुतिसाधनपरिच्छेदिकायाः स्तुतिमानत्वेन स्तोमत्वाद्दचामिव घृतादेरपि रथघोषवदुपस्थापकतया स्तुतिसाधनत्वोपपत्तेः उप्रत्ययाविरोध इति परिहरति * नैष दोष इति * स्तोत्रसाधनानामृचामेव परिच्छेदिका संख्या स्तोमशब्दवाच्या न साधनान्तरपरिच्छेदिका इति शङ्कानिवृत्त्यर्थो मात्रशब्दः। नन्वेवं सति स्तोमशब्दवाच्यस्तोत्रसाधनसंख्यापरिच्छेद्यत्वार्थं घृतादीनां स्तोत्रसाधनत्वं वक्तुम् आज्यवन्ति पृष्ठवन्ति बर्हिष्पवमानवन्ति स्तोत्राणीति वक्तव्यं तथा चै मत्वर्थलक्षणाप्रसङ्गान्न लक्षणेत्ययुक्तमित्याशङ्क्याह * न चात्रेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * विवक्षितार्थापेक्षया न्यूनत्वाभ्युपगमे लक्षणावाक्यभेदो आधिक्याभ्युपगमे त्वादिशब्दोक्तमानर्थक्यम्। अथ वा न्यूनस्या- २९।१

१ उत्पत्तौत्युक्तमिति २ पु० पा० अयमेव मुद्रिततन्त्रवार्तिके दृश्यते।
२ वक्तव्यं तथा चेति २ पु० पा० ५
३ यदेति २ पु० पा०।

धिकार्थविषयत्वकल्पने लक्षणावाक्यभेदौ गौणत्वाध्याहारौ दोषा इत्यर्थः । न्यूनत्वे लक्षणावाक्यभेदौ आधिक्ये त्वानर्थक्यं अन्यथात्वकल्पने विपरिणामव्यवहितकल्पना व्यवधारणकल्पनादोष इति वा योज्यम् । अनुमिते तु विवक्षितार्थाभिधानशक्तस्यैवानुमानान्न कश्चिद्दोष इति भावः । द्रव्यसंख्यारूपानेकार्थविधिलक्षणवाक्यभेदपरिहारो ऽपि लक्षणापरिहारन्यायेनैवोक्त इति सूचयितुं वाक्यभेदोपादानम् । ननु इहाज्यैः स्तुवतइत्यादिषु श्रुतिष्वेवोत्पत्तिवाक्येषु मत्वर्थलक्षणा प्रसज्येतेत्याशङ्क्याह * इह तावदिति * विधौ मत्वर्थलक्षणापत्तेः श्रुतवाक्यगतेन विधिना सहाज्यादीनां संयोगाभावात् स्तोत्रप्रकरणे यत्पञ्चदशानीत्यादिगुणवाक्यात्मानं तदनुमिते च पञ्चदशसंख्याविशिष्टैराज्यैः स्तोत्रस्योपकर्त्तव्यमित्यादिवाक्येन कृतो यः स्तोत्राज्यादिसम्बन्धस्तत्पूर्वकप्रयोगवचनेन विधिरित्यर्थः । नन्वाज्यादीनामक्रियात्मकत्वेन प्रकरणग्रहणायोगान्न तद्बोधेन वाक्यानुमानं युक्तमित्याशङ्कते *तत्रेति* भवत्युपात्ताज्यादिसत्ता प्रकरणग्राह्या भविष्यतीति परिहरति * सत्तैवेति * ननु धातुवाच्यत्वमात्रेण सत्तायाः क्रियात्वे ऽपि चेतनक्रियात्वाभावेनाननुष्ठेयत्वान्न प्रकरणग्राह्या भविष्यतीत्याशङ्क्याह * प्रधानेति * सत्तायाः स्वरूपेणाननुष्ठेयत्वे ऽपि अङ्गत्वेन स्तोत्रसामीप्यावगमात्तस्य च सन्निधिस्थापनासाध्यत्वात्तेन रूपेणानुष्ठेयत्वं भविष्यतीत्याशयः । संसर्गिद्रव्यत्वादाज्यानां स्वरूपेण संख्यायोगाभावे ऽपि पञ्चदशाज्यपात्राणि समीपे निधाय स्तोतव्यं पूर्वपक्षे कर्त्तव्यं सप्तदश पराङ्मुखप्राणिस्थापनेन सप्तदश पृष्ठानि समीपे निधाय स्तोतव्यं त्रिवृच्छब्दवाच्यं च त्रिपुटा त्रिर्भिद्यापरपर्यायलताद्रव्यम् पवनार्हद्रव्यं कृत्वा वस्त्रादौ पवमानं सदसो बर्हिः[1] समीपे निधाय स्तोतव्यं इतीतरवाक्यार्थानुष्ठानं सन्निधिस्थापनमात्रेणाप्यग्निवदुपकारकत्वोपपत्तेः साधकतमत्वविवक्षया उत्पत्तिवाक्येषु अनुवादार्थतृतीयया निर्देशोपपत्तिरिति दर्शयितुमाह * अतश्चेति * नन्वेवं सत्युत्पत्तिवाक्येष्वाज्याद्यनुवादो ऽनर्थकः स्यादित्याशङ्क्य प्रशस्तमिदं स्तोत्रं यत्क्रियमाणमाज्यादिसन्निधियुक्तं भवतीत्येवं स्तोत्रप्रशंसार्थत्वेनानुवादसाफल्यं सूचयितुमाहेतीति भाष्यकृता गुणोपदेश इत्यनेन गुणोपदेशयुक्तविपयर्निर्देशेनैव वाक्यभेदप्रसङ्गस्य गुणविधिनिरासहेतोः सूचितत्वात्प्रधानतो ऽभिसम्बन्ध इति सूत्रावयवो नामधेयत्वप्रतिज्ञार्थतया व्याख्यातः । तत्र नामधेयत्वप्रतिज्ञा-

१ बर्हिरिति २ पु० पा० ।

याः पूर्वसूत्रोक्ताया एवानुषङ्गसम्भवात् प्रधानशब्दस्य च कर्मपरत्वे लक्षणादोषापत्तेः कर्मसम्बन्धस्य च गुणविधावप्युपपत्तेर्नामधेयत्वात् सहार्थेन च तसिप्रयोगादर्शनेनासाधुत्वापत्तेरपरितोषात्स्वयं वाक्यभेदोपपादनार्थतया अवतारणपूर्वकं व्याचष्टे *प्रधानत इति * अनेन च प्रधानद्वारानेकेषां गुणानामनेकविशेषणविधिप्रसवसमर्थेनैकेन विधिना सम्बन्धो भवति न चात्र प्रधानभूतं कर्म त्वत्पक्षे विधीयतइत्येवं व्याख्यातं विषयनिर्देशकगुणोपदेशशब्दसूचितं गुणविधिनिरासहेतुवाक्यभेदप्रसङ्गव्याख्यानार्थं गुणविधौ हीति भाष्यमाग्नेयो ऽष्टाकपाल इत्यादौ गुणविधावपि वाक्यभेदाभावादयुक्तमाशङ्क्य कर्मानुवादविषयत्वेन व्याचष्टे * अत्र पुनरिति * पुंपशाविति भाष्येणोत्पत्तिशिष्टपुंस्त्वावरुद्धे ऽग्नीषोमीये स्त्रीत्वं विधातुमशक्यमिति अभिधानपूर्वकं चित्रत्वस्त्रीत्वगुणपशुफलरूपानेकार्थविधानाद्वाक्यभेदो विवृतः। तत्रोत्पत्तिशिष्टगुणावरुद्धे तद्विरोधित्वगुणान्तराविध्यसम्भवो वैश्वदेवाधिकरणे व्युत्पादयिष्यमाणो ऽत्र हेत्वन्तरसमुच्चयार्थमुक्तो वाक्यभेदप्रसङ्ग एव त्वत्र गुणोपदेशशब्दोक्तः प्रधानहेतुरित्यभ्यार्हितं पूर्वं निपततीतिन्यायेन सूचनार्थं प्रथमं वाक्यभेदमुपपादयितुं चित्रत्वस्त्रीत्वविशिष्टैककारकविधानादवाक्यभेदाभिप्रायं पूर्वोपन्यस्तं निरस्यति * न चेति * कर्मवत्कारकस्य द्रव्यस्यापि चोत्पत्तिवाक्यादेव प्राप्तत्वाच्चित्रत्वस्त्रीत्वमात्रमत्र विधेयं तयोश्च परस्परविशेषणविशेष्यत्वाभावेनैकविशिष्टेतरविध्ययोगादपरिहार्यो वाक्यभेद इत्याशयः। वृद्धसम्मत्यैतदेव द्रढयति * आह चेति * ननु चित्रया कुर्यादिति सकृदुच्चरितस्य प्रत्ययस्यानेकार्थप्रतिपादकेनाप्येकेन चित्रापदेनान्वयोपपत्तेर्न प्रत्ययोच्चारणावृत्त्यापत्तिरित्याशङ्क्याह * एकेति * अथापि शास्त्रतन्त्रत्वं तथापि तदनेकतेति ग्रहाधिकरणवार्त्तिकोक्तन्यायेन सकृदुच्चरितस्यापि प्रत्ययस्यैकपदोपात्तानेकार्थविधिशक्तत्वे ऽप्येकेनैव व्यापारेणानेकविध्यशक्तेर्व्यापारभेदकल्पनावश्यम्भाविनीत्यर्थः। शक्तिशब्देन व्यापारो विवक्षितः पुंपशाविति भाष्यावयवोक्तोत्पत्तिशिष्टगुणावरुद्धे कर्मणि तद्विरुद्धगुणान्तरविध्यसम्भवं हेत्वन्तरसमुच्चयार्थत्वेनेदानीं व्याचष्टे * उत्पत्तीति * विधातुमिति शेषः ननूत्पत्तिशिष्टैकहायिन्यवरुद्धे ऽपि क्रये हिरण्यादीनां विधिदर्शनात् कथमशक्यतेत्याशङ्क्य * तद्विरोधीत्युक्तम् * विक्रेत्रानतिजननेनैकहायन्याः क्रयसाधनत्वादानत्यतिरेकार्थं द्रव्यान्तरसमुच्चयो- २९२।१

१ एवेति २ पु० ना०।

पपत्तेरविरोध इत्याशयः । ननु विरोधे ऽप्युत्पत्तिशिष्टगुणबाधेन विकल्पेन वा गुणान्तरनिवेशो भविष्यतीत्यत आह * यत्रेति * विशिष्टविधौ शुद्धस्याविहितत्वेनाप्राप्तेरनुवादायोगाद्विशिष्टमेव कर्मानुवादितव्यं तस्य च समुच्चये प्यानतिवदतिरेकाभावादेकेनैव गुणेनाकाङ्क्षानिवृत्तेर्न गुणान्तरसम्बधोपपत्तिरित्यर्थः । यत्तु विशेषणविशेष्यविधिपूर्वकत्वाद्विशिष्टविधेर्विशेषणवद्विशेष्यस्वरूपस्याप्यर्थापत्तिप्रसूतेन विधिना विहितत्वेन प्राप्तिसम्भवाद्विशिष्टविहितस्यापि कर्मणः स्वरूपमात्रं निष्कृष्य गुणान्तरविधानमुद्भिदधिकरणपूर्वपक्षे ऽभिहितं तन्निरस्यति * न चेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * शुद्धस्य कर्मणो ऽननुष्ठेयत्वेन विधातुमशक्यत्वाच्छ्रुतेष्वपि गुणविधिषु स्वातन्त्र्येण गुणविधानस्याधाराग्निहोत्राधिकरणे वार्त्तिककृता निराकरिष्यमाणत्वेनार्थापत्तिप्रसूतेषु स्वातन्त्र्यस्य दूरनिरस्तत्वात्तद्दृष्टान्तत्वेन विशेष्यस्वरूपस्य स्वातन्त्र्यस्य विधानाशङ्कानुपपत्तेरार्थैरपि विधिभिर्विशिष्टावयवत्वेनैव विशेषणविशेष्यांशानां विधानाच्छुद्धस्य कर्मणो प्राप्तेर्न निष्कृष्यानुवादो युक्तः । एवं सत्यपि यदि स्ववाक्यस्थगुणसम्बन्धवेलायामेव वाक्यान्तरगतानामपि गुणानां क्रियासम्बन्धः स्यात्ततो विशेषाग्रहणात् सर्वेषां तुल्यबलत्वं स्यात्तेषां तु पूर्वपश्चाद्भावात्स्ववाक्यस्थगुणनिराकाङ्क्षायां क्रियायां वाक्यान्तरगतगुणविधानानुपपत्तिरित्याशयः । ननूत्पत्त्युत्पन्नशिष्टयोः क्रियासम्बन्धपूर्वपश्चाद्भावनिमित्ते बलाबलविशेषे सत्युत्पन्नशिष्टानामपि व्रीह्यादीनां भिन्नवाक्यगतत्वेन युगपत् क्रियासम्बन्धायोगात्पौर्वापर्यनिमित्तं बलाबलं स्यादित्याशङ्क्याह * यानीति * उत्पत्तिवाक्यापेक्षत्वेनोत्पन्नवाक्यानां ततो दौर्बल्यं न पौर्वापर्यमात्रकृतमित्याशयः । चित्रत्वविधौ स्त्रीत्वविध्यसम्भवं वाक्यभेदप्रसङ्गेनोत्पत्तिशिष्टपुंस्त्वविरोधाच्च पुंपशाविति भाष्यावयवोक्तमुपपाद्य पशवः फलमिति भाष्यावयवोक्तं वाक्यभेदापत्तेरेव फलविध्यसम्भवमुपपादयति * पशुकामेति * ननु फलस्याविधेयत्वात्कथं वाक्यभेदो ऽत आह*यद्यपि चेति * न केवलमनेकार्थविधिलक्षणो वाक्यभेदः किं तुवैरूप्यमपीत्याह * अपि चेति* ननु स्त्रीपशुद्रव्यके मेषीयागे चित्रत्वमात्रविधानादुपादानाङ्गत्वप्राप्तपशुकामानुवादाच्च गुणविधावपि न वाक्यभेद इत्याशङ्कानिरासार्थं चित्रो गुणो विधीयमानो वाक्यभेदपरिहाराय स्त्री यत्र यागे द्रव्यं तत्र विधीयते तत्र च स्त्रीद्रव्यके ऽपि मेषीयागे प्राकृतकृष्णसारङ्गादिगुणनिराकाङ्क्षे ऽनारभ्याधीतस्य चित्रत्वस्य

विधातुमशक्यत्वादग्नीषोमीयसर्वपशुयागपरमप्रकृतिभूते गुणाकाङ्क्षे कृष्णसारङ्गादिगुणान्तरेण सह पूर्वोपपादिततुल्यकल्पत्वाद्विकल्प्यमानो विधीयते। न चासौ स्त्रीपुंपशुद्रव्यके ऽग्नीषोमीये ऽस्तीति स्त्रीत्वाविधानापत्तेरपरिहार्यो वाक्यभेदः पशुकामश्च यत्र कर्त्ता तत्र विधीयेत तत्र च षष्ठाद्यसिद्धान्तन्यायेन पशुकामशब्दस्य फलपरत्वेनावधारितस्योपादानाङ्गत्वप्राप्तपशुकामानुवादकत्वायोगात् फलत्वेन पशून् कामयमानः पशुकामशब्देन वाच्यः। सो ऽपि पशुकामा नाग्नीषोमीये ऽस्तीति तन्निमित्तो ऽपि वाक्यभेदो ऽपरिहार्य इति भाष्यकृतोक्तम्। तत्र मेषीयागाङ्गत्वाशङ्कानिरासस्य स्पष्टत्वादुपेक्ष्यार्ज्जनाङ्गत्वप्राप्तानुवादाशङ्कानिरासं व्याचष्टे * न चेति * एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * नन्विच्छां विना करणेतिकर्त्तव्यतयोः कथं प्रवृत्तिरित्याशङ्क्याह * तत्साधनेति * प्रधान्येनार्थनामिच्छा कामना नेच्छामात्रं पुरुषार्थसाधने तदङ्गे चेदं मे भवेदिति एवं प्राधान्येनानर्थं विनापि प्रार्थितसिद्ध्येच्छया प्रवृत्तिरित्यर्थः। एतदेव व्याचष्टे * न हीति * ननु करणोपकारादावपुरुषार्थे ऽपि काम्यत्वव्यपदेशो ऽस्तीत्याशङ्क्याह * गौणी वेति * यथाकाम्यसिद्ध्यर्थं प्रवर्त्तते तथा करणोपकारसिद्ध्ये ऽपीति साधर्म्यात्काम्यत्वोपचारस्तत्रेत्यर्थः। नन्वेवं सति काम्यमानसिद्ध्यर्थत्वेन गुणवृत्त्या वा साधनस्यापि काम्यत्वोपपत्तेर्न कामशब्दोपबन्धात् फलत्वावगतिः सम्भवतीत्याशङ्क्याह * अत इति * अन्यापेक्षस्य गौणस्य वा काम्यत्वस्य प्रमाणान्तरानुसारेण कल्प्यत्वाद्भेदे च तदभावान्नात्र तत्कल्पना युक्तेत्याशयः। तदेव कामशब्दोपबन्धात्प्रतीमः। तच्च फलमिति योज्यं यदि च कामशब्दोपबन्धात्स्वर्गपश्वादेः फलत्वं न प्रतीयते ततो निष्फलस्य कर्मणो न कश्चित्साधको ऽनुष्ठाता स्यात् फलार्थत्वात्कर्मणि प्रवृत्तेरिति युक्त्यन्तरं वक्तुं शक्यमित्याशयेन स्वर्गकामाधिकरणसिद्धान्तसूत्रं पठति * विस्तरेण चैतदिति * कामशब्दोपबन्धस्य फलत्वाप्रतिपादकत्वे कर्म तत्साधकशून्यं स्यात् फलार्थत्वात् प्रवृत्तेरिति सूत्रार्थः। नन्वेकस्मै वा ऽन्ये क्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोम इति ज्योतिष्टोमद्वारा सार्वकाम्यप्राप्तपशुफलत्वानुवादस्तर्हि भविष्यतीत्याशङ्क्याह * फलं चेति * औपचारिकानुवादस्यानर्थक्यापत्तेरसम्भवः विशेषणत्वं तु वाक्यभेदापत्त्यैव सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेद इत्युद्भिदाधिकरणवार्त्तिकोक्तन्यायानिरस्तमित्याशयः। प्राजापत्येष्टिप्रकरणबाधापत्तेरप्यग्नीषोमीये गुणविधिर्न युक्त

इत्याह * प्रकरणं चेति * ननु चित्राशब्दस्य गुणे निरूढत्वेनोद्भिदादिशब्दवत्कर्मण्यवयवद्वारेण प्रसिद्ध्यभावात्संज्ञासंज्ञिसम्बन्धानुवादानुपपत्तेर्नामधेयत्वपक्षे ऽपि प्राजापत्येष्टेः फलं पशवः सा च चित्रासंज्ञकेतिकर्मफलसम्बन्धसंज्ञासंज्ञिसम्बन्धरूपानेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह * नामधेयत्वे त्विति * द्रव्यादिचित्रद्रव्यकत्वात् स्त्रीप्रत्ययान्तेनेष्टिशब्दवाच्यत्वाच्च कर्मणि स्त्रीलिङ्गचित्राशब्दप्रसिद्धेरनुवादोपपत्तिरिति भावः। आज्यादुदाहरणेषु द्रव्यसंख्यासम्बन्धस्तोत्रद्रव्यसम्बन्धरूपानेकार्थविधिलक्षणवाक्यभेदाभिधानार्थं तथेति भाष्यं तात्पर्यतो व्याचष्टे * पञ्चदशानीति * द्रव्यानुवादाभावे ऽपि भाष्योक्तं यदि कश्चित्संख्यानुवादेन द्रव्यविधानमाशङ्क्येत तन्निरासार्थं द्रव्यसंख्ययोरित्युक्तम्। ननु स्तोत्रेष्वप्राप्तावपि कर्मान्तरे ऽप्युपसदादिषु आज्यानां
२९३।१ प्राप्तेस्तदनुवादेन संख्याविधिर्भविष्यतीत्याशङ्क्याह * कर्मान्तरस्थं चेति * स्तोत्रप्रकरणे कर्मान्तरस्याबुद्धिस्थत्वादित्याशयः। न च द्रव्यस्वरूपानुवादेन संख्याविधिर्युक्तः। तथा सति द्रव्याङ्गत्वापत्तेरकर्माङ्गत्वप्रसङ्गेनानर्थक्यापातादित्याह * तदनुवादेन चेति * दोषान्तरमाह * प्रकरणेति * एवं तर्हि संख्याविशिष्टं द्रव्यमेव प्रकरणेन स्तोत्राङ्गत्वसिद्ध्यर्थं विधीयतामत आह * न चेति * अनेन चाथ कस्मान्न पञ्चदशसंख्याविशिष्टान्याज्यानीत्यादिभाष्ये द्वावेतावर्थौ एकस्य वाक्यस्याशक्यावित्यस्यानन्तरं द्रष्टव्यमित्यपकृष्य व्याख्येयत्वस्य वक्ष्यमाणत्वात्कथं व्याख्येयमित्यपेक्षायामिति व्याख्यातं द्रव्यसंख्ययोः प्रधानभूतैककियावशीकारं विशेषणविशेष्यत्वाप्रतीतेः संख्याविशिष्टद्रव्यविध्यसम्भवहेतोः भाष्यव्याख्यैव विवरिष्यमाणत्वात् भाष्यसूचितानि हेत्वन्तराणि वक्तुं संख्याविशिष्टद्रव्यविधौ द्रव्यविशेषणत्वेन संख्यायाः कर्माङ्गत्वाभावादनुपादाने ऽपि कर्मवैगुण्याभावेनानादरं तत्रैकत्वमयज्ञाङ्गभूतमर्थस्य गुणभूतत्वादिति चतुर्थाधिकरणपूर्वपक्षसूत्रोक्तं तावदाह * इतीति * तच्छब्देन द्रव्याणि त्वविशेषेणानर्थक्यात् प्रतीयेरन्निति पूर्वाधिकरणसूत्रोपात्तद्रव्यपरामर्शादेकत्वग्रहणस्य चोपादेयगतसंख्यामात्रोपलक्षणार्थत्वाद्यज्ञशब्दस्य च क्रियामात्रोपलक्षणार्थत्वात् तत्र द्रव्ये यत्पशुमालभेतेत्येकत्वमनड्वाहौ युनक्तीति वा द्वित्वं कपिञ्जलामालभेतेति वा बहुत्वं तदाक्रियाङ्गमुपश्लेषलक्षणया श्रुत्या प्रातिपदिकार्थे प्रति गुणभूतत्वादिति सूत्रार्थः। द्रव्यविशिष्टस्य विधेयत्वसम्भवे ऽप्यक्रियाङ्गत्वापत्तेर्वि-

शिष्टद्रव्याविध्यसम्भव उक्तः। परमार्थतस्त्वक्रियाविशेषणस्य-विधेयत्वमेव न सम्भवतीत्याह * न चेति * कथं तर्हि पश्वेकत्वादेर्विधेयत्वं क्रियाङ्गत्वं वेत्याशङ्क्य तत्र विधेयत्वाक्रियोपादानात् संख्यायाश्चैकप्रत्ययोपादानलक्षणया श्रुत्यैकपदोपादानलक्षणश्रुतिगम्यप्रातिपदिकार्थाङ्गबाधेन कारकाङ्गत्वावगतेस्तद्द्वारेण क्रियाङ्गत्वावसायात् क्रियाङ्गत्वेन विधेयत्वं पश्वेकत्वाधिकरणासिद्धान्ते वक्ष्यमाणं सम्भवति इह तु क्रियानुपादानाच्चतुर्थाधिकरणसिद्धान्तन्यायासम्भव इति वैलक्षण्यं वक्तुमाह * न चेति * क्रियानुपादानादेवाक्रियात्मकत्वेन स्तोत्रप्रकरणग्राह्यत्वायोगात् तदङ्गत्वानुपपत्तेरानर्थक्यापातादपि विशिष्टद्रव्याविध्यसम्भव इत्याह * न चैषामिति * अक्रियात्मकस्य प्रकरणाग्राह्यत्वे वृद्धसम्मतिमाह * आह चेति * नन्वस्तिभवन्तीपर इति स्मृतिकल्पितभवतिवाच्यसत्ता द्रव्यक्रियाद्वारा द्रव्यसंख्ययोः प्रकरणेन ग्रहणं भविष्यतीत्याशङ्क्याह * न चेति * द्रव्यसंख्ययोर्भवतिक्रियाङ्गत्वे सति तद्द्वारा प्रकरणेन ग्रहणं स्यात् न तु द्रव्यसंख्ययोः स्वसत्तां प्रत्यङ्गत्वं सम्भवतीत्यर्थः। असम्भवे हेतुमाह * सर्वो हीति * क्रियासिद्धौ व्याप्रियमाणं कारकं क्रियाङ्गं भवति सत्तासिद्धिवेलायां चालब्धात्मकत्वान्न व्यापारः सम्भवति इत्याशयः। ननूत्पत्त्याख्याद्यभावविकारेण लब्धात्मकस्य सत्ताख्यद्वितीयभावविकारसिद्धौ व्यापारः सम्भविष्यतीत्याशङ्क्याह * सत्तायास्त्विति * उत्पत्तुमारभमाणस्यापि कुतश्चित्कारणात्सत्तासिद्ध्यभावे सिद्धो घट इत्यात्मलाभव्यवहारासम्भवात् सत्तातः प्रागलब्धात्मकत्वात् तद्व्यापारः सम्भवतीत्याशयः। वस्त्वात्मलाभमात्रस्य सत्तातोऽपवर्गात् समाप्तेस्तस्या न वस्तुना साध्यत्वमिति योज्यम्।आद्यभावविकारेणोपक्रान्तस्यात्मलाभस्य द्वितीयेन पर्यवसानमित्यपवर्गशब्देनोक्तं यदि च पञ्चदशसंख्यैराज्यैः स्वसत्तां भावयेदिति वाक्यार्थः स्यात्ततोऽन्यसाध्यानपेक्षणेन स्तोत्रोपकारस्य साध्यत्वेनासम्बन्धात् न स्तोत्राङ्गत्वं स्यादित्याह * तद्व्यतिरिक्तेति * ननु रथन्तरं भवतीत्यादौ भवतिक्रियाद्वारेण प्रधानक्रियाङ्गत्वदर्शनादिहापि तथा स्यादित्याशङ्क्याह* यत्त्विति*बृहद्वा रथन्तरं वा पृष्ठं भवतीति वचनेन पृष्ठाख्यस्तोत्रसाधनतया विकल्पेन विहितयोर्बृहद्रथन्तरयोर्विकृतावतिदेशप्राप्तायां वैकल्पिकायां सत्तायां रथन्तरसत्तानियमार्थमिदं वाक्यम्।तत्र चातिदेशप्राप्तस्य पृष्ठारव्यस्तोत्ररूपावान्तरक्रियासम्बन्धस्य प्रज्ञानाद्युक्ते विकृतिप्रकरणग्रहणमित्यर्थः। लोकसि-

ङ्गत्वेन चाज्यादिसत्ताया विधेयत्वायोगात् न तदुद्धाराज्यादीनां स्तोत्रप्रकरणग्रहणं युक्तमित्याह * नचेति * नन्वाज्यादिसत्तायाः स्वरूपतः सिद्धावपि स्तोत्रसामीप्यासिद्धेस्तेन रूपेण विधेयत्वं भविष्यतीत्याशङ्कते * स्तुतीति * स्तोत्रसान्निध्यरूपेणासिद्धावपि सत्तायाः पुंव्यापारत्वाभावेनानुष्ठेयत्वाभावाद्विधेयत्वं न सम्भवतीत्याशङ्कानिरासायानुष्ठानार्हस्थापनोपन्यासः । कथमश्रुतोपस्थापनप्रतीतिरित्याशङ्क्याप्राप्तत्वेनाज्यादिसत्ताया विधेयत्वप्रतीतेर्विधेश्च विधेयस्वभावैकगोचरत्वेन विधेश्च भावनाक्षेपकत्वाद्भावनायाश्चानुष्ठेयधात्वर्थावच्छेदं विनात्मलाभाभावादवच्छेदकधात्वर्थविशेषापेक्षायां योग्यतया स्थापनावगतिं सूचयितुं भावनाग्रहणं विधेरश्रुतत्वात् सत्तायाश्चाननुष्ठेयत्वेन विधानानर्हत्वात् अश्रुतविधिकल्पनानुपपत्तेर्न तावद्विध्यन्यथानुपपत्त्या भावनाक्षेपस्तदवच्छेदकस्थापनाख्यधार्थविशेषाक्षेपो वा युक्तः । अविधेयत्वेन चाङ्गत्वायोगात् न स्तोत्राङ्गत्वकल्पिततत्सामीप्यसम्पादनायापि सन्निधिस्थापनाक्षेपो युक्तः सामीप्यसम्पादनरूपेण विधेयत्वादङ्गत्वम् अङ्गत्वं विना सामीप्यासिद्धेरितरेतराश्रयत्वं स्यादित्यभिप्रेत्य निराकरोति * नेति * अग्नेस्तु सन्निधिस्थापनस्य विधानं प्रकरणग्रहणं च युक्तमिति पूर्वपक्षोक्तदृष्टान्तवैषम्यमाह * अग्निमिति * अथ त्विति भाष्यमपि चेत्यनेनापि पूर्वपक्षस्यैव निरासान्मध्ये सिद्धान्तसमर्थनस्यासङ्गतत्वादयुक्तमाशङ्क्याग्नेयो ऽष्टाकपालो भवतीत्यादिवदिहाप्यावश्यकल्प्यं भवति वाच्यभावनाख्यप्रयोज्यव्यापाराक्षिप्तभावनाख्यप्रयोजकव्यापारविधन्यथानुपपत्त्या पञ्चदशसंख्यैराज्यैः स्तोत्रोपकारं भावयेदिति विनियोजकवाक्यकल्पनयाज्यानां स्तोत्रसम्बन्धसिद्धेः श्रुतस्य संख्यासम्बन्धमात्रविधानान्न वाक्यभेद इति वाक्यभेदपरिहाराशङ्कानिरासार्थत्वेन व्याख्यातुमाह * सिद्धान्तेन चेति * गुणविधिकल्पनायामपि न लक्षणेति पूर्वपक्षिणोक्तं तन्निरासार्थमपि चेति भाष्यमुदाहृतवाक्ये स्तोत्राज्यसामानाधिकरण्यानुपादानादयुक्तमाशङ्क्योत्पत्तिवाक्याभिप्रायेण व्याचष्टे * यदि त्विति * अनेन च यदि वाक्यभेदपरिहारायोत्पत्तिवाक्यविहिताज्यानुवादेन पञ्चदशत्वं गुणो विधीयते ततः सामानाधिकरण्यसिद्ध्यर्थमाज्यशब्देन मत्वर्थलक्षणया विहितेष्वाज्येषु गुणविध्यापत्तेर्लक्षणैव दोष इत्येवं भाष्यं व्याख्यातम्।उत्पत्तिवाक्ये तृतीयानिर्दिष्टानामप्याज्यानां गुणविधौ करणत्वाविवक्षासूचनार्थो भाष्ये प्रथमानिर्देशः संसर्गित्वेनाज्यानाम् अनेकेषामप्येकत्र मेलने सत्येकत्वापत्तेः पृथ-

क्तनिवेशिपञ्चदशत्वयोगासम्भवात्पञ्चदक्षाज्यपात्राणीत्याज्यभेदापादकाज्याधारभूतपात्रलक्षणापि गुणवाक्ये स्यादित्याह * संसर्गेति * पलादिपरिमाणभेदे ऽपि पात्राभेदं विनाज्ये भेदबुद्ध्यनुपपत्तेः पलादिपरिमाणावच्छेदकपात्रभेदोपलक्षणार्थं पलादिग्रहणम् अतः कर्मनामधेयानीति भाष्यं गुणवाक्यगतानामप्याज्यादिशब्दानां गुणविधित्वे वाक्यभेदापत्तेरुत्पत्तिवाक्यगतानां नामधेयत्वस्यासम्बद्धत्वापत्तेरयुक्तमाशङ्क्योपपादयितुमाह * तेनेति * गुणवाक्यव्यवहारस्योत्पत्तिवाक्यावगतार्थाधीनत्वेन गुणवाक्ये गुणविधिनामधेयविचारानुपयोगात् उत्पत्तिवाक्यगतानामेवाज्यादिशब्दानां नामधेयत्वसिद्ध्यर्थं गुणवाक्ये गुणविधित्वे वाक्यभेदापादनात् नासम्बद्धतेत्याशयः। यत्विति भाष्येण न चैते कर्मणि प्रसिद्धा इति पूर्वपक्षोक्तं प्रसिद्ध्यभावात्कर्मनामत्वासम्भवमनुभाष्यावयवप्रसिद्ध्येत्यादिनावयवोपयोगेन प्रसिद्धिमुपपाद्य तस्मादित्यनेनोपसंहारः कृतः सो ऽतः कर्मनामधेयानीत्यनेन पुनरुक्त इत्याशङ्क्य सर्वहेतुसङ्कल्पनार्थत्वादपौनरुक्त्यं सूचयितुमाह * गुणवाक्येति * अपि चेति भाष्योक्तसामानाधिकरण्यलक्षणहेतुसङ्कलनार्थं समभिव्याहृतेन चेत्युक्तम्। अस्यान्वयहेतुत्वसूचनार्थश्चकारः आज्यार्थवादं पठित्वा व्याचष्टे * यदाजिमिति * प्रजापतिर्देवेभ्य आत्मानं यज्ञं कृत्वा प्रायच्छत्ते ऽन्योन्यस्माअग्रायणातिष्ठन्त तानब्रवीदाजिमस्मिन्नितेतित आजिमायन्निति अर्थवादोपक्रमव्याख्यान्वाख्यानरूपताप्रदर्शनार्थमस्मिन् यज्ञे काष्ठां गच्छतेति प्रजापतिवचनादेतानि स्तोत्राणि काष्ठां कृत्वा यस्मादाजिगता देवास्तस्मादाज्यार्हत्वादेषामाज्यत्वमित्यर्थवादार्थः। स्पर्शनवचनात्पृष्ठानीति पृष्ठशब्दव्युत्पत्तिप्रतिपादनार्थं भाष्यं स्पर्शननिमित्तपृष्ठशब्दप्रतिपादनपरार्थवादाश्रवणादयुक्तमाशङ्क्योपपादयितुमाह * तथेति * पृष्ठानि वा असृज्यन्त इत्युक्ते कथमसृज्यन्तेत्यपेक्षायामापो वा ऋत्वियमार्छन्तासां वायुः पृष्ठे व्यवर्त्तत इत्यार्त्तवयुक्तानामपां पृष्ठे वायोर्विवर्त्तनमृतुमत्यामिव स्त्रियां पुंसो ऽभिधीयमानं मैथुनात्मकं स्पर्शनमेव पृष्ठाख्यस्तोत्रसाधनत्वनिमित्तपृष्ठशब्दवाच्यं रथन्तरादिसृष्टिहेतुत्वेनोक्तं भवतीत्याशयः। विवर्त्तनशब्दस्य मैथुनाख्यस्पर्शवाचित्वं द्योतयितुं पृष्ठइत्युक्तं स्पर्शनवचनस्य कैमर्थ्यापेक्षायां पूर्वोक्तायाः पृष्ठसृष्टेर्हेत्वाकाङ्क्षापूरणार्थत्वेनापेक्षिताभिधानसिद्ध्यर्थं पृष्ठोत्पत्तिहेत्वभिधानार्थत्वावगमादुत्पाद्योत्पादकभावाभिधानस्य च कैमर्थ्यापेक्षायां पशवो वै बृहद्रथन्तरे इत्युपक्रम्याभिधा- २९४।३

नेन रथन्तरादिषु पृष्ठशब्दव्युत्पत्तिनिमित्तप्रतिपादनार्थत्वावगमाद्रथन्तरादीनित्युक्तम् । अनेन च स्पृशेर्धातोरौणादिके थक्प्रत्यये कृते तिथपृष्ठगूथप्रोथा इति सूत्रेण सकारलोपे निपातिते ब्रश्चादिसूत्रेण च शकारस्य षकारादेशे कृते ष्टुत्वे च कृते पृष्ठशब्दव्युत्पत्तिरुक्ता भवति न न्वापो वा ऋत्वियमार्च्छन्नित्युपक्रम्य ततो वसुवामं समभवत् तन्मित्रावरुणौ पर्यपश्यतां तावब्रूतां वामं मर्याइदं देवेष्वाजनीति तस्माद्वामदेव्यमित्यनन्तरं वामदेव्यशब्दप्रवृत्तिनिमित्ताभिधानाद्वामदेव्यादिष्वेव पृष्ठशब्दप्रवृत्तिनिमित्ताभिधानार्थतास्यावसीयते नं रथन्तरबृहद्भैरूपवैराजशाक्ररैवतेष्वित्याशङ्क्याह * तत्प्रकृतित्वाच्चेति * अयमाशयः पृष्ठैः स्तुवतइत्युत्पत्तिवाक्ये स्तोत्रसामानाधिकरण्यात् पृष्ठशब्दस्य स्तोत्रमेव वाच्यं न रथन्तराद्यपि रथन्तरं पृष्ठं भवतीत्यादौ पृष्ठशब्दस्य साधनलक्षणार्थत्वात्सामानाधिकरण्यं रथन्तरं पृष्ठाख्यस्तोत्रस्य साधनं भवतीत्यर्थः । पृष्ठैरुपतिष्ठतइत्यादौ तु रथन्तरादिषु पृष्ठशब्दप्रसिद्धिसिद्ध्यर्थमनेनार्थवादेन च प्रवृत्तिनिमित्ताभिधानम् । पशवो वै बृहद्रथन्तरम् इत्युपक्रमवशात् प्रतीयते वामदेव्यनौधसश्यैतेषु ज्योतिष्टोमे पृष्ठशब्दाभावात्कथं पृष्ठान्यसुज्यन्तेति बहुवचनमित्यपेक्षायां पृष्ठशब्दवाच्यरथन्तरादिप्रकृतित्वेन तेषामौपचारिकपृष्ठत्वप्रदर्शनार्थस्य पिता वै वामदेव्यं पुत्राः पृष्ठानीति अर्थवादस्य तत्पृष्ठेषु न्यदधुरिति अस्य चावसरप्रदर्शनार्थं ततो वामदेव्यमित्याद्युक्तम् इति पृष्ठैः स्तुवतइत्येतत्तु बहुवचनं प्राणभृत उपदधातीतिवत् लिङ्गसमवायादिति सप्तमे वक्ष्यते तत्र हि विश्वजित्सर्वपृष्ठो भवतीति उदाहृत्य किमयं पृष्ठशब्दो ऽतिदेशार्थो न वेति विचारयितुं ज्यौतिष्टोमिकपृष्ठविषयो ऽयं पृष्ठशब्दः षाडहिकपृष्ठविषयो वेति सन्दिग्धे विश्वजितो ज्योतिष्टोमपूर्वकत्वात् तत्र च पृष्ठैः स्तुवतइति सप्तदशानि पृष्ठानि इति बहुवचनवशेन माहेन्द्रादिषु चतुर्षु स्तोत्रेषु पृष्ठशब्दवाच्यत्वावगतेः । पृष्ठबहुत्वसम्भवादतिदेशप्राप्तज्यौतिष्टोमिकपृष्ठानुवादत्वान्नातिदेशार्थो ऽयं पृष्ठशब्द इति विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्यौतिष्टोमिकानि पृष्ठान्यस्ति च पृष्ठशब्द इतिसूत्रेण पूर्वपक्षयित्वा बृहद्वा रथन्तरं वा पृष्ठं भवतीत्येकस्यैव पृष्ठस्य ज्योतिष्टोमे विकल्पेन विधानात् पृष्ठबहुत्वाभावेन सर्वशब्दायोगात् षाडहिकानामेव रथन्तरबृहद्भैरूपवैराजशाक्ररैवतानां षण्णां पृष्ठानामतिदेशार्थः पृष्ठशब्द इति षडहाद्वा तत्र हि चोदेनेनेति सूत्रेण सिद्धान्तयिष्यतेऽनु ज्योतिष्टोमे पृष्ठबहुत्वाभावेन

१ नकाररहितः कथमिति पा० २ पु० दृश्यते ।

बहुवचनानुपपत्तिः स्यात् इत्याशङ्क्यानिरासायोत्पन्नाधिकारे ज्योतिष्टोम इतिसूत्रेण माहेन्द्रस्तोत्रस्यैव बृहद्रथन्तरं वा पृष्ठं भवतीति वाक्येन ज्योतिष्टोमे पृष्ठत्वावधारणात् वामदेव्यनौधसश्यैतानां पृष्ठत्वाभावादुत्पन्नानि चान्यतः पृष्ठत्वेनावगतानि स्तोत्राण्यधिकृत्य पृष्ठशब्दप्रयोगात् प्रमाणान्तरापेक्षत्वेन लिङ्गसमवायात् पुरोडाशानलङ्कुर्वित्यादिबहुवचनोपपत्तिरित्युक्तम् । ननु पृष्ठैः स्तुवतइति पृष्ठशब्दस्य स्तोत्रनामत्वे रथन्तरादिविषयपृष्ठशब्दप्रसिद्ध्यर्थो ऽयमर्थवादो ऽनर्थकः स्यात् । न च पृष्ठैरुपतिष्ठतइत्येतद्वाक्यगतरथन्तरादिविषयपृष्ठशब्दप्रसिद्ध्यर्थो ऽयमर्थवादो युक्तस्तस्याभित्वेत्याद्यृग्वाचित्वस्य सप्तमे वक्ष्यमाणत्वात् तत्र ह्ययं पृष्ठशब्दो हिङ्कारादिपृष्ठधर्मातिदेशार्थो न वेति विचारयितुङ्किमयं स्तोत्रवाची ऋग्वाची वेति सन्दिह्य चित्राधिकरणे स्तोत्रक्रियावाचित्वेन स्थितस्य पृष्ठशब्दस्येहानेकार्थदोषप्रसङ्गाद्द्रव्यवाचित्वकल्पनानुपपत्तेर्मुख्यानां च पृष्ठानाम् अन्यत्र क्रियावाक्ये विनियुक्तानामिह विनियोगात् मासमग्निहोत्रं जुहोतीतिवर्द्धमातिदेशार्थतेति कर्मणि पृष्ठशब्दः स्यात्तथाभूतोपदेशादिति सूत्रेण पूर्वपक्षिते ऽभिधानोपदेशाद्वा विप्रतिषेधाद्द्रव्येषु पृष्ठशब्दः स्यादिति सूत्रेणाभित्वा शूरेत्याद्यानामृचामयं पृष्ठशब्दो वाचक इति सिद्धान्तयिष्यते उपान्मन्त्रकरणइति उपपूर्वकात्तिष्ठतेर्मन्त्रकरणे ऽर्थे वर्त्तमानादात्मनेपदस्मृतेः समीपस्थाने च मन्त्रस्य करणत्वायोगादभिधानार्थोपस्थानवाचित्वं धातोः कल्पयित्वोपस्थानकार्यमभिधानं कुर्वतो मन्त्रस्योपस्थाने ऽपि यागस्य कार्यफलं प्रति ग्रहणायोग्यत्वं कुर्वतां यजमानसंस्काराणां याग इव करणत्वोपपत्तेरभिधानार्थमग्निसमीपे तिष्ठेदित्याख्यातपदार्थावगमात् समभिव्याहृतस्य पृष्ठशब्दस्य स्तोत्रक्रियावाचित्वे सत्यात्मनेपदविप्रतिषेधापत्तेस्तत्परिहारार्थं पृष्ठाख्यस्तोत्रसाधनत्वेनान्यत्र विनियुक्तासु ऋक्षु लक्षणया प्रवृत्त्युपपत्तेः ।

कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्मालयतां यान्ति विनियोज्याः पुनः पुनः ॥

इतिस्मृतेश्च मन्त्राणां विनियुक्तविनियोगाविरोधात् ऋग्वाच्ययं पृष्ठशब्द इति सूत्रार्थः । अतो ऽर्थवादाद्रथन्तरादीनां पृष्ठत्वं तत्प्रकृतित्वाद्वामदेव्यादीनामित्ययुक्तम् । उच्यते रथन्तरादिगीतिविशिष्टानामेव ऋचां पृष्ठसाधनतया पृष्ठशब्देन लक्षयितुं शक्यत्वाद्न्यथा चाऽभित्वाद्यृग्विशेषप्रतीतावपि करणाभावाद्विशेषणे च पूर्वसम्प्रत्ययाद्रथन्तरं पृष्ठं भवतीत्यादौ च रथन्तरादिषु पृष्ठशब्दप्रयोगा-

तु साम्नोऽपि चाभिधायकाक्षराभिव्यक्तिद्वाराभिधाने ऽपि स्तुतौ करणत्वोपपत्तेर्न ऋग्वाचित्वाभिधानाद्यथन्तरादिवाचित्वं पृष्ठशब्दस्य प्रसिद्धं किं त्वनुज्ञातमेवेत्यदोषः । द्रव्यसंख्यारूपानेकार्थप्रतिपादितवाक्यभेदपरिहाराशङ्कानिराकरणभाष्यमधिकरणसिद्धान्तोपसंहारादनन्तरम् असङ्गतत्वादयुक्तमाशङ्क्यापकृष्य व्याख्येयमित्याह * द्वावेताविति * भाष्यकृता तु प्रधानतोऽभिसम्बन्ध इत्यनेनैव सूत्रावयवेनावृत्त्या प्रधानक्रियोपादाने सत्येव क्रियावशीकारात्तदभिमुखीभूतयोर्द्रव्यसख्ययोर्विशेषणविशेष्यसम्बन्धः स्यात् न त्विह प्रधानक्रियोपादानमस्तीत्येवमेषा शङ्का निराक्रियते इति सूचनायैतावता शङ्कापरिहारावन्ते कृताविति दोषः । आशङ्कानिराकरणार्थं विशिष्टानामिति भाष्यं विशिष्टवाचिशब्दाभावे ऽप्यरुणकहायनीवदग्नये शुचये ऽष्टाकपालं निर्वपेदिति वद्वा सामानाधिकरण्यमात्रेण विशिष्टप्रतीतिसम्भवादयुक्तमाशङ्क्याह * विशिष्टानामिति * अयमाशयः गौरश्व इतिवत्परस्परसामीप्यकविभक्तिनिर्देशमात्रेण सामानाधिकरण्यायोगान्नारुणकहायन्योस्तद्वशाद्विशेषणविशेष्यभावावगतिः किं तु निर्द्रव्यगुणस्यामूर्त्तत्वेन क्रियासाधनत्वानुपपत्तेर्निर्गुणस्य च द्रव्यस्यानुपादेयत्वेन क्रियासाधनत्वानुपपत्तेर्द्वयोश्चैकक्रियानुगृहीतत्वेन द्रव्यगुणान्तरामापेक्षकत्वात् क्रियासाधनत्वानुपपत्त्याग्निशुच्योस्तु देवतात्वेनान्वयात् तस्य चोद्देश्यत्वमात्रेण क्रियासाधनत्वात् अमूर्त्तस्य निर्गुणस्यापि चोद्देश्यत्वोपपत्तेः क्रियासाधनत्वान्यथानुपपत्त्या विशेषणविशेष्यभावानवगमे ऽपि तदनभ्युपगमे प्रत्यक्षमन्वयायाख्यातावृत्त्यापत्तेः प्रधानभूताख्यातावृत्तेश्चात्यन्तान्याय्यत्वात् प्रत्येकं च देवतात्वापत्तेर्गुणभेदेनादृष्टकल्पनागौरवापादककर्मभेदप्रसङ्गादेककियावशीकारावसायात्तदन्यथानुपपत्त्या विशेषणविशेष्यभावावगतिः । पदश्रुत्यान्याज्यानीत्यत्र तु प्रधानभूतसाध्यक्रियावाच्याख्याताश्रवणात् न तस्य सामानाधिकरण्यानिर्देशमात्रेण विशेषणविशेष्यभावावगतिः सम्भवतीति । नन्वित्याशङ्काभाष्यमाख्यातनिरपेक्षस्य समभिव्याहारमात्रस्य विशिष्टावगतिकरणत्वानुपपत्तेरुक्तत्वादयुक्तमाशङ्क्याह *नन्विति * न तत्पदद्वयमपीत्याशङ्कानिराकरणभाष्यं तस्य किलायमाशयः पञ्चदशान्याज्यानीत्यत्र विशेषणविशेष्यभूते द्रव्यसंख्ये विधीयेते अनूद्येते वा एकानुवादेनेतरविशिष्टता वा विधीयते तत्राभयोर्विधाने परस्परनैरपेक्ष्याद्विशेषणविशेष्यभावो न स्यात् लोके क्वचिद्विशेषणविशेष्यभावेन प्राप्तयोर्द्रव्यसंख्ययोरनुवादे श्रुतस्य प-

द्द्वयस्यानुवाद्व्यापृतत्वेन स्तोत्रसम्बन्धविधायकत्वाभावात्तत्सम्बन्धानुपपत्तेरानर्थक्यापत्तिः स्वरूपेण चैकमनूद्येतरावधानानर्थक्यापत्तेः स्तोत्रसम्बन्धित्वेन चैकस्याप्यप्राप्तेर्नैकानुवादेनेतरविशिष्टता विधातुं शक्येति तत्रैकभवतिक्रियावशीकारेणोभयोर्विधीयमानयोररुणैकहायन्यादिवद्विशेषणविशेष्यभावोपपत्तेरनुपपत्तिमाशङ्क्याह *न तदिति* भवतिवाच्यायाः सत्ताख्यायाः क्रियाया द्रव्यसंख्यैः प्रत्यात्मलाभोपकारजननेन गुणवत्त्वात्प्राधान्याभावेनोभयवशीकारसामर्थ्यं नास्तीत्याशयः । ननु निर्द्देश्यायाः संख्यायाः निःसंख्यस्य च द्रव्यस्यात्मलाभाभावात् कथं सत्तायाः प्रत्येकवर्त्तितेत्याशङ्क्याह* पञ्चदशानीति*अर्थाक्षिप्तयत्किञ्चित् द्रव्यसंख्याक्षेपे ऽप्यप्रधानभूतया क्रियया वशीकर्त्तुमशक्यत्वात् नान्योन्यनियमसिद्धिरित्याशयः । नन्वेकक्रियावशीकाराभावे ऽपि द्रव्यसंख्ययोरितरेतरापेक्षायां सन्निधानेनैतरयोरेव परस्परनियमाद्विशेषणविशेष्यभावो भविष्यतीत्याशङ्क्याह * तस्मादिति * एकक्रियावशीकारसम्भवे तद्वशेन विशेषणविशेष्यभावापत्तेः संख्याविशिष्टद्रव्यविधिः शङ्कितुं शक्यते तदसम्भवे तु स्वतन्त्रयोरेव विधानापत्तेस्तस्य च वाक्यभेदप्रसङ्गेनासम्भवात् पाश्चात्येन विशेषणविशेष्यभावेन विधानकालीनस्य वाक्यभेदस्य परिहर्त्तुमशक्यत्वात् नोभयविधिः सम्भवतीत्यर्थः । अविधायक इतिभाष्यावयवं व्याख्यातुमाह * न चेति * यादृशः क्व चिल्लोके पञ्चदशघटनिक्षिप्तेष्वाज्यपञ्चदशत्वयोर्विशेषणविशेष्यभावः प्राप्तस्तादृशस्य स्तोत्रेषु विधायकाभावेनाभावात् स्तोत्रेषु विधायकाभावेनाभावात् स्तोत्रसम्बन्धित्वेन विधानानुवादायोगात् स्वतन्त्रानुवादे त्वानर्थक्यप्रसङ्गान्नोभयमनुवादकमित्यर्थः । एकमत्रेति भाष्यावयवं प्राक् पठितमपि उभयविध्यनुवादासम्भवाधीनसिद्धित्वात् पश्चाद्व्याचष्टे * तस्मादिति * नन्वेवं सत्याज्यानुवादेन तेषां पञ्चदशत्वसंख्याविशिष्टविधिराशङ्कावाद्युक्तः सिध्येदित्याशङ्क्याह * नामधेयत्वइति * स्तोत्रनामत्वे सत्याज्यशब्दस्याज्यैः स्तुवतइत्येतद्वाक्यप्राप्तान्याज्यान्यनूद्य संख्याविशिष्टत्वं विधातुं शक्यं घृतानां त्वप्राप्तत्वान्नानुवादः सम्भवतीत्याशयः । अनेन चास्य भाष्यावयवस्याशङ्कानिराकरणमध्यगतस्यापि लिङ्गबलीयस्त्वात्सिद्धान्तसिद्ध्यर्थतोक्ता लिङादिरहितस्य विध्यशक्तेर्विधायकशब्दानुपपत्तिमाशङ्क्याह * विधायकमिति * ननु संख्याविशिष्टाज्याविधयसम्भवे ऽपि पञ्चदशान्याज्यानि स्तोत्रेषु भवन्तीत्याज्यस्य पदस्य स्तोत्रसंख्यापदाभ्यां तत्र सम्बन्धादर्थाद् द्रव्यसंख्ययोर्विशेष-

णविशेष्यभावो भविष्यतीत्याशङ्क्य वैरूप्यापादनेन तन्त्रसम्बन्धनिरासार्थं न चात्रैकमाज्यपदं विशेषणं संख्यां प्रत्युद्देशकमितिभाष्यं वाजपेयाधिकरणवक्ष्यमाणस्य तन्त्रसम्बन्धनिरासस्यानागतावेक्षणन्यायेनेहाभिधानार्थमिति सूचनायोपेक्षितम्। डप्रत्ययान्तशब्दसामानाधिकरण्यलिङ्गादप्याज्यपृष्ठशब्दयोः स्तोत्रनामतावसीयतइत्याह *पञ्चदशानीति * क्रियामानस्य कारकमानाधीननिरूपणत्वात् घृतानां च कथं चिदुपस्थापकत्वेनोपकारकत्वसम्भवे ऽप्यवाचकत्वेन गुणवत्त्वाभिधानलक्षणां स्तुतिं प्रति कारकत्वायोगात् तृतीयया साधकतमत्वोपचारे ऽपि मुख्यसाधकतमत्वासम्भवात् न तत्संख्यया मुख्यं स्तोमत्वमवसीयतइत्याशयः ॥ २ ॥

॥ अथ अग्निहोत्रादिशब्दानां यागनामधेयताधिकरणम् ॥ ३ ॥

२९५।१ तत्प्रख्यं चान्यशास्त्रम् ॥ ४ ॥

निरूढानिरूढत्वेन द्विविधस्यापि नामधेयस्य विचारितत्वादुत्तराधिकरणद्वयानर्थक्यमाशङ्कते * नन्विति * पूर्वोक्तगुणविधिनिरासहेत्वभावादिह हेत्वन्तरेण निरासार्थं चिन्तेति परिहरति * उच्यतइति * वाक्यभेदासम्भवाच्चिन्तेत्यनुषङ्गः । तत्रेह तत्प्रख्यान्यशास्त्रसद्भावेन गुणविधिनिराकरणमुत्तरत्र तद्व्यपदेशान्यशास्त्रसद्भावेनेति विवेकः । यथा चाज्यादिशब्दानां गुणवाक्यगतवाक्यभेदालोचनेन गुणविधित्वनिरासस्तथाग्निहोत्राद्यारशब्दयोरपि गुणवाक्यगततत्प्रख्यान्यशास्त्रलोचनेनेत्यनन्तरसङ्गतिः । तद्व्यपदेशस्य त्वर्थवादगतत्वाद्वैलक्षण्यं, न च यौगिकत्वसाम्यमात्रेण उद्भिदधिकरणानन्तरमेतदारब्धुं युक्तं सामानाधिकरण्यनिरपेक्षस्य यौगिकत्वस्य नामधेयासाधकत्वेनाकिं चित्करत्वात्तत्प्रख्यत्वपरिहारसंभवासम्भवाभ्यां च सन्देह इति सर्वमनवद्यम् । अग्निहोत्रशब्दस्य देवतालक्षणगुणविधित्वाभिधानार्थं गम्यते हीति भाष्यं चतुर्थीसमासलक्षणाभावादयुक्तमाशङ्क्याह * तत्रेति * ननु सिद्धान्ते प्रमाणान्तरावगतार्थानुवादत्वात्तेन चाग्नेर्देवतात्वावगतेस्तदनुसाराच्चतुर्थीबहुव्रीह्यङ्गीकरणं युक्तं, विधिपक्षे तु प्रमाणान्तराभावान्न लक्षणा । ननु गतसमासाङ्गीकरणं युक्तमित्याशङ्क्यान्येत्युक्तम् । षष्ठीतत्पुरुषे सम्बन्धविशेषानवधारणेन व्यवहारसिद्धेः सर्वहोमानां चाग्न्याधारत्वस्य यदाहवनीयवाक्यादेव प्राप्तेः सप्तमीबहुव्रीह्यानर्थक्याल्लक्षणानुगतत्वाद्विशेषाच्च समासान्तरानुपपत्तेः पारिशेष्याच्चतुर्थीबहुव्रीहिरेवावसीयतइत्याशयः । न चेति भाष्ये वक्ष्यमाणं

चोद्भिन्न्यायवैषम्यं बहुव्रीह्यङ्गीकरणस्य प्रयोजनमित्याह * अन्तर्णीतेति * प्रसिद्ध्यादिहेतुत्रयं विक्षिप्योक्तं सङ्कलय्य पूर्ववद्व्याख्येयमित्याह * तएव चेति * पूर्वव्याख्यातिदेशार्थस्तत्त्वोपचारः। ननु गौरवभयेनेहाप्युद्भिच्चित्रादिवद्विशिष्टविध्यनाश्रयणाद्यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातर्जुहोतीति वाक्ययोरनेकगुणोपादानात्कर्मानुवादेन गुणमात्रविधौ वाक्यभेदापत्तेर्गुणविशिष्टकर्मविधानावगमात् तद्धितयोः कर्मणोः सन्निधानादग्निहोत्रशब्दो गुणविधिः प्रसज्येत तत्र च सायं होमे ऽग्नेः प्राप्तत्वावगमात्तत्प्रख्यशास्त्रान्तरसद्भावे चानर्थक्यापत्तेर्नाग्न्याख्यदेवताविधिर्युक्त इत्याशङ्क्याह * सत्यामिति * तद्वर्जमित्यनेनोभयोः सन्निधानाविशेषे ऽपि प्राप्तत्वात् सायं होमवर्जनमिति दर्शितम्। उत्पत्तिशिष्टसूर्यप्रजापत्यवरुद्धे ऽपि प्रतिहोमे ताभ्यां सह समुच्चयेन विकल्पेन वाग्निर्निवेश्यते यद्वाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र वाक्ये ऽग्निहोत्रशब्देन फले विधीयमानो गुणः प्रकृताश्रयापेक्षायां सायं होमे ऽग्न्याख्यस्य गुणस्यान्यतः प्राप्तेरभिधेयतया फलान्वययोगेनाश्रयान्तरापेक्षत्वात् प्रातर्होममाश्रयत्वेन गृह्णन्नित्यतद्गुणं सूर्यादिकं बाधित्वा निवेक्ष्यते यद्वा यज्जुहोति तत्सूर्याय च प्रजापतये चेति चशब्देनान्योन्यसापेक्षस्यैव देवताद्वयस्य क्रियान्वयप्रतीतेः प्रतिकारकं प्रत्ययव्यापाराभावादनेकगुणोपादाने ऽपि वाक्यभेदानापत्तेः सूर्यवाक्यस्यापि गुणसञ्चरितविधिशक्तत्वेन कर्मोत्पादकत्वाभावात् सूर्यप्रजापत्योरुत्पत्तिशिष्टत्वाभावेन बलीयस्त्वानुपपत्तेः सायं च प्रातश्च जुहोतीत्यस्यानुपादेयकालसम्बन्धात् प्रकरणान्तरन्यायेनाश्विनवाक्यवत् पूर्वपक्षे कर्मविधित्वावगमात्तस्य चासम्भवद्विकल्पसमुच्चयसायम्प्रातःकाललक्षणगुणद्वययोगेन यदाग्नेयो ऽष्टाकपाल इतिवत् कर्मद्वयविधायकत्वावगतेस्तद्धिते प्रातर्होमे वाक्यान्तरविहिताभ्यां सूर्यप्रजापतिभ्यां सह तुल्यबलत्वाद्विकल्पेनाग्निहोत्रवाक्यमाग्नं विधास्यतीति वक्ष्यमाणानुषङ्गेण वाक्यं पूरणीयम्। भाष्यकृता तु सायं च प्रातश्च जुहोतीत्येतद्वाक्यविहितस्य कर्मद्वयस्य यदग्नये च सूर्याय चेति वाक्याभ्यां सायम्प्रातःकालविशिष्टकर्मविशेषानुवादेन देवताविधायकाभ्यां विहितेनाग्निसूर्यादिना नैराकाङ्क्ष्यात्सन्निहिते ऽपि तस्मिन् अग्निहोत्रवाक्येन गुणविधानाशक्तेर्दूरस्थेष्वप्यविहितदेवताकेषु जुहोतिचोदितेषु दर्विहोमशब्दवाच्येषु गुणविधिरित्युक्तम्। तदुपपादयति * होमेति * सूर्याग्निवाक्ययोः कालदेवता-

विशिष्टकर्मविधायित्वे सायम्प्रातर्वाक्यस्य तत्र कालविधायित्वायोगादत्रत्यपूर्वपक्षे चाग्निहोत्रवाक्यस्य कर्मविधायित्वाभावात्कालविशिष्टकर्मविधायित्वापत्तेस्तद्विहिते ऽपि कर्मणि जुहोतिचोदितत्वाद्दर्विहोमशब्दवाच्ये देवताविधिं वक्तुं सर्वशब्दः । नन्वेवं सन्निहित एव सायम्प्रातर्वाक्यविहिते कर्मणि गुणविध्युपपत्तेर्दूरस्थेषु विधिर्न युक्त इत्याशङ्क्य होममात्रेत्युक्तं सूर्याग्निवाक्ययोः कालविशिष्टकर्मानुवादेन देवताविधायकतया विशेषरूपत्वात् तद्विहितदेवतावरुद्धे कर्मणि सन्निहिते ऽप्यग्निहोत्रवाक्यं होममात्रानुवादेन देवताविधायकतया सामान्यरूपत्वात् ततो दुर्बलं न शक्नोति देवतान्तरं विधातुमित्याशयः । नन्वसन्निहितस्य कर्मणो प्रत्यभिज्ञानात् कथमनुवाद इत्याशङ्क्यैकवाक्योपात्तजुहोतिसामर्थ्यात् प्रत्यभिज्ञानोत्पत्तिरुक्ता । नन्वाघारमाघारयतीत्येतद्वाक्यविहिते कर्मणि चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य त्रिरितः प्राचीनं प्रयाजान् यजतीति वाक्यान्तरेणाघारशब्दवाच्यस्य क्षरणार्हद्रवद्रव्यस्य चतुर्गृहीतस्याज्यविशेषरूपेण प्राप्तत्वात् सामान्यविधेश्चाविशेषोपसंहारेण पयःप्रभृतिद्रवद्रव्यान्तरप्रापकत्वायोगात्तत्प्रख्यशास्त्रान्तरसद्भावेनाघारशब्दस्य गुणविधित्वं न युक्तमित्याशङ्क्याघारश्चेति भाष्येणाघारशब्दवाच्यं द्रव्यमात्रमुपांशुयाजे विधीयतइत्युक्तं तदुपपादयितुमाह * तथेति * ननु क्षारितस्य नष्टत्वात्कथं प्रयोजनापेक्षेत्याशङ्क्याह * धर्ममात्रं चेति * प्रतिपत्त्यर्थत्वे दृष्टार्थत्वात् सर्वस्य क्षारणं स्यात् इदं त्वदृष्टसंस्कारार्थत्वात् शब्दमात्रे ऽनुष्ठिते ऽपवृज्येतेत्यर्थ * तत्क्षारितेति * तस्मादित्यर्थे तदित्यव्ययम् । ननु यदि सोमं न विन्देत पूतीकानभिषुणुयादित्यभिषवस्य स यदि राजन्यं वा वैश्यं वा याजयेत् स यदि सोमे विभक्षयिष्येन्यग्रोधास्तिभिनीराहृत्य ताः सम्पिष्य दध्न्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति भक्षस्य च प्रकरणेन यागसाधनसंस्कारतया प्रत्यभिज्ञानादभिषवयुक्तानां पूतिकाख्यानां वृक्षविशेषाणां भक्षयुक्तस्य च न्यग्रोधस्यावरोधांश्च फलानि चौदुम्बराण्यश्वत्थानि प्लाक्षाणि अभिषुणुयात्तानि भक्षयेदित्यैतरेयब्राह्मणे ऽवरोधशब्दवाच्यानां स्तिभिनीनामौदुम्बरादिफलसाहित्यश्रवणात्तत्समुदायस्य भूम्ना फलचमसशब्दाभिधेयस्य यागसाधनत्वं युक्तं क्षारणस्य तु कथमित्याशङ्क्याह * लोके ऽपि चेति * क्षारणस्याप्युपयोक्ष्यमाणसंस्कारत्वेन लोके ऽवधारणात् तद्युक्तस्य द्रवद्रव्यस्यावश्यं क्व चित्कर्मणि साधनत्वावगतेर्युक्ता प्रयोजनापेक्षेत्याशयः । प्रयोजनापेक्षामुपसंहरति * तेनेति * ननु यदि सोमं न वि-

न्देति सोमाभावे पूतिकानां प्रतिनिधिनियमार्थेन विधिप्रतीतेस्तत्कार्यकारित्वं युक्तमाधाराख्यस्य तु द्रव्यस्य कस्य चिदभावे विध्यभावात् प्रतिनिधित्वाप्रतीतेः कथं कर्मापेक्षेत्याशङ्क्यानिरासाय प्रतिनिधित्वरहितदृष्टान्तान्तराभिधानं पूतिकादिवत् संस्कार्यत्वान्यथानुपपत्त्यापि कर्माङ्गत्वावसायात् विशेषानवगतेः सामान्यतस्तावदभिलाषो ऽस्तीत्यर्थः। नन्वेवमपि उपांशुयाजार्थत्वापत्तिः कथमित्याशङ्क्याह * प्रकरणेति * पार्वणहोमादिनिवृत्त्यर्थः प्रधानशब्दः नन्वक्रियात्मकत्वेन द्रव्यस्य प्रकरणग्राह्यत्वात् स्ववाक्योपात्तेनैव कर्मणान्वयो युक्तो न प्रकृतेनेत्याशङ्क्यानिरासार्थं वृद्धसम्मतिमाह * आह चेति * श्रुतः संस्कारेण सम्बन्धो यस्य द्रव्यस्य तन्मुख्यैः प्रथमावगतैः स्ववाक्योपात्तैः कर्मभिरसङ्गतमपि कर्मान्वयं विना संस्कारसम्बन्धायोग्यत्वात्प्रकृतैरन्वयं यातीत्यर्थः। यद्वा यदि सोमं न विन्देत यदि सोमं विभक्षयिषेदिति च मुख्ययागसाधनसोमप्रसङ्गात् पूतीकफलचमसयोस्तत्कर्मकारित्वप्रतीतेः प्रकृतकर्मान्वयो युक्तो ऽस्य तु कथमित्याशङ्क्यानिराकरणार्थं मुख्यैराधारणसंस्कार्यैर्द्रव्यान्तरैर्यद्यप्यसङ्गतमित्युक्तम्। एवमाधारवाक्यस्य संस्कारविधायित्वमङ्गीकृत्य संस्कार्यत्वान्यथानुपपत्त्योपांशुयाजे द्रव्यविनियोगपर्यवसायितोक्तेदानीं वाक्यस्यैवोपांशुयाजे द्रव्यविनियोजकत्वमाह * अथ वेति * नन्वाधारणलक्षणधात्वर्थभेदाच्छब्दान्तरन्यायेन भावनाभेदप्रतीतेः कथमुपांशुयाजभावनानुवाद इत्याशङ्क्याधारद्रव्यसाद्ध्यत्वादेवेत्युक्तम्। आधारणक्रियायोगप्रवृत्ताधारशब्दवाच्येन यत् साध्यते तदाधारणमेव भवतीत्येवं प्राप्तो धात्वर्थः प्रत्ययानुग्रहायानूद्यमानो न भावनां भिनत्तीत्याशयः। नन्वत्र शुद्धभावनावाचिकरोत्यश्रवणात् शुद्धस्य चाख्यातस्याप्रयोज्यत्वात् धातुविशिष्टेन प्रत्ययेन धात्वर्थावच्छिन्नभावनानुवादपूर्वकद्रव्यविधानापत्तेः प्रागेव धात्वर्थप्राप्तिर्वाच्येत्याशङ्क्यानिरासायान्यथाप्राप्तिमाह * भावप्राप्तेति * तावब्रूतामग्नीषोमावाज्यस्यैव नौ उपांशु २९६।२
पौर्णमास्य इज्जन्यस्य कालविध्यर्थत्वेनाज्यविध्यर्थत्वासम्भवात्सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्याज्यप्रापकमुक्तम् एवं तावद्विलीनाज्यस्य होमाशक्त्यैव व्यावृत्तेराधारशब्दस्याज्यविशेषणत्वायोगात् आनर्थक्यं स्यादित्याशङ्क्य * क्षरणेत्युक्तम् * क्षरणात्मकत्वसिद्ध्यर्थं प्रागाज्यप्राप्तयभ्युपगमे व्यानर्थक्यपरिहारायाज्येन सह विकल्पमानं द्रवद्रव्यमात्रं विधीय-

१ संयोगादिति २ पु० पा०।

तइत्याशयः । नमु नामधेयत्वेनैवानर्थक्यपरिहारो भविष्यतीत्याशङ्क्याह * न चेति * क्षरणात्मकत्वविशेषस्य धात्वर्थपर्यालोचनयैव सिद्धेर्नामानर्थक्यमित्यर्थः । आधारणस्य च तस्याधारमाधार्येति क्त्वाश्रुत्या प्रयाजार्थजौहवचतुर्गृहीताज्यसंस्कारार्थत्वावधारणात् संस्काराणां च संस्कार्यनिष्ठत्वात्तद्विशेषेणैव विशेषसिद्धेर्नामानर्थक्यमित्याह * न चेति * आधारशब्दे गुणविध्यर्थे ऽपि मत्वर्थलक्षणा नास्तीत्याभिप्रायेणार्थमाधार इति भाष्यं गुणविधित्वेनाभिमतस्याधारशब्दस्य द्वितीयान्तत्वाद् गुणत्वाभिधानाशक्तेरयुक्तमाशङ्क्य व्याचष्टे * श्रुत्यैवेति * विधित्सितगुणप्रख्यमन्यच्छास्त्रं यस्मिन्स्तदपि नामधेयमिति पूर्वसूत्रगतयस्मिंच्छब्दानुषङ्गेण च सूत्रं योजयन् सिद्धान्तमाह * अत्रेति * पूर्वसूत्रनिर्दिष्टगुणपरामर्शार्थत्वेन तच्छब्दं व्याख्यातुं विधित्सिते गुणेत्युक्तम् अनेन च स विधित्सितो गुणः प्रख्याप्यते प्राप्यते ऽनेनेति विग्रहो दर्शितः । अग्निप्रजापत्योर्द्वयोः शास्त्रान्तरप्राप्तयोरग्नेः पुनर्वचनं प्रजापतिपरिसंख्यार्थमित्याशङ्क्य प्रत्यक्षश्रुतपरिसंख्यायां त्रिदोषत्वापत्तेः परिसंख्येयस्य च विध्यानर्थक्यापत्तेरयुक्ता परिसंख्येत्यभिधानार्थं प्रजापतिनिवृत्त्यर्थमित्यादिभाष्यं व्यर्थत्वोक्त्या व्याख्यातं भवति इह च सो ऽन्यतः प्राप्तो यदग्नये चेति दुष्टीकायामुक्तत्वादिहापि देवताव्यवस्थापरे वाक्ये वाक्यान्तरतः प्राप्तः कालो ऽनूयतइत्याधाराग्निहोत्राधिकरणे वक्ष्यमाणत्वात् भाष्यकृद्वार्त्तिककृतो ऽपि यदग्नये च प्रजापतये च सायं जुहोतीत्येतदेव तत्प्रख्यशास्त्रान्तरमभिमतं लक्ष्यते भिन्नपदोपात्तस्यापि देवताद्वयस्य चशब्दात् परस्परसापेक्षस्याख्यातान्वयप्रतीतेः । प्रत्येकं विधिव्यापाराभावात् वाक्यभेदानापत्तिश्चादीनां हि निपातोपसर्गाणां पृथक्पदत्वे ऽपि केवलाप्रयोगित्वेन स्वातन्त्र्येणार्थप्रतिपादकत्वाभावात्पदान्तरार्थातिशयद्योतनार्थत्वावधारणात् तत्समभिव्याहृतस्य नामपदस्याख्यातपदस्य वा तन्नैरपेक्ष्येण स्वार्थासमाप्तत्वात् पदान्तरान्वयानुपपत्तेश्चशब्दोपहितयोरेवाग्निप्रजापतिशब्दयोराख्यातान्वयान्नेतरेतरनिरपेक्षयोः प्रत्येकं विधिव्यापारो युज्यते अत एव गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति चशब्दसमुच्चितानां[2] दक्षिणात्वाद्विकृतौ धेनुर्दक्षिणेति श्रुतायाः धेन्वाः प्राकृतकृत्स्नदक्षिणाविकारत्वं द-

१ तत्पूर्वसूत्रगतनामधेयपदानुषङ्गं इति २ पु० पा० ।

२ चशब्दयोगेन समुच्चितानामि २ पु० पा० ।

शमे वक्ष्यते तत्र ह्यथैष भूर्वैश्वदेवस्त्रिवृदे सर्वस्तस्य विश्ववत्यः स्तोत्रीया धेनुदक्षिणोत्युदाहृत्य किं धेनुर्गवां निवर्त्तिकोतकृत्स्नाया दक्षिणाया इति सन्दिग्धे यच्छब्दयोग प्राथम्यमित्याद्युद्देश्यलक्षणामित्यनेन न्यायेन दक्षिणासम्बन्धे प्रथमं गवादीनामुपादानेनोद्देश्यत्वावगमात् उद्देश्यगतस्य चशब्दोक्तस्यापि साहित्यस्याविवक्षितत्वात् प्रत्येकं दक्षिणात्वावगतेर्गोत्वैकार्थसमवेतदोग्ध्रीत्ववाचिमा धेनुशब्देन गवामेव दोग्ध्रीणां निवृत्तिप्रतीतेरेकवचनेन च द्वादशशतसंख्यानिवृत्तिप्रतीतेर्यथा सौर्यं चरुं निर्वपेदिति निर्वापलक्षणगुणशब्दे नैष्ठिको विध्यन्तो नियम्यते तथा धेनुशब्देन गोमात्रनिवृत्तेर्नाश्वादिनिवृत्तिरिति तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात् सामान्यात्तद्विकारः स्यात् यथेष्टिर्गुणशब्देनेति सूत्रेण पूर्वपक्षयित्वा सर्वस्य वा क्रतुसंयोगादेकत्वाद्दक्षिणार्थस्य गुणानां चार्थैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तत्समवायो हि कर्मभिरिति सूत्रेण सिद्धान्तिन्तं तस्यार्थः सर्वस्य क्रतुदाक्षिण्यस्य धेनुर्विकारो बाधिका कुतः तस्य विश्ववत्यः स्तोत्रीया इति तच्छब्दानुषङ्गेण तस्य भूनाम्नः क्रतोर्धेनुर्दक्षिणेति कृत्स्नक्रतुसंयोगाद्विकृतौ भूनाम्नि क्रतौ प्राकृते ऽर्थे दक्षिणात्मके कार्ये श्रुततो भूतं प्रत्यक्षश्रुत्या प्राप्तं धेनुर्द्रव्यमानुमानिकं सर्वदक्षिणाबाधकं स्यात् । ननु ज्योतिष्टोमे बहुद्रव्यानतानामृत्विजां कर्मसम्बन्धावगतेस्तद्विकृतौ भुव्यप्येकद्रव्यानतानां कर्मसम्बन्धो न युक्त इत्याशङ्क्य * तत्समवायो हीत्युक्तम् * तया दक्षिणया ऋत्विजां कर्मसम्बन्धावधारणात् एकेनापि द्रव्येण दक्षिणात्वेन श्रुतेनानतानां कर्मसमवायो युक्त इत्यर्थः । ननु गवादिद्रव्यजन्यानामानतीनां भेदान्न गोजन्यानत्यर्थं विहितया धेन्वाश्वादिनिवृत्तिर्युक्तेत्याशङ्क्यैकत्वाद्दक्षिणार्थस्येत्युक्तम् । ऋत्विगानत्युपायापेक्षायामृत्विग्भ्यो दक्षिणां ददातीत्यानतिसाधनवाचिदक्षिणाशब्दस्य ददात्यन्वयाद्दक्षिणायाश्चोपादेयत्वेन विवक्षितैकसंख्यत्वात् तदर्थस्य प्रयोजनस्यानमनस्याप्येकत्वमित्यर्थः । ननु दक्षिणां ददातीत्येकवचनश्रवणे ऽपि गौश्चाश्वश्चेत्यादिवाक्ये दक्षिणासमुच्चयप्रतीतेस्तत्प्रयोजनानतिभेदो ऽवसीयतइत्याशङ्क्य गुणानां चार्थैकत्वादित्युक्तं चशब्देनेतरेतरसहितानामेव गवादीनां दक्षिणात्वप्रतीतेस्तस्य द्वादशशतं दक्षिणेत्येकवचनाच्च समुच्चितानामेव दक्षिणात्वमित्यर्थः । गवादीनामुद्देश्यत्वात् साहित्याविवक्षाशङ्कानिरासायोपादेयत्वज्ञापनार्थङ्गुणशब्देनाभिधानं दक्षिणात्वं च गवादीनां प्रत्युद्देश्यमिति ज्ञापयितुमर्थशब्देनोक्तं ततश्च यथैव गौर्दक्षिणेति न प्रत्येकं दक्षिणाशब्दः

सम्बध्यते तथाऽऽप्यग्नये जुहोति प्रजापतये जुहोतीति प्रत्येकमाख्यात-सम्बन्धाभावान्न वाक्यभेदापत्तिः।न चैतावताग्नीषोमादिवत्समुच्चितयोर्देवतात्वापत्तिः पृथक्चतुर्थीनिर्देशेनेतरेतरनिरपेक्षयोरेव देवतात्वप्रतीतेः पदान्तरसम्बन्धे हि चशब्दात्साहित्यं प्रतीयते न विभक्तिसम्बन्धे तत्सम्बन्धात् यागपरिपूर्णस्य[1] पदान्तरेण चशब्देनान्वयानुपपत्तेः । तस्मादेवतयोरेवात्र चशब्दात्साहित्यमवगम्यते न सहितयोर्देवतात्वं न चाग्निसूर्यवाक्याभ्यां देवताविधौ तत्प्रकाशनसमर्थयोर्मन्त्रयोर्लिङ्गादेव प्राप्तेरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति मन्त्रविध्योस्तदर्थशास्त्रसद्भावेनानर्थक्यं शङ्कनीयम् अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोतीति च मिश्रालिङ्गमन्त्रविधिपर्युदस्तयोः केवललिङ्गयोः प्रतिप्रसवार्थं विधानार्थवत्त्वोपपत्तेश्चतुर्थीतश्च मन्त्रवर्णदौर्बल्यात् प्रजापत्तेरपि च यज्ञसाधनत्वधर्मयोगात् अङ्क्तेर्वा गत्यर्थादग्निशब्दव्युत्पत्तेर्हिरण्यगर्भत्वसंस्तवसामान्याद्वाग्निशब्देनेन्द्रीवद्वौण्यावृत्त्या अभिधानोपपत्तेर्न चतुर्थीसद्भावे देवताप्रापकत्वं युक्तं मिश्रलिङ्गमन्त्रपक्षे च द्विदेवत्यहोमापत्तेः केवलस्याग्नेर्देवतात्वाभावान्नित्यवदनुवादो न युक्तः। प्रजापतिमात्रविधेश्चैकेनैव वाक्येन सिद्धेरन्यतरवाक्यानर्थक्यं व्यवस्थानपेक्षणाच्च सायम्प्रातःशब्दावनर्थकौ स्यातां तस्मादाघाराग्निहोत्राधिकरणे मान्त्रवर्णिकदेवताभिधानं परमतेनेति द्रष्टव्यम् । ततश्च ब्राह्मणेनाग्निसूर्ययोः शुद्धयोर्देवतात्वविधानाच्छुद्धावेवाग्निसूर्यौ द्रव्यत्यागवेलायामुद्देष्टव्यौ न मन्त्रवर्णानुसारेण ज्योतिष्टगुणाविशिष्टाविति यदग्नये चेति शास्त्रान्तरेण सायं होमेऽग्निविधानाच्चतुर्गृहीतं वा इत्यनेनाघाराख्ये कर्मणि द्रव्यविधानान्नाग्निहोत्राघारशब्दयोर्विधानार्थत्वं युक्तमित्यभिधानार्थं यदग्नये चेत्यादिभाष्यं दर्विहोमोपांशुयाजयोर्गुणविधिः पूर्वपक्षोक्तस्य कर्मान्तरगतेन गुणविधिना वैयर्थ्यानापादनादयुक्तमित्याशङ्क्ते * अत्रेति * पूर्वपक्षिणा उक्तमपि सायंहोमे देवताविधिमाघारे च द्रव्यविधिमापाद्यैतदुक्तमित्येवं भाष्यं समाधातुमग्निहोत्रशब्दस्य तावत् परमार्थतो विधानार्थतैव नास्तीत्याह * उच्यतइति * यद्यग्निहोत्रशब्दो प्राप्तार्थत्वात् विधेयसमर्पकः स्यात् ततोऽस्य विधेयगुणविषयभूतकर्मापेक्षिणः प्रकृते प्रातर्होमे दूरस्थेऽपि वा दर्विहोमे निवेशः स्याद्विशिष्टविधौ गौरवा-

---

१ प्रागपरिपूर्णस्य पदस्येति २ पु० पा० ।

पत्तेः। कर्मानुवादेन गुणविधानस्य युक्तत्वात् यदग्नये चेति त्वग्येन शास्त्रेणाग्नेर्होत्रेण हूयमानेन हविषा सम्बन्धे कृते प्रवर्त्तमानत्वेन प्राप्तार्थत्वादग्निहोत्रपदे ऽनुवादलक्षण स्पष्टमित्यर्थः। न केवलं प्राप्तार्थविधानात्[1] गुणविध्यसम्भवः किं त्वनुवाद्यकर्माभावादपीत्याह * अनूद्येति * ततश्च प्रकृतकर्मानुवादेन गुणविधावुत्पत्तिशिष्टसूर्योवरोधेन प्रातर्होमे गुणविध्ययोगात् सायं होमे गुणविध्यापत्तेस्तत्र चाग्नेः शास्त्रान्तरेण प्राप्तेः सिद्धा तत्प्रख्यतेत्याह * प्रकृतमिति * ननु तत्प्रख्यतापरिहारायैवाप्रकृतौ विधिर्भविष्यतीत्याशङ्क्याह * अन्यत्रेति * प्रत्यभिज्ञायमानविषयत्वं नानुवादानां प्रकृतपरिग्रहस्य न्याय्यत्वादित्यर्थः। न केवलं तत्प्रख्यत्वात् प्रत्यभिज्ञायमानदोषाभ्यां प्रकृता ऽप्रकृतानुवाद्यकर्मालाभः किं त्वप्राप्तत्वादपीत्याह * नेति * गुणविधित्वाभावे तर्ह्यग्निहोत्रवाक्यस्य का गतिरित्याशङ्क्याह * तस्मादिति * ननु यदग्नये चेत्यादीनां ऋजुमाधारयतीत्येवमादी- २९७।२
नां गुणसंक्रान्तिशक्तित्वात् कर्मविधायित्वासम्भवे ऽपि सायं च प्रातश्च जुहोतीत्यस्यानुपादेयकालसम्बन्धादग्निहोत्रं जुहुयात्स्वर्गकाम इत्यस्य चानुपादेयफलसम्बन्धाद्यावज्जीवमग्निहोत्रं जुहोतीत्यस्य चानुपादेयनिमित्तसम्बन्धादूर्ध्वमाधारयतीत्यस्य चानुपादेयदेशसम्बन्धात् प्रकरणान्तरन्यायेन कर्मविधायित्वात् तद्धितयोः कर्मणोरग्निहोत्राधारशब्दौ गुणविधी भविष्यतइत्याशङ्क्याह * सायमिति * सिद्धान्ते तावदग्निहोत्राधारवाक्यविहितयोः कर्मणोः प्रत्यभिज्ञानात् प्रकरणान्तरन्यायाभावात्पूर्वपक्षे ऽपि विशिष्टविधेः क्व चिदनभ्युपगमात् केवलस्य गुणस्य कर्मणो वा विधेयत्वापत्तेर्न प्रकरणान्तरन्यायः सम्भवतीत्याशयः। ननु भिन्ने जुहोतीत्यादिष्वविहितदेवताकेषु दूरस्थेषु दर्विहोमेषु कर्मप्रत्यभिज्ञाभावेनानुपादेयनिमित्तादिसम्बन्धेन च प्रकरणान्तरन्यायात् कर्मविधिप्रतीतेस्तत्र देवताविधिर्भविष्यतीत्याशङ्क्याह * दूरस्थस्येति * तेषामसम्बन्धव्यवायेनाबुद्धिस्थत्वान्नानुवादः सम्भवतीत्यर्थः। कुण्डपायिनामिदं कौण्डपायिनं कुण्डपायिनामयनाख्यं सत्रं तत्सम्बन्धिनो होमस्य मासमग्निहोत्रं जुहोतीति विहितस्य असम्बद्धव्यवायेनाबुद्धिस्थत्वाद्यदग्नये चेत्यादिदेवताविधौ दध्ना जुहोतीत्यादिद्रव्यविधौ चानुवादो यथा न युक्त इत्यातिदेशककर्मसम्बन्धाङ्गीकरणेन दृष्टान्तसिद्धिः। यदाहवनीये जुहोतीत्यादौ द्रव्यदेवतस्योपदेशतो ऽतिदे-

---

१ प्राप्तार्थत्वादिति पु० पा०।

२ असम्बद्धपदव्यवायेनेति पु० पा०।

शतो वा लाभासम्भवेनारूपत्वात्कर्मणो विध्यनुपपत्तेरगत्या दूरस्थानुवादाश्रयणमित्याशयः । एवं कर्मानुवादेन गुणविधित्वे ऽग्निहोत्र वाक्यस्य पूर्वपक्ष्युक्ते निरस्ते यदि कश्चिद् गुणविशिष्टकर्मविधिमङ्गीकृत्य प्रत्यवतिष्ठेत तं प्रति अन्यतो विशेषणांशस्य विशेष्यांशस्य वा प्राप्तिसम्भवे विशिष्टविधिगौरवाश्रयणमयुक्तम् । यदग्नये चेति शास्त्रान्तरेण चोभयवादिसिद्धगुणविधित्वेनेह विधित्सितस्य प्राप्तत्वात् व्यर्थं विशिष्टविधानमित्युत्तरद्वयं वाच्यमित्याह * विधीयतामिति * विकल्प्यते ऽन्यथा पूर्वपक्षो रक्ष्यतइत्यर्थः देवताधिकरणे देवताप्राधान्यस्य निषेध्यमानरूपतया होत्रशब्दाभिधेयस्य हूयमानस्याग्न्यर्थत्वाभावात् प्रकृतिविकारभावायोगाच्च चतुर्थीतदर्थार्थबलिहितसुखरक्षितैरिति चतुर्थीसमासलक्षणाभावात् व्यधिकरणबहुव्रीहेश्च नियतविषयत्वान्न चतुर्थीबहुव्रीहिर्युक्त इत्याह * नेति * समासान्तरं तर्हि भवत्वित्याशङ्क्याह * न चेति * ननु शेषलक्षणाया अपि षष्ठ्याः सम्प्रदानसम्प्रदेयलक्षणसम्बन्धविशेषनिष्ठत्वसम्भवादेवतायाश्च सम्प्रदानशब्दवाच्यं त्यज्यमानद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायैकदेशेन त्याज्यद्रव्योद्देश्यत्वेन प्रतिग्रहीतृत्वांशाभावे ऽपि समुदायलक्षणया सम्प्रदानत्वोपपत्तेः षष्ठीतत्पुरुषेण देवताविधिर्भविष्यतीत्याशङ्क्याह * य इति * विधौलक्षणानुपपत्तेरिति भावः । षष्ठीसमासाश्रयणे ऽपि व्यधिकरणबहुव्रीहेरसामञ्जस्यात्तत्पुरुषो ऽभ्युपगन्तव्य इति तत्पुरुषादित्यनेनोक्तं यस्मिन्नग्नये होत्रं होमे तद्धोमात्मकं कर्माग्निहोत्रशब्दवाच्यं भवतीति भाष्येण सिद्धान्ते ऽपि चतुर्थीबहुव्रीहिराश्रितः स कथं समञ्जसः स्यादित्याशङ्क्याह * अनुवाद इति * नामधेयत्वे ऽनुवादत्वात्तस्य च प्रमाणान्तरपारतन्त्र्यादन्यतः सिद्धे देवतात्वलक्षणसम्बन्धविशेषे तल्लक्षणार्था सम्बन्धमात्रवाचिन्यपि षष्ठी हूयतइति च कर्मणि जुहोतेर्धातोर्हुपामाश्रुभसिभ्यस्त्रान्नित्यौणादिके स्त्रन् प्रत्यये कृते सार्वधातुकार्द्धधातुकयोरिति च गुणे कृते होत्रशब्दव्युत्पत्तेरग्निहोत्रशब्दस्य बहुव्रीहिं विना जुहोतिसामानाधिकरण्यायोगाद्व्यधिकरणे बहुव्रीहिः कण्ठेकालवत्कथ्यते इत्यर्थः । यथा ऽश्वार्थो घास इति प्रमाणान्तरसिद्धतादर्थ्यविवक्षायामपि प्रकृतिविकारभावाभावेन तदर्थसमासायोगात् तादर्थ्यलक्षणार्थः षष्ठीतत्पुरुष. कथ्यतइति दृष्टान्तार्थः । ननु यद्यपि गौरवापत्तेस्तत्प्रख्यशास्त्रान्तरसद्भावाच्च विधिर्न युक्तः । नापि च सायं होमे गुणविधिः दूरस्थस्यानुवादाभावाच्च न दार्विहोमे गुणविधिः तथापि प्रकृते प्रातर्होमे देवताविधिर्भविष्य-

तीत्याशङ्क्याह * विधातव्यश्चेति * बहुव्रीह्यर्थस्य होमस्य प्राप्तत्वाल्लोहितोष्णीषादिवत्तद्विशेषणभूतयोर्द्रव्यदेवतयोर्होत्राग्निपदार्थयोः सम्बन्धो जुहोतिपरेण प्रत्ययेन विधातव्यः स्यादित्यर्थः। समासानुपपत्त्यादिदोषसमुच्चयार्थश्चशब्दः। ननु प्रातर्होमे ऽग्नेरविधाने निमित्ताभावान्नाग्निहोत्रनामधेयानुवादः सम्भवेदित्याशङ्क्याह * एकदेशे ऽपि चेति * अग्निहोत्रवाक्योत्पादितस्य कर्मणः सायं च प्रातश्च जुहोतीति वाक्यान्तरवशात्सायम्प्रातरावृत्तावपि ज्योतिष्टोमवत्स्वरूपभेदाभावात् तदेकदेशे साय होमे ऽग्निदेवत्यत्वज्ञानान्नाग्निहोत्रे नामधेयानुवादो ऽपगच्छतीत्यर्थः। एतच्चाहवनीये होमो नापरयोरिति गार्हपत्यान्वाहार्यपचनयोर्होमनिषेधाद् बहवृचब्राह्मणो सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्तशतानि विंशतिश्च सवत्सरे प्रातराहुतयः तावत्यो ऽग्नेर्यज्ञुष्मत्य इष्टकाः संवत्सरेणाहास्याग्निना चित्येनेष्टं भवति य एवं विद्वानग्निहोत्रं जुहोतीत्याहवनीयाहुतिसंख्ययैवाग्निहोत्रस्य स्तुतत्वात् प्रातर्होमे चाहवनीये ऽग्निदेवत्यहोमाभावात्तत्पक्षाश्रयणेनोक्तं द्वे आहवनीये जुहोति चतस्रो गार्हपत्ये चतस्रो ऽन्वाहार्यपचन इति तु दशाहुतिपक्षे। द्वे आहवनीये द्वे गार्हपत्ये द्वे आन्वाहार्यपचनइति षडाहुतिपक्षे वा प्रातर्होमे ऽपि गार्हपत्यान्वाहार्यपचनयोरग्नये गृहपतये स्वाहा ऽग्नये संवेशयतये स्वाहेत्यादिमान्त्रवार्णिकाग्निदेवत्यहोमसद्भावाद्अग्निहोत्रशब्दप्रवृत्तिः सुतरां युज्यते यथा च परपदार्थसम्बन्धविधानादिक्लेशापतेर्नाग्निहोत्रशब्दस्य प्रकृते ऽपिप्रातर्होमे गुणविधित्वं युक्तं तथाघारशब्दस्यापि क्षरणसमर्थद्रव्यमात्रवाचित्वं कल्पयित्वा तस्यान्यत्र विनियुक्तस्यापि द्वितीयामात्रेण संस्कार्यत्वं कल्पयित्वा तदन्यथानुपपत्त्योपांशुयाजाङ्गत्वकल्पनायामाघारयति परेण वा प्रत्ययेनोपांशुयाजभावनामनूद्याघाराख्यद्रव्यविधिकल्पने ध्रौवाज्यप्राप्तापादितक्षरणात्मकत्वोपांशुयाजभावनानुवादेन वा द्रव्यविधिकल्पनेति क्लेशापत्तेर्नाघारशब्दस्योपांशुयाजाख्येन कर्मणा सह तदङ्गभूतार्थाभिधानेनान्वयो युक्त इत्याह * आघारस्येति * ततश्चोपांशुयाजे द्रव्यविध्यसम्भवात् आघारयतीत्याख्यातविहिते कर्मण्याघारशब्दस्य द्रव्यविधित्वापत्तेस्तत्र च चतुर्गृहीतवाक्येनैव द्रवद्रव्याज्यप्राप्तेः। प्रयाजाज्यसंस्कारार्थं चाघारणं द्रव्यान्तरानपेक्षणात्पयःप्रभृति द्रवद्रव्यमात्रविधानानुपपत्तेः तत्प्रख्यशास्त्रान्तरसद्भावो ऽपरिहार्य इत्याशयः। नन्वस्य संस्कारकर्मत्वे सति यद्धाप्यकृतोच्यतइत्यादिना घारणक्रियया प्रयाजद्रव्यस्यैकदेश-

क्षरणात्मकातिशयावगतेः क्षारितैकदेशस्य च प्रयाजयागसाधनत्वेन संस्कारानर्थक्याभावात् संस्कारकर्मत्वं त्वया ऽप्येष्टव्यं संस्कारस्य च संस्कार्यनिष्ठत्वेन तद्विशेषादेव विशेषसिद्धेर्नाम्ना प्रयोजनामित्याशङ्क्योच्यते एतदेवाघारणं प्रधानकर्मेत्युक्तं तदयुक्तम् । प्रयाजाङ्गरूपत्वेन प्रधानत्वायोगात् अयागरूपस्यापि स्तोत्रशस्त्रादेः प्रधानकर्मत्वदर्शनात् द्रव्यदेवतान्वयेन यागत्वापादनमनर्थकं क्षारणात्मकत्वेन च प्रक्षेपाधिक्यात् प्रस्तरप्रहरणवद्धोमत्वापत्तेर्यजतेर्नामधेयमित्येतदप्ययुक्तमित्याशङ्क्यान्वयनिरासं सूचयन् सर्वत्र धात्वर्थस्य करणत्वेनान्वयादाघारमग्निहोत्रमिति द्वितीयान्तरस्य सामानाधिकरण्यानुपपत्तेस्तन्नामत्वमयुक्तमित्याशङ्कां निरस्यति * सामानाधिकरण्यं चेति * कर्तृव्यापारव्याप्यत्वं विना करणत्वायोगात् तदाक्षिप्तकर्तृव्यापारव्याप्यत्वेनानीप्सितकर्मत्वरूपसाध्यांशविवक्षया सामानाधिकरण्यं युक्तमित्यर्थः । नन्वेवं सति तृतीयान्तस्याप्युद्भिदादिपदस्य गुणविधित्वे ऽर्थाक्षिप्तसाध्यांशविवक्षया वैय्यधिकरण्येनान्वयोपपत्तेर्न मत्वर्थलक्षणापत्तिरित्याशङ्क्याहेत्युक्तम् । इह नामधेयत्वपक्षे साध्यांशविवक्षा गुणविवक्षो गुणविधौ त्वपूर्वसाधनांशे गुणं विधातुं करणत्वांशस्यैव विवक्षेत्याशयः । साध्यशब्देन च भाष्यगतः प्रधानशब्दः साध्यांशविवक्षार्थ इति सूचितं कस्य प्रधानभूतस्य साध्यभूतस्य द्वितीयान्तमेतन्नामधेयं स्यादित्यर्थः । संस्कार्यनिष्ठस्य संस्कारस्य साध्यत्वानिरूपणात्साध्यत्वविवक्षायां संस्कार्यान्वयस्यावश्यापेक्षणीयत्वात्तत एव विशेषसिद्धेर्नामानर्थकमित्याशङ्कानिरासार्थमाघारणस्वरूपस्य संस्कारत्वे ऽपि द्रव्यदेवतान्वयेन यागत्वसिद्धेः तस्य च प्रधानकर्मत्वात् स्विष्टकृदादिवच्च संस्कारकर्मत्वे ऽपि प्रधानकर्मत्वाविरोधात्कर्मशब्देन (धर्ममाज्येभ्यस्तदृग्ह्यान्नेष्टकर्म स्यात् इतिवत्[1]) प्रधानकर्मत्वमुक्तं प्रक्षेपाधिक्याच्च सत्यपि होमत्वे प्रधानकर्मत्वमात्रेण नामधेयार्हत्वासिद्धेस्तस्य चेह द्रव्यदेवतान्वयलभ्ययागत्वाधीनसिद्धित्वात् प्रधानकर्मत्वमात्रविवक्षया भाष्ये यजतिशब्दो न होमत्वनिवृत्त्यर्थ इति कर्मण इति सामान्यशब्देन सूचितं यज्जुह्वां चतुर्गृह्णाति प्रयाजार्थेनोत्पन्नस्य चतुर्गृहीतस्याप्यन्यत्र विनियोगात् तस्याघारमाघार्येति तस्य प्रयाजार्थे चतुर्गृहीतस्यैकदेशं क्षारयित्वा इतः क्षारितैकदेशाच्चतुर्गृहीतात्त्रिःप्रयाजान् यजतीत्याघारणस्य प्रयाजाज्यसंस्कारार्थत्वप्रतीतेः स्वरूपेण

---

१ गुणविवक्षेति २ पु० पा० ।

२ अर्थं पा० २ पु० ना० परं त्वितरस्थाने धर्ममात्रे तु कर्म स्यादितिवदिति पा० ।

च प्रधानकर्मत्वसम्भवे यागरूपत्वापादनानर्थक्यापत्तेर्न संस्कारकर्मत्वनिरपेक्षं प्रधानकर्मत्वं भाष्यकृतोक्तमिति भ्रमितव्यं ततश्चाधारहोमानन्तरं चतुर्गृहीतस्य नाशदोषापहारेष्वन्यत्प्रयाजार्थं चतुर्गृहीतं गृहीत्वा धारणेन संस्कृत्य प्रयाजा यष्टव्या इति। ननु यद्यप्याघारशब्देनोपांशुयाजे स्वाक्यविहिते चाघारकर्मणि द्रव्यं न विधीयते तथा ऽप्याज्यपयःप्रभृतिद्रव्यं साम्नाप्योपांशुयाजादिषु विहितमाघारशब्देनानूद्य क्षारणसंस्कारविधिरयं भविष्यतीत्याशङ्क्य निराकर्त्तुमाह * विस्पष्टमिति * आघारशब्देनान्यत्र द्रव्यस्याविधानेनान्यत्र विहितद्रव्यप्रत्यभिज्ञाभावान्न कर्मान्तरविहितद्रव्यानुवादो ऽत्र सम्भवतीत्याशयः॥

॥ अथ श्येनादिशब्दानां यागनामधेयताधिकरणम् ॥ ४ ॥

तद्व्यपदेशं च ॥ ५ ॥

अथैष शब्दसमभिव्याहारात्साद्दश्येनाथैष ज्योतिरित्यादीन्यपि इहोदाहरणमिति कस्य चिच्छङ्कास्यात्तन्निवृत्त्यर्थमाह * अथैष इति * नन्वेवं सति तेषां गुणविधित्वं निरस्तं न स्यादित्याशङ्क्य गुणविधित्वशङ्कैव तेषु नास्तीत्याह * तेषामिति * कर्मनामत्वे[1] तस्य कारकविभक्त्या विनापि विधिमात्रेण विनियोगोपपत्तेरज्ञातस्वरूपज्ञापनार्थं प्रातिपदिकार्थप्रधानप्रथमाविभक्तिनिर्देशो युक्तः गुणस्य तु लोकसिद्धस्य स्वरूपज्ञापनानपेक्षणात् कारकविभक्त्या च विना विनियोगायोगात् तदभावे गुणविधित्वाशङ्का न युक्तेत्याशयः। नन्वेतेन सदृक्षदाक्षिणेन यजेतेति वाक्यान्तरेण तेषामपि तृतीयानिर्देशाद् गुणविधित्वाशङ्कास्तीत्याशङ्क्याह * ते ऽपि चेति * तद्व्यपदेशरहितानामेतदधिकरणविचार्यत्वायोगे ऽप्युद्भिदधिकरणादिषु यथासम्भवं विचारो भविष्यतीत्याशयः। ननु प्रथमानिर्देशेनावधारितकर्मनामत्वानां न वाक्यान्तरस्थेन तृतीयानिर्देशेन निवृत्तिर्युक्तेत्याशङ्क्यापरितोषात्पक्षान्तरमाह * अथ वेति * एते ऽपि प्रथमानिर्दिष्टा अपि ज्योतिरादिशब्दा यथासम्भवमुद्भिदाद्यधिकरणेषूदाहरणमित्यर्थः। प्रसिद्ध्यादिभिरिति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * तृतीयान्तत्वेनोद्भिदादिशब्दवत् श्येनादिशब्दानामपि करणवाचित्वप्रसिद्धेर्द्रव्यस्यैव करणत्वोपपत्तेः श्येनादिशब्दानां द्रव्य- २९८।१

१ अथैष ज्योतिरथैष विश्वजिदित्यत्र तृतीयानिर्देशाभावात् गुणविधित्वशङ्कैव नास्तीत्युच्यते तर्हि सिद्धान्ते ऽपि तृतीयाया अभावादेव यागत्वे कार्यसमवेन करणत्वानुपपत्तेर्ज्योतिरादिशब्दस्य यागार्थत्वमपि न स्यादित्याशङ्क्यां परिहर्तुमाह कर्मनामत्वइति।

वाचितेन्युक्ते ननूद्भिदादिसिद्धान्तन्यायेन तृतीयान्ततयैव सामानाधिकरण्यात् कर्मनामत्वं सेत्स्यतीत्याशङ्कानिरासार्थं नन्विति भाष्यं व्याचष्टे * न चेति * निरूढार्थत्वेनैषां न सामानाधिकरण्यं निर्णायकमितिभावः । ननु यथा वै श्येन इत्याद्यर्थवादावगतो वत्यर्थः कर्मणि प्रवृत्तिनिमित्तं भविष्यतीत्याशङ्क्याह * वत्यर्थोपादानेन चेति * श्रुतिवृत्त्यपेक्षया विप्रकृष्टापि लक्षणा वाच्येन स्वसम्बन्ध्युपस्थापनात् सन्निकृष्टा गौणता तु वाच्यलक्षितेन वाच्यसम्बन्धिनो ऽर्थस्योपस्थापनात् अत्यन्तविप्रकृष्टा वत्यर्थोपादानेन कर्मणि प्रवृत्तौ गौणता स्यात् सा चात्यन्तविप्रकृष्टेति योज्यम। ननु श्येनादेर्यागसम्बन्धानवगमात् कथं लक्षकतेत्याशङ्क्याह * साध्यं हीति * उद्भिदादीनामिवेति दृष्टान्तोपादानेन तद्वदेव ज्योतिष्टोमे गुणविधानस्य सूचितत्वात् तदुद्देशेन विधीयमानस्य श्येनादेस्तत्साधनत्वप्रतीतिः । स्वसाध्यलक्षकत्वं युक्तमिति भावः । नन्वेवं सति वैदिकत्वेन श्येनादिशब्दानामपि निरूढलक्षणापत्तेः गुणवचनत्वान्मतुप्लोपो ऽन्वाख्यातव्यः स्यादित्याशङ्क्याह * विनैवेति * मतुप्लोपः स्मर्यतइति सिद्धान्ते दर्शनात् स्मर्यमाणेनेति शेषः कल्पनीयः। गुणवचनेषु शब्दस्वभावनिबन्धनत्वात् लक्षणया गुणशब्दस्य गुणिनि वृत्तिप्रतीतेर्वाचकत्वशङ्कायां तन्निरासार्थं मतुल्लोपान्वाख्यानं श्येनादिशब्दानां तु पदान्तरसामानाधिकरण्यनिबन्धनत्वात् मतुल्लोपानन्वाख्याने ऽपि वाचकत्वशङ्काभावात् तन्निरासार्थमन्वाख्यानमनर्थकमित्याशयः । मत्वर्थलक्षणायां च श्रुत्यर्थस्यापि वाक्यार्थान्वायित्वेनात्यागाद्वत्यर्थस्य प्रतीतिमात्रौपाधिकत्वेन वाक्यार्थान्वयाभावात् त्यागापत्तेर्मत्वर्थलक्षणैव ज्यायसीत्याह*किं चेति* मत्वर्थस्य वैशिष्ट्यस्य यज्यन्वयमात्रात्सिद्धेः श्येनप्रातिपदिकस्य तात्पर्याभावेन श्रुत्यर्थप्राधान्याविघातात् स्वार्थपरश्येनौपयिकत्वेन वा पानाख्यानान्वयासम्भवे ऽपि[1] यजिसामानाधिकरण्योत्तरकालं तदन्यथानुपपत्त्या लक्षणेति सामानाधिकरण्यरूपैकवाक्यवशादित्युक्तं गौणत्वे तु श्रुत्यर्थस्य वाक्यार्थानन्वयात् श्येनप्रातिपदिकस्य तात्पर्यानुपपत्तेर्वत्यर्थे एव साहश्ये तात्पर्यकल्पनां विनाख्यातान्वयायोगात् वत्यर्थाकल्पनापुरःसराख्यातान्वयसिद्ध्यर्थं पदवेलायामेवासौ श्रुत्यर्थतात्पर्यत्यागेन लक्षणीय इति श्रुत्यर्थबाधापत्तेर्मत्वर्थाद् दुर्बल इत्यर्थः । श्लोकं व्याचष्टे * गुणविधिपक्षे हीति * तेन श्येनादिनेति भाष्येण सौत्रं तच्छब्दं यस्मिन् गुणोपदेश इत्ये-

[1] स्वार्थपरश्येनौपयिकत्वेन वाख्यातान्वयसंभवे ऽपीति २ पु० पा० ।

तत्सूत्रनिर्दिष्टविधित्सितगुणपरामर्शिनमङ्गीकृत्य विशब्दं च भेदवाचिनमङ्गीकृत्य तेन विधित्सितेन च श्येनादिरूपेण गुणेन भिन्नार्थतया व्यपदेशः सङ्कीर्त्तनं यस्य श्येनादिपदस्य तदपि नामधेयमिति नामधेयपदानुवृत्त्या सूत्रं योजितं तत्र कथं भिन्नार्थत्वावगतिरित्यपेक्षिते श्येनादिशब्दानां कर्मणि प्रवृत्तिनिमित्तप्रदर्शनार्थेन सादृश्यव्यपदेशादित्यादिभाष्येणोक्तमार्थवादिकं श्येनसादृश्यमेव भिन्नार्थत्वावगतावपि कारणमिति प्रदर्शयन् सिद्धान्तमाह * तदिति * उपपत्तिरित्यादावुपशब्दस्य सादृश्यार्थत्वदर्शनात् उपमीयते सादृश्येनावगम्यते ऽनयेति व्युत्पत्त्या सादृश्यावच्छेदकमुपमाशब्देनोक्तं तथा यद्वस्तु स्तूयते तद्भिन्नया सत्या तस्माच्छ्येनद्रव्येणोपमानेनोपमितस्य श्येनेन यजेतेति श्येनशब्दार्थस्य श्येनद्रव्याद्भेदो ऽवसीयतइत्यर्थः । ननु श्येनशब्दार्थस्य पक्षिविशेषस्योपमानात् पक्षिविशेषादभेदे ऽपि तद्वतो यागस्य ततो भेदात्सादृश्येन स्तुतिर्भविष्यतीत्याशङ्क्य विधेयमित्युक्तम् । एतदधिकरणपूर्वपक्षे याजिना ज्योतिष्टोममनूद्य तत्र श्येनादिगुणमात्रविधानमभ्युपगमात् तदेव स्तोतव्यं न याग इत्याशयः । ननु स्तुतिः स्वरूपसत्यत्वानपेक्षणात् यथा कथं चिदुपपत्स्यते इत्याशङ्क्य न हीत्युक्तं सादृश्यद्वारा स्तुतिर्भेदाभावे सादृश्यस्योपायमात्रत्वेनापि वक्तुमशक्यत्वात् निरालम्बना स्यादित्याशयः । ननु गगनं गगनाकारं सागरः सागरोपम इत्यादावभेदे ऽपि सादृश्येन स्तुतिर्दृष्टेत्याशङ्क्य * सदेत्युक्तम् * काल्पनिकभेदाश्रया स्तुतिर्गत्या कदा चिदङ्गीक्रियते न सर्वदेत्यर्थः । श्लोकं व्याचष्टे * श्येनादिवाक्येषु हीति * सदेति पदं शङ्कानिरासार्थत्वेनाथोच्यतेत्यादिना व्याख्यातम् । श्रुतिर्हीति भाष्यं नामधेयत्वे वत्यर्थलक्षणया श्रुत्यर्थत्यागापत्तेरयुक्तमाशङ्क्योपमासामञ्जस्यपरत्वेन व्याचष्टे * नामधेयत्वे त्विति * लक्षणेति भाष्यं मत्वर्थलक्षणाया वत्यर्थलक्षणातो ज्यायस्त्वस्योक्तत्वादयुक्तमाशङ्क्य वत्यर्थलक्षणायाः पक्षद्वयसाम्येनापर्यनुयोज्यत्वाद् गुणविधौ च कालपनिकभेदाश्रयणत्वेनात्यन्तासामञ्जस्यात् मत्वर्थलक्षणादोषाधिक्याभिप्रायत्वेन व्याचष्टे * इतरथा हीति * सामानाधिकरण्यसिद्ध्यर्थं श्येनवता यागेनेति मत्वर्थस्तावल्लक्षयितव्यः कर्माङ्गभूतस्य च श्येनस्य इतरश्येनैकजातीयत्वेन भूयो ऽवयवसामान्ये योगो जात्यन्तरस्य तदिति भिन्नजातीयाश्रयत्वेनोक्तस्य जातिसादृश्यस्याभावात् काल्पनिकभेदाश्रयणे ऽपि कर्मणि व्यापृतस्य भ्रातृव्यादातृत्वायोगादभिचार्यस्य च यजमानभ्रातृव्यस्यादाने योग्यत्वस्याप्यभावात् सादृश्यानुपपत्तेरर्थवादोक्तस्यापि

वस्तुतो सम्भवात्तदालम्बनसिद्ध्यर्थं भ्रातृव्यादानसाधनद्वारा तदङ्गभूते इयेने वत्यर्थो ऽपि लक्षयितव्य इत्यर्थः।ननु यागस्य भ्रातृव्यादानसाधनत्वेन इयेनसाहश्योपपत्तेर्विधयइयेनस्तुत्यर्थायामिव वेतसावकास्तुत्यर्था स्तुतिर्भविष्यतीत्याशङ्क्याह * न चेति * यागविधेर्निराकर्तुमशक्यत्वात् स्तुतेर्नान्यत्र सञ्चारो युक्त इत्यर्थः। एतदेव विवृणोति
२९९।१ * अविधेयेति * ननु यागविधावपि तद्विशेषणतया द्रव्यस्यापि विधेयत्वोपपत्तेः स्तुतिभाक्तं भविष्यतीत्याशङ्क्य नामधेयत्वेन गतिसम्भवे विशिष्टविधिगौरवस्यानाश्रयणीयत्वात् द्रव्यस्याविधेयत्वमुक्तं सामानाधिकरण्यार्थं च द्रव्येण मत्वर्थं यागं लक्षयित्वा यागस्तुतिं द्रव्ये सञ्चारयितुं पुनरपि यागेन द्रव्यलक्षणाद्विप्रकर्षो ऽस्मिन् पक्षे स्यादित्याह * पुनरपि चेति * यथा च लौकिकप्रयोगात् इयेनशब्दस्य द्रव्यवचनत्वं मुख्यं तथा वैदिकात् सामानाधिकरण्याद्यागवचनत्वमपि मुख्यं वक्तुं शक्यमिति श्रुतिहीतिभाष्यं प्रौढया यथाश्रुतं व्याख्यातुमाह * समभिव्याहाराच्चेति * लक्षणेत्यादिभाष्यम् अन्यथा व्याचष्टे * विधौ चेति*गुणे इयेनशब्देन विहिते विधौ मत्वर्थलक्षणा स्यात् इत्येवमनेन भाष्येण व्याख्यातम् । एतदेवं भाष्यं गुणशब्देषु मतुल्लोपस्य विहितत्वात् मत्वर्थलक्षणा युक्ता नान्यत्रेत्यन्यथा व्याख्यातुमाह * गुणेति * नन्विवलोपस्याप्यस्मरणात् तदर्थलक्षणाप्ययुक्ता स्यादित्याशङ्क्याह * इवार्थस्त्विति * फलप्रकल्पाभिप्रायो वा भाष्यगतो श्रुतिलक्षणाशब्दावित्यन्यथा व्याख्यातुमाह * मत्वर्थलक्षणा त्विति * दोषान्तराण्यपि भाष्यगतेन लक्षणाशब्देनोपलक्षितानीति सूचयितुम् उद्भिदधिकरणवार्त्तिकोक्तान्यागं प्रति गुणविधावभिचरन्निति फलपदस्यानुवाद्यज्योतिष्टोमयागविशेषणत्वासम्भवादानर्थक्यं सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेदः प्रत्ययव्यापारविप्रकर्षः धातुपारार्थ्यं यागमात्रे च गुणविधौ उत्पत्तिविशिष्टेन सह विकल्पः फलविशिष्टयागे गुणविधौ सामान्यशिष्टस्य सोमस्य विशेषविशिष्टेन इयेनादिना बाध इति दोषान् योजयति * पूर्वोक्तांश्चेति *

॥ अथ वाजपेयादिशब्दनां यागनामधेयताधिकरणम् ॥ ५ ॥

नामधेये गुणश्रुतौ स्याद्विधानमिति चेत् ॥ ६ ॥

ननु किमत्र ज्योतिष्टोमयागानुवादेन वाजपेयलक्षणगुणविधिः पूर्वपक्ष्यते, गुणविशिष्टयागविधिर्वा, तत्राद्ये कल्पे ज्योतिष्टोमक्रियातो वाजपेयक्रियाया भेदाभावाल्लिङ्गदर्शनसूत्रानुपपत्तिः । सा-

र्थकाम्यप्राप्तस्वाराज्यकामानुवादापत्तेश्च । फलसम्बन्धस्याविवक्षितत्वाद्वैरूप्यं सूत्रस्याप्यनुपपत्तिः । द्वितीयकल्पे तु मत्वर्थलक्षणा स्यात् तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारशङ्कायामुद्भिदादिष्वपि तन्त्रसम्बन्धाभ्युपगमेन मत्वर्थलक्षणापरिहारोपपत्तेर्गुणविधित्वसम्भवात् नामधेयत्वसिद्धान्तः प्रत्युद्भियेत वाजं पेयमस्मिन्निति बहुव्रीहिणा मत्वर्थलाभाभ्युपगमे बहुव्रीह्यान्तर्गीतगुणसम्बन्धस्य कर्मण एव श्रुत्या फले विधानादर्थाद् गुणविधाने ऽपि वचनव्यक्त्यन्यथात्वाभावाद्वैरूप्यसूत्रानुपपत्तिस्तदवस्थितेत्याशङ्क्याह *तन्त्रसम्बन्धेनेति* विशिष्टविधावपि तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारशङ्कोद्भिदादिष्वपि प्रसज्यमाना तदाक्षेपेण प्रत्यवस्थान्नान्न दूष्यतीति तात्पर्यार्थः । यागानुवादेन गुणविधावनूद्यमानस्य यागस्य फलेन विशेष्टुमशक्यत्वादुभयसम्बन्धाभावेन तन्त्रत्वानुपपत्तेः । फलसाधनतयान्वतः प्राप्तस्य गुणवत्त्वाभिधानायावश्यं मत्वर्थलक्षणापद्येत विशिष्टविधौ तु विध्युत्तरकालं तत्सामर्थ्यलभ्ये धात्वर्थस्य फलं प्रति करणत्वे ऽर्थाक्षिप्ते च गुणं प्रति साध्यत्वे सत्यपि विधीयमानावस्थायां कारकविभक्त्यभावाद्धातुतः स्वरूपमात्रेण प्रतीतस्योभयसम्बन्धो मत्वर्थलक्षणां विना ऽपि न विरुध्यते फलसम्बन्धोत्तरकालं गुणसम्बन्धाभ्युपगमे फलसम्बन्धेन साधनत्वाक्षेपात् तादृशस्य साधनभूतेन गुणेन समत्वात् सम्बन्धो न युज्यते गुणसम्बन्धोत्तरकालं च फलसम्बन्धाभ्युपगमे गुणसम्बन्धेन साध्यत्वाक्षेपात् साध्यभूतेन फलेन न युज्यतेति युगपदुभयसम्बन्धप्रदर्शनार्थं तन्त्रत्वमुक्तम् । आख्यातपदस्य तन्त्रेणोभयसम्बन्धोत्तरकालं तेनैव हेतुना धात्वर्थस्य साध्यसाधनभावो भवन्न विरोत्स्यतइति हेतौ तृतीयामङ्गीकृत्य योज्यम् । ननु वैरूप्यापत्तेर्मत्वर्थलक्षणां विनोभयसम्बन्धो न युक्त इत्याशङ्क्य तेनेत्युक्तं येन कारणेन धात्वर्थस्य साध्यसाधनत्वनिरपेक्षस्य स्वरूपमात्रेण धातुनोक्तस्योभयसम्बन्धोत्तरकालमर्थादापन्नः साध्यसाधनभावो न विरुध्यते तेन कारणेन युगपद्विधेयव्यापारोत्तरकालं तद्धेतुकसाध्यसाधनरूपेणोभाभ्यां मत्वर्थलक्षणया विनैव धात्वर्थस्य सम्बन्धत्वसिद्धिरित्यर्थः । तन्त्रसम्बन्धेन च विशिष्टविधावपि मत्वर्थलक्षणपरिहारसम्भवे चित्रावाक्ये ऽपि चित्रात्वस्त्रीत्वविशिष्टयागविधानोपपत्तेः । स्त्रीत्वाक्षिप्तप्राणिद्रव्यकत्वेन दैक्षसादृश्यात्तदीयेतिकर्त्तव्यतालाभेन नैराकाङ्क्ष्योपपत्तेर्न वाक्यभेदापत्तिः । आज्यैः स्तुवतइत्यादिष्वप्याज्यादिविशिष्टस्तुतिविधानोपपत्तेः पञ्चदशादिवाक्येराज्याद्यनुवादेन सं-

१ साध्यसाधनत्वनिरपेक्षस्य स्वरूपमात्रेण धातुनोक्तस्योभयसंबन्ध इ० २ पु० पा० ।

ख्यामात्रविधानान्न वाक्यभेदापत्तिः सूर्याग्निवाक्ययोश्च देवताद्वय-विशिष्टहोमान्तरविधायित्वोपपत्तेरग्निहोत्रवाक्याविहिते होमे शास्त्रा-न्तरेणाग्नेः प्राप्तत्वाभावात्तत्प्रख्यता परिहर्तुं शक्या ।श्येनादिवाक्येष्वपि श्येनादिवाक्यविहितस्य च द्रव्याविशिष्टस्य यागस्य श्येनादिद्रव्योपमा-नेन स्तुत्युपपत्तेस्तद्वत्पदेशतापि परिहर्त्तुं शक्येति सूचितम्।यद्यपि घृ-तादेः स्तुतावकरणत्वात्कारकविभक्तिसम्भवे चोपपदविभक्तित्वाश्र-यणस्यायुक्तत्वात् सहार्थे तृतीयाङ्गीकरणेनाज्यादीभिः सह स्तुवतइ-त्येवमपि विशिष्टविधानं न युज्यते तथापि पञ्चदशादिवाक्येष्वेवाध्याहृ-तभवतिपराख्यातोक्तायाः यागभावनायाः स्थापनाख्यधात्वर्थावच्छेदा-भ्युपगमात्तस्य च देशानपेक्षस्यानुष्ठानाशक्तेर्विधययोगात् प्रकरणस्य गम्यस्तोत्रदेशान्विताज्यादिविध्यवगतेराज्यादिपदस्य प्रकरणप्राप्तेन स्तोत्रेण वाक्योपात्तया च संख्यया सह तन्त्रेण सम्बन्धात् संख्या-विशिष्टघृतादिरूपैकार्थविधानोपपत्तेर्न वाक्यभेदापत्तिरिति दर्शयितुं तथेत्युक्तम् । आदिशब्दस्त्रिवृच्छब्दस्य बहिष्पवमानत्वयोगोक्त्यर्थः स-र्वाक्षेपे सूत्रसामञ्जस्यप्रदर्शनार्थम् * तस्मादित्यनेन * सूत्रम् यो-जितं मत्वर्थलक्षणापरिहारमात्रेणाक्षेपे सत्युद्भिदधिकरणानन्तरमेवै-तदधिकरणारम्भोपपत्तेरिहासङ्गतिमाशङ्क्य सर्वेत्युक्तम्। कथं वाक्य-भेदादिपरिहरणीयमित्यपेक्षिते ऽस्मदुक्तप्रकारसूचनार्थं यथासम्भ-वमित्युक्तमिति । ननु पूर्वाधिकरणचतुष्टयाक्षेपेणैतदधिकरणारम्भे सत्यपूर्ववाक्योदाहरणमनर्थकमित्याशङ्क्याह * तत्रेदमिति * वाजं पेयमिस्मिन्निति बहुव्रीहिणैव मत्वर्थलाभान्मत्वर्थलक्षणानापत्तेः पेय-त्वस्य च वाजशब्दवाच्यान्नविशेषणत्वोपपत्तेः पानार्हत्वविशिष्टवाज-रूपैकार्थविधानसम्भवाद्वाक्यभेदानापत्तेस्तत्प्रख्यान्यशास्त्रतद्वत्पदे-शयोश्चाभावात् पूर्वन्यायचतुष्टयेन वाजपेयशब्दस्य गुणविधित्वनिरा-सासिद्धैवैरूप्यापत्त्या तन्निरासायेदं वाक्यम् उदाहृतमित्यर्थः। यद्य-प्युपदिष्टेषु धात्वर्थेपूपदेशसामर्थ्यात्करणत्वं प्रतीयते तेन चार्थात् क र्तृव्यापारव्याप्यत्वरूपं साध्यत्वं कल्प्यते तथाप्युपदिश्यमानावस्थायां कारकविभक्त्यभावात् साध्यसाधनत्वशून्यरूपस्वरूपमात्रेण धातु-नोक्तस्य धात्वर्थस्य तन्त्रसम्बन्धेन मत्वर्थलक्षणां विनैव गुणविधा-नोपपत्तेर्नास्ति मत्वर्थलक्षणेति यदुक्तं तत्रैव वृद्धसम्मतिमाह * आह चेति* यद्वा करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतकर-णत्वाक्षिप्तसाध्यांशानुवादेन गुणे ऽपि विधीयमानेन मत्वर्थलक्षणो-ति चित्राधिकरणपूर्वपक्षवार्त्तिकोक्तन्यायेन यागानुवादेनापि गुणवि-धौ मत्वर्थलक्षणानापत्तेः किमिति विशिष्टविधिमभ्युपेत्य तन्त्रस-

म्बन्धेन मत्वर्थलक्षणापरिहारक्लेशः क्रियतइत्याशङ्क्यानिरासार्थो ऽयं श्लोकः करणेषूपदिष्टेषु सत्सु याथार्थ्यसाध्यत्वकल्पना तस्यां च गुणविधाने मत्वर्थलक्षणा न नास्ति किं त्वस्त्येति द्वौ नञौ प्रकृत्यर्थं गमयतः इति न्यायेन योज्यः। विधिसामर्थाद्धातोः साधनत्वरूपस्यार्थप्रतिपादकत्वावगतेस्तत्सिद्धये ऽर्थाक्षिप्तस्यापि साध्यत्वस्याशाब्दत्वाच्छब्देन गुणेनान्वयानुपपत्तेरन्यथा च क्व चिदपि मत्वर्थलक्षणानापत्तेरित्याशयः।

तुल्यत्वात् क्रिययोर्न ॥ ७ ॥

नन्वेतल्लिङ्गोपन्यासात् वाजपेयवाक्यमेवात्रोदाहरणं प्रतीयतइत्याशङ्क्याह * वाजपेये तावदिति * वक्ष्यमाणसूत्रोक्तवैरूप्यलक्षणान्यायमूलत्वाल्लिङ्गस्य न्यायस्य च सर्वसाधारण्यान्न लिङ्गमात्रेण सङ्कोचो युक्त इत्याशयः। भाष्यकृता सौत्रं नञं पूर्वपक्षनिरासार्थत्वेन व्याख्याय गुणविशिष्टकर्मविधिपक्षे वाजपेयक्रियाया दर्शपूर्णमासक्रियया तुल्यत्वात् दार्शपौर्णमासिकविध्यन्तापत्तेर्दीक्ष्योपसद्दर्शनं न युक्तमिति पूर्वपक्षनिरासलिङ्गाभिधानार्थत्वेन च सूत्रं व्याख्याय नामधेयत्वं सत्यव्यक्तचोदितत्वेन ज्योतिष्टोमक्रियया तुल्यत्वादीक्षोपसद्दर्शनं युक्तमिति सिद्धान्तलिङ्गाभिधानार्थत्वेन व्याख्यातं तत्र नामधेयपक्षवद् गुणविधिपक्षे ऽपि स्वार्थविहितदेवताशून्यत्वलक्षणाऽव्यक्तचोदितत्वसद्भावात् सौमिकविध्यन्तप्राप्त्युपपत्तेरौषधद्रव्यकत्वेनेष्टिसादृश्ये ऽपि सत्यैष्टिको विध्यन्तः सौमिको वेति सन्देहे दीक्षोपसद्दर्शनात् सन्दिग्धेषु वाक्यशेषादिति न्यायेन सौमिकविध्यन्तनिश्चयात् नानेन लिङ्गेन गुणविधित्वनिरासो नामधेयत्वं वा सिध्यतीत्याशङ्क्याह * वाजमिति * विप्रतिपत्तौ हविषा नियम्येत कर्मणास्तदुपाख्यत्वादित्यष्टमाधिकरणन्यायेन द्रव्यसादृश्यस्य बलीयस्त्वादीक्षोपसद्दर्शनस्यापि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति विध्यन्ताधिकरणोक्तन्यायेन यथा सम्भवं परिहारोपपत्तेरौषधिद्रव्यकत्वे सति द्रव्यसारूप्येण वाजपेयस्य दर्शपूर्णमासाभ्यां समानत्वादिष्टिप्रकृतिकत्वं प्रसज्येतेत्यर्थः। ३००।१

ऐकशब्द्ये परार्थवत् ॥ ८ ॥

भाष्यकृता यदि गुणविशिष्टकर्म विधिः स्यात् ततः स्वार्थवत्परार्थवच्चाभिधानं प्रसज्येत तच्च यजेतेत्यस्य शब्दस्यैकत्वाद्विप्रतिषिध्येतेति वदता गुणविशिष्टकर्मविधौ स्वार्थवत्

स्वविधानार्थवदपूर्वविधित्वेनोपादेयत्वेन गुणत्वेन चाभिहितस्य यागस्य परार्थवत् गुणविधानार्थवत् प्राप्तानुवादत्वेनोद्देश्यत्वेन प्राधान्येन च अभिधानमेकशब्दे सकृदुच्चरिते धातोर्न युक्तमिति पूर्वसूत्रगतस्य नञः काकाक्षिवदिहाप्यन्वयमङ्गीकृत्य विप्रतिषेधशब्देन नञर्थव्याख्यानात् सूत्रं योजितं तत्र गुणप्रधानत्वाद्यनपेक्षस्वरूपमात्रेण धातुनोक्तस्य यागस्य पश्चाद् गुणप्रधानत्वादिरूपापत्तावपि विधीयमानावस्थायामैकरूप्येण तन्त्रसम्बन्धोपपत्तेरुक्तत्वाद्विप्रतिषेधासम्भवमाशङ्क्याह * तन्त्रत्वमिति * अयमाशयः । धात्वर्थस्याक्रियारूपत्वात् कर्मकारकेण तत्फलेन करणकारकेण च गुणेन सह साक्षात् सम्बन्धायोगात् भावनाद्वारा ताभ्यां सम्बन्धो वाच्यः । न चाकारकरूपस्य क्रियारूपया भावनयान्वयः सम्भवतीति भावनान्वयायावश्यं कारकरूपता धात्वर्थस्याभ्युपगन्तव्या अशाब्देन च कारकत्वेन शाब्दे व्यवहारे अन्वयायोगात् कारकत्वरूपेणैव धात्वर्थो भावनान्वयार्थे धातुनाभिधातव्यस्तत्र कर्मत्वेनाभिधाने फलसम्बन्धायोगात् करणत्वेन चाभिधाने गुणसम्बन्धायोगात् तन्त्रसम्बन्धायोगात्तन्त्रसम्बन्धानुपपत्तिरिति योज्यं चैवं यदि यः फलस्य साधनाकाङ्क्षापूरणलक्षणो धात्वर्थसम्बन्धेनोपकारः क्रियते स एव गुणस्यापि यो वा गुणस्य साध्याकाङ्क्षापूरणलक्षणः स एव कालस्यापि[1] ततो वैरूप्याभावात् तन्त्रत्वं युक्तं तदभावे त्विहावृत्तेरुभयसम्बन्धो लक्षणद्योतको भवतीति नन्वृत्विजो वृणीते अहं सम्माष्टीत्यादौ उपकारतुल्यत्वे ऽपि प्रत्येकं वाक्यपरिसमाप्तेरावृत्तिप्रसङ्गात् तन्त्रत्वं नास्तीत्याशङ्क्याह * द्वेधा हीति * सकृदुक्तस्यापि वरणसम्मार्गादेः सभामध्यस्थप्रदीपवत् प्रत्येकमुपकारकत्वेनान्वयोपपत्तेर्नाख्यातावृत्तिस्तत्र कल्प्येत्याशयः । एवं तर्ह्यरुणया पिङ्गाक्ष्यैकहायन्येति क्रयवहत्विगादिसमुदाये ऽपि वाक्यपरिसमाप्तिः कस्मान्नेष्टेत्याशङ्क्याह * आख्यातगुणत्वेति * आख्यातेन च स्वार्थस्य गुणत्वप्राधान्यरूपेणानाभिधाने प्रधानभूतेनर्त्विगादिना गुणभूतेन चारुणादिनान्वयायोगात् गुणत्वप्राधान्यरूपेण स्वार्थाभिधानद्योतनायाख्यातस्य गुणप्रधानतार्थगतोपचारेणोक्ता गुणभूतेन चरणादिना प्रधानभूतानामृत्विगादीनां समुदायीकर्तुमशक्यत्वात् आख्यातन्त्रत्वे ऽपि प्रत्येकं वाक्यसमाप्तिरङ्गीकार्येत्याशयः । पूर्वसूत्रगतानुपक्तनञभिहतविप्रतिषेधविवरणार्थेन यदीति भाष्येण फलं प्रति विधेयतयोक्तस्य यागस्य गुणवि-

१ फलस्यापीति २ पु० पा० ।

धानायानुवाद्यतयाभिधानं न युक्तं तत्रोत्पत्तिविधिव्यापारपूर्वकत्वेनेतरविधिव्यापाराणां द्रव्यवत्फलस्याप्यनुत्पन्नया क्रिययान्वयायोगात् उत्पन्नायाश्च विधानायोगात् पूर्वं फलसम्बन्धे ऽपि तद्विधानार्थं यागस्यानुवाद्यत्वाद्विप्रतिषेधानुपपत्तिमाशङ्क्याह * तदिहेति * ततश्च न फलसम्बन्धे यागस्यानुवाद्यतेत्याशयः। कथं विधेयत्वस्य फलत्वाभावापादकतेत्याशङ्क्याह * उद्दिश्यमानं हीति * यमर्थमधिकृत्य प्रवर्त्तन्ते तत्प्रयोजनमिति नैयायिकोक्तलक्षणानुसारात् कृत्युद्देश्यप्रयोजनस्य फलत्वप्रसिद्धेर्विधेयत्वं च यागमनुतिष्ठता स्वाराज्यं कामयितव्यमित्युपादेयत्वापत्तेः। कृत्युद्देश्यत्वाभावात्फलत्वं न स्यात् प्रत्युत विधेयत्वादङ्गतैव स्यादित्यर्थः। एवं तर्हि फलसम्बन्धवत् द्रव्यसम्बन्धे ऽपि यागस्यैव सन्निकृष्टतया विधेयत्वेनैकरूप्यात् तन्त्रत्वं युक्तमित्याशङ्क्याह * यागो ऽपीति * यद्यपि विधित्वं प्रत्ययोपात्तं न नामपदमृच्छतीत्याधाराग्निहोत्राधिकरणवार्त्तिकोक्तन्यायेन सर्वत्र धात्वर्थावच्छिन्ना भावनैव विधेया तथापि फलं सिद्धवत्कृत्य यथापाद्यत्वेन यागो विधीयते नैवं द्रव्यं सिद्धवत्कृत्यापाद्यत्वेनासौ विधीयते निमित्तदेशकालसंस्कार्याणां पञ्चानामेव सिद्धवत्कारोपपत्तेर्द्रव्यस्य च देशादिचतुष्टयान्तर्गत्यसम्भवात्पारिशेष्यात्संस्कार्यत्वापत्तेस्तथा च सति तृतीयाबाधापत्तिरित्यर्थः। भूतभाव्युपयोगाभावाच्च द्रव्यस्य च संस्कार्यता न युक्तेत्याह * न चेति * एवं यजेः तन्त्रेण फलद्रव्यपदसम्बन्धे पूर्वपक्ष्युक्ते निरस्ते यदि कश्चिद् द्रव्यपदस्येतराभ्यां तन्त्रसम्बन्धं ब्रूयात् तन्निरासायाह * एतेनेति * यागस्य द्रव्यं प्रत्युपादानस्य निरस्तत्वेन फलस्य च यागं प्रत्युपादानस्य निरासात् सुतरां द्रव्यं प्रत्यसम्भावनेत्यर्थः। द्रव्यस्यैवंभूतप्रत्युपादेयत्वेनैकरूप्यं फलं प्रत्युपादानस्य निराकरिष्यमाणत्वात् न सम्भवतीत्याशयः। नन्वेवं सति फलस्य सर्वप्राधान्येनैकरूप्यादितराभ्यां तन्त्रसम्बन्धो भविष्यतीत्याशङ्क्याह * न चेति * फलस्य त्वितरे प्रत्युपादानमनाशङ्क्यमेवेत्याशयः। ननु यथा सोमेन यजेतेत्यादौ यागद्रव्ययोरेकस्यां भावनायामुपादानमिष्यते तथा फले ऽपि किं न स्यादित्याशङ्क्याह * एकेनेति * भावनायाः साध्यसाधनेतिकर्त्तव्यतारूपांशत्रयाकाङ्क्षत्वात् साधनाकाङ्क्षायां धात्वर्थान्वयनिवृत्तायामपीतिकर्त्तव्यताकाङ्क्षायां द्रव्येणाप्यन्वयो युक्तः। फलस्य तु साधनप्रतियोगिकसाध्यत्वासिद्ध्यर्थं साधनमात्राकाङ्क्षत्वात् एकेन साधनेन नैराकाङ्क्ष्ये कृते ऽन्यस्य तदुद्देशेनाविधानात् न तादर्थ्येनापाद्यता युक्तेत्याशयः। ननु द्रव्यमप्यप्राप्त-

त्वादवश्यविधेयं तस्य फलार्थत्वाभावे कैमर्थ्येन विधिः स्यादित्याशङ्क्याह * यथेति * प्रतिपदाधिकरणभाष्योक्तन्यायेन यागार्थं द्रव्यं भविष्यतीत्यर्थः । नन्वेवमपि द्रव्येण विशेष्यमाणस्यैव यागस्य फले विधानात् तन्त्रसम्बन्धाविरोध इत्याशङ्क्याह * न चेति * फलसाधनतया विधीयमानस्य यागस्य तृतीयानिर्दिष्टेन द्रव्येण मत्वर्थलक्षणां विना विशेष्टुमशक्यत्वादिति भावः । मत्वर्थलक्षणापरिहारार्थं तु फले यागविधाने यागे च द्रव्यविधाने चाभ्युपगम्यमाने वैरूप्यमपरिहार्यमित्याह * तत्रेति * नन्वर्थाद्यागस्य फलसम्बन्धे साधनत्वापत्तौ द्रव्यसम्बन्धे च साध्यत्वापत्तावपि धातुना स्वरूपेणाभिधानान्न वैरूप्यापत्तिरित्याशङ्क्यां निराकर्तुं तन्त्रसम्बन्धासम्भवमुपसंहरति * ततश्चेति * भावनान्वयनिरपेक्षस्य यागस्य विधातुमशक्यत्वात् अविधीयमानस्य च भावनान्वयद्वाराफलाद्यन्वययोगाद्विधीयमानावस्थायामेव साधनरूपताभ्युपगन्तव्या । न चाशाब्देन साध्यसाधनत्वरूपेण शाब्दे व्यवहारे ऽन्वयः सम्भवतीति शब्देनैव साध्यसाधनरूपताभिधातव्येत्यपरिहार्यं वैरूप्यमित्याशयः । साध्यसाधनत्वरूपाभिधानस्य त्रिविधवैरूप्यापादकत्वप्रदर्शनायोपादेयेत्युक्तं साध्यस्य तावत्प्रयोजनत्वात् प्राधान्यम् । साधनस्य च साध्यसिद्ध्यर्थत्वेन पारार्थ्यात् शेषत्वापरपर्यायं गुणत्वं प्रसिद्धमेव प्राधान्यस्य च कृत्युद्देश्यं विनानुपपत्तेरुद्देश्यत्वापादकत्वम् अप्राप्तस्य चोद्देष्टुमशक्यत्वात् प्राप्तानुकीर्त्तनरूपानुवादापादकत्वम् एवं शेषत्वस्य शेषिपारतन्त्र्यरूपत्वात् पारतन्त्र्यापाद्यत्वलक्षणोपादेयत्वापादकत्वम् । उपादेयत्वस्य विध्यधीनत्वात् विधेयत्वापादकत्वमिति विरुद्धत्रिकद्वयापत्तिः । देशकालयोर्विधेयगुणभावे ऽप्युपादेयत्वाभावात् प्राधान्यानुवाद्यत्वाभावे ऽपि चोद्देश्यत्वाभ्युपगमात् कथं गुणत्वस्योपादेयत्वापादकत्वमुद्देश्यत्वस्य चानुवाद्यत्वापादकत्वमित्याशङ्क्यानिवृत्त्यर्थं यागशब्दः देशकालयोः स्वभावसिद्धत्वेनानाद्यत्वात् सिद्धवत् करणरूपमुद्देश्यत्वं प्रधानत्वं स्वाभाविकत्वात् गुणत्वे ऽपि नापनीयते कर्मणस्तु स्वभावसिद्ध्यभावात् उभयरूपाभिधानसम्भवे प्रतियोग्यन्वयानुरूपविवक्षोपपत्तेर्गुणत्वस्योपादेयत्वापादकत्वं सिद्धवत्करणस्य च स्वयम्प्राप्त्यनापादकत्वे ऽप्यप्राप्तस्य सिद्धवत्कर्तुमशक्यत्वात् प्राप्त्यपेक्षत्वं युक्तमेवेत्याशयः । अतएवोद्देश्यानूद्यप्रधानभूतापेक्षणादित्यपेक्षामात्रमुक्तम् । इह च वदः सुपि क्यकचित्यत्र गदमदचरयमश्चानुपसर्गइत्येतत्सूत्रगतानुपसर्गपदानु-

१ सिद्धसाध्यरूपेत्यर्थः ।

वृत्त्या ऽनुपसर्गे सुबन्ते उपपदे वदतेःक्यप्प्रत्ययाभ्याख्यानात् उपसर्गयोगे क्यप्प्रत्ययाभावेन किन्निमित्तसम्प्रसारणाभावात् ऋहलोर्ण्यदिति सामान्यविहितण्यत्प्रत्ययप्राप्तेः प्रवाद्यापवाद्येनिवदनुवाद्येति रूपापत्तेर्नु क्षिप्रं वाद्यं नूद्यमिति क्षिप्रवाचिनि नुशब्दे निपातरूपे सुप्युपपदे वदः क्यपं कृत्वा ऽनुवाद्यस्य प्राप्त्यपेक्षत्वेन क्षिप्रोद्यत्वायोगात् नूद्यं न भवतीत्यनूद्यमिति नञ्समासाश्रयणेन रूपसिद्धिः कार्या। ननु यद्यपि फलेनापादेयत्वादिरूपेण यागो गृह्यते गुणेन चोद्देश्यत्वादिरूपेण तथापि एकेन रूपेणाभिधानादितरेण चार्थात्प्रतीतस्योभयसम्बन्धो न विरोत्स्यते इत्याशङ्क्याह * एकेति * अभिधानिकं रूपं विना शाब्दे व्यवहारे ऽन्वययोगाद्यागस्यैकरूपाभिधाने ऽप्यविशेषादुपादेयत्वादिरूपेणाभिधानाश्रयणे गुणस्य यागेनासम्बन्धादुद्देश्यत्वादिसाधारणादिरूपेण फलस्यासम्बन्धस्तन्त्रत्वाभाव इत्यतीतानुषङ्गेण समापनीयम्। तर्ह्युपादेयोद्देश्यत्वादिसाधारणरूपेणाभिधानादुभयसम्बन्धो भविष्यतीत्याशङ्क्याह * तत्रेति * अनेन च भिद्येत हीति भाष्यं व्याख्यातम्। ननु सकृदुच्चरितस्यैवोभयसम्बन्धात् कथं वाक्यभेदापत्तिरित्याशङ्क्याह * अवश्यं हीति * सकृदुच्चरिते चास्मिन् विवक्षैकैव दृश्यतइति अनेन न्यायेन सकृदुच्चरितस्य विरुद्धानेकरूपाभिधानपरत्वायोगाद्यत्र गुणसम्बन्धे यागस्योद्दिश्यमानादिरूपमभिधेयं यत्र च फलसम्बन्धे यागस्योपादीयमानाद्यात्मकताभिधेया तत्राख्यातपदावृत्त्या स्वाराज्यकामो यजेत वाजपेयेन यजेतेति द्वे वाक्ये कल्पनीये स्यातामित्यर्थः। भावनायाः सर्वत्रैकरूप्यात्तन्त्रेणानेकसम्बन्धसम्भवे ऽपि भावनासम्बन्धोत्तरकाले धात्वर्थस्य कारकसम्बन्धालोचनकाले वैरूप्यापत्तिरिति सूचयितुम् * यागस्येत्युक्तम्। नन्वित्याशङ्क्य भाष्यमाख्यातैक्येनैकवाक्यतायाः स्पष्टत्वादयुक्तमाशङ्क्य व्याचष्टे * ननु चेति * तन्त्रेणाख्यातस्योभयसम्बन्धाद्वाक्यार्थद्वित्वेन वाक्यद्वित्वाभिधानमित्यर्थः। नैतदेवमिति परिहारभाष्यमाख्यातद्वयाभावे ऽपि तन्त्रसम्बन्धोपपत्तेः। पदचतुष्टयाप्रसङ्गादयुक्तमाशङ्क्याह * चत्वारीति * उच्यतइत्याशङ्क्याभिप्रायविवरणार्थं भाष्यं व्याचष्टे * परस्य त्विति * विभक्त्यभाव- ३०१।१
त्कर्मकरणत्वनिरपेक्षस्वरूपमात्रेण धात्वर्थस्य धातुना ऽभिधानादित्याशयः। कारकरूपाभिधानं विना क्रियारूपया भावनया सहान्वययोगात्कारकरूपेणैव धात्वर्थो ऽभिधातव्यः। ततश्च धात्वर्थाभिधानलक्षणकार्यप्राधान्यात्कार्यगतकर्मकरणत्वाभिधानवैरूप्याद्यागो

यागेनेति शब्दरूपस्य भेदापत्तिरिति परिहाराभिप्रायविवरणार्थं नैतदस्तीति भाष्यं व्याचष्टे * नैतदस्तीति * यद्यपि विभक्त्यभावाद्धातोः स्वतो रूपभेदो नास्ति तथापि यद्यप्राप्तो धात्वर्थस्ततो धातुविधिः प्राप्ते त्वनुवाद इति विध्यनुवादरूपत्वात् अर्थतो रूपभेदः प्रसज्येतेति भाष्यार्थः । विधिशब्देनोपादानगुणत्वे ऽनुवादशब्देन चोद्देश्यत्वप्राधान्ये ऽप्युपलक्षिते वाजपेयेन गुणेन सम्बन्धं परार्थमनूद्येतेत्यनेन यद् गुणसम्बन्धे धात्वर्थस्यानुवाद्यत्वं वैरूप्यापादनायोक्तं तदाक्षेपार्थमाहेति भाष्यं व्याचष्टे * आहेति * ननु वाजपेयशब्दस्याख्यातकृत्यवत्प्रवर्त्तनानभिधायित्वे ऽपि विधेयसमर्पकत्वाद्विधायकत्वं भविष्यतीत्याशङ्क्य भाष्यकृता नामशब्दार्थेत्युक्तं व्यापार एव साक्षाद्विधेयः न च नामशब्दस्यार्थो व्यापार इत्यर्थः । नन्वाख्यातशब्दार्थव्यापारद्वारा नामशब्दार्थस्य विधेयत्वं भविष्यतीत्याशङ्क्य यश्चात्रेत्युक्तं पूर्वापरीभूतानिष्पन्नरूपत्वात् धात्वर्थ एव व्यापारः धातोश्चानुवाद्यत्वसमर्पकत्वस्य त्वगोक्तत्वात्तस्यार्थो व्यापारो न विधातुं शक्यतइत्याशयः । अतः फलसम्बन्धवद् गुणसम्बन्धो ऽप्याख्यातस्य विधिरूपत्वात् न वैरूप्यापत्तिरिति तात्पर्यार्थः यदीति समाधानभाष्यस्यायमाशयः धात्वर्थानुवादे ऽपि प्रत्ययार्थस्य भावनायाः सर्वकारकानुरञ्जनसहत्वात् फलविशिष्टत्ववद् गुणविशिष्टतयाप्यैकरूप्येण विधानात्तद्द्वारा नामशब्दार्थस्यापि विधानोपपत्तेर्न विध्यभावदोषापत्तिःयदि तु भावनातिरस्कारेण साक्षाद् धात्वर्थस्यैव फलवद् गुणविधिरिष्यते ततस्तस्य व्यापारात्मकत्वे ऽप्यन्योत्पादानुकूलस्वभावत्वाभावेनाक्रियारूपस्यैकरूप्येणातुल्यरूपानेककारकानुरञ्जनासहत्वात् फलं प्रति गुणभूतस्य गुणं प्रति प्राधान्यायोगेनोभयं प्रति गुणत्वापत्तेः प्रत्येकं वाक्यपरिसमाप्तिप्रसङ्गात् फलगुणयोः परस्परानन्वयः स्यादिति तत्र वाजपेयाख्यद्रव्यं प्रति यागस्य गुणत्वे द्रव्यस्य यागसंस्कार्यत्वापत्तेस्तृतीयानुपपत्तिदोषः कस्मान्नोक्त इत्याशङ्क्याह * यदीति * स्वरूपतानादरकारणमित्याशयः । ननु यथा व्रीहिविधेर्दर्शपूर्णमासविध्येकत्वाभावे ऽपि प्रकरणेन दर्शपूर्णमासयोरेव व्रीहीणामवरोधात् व्यवस्था तथा वाजपेयस्यापि स्वाराज्यकामयागएव प्रकरणेनावरोधात् व्यवस्था भविष्यतीत्याशङ्क्यार्थे प्रकरणादिति भाष्यं व्याचष्टे * प्रकरणेति * नेति परिहारभाष्यमपूर्वसाधनांशलक्षणार्थं वाक्यस्य प्रकरणापेक्षित्वादविरोधोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * नेति * यद्वाजपेयेन यजेत तत् स्वाराज्यकामा यत् स्वाराज्यकामो यजेत तद्वाजपेयेनेति चै-

कविशेषितेन यागेनेतरस्य सम्बन्धे ज्ञातवद्विशेषणत्वेनोपादानाद-ज्ञातवच्च विधानाद्वैरूप्यलक्षणवाक्यभेदापत्तेस्तन्त्रसम्बन्धे परस्परानपेक्षेति भाष्यतात्पर्यव्याख्या तत्रैवं परस्परनैरपेक्ष्ये सति गुणो विधीयमानः सार्वत्रिको ऽपूर्वयागसम्बन्धो वेति मात्रशब्दस्य द्वेधा व्याख्या प्रकरणानिष्पत्तेः शुद्धयजिसम्बन्धादित्याशङ्कापरिहारः अस्त्वित्याशङ्काभाष्यं स्पष्टत्वादव्याख्याय नेत्यादिपरिहारान्तरभाष्यं व्याचष्टे * तेनेति *

॥ अथाग्नेयादीनां नामनामताधिकरणम् ॥ ६ ॥

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थेन चेदन्येन शिष्टाः ॥ ९ ॥

अत्र भाष्यकृताग्नेयादयः शब्दा गुणविधयः कर्मनामधेयानि वेति चिन्ता दर्शिता साष्टाकपालादिसामानाधिकरण्यात् कर्मणश्चाश्रवणान्मन्त्रतस्तु विरोधे स्यात् इत्यत्र चाग्नेयाग्नीषोमीययोर्ब्राह्मणक्रमविपर्ययेण मन्त्रक्रमाम्नानस्य वक्ष्यमाणत्वेन क्रमविनियुक्तमन्त्राभावात् श्रुत्यविनियुक्तानां च मन्त्राणां स्वार्थसमवायकल्पकत्वाभावात् मान्त्रवर्णिकदेवताकल्पनानुपपत्तेर्द्रव्यदेवतासंयोगेनापि योगस्य कल्पयितुमशक्यत्वात् आग्नेयं चतुर्द्धा करोतीत्यादिव्यवहारस्य द्रव्यविषयत्वेन कर्मनामानपेक्षत्वात् निष्प्रयोजनत्वेनाप्याग्नेयादिशब्दस्य कर्मनामत्वशङ्कानुपपत्तेरयुक्तेत्याशङ्क्याह * एवमिति * अयमाशयः पूर्वाधिकरणे तन्त्रसम्बन्धानुपपत्त्या विशिष्टविधौ निरस्ते क्व चिदप्यनावृत्तेन प्रत्ययेन विशिष्टविधिर्नसम्भवतीत्याशङ्क्य विशिष्टविधिव्युत्पादनायैतदधिकरणं तद्धुत्पादनस्य चोत्पत्तिशिष्टबलीयस्त्वसिद्धिः प्रयोजनं सोमेन यजेतेति सोमविशिष्टे यागे श्रुतेन प्रत्ययेन विहिते शुद्धस्याप्राप्तत्वेनानुवादायोगात् विशिष्टस्य च द्रव्यान्तरानाकाङ्क्षत्वान्नोत्पत्तिशिष्टसोमावरुद्धे ज्योतिष्टोमे खनित्रादिद्रव्यान्तरं विधातुं शक्यमित्युद्भिदादिशब्दानां नामधेयत्वं सिध्यति श्रुतेन तु प्रत्ययेन शुद्धं यागं विधायोपपदानर्थक्यपरिजिहीर्षया तदर्थविधानायाश्रुतप्रत्ययान्तरकल्पने श्रुतस्यैव वा वृत्तिकल्पने शुद्धयागानुवादेनोत्पत्युत्पन्नशिष्टयोर्वाक्यीयत्वाविशेषात्तुल्यबलत्वेन विकल्पोपपत्तेर्नामधेयत्वं न सिध्यतीत्युद्भिदादिशब्दानामुत्पत्तिशिष्टगुणावरुद्धे यागे गुणान्तरविधायकत्वासम्भवान्नामधेयत्वं द्रढयितुं विशिष्टविधिरिह व्युत्पाद्यते सर्वे चात्र विशिष्टविधयः उदाह-

रणं तत्र सन्निकृष्टविध्यसम्भवनिबन्धनत्वाद्विप्रकृष्टविधेर्विशिष्टविधौ च सन्निकृष्टविप्रकृष्टयोर्विशेष्यविशेषणयोर्युगपद्विधेयत्वात् सन्निकृष्टविधानार्थं तस्य विधेयत्वसम्भवो विप्रकृष्टविधानार्थं चासम्भवो ऽभ्युपगन्तव्यः स्यादिति युगपत्तद्विरुद्धसम्भवाऽसम्भवायोगात् न क्व चित्सकृच्छ्रुतेन प्रत्ययेन विशिष्टविधिः सम्भवतीति प्राप्ते तत्यागादिकर्मतद्विशेषणभूताश्च सोमादयो गुणा युगपद्विधीयेरन्निति प्रतिज्ञाय शुद्धस्य कर्मणो ऽनुष्ठानाशक्तेर्विधानासम्भवाद्विधानार्थं लिङ्प्रत्यये विशेषणविशेष्यविधिविभागाभावादिति हेतुरुक्तः एवं तर्ह्यशत्रयोपेताया भावनायाः सर्वत्रानुष्ठानयोग्यत्वेन विधेयत्वाद्वाक्यान्तरगतानामप्यङ्गानां प्रधानविधिनैव विधेयत्वापत्तेरुत्पत्त्युत्पन्नशिष्टविवेको न स्यादित्याशङ्क्य न चेदन्येन शिष्टा इत्युक्तं किं चित्केन चित्कथं चित् कुर्यादिति सर्वत्र सामान्यतः साध्यसाधनेतिकर्त्तव्यतान्वितभावनाविधाने ऽपि विशेषाकाङ्क्षायां वाक्यान्तरविहितविशेषलाभेनोपपन्नस्य प्रधानविधायिनः प्रत्ययस्य तद्विधानक्लेशाङ्गीकरणायोगात् स्ववाक्यगतविशेषविधानमात्रपर्यवसानोपपत्तेरुत्पत्त्युत्पन्नविशिष्टविवेकाविरोध इत्याशयः । अतः परमार्थतो विशिष्टविधिव्युत्पादनायैवैतदधिकरणम् तथापि पूर्वापवादत्वेन सङ्गतिं वक्तुं भाष्यकृता गुणविधयः कर्मनामधेयानि वेति विचारो दर्शित इत्यपवादशब्देन सूचितं । नामधेयत्वाशङ्कायाश्चेह निर्बीजत्वात्तदपवादो ऽनर्थक इति तद्द्वारा नामधेयकार्यस्य गुणफलोपबन्धादेरपवादो ऽयमिति नामधेयकार्यशब्देन सूचितम् । नामधेयाभावे ऽप्याग्नेयं चतुर्द्धा करोतीत्यादिव्यवहारोपपत्तेश्चशब्देनाग्नेयादिशब्दे गुणविधिनामधेयचिन्तायाः निष्प्रयोजनत्वं सूचितम् । उद्भिदादिशब्देषु हि गुणविधित्वे खनित्रादिना यष्टव्यं नामधेयत्वे सोमेनैवेति चिन्ताप्रयोजनं चित्राशब्देष्वप्येवं स्पष्टमेव प्रयोजनं तत्प्रख्याविचारे ऽप्यग्निहोत्रशब्दस्य गुणविधित्वे दर्विहोमेष्वविहितदेवताकेष्वग्निर्देवता नामत्वे मान्त्रवर्णिकी आधारशब्दस्य तु गुणविधित्वे द्रवद्रव्यमात्रेणोपांशुयाजः कार्यो नामत्वे त्वाज्येनैवेति प्रयोजनमाग्नेयादिशब्दस्य तु गुणविधिनामधेयत्वयोर्न प्रयोजनविशेषो ऽस्तीत्यपवादत्वे सङ्गतिप्रदर्शनमात्रार्थः । सन्देहवेलायां नामधेयपक्षोपन्यासो ऽत एवानेकगुणोपादानात् गुणविध्यसम्भव एव पूर्वपक्षितः । सिद्धान्ते ऽपि गुणविधित्वसमर्थनमात्रं कृतं न नामत्वं निराकृतं गुणविध्यसम्भवस्य चाधिकरणपञ्चकोक्तस्यापवादायैतदधिकरणं गुणविध्यसम्भवे त्वाग्नेयादिशब्दस्यानर्थक्यपरिहाराया-

त्वात्या यथा कथं चिन्नामत्वं शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीय इत्यादि व्यवहारसिद्ध्यर्थमेष्टव्यमिति दर्शयितुं नामधेयत्वोपन्यास इति द्रष्टव्यम्। ननु समाम्नायां नामधेयत्वचिन्तायाम् अपवादप्रस्तावस्योचितत्वात् दर्विहोमपदमविचार्योपवादो न युक्त इत्याशङ्क्य ते *कस्मादिति* वैश्वदेवपदस्य तु नामत्वमङ्गीकृत्य गुणार्थताप्यस्ति नास्तीति वैश्वदेवाधिकरणे चिन्तेत्यभिप्रेत्य तच्चिन्तेहानाशङ्किता समिदादिपदानामपि तत्प्रख्यन्यायान्नामत्वे सत्येव पार्वणशब्दस्य कर्मनामधेयस्यापि कालाभीज्या समुदायाभीज्या वेति विचारेण देवताविधित्वावसायात्तन्न्यायेन देवताविधित्वमङ्गीकृत्य प्रकृतसमिदादिशब्दवाच्यदेवतासंस्कारार्थाः प्रयाजा इत्याशङ्क्य द्वितीयान्तत्वेन देवताविधित्वायोगात् मान्त्रवर्णिकसमिदादिदेवतायोगेन यागेषु लक्षणया समिदादिशब्दप्रवृत्तेर्मन्त्रवर्णेभ्यश्चापूर्वाणां देवतानामेव यागार्थत्वप्रतीतेर्न देवतासंस्कारार्थतेति नवमे वक्ष्यमाणत्वात् नेह तच्चिन्ताशङ्किता। दर्विहोमपदं किं गुणविधिः कर्मनामधेयं वेत्यष्टमे विचारयिष्यमाणमिहैव कस्मान्न विचारितमित्याशङ्क्य तम्। लौकिकहोमेष्वाचारतस्त्याग्बिलया मूलदण्डया दर्व्या जुहोतीति स्मृत्या च विधित्सितस्य दर्विलक्षणस्य गुणस्य प्राप्तेः पुरो ऽनुवाक्यामनुयाज्यया जुहोति सदेवत्वायेति विध्येकवाक्यतया चार्थवादत्वेनोपयुक्तस्य समासान्निःकृष्य दर्विपदस्य तद्विधायित्वमङ्गीकृत्य स्मृतिमूलत्वकल्पनायोगात्तत्प्रख्यन्यायेनैव नामधेयत्वं सिद्धं वैदिकेष्वपि स्रुवेण जुहोति चमसेन जुहोतीति साक्षाद्विहितेन स्रुवादिना सह समासान्निष्कृष्य विधेयत्वेन कल्प्यमानाया दर्वेर्विकल्पायोगाच्छास्त्रान्तरेण वैपरीत्यप्राप्तेस्तत्प्रापणस्यासम्भवेन वैयर्थ्यापत्तेस्तेनैव च सिद्धमित्यभिप्रेत्य परिहरति * विचारितमिति* एवं त्वाष्टमिकस्य गुणविधिनामधेयविचारस्य पौनरुक्त्यापत्तेरपरितोषादन्यथा परिहरति * विध्युद्देशगतानामिति * ततश्च विध्युद्देशगतानां नामधेयविचारस्य समाप्तत्वाद्युक्तो ऽपवाद इत्याशयः अर्थवादगतानामपि तुल्यन्यायतया सिद्धस्य नामधेयत्वस्य किं लौकिकानामेवैतन्नामधेयमुत अलौकिकानां वैदिकानां तत्रापि किं यजतिचोदनानामप्युत जुहोतिचोदनानामेवेति। विशेषविचारार्थं स्मारणमितीहाप्यपरितोषादन्यथा परिहरति * सिद्धे वेति * ननु विशेषविचारे गुणविध्याशङ्का न युक्तेत्याशङ्क्याह * या त्विति * परिचोदनामात्रत्वोपपादनायाग्राधिकरणमध्यशब्दः तत्र हि दर्विहोमो ३०।२

१ अत्रत्य याज्यया जुहोतीति २ पु० पा०।

यज्ञाभिधानं होमसंयोगादिति सूत्रेण होमपदेनास्य समासपदस्य संयोगात्तत्र च होमस्य प्राध्यान्यातद्वाची दर्विहोमशब्द इति यज्ञशब्दलक्षितकर्मनामधेयत्वं प्रस्तुत्य तद्विशेषे ऽपेक्षिते स लौकिकानां स्यात् कर्तुस्तदाख्यत्वादित्यनेन स्मार्त्ताष्टकादिकर्त्तरि दर्विहोमिकसमाख्यानात् स्मार्त्तानामेवैतन्नामेति पूर्वपक्षं कृत्वा सर्वेषां वा दर्शनाद्वा ऽस्तु होमे इत्यनेन वैदिके ऽपि वास्तु होमे यदेकया जुहुयाद् दर्विहोमं कुर्यादिति दर्विहोमशब्दप्रयोगात् वैदिकानां चैतन्नामकत्वाभावे सत्येकया ऋचा दर्विहोमशब्दप्रयोगानुपपत्तिप्रसङ्गात् होमशब्दस्य च सामान्याभिधायित्वात्सर्वेषां नामेति सिद्धान्तिते तत्रापि विशेषापेक्षायां यजतिचोदनानामपि दर्शपूर्णमासादीनां चतुरवत्तादिवाक्यैर्होमत्वापत्तेस्तेषामप्येतन्नामेति प्राप्ते जुहोतिचोदनानां चातत्संयोगादित्यनेन होमशब्दसंयोगात् होमनामत्वप्रतीतेर्यजतिचोदनानां च देवतोद्देशद्रव्यत्यागमात्रेण पर्यवसानाच्चतुरवत्तादिवाक्यैर्यागीयद्रव्यप्रातिपत्त्यर्थं प्रक्षेपविधाने ऽपि होमत्वानापत्तेर्जुहोतिचोदनानामेव दर्विहोमशब्दो नामेति सिद्धान्तयित्वा द्रव्योपदेशाद्वा गुणाभिधानं स्यादित्यनेन दर्विहोमशब्दात्पात्ररूपद्रव्योपदेशप्रतीतेर्गुणविधिरित्याशङ्क्य न लौकिकानामाचारग्रहणात् शब्दवतां चान्यार्थविधानात् इत्यनेन लौकिकेष्वाचारेषु दर्व्या गृहीतत्वाद्वैदिकेषु चान्येषां स्रुवादीनां पात्राणां होमनार्थितानामाकाङ्क्षितानां विधानाद्दर्विसमासान्निष्कृष्य विधानं न युक्तामित्याशङ्कां निराकृत्य नामधेयत्वमुपसंहृते ननु विशेषविचारो ऽपाहैव नामधेयचिन्ताधिकारात्कर्तुं युक्तो नाष्टमे विशेषातिदेशलक्षणत्वात् तस्येत्याशङ्क्याह * सर्वमेवेति * लक्षणान्तरगोचरो ऽपि विचारः प्रसङ्गाल्लक्षणान्तरे क्रियमाणो न दोषमावहतीत्याशयः । कथं तत्र प्रसङ्ग इत्यपेक्षायामाह * पूर्ववदिति * अविहितेतिकर्त्तव्यताकेष्वतिदेशेनेतिकर्त्तव्यताप्राप्ता युक्तायां दर्विहोमेष्वविहितेतिकर्त्तव्यताकेष्वपि नातिदेशेनेतिकर्त्तव्यता प्राप्तिरस्तीत्यपवादार्थं किं दर्विहोमाः कुतश्चिद्धर्मग्राहित्वात् पूर्ववन्तो ऽथ पूर्वा इति चिन्तामधिकृत्य सर्वेषां जुहोतिचोदितानामपूर्वत्वसिद्ध्यर्थं विशेषचिन्तेत्यर्थः आग्नेयादिवाक्येषु कर्मोश्रवणात् नाग्नेयादिशब्दानां तन्नामत्वशङ्कायुक्तेत्याशङ्कते * केनेति * तत्र शिरो वा एतद्यज्ञस्य यदाग्नेय इति यज्ञावयवस्तुत्या प्रसिद्धयागनामोपांशुयाजशब्दसाहचर्याच्च यागनामत्वप्रतीतेर्व्युत्क्रमाम्नातानामष्टाकपालादीनां लिङ्गदर्शनत्वात् कस्यां चिच्छाखायां क्रमाम्नानं भविष्यतीत्यारोप्य मान्त्रवर्णिकदे-

वतान्वयेन यागकल्पनोपपादनार्थं प्रकाशनार्हानुष्ठेयक्रियां विना प्रकाशकमन्त्रान्वययायोगादष्टाकपालादीनामप्राप्तत्वेन विधेयत्वावसायात् विधेश्च भावनैकगोचरत्वात् तदाक्षेपकत्वेनाष्टाकपालादिवाक्येषु भावनाप्रतीतिं तावदाह * तादिति * भावनानां चावच्छेदकधात्वर्थविशेषापेक्षायां यागाख्यधात्वर्थान्वयसिद्धये ऽग्न्यादिदेवत्यमन्त्रान्वयं दर्शयितुमाह * तासां चेति*आनन्तर्यमचोदनेत्यानन्तर्यलक्षणस्य क्रमस्याविनियोजकत्वाभ्युपगमात् पाठसाहश्यलक्षणक्रमप्रतिपत्त्यर्थः स्थानशब्दः यागाङ्गमन्त्रवाचियाज्यानुवाक्यासमाख्ययापि यागाक्षेपसूचनार्थं याज्यानुवाक्यायुगलानीत्युक्तम् ननु श्रुत्यविनियुक्तानां मन्त्राणां करणत्वानवगमाददृष्टार्थत्वेनाप्यङ्गत्वोपपत्तेः स्वार्थसमवायकत्वाभावान्न तत्प्रतिपाद्यस्याग्न्यादेः क्रियाङ्गत्वसिद्धिरित्याशङ्क्याह चोपांशुयाजे याज्यानुवाक्यायुगलानां क्रमविनियुक्तानामपि देवताकल्पकत्वदर्शनात् तत्सामान्यमात्रेणापि देवताकल्पकत्वसम्भवं दर्शयितुमाह * तानीति * ननूपांशुयाजे यजिना विहितस्य यागस्य देवताकाङ्क्षत्वाद्यथाकथंचिदुपस्थापितदेवताग्रहणं युक्तम्। इह तु यज्यश्रवणेनानाकाङ्क्षितायां देवतायास्तत्सम्बन्धप्रमाणतश्चितायां भावेन युक्ता कल्पनेत्याशङ्क्याधारादिवद्यज्यश्रवणे ऽपि क्रियातत्समवेतार्थप्रकाशनेन मन्त्राणां क्रियाङ्गतेति सामान्यतो दृष्टेनाग्न्यादेः क्रियाङ्गत्वमुपपादयति * न हीत्यादीना * क्रियाङ्गमित्यन्तेन नन्वग्न्यादेः क्रियान्वये देवतात्वावगतिः कथमित्याशङ्क्याह * न चेति * अग्निर्मूर्द्धेत्यादिमन्त्रेष्वग्न्यादीनां प्राधान्येनाभिधानाद्यमर्थं प्राधान्येन मन्त्रो ऽभिदधाति सापि देवतेति लक्षणेन देवतात्वावसायात् कर्मस्वपि देवतात्वावगतिरित्यर्थः। नकेवलं मन्त्रेष्वग्न्यादीनां देवतात्वात् कर्मस्वपि देवतात्वं किं त्वष्टाकपालादिशब्दानामनेकत्र पुरोडाशशब्दसामानाधिकरण्यदर्शनादिहापि ते पुरोडाशं कूर्मभूतं सर्पन्तमपश्यन्नित्यष्टाकपालवाक्यशेषात् पुरोडाशपरत्वावगतेः पुरोडाशादीनां च वृद्धव्यवहारात् धानाः करम्भः परिवापः पुरोडाशः पयस्येत्येष वै यज्ञो हविःपङ्क्तिरित्यादिलिङ्गाच्च हविष्ट्वप्रसिद्धेर्हविःशब्दस्य चार्चिश्युचिहुसृपिछदिभ्य इसिरिति जुहोतेरौणादिके कर्मणि इसिप्रत्यये कृते हूयतइत्येतस्मिन्नर्थे हविःशब्दव्युत्पत्तेर्देवतां च विना होमायोगात् द्रव्याकाङ्क्षावशादग्न्यादेर्देवतात्वावगतिरित्याह * पुरोडाशादिभिरिति * जुहोत्युत्पन्नस्यापि हविःशब्दस्याहूयमाने ऽपि द्रव्ये हवींष्यासादयतीति प्रयोगदर्शनात् तादर्थ्यनिमित्तत्वाप्रतीतेरजुहो-

तिचोदिते कर्मणि होमस्यैव यागीयद्रव्यसंस्कारार्थत्वेन द्रव्यस्य होमार्थत्वायोगात् यागार्थद्रव्यवाची हविःशब्द इति मत्वा देवतान्वयं विनापि द्रव्यान्वयमात्राद्यागानुमानसूचनार्थं यागेत्युक्तम् । नन्वेवं सत्यपि देवतान्वये कथं यागकल्पनं कथं च सत्स्वपि यागेष्वाग्नेयादिशब्दानां नामतेत्याशङ्क्याह * इतीति * यजतिस्तु द्रव्यफलभोक्तृत्वसंयोगादित्यत्र द्रव्यदेवतान्वयेन यागकल्पनस्य वक्ष्यमाणत्वाद्विधित्सितस्य च गुणस्यान्यतः प्राप्तौ नामत्वस्योक्तत्वात् उभयसिद्धिरिति भावः । नन्वष्टाकपालादिवाक्यान्याग्नेयादिशब्दैर्विना पर्यवस्यन्ति न वातत्रापर्यवसाने स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तरान्वयायोगात् मन्त्रान्वयाभावे तत्प्रतिपाद्यदेवतान्वयकल्प्ययागासिद्धिः । पर्यवसाने त्वाग्नेयादिशब्दस्यानन्वयान्नामत्वानुपपत्तिरित्याशङ्क्याश्रुतयागनामत्वाशङ्कासम्भवे ऽपि च चतुरवत्तं जुहोतीति श्रुतहोमनामत्वेन पूर्वपक्षो भविष्यतीत्याह * अथ वेति * चतुरवत्तवाक्याद्धोमनिष्पत्तावपि आग्नेयादिशब्दानां कथं तन्नामतेत्याशङ्क्य क्रमविनियुक्तमन्त्रवशात् देवताप्राप्तेस्तत्प्रख्यन्यायेनैवेति दर्शयितुं तथैवेत्युक्तम् । सकृच्छ्रवणेन होमैक्यान्मन्त्राणां च बहुत्वाद्विसंख्यत्वेन क्रमानुपपत्तिमाशङ्क्य यावद्द्रव्यमित्युक्तम् । कानि द्रव्याणीत्यपेक्षिते ऽष्टाकपालादीना सम्बन्धिनां होमानामित्युक्तं कथं चतुरवत्तवाक्यस्याष्टाकपालादिविषयतेत्याशङ्क्याष्टाकपालादीनां चतुरवत्ततोक्ता तदुपपादनार्थं द्विरिति वाक्याद्वयवदानसिद्धिरुक्ता तस्याष्टाकपालादिविषयत्वोपपादनार्थं हविष्ट्वादित्युक्तम् । एवमपि चतुरवत्तनिष्पत्तिः कथमित्यपेक्षिते चोदनान्तरेणेत्युक्तम् । ननूपस्तृणात्यभिघारयतीति चोदनान्तरेणोपस्तरणाभिघारणयोर्ग्रहणे ऽपि तयोरुपस्तरणाभिघारणयोरुपस्तृणन्नभिघार्याज्यस्य यजेतेति ध्रौवाज्यसाधनत्वेनाष्टाकपालादीनां कथं चतुरवत्तेत्याशङ्क्य तत्संस्कारार्थेत्युक्तं दशमे कृष्णलचरावुपस्तरणाभिघारणयोरर्थलोपेन बाधं वक्तुं कर्म वा संसर्गार्थनिवृत्तित्वात् तस्मादाप्तिसमर्थत्वमिति सिद्धान्तसूत्रे हविषः स्रुक्संसर्गस्योपस्तरणाभिघारणयोर्निवर्त्यत्वेन प्रयोजनस्य कृष्णले च विशदत्वेन स्वत एव निवृत्तेश्चत्वारि चत्वारि कृष्णलान्वयाति चतुरवत्तस्याप्त्यै इति चोपस्तरणाभिघारणसाध्यस्य च तुरवत्तत्वसम्पादनस्यान्येनाप्तेस्तदकरणसमर्थनादकरणं तयोरिति वक्ष्यमाणत्वाद्धविषः स्रुच्यसंसर्गलक्षणसंस्कारार्थत्वमनयोरवसीयतइत्याशयः । नन्वग्नीषोमीयब्राह्मणस्य प्राक्पाठादाग्नेयब्राह्मणस्य च पश्चात्पाठाद्याज्यानुवाक्यायुगलयोश्च ब्राह्मणक्रमविपर्ययेण पा-

ठादविद्यामानक्रमाम्नानाध्यारोपेणात्यन्तक्लिष्टमामर्थ्याशङ्का न युक्तेत्याशङ्क्य * आहैवं चेति * प्राप्ते कर्मण्याग्नेयादिवाक्यैर्द्रव्यदेवताद्यनेकगुणविधाने चोदिते हि तदर्थत्वात् तस्य तस्योपादिदृक्षतेत्यनेन वाक्यभेददोषापत्तिः । विशिष्टविधाने तु सान्निकृष्टविप्रकृष्टविशेषणविशेष्यरूपानेकार्थविधानापत्तेस्तत्र च सान्निकृष्टविधानासम्भवनिमित्तत्वाद्विप्रकृष्टविधानस्य युगपत्सान्निकृष्टविधानसम्भवासम्भवाभ्युपगमदोषसम्भवाद् गुणविध्यसम्भवमात्रमत्र पूर्वपक्षिणोऽभिमत तथा च सत्याग्नेयादिशब्दानर्थक्यापत्तेस्तत्परिहारार्थं यथाकथञ्चिन्नामधेयत्वाभिधानमित्याशयः । एव नामधेयत्वे सत्याग्नेयादिशब्दस्य गुणविधित्वाभावान्न सान्निकृष्टविप्रकृष्टविशेष्यविशेषणरूपानेकार्थविधिनिमित्तो युगपत् सान्निकृष्टविप्रकृष्टविधिसम्भवासम्भवाभ्युपगमदोषो भावष्यत्यतदर्थं नामधेयत्व यथाकथञ्चिदुक्तं न तु पूर्वपक्षिणोऽभिमतमित्यर्थः । पूर्वपक्षभाष्यं चानेन व्याख्यात तत्र च विशिष्टविधेः सिद्धान्तिनोऽभिमतत्वात् विशेष्यस्य यागस्याश्रुतत्वेन द्रव्यदेवतासम्बन्धलक्षणगुणविधिकल्प्यत्वात् श्रुत्या गुणमात्रविधिं मत्वा गुणे विधिशब्दः तस्मिन्सत्यनेकां विशेषणविशेष्यरूपो ऽर्थो ऽभिधीयते तत्र च सान्निकृष्टविध्यसम्भवनिमित्तत्वाद्विप्रकृष्टविधेर्युगपत्सान्निकृष्टविशेष्यविधिसम्भवासम्भवाभ्युपगमदोषापत्तिरित्युक्तम् । ननु विशेष्यस्य यागस्याश्रुतत्वात् कथ गुणविधौ सति विशेषणविशेष्यरूपानेकार्थविधिः स्यादित्याशङ्क्याग्नेर्देवता पुरोडाशो द्रव्यमिति द्रव्यदेवतासम्बन्धलक्षणागुणविधिद्वारेत्युक्तमिति भाष्यं योज्यम् । एतच्च वार्त्तिकताघाराग्निहोत्राधिकरणे परदौर्बल्यवतो दृष्टा श्रुतिप्रकारान् परोक्तान्निराकुर्वता विशिष्टविधेरत्यन्तक्लिष्टत्वं तृतीयस्थानानिवेशासम्भवापपादनार्थं वक्ष्यमाणत्वान्नेह प्रपञ्चितमित्यनवद्यम् । सूत्रं योजयन् सिद्धान्तमाह * तथेति * यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्तीति भाष्याद्विशेषणस्यैवान्यतः प्राप्तावविधेयत्वं विशेष्यस्य त्वन्यतः प्राप्तावपि तन्निरपेक्षविशेषणविध्ययोगात् विधेयतेत्याभाति तच्च सर्वतो पदार्थसक्रान्तावविधशक्तौ धात्वर्थानुवादाभ्युपगमात् अयुक्तमित्याशङ्क्य गुणग्रहणस्योपलक्षणार्थत्वं दर्शयितुं यागइत्युक्तम् । न चेदिति सूत्रावयवे प्राप्तेर्विधेयत्वहेतुत्वाभिधानार्थ इति प्राग्व्याख्यया सूचितम् । तच्च कर्मेति भाष्यात् तच्च गुणाश्चेत्येकवचनाध्याहारेण विग्रहः प्रतिभाति तच्चोदाहरणबहुत्वेन तुल्यत्वाक्रियायोगेति सूत्रोक्तक्रियापरामर्शितच्छब्दोपात्तयागबहुत्वोपपत्तेः श्रुतस्यैव बहुवचनस्य तन्त्रेणोभयान्वये ३०३।१

सम्भवत्यश्रुतैकवचनाध्याहारायोगात् अयुक्तमित्याशङ्क्य त इति बहुवचनान्तविग्रहो दर्शितः । सोमेन यजेतेत्यादौ गुणकर्मणोर्भिन्नपदोपादाने ऽपि तावच्छुद्धस्य कर्मणो ऽशक्यानुष्ठानत्वेन विध्ययोगात्सन्निकृष्टस्य शुद्धरूपेण विध्यसम्भवात् विशिष्टरूपेण च सम्भवात् रूपभेदेन युगपत्सम्भवासम्भवविरोधपरिहारोपपत्तेर्विशिष्टविधेरनुष्ठत्वाभिधानार्थमविभागाद्विधानार्थ इति सूत्रावयवविधानार्थे लिङ्प्रत्यये गुणकर्मविध्योरविभागादित्येव व्याख्यातुमविभक्तरूपेण सकृदुच्चरितेन विधिनेत्युक्तम् । आग्नेयादिवाक्ये त्वेकस्मिन्नेव विधेयसमर्पके तद्धितान्ते शब्दे गुणकर्मविभागादित्येवं व्याख्यातुं विधेयसमर्पकेण तद्धितान्तेन शब्देन सह गुणकर्मशब्दानामविभागात्सन्निकर्षविप्रकर्षविरोधाभावाभिधानायैकशब्दोपादानप्रदर्शनार्थं तद्धितान्तेन विधिनेति योज्यम् । हिशब्दः पादपूरणार्थः । ननु मान्त्रवर्णिकदेवतासंयोगान्यथानुपपत्त्या यागप्राप्तेरसिद्धान्याशीष्टनेत्याशङ्क्य निराकरोति * नेति * संस्कारशब्देन स्मृतिहेतुसंस्कारोदबोधार्थो मन्त्रो विवक्षितः । अष्टाकपालादिद्रव्यं देवतासंस्कारश्चाग्निर्मूर्द्धेत्यादिमन्त्रः तत्संयोगेन यो ऽत्र यागविधिः पूर्वपक्षिणोक्तः स नोपपद्यतइत्यर्थः । यदपि पुरोडाशादीनां हविष्ट्वाद्यागसाधनत्वप्रतीतेर्यागानुमानमुक्तं तदपि निराकरिष्यतइति तावच्छब्देन सूचितम् । यद्वा यागविधिस्तावन्नोपपद्यते ततश्च तन्नामत्वमनाशङ्क्य चतुरवत्तचोदनाविहितहोमतापि निराकरिष्यतइत्येवं तावच्छब्दो योज्यः । एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * ननु भावनाकाङ्क्षायां मन्त्रसम्बन्धस्योक्तत्वात् स्वरूपेण द्रव्यस्य मन्त्राकाङ्क्षानिरासो न युक्त इत्याशङ्क्याह * नेति * भावनाया अश्रुतत्वात् विध्यश्रवणाच्च तद्ग्रहणेनापि कल्पयितुमशक्यत्वात् अप्राप्तस्यापि च द्रव्यस्य भावनानिवेशं विना विधेयत्वायोगात् विधिवशेन भावनाकल्पने विधेरपि भावनाकल्प्यत्वेनेतरेतराश्रयं वक्तुं विध्यभावाभिधानं कथं चिद्भावनाकल्पने ऽपि धात्वर्थानवच्छिन्नायास्तस्या अनुष्ठातुमशक्यत्वान्मन्त्राकाङ्क्षानुपपत्तेर्मन्त्रान्वयादेव तद्द्रव्यदेवतासंयोगेन यागाख्यधात्वर्थकल्पने चानुष्ठेयत्वसिद्धये धात्वर्थविशेषावच्छेदाधीनत्वात् मन्त्रान्वयस्येतरेतराश्रयापत्तेर्द्रव्यस्य स्वरूपेणैवाकाङ्क्षापद्यतइति सूचनार्थः कश्चिच्छब्दः । सामान्यतो ऽपि पुरुषव्यापारो न विधीयते किमुत धात्वर्थावच्छिन्न इत्यर्थः । नन्वष्टाकपालभवनस्यासिद्धत्वेनानुष्ठेयत्वान्मन्त्राकाङ्क्षा भविष्यतीत्याशङ्क्य न चेत्युक्तम् । भवनक्रियायामसिद्धस्यैव कर्तृनियमात् सिद्धा-

स्मकपुरुषानुष्ठेयत्वायोगान्न स्मारकापेक्षेत्याशयः। ननु द्रव्यस्यैव तर्ह्यनुष्ठानात्प्राक् असिद्धत्वेनानुष्ठानापाद्यत्वात् स्मारकापेक्षा भविष्यतीत्याशङ्क्य नापीत्युक्तम्। तस्याव्यापारात्मकत्वेनानुनिष्पादिततृप्त्यादिवत् साध्यत्वे ऽपि अननुष्ठेयत्वात् न स्मारकापेक्षेत्याशयः। कथं चित्सत्यामपि द्रव्यस्य मन्त्राकाङ्क्षायां अग्न्यादिवाचिना मन्त्रेण सह सम्बन्धो न प्रतीयतइत्येवमुत्तरार्द्धं व्याचष्टे * न चेति * ननु पुरोडाशादिभिर्हविरात्मकत्वाद्यागसाधनत्वेनावगम्यमानैर्देवतापेक्षणात्तद्वाचिमन्त्राणामन्वयो भविष्यतीत्याशङ्क्याह * न चेति* पुरोडाशे यागः साध्यत्वेन नावधारित इत्युक्ते यागसम्बन्धाश्रयणे ऽपि हविः शब्दाभिधेयत्वात् यागानुमानं भविष्यतीत्याशङ्क्य हविष्टुमपि नावधारितमित्युक्तम्। श्लोकं व्याचष्टे *यदि हीति* भावनोपादाने सति तस्या धात्वर्थविशेषापेक्षायां कर्थाञ्चिद्यागत्वावधारणं शक्येत न तु तदस्तीति दर्शयितुं भवतिशब्देन भावनानुपादानाद्यागत्वं नोक्तमित्युक्तं हविः शब्दस्तु यागान्वयं विना न क्व चिदस्तीत्यर्थः। हविष्टुभावादेव चतुरवत्तचोदनाविहितहोमनामतापि निरस्तेत्याह * एतेनेति * नन्वाधारादिवद्यागत्वावधारणात् प्रागपि मान्त्रवर्णिकदेवताकल्पनं भविष्यतीत्याशङ्क्याह * आधारादिषु त्विति * उपांशुयाजे तु वाचनिकविनियोगाभावे ऽपि यागात्मकत्वात् सामान्यतो देवतान्वये सिद्धे मन्त्रवर्णाद्धि शेषमात्रावधारणं युक्तं न तु श्रुत्यविनियुक्तस्य मन्त्रस्यापूर्वदेवताकल्पकत्वं क्व चिदस्तीत्याशयः। तद्धितेन देवतान्वयसम्भवे तद्धितचतुर्थीमन्त्रवर्णानां देवतान्वयप्रमाणानां मध्ये जघन्येन मन्त्रवर्णेन देवताकल्पनं न युक्तमित्याह * सर्वजघन्यश्चेति * न च तद्धितसम्भवे मन्त्रवर्णस्य प्रामाण्यमप्यस्तीत्याह * अन्यथेति * मन्त्राङ्गत्वान्यथानुपपत्तिस्तद्धितेन देवतान्वये ऽवधारित नास्तीत्यर्थः। ननु तद्धितेन देवतान्वयावगमे लिङ्गादेव मन्त्रप्राप्तेर्मन्त्राम्नानमनर्थकं स्यादित्याशङ्क्यं निराकुर्वन् सिद्धान्तमुपसंहरति * तस्मादिति * सामान्यतो ऽग्निदेवत्यमन्त्रप्राप्तावप्यग्निर्मूर्द्धेत्यादिमन्त्रविशेषार्थं क्रमाम्नानमित्यर्थः। अविद्यमानमपि क्रमं पूर्वपक्ष्यारोपितमभ्युपगम्य परिहारसामर्थ्यप्रदर्शनार्थः क्रमशब्दः। ननु तद्धितेन देवतान्वये कृते ऽपि तस्याविधायकत्वाद्विधीयेरन्नित्ययुक्तमित्याशङ्क्य भवति इति पञ्चमलकाररूपेणाख्यातशब्देनेत्युक्तम्। नन्वस्य वर्त्तमानापदेशसन्दिग्धत्वात् पञ्चमलकारत्वनिश्चयः कथमित्याशङ्क्यार्थवादेत्युक्तम् अङ्गिरसो वा इत उत्तमाः स्वर्गं लोकमायन्नित्याद्यर्थवादान्वयान्यथानुपपत्त्या

३०४।१

विधित्वनिश्चयः । अन्यथास्यार्थवादत्वासम्भवेनानर्थक्यापत्तेरित्याशयः । नन्वेवं सति विधिगौरवक्लेशः स्यादित्याशङ्क्याह * अगत्या चेति * विधानार्थ इति भाष्यं तद्धितस्याख्यातकृत्यत्वाभावेनाविधायकत्वादयुक्तमाशङ्क्य व्याचष्टे * विधानार्थेति * अविभागादिति सूत्रावयवव्याख्यानार्थमविभक्ता हीति भाष्यावयवं तद्धितान्तर्गत्यभिधानार्थत्वेन तत्सापेक्षत्वात् पश्चाद्व्याचष्टे * सर्वं चेति * एतदेवोपपादयति * देवतेति * नन्वाग्नेयतेति भावप्रत्ययात् सम्बन्धस्यापि अविभक्ततोक्ता प्रतिभाति सा च सम्बन्धवाच्यत्वस्य अरुणाधिकरणे निषेत्स्यमानत्वादयुक्तेत्याशङ्क्याह * सम्बन्धो ऽपीति * नन्वेवमप्यष्टाकपालशब्दवाच्यस्याष्टत्वकपालतदधिकरणसंस्कारोपसर्जनस्य पुरोडाशस्याग्नेयादिशब्दानन्तर्गतत्वादष्टाकपालस्यापि विशेषणाभिधानमयुक्तमित्याशङ्क्याह * तादृति * नैव हि द्रव्यमात्रस्य तद्धितेर्देवतोच्यते अस्य शब्दाभिधेयस्य विशेषस्यैव देवतेत्यनेन न्यायेनाष्टाकपालपदार्थो ऽपि तद्धितान्त एव शब्दान्तर्गत इत्यर्थः । स एष इति भाष्येण यागस्य तद्धितान्तर्गतिरुक्ता सा यागं विनापि यथाकथञ्चित्सिद्धाग्नेयत्वसङ्कीर्त्तनोपपत्तेरयुक्तेत्याशङ्क्याग्नेयस्य भाव्यमानत्व याग विना न सिध्यतीति दर्शयितु भावनान्तर्गतिपूर्वक यागान्तर्गतिमाह * द्रव्यस्येति * अन्तर्गतेति शेषः पुरुषव्यापारस्य भावनाया यागावच्छेदकत्वाद्विशेषो न व्यक्तित्वेन । सर्वान्तर्गत्यभिधानस्य पूर्वपक्षोक्तवाक्यभेदपरिहार प्रयोजनमाह * ततश्चेति * तद्धितान्तपदेनोपात्तस्यार्थस्य विधिनेति विग्रहः भिन्नपदोपादानाभावान्न वाक्यभेदापत्तिरित्याशयः । नन्वेकपदोपात्तेऽप्यनेकार्थस्य विधानाच्चत्रत्वस्रोत्वविधाविव वाक्यभेदः स्यादेवेत्याशङ्क्याह * भावनेति * यागो हि विहितो भवतीति भाष्ये यागशब्दो यागावच्छिन्नभावनाभिप्रायेणेत्याशयः । स एवमिति भाष्य व्याचष्टे * तत इति * ननु सम्बन्धो हीति भाष्येण सम्बन्धविधानान्यथानुपपत्त्या सम्बन्धिनोर्द्रव्यदेवतयोर्विधानाक्षेपस्योक्तत्वात् भाष्यविरुद्धं भावनाविधानाभिधानमित्याङ्क्याह * सर्वेति * सर्वेर्ऋत्वर्थकारकैः सम्बध्यतइति कर्मव्युत्पत्त्या भावना सम्बन्धशब्देनोक्तेत्यर्थः । किमित्येवं व्याख्यायतइत्यपेक्षायामाह * न हीति * विशिष्टविधावप्यन्यतो लभ्यमानस्याविधानान्न गौरवलक्षणवाक्यभेदापत्तिरित्यभिधानार्थो न चेदन्येन शिष्टा इति सूत्रावयवो ऽष्टास्वित्यादिभाष्येणानेककपालाधिकरणसंस्कारस्य पुरोडाशादन्यत्राप्रसिद्धेस्ते पुरोडाशं कूर्म भूत्वा सर्पन्तमपश्यन्नित्यर्थवादावगतस्य

पुरोडाशस्याष्टसंख्यकपालाधिकरणसंस्कारविधिनैव प्राप्तेः कपालानां तदूबहुत्वस्य तदधिकरणस्य संस्कारस्य च कपालेषु श्रपयतीति वाक्यान्तरादेव प्राप्तेर्बहुत्वविशिष्टत्वमात्रविशिष्टद्रव्यविशेषाग्न्याख्यदेवताविशिष्टयागभावनाविधानान्नातिगौरवापत्तिरित्येवं व्याख्यातः। तत्राविभागादित्यादृत्तिलक्षणवाक्यभेदपरिहारार्थो हेतुः। न चेदिति तु गौरवलक्षणवाक्यभेदपरिहारार्थ इति हेतुद्वयस्य विविक्तविषयत्वं दर्शयितुमाह * अविभागादिति * तद्धितान्तोक्तेन देवताविशिष्टेन द्रव्येण सम्बन्धस्य विभागात् सम्बन्धं विना वैशिष्ट्यासिद्धेरर्थात् सम्बन्धाक्षेपः। न क्रियाकर्तृसम्बन्धादृते सम्बन्धनं क्व चिदित्यनेन च न्यायेन क्रियागर्भत्वात्सर्वसम्बन्धानां देवतोद्देशपूर्वकद्रव्यत्यागाच्च विना द्रव्यस्य देवतान्वयायोगाद्यागाख्यस्य क्रियाविशेषस्य द्रव्यदेवतासम्बन्धाविभागात्तेनार्थादाक्षेपः। यागस्य चाभावितस्यानिष्पत्तेर्भावनाया यागाविभागात्तेनार्थादाक्षेप इत्यर्थः। अन्यथानुपपत्त्यधीनत्वाच्चार्थाक्षेपस्यान्यतः प्राप्तस्य कपालादेरनाक्षेपान्नातिगौरवापत्तिरित्यदुष्टो विशिष्टविधिरित्याशयः। यत्तु विधित्सितस्यान्यतः प्राप्तौ तद्वाचिनः शब्दस्य नामधेयतेति एतदर्थपरत्वेन न चेदित्यवयवस्य पाठपूर्वकं व्याख्यानान्तरं भाष्यकृता कृतं तन्नामधेयत्वस्य पूर्वपक्षिणोऽप्यनभिमतत्वात्तत्प्रख्यं चान्यशास्त्रमित्यनेन च पौनरुक्त्यापत्तेरयुक्तमित्युपेक्षितं वार्त्तिककृतेति विशिष्टविधिव्युत्पादनार्थतैवास्याधिकरणस्यावसीयते॥

॥ बर्हिरादिशब्दानां जातिवाचिताधिकरणम् ॥ ७ ॥

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः ॥१०॥

बर्हिरादिशब्दो लवनादिसंस्कारानिमित्तः कुशात्वादिजातिनिमित्तो वेति चिन्तायाः प्रकृतगुणविधिनामधेयचिन्तारूपत्वाभावात् पूर्वाधिकरणकृतविशिष्टविधिव्युत्पादनवच्च तच्छेषत्वाभावाच्च प्रकरणासङ्गतिरित्याशङ्क्य प्रासङ्गिकीं प्रकरणसङ्गतिमाह * नामधेयेति * अनन्तरसङ्गतिस्त्वाग्नेयादिशब्दानां देवतोद्देशपूर्वकद्रव्यत्यागात्मकयागारव्यक्रियागर्भसम्बन्धनिमित्तदेवतार्विशिष्टद्रव्यवाचित्वात्तद्द्वारेण क्रियानिमित्तत्वे ऽभिहिते बर्हिरादिशब्दानामपि संस्कारात्मकक्रियानिमित्ततास्युत नेति विचारात् स्पष्टैवेति नोक्ता पुरोडाशोदाहरणमुत्सूत्रत्वादयुक्तमाशङ्क्याह * तुल्यहेतुत्वादिति * यूपादिवद्वचनव्यक्तिविपर्ययाश्रयणसम्भवासम्भवमस्य सन्देहहेतोः

१ ऽसंख्येति २ पु० पा०।

संस्कृतप्रयोगबलीयस्त्वस्य च पूर्वपक्षहेतोः संस्कारनिमित्तत्वे च परस्पराश्रयपरिहारासम्भवस्य च सिद्धान्तहेतोस्तुल्यत्वात् सूत्रे बर्हिराज्यग्रहणमुपलक्षणार्थमित्याशयः। सर्वत्रेति भाष्यावयवेन संस्कृतप्रयोगस्य सार्वत्रिकत्वं पूर्वपक्षोपपत्तित्वेनोक्तं नासंस्कृतेष्वित्यनेन चासंस्कृतप्रयोगाभावः तदुभयमप्ययाज्ञिकदेशे संस्कृतेषु प्रयोगाभावादसंस्कृतेष्वपि च कस्मिंश्चिद्देशे प्रयोगादयुक्तमाशङ्क्य व्याचक्षाणः पूर्वपक्षमाह * तत्रेति * याज्ञिकप्रयोगो ऽत्र विवक्षितः सर्वे च याज्ञिकाः संस्कृतेष्वेव प्रयुञ्जते नासंस्कृतेष्वित्याशयः। तस्य बलीयस्त्वाय शास्त्रस्था वेत्युक्तं यश्चासंस्कृतेषु क्व चित्प्रयोगः स प्रादेशिकत्वेनाशिष्टत्वेन च दौर्बल्यात्सादृश्योपपत्तेर्न याज्ञिकप्रयोगस्य विगीतत्वापादने शक्त इत्येवमर्थत्वेन न त्वसंस्कृतेष्वपीत्याशङ्कानिरासार्थं सादृश्यादिति भाष्यं व्याख्यातुमविगीतत्वादित्युक्तम्। ननु बर्हिराद्यनुवादेन विधीयमानस्य संस्कारस्य प्राक्सिद्धबर्हिराद्यपेक्षत्वेनेतरेतराश्रयापत्तेर्न बर्हिरादिशब्दप्रवृत्तिनिमित्तता युक्तेत्याशङ्क्याह * तथा हीति * क्व चिद्देशे पुरोडाशादिशब्दैर्व्यवहारे सत्यप्यभियुक्तजने लोक्यते दृश्यते शब्दार्थसम्बन्धो ऽनेनेति व्युत्पत्त्या लोकशब्देन विवक्षिते व्यवहाराभावाच्छिष्टप्रयोगविरोधेचाशिष्टप्रयोगस्याप्रामाण्यात् यद् बर्हिस्तल्लुनातीत्यादिवचनव्यक्त्यनुपपत्तेर्यल्लूयते तद् बर्हिरित्यादिविपरीतवचनव्यक्त्याश्रयणात्। पुरोडाशादिशब्दानां संस्कारहेतुतेत्यर्थः। यथा च पलाशे बध्नातीति प्रकृत्य यूपं छिनत्तीति श्रवणाच्छेदनस्य पलाशविषयत्वावधारणाच्छेदनसंस्कृतपलाशनामत्वं यूपशब्दस्यावसीयते तथात्रापि दर्भैस्तृणीत हरितैः सुपर्णैरिति बर्हिस्तरणार्थे मन्त्रे कुशवाचिदर्भशब्दश्रवणाद् बर्हिःशब्दस्य लवनादिसंस्कृतकुशनामत्वावधारणात् पिष्टानि संयौति पिण्डं करोतीत्यादिश्रवणाच्च पुरोडाशशब्दस्य प्रथनादिसंस्कृतपिष्टपिण्डनामत्वावधारणादुत्पवनादीनां च घृतविषयत्वं कथं चिदुत्प्रेक्ष्याज्यशब्दस्योत्पवनादिसंस्कृतघृतनामत्वावधारणाद्यूपादिवद्वचनव्यक्तिविपर्ययाश्रवणमदुष्टमिति दृष्टान्तेन सूचितम्। संस्काररहिते कुशादिजातिमात्रे बर्हिरादिशब्दस्य क्व चित्प्रयुक्तस्य संस्कृतेष्वपि जात्यनपगमेन लाभान्नायं संस्कारशब्द इत्येवं सूत्रव्याख्यानार्थमेवं प्राप्तइति भाष्यं व्याचष्टे * तदिति * शास्त्रस्य शब्दार्थसम्बन्धहेतुत्वाभावेन लोकप्रसिद्ध्यपेक्षत्वात् प्रादेशिकस्यापि प्रयोगस्य शास्त्रस्यप्रसिद्ध्या बाधो न युक्त इति वक्तुमेकदेशे ऽपीत्युक्तम्। श्लोकं व्याचष्टे *य एवेति * ननू- ३०५।१

क्तामिति भाष्येणासंस्कृतेषु सादृश्यात् प्रयोगोपपत्तिं पूर्वपक्षोक्तामनुभाष्य तन्नेत्यनेन संस्कारशब्दत्वप्रसिद्धेः सादृश्यनिमित्तप्रयोगकल्पना न युक्तेत्युक्तं तदर्तिस्पष्टत्वादव्याख्याय कथमिति प्रश्नपूर्वकमप्रसिद्धयुपपादनार्थं बर्हिरित्यादिभाष्यम् असंस्कृतेष्वपि शब्दलाभादित्यनेनैकस्या युक्तेरुक्तत्वाद्युक्त्यन्तरसमुच्चयार्थत्वेन व्याचष्टे * किं चेति * जातिशब्दत्वाभावे पलाशे बध्नातीतिवत्कुशादीनामप्रकृतत्वेन संस्कारान्वयाज्ञानात् मन्त्रस्य च श्रुत्यविनियुक्तत्वेन स्वार्थसमवायकल्पकत्वानुपपत्तेस्तद्ग्रहणेनापि लवनादेः कुशविषयत्वाज्ञानात् उत्पवनादीनां च घृतविषयत्वोत्प्रेक्षायाः प्रापकानुपलम्भेनायोगात् प्रथनादीनां च कथं चित्पिष्टपिण्डविषयत्वज्ञानसम्भवे ऽपि युपकार्यपशुबन्धनार्थत्वेनैव पलाशस्य पुरोडाशकार्ययागार्थत्वेन पिष्टपिण्डस्याश्रवणात् पुरोडाशशब्दस्य प्रथनादिसंस्कृतापिष्टपिण्डनामत्वावधारणाशक्तेः पिष्टपिण्डप्रथनादिना पुरोडाशीकुर्यादिति वचनव्यक्त्याश्रयणायोगात् यद्बर्हिरादिशब्दवाच्यं तत्संस्कार्यं यच्च संस्क्रियते तद्बर्हिरादिशब्दवाच्यमितीतरेतराश्रयस्यापरिहार्यत्वात् यल्लोकसम्मतं बर्हिरादिशब्दानां जातिशब्दत्वं तद्भेदेनापि लवनादिसंस्कारे विधेये तस्मात्प्रागाश्रितमित्यर्थः । ननु संस्कारविधितः प्रागेव केन चिद्यदृच्छया लवनादिभिः संस्कृतं कुशादि बर्हिरादिशब्दैरुद्दिश्य संस्कारविधिसम्भवान्नेतरेतराश्रयापत्तिरित्याशङ्क्याह । स्वाश्रयस्यापूर्वसाधनत्वयोग्यताधानार्थायाः क्रियायाः संस्कारशब्दवाच्यत्वाद्विध्यभावे च तादर्थ्यानवधारणात् यदृच्छया लवनादौ कृते ऽपि संस्कारस्याभावेन बर्हिरादिशब्दप्रवृत्तौ निमित्तत्वायोगात् अपरिहार्यमितरेतराश्रयमित्येवं निरासार्थं न चेत्यादिभाष्यम् आशङ्क्यास्तुच्छत्वे ऽप्यन्वयव्यतिरेकाभ्यां जातिवाचित्वावधारणार्थमिति व्याख्यातुमाह * तेनेति * येन संस्कारात् प्रागेव जातिशब्दत्वमाश्रितं तेनेत्यर्थः । सत्यां च गतौ वचनव्यक्तिविपर्ययाङ्गीकरणमयुक्तमित्यभिधानार्थं न चालौकिकानां सतामित्यादिभाष्यं व्याचष्टे * न चेति * श्लोकं व्याचष्टे * यदि हीति * प्रयोजनभाष्यं तु निर्देशात्तु विकृतावपूर्वस्यानधिकार इत्यत्र तृतीये यूपावटस्तरणार्थे बर्हिषि यूपाङ्गार्थे चाज्ये लवनोत्पवनादयः संस्काराः कार्या न वेति विचारेण स्पष्टीकरिष्यमाणत्वान्न व्याख्यातम् ।

॥ प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम् ॥ ८ ॥

प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥

अत्र भाष्यकृता प्रोक्षणीशब्दः किमुत्पवनादिसंस्कारनिमित्तो जातिनिमित्तो वा प्रकर्षसेचनलक्षणक्रियानिमित्तो वेति सन्दिह्य पूर्वन्यायनिरस्तमपि संस्कारशब्दत्वमत्तच्छब्द इति पूर्वसूत्रावयवेनेह सूत्रे प्रतिज्ञाकाङ्क्ष्यानुषक्तेन निरासप्रतीतेस्तद्व्याख्यानायोपन्यासपूर्वकं निरस्य पूर्वन्यायेनैव जातिशब्दत्वं प्राप्तं यौगिकत्वेनापोदितं तद्रथकाराधिकरणे समुदायप्रसिद्धेरवयवप्रसिद्धितो बलीयस्त्वस्य वक्ष्यमाणत्वात् विरुद्धमित्याशङ्क्य * नन्विति * षष्ठे हि वचनाद्रथकारस्याधानस्य सर्वशेषत्वात् इत्यत्र वर्षासु रथकार आदधीतेति किमवयवप्रसिद्ध्या त्रैवर्णिकानामन्यतमो रथकारशब्देनोच्यते समुदायप्रसिद्ध्या वा ऽन्यो जातिशब्द इति सन्दिग्धे ऽवयवप्रसिद्ध्या रथकारिणि त्रैवर्णिके रथकारशब्दसम्भवात् अपशूद्राऽधिकरणप्रतिषिद्धस्यात्रैवर्णिकस्याधिकारो न युक्त इति प्राप्ते समुदायप्रसिद्ध्यावयवप्रसिद्धिबाधाद्वचनबलेनात्रैवर्णिकस्यैवाऽधिकार इति वक्ष्यते । अन्यत एव तु समुदायप्रसिद्धिबलीयस्त्वसिद्धौ न्यायेन प्रैतिषिद्धस्याप्यत्रैवर्णिकस्यैव वचनबलेनाधिकारनिश्चयात्सन्देहाभावेन रथकाराधिकरणारम्भो न युज्यत। न चान्यत्र क्व चित्समुदायप्रसिद्धिबलीयस्त्वव्युत्पादनं दृश्यते । न च तदव्युत्पादनं विना पारिशेष्यमात्रेणात्रैवर्णिकस्याधिकारसिद्धिः। त्रैवर्णिकस्याप्यवयवार्थयोगेन रथकारशब्दवाच्यत्वसम्भवे वसन्तादिवाक्यैस्तस्याधानप्राप्तावपि रथकारित्वेन निमित्तेन वर्षाकालाधानार्थतया वचनोपपत्तावविदुषो ऽत्रैवर्णिकस्याधिकारकल्पनानुपपत्तेः । अत एव वचनादिति मुख्यं हेतुं व्याख्यायाधानस्यासर्वशेषत्वादित्यनेनाधानसम्बन्धितया सर्वेभ्यो ब्राह्मणराजन्यवैश्येभ्यः प्राप्तेभ्यो ऽत्रैवर्णिकस्य पारिशेष्यादयमाधानविधिरित्येवमुक्तो हेतुः सर्वशेषश्चात्रैवर्णिक आधानइति भाष्ये भाष्यकारेण चशब्दप्रयोगादुपचयोपपत्तित्वेन व्याख्यातः । तस्माद्रथकाराधिकरणसिद्धमेतत्समुदायप्रसिद्धिबलीयस्त्वमिहोक्तम्। कथं समुदायप्रसिद्धेः श्रुतिस्थानीयत्वं कथं चावयवप्रसिद्धेर्वाक्यस्थानीयतेत्यपेक्षिते रथकाराधिकरणावक्ष्यमाणमेवोभयमुपपादयति * तथा हीति * वर्णसमुदायशक्तिनिमित्तज्ञानात्मकत्वेन समुदायप्रसिद्धेरशब्दात्मकत्वात् श्रुतित्वाभावे ऽप्यक्षरश्रवणमात्रापेक्षत्वात् श्रुतितुल्यत्वं प्रातिपदिकावयवशक्तिनिमित्तज्ञानात्मिकायास्त्ववयवप्रसिद्धेरेकार्थपदसमुदायात्मकवाक्यत्वाभावे ऽपि यौगिकप्रातिपदिकप्रतिपाद्यस्य विशिष्टस्यार्थस्य ये प्रकर्षादयो भागास्तेषामेकार्थवृत्तित्वनियमलक्षणेनोपसंहारेण प्रवृत्तेर्विप्रकृष्टत्वाद्वाक्यतुल्यतेत्यर्थः । य- ३०६।१

यद्यपि रथकाराधिकरणे ऽवयवप्रसिद्धितः समुदायप्रसिद्धेर्बलीयस्त्वं वक्ष्यते तथापीह समुदायप्रसिद्धेरात्मलाभसदसद्भावौ चिन्त्येते तथापीह समुदायप्रसिद्धेरात्मलाभसदसद्भावौ चिन्त्येते यदि च सर्वत्र समुदायस्यैव शक्तिर्न क्व चिदवयवानां ततः सा चिन्ता विरुध्येत न त्वेतदस्ति तथा सत्यवयवप्रसिद्धेः सर्वत्राभावापत्तेरित्यभिप्रायेण परिहरति * सत्यमिति * ननु समुदायप्रसिद्धेः स्वात्मलाभः क्वास्ति क्व च नेति कथं ज्ञातव्यमित्यपेक्षायामाह * तत्र चेति * ननु समुदायप्रसिद्धया सर्वत्रावयवप्रसिद्धेर्बाधेनावयवार्थाभावात् सर्वत्रैव समुदायः प्रसिद्ध्येदित्याशङ्क्यानिरासपूर्वं श्लोकं व्याचष्टे * लब्धात्मिका हीति * नन्वेवं सति रथकारशब्दे ऽवयवार्थसद्भावे समुदायप्रसिद्ध्यनात्मलाभादभावे चाप्रतियोग्यभावात्तद्बलाच्चिन्तानुपपत्तेरनर्थकं रथकाराधिकरणं स्यात् इत्याशङ्क्याह * ततश्चेति * रथकारशब्दस्य रथकारिण्यवयवप्रसिद्धिसम्भवात् माहिष्येण करिण्यां च रथकारः प्रजायतइति * स्मृते* श्चानुलोमविशेषे सौधन्वनास्तुहीनत्वात्मन्त्रवर्णात् प्रतीयेरन्नित्यनेन वा न्यायेन ऋभूणां त्वा देवतानां व्रतपते व्रतेनादधामि इति रथकारस्यादध्यादित्याधानमन्त्रवर्णात् सौधन्वना ऋभव इति च सौधन्वनशब्दसामानाधिकरण्यस्य ऋभूशब्दस्य तं नेमिमृभवो यथेति मन्त्रवर्णाद्रथकारविषयत्वप्रसिद्धेः ।

ब्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च ।
मारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥

इति सात्वताद्यपरपर्याये सौधन्वनाख्ये जातिविशेषे समुदायप्रसिद्धिसम्भवाद्रथकार आदधीतेत्यत्र समुदायप्रसिद्धिबलीयस्त्वाभिधानं युक्तमित्यर्थः । नन्वेवं तर्ह्युदासीनास्वप्सु प्रकर्षसेचनकरणत्वाभावे ऽपि क्व चिद्देशे प्रयोगदर्शनात् प्रकर्षसेचनकरणत्वे सत्यपि च तैलादावप्रयोगाद्योगस्य व्यभिचारित्वेन समुदायप्रसिद्ध्यात्मलाभोपपत्तेस्तद्बलीयस्त्वाद्रथकाराधिकरणसिद्धान्तात् जातिवाचितैव युक्तेत्याशङ्क्य तुशब्दसमानार्थेन पुनः शब्देन निरस्यन् सिद्धान्तमाह * अत्रेति * औदासीन्यावस्थायामपि प्रकर्षसेचनकरणत्वशक्तिसद्भावात् प्रयोगोपपत्तेर्वाच्यसद्भावेन च शब्दप्रयोगावश्यम्भावाभावात् तैलादावप्रयोगोपपत्तेः । कल्पनावयवशक्त्यानुसारेणैव शब्दप्रयोगोपपत्त्यार्थापत्तेः क्षीणत्वात् समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेः समुदायप्रसिद्ध्यात्मलाभो नास्तीत्याशयः । स्वरूपतो ऽवयवार्थाभावे शक्तिसद्भावमा-

त्रेणाग्नाविवादग्धृत्वावस्थायामपि दग्धृशब्दस्य प्रोक्षणीशब्दप्रयोगोपपत्तौ समुदायस्य शक्त्यन्तरकल्पनं न युक्तमित्येतदेव व्यतिरेकदृष्टान्तमुखेन दर्शयितुमाह * तथा हीति * शालाख्ये वृक्षविशेषे ऽश्वत्वकर्णत्वयोः शक्तिरूपेणाप्यभावात्समुदायस्य शालजातिवाचित्वं कल्पितमित्यर्थः । सिद्धान्तमुपसंहरति * तस्मादिति * नन्वेवं सति तैलादावपि प्रोक्षणीशब्दः किमिति न प्रयुज्यत इत्याशङ्क्याह * इतीति * समुदायप्रसिद्ध्यभावासिद्धयौगिकत्वपरामर्शार्थो ऽयमितिकरणः । यस्मात्प्रोक्षणीशब्दस्य समुदायप्रसिद्ध्यभावाद्यौगिकत्वं सिद्धं तस्मात्तैलादावपि साधारणतास्त्येव प्रयोगाभावस्तु सत्यपि वाच्ये न विरुध्यतइत्याशयः । यद्वा समुदायप्रसिद्धेर्बलीयस्त्वे ऽप्यप्सु प्रोक्षणीशब्दस्य तदभावादवयवप्रसिद्धिरङ्गीक्रियमाणा न रथकाराधिकरणविरुद्धेति सूचनार्थत्वात् पूर्वशेषो ऽयमितिकरणः । प्रयोजनभाष्ये प्रोक्षणीशब्दस्य संस्कारशब्दत्वे धृते ऽप्यविकृतस्य प्रयोगमुक्तमाक्षिपति * नन्विति * परिहरति * यदि हीति * निपातानामनेकार्थत्वात् शङ्कानिरासार्थो हिशब्दः । एतदेवोपसंहरति * तस्मादिति * यौगिकत्वे स्त्रीप्रत्ययमात्रनि-
३०७।१ वृत्तिप्रयोजनत्वेनोक्तामुपपादयति * यौगिकत्वे त्विति * ननु यौगिकत्वे ऽपि घृतप्रोक्षणं भवतीति विधिवाक्ये घृतशब्दश्रवणात् विधिशब्दस्य मन्त्रत्वाभावः स्यात्तेन चोदनेति दशमाधिकरणन्यायेन द्रव्ये ऽपि देवतावद्विधिगतस्यैव शब्दस्य प्रयोगनियमाज्जातिशब्दत्ववत् घृतशब्दस्यैव प्राप्तेः प्रातिपदिकस्यापि निवृत्तत्वात् स्त्रीप्रत्ययमात्रनिवृत्त्यभिधानं न युक्तमित्याशङ्क्याह * न चेति * दशमएवाग्नये पवमानायाष्टाकपालं पुरोडाशं निर्वपेदिति विहिते किमाग्नेः पवमानादिगुणशब्दसहितेनाग्निशब्देनाभिधेयः केवलेन वेति सन्दिह प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यादिति सिद्धान्तेनोपक्रम्या विकारो वार्थशब्दानपायात् स्याद् द्रव्यवदित्यनेनार्थस्याग्नेश्चोदकप्राप्तस्य चाग्निशब्दस्य केवलाभिधाने ऽप्यनपायाद्यथा सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत भूतिकाम इत्यजाशब्देनापि विहिते द्रव्ये वशाशब्दवाच्यवन्ध्यात्वगुणयुक्ते चातिदेशप्राप्तौ नञ्छागशब्देन निर्गुणेन चाभिधानं तथेहाप्यविकारः स्यादिति पूर्वपक्षमुपन्यस्यारम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यादित्यनेनार्थस्य देवतायाः श्रुतिसमवायित्वादारम्भेण स्वरूपेण कर्मणयसमवायाद् गुणानाभिधाने च गुणशास्त्रस्यानर्थक्यापत्तेः चोदितेन सगुणेनाभिधानं

स्यादित्येवं निरस्य द्रव्येष्वेवारम्भगामित्वादर्थे विकारसामर्थ्यमित्यनेनारम्भेण स्वरूपेण द्रव्येषु क्रियागामित्वाद्विकारसहितस्यापि शब्दस्य द्रव्यरूपे ऽर्थे सामर्थ्यमस्तीति वैषम्यं वदतां द्रव्येष्वर्थरूपेण कर्मणि समवायाभ्युपगमाद्विधिगतशब्दप्रयोगनियमो नास्तीत्यर्थः ।

॥ अथ निर्मन्थ्यशब्दस्य यौगिकत्वाधिकरणम् ॥ ९ ॥

तथा निमन्थ्यें ॥ १२ ॥

वैद्युताद्यग्निव्यक्तेर्मन्थनजन्यत्वे शक्तेरप्यभावात् पूर्वन्यायात्तुल्यत्वमाशङ्क्य विशेषरूपेण शक्त्यभावे ऽप्यग्निजातीयस्य कस्य चिन्मन्थनजन्यत्वदर्शनेन शक्त्यवधारणाद्वैद्युतादावप्यग्निजातीयकत्वाविशेषेण सामान्यतः शक्तिसम्भवेन कथं चित् कल्पावयवशक्त्यनुसारात्प्रयोगोपपत्तौ समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेस्तुल्यत्वातिदेशायेदमधिकरणमित्याह * निर्मन्थ्ये ऽपीति * भाष्यकारेणाचिरनिर्मन्थितत्वं यौगिकत्वप्रयोजनमुक्तमाक्षिपति * वैद्युतेति * पाकान्यथानुपपत्त्याग्निमात्रप्राप्तौ मन्थनजन्यत्वविशेषणस्यातज्जन्याग्निव्यावृत्त्या कृतार्थत्वात् नाचिरत्वाक्षेपकत्वं युक्तमित्यर्थः । ननु नावनीतेन भुङ्क्तइत्यत्रापि घृतशब्दानुदापानात्तैलादेरपि प्राप्तौ तान्निवृत्त्या नावनीतशब्दस्य कृतार्थत्वात् नाचिरत्वाक्षेपकतेत्याशङ्क्याह * लोक इति*प्रमाणान्तरावगतवक्तृभिप्रायानुसारात्तत्र विशेषप्रतीतिर्न शब्दसामर्थ्यादिति भावः । यद्वा यथैवाभ्यासः सामधेनीनां प्राथम्यात् स्थानधर्मः स्यादित्यत्र त्रिः प्रथमामन्वाह त्रिरुत्तमामिति प्रथमोत्तमशब्दयोः प्रथमावगताद्यन्तस्थानपरत्वातिक्रमहेत्वभावान्न तदुपलक्षितप्रवो वाजा आजुहोतेति ऋक्परतेति नवमे वक्ष्यते तथा नावनीतशब्दस्यापि प्रथमावगतनवनीतविकारत्वलक्षणधर्मातिक्रमेण तदुपलक्षितघृताख्यधर्मिपरत्वाभावात् धर्मस्य च प्रवो वाजा इति प्रथमऋक्प्रतीकम् । आजुहोतेति अन्त्यऋक्प्रतीकं तत्परता धर्मिगतस्पर्द्धमानधर्ममात्रव्यावर्त्तकत्वेनास्पर्द्धमानधर्म्यन्तरव्यावर्त्तकत्वायोगात् तैलादिव्यावृत्त्यप्रतीतेर्घृते च नवनीतविकारत्वावरुद्धधर्मान्तराऽभावादबुद्धिस्थनवनीतव्यक्तिविकारत्वव्यावृत्त्या बुद्धिस्थनवनीतव्यक्तविकारपरत्वावगतेश्चिरकालवगतायाश्च नवनीतव्यक्तेरबुद्धिस्थत्वादचिरावगतनवनीतव्यक्तिविकारत्वप्रतीतेः । शब्दसामर्थ्यादेवाचिरनिर्दग्धत्वावगतिरित्याह * सर्वघृतानां चेति * प्रकरणादिना घृतप्रतीतिमभिप्रेत्य पुनःश्रुतेरित्युक्तं नावनीतेन घृतेन भुङ्क्तइत्येवंविधवाक्याभिप्रायेण वा पञ्चम्यन्तं वा श्रुतिशब्दमङ्गीकृ-

त्य श्रुतितो ऽपि पुनरेवमचिरनिर्दग्धत्वावगतिरित्येवं योज्यम्। आनर्थक्यानुपपत्तिलक्षणार्थो वा पुनः शब्दः।निर्मन्थ्यशब्दे तु शब्दप्रमाणकत्वेन प्रमाणान्तरानुसारायोगादमन्थनजन्याग्निनिवृत्त्या च कृतार्थत्वेन शब्दसामर्थ्याभावादचिरनिर्मन्थितत्वाप्रतीतेर्नाचिरनिर्मन्थितविषयता कल्प्येति वैषम्यमाह*इह त्विति * चिरग्रहणं दृष्टान्तार्थं ननु पङ्कजादिशब्दवन्निर्मन्थ्यशब्दस्य योगरूढित्वादचिरनिर्मन्थिताग्निगतमन्थनक्रियायोगानिमित्तत्वप्रतीतेर्विशेषावगतिर्भविष्यतीत्याशङ्क्याह * न हीति * पद्मव्यतिरिक्ते द्रव्ये पङ्कजन्यत्वे सत्यपि पङ्कजशब्दप्रयोगाभावात् योगरूढित्वं कल्पितं निर्मन्थ्यशब्दस्य त्वग्निमात्रे प्रयोगस्य भाष्यकृतोक्तत्वान्न योगरूढिता कल्प्येत्याशयः। आक्षेपमुपसंहरति * तस्मादिति * पाकाङ्गत्वेनेह विधीयमानस्य मन्थनस्य पाकैकदेशकालकर्तृकत्वादचिरनिर्मन्थितत्वसिद्धिरिति परिहरति * नैष दोष इति * श्लोकं व्याचष्टे * यथैवेति * नन्वेवं सति देशकर्त्रैक्यमपि कस्मान्नोक्तमित्याशङ्क्याह * तेनेति *

॥ अथ विश्वदेवादिशब्दानां यागनामधेयताधिकरणम् ॥ १० ॥

वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥

अत्र भाष्यकृता किं वैश्वदेवशब्दो गुणविधिः कर्म नामधेयं वेति चिन्तोक्ता सा पूर्वपक्षसूत्रे विकल्पाभिधानात् सिद्धान्तसूत्रे च तन्निराकरणमात्रप्रतीतेरयुक्ता च प्रकरणपर्यालोचनया गुणविधिनामधेयविचारो ऽधिकरणस्य तात्पर्यावगमादेवमुपन्यासो युक्तः। आग्नेयाधिकरणे ऽपवादान्नामधेयविचारस्य पर्यवसितत्वावगतेर्नामधेयविचारस्यापर्यवसितस्याप्यपवादसम्भवे दर्विहोमपदस्थैव विचार्यत्वाशङ्काष्टमाध्यायासङ्गत्या शङ्कायास्तत्रैव निराकार्यत्वेनेहाप्रस्तुतत्वात् न युज्येताग्नेयाधिकरणस्यापवादत्वेन सङ्गतिप्रदर्शनार्थं गुणविधिनामधेयविचारे ऽपि विशिष्टविधिव्युत्पादने तात्पर्यादपवादे तात्पर्याभावेन पर्यवसानद्योतकत्वं नास्तीत्युच्यते तथा सत्युत्पत्तिशिष्टगुणबलीयस्त्वसिद्धिप्रयोजनत्वाद्विशिष्टविधिव्युत्पादनस्य तदधिकरणोक्तक्रियानिमित्तत्वप्रसक्त्या कृते ऽधिकरणत्रये यत्प्रसक्त्या यो विचारस्तत्समाप्तौ स एव बुद्धिस्थो भवतीति प्रासङ्गिकाधिकरणत्रयसमाप्त्या तस्यैव बुद्धिस्थस्य प्रयोजनविचारायैतदधिकरणमिति गुणार्थमिति गुणविधिनामधेयविचारे तात्पर्याभावात्तदुपन्यासस्तात्पर्यतो ऽप्ययुक्तः। उत्पत्तिशिष्टबलीयस्त्वव्युत्पादनार्थे चास्मिन्नधिक-

रणे सत्युद्भिदादीनामेवोदाहरणत्वोपपत्तेर्वैश्वदेवोदाहरणं व्यर्थमित्याशङ्क्याह * तद्धितेति * अयमाशयः (सत्यपि विशिष्टविधौ[1] ३०८।२
)गुणविशिष्टस्यापि कर्मणो विहितस्य विशिष्टविध्यन्यथानुपपत्तिप्रसूतेन विधिना विशेष्यस्यापि विशेषणवद्विधानाच्छुद्धानुवादेनापि वाक्यान्तरस्थस्यापि गुणस्य स्ववाक्यस्थवद्वाक्यीयत्वाविशेषाद्विकल्पेन विधानोपपत्तेरुत्पात्तिशिष्टेनापि सोमेनोत्पन्नाशिष्टस्य खनित्रादेर्बाधायोगादुद्भिदादिशब्दानां ज्योतिष्टोमे गुणविधित्वोपपत्तेरुत्पत्तिशिष्टबलीयस्त्वेन गुणविधित्वनिरासायोत्पात्तिशिष्टबलीयस्त्वसिद्ध्यर्थं विशिष्टविधिव्युत्पादनं व्यर्थमित्याशङ्क्यानुष्ठानायोग्यत्वेन शुद्धस्य विधातुमशक्यत्वात् अग्निहोत्रं जुहोतीत्यादावपि सामान्यतो द्रव्यदेवताविशिष्टस्यैव विधेयत्वाभ्युपगमात् विशिष्टविधौ स्ववाक्यश्रुतद्रव्यादिविशेषविशिष्टस्यैव प्राप्तत्वेनानुवादापत्तेस्तादृशेन च नैराकाङ्क्ष्ये स्ववाक्यश्रुतगुणविरोधिगुणान्तरविध्यनुपपत्तेर्विशिष्टविधौ सत्युत्पात्तिशिष्टेनोत्पन्नाशिष्टस्य बाधसिद्धिरिति विशिष्टविधिव्युत्पादनप्रयोजनमुत्पात्तिशिष्टबलीयस्त्वं समर्थयितुमेतदधिकरणम् तथाप्युत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं सिध्यति नान्यथेति दर्शयितुं भाष्यकृतैवं विचारारम्भः कृतः। वैश्वदेवोदाहरणस्याप्येतदेव प्रयोजनमित्येतदेवोपपादयितुं पूर्वोक्तकारणासम्भवस्तद्धितोपात्तत्वादित्यादिना दर्शितः। न तूद्भिदाद्यधिकरणैरगतार्थत्वम् दर्शयितुम् इति भ्रमितव्यं गतार्थत्वशङ्कानुपपत्तेस्तन्निरासायागतार्थत्वाभिधानानर्थक्यात् सास्यदेवतेति हि देवतातद्धिताधिकारे सूक्तहविषोरिति स्मृतेर्देवतातद्धितस्य सूक्ते हविषि वा मुख्यत्वावगमे ऽपि द्रव्यविशेषस्येहानुपादानेनास्य शब्दाभिधेयत्वायोगात्सामानाधिकरण्योपात्तत्वेनास्य शब्दाभिधेयस्य यागस्यैव देवतासम्बन्धावगतेस्तदन्यथानुपपत्त्या द्रव्यस्यैव लक्ष्यमाणत्वात् मत्वर्थस्य यागस्य लक्षणा नाशङ्कितुं शक्या आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमित्यष्टौ कर्माणि प्रकृतानि वैश्वदेवेन यजेतेति याजनानूद्य विधित्सितस्य देवतालक्षणस्य गुणस्यामिक्षायागे प्राप्तस्यापि इतरेषु सप्तसु प्राप्त्यभावात् विधिसम्भवे तत्प्रापणवैयर्थ्याभावात् तत्प्रख्यतापि नाशङ्कितुं शक्या वाक्यभेदाद्याशङ्का त्वत्यन्तनिर्मूलेत्यगतार्थत्वाभिधानार्थक्यापत्तिरुत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं दर्शयितुमव-

१ यमं पा० २ पु० पा०।

मारम्भ इतीहश्येव ग्रन्थतात्पर्यव्याख्या युक्ता । ननु गुणविधिनामधेयचिन्तात्मकस्याधिकरणस्य बर्हिराज्यादिविचारात् प्रागेवारम्भः स्यादित्याशङ्क्याह * सर्वत्र चेति * बर्हिरादिशब्दो ऽपि कस्य नामेत्येवं विचारात्मकत्वात् तस्याव्यवधायकतेत्यर्थः । यदा तु गुणविधिप्रतियोगित्वेन विधिनिरपेक्षलोकप्रसिद्धदध्यादिनाम विलक्षणं विधेयकर्मण्यलौकिकं नाम वेदेन विधीयमानं नामधेयशब्देनोच्यते तदा संस्कारनिमित्तत्वपक्षे यल्लूयते तस्य बर्हिःशब्दो नामेति विधेयसंस्कारयुक्ते द्रव्ये वेदेनालौकिकस्य नाम्नो विधीयमानत्वात् नामधेयत्वजातिनिमित्तत्वे यौगिकत्वे च विधिनिरपेक्षलोकप्रसिद्धत्वात्तन्नामधेयतेति सामान्यत एव नामधेयचिन्तात्मकत्वात् स्पष्टमेवाव्यवधायकत्वं यद्वा निर्मन्थ्यशब्दस्य यौगिकस्य नामधेयत्वे सत्यपि गुणविधित्वस्य दर्शनाद्वैश्वदेवशब्दस्यापि यौगिकत्वात् सत्यपि नामधेयत्वे गुणविधित्वमप्यस्तीति समुच्चयेन पूर्वपक्षः केवलनामधेयत्वेन सिद्धान्त इत्येव विचाराङ्गीकरणेनानन्तरसङ्गतिरेवं वक्तुं शक्येत्याह * अथ वेति * एतच्चानन्तरसङ्गत्युपपादनसामर्थ्यप्रदर्शनमात्रार्थमुक्तं न पारमार्थिकं सिद्धे हि वैश्वदेवशब्दस्य नामधेयत्वे समुच्चयेन पूर्वपक्षः स्यात् तत्सिद्धिश्च तत्प्रख्यतयैव सर्वेषां नामधेयमिति वार्त्तिकदर्शनात् तत्प्रख्यन्यायेनाशङ्क्यते स चाविदितबोधनं च विधिरित्युच्यते विदितं चात्रान्यतो गुणविधानमिति तत्प्रख्याधिकरणभाष्यादतस्तत्प्रापणं व्यर्थमिति च वार्त्तिकाद्विधित्सितस्य गुणस्यान्यतः प्राप्तौ विध्यानर्थक्यादु गुणविधित्वानुपपत्तेः पारिशेष्यान्नामधेयतेत्येवं रूपः प्रतीयते न चामिक्षायागव्यतिरिक्तेषु यागेष्वन्यत्र विधित्सितस्य गुणस्यान्यतःप्राप्तिरस्ति प्रकृत्याविशेषेणाष्टस्वपि यागेषु गुणविधित्वापत्तावप्यस्यामिक्षातिरिक्तार्थत्वेनानर्थक्ययोगात् गुणविधित्वमाश्रित्य वैश्वदेवीमामिक्षामित्यस्यैवामिक्षामात्रविशिष्टभावनाविधायित्वाश्रयणेन क्रमाविनियुक्तवैश्वदेवयाज्याज्यानुवाक्यायुगलकल्पितमान्त्रावार्णिकदेवतान्वयाद्यागे ऽनुमिते वैश्वदेवीशब्दस्यामिक्षायागनामधेयत्वं वरं युक्तं मन्त्रवर्णाच्च तद्धितस्य बलीयस्त्वात् तद्धितनियुक्ताया अपि देवताया वैश्वदेवेन यजेतेत्यनेन विधिरविरुद्धः उत्पत्तिशिष्टाग्न्याद्यवरुद्धत्वादामिक्षायागव्यतिरिक्तेषु देवताविध्यसम्भवेनामिक्षायागे देवताविधिप्रसक्तिमापाद्य तत्प्रख्यतया नामधेयत्वासिद्ध्यभ्युपगमे केवलामिक्षायागनामत्वापत्तेः सर्वनामतेष्टा न सिध्येत् । वार्त्तिककारीयं तु तत्प्रख्यत्वाभिधानमुत्पत्तिशिष्टबलीयस्त्वेनैतदधिकरणव्युत्पादितेन

गुणविध्यसम्भवान्नामधेयत्वे साधिते प्रवृत्तिनिमित्तप्रदर्शनार्थं न तु नामधेयत्वसिद्ध्यर्थम् सर्वत्र च गुणविधित्वसम्भवेनैव नामधेयत्वाभिधानात् इह गुणविधित्वसम्भवे नामधेयत्वानुपपत्तेः। समुच्चयेन पूर्वपक्षस्यानाशङ्क्यत्वात्प्रौढिमात्रमेतदिति स्थितं विशिष्टविध्यसम्भवे कस्य चिद् गुणस्योत्पत्तिशिष्टस्याभावात्तद्बलेन प्रसिद्ध्यादिहेतुत्रयावधारितगुणविधित्वनिरासाशक्तेः सन्देहायोगाद्विशिष्टविधौ व्युत्पादिते सत्युत्पत्तिशिष्टगुणसम्भवात्तद्बलीयस्त्वसन्देहेन गुणविधिनामधेयसन्देहो भवतीति सूचनार्थत्वेनेति चेदिति सूत्रावयवव्यानार्थं यदीति भाष्यं स्पष्टत्वान्न व्याख्यातं विकल्पशब्दस्य गुणविधिप्रतिज्ञानार्थत्वेन व्याख्यानार्थं वैश्वदेव इति भाष्यमुपपादयति * तत्रेति * विफलेन गुणविधिप्रतिज्ञानस्य किं प्रयोजनमित्यपेक्षायामुत्पत्तिशिष्टाग्न्याद्यविरुद्धेषु यागेषु देवतान्तरविध्ययोगाद् गुणविध्यसम्भवाशङ्कानिरासप्रयोजनमाह * एवं हीति * ननूत्पत्तिशिष्टबलीयस्त्वस्योत्पत्तिवाक्यविज्ञातमित्यादिना चित्राधिकरणे साधितत्वात् नेहोत्पत्युत्पन्नशिष्टयोर्विकल्पः पूर्वपक्षयितुं युक्त इत्याशङ्क्याह * न चेति * वाक्यभेदापत्त्या तत्र गुणविधित्वानिरासात् पुंपशौ प्राप्ते स्त्रीपशुरिति भाष्यावयवव्याख्यानार्थानागतावेक्षणेनैतदधिकरणसिद्धोत्पत्तिशिष्टबलीयतास्माभिरुक्तेत्यर्थः। भाष्यावयवोऽप्यनागतावेक्षणेनाभ्युच्चयहेत्वभिधानायेति भाष्यकारशब्देन सूचितम्। ननूत्पत्तिशिष्टाग्निक्षावरुद्धे यागे वाजिनस्योत्पन्नशिष्टस्य विधानाऽयोगेन भेदकत्वस्य गुणाधिकरणे वक्ष्यमाणत्वात् इह तुल्यबलत्वाशङ्का न युक्तेत्याशङ्क्य * क्व चिदित्युक्तम् * वैश्वदेव्यामिक्षा वाजिन्यो वाजिनमिति तद्धितचतुर्थीकृतं बलाबलं तत्र वक्ष्यत इत्युत्पत्युत्पन्नशिष्टकृतमित्याशयः। नन्वेवमप्यग्नेयदोषविकल्पापादकत्वाद् गुणविधिर्न युक्त इत्याशङ्क्याह * किं चेति * वसन्ताद्येककालादियोगेनैव समुदायापादनसिद्धेः समस्तानुवादानर्थक्यप्रसङ्गाद्वैश्वदेवशब्दस्य चाग्नेयादिषु प्रत्येकं समुदाये वा प्रवृत्तिनिमित्ताभावेन नामधेयत्वायोगादगत्या विकल्पापादको गुणविधिरेव ज्यायानित्याशयः। श्लोकं व्याचष्टे * यदि हीति * नन्वाग्नेयादिषु प्रत्येकं समुदाये वा विश्वेदेवसम्बन्धस्य प्रवृत्तिनिमित्तस्याभावान्नामधेयत्वासम्भवेऽप्यामिक्षायागनामत्वं प्रवृत्तिनिमित्तसद्भावाद्भविष्यतीत्याशङ्क्याह *न चेति* यजिसामानाधिकरण्यनिबन्धनत्वान्नामधेयत्वस्य यजेश्चामिक्षायागमात्राग्राहित्वायोगात् तन्मात्रनामधेय-

१ तत्राश्रय इ० २ पु० पा०।

त्वस्य च निष्प्रयोजनत्वेन सिद्धान्तिनोऽप्यनिष्टत्वात् नैषा शङ्का युक्तेत्यर्थः । आमिक्षायागे तत्प्रख्यान्यशास्त्रसन्द्रावाद् गुणविधिर्व्यर्थः
३०९।। स्यादित्याशङ्कां निरस्यन् पूर्वपक्षमुपसंहरति * तस्मादिति * यस्मादुत्पत्त्युत्पन्नशिष्टयोस्तुल्यबलत्वेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धेष्वपि यागेषु विकल्पेन देवतान्तरनिवेशः सम्भवति नामधेयत्वं च समस्तानुवादानर्थक्यापत्तेरामिक्षायागव्यतिरिक्तेषु च प्रवृत्तिनिमित्ताभावात् तन्मात्रनामत्वस्य चानिष्टत्वात् न युज्यते तस्मादित्यर्थः । शङ्कानिरासार्थं सप्तम्यित्युक्तम् । ननु प्रकृतत्वाविशेषात् सर्वेषु यागेषु यजिना गृहीतेषु एकस्यैव वैश्वदेवशब्दस्यामिक्षायागव्यतिरिक्तेषु विधित्वं तस्मिंश्चानुवादत्वं वैरूप्यापत्तेर्न युक्तमित्याशङ्क्ते * तत्रेति * परिहरति*तत्रेति* प्रकृतत्वात् सर्वयागानां ग्रहणाविशेषे ऽपि येषु यागेषु गुणस्याप्राप्तिस्तेषु विधिप्रत्ययस्य तात्पर्योपसंहारात् तद्विषयसमर्पकस्य वैश्वदेवशब्दस्यापेक्षाऽभेदादवैरूप्यमित्यर्थः ।

न प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य ॥ १४ ॥

वैश्वदेवशब्दे गुणविधानस्य प्रकृतयागापेक्षत्वात् तेषु च प्रत्यक्षेण द्रव्यदेवताविशिष्टयागविधिनैवाग्न्यादिदेवतालक्षणस्य गुणस्य विधानात्तद्विरोधिगुणान्तरनिवेशानुपपत्तेर्न गुणविधिः सम्भवतीत्युत्पत्तिशिष्टबलीयस्त्वेन गुणविधिनिराकरणमविहितदेवताकोपांशुयाजादियागे देवताविधौ देवताविशिष्टयागान्तरविधौ वा न सम्भवतीति प्रकृतयागानुवादो न गुणविधिरुत्पत्तिशिष्टबलीयस्त्वेन निरस्यत इति दर्शयन्सौत्रनञुक्तां प्रतिज्ञां व्याचष्टे * अत्रेति * उत्पत्त्युत्पन्नशिष्टत्वलक्षणवैषम्याभिधानसूचितमुत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधं प्रश्नपूर्वकं हेतुत्वेनाह * कथमिति * उत्पत्त्युत्पन्नशिष्टयोर्वाक्यीयत्वाविशेषात् विकल्पोपपत्तेः किमित्युत्पत्तिशिष्टगुणावरुद्धे कर्मणि उत्पन्नशिष्टो गुणो नावकाशार्ह इत्यपेक्षायां प्रकरणात्प्रत्यक्षविधानाच्चेति सूत्रावयवोक्तं वैषम्यं हेतुत्वेन योजयति * विकल्पो ऽपीति * पारिशेष्यान्नामत्वसिद्धिं तस्मादित्युपसंहारभाष्योक्तां विवरीतुम * तस्मादित्युक्तम् *. उत्पत्तिशिष्टबलीयस्त्वं प्रत्यक्षविधानादिति * सूत्रावयवोक्तम * दर्शयितुं प्रत्यक्षेति भाष्यं व्याचष्टे * अग्न्यादयो हीति * यद्यपि सोमेन यजेतेत्यादौ

१ नामामति २ पु० पा० ।

कर्मगुणयोर्भिन्नपदोपादाने ऽपि सकृच्छ्रुतैनैव प्रत्ययेनोभयविधानात् शुद्धकर्माप्राप्तेरुत्पत्तिशिष्टबलीयस्त्वं सिध्यति तथापीह विधेयसमर्पकमप्येकमेव पदमस्तीत्यतिशयाभिधानार्थं तद्धितग्रहणं तेषां यागादीनामिति भाष्योक्तस्याग्न्यादीनां यागसम्बन्धस्य द्रव्यसम्बन्धद्वारत्वं दर्शयितुमष्टाकपालादीनामित्युक्तम् । एकपदोपात्ताग्न्यादिवैषम्यसूचितामितरेषां भिन्नपदोपादानं विश्वेदेवा इत्यनेन दर्शितम् । नन्वाग्नेयमष्टाकपालं निर्वपतीत्यादावुत्पत्तिवाक्ये ऽपि द्रव्यविशेषसम्बन्धस्याष्टाकपालादिपदान्तरसम्बन्धाधीनत्वाद्वाक्यीयत्वेन तुल्यतेत्याशङ्क्ते * नन्विति * नैव हि द्रव्यमात्रस्य तद्धितेर्देवतोच्यते अस्य शब्दाभिधेयस्य विग्रहवाक्यस्थनास्येति सर्वनाम्ना सन्निहितस्य द्रव्यविशेषस्यैव देवतासम्बन्धस्तद्धितेन क्रियते न चैतावता पदान्तरानर्थक्यम् ।

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसामीप्यात्तस्यैव विषयार्पणम् ॥

इत्यनेनैव न्यायेन सन्निहितविशेषणापेक्षितविशेष्यासमर्पणार्थत्वात् पदान्तरस्येति परिहरति * नेति * प्रत्यक्षविधानादिति सूत्रावयवोक्तेनैव तद्धितवाच्यद्रव्यविशेषसम्बन्धेन पशुसोमाधिकरणादौ व्यवहारादपौनरुक्त्यम् अस्यापि तद्धितत्वाविशेषात् तुल्यतामाशङ्क्ते * वैश्वदेवशब्दे ऽपीति * देवताशब्दस्य सम्बन्धिशब्दत्वेन गुर्वादिशब्दवत् प्रतिसम्बन्धिनमपेक्ष्य प्रवृत्तेर्यागस्य च सम्बन्धापादकत्वेनाध्यापनादिवत् प्रतिसम्बन्धित्वायोगात् द्रव्यस्यैव शिष्यादिवत् प्रतिसम्बन्धित्वप्रतीतेः । सास्यदेवतेति देवताताद्धिताधिकारसूत्रे ऽस्य शब्दस्य प्रतिसम्बन्धिद्रव्यविषयत्वावधारणात् सूक्तहविषोरिति नियतविषयत्वस्मृतेश्च वैश्वदेवशब्दस्य देवतासम्बन्धिद्रव्यवाचित्वावसायाद्यागलक्षितस्य द्रव्यस्य देवतासम्बन्धं कल्पयित्वा तद्द्वारेण यागस्य देवतासम्बन्धात्प्रवृत्तेर्विप्रकर्षसाम्याद्वाक्येनेति भाष्यकृतोक्तमिति परिहरति * नेति * नन्वष्टाकपालादेः प्रकृतस्य देवतासम्बन्धित्वोपपत्तेः किमिति यागेन द्रव्यं लक्ष्यणीयमित्याशङ्क्यानिरासपूर्वकमेतदेव व्याचष्टे * न तावदिति * द्रव्यसम्बन्धं विना तद्धितशब्दस्यापर्यवसानेन वाक्यान्तराम्वयायोगात् अप्रकृतवत्प्रकृतेनापि द्रव्येण स्ववाक्ये श्रवणं विना सम्बन्धानुपपत्तेरपरिहार्यो लक्षणेत्याशयः । ननु वाक्येनैव विश्वेषां देवानां यागसम्बन्धलाभेन प्रकरणादिति सूत्रावयवेन प्रकरणापेक्षत्वाभिधानमयुक्तं स्यादित्याशङ्क्यानिरासार्थं प्रकरणादिति भाष्यं व्याचष्टे

* वाक्येन चेति * कर्मानुवादिनां धातूनां सामान्यविषयत्वे सर्वसङ्करापत्तेस्तत्परिहारायानुवाद्यकर्मविशेषलाभार्थं प्रकरणापेक्षेत्याशयः। तथा च प्रत्यक्षविधानादित्यनेनाग्न्यादीनामेकपदोपादानाभिधानाद्विश्वेषां देवानां भिन्नपदोपादानां सूचितम् । तथा प्रकरणादित्यनेन विश्वेदेवविधौ प्रकरणापेक्षाभिधानादग्न्यादिविधौ तदनपेक्षा सूचितेति दर्शयितुमाह * न त्विति * भाष्यगतेन वाक्यशब्देन वैश्वदेवशब्दे द्रव्यलक्षणाभिधानात्तत्सदसद्भावकृतमपि वैषम्यं सूचितमिति दर्शयितुं लक्षणाशब्दः । न हीति सूत्रावयवं स्वयं तावन्नन्वाग्नेयादिवाक्ये ऽपि द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या यागे कल्पयितुमारभ्यमाणे वैश्वदेवेन यजेतेति प्रत्यक्षश्रुतेन कल्पनाप्रतिबन्धात् तस्यैव ग्रहणायास्त्येव प्रकरणापेक्षेत्याशङ्कानिरासार्थत्वेन निर्वपतेरतिदेशप्राप्तानुवादत्वेन पुंव्यापारनियोगाभावात् आग्नेयादिवाक्यस्य स्वार्थासमाप्तत्वेन वाक्यान्तरान्वयायोगात् नाष्टाकपालादिद्रव्यस्याग्न्यादिसम्बन्धे प्रकरणापेक्षेत्येवं व्याचष्टे *न हीति* यद्वा वैश्वदेववाक्ये यागेन द्रव्यलक्षणाद्विप्रकर्षे ऽभिहिते ननु प्रकृतस्याष्टाकपालादेर्देवतान्वयसम्भवान्न यागेन द्रव्यं लक्षणीयमित्याशङ्कानिरासार्थत्वेन द्रव्यसम्बन्धं विना तद्धितस्यापर्यवसानेन वाक्यान्तरान्वयायोगात् यद्द्रव्यस्य प्रकरणे श्रवणं तन्न वैश्वदेववाक्येनाश्रितम् इत्येवं व्याख्येयमित्याह * अथ वेति* भाष्यकृता त्वाग्नेयादिवाक्ये प्राकरणिकयज्यपेक्षायां वैश्वदेववाक्यस्यैव यागविधायित्वापत्तेः पूर्वपक्षहानिप्रसङ्गात् ।प्राप्ते च कर्मण्याग्नेयादिवाक्येनानेकगुणविधेर्वाक्यभेदापत्त्या पौर्णमास्यधिकरणे निराकरिष्यमाणत्वात्। आद्यायाः शङ्कायास्तुच्छत्वात् यागेन च द्रव्यलक्षणायाः सूत्रानुक्तत्वेन तद्विषयाशङ्कानिरासार्थतया सूत्रावयवयोजनस्य क्लिष्टत्वात् । प्रत्यक्षविधानप्रकरणशब्दोक्तस्योत्पत्त्युत्पन्नाशिष्टत्वलक्षणस्य वैषम्यस्य प्रस्तुतविकल्पनिरासोपयोगित्वप्रतिपादनार्थत्वेनायं सूत्रावयवश्चशब्दार्थे हिशब्दं द्रव्यशब्दं चाग्न्यादिदेवतापरमङ्गीकृत्य प्रकरणापेक्षं विश्वेदेवदेवताख्यं वस्तुश्रुतस्याग्न्यादेः पाक्षिकबाधनेन च समर्थं येन विकल्पः स्यादिति अध्याहारेण व्याख्यातः तत्र कथं द्रव्यशब्देन देवतोच्यते इत्यपेक्षायामाह * भाष्ये त्विति * देवताव्यतिरेकजनितां वा षष्ठीमङ्गीकृत्य श्रुतस्य द्रव्यस्येति षष्ठ्या वैयधिकरण्यनिर्देशेन द्रव्यस्याष्टाकपालादेः सम्बन्धित्वेन श्रुतस्याग्नादेर्देवतारूपस्येत्येवं भाष्यकृद्व्याख्यानुसर्तव्येत्याह * वैयधिकरण्यं वेति * देवतात्वेनादीयते गृह्यते यदग्न्यादीत्येतदर्थप्रतिपादनार्थो ऽयमादि-

शब्दः यागसम्बन्धित्वेन श्रुतेभ्यो विश्वेदेवेभ्यो ऽन्यादीनां वैषम्यप्रदर्शनार्थं द्रव्यसम्बन्धाभिधानम्।ननु प्रकृतेषु गुणविध्यसम्भवे ऽप्यविहितदेवताकोपांशुयाजानुवादेन गुणविधिगुणविशिष्टापूर्वकर्मविधिर्वा भविष्यतीत्याशङ्क्याह * प्रकृतेति * समस्तानुवादानर्थक्यं ३१०।२
पूर्वपक्षोक्तं परिहरति * विप्रकीर्णेति * यद्विश्वेदेवा अयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादावगतविश्वेदेवकर्तृकत्वलक्षणैकधर्मयोगनिमित्तमष्टानां यागानां समुदायरूपत्वेनैकीकरणं समुदायानुवादप्रयोजनमित्यर्थः । ननु प्राजापत्यपशुयागादिवत् समुदायानुवादं विनापि प्रकृतत्वयागत्वाभ्यामेकबुद्धिविषयत्वलक्षणसमुदायत्वं सेत्स्यतीत्याशङ्क्य विप्रकीर्णेत्युक्तं सह विधानाभावान्नैषां प्राजापत्यादितुल्यतेत्याशयः । ननु वसन्ताद्येककालादियोगात् समुदायत्वं सेत्स्यतीत्याशङ्क्याह * न हीति * वैश्वदेवशब्दस्य समुदायवाचित्वाभावे भिन्नवाक्यविहितानां यागानां साहित्याप्रतीतेर्भिन्नेष्वपि च वसन्तकालेषु प्राचीनप्रवणादेशेषु वानुष्ठाने वसन्तादिविध्यर्थसम्पत्तेर्गुणानुरोधेन प्रधानसाहित्यकल्पनायोगात् नैकदेशकपालायोगात्समुदायत्वासिद्धिरित्याशयः।विश्वे देवा न च प्राप्ता इत्यनेन प्रवृत्तिनिमित्ताभावान्नामधेयत्वासम्भवमुक्तं परिहरति *तस्मादिति * यस्मात्समुदायानुवादेन समुदायत्वं सिद्धं तस्माल्लिङ्गसमवायात्सर्वेषां तत्प्रख्यस्य वैश्वदेवशब्दव्यपदेश्यत्वस्योपपत्तेः सर्वेषामेव वैश्वदेवशब्दो नामधेयमित्यर्थः । समुदायत्वसिद्धावपि वैश्वदेवशब्देन समुदाये गुणस्याविधित्सितत्वात्समुदाये गुणप्रापकशास्त्रान्तरस्याभावादेकदेशे प्राप्तस्य गुणस्यैकदेशान्तरं प्रापणवैयर्थ्ययोगात्तत्प्रख्यशब्दस्य च तत्प्रख्यान्यशास्त्रसद्भावप्रतिपादनासामर्थ्यात्तत्प्रख्याधिकरणन्यायसिद्धत्वं नामधेयस्यानेनोक्तमिति न भ्रमितव्यम्।

मिथश्चानर्थसम्बन्धः ॥ १५ ॥

ननु यथा वाजिभ्यो वाजिनमित्यत्र स्ववाक्यगतेन वाजिशब्देनाभिक्षाक्षागं लक्षयित्वा विधीयमानस्य वाजिनस्य प्रकरणापेक्षाभावात्तन्निमित्तदौर्बल्याभावेनोत्पत्तिशिष्टाभिक्षावरुद्धस्यापि यागस्य विधीयमानद्रव्यान्तराकाङ्क्षावशेनाकाङ्क्षोत्थापनात्तस्मिन्नेव यागे वाजिनस्य निवेशोपपत्तिरिति गुणाधिकरणे पूर्वपक्षयिष्यते तथेहापि स्ववाक्यगतेन वैश्वदेवशब्देनैवाग्नेयादियागलक्षणोपपत्तेः प्रकरणानपेक्षत्वात् तदपेक्षानिमित्तदौर्बल्याभावेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धे-

ष्वपि यागेषु विधीयमानदेवतान्तराकाङ्क्षावशेनाकाङ्क्षोत्थाप नादेवतान्तरं निवेक्ष्यते यथा चैतद्यदनुसवनं पुरोडाशा निरूप्यन्ते इति पुरोडाशशब्देन धानाः करम्भः परिवापः पुरोडाशः पयस्येत्येष वै यज्ञो हविष्यङ्क्तिरित्येकस्यैव पुरोडाशस्य प्रकृतत्वाद् बहुवचनांन्वयाय हविर्गणो लक्ष्यते तया वैश्वदेवशब्देमाप्यामिक्षायागो विश्वेषां देवानां प्राप्तत्वेन विधानायोगात् तद्विधानायामिक्षायागलक्षणायामानर्थक्यापत्तेस्तत्सहचरिताग्नेयादियागलक्षणा न विरुद्धेत्याशङ्क्यानिरासार्थत्वेनैतत्सूत्रव्याख्यानार्थमथोच्येतेति भाष्यं संक्षिप्य व्याचष्टे * वैश्वदेवमिति * उपोधिके चेति चकारेण लक्षणार्थस्यापि उपशब्दस्य कर्मप्रवचनीयसंज्ञान्वाख्यानात्कर्मप्रवचनीययुक्ते द्वितीयेति स्मृतेस्तद्योगनिमित्तद्वितीयाभ्युपगमेन विश्वेदेवयागस्य समीपे विहितानाग्नेयादियागान् वैश्वदेवशब्देनादाय देवतोपादिश्यत इति यदाशङ्क्यते तन्न युक्तमित्येवं योज्यम् । यदा त्वनन्तरसङ्गतिलोभेन द्रव्यशब्दानुपादाने ऽपि देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धिद्रव्यमपेक्ष्य प्रवृत्तेः सास्य देवतेति अधिकारसूत्रगतस्यास्य शब्दस्य द्रव्यविषयत्वावगतेः सूक्तहविषोरिति च तद्विषयस्मृतेर्विश्वेदेवा अस्य हविषो देवता इति वैश्वदेवशब्दार्थावसायात् यजिसामानाधिकरण्यसिद्ध्यर्थं वैश्वदेवद्रव्यवतायागेनेति मत्वर्थलक्षणाप्रसङ्गात् उद्भिन्न्यायसिद्धं नामधेयत्वमाश्रित्य प्रवृत्तिनिमित्तसिद्ध्यर्थं गुणविधिरप्यस्त्विति समुच्चयेन पूर्वपक्षः क्रियते तदा नामधेयगुणविधिरूपयोरर्थयोः प्रयोजनयोः सकृदुच्चरितेन वैश्वदेवशब्देन सह प्रयोजनप्रयोजनिभावलक्षणः सम्बन्धो न युक्त इत्येवं सूत्रं व्याख्येयमित्याह * अथ वेति * ननु निर्मन्थ्यशब्दे प्रयोजनद्वयदर्शनान्नानयोर्विरोधो ऽस्तीत्याशङ्क्याह * निर्मन्थ्यस्त्विति * अग्निशब्दाश्रवणेन तत्सामानाधिकरण्याभावाश्रवणे ऽपि वा निर्मन्थ्यशब्दस्याग्निपर्यायत्वाभावेनाग्निमात्रनामत्वायोगात् मन्थनजन्यस्य च विशेषस्याक्षेपकाभावेनाप्रतीतेस्तन्नामत्वस्याप्ययोगाद् गुणविधिरेव केवलो ऽसावित्यर्थः ।

परार्थत्वाद् गुणानाम् ॥ १६ ॥

भाष्यकृता गुणानां हविषां प्रधानार्थत्वेन तदावर्त्तकत्वाशक्तेः सहप्रदानप्रसङ्गात् त्रिंशत्सम्पतिवचनं न युज्येतेत्यध्याहारेणैतत्सूत्रं व्याख्यातम् । तत्र बहुपदाध्याहारदोषेणापरितोषात् पूर्वेण सहैकसूत्रतया व्याचष्टे * पूर्वेणेति * त्रिंशदाहुतया हूयन्तइति वाक्या-

र्थसम्बन्धो न स्यादित्यर्थः । गुणविधावपि हविर्भेदेन प्रधानावृत्तेः कथं सहप्रदानापत्तिरित्याशङ्क्यानिरासार्थत्वेन परार्थत्वादित्यत्र गुणशब्दं हविःपरमङ्गीकृत्य योजयति * कुत इति * ननु स्वत एव कर्मणां भेदात् नाश्रुतावृत्त्यापत्तिरित्याशङ्क्याह * देवतैक्यादिति * भिन्नानामपि कर्म्मणां प्रयोगवचनेन सहानुष्ठानं विहितमशक्त्या त्यज्यते एकां तु देवतां सकृदुद्दिश्यानेकद्रव्यत्यागशक्तेः साहित्यत्यागो न युक्त इत्यर्थः । ननु गुणानां प्रधानावर्त्तनाशक्तावपि प्रधानानां भेदात् स्वत एवानुष्ठानभेदो भविष्यतीत्याशङ्क्यानिरासार्थं तत इति भाष्यं व्याचष्टे * तेनेति * कथं भिन्नानां सहानुष्ठानं शक्यम् इत्याशङ्क्यानिरासार्थं सम्प्रतिपन्नेति भाष्यं व्याचष्टे * सम्प्रतिपन्नेति * सकृदनुष्ठानापादनस्य प्रकृतोपयोगाभिधानार्थं तत्रेतिभाष्यं व्याचष्टे * ततश्चेति * ननु प्रधानानुष्ठानभेदे ऽप्यष्टसंख्या- ३११।१
सम्पत्तेस्त्रिंशत्सम्पत्तिवचनं न युज्येतैवेत्याशङ्क्याह * त्रिंशत्पूरणं चेति * अपरेषां तु स्विष्टकृद्यागवाजिनेज्याग्रहणादाधारौ न गणितौ इति लिङ्गदर्शनसूत्रमुपसंहरति * सर्वथेति *

॥ वैश्वानरेऽष्टत्वाद्यर्थवादताधिकरणम् ॥ ११ ॥

पर्ववन्तो विधानार्थास्तत्सामर्थ्य समाम्नाये ॥ १७॥

ननु नामधेयाधिकरणे नामधेयानां त्र्यंशवेदबाह्यत्वाद्धर्मप्रमोपयोगाभावेनानर्थक्यमाशङ्क्य गुणफलोपबन्धाद्युपयोगित्वेन विध्युद्देशान्तर्गत्या धर्मप्रमोपयोगं प्रसाध्य क्वास्ति नामधेयत्वं क्व वा नेति कांष्ठशोधनमुद्भिदाद्यधिकरणैः कर्त्तुमारब्धं तस्य चात्राविचारेण पर्यवसानात्कांष्ठशोधनेन नामधेयप्रामाण्यविचारशेषत्वानुपपत्तेरर्थवादकांष्ठशोधनार्थत्वे वा द्वितीयपादएवार्थवादप्रकरणे कर्त्तव्यत्वापत्तेः स्वातन्त्र्येण तु गुणविध्यर्थवादविचारे वाक्यार्थव्याख्यानापत्तेः प्रमाणलक्षणमङ्कृत्यभाघप्रसङ्गादनारभ्यमिदमधिकरणमित्याशङ्क्याह * गुणविधीति * सर्वत्र गुणविध्यसम्भवेनैव नामधेयत्वस्योक्तत्वात् तद्विचारे पर्यवसिते प्रतियोगित्वेन बुद्धिस्थस्य गुणविधित्वस्य विचारः पूर्वाधिकरणव्युत्पादितस्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्याष्टाकपालादिर्विषयो भवति न वेत्येतन्निर्णयार्थत्वेन नामधेयत्वसिद्ध्यर्थोत्पत्तिशिष्टबलीयस्त्वविषयविवेकफलतया नामधेयविचारशेषत्वं प्रतिपद्यमानो नासङ्गत इत्याशयः । यद्वा गुणविधिनामधेयं निर्णीतं सन्दिग्धानामर्थानां वाक्यशेषादर्थाच्चाध्यवसानमुक्तमिति द्वितीयाध्यायोपक्रमभाष्यपर्यालोचनया ऽक्ता-

धिकरणं यावन्नामधेयविचारप्रतीतेः साक्षान्नामधेयाविचार-सङ्गतिसिद्ध्यर्थम् अष्टाकपालादिशब्दानां नामधेयत्वेनापि पूर्व-पक्षः कर्तुं शक्यतइत्याह * अथ वेति * अष्टाकपालादिशब्दा-नां विशेष्यापेक्षायां द्वितीयान्तस्यापि वैश्वानरपदस्य प्रथमान्त-त्वेन परिज्ञातस्यान्वयप्रतीतेः । तस्य च देवतान्वितद्रव्यवाचित्वे ऽपि यागानुमानपर्यवसायित्वात् उत्पत्तिशिष्टद्वादकपालावरुद्धे च यागे ऽष्टाकपालादीनां निवेशायोगात् द्वादशत्वान्तर्गताष्टत्वादियोग-स्य च प्रवृत्तिनिमित्तस्य सम्भवाद्वैश्वदेवशब्दवद्यागनामत्वमाशङ्क्य द्वादशकपालस्याष्टाकपालादिव्यपदेश्यत्वलक्षणस्य तत्प्रख्यत्वस्याभा-वेन प्रवृत्तिनिमित्ताभावान्निराकृत्य वैकल्पिकानेकसंख्याविशिष्टवै-श्वानरयागाख्यैकार्थविधानेनानेकगुणविधावपि वाक्यभेदाप्रसक्तेः सर्वेषामुत्पत्तिशिष्टत्वाविशेषाद्वैश्वदेवन्यायवैषम्येण गुणविधिमु-पपाद्य सामानाधिकरण्यनिर्दिष्टद्वादशकपालान्वयेन निराकाङ्क्षस्य वैश्वानरस्य विपरिणामेनाष्टाकपालाद्यन्वयकल्पनानुपपत्तेर्गुणविधा-वेकवाक्यत्वायोगात् वैश्वदेवन्यायसाम्यापादनेन निराकृत्यार्थवा-दत्वं सिद्धान्त्यतइत्यर्थः । नन्वौदुम्बराधिकरणे एव सर्वेषां विधि-वन्निगदानां विधित्वाशङ्कानिरासेनार्थवादाधिकरणव्युत्पादितस्या-र्थवादत्वस्यापि स्थापितत्वादनर्थकमेतदधिकरणं स्यादित्याशङ्क्य *पू-र्वसिद्धैर्वेत्युक्तम् * भाष्यकारान्तरकृता ऽऽकारप्रश्लेषरहितसूत्रव्या-ख्यानत्यागेनाकारप्रश्लेषेण भाष्यकृतो व्याख्याने कारणं वक्तुमुपन्या-सपूर्वकं तद् दूषयति *तत्रेति* यस्माद्यदुत्पत्तावपूर्वमित्यनेनाप्रासि-द्धानामुद्भिदादिशब्दानां नामधेयत्वावधारणात् लोकप्रसिद्धानां गुण-विधाननार्थवत्त्वमर्थादुक्तं भवति तस्मादेते ऽष्टाकपालादयः शब्दा लो-कप्रसिद्धार्थत्वाद् गुणविधय इत्यर्थः । द्वादशकपालं निर्वपेदित्यनेनैव पुरोडाशप्राप्तेः संख्यामात्रपरत्वमष्टाकपालादिशब्दानां सूचयितुमष्ट-त्वादय इत्युक्तम् । उद्भेदनादेरवयवार्थस्य लोकप्रसिद्धस्यैव नामधेय-प्रवृत्तिनिमित्तत्वाल्लोकप्रसिद्धार्थस्यापि चित्रादिशब्दस्य नामधेयत्वप्र-सिद्धेर्न लोकप्रसिद्धार्थत्वमात्रेण गुणविधित्वासिद्धिरिति दूषणा-शयः । किमर्थं तर्हि यदुत्पत्तावपूर्वमित्युक्तमित्याशङ्क्याह * सती-ति * नालौकिकार्थत्वमपूर्वशब्देनोक्तं किं त्वनिरूढार्थत्वमिति सू-चयितुम् * सर्वत्रेत्युक्तम् * तदपि नामधेयत्वावधारणे सामाना-धिकरण्यसहकारिकारणं न साक्षादिति समभिव्याहारादिभिरित्य-नेनोक्तं पूर्ववच्छब्दं प्राप्तार्थाभिप्रायमङ्गीकृत्याकारप्रश्लेषेण भाष्य-कारीयव्याख्यानमनुसन्धत्ते * तस्मादिति * पूर्ववन्तो विधाना-

र्थो इति सूत्रावयवो ये हीति भाष्यानुसारात् पूर्वार्द्धेन व्याख्यातः। तदेतदिति भाष्यानुसारादुत्तरार्द्धेनोत्तरः पूर्वार्द्धं व्याचष्टे * यदि हीति * उत्तरार्द्धं व्याचष्टे *न त्विति* ननु द्वादशत्वे ऽष्टत्वादीनामन्तर्गतेः प्राप्तिर्भविष्यतीत्याशङ्क्याह * तथा हीति * यथा देवदत्त गामानयेति त्रिपदे वाक्ये गामानयेति पदद्वयसमुदायो ऽन्यत्र वाक्यार्थाभिधानलक्षणैकार्थक्रियाकारित्वधर्मयोगाल्लब्धात्मको ऽत्र प्रत्याभिज्ञायमानो ऽपि विवक्षितवाक्यार्थाभिधाने व्यापाराभावान्न समुदायत्वेन व्यपदिश्यते तथा संख्येयपरिच्छेदकत्वेनान्यत्र लब्धात्मिकाप्यष्टत्वादिसंख्या द्वादशसंख्यापरिच्छेद्यानां कपालानामपरिच्छेदकत्वात् परिच्छेदकत्वं च विना निरूपयितुमशक्यत्वात् न संख्यात्वेन व्यपदिश्यतइत्युक्तम्।ननु महासंख्यायामवान्तरसंख्याव्यपदेशाभावे सहस्रदर्शनेन शतानुमानं शतं ब्राह्मणाः सोमान् भक्षयन्तीति चोक्ते द्वादशैकैकमिति विभागकथनं सप्तमान्त्ये च चोदकनामधेययोर्विरोधे नामधेयबलीयस्त्वे सिद्धान्तिते गवामयनं तर्हि वैश्वानरो ज्योतिष्टोमं प्रायणीयमहर्भवति इति प्रथमस्याहो नामधेयबलीयस्त्वात् ज्योतिष्टोमविकारत्वेन ऽग्न्युपसत्त्वे प्राप्ते तस्य च मुख्यत्वात् तदनुरोधेनान्येषामपि ऽग्न्युपसत्त्वापत्तेर्द्वादशोपसत्त्वदर्शनं न युक्तमित्याशङ्क्य द्वादशसु तिसृणां भावात् सर्वेषामनुग्रहार्थं द्वादशोपसत्त्वस्य तन्न्याय्यत्वात् युक्तं तद्दर्शनमित्यभिधानं न युज्यतेत्याशङ्क्य * अर्थात्मनेत्युक्तं * वस्तुवचनो ऽर्थशब्दः महासंख्यापरिच्छेद्येभ्यः संख्येयेभ्यः कतिषु चिन्निष्कृष्यमाणेष्ववान्तरसंख्या वस्तुरूपेणास्त्येवेत्यर्थः। एवं तर्हि प्राप्तत्वान्नाष्टत्वादीनां विधेयत्वं सिध्येदित्याशङ्क्य * नासाविति्युक्तम् * अष्टसु कपालेषु संस्कृतमिति विग्रहवाक्यगतया सप्तम्याष्टत्वस्य संस्काराख्यक्रियाङ्गत्वप्रतितेस्तस्य च संस्कारसाधनीभूतकपालपरिच्छेदद्वारत्वात्तेषां च द्वादशत्वपरिच्छिन्नानामष्टत्वेन परिच्छेतुमशक्यत्वात् निर्द्धारणस्य गुणस्य क्रियासाधनत्वायोगात् नाष्टत्वादेर्द्वादशकपालपुरोडाशसंस्काराङ्गत्वेन प्राप्तिरस्तीत्याशयः। यथा कथं चित्प्राप्तिमभ्युपेत्यापि तद्धितसमासयोः सामर्थ्यापेक्षत्वात् विशेषणत्वं च विना सामर्थ्यायोगात् द्वादशान्तर्गतस्य चाष्टत्वादेः संख्यान्तराव्यावर्त्तकत्वाद्विशेषणत्वाऽसम्भवेनाष्टाकपालादिशब्दानुपपत्तिसूचनायाङ्गमिति वक्तव्ये * विशेषणमित्युक्तम् * श्लोकं व्याचष्टे * न हीति * निष्क्रियत्वेन संख्यायाः संस्कारसाधनभूतकपालपरिच्छेदनिरपेक्षायाः ३१२।१

संस्कारे व्यापाराभावान्नाङ्गत्वेन प्राप्तिरस्तीत्यर्थः । अप्राप्त्यर्थमेव संख्यापरिच्छेदकत्वं विना संख्यानिरूपणाशक्तेरसत्तुल्यत्वमविद्यमानताशब्देनोक्तं कति चिन्निष्कृष्याष्टावेतानीति परिच्छेदकत्वात् प्राप्तिसम्भवे ऽपि संस्कारसाधनीभूतद्वादशसंख्याकपालपरिच्छेदकत्वाभावान्नाष्टकपालादिव्यपदेशोपपत्तिरिति * यद्यपि चेत्यनेनोक्तम् * ननु द्वादशकपाले ऽप्यष्टौ कपालानि सन्ति अस्मिन्निति अष्टाकपालशब्दो न शक्यो वक्तुमित्याशङ्क्य * संस्कृतेत्युक्तम् * तत्रेत्यनुवर्त्तमाने संस्कृतं भक्षा इत्यनेनाष्टसु कपालेषु संस्कृतमित्यस्मिन्नर्थे संख्यापूर्वसमासत्वेन द्विगुसञ्ज्ञा दृष्टा कपालप्रातिपदिकाद्धितस्याण्प्रत्ययस्य द्विगोर्लुगनपत्यइति द्विगुपरतद्धितलुक्स्मरणेन लोपादष्टाकपालशब्दसिद्धिरित्याशयः । नन्वेवमपि समासवेलायां संस्कारकत्वस्योपाधेरभावात् संस्कारकाणामष्टत्वेनापरिच्छेद्यत्वे ऽपि केषां चिन्निष्कृष्टानां तत्परिच्छेद्यत्वेन समासोपपत्तिरधिकानामपि च संस्कारकत्वानपायात्तद्धितोपपत्तेरष्टाकपालशब्दो न विरुध्यतइत्याशङ्क्य * तद्धितार्थेत्युक्तम् * तद्धितार्थोत्तरपदसमाहारे चेति तद्धितार्थे विषयभूते दिक्संख्ययोः सामानाधिकरण्यसमासस्मृतेः संस्कारकत्वस्योपाधित्वावश्यायात् द्वादशत्वपरिच्छिन्नानां च संस्कारकाणामष्टत्वेन परिच्छेत्तुमशक्यत्वात् अष्टाकपालशब्दानुपपत्तिरित्याशयः । ननु द्वादशत्वपरिच्छेद्यसमुदायैकदेशभूतानि तानि कपालानि निष्कृष्याष्टत्वादिना परिच्छेतुं शक्यत एवेत्याशङ्क्याह *नो चेति* एकदेशभूतानामेकदेशान्तरसापेक्षत्वात्तद्धितसमासयोर्द्वयोरप्यनुपपत्तिः स्यादित्याशयः । द्वादशकपाले ऽष्टत्वाद्यभावाभिधानस्य प्रकृतोपयोगमाह * तेनेति * अष्टाकपालादिशब्देन द्वादशकपालसङ्कीर्त्तनस्यासत्त्वादित्यर्थः । नामधेयत्वपूर्वपक्षस्यानभिमतत्वद्योतनार्थं तदुपेक्षा अनेन चेतरथेति भाष्यमपि व्याख्यातं भवति। नन्वष्टाकपालादिशब्दैर्द्वादशकपालाऽनभिधानात्तत्प्ररोचनाऽसम्भवे ऽप्यष्टत्वादीनां द्वादशत्वान्तर्गतानां प्ररोचनार्था स्तुतिर्भविष्यतीत्याशङ्क्याह* न चेति * द्वादशकपालसाध्ये कर्मण्यष्टत्वादेर्द्वादशत्ववत् कपालपरिच्छेदकत्वाभावात् तद्वैलक्षण्येन च प्रकारान्तरेण संख्यायाः कर्मोपयोगासम्भवात् अनुपयोगिनः स्तुतिर्व्यर्था स्यादित्याशयः । अविभागादिति सूत्रे यदा त्वष्टत्वादिप्ररोचनार्था अनर्थका इत्यवगतमित्यनुभाषणार्थकथनपरभाष्यदर्शनादितरथेति भाष्यस्याप्ययमेवाशयो गम्यते एतच्च तत्सामर्थ्यमिति सूत्रावयवेन विधानएव साम-

१ संस्कारकत्वावतामतोधिकं २ पु० पा० ।

र्थ्यमित्यवधारणादर्थवादत्वे सत्यसामर्थ्यमित्यर्थादुक्तं भाष्यकृता व्याख्यातम्। नन्वष्टत्वादेः कर्मानुपयोगित्वात्स्वतः स्तुत्यनर्हत्वे द्वादशत्वस्तुत्यर्थं वेतसावकस्तुत्यर्थे वयं स्तुतिर्भविष्यतीत्याशङ्कानिरासार्थं न चेति भाष्यं व्याचष्टे * यद्यपि चेति * द्वादशकपालाष्टाकपालशब्दयोः पुरोडाशवाचित्वादष्टाकपालपुरोडाशस्तुत्या द्वादशकपालपुरोडाशस्तुतिरिह प्रतीयते न च गायत्र्याद्यक्षरसंख्यासामान्येनाष्टत्वादौ कपालविशेषणे स्तुते तद्द्वारा द्वादशत्वे स्तुते कपालाधारसंस्कारविशेष्यः पुरोडाशः स्तुतो भवतीत्यर्थः । अनेन च प्रत्यक्षा ह्यष्टानां कपालानां स्तुतिः परोक्षा द्वादशानां पुरोडाशस्य तु न कथं चिदित्येवं भाष्यं व्याख्यातम् । ननु संख्यास्तुत्या पुरोडाशस्तुत्यसम्भवे ऽपि द्वादशसंख्यैवाष्टादिसंख्या स्तोष्यतइत्याशङ्कानिरासार्थत्वेन प्रत्यक्षाभावे चेति भाष्यं द्वादशत्वस्यासाक्षात् सम्बन्धिस्तुत्यभावे ऽष्टत्वादिद्वाराङ्गीकार्या स्यात् तत्सद्भावात्तु परोक्षाङ्गीकरणं न युक्तमित्येवं व्याचष्टे * अपि चेति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * ननूत्पत्युत्पन्नशिष्ट्योर्विकल्पः पूर्वाधिकरणएव निरस्त इत्याशङ्क्याह * सर्व चेति * वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालो भवति त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो भवति विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालो भवति त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो भवति जगत्यैवास्मिन् पशून्दधाति यस्मिन् जातएतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीत्युपक्रमोपसंहारयोरेकजातेष्टिविषयत्वेनैकवाक्यत्वान्नोत्पत्युत्पन्नशिष्टरूपो विशेषो ऽस्तीत्यर्थः । एकवाक्यविहितानामपि संख्यानां समुच्चयायोगात् विकल्पो न विरुद्ध इत्याशयः । अनेन चैकवाक्यत्वाभिधानार्थत्वेन सौत्रं समाम्नाय पदं व्याख्यातं भवति न त्वावद्यानार्थो इत्यकारप्रश्लेषेण व्याख्याने तत्सामर्थ्यमिति तच्छब्देनाविधानस्यैव परामर्शापत्तेर्विधानसामर्थ्यमिति भाष्यकारीयं व्याख्यानं पूर्वापरविरुद्धमित्याशङ्क्याह * तत्सामर्थ्यमिति चेति * तत्रत्यपूर्वपक्षे विकल्पेन फलेन गुणविधिप्रतिज्ञानात् व्यवहितस्यापि योग्यत्वात्तच्छब्देन परामर्शो भाष्यकृता विधानशब्देन दर्शितो नैतत्सूत्रस्थस्येत्याशयः । योग्यत्वमेव विवृणोति * तदीयं हीति * प्रतिज्ञाध्याहारेण सूत्रं पूरयति * तस्मादिति * ये वैश्वदेवादिशब्दाः पूर्ववन्तो वाक्यान्तरेण गुणविशिष्टं कर्माणि पूर्वमुत्पन्ने तद्विरुद्धगुणान्तराभिधा-

यिनः ते स्ववाक्यस्थेन गुणेन निराकाङ्क्षे कर्मणि तद्विरुद्धगुणान्तराभिधानाशक्तेरविधानार्था अष्टाकपालादिशब्दानां तु सामाम्नायत्वात् सहोच्चारणत्वात् एकवाक्यगतत्वात् उत्पन्नाशिष्टत्वविशेषानवगमाद्यद्वैश्वदेवशब्दस्य पूर्वपक्षे सामर्थ्यं तदेषामस्ति यस्तूत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधस्तत्रोक्तः सो ऽत्र नास्तीति सूत्रार्थो ऽनेनोक्तो भवति ।

गुणस्यतु विधानार्थे ऽतद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्तास्ति ॥ १८ ॥

गुणविधानार्थत्वे ऽष्टाकपालादिशब्दानां बलाद्वाक्यभेदापत्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादीनां निवेशाशक्तेरतद्गुणेनानर्थक्यम् उपपादयितुं गुणस्येत्यादिभाष्यमकृते द्वादशत्वानवरुद्धे गुणविधौ गुणविशिष्टयागान्तरविधौ चानर्थक्याभावादयु-
३१३।२ क्तमाशङ्क्योपलक्षणार्थत्वेन व्याचष्टे * प्रकृतं इति * तथाशब्देन प्रकृताप्रकृतत्वे परामृष्टे गुणविशिष्टो 'यागश्चकारेणोक्तः । यागे तावत् त्रेधापि गुणविध्यसम्भवमुपपादयति * प्रकृत इति * द्रव्यदेवतासंयोगाश्रयणेन यागानुमानं निरस्तं द्रव्ये ऽपि प्रकृतयागसम्बन्धिनि दूरस्थयागसम्बन्धिन्यपूर्वयागसम्बन्धिनि वा गुणविधिस्त्रिविधो ऽपि यागे गुणविधिनिरासान्निरस्त इत्याह * एतेनेति * गुणविशिष्टद्रव्यविध्यसम्भवं प्रतिज्ञातमुपपादयितुं स्मारयति * तथेति * त्रेधापि प्रत्युक्तमित्यतिदेशार्थस्तथाशब्दः । प्रकृते तावद्यागे गुणविशिष्टद्रव्यविध्यसम्भवमुपपादयति * न हीति * यदाहवनीये जुहोतीतिवद्यजेतेति स्वशब्देनानुवादाभावाद् दूरस्थे ऽपि द्रव्यविधिर्न सम्भवतीत्याह * नापीति * नन्वेवमपि तर्हि स्वतन्त्रमेव गुणविशिष्टं द्रव्यं विधीयतामत आह * न चेति * न केवलमानर्थक्यापत्तेरविधानं किं त्वशक्यत्वादपीत्याह * नापीति * विध्यशक्तेरेव तदधीनफलकल्पनाशक्तेर्नाश्रुतफलकल्पनयानर्थक्यं परिहर्तुं शक्यमित्याह * अत इति * ननु वैश्वानरो ऽष्टाकपालो भवतीति वैश्वानरपदानुषङ्गेण द्रव्यदेवतासम्बन्धानुमितयागलाभाददृष्टाकपालादिपुरोडाशविशिष्टापूर्वयागविधिर्भविष्यतीति तृतीयं प्रकारमाशङ्क्याह * वैश्वानरपदमिति * पदोत्तरत्वेन श्लोकं व्याचष्टे * स्यादेतदिति * ननु स्तुतिरपि विधेयवैश्वानरयागविषयत्वान्न वैश्वानरपदानुषङ्गं विना युक्तेत्याशङ्क्याह * तदा चेति *

अनुवादस्य प्रमाणान्तराधीनत्वान्न शब्दव्यापारापेक्षेत्याशयः। अतस्त्रे-
धापि पुरोडाशविधानं न सम्भवतीत्युपसंहरति * तस्मादिति *
एवं प्रकृताप्रकृतापूर्वयागसम्बन्धितया त्रेधाप्यष्टाकपालादिपुरो-
डाशविधाने निरस्ते यदि कश्चित् प्रकृते द्वादशकपाले ऽष्टाकपा-
ले ऽष्टाकपालादिविधिमाशङ्कते तं प्रत्याह * न चेति * अयमा-
शयः। यथैवाष्टाकपालस्य यागाङ्गत्ववादिना वैश्वानरो ऽष्टाकपा-
ल इति विपरिणतवैश्वानरपदानुषङ्गो ऽङ्गीक्रियते तथैव द्वादशक-
पालो ऽष्टाकपाल इति विपरिणतद्वादशकपालपदानुषङ्गोऽङ्गीकार्यः। स च तद्देवाप्रमाणकः। तदभ्युपगमे ऽपि सामानाधिक-
रण्यनिर्देशेन पुरोडाशभेदानवगमात् द्वादशकपालाङ्गत्वेनाऽष्टाक-
पालादिशब्दैर्वैकल्पिकसंख्यान्तरविधानापत्तेस्तस्य च यागाङ्गत्ववाञ्छि-
द्धत्वान्नाशङ्का युक्तेति ननूत्पत्तिशिष्टद्वादशत्वावरोधान्नाष्टत्वादेः
प्रकृते यागे पुरोडाशे वा विधिः सम्भवतीति त्वयोक्तं तच्च सर्वस्यै-
कवाक्यत्वात्पूर्वपक्षिणा परिहृतमित्याशङ्क्याह * न चेति * वै- ३१४।१
श्वानरपदस्य द्वितीयान्तेन द्वादशकपालपदेन प्रथमान्तैश्चाष्टाकपाला-
दिपदैर्वैरूप्यापत्तेस्तन्त्रान्वययायोगात् श्रुतद्वितीयान्तद्वादशकपाल-
पदान्वयत्यागेनाष्टाकपालादिपदैरन्वयापत्तेर्द्वितीयान्तत्वेन परिणतै-
स्तन्त्रान्वयाभ्युपगमस्यात्यन्तायुक्तत्वात् वैश्वानरवाक्ये द्रव्यदेवता-
विशिष्टो यागो विधेयत्वेन प्रयोजनमितरेषु संख्येति प्रयोजनरूपार्थ-
भेदाद्विभागे च नैराकाङ्क्ष्याद् गुणविधिपक्षे बलाद्वाक्यभेदः प्रस-
ज्येतेत्याशयः। एकवाक्यत्वे चाऽष्टाकपालं नवकपालं दशकपाल-
मेकादशकपालं द्वादशकपालं वैश्वानरं कुर्यादिति समुदाये वाक्य-
समाप्त्या सर्वसंख्याविशिष्टैकभावनाविधिप्रतीतेर्वस्तुतः संख्यानां
समावेशायोगे ऽपि निरपेक्षसाधनत्वानवसायान्न विकल्पः स्यादि-
त्याह * यदि चेति * आख्यातगुणभावेनाष्टाकपालं वैश्वानरं कु-
र्यान्नवकपालं कुर्यादित्यादिप्रत्येकं वाक्यसमाप्त्ययोगान्न निरपेक्ष-
साधनत्वं वक्तुं शक्त्यमित्याह * अष्टत्वादीनां चेति * ननु समु-
च्चयेन तर्हि पूर्वपक्षो ऽस्त्वित्याशङ्क्याह * न चेति * तथा सति
पञ्चाशत्संख्यापत्तेरष्टत्वादीनां मध्ये न का चित्स्यादित्यर्थः। नन्व-
ष्टत्वादीनां द्वादशत्वान्तर्भूतानामेव समुच्चयोपपत्तेर्न संख्यान्तरोपज-
ननापत्तिरित्याशङ्क्याह * संख्यान्तरेति * अतो वैश्वदेवन्या-
येनेहाप्युत्पत्तिशिष्टेनोत्पन्नशिष्टबाधान्न गुणविधिः सम्भवती-
त्युपसंहरति * तेनेति * अपि चेति भाष्येणाष्टत्वादीनां प्रक-
रणगम्ययागाङ्गत्वबाधेन पुरोडाशैकवाक्यत्वावगमात् न यागाङ्ग-

त्वम् * सम्भवतीत्युक्तम् * तत्पूर्वेण पुनरुक्तमाशङ्क्य विविक्तविषयत्वं भाष्यद्वयस्याह * एवमिति * पूर्वेणोत्पत्तिशिष्टद्वादशत्वावरोधाद्यागस्याष्टत्वाद्यनाकाङ्क्षोक्ता अनेनाभ्युपगम्य यागाकाङ्क्षां वाक्येन पुरोडाशाङ्गत्वावसायान्न यागाङ्गतेत्युच्यते इति विवेकः । ननु पुरोडाशस्वरूपचिन्तायामानर्थक्यापत्तेरपूर्वसाधनांशलक्षणार्थं वाक्येन प्रकरणापेक्षणात् न विरोधो ऽस्तीत्याशङ्क्य * ऽष्टत्वादय इत्युक्तम् * द्वादशत्वावरुद्धपुरोडाशद्वाराष्टत्वादेर्यागाङ्गत्वायोगात् तन्नैरपेक्ष्येण यागाङ्गत्वं वाच्यम्।न च पुरोडाशमतिक्रम्याष्टत्वादयो यागान्वयं सहन्तइत्याशयः । सहेः कर्त्तरि क्तप्रत्यये परभूते ढोढ इति हकारस्य ढकारादेशे कृते झषस्तथोर्धो ध इति तकारस्य धत्वे ष्टुत्वे कृते ढोढे लोप इति पूर्वढकारे लुप्ते कृते सहिवहोरोदवर्णस्येत्यकारस्यौकारादेशात्सोढा इति रूपसिद्धिः । यागप्रकरणशब्दौ वैश्वानरयागविषयतयैकवाक्यत्वे च यागानङ्गत्वं हेतुतया व्याचष्टे * ते ऽपीति * कस्मिन्नर्थे पुरोडाशैकवाक्यत्वं हेतुरित्यपेक्षायां नैवेत्युक्तं कस्य प्रकरणमित्यपेक्षायां तच्छब्देन वैश्वानरयागः परामृष्टः भाष्यस्थं यागशब्दं वैश्वानरविषयं द्योतयितुं तस्येत्युक्तम् । वैश्वानरयागप्रकरणं बाधित्वा पुरोडाशैकवाक्यत्वान्नाष्टत्वादयः पुरोडाशान्वयानपेक्षाः वैश्वानरयागस्य भविष्यन्ति येनोत्पत्तिशिष्टेन द्वादशत्वेन भिन्नविषयतया विरोधाभावान्न बाधेरन्निति भाष्यार्थः । यागशब्देन च भाष्यकृता परार्थत्वाद् गुणानामिति पूर्वाधिकरणसूत्रगतेन परशब्देन निर्दिष्टो यागो ऽतद्गुणा इति तच्छब्देन परामृष्ट इति द्योतितम् यागानङ्गत्वे को दोष इत्याशङ्क्य प्रयोगे स्युरनर्थका इति सूत्रकृतोक्तं तद्व्याख्यानार्थं यागासम्बन्धे चेति भाष्यं व्याचष्टे * तथा चेति * पुरोडाशस्य यागाङ्गत्वात् तद्द्वारा ऽष्टत्वादेः पुरोडाशान्वये ऽपि फलवत्त्वोपपत्तेः फलाभावादित्ययुक्तमाशङ्क्य केवलेत्युक्तम्।यागाङ्गभूतस्य पुरोडाशस्य द्वादशत्वावरोधेनाष्टत्वाद्यन्वयायोगात् पुरोडाशास्वरूपान्वयो ऽष्टत्वादेर्वाच्यस्तत्र चानर्थक्यं स्यादित्याशयः।न हि तं प्रत्यर्थवत्तास्तीत्येतत्सूत्रावयवव्याख्यानार्थमपि पुरोडाशेति भाष्यमतद्गुणा इति तच्छब्दपरामृष्टयागान्यवाचिता नञा निर्दिष्टस्य पुरोडाशस्य तं प्रतीति तच्छब्देन परामर्शो ऽनेन भाष्येणोक्त इति सूचयितुं पूर्वेणैकीकृत्य व्याख्यातम्। न हीति सूत्रावयवः पुरोडाशेति भाष्येण कथं व्याख्यात इत्यपेक्षायामाह * न हीति * स्वयमन्यथा व्याचष्टे * अथ वेति * तच्छेषो नोपपद्यतइति चेदिति सूत्रापातानिकार्थमर्थ-

वादत्वेन त्विति भाष्यं तत्तु स्तुत्यर्थत्वेनोपपन्नत्वान्नानर्थकमित्यनेनार्थतो व्याख्यातत्वान्न व्याख्यातम् एतत्सूत्रार्थस्य चेतरथार्थवादाः सन्तो ऽनर्थकाः स्युरिति भाष्येण तत्सामर्थ्यमिति विशेषणाक्षिप्तस्योक्तत्वादिति यदुक्तमितिभाष्येणाभाषान्तंमतत्सूत्रमित्युक्ता विभागाद्विधानार्थं स्तुत्यर्थेनोपपद्येरन्निति सूत्रं परिहारार्थत्वेन भाष्यकृता पृथक् पठितमपि यदा त्विति भाष्यावयवेनाभाषासूत्रार्थस्य परिहारसूत्रार्थेन सहैकीकृत्य व्याख्यानात् स्वयमपि तथा व्याख्यातुमेकीकृत्य पठति * तच्छेष इति इति चादिति * पदद्वयं भाष्यकारेणापठितमपि वृत्त्यन्तरे दृष्ट्वाद्धार्त्तिककृता पठितं यदा त्विति भाष्यावयवेन पूर्वसूत्रगतगुणशब्दनिर्दिष्टाष्टत्वादिपरामर्शितं तच्छब्दमङ्गीकृत्याष्टत्वादिशेषो यदष्टाकपालो भवतीत्याद्यर्थवादो नोपपद्यत इति एवमाभाषासूत्रं व्याख्यातं तदष्टत्वादेर्भवतिपरेणाख्यातेन विहितस्य स्तुत्युपपत्तेरयुक्तमाशङ्क्याेपपादयति *अष्टत्वादीति* ३१५।१
उत्पत्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादेर्विधानानर्हत्वात् इयमष्टत्वादेः प्ररोचना सती व्यर्था स्यादित्यर्थः।तदेति भाष्यावयवेन विधानार्थे स्तुत्यर्थे नोपपद्येरन्निति परिहारसूत्रावयवं विधानविषयभूतद्वादशत्वस्तुत्यर्थेन यदष्टाकपालो भवतीत्यादयः शब्दा उपपद्यन्त इति एवं च व्याख्यातुं लक्षणयाष्टाकपालादिशब्दैर्द्वादशकपालस्तुतिरित्युक्तं तत्र लक्षणायां को हेतुः कथं चाष्टत्वादिना द्वादशत्वं लक्ष्यतइत्यपेक्षायामाह * तस्मादिति * अष्टत्वादिप्ररोचनावैयर्थ्यस्य हेतुत्वं तस्माच्छब्देनोक्तम्। अवयवावयविसम्बन्धस्य च लक्षणाबीजत्वमवयवद्वारमित्यनेनोक्तम्। एतदेव व्याचष्टे* यदिति * नन्वष्टाकपालादिशब्दानां द्वादशत्वान्तर्गताष्टत्वादिपरत्वं कथमवसेयमित्याशङ्क्यानिरासार्थत्वेनाविभागादिति सूत्रावयवव्याख्यानार्थं सन्ति हीति भाष्यं तात्पर्यतो व्याचष्टे * तदिति * सामीप्यवाच्यविभागशब्द इत्याशयः। ननु गायत्र्यादिशब्दैः संख्यासाम्येनाष्टत्वादिषु स्तुतिप्रतीतेः कथं द्वादशकपालस्तुतिरित्युक्तमित्याशङ्क्याष्टत्वाद्येवात्र द्वादशत्वस्तुत्यर्थं स्तूयतइति अत इति भाष्येणोक्ता कथमवयवस्तुत्यावयवी स्तुतो भवतीत्याशङ्क्यानिरासार्थं यथेति भाष्ये दृष्टान्ताभिधानं कृतं तत्तात्पर्यतो व्याचष्टे * एकदेशेति * ननु चक्रावयवत्वान्नेम्यादेस्तत्स्तुत्यावयविनः स्तुतिर्युक्ता संख्यानां त्ववयवावयविभावाभावान्नाष्टत्वादिस्तुत्या द्वादशत्वं स्तुतं भवतीत्याशङ्क्यावयवावयविभावाभावे ऽप्येकदेशैकदेशिभावेन

१ उपपन्नतरत्वादिति २ पु० पा०।

समुदायिहस्त्यादिस्तुत्या समुदायसेनास्तुतिदर्शनात् संख्यानामपि चैकदेशैकदेशिभावप्रसिद्धेरष्टत्वाद्येकदेशस्तुत्यैकदेशिनीद्वादशत्वसङ्ख्या स्तुता भवतीति प्रतिपादनार्थत्वं द्वितीयदृष्टान्ताभिधानस्य सूचयितुमेकदेशैकदेशिशब्दौ तस्मादित्युपसंहारभाष्यं कीदृशी स्तुतिरित्यज्ञानाद्वचाचष्टे * तेनेति * यच्च प्रत्यक्षाभावे त्वपरोक्षः स्यादिति पूर्वपक्षभाष्येण द्वादशत्वस्य प्रत्यक्षरूपात्मीयस्तुतिसद्भावात् परोक्षाष्टत्वादिद्वारा स्तुत्यङ्गीकरणमयुक्तं तत्परिहारार्थत्वेनाप्येतदेव भाष्यं पूर्वोक्तानुभाषणपूर्वकं व्याचष्टे * यत्विति * प्रत्यक्षपरोक्षस्तुतीनां प्रत्येकं ग्रहणे सति प्रत्यक्षयैव नैराकाङ्क्ष्यात् परोक्षाश्रयणमयुक्तं स्यात् तासां तु यस्मिन् जातएतामिष्टिं निर्वपति स पूत एव तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवतीति प्राशस्त्यप्रतिपादनोपपादकतया सर्वासां युगपत् ग्रहणान्नैकया नैराकाङ्क्ष्यमिति वक्तुम् * ऐकरूप्येणेत्युक्तम् * अल्पयैव स्तुत्या प्ररोचनोपपत्तौ महती स्तुतिरनर्थिकेत्याशङ्कानिरासायापरिमाणत्वादित्युक्तम् । अनियतपरिमाणत्वमेवोपपादयति * सर्वत्रेति *

कारणं स्यादिति चेत् ॥ २० ॥

स्वयं तावत्सूत्रं व्याचष्टे * जनकत्वेनेति * भाष्यकारीयं व्याख्यानमुपपादयति * तेषामिति * फलस्य साधनविषयप्रवृत्तिहेतुत्वात् साधनं प्रति कारयितृतास्तीत्याशयः । किमेवमिति भाष्येण किमर्थं कारणत्वाभिधानमिति पृष्ट्वा पुरोडाशस्येत्यादिनोक्तदोषपरिहाराय गुणफलसम्बन्धिरूपपूर्वपक्षान्तरप्रदर्शनार्थमेतत्सूत्रमित्युक्तम्।तत्प्रपञ्चयितुमाह* यदुक्तमिति*काम्यस्याप्युपन्नशिष्टस्योत्पत्तिशिष्टबाधकत्वं कथमित्याशङ्क्य नैमित्तिके तु प्रकृतौ तद्विकारः सम्प्रयोगविशेषादिति तृतीयाधिकरणवक्ष्यमाणन्यायमाह
३१६।१ * तथा हीति * अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्र सन्दिग्धमाराद्विशेषाशिष्टं स्यादिति दशमाधिकरणन्यायेन नापि काम्यं नित्यस्य बाधकमित्याह * विशेषतश्चेति * जातेष्टिप्रयोगमात्रविषयत्वात् सामान्यरूपे द्वादशत्वे प्राप्ते ब्रह्मवर्चसकामादिप्रयोगविशेषविषयत्वेनाष्टत्वादेः प्रवर्त्तनादित्यर्थः । पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति षष्ठाधिकरणन्यायेनाप्येवमित्याह * पूर्वेति * उत्पत्तिशिष्टत्वात् पूर्वं प्राप्ते द्वादशत्वे ऽष्टत्वादेरुत्पन्नकर्माश्रयत्वेन पश्चात्प्रवर्त्तनादित्यर्थः । तार्तीयं न्यायं विवृणोति * पुरुषार्थेति *

काम्यस्य नित्यबाधकत्वे ऽयमेव मुख्यो न्यायः सम्भवमात्रेण तु न्यायान्तरोपन्यासस्तत्रेति सूचयितुमस्यैव विवरणगुणफलसम्बन्धविधानोपपादनफलमानर्थक्यपरिहारमुपसंहरति * तस्मादिति * ननु भवतीति वर्त्तमानापदेशसान्दिग्धस्य पञ्चमलकारतया विधित्वनिर्णयः स्तुत्यन्वयान्यथानुपपत्त्यधीना गायत्र्यैवैनमित्यादेस्तुत्यभावेनास्य विधित्वनिर्णयाशक्तेर्गुणफलसम्बन्धविधिर्न युज्येतेत्याशङ्कते * ननु चेति * विध्यभावे ऽपि समभिव्याहारादेव गुणफलसम्बन्धः सेत्स्यतीति केषां चित्परिहारमुपन्यासपूर्वकं दूषयति * तत्रेति * स्वमतेन परिहरति * अतो ऽयमिति * श्लोकं व्याचष्टे * यदिति *

आनर्थक्यादकारणे कर्त्तुर्हि कारणानि गुणार्थे हि विधीयते ॥ २१ ॥

गुणफलसम्बन्धविधौ स्तुत्यर्थत्वायोगादेकोपक्रमोपसंहाररूपत्वेन एकवाक्यत्वं प्रतीयमानं बाध्येतेत्यानर्थक्यादकारणमिति सूत्रावयवव्याख्यानार्थं यदीति भाष्यं व्याचष्टे * वाक्यानीति * श्लोकं व्याचष्टे * पुत्र इति * तस्येति भाष्यावयवं यद्यष्टत्वादयो न सम्बन्ध्येरन्ततो वाक्यान्तरत्वं स्यात् स्तुत्यर्थत्वेन सम्बन्धोपपत्तेर्न वाक्यान्तरता युक्तेति व्यवधारणकल्पनया व्याख्यातुमाह * तावतीति चेति * ननूपक्रमोपसंहारपर्यालोचनयैकवाक्यत्वे सति सर्वसंख्यानामुत्पत्तिशिष्टत्वाविशेषेण बलाबलविशेषाभावादाद्यपूर्वपक्षनिरासो न युक्तः स्यादित्याशङ्क्याह* तदिति * तस्मिन्नपि पक्षे न चाष्टत्वादीनां द्वादशकपालेनैकवाक्यता तवोपपद्यतइत्यादिनैकवाक्यस्य निरस्तत्वादिति भावः। अनेन च गुणफलसम्बन्धविधिपक्षे वाक्यभेदापादनेन गुणफलसम्बन्धविधौ गम्यमानैकार्थ्याभावप्रसङ्गादित्येवमानर्थक्यादिति सूत्रावयवो योजितो भवतीत्याह * अर्थान्तरेति * स्तुत्या विनैकवाक्यता कस्मान्नोपपद्यतइत्यपेक्षितस्य ग्रन्थस्य तदुपपादनार्थत्वेनान्वयप्रतीतेरानर्थक्यादित्यस्यार्थैक्याभावप्रसङ्गादित्यर्थावसायादेवं व्याख्यातं यथाश्रुतस्यानन्वयापत्तेः। एवं च गुणफलसम्बन्धविधौ वाक्यभेदापादनस्य सूत्रारूढतोक्ता भवति स्तुत्यर्थत्वानभ्युपगमे ऽर्थान्तरस्यासम्भवादानर्थक्यमेवावशिष्यतइत्यभिधानार्थेनैवानेन सूत्रावयवेनार्थान्तरपरत्वे वाक्यभेदप्रसङ्गाख्यं दूषणान्तरमप्युपलक्षितं भाष्यकृता ३१७।१

विवृतं स्वरूपार्थस्तु यद्यर्थवादा अपीत्यनेन वक्ष्यते अस्मिन्पक्षे ऽर्थान्तरेति ग्रन्थो लिङ्गात् स्वातन्त्र्येणानर्थक्यादिति सूत्रावयवयोजनार्थो यथाश्रुत एव भवति । ननु गुणफलसम्बन्धविधानेनाप्यर्थवत्त्वोपपत्तेः कथमानर्थक्यापत्तिरित्याशङ्क्यानिरासार्थं कर्तुर्हि कारणानीति सूत्रावयवं व्यवधारणकल्पनया व्याचष्टे * यदि हीति * गोदोहनेन पशुकामस्य प्रणयोदितिवत् पूतत्वकामस्याष्टाकपालो भवतीति श्रवणे सति कामिनः कर्तुः काम्यमानतया सम्बन्धीनि सन्ति पूतत्वादीनि फलत्वात्कर्तुः प्रवृत्तिकारणानि स्युस्तेषां तु यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स्स इत्यादिसमभिव्याहाराद्वैश्वानरेष्टिमात्रसम्बन्धित्वप्रतीतेः कामिपदनिरपेक्षसमभिव्याहारमात्रप्रमाणकत्वस्य च साध्यत्वस्य पर्णमय्यधिकरणे निराकरिष्यमाणत्वात् फलाभावेन कर्तृप्रवृत्तिकारणत्वं नास्तीति भाष्यानुसारात्सूत्रावयवोऽनेन योजितः । अष्टत्वादौ कारणशब्देन विवक्षिते यद्यष्टाकपालं कुर्यादिति कर्तुः प्रवृत्तिविषयतयाष्टत्वादीनि सम्बन्धीनि स्युस्तत समीहितसाधनत्वं विना प्रवृत्तिविषयत्वायोगात् उत्पत्तिशिष्टद्रादशावरुद्धवैश्वानरयागोपकारसाधनत्वस्यासम्भवाद्रात्रिसत्रन्यायेनार्थवादावगतानि पूतत्वादीनि प्रवृत्तिजनकानि स्युः । विध्यश्रवणेन त्वेषां समाहितसाधनत्वाप्रतीतेः समभिव्याहारमात्रकल्पस्य साधनत्वस्यौदुम्बराधिकरणे निरस्तत्वात् न पूतत्वादीनि प्रति कारणतास्तीति योज्यः । ननु पूतत्वादेः फलत्वाभावे किमर्थं कार्त्तनामित्याशङ्क्यानिरासार्थं गुणार्थो हीति सूत्रावयवं व्याचष्टे * तस्मादिति * निपातानामनेकार्थत्वात्तस्माच्छब्दार्थे हि शब्दव्याख्यानार्थं तस्मादित्युक्त्वा तद्व्याख्यानायान्यस्यार्थान्तरस्यासम्भवादित्युक्तम् । स्तुतिविषयत्वेन गुणशब्दं व्याख्यातुं स्तुत्यर्थ इत्युक्तम् । इतिशब्दः पूर्वोक्तस्तुतिप्रकारपरामर्शार्थः । यस्मादन्यो ऽर्थो न सम्भवति तस्मादुक्तप्रकारस्तुतिरूपो ऽर्थः पूत एवेत्यादिभिर्ज्ञाप्यतइत्यर्थः । अनेन च स एष इतिभाष्यगतस्य तच्छब्दस्य स्तुत्यर्थेनोपपद्येरन्निति एतत्सूत्रोक्तस्तुतिरूपार्थपरामर्शकत्वात् सौत्रगुणशब्दव्याख्यानार्थत्वमेतच्छब्दस्य च पूर्वोक्तावयवद्वारत्वरूपस्तुतिप्रकारपरामर्शकत्वं सूचितम् अविधीयते वैश्यानरयाग इति भाष्यावयवेन सौत्रो हिशब्दः प्रसिद्धार्थवाचित्वात् वैश्वानरेष्टेश्च पूर्वविहितत्वेन प्रसिद्धत्वादष्टत्वादेः स्तुतिसम्बन्धे सति विधेयत्वापत्तेस्तन्निरासार्थं पूतत्वादेर्वैश्वानरेष्टिविषयत्वाभिधानार्थतया व्याख्यातस्तदुपपादयितुमाह * पू-

१ प्रतीति २ पु० पा० ।

त इति* यत्तदोरेकविषयत्वाद्यस्मिन् जात एताम् इष्टिं निर्वपेदिति स पूत इति पूतत्वादीनां जातेष्ट्यन्वयप्रतीतिर्नाष्टत्वाद्यन्वयो ऽस्तीत्यर्थः। नन्विष्टेर्नैमित्तिकत्वेन फलानपेक्षतया पूतत्वाद्यन्वययायोगाद् गुणफलसम्बन्धविधानायाष्टत्वाद्यन्वयः कल्पयिष्यते ऽत आह * न चेति*स्तुत्यर्थेनेष्टान्वयोपपत्तेर्नाप्रतीयमानाष्टत्वान्वयकल्पना युक्तेति भावः। पूतत्वादीनां च पूत एव स इति तच्छब्दानिर्दिष्टैकपुत्रविषयत्वेन समुच्चयप्रतीतिर्व्यवस्थितत्वादष्टत्वादिफलत्वं न सम्भवतीत्याह * न चेति * नन्वेवं सत्येकैकस्याष्टत्वादेः फलपञ्चकं भविष्यतीत्याशङ्क्य निरासार्थं ब्रह्मवर्चसादीनामित्युक्तम्। गायत्र्यैवैनं ब्रह्मवर्चसेन पुनातीत्यादिवाक्यवशेनाष्टत्वादीनां व्यवस्थितफलत्वावगमात् समुच्चयो न युक्त इत्याशयः। यो ऽष्टत्वादीनां गुणानां ब्रह्मवर्चसादीनां च स्तवनानाम् एभिः पूतत्वादिभिर्विभागेन सम्बन्धो ऽपेक्षितः स न प्रतीयतइत्यर्थः। नन्वेवं तर्हि गायत्र्यैवैनमित्यादिभिरेव विभागेन फलसम्बन्धः करिष्यतइत्याशङ्क्याह * यत्र त्विति * स्तुत्यभावे विध्यभावोपपत्तेरित्याशयः। ननु चतुर्थे फलसंयोगस्त्वचोदितेन स्यादशेषभूतत्वादित्यत्रैतदेव वाक्यमुदाहृत्य किमियं वैश्वानरेष्टिरात्मगामिफलप्रयुक्ता पुत्रगामिफलप्रयुक्ता वेति सन्दिह्याधानगतात्मनेपदपर्यालोचनयात्मगामिफलप्रयुक्तत्वे प्राप्ते यस्मिन् जातएतामिष्टिं निर्वपति पूत एव स इति फलवचनस्य पुत्रशेषत्वावगते पितृशेषत्वाभावात्फलभागित्वेनाचोदिते पितरि फलसंयोगो न स्यादिति पूतत्वादीनां पुत्रगामिफलत्वस्य वक्ष्यमाणत्वात्फलसम्बन्धापन्हवो न युक्त इत्याह *अत इति* रात्रिसत्रन्यायेनार्थवादत्वेनोपयुक्तानां पूतादिफलवचनानां परावर्त्य फलपरत्वकल्पने ऽप्यष्टत्वादीन् प्रति फलं नास्तीत्यर्थः। फलपरत्वे सतीह स्तुतित्वाभिधानं विरुध्येतेत्याशङ्क्याह * प्रथमेति * नन्वेवं पूतादिपदैरेव स्तुतिसिद्धेर्यदष्टाकपाल इत्यादीनां गुणफलसम्बन्धाविधित्वानङ्गीकरणे सत्यानर्थक्यं स्यादित्याशङ्क्यानिरासार्थं तेन चेत्यादिभाष्यं व्याचष्टे * एतैरेवेति * नन्वेवं सति स्तुत्यर्थवत्त्वोपपत्तेरानर्थक्याभिधानं न युक्तमित्याशङ्क्यार्थवादत्वानभ्युपगमेन गुणफलसम्बन्धविधिपरत्वाभ्युपगमे तदसम्भवादानर्थक्यमापद्येतेत्येवमानर्थक्यपदव्याख्यानार्थं ततः कामायेति भाष्यम् अर्थान्तरपरतायामित्यनेनैव व्याख्यातत्वात् तस्मादिति चाकारणपदव्याख्यानार्थं पूर्वसूत्रगतकारणपदव्याख्यानार्थभाष्यव्याख्यानेन तेषां कारयितृत्वाद्वेत्यनेनैव व्याख्यातत्वान्नेह व्याख्यातम्। तस्मादित्यर्थवादत्वोपसंहा-

रभाष्यमर्थवादविचारस्येहासङ्गतत्वेन गुणविधित्वसम्भवासम्भव-मात्रविचारस्याधिकरणार्थत्वात् अयुक्तमित्याशङ्क्य गुणविधित्वासम्भवोपसंहारपरतया व्याचष्टे * तस्मादिति *

॥ अथ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम् ॥ १२ ॥

तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया ॥ २२ ॥

अत्र भाष्यकृता यजमानः प्रस्तर इत्यादूयुदाहृत्य विध्यर्थवादचिन्ता सा तावत् पूर्ववदेवासङ्गता गुणविधिसम्भवासम्भवचिन्ताप्येवंविधेषु विधिप्रत्ययशून्येषु सम्भवविध्यन्तरैकवाक्यत्वेनौदुम्बराधिकरणएव विधित्वाशङ्काया निरस्तत्वात् । अयुक्ता पूर्वाधिकरणे त्वौदुम्बराधिकरणपूर्वपक्षन्यायेन विधित्वमङ्गीकृत्य वैश्वदेवाधिकरणोक्तस्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्याष्टत्वादेर्विषयो भवति न वेति चिन्तितम् । इह त्वङ्गीकृत्य विधित्वं चिन्तान्तराभावान्न कृत्वाचिन्तान्यायः सम्भवति । न चार्थवादत्वाभिधाने विधित्वनिरासे वैतत्सूत्रं समर्थम् । तत्सिद्ध्यादीनां गुणवादनिमित्तत्वाभिधानमात्रप्रतीतेस्तदभिधानमपि यदि निमित्तासम्भवेन गुणवादासम्भवशङ्कानिरासार्थं ततो रूपात्प्रायादित्यादिना यथासम्भवगुणवादनिमित्तानामुक्तत्वादनर्थकम् । लक्षणासम्भवेन तु गुणवादासम्भवशङ्का गौणमुख्याधिकरणे स्वाभिधेयलक्ष्यमाणगुणयोगनिमित्तलक्षणाया गौण्या वृत्तेः साधयिष्यमाणत्वादयुक्ता । अथ तत्र प्रकृतगौणमुख्यविषयमन्त्रविनियोगविचारसिद्ध्यर्थं गौणवृत्तिसद्भावप्रतिपादनान्न लक्षणविशेषाभिधाने तात्पर्यम् । इह तु प्रसिद्धार्थत्यागेनाप्रासिद्धतद्गुणवृत्तिन्वलक्षणे गौणत्वे स्वार्थत्यागेन वेदाप्रामाण्यापत्तेः । समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे समुदायानित्यत्वेन शब्दार्थसम्बन्धस्यानित्यत्वापत्त्या वेदाप्रामाण्यापत्तेरारोपितार्थवृत्तित्वलक्षणस्य च गौणत्वस्यारोपकपुरुषाभावाद्भेदे ऽनुपपत्तेरेतल्लक्षणत्रयनिरासेन गुणयोगनिमित्तवृत्तित्वलक्षणप्रतिपादनार्थं तत्सिद्ध्यादीनां निमित्तत्वाभिधानमित्युच्यते ततो गुणवादसूत्रानन्तरमेवैतत्सूत्रं कार्यं गौणवृत्तित्वलक्षणाभिधानार्थे चास्मिन्सूत्रे सति कथं भाष्यकारीया विध्यर्थवादचिन्ता सम्बध्येतेत्याशङ्कासप्तकं निराकर्तुमाह * अर्थवादेति * विध्यर्थवादचिन्तायाः प्रकरणासङ्गतत्वम् विधित्वशङ्कानिरासस्य चौदुम्बराधिकरणेन गतत्वम् । सूत्रस्य च

तदभिधानात्सामर्थ्यं तादर्थ्यानभ्युपगमेनैव परिहृतम्। गुणवादासम्भवाशङ्कानिरासार्थत्वेनाभ्युपगमोऽपि लक्षणशब्देनोक्तः। नात्र गुणवादस्तस्य वा निमित्तमभिधीयते येन गौणमुख्याधिकरणेन रूपात् प्रायादित्यादिना वा गतार्थत्वं स्यात् किं तु गुणवादस्य तत्सिद्ध्यादिनिमित्ताभिधानद्वारेण लक्षणमभिधीयते। गुणशब्देन गौणवृत्त्यभिधानादाश्रयशब्देन च निमित्ताभिधानात्तत्सिद्ध्यादयो गौण्या वृत्तेर्निमित्तमित्युक्ते यस्यां वृत्तौ ते निमित्तं सागौणी वृत्तिरित्यर्थात् प्रतीते च निमित्ते गुणयोगनिमित्तायां च वृत्तौ तेषां निमित्तत्वाद् गुणयोगनिमित्तवृत्तित्वमेव गौण्या वृत्तेर्लक्षणमित्यवसीयतइत्याशयः। गुणवादसूत्रानन्तराभिधेयत्वशङ्कानिवृत्त्यर्थं तत्र नोक्तमित्युक्तम्। अर्थवादवत् श्येनचितं चिन्वीत नेन्द्रसश्चसि दाशुषे मासमग्निहोत्रं जुहूवतीत्यादिषु विधिमन्त्रनामधेयेष्वपि श्येनेन्द्राग्निहोत्रादिशब्दानां गौणत्वदर्शनात् सर्वधारण्यसूचनाय सर्वोपयोगव्युत्पादनानन्तरमेव गौणवृत्तिलक्षणाभिधानं युक्तमित्याशयः। सूत्रस्य गौणवृत्तिलक्षणार्थत्वे विध्यर्थवादविचारासम्बद्धत्वशङ्कानिवृत्त्यर्थम्*अर्थवादेत्युक्तम् * सूत्रकृतो प्रसक्ताभिधायित्वपरिहाराय लक्षणाभिधानस्य प्रसङ्गसिद्ध्यर्थं विध्यर्थवादचिन्तयोपक्रान्तम् यथाकृतिसङ्गावेऽपि प्रतिपिपादयिषितेयं गौरित्यस्य शब्दस्य को ऽर्थ इति वाच्यत्वमुखेनोपक्रान्तमित्यर्थः। कथमर्थवादत्वोक्त्या गौणवृत्तिलक्षणाभिधानस्य प्रसङ्गो भवतीत्यपेक्षायां तदुपकारीत्युक्तम्। पूर्वाधिकरणस्य गुणविधिसम्भवासम्भवचिन्तार्थत्वेनार्थवादत्वाभिधाने तात्पर्याभावात् पूर्वाधिकरणोक्तार्थवादप्रसङ्गेनानन्तरसङ्गतिरनाशङ्कनीया। ननु निमित्ताभिधानद्वारेण चेदनेन सूत्रेण लक्षणमुच्यते ततो रूपात्प्रायादित्यादिभिरपि सूत्रैर्निमित्ताभिधानद्वारेण लक्षणज्ञानसिद्धेरनर्थकमिदं सूत्रं स्यादित्याशङ्क्य * ननु चेति * रूपप्रायेति वक्तव्ये विभक्तिनिर्देशः प्रदेशविशेषज्ञापनार्थः इति गुणाश्रया इति प्रकारवाचिनेतिकरणेन तत्सिद्ध्यादिप्रकाराणि गुणवादनिमित्तानीत्याभिधानात् प्रकारस्य च व्यवच्छेदकत्वेन लक्षणत्वाद्यथा तत्सिद्ध्यादेर्गौणवृत्तिनिमित्तलक्षणत्वेनाभिधानं नैवं रूपादेः किन्तु स्तेनं मन इत्याद्युदाहृतार्थवादगतगुणवाद्याख्यलक्ष्यविषयस्य किंनिमित्तोऽयं गुणवाद इत्येवंविधस्य व्यवहारस्य सिद्ध्यर्थमिह सिद्धं सारूप्यशब्देन रूपस्य निमित्तत्वं भूमशब्देन च प्रायभूयस्त्वयोर्निमित्तत्वं प्रशंसाशब्देन च दूरस्थपराधनिमित्तदुर्ज्ञानत्वादेः सुकरस्य प्रशस्तत्वात् दक्षरस्य तदभावात्मकत्वान्निमित्तत्वं तत्र नीतामिति परिहरति * स

त्यमिति * उदाहृतशब्देन रूपादेः सर्वगुणवादाव्यापकत्वादपि लक्षणत्वं नास्तीति सूचितम् । ननु यदष्टाकपाल इत्यादौ तत्सिद्ध्यादेरभावेनाव्यापकत्वादलक्षणं स्यादिति शङ्कां सर्वशब्देन निरस्यन्निति करणेन प्रकारवाचिना तत्सिद्ध्यादीनां निमित्तं लक्षणेनोक्तामिति व्यतिरेकमाह * अत्र त्विति * अष्टत्वादेरपि द्वादशत्वपरिच्छेद्यानां कपालानां मध्ये कति चिन्निष्कृष्याष्टावेतानीत्यादिसंख्येयपरिच्छेदकत्वेन द्वादशत्वकार्यकरत्वोपपत्तेरष्टाकपालादिशब्देन तत्सिद्धिसद्भावादन्यत्रापि च यथासम्भवं तत्सिद्ध्यादिषट्कमध्ये कस्य चिन्निमित्तस्योहितुं शक्यत्वान्नाव्यापकतेत्याशयः । ननु सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावे ऽपि तद्भावुपचार इति सूत्रेण यष्टीः प्रवेशयेति सहचरणात् ब्राह्मणेषु यष्टिशब्दस्य मञ्चाः क्रोशन्तीति स्थानात्पुरुषेषु मञ्चशब्दस्य कटं च्छिनत्तीति तादर्थ्यद्वारेण कटशब्दस्य यमो ऽयं राजेति वृत्तात् राज्ञि यमशब्दस्य आढकमश्नातीति मानात् सक्तुष्वाढकशब्दस्य तुलयानुलिम्पतीति धारणाच्चन्दने तुलाशब्दस्य गङ्गायां घोष इति सामीप्यात्तीरे गङ्गाशब्दस्य नीलः शाटक इति योगाच्छाटके नीलशब्दसामानाधिकरण्यस्य अन्नं बलमिति साधनाद् बले ऽन्नशब्दसामानाधिकरण्यस्य अयं पुरुषः कुलमित्याधिपत्यात्कुले पुरुषशब्दसामानाधिकरण्यस्य प्रयोग इति वदद्भिर्नैयायिकादिभिरन्येषामपि गौणवृत्तिनिमित्तानामुक्तत्वान्न षट्कस्यापि सर्वगौणवृत्तिव्यापकतेत्याशङ्क्य ते * ननु चेति * न चैतत् तार्किकस्थितिमात्रं लोके ऽपि दर्शनादित्याह *लोके चेति * लक्षणार्थे च निमित्ताभिधाने व्यापकत्वाच्च सर्वाण्युपसंहार्याणीत्याह * तानीति * परमतेन परिहरति * लिङ्गेति * एवं तु सृष्टिशब्दे ऽपि सृष्टिसञ्ज्ञेष्टकासमवायेनेतरेष्टकाप्रतीत्युपपत्तेर्भूम्नो ऽप्यवाचकत्वापत्तेर्भूयो ऽल्पत्वप्रतीतिवैलक्षण्याद्वा भेदेनोपन्यासे ऽत्रापि साहचर्यादिप्रतीतिवैलक्षण्यात् पृथगुपन्यासापत्तेरपरितोषात् परिहारान्तरमाह * अथ वेति * जहत्स्वार्थाभिधायित्वलक्षणे समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे ऽध्यारोपितार्थवृत्तित्वलक्षणे वा गौणत्वे वेदे तदसम्भवेनाप्रामाण्यापत्तेस्तन्निरासेन लक्ष्यमाणगुणयोगवृत्तित्वलक्षणज्ञापनायैतन्निमित्ताऽभिधानम् । लक्षणावृत्तौ तु वेदाप्रामाण्यापादकस्य लक्षणस्य कैश्चिदनुक्तत्वेन वेदप्रामाण्यविरोधिलक्षणज्ञापनार्थेन निमित्ताभिधानेनोपयोगाभावात्साहचर्यादीनां च लक्षणावृत्तिनिमित्तत्वान्नेहाभिधानमिति भावः । न-

नूभयत्र परशब्दस्य परत्र वृत्तेस्तुल्यत्वान्नानयोः शब्दवृत्त्योर्भेदो ऽस्तीत्याशयेन पृच्छति * किं चेति * लक्षणभेदाशयेनोत्तरमाह * बाढमिति * प्रश्नपूर्वकं लक्षणभेदमाह * कुत इति * अभिधेयसम्बन्धित्वरूपापरित्यागप्रदर्शनार्थो ऽभिधेयाविनाभूतशब्दः गौण्यां तु वृत्तावभिधेयसिंहादिसम्बन्धित्वरूपानादरेण तल्लक्षितप्रसह्यकारित्वादिगुणयोगमात्रादरसूचनायाभिधेयस्य गुणलक्षणायां व्यापारे ऽप्यनुपादानम् । ननु लक्षणायामविनाभावापेक्षणे यष्ट्यादेः पुरुषाविनाभावाभावात् न यष्ट्यादिशब्दे लक्षणा स्यात् इत्याशङ्क्याह * तद्धेति * अयमाशयः नात्र लक्षणाहेतुत्वेनाविनाभावोपादानं तस्याः सम्बन्धमात्रेण शब्दतात्पर्यवशादुपपत्तेः। न चात्र लक्षकस्याभिधेयस्य लक्ष्येणाविनाभावो ऽग्निनेव धूमस्योक्तः विपरीताभिधानात् । किं त्वभिधेयसम्बन्धित्वरूपादरप्रदर्शनार्थं यष्ट्यादिशब्दानामपि चाभिधेययष्ट्यादिसम्बन्धित्वानादरेण पुरुषस्वरूपे प्रवृत्त्यभावेनाभिधेयाविनाभूतप्रवृत्तित्वाविघातात् सम्बन्धमात्रस्य च लक्षणाहेतोर्भावाद् युक्तैव लक्षणया प्रवृत्तिरिति । ननु सम्बन्धमात्रेण लक्षणोपपत्तावग्न्यादिशब्दानामपि अभिधेयाग्न्यादिसम्बद्धपैङ्गल्यादिसम्बन्धेन लक्षितलक्षणया माणवकादौ प्रवृत्त्युपपत्तेर्गौणत्वाख्यवृत्त्यङ्गीकरणं न युक्तमित्याशङ्क्याह * अग्निरिति* लक्षणाहेतुसम्बन्धसद्भावे ऽप्यविनाभावशब्दोक्ताभिधेयसम्बन्धिस्वरूपादराभावान्न लक्षणात्वप्रसिद्धिरभियुक्तानामित्याशयः । अभिधेयसम्बन्धित्वरूपानादरमेव प्रश्नपूर्वकमुपपादयन्नाह *किं तर्हीति* लक्षणोपायमात्रत्वेनाभिधेयस्यावस्थानं सूचयितुम् * वन्हित्वलक्षितादित्युक्तम् * सादृश्यसामान्यापेक्षत्वादग्निसम्बन्धानपेक्षपैङ्गल्यादिस्वरूपमात्रयोगान्माणवके ऽग्निशब्दप्रवृत्तिरिति सादृश्यशब्देनोक्तम् । नन्वत्र लक्षणानिमित्तानभिधाने भूमलिङ्गसमवाययोरभिधेयसम्बन्धादरेण लक्षणानिमित्तत्वात् उपन्यासो न युक्त इत्याशङ्क्याह * सर्वत्र चेति * वस्तुतस्तयोर्लक्षणानिमित्तत्वे ऽप्यभिधेयसृष्ट्यादिसमुदायिलक्ष्यमाणसमुदायाख्यगुणयोगात् समुदायान्तरे सृष्ट्यादिशब्दवृत्तेर्गौणत्वसम्भवात् जहत्स्वार्थवृत्त्यादिलक्षणशङ्कायां वेदाप्रामाण्यापत्तेस्तन्निरासायाऽप्युपगम्य गौणत्वं तन्निमित्तत्वेनेहोपन्यास इत्याशयः। प्रस्तरप्रभृतौ तत्सिद्धिकरादौ यजमानादिशब्दानां क्व चिल्लक्षणावृत्तिसद्भावे ऽपीयं तावद् गौणी वृत्तिरस्त्येवेति योज्यम् । सूत्रकृतो ऽप्रसक्तगौणत्ववृत्तिलक्षणाभिधा-

१ शक्तिभेदाङ्गीकरणमिति २ पु० पा० ।

यित्वपरिहारार्थं प्रकृतसिद्ध्यर्थवादाचिन्तयोपक्रमितुं भाष्यकृता द्वेधोपन्यस्ते ऽपि सन्देहे पूर्ववत् प्रौढ्या नामधेयाचिन्तया सह साक्षात् सङ्गतिप्रदर्शनार्थं त्रेधा सन्देहमाह * अत्रापि चेति * पूर्वस्मिन्नधिकरणे त्रयः पक्षा स्त एवात्रापीति योज्यम् । किं तावदित्यादिपूर्वपक्षभाष्यमर्थवादानर्थक्यस्यार्थवादाधिकरणे निरस्तत्वादयुक्तमाशङ्क्योपपादयति * तत्रेति * ननु शब्दसमभिव्याहारमात्रेण स्तुत्यप्रतीतावपि सर्वाभ्यर्हितयजमानत्वोपचारेण प्रस्तरस्तुतिः प्रत्येष्यते[1] इत्याशङ्क्याह * न चेति * ननु गौण्या वृत्त्या परशब्दस्य परत्र वृत्तिर्गुणवादसूत्रे वर्णितेत्याशङ्क्याह * न चेति * एतत्सूत्रसिद्धां वेदे गौणीं वृत्तिमङ्गीकृत्य तत्र गुणवादेन परशब्दस्य परत्र वृत्तिर्वर्ण्यते इह तु सैव वेदप्रामाण्याविरोधिनिमित्ताभावाद्भेदे न सम्भवतीति पूर्वपक्षी मन्यतइति भावः । ननु तत्सिद्धिकरत्वादि तस्या निमित्तं तच्च वेदे ऽपि सम्भवतीत्याशङ्क्याभ्युपगम्य तस्य निमित्तत्वं प्रस्तरे यजमानशब्दप्रवृत्तौ यजमानकार्यकरत्वस्य निमित्तस्य प्रमाणान्तरेणासिद्धे स्तत्कार्ये प्रस्तरविध्यपेक्षत्वात् गुणविधिरेव बलादापद्येतेत्याह * न चेति * तस्माद्विधिरिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * न च प्रस्तरो याजमानं शकनोति कर्त्तुमित्युत्तरभाष्यदर्शनात् अन्यतर इत्युपक्रममात्रं कुण्डपायिनामयने यो होता सो ऽध्वर्युः स पोता य उद्गाता स नेष्टा सो ऽच्छावाको यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्त्ता यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुद्यः प्रतिप्रस्थाता सो ऽग्नीत्स उन्नेता गृहपतिर्गृहपतिः सुब्रह्मण्य. सुब्रह्मण्य इत्यृत्विक्समासे समाम्नाते होत्रादिशब्दानां मुख्यार्थत्वमङ्गीकृत्य तत्सामानाधिकरण्यायाध्वर्यवादिशब्दानां लक्षणार्थत्वं तृतीये विप्रतिषेधे करणः समवायविशेषादिति समवायविशेषव्याचक्षणेन भाष्यकृतोक्तमिह दृष्टान्ततम् । अव्यवस्थितशास्त्रार्थायोगात्कतरो ऽत्र कार्यलक्षणो ऽर्थः पूर्वपक्षिणो ऽभिमत इत्यपेक्षायां मुख्यं वा पूर्वचोदनालोकवदिति द्वादशाधिकरणन्यायेन यजमानशब्दस्य मुख्यार्थत्वमङ्गीकृत्य प्रस्तरशब्दस्य कार्यलक्षणार्थत्वमाह * तत्रापीति * आग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वतीमाज्यस्य यजेतेत्युदाहृत्य किं विकल्पेनान्यतरस्य तन्त्रं प्रसङ्गेनान्यतरस्योपकारकत्वात् कर्त्तव्यम् उतआग्नावैष्णवं चरुं[2] तन्त्रमेवेति सन्दिह्य विशेषादनियमे प्राप्ते भूयसां स्यात् स्वधर्मत्वमिति पूर्वसूत्र-

---

१ प्रत्यतव्यात २ पु० पा० ।

२ चरमिति २ पु० पा० ।

गतं स्वधर्मत्वपदं परित्यक्तभावप्रत्ययमनुषज्य मुख्यमाग्नावैष्णवकर्म पूर्वचोदितत्वेनानुपसञ्जातविरोधित्वात् स्वधर्मकं यथा लोके पूर्वगतानां पूर्वासनेपूपवेशनं जघन्यागतानामितरेष्विति वक्ष्यते। नैतदेवमित्यादिसिद्धान्तभाष्यं यजमानशब्दस्य मुख्यत्वेन कार्यलक्षणार्थत्वायोगात् तत्कार्ये प्रस्तरविधानस्यानाशङ्कितत्वेनायुक्तमाशङ्क्योपपादयति * न तावदिति * प्रस्तरकार्ये यजमानविधौ निरस्ते यदि कश्चिद्यजमानकार्ये प्रस्तरविधिः शङ्केत तन्निरासाय स्वकार्यविरोधाद्यजमानस्य प्रस्तरकार्ययोगो ऽचेतनस्य च प्रस्तरस्य चेतनकार्यविरोधाद्यजमानकार्ययोगो न सम्भवतीति यजमानकार्ये प्रस्तरचोदनोपपत्तिमभ्युपेत्यैतावदुक्तम् वस्तुतस्तु मुख्यत्वेन यजमानशब्दस्य कार्यलक्षणार्थत्वायोगात्सापि नोपपद्यतइत्यर्थः। आदिशब्देनैककपालोपादानम्। यजमानस्यैककपालकार्यार्थत्वे सर्वतन्त्रलोपापत्त्यभिधानं प्रस्तरकार्यार्थत्वे ऽपि तुल्यमित्याह * एकेति * भाष्यकृता तु ३१९।२
प्रस्तरस्य मान्त्रवर्णिकदेवतान्वयेनानुषङ्गिकयागसाधनत्वे ऽपि प्रहरणस्य प्रतिपत्तित्वेन प्रस्तरकार्यत्वाभावाद्यजमानस्य च पुरोडाशकपालवदन्यार्थस्यैव स्रुग्धारणाविनियोगे ऽपि तन्मात्रनिष्पत्त्या कृतार्थत्वाभावेनाप्रतिपाद्यत्वात् प्रहरणानापत्तेस्तदुपेक्ष्येतरत्रैव दूषणमुक्तम् विध्यन्तरं चेत्यादिभाष्येण विध्येकवाक्यत्वं विनार्थवादत्वायोगेनानर्थक्यपरिहाराय कथं चिद्विधित्वमेष्टव्यम् इत्याशङ्कानिरासायैकस्योपरि सादनविधिशेषता इतरस्य च सर्वहोमविधिशेषतेत्यभिधानपूर्वकं विधित्वासम्भवोपसंहारेणानुवादत्वमुक्तं तद्व्याचष्टे * तस्मादिति * कथं पुनरिति भाष्येण प्रस्तरैककपालशब्दयोः कार्यलक्षणार्थत्वाभावे कथं यजमानशब्दसामानाधिकरण्यज्ञानमिति पृष्ट्वा गौण्या वृत्त्या सामानाधिकरण्यं भविष्यतीत्याशङ्कानिरासार्थं वेदे गौण्यवृत्त्यसम्भवं मनसि कृत्वा कथमिति प्रश्नाभिप्रायो विवृतः। तत्सङ्क्षिप्य व्याचष्टे * कथमिति * किमर्थं चेति प्रश्नान्तरभाष्यं विध्यर्थवादचिन्तोपक्रमेण सम्वादस्य स्तुत्यर्थत्वाज्ञानादयुक्तमाशङ्क्य स्तुतिप्रकारप्रश्नविषयतया व्याचष्टे * किमाकारा वेति * उच्यतइति द्वितीयप्रश्नोत्तरभाष्यं व्याचष्टे * यजमानो हीति * उत्तरशब्दव्याख्यानायोपरिशब्दः कथमित्यादिप्रश्नानुभाषणपूर्वकं गौणवृत्तिलक्षणाभिधानापातनिकार्थं गुणवादस्त्विति सूत्रेणोत्तराभिधानार्थं भाष्यं व्याचष्टे * गुणाच्चेति * गौणवृत्त्यसम्भवाभिधानार्थं कथमिति भाष्यं गुणादिति पञ्चम्या परशब्दस्य परत्र प्रवृत्तौ गुणस्य हेतुत्वमात्राभिधानात् लक्ष्यमाणस्यापि च हेतुत्वोपपत्तेर्वाच्यत्वान-

भिधानादयुक्तमाशङ्क्य व्याचष्टे * कथमिति * अयमाशयः न लक्ष्यमाणगुणयोगमात्रेण सिंहादिशब्दस्य देवदत्तादौ वृत्तिर्युक्ता लक्ष्यमाणगुणस्याशाब्दत्वाच्छब्देन देवदत्तादिना धूमोऽयं ज्वलतीतिवदन्वयापत्तेः । प्रसह्यकारित्ववच्च दंष्ट्रित्वचतुष्पात्त्वादेरपि सिंहगुणस्य देवदत्ते प्रत्ययापत्तेर्लक्षणायां त्वभिधेयसम्बन्धित्वरूपादरेण तत्र शब्दतात्पर्यावगतेर्यत्परः शब्दः स शब्दार्थ इत्यनेन न्यायेनाभिधेयसम्बन्धित्वरूपस्यापि शब्दार्थत्वाच्छाब्दार्थान्तरेणान्वयो युक्तः । तात्पर्यव्यवस्थानादेव च गङ्गादिशब्दानामभिधेयसम्बन्धाविशेषेऽपि सिकतादिलक्षकत्वानापत्तिः । तस्माल्लक्ष्यमाणगुणयोगनिमित्तवृत्तित्वस्य गौणवृत्तिलक्षणस्यायोगात् प्रसिद्धवाच्यत्यागेन तद्गुणवाचित्वं गौणवृत्तित्वलक्षणमभ्युपगन्तव्यम् । सिंहादिशब्दस्य हि स्वार्थवाचित्वे देवदत्तशब्दसामानाधिकरण्यायोगात् तद्गुणप्रसह्यकारित्ववाचित्वाकल्पनायां देवदत्तेऽपि तत्सद्भावाद्धीरो देवदत्त इतिवत्सामानाधिकरण्यमुपपादयितुं शक्यते । स्वार्थत्यागेन च तद्गुणे वर्त्तमानत्वात्तत्र भव इत्येतस्मिन्नर्थे तद्धितोत्पत्तिः । पौरुषेये च वाक्ये वक्त्रभिप्रायानुसारात् स्वार्थत्यागेन तद्गुणे वृत्तिर्युक्ता वेदे तु स्वार्थत्यागेन प्रामाण्यबाधापत्तेस्तत्त्यागेन गुणवाचित्वकल्पना न युक्तेति स्वार्थाभिधानेनेत्युत्तरभाष्याभिप्रायमाह * सिद्धान्तस्त्विति * गुणस्यावाचको ऽपि स्वार्थमभिधाय लक्षणया गुणं ब्रवीतीति वदता लक्ष्यमाणगुणयोगनिमित्तत्वं सिद्धान्त्यभिमतं गौण्या वृत्तेर्लक्षणं सूचितं भवतीत्याशयः । सर्व इति भाष्यं पराभिमतलक्षणानिरासार्थतया व्याचष्टे * अजहत्स्वार्था इति * न जहाति शब्दः स्वमर्थं यासु वृत्तिषु इति विग्रहः । यथा श्रुतिवृत्तौ लक्षणावृत्तौ वा शब्दः स्वार्थं न जहाति तथा गौण्यामपीत्यर्थः । ततश्च स्वार्थत्यागाभावान्न वेदाप्रामाण्यापत्तिरित्याशयः । भाष्यकृता प्रसिद्ध्यर्थहानाप्रसिद्ध्यर्थकल्पनापत्तिः पराभिमतलक्षणानिरासे हेतुत्वेनोक्ता सा गवादिशब्दानामपि सास्नादिमदर्थत्यागेन पृथिव्यादिवाचित्वनिरासापादकत्वादहेतुरित्याशङ्क्य स्वयं हेतुमाह * पूर्वेति * कथं पूर्वकल्पसशक्त्यनुसारेण परशब्दस्य परत्र वृत्तिरित्याशङ्क्याह * सम्भविष्यति चेति * भविष्यन्निर्देशेनान्यस्य प्रकारस्य वक्ष्यमाणत्वं सूचितम् । भाष्योक्तं हेतुमनुसन्धत्ते * इतीति * स्वोक्तहेतूपजीवित्वसूचनायेति करणः प्रसिद्धहानाप्रसिद्धकल्पनस्य दोषत्वोपपादनार्थं व्यवहारोच्छेदकत्वाभिधानम् । न चेति भाष्यं मतान्तरनिरासार्थत्वेन

व्याख्यातुं तत्रावयुपन्यस्यति * अन्येषां त्विति * सिंहादिशब्दो-
चारणे जातिवद् द्रव्यादीनामपि प्रतीतेरवाच्यत्वे वा शब्दत्वेन द्र-
व्यादिवाचिशब्दान्तरासामानाधिकरण्यायोगात् समुदायवाची सिं-
हादिशब्दो देवदत्तादौ समुदायाभावेनैकदेशे गुणादौ लक्षणया व-
र्त्तमानो गुणशब्दस्याङ्गे प्रयोगादङ्गशब्दस्य चावयवापरपर्यायैकदेशे प्र-
योगादेकदेशाख्ये गुणे वर्त्तमानत्वात् पूर्ववद् गौण इत्युच्यते तस्मा-
त् समुदायवाचिनस्तदेकदेशवृत्तित्वं गौणवृत्तिलक्षणं तच्च समु-
दायानित्यत्वेन शब्दार्थसम्बन्धानित्यत्वापत्तेरप्रामाण्यापादकत्वाद्दु-
र्दे न सम्भवतीत्याशयः । एतन्मतनिरासार्थतया न चेति
भाष्यं व्याचष्टे * तत्रेति * समुदायवाची वेति भाष्यावयवस्य
समुदायवाचित्वाङ्गीकरणेन एकदेशवृत्तिनिरासार्थत्वशङ्कानिवृत्तये
पूर्वैकवाक्यत्वेन समुदायवाचित्वनिरासार्थत्वसूचनायादौ व्या-
ख्या। नन्वेवं सति वेदमधीत्य स्याादिति क्त्वाप्रत्ययस्य पूर्वकालतानन्त-
र्यसमुदायवाचिनो ऽध्ययनविध्यविरोधार्थं तदेकदेशे पूर्वकालत्व-
मात्रे वृत्त्यभ्युपगमो विरुध्येतेत्याशङ्क्य नावयवे श्रुत्या वर्त्तितुमर्ह-
तीति अध्याहारेण व्याख्यातुं मुख्यरूपेणेत्युक्तं गुणहीने ऽपि इत्या-
दिपूर्वावयवव्याख्यानार्थं भवतीत्याद्युक्तम् । समुदायवाचित्वनि-
रासायैव सर्वेति दूषणान्तरभाष्यं सिद्धान्तविरोधाभिधानार्थतया
तावद्व्याचष्टे * सामान्येति * एतदेव भाष्यं सामान्यवचनः शब्द
इति प्रतिज्ञासिद्ध्यर्थो यदि व्यक्तिः शब्दार्थो भवेदित्यादिभाष्योक्तो
व्यक्तिवाचित्वनिरासो न्याय्य इत्येवं व्याख्यातुमाह * क्रिये- ३२०।१
ति * प्रबलारिमर्दनादिक्रियाणां शौर्यादिगुणानामित्यर्थः । किं
च व्यक्तिवाचित्वपक्षे व्यक्त्यन्तरे प्रयोगासम्भवे ऽप्येकस्यां तावद्व्यक्तौ कालान्तरे ऽपि प्रयोगः सम्भवति । गुणादिसमुदायवा-
चित्वे त्वेकस्यामपि व्यक्ताववस्थाभेदेन तेषां भेदात् सम्बन्धाग्रह-
णेनाभिधानाशक्तिरित्याह * एकस्यामेवेति * ननु गुणक्रियाणाम-
न्यत्वे ऽप्येकं किं चिद् गुणक्रियावान्तरसामान्यसम्बन्धग्रहणायोपल-
क्षणं भविष्यतीत्याशङ्क्याह * न चेति * आसां गुणक्रियाणां समु-
दायशो व्यापकमुपलक्षणभूतं सिंहत्वादन्यत्सामान्यं नास्ति । न
च गुणत्वादिसामान्यस्यैव सिंहशब्दवाच्यत्वोपलक्षणत्वं युक्तम्। तस्य
समुदायशो व्यापकत्वाभावेन प्रत्येकमुपलक्षणापत्तेस्तथोपलक्षितानां
च गुणक्रियाणां व्याघ्रादिजात्यन्तरे ऽपि व्यक्तानां भावात् सिंहश-
ब्दवाच्यत्वं नास्तीत्याशयः । ननु सिंहत्वमेव तद्व्युपलक्षणं भवत्वि-

१ यदिति २ पु० ना० ।

त्याशङ्क्याह * तत्रेति * उत्तरार्द्धं व्याचष्टे * न हीति * समुदा-वाचित्वनिरासस्य परोक्तगौणावृत्तिलक्षणनिरासोपयोगमाह * इती-ति * न चासतीति भाष्यमारोपितार्थवृत्तित्वरूपगौणवृत्तिलक्षणा-निरासार्थत्वेन व्याख्यातुं तन्मतं तावदुपन्यस्यति * क्वचिदिति * समारोपिते तस्मिन् वाच्ये भावः प्रवृत्तिर्यस्य शब्दस्य स गुणतो वाच्यमारोप्य प्रवर्त्तमानत्वात्तत आगत इत्यस्मिन्नर्थे तद्धितोत्पत्ते-र्गौण इति उच्यते समारोपितो वा यस्मिन्नर्थे तस्य वाच्यस्य सद्-भावः सो ऽर्थो गुणतो वाच्यारोपेण शब्दात् प्रतीतत्वात् गौण इ-त्युच्यते ततश्च समारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणं समारो-पितार्थाश्रयत्वं चार्थस्य तच्च वेदे समारोपकपुरुषाभावान्न सम्भव-तीत्याशयः । एतदेव लक्षणमुपपादयितुमाह * तस्येति * शब्दस्येहा-भिधानं वृत्तिव्यापारो न चासावभिधेया ऽभावे सम्भवतीत्याशयः । ननु सिंहशब्दस्य देवदत्ताभिधाने व्यापाराभावे ऽपि स्वाभिधेयल-क्ष्यमाणगुणयोगेन देवदत्तप्रतिपत्त्यर्थं प्रयोगो भविष्यतीत्याशङ्क्याह * न चेति * सिंहशब्दाभिहितेन सिंहत्वेन गम्यमानस्यापि गुणस्या-शाब्दत्वाच्छब्देन देवदत्तेनान्वययोगादित्याशयः । सिद्धान्त्यभिमत-लक्षणासम्भवमुक्त्वा स्वाभिमतं प्रश्नपूर्वकमुपपादयति * कथं तर्हीं-ति * ननु सिंहशब्देनैव देवदत्ते स्ववाच्यसिंहत्वरूपमारोपेणार्पितं विषयीकृत्य शब्दप्रवृत्ताविवरेतराश्रयः स्यादित्याशङ्क्य स्वयमेव व-क्तव्याध्यारोप्येत्युक्तम् । आरोपनिमित्तमाह * सिंहादीति * सिं-हादिरूपतां प्रतिपद्यन्तइत्यर्थः । ननु देवदत्ते सिंहत्वं वक्ष्यारोपित-मिति कथं ज्ञायतइत्याशङ्क्याह * ततश्चेति * शब्दप्रयोगस्य स्वार्थ-एवोपपत्तेः सिंहशब्दप्रयोगान्यथानुपपत्त्या सिंहत्वारोपः कल्प्यत-इत्याशयः । नन्वेवं वाच्य एव शब्दप्रयोगान्मुख्यत्वं स्यादित्याशङ्क्या-ह * न चेति * नन्वारोपिते वाच्ये ऽर्थान्तराभिधानानपेक्षत्वात् मु-ख्यवत्प्रथमप्रवृत्तेर्मुख्यत्वाविरोध इत्याशङ्क्याह * यत्र त्विति * वस्तुवृत्त्या स एवार्थो यत्र न पुनरारोप्यते तत्र प्रवर्त्तमानः शब्दो मुख्य इत्युच्यते इतरत्र तु जघनवदारोपात् पश्चात्प्रवृत्तेर्जघन्यो गुणतश्चारोपात् गौण इत्युच्यतइत्याशयः । न च शुक्तिकादावपि रजतत्वारोपेण रजतादिशब्दप्रवृत्तेर्गौणत्वापत्तिः । पुरुषोत्प्रेक्षा-प्रभवत्वाभावेन शुक्तिकादौ रजतादिबुद्धेरारोपितत्वाभावादिति सूचनायादोष इत्युक्तम् । एतन्मतनिरासार्थत्वेन भाष्यं व्या-चष्टे * तत्रेति * एतदेवोपपादयति * तथा हीति * सिं-हदेवदत्तयोरत्यन्तवैलक्षण्येनारोपायोगादसम्भविनश्चार्थापत्त्यापि

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एक. स्तबको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयै ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं
वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १
(६) भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरु भिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः)४
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ५

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय

स्याशङ्क्याह * तत्रेति * उत्तरार्द्धं व्याचष्टे * न हीति * समुदायवाचित्वनिरासस्य परोक्तगौणवृत्तिलक्षणनिरासोपयोगमाह * इतीति * न चासतीति भाष्यमारोपितार्थवृत्तित्वरूपगौणवृत्तिलक्षणनिरासार्थत्वेन व्याख्यातुं तन्मतं तावदुपन्यस्यति * काश्चिदिति * समारोपिते तस्मिन् वाच्ये भावः प्रवृत्तिर्यस्य शब्दस्य स गुणतो वाच्यमारोप्य प्रवर्त्तमानत्वात्तत आगत इत्यस्मिन्नर्थे तद्धितोत्पत्तेर्गौण इति उच्यते समारोपितो वा यस्मिन्नर्थे तस्य वाच्यस्य सद्भावः सो ऽर्थो गुणतो वाच्यारोपेण शब्दात् प्रतीतत्वात् गौण इत्युच्यते ततश्च समारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणं समारोपितार्थाश्रयत्वं चार्थस्य तच्च वेदे समारोपकपुरुषाभावान्न सम्भवतीत्याशयः । एतदेव लक्षणमुपपादयितुमाह * तस्येति * शब्दस्येहाभिधानं वृत्तिव्यापारो न चासावभिधेया ऽभावे सम्भवतीत्याशयः । ननु सिंहशब्दस्य देवदत्ताभिधाने व्यापाराभावे ऽपि स्वाभिधेयलक्ष्यमाणगुणयोगेन देवदत्तप्रतिपत्त्यर्थं प्रयोगो भविष्यतीत्याशङ्क्याह * न चेति * सिंहशब्दाभिहितेन सिंहत्वेन गम्यमानस्यापि गुणस्याशाब्दत्वाच्छब्देन देवदत्तेनान्वययोगादित्याशयः । सिद्धान्त्यभिमतलक्षणासम्भवमुक्त्वा स्वाभिमतं प्रश्नपूर्वकमुपपादयति * कथं तर्हीति * ननु सिंहशब्देनैव देवदत्ते स्ववाच्यसिंहत्वरूपमारोपेणार्पितं विषयीकृत्य शब्दप्रवृत्ताविवरेतराश्रयः स्यादित्याशङ्क्य स्वयमेव वक्त्राध्यारोप्येत्युक्तम् । आरोपनिमित्तमाह * सिंहादीति * सिंहादिरूपतां प्रतिपद्यन्तइत्यर्थः । ननु देवदत्ते सिंहत्वं वक्रारोपितमिति कथं ज्ञायतइत्याशङ्क्याह * ततश्चेति * शब्दप्रयोगस्य स्वार्थएवोपपत्तेः सिंहशब्दप्रयोगान्यथानुपपत्त्या सिंहत्वारोपः कल्प्यतइत्याशयः । नन्वेवं वाच्ये एव शब्दप्रयोगान्मुख्यत्वं स्यादित्याशङ्क्याह * न चेति * नन्वारोपिते वाच्ये ऽर्थान्तराभिधानानपेक्षत्वात् मुख्यवत्प्रथमप्रवृत्तेर्मुख्यत्वाविरोध इत्याशङ्क्याह * यत्र त्विति * वस्तुवृत्त्या स एवार्थो यत्र न पुनरारोप्यते तत्र प्रवर्त्तमानः शब्दो मुख्य इत्युच्यते इतरत्र तु जघनवदारोपात् पश्चात्प्रवृत्तेर्जघन्यो गुणतश्चारोपात् गौण इत्युच्यतइत्याशयः । न च शुक्तिकादावपि रजतत्वारोपेण रजतादिशब्दप्रवृत्तेर्गौणत्वापत्तिः । पुरुषोत्प्रेक्षाप्रभवत्वाभावेन शुक्तिकादौ रजतादिबुद्धेरारोपितत्वाभावादिति सूचनायादोष इत्युक्तम् । एतन्मतनिरासार्थत्वेन भाष्यं व्याचष्टे * तत्रेति * एतदेवोपपादयति * तथा हीति * सिंहदेवदत्तयोरत्यन्तवैलक्षण्येनारोपायोगादसम्भविनश्चार्थापत्त्यापि

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच्च शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयैः ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं

वार्षिकमग्रिमं	मूल्यम्	मुद्राः ७	आणकाः ८
६ कालान्तरे प्रतिस्तबकं	"	" १	" ०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः-

	मुद्रिताः स्तबकाः
(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः)	२
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्)	१०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा)	१०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः)	२
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः)	१
(६) भाट्टचिन्तामणिः महामहोपाध्यायः श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)	२
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा)	२
(८) ब्रह्मसूत्र भाष्यम्-वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त)	६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्)	२
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरु भिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त)	१
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः)	१
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः)	४
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा)	२
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा)	५

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

The Chowkhamba Sanskrit Series, Benares.

This Monthly Magazine consists of very rare and invaluat ancient Sanskrit works on Vedic Literature, Hindu Philosop different sciences, general literature and Purânas &c. tl have never been published before. The monthly issue of tl Magazine dealing with one subject contains 100 pages of Der octavo size, printed neatly in beautiful types on good thick p per, after being carefully corrected by the Pandits of the Gove ment Sanskrit College Benares and other learned men.

The works included in the Magazine hitherto issued ar those in course of preparation for publication are as follows:-

Names of Books,	*Fasciculus ready for Su*
1. Sanskâraratnamâlâ, by Gopînâtha Bhatta.	(Sanskâra)
2. Shabdakoustubha, by Bhattoji Dikshita.	(Vyâkarana) 1
3. Sloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Pârthasârathi Misra. (Complete)	(Mîmânsâ) 1
4. The Vedânta–Tattvatraya, of Sri Lokacharyya along with Bhatta–Bhasha–Prakasha of Sri Narayana Tirtha. (Complete)	(Vedanta)
5. Karana-Prakash, by Brahmadeva. (Complete)	(Jyotisha) 1
6. Bhatta–Chintamani, of Gaga Bhatta.	(Mimansa) 2
7. Nyaya–Ratna–Mala, of Sri Parthasarathi Misra.	(Do) 2
8. Brahma Sutra, with Commentary called Viggyanamrita.	(Vedanta) 6
9. Syadwâda Manjarî, by Mallîshêna with a Commentary by Hêmchandra.	(Jaina Dars'ana) 2
10. Siddhitrayam by Yamun Muni.	(Vedanta) 1
11. Nyâya-Makarand, of Sri Anand-Bodh Bhattarkacharyya with annotations by Chit-Sukh Muni.	(Do) 1.
12. Vibhaktyartha-Nirnaya, By M. M. Sri Girdhara Upadhyaya.	(Nyaya) 4.
13. Vidhirasâyana, of Appaya Dîkshita.	(Mimansa) 2.
14. Nyayasudha, A commentary on Tanravartika, By Pandit Someshwara Bhatta.	(Mimansa) 5.

FOR INDIA, BURMA & CEYLON.

Annual subscription (in advance)	Rs.	7	8	0
Single copy	„	1	0	0

FOR FOREIGN COUNTRIES.

	£.	s.	d.
Annual subscription (in advance) ...	0	15	0
Single copy	0	1	9

Postage free.

To be had from:—

H. D. GUPTA, *Secretary.*

No. 52.] [*Price Rupee One.*

THE

CHOWKHAMBA SÂNSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA.

BY

PANDIT SÓMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS VI

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

LEIPZIG:-OTTO HARRASSOWITZ, LEIPZIG:

Printed By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

181.43
S67N
F.L.

Registered According to Act XXV. of 1867.

श्रीः

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितमध्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तवकः—५२

कल्पयितुमशक्यत्वात् नाभिधानसिद्ध्यर्थमप्यारोपो युक्त इत्यर्थः। वैलक्षण्ये ऽप्यूपरादौ तोयाध्यारोपदर्शनाद् * भ्रान्तिवर्जितैः * इत्युक्तम्। ननैव सति योषा वा गौतमाग्निरिति योषायामग्नित्वारोपविधिर्न स्यादितिवाच्यम्। तद्रेतःप्रक्षेपस्य मध्यायत्कर्त्वमभवदभीक इति द्वाभ्यामृग्भ्यां स्वाहाकारान्ताभ्यां रेतः सिञ्चेदिति स्वाहाकारसाध्यत्वस्मृतेस्तथाविधस्य च होमत्वप्रसिद्धेर्यूपशकला होतव्या इति च देवतोद्देशद्रव्यत्यागनिरपेक्षप्रक्षेपमात्रे ऽपि जुहोतेर्वेदे दर्शनात्तत्कर्मीभूतस्य रेतसो ऽग्निशुचिहसृपिछदिछविश्य इसिरिति जुहोतेरिसिप्रत्ययान्वाख्यानाद्धावःशब्दव्यपदेश्यत्वेन योषाया रेतोरूपहविराधारतयाग्निसादृश्यसम्भवाच्छ्येनाचितं चिन्वीतेति च योषायामग्निसादृश्यारोपस्य निमित्तत्वादित्याशयः। ननु भ्रान्तिवर्जितानां विसदृशे वस्तुनि वस्त्वन्तरारोपाशक्तावपि भ्रान्त्यवसितसादृश्ये ऽपि तत्त्वारोपेण शब्दः प्रयोक्ष्यतइत्याशङ्क्याह * यदेति * ३२१।२ रश्मिमत्तोयरे भ्रान्त्या शौक्ल्यचञ्चलत्वादितोयगुणदर्शनेन तोयसादृश्याध्यवसानात्तोयमुत्प्रेक्ष्य तोयशब्दप्रयोगे तत्त्वतो भ्रान्तावपि भ्रान्त्यध्यवसितस्यैव कारणत्वोपपत्तेरुत्प्रेक्षामात्रत्वाभावेनारोपाभावाद् दूरमपि गत्वा भ्रान्तित्वस्य परिहर्त्तुमशक्यत्वे प्रथममेव सादृश्यज्ञानानपेक्षस्य भ्रान्त्यङ्गीकरणस्य च युक्तत्वात् मुख्यतैवावसीयते न गौणतेत्याशयः। परानभिमतमपि वा भ्रान्तेरागापत्वं लोकप्रसिद्धवनुसारेणापाद्यारोप्येत्युक्तम्। तोयस्य तत्राविद्यमानत्वात् मुख्यत्वानुपपत्तिमाशङ्क्य *भ्रान्तोत्युक्तम्*भ्रान्त्यध्यवसितस्यापि प्रथमं शब्दात्प्रतीतेर्मुख्यत्वाविरोध इत्याशयः। भ्रान्त्यध्यवसितो मुख्यो भ्रान्तिमुख्य इति शाकपार्थिववन्मध्यमपदलोपी समासः। ननूभयोर्भ्रान्तावर्थान्तराभिधानैरपेक्ष्येण प्रथमवृत्तिर्मुख्यत्वादू गौणत्वासम्भवे ऽपि वक्तुर्भ्रान्त्यभावेऽपि श्रोतृप्रतारणायोपरे तोयशब्दप्रयोगे भ्रान्तिमुख्यत्वस्याप्यसम्भवादू गौणत्वं भविष्यतीत्याशङ्क्याह *अथापीति*श्रोतृवञ्चनार्थेनैव परशब्दस्य परत्र प्रयोगोपपत्तेर्नासम्भाविनो ऽध्यारोपस्य कल्पना युक्तेत्याशयः। ननु द्वयोः श्रोतुरेव वा भ्रान्त्या वारोपाभावे ऽपि भ्रान्त्या प्रतारणार्थेन वा परशब्दस्य परत्र प्रयोगोपपत्तेर्माभूदारोपकल्पना द्वयोरपि तु भ्रान्त्यभावे सिंहो देवदत्त इत्यादावारोपं विना शब्दप्रयोगानुपपत्तेस्तत्कल्पनैवोचितेत्याशङ्क्याह * यदा त्विति * सादृश्यमादिशब्दोपात्तो वा सादृश्यहेतुर्गुणयोगो निमित्तं यस्य वत्यर्थस्य तस्य परत्र परशब्दप्रवृत्तौ निमित्तत्वेनाध्यवसानान्नारोपकल्पना युक्तेत्यर्थः। वत्यप्रयोगात्तदर्थाध्यवसानासम्भवाशङ्कानि-

रासायान्तर्णीतशब्देनाभिप्रेतत्वमुक्तम् । ननु वत्यर्थाभिप्रायस्यैव तत्र निमित्तत्वं नारोपस्येति नियमे को हेतुरित्याशङ्क्यं पूर्वश्लोकव्याख्यानेन निरस्यति * तथा हीति * ननु सत्यपि विवेके प्रसह्यकारित्वादिसादृश्यादारोपः सम्भवतीत्याशङ्क्याह * यथेति * विवेकज्ञानाम् पुंसाम् आरोपानुपपत्तौ हेतुमाह*न हीति * ज्ञानस्य व्यवहाराङ्गत्वात् अर्थानिरपेक्षेण च ज्ञानरूपेण व्यवहाराभावात् अर्थाध्यवसानात्मकमेव सर्वं ज्ञानं न ततो ऽन्यादृशं न च विवेकेनार्थे ऽध्यवसिते तत्त्वारोपः सम्भवतीत्याशयः । यद्वा विवेकज्ञानाङ्ग तत्त्वभ्रान्त्यसम्भवे ऽप्युत्प्रेक्षामात्रप्रभवा कल्पनारूपा बुद्धिरारोपशब्दवाच्योपपत्स्यतइत्याशङ्क्य * न हीत्युक्तम् * अयमाशयः कल्पनारूपापि बुद्धिरर्थान्तरात्मना यद्यर्थान्तरमवभासयेत्ततो मानान्तरेण भ्रान्तिरेव स्यात् सा च विवेकिनां न सम्भवतीत्यर्थानवभासिकासावभ्युपगन्तव्या न चार्थानवभासिका बुद्धिः सम्भवतीति व्यवहारानङ्गत्वापत्तेस्तावन्निरालम्बना बुद्धिर्न सम्भवतीत्युक्तं बुद्धिस्वाभाव्यादप्येवमित्याह * किं चेति * पुरुषप्रयोज्यत्वात्तदधीनो ऽपि शब्दः प्रवृत्तिनिमित्तं विषयं विना न प्रवर्त्तते घटे वैयात्यात्पटशब्दोच्चारणे ऽपि बुद्धचनुपपत्तेः । बुद्धिस्तु स्वच्छन्दत्वाद्विषयं विनोत्पत्तुमेव नार्हतीत्यर्थः । ननु स्वांशएव विषयो भविष्यतीत्याशङ्क्याह * न चेति * आरोपसम्भवात्कल्पना न युक्तेत्युक्त्वा कल्पकाभावादपि तत्कल्पना न युक्तेत्याह * अपि चेति*अयमाशयः । स्वप्रत्ययानुसारेण श्रोत्रा वक्त्राभिप्रायानुसारात् श्रोतुरारोपितार्थप्रत्यये सति वक्तर्यारोपकल्पना युज्येत तस्यैव देवदत्तपदसामानाधिकरण्यात्पूर्वं सिंहपदात्सम्बन्धग्रहणकालावगतानारोपितसिंहत्वरूपार्थप्रतीतेस्तत्सामानाधिकरण्योत्तरकालमपि सिंहसादृश्यमात्रप्रतीतेरारोपितार्थप्रत्ययाभावान्न वक्तर्यारोपकल्पना युक्तेति पदजन्यस्य पदार्थज्ञानस्य केवलसंस्कारजन्यत्वाभावात् स्मृतित्वाभावे ऽपि अधिकार्थत्वाभावसूचनार्थः स्मृतित्वोपचारः ततश्चानारोपितमुख्यार्थग्रहणान्न श्रोतरि नापि वक्तर्यारोप इत्यर्थः । श्लोकं व्याचष्टे * सर्वथेति * यदि द्रुतमध्यादिविभागवदर्थविशेषनिरपेक्षो गौणमुख्यविभागः स्यात्ततः श्रोतृप्रत्ययानपेक्षत्वात् परत्र परशब्दप्रयोगान्यथानुपपत्त्याध्यारोपः कल्प्येतापि स त्वर्थप्रत्ययापेक्षत्वात् तस्य श्रोतृगामित्वात् श्रोतुरारोपितार्थप्रत्ययान्यथानुपपत्त्या कल्पनीयः। न च तस्यारोपितार्थप्रत्ययः सम्भवतीति दर्शयितुम *श्रोतृणामित्युक्तम् * सादृश्यादीत्यादिशब्देन तद्धेतुगुणयोगोपा-

दानम्। नन्वेवं सति सादृश्यस्यैव वाच्यत्वापत्तेः स्वार्थत्यागः स्यादित्याशङ्क्य * सा चेत्युक्तम् *तमेवन्यायं प्रश्नपूर्वकं वक्तुम्* कथमि ३२२।१
त्युक्तम्* अस्यैव श्लोकस्योत्तरार्द्धं व्याख्यातुम् *यदा चेत्युक्तम् * कीदृशी तर्हि परत्र परशब्दप्रयोगोपपत्त्यर्थं वक्तरि कल्पनेत्यपेक्षायां प्रश्नपूर्वकम् *कथं तर्हीत्युक्तम्* प्रसह्यकारित्वादेः सिंहत्वेनाविनाभावे देवदत्ते ऽनुपपत्तिप्रसङ्गात् बहुव्रीह्यभ्युपगमे चाविनाभूतशब्दस्य विशेषणत्वात्पूर्वनिपातापत्तिः बाधिते च सिंहे व्यभिचारात् प्रसह्यकारिता तत्र प्रायेणेति भाष्ये प्रायशब्देनाविनाभावानादरसूचनात्सम्बन्धमात्रविवक्षया ऽविनाभूतशब्दः अनेन च कथं तु स्वार्थाभिधानेन प्रत्यय इत्यादिभाष्यमनागतावेक्षणन्यायेन व्याख्यातं भवति। स्वोत्प्रेक्षितगौणवृत्तिलक्षणाभ्युपगमे ऽनवस्थितवेदप्रामाण्यापह्नवस्यानुचितत्वान्नारोपितार्थवृत्तित्वं गौण्या वृत्तेर्लक्षणमित्याह* किं चेति * आरोपस्य पुरुषधर्मप्रदर्शनार्थं वक्तृणामित्युक्तम् किं तर्हि गौणवृत्तिनिमित्तलक्षणमित्याशङ्क्येति गुणाश्रया इतीतिकरणेन प्रकारवाचिना तत्सिद्ध्यादिगुणयोगस्य गौणवृत्तिनिमित्तत्वाभिधानात्सूचितम्। गुणयोगवृत्तित्वं गौणवृत्तिलक्षणमाह*तस्मादिति* उपपदाधीनवृत्तित्वादीनां गौणवृत्तिलक्षणानां वेदाप्रामाण्यापादकत्वादिहानिराकरणे ऽपि गौणमुख्याधिकरणे निराकरिष्यमाणत्वात् परिशेषसिद्धिप्रदर्शनार्थम् * तस्मादित्युक्तम् * गुणयोगनिमित्तायाः शब्दप्रवृत्तेर्गौणत्वेनेष्टत्वाद्वाच्यगुणानां प्रभूतानामर्थान्तरे वृत्तियोंगः प्रयोजनं प्रवृत्तौ निमित्तं यस्य स गौण इत्येवं व्याख्येयम्। गुणानामशब्दत्वाच्छाब्देनार्थान्तरेणान्वयानुपपत्तिः प्रसह्यकारित्वादिवच्च दंष्ट्रित्वादेरपि प्रत्यापत्तिरित्याशङ्क्यानिरासार्थं यो हि मन्यते प्रसह्यकारिणं प्रत्याययेयमिति भाष्यावयवव्याख्यानार्थेन सिंहत्वाविनाभूतानेककक्रियागुणसमुदायो ऽनेन विवक्षित इति ग्रन्थेन प्रसह्यकारित्वादीनां तात्पर्यवृत्त्या व्यवस्थितं शाब्दत्वं यत्सूचितं तद्विवरणार्थेन प्रयोजनशब्देन प्रयुज्यते ऽनेनेति व्युत्पत्त्या निमित्तमुक्तम्। भेदनादेर्निमित्तस्य हेमादिप्रयोजकत्वाभ्युपगमान्नाशेषिणो ऽपि तावन्निमित्तस्याप्रयोजकत्वासम्भवोपालम्भः। इह तु यथा रामस्य वेतनदाने निमित्तस्य शेषित्वरूपमपि प्रयोजनत्वं तथा देवदत्ते सिंहगुणयोगस्य सिंहशब्दप्रवृत्तौ निमित्तत्ववत् प्रतिपाद्यत्वेन प्रयोजनत्वमप्यस्तीतिसूचयितुं प्रयोजनशब्देनाभिधानं युक्तमेव। आरोपवाद्यस्य लक्षणस्याव्यापकत्वमाशङ्कते * नन्वेवमिति * खपुष्पादेरसद्रूपत्वेन गु-

१ व्याधिते इति २ पु० पा०।

णाभावादात्मादौ तद्गुणयोगानुपपत्तेः खपुष्पादीनां शब्दानां खपुष्पमात्मेत्यादिगौणप्रयोगो ऽस्मिन् लक्षणे न युज्येतेत्यर्थः । नन्वसद्रूपस्याध्यारोपयितुमशक्यत्वादारोपितार्थवृत्तित्वमपि खपुष्पमात्मेत्यादिगौणप्रयोगेष्वसम्भवादव्यापकं स्यादित्याशङ्क्याह * सांख्यादीति * असद्रूपस्यारोपासम्भवे प्रधानादेरसद्रूपत्वेनाप्रतीतिप्रसङ्गादप्रसक्तस्य प्रधानं नास्तीत्यादिनिषेधायोगात् प्रसक्त्यर्थं सद्रूपत्वाभ्युपगमे निषेधविरोधापत्तेरारोपस्यैव प्रसक्तिसिद्धये ऽवश्याङ्गीकार्यत्वादसतो ऽप्यारोपापत्तेरात्मनि खपुष्पत्वारोपेण खपुष्पमात्मेति गौणप्रयोगसम्भवान्नास्मत्पक्षे लक्षणस्याव्यापकतेत्याशयः । सिद्धान्ते तु त्वदीयस्यैव लक्षणस्याव्यापकत्वाख्यो दोषो नास्मदीयस्येति प्रतिजानाति तावत्* अत्रेति * परपक्षे तावत्प्रश्नपूर्वकं दोषमुपपादयति * कुत इति * किं चिद्रूपमुपादायातद्रूपे तद्रूपकल्पनारोपः खपुष्पस्य त्वेवं विधमिति निरूपणासम्भवान्न शक्या कल्पना गौणप्रयोगसिद्ध्यर्थं चार्थान्तरे ऽन्वयारोपो वाच्यः अर्थान्तरस्य चात्मनो सद्रूपतयात्मा खपुष्पमात्मेति गौणशब्दप्रयोक्तुर्बौद्धादेरभिप्रेतत्वान्न तस्मिन्नारोपोपपत्तिरित्यर्थः । एतदेव व्यतिरेकमुखेनोत्तरार्द्धेन विवृतं गुणे रूपं सत्ता च प्रज्ञाते यस्येति विग्रहः । एतदेवोपपादयति * यस्तावदिति * असद्रूपस्यारोपाभावे प्रसक्त्यभावात् खपुष्पं नास्तीति प्रयोगानुपपत्तेरसद्रूपस्यापि खपुष्पादेरारोपो ऽङ्गीकार्य इति याशङ्क्या प्रधानादिनिषेधोपन्यासेन कृतासायेऽपि प्रधानात्मादीनां निषेधा इत्युपन्यासपूर्वकं पश्चात्परिहरिष्यते खपुष्पमात्मेत्यादिगौणप्रयोगे तावत् खपुष्पस्यारोपासम्भवो ऽधुनोच्यतइति तावच्छब्दार्थः । खपुष्पशब्दस्य गौणत्वद्योतनार्थः स्थानीयशब्दः । अनिर्द्धारितरूपस्यारोपासम्भवद्योतनार्थं निर्द्धारणार्थतरप्प्रत्ययप्रयोगः । अन्यस्य चान्यत्रारोपो भवति खपुष्पस्यारोप्यत्वाभिमतस्यारोप्याश्रयादात्मनो ऽन्यत्वेनानवधारणान्नात्मन्यारोपः सम्भवतीत्यन्यशब्देनोक्तम् । न-
३२३।१ न्वात्मनः सद्रूपादसद्रूपस्यान्यता प्रसिद्धैवेत्याशङ्क्य*त्वयेत्युक्तम् * नैरात्म्यवादिनो बौद्धादेः खपुष्पमात्मेति प्रयोगः तन्मते चासत्त्वाविशेषान्नान्यत्वं सम्भवतीत्याशयः । यद्यपि खपुष्पशब्दस्य स्वाधारपुष्पावच्छिन्नाभाववाचित्वं गम्यते तयोश्चाभाववाचित्वं पूर्वेणैवाभावे ऽवगते इत्यादिना वक्ष्यते तेनैव न्यायेनात्मशब्दस्यापि नैरात्म्यपक्षे शरीराद्याधाराहम्प्रत्ययग्राह्यावच्छिन्नाभाववाचित्वं गम्यते तयोश्चाभावयोर्द्धर्मिप्रतियोगिभेदेन भेदादात्मनो ऽन्यत् खपुष्पं नैरा-

त्म्यवादिनापि वक्तुं शक्यते तथापि खपुष्पत्वरूपस्य शरीराद्याधाराहम्प्रत्ययग्राह्यरूपे ऽध्यारोपाभावात् स्वरूपेण चाऽभावयोरवैलक्षण्यान्नारोप्यरूपस्यान्यत्वावधारणं सम्भवतीति दर्शयितुं *यदध्यारोप्येतेत्युक्तम् * तस्मादात्मनि खपुष्पारोपासम्भवेनारोपितार्थवृत्तित्वस्यास्मिन्प्रयोगे ऽनुपपत्तेस्तवैवाऽव्यापकत्वलक्षणो दोषः सिद्ध इति तात्पर्यार्थः । ननु खस्य पुष्पस्य च कथं चित् संसर्गकल्पनमारोपात्मकं खपुष्पमभ्युपगम्यात्मन्यारोपयिष्यते इत्याशङ्क्याह * तेनेति* एवं[1] खपुष्पशब्दस्य खपुष्पसंसर्गात्मकारोपितार्थत्वेन खपुष्पएव गौणत्वोपपत्तेर्गौणशब्दवृत्तिविषयतया खपुष्पस्यैवारोप्यस्य गौणत्वमापद्येत न चैतस्यारोप्यस्य लोके गौणत्वं प्रसिद्धं सिंहत्वादेरारोप्यस्य गौणत्वप्रसिद्धेः। ततश्चैतद्गौणत्वलक्षणमतिव्यापकं स्यादित्याशयः। येन कारणेन स्वरूपेणानवधारितस्यान्यत्रारोपो न सम्भवति तेन पूर्वं तावत्स्वरूपमेवारोपात्मकमभ्युपगन्तव्यं ततश्च गौणतापि तस्यैवापद्येत सा च लोकाननुसारित्वादयुक्तेत्यर्थः । गौणमुख्यविभागस्यार्थविषयत्वे ऽर्थस्यारोपितार्थवृत्तिशब्दविषयत्वं गौणत्वलक्षणमभिप्रेत्यैतदुक्तम् । शब्दविषयत्वेन चैतस्मिन्नारोप्ये खपुष्पशब्दस्य सिंहादिशब्दस्येव लोके गौणत्वप्रतीतिरिति व्याख्येयम् ननु नारोपितार्थशब्दवृत्तिविषयत्वगौणत्वलक्षणं येन सिंहत्वादेरपि गौणत्वं प्रसज्येत किं त्वारोपितार्थाश्रयत्वं ततश्च सिंहत्वादेस्तावन्न गौणत्वापत्तिः स्वपुष्पस्य तु गौणत्वं युक्तमेव तथा हि खपुष्पशब्दस्याभावे ऽवृत्तिर्वक्ष्यते न चाभावस्तस्य वाच्यः तथा सति खपुष्पं नास्तीति प्रयोगानुपपत्तिप्रसङ्गादतो स्ववाच्यखपुष्पसंसर्गारोपेणाभावे वर्त्तमानः खपुष्पशब्दो गौणो भविष्यति आरोपितखपुष्पसंसर्गाश्रयत्वाभावाच्चाभावो गौण इत्याशङ्क्याह* मुख्य इति *अयमाशयः समासं विना खपुष्पशब्दात्संसर्गाप्रतीतेः समासवाच्यत्वं खपुष्पसंसर्गस्याभ्युपगन्तव्यं विग्रहवाक्यार्थश्च समासवाच्यः प्रमाणान्तरेण च खस्य पुष्पस्य खसंसर्गाप्रतीतेः खस्य पुष्पमस्तीति विग्रहायोगात्खस्य पुष्पं नास्तीति वाक्यार्थे समासप्रतीतेः खपुष्पाभाव एव खपुष्पशब्दस्य वाच्यत्वान्मुख्यो ऽर्थ इति संसर्गस्यैव वाच्यत्वं पराभिमतमभ्युपेत्य लोके गौणस्य मुख्यपूर्वकत्वप्रसिद्धेर्मुख्यार्थान्तराभावेन गौणतानेन निरस्यते । नन्वारोपितस्य मृगतोयादेर्लोके मुख्यत्वप्रसिद्ध्यभावात्पारिशेष्याद्गौणतैव स्यात् इत्याशङ्क्याह * प्रथमेति * गौणमुख्यव्यवहारे मुखवत् प्रथमं प्रतीय-

१ एवं सतीति २ पु० पा० ।

मानं मुख्यत्वेन प्रसिद्धमित्याशयः । ऊहितां शङ्कामुद्घाटयति * कथमिति * आरोपिते मुख्यत्ववत् गौणत्वस्याप्यप्रसिद्धेस्तुल्यत्वमाह * तुल्यमिति * नन्वसतो गुणयोगासम्भवान्माभूत्तन्निमित्तं गौणत्वमारोपनिमित्तं तु भविष्यतीत्याशङ्क्याह * यत्र हीति * आरोप्याश्रयस्य देवदत्तादेर्गौणत्वं प्रसिद्धं नारोप्यस्य सिंहत्वादेरित्यर्थः । नन्विहाप्यारोप्यस्व खपुष्पस्य गौणत्वासम्भवे ऽप्यारोप्याश्रयस्यात्मनो गौणत्वं भविष्यतीत्याशङ्क्याह * खपुष्पं चेति * खपुष्पमात्मेति गौणप्रयोगवादिमते आरोप्यखपुष्पाश्रयत्वेनाभिमतस्यात्मनो ऽप्यसत्त्वाद्भेदाधिष्ठानत्वेन चाश्रयाश्रयिभावस्य खपुष्पएव खपुष्पारोपस्यानाशङ्कनीयत्वात् आश्रयानपेक्षकेवलारोप्यमात्ररूपतया खपुष्पस्यारोपितार्थाश्रयस्वरूपलोकप्रसिद्ध्यनुसारिलक्षणायोगात् आरोपितार्थवृत्तिशब्दविषयत्वमेवारोपवादिना लक्षणं वाच्यं तच्च मुख्ये ऽपि सिंहत्वादावारोपवादिमते ऽस्तीति अतिव्यापकं लक्षणं स्यादारोपितार्थाश्रयत्वं तु खपुष्पमात्मेति प्रयोगे ऽनुपपत्तेरव्यापकमिति तात्पर्यार्थः। एवमविद्यमानमेव खस्य पुष्पस्य च संसर्गमारोप्य खपुष्पाभावे खपुष्पशब्दप्रवृत्तेरारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणमारोपितार्थवृत्तिशब्दविषयत्वं चार्थारोपवाद्यभिमतमित्यङ्गीकृत्य सिंहत्वे ऽपि सिंहशब्दस्य गौणत्वापत्तेर्दूषणे ऽभिहिते ऽध्यारोपवादी स्वाभिमतमारोपिताश्रयत्वमर्थस्य गौणत्वलक्षणं मनसिकृत्वा खपुष्पस्याप्यारोपितघटादिसत्ताश्रयत्वाद् गौणत्वमस्त्येवेति नाव्यापकत्वं लक्षणस्येति शङ्कते * तत्रैतत्स्यादिति * आत्मन्यारोपितसत्ताकत्वरूपखपुष्पगुणदर्शनेन देवदत्ते सिंहत्ववत् खपुष्पत्वारोपोपपत्तेः । खपुष्पमात्मेति अत्रापि गौणप्रयोगलक्षणसद्भावाद्व्यापकत्वमनाशङ्क्यमेवेति भावः। विद्यमानस्य घटादेर्यत्सद्रूपं तत्तत्र खपुष्पादावारोप्यते प्रातिपदिकार्थः सत्तेति सर्वप्रातिपदिकानां सत्तावाचित्वस्मृतेः। ततश्चारोपितसत्तारूपार्थाश्रयणात्वात् खपुष्पादेर्गौणतास्त्येवेत्यर्थः। सर्वप्रातिपदिकानां सत्तावाचित्वस्याकृत्यधिकरणे निरस्तत्वात् स्मृतेश्च लिङ्गसंख्यान्वययोग्यसिद्धरूपार्थप्रतिपादनमात्रपरत्वात् यदि परं प्रतीतिबलेन खपुष्पशब्दस्य सत्तावाचित्वं वक्तव्यं न च खपुष्पादिशब्दात् सद्रूपप्रतीतिरस्तीति निराकरोति*तदिति*नन्वेवं सति पदात्सदसत्साधारणरूपार्थप्रतीतेरभावस्यापि खपुष्पशब्दवाच्यत्वं न स्यात्। अथ सदसत्साधारणपदार्थस्वरूपमात्रवाचिनो ऽपि पदस्य व्यवहारयोग्यार्थाभिधाने तात्पर्यात् साधारणस्वरूपस्य च व्यवहारायोग्यत्वात् अभाववाचितेष्यते । तथा सति

रवपुष्पं नास्तीति असद्रूपस्य खपुष्पस्य निषेधे सद्रूपत्वापत्तेर्निषेधान्वयसिद्ध्यर्थं खपुष्पशब्दस्य सद्रूपताभिधायितैवेष्टेत्याशङ्क्याह *अवश्यं हीति* यदि कश्चिदाकाशस्यानन्तदेशगतत्वान्न क्व चिद्देशे पुष्पमस्तीत्यवधारणाऽशक्तेः। खपुष्पशब्दस्याभावेन सम्बन्धग्रहणाऽयोगाद्भावा ऽभावसन्देहे चाभावज्ञानस्य भावज्ञानसापेक्षत्वात् सद्रूपेणैव खपुष्पस्यानुभवमाशङ्क्य तं प्रत्युदाहरणान्तरं निषेधान्वयस्तु समासार्थकथनार्थो भविष्यतीत्याशयः। ननु घटादेः सद्रूपस्यैव वाच्यत्वदर्शनात् शशविषाणादेरपि वाच्यत्वसिद्ध्यर्थं प्रमाणानवगतमपि सद्रूपत्वं घटादिगतमारोपयिष्यते इत्याशङ्क्याह * न चेति * सम्बन्धिग्रहणपूर्वकसम्बन्धग्रहणापेक्षत्वात्तद्वाच्यत्वस्य योऽर्थो येन रूपेण सम्बन्धिग्रहणकाले गृहीतस्तेनैव रूपेण तस्य सम्बन्धग्रहणात्तद्वाच्यत्वं न्याय्यं न चार्थान्तरस्य सद्रूपत्वग्रहणमात्रेण खपुष्पादौ सद्रूपेण सम्बन्धग्रहणं सम्भवतीत्यर्थः। नन्ववयवद्वारा खपुष्पशब्दस्यार्थप्रतिपादकत्वात्तयोश्च सद्रूपेण खेन पुष्पेण च सम्बन्धानुभवात्तद्रूपप्रत्ययोपपत्तिरित्याशङ्क्याह *ययोरिति* सामासार्थो ऽत्र चिन्त्यते न चासौ सद्रूपतया सम्बन्धग्रहणं विना सद्रूपतयाभिधातुं शक्यतइति भावः। ननु सद्रूपत्वेनाप्रतीतस्य शशविषाणादेरप्रसक्तत्वान्निषेधो न युज्येतेत्याशङ्क्ते * कथं तर्हीति*सद्रूपप्रतीतावपि निषेधानुपपत्तिसाम्यमाह * सदिति * सद्रूपत्वेनापि प्रतीतस्य घटादेर्देशान्तरादौ निषेधदर्शनादात्यन्तिकेत्युक्तम् एतदेव विवृणोति * पश्येति* शशविषाणादौ देशकालाद्यवच्छेदाप्रतीतेरविशेषेण सर्वत्र भावाभावप्रसङ्गादेकत्रैवेत्युक्तम्। ननु वस्तुवृत्त्यैकत्र सदसद्रूपत्वासम्भवे ऽप्यारोपेण सद्रूपतया प्रतीतस्यैकत्र शुक्तिरजतवदविरुद्धो निषेध इत्याशङ्क्ते * तेनेति* येन कारणेनैकत्र वस्तुवृत्त्या सदसत्त्वे विरुध्येते तेनैव कारणेन सद्रूपत्वमारोप्यतइत्युक्तमिति शेषः। खपुष्पे वान्यदारोप्येत खपुष्पं वान्यत्र तस्य त्वसिद्धसद्भावत्वान्नारोप्याश्रयत्वेनारोप्यारोपविषयत्वं युक्तमित्याह * नेति * यथापवरके घटो नास्तीति निषेधो ऽपवरकाख्यस्य निषेधाश्रयस्य निषेध्यघटप्रदेशात् प्रदेशान्तरस्य सद्भावं निषेध्यस्य च घटस्य प्रदेशान्तरे सद्भावमपेक्षते तथारोप्ये ऽप्यारोप्याश्रयस्योषरादेरारोप्य तोयादिप्रदेशान्नद्यादेः प्रदेशान्तरस्य सद्भावमारोप्यस्य च तोयादेः प्रदेशान्तरे नद्यादौ सद्भावमपेक्षते इति प्रदेशान्तरसद्भावशब्दस्यावृत्त्या षष्ठीसमासं सप्तमीसमासं चाङ्गीकृत्य योज्यम्। ननु यद्यपि खपुष्पस्यात्यन्तासत्त्वान्न घटादिसत्तायास्तस्मिन्नारोपस्तस्य वा घटादावारोपः सम्भ-

वति तथापि वृक्षादौ ज्ञातसद्भावस्य पुष्पस्याकाशे ऽध्यारोपो भविष्यतीत्याशङ्क्याह *न चेति* खपुष्पशब्दस्य केसरादिमद्रूपाकाशावयवपरिमाणवाचित्वाद्वृक्षादिपुष्पस्य च तादृप्याभावेन ततो ऽन्यत्वाज्ञान्यस्य वृक्षादिपुष्पस्य सद्भावेनान्यस्याकाशावयवसन्निवेशविशेषरूपपरिमाणात्मकस्यात्यन्तासत्ताकस्यारोपः सम्भवतीत्यर्थः । ननु यथा केशों ऽङ्कादौ मनुष्यमस्तकादिगतकेशेभ्यो ऽन्यत्वे ऽप्याकाशावयवसंनिवेशविशेषरूपपरिमाणात्मकानामत्यन्तासतां केशानामारोपो दृष्टस्तथेहापि भविष्यतीत्याशङ्क्य * असम्बन्धादित्युक्तम् * तिमिरादिविरलीकृता लोकविच्छिन्नास्तमो ऽवयवास्तत्रात्यन्तसौक्ष्म्यकार्ष्ण्यादिदैर्घ्यादिगुणसम्बन्धेन साहश्यात् केशरूपतया ऽऽरोप्यन्ते खपुष्पवृक्षपुष्पयोस्तु सदसद्रूपताया कथं चिदवयवसामान्यसम्बन्धाभावेनासाहश्यान्न केशों ऽङ्कादितुल्यतेत्याशयः । यद्वान्यस्यारोपाश्रयभूतस्यावाकाशस्य सद्भावेनान्यस्यात्यन्तासतः खपुष्पस्यारोपो न सिध्यति सदसतोरेकधर्मसम्बन्धाभावेनासाहश्यादित्यर्थः । अथ वा प्रदेशान्तरस्यारोप्याश्रयस्य खपुष्पस्यासत्त्वात् न घटादिसत्तायास्तस्मिन्नारोपः सम्भवतीति पूर्वग्रन्थेनोक्ते खपुष्पस्यैव तर्हि घटादावारोपो ऽस्त्वित्याशङ्क्यान्यस्य प्रदेशान्तरस्य घटादेः सद्भावमात्रेणान्यस्यारोपविषयस्य खपुष्पस्यारोपो न सिध्यति खपुष्पस्य घटादिनैकधर्मसम्बन्धाभावेनासाहश्यादित्यनेन ग्रन्थेनोच्यते यद्यपि ध्वनिधर्माणामसदृशेष्वपि वर्णेष्वभिव्यङ्क्त्याभिव्यङ्क्तत्वसम्बन्धनिमित्तारोपदर्शनात् पित्तधर्मस्य च पीतत्वस्य चाक्षुषरश्मीनां शङ्खप्राप्तौ राश्मिसंयुक्तानां पित्तावयवानामपि शङ्खप्राप्तेः शङ्खसंयुक्तसमवायनिमित्तारोपदर्शनात् साहश्यादिना केन चित्सम्बन्धेनारोपो भवति न सम्बन्धं विनेति दर्शयितुम् *असम्बन्धादित्युक्तम् * तथापि द्रव्यस्य द्रव्यान्तरे साहश्यं विनारोपादर्शनात् साहश्याभावार्थत्वेन व्याख्यातम् । ननूषरेण तोयस्य साहश्यादिना केन चित्सम्बन्धाभावात् कथं तत्र तोयादेरारोप इत्याशङ्क्ते * कथमिति * तोयस्य सदूरूपत्वे साहश्यादिसम्बन्धसद्भावात् शौक्ल्यचञ्चलत्वादिधर्मकराश्मिसंयुक्तेनोषरेण सह साक्षात् साहश्याभावे ऽप्यूषरसंयुक्तरश्मिसाहश्यादारोपोपपत्तिरित्याशयेन परिहरति * प्रदेशान्तरेति * खपुष्पस्यासम्भवादारोपासम्भवे ऽभिहिते तोयस्याप्यसम्बन्धादारोपो न स्यादित्याशङ्क्यार्थप्रतीतेरन्यन्तासत्त्वाभिप्रायस्य च प्रत्यक्षविरोधेनानुपपत्तेस्तन्निरासार्थं तोयस्य सद्भावादूषरसम्बन्धप्रतीतेरिति

१ षसंपन्नादिति २ पु० पा० ।

व्याख्येयम् । सम्बन्धानपेक्षणे च तत्रासतो ऽत्यन्तासतश्च विशेषाभावात्तत्रासदपि भ्रान्तौ प्रकाशते ऽत्यन्तासत्तु न प्रकाशते इति व्यवस्थाहेत्वभावात्परिभाषामात्रापत्तेरत्यन्तासतो ऽपि शुक्तिरजतताद्रात्म्यस्य प्रकाशनदर्शनात् प्रदेशान्तरसत्ताया न कश्चिदुपयोगः।अत एव च प्रज्ञातगुणसत्ताकमित्यत्र गुणग्रहणं कृतम् । ननु शशविषाणस्य निषेधानुपपत्तौ शशविषाणं नास्तीति नास्तिशब्दप्रयोगः कथं घटेतेत्याशङ्क्य ते * कथमिति * नायं नास्तिशब्दो निषेधार्थः किं त्वनुवादमात्रमिति परिहरति * पूर्वेणेति * अप्राप्तस्यानुवादानुपपत्तिमाशङ्क्य * पूर्वेणैवेत्युक्तम् * प्रमाणान्तरेण कदा चिच्छशशृङ्गानुपलब्धेः । शशे विषाणमस्तीति विग्रहवाक्यार्थे समासायोगादभावाख्यप्रमाणावगतस्यात्यन्ताभावस्यैव सम्बन्धग्रहणसम्भवात्समासार्थत्वोपपत्तेः। शशे विषाणं नास्तीति विग्रहवाक्यार्थे ऽन्तर्णीतनिषेधो ऽयं समासश्चन्द्राननमित्यन्तर्णीतवत्यर्थो यथेति अवधारणाच्छशविषाणशब्दस्यात्यन्ताभाववाचित्वप्रतीतेः । शशविषाणशब्देनैव भावावगमान्नास्तिशब्दस्यानुवादत्वोपपत्तिरित्यर्थः। अनुवादमात्रानर्थक्यापत्तेरपरितोषादभावसामान्यस्य नास्तिशब्दोक्तस्य विशेषणार्थो ऽत्यन्ताभावाख्यविशेषवाचिशशविषाणप्रयोग इति परिहारान्तरमाह * अथ वेति * नन्वीदृशएव विशेषणविशेष्यभावो न तु विपरीत इति कथं निश्चेयमत आह * नेति * अर्थद्वारशब्दयोर्विशेषणविशेष्यभावः । न चाभावसामान्येनात्यन्ताभावाख्यविशेषरूपं शशविषाणं विशेष्यते गोत्वादिसामान्यं हि बाहुलेयादिविशेषान्तरे व्यभिचाराच्छाबलेयादिविशेषेण विशेष्यमाणं दृष्टं विशेषस्य व्यभिचारात् सामान्येन विशेषणं न युक्तमित्यर्थः । एवमपि शशविषाणादिशब्दादेव कर्कादिवद्व्यभिचाराभावेन विशेषान्तर्गतसामान्यप्रतीतेरपि सिद्धेर्नास्तिशब्दानर्थक्यमपरिहार्यमित्यपरितोषात्प्रमाणान्तरेण शशे शृङ्गाप्रतीतावपि शशविषाणशब्दादेव वस्तुतो ऽत्यन्ताभाववचनादपि भ्रान्तस्य संसर्गप्रतीतिं वारयितुम् अयं निषेध इति परिहारान्तरमाह * अथ वेति * नन्ववयवार्थग्रहणे षष्ठ्यर्थ- ३२४।१
स्मृतिप्रसङ्गे ऽपि योग्यानुपलब्ध्या शशस्य शृङ्गराहित्यावगमात् कथं संसर्गभ्रान्तिरित्याशङ्क्य * न चेत्युक्तम् * एवं त्वाभाववाचित्ववादिनं प्रति प्रयोगानुपपत्तेरपरिहारेणापरितोषात् स्वमतेन समासार्थकथनार्थत्वं नास्तिशब्दस्य द्योतयितुमाह * अथ वेति * शशे विषाणं नास्तीति विग्रहवाक्यसूचनार्थम् * विनैवेत्युक्तम् * शृङ्गोत्पत्त्याश्रयत्वे निषेधविवक्षासूचनाय *अधिकरणत्वेनेत्युक्तम्*

विषाणास्याधेयत्वाविवक्षायामपि प्रथमाया एव प्रयोज्यत्वात्तस्याश्च निर्देशार्थत्वेनैव प्राप्तेर्विषाणं च निर्हिश्येतेत्येतावदुक्तम्।नन्वसतोऽध्यारोपं विनाधेयत्वनिर्देशायोगात् परपक्षापात्तिरित्याशङ्क्य * गवादीत्युक्तम् * शशगतस्य शृङ्गस्य निर्देशो नारोपं विना युज्येत गवादिगतस्य तु प्रमाणसिद्धत्वान्नारोपापेक्षेति भावः । गवादिगतस्य निषेधानुपपत्तिमाशङ्क्य निषेधभूतस्य शशसम्बन्धविषयत्वं वक्तुम् *तयोरित्युक्तम्* शशविषाणयोः सम्बन्धस्याप्रसक्तेर्निषेधानर्थक्यमाशङ्क्य शशविषाणस्यात्यन्ताभावेन सह वाच्यवाचकसम्बन्धकथनार्थत्वसूचनार्थं तेनैवेत्युक्तम्। चन्द्राननेन समासार्थकथनार्थं चन्द्र इवाननमिति विग्रहवाक्यवच्छशविषाणसमासार्थकथनार्थेन शशे विषाणं नास्तीति विग्रहवाक्येनानुभूतस्य सम्बन्धस्य श्रोतुः शशविषाणशब्दः तद्वाक्यप्रतिपाद्यमेवात्यन्ताभावं गमयिष्यतीत्येतदर्थं नास्तिशब्दप्रयोग इति व्यवहितेनान्वयः। क्रियायां च क्रियार्थायामिति लृङः क्रियार्थक्रियोपपदानिमित्तत्वात् गमयिष्यतीत्येतदर्थमित्यर्थो लभ्यते शशविषाणं नाम किमित्यपेक्षायामकदेशेन विग्रहवाक्यसूचनार्थे नास्तीति शब्दप्रयोग इति तात्पर्यार्थः । शशे विषाणं नास्तीति विग्रहवाक्यस्य निषेधपरत्वमभ्युपगम्य समासार्थकथनप्रयोजनं तेनैवानुभूतसम्बन्धस्येत्यनेन सूचितम्। वस्तुतस्तु भावान्तरमभावोऽन्यो न कश्चिदनिरूपणादित्यनेन न्यायेन भावनिरपेक्षस्याभावस्य वक्तुमशक्यत्वात् शृङ्गाकारेण परिणतः शशमूर्द्धैव भावरूपो विग्रहवाक्यार्थ इति निषेधार्थत्वाभावान्नारोपापेक्षेत्याह * अथ वेति * ततश्च शशविषाणं नास्तीत्यत्राप्येकदेशेन समासार्थकथनार्थविग्रहवाक्यसूचनार्थस्य नास्तिशब्दस्याप्यसावेव विषय इति निषेधार्थत्वाभावादारोपाभावेऽपि प्रयोगविरोध इति निषेधार्थत्वाभावादारोपाभावेऽपि प्रयोगाविरोध इति कथं तर्हि शशविषाणं नास्तीति प्रयोग इत्याशङ्क्यानिरासमुपसंहरति * इतीति * भावस्यापि नास्तिबुद्धिविषयत्वं दृष्टान्तेनोपपादयितुं वृद्धसम्मतिमाह * तथा चेति * तिष्ठतेर्गतिनिवृत्तौ स्मरणेऽपि पूर्वो सन्ध्यां जपंस्तिष्ठेदित्यादावूर्ध्वावस्थाने प्रयोगाद्वस्तुवाचितोक्ता । स्वातन्त्र्यमात्रं चाभावस्य नास्तीति अभिप्रेतं न सर्वात्मना निरूपणाभावः सदसद्विवेकाभावप्रसङ्गादिति । एवं तवैवायं दोष इत्यनेनारोपितार्थवृत्तित्वस्य गौणत्वलक्षणस्याव्यापकत्वं दोषं प्रतिज्ञातम् । खपुष्पस्यात्मन्यारोपायोगात्तदारोपेण खपुष्पस्यात्मनि वृत्त्यनुपपत्तेः खपुष्पमात्मेति गौणप्रयोगे लक्षणासम्भवेनोपपाद्यम् । नन्वेवं सति खपुष्पादीनां स्वार्थाविनाभू-

तगुणाभावात् गौणप्रयोगाभावप्रसंङ्ग इत्यनेनाशङ्कितं गुणयोगनिमित्तवृत्तित्वस्य गौणलक्षणस्याव्यापकत्वं परिहरति * तेनेति * आरोपितस्य खपुष्पादेर्गुणायोगाद्वास्तवत्वप्रतिपादनार्थो लब्धशब्दः मुख्यार्थान्तराभावादित्यादिनोपपादितस्य मुख्यत्वस्य गौणप्रयोगोपपादनोपयोगसूचनार्थो मुख्यशब्दः। येन कारणेन लब्धो वास्तवोऽत्यन्ताभावाख्यो वाच्यो ऽर्थः शशविषाणादिशब्दानां तेनान्यत्राप्यात्मादौ शशविषाणमात्मेति गौणः प्रयोगः सिद्ध इत्यर्थः। तन्निमित्तगुणाभिधानार्थम्। प्रसिद्धीत्युक्तम्। वस्तुतः सद्रूपत्वेन या प्रसिद्धिः ततो ऽन्येन प्रकारेणाद्रूपत्वेनावस्थानं नाम खपुष्पादेर्गुण इति भावः। मुख्यशब्दसूचितम् मुख्यत्वस्य गौणत्वोपयोगं प्रकटयितुमाह * तव त्विति * आरोपवादिनो ह्याकाशस्य पुष्पस्य च संसर्गः खपुष्पशब्दस्य मुख्यो ऽर्थो ऽभिमतः। तस्य च वस्तुतो ऽसत्त्वात्तत्पूर्वको गौणो न सिध्यदिति भावः। लब्धमुख्यार्थानामिति मुख्यशब्देनैव न चैतस्य लोके गौणत्वप्रतीतेरिति खपुष्पगौणत्वप्रतीतेरिति खपुष्पगौणत्वनिरासस्यार्थाद् गौणप्रयोगोपपादनोपयोगं सूचितं प्रकटयितुमाह * यदि चेति * पुष्पाकाशयोः संसर्गारोपेण स्वार्थे ऽत्यन्ताभावे खपुष्पशब्दस्य गौणतारोपवादिनो ऽभिमता तथा च सत्यात्मनि गौणत्वं न स्यादित्यर्थः। एतदेवोपपादयति * न हीति * नन्वग्निशब्दस्यापि गौणमाणवकद्वारान्यत्र गौणत्वं कस्मान्न भवतीत्याशङ्क्य षष्ठं न्यायमाह * तथा चेति * प्रतिनिधावुपात्ते ऽपचरिते प्रतिनिधिसदृशमुपादेयं मुख्यसदृशं वेति सन्देहे प्रतिनिधेरुपात्तत्वेन शास्त्रपरिगृहीतत्वात्तादृशोपादाने प्राप्ते वचनात्त्वन्याय्यमभावे तत्सामान्येन प्रतिनिधेरभावात् इतरस्येति सूत्रादभावे तत्सामान्येन प्रतिनिधिरिति पदत्रयानुषङ्गेण प्रतिनिधावुपात्ते तदभावेन तत्सामान्येन प्रतिनिधिर्नोपादेयः मुख्यावयवोपादित्सयोपात्तस्यापि प्रतिनिधेरचोदितत्वेनेतरसाम्यादिति षष्ठे वक्ष्यते तेनैव न्यायेन माणवकस्याप्यवाच्यत्वसामान्यान्नाग्निशब्दस्य तद्द्वारा ऽन्यत्र गौणतेत्याशयः। यदप्यसद्रूपस्यारोपाभावे सांख्यादिकल्पितप्रधानादिनिषेधो न * सम्भवतात्युक्तम् * तदप्यनुभाषणपूर्वकं परिहरति * ये ऽपीति * परमाणुकारणवादिभिर्वैशेषिकैः परमाणुभ्यो ऽन्यदेव प्रधानरूपं शरीरात्मवादिभिश्चार्वाकैः शरीरादन्यादृगात्मरूपं शरीरादित्यादिशब्दोपात्तज्ञानसन्तानात्मवादिभिर्बौद्धैर्ज्ञानसन्तानादन्यादृगात्मादी-

१ पूर्वपक्षसूत्रादित २ पु. पा.।

त्यादिशब्दोपात्तपृथिव्यप्तेजोवायव्याख्यचतुष्टयतत्त्ववाचिभिश्चार्वाकै-
स्तेभ्यो ऽन्याहक्रूपशब्दोपलक्षितमाकाशादितत्त्वं नास्तीति वर्ण्यत-
इति योज्यम् । श्लोकं व्याचष्टे * प्रधानादीति * एवं स्वार्थाभिधा-
नेनेति भाष्यमुपसंहारार्थत्वेन व्याख्यातुमाह * तस्मादिति * ए-
वमिति गुणाश्रया इति सूत्रावयवसूचितं गौणवृत्तिलक्षणाभिधाना-
र्थं कथमगुणवचनो गुणं ब्रूयादिति भाष्यं व्याख्याय प्रकृतोदाहरणे
कीदृशो गुणसम्बन्ध इति प्रश्नोत्तरत्वेन तत्सिद्धिशब्दव्याख्यानार्थं
३२५।२ इह त्विति भाष्यं व्याचष्टे * अतश्चेति * प्राप्नोति परमां सिद्धिमि-
त्यादावीप्सिते कार्ये सिद्धिशब्दप्रयोगात्तस्य मुख्यस्यार्थस्य सिद्धिः
कार्यमस्येति व्यधिकरणबहुव्रीहिणा तत्सिद्धिशब्देन तत्कार्यकारिता
उक्तेति दर्शयितुं स्वार्थस्य यजमानस्य या सिद्धिः कार्यं * तत्कर-
त्वमित्युक्तम् * भाष्यं तु कीदृशः प्रस्तरादेर्यजमानगुणसम्बन्ध इति
पृष्टे यजमानसिद्धिकरः प्रस्तरादिरिति योज्यम् सर्वो हीत्यादिभा-
ष्यं संक्षिप्य व्याचष्टे * प्रस्तरेति * तस्मादित्युपसंहारभाष्योपे-
क्षया विध्यर्थवादविचारानादरः सूचितः । जात्यादिविषयभूतेष्व-
प्याग्नेयाद्युदाहरणेषु विध्यर्थवादविचारोपक्रमस्य गुणवादनिमित्ता-
भिधानावसरकरणार्थत्वान्न विध्यर्थवादविचारे ऽभिनिवेष्टव्यम् । इति
सूचयितुमाह * एतेनेति * तत्सिद्धेर्गुणवादनिमित्तत्वाभिधानेन
जात्यादीन्यपि तन्निमित्तत्वेन व्याख्यातानीत्यर्थः ।

॥ आग्नेयादिशब्दानां ब्राह्मणस्तुत्यर्थत्वाधिकरणम् ॥ १३ ॥

जातिः ॥ २२ ॥

भाष्योक्तोदाहरणं दूषयति* तत्रेति*अर्थवादान्तरोक्तप्रजापति-
मुखाद्येकप्रकृतिप्रभवत्वेन ब्राह्मणादीनामग्न्यादिभिर्भ्रातृवत् सम्बन्ध-
सद्भावादर्थवादोक्तस्यापि च सम्बन्धस्यान्यैः स्तुवतइत्यादिषु मुख्य-
शब्दप्रवृत्तिनिमित्तत्वदर्शनात् ब्राह्मणादिष्वाग्नेयादिशब्दानां मुख्यते-
त्याशयः । ननु देवतातद्धितस्येह मुख्यत्वं न सम्भवतीत्याह * ये-
नेति * सर्वत्राग्निकलिभ्यां ढगिति सम्बन्धमात्रे ऽग्निशब्दात् ढक्-
स्मृतेस्तस्येदमिति चाण्प्रत्ययस्यापि तन्मात्रे स्मृतेर्नायं देवतातद्धित
इति भावः । त्रैवर्णिकानां वा यागाधिकारित्वाद्यागदेवताभिराग्ने-
यादिभिर्देवतासम्बन्ध एव वक्तुं शक्यतइत्याह * देवतेति * ननु
देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धित्यज्यमानं हविरेवापे-
क्ष्य प्रवृत्तेः शिष्यस्यैव गुरुसम्बन्धवत्तत् विषयएवं देवतासम्बन्धो

१ भ्रातृत्वेति २ पु० पा० ।
२ विषयस्थाने ऽविषयइति २ पु० पा० ।

नान्यस्येत्याशङ्क्याह * न हीति * त्यक्तारमपेक्ष्य देवताशब्दस्याप्रवृत्तावपि देवतोद्देशपूर्वकद्रव्यत्यागाख्यैककक्रियाविषयनियमलक्षणत्वात् द्रव्यदेवतयोः सम्बन्धस्यैतस्य च त्यक्रपेक्षत्वात् येन देवतोद्देशपूर्वकद्रव्यत्यागाख्यैककक्रियासम्बन्धेन द्रव्यस्य सम्बन्धिनी देवता तेनैव त्यक्तुरपीत्यर्थः । त्यक्तुरपि देवतासम्बन्धं भाष्यकृतः संमतिमाह * यथेति * आग्नेयो ब्राह्मणः स सोमेनेष्ट्वा ऽग्नीषोमीयो भवति यदेवाद पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत्तर्हि स उभयदेवतो भवतीत्यनेन सोमयागादूर्ध्वं ब्राह्मणो ऽग्नीषोमदेवतो भवतीत्याभिधानादग्नीषोमीयहविर्मात्रमुत्कृष्यते न दर्शपौर्णमासौ नापि नापि कृत्स्ना पौर्णमासीत्युक्तेः, कथं पुरुषस्य देवतान्वय इत्याशङ्क्यैतत्पक्षमे भाष्यकृतोक्तं दूषणमुपसंहरति * तस्मादिति * स्वयमुदाहरणान्तरमाह * अत इति * नन्वग्न्यादिगुणस्य ब्राह्मणादिष्वदर्शनात् कथमत्र गौणप्रयोगोपपत्तिरित्याशङ्क्याह * अग्निरिति * भाष्यकृता गुणवादनिमित्ताभिधानावसरार्थं को गुणवाद इत्यनेन वादशब्दमुद्यतइति कर्मव्युत्पत्त्या ऽभिधेयवाचिनमङ्गीकृत्य कर्मधारये को गुणो विवक्षित इति पृष्ट्वाग्निसम्बन्ध इत्यनेनाग्नेयशब्दवाच्यस्याग्निदेवत्यस्य हविषो ऽग्निसम्बन्धो गुणो ब्राह्मणे विवक्षित इत्युत्तरं दत्तं कथं ब्राह्मणस्याग्निसम्बन्ध इति पृष्ट्वा तदुत्तरत्वेन जातिशब्दव्याख्यानाय * एकजातीयत्वादित्युक्तम् * तत्सामान्यवाचितया जातिशब्दव्याख्यानार्थमिति शङ्कां निवर्त्तयितुमाह * जातिरिति * जातिशब्दस्याद्यभावविकारवाचित्वज्ञापनार्थं जन्मेत्युक्तं जायते ऽस्मादिति व्युत्पत्त्या प्रकृतिवाचित्वज्ञापनायोपादानशब्देनोत्पत्तिहेतुः प्रकृतिरुक्ता । तच्छब्दानुपङ्क्तेण तस्य मुख्यस्याग्नेया जातिः प्रकृतिः सैव यस्य ब्राह्मणस्य जातिरिति पूर्ववद्बहुव्रीहिणा तज्जातिशब्देन द्वयोरेकजातीयतोक्ता भवतीति कृत्वैकजातीयत्वं भाष्यकृतोक्तम् । ननु संसारानादित्वेनाग्निब्राह्मणादेः प्रजापतिमुख्यादिप्रकृतिकत्वं नास्तीति किमेकजातीयकत्वमिति भाष्येणाशङ्क्यार्थवादोपन्यासस्याशङ्कानिरासार्थत्वं सूचयितुमाह * यद्यपि चेति * अन्तरशब्देनाग्नेयो ब्राह्मण इत्यस्याग्नेयमष्टाकपालं निर्वपेत् ब्राह्मणो ब्रह्मवर्चसकाम इति विध्यन्तरशेषत्वेनार्थवादत्वसिद्धान्तानुसन्धानं सूचितम् । एकस्मिन्निति भाष्यतात्पर्यं वक्तुमिहेत्युक्तम् । इहोदाहरणे ऽग्न्यादिशब्दस्य ब्राह्मणादौ प्रवृत्तिनिमित्ततां प्रतिपत्स्यतइत्यर्थः । स्वरूपार्थस्त्वग्निर्हीत्यनेनैवानागतावेक्षणेनोक्तः ॥

॥ युपादिशब्दानां यजमानस्तुत्यर्थत्वाधिकरणम् ॥ १४ ॥

सारूप्यात् ॥ २२ ॥

लिङ्गसमवाया इति द्वन्द्वसमासे प्रथमाबहुवचनदर्शनात् तत्सिद्धिश्च जातिश्च सारूप्यं च प्रशंसा च भूमा च लिङ्गसमवायश्चेति प्रथमयैव सर्वत्र विगृहीतव्ये ऽपि प्रस्तरादेर्यजमानादिसारूप्यं तत्कार्यकरत्वादिधर्मसामान्यात् सम्भवदपिशब्दस्य तत्कार्यकरत्वादिमात्रे पर्यवसानेन शाब्दबुद्धिविषयत्वाभावात् अविषयस्य च प्रतिपादनात्मकशब्दप्रवृत्तिनिमित्तत्वायोगात् न शब्दप्रवृत्तिनिमित्तं यूपस्त्वादित्ययजमानसारूप्यं शब्दप्रतीतिविषयत्वाच्छब्दप्रवृत्तिनिमित्तमिति वैषम्यं दर्शयितुं पञ्चम्यध्याहृता गुणाश्रयशब्देन सर्वेषां गौणत्वनिमित्तत्वे ऽभिहिते पुनः सारूप्यस्य निमित्तत्वाभिधानाच्छाब्दबुद्धिविषयत्वात्मकनिमित्तत्वविशेषप्रतीतमेवाशयं शङ्कापूर्वकं विवृणोति * नन्विति * सारूप्य विना गौणत्वाभावात्तस्य गौणत्वनिमित्तत्वे ऽपि बोधकत्वातिरिक्तायाः शब्दस्य वृत्तेरभावान्निर्विषयायाश्च बुद्धेरसम्भवाच्छाब्दबुद्धिविषयस्यैव शब्दवृत्तिनिमित्तत्वं वाच्यम् । न शब्दतात्पर्यावधारण विना शाब्दबुद्धिविषयत्वं युक्तम् । तत्कार्यकरत्वादिनिमित्ते च सारूप्ये तन्मात्रपर्यवसितस्य शब्दस्य तात्पर्यावधारणमशक्यम् । इह तु प्रत्यक्षत्वेन सारूप्यस्य प्रथमं प्रतीतेस्तत्रैव शब्दस्य तात्पर्यावधारणाच्छाब्दबुद्धिविषयत्वेन शब्दप्रवृत्तिनिमित्तत्वं युक्तमित्याशयः । चक्षुर्ग्राह्ये सादृश्ये तात्पर्याख्यविवक्षावधारणसम्भवात् शाब्दबुद्धिविषयत्वरूपशब्दप्रवृत्तिनिमित्तत्वाविशेषाभिधानार्थं तत्कार्यकरत्वादिहेतुकेभ्यः सद्भावमात्रेण गौणत्वनिमित्तेभ्यः सादृश्येभ्यो ऽस्य पृथगसाधारण्येनोपादानमित्यर्थः । अशक्यत्वादिति सिद्धान्तभाष्यं यजमाने ऽपि पशोर्बन्धुं शक्यत्वात् अयुक्तमाशङ्क्याह * यजमानस्य हीति * खलेवालीवदयूपस्यैव यूपकार्ये विधानात् यूपनिष्पत्तिमात्रापवर्गिणां धर्माणां निवृत्तावप्युत्तरवेदेः प्राग्देशे पशुधारणस्य निखननस्य च पशुनिरोधार्थत्वेन यूपकार्यान्त पातात्तत्कार्यापन्ने यजमाने प्राप्ते दक्षिणोपविष्टस्य पदार्थकरणविरोधप्रसङ्गादशक्यतेति भावः । आदित्यस्य यूपकार्यार्थत्वनिरासः कस्माच्च कृत इत्याशङ्क्य स्पष्टत्वादिति सूचयितुमाह * सहस्ररश्मेरिति * ननु दारुमय्यामादित्यप्रतिकृतौ शङ्कां पशुबन्धनमित्याशङ्क्याह * यदि चेति * प्रतीयमानयूपोच्छ्रयणविध्येकवाक्यत्वत्यागापत्तिदोषसूचनार्थम् * नास्तिक्यादित्युक्तम् * ननु श्येनचितं चिन्वीतेत्यादौ सादृश्यसम्पत्तेरपि विधिविषयता

दृष्टेत्याशङ्क्याह * तदिति * स्तुतौ गौणत्वसम्भवे विधौ तदाश्रयणं ३२६।१ न युक्तमित्याशयः ॥

॥ अपश्वादिशब्दानां गवादिस्तुत्यर्थत्वाधिकरणम् ॥ १५ ॥

प्रशंसा ॥ २२ ॥

गोअश्वान् प्रशंसितुमित्यादिभाष्यात् प्रशंसायाः प्रयोजनत्वेन रामस्येव वेतनदाने निमित्ततोक्तेत्याभाति तस्याश्च सर्वत्र प्रयोजनत्वाविशेषादिहोपादानमनर्थकमित्याशङ्क्य * नन्विति * नात्र प्रयोजनत्वेन निमित्तत्वं विवक्षितं किं तु प्रसह्यकारित्वादिवदभिधेयलक्ष्यमाणगुणत्वेनेत्याशयेन परिहरति * फलमिति * ननु गवाश्वव्यतिरेकेष्वजादिष्वपि पशुशब्दप्रवृत्तौ प्रशंसाया निमित्तत्वं न सम्भवति गवाश्वावुपादेयत्वेन विहितौ प्रशंसितुमन्यान्यपां निन्दाया विवक्षितत्वात् इत्याशयेन कथं प्रशंसाप्रवृत्तिनिमित्तत्वमिति पृच्छति * कथमिति * नञ्समासावयवभूतस्य पशुशब्दस्य समासान्तर्गत्या ऽजादिषु प्रवृत्तौ प्रशंसानिमित्तमित्याशयेनोत्तरमाह * गवेति * नञ्समासावयवभूतेन पशुशब्देन प्रशस्ततां लक्षयित्वा नञ्समासेनान्यपशुषु तदभावः कथ्यतइत्यर्थः । ननु पशुशब्दस्य नञ्समासे कृते निषेधपर्यवसायित्वादकृते च परशब्दत्वाभावान्न प्राशस्त्यलक्षणार्थता युक्तेत्याशङ्क्य * पूर्वमित्युक्तम् * समासविध्यर्थं तद्योग्यार्थलक्षणा गङ्गावास्यादिशब्दवदविरुद्धेत्याशयः । नन्वजादेरपि पयोदानाद्युपकारित्वेन प्राशस्त्यसद्भावान्निषेधानुपपत्तिरित्याशङ्क्य * गवेत्युक्तम् * गवाश्वान्यत्वोक्त्या तद्गतप्राशस्त्यातिशयलक्षणार्थतावसीयतइत्याशयः । उदाहरणान्तरविषयावादिशब्दौ। ननु पशुत्वाभाव एव नञ्समासेन कस्मान्न कथ्यतइत्याशङ्क्याह * नेति * पशुत्वस्यायं निषेधस्तल्लक्षितस्य वा यागादिकार्यस्य पुत्रकार्यमकुर्वतीव पुत्रे न ममैष पुत्र इति । तत्राद्ये प्रत्यक्षविरोधो द्वितीये ऽग्नीषोमीय इत्यादिवचनविरोध इत्यर्थः । अनेन चोत्पत्तिरनर्थिकास्यादिति भाष्यावयवगतेनोत्पत्तिशब्देन प्राथम्यगुणयोगात्पशुयज्ञसत्रग्राहिप्रत्यक्षमुक्तम् तस्य च निर्विषयत्वापत्तिः स्वरूपनिषेधे ऽनर्थिकेत्यनेनोक्ताम् कार्यनिषेधे वचनविरोधो विध्यन्तरं चेत्यनेनोक्त इति व्याख्यातम् । ननु विकल्पाङ्गीकरणेन विरोधः परिहरिष्यते ऽत आह * न चेति * नन्वगत्या वैषम्ये ऽपि विकल्पः स्यादित्याह * स्तुत्या चेति * न च मुख्यार्थत्यागापत्तेस्तुत्यर्थत्वासम्भवः । कार्यलक्षणायामपि तुल्यत्वादित्याह * तुल्य-

श्चेति * गवाश्वव्यतिरिक्तस्य च पशुकार्यकरत्वनिषेधे पारिशेष्यात् गवाश्वस्य पशुकार्यकरत्वसिद्धेस्तदुपादानानर्थक्यम् ।प्राशस्त्यनिषेधे तु गवाश्वगतं प्राशस्त्यविषयत्वं निषेधस्य ज्ञापयितुं पशुशब्दस्य गवाश्वशब्दसामानाधिकरण्योपादानमनर्थकमित्याशयेनाह * पशव इति * ननु पशुस्वरूपस्य तत्कार्यस्य वा निषेधासम्भवे ऽपि पशुगता क्रिया गुणो वा अजादौ निषेत्स्यतइत्याशङ्क्याह * न चेति * पशुमात्रवर्तिक्रिया गुणसामान्यं वा निषिध्येत गवाश्वगताः क्रिया गुणविशेषा वा आद्ये पूर्ववत्प्रत्यक्षविरोधः द्वितीये योग्यानुपलब्धितो ऽपि ज्ञातुं शक्यत्वान्मन्दफलत्वम् अन्यगतस्य विशेषस्यान्यत्रासम्भवादन्यशब्देनैव सिद्धेरत्यन्तानर्थक्यमित्यर्थः । ननूक्तेन प्रकारेण नञ्समासस्य निषेध्यान्तरासम्भवात्प्राशस्त्यस्य निषेधकत्वे प्रशंसालक्षणार्थत्वाभावान्न प्रशंसोदाहरणत्वं युक्तमित्याशङ्क्यानिरासाय श्लोकगतपूर्वशब्दोक्तम् निषेधान्वयात् प्राक् समासावयवभूतेन पशुशब्देन प्राशस्त्योपादानमुपपादयति * अवश्यं चेति * नन्वेवं सति केवलस्य पशुशब्दस्य मुख्यार्थत्वसम्भवात्प्राशस्त्यलक्षणा न युक्तेत्याशङ्क्याह * न चेति * निषेधान्वययोग्यत्वान्न मुख्यो ऽर्थः सम्भवतीत्याशयः । ननु प्राशस्त्यस्यापि क्रियागुणवत् पशुमात्रवर्त्तिनो निषेधाशक्तेर्गवाश्वगतस्य च प्राशस्त्यस्याप्रतीतेर्निषेधो न सम्भवतीत्याशङ्क्याह * शक्नुवन्ति चेति * गवाश्वशब्दसमभिव्याहारात् गवाश्वगतप्राशस्त्यातिशयप्रतीतिरित्यर्थः । ननु पशुशब्दोदाहरणे पशवो गो अश्वा इति गवाश्वपदसामानाधिकरण्येन पशुशब्दोपादानात्तद्गतप्राशस्त्यातिशयप्रतीतिसम्भवे ऽप्ययज्ञा ऽसत्रशब्दोदाहरणयोः सामवच्छन्दोमवच्छब्दसामानाधिकरण्येन यज्ञसत्रशब्दानुपादानात्कथं तद्गतप्राशस्त्यातिशयप्रतीतिरित्याशङ्क्यानिरासस्सूचनयादिशब्दः सामरहितस्य वा यज्ञत्वे ऽभिहिते छन्दोमरहितस्य वा सत्रत्वे ऽभिहिते ऽर्थात् सामवान् यज्ञः छन्दोमवत्सत्रमिति सामानाधिकरण्यप्रतीतेः । सामवच्छन्दोमवत्तद्गतप्राशस्त्यातिशयावगतिः सम्भवतीत्याशयः । ननु पशुषु हिताहितविवेकराहित्यादिदोषदुष्टत्वेनाप्राशस्त्यस्यापि भावात्तस्यापि च निषिध्यत्वोपपत्तेरेकान्ततः पशुत्वेन प्राशस्त्यस्य लक्षयितुमशक्यत्वात् नेह प्रशंसाया गुणवादनिमित्तत्वाभिधानं युक्तमित्याशङ्क्याह * यद्यपीति * पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चात्प्राचीनमृषभस्येति गवाश्वविधिप्रक्रमेण तदप्राशस्त्यानपेक्षितत्वात् तदपेक्षितगवाश्वप्राशस्त्यसिद्ध्यर्थं पश्वन्तरप्राशस्त्यस्यैव निषे-

धार्हतेत्यर्थः। ननु पश्वन्तरप्राशस्त्यनिषेधस्य तन्निन्दार्थत्वात् निन्दायाश्च विधिनानपेक्षणात् न गवाश्वविधिना ऽन्वयः सम्भवतीत्याशङ्क्याह *तदिति * गवाश्वप्राशस्त्यरव्यापनार्थो पश्वन्तरानिन्देत्याशयः। पश्वन्तरप्राशस्त्यनिषेधेन गवाश्वप्राशस्त्यख्यापनात्तेषामपि च प्राशस्त्यसद्भावेन तन्निषेधायोगात् कथं तद्द्वारेण गवाश्वप्राशस्त्यख्यापनामित्याशङ्क्य गवाश्वगतप्राशस्त्यातिशयः पश्वन्तरे निषिध्यतइति सूचनार्थस्तरप्प्रत्ययः पश्वन्तरस्य हि प्राशस्त्यातिशये निषिद्धे तत्सद्भाव एव गवाश्वस्य ख्यापितो भवति अनेन च गोअश्वान् प्रशंसितुमित्यादिभाष्यं पश्वन्तरे प्राशस्त्यनिषेधस्य गवाश्वप्राशस्त्यख्यापनपर्यवसानाभिधानार्थत्वेन व्याख्यातं तरपा सूचितमर्थं विवृणोति * एतादिति * पश्वन्तरेष्वपशुशब्दप्रवृत्तेः प्रशंसाया निमित्तत्वमुपसंहरति * एवमिति * गवाश्वादिगता प्रशंसा यस्या प्रति- ३२७।२
षेधस्यापशुशब्दस्य पश्वन्तरेष्वपशुशब्दप्रवृत्तौ निमित्तं स तथोक्तः। ननु पश्वन्तरप्राशस्त्यनिषेधस्य गवाश्वप्रशंसार्थत्वात्कथं प्रशंसाया निषेधं प्रति निमित्तत्वेत्याशङ्क्याह *सा चेति * शब्देनार्थप्रतिपादने कृते तस्य कैमर्थ्याकाङ्क्षायां विध्येकवाक्यत्वेन[1] प्रशंसार्थत्वं कल्पनीयम् परशब्दस्य परत्र प्रवृत्तेर्निमित्तमन्तरेणासम्भवात् प्रथममेव गवाश्वगता प्रशंसा प्रवृत्तिनिमित्तत्वेनाश्रितेति कृत्वा प्रशंसानिमित्तः प्रतिषेध इत्यन्तेनान्वयः। प्रयोजनत्वाभिधानं तर्हि विरुध्येतेत्याशङ्क्याह * अनन्येति * प्रशंसां निमित्तीकृत्य पश्वन्तरेष्वपशुशब्दे प्रवृत्ते पश्वन्तरप्राशस्त्यनिषेधस्य कैमर्थ्यापेक्षायां प्रयोजनान्तरासम्भवान्निमित्तभूतैव प्रशंसाप्रयोजनतया शब्दप्रवृत्तेः पश्चादवगम्यतइत्यर्थः। ननु यजमानादिशब्दानामपि प्रस्तरादिषु प्रवृत्तौ प्रशंसानिमित्तं कस्मान्नेष्टेत्याशङ्क्याह * अन्यत्र पुनरिति * शब्दप्रवृत्तेः प्रथममप्रतीतत्वात् प्रशंसाया निमित्तत्वं न सम्भवतीत्याशयः।

॥ अथ बाहुल्येन सृष्टिव्यपदेशाधिकरणम् ॥ १६ ॥

भूमा ॥ २२ ॥

सृष्टिमन्त्रका उपदधातीति भाष्यावयवात् पदद्वयस्यापि विधित्वाशङ्कानिरासः प्रतिभाति तच्च समस्तवाक्यार्थानर्थक्यापत्तेरयुक्तमित्याशङ्क्योपधानानुवादेन शब्दविधिः पूर्वपक्षिणो ऽपि मतो

१ तरप्रतिषेधेति २ पु० पा०।

२ इत्यतीतेनेति २ पु० पा०।

निरस्यते । सृष्टिशङ्कायास्तु सबीजत्वायाख्यातोपन्यास इति सूचयन् यदीति भाष्यं व्याचष्टे * यदीति * तत्रेत्याशङ्काभाष्यं व्याचष्टे * तत्रेति * तद्वानासामुपधानो मन्त्रइतीष्टकासु लुक् च मतोरिति स्मृतेः । सृष्ट्यभिधायिमन्त्रैरुपधेयानामिष्टकानां सृष्टिशब्दवाच्यत्वावगमे ऽपि कासामिष्टकानां सृष्टिमन्त्रैरुपधानमिति विशेषानवगमात् वाक्यान्तराद्वा विशेषावगमे सत्येतद्वाक्यानर्थक्यापत्तेर्नोपधानानुवादेन सृष्टिसंज्ञकेष्टकाविधिर्विशिष्टविधिर्वा सम्भवतीत्याशयः । ननूपधानानुवादेनेष्टकाविधेरिष्टकाविशिष्टोपधानविधेर्वानुपपत्तावप्युपधानानुवादेन सृष्टिलिङ्गमन्त्रविधिर्भविष्यतीत्याशङ्क्यानिरासार्थं तत्र सर्वासामितिभाष्यं व्याचष्टे * तत्रेति * पूर्वपक्षनिरासभाष्यं व्याख्याय तस्मादिति सिद्धान्तभाष्यं व्याचष्टे * तस्मादिति * भाष्योक्तं सिद्धान्तमाक्षिपति * अत्रेति * उपधानस्याविधेयत्वान्मन्त्रविधेश्च मन्त्राम्नानानुमेयत्वेन प्रदेशान्तरस्थत्वाद्विध्येकवाक्यकल्पत्वाच्चार्थवादत्वस्य तदभावान्नायमर्थवाद इत्यर्थः । विध्येकवाक्यत्वं च विनार्थवादत्वानुपपत्तिर्येन विधीयते तस्य शेषो ऽर्थवाद इति प्रथनार्थवादे ऽभिधानाद्भाष्यकृतो ऽप्यभिमतेत्याह * तथा चेति * भाष्योक्ते ऽर्थवादत्वे निरस्ते यदि कश्चित्प्रकरणप्राप्तमन्त्रेषु पुनः श्रुतेरभ्यादानमन्त्रवद् गुणार्थत्वं शङ्केत तदपि मन्त्रव्यतिरिक्तगुणाश्रवणादयुक्तमित्याह * न चेति *मन्त्रान्तरपरिसंख्यार्थता तु मन्त्रान्तरानर्थक्यापत्त्यैव निरस्तेत्याह * तत्रेति * तस्माद् ग्रहणादिकार्यान्तरपरिसंख्यार्थो ऽयमुपधाने मन्त्रविधिरिति पूर्वपक्ष एव ज्यायानित्युपसंहरति * तत्रेति * नन्वनुपधीयमानाभिरिष्टकाभिश्चयनस्य कर्तुमशक्यत्वादिष्टकाभिरग्निं चिनुतइति इष्टकासाध्यतया विहितेन चयनेनेष्टकोपधानस्यार्थादाक्षेपाद्विधानानर्थक्यमिति शङ्कामनुभाषणपूर्वकं निराकरोति * चयनेनेति * व्यूहविशेषेण च स्थापनमुपधानं तद्विधानाभावे यथाकथं चित्स्थापने ऽपि चयनं सम्भवति समुदितानामपि च स्थापनोपपत्तेर्न प्रत्येकं स्थापनसिद्धिरित्यर्थः । ननु समुदितोपधानस्यापि सम्भवात्तदपि कथं प्रत्येकं सिध्येदिति शङ्कते * नन्विति * विहितत्वेन तस्याङ्गत्वात् प्रतिप्रधानमावृत्तिर्न्यायात्सेत्स्यतीति परिहरति * नेति * उपादेयत्वेनाङ्गत्वं लक्षितम् अर्थाक्षेपस्य श्रुत्यनुमानेन विलम्बितत्वादप्राप्तावस्थस्योपधानस्य शीघ्रप्रवृत्तिना प्रत्यक्षविधिना विधानोपपत्तेर्निष्प्रयोजनत्वमात्रेणाविधानं वक्तव्यम् । अस्तित्वे काध्वर्युकर्तृकत्वसिद्धिर्विधेः प्रयोजनमित्याह * अपि चेति * आध्वर्यवसमाख्यातचयनविधिनापि कल्पितस्योपधा-

नविधेरसमानत्वात्तादृशे चाभियुक्तैराध्वर्यवादिशब्दाप्रयोगेणाध्वर्यवसमाख्यानालाभाद्ध्वर्युकर्तृकत्वं न लभ्यतइत्युक्तम्। ननु चयनस्य समाख्ययाध्वर्युकर्तृकत्वात्तस्य चोपधानार्हते ऽध्वर्युणा कर्त्तुमशक्यत्वात् उपधानस्याध्वर्युकर्तृकत्वं लप्स्यतइत्याशङ्क्यैककर्तृकत्वं चेत्युक्तम्। अन्यसहायेनापि सन्धुक्षणादावन्तरव्यापारे कृते देवदत्तेन पाकः कृत इति लोके व्यपदेशादुपधाने ऽन्यसहायेनापि कृते चयनस्याध्वर्युकर्तृकत्वप्रसिद्धेर्नैकाध्वर्युकर्तृकत्वं सेत्स्यतीत्याशयः। एवं तु सर्ववाक्येषूपधानमात्रविधानात् अभ्यासन्यायेनोपधानभेदापत्तेः सकृद्विहितस्यापि चेष्टकाः प्रत्यङ्गत्वात्प्रतीष्टकमावृत्तिसिद्धेरसकृद्विधिप्रयोजनाभावेनापरितोषात्स्वमतेनार्थाक्षिप्तोपधानानुवादेन मन्त्रविधिरिति पूर्वपक्षमेव न्याय्यं मत्वा प्रकरणप्राप्तमन्त्रेषु पुनः श्रुतेर्मन्त्रान्तरपरिसंख्यार्थत्वासम्भवे ऽपि ग्रहणादिकार्यान्तरपरिसंख्याप्रयोजनत्वं दर्शयितुमाह * न चेति * ग्रहणादीना- ३२८।२
मपि चयनचोदनाक्षिप्तत्वाविशेषेणोपधानतुल्यत्वात् लिङ्गविशेषरहितानां मन्त्राणां प्रकरणादुपधाने ग्रहणादिषु च प्राप्नुवतामुपधानसम्बन्धः पुनःश्रवणमद्वाभिधान्यादानसम्बन्धपुनःश्रवणवत् कार्यान्तरपरिसङ्ख्यार्थं न त्वाज्यभागपुनःश्रवणवदङ्गान्तरपरिसङ्ख्यार्थं येन मन्त्रान्तरानर्थक्यमापद्यतेत्याशयः। पञ्चमे तु मध्यमायां तु वचनात् ब्राह्मणवतीत्यत्र यांवै काञ्चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनवशेनाभिपूर्वस्य जानातेः प्रत्यक्षज्ञानवाचित्वात्-प्रत्यक्षब्राह्मणविहितानाम् इष्टकानामध्यमचित्याश्रयत्वस्य वक्ष्यमाणत्वादिष्टकानां चोपधानकरणभूतमन्त्रान्वयं विना निरूपणाशक्तेस्तद्द्वारेणैव विधेयत्वान्मध्यमचित्याश्रयत्वसिद्धिरप्युपधानसम्बन्धितया मन्त्रविधेः प्रयोजनं भविष्यत्याह * अपि चेति * मन्त्राणामुपधानसम्बन्धो विधेय इत्यर्थः। अनारभ्याधीतानां च मन्त्राणां प्राकरणिकसामान्यसम्बन्धासम्भवादपेक्षलैङ्गिकविनियोगानुपपत्तेरप्राप्तविधिरेव भविष्यति इत्याह * ये त्विति * ननु सृष्टिमन्त्राणां विधानाभ्युपगमे ऽर्थवादत्वसिद्धान्तो भज्येतेत्याशङ्क्याह * न चेति * गुणाश्रया इति सूत्रान्ते गुणवादनिमित्तत्वाभिधानदर्शनात्तादर्थ्यनिश्चयसूचनार्थः सूत्रावयवे सूत्रशब्दः सकलसूत्रविषयत्वे वा तल्लिङ्गे तत्सिद्ध्यादेरप्युपलक्षणार्थम्। ननु भूमेत्येतावदेव सूत्रं तत्सिद्ध्यादेरेकसूत्रत्वेनादौ पठितत्वाद् देवतावतश्चावाचकत्वात् तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादिष्वाद्यचतुर्दशान्त्यव्य-

तिरिक्तेषु चतुर्दशसु सृजधातुयोगात् सृष्टिलिङ्गेष्वेकया स्तुवतप्रजाधीयन्त प्रजापतिरधिपतिरासीत्सप्तविंशत्या स्तुवत द्यावापृथिव्यौ तां वसवो रुद्रा आदित्या अनुव्यायंस्तेषामाधिपत्यमासीत् त्रयस्त्रिंशता स्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीदित्याद्यचतुर्दशान्त्येषु त्रिष्वसृष्टिलिङ्गेषु भूयस्त्वनिमित्ता सृष्टिशब्दस्य प्रवृत्तिरित्येतावन्मात्रस्यानेन सूत्रेण कथनात् नार्थवादत्वं प्रतिपाद्यतइत्यर्थः । ननु भाष्यकृतार्थवादत्वस्योक्तत्वात् सूत्रस्यापि तादर्थ्यमवसीयतइत्याशङ्क्याह * अत इति * युक्त्यागमानुपेतत्वादुपेक्ष्यं तद्भाष्यमित्याशयः । किमर्थं तर्हि भाष्यकृतार्थवादतोक्तेत्यपेक्षायामाह * भाष्यकारेण त्विति * एतमेव भाष्यकाराभिप्रायं प्रकटयितुमपि चेतिभाष्यं व्याचष्टे * एकयेति * प्रतीकेन सप्तदशमन्त्रसमुदायात्मकसर्वो ऽनुवाको गृहीत इति सूचनार्थो ऽनुवाकशब्दः । मुख्यलक्षणायाः क्व चिदहत्वादित्यन्तानौचित्यसूचनायाद्यशब्दः आत्मत्यागान्यद्वारस्वीकारयोरिव स्वार्थस्यापि त्यागान्यद्वारस्वीकारयोरत्यन्तानौचित्यसूचनार्थे शब्दार्थयोरभेदोपचारेण स्वार्थविषयावात्मशब्दौ सृष्टीरुपदधातीत्युपक्रम्यैकया स्तुवतेत्यादिसप्तदशमन्त्रोपधानसाधनिकानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा यत्सप्तदशेष्टका उपदधातीत्युपसंहारात् सृष्टिशब्दस्य सप्तदशमन्त्रविषयत्वावगते स्ववाच्यसृष्टिलिङ्गमन्त्रमात्रपरत्वे तद्बाधप्रसङ्गात्स्वार्थपर्यवसायित्वत्यागेनेतरा सृष्टिलिङ्गमन्त्रलक्षणार्थता वाच्यलक्षितसमुदायद्वारा स्यात् समुदायस्य चैकार्थ्याभावेनोपधानप्रकाशकत्वानुपपत्तेस्तत्रापि पर्यवसानासम्भवात् तदितरमसृष्टिमन्त्रवाच्यसृष्टिमन्त्रलक्षितसमुदायद्वारेण लक्षयित्वा सृष्ट्यसृष्टिमन्त्रलिङ्गमन्त्रसमुदायसम्बन्धित्वाविशेषादसृष्टिमन्त्रवत् स्वार्थसृष्टिमन्त्रो ऽपि तात्पर्यतः सृष्टिशब्देन प्रतिपादनीय इति षष्ठ्यन्तं तृतीयान्तं सृष्टिशब्दमध्याहृत्य योज्यम् । स्वरूपाभिधानस्य शून्यवादवार्त्तिकेन निरस्तत्वादजहत्स्वार्थत्वस्य चात्रैवोक्ते वक्ष्यमाणत्वात्[1] वाच्येन च समुदायलक्षणया मन्त्रगणं लक्षयेदिति भाष्ये वक्ष्यमाणत्वादेवं व्याख्यातम् । अनेन चैकया स्तुवतेत्यत्रानुवाके याः सृष्ट्यस्तन्मात्रपर्यवसानरूपेण त्यक्ता तत्र तत्सृष्ट्यसृष्टिसमुदायं लक्षयित्वा पश्चादितराभिः[2] सहितास्तात्पर्यतः सृष्टिशब्दो लक्षयेत्प्रतिपादयेदित्येवं भाष्यं व्याख्यातम् । नन्वित्याशङ्क्यानिरासार्थं नानुवादेति भाष्यं व्याचष्टे

---

१ वक्ष्यमाणत्वादिति २ पु० ना० ।

२ ताभिरिति २ पु० ना० ।

* उपधानेति * कथं त्विति भाष्यं तल्लिङ्गेति सूत्रावयवेनैव व्याख्यातत्वान्न व्याख्यातम्।

॥ अथ प्राणभृदादिशब्दानां स्तुत्यर्थताधिकरणम् ॥ १७ ॥

लिङ्गसमवायात् ॥ २२ ॥

ननु सृष्टिशब्दस्योपधानाविधिशेषतयार्थवादत्वं युक्तं प्राणभृदादिवाक्येषु तु सृष्टिवाक्यविहितत्वेनोपधानस्य विधातुमशक्यत्वात् विध्येकवाक्यत्वं च विनार्थवादत्वायोगाद् गुणाश्रवणाच्च प्रकरणप्राप्तमन्त्रपुनःश्रुतेस्तादर्थ्यस्यापि कल्पयितुमशक्यत्वात् परिसंख्यार्थत्वे च मन्त्रान्तरानर्थक्यापत्तेः प्राणभृदादिशब्दस्य न किञ्चित्प्रयोजनमित्याशङ्क्याह * सृष्टिवदिति * सृष्टौ यथास्माभिर्ग्रहणादिकार्यान्तरपरिसंख्यामध्यर्मचित्याश्रयत्वसिद्धिश्चोपधानसम्बन्धितया मन्त्रपुनःश्रुतेः परिहारो ऽस्य चोद्यस्योक्तस्तथाप्यपि वक्तव्यः। भाष्यपक्षे त्विदं चोद्यं यथा प्राणभृदादिष्वपरिहार्यं तथा सृष्टावपि विशेषाभावेन प्राणभृद्वाक्यविहितत्वात् सृष्टिवाक्यमुपधानस्याविधायकम इत्यपि वक्तुं शक्यत्वादिति द्वन्द्वनिर्देशेन सूचितम्। ननु वाच्यैकसमुदायिलक्षितसमुदायद्वारा समुदाय्यन्तरे शब्दवृत्तेरुभयत्र तुल्यत्वान्नोदाहरणभेदो युक्त इत्याशङ्क्याह * अल्पैरिति * अयमाशयः शब्दस्य प्रवृत्तिर्नाम बोधकत्वमेव निर्विषयायाश्च बुद्धेरसम्भवात् बुद्धिविषयस्यैव प्रवृत्तिनिमित्तत्वं वाच्यम्। अत एवाभिधेयगुणयोगेन सारूप्यं सर्वत्र सम्भवदपि आदित्यो यूप इत्यत्रैव बुद्धिविषयत्वादुक्तं नान्यत्र न हि यजमानः प्रस्तर इत्यत्र यजमानसदृशः प्रस्तर इति बुद्धिरुदेति तत्कार्यकारित्वमात्रबुद्धेर्ब्राह्मणस्याप्यर्थवादवशात् प्रजापतिमुखजातत्वमात्रबुद्धिरजादौ गवाश्वगतप्राशस्त्याभावमात्रबुद्धिः यूपे त्वादित्यसारूप्यमात्रबुद्धेः सारूप्यं प्रवृत्तिनिमित्तमुक्तम् तेनेहापि सृष्टिशब्दात् सृष्टिबाहुल्यबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वं प्राणभृच्छब्दात्तु प्राणभृल्लिङ्गसमवायमात्रबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वाद्भेदेनोपादानं युक्तमेवेति भूयस्त्वाप्रतीतिप्रदर्शनार्थो ऽल्पशब्दः भूयस्त्वानपेक्षस्य लिङ्गसमवायमात्रस्य निमित्तत्वसूचनायैव लिङ्गसमवायादिति पञ्चम्युदाहृता एकेनेति भाष्येण लिङ्गशब्दं चिन्हार्थत्वेन व्याख्याय ननु सम्बन्धं विना लिङ्गत्वायोगात् लिङ्गशब्देनैव समवायशब्दोक्तसम्बन्धसिद्धेः समवायशब्दो ऽनर्थक इत्याशङ्क्य न चायमित्यादिभाष्येण लिङ्गस्यापि स्वलक्षिते गणे ऽन्त-

१ द्वादशाधिकरणमारभ्य सप्तदशाधिकरणपर्यन्तमेकवर्णकमेव वार्तिके नाधिकरणभेदः।

भावप्रतिपादनार्थत्वं समवायशब्दस्योक्तं तद्व्याचष्टे * स्वार्थेति * उभयत्रेत्यनेन भूम्न्यपि समवायशब्दानुषङ्गः सूचितः । मन्त्रगणलक्षणायां व्यापृतः प्राणभृदादिशब्दः किमिति स्वार्थं न जहाति इत्याशङ्कानिरासार्थत्वेन समवायशब्दव्याख्यानार्थं तद्गुण इतिभाष्यावयवं व्याख्यातुम् * उपादीयमानत्वादित्युक्तम् * सर्वसमुदायिव्यासक्तेन समुदायेन स्वसमवायितयेतरसमुदायिवल्लक्षकस्यापि समुदायिन उपादीयमानत्वात् स्वार्थापरित्याग[1] इत्यर्थः । ननु सृष्टिशब्दस्याप्यभिधेयसृष्टिलक्षितसृष्ट्यसृष्टिसमुदायलक्षणगुणयोगेनासृष्टिषु प्रवृत्तेर्गौणत्वाद्गौणयां च वृत्तावभिधेयसम्बन्धित्वरूपानादरात् सृष्टिलक्षितस्य समुदायस्य सृष्टिसमुदाय्यनादरेणासृष्टिष्वेव व्यासज्यवृत्त्युपपत्तेः कथं तेनाभिधेयानां सृष्टीनां लक्षणभूतानामुपादानमित्याशङ्कानिरासार्थं वृद्धवाक्यं पठति * आह चेति * लक्ष्यमाणगुणयोगनिमित्तवृत्तिस्वरूपगौणत्वलक्षणसद्भावात्सृष्ट्यादिशब्दानां गौणत्वे ऽपि स्वार्थासम्बद्धस्य समुदायाख्यस्य गुणस्य लक्षयितुमशक्यत्वात् । तस्य च व्यासज्यवृत्तित्वेनैकसमुदायित्यागे समुदायस्याप्यभावोपपत्तेः सर्वेषामपि समुदायिनामविशेषेणैवोपादानम् पैङ्गल्यादेस्तु सामान्यरूपेणाग्नित्वादिना लक्षितस्य प्रत्येकं पैङ्गल्यादिगुणव्यक्तिषु वृत्तेरग्न्यादिगतायाश्च पैङ्गल्यादिगुणव्यक्तेर्माणवकादावभावाद्युक्तो ऽग्न्यादिसम्बन्धानादर इत्याशयः । अभिधेयसम्बन्धादरानादरलक्षणे तु गौणी लक्षणा वृत्तिविवेके सृष्ट्यादिशब्दानामपि लक्षणावृत्तिरेवास्तु गौणत्वाभ्युपगमे न तु जहत्स्वार्थवृत्तित्वादिलक्षणान्तरनिरासार्थमिहोदाहरणम् श्लोकस्त्वेवं योज्यः । यत्र यजमानादिशब्दे लक्षणं यजमानाद्युपलक्षणमात्रीकृत्य तल्लक्ष्ये यजमानकार्ययागापूर्वनिष्पत्त्यादौ प्रस्तरादेर्यजमानादिसम्बन्धिसाङ्गप्रधानानुष्ठानसाध्यापूर्वनिष्पत्त्याख्यकार्यकरत्वाभावाद्यजमानादिसम्बन्धिरूपनिरपेक्षशब्दकार्यमर्थप्रत्यायनं नियुज्यते वाच्यसम्बन्धित्वानादरेण वाच्यगुणस्वरूपमात्रलक्षणे यत्र शब्दस्य तात्पर्यमित्यर्थः । तस्मिन् शब्दे लक्ष्यस्वरूपमात्रस्य शाब्दप्रतीतिविषयत्वेन ग्रहणं न तूपायमात्रतयावस्थितस्य लक्षणस्यापि यत्र सृष्ट्यादिशब्दे लक्षणभूतसृष्ट्यादिलक्षितेन सृष्ट्यादिसम्बन्धिना समुदायेन सृष्ट्यादित्यागे व्यासज्यवृत्तित्वाभावादात्मानमलभमानेन सृष्ट्यादेर्लक्षणस्यापि स्वाश्रयत्वेनोपादानं तत्र लक्ष्यलक्षणयोः शाब्दप्रतीतिविषयत्वेन ग्रहणमिति ।

---

१ स्वार्थसमुदायिन इति २ पु० पा० ।

॥ अथ वाक्यशेषेण सन्दिग्धार्थनिरूपणाधिकरणम् ॥ १८ ॥

सन्दिग्धेषु वाक्यशेषात् ॥ २३ ॥

विध्युद्देशान्तर्गतानामप्युद्भिदादिपदानां विधानातिरेकेण नामधेयतयोपयोगे प्रतिपादिते ऽर्थवादानामपि स्तावकत्वातिरेकेण सन्दिग्धार्थनिर्णायकत्वेनोपयोगप्रतिपादनार्थं कल्पनैकदेशत्वादिति उत्तरसूत्रगतपदद्वयानुषङ्गेणैतत्सूत्रं प्रकरणान्तरत्वाच्चानन्तरसङ्गत्यभावे ऽपि न दोषः प्राणभृदादिशब्दानां वा लिङ्गसमवायात्तल्लिङ्गातल्लिङ्गेषु प्रवृत्तावुक्तायां घृतशब्दस्यापि घृताघृतोक्तेषु लिङ्गसमवायात् प्रवृत्तिः प्रासात्रापोद्यतइत्यनन्तरसङ्गतिरपि सम्भवति प्रतिपादितप्रामाण्ययोपयोगिद्वाराणामपि तद्विशेषोपयोगिद्वारान्तरप्रतिपादनात्पादाध्यायसङ्गतिरिति सूचयितुमाह * विधीति * निर्णयार्थत्वेन कल्पनाशब्दव्याख्यानाय *अवधार्यतइत्युक्तम् * अर्थवादस्य विधिगतसन्देहापनायकत्वेन साध्ये यद्दचा स्तुवते तदसुरा अन्वधायन् इत्याद्यर्थवादगतस्तुतिनिन्दार्थत्वसन्देहापनायकत्वं य एवं विद्वान् साम्ना स्तुवीतेत्यादिविधेरर्थवादाधिकरणोक्तं दृष्टान्तयितुमेकत्रैतरेणेत्युक्तम् । ननूपक्रमानुरोधेनोपसंहारव्याख्यानस्य तृतीये वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वान्नोपसंहारस्थेनार्थवादेनोपक्रमस्थविध्यर्थनिर्णयो युक्त इत्याशङ्क्य * सन्दिग्धमित्युक्तम् * तत्रो- ३२९।१
पक्रमस्य वेदविषयत्वेन निश्चितत्वादुपसंहारगतानामृगादिशब्दानां तदनुरोधवृत्तिता युक्तेत्याशयः । ननूपक्रमोपसंहारविप्रतिपत्त्यालोचनया सन्देहस्तत्राप्यस्तीत्याशङ्क्य * एकत्रेत्युक्तम् * सन्दिग्धशब्देनाव्यवस्थितार्थप्रतीतिरभिमता सा विध्युद्देशमात्रपरामर्शाद्भवन्तीति वाक्यशेषावधारितया व्यवस्थया वार्यतइत्याशयः । निर्णीयतइति वक्तव्ये ऽवधार्यते पदं प्रयुञ्जानेनैतदेव सूचितम् । सन्दिग्धावधारणरूपप्रामाण्यविशेषोपयोगिद्वारान्तरप्रतिपादनाच्च पादलक्षणसङ्गतिःसूचिता । अनन्तरसङ्गतेस्त्वभावो यथा सृष्टिष्वसृष्टिषु चेति भाष्यसूचितत्वाद्वा स्पष्टत्वमनभिधानेन सूचितम् । एकदेशशब्देमेको ऽर्थो दिश्यते प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यां तावेकदेशौ तयोर्भावस्तत्त्वमिति व्युत्पत्त्यैकविषयत्वाभिधानार्थत्वेन व्याख्यातुं पूर्वार्द्धसंभवाय सदा शब्देन च स्तुतिनिरपेक्षस्य विधेरपर्यवसानमुक्तम् । प्ररोचनानपेक्षस्य विधेः पर्यवसानसम्भवे ऽर्थवादान्वयासम्भवात्प्रागेवार्थाक्षिप्तविशेषकल्पनया निर्णये कृते पश्चादर्थवादानर्थक्यपरिहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादान्वये सत्यपि निर्णीता-

र्थत्यागायोगात्तदर्थवादस्यैवासामञ्जस्यमङ्गीकार्यमपर्यवसाने त्वर्थवादावगतस्यैव विशेषस्य ग्रहणमिति न्यायावतारङ्गभूतोपन्यस्तसन्देहकारणप्रश्नार्थं कथमिति भाष्यं वृत्यन्तरोक्तसन्देहकारणनिरासार्थमिति दर्शयितुं स्वरूपतस्तावद् व्याचष्टे * किमिति * तत्र विध्यर्थवादयोर्भिन्नवाक्यत्वेनार्थवादिकस्य विशेषस्य विधिवाक्यार्थावधारणवेलायामप्रतीतेः । सामान्यमात्रप्रत्ययाद्विशेषं प्रतिसन्देह इत्येकेषां मतमुपन्यासपूर्वकं दूषयति * विधाविति * विधिसामान्याक्षिप्ताञ्जनसमर्थद्रव्यमात्रनिर्णयान्नैतत्सन्देहकारणं युक्तमित्यर्थः । सामान्यमात्रनिर्णयादिति यावच्छ्रुतं मत्वा तेषामाशयं विवृणोति * स्यादिति * दूषयित्वा दृष्टान्ताभिधानेनोत्तरं विवृणोति * घृतवदिति * यथा घृतत्वसामान्यं स्रोपलक्षितयत्किंचिद्विशेषावधारणेनाङ्गमेवमञ्जनक्रियाक्षिप्तं स्नेहद्रव्यसामान्यमपीत्यर्थः । एतदेव घृते ऽपि सन्देहोपपादनपूर्वकं विवृणोति * तत्रेति * (विधौ सामान्यश्रवणादर्थवादे च विशेषश्रवणात् वाक्यद्वयविप्रतिपत्तिः । सन्देहकारणमित्यन्येषां मतमुपन्यस्यति) *तस्मादिति* विधिगतसामान्यश्रवणमात्रस्य सन्देहकारणतोक्तेति भ्रान्त्या विधिनिरपेक्षस्य घृतप्रापकत्वायोगाद्विध्यर्थवादयोरेकवाक्यत्वमभिप्रत्यैतदुक्तमिति भ्रान्त्या दूषयति * तथापीति * एकवाक्यगतसामान्यविशेषश्रवणं न सन्देहकारणमिति दृष्टान्तेनोपपादयितुं * न हीत्युक्तम् * दृष्टान्तवैषम्याभिधानेनापरेषामाशयं विवृणोति * विषम इति * गौः शुक्ल इत्येकवाक्यगतयोः सामान्यविशेषयोः श्रवणादिह तु भिन्नवाक्यगतावितिं वैषम्यम् एतदेव प्रश्नपूर्वकं विवृणोति * कथमिति * सामान्यविषयविधिवाक्यगत एव यदि विशेषः स्यात्ततो ऽत्रापि न सन्देहः शुक्लः प्रशस्त इति वाक्यान्तरगते तु विशेषेतत्रापि सन्देह इत्यर्थः । श्लोकं व्याचष्टे * यदि हीति * अन्वयमुखेनैतमेवाशयं विवृणोति * अत इति * चकारेण सामान्यश्रवणसहितस्य विशेषश्रवणस्य सहकारित्वाभिधानादाद्या भ्रान्तिर्निरस्ता विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनैतन्मतद्वयं तच्चैकवाक्यत्वावगतेरयुक्तमिति दर्शयिष्यन्सन्देहदर्शनमेवोभयेषां भिन्नवाक्यत्वभ्रान्तौ कारणमित्याह * के चिदिति * के चित्सामान्यमात्रश्रवणसन्देहकारणवादिनश्चकारादपरे ऽपि भिन्नवाक्यगतसामान्यविशेषश्रवणसन्देहकारणवादिन इत्यर्थः । एतदेवोपपादयति * यदि हीति * नन्वेवं सति सूत्रविरोधः स्यादित्याशङ्क्याह

१ चयं पा० २ पु० ना० ।

* यत्विति * नन्वाकाङ्क्षानिबन्धनत्वात्सम्बन्धस्यावान्तरवाक्यार्थप्रतिपादनमात्रेणाकाङ्क्षापर्यवसाने वाक्यान्तरान्वयायोगात्कथं भिन्नयोः पश्चादेकवाक्यतेत्याशङ्क्याह * तथा हीति * पदार्थानां परस्परान्वयाकाङ्क्षापर्यवसाने ऽपि वाक्यार्थानां परस्परापेक्षया ऽन्वयो न विरुद्ध इत्याशयः । भावप्रत्ययेन सम्बन्धाभिधानादङ्गस्याङ्गिसम्बन्धापेक्षयाङ्गिनश्चाङ्गसम्बन्धापेक्षयादिशब्देनाग्नेयादिप्रधानानामेकफलसम्बन्धापेक्षयाङ्गानां चैककरणोपकारसम्बन्धापेक्षया स्वार्थपर्यवसितानामपि वाक्यानां संहत्यैकमहावाक्यार्थोपादनेनैकवाक्यत्वं भवतीत्यर्थः । अङ्गप्रधानवाक्यैः सहार्थवादानां वैषम्याभिधानेनैतद् दूषयति * न त्विति * सिद्धार्थप्रतिपादकानामप्युपनिषद्वाक्यानां चतुस्त्रिंशदाश्वीनानि सरस्वत्यावशनात् प्लुक्षप्रश्रवणमित्यादीनां च पुरुषार्थोपयिकस्य कर्मोपयिकस्य वा प्रयोजनस्य लाभात्स्वार्थपर्यवसानं युक्तम् अर्थवादार्थस्य तु निष्प्रयोजनत्वान्न तत्रार्थवादानां पर्यवसानमिति प्रयोजनशब्देनोक्तम् भिन्नवाक्यत्वे च व्रीहिषववाक्यवत्सामान्यविशेषवाक्ययोरप्यन्योन्यानिरपेक्षवैकल्पिकसाधननिश्चायकत्वात्सन्देहो नतरां युज्येतेत्याह * दुर्लभेति * सामान्यविशेषयोर्मध्ये इतरत्र सामान्ये सामान्यवाक्यस्येतरत्रविशेषे विशेषवाक्यस्य पर्यवसानादित्यर्थः । ननु वाक्यद्वयस्यान्योन्यानिरपेक्षस्यार्थपर्यवसाने ऽपि विप्रतिपत्तेः सन्देहः स्यादित्याशङ्क्याह * यदिति * वैकल्पिकानुष्ठानेन विरोधपरिहार इत्याशयः । नन्वङ्गाङ्गिवत्सामान्यविशेषयोरप्यन्योन्यापेक्षितत्वात्सार्थपर्यवसितयोरपि तद्वाक्ययोरङ्गाङ्गिवाक्यवत्पश्चादेकवाक्यत्वकल्पनायामेकविषयत्वायैकानुरोधेनेतरवृत्तेरवश्यम्भाविनीत्वात्कस्यानुरोधेन किं वर्त्तत इति जिज्ञासायां विशेषानिर्द्धारणात्सन्देहः स्यादित्याशङ्क्याह * सामान्येति * एवं सति सामान्यमात्रे पर्यवसितस्य विधेरर्थवादविरोधाद्विषयसङ्कोचात्मकबाधाभ्युपगमेन सिद्धान्तः स्यान्न चार्थवादानुरोधेन विधिबाधो युक्त इत्याशयः । न विद्यते विशेषो ऽस्येत्यविशेषो विशेषरहितः स्यात् इत्यर्थः । ननु यथा पशुमालभेतेति सामान्यपर्यवसितस्यापि विधेः छागस्य वपाया मेदसो ऽनुब्रूहीति मन्त्रवर्णानुरोधेन सङ्कोचो विधिमन्त्रयोरेकविषयत्वात् सामान्यस्य च कृत्स्नस्य छागे ऽपि विभावेनाविरोधान्नियमसम्भवे चानियमानुपपत्तेः षष्ठान्त्ये वक्ष्यते तथात्रापि भविष्यतीति शङ्कते * मन्त्रेति * पौनरुक्त्यापत्त्या तं दूषयति * एवमिति * एकवाक्यत्वे रुपक्रमबलीयस्त्वेनात्र पूर्वपक्षसम्भवादपौनरुक्त्यमि- ३३०।२

तिभावः । स्वाभिमतन्यायावतारार्ङ्गभूतसन्देहकारणाभिधानार्थमञ्जनसामान्येनेत्यादिभाष्यं व्याचष्टे * तस्मादिति * ननूपक्रमबलीयस्त्वस्य वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वात्सिद्धान्तवचनव्यक्त्यसम्भवेनैकवाक्ये सन्देहो न युक्त इत्याशङ्क्य * किमधीनेत्युक्तम् * अर्थवादप्रवृत्तेर्विध्यधीनत्वे विप्रतिपत्त्यभावात्प्ररोचनां विना विध्यपर्यवसानेनार्थवादाधीना किं विधेः प्रवृत्तिः पर्यवसानेन वा तदधीनार्थवादस्येति सन्देहार्थः । अतो ऽनेन प्ररोचनापेक्षविधिपर्यवसानसम्भवासम्भवसन्देहः * सन्देहकारणमित्युक्तम् * भवति पर्यवसाने विध्युद्देशेन सामान्याक्षिप्तविशेषमात्रनिर्णयादर्थवादानर्थक्यपरिहारायान्यतराकाङ्क्षया वैकृताङ्गवदर्थवादः पश्चादन्वीयमानो ऽपि विध्यनुरोधेनैव व्याख्येयः । अपर्यवसाने त्वर्थवादोक्तविशेषसद्भावे विशेषाक्षेपकत्वायोगादर्थवादोक्तस्यैव ग्रहणमिति किं समञ्जसमिति भाष्यावयवमर्थतः पाठित्वा व्याचष्टे * कस्येति * एवमिति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * विध्यधीनत्वे ऽप्युपक्रमस्थायाः स्तुतेः श्रौतत्वदर्शनादुपसंहारस्थत्वाभिधानायानुपश्चाद् * वादादित्युक्तम् * अनेन च विनिगमने त्विति भाष्यावयवो विधिना त्वेकवाक्यत्वादित्येतत्सूत्रसिद्धविध्यधीनत्वाङ्गीकरणेन विधेरपि प्ररोचनं विना प्रवृत्त्यशक्तत्वेन स्तुत्यधीनत्वान्नानेन हेतुनार्थवादे लक्षणावृत्तिर्निश्चेतुं शक्येत्याशङ्कानिरासार्थत्वेन व्याख्यातः । चकारेण च लक्षणार्थं घृतवचनामिति भाष्यावयवो विशेषस्याव्यभिचारेण सामान्यलक्षणे सामर्थ्यात् घृताख्यविशेष्यवचनं स्नेहद्रव्यसामान्यलक्षणार्थमित्येव व्याख्यातः।मुख्यत्वादित्यनेनाविरोधाच्चेति चकारसहितेनोपक्रमस्थत्वेन विरोधात्सामान्येन च व्यभिचारिणा विशेषस्य लक्षयितुमशक्यत्वात् उपक्रमस्थेन सामान्यवचनेन न विशेषः परिकल्पयितुं लक्षयितुं युक्तमित्येवमुपक्रमे सामान्यवचने सति न विशेषः कल्प्यतइति भाष्यावयवं व्याख्यायाविरोधाच्चेत्यनेन ननु सामान्यमात्रस्यानुष्ठेयत्वाद्विशेषस्य चानिश्चयादुपक्रमो ऽपि सन्दिग्धार्थत्वादुपसंहारेण निर्णेतव्य इत्याशङ्कानिरासार्थत्वेन सन्दिग्धेष्वविरोधादिति भाष्यावयवो ऽप्यापातप्रतिभानात्सन्देहे ऽपि सामान्याक्षिप्तस्नेहद्रव्यमात्रनिर्णयोपपत्तेरर्थवादाभावे ऽप्यननुष्ठेयसामान्यमात्ररूपार्थाविधायकत्वलक्षणाविरोधाभावादित्येवं व्याख्यातः । प्ररोचनानपेक्षस्य विधेः प्रवृत्तावसामर्थ्यादर्थवादसन्निधाने च स्वयमप्ररोचकत्वादर्थवादसहितस्यैव विधायकत्वावगतेस्तत्समर्पितविशेषलाभे विशेषान्तरकल्पनायोगेनोपक्रमस्थस्यापि विधेर्निर्णाय-

कत्वाशक्तेरुपसंहारस्थेनापि अर्थवादेन निर्णयो युक्त इत्याशङ्क्यानिरासार्थत्वेन प्ररोचनानपेक्षस्यैव विधेः स्वविषयेऽसाधनत्वज्ञापनमात्रेण प्रवर्त्तकत्वोपपत्तेरर्थवादाभावे ऽपि विधायकत्वाविरोधादिति भाष्यावयवो व्याख्यातः। श्लोकं व्याचष्टे * विधीयमानं हीति * स्तुतेर्विध्यधीनत्वोक्त्यार्थाद्विधेस्तुत्यनधीनता ऽनुवादत्वोक्त्या च प्राप्तार्थतोक्तेति सूचनार्थम् *नान्वित्यादुक्तम् * ननु विधेः स्तुत्यनधीनत्वे कथमुच्चैर्ऋचा क्रियतइत्यादि विध्युद्देशस्थानामृगादिशब्दानामर्थवादानुरोधेन वेदलक्षणार्थे तृतीये वक्ष्यतइत्याशङ्क्यानिरासार्थत्वेन मुख्यत्वादित्यवयवं व्याख्यातुम् * यद्यपि तावदित्युक्तम् * अविरोधाच्चेत्यवयवं व्याख्यातुं विनापिचेत्युक्तम् विधेः स्तुत्यनधीनत्वं च पूर्वोक्तमनेनोपपादितम्। स्तुतिपदान्यनर्थकान्यभविष्यन् साकाङ्क्षाणीत्यादेर्यो ऽसौ विध्युद्देशः स शक्नोति निरपेक्षार्थं विधातुमित्यर्थवादाधिकरणभाष्यादर्थवादनिरपेक्षस्य विधिमात्रस्य प्रवृत्तिशक्तावप्यर्थवादानर्थक्यपरिहारमात्रार्थमर्थवादान्वयप्रतीतेरेतत्पूर्वपक्षणोक्तम्। स्तुतेर्विध्यधीनत्वोपपादनायार्थ- * वादस्त्वित्युक्तम् * आद्यचकारसूचितं द्वितीयभाष्यावयवार्थं व्याचष्टे * विशेषश्चेति * द्वितीयचकारसूचितमाद्यभाष्यावयवार्थं व्याख्यातुमाह *न सामान्यामिति * व्याक्यशेषस्यैव सन्दिग्धार्थनिर्णायकतास्ति न वेति चिन्ताविषयत्वेनोदाहरणत्वे विध्युद्देशोपन्यासस्तु तद्विषयत्वमात्रेणेति सूचनार्थं व्युत्क्रमेण व्याख्यातमुपसंहरति * तस्मादिति * एवं प्ररोचनानपेक्षस्यापि विधेः प्रवृत्तिसामर्थ्येनार्थवादान्वयात्प्रागेव विध्युद्देशार्थनिर्णयान्नार्थवादोक्तविशेषग्रहणमित्युक्त्वा प्ररोचनानपेक्षस्यासामर्थ्ये ऽप्यर्थवादाभावे विधेरेव प्ररोचनाशक्त्याविर्भावात्सामान्यविधेयस्य विशेषाकाङ्क्षायां घृते सार्थवादकस्याभिधायकत्वमितरयोः केवलस्य भविष्यतीति घृतशब्दस्य स्नेहमात्रलक्षणार्थतापि नास्तीत्याह * कामं वेति * ननु यथाग्निविद्यासाध्यस्याग्निहोत्रादेस्तदनुरोधेन त्रैवर्णिकविषयतया सङ्कोचो वक्ष्यते तथा विधानस्याप्यर्थवादसाध्यत्वात्तदनुरोधेन विषयसङ्कोचः कस्मान्न स्यादित्याशङ्क्याह * यथेति * अयमाशयः ३३१।२
येनाङ्गेन विना प्रधानं न सिध्यति स्वयं च नाक्षिप्यते तदनुरोधेन प्रधानस्यापि सङ्कोचो भवति विनापि त्वर्थवादेन विधेरेव तु प्ररोचनाशक्तिकल्पनेन विधायकत्वोपपत्तेः यथेन्द्राय त्वा वसुमते गृह्णामीत्यैन्द्रमन्त्रसाध्यस्यापि सोमग्रहणस्य मन्त्राभावे ध्यानादिनापि स्मृतस्यानुष्ठानोपपत्तेर्नाङ्गभूतमन्त्रानुरोधेन प्रधानस्य सोमग्रहण-

स्येन्द्रप्रदानमात्रसङ्कोचो युक्त इति तृतीये लिङ्गविशेषनिर्देशात्समानविधाने ऽप्यैन्द्राणाममन्त्रत्वामित्यत्र वक्ष्यते तथाङ्गभूतार्थवादानुरोधेन प्रधानभूतस्य विधेः सङ्कोचो न युक्त इति । नन्वत्राप्यर्थवादसद्भावेन विधेः प्ररोचनाशक्त्यभ्युपगमात्तैलादावर्थवादाभावेन विधायकत्वायोगात्तदनुरोधेन सङ्कोचो युक्त एवत्याशङ्क्याह * यत्रेति * अर्थवादसद्भावकृतत्वात्प्ररोचनाशक्त्यपगमस्य घृतमात्रे तत्सद्भावादपगमो युक्तो नेतरत्रेत्याशयः । पूर्वपक्षमुपसंहरति * इतीति * सन्दिग्धेष्वित्यादिसिद्धान्तभाष्यमक्तशर्करोपधानस्य अर्थवादसद्भावे वर्त्तमानापदेशानुपपत्तेराख्यातस्य पञ्चमलकारत्वेन विधायकत्वावगमाद्विध्यभावे च विध्येकवाक्यत्वकल्पस्यार्थवादत्वस्याप्ययोगादिमां स्पृष्ट्वेदुगायेदित्येतदुदाहरणाव्यापकत्वाच्चायुक्तमाशङ्क्यार्थवादानपेक्षविधिपर्यवसानाभावाभिप्रायेण व्याचष्टे *उच्यतइति* प्रवृत्तिप्रतिबन्धकालस्यादिभङ्गं विना चेतनस्य प्रवर्त्तयितुमशक्यत्वादालस्यादिभङ्गाख्यप्ररोचनासापेक्षस्यैव विधेः प्रवर्त्तकत्वनिर्वाहादर्थवादसद्भावे च विधेः प्ररोचनशक्त्यभावादर्थवादस्य च घृतमात्रविषयत्वाद्विधेरपि तन्मात्रविषयतैव युक्तेत्याशयः । श्लोकं व्याचष्टे * यद्यपीति * प्रक्रमशब्देनापर्यवसानं सूचितम । यद्यप्यङ्गक्रियासाधनत्वाविशेषात्तैलवसयोरप्यर्थाक्षेपेणोपादानं तथाप्यनुष्ठानस्य विध्यधीनत्वाद्विधेश्च प्ररोचनापेक्षत्वे घृतमात्रविषयत्वात्तैलवसे नानुष्ठेये इत्यर्थः । वस्तुतस्तु प्रत्यक्षश्रुतेर्घृत ऽर्थाक्षेपायोगान्नार्थाक्षेपात्मकमुपादानमपि तैलवसयोरस्तीति क्रियामात्रमिवोदितमित्यादिना वक्ष्यतइति तावच्छब्देन सूचितम् । यत्तु तैलवसयोरर्थवादाभावाद्विधेरेव प्ररोचनाशक्तिकल्पनया पर्यवसानं कामं वेति श्लोकेनोक्तं तदाग्नेयाधिकरणाभ्युत्पादयिष्यमाणगौरवलक्षणवाक्यभेदापादनेन निराकरोति * कल्पयितव्येति * घृतप्ररोचनोपादानेन वा समाप्ते वाक्ये काल्पनिकतैलादिप्ररोचनया वाक्यान्तरारम्भापत्तेर्वाक्यभेदो ऽभिप्रेतः । वैरूप्यलक्षणो ऽपि वाक्यभेदो ऽस्मिन् पक्षे स्यादित्याह * घृतइति* अतो ऽर्थवादस्य घृतमात्रविषयत्वात्तत्सद्भावे च विधेः प्ररोचनाकल्पनायोगात्तस्यापि तन्मात्रविषयतेति । श्लोकार्थमुपसंहरति * तस्मादिति * एवं तात्पर्यतो भाष्यं व्याख्याय स्वरूपतो व्याचिख्यासुः सामान्यवचनेनेति भाष्यावयवमङ्गसमर्थद्रव्यसामान्यस्याश्रवणादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * यद्यपि चेति * अभ्युपेत्यवादस्य च वासः परिधत्तइत्यादौ निरासतुल्यत्वसिद्धिः

प्रयोजनम् कथं न तद्विशेष इत्याशङ्क्य भाष्यशेषव्याख्यानेन परिहरति * तत्रेति * अनेन च यो वाक्यस्य सामान्यवचनेनोपक्रमः स निगमनवशेन श्रुत एव विशेषे व्यवस्थाप्यते तस्योपक्रमापेक्षितविशेषसमर्पणेन तदानुकूल्यादिति व्यवस्थाप्यतइत्यध्याहारेण योजितम् । ननूपक्रमस्थसामान्याक्षिप्तस्य तैलादेर्नोपसंहारानुरोधेन त्यागो युक्त इतिभाष्येणाशङ्क्य श्रुतविशेषसद्भावे ऽर्थाक्षेपायोगान्न स्नेह सामान्यमर्थाद्विहितं येन निगमनस्योपक्रमविरोधः स्यादिति न हीत्यनेन परिहृतम् तद्व्याचष्टे * घृते चेति * ननु विध्युद्देशमात्रपरामर्शात्स्नेहमात्रप्रतीतिर्भवत्येवेति कथमुच्यते न सामान्यं विहितमित्याशङ्कानिरासार्थत्वेन सन्दिग्धेष्विति भाष्यावयवं व्याचष्टे * सन्देहमात्रं हीति * पूर्वमनिर्द्धारितविशेषाभिप्रायेण सामान्यशब्दं व्याख्याय द्रव्यसामान्यमपि न विहितमिति यथाश्रुतं व्याख्यातुमाह * क्रियामात्रमिति * विधानेत्यादिभाष्यस्यापर्यवसानाभिप्रायेण श्लोकेनैव व्याख्यातत्वान्नापीत्यस्य च घृतेः प्रत्यक्षस्तुतिसद्भावात्सामान्यस्नेहमात्रस्य तैलादेः साक्षात्स्वयमेव विधितः स्तुतिः कल्पयितुं न युक्तेत्येव विधेः प्ररोचनैकल्पनाशङ्कानिरासार्थत्वेन कल्पयितव्या चेत्यादिनैव व्याख्यातत्वाल्लक्षणयेति भाष्यं लक्षणात्रयोपलक्षणार्थत्वेन व्याख्यातुमाह * तैलादीति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * वृत्त्यन्तरोदाहृतमन्त्रवर्णापेक्षणे भाष्यकृतो ३३२।२
ऽभिप्रायमाह * वृत्त्यन्तरेष्विति * विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनास्मिन्विचारे तुल्यन्यायत्वान्मन्त्रवर्णो ऽप्युदाहरणं स्यात् भिन्नवाक्यगतस्य विशेषशब्दस्यात्रैव नियामकत्वे ऽभिहिते षष्ठान्यमनर्थकं स्यादित्यर्थः ।

॥ अथ सामर्थ्यानुसारेण अव्यवस्थितानां व्यवस्थाधिकरणम् ॥ १९ ॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥ २४ ॥

वाक्यशेषस्य सन्दिग्धार्थनिर्णायकत्वे स्तावकत्वातिरिक्तधर्मप्रमोपयोगद्वाराभिधानार्थं व्युत्पादिते प्रसङ्गात्सामर्थ्यस्यापि सन्दिग्धार्थनिर्णायकत्वव्युत्पादनेनानन्तराधिकरणसङ्गतिं सूचयन् पूर्वसूत्रगतसन्दिग्धपदानुषङ्गेण सूत्रं व्याचष्टे * अथेति * नन्वर्थशब्दोक्तसामर्थ्यकल्प्यद्रव्यादिविषयविशेषस्याशाब्दत्वाच्छाब्देन विधिना ऽन्वयो न सम्भवतीत्याशङ्कानिरासार्थत्वेनैकदेशत्वादिति सूत्रावयवं व्याख्यातुं सामर्थ्यकल्पितेन शब्देन * विध्यंशेनेत्युक्तम् * व्यवस्था-

१ प्ररोचकलेति २ पु० पा० ।

र्थत्वेन कल्पनाशब्दं व्याख्यातुं निर्णयशब्दः । ननु सामर्थ्यस्य लिङ्गत्वात्तत्प्रामाण्यं व्युत्पादनस्य च तृतीयविषयत्वान्नार्स्मिल्लक्षणे सङ्गतिरित्याशङ्क्य प्रासङ्गिकसङ्गतिसूचनाय * अर्थेत्युक्तम् * प्रसङ्गकारणं वक्तुं सन्दिग्धशब्दः इतिकरणोभ्रान्त्युत्पन्नतैलाद्याकाङ्क्षेति वार्त्तिकसूचितविध्युद्देशमात्रपर्यालोचनोत्थविषयोपलक्षणभूता व्यवस्थितार्थप्रतीतिरूपसन्देहप्रकारपरामर्शार्थः । न्यायावताराङ्गभूतस्तु सन्देहः किमव्यवस्थितविषयतया भासमानस्य विधेरव्यवस्थितविषयतैवोचिता सामर्थ्याद्वा विषयव्यवस्थाकल्पनायेत्येवं रूपो यथा भाष्यमेव स्पष्टत्वान्नोक्तः । विधेर्वस्तुसामर्थ्यापेक्षासदसद्भावसन्देहश्च तत्कारणमाख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणीति सिद्धान्तभाष्यपर्यालोचनयावगन्तुं शक्यत्वान्नोक्तम् । पूर्वपक्षो ऽपि प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षणे वेदस्य सापेक्षत्वेनाप्रामाण्यापत्तेर्वस्तुसामर्थ्यानपेक्षत्वात्तीक्ष्णपुष्करधारस्य च स्रुवस्य संहतशब्दोक्तकाठिनद्रव्यावदाने पि सामर्थ्यसम्भवादायसावष्टम्भेन स्रुवहस्तयोर्मांसावदाने ऽपि शक्तिसम्भवात्कोटरकल्पनश्च स्रुवितेर्द्रवावदाने ऽपि सामर्थ्योपपत्तेरनुग्राहकापेक्षायामपि निरपेक्षसाधनत्वाविघातादव्यवस्थैव युक्तेत्येवंरूपो भाष्योक्तविशेषानभिधानेनैव स्पष्टत्वान्नोक्तः वाक्यशेषप्रत्युदाहरणरूपेणात्र पूर्वपक्षिणः प्रत्यवस्थानादनन्तरसङ्गतिं वक्तुम् * यत्र वाक्यशेषो न विधीयतइत्युक्तम् * सापेक्षत्वेन वेदाप्रामाण्यापत्तेः प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षा विधेर्न युक्तेत्याशङ्कानिरासायैवकारः । अशक्यार्थानुष्ठानायोगात्प्रवर्त्तकत्वव्याघातापत्तेः सर्वविधिभिः सामर्थ्यस्यावश्यापेक्षणीयत्वात्सामर्थ्यस्य च प्रमाणान्तरगम्यत्वे ऽपि विषयस्यान्यतो ऽनवगतेर्वेदस्य नैरपेक्ष्याविघातात्तीक्ष्णपुष्करधारिणापि स्रुवेण मांसावदानाशक्तेर्निरपेक्षसाधनत्वविरोधाच्चायसावष्टम्भनकल्पनानुपपत्तेः । केवलेनापि च स्रुवेण द्रवावदानोपपत्तेरायसस्यानुग्राहकत्वकल्पनायोगात्स्रुवितेश्च रूपं वा शेषभूतत्वादित्यनेन न्यायेन वासोवल्लोकसिद्धस्य चोपादेयत्वात्कोटरकरणेन सामर्थ्याधीनकल्पनानुपपत्तेः सामर्थ्याद् व्यवस्थितविषयत्वकल्पना युक्तेत्याशयः । स्रुवाद्युदाहरणेषु सामर्थ्येनानुवाद्यगतसन्देहनिरासदर्शनाद्विधेयगतसन्देहनिराससामर्थ्यशङ्कानिरासायोदाहरणान्तरस्य सिद्धान्तभाष्ये दत्तस्याकोशे ऽप्यञ्जलिशब्दवाच्याद्विहस्तसंयोगाविरोधात्सन्देहविषयत्वानुपपत्तिमाशङ्क्याकोशाख्यविशेषाविवक्षासदसद्भावावि-

१ प्रकारमिति २ पु० पा० ।

षयत्वेन सन्देहमुपपादयल्लोकं व्याचष्टे * देवतेति * एकदेश-संयोगे ऽपि संयोगप्रसिद्धेः सर्वावयवसंयोगप्रदर्शनार्थं संहतयोर्हस्तयोः * संयोगइत्युक्तम् * आकोशशब्दवाच्येषत्कोशाकारव्यावृत्त्यर्थो मात्रशब्दः । आकोशे तर्हि सर्वावयवसंयोगाभावान्नाञ्जलित्वं स्यादित्याशङ्क्य नाञ्जलिनेति प्रयोगो दर्शितः संहतत्वाकोशित्वयोर्विशेषयोः सामान्यवाचिनो ऽञ्जलिशब्दात्सन्देहः सक्तुहोमे ऽञ्जलिचोदनायां भवतीत्यर्थः । चोदनाशब्देन विधेयगतत्वं दर्शितम् । असति चेत्यनेन घृतवत्सन्देहव्यावर्त्तकाकोशविषयवाक्यशेषाश्रवणे ऽपि होमान्यथानुपपत्तिकल्पितेन वाक्यशेषेणाकोशनिर्णयाभिधानाल्लोको व्याख्यातः । ननु सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यकल्पितवाक्यशेषानुरोधेन विषयसङ्कोचाभ्युपगमे दर्शपूर्णमासविधेरपि सामान्यतः सर्वाङ्गविशिष्टकर्मविषयप्रवृत्तस्य सामर्थ्यकल्पितवाक्यशेषानुरोधेन शक्यमात्राङ्गविषयतया सङ्कोचापत्तेरन्धादीनामपि कर्मण्यधिकारप्रसङ्गातियंगधिकरणविरोधः स्यादित्याशङ्क्ते * नन्विति * येन प्रकारेण कर्त्तुं शक्नुयात्तेन प्रकारेण कुर्यादिति वाक्यशेषेणान्धादीनामाज्यावेक्षणादिप्रकारव्यावृत्तेस्तद्रहितो ऽधिकारः स्यादित्यर्थः । विधिस्त्वेकश्रुतित्वादित्येकादशाधिकरणन्यायेन सर्वाङ्गोपसंहारनिश्चयात्किमङ्ग प्रयोक्तव्यमिति सन्देहानुपपत्तेर्नात्र सामर्थ्यानुरोधेन सङ्कोचापादको वाक्यशेष इति परिहरति * नेति * एतदेव विवृणोति * सन्दिग्धेति * ननु प्रयोगविधिपर्यालोचनया सर्वाङ्गोपसंहारावगमे ऽप्यधिकारस्य सामर्थ्यानपेक्षत्वादन्धादेश्चाज्यावेक्षणादौ सामर्थ्याभावात्किं प्रयोगशास्त्रानुरोधेनाधिकारशास्त्रं समस्ताङ्गोपसंहारसमर्थपुरुषविषयतया सङ्कोचनीयमधिकारशास्त्रानुरोधेन वा प्रयोगशास्त्रं शक्यमात्राङ्गविषयतयेति सन्देहे ऽधिकारस्य फलपर्यवसायित्वेन प्राधान्यात्तदनुरोधेन यथा शक्नुयातथा कुर्यादिति वाक्यशेषकल्पनया प्रयोगविधेः शक्यमात्राङ्गविषयतया सङ्कोचोपपत्तेरन्धाद्यधिकारो दुर्वार इत्याह * न चेति * कार्ये ज्ञाते ऽधिकारः स्यादित्यनेन न्यायेन प्रयोगविधिप्रयोज्यसमस्ताङ्गावधारणपूर्वकत्वेनाधिकारविधेरेव प्रयोगविध्यनुरोधवृत्तित्वस्य न्याय्यत्वात् समस्तधर्मोपेतं यः शक्नुयादिति वाक्यशेषकल्पनेन सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारनिश्चयान्नाधिकारे ऽपि सन्देह इत्यपि शब्दार्थे चशब्दमङ्गीकृत्य योज्यम् । यः शक्नुयात्स कुर्यादिति वक्तव्ये प्रतिसमाधेयाङ्गवैकल्ये सति तिमिराद्यपनयनेनापादितस्याप्यधिकारसद्भावमङ्गहीनस्य तद्धर्मेत्यत्र षष्ठाद्यधिकरणएव वक्ष्यमाणं सूच-

यितुं यथा शक्नुयात् * तथा कुर्यादित्युक्तम् * द्रव्येन्द्रियवैकल्यादिना स्वतोऽशक्तोऽपि द्रव्यार्जनादिना यथा शक्तो भवति तथा शक्तिमापाद्य सर्वधर्मोपेतं कुर्यादित्यर्थः । यदि तु न कश्चित्सर्वाङ्गोपसंहारसमर्थः स्यात्ततः कतिपयाङ्गोपसंहारेणाप्यधिकारः कल्प्यते नन्वेतदस्तीत्याह * सन्ति चेति * अतः प्रयोगविधेः सङ्कोचं विना ऽनुपपत्त्यभावान्न शक्यमात्राङ्गविषयतया सङ्कोचकल्पना युक्तेत्युपसंहरति * इतीति * नन्वेवं सति नित्याधिकारेऽपि यः समस्तधर्मोपेतं कर्तुं शक्नुयात्सोऽवश्यं कुर्यादिति वाक्यशेषकल्पनया सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारोपपत्तेः सर्वशक्त्यधिकरणविरोधः स्यादित्याशङ्क्याह * यत्र त्विति * जीवने सत्यप्यकरणे जीवितस्य निमित्तत्वव्याघातापत्तेः पौर्णमास्यादिकालवच्चाज्यावेक्षणादेरुपादेयत्वेनानुपादेयनिमित्ततावच्छेदकत्वायोगान्निमित्तपरतन्त्रत्वाच्च प्रयोगविधेस्तदनुरोधेन निमितश्रुतिबाधायोगान्निमित्तश्रुत्यवगतावश्यकर्त्तव्यतानुरोधेन यावज्जीवादिप्रयोगविधेः शक्यमात्राङ्गविषयतया सङ्कोचकल्पना युक्तेत्याशयः । प्रयोगचोदनान्यथानुपपत्तिरेव शब्देन परामृष्टा । अनुष्ठानमात्रादविषयश्चात्र सङ्कोचः कल्प्यते प्रयोगविधिस्तु नित्याधिकारेऽपि सर्वाङ्गविशिष्टमेव प्रधानमनुष्ठापयतीति तत्रापि सामर्थ्यापादनं यतितव्यमिति त्यागशब्देन सूचितम। अशक्याङ्गत्यागस्य च विधिनानुज्ञातत्वान्न वैगुण्यापादकतेति विशेषेणोक्तम् चोदनयानुज्ञातत्वं चोदनाशब्देनोक्तम् अतः कामाधिकारेऽन्धादीनामधिकारस्यानिर्दिष्टस्यानापत्तेर्नित्याधिकारे चापाद्यमानस्येष्टत्वात्सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यानुरोधेन सङ्कोचकल्पनेऽपि नानिष्टापत्तिरित्युपसंहरति * इतीति * अन्धादीनामधिकारमिति विपरिणतेर्व्यवहितान्वयेन योज्यम् । ननु यदि सामर्थ्येनाश्रुतोऽपि वाक्यशेषः कल्प्यते ततः कामाधिकारे सन्देहाभावेऽपि यथा शक्नुयात्तथा कुर्यादिति वाक्यशेषस्य कल्पयितुं शक्यत्वादन्धाद्यधिकारोऽनिवार एव स्यादित्याशङ्क्याह *तस्मादिति* अयमाशयः वैदिकस्यार्थस्य प्रमाणान्तरगोचरत्वाद्वैदिक एव वाक्यशेषः सामर्थ्येन कल्पनीयः कल्प्यस्य वाक्यशेषस्य वेदानुगतत्वेन व्यतिरिक्तं वैदिकत्वं न सम्भवति न च निर्णीतार्थो वेदो वाक्यशेषमनुमन्यतइति तस्माच्छब्दस्य योग्यतया चोदितशब्दोक्तचोदनानुमितत्वपरामर्शित्वात् चोदनयानुमतत्वादित्यर्थः । अलब्धात्मकशब्देन सन्दिग्धार्थत्वाद् * अपर्यवसितत्वमित्युक्तम्* सिद्धशब्देन पर्यवसितत्वं पौरुषेयत्वशब्देन पुरुषोत्प्रेक्षाप्रभवत्वम् । ननु

वैदिकशब्दसामर्थ्यस्यैव वेदानुमतत्वात् वैदिकत्वोपपत्तेः किं वाक्यशेषकल्पनयेत्याशङ्क्याह * सामर्थ्येति * वाक्यशेषसिद्धमात्रं सामर्थ्याधीनं न वैदिकार्थनिर्णयः शब्दैकसमधिगम्यत्वात्तस्य सामर्थ्यस्य चाशाब्दत्वात्कल्पितस्य चार्थस्याशाब्दवैदिकार्थान्वयानुपपत्तेर्वेदानुमतत्वासम्भवादित्याशयः। ननु व्यवस्थितविषयस्य सामर्थ्यस्य व्यवस्थितविषयमङ्गत्वं विनानुपपत्तेः सामर्थ्यव्यवस्थयाङ्गत्वं व्यवस्थामात्रं कल्पयितुं युक्तम्। शब्देन तु विनानुपपत्त्यभावाच्छब्दकल्पना न युक्तेत्याशङ्क्य सामर्थ्यस्य शब्दकल्पकत्वे वृद्धसम्मतिमाह * आह चेति * विभज्यमानसाकाङ्क्षसंहत्यार्थविशिष्टैकार्थप्रतिपादकपदसमुदायस्य वाक्यत्वात्तस्य च वाक्यार्थप्रतिपत्त्युपायभूतकल्पपदार्थवाचिपदाभावे सकाङ्क्षत्वेनापरिपूर्णस्य विशिष्टार्थप्रतिपादकत्वायोगाद्विशिष्टाश्रुतिपादनार्थं[1] च विना व्यवहारासाधनत्वेनानर्थक्यापत्तेः परिपूर्णत्वाय श्रुतपदैकवाक्यभूतपदान्तरकल्पना युक्तेति भावः। प्रतिपत्तेर्नित्यं प्रतिपाद्यसापेक्षत्वात्प्रतिपत्तिशब्दस्य श्रुतिशब्दसापेक्षत्वे ऽपि उपायशब्देन सह समासाविघातः सामर्थ्यकल्पितायाः श्रुतेः स्मृतिकल्प्यश्रुतिवत् पृथक्वाक्यत्वाभावाच्छ्रुतवाक्यशेषभूतपदविषयः श्रुतिशब्दः। ननु कल्प्यानां श्रुतीनां कस्य चिच्छाखायामनाम्नानादभावावगतेः शशशृङ्गवत्कल्पना न युक्तेत्याशङ्क्य * तेनैव चेत्युक्तम् * सामर्थ्यलभ्यत्वेनाम्नानोपपत्तेर्नाभावकल्पना युक्तेति भावः। ननु सामर्थ्यलभ्यानामपि प्रतिपत्तिसौकर्यादाम्नानं युक्तमित्याशङ्क्य * सहस्रेत्युक्तम् * सहस्रशब्दो ऽयमनन्तवाची। सामर्थ्यलभ्यानामाम्नाने ऽनन्तावयवत्वेनाम्नानापत्तिरिति क्लेशः स्यादित्यर्थः। श्रोतृप्रोत्साहनाय सूत्रकृतः शब्दार्थभयशङ्कानिरासाय यत्नपूर्वकमर्थचिन्तां कुर्वता राज्ञा सह रूपकालंकारद्वारेण ऋषं दर्शयन् प्रमाणलक्षणसमाप्तिं तस्याश्च प्रमेयचिन्तार्थोत्तरैकादशलक्षणीं प्रति हेतुत्वात्तदारम्भसम्भवं सूचयति * इतीति * बहुमार्गं विस्तीर्णं च दुर्गं तद्रक्षिणां प्रवेशनिर्गमनविरोधाशक्तेः परिखाप्राकारोपेतं चतुरस्रं प्रवेष्टुमशक्तेः परैरभिभवितुमशक्यं प्रविश्यार्थस्य हिरण्यादेः कियानर्थः कश्च किमर्थः किमर्थं वोपादीयते केन च क्रमेण कश्च कस्मिन्स्वामीत्यादिविभागेन चिन्ता क्रियते तथा धर्मस्यापि दुरधिगमत्वात् दुर्गत्वेनोपचरितस्य मन्त्रादिभिः कृताः कर्मस्मृत्यादयः प्रकारभेदेन प्राप्तिहेतुत्वात् बहवो मार्गाः नामधेयसामर्थ्ययोर्विध्यन्तर्भावाद्वाक्यशेषस्य चार्थवादान्तर्भा-

१ विशिष्टार्थप्रतिपादनमिति २ पु० पा०।

वात्पृथगुपन्यासः । स्मृतिशब्दोपलक्षितानि वेदातिरिक्तधर्मप्रमाणानि शिष्टाचारसहितानि विद्यास्थानानि प्रकारतयोपचरितवेदव्यवधानेन धर्मदुर्गरक्षाहेतुत्वात् वेदाच्चापकृष्टत्वात्परिखात्वेनोपचरितानि साक्षाद्धर्मदुर्गरक्षाहेतुत्वात् वेदानां प्रकारस्थानीयशालाशब्देन गृहवाचिना परिवेष्टनाभित्तिरूपत्वगुणवशेन प्राकारत्वोपचारः । गूहतेः सम्वरणार्थत्वात् सम्वरणेन च सम्वेष्टनापरपर्यायेण शत्रुकृतपराभवात् दुर्गस्य रक्षणात् वेदाख्यशालया प्राकारेण गूढं रक्षितमित्यर्थः । साक्षाद्रक्षाहेतुत्वसूचनायोपशब्देन सामीप्यमाधिक्यं चोक्तम् प्रमाणस्य प्रमेयतद्भावपरिच्छेदकत्वाद्रक्षितत्वोपचारः । बहुदातर्युदारशब्दप्रसिद्धेर्विस्तीर्णबहूनामवकाशदानादुदारशब्देन विवक्षितम् पराक्रान्तेदुर्गे तान्सम्प्रविश्येत्यनेन साधितम् । दुर्गमिति व्यवहारात्साधने प्रवेशत्वेनोपचारः । वेदार्थस्याप्यर्थशब्दवाच्यत्वसामान्येन हिरण्यादिना श्लेशस्तस्यापि हिरण्यादिवत्परिमाणविनियोगप्रयुक्तिक्रमाधिकार्यादिप्रविभागेन द्वितीयादौ चिन्तां करोतीत्यर्थः । प्रथमपादे प्रमाणचिन्तापर्यवसानादर्थचिन्तैव त्रिपाद्यामपि कृतेत्याशङ्कानिरासाय * इदानीमित्युक्तम् * अर्थवादपादगतस्य विचारस्यार्थपरत्वाभावे ऽपि नामधेयपादगतस्यार्थपरत्वशङ्कानिवृत्त्यर्थं समस्तशब्दः ।

इतिकरणः समस्तोक्तप्रकारपरामर्शार्थः ।

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां प्रथमाध्यायस्य चतुर्थः पादः अध्यायश्च समाप्तः ।



॥ न्यायसुधायाम् ॥

॥ द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ अथापूर्वस्याख्यातप्रतिपाद्यत्वाधिकरणम् ॥ १ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥ ३३४।४

प्रथमे ऽध्याये इत्यादिना प्रसक्तानुप्रसक्तं चैत्यनेन कृतस्य वृत्तवर्त्तिष्यमाणार्थकीर्त्तनस्य प्रयोजनमाह * सम्बन्धं तावदिति * पाठक्रमेणोपक्रमभाष्यविषयत्वज्ञानात् भाष्याननुभाषणं तावच्छब्दाद्वापूर्वं तावत् सम्बन्धं करोति पश्चात् व्याख्यामिति प्रतीतेरुपक्रमभाष्यविषयत्वज्ञानं सर्वेषां वा वृत्तवर्त्तिष्यमाणाध्यायार्थकीर्त्तनानां लिङ्गेन क्रमं बाधित्वा साधारणप्रयोजनाभिधानायेदमिति न भाष्यविशेषो ऽनुभाषणीयः। एकादशानामप्यध्यायानां प्रथमाध्यायोक्तप्रामाण्यापेक्षत्वान्न द्वितीयाध्यायार्थमात्रकीर्त्तनमसाधारणसम्बन्धार्थमुक्तमित्याशङ्क्य लक्षणद्वयस्येत्यनेन निराकृता। भेदादिसापेक्षस्य प्रामाण्यस्य शेषादिहेतुत्वे ऽप्यन्यनिरपेक्षस्य भेदमेव प्रति हेतुत्वादसाधारण्यमन्यथा भेदादीनामप्युत्तराध्यायार्थान् प्रति आसाधारण्यानुपपत्तेरित्याशयः। यद्वा कर्मोत्पत्तिप्रतिपादनेनोत्पन्नस्योत्पत्तिविध्यानर्थक्यप्रसङ्गात्तत्परिहाराय शब्दान्तरादिभिर्भेदः प्रतिपाद्यते सिद्धप्रामाण्यस्य ह्यानर्थक्यं परिहरणीयमिति प्रामाण्यापेक्षो भेदः अवघातादीनां त्वाज्याद्यर्थत्वे ऽप्यदृष्टार्थत्वेनार्थवत्त्वोपपत्तेः। सर्वत्रापि चैवमेव वक्तुं शक्यत्वान्न प्रामाण्यबलेन शेषादिसिद्धिरिति असाधारण्यं स्पष्टम्। किं च को धर्मः कथं लक्षणः कान्यस्य साधनानि कान्यस्य साधनाभासानि किं परश्चेति चतुर्विधा धर्मजिज्ञासा प्रथमसूत्रेणोपक्षिप्ता तत्राध्यायद्वयप्रतिपाद्यप्रमाणस्वरूपविषयं प्रतिज्ञाद्वयं श्रुत्यर्थाभ्यां द्वितीयसूत्रेण कृत्वा तस्य निमित्तपरीष्टिरित्यादिना प्रथमाध्यायेन वेदप्रामाण्ये साधिते तदूबलेन चैत्यवन्दनादीनां धर्मत्वव्युदासेन ज्योतिष्टोमादीनामेव धर्मत्वमिति धर्म-

स्वरूपे ज्ञाते ऽपि इयन्त्येव धर्मस्वरूपाणीति कात्स्न्र्येन धर्मस्वरूपं भेदनिरूपणाधीनज्ञानमित्यध्यायद्वयस्य चोदनासूत्रपरिकरत्वात्स्पष्टतरासाधारणेह सङ्गतिरिति । यथोक्तम् ।

अथ वा द्वयमेवेदं सर्वशास्त्रमुखं मतम् ।
द्वयध्याय्याश्चोदनासूत्रं शेषाणां शेषलक्षणम् ॥
चोदनासूत्रनिर्दिष्टो यः प्रामाण्यपरिग्रहः ।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः ॥

इति सम्प्रत्येतदेवभाष्यमवयवशो व्याख्यास्यन् वृत्तानुकीर्त्तनभाष्यावयवद्वयं प्रतीकेनानुभाष्याक्षिपति * तत्रेति* धर्मप्रमाणस्य विध्यात्मकस्य वेदस्य तत्र प्रामाण्यव्युत्पादनात्कथमयुक्तमिति मत्वा पृच्छति * कुत इति * अभिप्रायमाह * नैव हीति * सजातीयविजातीयार्थान्तरव्यावृत्तासाधारणधर्मप्रतिपादको रूढ्या लक्षणशब्दस्तार्किकाणां प्रसिद्धस्तदभ्युपगमेनाप्येतत्समर्थयितुं शक्यमित्येतत्प्रतिपादनार्थो ऽयमारम्भः परमार्थतस्तु नानाकर्मलक्षणमित्यादिवत् व्युत्पादनमात्रार्थः प्रमाणलक्षणशब्दो ऽपीति न चोद्यावकाशः विध्यादावपि परिहारदर्शनादादिशब्देन तदग्रहणं प्रत्यक्षाद्यभिप्राये प्रमाणशब्दे तल्लक्षणमुपसंह्रियेत तस्य त्वसौत्रत्वेनाध्यायार्थत्वाभावादनुपसंहार्यत्वे वक्तुम् सूत्रकारेणेत्युक्तम् * अभिप्रायं स्पष्टयति * तन्नामेति * नामशब्देन रूढ्यर्थत्वं दर्शितं सूत्रकारेणेत्येतद्व्याचष्टे * अनुमानादीनीति * प्रत्यक्षलक्षणमपि न सूत्रितं प्रत्यक्षसूत्रस्याप्यनिमित्तपरत्वादित्याह * प्रत्यक्षमपीति * ननु चोदनासूत्रेण चोदनाया धर्मप्रामाण्याभिधानाद्धर्मप्रमाणस्य चोदनात्वं लक्षणमुक्तं भवत्यत आह * न चेति * धर्मानुवादेन प्रमाणविशेषविधिपरं तन्न प्रमाणस्य चोदनात्वलक्षणविधिपरं न चार्थात्तत्परत्वमन्यतः सिद्धत्वादित्याह * अस्मिन्नेवेति * साध्यसाधनसम्बन्धरूपधर्मप्रमाणमूलस्याख्यातशब्दस्य येषां तूत्पत्ताविति यत्र वक्ष्यमाणत्वादित्यर्थः । नन्वसूत्रितस्यापि प्रत्यक्षादिलक्षणस्य वृत्तिकारोक्तत्वादुपसंहारो भविष्यत्यत आह * यदपीति * हेतुमाह * सूत्रेति * अध्यायार्थो ह्युपसंहार्यः सूत्राश्रितत्वाच्चाध्यायव्यवस्थायाः सूत्रारूढस्यैवाध्यायार्थत्वमिति भावः । सूत्रारूढो ऽध्यायार्थ इति शाकपार्थिवादित्वान्मध्यमपदलोपेन समासः । न च तद्व्याख्यातएवार्थे सूत्रतात्पर्यं कल्प्यं प्रतिज्ञातचोदनाप्रामाण्यतत्सिद्ध्यर्थेतराप्रामाण्यतदुभयोपपत्तिप्रतिपादनरूपसमस्तलक्षणार्थव्यतिरिक्तरूपत्वादित्याह * कथं चेति * प्र-

त्यक्षसूत्रावयवमात्रस्य लक्षणपरत्वोक्तावपि औचित्यकथनार्थम् *सूत्राणीत्युक्तम् * न च तेनापि लक्षणपरत्वमुक्तम् उपक्रमोपसंहारपर्यालोचनेनापरीक्षापरत्वावसायादित्याह * अपि चेति * तद्विवृणोति * लोकेति * विध्याद्याक्षेपस्य विधेरिदं रूपमित्यादिना परिहारे विवरिष्यमाणत्वादिहाप्रपञ्चः समाधातुमुपक्रमते * तस्मा- ३३५।२
दिति * आद्यावयवस्य तावत्समाधानप्रकारमाह * तत्रेति * प्रमाणलक्षणमिति यदुक्तं तच्चोदनालक्षणसूत्रोक्तार्थानुवादार्थमित्यर्थः। द्वितीयावयवसमाधानप्रकारमाह *विध्यादीति* विध्यादीनां प्रामाण्येन या निर्णीतिः स्थिता सैव तत्त्वनिर्णीतिरभिप्रेतेत्यर्थः। नन्वध्यायसङ्गत्यै समस्ताध्यायार्थानुवादो युक्तो नैकसूत्रार्थानुवादः। अथ सर्वेण वृत्तानुकीर्त्तनभाष्येणावयवशः समस्तानुवादो नैतावतेत्युच्यते तथापि विध्यर्थवादेत्यादिना त्रिपाद्यर्थानुवादात्समस्तप्रथमपादार्थः पूर्वावयवत्वेनानुवाद्यो Sत आह * समस्तो हीति * अध्यायद्वयस्यापि तत्परिकरत्वे त्रिपाद्यर्थस्योत्तरावयवैरनुवादात्प्रथमपादार्थमात्रानुभाषणार्थत्वमस्य दर्शयितुं तस्य तावत्परिकरत्वमस्तीत्यभिप्रेत्य प्रमाणान्तरनिरासेन वा सम्मुग्धवेदप्रामाण्यं तन्मात्रेण पर्यवस्यतीत्याभिप्रेत्य प्रथमपादोक्तिः कथं चोदनासूत्रेण प्रमाणलक्षणाभिधानमित्यभिप्रेत्य स्वरूपवचनव्यक्तिपक्षे तावदुपपादयति *तत्र चेति * यश्चोदनाप्रमाणकः स धर्म इत्युक्ते चोदितत्वं धर्मस्य लक्षणमुक्तं भवतीति भावः। चोदनाप्रमाणकत्वं वा धर्मस्य लक्षणत्वेनोक्तमित्यध्याहार्यं भाष्ये धर्मशब्दानुपादानात्कथमेतदर्थलाभ इत्याशङ्क्याह * अत इति * कर्मव्युत्पत्तावपि कथं विशेषलाभो Sत आह * सत्यपि चेति * इदानीं प्रमाणवचनव्यक्तिपक्षे Sप्युपपादयत्यथ वेति प्रत्यक्षादिविषयत्वाशङ्कां निराकर्त्तुमाह * यद्यपि चेति * प्रमाणविधिपरत्वात्तस्य कथं तदनुवादेन लक्षणविधिपरत्वमित्याशङ्क्यार्थादुक्तं भवतीति दर्शयितुम् * एतावतैवेत्युक्तम् * चोदनात्वस्य लोकवेदसाधारण्येनातिव्यापकत्वादलक्षणत्वमाशङ्क्याह * न चेति * विजातीयव्यावृत्त्या क्रियावत्तस्येवाद्रव्यव्यावृत्त्या कथं चिल्लक्षणत्वं सम्भवतीति भावः। औत्पत्तिकसूत्रेण वा नित्यत्वाद्यभिधाने वैदिकत्वलाभान्नातिव्याप्तिरित्याह * अपि चेति * एवं तार्किकाभिमतं लक्षणशब्दार्थमुपपाद्य स्वतन्त्रप्रक्रियया न्यायव्युत्पादनार्थत्वात्समञ्जसमेवानुभाषणमित्याह *अथ वेति * एवं त्रिप्रकाराद्यावयवव्याख्यानेन पूर्वार्द्धं प्रपञ्चयोत्तरार्द्धं व्याचष्टे * तथेति * विध्यादीनां प्रामाण्योपयोगीद्वारविशेषः प्रवर्त्तकत्वस्तावकत्वस्मार-

कत्वरूपस्तत्त्वशब्दार्थो ऽभिमतः । किमित्यसौ द्वारविशेषो न स्पष्टमनुक्रान्तो ऽत आह * अवसराभावादिति * भेदलक्षणसङ्गत्यैतद्धेतुमात्रानुभाषणस्योपयोगादिति भावः । स्मृतिप्रामाण्योपयोगिनं द्वारविशेषमाह * श्रुतिमूलत्वमिति * स्मृतिमूलस्येत्यध्याहारः एवमवयवद्वयमाक्षेपपूर्वकं व्याख्यायेदानीं तृतीयावयवे वाक्यार्थविचाराभावाद् गुणविधिग्रहणानुपपत्तिमाशङ्क्याह * नामधेयस्येति * सत्यं नामधेयप्रामाण्यमेव सप्रपञ्चमुक्तं तस्य तु चोदनान्तर्गतत्वादाग्नेयादौ तदसम्भवे ऽर्थवादत्वानुपपत्तेः परिशेषाद् गुणविधित्वमेव भवतीति दर्शयितुं तद्ग्रहणमित्यर्थः । चतुर्थावयवे सन्दिग्धे विशेषणस्य प्रयोजनमाह * सन्दिग्धार्थेति * प्रथमपादमात्रे चेत्प्रमाणलक्षणोक्तिः कथमध्यायस्य प्रमाणलक्षणाख्येत्याशङ्क्याह * एवमिति * उक्तेन प्रकारेण सामान्यविशेषाभ्यां समस्तस्य प्रामाण्यव्युत्पादनार्थत्वादिति भावः । तत्र प्रस्मर्त्तव्यमिति भाष्यमध्याययोर्हेतुहेतुमद्भावप्रतिपादनार्थतया व्याचष्टे * तत्रेति * वर्त्तिष्यमाणार्थकीर्त्तनभाष्यमनन्तरमित्यादि तत्र प्रधानाप्रधानानीत्यवयवं भेदलक्षणासङ्गतत्वेनाक्षिपति * ननु प्रधानेति * प्रधानाप्रधानचिन्तादिशेषशेषिरूपत्वात्साक्षात्तृतीये सङ्गच्छते । चतुर्थे ऽपि फलक्रतुप्रयुक्तत्वविवेकार्थं यथोक्तं पुनः श्रुत्यादिषट्केन क्रत्वर्थपुरुषार्थयोः प्रयोज्यत्वाप्रयोज्यत्वशेषधर्मविचारणा । फलविध्यर्थवादत्वकालार्थाङ्गप्रधानता फलक्रतुप्रयुक्तत्वविवेकार्थं विचारिता इति अत्र तु कथं सङ्गतिरिति भावः । अत्राज्ञाताक्षेपाभिप्रायास्तानि द्वैधमित्यादिगुणप्रधानविचारदर्शनेनोत्पन्नभ्रमाभेदस्यैव लक्षणार्थत्वं निर्द्धारयितुमशक्नुवन्तः शेषशेषिविचाररूपेण सामान्येन पौनरुक्त्यमनेनाशङ्क्तिमिति मन्यमानाः परिहारमाहुरित्याह * के चिदिति *
३३६।२ दूषयति * तदयुक्तमिति * यद्यवघातसम्मार्गादीनां गुणकर्मत्वं स्तोत्रशस्त्रयोश्च प्रधानकर्मत्वमधिकरणान्तरसिद्धं स्यात् ततः पौनरुक्त्यशङ्कासम्भवात् तत्परिहाराभिधानं युज्येत शेषशेषिरूपतासामान्येन तु पौनरुक्त्यमनेनाशङ्क्य परिहारं द्रव्यगुणसंस्कारेष्वित्यत्र संस्कारशब्देनावघातादेर्द्रव्यशेषत्वाभिधानात् द्रव्यशब्देन द्रव्यस्य शेषत्वाभिधानेन तत्प्रति कर्मणः प्राधान्याभिधानादित्यर्थः । तस्मादेवं समाधेयमित्याह * तेनेति * सत्यन्तत्वेन लक्षणार्थत्वेन लक्षणं प्रति प्राधान्येन भेद एव लक्षणप्रतिपाद्यो ऽपूर्वभेदो ऽपि तु प्रतिपाद्य एव । न चैवं लक्षणभेदापत्तिरनुनिष्पादित्वात्तस्येत्युक्तम् * तमन्विति * अतस्तत्प्रसिद्धया प्राधान्यं विचार्यमाणं नासङ्गतमिति भावः ।

तदयं भाष्यार्थः । अनन्तरं भिन्नान्यभिन्नानि च कर्माणि परीक्षिष्यन्ते तदनुनिष्याद्यपूर्वभेदाभेदसिद्ध्यर्थं च द्रव्यं प्रति प्रधानान्यप्रधानानीति। ननु अभेदस्यापि परीक्षणे लक्षणभेदः स्यादत आह *कर्मभेदस्तावदिति * उत्सर्गापवादाभ्यां तस्यैव परीक्षेत्यर्थः । उत्तरार्द्धं व्याचष्टे * तदनुनिष्पादिना त्विति * एतदेव प्रपञ्चयत्समस्ताध्यायाधिकरणान्यनुक्रामति * तत्रेति * तत्र शब्देनापूर्वनिष्पादनपर्यन्तेन भावार्थाधिकरणेन कर्मशब्देभ्यो ऽपूर्वं प्रतीयतइति व्युत्पादयता कर्मभेदानुनिष्पादित्वे ऽपूर्वस्य सिद्धे * सतीत्युक्तम * तृतीयाविषयत्वेन प्रसिद्ध इत्यर्थः । यत्पुनः तृतीयाविषयः सन्नत्रारभ्यते तदपवादत्वेनेत्यसङ्गतिनिरासार्थम् * पुनरित्युक्तम् * अपवादं दर्शयति * सत्यपीति * ननु चतुर्थे संस्कारे च तत्प्रधानत्वादित्यत्रावहन्त्यादीनां दृष्टार्थत्वेन प्राप्तत्वादविधेयत्वमाशङ्क्य नियमादृष्टार्थत्वेन देशादिवद्विधानं भविष्यतीति वक्ष्यमाणत्वात् कथमपूर्वाभावाभिधानमत आह * यत्त्विति * पुरोडाशनिष्पत्त्यर्थस्य तण्डुलीभावस्यानेकानि स्वनिष्पत्तिसमर्थानि साधनान्यालोचयतो यो ऽवघातविधिना साधनविशेषसमर्पणेन तत्रोपसंहारः क्रियते स एव नियमनिबन्धादिशब्देनोच्यते अर्थाक्षेपेण हि प्राप्स्यन्नप्यवघातस्तण्डुलीभावजनकत्वेन नियम्यमानो जन्यजनकनियमस्यादृष्टं प्रयोजनमपेक्षते ततश्चावघातेन तण्डुलीभावे कृते तज्जन्यत्वात्तण्डुलेष्वतिशयो निष्पाद्यमानो नावघातक्रियाजन्यो वक्तुं शक्यते तण्डुलोत्पादनानिरपेक्षावघातस्वरूपजन्यत्वाभ्युपगमे कृष्णलेष्वप्यतिदेशप्राप्तो ऽवघातो न वारयितुं शक्यते तस्मान्नियमादृष्टस्य चतुर्थाधिकरणे क्रियाजन्यत्वानभ्युपगमान्न तद्विरोध इत्यर्थः । अन्ये त्वर्थाक्षेपस्य विधिकल्पनानिरपेक्षस्याप्रापकत्वेन मन्थरत्वादप्राप्तावस्थस्य क्रियास्वरूपस्यैव विधेयत्वात्प्रयोजनकल्पनोचिता न फलमात्रत्वेनावस्थितस्य नियमस्येति मन्वाना नियमादृष्टस्यापि क्रियाजन्यत्वमिच्छन्तस्तादर्थ्यमात्रनिराकरणपरतयेदं वार्त्तिकमेवं व्याचक्षते क्रियाजन्यक्रियाकृतशब्दाभ्यामीप्सितत्वमुद्देश्यत्वाद्यपरनामधेयमभिप्रेतं नोत्पाद्यत्वमात्रं न तया व्यपदिश्यतइति च क्रियोत्पाद्यत्वे सत्येवानुषङ्गिकत्वात्तद्व्यपदेशमात्रं निराकरणपरमिति आनुषङ्गिकत्वादेव च कृष्णलेष्ववघाताप्रयोजकत्वमिति भावः। अपवादसिद्धिमुपसंहरति *तेनेति* गुणकर्मस्वप्यदृष्टार्थेषु अपूर्वाङ्गीकरणादैकान्तिकीति पूरणीयं प्रोक्षणादिजन्यस्य वा व्रीह्याद्याश्रितस्यातिशयस्य फलस्थानीयत्वेनात्माश्रितावान्तरद्वाररूपापूर्वशब्दवाच्यत्वाभावात्त-

स्य चानन्तरभावित्वेन तत्सिद्ध्यर्थापूर्वान्तरकल्पने प्रमाणाभावात्प्रोक्षणजन्ये ऽतिशये प्रमाणान्तरागोचरत्वसाम्येनौपचारिको ऽपूर्वशब्दप्रयोग इत्यविरोधः । अस्य चेत्यादिभेदलक्षणार्थ इत्येवमन्तं सुगमम् * तदपवादार्थमिति * गुणत्वलक्षणस्यापवादः प्रधानत्वलक्षणं तदपवादार्थं प्रधानत्वलक्षणस्यापवादो गुणत्वलक्षणं तदपवादार्थमुत्तरमित्यर्थः । प्रक्रियाशब्देन विरुद्धलक्षणया प्रकरणान्तरमुक्तं । कैश्चित्तु प्रथमाध्यायप्रतिपादितप्रामाण्यस्य शास्त्रस्य साध्यानुबन्धभेदाभ्यां भेदो ऽस्मिन्नध्याये प्रतिपाद्यतइत्युक्तं तत्र साध्यं संयवनस्य पिण्डोत्पत्तिः गोदोहनस्य पयःप्राप्तिः अवघातस्य व्रीहिविकारः प्रोक्षणस्य संस्कार इति चतुर्विधमन्योन्यनिरपेक्षं भिन्नं सत्सामवायिकाङ्गशास्त्राणां भेदकं द्वितीयाश्रुत्या एषां साध्यनिष्ठत्वावसायात् क्रियारूपानुबन्धनिष्ठत्वाभावेन तद्भेदनिमित्तभेदायोगात्तथारादुपकारकाङ्गसाध्यः करणोपकारः प्रधानसाध्यानि करणावान्तरकार्याणीति तद्भेदेनाङ्गप्रधानशास्त्रभेदः समस्ताङ्गप्रधानसाध्यश्चैश्वर्यलक्षणो ऽधिकारः कामजीवनाधिकाररूपेण भिन्न इति तच्छास्त्रभेदाध्यवसानमिति शब्दान्तरादिप्रमाणकविषयापरनामधेयानुबन्धभेदाच्च यागहोमादिशास्त्राणां भेद इति तन्निराकरणार्थमेष एवार्थो वर्णनीयो नान्य इति भाष्यं व्याचष्टे * एष एवेति * अयमाशयः अङ्गाङ्गित्वाद्यवधारणार्थत्वेनानुष्ठानोपयोगित्वाच्छास्त्रार्थरूपकर्मभेद एव विचार्यो नानुपयोगी शास्त्रभेदो ऽनुष्ठानपर्यवसायित्वान्मीमांसाशास्त्रस्येति । किं च साध्यानुबन्धभेदयोः शास्त्रार्थभेदद्वारा वा शास्त्राभेदकत्वं तन्निरपेक्षं वेति विकल्पनीयं न तावदाद्यः पक्षः । शास्त्रभेदावधारणात्प्रागेव शास्त्रार्थभेदे ऽवधारिते नुष्ठानसिद्धेरनुनिष्पादिशास्त्रभेदावधारणानर्थक्यान्नैरपेक्ष्यं तु न सम्भवत्येव साध्यानुबन्धभेदयोः शास्त्रार्थेन भावनया नियोगेन वा सम्बन्धं विना शास्त्रेणासम्बन्धाद्भेदकत्वानुपपत्तेः । अस्तु वा ऽनुबन्धभेदेनाधिकारलक्षणसाध्यभेदेन च शास्त्रार्थभेदाध्यवसायात्तद्द्वारेण शास्त्रभेदः साध्यान्तराणां तु शास्त्रार्थभेदकत्वात्कथं शास्त्रभेदकत्वमिति वाच्यम् । उत्पत्त्यादीनामशाब्दत्वेन शास्त्रार्थनियोगानवच्छेदकत्वात्तद्भेदकत्वानुपपत्तिः । तदेवं भाष्यकारेणैव शास्त्रभेदस्य लक्षणार्थत्वनिराकरणात्प्राभाकराणां प्रधानप्रधानानीति भाष्यस्य शास्त्रभेदलक्षणार्थप्रतिपादनपरतया व्याख्यानमतिमूढतामापादयतीति अलमनेन कर्मभेदस्य लक्षणार्थत्वे कथं प्रमाणलक्षणानन्तरसङ्गतिरित्याशङ्क्य भाष्यकृतोक्तम् । एष एवाध्याय सम्बन्ध इति तत्र तत्र

प्रस्मर्त्तव्यमित्यनेन च हेतुहेतुमद्भावलक्षणसम्बन्धप्रतिपादनेन भेदलक्षणस्य चावसरप्रतिपादनाल्लक्षणान्तरावसरनिरासपरतया इदं भाष्यं व्याचष्टे * न चान्यस्येति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * उपदेशे ज्ञात इत्यनुषङ्गः सर्वेषामुत्तरोत्तराध्या- ३३७।१
यानां पूर्वपूर्वापेक्षत्वं दर्शयितुं श्लोकानुक्तमपि प्रमाणलक्षणापेक्षत्वं दर्शयति * प्राक् तावदिति * तत्रापीत्यादिना ऽपेक्षतइत्यन्तेन श्लोकव्याख्यानं तत्रावृत्तिप्रसङ्गानामुपदेशातिदेशसाधारण्ये ऽपि भूम्नोत्तरषट्कस्यातिदेशविषयत्वाभिधानं लक्षणान्तरावसरनिराकरणपरत्वे कथं प्रस्तुताशङ्कानिराकरणमत आह * ततश्चेति * तदिहेत्यादिभाष्ये भेदस्य स्वतो वैलक्षण्याभावात् षड्विधत्वानुपपत्तिमाशङ्क्य व्याचष्टे * षड्विधइति * नामधेयक्रमस्त्वविवक्षित इत्याह * वक्ष्यमाणेति * शब्दान्तरादीनां भेदत्वाभावात्सामानाधिकरण्यानुपपत्तिमाशङ्क्य च वैयधिकरण्येन व्याचष्टे * इतिकरण इति * शङ्काद्वयमप्यन्यथा परिहरति * अथ वेति * संज्ञायाः शब्दान्तरवदभिधानान्तरत्वेनाभिधेयान्तरोपस्थापकत्वात्संख्यायाश्च गुणत्वाविशेषाद्भेदोपादानमर्थकमाशङ्क्याह * संज्ञाशब्दान्तरयोरिति * धात्वन्तररूपं शब्दान्तरं भविनानुरञ्जकव्यापाररूपेण स्वार्थं वदत्स्वार्थानुरक्तायाः भावनायाः धात्वर्थान्तरानुरक्तभावनातः स्पष्टं भेदं बोधयति संज्ञा तु न स्वेन भावनानुरञ्जकव्यापाररूपेण धात्वर्थं वदति नाम्नां निष्पन्नरूपाभिधानस्वभावत्वान्नासौ धात्वर्थमात्रभेदे व्याप्रियते तद्भेदात्तु शब्दान्तरन्यायेन भावनाभेदसिद्धिः। गुणश्च गुणान्तरावरुद्धं कर्मणएयसम्भवात्स्वविशिष्टकर्मोत्पत्तिमाक्षिपन्नुत्पन्नस्योत्पत्त्यसम्भवात्कर्मान्तरेभ्यो भेदं बोधयति संख्या तु व्यासज्यवृत्तित्वेनैकनिष्ठत्वाभावात्संख्यान्तरावरुद्धेष्वपि कर्मसु उपजनापायेनोपपत्तेः स्वविशिष्टकर्मोत्पत्तिमाक्षेप्तुमशक्नुवन्ती प्रमाणान्तरेण कर्मोत्पत्ताववधारितायामनेकत्वमात्रं बोधयतीति स्वरूपानभिधायित्वात्सञ्ज्ञाशब्दान्तरात्पृथक् व्यासज्यसमवायाच्च संख्या भिन्ना गुणान्तरादित्यस्मिन्वार्त्तिके वक्ष्यतइति भिन्नान्यभिन्नानि चेत्येतावतैव हेतुमत्तया वर्त्तिष्यमाणकथनसिद्धेः षड्विधकथनानर्थक्यमाशङ्क्य वक्ष्यमाणमित्यादिभाष्येण सङ्क्षेपप्रदर्शनपूर्वकस्य विस्तरवचनव्याख्यातुः प्रतिपादनसौकर्यं श्रोतुश्च प्रतिपत्तिसौकर्यं प्रयोजनमुक्तं तदिष्टं विदुषां लोके समासव्यासधारणमिति न्यायेन स्पष्टत्वात् तदेतदित्येतदप्यनादिसमाख्याबलेन शास्त्रभेदलक्षणार्थत्वनिराकरणपरतया ऽतिस्पष्टत्वान्न व्याख्यातम्। यद्वोप-

क्रमोपसंहारपर्यालोचनया सर्वमेवैतन्निराकरणपरं व्याख्येयं हेतुहेतुमल्लक्षणो ह्यध्यायानां सम्बन्धः प्रसिद्धो न प्रासङ्गिको प्राधान्यापत्तेः। षड्विधत्वेन साध्यानुबन्धभेदाभ्यां द्वैविध्यमवान्तरविवक्षया त्रयोदशविधत्वं निराकृतं कर्मशब्देन शास्त्रविषयत्वं शब्दान्तरादिग्रहणेन साध्यादीनि । परोक्ताध्यायार्थनिरासेन स्वाभिमतार्थकथनस्य व्याख्यानतो ज्ञास्यमानत्वादानर्थक्यमाशङ्क्योत्तरभाष्यमिति ।न चोक्रमोपसंहारभाष्ययोः सत्यमन्यमर्थं पश्यामः । एतन्नात्पर्येणेति भाष्ये काक्का भेदमात्रतात्पर्याभिधानं बलाबलस्यापि वक्तव्यत्वादयुक्तमाशङ्क्य व्याचष्टे * सर्वदा चेति * न यत्रैकेन भेदो बोध्यते तत्रैवेतरेणेति भिन्नविषयत्वम्। उपोद्घातादिशब्दार्थं व्याचष्टे * तत्रेति * यत्प्रस्तुतादुपजायते तत्प्रसक्तानुप्रसक्तादीति योज्यम् । किं पुनरुपोद्घाताधिकरणमत आह * यथेति * अनुसरतीति कर्त्तरि घञं व्युत्पाद्य प्रकृतौ यो ऽनुनिष्पाद्यपूर्वको भेदानुसारी कर्मभेदः तत्सिद्ध्यर्थमिति योज्यम्। धात्वर्थस्य हि फलभावनाकरणत्वे तद्भेदानुनिष्पादी फलापूर्वभेदः ।सिध्यति कारणभेदानुनिष्पादित्वात्कार्यभेदस्य नामार्थस्य तु करणत्वे तद्भेद एवापूर्वभेदापादकः स्यादित्याशयः प्रकृतानुनिष्पाद्यान्यथादरदर्शनान्नानुनिष्पादित्वमात्रेणापूर्वभेदस्यानादरणीयत्वम् । धर्मापेक्षाज्ञानार्थं चेह कर्मभेदस्य प्रतिपाद्यत्वात्फलसाधनत्वेन कर्मणां धर्मत्वात्तस्य चापूर्वद्वारत्वादनुनिष्पादिनो ऽप्यपूर्वभेदस्य विवक्षोपपत्तेः। प्रकृतकर्मभेदविशेषणत्वाविरोधः किं भावशब्देभ्यो ऽपूर्वं किं द्रव्यगुणशब्देभ्य इति सन्देहभाष्यम्।अपूर्वस्य शब्दवाच्यत्वाभावादयुक्तमाशङ्क्य फलपदसम्बन्धद्वारा भावशब्दानां द्रव्यगुणशब्दानां चापूर्वगमकताभिप्रेतेति भावः । अनेन च नामार्थस्य फलभावनाकरणत्वं धात्वर्थस्य वेत्यधिकरणार्थः सूचितः । करणभेदाभेदयोरपूर्वभेदाभेदहेतुत्वसूचनायानुगन्तव्यावित्युक्तं सर्वेषां फलपदसम्बन्धे कतरस्य सम्बन्धे इति चिन्तानुपपत्तेस्तत्सिद्ध्यर्थं प्रथमं तावदित्यादिभाष्येणैकस्य फलसम्बन्धः सर्वेषां चेति चिन्तान्तरं कुर्वतो ऽर्थस्याप्यस्य चिन्तान्तरस्य धर्मभेदाभेदफलत्वाल्लक्षणसङ्गतिरप्यस्तीति दर्शयितुं किं पदेन पदेन धर्म उच्यते उत सर्वैरेक इति । प्रथमं चिन्त्यतइत्युक्तम । भेदस्य च पदार्थस्वरूपत्वात् प्रमाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रप्रतिज्ञातधर्मस्वरूपव्युत्पादनार्थत्वात्तयैव प्रतिज्ञया सङ्गतिरिति सूचयितुम्* प्रथमे ऽध्यायइत्युक्तम् * नन्वेवं सति चोदनाशब्दस्य विधिप्रत्ययमात्रवाचित्वात्तत्पदेन पदेनेति चिन्ता न युक्तेत्याशङ्क्य * वाक्यमित्युक्तम् *

तदुपपादनार्थं विधेस्त्र्यंशभावनाविषयत्वं वक्तुम् * क्रियाया इत्युक्तम् * तच्चोदनासूत्रएव द्रव्यध्याय्याश्चोदनासूत्रमित्यनेन प्रमाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रपरिकरत्वाभिधानात्किमाद्यपेक्षितैः पूर्णः समर्थप्रत्ययो विधावित्यनेन वाक्यस्य चोदनात्वाभिधानात् स्पष्टमित्युपेक्ष्य वाक्ये चेति वाक्यैवाक्यार्थसावयवत्वाभिधानस्य प्रकृतोपयोगमाह * यदेति * भाष्यार्थमजानानः शङ्कते * अत्रापीति * वाक्यवाक्यार्थयोः सावयवत्वे ऽपि चोद्यं भवतीत्यर्थः। ३३८।१
धर्मस्य वाक्यरूपचोदनागम्यत्वेन वाक्यार्थत्वात्प्रतिपदमित्याशङ्का न युक्ता वाक्यार्थस्य लक्ष्यमाणत्वाद्वाच्यत्वाभिधानं न युक्तमिति चोद्यार्थः। एतदेव व्याचष्टे * यदि हीति * किं वाक्यार्थस्य धर्मत्वमभिप्रेत्येयमाशङ्का भाष्येण धर्मस्य पदार्थता उक्तेत्यभिमानाद्वा तत्र पदार्थस्यैव श्रेयःसाधनत्वेन धर्मत्वान्न तावद्वाक्यार्थस्य धर्मता युक्तेत्याह * तदुच्यतइति * धर्मस्य वाक्यार्थत्वे ऽपि वाक्यार्थस्य धर्मत्वं नास्तीत्याशयः। न च भाष्येण धर्मस्य पदार्थतोक्तेत्याह * न चात्रेति* श्रेयःसाधनत्वस्य फलपदसमभिव्याहारलभ्यत्वाद्वार्थात्मत्वे सति वाक्यार्थत्वप्रसिद्ध्युपपादनायोक्ते पदार्थस्य धर्मत्वे सर्वपदानामेकवाच्याभावात्सर्वशब्दानर्थक्यमाशङ्क्येतरेत्युक्तम्। पदार्थान्तरानुपगृहीतस्यैकपदार्थस्यैव फलपदान्वयाधीना श्रेयःसाधनत्वावगतिरित्याशयः। अत्रैव भाष्यं योजयति *तथा चेति* नन्वेवमपि पदद्वयमात्राधीनत्वाद्धर्मत्वावगतेर्बहुविषयसर्वशब्दानर्थक्यं द्रव्यादेरपि फलवदुपकारित्वेन धर्मत्वात्तदभिधायिपदापेक्षत्वेन सर्वशब्दस्यार्थवत्त्वे सत्येकपदानर्थक्यं स्यादित्याशङ्क्याह *साक्षादिति* कान्यस्य साधनानीत्यादौ अङ्गस्य धर्मसाधनत्वाभिधानेन धर्मत्वानभ्युपगमान्न धर्मानेकत्वापत्तिरित्याशयः। यथा श्रुतं त्वसमञ्जसमेव स्यादित्याह *न त्विति* नन्वत्र किं पदेनेति भाष्यात्सर्वेषां धर्मत्वम् एकस्य वेति विचारः प्रतिभाति यदैकस्मादपूर्वम् इत्यस्माच्च सर्वेषां वा ऽपूर्वसाधनत्वमेकस्य वेति यआहुः किमपि भावयेदिति ते स्वर्गकामपदसम्बन्धात्स्वर्गं भावयेदिति ब्रूयुरिति मुख्योपोद्घाताधिकरणभाष्याच्च एकस्य फलसम्बन्धः सर्वेषां चेति तत्र किं प्राधान्येन विचार्यमित्याशङ्क्याह * यच्चेति * फलपदसम्बन्धावगम्यधर्मत्वकल्प्यत्वादपूर्वसाधनत्वस्य फलपदसम्बन्धएव मूलत्वात्प्राधान्येन विचार्य इत्यर्थः। किं तावदिति पूर्वपक्षप्रतिज्ञामुपपादयितुं व्याचष्टे * किं प्राप्तमिति * प्रतिज्ञासूचितामुपपत्तिं प्रश्नपूर्व-

१ वाक्येति २ पु० ना०।

कमाह * कुत इति * सर्वेषामगृह्यमाणविशेषतया ऐकरूप्यात्फल-पदसम्बन्ध इति हेतौ तृतीयामङ्गीकृत्य तावद्व्याचष्टे *यदि हीति * सर्वेषां फलपदसम्बन्धे सति ऐकरूप्येण सम्बन्धः सिद्ध्यतीति इत्थम्भावे तृतीयामङ्गीकृत्यान्यथा व्याचष्टे * यदि चेति * व्याख्याद्वय-समुच्चयार्थश्चशब्दः प्रधानेन चेत्युपपत्त्यन्तरं गुणसम्बन्धे ऽप्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * सर्वश्चेति * ननु सर्वेषां फलपदसम्बन्धस्य प्रतिज्ञार्थत्वे धर्मग्रहणमसङ्गतं स्यादित्याशङ्क्य फलतः सङ्गतिं दर्शयन्नुत्तरार्द्धं व्याचष्टे * तस्मादिति * नन्वेवं सति धर्मभेदाभेदफलत्वाद्विचारस्य तस्मादेकमपूर्वमिति सिद्धान्तोपसंहारवत्पूर्वपक्षे भिन्नो धर्म इति वाच्यमित्याशङ्क्याह * तत्र त्विति * प्रत्येकं फलसाधनत्वे सति भेदेन श्रेयःसाधनत्वाद्धर्मभेदः सिद्ध्येन्न च सर्वेषामपि फलपदसम्बन्धे नियमेन प्रत्येकं फलसाधनतास्तीत्याशयः । पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यादिति षष्ठाधिकरणन्यायेन यथा सत्रिणः प्रत्येकं कृत्स्नं फलं लभन्ते तथा नामधात्वर्था अपि किं प्रत्येकं फलं साधयन्त्यथ एकप्रयोजनाभिसम्बन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगादित्येकादशाधिकरणन्यायेन यथा दर्शपूर्णमासौ संहत्य साधयतस्तथैते ऽपि संहत्य साधयन्तीति यथेष्टं कल्पनोपपत्तेः सर्वेषां फलसाधनत्वे ऽपि पृथक्फलसाधनत्वनियमाभावान्नैकान्ततो धर्मभेदः सिद्ध्येदित्यर्थः प्रत्येकमपि फलसाधनत्वे ऽग्निहोत्रे दध्यादिवददृष्टार्थत्वेनैकार्थत्वादन्योन्यानैरपेक्ष्याद्विकल्पे सत्यथ वा ऽग्निहोत्रदर्शपूर्णमासादिवदन्योन्यनैरपेक्ष्याभावात्समुच्चये सति नात्यन्तिको धर्मभेदः सिध्येन्न चाग्निहोत्रदर्शपूर्णमासादिवदेकान्तत एकशब्दोपादानमप्यस्तीति सूचयितुम् * तथेत्युक्तम् * आदिशब्दसूचितानवकॢप्तिर्यथेष्टशब्देन स्वीकृता । ननु ऋद्धिकामाः सत्रमासीरन्नित्याख्यातोक्तस्य बहुकर्तृत्वस्य संहतानां कर्तृत्वाद् द्रव्यभेदे ऽपि कर्तृरूपैक्यादनुपपत्तेः प्रत्येकं कर्तृत्वावसायात्पुरुषार्थस्य फलस्यैकस्मात्कर्तुः सिद्धेः तस्य तस्य कर्तुः प्रत्येकमधिकारो युक्तः । ऽयेनाभिचरन्यजेत चित्रया यजेत पशुकाम इत्यादौ तु नामधात्वर्थानां फलभावनां प्रत्युपादयत्वेन समुदाये वाक्यपरिसमाप्तेः संहत्यकारित्वावगमात्प्रत्येकसाधनशक्त्यवगमहेतोर्बहुवचनस्याभावात्कथं प्रत्येकं फलसाधनतेत्याशङ्क्याह * तत्रेति * नामधात्वर्थयोरस्मिन्पूर्वपक्षे ऽरुणैकहायन्यादिवद्विशेषणविशेष्यभावानभ्युपगमाद्दर्शपूर्णमासादिवच्चैकशब्दोपादानाभावात्साहित्यानवगतेरुपादेयत्वे ऽपि समुदाये वाक्यसमाप्तयोगात्

बहुवचनाभावे ऽपि नामार्थस्य तृतीयया व्रीह्यादिवन्निरपेक्षसाधनत्वावगमाद्धात्वर्थस्याप्यन्यसापेक्षस्य साधनत्वे सामर्थ्याभावात्समर्थः पदविधिरिति पदमात्रविधौ सामर्थ्याधीनत्वस्मृतेः प्रत्ययार्थान्वयानुपपत्तिप्रसङ्गान्नैरपेक्ष्यावगतेर्बहुवचनाभावे ऽपि पृथक्फलसाधनत्वावगतिः सम्भवतीत्यर्थः। समुच्चयस्तर्हि न सम्भवेदित्याशङ्क्य यथा सत्रिणां प्रत्येकं साधनत्वशक्त्यवगमे ऽपि समुच्चयस्तथानामधात्वर्थानामपीत्येतावता दृष्टान्ताभिधानम्। नन्वत्र सत्रिवत् बहुवचनाभावात्कथं समुच्चयावगतिरित्याशङ्क्य * फलेत्युक्तम् * दृष्टार्थव्रीह्यादेः साहित्ये ऽपि फलानातिशयादगत्या विकल्पो ऽङ्गीकृतः। इह तु प्रत्येकं साधनत्वे ऽपि समुच्चयेन फलभूयस्त्वस्य सारतरत्वस्य वा कल्पयितुं शक्यत्वान्न विकल्पाङ्गीकरणं युक्तमिति भावः। नन्वेवं सति दर्शपूर्णमासवदेकशब्दोपादानाभावात्कथं संहत्य साधनत्वपक्षसम्भावनेत्याशङ्क्याह * अथ वेति * अन्योन्यनैरपेक्ष्यात्संहत्य साधनत्वायोगे ऽपि दर्शपूर्णमासवत्साधनानां साहित्यमेकशब्दोपादानाभावे ऽप्येकवाक्योपादानात्सम्भवतीत्यर्थः। समुदाये वाक्यसमाप्तिसम्भावनार्थो ऽरुणादिदृष्टान्तः। विकल्पपक्षमपि सम्भावयत्यथ वेति। दर्शपूर्णमासवदेकशब्दोपादानाभावेन शब्दसामर्थ्यादरुणादिवच्चान्योन्याकाङ्क्षाभावेन वस्तुसामर्थ्यादपि साहित्यानवगतेः। समुदाये प्रमाणाभावात्प्रत्येकं वाक्यसमाप्त्या विकल्पः प्रतिभातीत्यर्थः * इति प्राप्तइति* सिद्धान्तभाष्यं प्रति पदधर्म इति सर्वेषां फलसाधनत्वे पूर्वपक्षिते तत्प्रतियोगित्वेनैकस्य फलसाधनत्वे ऽभिधातव्ये ऽपूर्वसाधनत्वाभिधानादयुक्तमाशङ्क्योपपादयन् सिद्धान्तयति *अत्रेति* अदृष्टकल्पनागौरवापत्त्या सर्वेषां फलसाधनत्वं निराकर्त्तुमेवमुक्तमित्याशयः। सर्वेषां हि फलसाधनत्वे ऽभिहिते संहत्य पक्षे ऽपि उत्पत्त्यपूर्वभेदो ऽवश्याङ्गीकार्यः। विकल्पे ऽपि प्रत्येकमपूर्वकल्पना प्रसज्येतैव तत्र यद्येकस्य फलापूर्वसाधनत्वे नामार्थस्य धात्वर्थस्यानर्थक्यं स्यात्ततो ऽगत्या बह्वदृष्टकल्पनापादकमपि सर्वेषां फलापूर्वसाधनत्वं कल्प्येत। न त्वेतदस्ति धात्वर्थस्य साधनत्वे नामार्थस्य धात्वर्थनिष्पादकत्वेन तादर्थ्योपपत्तेः नामार्थस्य चासाधनत्वे निराश्रयस्य तस्य साधनत्वायोगेनाश्रयतया धात्वर्थस्य नामार्थोपकारित्वोपपत्तेः। ततश्चादृष्टानुमानस्य प्रसङ्गो यस्यां कल्पनायां सालघीयसी भविष्यतीति भाष्यार्थो ऽनेन सूचितः। श्लोकं व्याचष्टे * यदि हीति * तस्मादित्युपसंहारभाष्यं फलसम्बन्धद्वारा ऽपूर्वसम्बन्धाभिधानात्पूर्वपक्षप्रतियोगित्वोपपत्तावप्युप-

क्रमानुरोधेनैकस्मादपूर्वमित्युपसंहर्तव्ये पूर्वैक्योपसंहारादयुक्तमाशङ्क्यैकस्मादित्यनेनैकस्य फलापूर्वसाधनतया उक्तस्य तस्माच्छब्देन परामर्शमभिप्रेत्यैकस्मात्फलसम्बन्धिनो ऽपूर्वमित्येवं व्याख्यां सूचयन् सिद्धान्तमुपसंहरति * तस्मादिति * भाष्यकृता तु सर्वेषां फलसम्बन्धे फलांशस्याविधेयत्वेन नामधात्वर्थविशिष्टफलभावनाविध्यनुपपत्तेर्नामधात्वर्थानामेकविशिष्टविधिप्रसूतार्थविधिविधेयत्वायोगाच्छ्रौतव्यापारनानात्वेन वाक्यभेदापत्तेरेकस्यैव फलोद्देशेन विधेयत्वादेकमेवापूर्वं प्रमाणवदिति सूचनायापूर्वैक्यमुक्तम् । एवं च सर्वेषां फलसाधनत्वपक्षे प्रत्येकं विकल्पेनैव फलसाधनत्वापत्तेर्धर्मभेदात् सिद्धान्ते चाभेदात्साक्षादप्यस्याश्चिन्ताया लक्षणसङ्गतिः सूचिता भवति । यस्त्वेकस्य फलवत्त्वे ऽन्यस्य तदुपकारित्वे वैरूप्याख्यो वाक्यभेदो ऽभिहितः तं परिहरति * न चेति * नामार्थस्य फलसम्बन्धे सोमेन यजेतेत्यादौ चैतत्परिहारायोगाद्भावार्थाधिकरणसिद्धान्तत्वाच्च पूर्वं नामधेयत्वस्य वक्तुमशक्तेरपरितोषात्स्वमतेनान्यथा परिहरति * अगत्या वेति * अदृष्टकल्पनातो लक्षणा ज्यायसीति सूचनायागत्येत्युक्तम् । इह नामार्थस्य फलसम्बन्धे यागवता श्येनेनेति मत्वर्थलक्षणाधात्वर्थपक्षे तु श्येनवता यागेनेति मत्वर्थलक्षणाप्यत्र नास्तीति प्रौढ्या परिहारान्तरमाह *अर्थाक्षिप्तेति *धात्वर्थस्य करणत्वे कर्तृव्यापारव्याप्यत्वात्करणस्य यो ऽर्थात्करणत्वेनाक्षिप्तः कर्तृव्यापारव्याप्यत्वरूपः साध्यांशस्तदुद्धारेण धात्वर्थैरात्मनो निष्पादकस्य नामार्थरूपकरणस्य ग्रहणसिद्धेः शब्दस्योपादेयत्वोद्देश्यत्वविधेयत्वानुवाद्यत्वगुणत्वप्रधानत्वरूपविरुद्धत्रिकद्वयपरत्वाभावान्न वैरूप्यलक्षणा विरोधो भविष्यतीत्यर्थः । नामार्थस्य करणत्वे निर्व्यापारस्य तस्य करणत्वायोगादात्मनः करणत्वसिद्धये ऽर्थाक्षिप्तो यः कस्य चिद्व्यापारस्य साध्यत्वाख्यः सामान्यरूपो ऽशस्तदुद्धारेण नामार्थैरात्मीयस्ववाक्योपात्तयागादिविशेषरूपसाध्यग्रहणसिद्धेरित्यूहेन योज्यम् ॥१॥ सर्वेषां फलसाधनत्वे कतरस्य साधनतेति विचारायोगात्तत्सिद्ध्यर्थमेकस्य साधनत्वे साधिते मुख्योपोद्घातोपक्रमार्थं यदेति भाष्यं तस्माच्छब्दपरामृष्टादेकस्मात्फलसम्बन्धिनो ऽपूर्वमित्येवं व्याचष्टे * एवमिति * अत्रापि भाष्यगतस्यैकशब्दस्य पूर्वोक्तमेव प्रयोजनद्वयमविशेषेणेति पूर्वपक्षभाष्यादनियमपक्षो ऽप्यत्राभिप्रेत इति शङ्का स्यात्तन्निवृत्तये निर्द्धारणार्थो ऽतरप्रत्ययः । ननु सर्वेषां फलसाधनत्वयोग्यतायामप्यनेकादृष्टकल्पनापरिहारायैकस्य साधनतोक्ता तस्य च पक्षद्वये ऽप्युपपत्तेरनियमो

ऽपि प्राप्नोतीत्याशङ्क्यामुपन्यासपूर्वकं निरस्यति * सर्वथेति * नन्व-
नियमे विकल्पापत्तेस्तस्य च पूर्वाधिकरणपूर्वपक्षनिरासेन निरस्त-
त्वान्नेहानियमाशङ्का युक्तेत्याशङ्कानिराससूचनार्थः प्राप्तिशब्दः सर्वे-
षां फलसाधनत्वं वाक्यं बोधयतीति पूर्वाधिकरणपूर्वपक्षार्थः। प्रयोगे
तु विकल्पो योगसिद्ध्याधिकरणन्यायेन सिद्धः फलत्वेनोक्तः। इदानीं
तु वाक्येनैवानियमः प्रतिपाद्यतइति शङ्कानिरसनीयेत्याशयः। वि-
ध्यधीनत्वात्फलसाधनत्वस्य एकस्मिंश्च वाक्ये विधेयद्वयायोगेनैक-
विशिष्टस्येतरस्य विधेयत्वात् धात्वर्थस्य फलसम्बन्धे श्येनवता यागे-
नेति फलसम्बन्धिनो धात्वर्थस्य विशेष्यत्वरूपात्प्राधान्यात्फलसम्ब-
न्धिनश्च नामार्थस्य विशेषणत्वरूपादङ्गत्वान्नामार्थस्य तु फलसम्बन्धे
यागवता श्येनेनेति विपरीतविशेषणविशेष्यभावापत्तेरेकस्य चैकत्र
वाक्ये वचनव्यक्तिभेदप्रसङ्गेन विशेषणविशेष्यत्वाख्याङ्गप्रधानत्वा-
योगान्नानियमः शङ्कितुं युक्त इत्याशयः। श्लोकं व्याचष्टे *न हीति * ३४०।२
अतो निर्द्धारणार्थो डतरप्रत्ययो युक्त इत्युपसंहरति * तस्मादिति*
कः पुनरिति भाष्येणाख्यातशब्दानां भावनावाचित्वव्युत्पादनार्थं
प्रश्नद्वयं कृतं तद्भावप्रधानमाख्यातमिति स्मृत्याख्यातस्य भावनावा-
चित्वप्रसिद्धेरयुक्तमाशङ्क्योपपादयति * कः पुनरिति * इह व्यु-
त्पाद्यमानभावनावाचित्ववलेन भावनाक्षेपादेव कर्तृप्रतीतिसिद्धेरा-
ख्यातस्य कर्तृवाचित्वं कर्त्राधिकरणे निषेत्स्यमानमपि असिद्धभावना-
वाचित्वावस्थायामुच्यमानं न विरुद्धत्वेनाशङ्कनीयं विशेष्यत्वेन वा
विशेषणत्वेन वा कर्तैवाख्यातेनोच्यते न तु कथं चिद्भावनेति सूच-
यितुं कर्तुः प्रत्ययार्थत्वेनाप्राधान्याद्विशेष्यत्वे ऽभिहिते प्रत्ययार्थत्वो-
पपादनार्थं लः कर्मणि चेति सूत्रे चकारेण कर्तरिकृदित्यतः कर्तृ-
रीत्यनुकर्षणात्कर्तरि लकारोत्पत्तिरुक्ता। नन्वनेककारकानुरञ्जन-
सहत्वेन भावनायाः प्राधान्यदर्शनात्प्रत्ययार्थत्वं न्याय्यं न कर्तुरि-
त्याशङ्क्य फलभाक्त्वात्कर्तुः प्राधान्यं वक्तुम् * फलेत्युक्तम् *
ननु प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येनेति
सामान्यस्मृतेर्भावप्रधानमाख्यातमिति विशेषस्मृत्या बाधाद्भावनाया
एव प्राधान्यात्प्रत्ययार्थता युक्तेत्याशङ्क्य * कथं चिद्भेत्युक्तम् * धा-
त्वर्थातिरिक्तायाः भावनायाः स्वरूपेणैव सिद्धायाः प्राधान्यप्रत्यया-
र्थत्वयोर्दूरोत्सारितत्वाद्धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयतइ-
ति च भावशब्दस्य स्वतन्त्रधात्वर्थवाचित्वस्मृतेर्विशेषस्मृतिबलेन प्र-
कृतिप्रत्ययार्थप्राधान्यविपर्ययमभ्युपगम्य कर्तृविशिष्टयागाद्यभिधानं
युक्तं न तु भावनाप्राधान्यपरेयं स्मृतिरित्याशयः। ननु कः पुन-

र्भाव इति भावनाक्षेपेणैव तद्वाचिशब्दाक्षेपसिद्धेः के भावशब्दा इति पुनराक्षेपो अयुक्त इत्याशङ्क्याह * सत्यामपीति * यदि कश्चिद्भावोत्पन्नल्युडादिप्रत्ययान्तधातुवाच्यस्य भावत्वाभ्युपगमेनार्थपर्यनुयोगं परिहरेत्तं प्रति इयेनेन यजेतेत्यादिषु एतदधिकरणोदाहरणभूतेषु वाक्येषु तादृक्भावशब्दाभावादन्य एव भावो भावशब्दाश्चाभिमता इतिप्रत्युत्तरसूचनायोभयप्रश्न इत्यर्थः । अलौकिकशब्दो वैयाकरणाप्रसिद्धत्वाभिप्रायः । न केवलं भाव एवालौकिकः किं तु भावशब्दा अपीत्यपिशब्दार्थः यजतीत्युत्तरभाष्ये शब्दमात्रकथनाद्व्यापकमाशङ्क्य शब्दान्तरकथनेनार्थान्तरस्यापि सूचनाद्व्यापकत्वं दर्शयन् व्याचष्टे * सिद्धान्तेति * वैयाकरणाभिमतशुद्धधात्वर्थव्यतिरिक्तभावनारूपार्थवाचित्वोपपादनार्थं हेतुमति चेति णिचि कृते भावीतीकारान्तत्वादेराजित्यच्प्रत्यये सति णेरनिटीति णिलोपे भावशब्दव्युत्पत्तिनिरूपणेन कः पुनर्भाव इति प्रश्ने निरस्ते के भावशब्दा इति प्रश्ननिरासाय आख्यातस्य * चेत्युक्तम् * धात्वर्थातिरिक्तभावनाख्यभावाभ्युपगमेनोदाहृतानां तद्वाचित्वासम्भवाशङ्कार्थं नन्विति भाष्यं धातोर्यागादिधात्वर्थवाचित्वे ऽपि आख्यातस्य भावनावाचित्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * परः पुनरिति * भावनाया णिजन्तभवतिधातुमात्रवाचित्वाच्छब्दान्तरवाच्यत्वायोगे ऽभिहिते ननु यजत्यादिधात्वन्तरवाच्यत्वाभावे ऽप्याख्यातवाच्यत्वं भविष्यतीत्याशङ्क्याख्यातस्य धात्वर्थवाचित्वादर्शनाद्भावयतश्च सनाद्यन्ता धातव इति धातुसञ्ज्ञत्वेनाख्यातप्रकृतिभूतयजत्यादिधात्वर्थत्वाभावे ऽपि भावनाया धात्वन्तरार्थत्वान्नाख्यातवाच्यत्वं सम्भवतीति दर्शयितुं * न चेत्युक्तम् * नन्वेवमपि धातूनां भावनावाचित्वस्य सिद्धान्त्यनभिमतत्वात्तन्निषेधो न युक्त इत्याशङ्क्य * काममित्युक्तम् । धात्वर्थत्वेनाख्यातप्रत्ययार्थत्वे निषिद्धे यदि कश्चिद्याति वाति गच्छतीत्यादिधातूनां तुल्यार्थत्वदर्शनाद्यजत्यादिधातूनां भावयतिधातुवाच्यभावनावाचित्वं शङ्कते तन्निरासायेदमुक्तमित्याशयः *नैतदेवमिति* परिहारभाष्यं धात्वर्थाभिधानानर्थक्यमाशङ्क्य भावनानुरञ्जकत्वेन धात्वर्थाभिधानं दर्शयन् व्याचष्टे * अत्रेति * धात्वर्थस्यापि प्रत्ययार्थतानन्यथासिद्धप्रतीतिबलादवगम्यमाना न विरुद्धेत्याशयः । श्लोकं व्याचष्टे * यावानेव हीति * नन्वाख्यातप्रत्ययस्य भावनावाचित्वे ऽपि इह धात्वर्थस्य फलभावनाकरणत्वाभिधानार्थं धातोः फलपदसम्बन्धेनापूर्वगमकताया विवक्षितस्य भावनावाचित्वाभावेन भावशब्दत्वाभावात् किं भावशब्देभ्यो ऽपूर्वमि-

ति सिद्धान्तवचनव्यक्तिरयुक्ता प्रत्ययसम्बन्धानुग्रहात्तु भावनानुरञ्जकस्यार्थवाचितया भावशब्दत्वे द्रव्यगुणशब्दानामपि पूर्वपक्षे प्रत्ययसम्बन्धस्य सर्वेषां भावार्थ इति चेदित्यत्र वक्ष्यमाणत्वाद्भावशब्दत्वापत्तिरित्याशङ्क्यानिरासार्थं द्रव्यगुणशब्देभ्यो द्रव्यगुणप्रत्ययो न तु तेभ्यो भावना प्रतीयते तदर्थस्य भावनानुरञ्जकत्वायोगादिति प्रत्ययशब्दस्य समासान्निष्कृष्य भावनाशब्देनान्वयं कर्मव्युत्पत्तिं चाङ्गीकृत्य भाष्यकृतोक्तम् । तत्र के द्रव्यगुणाः के वा तच्छब्दा इति प्रश्नपूर्वकं तत्स्वरूपमनुक्त्वैव भावशब्दत्वशङ्कानिरासो न युक्त इत्याशङ्क्याह * तद्व्यतिरिक्तास्त्विति * आख्यातानां भावशब्दत्वे कथिते तद्व्यतिरिक्तानां द्रव्यगुणशब्दत्वज्ञानसिद्धेः प्रश्नपूर्वकमनभिधानमित्यर्थः । उपलक्षणार्थः पृष्ठशब्दः निपातोपसर्गाणामाख्यातव्यतिरेकेऽपि स्वतन्त्रार्थानभिधायित्वेनेहाविवक्षितत्वान्न द्रव्यगुणशब्दत्वापत्तिः । द्रव्यगुणशब्दत्वेन च निष्पन्नार्थाभिधायित्वस्य विवक्षितत्वात्क्रियावाचिनां नाम्नां द्रव्यगुणशब्दत्वापत्तावप्यदोषः । किं तावदिति पूर्वपक्षभाष्यमव्यवस्थितशास्त्रार्थानुपपत्तेरनियमपक्षायोगादयुक्तमाशङ्क्य यदि भावशब्देभ्य एवाकाङ्क्षोत्पद्यते न द्रव्यगुणशब्देभ्य इति विशेषः स्यात्ततो द्रव्यगुणशब्दानां नैराकाङ्क्ष्येणाकाङ्क्षानिबन्धनफलपदसम्बन्धायोगान्नापूर्वगमकत्वं स्यान्न त्वसावास्ति द्रव्यगुणशब्देभ्योऽपि करणविभक्त्यन्तेभ्यः साध्याद्याकाङ्क्षोत्पत्तेरविशेषादित्येव व्याख्यां सूचयन् पूर्वपक्षमाह * तत्रेति * यथैव भावशब्देभ्यो ३४१।१
भावार्थत्वात् भावनाकाङ्क्षोत्पत्तिस्तथैव द्रव्यगुणशब्देभ्योऽपि करणार्थत्वादित्यविशेषपदव्याख्यासूचनार्थं करणार्थत्वेन फलपदसङ्गतौ योग्यत्वादित्युक्तम् । इतरथा निष्पन्नार्थाभिधायित्वेनैव योग्यत्वसिद्धेः करणार्थत्वस्य च धातावपि तुल्यत्वात्करणार्थत्वशब्दोऽनर्थकः स्यादिति । नन्वविशेषे सति कथं द्रव्यादिशब्दानामेव फलपदसङ्गतिरित्याशङ्क्य निष्पन्नार्थाभिधायित्वलक्षणाभिधानमनेन च भाष्येणाकाङ्क्षोत्पादकत्वलक्षणविशेषसदसद्भावसन्देहएव नामार्थस्य फलभावनाकरणत्वं धात्वर्थस्य चेति सन्देहकारणमिति सूचितं भवति । अत एव सर्वेषां भावोऽर्थ इति चेदित्येनेन सर्वेषां साकाङ्क्षत्वाविशेषमाशङ्क्य येषामुत्पत्ताविति सूत्रद्वयेन विशेषो वक्ष्यते । श्लोकं व्याचष्टे * सर्वत्र हीति * न साध्यान्तरमित्येनेन धात्वर्थस्य विधिसामर्थ्यात्करणत्वावगतेः साध्यापेक्षायामपि असिद्धत्वेन तस्यापि साध्यत्वादसम्बन्धः समत्वात्स्यादिति न्यायान्न

साध्यान्वयो ऽस्तीति सूचितम् । उच्यतइति सिद्धान्तभाष्यं व्याचष्टे * इतीति * सूत्रशब्देन प्रतिपदाधिकरणसिद्धान्तस्योत्सूत्रत्वं सूचितम् । कीदृशेन सूत्रेण भाष्यकृतोत्तरं दीयतइत्यपेक्षिते सूत्रं योजयति * भावार्था इति * यच्छब्देन भावप्रधानमाख्यातमित्याख्यातशब्दानां भावनावाचित्वप्रसिद्धेस्तद्विषयो ऽयं निर्देश इति सूचितम् । फलस्येति भाष्यात् क्रियाशब्दस्य फलनिष्पादनविषयत्वप्रतीतावपि भावशब्दानां फलनिष्पादनप्रत्यायकत्वाभिधानस्य यदेकमपूर्वं तदा सन्देहः । किं भावशब्देभ्य इति सन्देहभाष्याद्भावशब्देभ्यो ऽपूर्वमिति सिद्धान्तवचनव्यक्त्यर्थत्वावगतेस्तद्धेतुत्वसूचनार्थमपूर्वक्रियागतिरित्युक्तम् । एष ह्यर्थो विधीयतइत्युक्ते को ऽसावित्यपेक्षायाम् * कुर्यादित्युक्तम् * आख्यातपदानां फलपदान्वये धात्वर्थस्य फलभावनाकरणत्वं सिद्धान्त्यभिमतं सिद्ध्यतीति प्रदर्शनार्थम् * यजिनेत्युक्तम् * (फलसाधनविधिमात्रेण भावशब्दानामपूर्वगमकत्वासिद्धेस्तैरित्यध्याहृतम् भावशब्दानामेव फलपदान्वयो न द्रव्यगुणशब्दानामित्याशयः[1]) ननु भावशब्दानां फलसाधनविधायकत्वस्यापूर्वगमकत्वे कथं हेतुतेत्याशङ्क्याह * फलेति * ननु भावशब्दानामेव फलपदान्वयो न द्रव्यगुणशब्दानामित्येतदेव कथमवगम्यतइत्याशङ्क्याह * सम्बन्धश्चेति * द्रव्यगुणशब्देभ्यः करणार्थत्वेन क्रियामात्राकाङ्क्षोत्पत्तावपि कारकाणां क्रियान्वयनिरपेक्षान्योन्यान्वयायोगेन साध्यानाकाङ्क्षत्वात्तदभावे चेतिकर्त्तव्यतान्वयानुपपत्तेः भावशब्दवत् सर्वपदार्थान्वयः स्यादित्याकाङ्क्षा नोत्पद्यत इति सूचयितुम् * प्रसर्पन्तीत्युक्तम् * इदंयतइत्यनेन प्रतीतिसाक्षिकतोक्ता अतो भावशब्दानां फलपदान्वयेन फलसाधनविधायकत्वादपूर्वगमकतेति सूत्रयोजनामुपसंहरति * तस्मादिति * क्रियाशब्दव्याख्यानार्थो भावनाशब्दः । न चात्र धात्वर्थस्य फलभावनाकरणत्वं तद्भेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थं वाच्यम् । तच्च भावनावाचिनः प्रत्ययस्य फलपदान्वये ऽपि करणाकाङ्क्षायां सिद्धत्वेन योग्यत्वात्पदान्तरोपात्तस्यापि नामार्थस्यैव करणत्वापत्तेर्न सिद्ध्यतीत्याशङ्क्याह * तत्र चेति * योग्यत्वं नाम लिङ्गं तच्चैकपदोपादाननिमित्तप्रत्यासत्तिलक्षणया श्रुत्या बाध्यतइति भावः । स्वकारकनिष्पादितस्य धात्वर्थस्यापि योग्यतास्तीति सूचनार्थश्चकारः । सिद्धे च धात्वर्थस्य करणत्वे तदन्यथानुपपत्तिकल्प्यत्वेनापूर्वस्य तद्भेदानुनिष्पादौ भेदः सिद्ध्यतीति सूचयन्नाह * अत इति * भाष्यं चा-

१ चयं पा० २ पु० ना० ।

नैनैव व्याख्यातम् । भावशब्देभ्यः फलक्रियाप्रतीयतइति भावशब्दानां फलपदान्वये ऽभिहिते कुतो भावशब्दानामन्वय इति पृष्टे ऽन्त्रयाकाङ्क्षभावनावाचित्वादेवेत्युक्त्वा यआहुरित्यनेन किमपीति भाव्याकाङ्क्षाप्रदर्शनपूर्वकमेतदेवोपपाद्यनन्वाख्यातस्य भावनावाचिनः फलपदान्वये ऽपि करणाकाङ्क्षायां नामार्थस्यापि करणत्वोपपत्तेः कथं धात्वर्थस्य करणत्वसिद्धिरित्याशङ्क्य ते चेत्यनेन धात्वर्थानुरक्तभावनावाचितया धात्वर्थसम्बद्धानां स्वर्गोत्पादनाभिधायित्वात्प्रत्यासत्तेर्धात्वर्थस्यैव करणत्वावगतिरिति कर्मशब्दा इति एतत्सूत्रावयवसूचिते ऽर्थे ऽभिहिते नन्वेकप्रत्ययोपादानश्रुत्या धात्वर्थनिरपेक्षायाः भावनाया विध्यन्वयात्स्वर्गादिपुरुषार्थफलत्वे ऽवगते करणाकाङ्क्षायामपि निष्पन्नत्वेनायोग्यत्वात्प्रत्यासन्नमपि धात्वर्थं भाव्यांशवत्करणांशादपि प्रत्याख्याय नामार्थेनैवान्वयावगमात्कुतो धात्वर्थ सम्बन्ध इति पृष्ट्वा एष हीति सूत्रावयेन प्रकृतिप्रत्ययपौर्वापर्यनियमाच्छुद्धभावनानवगतेरनुष्ठानाशक्तेश्च धात्वर्थानुरक्तायाया एव फलोद्देशेन विधीयमानत्वाद्विधिगम्यत्वाच्च करणत्वस्य केन भावयेत्स्वर्गमित्यपेक्षायां यागादिनेत्येवान्वयो युक्त इत्युत्तरे दत्ते धात्वर्थकरणत्वाभिधानफलं भावनाशब्दानामपूर्वगमकत्वं यस्य चेत्यादिनोक्तमिति अपूर्वभावनागम्यतइति भावनाशब्देन निष्पत्त्युत्पत्तिशब्दयोः प्रयोज्यव्यापारवाचिनोरपि प्रयोजकव्यापारलक्षणार्थत्वं सूचितम् । अन्यथानुपपत्तिशब्देन तेनापूर्वं कृत्वा नान्यथेति भाष्येणापूर्वस्यार्थापत्तिगम्यता पराभिमतलिङादिवाच्यत्वनिरासायोक्तेति सूचितं तथा च ननु कश्चिच्छब्दः साक्षादपूर्वस्य वाचको ऽस्तीत्युक्तं । लिङादिव्यतिरिक्तशब्दाभिप्रायत्वे तु कश्चिच्छब्दो ऽसमञ्जसः स्यात् ।अपूर्वशब्दस्याप्यनुष्ठानात्पूर्वं न जायत इत्यवयवव्युत्पत्त्या प्रवृत्तेर्न वाचकतास्तीत्यविरोधः।

अतो लिङादिवाच्यत्वमपूर्वस्य वदन्तिये ।
एतद्भाष्यविरोधस्तैः परिहर्त्तुं न शक्यते ॥

एवं सूत्रयोजनापूर्वकं सङ्क्षेपेण भाष्यं व्याख्यायाख्यातस्य भावनावाचित्वमाक्षिपति * कथं पुनरिति * यद्यपि प्रत्ययवाचित्ववद्यज्यादिवाच्यत्वमप्याक्षेप्तुरनिष्टं तथापि प्रत्ययमात्रवाच्यत्वसिद्धान्तसूचनार्थं यागादिना स्वर्गकाम इति करणांशवाचित्वेन यज्यादीन्धातून्पृथक्कृत्य प्रत्ययमात्रवाच्यो भावनारूपो ऽर्थो यो ऽभ्युपगम्यते * स कथं लभ्यतइति * अनुवादपूर्वकमाक्षेपः कृतः । एवकारेण धातुवाच्यत्व-

निरासासिद्धावपि धातुप्रत्ययसमुदायवाच्यत्वनिरासार्थः केवलशब्दः। ये तु भावनारूपो ऽर्थो ऽङ्गीक्रियमाणो धातोः स्वार्थाभिधानोपक्षीणशक्तित्वात्प्रत्ययवाच्यो ङ्गीकार्यः । स च न सम्भवतीति भावनासद्भावाक्षेपार्थत्वेनेम ग्रन्थं व्याचक्षते तेषामभिदध्युः *स्वशक्त्या हीति* वाच्यत्वाक्षेपोपपादनार्थः सिद्धकर्तृक्रियावाचिनीत्यादिस्तस्मात्प्रत्ययार्थ एव भावनेत्युपपन्नमित्यन्तश्च वाच्यत्वसमर्थनार्थः । सर्वो ऽयं ग्रन्थो ऽन्यपरत्वापत्तेरसमञ्जस एव स्यात्। न चाख्यातवाच्यत्वासम्भवमात्रेण वस्त्वभावो भवति घटादिवन्नामवाच्यत्वोपपत्तेः। उत्पादनमेव च प्रयत्नानुष्ठानाद्यपरपर्यायं भावनाशब्देनाभिप्रेतम् । तच्च सर्वलोकप्रसिद्धत्वान्नापह्नोतुं शक्यम्। धात्वर्थमात्रातिरेके तु विप्रतिपत्तिः तत्र चानतिरेके ऽपि धातुना धात्वर्थस्वरूपमभिधाय तस्यैवान्योत्पादानुकूलत्वरूपभावनाप्रत्ययेनोच्यतइति वक्तुं शक्यत्वान्न धात्वर्थातिरेकाक्षेपार्थत्वं वाच्यत्वाक्षेपस्य युक्तम् । भावनायां तु धात्वर्थस्य करणत्वसिद्ध्यर्थम्। ननु च यदि प्रयोजकव्यापारो भावनेष्यते इत्यादिना शङ्कापूर्वकं धात्वर्थातिरेको वक्ष्यते अत एवं प्रत्ययार्थस्य भावस्य वाच्यता तत्र चिन्तितेत्याकूत्यधिकरणो ऽभिहितम्। वाच्यत्वाक्षेपं प्रश्नपूर्वकमुपपादयति*कुत इति* आख्यातप्रत्ययमात्रस्य भावनावाचित्वाक्षेपे ऽप्युदाहरणभूतविधिवाक्यगताख्याताभिप्रायेण * विधिमात्रमित्युक्तम् * कर्तृसंख्योपग्रहविशेषाभिधाने ऽपि भावनाभिधाननिरासार्थो मात्रशब्दः । धातुप्रत्ययांशद्वययोगिन्याख्याते धात्वंशस्य करणांशवाचित्वाभ्युपगमात्प्रत्ययस्यापि भावनावाचित्वासम्भवे ऽनभिधेयताक्षेप्तुरभिमता सिद्ध्यतीति सूचयितुम् * केनेत्युक्तम् * नन्वाख्यातप्रत्ययस्यानेकार्थत्वाद्विध्याभिधायित्वे ऽप्यविरुद्धं भावनाभिधायित्वमित्याशङ्क्य * स्वशक्त्येत्युक्तम् * स्वप्रत्ययार्थमात्रे प्रत्ययस्य शक्तेर्भावयतिधातुवाच्यभावनाभिधायित्वं न सम्भवतीत्याशयः । नन्वेवमपि धात्वंशेनाभिधानोपपत्तेः केनांशेनेत्यनभिधेयत्वाभिधानमयुक्तमित्याशङ्क्याह * न चेति * यज्यादिधातूनामण्यन्तधात्वर्थाभिधानव्यापृतत्वात् ण्यन्तभावयतिधात्वर्थाभिधायिता न युक्तेत्यर्थः । नन्वाख्यातश्रवणानन्तरं भावनाप्रतीत्यन्यथानुपपत्त्या तत्रापिशक्तिः कल्पनीयेत्याशङ्क्याह *अत इति * नास्माभिः प्रतीयमानाया अपि भावनाया युक्त्या वाच्यत्वं निरस्यते किं त्वप्रतीयमानत्वादेव स्वपक्षानुरागेण त्वप्रतीयमानायामपि प्रतीत्यारोपवादिनं प्रति युक्त्युपन्यास इत्याशयः । यतो लिङादयो धातवो वा न भावनां प्रतिपादयन्ति न भा-

वनाप्रतिपत्तिं जनयन्ति न तेभ्यो भावनाप्रतिपत्तिर्जायते अतः शब्दजनितप्रतीतिरहितमेवेदमारोप्यतइत्यर्थः। ननु लिङादीनां धात्वन्तरार्थवाचित्वायोगेऽपि करोतिभावयतिभ्यां विवरणदर्शनात्तत्पर्यायत्वावगतेस्तदर्थवाचिता युक्तेत्याशङ्क्याह * किं चेति * पिकादिशब्दान्तरस्य यो ऽर्थः कोकिलादिपर्यायैर्व्याख्यायते तस्मिन्नर्थे न स पर्यायस्तेन शब्दान्तरेण सह प्रयुज्यते किं तु केवलस्ततश्च पर्यायत्वस्य सहाप्रयोज्यत्वेन व्यावृत्तेराख्याते करोतिभावयतिभ्यां सहाप्रयोज्यत्वव्यावृत्त्या तत्पर्यायत्वव्यावृत्तिरित्याशयः। श्लोकं व्याचष्टे * तद्यथेति * ननु करोतिभावयतिमात्रेणाख्यातार्थकथनसिद्धावपि केवलधातुप्रयोगायोगात्तदनुग्रहार्थं प्रत्ययः प्रयुज्यमानो न दोषमावहतीत्याशङ्क्याह * न हीति * प्रत्ययसहितकरोतिभा- ३४२।२
वयतिप्रयोगे सति या करोतिना भावयतिना वा यजत्यादिपदप्रत्याख्या क्रिया व्याख्यायते सा यथा धात्वर्थस्य यागेनेति पृथगुपादानात्तद्वाच्या न सम्भवति तथा पर्याययोः सह प्रयोगायोगेनाख्यातवाच्यत्वस्याप्यसम्भवो वा विशेषाद्वाच्याख्यान्यथानुपपत्त्या चैकेनांशेन वाच्येत्यवगतावपि किं यजत्यादिधात्वंशेन प्रत्याख्याख्यातांशेन वेति विवेकज्ञानान्नार्थकथनं सिद्ध्येदिति भावः। नन्वेवं सति प्रत्ययो न प्रयुज्यतामित्याशङ्क्याह * अत्र त्विति * केवलधातुप्रयोगादवश्यं प्रत्ययः प्रयोज्य इति भावः। करोतिभावयतिपरप्रत्ययप्रयोगे च सति तेनैव यजिपरप्रत्ययार्थोपादानात्करोतिभावयत्योस्तदर्थकथनार्थत्वानुपपत्तेरानर्थक्यं स्यादित्याह * अतश्चेति * अधिकस्यापः प्रक्षेपो ऽस्यास्तीति बहुव्रीह्यर्थः। नन्वधिकापो ऽपि विश्वजिदादिवाक्ये स्वर्गकामादिपदापवन्न दोषमावहतीत्याशङ्क्यानिरासं सूचयन्नुपसंहरति * तस्मादिति * आनर्थक्येन वेदानुमतत्वान्नास्य तत्तुल्यतेत्याशयः। आख्यातस्य भावनावाचित्वमाक्षिप्तं समाधातुं करोत्यर्थवाचित्वं तावदुपपादयति * अत्रेति * किं करोति पचतीति करोतिसामानाधिकरण्येनाख्यातप्रत्यये करोत्यर्थो वाच्यो ऽवगम्यतइत्युक्ते भवत्यादिपराख्यातप्रत्यये करोत्यर्थसामानाधिकरण्याभावात्करोत्यर्थवाचित्वं न सिद्ध्यतीत्याशङ्क्य * सिद्धेत्युक्तम् * आक्षेपवाद्यसिद्धमपि आख्यातप्रत्ययस्य क्रियावाचित्वं स्वसिद्धान्तसिक्तमङ्गीकृत्य नाख्यातमात्रस्य करोत्यर्थवाचित्वं ब्रूमः किं तु करोतिसामानाधिकरण्यवतामेवाख्यातानामिति ख्यापनाय सिद्धकर्तृक्रियावाचित्वमुपलक्षणं कृतम्। यद्वा ये धात्वर्थस्य स्वरूपेण धातुनाभिहितस्यापि निष्पाद्यत्वलक्षणक्रियारूपेण प्रमाप्रत्ययवाच्यत्व-

मङ्गीकृत्य मीमांसकाभिमतधात्वर्थातिरिक्तभाव्यनिष्ठभावनावाचित्वं प्रत्ययस्य नेच्छन्ति तान्प्रति भावनावाचित्वं साधयितुं करोत्यर्थवाचितानेन साध्यतइत्यदोषः । नन्वसिद्धकर्तृविषयेष्वस्त्यादिपरेष्वाख्यातेषु करोतिसामानाधिकरण्याभावेन करोत्यर्थक्रियावाचित्वाभावात्तद्व्यावृत्त्यर्थं सिद्धविशेषणं व्यर्थमित्याशङ्क्य भाव्यनिष्ठभावनारूपकरोतिवाच्यक्रियावाचित्वाभावे ऽपि कर्त्रात्मलाभाख्यक्रियावाचित्वसद्भावाद्विशेषणसाफल्यं दर्शयितुं सिद्धासिद्धकर्तृक्रियावाचीन्याख्यातानि विविनक्ति *इहेति* भवतेर्जन्माख्याद्यभावविकारवाचित्वात्ततः परा तिङ्विभक्तिर्जायमानस्य कर्तुर्जन्मोत्पत्त्याद्यपरपर्यायात्मलाभमात्ररूपं व्यापारं प्रतिपादयन्ति । अस्तिविद्यत्योस्तु द्वितीयभावविकारवाचित्वात्ततः परां सत्तां प्रतिपद्यमानस्य कर्तुः स्वसत्ताख्यात्मलाभमात्ररूपमित्यर्थः । अन्यात्मलाभविषयस्यैव व्यापारस्य करोत्यर्थत्वात्तस्य चास्त्यादिपरया विभक्त्यानभिधानात्करोत्यर्थक्रियावाचित्वाभावे ऽप्यात्मलाभस्यानिष्पन्नरूपत्वेन व्यापारशब्दवाच्यत्वाद्व्यापारस्य क्रियात्वप्रसिद्धेर्व्यापाराख्यक्रियावाचित्वस्य सर्वाख्यातेषु भावादर्थवद्विशेषणमित्यर्थः । ननु द्रव्यव्यतिरेकेण व्यापारस्यानुपलब्धेरभावान्न वाच्यत्वं सम्भवतीत्याशङ्क्याह * द्रव्यमेव चेति * जातिगुणवत्क्रियाया अपि द्रव्यादत्यन्तव्यतिरेकाभावान्न व्यतिरेकानुपलम्भमात्रेणाभावो भवतीति सूचयितुम् * द्रव्यमेवेत्युक्तम् * ननु द्रव्यस्य व्यापारशब्दवाच्यत्वे सर्वदा घटो भवति देवदत्तः पचतीति प्रयोगः स्यादित्याशङ्क्य प्रचलितमपगतमात्मनस्तत्त्वमौदासीन्यस्वरूपं यस्येति द्रव्यगतस्यावस्थाविशेषस्य व्यापारशब्दवाच्यत्वं सूचितम् । नन्वेवं सति यौवनाद्यवस्थाविशेषस्यापि व्यापारत्वं स्यादित्याशङ्क्य विप्रकीर्णो विक्षिप्तो ऽनेकत्र व्यासक्तत्वादेकत्रानुपसंहृतः स्व आत्मीयो भावो धर्मो यस्येति अवस्थान्तरव्यावृत्त्यर्थं व्यापारावस्थाया विप्रकीर्णत्वं विशेषणम् । नन्वेवं सत्यवयविरूपस्याप्यनेकावयवव्यासक्तत्वेनैकत्रानुपसंहृतत्वाद्व्यापारत्वं स्यादित्याशङ्क्य तद्व्यावृत्त्यर्थं क्रियावयवानां क्षणिकत्वेनानेकक्षणव्यासक्तत्वाभावे ऽपि ।

यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः ।
क्रिया पूर्वापरीभूता लक्ष्यते वर्त्तते तदा ॥

अनेकफलसाधनानेकक्रियावयवसमूहस्यैव क्रियात्वाभिधानात्तस्याः पूर्वापरानेकक्षणव्यासक्तत्वरूपं पूर्वापरीभूतत्वं विशेषणम् । अवयविनस्त्वनेकावयवव्यासक्तत्वे ऽपि युगपद् बुद्धे-

र्नानेकक्षणव्यासक्तत्वास्तीति भावः। नन्वेवं सत्यनेकक्षणवर्त्तित्वेन क्रियाया द्रव्यतुल्यत्वात्कथं द्रव्याद्भेदाध्यवसाय इत्याशङ्क्य पूर्वोदासीन्यावस्थातः प्रच्युतं परमौदासान्यावस्थामप्राप्तमिति पूर्वापरावस्थयोरनुवृत्ता द्रव्याद्व्यावृत्तरूपाभिधानेन भेदो दर्शितः। नन्वस्तु नाम द्रव्यस्यैवंविधावस्थाविशेषस्तस्य तु व्यापारशब्दवाच्यत्वे किं निमित्तमित्याशङ्क्य फलोत्पादानुकूलत्वस्य निमित्तत्वसूचनार्थम् * विशिष्टेत्युक्तम् * यद्वा ननु घटो भवतीत्यादौ घटस्य वा कर्तृत्वं विवक्षितं मृत्पिण्डस्य वा। तच्च घटस्यासिद्धसत्ताकत्वेन व्यापाराश्रयत्वायोगान्मृत्पिण्डस्य च सिद्धत्वेन कर्त्रात्मलाभाख्यव्यापाराश्रयत्वायोगान्नोभयथापि सम्भवतीत्याशङ्क्योदमुक्तम्। घटोत्पत्तेः प्रागपि घटविषयायाः मृत्पिण्डाश्रितायाः शक्तेः कार्यकारणनियमान्यथानुपपत्तिकल्पितायाः सद्भावात्स्वरूपेण चाविद्यमानस्यापि शक्तिसद्भावमात्रेणातीतानागतज्ञानादौ कारकत्वदर्शनात्कर्तृत्वोपपत्तेः।समवायिकारणाच्च कार्यस्यात्यन्तभेदाभावान्मृत्पिण्डात्मना व्यापाराश्रयत्वोपपत्तेर्घटात्मना चासिद्धत्वोपपत्तेरुभयथाप्यविरोध इत्याशयः। नन्वस्य सिद्धासिद्धकर्त्राश्रितत्वे तस्यैव करोत्यर्थत्वादस्त्यादावपि करोतिसामानाधिकरण्यापत्तिः सिद्धकर्तृमात्राश्रितत्वे त्वस्त्यादिपराया विभक्तेर्व्यापारप्रतिपादकत्वाभिधानं न युज्येतेत्याशङ्क्यासिद्धकर्त्राश्रितस्य व्यापारस्य करोत्यर्थत्वाभावं दर्शयितुमाश्रयं तावद्विविनक्ति *तत्रेति* अन्योत्पादानुकूलस्यैव व्यापारस्य करोत्यर्थे वक्तुमेवकारः। अन्यात्मलाभफलकस्य हि व्यापारस्य कर्त्ता करोतीति व्यपदिश्यते अस्त्या पराख्यातप्रयोगे च कर्त्तुरेवात्मलाभाख्यव्यापारावस्थात्वप्रतीतेरन्यात्मलाभफलकव्यापारायोगान्न करोतिव्यपदेशता युक्तेत्याशयः। एवंशब्दात्प्रकृतव्यापारमात्रपरामर्शावगमे ऽपि सिद्धे कर्त्तर्यन्यस्यैवमवस्थात्वाभिधानेन तस्यासिद्धकर्तृविषयत्वावसायात्तस्य चात्मलाभातिरिक्तव्यापाराभावात्तत्परत्वव्याख्यानमसिद्धे कर्त्तरि तस्यैव व्यापारत्वं प्रतीयते सिद्धे त्वन्यो ऽपीत्यपिशब्दाध्याहारेण व्याख्याने व्यापारमात्रपरामर्शे ऽप्यदोषः। अन्यस्यात्मलाभाख्यं व्यापारं प्रति कर्तृत्वे ऽपि सिद्धकर्तृत्वस्य करोतिप्रयोगविषयत्वात्तत्र चासिद्धस्य कर्तृत्वाप्रतीतेः कर्तुरन्यत्वमविरुद्धं ततश्चासिद्धे कर्त्तर्यन्यात्मलाभफलाभावेन तद्व्यापारस्य करोत्यर्थत्वायोगात् सिद्धकर्तृव्यापारस्य त्वन्यात्मलाभफलत्वात्करोत्यर्थत्वोपपत्तेर्व्यवस्था युक्तेत्याह * तदिति * तस्मादित्यर्थे तदित्यव्ययम्। सिद्धकर्त्राश्रितस्यैव व्यापारस्य करोतिवाच्यत्वं ना-

सिद्धकर्त्राश्रितस्येत्येतदेव करोतिसामानाधिकरण्यव्यवस्थयोपपादयति * तथा चेति * नन्वाख्यातकरोत्योर्द्वयोरप्याकृत्याधिकरण्यन्यायेन सामान्यवाचित्वात्पर्यायत्वापत्तेः सामानाधिकरण्यं न युक्तमित्याशङ्क्य * सामान्येत्युक्तम् * सामान्यवाचिनोऽप्याख्यातस्य प्रकृत्यर्थोपधानेन विशेषपरत्वात्को राजा यातीति शुद्धसामान्यवाचिनो राजशब्दस्येव पाञ्चालराजशब्देन पाञ्चालविशेषोपहितराजसामान्यवाचिना सामानाधिकरण्यं युक्तमित्याशयः। यथाहुः मण्डनमिश्राः भेदोपहितसामान्यवचने ऽप्यपृथक् श्रुतिरिति । श्लोकार्थमुपसंहरति * तस्मादिति * ननु लब्धात्मककर्तृव्यापारवाचिनामाख्यातानां करोतिसामानाधिकरण्यात्करोत्यर्थत्वे ऽपि भावयत्यर्थभावनावाचित्वं कथमित्याशङ्क्य भावनावाचित्वोपपादनार्थं करोतिभावयत्योस्तुल्यार्थत्वमुपपादयितुं भावयतिवत् करोतेरपि भवत्यर्थकर्तृकर्मनिष्ठत्वं दर्शयन्कर्मनिष्ठतामेव तावदाह*तत्र चेति* उपसर्जनत्वेनाप्यनन्तरनिर्दिष्टस्य करोत्यर्थस्य योग्यतया ततशब्देन परा-
३४३। मर्शात्तत्र करोत्यर्थ इत्यर्थः । एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति*ननु कर्मनिष्ठत्वे ऽपि ग्रामं गच्छतीतिवद्भवत्यर्थकर्मकर्तृनिष्ठत्वाभावात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्य करोत्यर्थं प्रति भवत्यर्थकर्तुरेव कर्मतेत्याह * भवत्यर्थस्येति * करोतेरर्थस्येत्यर्थव्यतिरेकजनिता षष्ठी यजतिस्त्वित्यादिवद्धात्वर्थपरो वायं धातुनिर्देशः श्लोकपूर्वार्द्धं व्याचष्टे * करोतेरिति * उत्तरार्द्धं व्याख्यातुं कर्मणः प्रधानक्रियातिरिक्तावान्तरक्रियाकर्तृत्वापेक्षां तावदाह * सर्वेति * नन्ववान्तरक्रियापेक्षायामपि भवनक्रियापेक्षायाः प्रधानक्रियान्तरेष्वदर्शनात्कथमत्र तदपेक्षेत्याशङ्क्याह * प्रतिक्रियं चेति* अन्वयव्यतिरेकौ दर्शयति * तथा हीति * व्यतिरेकाभिधानसूचितान्वयदर्शनपूर्वकं श्लोकं व्याचष्टे * य एवेति * स्वयं विशीर्णे बीजे अङ्कुरस्य प्रवृत्त्योत्पत्त्याख्यभवनस्य जलावसेकारोपणादिनोत्पादनाख्यप्रयुक्तिदर्शनात्प्रवृत्तभवनः प्रयुज्यतइत्युक्ते ननु प्रवृत्त्यर्थत्वात्प्रयुक्तेः प्रवृत्तस्यानर्थक्यापत्तेः प्रयुक्तिरयुक्तेत्याशङ्क्य * सम्भावितभवनो वेत्युक्तम् * मृदादाविव घटादिसर्वः सम्भावितभवन एव प्रयुज्यते स्वयं विशीर्णबीजाङ्कुरस्यापि वृक्षादिरूपेणाप्रवृत्तोत्पत्तेरेव जलावसेकादिनोत्पादनादित्याशयः । ननु सिद्धस्यापि पाकादेः करोत्यर्थकर्मत्वदर्शनाद्व्यतिरेको व्यभिचरतीत्याशङ्क्याह * यत्रापीति * ननूत्पूर्वस्य करोतेरुपकारप्रयुक्तहिंसात्मकसूचनाख्ये गन्धने अपपूर्वस्य च भर्त्सनाख्ये ऽवक्षेपणे प्रपूर्वस्य चानुवृत्त्याख्यसेवने प्रक-

र्थकथनाख्यप्रकथने धर्माद्यर्थविनियोगाख्योपयोगे उपपूर्वस्य साहासिककर्माख्यसाहसिक्ये उपपूर्वस्य सतो गुणान्तराधानाख्ये प्रतियत्ने प्रयोगाद् गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ इतिस्मृतेश्चानेकार्थत्वेनोत्पादनार्थत्वनियमाभावात्कथमुत्पत्याख्यभवनकर्तृकर्मनिष्ठत्वनियम इत्याशङ्क्याह * सत्यपि चेति * नियमाभावे ऽपि वा यदोत्पादनार्थत्वं तदोत्पाद्यमानकर्मनिष्ठत्वं भविष्यतीत्याह * अथ वेति * करोत्यर्थकर्मणो भवनक्रियापेक्षामुपपादितामुपसंहरति * तेनेति * लब्धायां च भवनक्रियायां तत्कर्तृकर्मनिष्ठत्वं करोत्यर्थस्य सिद्धं भवतीति तावच्छब्देन सूचितम्। नन्वेवं करोतेर्भावयतिवद्भवत्यर्थकर्तृकर्मनिष्ठत्वे ऽपि णिजन्तत्वाभावेन प्रयोजकव्यापारवाचित्वायोगात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्याह * ततश्चेति * करोत्यर्थस्य भावयत्यर्थत्वोपपादनाय प्रयोजकव्यापारत्वप्रतिपादनार्थं तत्कर्तुः प्रयोजकत्वाभिधानं प्रयोज्यं विना प्रयोजकत्वायोगात्तत्सिद्ध्यर्थं प्रयोजत्वाभिधानम्। ननु णिच्प्रत्ययरहितस्य धातोः प्रयोजकव्यापारवाचित्वे करोतिवद्भवतेरपि तद्वाचित्वापत्तेर्भावयतीति णिच्प्रत्ययो ऽनर्थकः स्यात्प्रयोज्यव्यापारवाचित्वे वा भवतिवत्करोतेरपि तद्वाचित्वापत्तेः प्रयोजकव्यापारवाचित्वं न स्यादित्याशङ्क्याह * भवतीति * णिच्प्रत्ययरहितत्वाविशेषे ऽपि यथा विक्लित्तेः प्रयोज्यतण्डुलव्यापारवाचित्वं पचतेस्तु प्रयोजकदेवदत्तव्यापारवाचित्वं वृद्धव्यवहारान्नियतं तथा तयोरपीत्यर्थः। ननु प्रयोज्यप्रयोजकव्यापारयोः परस्परापेक्षत्वात्कथमनयोः प्रयोज्यप्रयोजकव्यापारमात्रवाचित्वेत्याशङ्क्याह * तत्र चेति * प्रयोज्यव्यापारानपेक्षप्रयोजकव्यापारयोगादवकारोक्तातन्मात्रे विवक्षा न युक्तेत्याशङ्क्य प्रयोज्यव्यापारस्यान्यतो ऽवगतिसिद्धेः पारिशेष्यात्प्रयोजकव्यापारमात्रविवक्षोपपन्नेति केवलमित्यनेन तु पारिशेष्यवाचिना क्रियाविशेषणेनोक्ते कथं प्रयोज्यव्यापारस्याभिधानं विनावगतिरित्यपेक्षायां घटमिति द्वितीययाभिहितया कर्माख्यया शक्त्याक्षिप्तः प्रयोज्यस्य घटस्य भवनाख्यो व्यापारो यस्मिन्निित्युक्तम्। कथं वा कर्मणः प्रयोज्यव्यापाराक्षेप इत्याशङ्क्य *कर्मणः शक्त्येत्युक्तम् * निर्व्यापारस्य कर्मत्वायोगात्तद्बलेनाक्षेप इति भावः। करोतिमात्रप्रयोगे कथमाक्षेप इत्याशङ्क्य * स्वयमाक्षिप्तप्रयोज्यव्यापारेत्युक्तम् * घटो भवतीत्यत्र प्रथमाया अप्यभिहितकारकविभक्तित्वाभ्युपगमात्प्रथमाभिहितकर्तृशक्त्याक्षिप्तः प्रयोजकव्यापारो यस्मिन्स्वयं वाक्षिप्तः प्रयोजकव्यापारो येनेति बहुव्रीहि- ३४४।१

विग्रहेण व्याख्येयम् । पचतिविक्लिद्यतीतिदृष्टान्तार्थौ उभयोस्तु व्यापारयोर्भिन्नपदोपात्तयोः समुच्चयेन विवक्षायां करोतिभवत्योः समुच्चित्य प्रयोग इत्याह * कदा चिदिति * ननु करोतेः प्रयोजकव्यापारवाचित्वे तदाक्षिप्तस्यापि भावनाख्यस्य प्रयोज्यस्य व्यापारस्याशब्दत्वेन प्राधान्यानुपपत्तेः क्रियते घट इति प्रयोज्यवाचिना घटशब्देन सामानाधिकरण्यं न स्यादित्याशङ्क्याह * कदा चिदिति * तिङा घटस्य कर्मत्वोक्तेः कर्मणश्च वस्तुतः प्राधान्यात् सव्यापारस्यैव च कर्मत्वादाक्षिप्तस्यापि प्रयोज्यव्यापारस्योपसर्जनीभूतः प्रयोजकव्यापारो यस्य स विवक्ष्यतइत्युत्तरग्रन्थगतविवक्ष्यतइति पदानुषङ्गेण व्याख्येयम्।ननु प्रयोज्यव्यापारस्य प्राधान्यविवक्षायां करोतिप्रयोगोपपत्तावुपसर्जनत्वविवक्षायां सुतरामुपपत्तेर्न कदा चिद्भावयतिः प्रयुज्यतेत्याशङ्क्याह *कदा चित्पुनरिति* समानस्य पदस्यैकदेशेनोपात्ता प्रयोज्यक्रियोपसर्जनीभूता यस्येति विग्रहः तदा च समानपदैकदेशोपात्तत्वविवक्षायां करोतेरेवाशक्तत्वेन भवतेरपि प्रयोज्यक्रियामात्रपर्यवसायित्वेन प्रयोजकव्यापारविवक्षायां णिच्प्रत्ययं विना प्रवृत्त्यशक्तेः सोऽप्यधिकः प्रयुज्यतइत्यर्थः ।क्रियाया धातुवाच्यत्वप्रसिद्धेर्णिचश्च केवलस्य धातुत्वाभावान्न क्रियावाचितास्तीति ये वदन्ति तन्मते न द्योतकत्वोक्तिः।स्वमते तु भुविक्लिद्योः प्रयोजकक्रियावाचित्वे केवलप्रयोज्यक्रियानिष्ठत्वोक्तिर्विरोधापत्तेर्णिच एव तद्वाचकत्वम्। प्रयोज्यक्रियावाचिना णिचा विना प्रयोजकक्रियायामशक्तिं वृद्धवचनेन द्रढयति * तथा चाहेति * प्रयोज्यकर्तृकाणां भवनादीनां व्यापाराणां प्रतिपादका ये भूवादयो धातवस्तेषांप्रयोज्यानां घटादीनां ये प्रयोजकाः कुलालादयस्तेषां व्यापारेषु प्रयन्ता एव प्रयुज्यन्तइत्यर्थः। भवनप्रतीनामन्योत्पादानुकूलत्वाभावेनाव्यापारत्वमाशङ्क्य *एकान्तेत्युक्तम्* अन्योत्पादानुकूलत्वाभावेऽप्यनिष्पन्नरूपत्वादेकान्तेन व्यापारतास्तीत्याशयः । ननु भवत्यादीनां णिचं विना प्रयोजकक्रियाभिधानाशक्तौ करोत्यादीनामप्यशक्तिप्रसङ्गात्तेषां वा शक्तावन्येषामपि शक्तिप्रसङ्गाद्व्यवस्था न युक्तेत्याशङ्क्याह * न चेति * शक्तीनां स्वभावत्वेनापर्यनुयोज्यत्वात्प्रकृतयः प्रत्ययास्तत्समुदायात्मकानि चादिशब्दोक्तानि पदानि नानारूपानर्थान्वदन्तीत्यर्थः । अतो भवत्यर्थकर्तृकर्मनिष्ठप्रयोजकव्यापारवाचित्वेन करोतिभावयत्योस्तुल्यार्थत्वात्सिद्धकर्तृक्रियावाचिषु चाख्यातेषु करोतिसामानाधिकरण्येन करोत्यर्थस्य वाच्यत्वावगमात्तद्द्वारा भावयत्यर्थस्यापि वाच्यत्वासिद्धेर्ज्या-

र्थश्चातो ऽवगम्यते भावयेदिति चेदित्यादिभाष्यं युक्तमेवेत्याह * एवमिति * ननु भावनायाः प्रत्ययवाच्यत्वे ऽपि धात्वर्थस्यैव निष्पाद्यत्वलक्षणक्रियारूपेण प्रत्ययेनाभिधानाद्भावनात्वोपपत्तेरन्योत्पादानुकूलत्वं ऽपि वा भावनालक्षणे धात्वर्थस्यैव धातुना व्यापारात्मनोपादीयमानस्य प्रत्ययावगतानुष्ठेयत्वान्यथानुपपत्त्या फलोत्पादानुकूलतयावगमाद्भावनात्वोपपत्तेर्भावयेद्यागेनेति क्रियाकरणतया भेदेन निर्देशो न युक्त इत्याशङ्क्य भवनक्रियाकर्तृकर्मनिष्ठप्रयोजकव्यापारत्वं धात्वर्थव्यावर्त्तकं लक्षणमाह * तेनेति * येन कारणेन करोतिभावयत्योरुक्तप्रकारेण तुल्यार्थत्वं तेन कारणेनेत्यर्थः। यत्त्वाक्षेप्त्रा विधिमात्राभिधायित्वाल्लिङादीनां भावनाभिधायित्वं न सम्भवतीत्युक्तं तदनुभाषणपूर्वकं निराकरोति * यत्तूक्तमिति। अयमाशयः * किं विधिमात्रशब्देन भावयतिधातुवाच्यत्वं भावनायाः प्रत्ययानभिधेयत्वे कारणमभिप्रेतं विधिव्यतिरिक्तभावनाभावो वा। तत्र विधेरपि भावयतिधातुवाच्यत्वेन लिङाद्यवाच्यत्वापत्तेर्नाद्यः कल्प इत्यभिधाभावनाशब्देन सूचितं प्रयोजकव्यापारवाचित्वात् भावनाशब्दस्य विधेरपि प्रयोजकलिङादिव्यापारत्वात् भावनात्वमस्तीत्याशयः। ननु विधेर्लिङादिवाच्यताभ्युपगमात्तदुच्चारणात्प्रागसिद्धत्वे सति अगृहीतसम्बन्धत्वेन वाच्यत्वायोगाल्लिङाद्युच्चारणात्प्रागेव सिद्धेस्तत्परत्वं न युक्तमित्याशङ्क्य शब्दश्रवणानन्तरभाविप्रवृत्तिहेतुप्रेषणाध्येषणादिव्यापारानुवृत्तप्रवर्त्तनासामान्याभिधानेन तद्विशेषापेक्षायामपौरुषेये वेदे पुरुषधर्मस्य प्रेषणादेरसम्भवात्तद्व्यतिरिक्तविध्याख्यस्य विशेषस्य पारिशेष्याल्लक्षणया गम्यमानस्य सम्बन्धग्रहणानपेक्षत्वेन प्राक् सिद्ध्यनपेक्षणादविरुद्धा शब्दव्यापारतेति सूचनायाभिधाशब्दः। कर्त्तृव्युत्पत्त्या करणव्युत्पत्त्या वाभिधाशब्दस्य शब्दपरत्वमङ्गीकृत्याभिधायाः शब्दस्यात्मनो भावनां व्यापारं प्रवर्त्तनासामान्यव्यक्तिभूतं लिङादयः प्रवर्त्तनासामान्यमभिदधाना निर्विशेषसामान्यायोगात्प्रैषादौ च लोकदृष्टस्य विशेषस्य पुरुषधर्मत्वेनापौरुषेये वेदेऽसम्भवात्प्रवर्त्तनासामान्यस्य च प्रैषादिप्रवर्त्तकव्यापारवर्त्तित्वदर्शनाल्लिङादेरेव च वेदाप्रवर्त्तकत्वावधारणाल्लक्षणया गमयन्तीत्यर्थः।अन्यामित्यपरत्ववाचिना ऽन्यशब्देन शब्दभावनायाः पाश्चात्यमभिदधतार्थभावनाविषयत्वेन तदपेक्षत्वसूचनाद्विध्यभिधायित्वं नार्थभावनाभिधायित्वस्य बाधकं प्रत्युत साधकमिति सूचितम्। न च विधिव्यतिरिक्तभावनापह्नवार्थो विधिमात्रशब्दार्थो युज्यते विध्यभावे ऽपि सर्वा-

ख्यातेषु दर्शनेनापह्नोतुमशक्यत्वादिति द्वितीयकल्पनिरासायोत्तरार्धं विधेयायाः भावनायाः पुरुषार्थरूपभाव्यनिष्ठत्वसूचनायेच्छायोनित्वं सूचयितुमिच्छार्थादर्थयतेर्णिजन्तादर्थयतइति कर्तृविवक्षायामेरजित्यच्प्रत्ययोत्पादनेनार्थिनः पुरुषस्यार्थशब्देनाभिधानाद्भावनायाश्च पुरुषधर्मत्वाद्धर्मधर्मिणोश्चात्यन्तभेदाभावात्तादात्म्यं विवक्षित्वार्थात्मा चासौ भावना चेति विग्रहः कार्यः । अन्यामित्यर्थ-
३४५।२ भावनापेक्षित्वं शब्दभावनायाः सूचितमुपपादयति * यदा हीति* पुरुषव्यापाररूपेत्यनेनार्थशब्दस्यार्थयतइति व्युत्पत्त्यार्थिपुरुषपरतया व्याख्यानं सूचितम्। विध्यादीनां भावनाव्यक्तित्वाभावे ऽपि विषयित्वेनावच्छेदकत्वात् विशेषतोक्ता लिङादिषु शब्दविशेषेषु अनुवृत्तं यत्सामान्यमाख्यातत्वं नाम तद्व्यतिरिक्तैर्लिङादिशब्दविशेषैर्वाच्या इत्याख्यातत्वेति त्वप्रत्ययाध्याहारेण व्याख्येयम्। व्यक्तीनां सामान्यादत्यन्तव्यतिरेकाभावे ऽपि आख्यातरूपवाच्यार्थभावनाव्यतिरिक्तविध्याद्यर्थान्तरवाचित्वोपपादनार्थं कथं चिद्व्यतिरेकविवक्षया व्यतिरेकशब्दः। लिङ्लोट्तव्यपञ्चमलकाराणां विधिर्वाच्यस्तेषामेव नञ्युक्तानां निषेधः। लङ्लुङ्लिटां भूतकालः लृट्लुटोर्भविष्यत्कालः लटो वर्त्तमानकालः आदिशब्दोपात्ता क्रियातिपत्तिर्लृङ्वाच्या आशीरादीनामपि लिङादिशब्दवाच्यानामादिशब्देनोपादानमतदेवोदाहरणैरुपपादयितुम् * तथा चेत्युक्तम् * ननु विध्यादेरर्थभावनापेक्षित्वे ऽप्यभिधाभावनायाः किमायातं का वाभिधाभावना कथं चास्याः सापेक्षतेत्याशङ्क्य * तत्रेत्युक्तम् * विधेरेवाभिधाख्यशब्दधर्मभावनात्वात्तस्याश्च प्रयोजकशब्दव्यापारत्वेन प्रयोज्यपुरुषव्यापारात्मकार्थभावनाविषयत्वात्तदपेक्षितेत्याशयः । शब्दव्यतिरेकेण व्यापारस्यानुपलम्भेनाभावमाशङ्क्यात्यन्तभेदाभावेनानुपलम्भोपपादनायाभिधात्मिकेत्युक्तम् । ननु भावनायाः सर्वत्रांशत्रयोपेतत्वाद्विधेश्चांशत्रयानिरूपणान्न भावनात्वमस्तीत्याशङ्क्याह * विशेषतश्चेति * पुरुषप्रवृत्तिविधिज्ञानप्ररोचनाख्यसाध्यसाधनेतिकर्त्तव्यताविशिष्टरूपेण वर्णितेत्यर्थः । यच्च करोतिभावयत्योः प्रत्ययेन सह प्रयोगात्सहाप्रयोज्यत्वलक्षणपर्यायास्तित्यतिलङ्घनेनापर्यायत्वमुक्तं तदप्यनुभाषणपूर्वकं त्रेधा परिहरति * यत्त्विति * पर्यायाणां सहाप्रयोज्यत्वस्यानर्थक्यापत्तिप्रयुक्तत्वात् पर्यायत्वस्वरूपस्याप्रयोजकत्वेन स्वरूपप्रयुक्तसाहित्यलक्षणव्याप्त्यभावादिह च प्रकृत्यनुग्रहादिप्रयोजनत्रयसद्भावेनानर्थक्यापत्त्यभावाच्च सहाप्रयोज्यत्वनिवृत्त्या पर्यायत्वनिवृत्तिरित्याशयः । प्रकृत्यनुग्रहार्थत्वमुप-

मुपपादयति *यदि हीति* ननु तृजादिप्रयोगेणापि प्रकृत्यनुग्रहसिद्धेराख्यातनियमो ऽनर्थकः स्यादित्याशङ्क्याह *तेनेति* येन प्रत्ययं विनापभ्रंशत्वप्रसङ्गस्तेनावश्यं कस्मिंश्चित्प्रत्यये प्रयोज्ये तृजादिप्रयोगे कर्त्राद्यर्थान्तरापत्तेस्तस्य च विवक्षितार्थाभ्यधिकत्वेनावाच्यत्वात्प्रकृत्यर्थानुवाद्याख्यातमेव नियम्यतइत्यर्थः। नन्वधिकार्थापत्तिभयात् कर्त्ता भावयितेत्यादिकर्त्रादिवाचितृजादिप्रयोगायोगे ऽपि इकः स्तिपो वाभ्यधिकार्थानापादकत्वेन प्रयोगोपपत्तेः क्रिभ्वादिः करोतिर्भावयतिरिति वा कस्मान्न प्रयुज्यतइत्याशङ्क्ते *ननु चेति * तयोरधिकार्थत्वाभावे ऽपि तद्युक्तयोः करोतिभावयत्योः स्वरूपवाचित्वेनाख्यातार्थवाचित्वहानापत्तेर्न युक्तः प्रयोग इति परिहरति * नैतदिति * नन्वर्थे ऽपीङ्न्तस्य स्तितवन्तस्य वा धातोः प्रयोगान्नार्थवाचित्वहानिरित्याशङ्क्याह * यत्त्विति * एतदेवोपसंहरति * तस्मादिति * कर्तृसंख्यादिसङ्ग्रहार्थत्वं विवृणोति * यदि ३४६।२
चेति * पूर्वस्मिन्परिहारे सर्वप्रत्ययार्थाविवक्षापत्तेः परिहारान्तरमुक्तम् भावनांशानुवादस्त्विहापि तुल्य इत्याह * यस्त्विति * ननु भावनायाः प्राधान्येनाख्यातार्थत्वाद् गुणभूतकर्तृसंख्यादिसंग्रहायानुवाद्यत्वानुपपत्तेः प्रकृत्यनुग्रहाय धातुनिर्देशार्थस्यैव प्रत्ययस्य लक्षणार्थपरत्वोपपत्तेः प्रयोगो युक्त इत्याशङ्क्याह * अन्यथा हीति * आख्यातार्थकथनाय भावनामात्रवाचिनि क्रियाव्यादिशब्दे प्रयुज्यमाने भावनामात्रस्याख्यातार्थत्वभ्रान्तिं करोतिभावयत्योर्वा सर्वाख्यातार्थवाचित्वभ्रान्तिं व्यावर्त्तयितुं कर्तृसंख्याद्याख्यातेनावश्यं वाच्यमित्यर्थः। रूपाविनाशसिद्ध्यर्थत्वमुपपादयति * नित्यं चेति * एतच्च ननु कारो भाव इत्यादि भावोत्पन्नकृत्प्रयोगे ऽभ्यधिकार्थान्तरानापत्तेः शब्दपदार्थकत्वानापत्तेश्च नाख्यातनियमः सम्भवतीत्याशङ्क्य * परिहारान्तरमुक्तम् * श्लोकार्थमुपसंहरति * तस्मादिति * एवं पर्यायत्वे ऽपि प्रत्ययस्य प्रयोजनान्तरार्थत्वेन पौनरुक्त्याभावात्सह प्रयोगो * न विरुध्यतइत्युक्तम् * इदानीं भावनाया वस्तुतः प्रत्ययमात्रवाच्यत्वे ऽपि प्रतीतिमात्रव्यवहारिणा लोकेन विवेक्तुमशक्यत्वादाख्यातपदेन धात्वर्थवत् भावनाप्युच्यतइत्येतावदवगम्य पचतीत्यस्य को ऽर्थ इति पृष्टे धातुमात्रवाच्यत्वेन निश्चितं धात्वर्थं पाकमिति व्याख्याय सम्मुग्धाख्यातपदवाच्यत्वेन भावनां ख्यापयितुं करोतौ भावयतौ वा प्रयुज्यमाने प्रकृत्यनुग्रहार्थं प्रत्ययमात्रस्य भावनावाचित्वाभावेनापौनरुक्त्यं मत्वा प्रयोगो न विरुध्यतइत्याह * किं चेति *

पर्यायत्वाभावादपि तिङ्प्रयोगाविरोध इत्येवम् किं च शब्दव्याख्यानपूर्वकम् । श्लोकं व्याचष्टे * यदि हीति * लोकानवगतं विवेकं कुर्वतां परीक्षकाणां लोकविरोधपरिहारसूचनार्थं लोकस्य विवेकज्ञानप्रयोजनाभावाभिधानम् । ननु धातोः व्यभिचारित्वेनावाचकत्वनिश्चयात्प्रत्ययमात्रवाच्यत्वं विवेक्तुं शक्यमित्याशङ्कते * स्यादेतदिति * प्रत्ययस्यापि व्यभिचारस्तुल्य इति तावत्परिहरति * तदिति * प्रौढ्या भावनावाचित्वेनाभिमतस्य सिद्धकर्तृक्रियावाचिनो धातोरव्यभिचारं वक्तुमुपक्रमते * न वेति * प्राधान्याप्रतीतावपि स्वरूपमात्रप्रतीतिदर्शनायात्यन्तमित्युक्तम् । अस्तिः प्रतीतिलक्षणार्थः। तत्र कृद्विशेषाणां कृत्यानां प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्रैषवाचित्वस्मृतेरप्राप्तविषयस्य च प्रैषस्य विधित्वाद्विधेश्च भावनाविषयत्वादप्रधानभूतायाश्चांशत्रयोपसंहारासामर्थ्येन विधातुमशक्यत्वादीषत्प्राधान्यमप्यस्तीति सूचयितुं पूर्वं कृत्येषु किं चिदपकृष्यमाणभावनारूपप्रतीतिं दर्शयति * कृत्येषु तावदिति * कृत्यमध्ये ऽपिभोक्तव्यमित्यादेर्भावोत्पन्नात्कृत्याद्धन्तव्य इत्यादिषु कर्मोत्पन्नेषु न्यू-
३४७।१ नतरागम्यतइत्याह * तत्रापीति * द्रव्यप्राधान्येन धात्वर्थस्यापि प्राधान्याभावाद्भावनायाः सुतरां नास्तीति सूचितं कथं न्यूनतरत्वं चेत्यपेक्षायामाह * न हीति * भोजनं कर्त्तव्यमित्यत्र प्रयोजकव्यापारस्य धात्वर्थप्रधानत्वाद्धन्तव्य इत्यत्र च प्रयोज्यद्रव्यपरत्वान्न प्राधान्यमित्यर्थः । द्रव्यस्वरूपस्य तव्यवाच्यत्वाभावेन प्राधान्यायोगात् कर्मस्वरूपेण प्राधान्यं वक्तुं प्रयोज्यशब्दः । निर्व्यापारस्य प्रयोज्यत्वायोगात्कर्मशक्त्याक्षिप्तप्रयोज्यव्यापारविशिष्टतोक्ता । नन्वेवं सति तिङ्क्षु भावनावाचित्वस्य भावनाप्राधान्यव्याप्तेः कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचितापि निवर्त्तनइत्याशङ्क्य तिङ्क्ष्वपि सर्वेषु भावनाप्राधान्याभावाद्वचाप्त्यभावं सूचयितुमाह * एतेनेति * भावोत्पन्नाः कर्मोत्पन्ना वा स्थानिनो लकारा येषां भुज्यते देवदत्तेन भुज्यते ऽन्नमित्यादीनामादेशानां तिङन्ते ऽप्यनेन भावकर्मोत्पन्नकृत्यव्याख्यानेन व्याख्याता इत्यर्थः । एतदेव विवृणोति * तेष्वपीति * अतो भावनावाचिनामपि सर्वेषां तिङन्तानां तत्प्राधान्यलक्षणतुल्यत्वाभावाद्भावनावाचित्वस्य तत्प्राधान्येनाव्याप्तेर्न कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचित्वनिवृत्तिरित्युपसंहरति * अत इति * अव्ययसंज्ञकेषु कृत्सु कृत्यसंज्ञकेभ्यो ऽपीषत्न्यूनभावनाज्ञानमित्याह * तथेति * ननु तेषामपि भोक्तव्यमिति कृत्यसंज्ञककृद्भावोत्पन्नत्वस्मरणाविशेषात्कथं कृत्यवाच्यभावनातो ऽव्ययकृ-

ख्याच्यावा भावनायाः न्यूनतेत्याशङ्क्य * अव्ययेत्युक्तम् * स्मृत्युपन्यासेनाव्ययकृत्सु इति ज्ञातुं शक्यत्वान्न करणेनोक्तम् । ईषन्न्यूनभावनाज्ञानस्य स्वसंवेद्यत्वमुदाहरणैर्दर्शयति * अभिक्राममिति * धातुसम्बन्धे प्रत्यया इति धातुसम्बन्धाधिकारविहितानामपि णमुलादीनां धात्वर्थसम्बन्धं विना धातुसम्बन्धायोगात् धात्वर्थनिष्पादलक्षणभावनायाः सम्बन्धं च विना धात्वर्थसम्बन्धायोगाद्भावनासम्बन्धवाचित्वप्रतीतेः समानकर्तृकयोः पूर्वकालइत्यनेन समानकर्तृकयोः धात्वर्थयोः पूर्वकाले धात्वर्थे वर्त्तमानाद्धातोः क्त्वाप्रत्ययं विधाय आभिक्ष्ण्ये णमुल्चेति तस्मिन्नेवार्थे पौनःपुन्याख्याभीक्ष्ण्याधिक्ये णमुलिवधानादभिक्रमणं कृत्वा होमं करोतीति णमुलश्रुत्यैव होमभावना सापेक्षाभिक्रमणभावनाश्रीयते । करणे हन इति च करणवाचिन्युपपदे हन्तेर्णमुलप्रत्ययविधानादुपहननं कृत्वा होमं करोतीति हननभावना होमभावना सापेक्षावगम्यते । होमं कृत्वा भक्षणं करोतीति भक्षणभावना सापेक्षा होमभावना क्त्वाश्रुत्यैवावगम्यते । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् इत्यनेन च तुमर्थइत्यनुवर्त्त्य भावं च तुमर्थत्वेन विवक्षित्वा भावो लक्ष्यतेऽनेनेति च भावलक्षणशब्दार्थं विवक्षित्वा तिष्ठतेरिणः कृञोवदेश्चरेर्जुहोतेस्तमिजनेश्च धातोर्भावलक्षणार्थे भावे वर्त्तमानात्तोसुन् विधानात्पुरा वाचः प्रवदितोरनूच्य इत्यत्र प्रवदितोरित्यव्ययतोसुन् श्रुत्यैव पुरेति दिक्शब्दयोगात् लुप्तपञ्चमीकतया वाक्प्रवादक्रियातः पुराप्रातरनुवाकानुवचनं कार्यमित्यनुवाचनभावनासापेक्षा प्रवादभावना गम्यते । अतो भावनान्तरसापेक्षत्वात्स्वसम्वेद्या न्यूनतेत्याशयः । निष्ठासञ्ज्ञयोस्तु क्तक्तवत्वोः कृतो न्यूनतरभावनाज्ञानं स्वसम्वेद्यमित्याह *पक्व इति* पक्वः पक्ववानित्यत्रौदनः कृतपाको देवदत्तः पाकं कृतवानिति निष्पन्नरूपायाः भावनायाः यथासंख्यं कर्मकर्तृरूपद्रव्योपसर्जनत्वप्रतीतेर्निष्पाद्यत्वप्राधान्ययोर्द्वयोरप्यभावात्कृत्यसञ्ज्ञकेभ्यः कृद्भ्यो न्यूनतरेत्याशयः । एवं कृत्याव्ययनिष्ठासञ्ज्ञकेषु कृद्विशेषेषु अपकृष्यमाणभावनारूपप्रतीतिमुक्त्वा कृदन्तरेषु यथासम्भवमतिदिशति * एवमिति * पाचकः पक्तेत्यादिषु कर्त्रुत्पन्नेषु पाककारकः पाककर्त्तेत्यादिकर्तृप्राधान्यप्रतीतेरादिशब्दोपात्तेषु पाक इत्यादिषु भावोत्पन्नेषु पाकः क्रियेत्यादिधात्वर्थप्राधान्यप्रतीतेर्विधेयत्वाभावेन च प्राधान्यानपेक्षणात् कृत्येभ्यो न्यूनतरेति भावः। स्वसम्वेद्यमपि सर्वेषु सिद्धकर्तृक्रियावाचिषु धातुषु भावनाज्ञानं विप्रतिपन्नान्प्रत्यर्थापत्त्या साधयति * तथा चेति * भावोत्पन्नेषु

कृत्येषु कस्य केनेति कर्मकर्तृकरणानां कर्मोत्पन्नेषु केनेति कर्तृकरणयोरभिक्रामामित्यत्र कर्तुरुपघातमित्यत्र कस्य कः केनेति कर्मकर्तृकरणानां प्रवदितोरित्यत्र कस्येति कर्मकर्त्रोः पक्व इत्यत्र केनेति कर्तृकरणयोः पक्ववानित्यत्र कस्य केनेति कर्मकरणयोः पाचक इत्यत्र कस्य केनेति कर्मकरणयोः पाक इत्यत्र कस्येति कर्मकर्त्रोः केनेति च करणस्याधिकरणाद्यपेक्षायाश्च यथायोगं दर्शनात्तस्याश्च रूढ्यादिषु भावनानुपलब्धावदर्शनाद्भावनाज्ञानहेतुत्वावधारणात्तदन्यथानुपपत्त्या भावनाज्ञानं कल्प्यतइत्यर्थः । करोतेश्च ण्वुल्प्रत्यये कारकशब्दस्य मनिन्प्रत्यये । कर्मशब्दस्य तृच्प्रत्यये कर्तृशब्दस्य ल्युट्प्रत्यये करणशब्दस्य व्युत्पत्तेः कारकव्यपदेशतद्विशेषकर्मादिव्यपदेशानां करोत्यर्थव्यापारसम्बन्धनिबन्धत्वात्तदन्यथानुपपत्त्यापि भावनाज्ञानं कल्प्यतइत्याह * न चेति * ननु धात्वर्थस्यैव व्यापारत्वात्कारकापेक्षा कर्मादिषु च कारककर्मादिव्यपदेशाश्चोपपत्स्यन्त इत्याशङ्क्याह * न त्वस्तीति * धात्वर्थस्य निष्पाद्यत्वे सत्यप्यन्योत्पादानुकूलत्वलक्षणकरोत्यर्थक्रियारूपव्यापारत्वाभावान्न क्रियासम्बन्धरूपकारकापेक्षा धात्वर्थसम्बन्धनिबन्धना च कारकादिव्यपदेशाः सम्भवन्तीत्याशयः । यत्र धात्वर्थे किं चिदसन्न जायते स व्यापारो न भवतीत्यर्थः । अतः करोतिभावयत्योर्ऽर्थस्सर्वधातूनामर्थः सिद्ध इत्युपसंहरति * ततश्चेति * नन्वाख्यातेषु भावनावाचित्वं करोतिसामानाधिकरण्येन व्याप्तं (कृत्सु करोतिसामानाधिकरण्ये व्यावृत्या न व्याप्तं[1]) कृत्सु करोतिसामानाधिकरण्ये व्यावर्त्तते इत्याशङ्क्याह * शक्यते चेति * ननु पूर्वापरानेकक्षणव्यासक्तरूपपूर्वापरीभूतत्वस्य व्यापारलक्षणस्य धञन्तादिष्वप्रतीतेः कथं भावनाख्यव्यापारवाचितास्तीत्याशङ्क्य * विनापीत्युक्तम् * यथा शुक्लत्वमित्यत्र भावप्रत्ययाद् गुणस्य निष्कर्षप्रतीतेर्द्रव्योपसर्जनत्वरूपाप्रतीतावपि गुणस्वरूपवाचित्वं न विहन्यते तथात्रापि धञादिप्रत्ययात् सिद्धरूपप्रतीतेः पूर्वापरीभूतत्वरूपनिष्पाद्यत्वाप्रतीतावपि भावनास्वरूपवाचित्वं न विहन्यतइति भावः । कथं शक्यमित्यपेक्षायामाह * तद्यथेति * णमुलन्तधातौ करोतिसामानाधिकरण्यं प्रदर्शयितुं प्रश्नार्थे किमिति प्रयोक्तव्ये अन्यथैवं कथमित्थम्विनियोगिनि किम्युपपदे करोतेर्णमुलप्रत्ययविधानात् * कथङ्कारमित्युक्तम् * किं कृत्वा भक्षयन्त्यभिषुत्य हुत्वेति वक्तव्यं होमाभिषवयोः पौर्वापर्यसन्देहनिवृत्त्यर्थं जुहोतीत्यु-

१ अयं पा० १ पु० ना० ।

कं किङ्कुर्वोः पुरा प्रवदितोरिति कृञ्वदिभ्यामेकसूत्रेण तोसुन्विधानात्सुञ्जातत्वान्न दर्शितम् किं कर्त्तेत्युच्यमाने कर्मविशेषप्रश्नाशङ्कापत्तेः क्रियाविशेषविषयत्वज्ञापनार्थं का क्रियास्येति विवक्षितत्वात् * किं क्रिय इत्युक्तम् * नन्वाख्यातेषु भावनायाः प्राधान्यप्रतीतेः प्रत्ययार्थत्वावधारणान्न धातुवाच्यतेत्याशङ्क्याह * न चेति * प्रत्ययार्थस्यापि कर्तृसंख्यादेर्गुणत्वदर्शनात्प्रत्ययार्थस्य प्राधान्यस्मृतिरप्रमाणमित्याशयः। अतो यथा धातवो धात्वर्थं न व्यभिचरन्ति तथा भावनामपीत्युपसंहरति * तस्मादिति * भिन्नक्रमो ऽपिशब्दः सर्वधातूनां करोत्यर्थवाचित्वे ऽभियुक्तानां संमतिमाह * तथा चाहुरिति *

विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोत्थः।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून्॥

नन्वाख्यातेषु सर्वधातुवाच्यत्वे भावनायाः प्राधान्यप्रतीतिः कथमित्याशङ्क्याह * यत्त्विति * गुणप्रधानभावस्यार्थाद्गम्यमानत्वेन प्रत्ययार्थत्वपक्षे ऽपि प्राधान्यस्य वाच्यत्वाभावात्प्रौढिमात्रेण वाच्यत्वाभिधानमिति सूचयितुम् * कामामित्युक्तम् * अस्मिन्पक्षे यज्याद्यर्थश्चात इत्यतःशब्देन धातुमात्रपरामर्शात् धात्वर्थश्च धातोरवगम्यत भावयेदिति चेति भाष्यं व्याख्येयम्।नन्वेवं भावनायाः प्रत्ययवाच्यत्वाभावात्प्रत्ययस्य करोतिभावयतिभ्यां पौनरुक्त्याभावे ऽपि यागेनेति घञन्तेन धातुना धात्वर्थे कथ्यमाने भावनाया अपि तेनैव धातुनोपात्तत्वाद्भावयेदिति पुनरुक्तं स्यादित्याशङ्क्ते * नन्विति * ननु घञा भावनातो धात्वर्थस्य निष्कृष्टत्वात्कथं भावनोपादानमित्याशङ्क्यैकशब्दोपात्तयोः शुद्धाभिधानलक्षणनिष्कर्षायोगात्सिद्धरूपाभिधानलक्षणो निष्कर्षो वाच्यः। भावनाया अपि सिद्धरूपेणाभिधानोपपत्तेरपरिहार्यं पौनरुक्त्यमिति सूचयितुं व्याख्यायमान इति वक्तव्ये निष्कृष्टमित्युक्तम्। तृतीयान्तेन करणात्मना धात्वर्थस्य निष्कृष्टत्वाद्भावनायाश्च क्रियात्वेन करणत्वायोगाद्धात्वर्थमात्रं धातुना विवक्षित्वा शब्दान्तरेण भावनारूपार्थव्याख्या युक्तेति परिहरति * नैष दोष इति * सामान्यविशेषशब्दयोरवच्छेद- ३४८।१
द्यावच्छेदकपरत्वं विशेषणभावाच्च यागादयो भावनाविशेषा इत्यत्र स्वयमेव वक्ष्यते एवं प्रौढ्या धातुमात्रवाच्यत्वमुपपाद्य केवलयोर्धातुप्रत्यययोर्व्यभिचाराद्धात्वनुगृहीतेन प्रत्ययेन प्रत्ययानुगृहीतेन वा धातुना उभाभ्यां वा परस्परानुगृहीताभ्यां भावनोच्यत इत्यपि वक्तुं शक्यमिति यदुपक्रमे ऽभिहितं तदुपपादयति *अथ वेति* कर-

णांशस्य धात्वर्थस्य कर्तृसंख्यादीनां चैकवाच्यत्वे ऽपि भावनायाः समुदायवाच्यत्वाविरोध इत्याशयः । अस्मिन्पक्षे यज्याद्यर्थश्चात इत्यतःशब्देन धातुप्रत्ययसमुदायं परामृश्यातःसमुदायाद्यज्यादिधात्वंशस्य चार्थो ऽवगम्यते समुदायार्थश्च भावनेति भाष्यं व्याख्येयम् प्रकृतसूत्रपर्यालोचनयाप्येतत्पक्षद्वयं प्रतिभातीत्याह * तथा चेति* क्रियतइत्यस्मिन्नर्थे करोतेर्मनिन्प्रत्ययस्मृतेः कर्मशब्दस्यानुष्ठेयवाच्यत्वाद्भावार्थनवच्छिन्नायाश्च भावनाया अनुष्ठेयत्वाद्भावार्थस्यैवानुष्ठेयत्वेन कर्मशब्दवाच्यत्वात्कर्मशब्दशब्देन धातून् विवक्षित्वा तत्सामानाधिकरण्याद्भावार्थता तेषामेवाश्रितेत्यर्थः । समुदायवाच्यत्वपक्षे भावार्थानां धातुप्रत्ययसमुदायानां धात्वंशेन कर्मशब्दत्वात्सामानाधिकरण्यं प्रत्ययस्य तु भावार्थत्वेन कथं चित् सामानाधिकरण्यमित्याशयः । नन्वेवं सति सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति इत्यादिना कस्मात्प्रत्ययवाच्यतोक्तेत्याशङ्क्याह * शास्त्रे त्विति * इहैव तावद्यज्याद्यर्थश्चातो यजेतेति पदादवगम्यते भावयेदिति चेति धातुवाच्यादर्थाद्भेदेन भावनावगमाभिधानाद्धातुमात्रस्य चानिर्दिष्टस्यातःशब्देन परामर्शानुपपत्तेस्तन्मात्रपरामर्शे च यागादिश्चातो ऽवगम्यते इति वक्तव्यत्वात्प्रत्ययार्थत्वाभिप्रायागवतेः शब्दान्तराधिकरणे च यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति उत्तरो भागो भावयेदिति इत्यादिभाष्ये परो भागो भावनावचन इत्यत्र च स्पष्टप्रत्ययवाच्यत्वाभिधानात्सामानाधिकरण्यस्य चाख्यातपदरूपाः शब्दाः प्रत्ययांशेन भावार्थाः धात्वंशेन कर्मशब्दा इत्येव धातव एव भावनाविशेषणभूतस्वार्थवाचित्वेन भावनाप्रयोजनत्वाद्भावार्था इत्येवं वोपपत्तेः । प्रत्ययमात्रार्थता शास्त्रकाराणामभिप्रेतेत्याशयः । प्रत्ययार्थत्वमुपपादयितुमुपक्रमते * तत्रेति * भावप्रधानमाख्यातमिति नैरुक्तिकस्मृतेर्णिजन्ताद्भवतेरच्प्रत्यये कृते भावशब्दव्युत्पत्तेर्भावनाप्राधान्यविषयत्वावसायात्प्राधान्याभावे च कृदन्तवन्निरपेक्षस्य कारकान्वययोगापत्तेराख्यातेश्च भावनाप्राधान्यावगतेः । सर्वस्य सम्वेद्यत्वान्न तावत्प्राधान्ये विप्रतिपत्तुं शक्यम् । प्रकृत्यर्थत्वे च सति विशेषणत्वापत्तेः प्राधान्याभावप्रसङ्गात्प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति प्रत्ययार्थप्राधान्यस्मृतेश्च कर्तृसंख्यादेः प्रत्ययार्थस्य प्राधान्याभावात्प्रत्ययार्थः प्रधानमेवेति नियमायोगे ऽपि प्रत्ययार्थ एव प्रधानमिति नियमोपपत्तेर्नामस्वपि च कृत्तद्धितान्तेषु कारकविभक्त्यन्तेषु च प्राधान्यस्य प्रत्ययार्थत्वाव्यभिचारात्सत्त्वप्रधानानि नामानि इति

स्मृतेश्च लिङ्गसंख्यासम्बन्धार्हत्वविषयतया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यपरत्वे ऽपि वा प्रतीत्यनुसारात्प्रथमान्तनामविषयतया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यस्य प्रत्ययार्थत्वव्यभिचारानापादकत्वात्प्राधान्येन भावनायाः प्रत्ययार्थतावसीयतइत्याशयः। प्रकृत्यर्थस्य विशेषणत्वोपपादनार्थं पूर्वार्द्धं प्रत्ययार्थविशेषणीभूतस्यार्थाभिधानेन प्रकृतेः प्रत्ययार्थपरत्वस्य विवक्षितत्वात् श्लोकतात्पर्यं व्याचष्टे * यद्यपीति * तदागमन्यायेनापि भावनायाः प्रत्ययार्थतावसीयतइत्याह * तथेति * नन्वन्वयव्यतिरेकाभ्यां निष्कृष्टे ऽर्थे नियम्यतइत्यन्वयव्यतिरेकैकशरणत्वान्निष्कृष्टार्थविषयशक्तिनियमस्य धातुव्यतिरेकेण चाख्याताभावादिह तन्मात्रान्वयव्यतिरेकानुपपत्तेः कथं तन्मात्रवाच्यत्वनिर्णय इत्याशङ्क्याह * न केवलमिति * धात्वपरित्यागे ऽपि प्रत्ययश्रवणकाले धातुश्रवणाभावे ऽपि भावनाप्रतीतेर्धातुश्रवणकाले च प्रत्ययश्रवणाभावे तदप्रतीतेः शब्दवत्तूपलभ्यते न तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषामिति चातुर्थन्यायेन निर्णयो भविष्यतीत्याशयः। यत्तु कृदन्तधातुवदस्त्यादिपरस्य प्रत्ययस्यापि भावनाव्यभिचारात्तद्वाचित्वं न सम्भवतीत्युक्तं तदनुभाषणपूर्वकं परिहरति * यत्त्विति * अयमाशयः पचतीत्यादिषु प्रतीयमानायाः भावनायाः धात्वर्थेन स्वनिष्पादकतया लक्ष्यमाणत्वे गुणत्वापत्तेः प्राधान्यप्रतीतिविरोधापाताद्वाच्यत्वं तावदवश्याङ्गीकार्यं तच्च व्यभिचारात्प्रत्ययस्यावाचकत्वे धातुसमुदाययोरप्यवाचकत्वापत्तेर्विरुध्येत समुदायार्थत्वपक्षे ऽपि हि धातुमात्रस्याख्यातसाहित्यात्मकः समुदायो भावनावाची स्यात्पच्यादिधातुविशेषस्य वा तत्र धातुविशेषस्य शुद्धस्यापि अव्यभिचारोपपत्तेर्द्वयोर्वाचकत्वकल्पनस्यान्याय्यत्वाच्छुद्धधातुवाच्यत्वस्य प्राधान्यविरोधादनभ्युपगमे प्राधान्यस्य शुद्धप्रत्ययार्थत्वेन कारकविभक्तिवाच्येषु कारकेषु व्याप्तेः। शुद्धप्रत्ययार्थत्वस्यैव न्याय्यत्वापत्तेर्धातुमात्राख्यातसमुदायार्थताभ्युपगन्तव्या सा च व्यभिचाराविशेषान्न युक्तेति पक्षत्रये ऽपि यत्र पचतीत्यादौ भावना प्रतीयते तत्रैव वाच्यताङ्गीकार्या तत्र चोक्तरीत्या प्रत्ययार्थतैव निश्चीयतइति। नन्वेवं सति भावनायाः सार्वत्रिकं प्रत्ययार्थत्वं न सिध्यतीत्याशङ्क्याह * अन्यत्र त्विति * प्रयोजकव्यापारस्य भावनात्वात् अस्त्याद्यर्थकर्त्तुश्चासिद्धत्वेन प्रयोजकत्वायोगात् भावनानुपपत्तेरसत्याश्च कस्य वाच्येति विचाराविषयत्वात्प्रत्ययस्य भावनावाचित्वाभावे ऽपि प्रकृ-

त्यनुग्रहार्थत्वेन कर्तृसंख्याद्यभिधानार्थत्वेन वा टाबादेरिव स्त्रीत्व-वाचिनः खट्वादौ स्त्रीत्वाभावेन तद्वाचित्वाभावे ऽप्यर्थवत्त्वोपपत्तेरानर्थक्यपरिहारायापि वाच्यानाकाङ्क्षणाद्यत्र प्रतीयते तत्रैव प्रत्ययार्थत्वं विचार्यते तत्र च सार्वत्रिकतास्त्येवेत्याशयः । नन्वेवं सति व्यभिचारात्प्रत्ययस्य भावनावाचिता न युक्तेत्याशङ्क्याह * क्व चिदिति *

नान्वयव्यतिरेकाभ्यां त्वपूर्वो ऽर्थो ऽवगम्यते ।
सङ्कीर्णे ऽवगते त्वर्थे ताभ्यां शक्तिर्नियम्यते ॥

तेनानेकात्मकाच्छब्दादनेकार्थावबोधने सिद्धे यदागमे यो ऽर्थः स तस्येत्यवधार्यते इत्यनेनानेकशब्दोच्चारणादनेकार्थप्रतीतौ कस्य शब्दस्य को ऽर्थ इति विवेकमात्रस्य तदागमन्यायात्मकान्वयव्यतिरेकाधीनत्वादस्त्यादौ च भावनाप्रतीत्यभावेन कस्यासावर्थ इति विवेकानाकाङ्क्षणात्कूपयूपसूपादिवद्व्यभिचारे ऽपि यत्रानेकार्थप्रतीतिस्तत्र तदागमन्यायाविघातान्न कश्चिद्दोष इत्युत्तरमुक्तमित्यर्थः । प्रौढ्या ऽस्त्यादिना परस्परप्रत्ययस्य भावनावाचित्वं वक्तुमुपक्रमते * अथ वेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * भाव्यं विना भावनानुपपत्तिमाशङ्क्य भाव्यान्तराभावे ऽपि कर्तैव भाव्यो भविष्यतीत्युक्ते कथमेकस्यैव कर्तृकर्मतेत्याशङ्कानिरासायांशशब्दः घटो भवतीत्युच्यमाने घटे प्रयोगात्तस्यां चावस्थायां पूर्वापरीभूतस्य घटस्य केन चिदंशेन सिद्धत्वात्केन चित्साध्यत्वात्सिद्धेः कर्तुर्घटस्यांशे समवेता भाव्यकर्त्रंशविषया भावनास्त्येवेत्यंशशब्दात्परां सप्तमीमधिकरणकर्मरूपविषयपरतयावर्त्य व्याख्येयम् । नन्वेवं सति तत्र करोतिसामानाधिकरण्यं कस्मान्न भवतीत्याशङ्क्योत्तरार्द्धं सिद्धासिद्धानां घटावयवानामत्यन्तभेदाभावादन्यत्र कर्तुव्यतिरिक्ते भाव्ये शेषत्वाभावाद्व्यतिरिक्तभाव्यनिष्ठत्वाभावात्करोत्यर्थभावनारूपेण सा न प्रकाशते न प्रतिभातीत्यर्थः । केन चिदंशेन सिद्धो घटो ऽशान्तरं करोतीत्यपि विवक्षितुं शक्यत्वात्प्रत्युक्तम्। कथं चित्करोत्यर्थरूपप्रतीतावपि प्रकर्षेण न प्रतीयत इत्यर्थः।अनुपलब्धिविरोधाशङ्का- ३४९।२
निरासार्थत्वेनोत्तरार्द्धव्याख्यानपूर्वकम् श्लोकं व्याचष्टे * यद्यपीति * प्रशब्दव्याख्यानाय * अतीवेत्युक्तम् * अंशाशिनोरत्यन्तभेदाभावात् * आत्मानमित्युक्तम्* अंशत्रयं विना भावनाया नैराकाङ्क्ष्याभावाद्भाव्यांशसूचितौ करणेतिकर्तव्यतांशौ दर्शयितुं निरन्तरपूर्वक्षणावयवोत्पत्तेः करणत्वं व्यवहितावयवोत्पत्तेश्चेतिकर्त्तव्यतात्वमु-

कम्। ननु घटो भवतीति वाक्ये कथमंशत्रयप्रतीतिरित्याशङ्क्य तत्र प्रयोगे त्रयो ऽप्यंशा धातूपात्तेन भवनेन * पूर्यन्तइत्युक्तम् * प्रत्ययोपात्ताया भावनाया भाव्यापेक्षायां घटस्य भवतिपदात् भवितृत्वावगतेर्भाव्यांशे निवेशार्हत्वाद्धातूपात्तस्य च भवनस्य धात्वर्थान्तरवत् करणेतिकर्त्तव्यतांशान्वयात् घटः स्वभवनेन करणेतिकर्त्तव्यतारूपेणात्मानं भवनं भावयतीत्यर्थो भवतीत्याशयः। ननु व्यापारान्तरासम्भवे ऽप्येकस्य भवनस्यानेकांशपूरकत्वं न युक्तमित्याशङ्क्य भवनकर्तृभूतावयवभेदेन भवनभेदं सूचयितुं के चिदवयवाः प्रयुज्यन्ते के चित्प्रयोजका इति श्लोकगतांशशब्दार्थे व्याख्याते के प्रयोज्याः के प्रयोजका इति व्यवस्थापेक्षायां भवनं कुर्वतामुत्तरावयवानां प्रयोज्यत्वोक्त्या भवनस्य प्रयोज्यव्यापारत्वेन भाव्यांशपूरकता सिद्धभवनानां च पूर्वावयवानां प्रयोजकत्वोक्त्या सिद्धत्वेन करणेतिकर्त्तव्यतांशपूरकतोपपादिता अवस्थाविशेषाभिप्रायौ चेमावंशावयवशब्दौ। घटादिर्हि मृत्पिण्डादेरुत्पद्यमानो घटादिशब्दवाच्यपृथुबुध्नोदराद्याकारात्मकावस्थाविशेषात्प्रागवस्थान्तराणि अनुभूय घटादिशब्दवाच्यावस्थाविशेषरूपेणोत्पत्तेः पूर्वावस्थाभिर्भाव्यः पूर्वावस्थायाश्च तत्साधनत्वाद्यथार्हं करणेतिकर्त्तव्यतात्वेन विवक्षितुं शक्यन्ते घटशब्दवाच्यस्य त्वस्यैवैकस्यावस्थाविशेषस्य प्रयोज्यत्वे वाच्ये ततः प्राचीनानामप्युत्तरोत्तरावस्थानां पूर्वपूर्वावस्थाहेतुकत्वं दृष्टान्तार्थं सूचयितुम् अवयवा इति बहुवचनम्। ननु सिद्धभवनानां पूर्वावयवानां प्रयोजकत्वेनाभिमतानामसिद्धभवनोत्तरावयवोत्पत्तौ हेतुभूतः को ऽसौ व्यापारो यो भावनेत्युच्यतइत्याशङ्क्य * सिद्धेत्युक्तम् * सिद्धभवनानां नियतपूर्वक्षणवर्त्तित्वेनासिद्धभवनोत्पादकत्वावगमात् व्यापारं च विनोत्पादकत्वायोगाद्भवनाख्यस्यानन्यनिष्ठत्वेनान्योत्पत्त्यननुकूलत्वादवश्यं सिद्धभवनप्रयोजकावयवव्यापारत्वात्तत्तद्वृत्त्यसिद्धभवनप्रयोज्यावयवनिष्ठत्वाच्च तद्वृत्तिसर्वधात्वर्थानुरञ्जनसहत्वरूपं व्यापारसामान्यमभ्युपगन्तव्यम्। तच्च भाव्यनिष्ठभावकव्यापारत्वेन भाव्यभावकोभयसम्पर्काद्भावनेत्युच्यतइत्यर्थः। भवतिपराख्यातस्य भावनावाचित्वोपपादनेन तत्पर्यायजन्यादिपरस्य सिद्धमपि भावनावाचित्वं भूसत्तायामिति स्मृतेः सत्ताख्यद्वितीयभावविकारवाचित्वेन भवतेराद्यभावविकारवाचिजन्यादिपर्यायत्वं नास्तीति भ्रमप्रसङ्गात्तद्व्यावृत्त्यर्थं लोकप्रयोगानुसारात् भवतेराद्यभावविकारवाचित्वेन जन्यादिपर्यायत्वं सूच-

१ भवन्तमिति २ पु० पा०।

यितुमतिदिशति * एतेनेति * आदिशब्देनोत्पद्यतिपराख्यातोपादानम् । ननु भवतेरुत्पत्त्याख्यप्रथमभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगाद्भाव्यान्तरायोगे ऽपि आत्मनो भाव्यत्वोपपत्तेर्भावनासम्भवे ऽपि अस्तेः सत्ताख्यद्वितीयभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगादात्मनो भाव्यत्वानुपपत्तेः । स्वनिष्ठत्वेन चं भाव्यान्तरायोगात्कथं तत्र भावनावाचित्वं स्यादित्याशङ्क्याय * अस्तिः पुनरिति * लभ्यमानसत्ताकत्वावस्थैवास्तेर्वाच्या न लब्धसत्ताकत्वावस्था तस्याविपरिणामादिभावविकारान्तरेष्वप्यनुवृत्तेर्द्वितीयभावविकारवाचित्वाभावापत्तेस्तस्यां चावस्थायामलब्धसत्ताकत्वाद्युक्तैवात्मनो भाव्यतेत्याशयसूचनाय * उपरितनीमित्युक्तम् * भवनानन्तरं भवितृत्वायोगात्कथं भाव्यतेत्याशङ्क्य * सत्त्येत्युक्तम् * सिद्धभवनस्य भद्रपेणापि कथं भवितृतेत्याशङ्क्य करणाधिकरणयोश्चेत्यधिकरणे ल्युडुत्पत्तेः । भवनाश्रयवाचिना भवनशब्देन भवनविशिष्टत्वाभिधानादात्मना स्वरूपेण सिद्धभवनस्यापि सत्तारूपेण भवनकर्तृता * युक्तेत्युक्तम् * आत्मना भवनं यस्येति बहुव्रीहिणा वा भवनविशिष्टत्वाभिधानं करणेतिकर्त्तव्यताकाङ्क्षाया धातूपात्तायाः सत्ताया एव करणेतिकर्त्तव्यतांशपूरकत्वं वक्तुं सत्तयेत्यवार्त्तनीयम् । सत्तया भवदित्यनुपात्तभवनविशेषणत्वं सत्ताया न युक्तमित्याशङ्क्य भवनानन्तर्यात्सत्ताया एव भवनलक्षणार्थत्वसूचनायार्थलक्षणार्थो भवति प्रयुक्तः कथं भवतिवाच्यावस्थानन्तर्य्यमस्तिवाच्यायाः अवस्थाया इत्याशङ्क्यातिदेशसूचितं जन्यादिपर्यायत्वं विवृतम्। ननु घटाकारावस्थाविशेषोत्पत्तेरतदाकारावस्थान्तरोत्पत्तिसापेक्षत्वात्प्रयोज्यप्रयोजकव्यापारभेदकल्पना युक्ता सत्तायास्त्ववस्थान्तरानपेक्षत्वेन एवंविधभेदकल्पना न युक्तेत्याशङ्क्याह * तत्रापि त्विति * उत्पत्त्याख्याद्यभावविकारानन्तरभावित्वाद्द्वितीयभावविकाररूपायाः सत्तायास्तस्याश्चावस्थाकालभेदेन भेदात्तदनुनिष्पादिसत्ताभेदस्यावश्यम्भावात्सिद्धसत्ताकाः पूर्वे ऽवयवाः प्रयोजकाः सत्ताभवनव्यावृताश्चासिद्धसत्ताका उत्तरे ऽवयवाः प्रयोज्याः । सिद्धसत्ताकासिद्धसत्ताकवर्त्तित्वसामान्यं भावनाख्यो व्यापार इति कल्पनानुसर्त्तव्येत्यर्थः । ननु वस्तुत्वसामान्यरूपायाः सत्तायाः स्वरूपेणैकत्वे ऽपि कालकृतो भेदो ऽनेनोक्त इति शङ्कनीयम्। तस्या धातुवाच्यत्वाभावान्निष्पन्ने वस्तुनि इदानीमस्तीति प्रयोगस्य कालसंसर्गविषयत्वेन वस्तुस्वरूपविषयत्वाभावात् पूर्वकाल-

१ भावनाभाव्यत्वेति २ पु० पा० ।

सत्तासम्बन्धस्य चोत्तरकालसत्तासम्बन्धं प्रति हेतुत्वाभावेन प्रयोजकत्वव्यवस्थानुपयोगितया इह कालसंसर्गस्यावक्तव्यत्वात्कालकृतो भेदो येषां पूर्वोत्तरावयवानां तेषां या सत्ता या चोभयवर्त्तिनी सामान्यसत्ता तद्रूपेणेति विग्रहः । नन्वेवं सत्याग्नेयोऽष्टाकपालो भवतीत्यादौ भवत्यर्थावच्छिन्नायाः पुरोडाशभावनाया विधेयत्वोपपत्तेः पुरुषव्यापारकल्पनानर्थिका स्यादित्याशङ्क्याह * सत्यामपि त्विति * निष्पन्नकर्तृविषयत्वोपपादनार्थं चेतनग्रहणम् । ननु भवत्याद्यर्थेऽपि विधिदर्शनात्कथं तत्र विधिप्रतिषेधयोरसम्भव इत्याशङ्क्ते * स्यादेतदिति * स्वप्रयोजकसिद्धकर्तृव्यापारलक्षणार्थत्वेनात्र भवत्याद्यर्थस्य विधिविषयत्वं युक्तमिति परिहरति * सत्यामिति * भवतिनास्तिरप्युपलक्षितः नन्वृत्विक्त्वस्यासिद्धत्वेन तद्भवनस्य सिद्धपुरुषव्यापारलक्षणार्थतास्तु रथन्तरादेस्तु सिद्धत्वात्तद्भवनस्य विधिविषयत्वोपपत्तेः पुरुषव्यापारलक्षणार्थत्वं न सम्भवतीत्याशङ्क्याह * तथेति * भवतीति श्रुत्या भवनस्य विधिसम्बन्धे प्रतीयमाने ऽप्यचेतनव्यापारे विध्यसम्भवाद्विधेये भावना लक्षणेत्याशयः । ननु चेतनगतस्य तर्हि भवनस्य विधिविषयत्वं भविष्यतीत्याशङ्क्याह * यत्र त्विति * तिष्ठत्यर्थवाचित्वात्स्मृतावपि इह भवेदिति देशविशेषाश्रितसत्ताभिधानेन गतिनिवृत्त्याख्यातिष्ठत्यर्थवाचित्वसम्पत्तेरेवमुक्तमिहामुकः स्यादिति प्रयोगे ऽस्तेरपि तिष्ठत्यर्थवाचितैवमूहितव्या नन्वृत्विजा भवितव्यमित्यादावृत्विक्त्वादिभवितृव्यतिरिक्तभावयितृपुरुषव्यापाररूपभावनासद्भावे भवितृव्यापारस्य भावनाभ्युपगमो व्यर्थः स्यादित्याशङ्क्याह * तेनेति * विध्यादिशब्दोपात्ते च प्रैषादौ ३५०।१
निषेधे च भवितृव्यापारव्यतिरिक्ताख्यातवाच्यभावनासद्भावे ऽपि भूताद्युपदेशेष्वभावान्न भवितृव्यापारस्य भावनात्वाभ्युपगमस्य वैयर्थ्यापत्तिरित्याशयः । ननु श्रुताद्युपदेशे ऽपि आत्मानमभावयद्भावयति भावयिष्यतीति वा व्यवहारादर्शनाद्व्यर्थो भवितृव्यापारस्य भावनात्वाभ्युपगमः स्यादित्याशङ्क्य *अपारमार्थिकमित्युक्तम * व्यवहाराननुपात्यपि भवितृव्यापारस्य भावनात्वमाख्यातार्थवत्त्वाय तत्राभ्युपगतमित्याशयः । एतच्च सिद्धभवनानामवयवानां भावनाख्यो व्यापारो भवतिपदेन भवनं करोतीत्यभिधानादुच्यते ऽसिद्धभवनावयवव्यापारस्तु धातुमात्रेणोच्यतइत्यङ्गीकृत्य प्रयोज्यनिष्ठप्रयोजकव्यापाररूपभावनावाचित्वमाख्यातस्योक्तम्।यदा प्रतीत्यनुसारात्समस्तस्य भ्रमच्चक्रोपस्थानप्रभृतेर्घटाकारनिष्पत्तिपर्यन्तस्य व्यापारस्य

वाचको धातुरिष्यते तदा प्रयोज्यप्रयोजकव्यापारभेदाभावाद्धातुमात्रोक्तव्यापारस्य च कर्तुरेकत्वेन प्रयोज्यप्रयोजकत्वभेदायोगादसिद्धत्वेन च घटस्य प्रयोजकत्वायोगादवयवलक्षणायां च कारणाभावात्प्रयोजकव्यापाररूपभावनानुपपत्तेर्भूनाद्युपदेशे ऽपि कर्तृसंख्यादिमात्रमाख्यातेनोच्यते न भावनेत्याह * भूतादीति * अस्तेर्लभ्यमानसत्ताकत्वावस्थावाचित्वात्तस्याश्चोत्पत्तिवदतदाकारावस्थान्तरानपेक्षत्वेनावयवशब्दाभिलप्यावस्थाभेदायोगे ऽप्युत्पत्त्यनन्तरकालत्वेनोत्पत्त्यवस्थाकालभेदेन भेदावश्यम्भावापत्तिसूचनार्थं कालग्रहणम् । यथा प्रतीत्यनारूढत्वादवयवकालव्यतिरिक्तार्थान्तरकृतस्य भेदस्यानाश्रयणं तथावयवकालकृतस्यापीत्यादिशब्देन सूचितम् । भेदाभावेचैकस्यैव प्रयोज्यव्यापारता प्रयोजकव्यापारता च विरुद्धेत्यर्थः । एवं तर्हि व्यभिचारो दुर्वारः स्यादित्याशङ्क्याह * न चेति * यत्तु धातूनां भावनावाचित्वमुक्तं तदनुभाषणपूर्वकं दूषयति * यत्त्विति * धात्वश्रवणे ऽप्योदने पच्यमाने हृष्टे पक्तृव्यापाररूपभावनाप्रतीतेर्धातुश्रवणे ऽपि च मानसादपचारात्तदर्थाप्रतीतावप्रतीतेः धात्वर्थाव्यभिचारद्वारा धातूनामव्यभिचारो न स्वत इत्यर्थः । धात्वर्थाव्यभिचारे च सति तत एव प्रतीत्युपपत्तेः । सत्यपि धात्वव्यभिचारे तद्वाच्यत्वकल्पना न युक्तेत्याह * तैरेव त्विति * चशब्दार्थे ऽनुशब्दः यदि ह्याख्यातवत् स्वप्राधान्येन कृदन्तेषु भावनावगम्येत ततो धात्वर्थप्रतीतिनिरपेक्षभावनाप्रतीत्युपपत्तेर्वाच्यत्वं कल्प्येत धात्वर्थनिष्पादकत्वेन तु तद्गुणत्वप्रतीतेर्धात्वर्थप्रतीतिसापेक्षत्वान्न साक्षाद्वाच्यत्वकल्पना युक्तेत्याह * तथा हीति * देवदत्तेनेत्यादिकारकविभक्तिश्रवणे यथाकारकसिद्ध्यर्थत्वेन तद्गुणतया ऽप्यवगम्यमानाया भावनाया न कारकविभक्तिवाच्यत्वं कल्पितं तथा धात्वर्थसिद्ध्यर्थत्वेनाप्यवगम्यमानाया न धातुवाच्यत्वं कल्पनीयमिति दृष्टान्तार्थं कारकग्रहणम् । एतदेव कर्तृधिकरणसिद्धदृष्टान्तपूर्वकं विवृणोति *यथैवेति* नन्वर्थादवगम्यमानाया भावनाया अशाब्दत्वात्करोतिसामानाधिकरण्यं पदान्तरोपात्तकारकान्वयश्च न स्यादित्याशङ्क्याह * गम्यमानेति * पक्तव्यमित्यादेर्भावनानपेक्षत्वे किं कर्त्तव्यमित्यादिप्रश्नानुरूप्यायोगादुरवायामोदनस्य काष्ठैर्देवदत्तेन पाक इत्यादौ च क्रियतइत्याद्याख्यातानपेक्षत्वे पाकभावनेत्यप्युक्ते ऽन्वयाप्रतीतेः । निष्पाद्यरूपभावनावगतिसापेक्षत्वादन्वयस्य भावनायां तात्पर्यावगतेरवाच्यत्वे ऽपि भावनायास्तात्पर्यवृत्त्या शाब्दत्वाद्युक्तं सामानाधिकरण्यादीत्याशयः । गम्यमानाया अपि भावना-

यास्तद्वाचिनश्चाख्यातस्यापेक्षया तात्पर्यावगतिरिति तात्पर्यसूचनायापेक्षोक्ता गम्यमानस्यापि तात्पर्यवृत्त्या शाब्दत्वात्सामानाधिकरण्योपपत्तौ कर्तृधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्ष्यमाणत्वेन तात्पर्यवृत्त्या शाब्दीभूतयेत्यर्थः भावनया कारकाणामन्वयायोगे ऽपि धात्वर्थेनैव गम्यमानभावनान्वयापादितसाध्यभावेनान्वयो भविष्यतीति प्रौढ्या परिहारान्तरमाह * अथ वेति * धात्वर्थस्य साध्यत्वसिद्ध्यर्थभावनायास्तन्निष्पादकत्वेनोपसर्जनतोक्ता।ननु धात्वर्थस्याक्रियारूपत्वात्कथं कारकान्वयो ऽत आह * स एव हीति * क्रियाया अपि निष्पन्नायाः कारकानपेक्षत्वात् साध्यत्वप्रयुक्तकारकापेक्षावगतेरक्रियारूपस्यापि च धात्वर्थस्य क्रियान्वयेन साध्यत्वापत्तेर्युक्तः कारकान्वय इत्याशयः। नन्वाख्यातश्रवणे तर्हि कथं भावनान्वयाभ्युपगमो ऽत आह * भावनापि चेति * गुणस्येव द्रव्यपरिच्छेदं विना कारकाणां धात्वर्थनिष्पादनं विना भावनान्वयायोगाद्धात्वर्थसिद्ध्यर्थत्वेनैव भावनया ग्रहणादाख्याताश्रवणे भावनान्वयाभावे ऽपि धात्वर्थान्वयो गौररुणेत्यत्र गुणस्य द्रव्यवदविरुद्ध इत्याशयः। कारकान्वयान्यथानुपपत्त्या कृदन्तानां भावनानभिधायित्वे ऽपि सर्वेषां भावनापरतोक्ता तद्विशेषाणां तु कृत्यानां प्रैषवाचित्वान्यथानुपपत्त्यापि भावनापरतावगम्यतइत्याह * कृत्यानां त्विति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * प्रैषाणां पुंव्यापारविषयत्वे ऽपि धात्वर्थस्यैव पुंव्यापारत्वोपपत्तेः किं भावनयेत्याशङ्क्य * तस्य चेत्युक्तम् * पुंसः को व्यापार इत्यपेक्षायां भावनेति वाच्यमित्यर्थः। एवमपि प्राधान्याप्रतीतेः साध्यसाधनेतिकर्त्तव्यतांशत्रयवशीकारासामर्थ्यात्कथमंशत्रयपरिपूर्णतेत्याशङ्क्यांशत्रयात्मिकेत्युक्तम्। अंशत्रयावच्छेदं विना ऽनुष्ठेयत्वाभावादेतादृश्या एवाक्षेपात्तदूबलेनैव प्राधान्यमपि कथं चिद्भविष्यतीत्याशयः। प्रैषाणां पुंव्यापारविषयत्वोपपादनपूर्वकम् श्लोकं व्याचष्टे * न हीति * प्रैषाणां भावनाविषयत्वोपपादनस्य प्रकृतभावनातात्पर्योपयोगितामाह * ते यदीति * ननु वैदिकानां कृत्यानां पुरुषाशयविशेषप्रैषवाचित्वायोगाद्विधौ चास्मृतेरनुष्ठापकत्वाभावात् कथं भावनापेक्षेत्याशङ्क्याह * यावांश्चेति * प्राप्तविषयत्वप्रवर्त्तकत्वसमुदायात्मकप्रैषवाचिनां कृत्यानां ब्राह्मणे प्राप्तविषयत्वाभावात् समुदायासम्भवे ऽपि प्रवर्त्तनात्मकत्वे तदेकदेशे ऽपि लक्षणया प्रयोगोपपत्तेरप्राप्तविषयप्रवर्त्तनस्य च विधित्वादस्मृतमपि विधायकत्वं सेत्स्यतीत्याशयः।मन्त्रगतेषु कृत्येषु प्राप्तविषयत्वोपपत्तेर्ब्राह्मण- ३५१।१

ग्रहणम् ।ननु प्रणतं नीचं प्रत्येषणं स्वाभिमतसाधने प्रवर्त्तनार्थं गमकं प्रैषणमधिकं वोच्चं प्रत्येषणं अध्येषणम् गत्यर्थेभ्यतिधात्वनुसारात्प्रसिद्धं तयोश्च मदभिमतसाधनमनेनानुष्ठेयमित्येवं विधोच्चनीचपुरुषाशयविशेषात्मकत्वेनापौरुषेये वेदे क्व चिदप्ययोगात् ब्राह्मणविशेषणं व्यर्थमित्याशङ्क्याह * अयमेव चेति * अग्नीदग्नीन्विहरेत्यादिमन्त्रेष्वध्येतृणां प्रैषसमाख्यानात् भृत्यादिवच्चाग्नीधो ऽप्यग्नीत्कर्त्तृकपदार्थानुष्ठानार्थं वृतत्वेन पदार्थानुष्ठाने प्रणतत्वात्तं प्रति प्रवर्त्तनार्थगमनोपलक्षितस्य प्रवर्त्तनस्य प्रैषशब्दवाच्यत्वोपपत्तेर्नाव्यापकं पुरुषाशयत्वं प्रैषलक्षणान्तःपातीतिभावः । प्रेषणं प्रवर्त्तनं भावनायाः प्रत्ययार्थत्वमुपपादितमुपसंहरति: * तस्मादिति * ननु भावनाया धात्वर्थाद्भेदे सत्युक्तेन न्यायेनास्तु प्रत्ययवाच्यत्वं न त्वसौ धात्वर्थाद्भिन्नास्तीति शङ्कते * ननु चेति * अयमाशयः प्रयोजकव्यापारत्वविशेषणेन प्रयोज्यव्यापाररूपाद्विक्लेदनादिधात्वर्थाद्भेदे सत्यप्यधिश्रयणादेः प्रयोजकव्यापाररूपाद्भेदो नोपलभ्यते स्थाल्यधिश्रयणोदकासेचनतण्डुलावापादिप्रयोजकव्यापारसमूहो हि विक्लेदनफलावधिः पचिनोच्यते कः पच्यर्थो येयं तण्डुलानां विक्लित्तिरिति तु महाभाष्यकारीयं विक्लित्त्यर्थत्वाभिधानं फलाभिप्रायं विक्लेदनाख्यप्रयोज्यव्यापारवाचित्वे देवदत्तः पचतीति सामानाधिकरण्यायोगापत्तेर्येनापि देवतोद्देशपूर्वकं द्रव्यत्यागाख्यसङ्कल्पः प्रयोजकव्यापार एवोच्यते अतो धात्वर्थादभिन्नत्वान्न प्रत्ययार्थो भावनेति ।पचौ प्रतीयमानान्यधिश्रयणादीनि यजौ च प्रतीयमानः सङ्कल्पः प्रयोजकव्यापार इति कृत्वैवमादीनां भावनात्वमित्यर्थः । ननु स्थाल्यादीनां चुल्ल्यादिसंयोगस्याधिश्रयणादिशब्दवाच्यस्याव्यापारत्वान्न भावनात्वापत्तिरित्याशङ्क्य * अत एव चेत्युक्तम् * अधिश्रयणादीनां पचिवाच्यस्य पचावधिश्रयणादीनीत्यनेनैव सिद्धत्वात् प्रयोजकव्यापारत्वावधारणायैवकारः प्रयोजकव्यापाररूपा एवाधिश्रयणादयः पच्यादिधात्वर्था न संयोगरूपा इत्यर्थः * अयमाशयः * संयोगमात्रं वा ऽधिश्रयणशब्दवाच्यं स्यात् स्थालीचुल्लीसंयोगो वा । तत्राद्ये कल्पे सर्वधातूनां पर्यायत्वम् । द्वितीये स्थालीचुल्ल्योरप्यभिधानापत्तेर्गौरवं दोषः। संयोगवाचित्वे चाधिश्रयतेरुदासीने ऽपि पक्तरि संयोगसद्भावो ऽधिश्रयणं वर्त्ततइति प्रत्ययापत्तिः । क्रियमाणसंयोगवाचित्वे वा प्रत्ययवाच्यायाः प्रक्रियायाः प्रागप्रतीतेर्विशेषणत्वायोगाद्धातुनैव क्रियाविशिष्टसंयोगाभिधानापत्तेर्दुर्वारं प्रयोजकक्रियाधातुवाच्यत्वम् अनेनैव न्यायेन गम्यादेः सं-

योगविभागावाचित्वं निरसनीयम्। संयोगविभागविशेषलाभाय च संयोगिनोर्विभागिनोश्चाभिधानापत्तेरतिगौरवं यज्यादेश्च संयोग-विभागावाचित्वायोगात् संयोगविभागात्मकधात्वर्थवचनमव्यापकं स्यात्तत्वावियोगात्मकस्वस्वामिविभागयज्यर्थाभ्युपगमे ऽपि जाना-त्यादौ कथं चित्संयोगविभागानिरूपणादव्याप्त्यपरिहारः भवति करोत्योः शक्तिभेदात्तु विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोज-कव्यापारवचनत्वामिति वार्त्तिकाद्वचापारस्यैव धात्वर्थतावसीयते धातुमात्रनिर्देशाच्च न प्रत्ययविषयतयातद्वार्त्तिकं व्याख्यातुं शक्यम् प्रत्ययस्य च एयन्तत्वाभावात्प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः ण्यन्ता एवेति न युज्येत संयोगविभागात्मकत्वे च धात्वर्थस्याव्यापार-रूपत्वाद् गोदोहनादिभिराश्रयत्वेन ग्रहणं न युज्यते धात्वर्थावच्छि-न्नाया भावनाया एवाश्रयत्वाभ्युपगमे गुणफलसम्बन्धविधौ वा-क्यभेदभयेन प्रकृताश्रयापेक्षणाद्भावनाभेदमुपपत्तेर्गुणकामेष्वाश्रयैः सह सामानासामानविध्यविचारः संख्याधिकरणे करिष्यमाणो न युज्यते व्यापाररूपत्वे ऽपि करोत्यर्थक्रियारूपत्वाभावाक्रियारूपायां भावनायां कारकत्वाविरोधः।

व्यापाररूपधात्वर्थादतो भेदमपश्यताम् ॥
संयोगरूपधात्वर्थवर्णनं भेदतृष्णया ॥ १ ॥
व्यापाररूपधात्वर्थात् सान्या स्पन्दात्मिका हि किम् ॥
प्रयत्नात्मा द्विरूपा वा सर्वथापि न युज्यते ॥ २ ॥
प्रयत्नो भावना चेत् स्यान्न रथो गच्छतीति हि ॥
प्रयोगः स्यात्प्रयत्नो हि चेतनेष्वेव सम्भवेत् ॥ ३ ॥
स्पन्दस्य भावनात्वे तु यजेतेति न चेतने ॥
द्विःसाधारणरूपत्वे शब्दो वक्तीत्यसम्भवः ॥ ४ ॥
न शब्दे स्पन्दयत्नौ हि विभुत्वाच्चेतनत्वतः ॥
एवं चैं सतिधात्वर्थसामान्यं भावना पतेत् ॥ ५ ॥
अथानयोर्हेतुभूतमन्यत्तन्नोपलभ्यते ॥
अभूतोत्पादनं चान्यद्धात्वर्थान्नैव दृश्यते ॥ ६ ॥
अन्योत्पादानुकूलत्वे भावनैकं च तद्यदा ॥
तदा न भावनाभेदो भवेद्धात्वर्थभेदतः ॥ ७ ॥
प्रतिधात्वर्थमन्यत्वं न च तस्यावधार्यते ॥
धात्वर्थभेदमात्रेण फलभेदप्रसिद्धितः ॥ ८ ॥
अथ धर्मेण येन स्याद्धात्वर्थः फलसाधनम् ॥
स धर्मो भावनान्यश्च प्रतिधात्वर्थमिष्यते ॥ ९ ॥

तस्य धात्वर्थधर्मत्वे पुरुषधर्मत्वं विरुध्यते ॥
पुरुषधर्मस्तु प्रयत्नः स्यात् स च पूर्वं निराकृतः ॥ १० ॥
किं च धात्वर्थनिर्वृत्तिपर्यन्तत्वात् सभावना ॥
कथं धात्वर्थसाध्या हि सेष्यतेफलसाधनम् ॥ ११ ॥
अथ धात्वर्थजन्यो ऽपि शक्त्यात्मा पुरुषाश्रितः ॥
प्रतिधात्वर्थमन्यो ऽसौ नापूर्वादतिरिच्यते ॥ १२ ॥
तस्याव्यापाररूपत्वाद्भावनात्वं न चेष्यते ॥
व्यापारत्वे ऽपि करणव्यापारत्वान्न भावना ॥ १३ ॥
तत्कर्तृव्यापृतिः सा हि प्रत्ययार्थश्च नत्वदः ॥

अतो धात्वर्थातिरिक्तभावनानुपपत्तेः प्रत्ययार्थता न युक्तेति तात्पर्यार्थः । परिहरति * नैष इति * व्यापारत्वाविशेषाद्धात्वर्थभावनयोर्भेदानवभासे ऽपि पाकं करोति यागं करोतीति भिन्नेषु धात्वर्थेषु करोत्यर्थानुवृत्तेर्धात्वर्थाद्भेदो ऽध्यवसीयतइत्यर्थः । श्लोकं व्याचष्टे * सर्वत्र हीति * सर्वधात्वर्थसाधारणस्य व्यापाररूपस्य करोत्यर्थस्याख्यातपदांशप्रत्ययवेलायां प्रतीतिसूचनायांशशब्दः विक्लेदनोद्देशेन क्रियमाणस्याधिश्रयणादेः पचिवाच्यत्वं वक्तुं विक्लित्तिग्रहणे समासस्थायाः षष्ठ्याः सम्बन्धमात्रोत्पन्नाया अपि तादर्थ्यलक्षणसम्बन्धविशेषनिष्ठत्वाद्विक्लित्त्यर्था अधिश्रयणादय इति समासार्थः । आदिशब्दोपात्तस्य वा विक्लिदेर्विक्लित्तिर्वाच्या धात्वर्थानां नियतकर्तृस्थभावनातो वैलक्षण्यं वक्तुं केषां चित्कर्मस्थत्वप्रदर्शनायोक्ता को ऽसावधिश्रयणादिकर्तृस्थव्यापारातिरिक्तसामान्यरूपो व्यापार इत्यपेक्षायामाह * तत्रेति * औदासीन्यमकुर्वत् रूपत्वावस्था ततः प्रच्युतिः कुर्वद्रूपत्वं करोतिप्रत्ययवेद्यमन्योत्पादानुकूलत्वं तेन रूपेण यन्निरूप्यते सा भावना इत्यर्थः । संयोगविभागादिहेतोः स्पन्दादेर्धात्वर्थाद्वैलक्षण्यप्रदर्शनार्थो मात्रशब्दः अकर्मकधातुवाच्यध्वननादिधात्वर्थानन्तरं नियमेनान्योत्पादादर्शनात्सकर्मकधातुवाच्येभ्यश्च गमनादिभ्यो ऽनन्तरमेव संयोगविभागाद्युत्पत्तेरुत्पाद्यानाकाङ्क्षणाद्भाव्याकाङ्क्षालक्षणभाव्यनिष्ठत्वापरपर्यायान्योत्पादानुकूलत्वरहिताद्धात्वर्थादकुर्वद्रूपत्वलक्षणौदासीन्यप्रच्युत्यात्मकत्वेनान्योत्पादनरूपत्वादनन्तरं च फलानुत्पत्तेर्भाव्यनिष्ठत्वापरपर्यायान्योत्पादाकाङ्क्षालक्षणान्योत्पादानुकूलत्वात् भावनाया वैलक्षण्यमित्याशयः । ततश्च यथा प्रयोज्यापरपर्यायकर्मस्थस्य विक्लेदनादेर्व्यापारत्वे सत्यपि प्रयोजकापरपर्यायकर्तृव्यापारत्वाभावात् न भावनात्वं तथाधिश्रयणादेः प्रयोजकव्यापारत्वे सत्यपि

भाव्यनिष्ठत्वाभावान्न भावनात्वमित्याशङ्कापरिहारः सूचितो भवति नन्वधिश्रयणादेः परिस्पन्दात्मकात्प्रयोजकव्यापारादन्यो भाव्यनिष्ठः प्रयोजकव्यापारश्चेदस्ति किमिति तद्व्यतिरेकेण नोपलभ्यतइत्याशङ्क्य *परिस्पन्दरूपमित्युक्तम्* भावनाया धात्वर्थेन विषयभूतेन ज्ञानस्येव ज्ञेयेन निरूपिताया अवच्छिन्नायाः कार्यभूतेन वा धात्वर्थेन करणतया निरूपिताया: कल्पिताया: निरूप्यत्वाद्धात्वर्थं विनानुपलब्धियुक्तेति भावः। भावनावच्छेदकधात्वर्थमात्रोपलक्षणार्थः परिस्पन्दशब्दः रूपशब्दस्य करणव्युत्पत्तौ परिस्पन्दो रूपमस्येति विग्रहः। कर्मव्युत्पत्तौ वा परिस्पन्देन निरूप्यमाणमिति विग्रहः। स्वशरीरस्य स्पन्दस्य ह्यात्मप्रयत्नहेतुकत्वव्याप्तेः। परशरीरे स्पन्ददर्शनात्प्रयत्नो ऽनुमीयते स्वप्रयत्नश्च मानसप्रत्यक्षवेद्यो ऽपि गमने ऽहम्प्रयते पाके ऽहम्प्रयते इति गमनादिना स्पन्देन यागे ऽहम्प्रयते ध्याने ऽहम्प्रयतइति वा चलनात्मकेन यागादिना धात्वर्थेनावच्छिन्न एव च भाव्यनिष्ठप्रयोजकव्यापारत्वात्मकभावनालक्षणयोगादर्थिपुरुषव्यापारत्वाच्चार्थयतइति कर्तृव्युत्पत्तिद्वारा ऽर्थयितृपुरुषव्यापारवाच्यर्थभावनाशब्दव्याच्यः सर्वेषु लङाद्याख्यातेषु गम्यते। यत्त्वस्मिन्पक्षे रथो गच्छतीत्यचेतने नाख्यातं प्रयुज्यते इत्युक्तं। तत्रैवं वाच्यं किमाख्यातप्रयोगान्यथानुपपत्त्या रथादौ भावना कल्प्यते। प्रतीतिबलाद्वाभ्युपगम्यते न तावत् स्पन्दातिरिक्ता भावना प्रत्यक्षेण प्रतीयते नापि कादाचित्कत्वं स्पन्दाख्यकार्यदर्शनात्कल्प्यते इति रथवोढृश्वादिप्रयत्नात् स्पन्दमानाश्वादिशरीरसंयोगात्तदभावे ऽपि वा पतनप्रतिबन्धकाधारसंयोगाभावसहकृताद् गुरुत्वाद्रथस्पन्दोपपत्तेः वायुसंयोगादिसद्भावभावितया च दृष्टस्य पर्णादिपतनस्य न कारणत्वकल्पना युक्ता वायोस्तु स्वाभाविकस्पन्दो न शक्नोत्येव स्वकारणत्वेन व्यापारान्तरं कल्पयितुं स्पन्दस्य च वायुरथादेः स्पन्दनं चलनं गमनं वर्त्ततइति आख्याताश्रवणे ऽपि धातुमात्रात्प्रतीतेराख्यातार्थत्वं भाव्यनिष्ठत्वाभावाच्च भावनात्वं नाभ्युपगन्तुं युक्तं स्पन्दतिचलत्योश्चाकर्मकत्वात्तद्वाच्यस्य स्पन्दस्य भाव्यनिष्ठत्वमनाशङ्क्यमेव ततश्च वायुरथादौ स्पन्दस्य भावनात्वायोगात्तदतिरिक्तव्यापारानुपलब्धेश्च प्रयत्नात्मकभावनानभ्युपगमे आख्यातस्य भावनाव्यभिचारो दुष्परिहरः स्पन्दस्य भावनात्वाभ्युपगमे ऽपि स्पन्दत्यादिधातुनैव तदभिधानसिद्धेस्तत्परस्याख्यातस्य व्यभिचारस्तदवस्थ एव स्पन्दत्यादिपराख्यातवच्च पचत्यादिपराख्यातस्यापि स्पन्दवाचित्वं न युक्तं न हि पचतीत्यस्य पाके स्पन्दतइत्यर्थे के

चिह्नयाचक्षते तथा यज्याद्यर्थश्चातो ऽवगम्यते भावयेदिति चेत्युक्ते कीदृशी पुनराख्याताद्भावनावगम्यते इत्यपेक्षायां तथा यतेत यथा किं चिद्भवतीति प्रयत्नवाचिताख्यातस्य भाष्यकृता विवृता दर्शेन्द्रियकामाधिकरणे च जुहुयादिति शब्दस्यैतत्सामर्थ्यं यद्धोमविशिष्टं प्रयत्नमाहेत्यभिधानात् जुहुयादित्यस्य होमे यतेतेत्यर्थः सूचितो भवति । प्रयत्नस्य चेच्छायोनित्वान्निष्फले चेच्छायोगाद्भाव्यनिष्ठत्वावगतेर्धात्वर्थनिष्पत्तिमात्रेण च फलवत्त्वासिद्धेस्तन्निष्पत्तिमात्रेण पर्यवसानायोगेन धात्वर्थकरणकस्य प्रयत्नस्य फलसाधनत्वाविघातात्प्रयत्नस्य भावनात्वे न कश्चिद्दोषः । प्रयत्नाभावे च वातरोगादिना देवदत्ते स्पन्दमाने नायं स्पन्दं करोति किं तु वातादिवशादस्य स्पन्दो भवतीति व्यवहारदर्शनात्प्रयत्न एव करोत्यर्थो ऽवगम्यते रथादावपि न रथः स्वयं गमनं करोति किं त्वश्वादिनास्य गमनं क्रियते इति व्यवहारदर्शनाद्धातुवाच्यस्पन्दातिरिक्तकरोत्यर्थभावनाप्रतीत्यभावः सिद्धः । आख्यातप्रयोगान्यथानुपपत्त्या तु रथादौ भावनाकल्पने रथो भवतीत्यत्रापि सर्वदा भावनाकल्पनापत्तेः भूतादिकथने ऽप्यवयवादिकृतभेदानाश्रयणे धात्वर्थमात्रं कर्तृसंख्यादयश्चाख्यातपदार्थत्वेनावधार्यन्ते न भावना न च भावनाव्यभिचारेण दोष इति वार्त्तिकं विरुध्यते अवयवादिकृतभेदविवक्षायामस्त्यादौ भावनाभ्युपगमः पूर्वोत्तरवार्त्तिकपर्यालोचनया प्रौढिमात्रेणेत्युक्तम् अथ वा सो ऽपि प्रयत्नाभिप्रायेण व्याख्यातुं शक्यते नित्यस्यात्मनः शरीरशरीरिणोरभेदविवक्षया शरीरानिष्पत्तावनिष्पत्तिव्यपदेशोपपत्तेः पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुरित्यादिस्मृतिपर्यालोचनया चात्मनः शरीरोत्पादनप्रयत्नावगमात् सिद्धभवनशरीरावयवाधिष्ठानेनात्मनासिद्धभवनान् शरीरावयवान्प्रति प्रयोजकस्य प्रयत्नात्मिका भावना न विरुध्यते । एवं च सिद्धकर्तृक्रियावाचिनीत्यपि चेतनाभिप्रायं व्याख्यातुं शक्यम् । यद्वा अर्थभावनायाश्चेतनमात्राश्रयत्वे ऽपि शब्दभावनायाश्चेतनाश्रयत्वायोगादुभयव्याप्तयर्थं सिद्धमात्रग्रहणं नित्यस्यापि शब्दस्याभिव्यक्तिः सिद्धिरभिप्रेता भाव्यनिष्ठप्रयोजकव्यापारत्वलक्षणयोगाच्च शब्दव्यापारस्याप्यविरुद्धं भावनात्वं । यथैव हि इच्छायोनित्वात्प्रयत्नस्येष्यमाणाभाव्यं विनात्मलाभायोगाद्भाव्यनिष्ठत्वं तथा लिङादिव्यापारस्यापि प्रेरणाख्यस्य प्रवृत्त्याख्यभाव्यकलपत्वेन तन्निष्ठतावर्सायते । न च यथा स्पन्दानन्तरमेव संयोगविभागोत्पत्तेराकङ्क्षातः प्रागेवाकाङ्क्षणीयलाभे लब्धव्यालाभनिमित्ताकाङ्क्षानुपपत्तेरन्यथा च कदाचिन्नैराकाङ्क्ष्यानु-

पपत्तिप्रसङ्गात् स्पन्दस्य भाव्याकाङ्क्षालक्षणं भाव्यनिष्ठत्वं नास्ति तथा प्रेषणाया भाव्यनिष्ठत्वाभावः पुरुषप्रवृत्तेः साध्यसाधनेतिकर्त्तव्यतापर्यालोचना सापेक्षत्वेन प्रेरणानन्तरमनुत्पत्तेः अनेनैव न्यायेन सर्वशब्दगतस्याभिधानलक्षणस्यापि व्यापारस्यार्थप्रतिपत्त्याख्य भाव्यकल्पितस्य भावनात्वमनुसन्धेयं तस्या अनभिहिताया एव कार्योपयोगित्वाल्लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते इत्यादौ भावनाद्वयोपन्यासाविरोधः ॥

स्पन्दप्रयत्नयोरेव भावनात्वमिति भ्रमम् ।
अपनेतुं प्रसक्तानुप्रसक्तत्वेतदुदीरितम् ॥
प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते ।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते ॥ २ ॥
स्त्रीत्वाभावे ऽपि खट्वादौ टाबादिप्रत्ययो यथा ।
प्रयुज्यते तथाख्यातं यत्नाभावे ऽप्यचेतने ॥
स्त्रीत्वादेः प्रत्ययार्थत्वं चतुर्थे वक्ष्यते स्फुटम् ।
तथा च लिङ्गमित्यत्र प्रयत्नस्य तथा भवेत् ॥
धातोरनुग्रहार्थं वा वाच्यन्तरधियेथ वा ।
प्रत्ययो ऽवश्यवक्तव्यस्तावता न त्ववाच्यता ॥
वोढ्रश्वादिगतं यत्नं रथादावुपचर्य वा ।
उपपाद्यः प्रयोगो ऽत्र मुख्यार्थानुपपत्तितः ॥
तिङ्वाच्यो हि करोत्यर्थः सामानाधिकरण्यतः ।
प्रयत्नश्च करोत्यर्थस्तदन्यानुपलम्भनात् ॥
न चौलूक्यैः प्रयत्नस्य गुणत्वपरिभाषणात् ।
अकरोत्यर्थता शङ्क्या सिद्धरूपा प्रतीतितः ॥
बुद्धीच्छाद्वेषयत्नानां शब्दज्ञैः कर्मतेष्यते ।
इत्याचार्यैश्च यत्नस्य व्यापारत्वाभिधानतः ॥
चेतनप्रेरकत्वं च विधेस्तद्विषयत्वतः ।
काष्ठाद्यप्यन्यथाकस्मान्न प्रेरयति वायुवत् ॥
विध्यर्थाज्ञानतो प्रेर्ये चेत्काष्ठादि ततः कथम् ।
सौधन्वननिषादादेरप्रेर्यस्याधिकारिताम् ॥
विधिस्त्वाप्रेरयत्यत्रेत्यप्रेर्यो ज्ञाप्यते कथम् ।
विद्वद्भिर्ज्ञापनादेव प्रेर्यत्वे ऽन्योन्यसंश्रयम् ॥
धात्वर्थव्यतिरिक्तात्तः प्रयत्नाख्यार्थभावना ।
यजत्यादिपराख्यातवाच्यतेत्यसमञ्जसम् ॥

ननु धात्वर्थभावनयोर्द्वयोर्व्यापाररूपत्वे समत्वेनान्योन्य-

समन्वयो न स्यादित्याशङ्क्याह * ये त्विति * व्यापारत्वसाम्ये ऽपि भावनाया एव भाव्यनिष्ठत्वेन करोत्यर्थरूपक्रियात्वाद्धात्वर्थस्य च भाव्यनिष्ठत्वाभावेन क्रियारूपत्वाद्यथायोग्यं सन्निकर्षविप्रकर्षापेक्षया करणत्वेनेतिकर्त्तव्यतात्वेन वा भावनान्वयः सम्भवतीत्याशयः । यथा कर्मगतस्य विक्लेदनादेः प्रयोज्यव्यापारस्य विक्लिद्यतस्तण्डुलान् पचतीत्यादिप्रयोगदर्शनात् व्यापारत्वसाम्ये ऽपि भावनान्वयो न विरुध्यते तथा कर्तृगतस्य पाकादेः प्रयोजकव्यापारत्वसाम्ये ऽपीत्यर्थः । एवं च तर्हि यस्य कस्य चिद्धात्वर्थस्य यया कया चिद्भावनयान्वयः कस्मान्न स्यादित्याशङ्कानिरासायानुरञ्जकत्वविशेषणम् । ननु धात्वर्थविशेषाणां भावनानुरञ्जकत्वाभ्युपगमे गौः शाबलेय इतिवत् सामान्यविशेषात्मकैकवस्तुत्वापत्तेः क्रियाकरणविभागो न स्यात् इत्याशङ्क्ते * एवं तर्हीति * भावनायाः प्रयत्नात्मकत्वात् धात्वर्थस्य च स्पन्दात्मकत्वादेकवस्त्वात्मकत्वाभावे ऽपि भावनाया भाव्यनिष्ठत्वाद्धात्वर्थे च विना भाव्यासिद्धेः स्वरूपेण धात्वर्थसाधनत्वे ऽपि भाव्यावच्छिन्नरूपेण धात्वर्थविशेषसाध्यत्वात् सामान्यरूपतोपपन्नेति परिहरति *सत्यमिति * एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * अयमाशयः द्वैधीभावाद्युद्देशप्रवृत्तोद्यमनादिकर्तृव्यापारव्याप्यस्य परश्वादेः करणत्वदर्शनात् भाव्योद्देशप्रवृत्तभावनाव्याप्यत्वेनाख्याते धात्वर्थः करणतयावसीयते णिजन्ताद्धि भवतेरचो यदिति कर्मणि कृत्प्रत्यये कृते भाव्यशब्दव्युत्पत्तेरीप्सिततमस्य च कर्मत्वाद्भावयितुमिष्टतमं यदुद्दिश्य भावना प्रवर्त्तते तद्भाव्यं ततश्च यथा गामानयायं दण्ड इत्युक्ते तृतीयां विनापि दण्डस्यान्यथान्वयायोगात्करणत्वं प्रतीयते तथा किञ्चिदीप्सितं भाव्यं भावयतीत्युक्ते भाव्यान्तरोद्देशेन प्रवृत्तया भावनया धात्वर्थस्य भाव्यत्वेनान्वययोगात्करणत्वं प्रतीयते तस्माद्यागादौ साध्यात्मकभावनासामान्यविरुद्धकरणात्मकधात्वर्थसामान्यसद्भावात् भावनासामान्यं न समवेतमिति करणत्वस्य भावनासामान्यविरोधप्रदर्शनायोत्तरार्द्धम् । ननु निर्विशेषभावनासामान्ययोगाद् बलाद्धात्वर्थेषु विशेषेषु समवायापत्तिरित्याशङ्क्याह * भावनाया हीति * ज्ञेयैक्ये ऽपि ज्ञानस्येव धात्वर्थैक्ये ऽपीषत्प्रयते ऽहमतिशयेन प्रयते ऽहमिति सातिशयानतिशयादिभेदेन प्रयत्नरूपभावनाभेदावगतेरनौपाधिकभेदद्योतनायैवकारः भावना चेन्न धात्वर्थसामान्यं किं तदित्यपेक्षायामाह * तथेति * यथा यद्भावनासामान्यं तद्धात्वर्थेन समवैति तथा यद्धात्वर्थसमवेतं तद्भावनासा-

मान्यं न भवतीति सूचनार्थस्तथाशब्दः कथं यागादेर्भावनाकरणतेत्याशङ्क्य भावनायाः केनेति करणांशेनापेक्षाहेतुत्वेनोक्ता धात्वर्थभावनयोर्भेदस्य सूत्रकृत्सूचितत्वं द्योतयितुं यद्भावार्थाः कर्मशब्दा इत्यनेन कर्मशब्देनाभिधीयतइत्युक्तम। नन्वेवं सति कृञ्वस्तयः क्रियासान्यवचनाः क्रियाविशेषवचनाः पचत्यादय इत्यादियागादिधात्वर्थानां क्रियाख्यभावनाविशेषस्मरणं न युज्यते इत्याशङ्क्याह * विशेषणेति * भुवो णिजन्तस्य क्रियासामान्यवचनताभिप्रेता ३५२।१
अस्तेरप्यर्द्धधातुके र्णौच कृते ऽस्तेर्भूरिति भ्वादेशस्मृतेर्भावनाख्यक्रियासामान्यवाचित्वोपपत्तिः। ननु क्रियाशब्दो यथा तद्भूतानां क्रियार्थेन सामाम्नायः। आम्नायस्य क्रियार्थत्वात्तेभ्यः क्रिया प्रतीयते क्रियायां पुरुषश्रुतिः। प्रतिषेधेषु कर्मत्वात् क्रिया स्यात् क्रिया स्याद्धर्ममात्राणामित्यत्र भावनायां प्रयुज्यते तथा आकृतिस्तु क्रियार्थत्वात् क्रियाणामाश्रितत्वात्क्रियाया ह्यस्तिसम्बन्धः क्रियातो व्यपदिश्येरन् तस्य क्रियाग्रहणार्थोक्तं क्रियाभिधानमित्यत्र धात्वर्थे ऽपि तथा तुल्यत्वाक्रियायोर्ने क्रियार्थानां संस्कारे तु क्रियान्तरमित्यत्रोभयोः कर्मशब्दश्च यथा फलस्य कर्मनिष्पत्तेः भावार्थाः कर्मशब्दास्तद्भेदात्कर्मणो ऽभ्यासः संख्यायाः कर्मभेदः स्यात् फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् समेषु कर्मयुक्तं स्यात्संस्कारश्चाप्रकरणे कर्मशब्दत्वात्कर्मणः श्रुतिमूलत्वात् एतेषां कर्मसम्बन्धात्केवले कर्मशेषः स्यात्कर्माण्यपि जैमिनिः कर्तृगुणेषु कर्मसमवायात् अचोदितं कर्म भेदात् कर्मणो चोदितत्वात् कर्मणो व्यवस्था स्यात् द्रव्याणां कर्मसंयोगे कर्मतो ह्यभिसम्बन्धः तस्मात्कर्मापदेशः स्यात्। अपि तु कर्मशब्दः स्यात्॥ कर्मणः पृथुशब्दः स्याद्धविर्भेदात्कर्मणो ऽभ्यास इत्यत्र धात्वर्थेषु प्रयुज्यते तथा कर्मैके तत्र दर्शनादित्यत्र तच्छब्दपरामृष्टः कर्मविषयः कर्मशब्दः कर्मणः सम्बन्धात् शब्दान्तरे कर्मभेदस्तदुत्सर्गे कर्माणीत्यत्र भावनायामपि एकस्यैवमित्यत्र चैवं शब्देनानुकृष्टः कर्मशब्दः फलं वा कर्मसन्निधावविभागात्तु कर्मणः कर्मधर्मः प्रकरणादित्यत्र चोभयोस्तेनैव व्यतिकरदर्शनाद्धात्वर्थभावनयोरभेदो ऽध्यवसीयते इत्याशङ्क्याह * शास्त्रेति * भावनावाचिनः क्रियाशब्दस्य धात्वर्थवाचिनश्च कर्मशब्दस्य लक्षणयेतरत्र प्रयोगोपपत्तिरित्याशयः। भावनाधात्वर्थस्वरूपवाचिनामपदाभाद्याच्च लाक्षणिको ऽपि प्रयोगो न दोषायेति न स्वरूपाभिधानेनेत्यनेन सूचितम्। एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * भावनाशब्दो हीति * एकस्मिन् क्षणे भावनायाः समस्तो-

पसंहृतरूपाप्रतीतेः । कथं निष्पन्नरूपतेत्याशङ्क्य यदेकत्रोपसंहृतत्वं रूपत्वे ऽपि नामपदसामर्थ्यात् सत्त्वस्य द्रव्यस्य यदेकत्रोपसंहृतत्वं रूपं तदापन्नामारोपितसिद्धरूपामित्युक्तं कथं नामपदसामर्थ्याद् द्रव्यरूपत्वारोप इत्याशङ्क्य नामपदोक्तो लिङ्गादियोगः कारणत्वेनोक्तः द्रव्यधर्मलिङ्गादियोगात् भास्वरत्वादिनेव शुक्तौ रजतत्वारोपो युक्त इत्याशयः । न केवलं नामपदेनाख्यातसदृशी भावना नोच्यते किं तु करोत्यादिधातुनापी त्याह * तथेति * अनन्यशब्दवाच्यत्वोपपादनस्यासाधारण्येनाख्यातस्य भावनार्थत्वसिद्धिप्रयोजनत्वं सूचयितुम् उपसंहरति * इतीति* नन्वाख्यातप्रत्ययस्य भावनार्थत्वे ऽपि स्वर्गस्य द्वितीयाभावेन भाव्यत्वाप्रतीतेः स्वर्गकामपदरूपसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भाष्यमयुक्तमित्याशङ्क्य स्वर्गस्य भाव्यांशनिवेशमुपपादयितुमुपक्रमते * सा त्विति * साध्यत्वान्वयात् प्रागंशान्तरान्वये भावनास्वरूपस्य सङ्कल्पाख्येच्छाविशेषसाध्यत्वेन यागादेस्तत्साधनत्वायोगात्तत्सिद्ध्यर्थं साध्यनिष्ठत्वाभावे भावनात्वस्यैव बाधापत्तेः साध्यांशस्य प्राधान्यात् साधनेतिकर्त्तव्यतांशवच्चापेक्षान्तराधीनत्वाभावात्प्राथम्यमुक्तम् । नन्वेकप्रत्ययोपादानात् भावनामात्रस्य विधेयत्वावगतेः साध्याद्यन्वयः प्रतीतो ऽपि विध्यसंस्पर्शादविवक्षितः स्यादित्याशङ्क्याह * तत्रेति * उपसर्गो धोः किरिति विपूर्वस्य दधातेः किप्रत्यये कृते विधिशब्दव्युत्पत्तेः कृदन्तत्वाद्भावप्रत्ययेन विधिसम्बन्धाभिधानम् । नन्वेवमप्येकपदोपादानेन प्रत्यासत्तेर्धात्वर्थस्यैव भाव्यत्वं कस्मान्न भवतीत्याशङ्क्याह * विधित्वेति * कमियोगादपि स्वर्गस्य साध्यत्वावगतिर्न च पुरुषार्थ इत्यनेनोक्ता ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥

इति श्लोको ऽपि चाम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानाम् ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते ऽर्थतो ह्यसमर्थानामानन्तर्ये ऽप्यसम्बन्धः तस्माच्छ्रुत्येकदेशः स इति विश्वजिदधिकरणसिद्धान्तसूत्रगतस्यार्थानां ह्यर्थवत्त्वेनेत्याद्यवयवस्य योग्यतानुरोधेन व्यवहितान्वयप्रतिपादनपरतया व्याख्यानात्तत्रैव पूर्वाचार्यैर्वक्ष्यतइत्यौचित्यालोचनया प्रतिभाति पदश्रुत्या धात्वर्थस्य साध्यत्वावगमे ऽप्येकाभिधानश्रुत्या पुरुषार्थसाध्यत्वावगमाद् बाध इति सकलस्य तात्पर्यं, यद्वा विरोध एव नास्तीत्याह * किं चेति * श्लोकं व्याचष्टे * सम्ब-
३३५।४ न्धेति * एवं भावनाया भाव्यापेक्षायां धात्वर्थस्य भाव्यत्वसम्भवे

ऽपि विध्यन्वयबलात् पुरुषार्थस्य भाव्यतोक्ता अधुना इच्छायोनित्वेन भावनायाः समीहितभाव्यनिष्ठत्वावधारणात् भावनास्वरूपालोचनयैव पुरुषार्थस्य भाव्यतामाह * किं चेति * श्लोकं व्याचष्टे * यत्र हीति * ननु भावनास्वरूपालोचनयैव समीहितसाध्यत्वावगमे स्वर्गकामादिपदं व्यर्थं स्यादित्याशङ्क्याह * तत्रेति * नन्वेवमपि स्वर्गादिपुरुषार्थविशेषलाभस्य शास्त्राधीनत्वात् सर्वथा साध्यांशनिवेशस्य विधिविषयत्वनिरासो न युक्त इत्याशङ्क्याह * तदपि चेति * साध्यशब्दस्य इष्टतमत्वलक्षणकर्मवाचिकृत्यप्रत्ययान्तत्वेन साधयितुमिष्टमित्येवमर्थत्वात् स्वर्गादेश्चेष्टतमत्वस्य त्वसम्वेद्यत्वेन शास्त्रानधीनत्वान्न साध्यत्वेन विशेषः शास्त्रादपेक्ष्यते अपि तु स्वर्गादीनां साध्यानां मध्ये ऽस्या भावनायाः को विषय इत्येवं विधेयभावनाविषयत्वेनेत्यर्थः। साध्यांशस्य विधेयत्वनिरासप्रयोजनमुपसंहरति *ततश्चेति*एवकारो धात्वर्थनिवृत्त्यर्थः अश्रुतपदत्वादिनिवृत्त्यर्थः कृतास्पदशब्दः कृतं कमिपदेनास्पदं साध्यांशनिवेशार्हत्वरूपं यस्येत्यर्थः। ननु स्वर्गादेः साध्यस्याशास्त्रीयत्वेन सन्निकर्षविप्रकर्षानपेक्षत्वे ऽपि भावनाविशेषान्वयस्य शास्त्रीयत्वेन तदपेक्षत्वात्सन्निकृष्टेन धात्वर्थस्य भावनान्वयेन बाधः स्यादित्याशङ्क्याह * धात्वर्थेति * धात्वर्थस्यायोग्यत्वेन साध्यांशनिवेशितयानपेक्षितत्वान्नान्वयः सम्भवतीत्याशयः। न केवलमनपेक्षितत्वाद्धात्वर्थस्य साध्यांशेन नान्वयः किं तु विधिश्रुतिबाधापत्तेरपीत्याह * विधीति * धातुश्रुतेः प्रत्यासत्तिमात्रबाधात्तरामित्युक्तं न केवलं स्वर्गादेरिष्टतमत्वाद्भाव्यत्वं किं तु भवितृतयोपादानादपीत्याह * किं चेति * ननु धात्वर्थस्यापि निष्पाद्यत्वाद्भवितृतास्तीत्याशङ्क्याह * न चेति* भवाद्यं भवितृत्वं शाब्दे व्यवहारे ऽनुपयोगीति भावः। स्वर्गादेः कथं भवितृतयोपादानमित्याशङ्क्याह * स्वर्गादीनां त्विति * एतदेव प्रप्रश्नपूर्वकमुपपादयति * कुत इति * भवेदेतदित्येवंरूपस्यैवाशयस्ये- ३५४।१
च्छात्वादिच्छाविषयत्वोपपादनादेवान्यथानुपपत्त्या भवितृत्वावगतिरिति भावः। स्वर्गाख्यदेशविशेषस्य सिद्धत्वात् भवितृत्वाभावमाशङ्क्य स्वसम्बन्धित्वेन भवितृत्वं भेदशब्देनोक्तं भवितृतयोपादानस्य भाव्यंशान्वयोपयोगित्वे भावनापेक्षाकारणमाह * तेनेति* नन्वेवमप्येकशब्दोपात्तस्य धात्वर्थस्य यागादिनेति भाष्येण पश्चादन्वयाभिधानं न युक्तमित्याशङ्क्याह * तत इति* धात्वर्थस्य करणांशे निवेशाभिधानाद्भावनास्वरूपस्य च निर्ज्ञातसङ्कल्पाख्येच्छाविशेषकरणकत्वेन करणानाकाङ्क्षात्वात्फलान्वितरूपस्य करणाकाङ्क्षयाः फला-

न्वयोत्तरकालं प्रवृत्तेर्युक्तं पश्चाद्धात्वर्थान्वयाभिधानम् इत्याशयः । नन्वेवमपि नामार्थस्य सिद्धत्वेन योग्यत्वात्करणांशान्वये वाच्ये धात्वर्थस्यासिद्धत्वेनायोग्यत्वात्करणांशान्वयाभिधानमयुक्तमित्याशङ्क्याह * तत्रेति * आदिशब्देन नामार्थस्य करणांशनिवेशहेतुर्विप्रकर्षो ऽभिप्रेतः।ननु सन्निधिवद्योग्यत्वस्याप्यन्वयहेतुत्वान्नामार्थस्य सिद्धत्वेन योग्यत्वात् करणांशनिवेशो युक्तो न धात्वर्थस्यासिद्धत्वेनायोग्यत्वादित्याशङ्क्य प्रमाणान्तराच्चेत्युक्तं सिद्धस्यापि मृदादेः पटादावयोग्यत्वेन सिद्धत्वमात्राद्योग्यतानवगतेरहष्टार्थेषु च कार्यगम्यविशेषयोग्यत्वस्य प्रमाणान्तरेण ज्ञातुमशक्यत्वात् सामान्यतश्च धात्वर्थस्यापि भोजनादेस्तृप्त्यादिफलसाधनत्वदर्शनेन ज्ञातुं शक्यत्वान्नायोग्यत्वेन धात्वर्थस्य करणांशात्प्रच्युतिर्युक्तेत्याशयः । न च साध्यांशवत्करणांशनिवेशे विधिविरोधो ऽस्तीति विध्यविरोधाच्चेत्यनेनोक्तं ततश्चायोग्यत्वविरोधलक्षणस्य साध्यांशे धात्वर्थातिक्रमकारणद्वयस्यात्राभावात् यागेनेत्येवमन्वयो विज्ञायतइत्यर्थः । प्रत्युत नामार्थस्यैव धात्वर्थनिरपेक्षस्य क्व चित्करणत्वानुपलब्धेरयोग्यतातिक्रमणकारणमस्तीति सर्वत्यनेनोक्तम् । यत्त्वनिष्पन्नत्वेनायोग्यत्वं पूर्वपक्षिणोक्तं तन्निरस्यति * यद्यपि चेति * नन्वेवं सति स्वनिष्पत्त्यपेक्षणाद्विलम्बः स्यादित्याशङ्क्य नामार्थस्यापि नित्यसिद्ध्यभावात् साम्यमाह * सर्वमेव चेति*न च प्राक्सिद्धस्यैव शास्त्रेण करणत्वं वाच्यमिति नियमे हेतुरस्तीत्याह * न चेति * किं चातीतस्यापि ग्रहोपसर्गादेः शुभाशुभोत्पत्तौ वर्त्तमानस्य च ज्ञानस्यार्थप्रकाशे भविष्यन्त्याश्च वृष्टेर्मत्स्यविकारहेतुत्वदर्शनान्न प्रागसिद्धिमात्रेण साधनांशनिवेशायोग्यतेत्याह * प्रमाणेति*उपसंहरति* तस्मादिति * यस्य चेति भाष्यं सङ्क्षेपेण व्याचष्टे * तच्चेति * यदा च यागादिधात्वर्थरूपकर्मवाचिभ्यो धातुशब्देभ्यो ऽपूर्वप्रतीतिस्तदा प्रयोजनवाच्यर्थशब्दाभ्युपगमेन प्रकृतिप्रत्ययौ प्रत्ययार्थं सह भूत इति स्मृत्यनुसाराद्धातोरपि भावार्थत्वोपपत्तेः सामानाधिकरण्येन व्याख्यासम्भवात् नावश्यं प्रत्ययांशेन भावार्थाः धात्वंशेन च कर्मशब्दाः पदरूपाः शब्दा इत्येवं व्याख्येयमित्याह * ततश्चेति * ननु यदि भावनाया भाव्यनिष्ठत्वादीप्सिततमस्य च कर्मणो भाव्यत्वाद्नीप्सितधात्वर्थातिक्रमेणेप्सिततमस्य स्वर्गादेर्भावनाकर्मत्वं धात्वर्थस्य च भाव्यान्वितभावनारूपे करणत्वं ततो ऽकर्मकेषु धातुषु कर्माभावाद्भावना न स्याद्भावनाभ्युपगमे वा तेषामपि सकर्मकत्वापत्तिरित्याशङ्कते * ननु चेति * भावनावगतिहेतुत्वाद्वा सकर्मकधातु-

युक्तमेव सर्वमाख्यातं प्राप्नोतीत्यर्थादुक्तं शङ्काभिप्रायं व्याचष्टे * तथा हीति * येन कारणेनेप्सिततमैः स्वर्गादिभिः पदार्थैर्भावनायाः किमित्यंशो ऽवरुध्यते धात्वर्थश्चेप्सिततमभावावरुद्धकिमित्यंशभावनायोगी तेन कारणेन न कश्चिद्धातुः अकर्मकः स्यादकर्मको वा यः कश्चिद्धातुः स सर्वो न भावनायोगी स्यादिति द्वेधा योज्यम्। द्वेधा श्लोकं व्याचष्टे * यदि वेति * भावनाकर्मणैव धातोः सकर्मकत्वे स्यादथ दोषः न त्वेतदस्ति धात्वर्थसाध्यकर्मनिबन्धनत्वाद्धातोः सकर्मकत्वस्येति परिहरति * नैष दोष इति * धात्वर्थसाध्यस्य कर्मणो ऽकर्मकेष्वभावान्न सर्वेषां सकर्मकत्वापत्तिरिति पूर्वार्द्धेनाद्यशङ्कापरिहारः भावनानिबन्धनस्य कर्मणः सर्वत्र भावान्नाकर्मकेभ्य भावनानुपपत्तिरित्युत्तरार्द्धेन द्वितीयशङ्काभिप्रायपरिहारः धात्वर्थभावनाकर्मणोरभेदे भावाभावव्यवस्थानुपपत्तेस्तत्सिद्धये ऽन्यत्वाभिधानं धात्वर्थसाध्यमिति वाच्ये भावनाकर्मणो व्यवहितसिद्धेर्धात्वर्थकर्मणो ऽनन्तरसिद्धत्वेनान्यत्वोपपादनार्थम् * प्राप्यमित्युक्तम् * कर्मद्वयस्याधिष्ठानान्यत्वनियमाभावे ऽपि यदेव धात्वर्थं प्रति कर्मत्वं तदेव भावनां प्रति न भवतीति कर्मत्वरूपान्यतोक्ता यद्धि यथाकथञ्चिदपि धात्वर्थसिद्धौ सत्यामनन्तरं नियमेनोत्पद्यते तद्धात्वर्थस्वरूपप्रयुक्तत्वाद्धात्वर्थकर्म यत्त्वन्यप्रेरितेन पुंसानुष्ठितकर्माणि कदा चिदुत्पद्यते कुतश्चिद्द्वाकारणान्न कदा चिदुत्पद्यते तन्नियोगप्रयुक्तत्वान्नियोगस्य च भावनाविषयत्वात् भावनाकर्म। उदाहरणनिष्ठं श्लोकं व्याचष्टे * ओदनमिति * पाकसमाप्त्यनन्तरमेवौदनाख्यं कर्मोत्पद्यते गमनसमाप्त्यनन्तरं च ग्रामप्राप्त्याख्यं नान्यत्किं चिदपेक्षितमिति द्योतनायापवर्गशब्दः अधिष्ठानान्यत्वनियमो ऽनेनोक्त इति शङ्कानिवृत्त्यर्थं तन्नेत्याद्युक्तं धात्वर्थसमाप्त्यनन्तरं नियमेनोत्पद्यमानत्वादोदनस्य धात्वर्थकर्मत्वे ऽप्युद्देश्यत्वलक्षणेप्सिततमत्वस्य प्रयत्नाख्यभावनैकगोचरत्वादोदनमात्रोद्देशेन यदा प्रवर्त्तते तदैकस्यैवोभे प्रति कर्मता यदा त्वोदनादिकर्मविशिष्टेन धात्वर्थेनावच्छिन्ना भावनान्यद्वेतनलाभादीप्सितममुद्दिश्य प्रवर्त्तेत तदा कर्माधिष्ठानमपि भिद्यतइत्याशयः [illegible]भयनिष्पत्युत्तरकालभाविना वेतनलाभादेः कथं निष्कृष्य भावनाकर्मत्वावधारणेत्याशङ्क्याह * ततश्चेति * विप्रकर्षार्थः परशब्दः। धात्वर्थाद्विप्रकृष्टकालत्वेन धात्वर्थान्तरैश्च व्यवधानेन पाकादिधात्वर्थकर्मत्वावधारणाशक्तेर्भावनाकर्मत्वावधारणेत्युक्ते ननु भावनाकर्मत्वावधारणाप्यस्मादेव हेतुद्वयादशक्येत्याशङ्क्य तदवा- ३५५।२

प्य * मात्रत्वेनेत्युक्तम् * धात्वर्थफलस्य स्वरूपप्रयुक्तत्वात् स्वरूपव्यवधाने न शक्यो जन्यजनकभावो ऽवसातुं भावनाफलस्य तु नियोगप्रयुक्तत्वात्तस्य च लोके नियोक्तृराजादेः सन्तोषादिपूर्वकफलदानप्रवृत्त्या व्यवधानदर्शनात् वेदे ऽपि योगसिद्ध्यधिकरणन्यायेनानन्तर्यनियमाभावादनन्तरजन्यत्वानपेक्षभावनाव्याप्यमात्रत्वेन नियोगवशादू गम्यमानत्वात् भावनाकर्मत्वावधारणेत्याशयः । तस्य चाकर्मकधातुयुक्तेष्वप्याख्यातेषु भावाद्भावनावगतिः सम्भवतीति सर्वत्रेत्यनेन सूचितम्। नन्वकर्मकेषु धात्वर्थकर्मभावे ऽपि भावनाकर्माभ्युपगमे स्वास्थ्यं शर्यीतेति द्वितीया कस्मान्न प्रयुज्यतइत्याशङ्क्याह * तच्चेति * भावनाया भाव्यनिष्ठत्वाद्भवितुरेव भाव्यत्वात् द्वितीयायाश्च प्राधान्यापरपर्यायेप्सिततमत्वमात्रवाचित्वेन भवितृत्वानभिधायित्वादेवं कामशब्दात्त्विदं भवेदिति भवितृत्वप्रतीतेस्तेनैव भावनाकर्मत्वप्रतीतिः । अग्निमादधीतेत्यादौ तु भावनाकर्मत्वान्यथानुपपत्त्या भवितृत्वकल्पनया क्लेशेन भावनाकर्मत्वनिर्वाह इत्यर्थः । धात्वर्थभावनाकर्मणोरन्यत्वाभिधानस्याशङ्कानिरासप्रयोजनत्वं पूर्वसूचितं प्रकटयितुमाह * सत्यपीति * प्रकटयति * तेनेति * नन्वग्निमादधीतेत्यादौ द्वितीयानिर्दिष्टस्यैव प्रायेण भावनाकर्मत्वदर्शनादेवं कामशब्दहेतुकत्वस्य प्रायिकत्वाभिधानमयुक्तं स्यादित्याशङ्क्याह * यजेरपि त्विति * विष्णुं यजतीत्यादौ द्वितीयानिर्दिष्टामपि देवतां कामशब्दोपबन्धाभावाद्भावनाकर्मत्वेन त्यक्त्वा कामशब्दोपबद्धस्य स्वर्गादेरेव भावनाकर्मत्वाश्रयणाद्युक्ता कामशब्दोपबन्धहेतुकत्वस्य प्रायिकतेत्याशयः । द्वितीयोक्तस्य कर्मत्वस्य निर्विशेषत्वाशङ्कानिरासार्थं यजिधात्वर्थकर्मतोक्ता यागे ऽपि देवतायाः स्वरूपेणासमवायात् कर्मत्वायोगमाशङ्क्यानभिमतमपि पूज्यत्वं त्यज्यमानद्रव्योद्देश्यत्वलक्षणत्वाद्देवतात्वस्य त्यज्यमानद्रव्योद्देश्यस्य च गुर्वादेर्लोके पूज्यत्वदर्शनादुपचारेणोक्तं शङ्कानिरासमुपसंहरति * तस्मादिति * नन्वेवमपि भावनाकर्मणैव तद्विशेषणभूतस्यासनशयनादेरपि धात्वर्थस्य सकर्मकत्वे सकर्मकाकर्मकविभागो न युज्यतइत्याशङ्क्य ते * कस्तर्हीति * भावनाविशेषणत्वसाम्ये ऽपि विभागहेतुमाह * उच्यतइति व्यवहितस्याप्यङ्कुरादिरूपतया बीजादिपरिणतस्य बीजावापादिधात्वर्थकर्मत्वदर्शनात् साक्षाच्छब्देन क्वचिन्नैरन्तर्यं क्वचिन्नियतरूपत्वमभिप्रेतं यदुप्तं बीजं तदेवाङ्कुररूपेण परिणतमिति नियतरूपेण प्रतीतेः। पारम्पर्यशब्देन साक्षात् शब्दोक्तनैरन्तर्याभाववाचिना तदुक्तस्यैव नियतरूपत्वस्याभिचारशब्दोक्त-

स्य च नियमस्याभाव उपलक्षितः । भावनाकर्माभिधानस्य धात्वर्थाकर्मकत्वोपपादने तात्पर्यं सूचयितुं व्युत्क्रमेण श्लोकं व्याचष्टे * आसनेति * श्रान्तस्यासीनस्य सुखीभावाच्छयानस्य स्वास्थ्याभावाद्व्यभिचारोपलब्धेः कदा चित्प्रबुद्धस्य चिरेणान्नपचनादिना धातुसाम्यलक्षणस्वास्थ्यासद्भावे ऽप्यानन्तर्याभावाच्छयानस्यासीनस्य चैतत्फलमिति नियतरूपानिरूपणाद्वा साक्षादनुपपत्तेर्द्धात्वर्थकर्मत्वायोगादास्यादेरकर्मत्वं पच्यादीनां तु धात्वर्थानां विक्लित्तयता तण्डुलादिना तच्छब्देन परामृष्टगमिधात्वर्थलक्षितं गन्तृसंयुज्यमानेन च ग्रामादिना साक्षादानन्तर्येणेदं तदिति वा नियतरूपतया धात्वर्थसम्बन्धिनौदनरूपापत्त्या प्राप्यमाणत्वेन वा कर्मत्वेन कर्मणा व्यभिचाराभावात्पच्यादीनां धातूनां सकर्मकत्वमिति पचिगम्यादीनामिति धात्वर्थपरतया स्वरूपपरतया चावर्त्य योज्यम् । साध्यसाधनान्वयाभिधानमात्रेण सूत्रव्याख्यानसिद्धेः । किं केन कथमित्याकाङ्क्षात्रयाभिधानमनर्थकमित्याशङ्क्याह * सेर्यमिति * कथं यथा सन्निकर्षं शास्त्रानुसारेण कल्प्यते कथं वा तदभावाद्यथा कथं चिदुपस्थाप्यमानेत्यपेक्षायां * श्रुत्यादीत्युक्तम् * अतिदेशस्योपकारद्वारत्वाद् * अत्यन्तेत्युक्तम् * भावनायास्त्र्यंशापेक्षत्वे ऽपि स्ववाक्योपात्त- ३५६।१
साधनमात्रान्वये विधिपर्यवसानभ्रान्तिं निवर्त्तयितुमाह * तत इति * ननु विशेषणविधिं विना विशिष्टविधिर्न सम्भवतीत्याह * तद्विधानाच्चेति * तस्मादित्युपसंहारभाष्यमधिकरणार्थोपसंहारार्थमिति शङ्कां निवर्त्तयितुं सूत्रार्थमात्रोपसंहारार्थत्वेन व्याचष्टे * इतीति * कर्मशब्दत्वभावार्थत्वयोरेकैकेनाख्यातोपलक्षणसिद्धेरुभयोपादानानर्थक्यमथेति भाष्येणाशङ्क्योच्यतइत्यनेन भावार्थत्वविशेषणप्रयोजनमुक्तं तत्र श्येनादिशब्दानां कर्मनामधेयत्वस्य यजिसामानाधिकरण्याधीनत्वाद्यागादिस्वतन्त्रकर्मशब्दत्यागेनोदाहरणमयुक्तमित्याशङ्क्याह * भवन्तीति * ननु श्येनादिशब्दवद्यागादिशब्दानामपि धात्वर्थाख्यकर्मवाचित्वाद्भावार्थता नास्तीत्याशङ्क्याह * यागादयो हीति * धातोराख्यातप्रत्ययोपात्तभावनोपश्लिष्टस्वार्थवाचित्वोपलम्भादिहापि भावनोपश्लिष्टस्वार्थवाचित्वं कथं नानुमीयतइत्याशयः । कर्मशब्दत्वविशेषणप्रयोजनाभिधानार्थं के चिदिति भाष्यं तत्रोदाहरणमाक्षिपति * के चिदिति * ननु णिजन्ताद्भवतेरुप्रत्ययोत्पादनेन भावनावाचितया भावशब्दस्य व्युत्पादितत्वात्कथमनुदाहरणतेत्याशङ्क्याह * तत्रेति * भवनाख्यप्रयोज्यव्यापारविशिष्टप्रयोजकव्यापारवाचिभावशब्दार्थैकदेशप्रयोज्यव्यापा-

रवाचित्वात् लक्षणयेतरयोरपि भावार्थतोपपत्स्यतइति परिहरति * तावपि त्विति * यदा तु भावनाप्रयोजनत्वाभिप्रायो भावार्थशब्दो व्याख्यायते तदा भावनैकदेशभूतभवनवाचित्वेनैषां भावनाप्रयोजनत्वाद्युक्तैव भावार्थतेति परिहारान्तरमाह * अथ वेति * ननु भावादिशब्दानां लक्षणया भावनाप्रयोजनत्वाद्वा भावार्थत्वे कर्माख्यानुष्ठेयव्यापारवाचित्वेन कर्मशब्दत्वान्नानेन विशेषणेन व्यावृत्तिरित्याशङ्क्ते * कथं पुनरिति * क्रियतइत्यस्मिन्नर्थे करोतेरौणादिके मनिन्प्रत्ययस्मृतेः । कर्मशब्दस्यानुष्ठेयव्यापारवाचित्वाद्धावनादेश्चासिद्धकर्तृव्यापारत्वेनानुष्ठेयत्वात्तद्वाचिनो भवत्यादेर्धातोः कर्मशब्दत्वायोगादुत्तरवार्त्तिकानुसाराच्चानुष्ठेयव्यापारवाचिसर्वधात्वभिप्रायो धातुमात्रशब्दः धात्वर्थविशेषानवच्छिन्नायाः भावनाया अनुष्ठातुमशक्यत्वात्तद्वाचिनो धातोरपि कर्मशब्दत्वं नास्तीति परिहरति *निर्विशेषस्येति* ननु भवनाख्यधात्वर्थविशेषावच्छिन्नाया भावनायास्तर्ह्यनुष्ठेयत्वात् भावादिशब्दानां कर्मशब्दतोपपत्स्यतइत्याशङ्क्याह * अत इति * भवनस्यासिद्धकर्तृव्यापारत्वात् भावनाविशेषणत्वं नास्तीत्याशयः । किं पुनरित्यादिभाष्येणोदाहरणं प्रश्नपूर्वकं विचारस्वरूपं स्पष्टयित्वा स्थितइत्युक्तम् । तच्छङ्कोत्तरत्वेनावतारयति * यदीति * नन्वेवं सति नामधेयचिन्तोपोद्घातत्वेन
३५७।९ ततः प्रागेवेदं कार्यमिति शङ्क्ते * कस्मादिति*सत्यप्युपोद्घातत्वेन भेदचिन्तयेव नामधेयचिन्तयापि सम्बन्धे ऽर्थचिन्तात्मकत्वात्प्रमाणलक्षणासङ्गतेस्तत्र न कृतमिति परिहरति * प्रमाणेति * एवं तर्ह्याख्यातपदस्य फलपदान्वयान्नामपदस्य तदन्वये ऽस्मिन्नधिकरणे निरस्ते तदेतरत्तदर्थमित्याख्यातान्वयप्राप्तौ गुणविधित्वेनाख्यातान्वयो नामधेयत्वेन वेति इहापि प्रसङ्गात् सङ्गत्युपपत्तेः । कस्मान्नामधेयचिन्तापीहैव न कृतेति शङ्क्ते * अथेति * प्रासङ्गिकत्वेनानन्तरसङ्गतौ सम्भवन्त्यामपि लक्षणासङ्गतेर्नेह कृतेति परिहरति * भेदेति * शङ्काद्वयनिरासमुपसंहरति * तस्मादिति * तथेत्यादिभाष्यं स्पष्टत्वादव्याख्याय न चेति भाष्यं स्वर्गं भावयेदिति फलान्वयस्य प्रागुक्तत्वात्किं केन कथमिति भाव्याद्याकाङ्क्षाया एवोपायस्योक्तत्वात्तद्विरुद्धपुरुषान्वयाभिधानादयुक्तमाशङ्क्य व्याचष्टे * न चेति * अर्थवाचिनः कमिपदस्य लक्षणया ऽर्थशब्देनाभिधानात्तस्य चैकादशाद्यभाष्ये फलपरत्वस्य वक्ष्यमाणत्वादविरोध इति भावः । इयेनेनाभिचरन्निति व्यधिकरणविभक्तित्वलक्षणस्य विभक्तित्वस्य साध्यसाधनान्वयापादकत्वेन विपरीतसा-

धनत्वादहेतुत्वमाशङ्क्य वीत्युपसर्गो विगमार्थो विशेषार्थो वेति द्वेधा व्याचष्टे * विभाक्तित्वादिति * तस्मादित्युपसंहारभाष्यं फलस्य क्रियेति फलभावनान्वयोपक्रमान्न द्रव्यगुणशब्दाः फलान्वयद्वारापूर्वस्याक्षेपका इत्येवमर्थमिति सूचयन्व्याचष्टे * तस्मादिति * एतमेव सिद्धान्तं वृद्धवचनेन द्रढयति * आह चेति *

सर्वेषां भावो ऽर्थ इति चेत् ॥ २ ॥

नन्वाख्यातपदादेव भावनाप्रतीतेः। सर्वेषां भावनार्थत्वाभिधानमयुक्तमित्याशङ्क्याह * न तावदिति * अयमाशयः धात्वर्थस्य करणत्वं वक्तुं धातोः फलपदान्वयद्वारिणापूर्वाक्षेपकत्वं यदुक्तं तदाक्षेपार्थदं सूत्रम्। न च भावनावाचिनः प्रत्ययस्य फलपदान्वयद्वारापूर्वाक्षेपकत्वं सिद्धान्तिनो ऽपीष्टं धातोरपि स्वतः प्रत्ययनिरपेक्षस्य भावनावाचित्वाभावेन फलपदान्वययोगान्नापूर्वाक्षेपकत्वमिष्टं किं तु परतः प्रत्ययान्वयद्वाराभावनानुरञ्जकत्वलक्षणया भावार्थत्ववशात्तच्च नाम्नो ऽपि इयंयेन कुर्यादिति प्रत्ययान्वयेन भावार्थत्वोपपत्तेः समर्मिति श्लोकं व्याचष्टे *यदीति* भावनावचनस्यैवेत्येवकारेण कारणवाचिशब्दानपेक्षोक्ता भावनावाचित्वेन तु फलपदद्वारा प्रत्ययस्यापूर्वाक्षेपकत्वोभयवादिसमानत्वान्न विचार्यत्वेनेष्टेत्याशयः। नामपदस्यापीत्यपिशब्देन श्लोकस्थो वा शब्दार्थो ऽप्यर्थे व्याख्यातः।

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षाभूतत्वात् स्वे-
प्रयोगे ॥ ३ ॥

ननु भावार्थत्वाविशेषाद्धातुवन्नाम्नो ऽपि फलपदान्वयसम्भवान्नियमानुपपत्तौ शङ्कितायां नामाख्यातयोः स्वरूपकथनमसम्बद्धमित्याशङ्क्याह *यदुक्तमिति* अयमर्थः धात्वर्थानपेक्षस्य नामार्थस्य ३५८।
भावनानुरञ्जनाशक्तेर्न तावद्धातुतुल्यं भावार्थत्वं नाम्नो ऽस्ति तदभावे ऽपि दध्नेन्द्रियकामस्येत्यादौ नाम्नः फलपदान्वयदर्शनाद्यथाकथं चित्तु भावार्थत्वमात्रस्य फलपदान्वययोपयोगित्वमाशङ्क्याद्यभिमतमभ्युपगम्य धातुनाम्नोर्विशेषं वक्तुमेतत् सूत्रद्वयं तत्र यदैकस्मादिति भाष्येण सर्वेषां फलपदान्वये बह्वदृष्टकल्पनापत्तिरेकस्य तु तदन्वये ऽल्पकल्पनेति यदुक्तं तत्रैकान्वये ऽपि नाम्नो ऽन्वयबहुकल्पना धातोस्त्वन्वये ऽल्पकल्पनेति विशेषः सार्द्धेन सूत्रे-

णोक्तः आश्रितत्वात्प्रयोगस्येति सूत्रावयवेन श्रुतिवाक्यकृतइति अयं च सिद्धसाध्यत्वकृतो विशेषो न श्रुतिवाक्यकृतविशेषवच्छब्दमात्रनिमित्तः. किं तु वास्तवो ऽपीति वस्तुधर्मेणोत्पत्तेनेनोक्तं कीदृशो ऽसौ विशेष इति प्रश्नपूर्वं विवरीतुमाह * कथमिति * प्रतिपदपक्षारिष्टत्वोपपादनस्यानिष्टापत्त्यभिधानार्थत्वेन प्रस्तुतोपयोगं वक्तुमाह * कस्मादिति * कथं नाम्नः फलपदान्वये बह्वदृष्टप्रसङ्गापरिहार इत्याशङ्क्याह * नाम्नश्चेति * ननु सिद्धरूपस्यापि नामार्थस्याश्रयत्वेन निष्पाद्यो धात्वर्थो दृष्टेनोपकरिष्यतीत्याशङ्क्याह * न हीति * विधीयमानस्य धात्वर्थस्य किं चित् समीहितं प्रति साधनत्वं विना विधेरपर्यवसानान्नामार्थं प्रति साधनत्वायोगात्तादर्थ्येन विध्यनुपपत्तेरन्यार्थत्वेनैव विहितस्याश्रयत्वेन ग्रहणात् सत्यप्याश्रयत्वे कश्चिददृष्टो नामार्थस्योपकारो धात्वर्थसाध्यो ऽस्मिन्पक्षे कल्प्यः स्यादित्याशयः । आश्रयत्वेन धात्वर्थं गृह्णन्नपि नामार्थः साधनत्वेन नापेक्षते येन नामार्थस्य फलान्वये धात्वर्थस्तस्य दृष्टेनोपकुर्यादित्यर्थः । उच्चारणोत्पत्ताविति भाष्यावयवेनोत्पत्तिशब्दमुच्चारणार्थत्वेन व्याख्याय स्वे ऽर्थइत्यनेन प्रयोगशब्दो वाच्यार्थत्वेन व्याख्यातः । तत्र प्रयुज्यमानशब्दात्कर्मव्युत्पत्तिरुक्तेत्याभाति तत्स्वार्थस्योच्चार्यत्वाख्यप्रयोज्यत्वाभावादयुक्तमाशङ्क्याधिकरणव्युत्पत्तिमाह * प्रयुज्यतइति * प्रयुज्यमानशब्दविषयभूते ऽर्थे रूपोपलब्धिरिति व्याख्यानेन सूचिता प्रयुज्यमानशब्दविषयत्वाल्लक्षणयार्थस्य प्रयुज्यमानतोक्तेत्याशयः । सूत्रान्त्यप्रयोगशब्दवत् अयमप्युच्चारणार्थतया प्रसिद्धः प्रयोगशब्दो वाच्यार्थतया कस्माद्व्याख्यायतइत्याशङ्क्य प्रयोगस्य सप्तम्या रूपोपलब्ध्या ऽऽधारत्वोक्तेर्वाच्याश्रितत्वाच्च तस्या इत्याह * तदाधारैव हीति * उच्चारणे ऽपि निष्पाद्यरूपोपलब्धेर्निष्पन्नरूपतेह विवक्षितेति निष्पन्नशब्देनोक्तं यत्सकृदिति भाष्येण रूपोपलब्धिपदं स्थायिरूपाभिप्रायेणान्वयमुखेन व्याख्याय क्रियावैधर्म्याभिधानेन व्यतिरेकमुखेन व्याख्यातं तदुभयमपि नामार्थस्य साधनानपेक्षत्वाय निष्पन्नत्वस्य वक्तव्यत्वाद्धात्वर्थस्य साधनापेक्षत्वायानिष्पन्नत्वस्य वक्तव्यत्वादयुक्तमाशङ्क्याह *अनुत्पन्नत्वइति* निष्पन्नत्वे नामार्थस्य वक्तव्ये स्थायित्वप्रदर्शनमित्यर्थादुक्तं कर्मनामधेयत्वेन नाम्नः फलपदान्वयस्यानाशङ्क्यत्वात्सन्निरासार्थसिद्धरूपार्थत्वाभिधानानर्थक्यापत्तेः द्रव्यगुणशब्दत्वाभ्युपगमे ऽनाशङ्केति सूचयितुं द्रव्यगुणशब्दा इति व्याख्याते किमर्थं तर्हि नामानीत्युक्तम् इत्याशङ्क्य सत्वप्रधानानि नामानीति स्मृत्या सिद्धार्थत्वोपपादनार्थं-

स्वे पर्यायत्वाभिधानेन सूचितं, तत्स्पष्टत्वादव्याख्याय तस्मात्तेभ्यः पराकाङ्क्षेति सूत्रावयवव्याख्यानार्थं यत एषामिति भाष्यं सूत्रे नञभावादयुक्तमाशङ्क्याध्याहारार्थत्वेन व्याचष्टे * तेभ्य इति * स्वयमन्यवाचित्वेन परशब्दं व्याख्याय प्रधानवाचित्वं भाष्योक्तं व्याख्यातुम् *निष्पाद्यत्वेन वेत्युक्तम्* निष्पाद्यत्वेन प्रधानस्य सतो या साधनाकाङ्क्षा सा न विद्यते निष्पाद्यत्वाभावादित्यर्थः। दूरवाचिना वा परशब्देनैव नञर्थो लभ्यतइत्यन्यथा व्याचष्टे * अथ वेति * भूतस्वादित्यादिसूत्रावयवं नैराकाङ्क्षोपपादनार्थत्वेन व्याचष्टे *कुत इति पौनरुक्त्यं परिहरति * स्वरूपेति *

येषा तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्याताानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य ॥४॥

आख्यातस्वरूपकथनस्य प्रयोजनमाह * आख्यातेति * श्लोकं व्याचष्टे * धात्वर्थस्तावदिति * व्यापारात्मकत्वाद्धात्वर्थस्य व्यापारस्य चानुपसंहृतरूपत्वाख्यानिष्पन्नरूपत्वात्स्वभावेनैव साध्यात्मकतेत्याशयः। ननु नामधेयत्वे नाम्नोऽपि साध्यार्थत्वान्निष्पन्नस्य चानुष्ठेयत्वाख्यसाध्यत्वायोगात्फलपदान्वयः प्रसज्येतेत्याशङ्क्ते *नन्विति * नामधेयत्वस्य धातुसामानाधिकरण्याभिधानत्वात्फलपदान्वये च सामानाधिकरण्याभावान्नामधेयत्वं न स्यादिति परिहरति * नेति * अन्योत्पादानुकूलार्थाभिधायित्वेन साध्यसाधनेतिकर्त्तव्यताकाङ्क्षोत्थानसूचनार्थं ते भावशब्दा इति वक्तव्ये तान्याख्यातानीत्यभिधानात् सूचितम्। परिहारान्तरमाह *अपि चेति* श्लोकं व्याचष्टे * यद्यपीति * ननु सिद्धत्वरूपतयाभिधाने ऽपि वस्तुतः साध्यत्वात् साधनाकाङ्क्षानुष्ठेयत्वनिर्वाहार्थं च फलाकाङ्क्षा भविष्यतीत्याशङ्क्याह * अभिधानेति * यागादिशब्दोच्चारणे ऽपि साध्यत्वानुरक्तावाकाङ्क्षानुपलब्धेरभिधानकृतैवाकाङ्क्षेत्याशयः। तस्मात्तेभ्यः प्रतीयेतेति तस्माच्छब्देन साध्यत्वोपपादितसाधनाकाङ्क्षावशान्नामार्थस्य धात्वर्थान्वये इष्टार्थत्वं हेतुत्वेन परामृष्टमिति सूचयितुमुपसंहरति * तस्मादिति * अनेन च भव्यार्थास्त इति भाष्यमपि तात्पर्यतो व्याख्यातम्। उच्चारणाख्यप्रयोगकाले स्वार्थे प्रयोगो न विद्यतइत्युक्ते प्रयोगकाले प्रयोगनिषेधायोगाद्विशेषणभूते ऽर्थे निषेधावतारात्प्रयोगकाले ऽर्थो न विद्यतइत्यर्थप्र- ३५९।२

१ सामानाधिकरण्याधीनत्वादिति १ पु० पा०।

तीतेः स्पष्टत्वात्तद्व्याख्यानार्थं भाष्यं न व्याख्यातम् । अदृष्टकल्पनालघुत्वबहुत्वकृतेन विशेषेण धात्वर्थफलवत्त्वसिद्धेराश्रितत्वादिति हेत्वानर्थक्यमाशङ्क्य किं चेति भाष्येण हेत्वन्तरसमुच्चयार्थत्वेन व्याख्यातम् । पूर्वोक्ताद्विशेषादेतदुक्तस्य विशेषस्य विवेकमाह * किं चेति * एक पदोपादानाद्धात्वर्थस्य प्रत्यासत्तिलक्षणया श्रुत्या भावनान्वयः नामार्थस्य वाक्येनेत्यर्थः । धात्वर्थानपेक्षस्य नामार्थस्य भावनानुरञ्जकत्वाद्धस्तुतो ऽपि धात्वर्थस्यैव प्रत्यासत्तेन शब्दग्रहणाद्धास्तवत्वनिवृत्तिः । अत्र भाष्यकृतौ तेषामाख्यातानां प्रयुज्यते ऽस्मिन्निति व्युत्पत्त्या प्रयोगशब्दवाच्यः प्रतिपाद्यो ऽर्थो धात्वर्थानुरक्तभावनाख्यः पुरुषेणाश्रित इति सूत्रावयवस्वरूपं व्याख्याय तदुपपादनार्थं पुरुषान्वितभावनाख्यातैरुच्यतइत्युक्तेन व्याख्यातेषु पुरुषानुपादानात्कथं तदन्वयावगतिरित्याशङ्क्य पुरुषस्याख्यातैर्भावनायां नियोगादर्थाक्षेपलभ्यत्वमुक्त्वा तथापि धात्वर्थस्य फलपदान्वयः कथमित्याशङ्क्यार्थाक्षिप्तस्य पुरुषस्य फलपदाद्विशेषप्रतीतेराख्यातोपात्तस्य धात्वर्थस्य भावनाद्वारा पुरुषान्वयः प्रतीयते न तु द्रव्यादेर्नामार्थस्येत्युक्ते तस्यापि भावनाद्वारान्वयो भविष्यतीति सर्वेषां भावो ऽर्थ इति सूत्रोक्तं चोद्यमनुभाष्य श्रुतिवाक्यविशेषाभिधानेन परिहृतं तत्सङ्क्षेपतो व्याचष्टे * पुरुषेति * भावनायां पुरुषस्य नियोज्यत्वोपपादनार्थं तद्व्यापारतोक्ता धात्वर्थानवच्छिन्नभावनानुष्ठानाशक्तेस्तदुपश्लेषो भावनायाः पुरुषेणापेक्षितइत्युक्तम् । दर्शपूर्णमासाभ्यामिति नाम्नः फलपदान्वये दर्शकालः पौर्णमासकालश्चेति भाष्ये कालवाचित्वाभिधानान्नामधेयविचारे ऽनुदाहृतत्वाद्धात्वर्थस्यापि फलान्वये गुणविधित्वाशङ्काप्रसक्तेस्तन्निरासार्थं दर्शपूर्णमासकालान्वितस्यैवाग्नेयादियागस्य विहितत्वात्तत्प्रख्यन्यायेन लक्षणाया यागनामधेयत्वाभिधायकं यदा यागेनेति भाष्यं स्पष्टत्वान्न व्याख्यातम् ।

॥ अथ अपूर्वस्यास्तिताधिकरणम् ॥ २ ॥

चोदनापुनरारम्भः ॥ ५ ॥

कथं पुनरित्यादिभाष्येण शङ्कानिरासार्थत्वेनेतत्सूत्रमवतारितमिति दर्शयितुमाह * सूत्रसिद्धामिति * अपूर्वाभावे केभ्यो ऽपूर्वं प्रतीयते इति प्रतिपत्त्युपायविशेषविचारायोगात्तत्प्रतिपादनापेक्षायां सूत्रकृदाहेति भाष्यतात्पर्यमित्यर्थः चोदनेनेत्यपूर्वं ब्रूम इत्यादिभाष्योक्तं सूत्रार्थं तात्पर्यतो व्याचष्टे * फलायेति * चतुर्थ्युक्तफलार्थत्वं तच्छब्देन परामृष्टं श्लोकं व्याचष्टे * वेदवाक्येति * वृत्यन्त- ३६०।१

रकरैरपूर्वाभावे ऽपि कर्मफलसम्बन्धोपपत्तेरपूर्वस्य निष्प्रमाणकत्वाद्भावार्थाधिकरणस्य च केवलः फलोत्पादावगतिरित्येतावति पर्यवसानोपपत्तेः सूत्रस्य चारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्वरूपकथनार्थतयापि व्याख्यातुं शक्यत्वान्नेदं सूत्रमपूर्वसद्भावाभिधानार्थमित्युक्तं तद् दूषयितुमुपन्यस्यति * अत्रेति * केन चित्प्रमाणेनानवगतपूर्वकत्वाद्वयवार्थमनुगतमस्य नामेति बहुव्रीहिरुपहासार्थः श्लोकं व्याचष्टे * वस्त्विति * प्रत्यक्षाप्रवृत्तिं तावदुपपादयति * तत्रेति * आदिशब्देन लोकसिद्धेन्द्रियविषयमात्रग्रहणम्। अनुमानाप्रवृत्तिमुपपादयति * नापीति * प्रत्यक्षसूत्रे सत्ता च नानुमानेन कस्य चित्सम्प्रतीयतइत्यत्रोक्तं शब्दाप्रवृत्तिमुपपादयति * पदेति * श्लोकं व्याचष्टे * आगमिकत्वमिति * उपमानाप्रवृत्तिमुपपादयति * न चेति * प्रत्युतासत्त्वपदोपमानं प्रवर्त्तते इत्युपहासार्थमाह ३६१।१
* कामामिति * अर्थापत्त्यप्रवृत्तिमुपपादयति * अर्थापत्त्यापीति * सिद्धान्ताभिमतश्रुतार्थापत्तिनिरासार्थम् * फलेत्युक्तम् * श्लोकं व्याचष्टे * दृष्टार्थापत्तिरिति * शब्दप्रामाण्यानादरेण दृष्टार्थापत्त्यवतारात्तथा चेश्वरेच्छादेरपि वैचित्र्यहेतोः परामिमतस्यापि शब्देनोपादानम्। ननु श्रुतायाः फलयागादिसङ्गतेरपूर्वं विना ऽनुपपत्तेः श्रुतार्थापत्तिर्निराकर्त्तुमशक्येत्याशङ्क्याह * श्रुतार्थापत्तिरिति * अपूर्वं तु न कदा चित्फलसाधनत्वेन सम्भाव्यतइति व्यतिरिक्ताभिधानात् सम्भवित्वाभिधानायान्यथानुपपत्तेः कथं चित्परिहारासम्भवः दार्ढ्यवाचिना प्रत्यक्षशब्देनोक्तमिति न कथं चिदपीत्यनेन व्याख्यातंन केवलमन्यथानुपपत्तेः कथंचित्परिहारासम्भवादेव द्रव्यविषयत्वस्य सम्भवित्वं किं तु सामान्यतः प्राप्तत्वादपीत्यपि चेत्यनेनोक्तम्। द्रव्येष्वप्यवदानप्रसक्तेरित्यर्थ। द्रव्याख्यविशेषे ऽप्यवदेयसामान्यवृत्तेः श्रुतहान्यभावः सामान्येन च विशेषाक्षेपादश्रुतापत्त्यभावः। सम्भाव्यमानस्याविरोधिनश्च श्रुतार्थापत्तिविषयत्वात् श्रुतार्थापत्तेरप्यपूर्वो न प्रवर्त्ततइति भावः। तत्रापूर्वाभावे ऽपि श्रुतसाध्यसाधनसम्बन्धानुपपत्तिपरिहारं कथं विनष्टं साधयतीत्यादिनाशङ्क्यापूर्वमुपपादयिष्यमाणमभिप्रेत्यापूर्वस्यासम्भवित्वं तावदाह * अपूर्वं त्विति * अनेनैव ग्रन्थेन पाक्षिकप्रसक्तेरपि निरस्तत्वात्परिशेषसिद्धरूपा तावदर्थापत्तिरनाशङ्क्यैवेति यतो ऽन्येत्यनेनोक्तम्। ननु प्रसक्त्यभावे ऽप्यन्यनिवृत्तिमात्रेण परिशेषः कस्मान्न सिद्ध्येदित्याशङ्क्याह * यदीति * श्लोकं व्याचष्टे * न हीति * श्रुतसाधनसम्बन्धविरो-

१ व्यतिरेकाभिधानादिति २ पु० पा०।

धि चापूर्वमित्याह * अपि चेति * न च साध्यसाधनत्वाकाररहिते
३६२।२ तत्कल्पयितुं शक्यं प्रमाणाभावादित्याह * न चेति * कथं तर्हि श्रुतसाध्यसाधनसम्बन्धसिद्धिरित्याशङ्क्याह * तेनेति * एतदेवाशङ्क्यापूर्वकमुपपादयति * कथमिति * न च ख्यातित्वं फलसाधकत्वे प्रयोजकमाकाशादिष्वपि प्रसङ्गादित्याह * अपि चेति * एतदेव विवृणोति * यदि चेति * ननु शास्त्रेण यागादेः फलसाधनत्वावसायाद्विनष्टत्वेन च तस्य साक्षात् साधनत्वायोगात् ख्यातिसम्बन्धिद्वारा साधनत्वासिद्धये ऽपूर्वकल्पनेति स्वयमेवाशङ्क्य निरस्यति * अथेति * तदेव व्याचष्टे * यदीति * अतिक्रान्तो ऽतीतो विनष्टो यागो यस्येति विग्रहः । नन्वात्मनः स्वरूपेणावैचित्र्याद्यागादेश्चातिक्रान्तस्यासत्त्वेनावच्छेदकत्वायोगात् फलवैचित्र्यहेतुत्वं न स्यादित्याशङ्क्य यागादिविनाशस्य तर्हि प्रतियोगियागादिनिरूपणाधीननिरूपणत्वादसत एव घटादेर्विनाशप्रतियोगित्वदर्शनात्तद्भेदापादितवैचित्र्यस्य फले ऽपि वैचित्र्यहेतुत्वोपपत्तेः ख्यातिमः सम्बन्धिनश्च साधनत्वं भविष्यतीति पक्षान्तरमाह * यद्वेति * श्लोकं व्याचष्टे * विनाशिनीति * ननु विनाशोत्तरकालीनस्यापि फलस्य कथं तज्जन्यत्वावधारणेत्याशङ्क्य यच्च यत् प्रतीत्य प्रतिगम्य प्राप्य यस्मिन्सतीत्युक्तमिति ननु कर्मविनाशान्वितस्यात्मनः साधनत्वस्य न चातिक्रान्तयागेभ्यः पुरुषेभ्यः फलोदृगतिरित्यादिना निवेद्यमानत्वात् स्वतन्त्रस्याभावस्य क्व चित्साधनत्वादर्शनान्नेह साधनत्वकल्पनेति स्वयमेवाशङ्क्य निरस्यति * स्यादेतदिति * श्लोके यत्सुप्त्यादिफलोत्पत्तिनिमित्तस्य भोजनादेः क्रियात्वं धर्मो दृष्टस्तदतिक्रमस्योभयपक्षसाम्यात् तत्कल्पनत्वाविशेषेणाभावस्यैव तन्निमित्तत्वकल्पनोचितेत्यर्थः । विनष्टस्य कर्मणः साधनत्वायोगे कालान्तरभाविफलसाधनत्वस्यापूर्वकल्पकस्य शास्त्रार्थत्वानवधारणात्कथम-
३६३।२ पूर्वकल्पनेत्याह * किं चेति * श्लोकं व्याचष्टे * क्रियेति * ननन्तरफलानुपलब्धेः शास्त्रप्रामाण्यरुच्चावश्यं फलोत्पत्त्यवसायात्कालान्तरभाविफलसाधनत्वं भविष्यतीत्याशङ्क्ते * तत्रेति * अनुष्ठानात्प्रागनन्तरमुत्पत्तेज्ञातुमशक्यत्वादुत्तरकालं च शास्त्राव्यापाराच्छास्त्रान्तर्गतिर्नापूर्वस्य सम्भवतीति परिहरति * तदिति * श्लोकं व्याचष्टे * न हीति * ननु योग्यत्वावधारणाधीनत्वाद्वाक्यार्थप्रतीतेरननुष्ठितस्य च योग्यतायाः प्रमातुमशक्यत्वात्कस्मान्नानुष्ठानोत्तरकालं शास्त्रार्थावधारणेत्याशङ्क्य ज्ञाते वा वचनं न ह्यविज्ञान्विहितो ऽस्तीति तार्तीयसूत्रावयवेनानुष्ठानोत्तरकालं शास्त्रार्था-

वधारणे सत्यत्योन्याश्रयापत्तिः सूचिता कर्मफलकालयोर्वियोगो विप्रकर्षः प्राक्चापूर्वानपेक्षस्य कर्मणः साधनत्वे निश्चिते पश्चात्तदन्तर्भावना शास्त्राविरुद्धेति सूचयितुम् * यच्चेत्युक्तम् *वैगुण्यकल्पनयापि वानन्तरानुत्पत्तिसम्भवान्न शास्त्राविरुद्धार्थापूर्वकल्पना युक्तेत्याह *अपि चेति* सर्वाङ्गप्रधानसाध्यत्वात्फलस्य कर्मभिश्चित् विगुणे सति इतरसाद्गुणयं ऽप्यनुत्पत्तिसम्भवं वक्तुं सर्वशब्दः।बहुपुरुषसाध्यत्वाच्चैकाशक्तावपि वैगुण्यापत्तिः कर्तृष्वितिबहुवचनेनोक्ता। सर्वेषु पदार्थेषु बहवः कर्त्तारस्तेषु मध्ये क्व चित्पदार्थे क्व चित्कर्त्तेर्यशक्तेरपरिहार्यत्वादित्यर्थः। श्लोकं व्याचष्टे * इश्यतइति* प्रायेण तावद्वैगुण्यं दृश्यते यत्रापि न दृश्यते तत्रापि शास्त्राविरोधात्तदेव कल्पनीयमित्यर्थः। ननु स्वर्गनरकयोरामुष्मिकत्वेनानन्तर्यायोगात्प्राग्व्यनुष्ठानादपूर्वद्वारैव तदुत्पत्त्यवधारणं भविष्यतीत्याशङ्क्याह * न चेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * निरति- ३६४।
शयसुखदुःखात्मकयोस्तादृशसुखदुःखोपभोगयोग्ययोर्देशविशेषयोर्वा स्वर्गनरकवाच्यत्वात्तयोश्चानेन शरीरेण प्राप्त्यसम्भवान्नानन्तर्योपपत्तिरित्याशङ्क्यालौकिकयोः सम्बन्धग्रहणासम्भवेन वाच्यत्वायोगात्सूक्ष्माणि वासांसि स्वर्गः चन्दनं स्वर्ग इति च सुखहेतौ द्रव्ये स्वर्गशब्दप्रयोगेणाकृतिन्यायाद्विशेषणभूतस्य लौकिकस्य सुखस्य स्वर्गशब्दवाच्यत्वावगतेर्दुःखहेतौ च दारिद्र्ये नरकापरपर्यायदुर्गतिशब्दप्रयोगाद्विष्ठायां च दुःखहेतौ नरकशब्दप्रयोगदर्शनादाकृतिन्यायेनैव लौकिकदुःखवाचित्वावगतेरानन्तर्योपपत्तिरिति सुखदुःखात्मकत्वेनेत्यनेनेन सूचितम्। श्लोकं व्याचष्टे * न हीति *ततश्च स्वर्गनरकयोरप्यानन्तर्योपपत्तेर्न ग्रामादिभ्यो विशेषो ऽस्तीत्युपसंहरति* इतीति * शास्त्रीयक्रियाजन्यत्वेनापूर्वस्य चेष्टत्वान्निषेधाधिकारे च निषेध्यस्य हननादेर्लोकसिद्धत्वेनाशास्त्रीयत्वात् शास्त्रीयायाश्च तन्निवृत्तेः फलाभावेनापूर्वानपेक्षत्वान्न तत्कल्पना युक्तेत्याह * किं चेति* श्लोकं व्याचष्टे * ब्राह्मण इति*एवं चापूर्वस्य श्रुतसाध्यसाधनसम्बन्धविरोधित्वाद्विनष्टस्यापि च कर्मणस्तत्सम्बन्धिनः पुरुषस्य वा विनाशस्यैव वा साधनत्वोपपत्तेः कालान्तरभाविफलत्वानवसायाद्वापूर्वस्यासम्भवित्वात्कल्पनानुपपत्तिमुक्त्वा इदानीं श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वादपि कल्पनानुपपत्तिमाह * कल्पितमिति * यागादेर्हि व्यापारात्मकत्वात् जन्मनैव कार्यारम्भकत्वं युक्तम् अपूर्वस्य त्वव्यापारात्मकत्वान्निव्यापारस्य कार्यारम्भकत्वानुपपत्तेः। श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वाद्व्यर्था कल्पनेत्यायः।

स्वर्गनरकोपभोगाय देशान्तरे शरीरस्य प्राप्तिर्लोकोत्पत्त्यपरपर्यायापेक्षिता य चादिशब्दात्पुत्रादेः प्राप्तिरपेक्षिता तत्साधनेनापूर्वं समर्थमित्यर्थः। स्याश्रयाभावेन चापूर्वस्य स्थायित्वायोगाच्छ्रुतसाध्यसाधनसम्बन्धोपपादकत्वं नास्तीत्याह *न चेति * प्रक्षेपान्तस्य यागस्यापूर्वारम्भकत्वेनेष्टत्वात्प्रक्षेपस्य च द्रव्यवदानाश्रितत्वाद् द्रव्यवदानव्यतिरिक्ते यजमाने ऽपूर्वारम्भकत्वानुपपत्तेर्द्रव्यवदानस्य च विनष्टत्वान्नापूर्वाश्रयः स्थायी सम्भवतीत्याशयः । वार्त्तिककृन्मते यागस्य पुरोडाशसाध्यत्वे ऽपि सङ्कल्पात्मकत्वेनात्माश्रितत्वाद् द्रव्यवदानप्रक्षेपादीनां हि सर्वेषामिति सिद्धान्तवार्त्तिकदर्शनाच्च पुरोडाशादादीयमानत्वात्पुरोडाशादिशब्देन द्रव्यवदानमेवोक्तमाअङ्गापूर्वाणामप्येवं न स्थाश्रयः सम्भवतीत्यतिदिशति * एवमिति * अङ्गापूर्वं च प्रधानापूर्वेण सम्बद्धं न वा असम्बद्धत्वे तावन्नोपकारित्वं सम्भवतीत्याह *किं चेति * आराच्छब्देन क्रियासाधनासमवायो ऽभिप्रेतः प्रधानाश्रयात्माश्रितत्वात्प्रधानाश्रयत्वे त्वारादुपकारित्वं विरुध्येतेत्याशयः । श्लोकार्थमुपपादयति * न हीति * सम्बन्धस्तु संयोगाद्यभावादाश्रयाश्रयिभावो वाच्यः अङ्गानां च प्रधानापूर्वसम्बन्धाभावेन तत्समवेतापूर्वोत्पादकत्वायोगात्पारिशेष्यात्पतनप्रबन्धलक्षणा एवाश्रयाश्रयिभावः परिशिष्यते। न चामूर्त्तस्य पतनप्रतिबन्धकतास्तीत्याह *न चेति * नन्वारादुपकार्यङ्गानां प्रधानापूर्वसम्बन्धाभावेन तत्समवेतापूर्वोत्पादकतायोगे ऽपि सन्निपत्योपकार्यङ्गानां प्रधानापूर्वसाधनाश्रयत्वेन तत्सम्बन्धसद्भावात्तत्समवेतापूर्वोत्पादकत्वं भविष्यतीत्याशङ्क्याह * यद्यपि चेति * लक्षणार्थत्वेनोपशब्दस्य व्रीह्यादिद्रव्यमात्रक्षये तत्समवायिनो ऽपूर्वस्य क्षयादित्यर्थलाभः व्रीह्याश्रितस्याप्यपूर्वस्यावघातेन व्रीहिनाशे ऽन्यत्र तण्डुलादावसञ्चारान्न तद् द्वाराप्रधानापूर्वोपकारित्वं स्यादित्यर्थः । सन्निपात्यङ्गानां प्रात्यात्मिकापूर्वमात्रपर्यवसायित्वस्य वक्ष्यमाणत्वात्फलसाधनस्य प्रधानस्य साध्यं यदपूर्वं तस्येति व्यधिकरणे षष्ठ्यौ व्याख्येये । नन्वङ्गापूर्वाणां प्रधानापूर्वसमवाये ऽपि प्रधानापूर्वाश्रयात्माश्रितत्वेनैकार्थसमवायात्प्रधानापूर्वोपकारकत्वं भविष्यति फलसाधनत्वयोग्यतासाधनार्थत्वेन च क्रियासाधनांशानिवेशाभावात् सन्निपत्योपकारित्वानापत्तेरारादुपकारकत्वाविरोध इत्याशयेनाशङ्कते * अथ
३६५।१ त्विति*प्रधानापूर्वाणामप्यात्माश्रितत्वसूचनायापिशब्दः आत्माश्रितत्वे सत्यपूर्वस्य योग्यतालक्षणत्वात्फलभोगयोग्यत्वस्यैवात्मनापेक्षणात्पुरुषार्थतापद्येतेति दूषणमाह*एवं सतीति* विधिस्थैकश्रुतित्वाद्-

स्यत्र चान्योन्यसापेक्षाणामङ्गपूर्वाणामुपकारकत्वस्य वक्ष्यमाणत्वाद्असम्बन्धानां चान्योन्यसापेक्षककार्यारम्भकत्वलक्षणयौगपद्यायोगाच्चोपकारकत्वं सम्भवतीत्याह *अपि चेति * एकोखासंयोगादिलक्षणान्योन्यसम्बन्धसम्बद्धानामेव प्रावादीनामेकोखाख्यैव धारणाच्च एककार्यारम्भदर्शनात् सम्बन्धं विनान्योन्यस्वापेक्षैककार्यारम्भकत्वलक्षणं यौगपद्यं न सम्भवतीत्याशयः । प्रधानापूर्वाणामप्यन्योन्यापेक्षाणामेकफलसाधनत्वलक्षणं फले यौगपद्यमेकादशाद्ये वक्ष्यमाणमन्योन्यसम्बन्धभावादेवायुक्तमित्यतिदिशति * एतेनेति * अतोऽपूर्वस्यासम्भवित्वाद्विरोधित्वादनुपपादकत्वाच्च कल्पनानुपपत्तेस्तन्निरपेक्षाणामेव प्रधानानां पुरुषार्थसाधनत्वमङ्गानां च प्रधानोपकारसाधनत्वमित्युपसंहरति * तस्मादिति * कृतत्वमात्रशब्देन विनष्टस्य कर्मणोऽतिक्रान्तयागस्य वा पुरुषस्य कर्मविनाशस्यैव वा फलसाधनतेति पक्षत्रयमपि संगृहीतं, किं चापूर्वं यागादिभिरुत्पाद्यते ऽभिव्यज्यते च नोभयथापि सम्भवतीत्याह * न चेति * उत्पत्त्यसम्भवे तावत्प्रश्नपूर्वकं विकल्प्य हेतुमाह * कुत इति * अङ्गकर्मजन्यस्योपकारापूर्वस्य प्रधानकर्मजन्यस्य च फलापूर्वस्यानवयवत्वाक्रमशोऽपि तज्जन्मसम्भवित्वं न प्रतीयतइत्यर्थः । एतदेवोपसंहरति * एवं तावदिति * ननु यथा स्फोटवादिभिर्निरवयवस्यापि स्फोटस्य क्रमवर्त्तिभिर्नादैरस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिरिष्यते तथापूर्वस्य निरवयवस्याप्याग्नेयादिभिः क्रमप्रवर्त्तिभिरस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिर्भविष्यतीति द्वितीयकल्पमाशङ्क्य दूषयति * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * कथमिति * प्रत्यक्षग्राह्यस्यैवार्थस्य लोके ऽभिव्यक्त्यपेक्षादर्शनात्तस्याश्चेन्द्रियविषयद्वयान्यतमसंस्कारद्वारदर्शनादप्रत्यक्षत्वाच्चापूर्वे तदनुपपत्तेर्नाभिव्यक्तिः सम्भवतीत्याशयः । ननु कुलालादिव्यापारेणैतत्विलक्षणाप्यभिव्यक्तिः घटादेः सांख्यैरिष्टेत्याशङ्क्य नो लौकिकानां * दर्शनइत्युक्तम् * श्लोकं व्याचष्टे * सर्वेति * अपूर्वापेक्षयान्तरशब्दः घटादेश्चालोकानन्तरमुपलम्भात् प्रत्यभिज्ञया च प्राक् सत्त्वावसायात्तदभिव्यङ्क्तेष्यते ऽपूर्वस्य तु यागाद्यनन्तरमप्यनुपलम्भात्प्राक् सत्त्वे च प्रमाणासत्त्वाच्च द्वयमप्यभिव्यङ्क्त्यत्वकारणमस्तीत्याह * यदि चेति * अपरेषां निपुणं मन्यानां मतमुपन्यस्तमुपसंहरति * इतीति * असम्भाव्यमानत्वाद्विरोधित्वादनुपपादकत्वादुत्पत्त्यभिव्यक्त्योश्चाभावादिति सर्वथाशब्देनोक्तं न केवलमपूर्वासम्भवादस्य सूत्रस्यापूर्वसद्भावप्रतिपादनार्थत्वं ते नेच्छन्ति किं त्ववा-

चकत्वादपीत्याह * न चेति * भाष्यकृद्व्याख्यादूषणमुपसंहरति * इतीति * प्राभाकरवत्कार्यनियोगापरपर्यायस्वतन्त्रापूर्वाभ्युपगमे परोक्ता दोषाः स्युर्नास्मदभिमतशक्तिरूपाभ्युपगम इति भाष्यकृद्व्याख्यानमभिधातुमुपक्रमते * अत्रेति * विग्रहवदिवेति शरीरगतं स्वातन्त्र्येण कार्यारम्भकत्वमुपमानेनोपलक्षितम् । अङ्गकर्मभ्यः प्राक् फलोत्पादनायोग्यस्य प्रधानकर्मणः फलोत्पादनयोग्यता प्रधानकर्मभ्यः प्राक् फलोपभोक्तृत्वायोग्यस्य पुरुषस्य फलभोक्तृत्वयोग्यतेत्यर्थः । कर्मजन्यत्वं वक्तुं कर्मभ्यः परेत्युक्तं लौकिककर्मजन्याया योग्यताया अपूर्वत्वनिवृत्त्यर्थम * शास्त्रेत्युक्तम * श्लोकं व्याचष्टे * प्रधानेति * सदुपलम्भकप्रमाणाभावेनापूर्वस्यासत्त्वं यदुक्तं तदनुभाषणपूर्वकं निरस्यति * यत्त्विति * सर्वप्रमाणाभावे सत्यभावः स्यान्न कतिपयप्रमाणाभावमात्रेणेत्यशयः । न तु प्रत्यक्षाद्यप्रवृत्तौ शशशृङ्गवदभावनिश्चयात्तद्विरोधेन श्रुतार्थापत्तेरप्यप्रवृत्त्युपपत्तेः कथमन्याप्रवृत्तिरदोष इति स्वयमेवाशङ्क्याह * किमिति * प्रमाणान्तरायोग्यत्वादप्रवृत्त्या नाभावनिश्चय इत्याशयः । नन्वेवं सत्यपूर्वस्यानागमिकत्वात्तद्द्वारस्य श्रेयः साधनत्वस्यागमिकत्वं न स्यादित्याशङ्क्याह *शब्देति * श्रुतशब्दैकदेशभूतशब्दकल्पकत्वेन शब्दैकदेशभावाच्छ्रुतार्थापत्तिरप्यागम एवेत्यर्थः । विवक्षितविशिष्टवाक्यार्थप्रतिपादनाशक्तेः श्रुतशब्दमात्रस्यापरिपूर्णत्वसूचनार्थः स्वार्थशब्दः । शब्दैकदेशत्वमेवोपपादयितुमुपक्रमते * येनेति * ननु विनष्टाविनष्टकारणसाधारणी शक्तिः कार्यकारणनियमासिद्ध्यर्थं कल्प्यमानापि क्रियाजन्यत्वाभावान्नापूर्वशब्दाभिधेयेत्याशङ्क्याह * नियोगतश्चेति * शक्तिकल्पनावश्यकत्वे वक्तुमेतदुक्तं वस्तुतस्त्वत्र कर्मफलसम्बन्धचोदनायामतीतानामेव कर्मणां जन्यांशक्तिरेष्टव्येत्यर्थः अनन्तरफलोत्पत्तावप्यावश्यकत्वं नियोगतश्चेत्यनेनोक्तम् । एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * यदेव हीति * केवलस्यापि दर्शस्यानेककर्मात्मकत्वाच्छक्तिं विना साहित्यासम्पत्तेः * तदन्त्यं वेत्युक्तम * यदा च शक्तिं विना भूयसां यौगपद्यं न सम्भवति तदानन्तरफलोत्पत्तावपि सर्वकर्मान्ते फलोत्पत्तेरभ्युपगन्तव्यत्वाच्छक्त्यनङ्गीकरणे चानन्तर्यविशेषेणैकस्यैव साधनत्वापत्तेः शक्तिद्वारा यौगपद्यं सर्वकर्मणां साधनत्वव्यवहारायाङ्गीकार्यमित्याह * नियोगतश्चेति * सर्वमेतद्वृद्धवाक्येन द्रढयति * तथा चाहेति * सर्वपदार्थानां कार्यारम्भाक्यव्यवहाराङ्गतत्त्वस्य शक्तिद्वारत्वात्प्रोक्षणादिपदार्थस्वरूपे द्रव्या-

३६६।५

३६७।१

श्रितत्वादन्यदेशे विनष्टत्वाच्चान्यकाले ऽपि सञ्चारिस्थायिशक्तिद्वारा व्यवहारः सिद्धवतीत्यर्थः। नन्वविनष्टस्य कर्मणः शक्तिरलौकिकीत्याह * लौकिकं चापीति * कालान्तरे यस्योद्गतिरिति विग्रहः श्लोकं व्याचष्टे * यान्यपि चेति * क्रियाजन्यकार्योत्पत्त्यनुकूलादृष्टातिशयात्मकत्वात् संस्काररूपतापूर्वस्य संस्कारशब्देन सूचिता ननु लोके प्रमाणान्तरानुसारात्संस्कारात्मकशक्तिकल्पनं युक्तं वेदे तु शास्त्रैकसमधिगम्यत्वात्तस्य चानुष्ठानात्प्रागेव प्रवृत्तेस्तदा च फलस्य कालान्तरीयत्वानिश्चयान्नापूर्वाख्यसंस्कारात्मकशक्तिकल्पना युक्तेत्याशङ्क्य निरस्यन् श्रुतार्थापत्तिप्रमाणकत्वमपूर्वस्योपसंहरति * तेनेति * फलस्यानेकाङ्गप्रधानसाध्यत्वात्तेषां च क्षणिकत्वेन स्वरूपसाहित्यायोगात्फलस्यानन्तरोत्पत्तावपि साहित्यसिद्ध्यर्थं शक्तिकल्पनानुष्ठानात्प्रागप्युपपन्नेत्याशयः। एवं स्वपक्षसाधनमुक्त्वा इदानीं परोक्तानि दूषणानि परिहरिष्यन्नपि च यदि तावदित्यनेनोक्तं श्रुतसाध्यसाधनसम्बन्धविरोधं तावदनुभाषणपूर्वकं परिहरति * यत्त्विति * श्लोकं व्याचष्टे * यदि हीति ननूदकाहरणसाधनघट- ३६८।१
साधनस्यापि कुलालस्योदकाहरणसाधनत्वाप्रसिद्धेः। कथं यागोत्पादितया शक्त्या साधीतस्य फलस्य यागः साधनमित्याशङ्क्यानिरासार्थत्वेन द्वारशब्दं व्याख्यातुम् * सर्वेत्युक्तम् * यथा काष्ठादेर्ज्वलनाद्यवान्तरव्यापाररूपद्वारापेक्षत्वे ऽपि पाकादौ साधनत्वाविघातस्तथासंस्कारात्मकद्वारापेक्षत्वे ऽपि साधनत्वाविघात इति सूचयितुं व्यापारशब्दः। नन्वपूर्वस्य व्यापारात्मकतानेनोक्ता व्यापारत्वे ऽस्य स्थायित्वानुपपत्तेः। शक्तिसंस्कारत्वोक्तिविरोधापत्तेश्च कार्योत्पत्त्यनुकूलो ह्यदृष्टो ऽतिशयः सिद्धरूपः शक्तिशब्दवाच्यः सामान्यतः प्रसिद्धस्तद्विशेषस्त्वागन्तुकः संस्कारशब्दवाच्यः प्रसिद्धो न व्यापारात्मकः साध्योद्देशप्रवृत्तकर्तृव्यापारव्याप्यत्वाद्व्यवहितस्यापि यागस्य साधनत्वाविघात इत्याशयः। अथ वेत्यनेन सर्वस्य दध्यादेरवस्थान्तरापत्त्यपेक्षत्वे ऽपि साध्यत्वाविघातदर्शनात् स्वर्गादेः शक्त्याख्यापूर्वात्मकावस्थान्तरापत्त्यपेक्षित्वे ऽपि साध्यत्वाविघाताभिधानार्थत्वेनोत्तरार्धं व्याख्यातम्। उपभोग्यानुपभोग्यावस्थे स्थूलसूक्ष्मशब्दाभ्यामभिप्रेते यदा च स्थाय्यपूर्वे शक्त्यात्मकत्वात्कर्मफलाभ्यामनत्यन्तभिन्नं तदा फलं भवद्भावयेदनेनेत्थमिति त्रयाणामपि भावनांशानां यौगपद्याभिधानमपि कर्मफलकालयोरविच्छेदादुपपन्नं भवतीति सूचयितुमाह * एतावानिति * परिहारद्वये ऽपि वृद्धसम्मतिमाह *आह चेति * ज्वलनक्रियाद्वारा पक्तव्यमिति द्वार-

निर्देशोक्तिः सर्वसाधनानां द्वारापेक्षाप्रदर्शनार्था साध्यस्वावस्थान्तरापेक्षायामुत्तरार्द्धेन दृष्टान्तो ऽभिहितः । यत्त्वपूर्वं विनापि कर्मफलयोः साध्यसाधनसम्बन्धानुपपत्तिपरिहारोपपत्तेर्नापूर्वं कदा चित्फलसाधनत्वेन सम्भाव्यतइत्युक्तं तदनुभाषणपूर्वकं निरसितुमुपक्रमते * यत्त्विति * यदि शास्त्रादेवावगम्यते किं भवतो विरुध्यत इत्यनेन विनष्टस्यापि कर्मणस्साधनत्वोपपादनेनानुपपत्तिपरिहारमुक्तम् तावत्प्रश्नपूर्वं निरस्यति * कुत इति * न सम्भावितं सामर्थ्यरूपेण स्थायित्वं यस्येति विग्रहः । श्लोकं व्याचष्टे *नूनमिति * एतदेवोपसंहरति * तस्मादिति * अवधारणाप्यपूर्वस्यानुष्ठानात्प्रागेव सिद्धा किमुत सम्भावनेत्यर्थः । यदपि यष्टुरेवात्मनो यागैः सङ्गतस्येत्यनेनातिक्रान्तयागस्य साधनत्वोपपत्तेरपूर्वस्यासम्भवित्वमुपपादितं तदपि निरस्यति * न वेति * श्लोकं व्याचष्टे * यदि हीति * अतिक्रान्तानतिक्रान्तयागयोरिति बहुव्रीहिणा अतिक्रान्तानतिक्रान्तयागपुरुषविशेष इति मध्यमपदलोपीसमासो व्याख्यातः । अविशेषमेवोपपादयति * आत्मत्वमिति * नन्वात्मत्वाविशेषे ऽपि विनष्टयागे पुरुष सं एष यज्ञायुधी यजमान इत्यादिप्रयोगदर्शनेन यजमानत्वस्य भावादकृतयागे चाभावाद्विशेषो ऽस्तीत्याशङ्क्याह * यागत्वमपीति * अयं भावः यागान्वितं वा रूपं यजमानत्वेनाभिमतं यागविषयं कर्तृत्वमात्रं वा तत्राद्ये कल्पे यागरूपस्य विनष्टानुत्पन्नत्वेनोभयत्रासरूपतया तुल्यत्वादविशेष इति स्वरूपनिष्कर्षार्थभावप्रत्ययान्तेन यागशब्देनोक्तम्।यजमानशब्दप्रयोगस्तु भूतगत्या भविष्यतीति द्वितीयं कल्पं निरस्यति *न चेति* यथा क्रियारहितस्यानुत्पन्नक्रियस्य निर्व्यापारत्वात्कर्तृत्वं नास्ति तथौदासीन्याख्यमवस्थान्तरं प्राप्तस्य विनष्टक्रियस्यापीत्यर्थः । कर्तृशक्तिस्तु सर्वदा सद्भावान्न विशेषादिकेति स्वयमेवाशङ्क्याह * क-
३६९।१ र्त्रिति * उक्तेन च प्रकारेणातिक्रान्तानतिक्रान्तयागयोः पुरुषयोर्विशेषाभावे शुद्धस्य पुरुषस्य साधनत्वापत्तेस्तस्य चावैलक्षण्यात्फलवैलक्षण्यं न स्यादित्याह * अपि चेति * ननु विशेषान्तराभावे ऽप्यतिक्रान्तयागत्वमेव विशेषो भविष्यतीत्याशङ्क्याह * तथेति * अतिक्रमस्य विनाशस्य कार्यानुपयोगित्वेनोपलक्षणमात्रार्थत्वाद्यागान्तरातिक्रमे चोपलक्ष्ये पुरुषे विशेषाप्रतीतेः फलविशेषासिद्धिरित्याशयः। एकयागगतप्रयोगाल्पत्वबहुत्वे ऽप्येतं दोषमतिदिशति * एतेनैवेति * फलविशेषाभाक्त्वेन निरस्ता इत्यर्थः । कर्तुश्चाख्यातवाच्यत्वे सति प्रकृत्यर्थस्य यागस्य तद्विशेषणत्वप्रतीतेर्विनष्टस्य च का-

विज्ञप्तिः ।

---

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एक स्तबको मुद्रयित्वा प्रकाश्यते ।
२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण धर्मशास्त्र साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच्च शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयै ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १७
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषं) १
(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मानरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः) ४
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ६
(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्त) १

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय

THE CHOWKHAMBA SANSKRIT SERIES, BENARES.

This Monthly Magazine consists of very rare and invaluable ancient Sanskrit works on Vedic Literature, Hindu Philosophy, different sciences, general literature and Purânas &c. that have never been published before. The monthly issue of this Magazine dealing with one subject contains 100 pages of Demy octavo size, printed neatly in beautiful types on good thick paper, after being carefully corrected by the Pandits of the Government Sanskrit College Benares and other learned men.

The works included in the Magazine hitherto issued and those in course of preparation for publication are as follows:—

Names of Books,	*Fasciculus ready for Sale*
1. Sanskâraratnamâlâ, by Gopînâtha Bhatta.	(Sanskâra) 2
2. Shabdakoustubha, by Bhattoji Dikshita.	(Vyâkarana) 10
3. Sloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Pârthasârathi Misra. (Complete)	(Mimânsâ) 10.
4. The Vedânta-Tattvatraya, of Sri Lokacharyya along with Bhatta-Bhasha-Prakasha of Sri Narayana Tirtha. (Complete)	(Vedanta) 2.
5. Karana-Prakash, by Brahmadeva. (Complete)	(Jyotisha) 1.
6. Bhatta-Chintamani, of Gaga Bhatta.	(Mimansa) 2.
7. Nyaya-Ratna-Mala, of Sri Parthasarathi Misra.	(Do) 2.
8. Brahma Sutra, with Commentary called Viggyanamrita.	(Vedanta) 6.
9. Syadwâda Manjarî, by Mallishêna with a Commentary by Hêmchandra.	(Jaina Dars'ana) 2.
10. Siddhitrayam by Yamun Muni.	(Vedanta) 1.
11. Nyâya-Makarand of Sri Anand-Bodh Bhattarkacharyya with annotations by Chit-Sukh Muni.	(Do) 1.
12. Vibhaktyartha-Nirnaya, By M. M. Sri Girdhara Upadhyaya.	(Nyaya) 4.
13. Vidhirasâyana, of Appaya Dikshita.	(Mimansa) 2.
14. Nyayasudha, A commentary on Tanravartika, By Pandit Someshwara Bhatta.	(Mimansa) 6.
15. Si va-stotravali, by Utpaladevacharya. With the commentary of Kshemaraja.	(Vedanta) 1.

FOR INDIA, BURMA & CEYLON.

Annual subscription	(in advance)	Rs	7	8 0
Single copy		„	1	0 0

FOR FOREIGN COUNTRIES.

		£.	s.	d.
Annual subscription	(in advance) ...	0	15	0
Single copy ...	... ...	0	1	9

To be had from:— *Postage free.*

H. D. GUPTA, *Secretary.*

No. 53.] [*Price Rupee One.*

THE

CHOWKHAMBA SÂNSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA,

BY

PANDIT SOMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS VII.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

LONDON:—OTTO HARRASSOWITZ, LEIPZIG.

By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

181 43
S 61 N
F.7

Registered According to Act XXV. of 1867.

श्रीः

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तवकः—५३

र्थानुपयोगित्वात्प्रमेयान्तर्भूतव्यावर्त्तकत्वे लक्षणविशेषणत्वानुपपत्ते-रुपलक्षणत्वमात्रकल्पनयातिक्रान्तयागस्य पुरुषस्य साधनत्वं सम्भाव्येत तस्य कर्त्रधिकरणे निषेत्स्यमानत्वाद्यागस्य पुरुषोपलक्षणत्वानुपपत्तेः शुद्धस्यैव पुरुषस्य साधनतापत्तेः फलनानात्ववैचित्र्ये न युज्येते एवेत्याह * कार्त्रेति * ननु विनष्टस्य यागस्य वैलक्षण्यानापादकत्वे तज्जन्यस्यापूर्वस्यापि वैलक्षण्यानुपकृतेर्नावैलक्षण्यापत्तेस्त्वत्पक्षे ऽप्येतौ दोषौ तुल्यावित्याशङ्क्याह * यस्य त्विति * कार्यकल्प्यत्वाद्यथाकार्यं विलक्षणमेव तत्कल्प्यत इत्याशयः । यथा च सत्त्वातिक्रान्तयागस्य कर्तुः फलसाधनस्य फलान्तरोत्पादनकाले ऽपि भावाद् बहुप्रयोगानुष्ठानानर्थक्यं तथातिक्रान्ताङ्गस्यापि कर्तुः कर्मोपकारित्वाभ्युपगमे सकृत्कृतेष्वङ्गेषु श्रुतिक्रान्ताङ्गस्य कर्तुः कर्मान्तरकाले ऽपि भावात्कर्मान्तराणामप्युपकारसिद्धेः पुनरनुष्ठानानर्थक्यमित्याह * किं चेति * कूसूलमध्यगतस्य धान्यस्य धान्यान्तराद्यवच्छेद्यत्वदर्शनादङ्गमध्यगतत्वेनाङ्गावच्छिन्नसोक्ता यथा प्रत्यानावच्छिन्नः कर्त्ता फलसाधनं तथोपकारको ऽप्यङ्गावच्छिन्नः कर्त्तैव चेदिष्यते ततः प्रकृतौ कृतैरङ्गैर्विकृतावपि प्रसङ्गेनोपकारसिद्धेर्विकृतावङ्गानां प्राप्तिर्न स्यादित्यर्थः । श्लोकं व्याचष्टे *प्रयाजादीनामिति* उपकार्यभेदे ऽपि तावदन्यार्थसिद्धोपकारसद्भावे ऽप्यन्यो नापेक्ष्यते इह तूपकार्यमप्यभिन्नमिति सो ऽपि चेत्यनेन सूचितम्। नन्वङ्गानामपूर्वार्थत्वस्य वक्ष्यमाणत्वान्न कर्तुरुपकार्यतेत्याशङ्क्य *अपूर्वाभावादित्युक्तम् * प्रयाजादिगतस्यातिक्रान्तप्रयाजादिकर्तृजन्यस्योपकारस्य सद्भावेनान्यार्थाङ्गकृतस्योपकारस्येतरत्रापि सन्निधानाविशेषरूपप्रसङ्गलक्षणसद्भावात्तस्य कृतप्रयाजादेः पुरुषस्य न पुनरङ्गान्वनुष्ठातव्यानीति कर्तृषष्ठ्यङ्गीकरणात्तेन नानुष्ठातव्यानीत्यर्थः । ननु तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्याविशिष्टत्वादिति द्वादशाध्यायाधिकरणसिद्धान्तसूत्रे तन्त्रमध्यविधाननिबन्धनत्वेन प्रसङ्गस्य वक्ष्यमाणत्वात्कथमिह तदभावे प्रसङ्गः स्यादित्याशङ्क्य * विनापीत्युक्तम् * अन्यार्थाङ्गकृतस्योपकारस्यान्यत्रापि सन्निधानाविशेषस्तन्त्रार्थस्याविशिष्टत्वादित्यनेनोक्तः । तन्त्रमध्यविधानस्य फलं तच्चेह न तन्त्रमध्यविधानं विनाप्युपकारस्यात्मनो विततत्वाल्लभ्यतइत्यर्थः । को ऽननुष्ठाने दोष इत्याशङ्क्याह *तत्रेति* ननु पश्वर्थमनुष्ठितैर्विधुदादिभिर्ब्राह्मणतर्पणान्तैः सर्वैरङ्गैः सम्पाद्यस्योपकारस्याद्याङ्गानुष्ठानेनोपक्रान्तस्यान्त्याङ्गानुष्ठानात्प्रागसमाप्तेस्तन्मध्ये ऽनु-

१ अनुपलम्भ नेति २ पु० पा० ।

ष्ठीयमानेन पशुपुरोडाशेनैकदेशकालकर्तृकत्वात्प्रसङ्गेन तादर्थ्यमपि युक्तं, विकृतेस्तु प्रकृतिप्रयोगबहिर्भावात्प्रकृतौ कृतस्योपकारस्य विकृत्या सहैकदेशकालकर्तृत्वानुपपत्तेस्तादर्थ्यमयुक्तमित्याशङ्क्ते * नन्विति * प्रकृतौ कृतानां प्रयाजादीनां विकृत्या सह कालभेदादेतत्प्रयाजाद्युपकृतमात्मरूपं न विकृतौ प्रसङ्गेनोपकरोतीत्यर्थः । पश्वर्थस्यापि प्रयाजानुयाजादेः पुरोडाशप्रयोगे ऽनुपक्रान्ते समाप्ते वा ऽनुष्ठानाद्भिन्नकालस्यापि प्रासङ्गिकत्वोपकारकत्वं दृष्टमित्याशङ्क्य * अत्यन्तेत्युक्तम् * पश्वर्थप्रयाजादिप्रयोगस्य पुरोडाशप्रयोगाद् बहिर्भावे ऽपि पुरोडाशप्रयोगस्य तदन्तर्भावेन नात्यन्तं कालभेदो ऽस्तीत्याशयः । विकाराश्च न भेदः स्यादर्थस्याविकृतत्वादिति द्वादशाधिकरणसूत्रे पाशुकानां प्रयाजानुयाजानामेकादशसंख्यत्वेन पौरोडाशिकेभ्यः पञ्चत्रिंसंख्येभ्यो ऽनुयाजानां च पृषदाज्यद्रव्यकत्वेन शुद्धाज्यद्रव्यकेभ्यः पौरोडाशिकेभ्यो गुणतो विकृतत्वात्तिष्ठत्पशुकालत्वेन च पाशुकानां प्रयाजानां पौरोडाशिकेभ्यः सप्तदशविष्कालेभ्यः कालतो विकृतत्वादनुष्ठानभेदः स्यादित्याशङ्कानिरासार्थं गुणकालविकारे सत्यप्यर्थस्योपकारस्याविकृतत्वान्नानुष्ठानभेद इत्यभिधानेनास्यापि चोद्यस्योत्तरमुक्तं भवतीत्याह * वक्ष्यतीति * नन्वेतदेककालोपकारविषयत्वात्कथं कालभेदचोद्यस्योत्तरमित्याशङ्क्य आह * यदेव हीति * कर्तुव्यतिरिक्तापूर्वानभ्युपगमेनास्मिन्पक्षे कर्तुरेवोपकारकत्वात्तस्य च स्थायित्वेनाविकृतत्वात्कालभेदे ऽप्यन्यथात्वाभावात्प्रसङ्गसिद्धिरविरुद्धेत्याशयः । अतिक्रान्तयागकर्तृपक्षोक्तदोषाः कर्मविनाशस्यापि साधनत्वपक्षे ऽतिदेष्टव्या इत्याह * एतदिति * कथमित्यपेक्षायामनुभाषणपूर्वकमतिदिशति * यस्यापि चेति * हिशब्दार्थे चशब्दः एतदेव दृष्टान्तेनोपपादयति *तथा हीति * महारोगापेक्षया रोगान्तराणां शुभत्वं विवक्षित्वा शुभाशुभकर्मविनाशाविशेषदृष्टान्तत्वं वाशब्देन रोगानुत्पत्तेरप्युपलक्षणात्प्राक् प्रध्वंसाभावाविशेषदृष्टान्तत्वं विनाशानां तु वैचित्र्याभ्युपगमे वस्तुन्येव वैचित्र्यदर्शनात् वस्तुत्वापत्तेः । कर्मानन्तरभावितत्सम्बन्धिवस्त्वन्तराभावान्नामान्तरेणापूर्वमेव स्यादित्याह * यदि त्विति * श्रुतहानाश्रुतकल्पनाप्रसङ्गश्चास्मिन्पक्षे स्यादित्याह * न चेति * श्लोकं व्याचष्टे * यजेतेति * यद्वा यथाश्रुतस्वर्गत्यागेनाश्रुतस्वर्गाभावस्य फलत्वकल्पनं न युक्तं तथा श्रुतयागत्यागेनाश्रुतस्य यागाभावस्य साधनत्वकल्पनमपीति वक्रोक्त्या दर्शयन् पूर्वार्द्धं व्याचष्टे * अथ वेति * ननु यथापूर्वसाधनत्वकल्पने ऽपि न या-

३७०।

यस्साधनत्वाहानिस्तथा यागाभावस्यापि साधनत्वेन तद्धानिरित्याशङ्क्यानिरास्यार्थत्वेनोत्तरार्द्धं व्याख्यातुं पूर्वोक्तमेवापूर्वपक्षे श्रुतहानाश्रुतकल्पनाप्रसङ्गाभावमाशङ्क्यापूर्वकं स्मारयति * अपूर्वेति * भावनिरपेक्षस्याभावस्य साधनत्वादर्शनान्न विनाशस्य साधनत्वं सम्भवतीत्याह * न चेति * ननु विहिताकरणास्याभावरूपस्यापि प्रत्यवायसाधनत्वस्मृतेस्तत्कालान्यकरणापेक्षत्वे च तस्यौदासीन्यमात्रेणापि प्रत्यवायपरिहारसिद्धेरनुष्ठानानर्थक्यप्रसङ्गादवर्जनीयस्य निमिषितादेः प्रत्यवायसाधनत्वे विहितानुष्ठानेऽपि प्रत्यवायापत्तेर्विहिताकरणापेक्षत्वे[1] च तस्यौदासीन्यमात्रस्य निमिषितादेः साधनत्वेऽन्वयव्यतिरेकाभ्यामकरणस्यैव साधनत्वापत्तेर्भावनिरपेक्षस्याभावस्य साधनत्वं दृष्टमित्याशङ्क्याह * यदि त्विति * गुर्वाज्ञानानुष्ठानेनाहमवज्ञातोऽस्मीत्यवज्ञानिमित्तगुरुकोपदर्शनाद्धितावज्ञाख्यभावसहकृतस्यैव विहिताननुष्ठानस्य साधनत्वकल्पना युक्तेत्याशयः * अत एवाचार्यैः *

स्वकाले यदकुर्वन्तत्करोत्यन्यदचेतनः ।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ॥

इति विहितमकुर्वन्यदन्यत्करोतीति यदद्भिर्विहिताकरणनिमित्तस्यान्यकरणस्य प्रत्यवायनिमित्तत्वाभिधानादवज्ञायामेव याकरणस्य निमित्तत्वोपपत्तेर्विहितावज्ञानमेव प्रत्यवायहेतुत्वेनोक्तम् । नाभावेनैव जन्यतइत्येवशब्दोत्कर्षेण केवलस्य हेतुत्वं निरस्तम्।एवं च विहितस्याननुष्ठानान्नरः पतनमृच्छतीति स्मृतिरनुगृहीता भवति निमिषितादेस्तु हेतुत्वे विहिताकरणस्य किंचित्करणत्वाभावात् स्मृतिबाधापत्तिः एतां वाव स देवतामपरुणद्धि यो ऽलमग्निहोत्राय सन्नाग्निहोत्रं जुहोतीति वापरोधशब्देनावज्ञाभिधानात्सैव प्रत्यवायहेतुर्वेदादवसीयते निमिषितादेस्तु हेतुत्वं निष्प्रमाणकमेव तस्मादवज्ञाख्याशयविशेषरूपस्य भावान्तरस्य तत्रसम्भवान्न शुद्धस्य क्वचिद्धेतुता दृष्टेति ग्रन्थार्थः । याप्यपूर्वेऽस्य दोषस्य तुल्यतोक्ता तामनुभाषणपूर्वं परिहरति * यत्विति * यत्वपूर्वस्य शास्त्रानन्तर्गतिरुक्ता तामप्यनुभाषणपूर्वं परिहर्तुमाह * यत्त्विति * अनन्तरफलत्वे ऽप्यनेकाङ्गप्रधानसाहित्यमपूर्वे विना न सम्भवतीत्याशयः स्वर्गस्य ज्वरादिदुःखानुविद्धकेवलसुखात्मकत्वेन परलोकानुभवनीयत्वेन च षष्ठाद्ये भाष्यकृता वक्ष्यमाणत्वात्तत्प्रतियोगित्वेन नरकस्य सुखानुविद्धकेवलदुःखात्मकत्वेन परलोकानुभवनीयत्वेन च

---

१ पेक्षत्वेति २ पु० पा० । तत्र तस्यौदासीन्यमात्रस्येति नास्ति

३७१।२ सूचयिष्यमाणत्वप्रतीतेरानन्तर्यासम्भवाच्छास्त्रार्थावधारणवेलायामेव कर्मफलकालयोर्विप्रकर्षावगतेरपूर्वस्य शास्त्रान्तर्गतिरस्तीत्याह *स्वर्गेति* निरतिशयत्वस्यालौकिकत्वे ऽपि शब्दे सुखदुःखात्मकत्वात् सम्बन्धग्रहणसम्भवाच्चन्दनविष्ठादावुपचारेण स्वर्गनरकशब्दप्रयोगोपपत्तेर्वाक्यशेषे ऽप्यस्य सुखनिरतिशयावगतेर्निरतिशयसुखदुःखयोर्भोग्यत्वं सम्भवतीत्याशयः।ऐहिकस्यापि पुत्रादेरानन्तर्यं न सम्भवतीत्याह * ऐहिकमिति * ग्रामादिप्राप्तेष्वानन्तर्यसम्भवे ऽपि चिरकालोपभोगयोग्यत्वेन ग्रामादेः पुरुषापेक्षावशात्फलत्वावगमात्तस्य चापूर्वं विनानुपपत्तेः सूत्रादप्यपूर्वस्य शास्त्रान्तर्गतिरस्तीत्याह *न चेति* श्लोकं व्याचष्टे *चिरेति * एवं चानुष्ठानात्प्रागेव पूर्वान्तर्गत्यवधारणाद्वैगुण्यकल्पनयार्थापत्तेः प्रतिबन्धो यो ऽभिहितः सो ऽप्ययुक्त इत्याह * अतश्चेति * यापि निषेधेष्वपूर्वानन्तर्गतिरुक्ता तामप्यनुभाषणपूर्वकं परिहरति * यत्त्विति * विधिवन्निषेधस्यापि शास्त्रत्वात्तद्विषयस्य हननादेरपि शास्त्रीयतास्तीत्याशयः । हननादेर्लौकिकत्वाद्वैदिकापूर्वजनकत्वानुपपत्तिशङ्कां निरस्यन् श्लोकं व्याचष्टे *यथा हीति * एवमसर्वस्य विरोधित्वासम्भवित्वे निरस्येदानीमनुपपादकत्वं निरसितुं कल्पितमपि चेत्यनेनोक्तं निष्क्रियत्वं तावत् साध्यसाधनसम्बन्धानुपपादकत्वे हेतुं निरस्यति * सत्यपीति * निश्चलस्याप्ययस्कान्तादेर्देशान्तरे कार्यारम्भकत्वदर्शनाच्चलनाख्यक्रियाराहित्यनिमित्तो यः कार्यारम्भासामर्थ्यरूप उपालम्भो दोष उक्तः सो ऽप्ययुक्त इत्याशयः। निश्चलस्याप्यात्मनः प्रयत्नाख्यक्रियावत्त्वेन देशान्तरे शरीरप्रापणसामर्थ्यदर्शनाच्चलनादीत्यादिशब्देन यत्नोपादानं प्रापणादीत्यादिशब्देन शरीरोत्पादनमुपभोग्यविषयोपनयनं चोपात्तं यापि स्याय्याभ्यासम्भवेनानुपपादकतोक्ता तामपि निरस्यति * आत्मैव चेति * यत्वपूर्वजनिकायाः प्रक्षेपादिक्रियाया द्रव्याश्रितत्वात्तद्व्यतिरिक्ते यजमानात्मन्यपूर्वारम्भकत्वं न सम्भवतीत्युक्तं तत्परिहरति* क्रियापीति।ननु प्रक्षेपादिक्रियायाश्चलनात्मकत्वात्सर्वगतात्माश्रितत्वं न युक्तमित्याशङ्क्याह * आत्मवाद इति * द्रव्यवदानचलनहेतुभूतशरीरचलनात्मकस्य प्रक्षेपादेः प्रयोजकव्यापारत्वात्प्रयोज्यव्यापारद्रव्यवदानवत्कर्मभूतद्रव्याश्रितत्वानुपपत्तेः कर्त्राश्रितत्वस्यैव न्याय्यत्वाच्छरीरचलने ऽपि चात्मन एव कर्तृत्वस्यात्मवादे सूचितत्वाच्चलनस्य शरीराश्रितत्वे ऽपि तद्वच्छिन्नस्य शरीरचालनात्मकस्य प्रयत्नस्य भावनात्मकस्यापूर्वजनकस्यात्मन्यपूर्वारम्भकत्वं युक्तमित्याशयः । एतदेव व्याचष्टे * द्रव्यवदानेति*

३७२।२

नन्वात्माश्रितत्वे ऽपि क्रियायाः क्षणिकत्वेनोत्पन्नमात्रविनाशिन्यास्तेनोत्पद्यविनष्टत्वान्नास्यारम्भक्षणो ऽपि हीत्यनेन न्यायेनापूर्वारम्भकत्वं न सम्भवतीत्याशङ्क्याह *अतश्चेति*आशुतरविनाशः क्षणिकत्वं नोत्पन्नविनाशितेत्याशयः । नन्वात्माश्रितत्वे ऽपि क्रियायाः स्वसमवेतापूर्वाख्यशक्तिजनकत्वानभ्युपगमे क्रियापूर्वयोः काष्ठज्वलनवद्धर्मधर्मिभावाभावेनात्यन्तभेदापत्तेः श्रुतक्रियासाधनत्वानिर्वाहप्रसङ्गात् स्वसमवेतापूर्वजनकत्वस्य बलादभ्युपगमनीयत्वापत्तेः क्रियाविनाशे तदाश्रितस्यापूर्वस्यापि काष्ठविनाश इव ज्वलनस्य विनाशे फलोत्पत्तिकालं यावदनवस्थानाच्छ्रुतसाध्यसाधनसम्बन्धोपपादकत्वं न सम्भवतीत्याशयेनाशङ्कते * कथमिति * द्रव्यमेव विशिष्टशक्त्युपेतं व्यापारशब्दवाच्यं भवतीत्यनेन न्यायेन क्रियात्मनोरत्यन्तभेदाभावेनात्मसमवेतस्यापूर्वस्य क्रियातो ऽत्यन्तभेदाभावात् साध्यसाधनसम्बन्धोपपादकत्वं सम्भवतीत्याशयेन परिहरति * अत्रेति * शङ्कापरिहाराशयौ प्रकटयति * कथमिति * आत्मसमवाये कर्मशक्तित्वं विरुध्यतइत्याशङ्क्यार्थः किं चाग्न्यादेरप्यदृष्टे ऽस्यातिशयस्य दाहादिकार्यसाधकत्वोपपादकत्वमेवाग्न्यादिशक्तित्वं नाग्न्यादिसमवेतत्वं भास्वरत्वादेरग्न्यादिसमवेतत्वेनापि तच्छक्तित्वाप्रसिद्धेः स्मृतिहेतौ च संस्कारे स्मर्त्रात्मसमवेते ऽपि संवित्सामर्थ्यभाविनः स्मरणादित्यादिप्रयोगादनुभवशक्तित्वप्रसिद्धिरतो ऽन्यसमवाये ऽपि कर्मशक्तित्वाविरोध इत्याह * अपि चेति * श्लोकं व्याचष्टे * यदेति*नैतावता कर्मशक्तित्वहानिरिति शेषः । यच्चारादुपकार्यङ्गापूर्वाणां प्रधानसम्बन्धाभावे तदुपकारित्वं न सम्भवति प्रधानसाधनशब्दसमवायात्तु प्रधासम्बन्धाभ्युपगमे वपनादिवत् सन्निपत्योपकारित्वापत्तेरारादुपकारित्वं विरुध्येतेत्युक्तं तदपि निरस्यति *तथेति* वपनादेरात्मनेपदेन लिङ्गेन वा वपनाद्याश्रयभूतप्रधानसम्बन्धियजमानशेषत्वात् सन्निपत्योपकारित्वं ज्ञातं तेषां त्वाश्रयशेषत्वाभावात् सन्निपत्योपकारित्वानापत्तेर्नारादुपकारकत्वविरोध इत्याशयः । यत्त्वङ्गानां यजमानशेषत्वाभावात् सन्निपत्त्योपकारित्वाभावे ऽपि अङ्गापूर्वाणां यजमानाश्रितत्वाभ्युपगमे ऽपूर्वस्य योग्यतालक्षणत्वाद्यजमानेन च फलभोक्तृत्वप्रयोग्यतापेक्षणात्फलभोक्तृत्वयोग्यतापादकत्वात् प्रधानवत्पुरुषार्थत्वापत्तेः कर्माङ्गत्वम् * हीयेतेत्युक्तम् * तदप्यनुभाषणपूर्वकं निरस्यति * वस्त्विति * तदुद्देशविधिविषयत्वलक्षणतादर्थ्यहेतुकत्वाच्छेषत्वस्याङ्गानां च पुरुषोद्देशेनाविधानात्प्रधानस्य च फलसाधनत्वयोग्यताधा-

नेन योग्यत्वलक्षणाविरोधात्पुरुषाश्रितत्वमात्रेण तच्छेषत्वं वाच्यं न च तत्सम्भवतीत्याशयः । आश्रितत्वस्य शेषत्वाहेतुत्वं दृष्टान्तेनोपपादयति * राजार्थेति * राजशेषभूतस्याङ्गानुलेपस्यौपयिकमित्यर्थः । न च पतनप्रतिबन्धलक्षण एवाश्रयाश्रयिभावो विवक्षितः येनामूर्त्तानां न स्यादित्याह * न चेति * नन्वारादुपकार्यङ्गापूर्वाणामात्माश्रितत्वात् स्थायित्वेनोपकारित्वोपपत्तावपि सन्निपत्योपकार्यङ्गापूर्वाणां संस्कार्यव्रीह्यादिनाशे नाशात् स्थायित्वाभावेनोपकारित्वं न सम्भवतीत्युक्तमत आह * यस्त्विति * व्रीहिसमवायिनोऽप्यपूर्वस्य तन्नाशे नाशात्तण्डुलादौ सञ्चारासम्भवमाशङ्क्य व्रीह्यादिद्रव्यस्यैवावस्थाविशेषस्तण्डुलादिरूप इत्युक्तं न व्रीह्यादिरूपं संस्कार्यं किं तु तदुपलक्षितं प्रधानापूर्वसाधनीभूतं द्रव्यं तच्चावस्थाभेदे ऽप्याहवनीयप्रक्षेपात्प्राङ् न विनश्यतीत्याशयः।यत् व्रीहिसमवाय्यपूर्वं तत्तण्डुलादिषु व्रीह्यादिद्रव्यावस्थासु सञ्चरणपरम्परया द्रव्यदानपर्यन्तं गतमिति तच्छब्दाध्याहारेण योज्यम । ननु द्रव्यदानपर्यन्तं गमने ऽपि तस्याहवनीयप्रक्षेपान्नाशे सति तद्गतस्यापूर्वस्यापि नाशान्न प्रधानापूर्वोपकारित्वं सम्भवतीत्याशङ्क्याह *तत्रापीति* प्रोक्षणादिजनितापूर्वावशिष्टद्रव्यदानसाधितस्यैव प्रधानस्य स्वापूर्वानिष्पादकत्वात्प्रधानीयापूर्वनिष्पत्तौ व्यापृत्य प्रोक्षणादिजनितमपूर्वं निवर्त्तते नश्यतीत्यनु प्रधानापूर्वमनिष्पाद्येत्युक्तम्। ननु क्रियाश्चैत्रेव च स्थितेति यागादेः प्रधानस्यात्मनि समवायाभिधानात् प्रक्षेपादेश्च द्रव्यदानचलनहेतुभूतशरीरचलनात्मकत्वादात्मन्यसमवाये ऽपि प्रयोजकव्यापारत्वात् शरीरसमवेतत्वेन द्रव्यदानसमवायाभावात्तद्गतस्य प्रोक्षणादिजन्यस्यापूर्वस्य प्रधानसम्बन्धानुपपत्तेः कथं तदीयापूर्वनिष्पत्तौ तद्व्यापार इत्याशङ्क्य * तत्रापीत्युक्तम् * देवतोद्देशद्रव्यत्यागात्मकप्रयोजकव्यापाररूपांशद्वययुक्तस्य यागाख्यप्रधानस्य यावंशावुद्देश्यदेवतात्याज्यद्रव्ययोः प्रयोज्ययोर्व्यापारौ प्रयोजकव्यापारान्यथानुपपत्तिकल्पितौ तयोर्मध्ये यस्त्याज्यस्य द्रव्यस्य त्यागांशं प्रयोजकव्यापारं प्रति प्रयोज्यस्य व्यापारस्त्यागद्वारा प्रधानस्यांशस्तेन द्रव्यदाने प्रधानस्य समवायाद्धोमाख्यस्य च प्रधानस्य देवतोद्देशद्रव्यत्यागप्रक्षेपात्मकप्रयोजकव्यापाररूपांशत्रययुक्तस्य त्यागप्रक्षेपौ प्रयोजकव्यापाररूपावंशौ प्रति प्रयोज्यस्य त्याज्यस्य प्रक्षेपस्य द्रव्यस्य यौ व्यापारौ त्यागप्रक्षेपद्वारेणांशौ ताभ्यां तद्द्रव्यदाने प्रधानस्य समवायादित्यर्थः । स्वमते च कृतस्य पुरोडाशस्य यागसाधनत्वाद् द्रव्यदाने यागस्य समवायो भाष्यकारमतेनोक्तः

ननु सर्वाङ्गानुष्ठानोत्तरकाले समस्ताङ्गापूर्वाणां युगपत्प्रधानोपकारसाधनत्वस्य वक्ष्यमाणत्वात्प्रधानापूर्वनिष्पत्तौ व्यावृत्त्यनिवृत्तिरयुक्तेत्याशङ्क्यानिरासायैवकारः आरादुपकार्यङ्गविषयो ऽसौ समस्तशब्द इत्याशयः। सन्निपत्योपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादनमात्रेण पर्यवसानं तेषामर्थाधिकरणे वक्ष्यमाणया व्यवस्थयोपपादयति * तेनैव चेति * यच्च युगपत्प्रयोगवचनग्रहणावगतमङ्गापूर्वाणां प्र- ३७३।२
धानोपकारे प्रधानापूर्वाणां च फले यौगपद्यमन्योन्यसम्बन्धाभावान्न सम्भवतीत्युक्तम्। तदपि निरस्यति*यथैव चेति * यथाङ्गापूर्वाणां प्रधानापूर्वाणां चान्योन्यसम्बन्धस्तथारादुपकार्यङ्गापूर्वाणामेकात्माश्रितत्वेनान्योन्यसम्बन्धाद्युगपत्प्रधानोपकारलक्षणकार्यारम्भसिद्धिःप्रधानापूर्वाणामप्येवमेवान्योन्यसम्बन्धात्फलाख्यकार्यारम्भसिद्धिरित्यर्थः। ननूक्तेन न्यायेनाङ्गप्रधानापूर्वाणां स्थायित्वे सम्बन्धे च सम्भवत्यपि प्रधानापूर्वनिष्पादनमात्रेणाङ्गापूर्वाणां विनाशस्योक्तत्वात्। प्रधानापूर्वाणां क्रमोत्पत्तित्वेनाङ्गापूर्वाणां प्रधानसमकालानां क्रमवर्त्तित्वापत्तेः। प्रागूर्ध्वं चोत्पद्यमानानामत्यन्तविप्रकर्षात्साहित्यानुपपत्तेर्न युगपदुपकारः सम्भवतीति शङ्कते * कथं पुनरिति * सन्निपत्यारादुपकारिणां सर्वेषां प्रधानापूर्वनिष्पत्तौ व्यापारमाशङ्क्यावाद्यभिमतमभ्युपगम्यैव तावन्निष्पन्नानामङ्गापूर्वाणां स्वरूपेणानागतानां च कर्त्तव्यत्वावधारणेन यौगपद्यमुपपादयति * के चित्तावदाहुरिति * समस्ताङ्गोपेतप्रधानप्रयोगप्रक्रमादागामिनामपि तादृस्थ्यावस्थायाः प्रचलितत्वात्प्रधानसहायतोपपन्नेत्यर्थः। न त्वेवं सर्वाङ्गापूर्वाणां यौगपद्योपपत्तावपि एकप्रधानापूर्वनिष्पत्तौ विनष्टत्वात्प्रधानान्तरसहकारित्वानुपपत्तेरेकैकमिति वीप्सा न युक्तेत्याशङ्क्याह * आतिथ्येति * यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येति श्रुतेः साधारणार्थतया चतुर्थे वक्ष्यमाणत्वाद्यथातिथ्यायामुपात्तस्य बर्हिषस्तत्समाप्तावपि नापवर्गइति चतुर्थसिद्धो दृष्टान्तः अनागतानामसत्त्वान्नोपकारित्वं सम्भवतीति शङ्कते * कथं पुनरिति * स्वरूपासत्त्वे ऽपि कर्त्तव्यत्वावधारणमात्रेण हेतुतान्यत्रापि दृष्टत्वादुपपन्नेति परिहरति * एकान्तेति*नन्वेवं सत्युत्पत्त्युत्तराङ्गानुष्ठानवैयर्थ्यं स्यादिति शङ्कते * ननु चेति * समस्ताङ्गोपेतप्रधानानुष्ठानोपदेशान्यथानुपपत्त्योत्तराङ्गानुष्ठानसहकृतानां प्रधानापूर्वाणां फलापूर्वनिष्पादकत्वावगतस्तदकरणे सहकार्यभावे निष्पन्नान्यपि प्रधानापूर्वाणि स्वकार्यं

१ तेषामर्थेन संबन्ध इति तृतीये।

फलापूर्वं न निष्पादयन्तीत्याशयेन परिहरति *कथमिति* कार्यापवर्गित्वादपूर्वाणामपवर्गेण कार्यानिष्पादकत्वं लक्षितं कर्त्तव्यत्वावधारणस्याविहितत्वात्प्रधानोपकारित्वकल्पनानुपपत्तेरुत्तराङ्गविधीनां कर्त्तव्यत्वावधारणपरत्वाभ्युपगमे वानुष्ठानस्याविहितत्वात्प्रधानापूर्वसहकारित्वकल्पनानुपपत्तेर्वैधे चार्थे प्रमाणान्तरानवतारादनेन प्रकारेण यौगपद्यानुपपत्तेरपरितोषात्स्वमतेन सन्निपत्योपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पत्तौ सहकारित्वात्तेषां चात्मीयप्रधानापूर्वनिष्पत्तावपवर्गेऽपि फलापूर्वनिष्पत्तौ सहकारिणामारादुपकार्यङ्गापूर्वाणां फलापूर्वनिष्पत्तेः प्रागपवर्गाद्यौगपद्यं सम्भवतीति दर्शयितुमपूर्वोत्पत्तिप्रक्रियामाह*अन्ये पुनरिति * प्रधानानामन्योन्याङ्गत्वाभावेऽपि तक्रमस्याङ्गत्वात्पूर्वं प्रधानमकृत्वोत्तरप्रधानानुष्ठानेऽप्यपूर्वानिष्पत्तेस्तदानुत्पन्नेत्युक्तम्।पाश्चात्यानां सामवायिकानां प्रतिपत्तित्वात्तस्याश्च क्रत्वर्थोपात्तद्रव्यनाशदोषापरिहारनिमित्तक्रतुवैगुण्यापत्याकदा चिन्निष्पन्नस्याप्यपूर्वस्य नाशापत्तेस्तत्परिहारार्थं प्रक्रान्तद्रव्यक्रतुसम्बन्धसमापनार्थत्वेनापूर्वनिष्पत्यर्थत्वाभावात्प्रथमकृतेत्युक्तम् आरादुपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादकत्वनिरासार्थो मात्रशब्दः । ननु सामवायिकाङ्गापूर्वाणां प्रधानापूर्वनिष्पत्तौ व्यापारे सति तन्मात्रेणापवर्गात्फलापूर्वोत्पादकरूपप्रधानोपकारनिष्पत्तौ व्यापाराभावे सर्वेषां युगपत् प्रधानोपकारजनकत्वमेकदेशे वक्ष्यमाणं विरुध्यते इत्याशङ्क्यैवमित्याद्युक्तं सामवायिकाङ्गापूर्वानुगृहीतप्रधानजन्यत्वं सर्वेषां प्रधानापूर्वाणामेवंशब्देनोक्तम्।यद्यप्यारादुपकार्यङ्गापूर्वाणामेव प्रधानोपकारनिष्पत्तौ व्यापारस्तथापि प्रधानापूर्वेष्वनिष्पन्नेषूपकारानिष्पादनात्तन्निष्पत्तेश्च सामवायिकाङ्गाधीनत्वात्सर्वेषां युगपत् प्रधानोपकारजनकत्वाभिधानमिति दर्शयितुम् * यदेत्युक्तम् * परमार्थतः पौर्णमास्यमावास्याख्यस्यैकैकस्य प्रधानात्रिकस्य स्वाङ्गापूर्वानुगृहीतस्यैकैकस्वसमुदायापूर्वजनकत्वेऽप्येकदेशिमतेन समुदायापूर्वाभावमभिप्रेत्य दर्शापूर्वाणां तदीयारादुपकार्यङ्गापूर्वाणां च प्रतीक्षणमुक्तम् सामवायिकाङ्गापूर्वसाध्यात् प्रधानापूर्वनिष्पादनात्मकात्प्रारभ्यात्मिकात्। प्रधानोपकाराक्रमवत्प्रधानानुसारितया क्रमेणोत्पद्यमानात्प्रधानवैचित्र्यतो विचित्रादारादुपकार्यङ्गापूर्वे साध्यस्यस्योपकारस्य आरादुपकारीणयङ्गानि प्रतिसाध्यतया प्रधानानि च प्रत्यनुग्राहकतया साधारणरूपत्वेनाहृष्टोपयोगित्वाच्चापूर्वात्मकत्वेन युगपदुत्पत्त्यैकरूपत्वेन वैलक्षण्यं दर्शयितुमङ्गानीत्याद्युक्तम्।तदुपपादनार्थं विधिस्त्वेकश्रुतित्वादपर्यायविधानादित्येकाद-

शाधिकरणसूत्रावयवोक्तमपर्यायविधानमनुकीर्त्तितं व्याख्यातुम् * युगपदित्युक्तम् * आरादुपकार्यङ्गापूर्वाणामखण्डोपकारनिष्पत्तेः प्रागविनाशाद्यौगपद्यं सम्भवतीति सकलस्य तात्पर्यं कः पुनर्निष्पादनातिरिक्तः प्रधानापूर्वाणामारादुपकार्यङ्गापूर्वैरुपकारः क्रियतइत्यपेक्षायां फलापूर्वोत्पादनयोग्यताधानात्मकमुपकारं दर्शयितुमाह- * तत इति * ननु फलापूर्वस्यापि संस्काररूपत्वाभ्युपगमात्संस्कारस्यानुभवादिजन्यस्य कालविप्रकर्षेण क्षीणत्वस्य चात्यन्तं नाशस्य चोपलम्भादपूर्वान्तरवत्फललाभात्प्रागपि नाशापत्तेः साध्यसाधनसम्बन्धोपपादकत्वं न स्यादित्याशङ्क्याह * तत्त्विति * फल- ३७४।२
लाभार्थत्वेनैव तस्य कल्पितत्वात्तत्पर्यन्तं तस्य स्थायित्वमक्षीणत्वं च कल्पितमित्याशयः। ननु यत्र प्रतिबन्धकादिवशादनन्तरं फलं नोत्पद्यते तत्रास्तु नाम फलापूर्वकल्पनं यत्र त्वैहिकत्वात् पुत्रादिवददृष्टकारणानपेक्षत्वादनन्तरमप्युत्पत्तुं शक्तं प्रतिबन्धकाभावादनन्तरमप्युत्पद्यते तत्र तत्कल्पनं विनापि साध्यसाधनसम्बन्धोपपत्तेरघान्तरापूर्वद्वारा चाङ्गप्रधानसाहित्योपपत्तेर्यस्य च शब्दस्यार्थेन फलं साध्यते तेनापूर्वं कृत्वा नान्यथेति फलापूर्वस्य सार्वत्रिकत्वाभिधानमयुक्तमिति कोमलोक्त्या शङ्कते * यदि पुन रिति * तथापीत्यर्थं ततो ऽपीत्युक्तम्। अनन्तरं फलोत्पत्तावप्यपूर्वं विना चिरकालोपभोगासम्भवस्योपभोगश्चिरेणैषां न निमित्ताद्विना भवेदित्यत्रोक्तत्वात्कल्पनीयं फलापूर्वमिति परिहरति * बाढमिति * नन्वपूर्वस्य चिरकालस्थायित्वाभ्युपगमे अङ्गापूर्वाणामेव साक्षात्प्रधानोपकारकत्वोपपत्तेरखण्डोपकारापूर्वकल्पनं व्यर्थं प्रधानापूर्वाणां च साक्षात्फलजनकत्वोपपत्तेः फलापूर्वकल्पनं व्यर्थमित्याशङ्कते *अथेति * प्रात्यात्मिकशब्देन प्रत्येकमेकैकाङ्गजन्यतोक्ता साक्षात्तेषां जनकत्वसम्भवे ऽपि कल्पकक्रमानुरोधेनैवङ्कल्पितमिति परिहरति * सत्यमिति * निषेधार्थं न हीत्यखण्डं पदं श्लोकं व्याचष्टे * प्रधानानामिति * उत्पत्तिवाक्यावगतभेदानामपि प्रधानानां फलान्वयात्प्रागङ्गानां च प्रधानोपकारान्वयात्प्रागपूर्वानपेक्षत्वात्तदन्वयकाले च यौगपद्यप्रतीतेर्भिन्नापूर्वकल्पनाहेत्वभावादेकमेव फलापूर्वमुपकारापूर्वं च प्रतीयते प्रयोगकाले तु क्रमप्रतीतेः स्वरूपतः साहित्यायोगात्साहित्यसम्पत्त्यर्थं प्रात्यात्मिकानेकापूर्वकल्पनेत्यर्थः। नन्ववश्यकल्प्यैः प्रात्यात्मिकापूर्वैरेव साहित्यवत्फलसाधनोपकारान्वययोरप्युपपत्तेर्गौरवापादिका प्रागेकापूर्वकल्पना न युक्तेत्याशङ्क्याह * सर्वत्र चेति * प्रत्यात्मिकापूर्वाणां साहित्यसिद्ध्यर्थं क-

लिपतत्वात्कार्यान्तरोपयोगित्वं न सम्भवतीत्याशयः । प्रौढ्या तु तेषां कार्यान्तरोपयोगित्वे ऽप्यदोष इति प्रागुक्तं तस्मात्फलापूर्वमेव समस्तफलोपभोगपर्यन्तं स्थायि कल्प्यते तदुत्पादनमात्रेण तु प्रधानापूर्वाणां नाशः । द्वारादुपकार्यङ्गापूर्वाणां प्रधानोपकारोत्पादनेन सामवायिकाङ्गापूर्वाणां प्रात्यात्मिकप्रधानापूर्वोत्पादनेनेति व्यवस्था सिद्धेति तात्पर्यार्थः । यत्त्वस्मिन्पक्षे पौर्णमास्यां निष्पन्नानामङ्गापूर्वाणां दार्शब्राह्मणतर्पणानन्तरमुपकारोत्पादनेनापवर्गाभिधानात्तावत्कालं स्थायित्वमुक्तं तदमावास्यायां पुनरननुष्ठेयत्वापत्त्या दूषयति * के चित्त्विति * को ऽननुष्ठेयत्वापत्तौ विरोध इत्याशङ्क्य * आहैवञ्चेति * प्रधानादुत्पाद्यङ्गसङ्गत्यवादङ्गाहुतीर्विना न त्रयोदशसङ्ख्या सम्पद्येतेत्याशयः । पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्ययेति पौर्णमास्यमावास्याख्ययोस्त्रिकयोः करणत्वप्रतीतेस्तस्य च साधकतमत्वलक्षणत्वात्तमबर्थस्यातिशयस्यापेक्षिकत्वेनाङ्गसाहित्यं विनानुपपत्तेरङ्गसाहित्यावगमात्तस्य स्वानुपादेयकालं प्रत्युपादेयत्वेन विवक्षितत्वादेकैकस्य त्रिकस्य फलसाधनत्वाभावेनानुपकार्यत्वात् त्रिकद्वयस्यैकस्मिन्काले ऽनुत्पन्नस्योपकर्तुमशक्यत्वादुपकारानिष्पत्तौ चाकृतकार्यत्वेनाङ्गापूर्वाणामपवर्गाभावे ऽपि वचनबलाद्विःप्रयुक्तानामुपकारकत्वाकल्पनया त्रिरनुष्ठानं सेत्स्यतीत्येकदेशिनां दूषणपरिहाराभिप्रायमाशङ्क्ते* अन्ये त्विति* यैः प्रयोगद्वयान्ते ऽङ्गापूर्वाणामपवर्गः प्रागुक्तस्त एवान्यशब्देन परामृष्टा त्रिः सम्मार्ष्टीत्यादिवदावृत्त्य विधानात् । सकृत्प्रयुक्तानामेवोपकारकत्वोपपत्तेरपवर्गाभावे पुनः प्रयोगानर्थक्यापत्तेरपरिहार्यत्वात् स्वमतेन पौर्णमास्यान्निष्पन्नानामङ्गापूर्वाणां पौर्णमास्याख्यप्रधानत्रयसमुदायापूर्वनिर्वृत्तावपवर्गं दर्शयितुमाह* अथ वेति * कथं प्रधानापूर्वत्रयस्यैकसमुदायापूर्वजनकत्वावगतिरित्येक्षायां पौर्णमास्येति तृतीयाश्रुत्या करणत्वावगमादित्युक्ते ननु फलापूर्वमेव प्रति करणत्वं भविष्यतीत्याशङ्क्य समर्थः पदविधिरिति पदमात्रविधेः सामर्थ्याधीनत्वस्मरणात् सापेक्षत्वे च सामर्थ्यविघातापत्तेर्विभक्तिश्रुत्यामावास्यानैरपेक्ष्यावगमात्पौर्णमास्यसहितामावास्ययया स्वार्थं समुदायापूर्वं करोतीत्यकारप्रश्लेषेणोक्तम् । अङ्गापेक्षा तु करणश्रुत्याक्षिप्तत्वान्न सामर्थ्यविघातिकेति साङ्गत्येन सूचितम् । यद्वा साङ्गा पौर्णमासी स्वार्थं समुदायापूर्वं करोति अमावास्याप्यमावास्ययेति करणविभक्तिश्रुतेरङ्गसहिता स्वार्थं समुदायापूर्वान्तरं करोतीति योज्यम् । यदि त्वमावास्याख्यसमुदायसहितस्य पौर्णमास्याख्यसमु-

दायस्य दर्शपूर्णमासाभ्यामिति करणविभक्तिश्रुतेः स्वार्थफलापूर्वसाधनत्वावगमात्समुदायद्वयस्य चापूर्वं विना साहित्यानुपपत्तेः। समुदायापूर्वजनकत्वावगतिरित्येवं व्याख्यायते ततः साहित्यस्य द्वन्द्वावगम्यत्वाद्विभक्तिगम्यत्वाभिधानं तावद्युक्तं समुदाययोश्च फलसाधनत्वाभ्युपगमे पौर्णमास्यधिकरणे तन्निरासादरो ऽपि विरुध्येत अङ्गपूर्वाणां प्रधानोपकारापूर्वोत्पादनमात्रेण निवृत्तिसूचनार्थम् * पूर्वोक्तेनैवेत्युक्तम् * पौर्णमासीकालीनेष्वङ्गापूर्वेषु पौर्णमास्याख्यप्रधानत्रयोपकारं कृत्वा निवृत्तेष्वङ्गापूर्वजनितानुग्रहविशिष्टं पौर्णमास्याख्यप्रधानापूर्वत्रयम् एकं समुदायापूर्वं कृत्वा अपवृज्यतइत्यर्थः· फलापूर्वस्य तर्हि कथं निवृत्तिरित्याशङ्क्याह * तत्पुनरिति * स्वाङ्गापूर्वजनितानुग्रहविशिष्टामावास्याख्यप्रधानापूर्वत्रयजन्यतामावास्याख्यसमुदायापूर्वस्यैवंशब्देनोक्ता समुदायापूर्वद्वयाभ्युपगमस्य प्रकृतोपयोगमाह *अत श्रेति * समुदायापूर्वद्वयाभ्युपगमे पौर्णमासाख्यसमुदायापूर्वजननार्थं पौर्णमासाख्यप्रधानापूर्वत्रयेण स्वाङ्गापूर्वजनितोपकारापेक्षणादुपकारनिवृत्तौ च कृतार्थतया पौर्णमासीनिष्पन्नाङ्गापूर्वनाशादमावास्यायां पुनः प्रयोगानर्थक्यदोषाभावः। तदनभ्युपगमे त्वकृतार्थत्वात्पौर्णमास्यां निष्पन्नानामङ्गापूर्वाणां नाशायोगात्पुनः प्रयोगानर्थक्यदोषो दुःपरिहर इत्यर्थः। यद्प्यपूर्वस्य कर्मभिरुत्पत्तिरभिव्यक्तिर्वेति विकल्पोत्पत्तिरपि युगपत्तावन्न सम्भवति क्रमवर्त्तित्वात्कर्मणामित्युक्तं तदप्यपूर्वद्वारा कर्मणां यौगपद्योपपादनात्सुपरिहरमित्याह * एतयैवेति * कर्मवर्त्तिनामपि कर्मणामवान्तरकार्ययौगपद्यद्वारा युगपत्परमकार्यारम्भकत्वं वृक्षोदाहृतेन दृष्टान्तेनोपपादयितुमाह * आह चेति * वाक्यतदवयवाध्ययनरूपेण क्रमवर्त्तिनीभिरावृत्तिभिरभ्यासकर्मभिर्यथावान्तरसंस्कार्ययौगपद्यद्वारा वाक्यसमुदायात्मकाध्यायग्रहणसामर्थ्यरूपः परमसंस्कारो युगपद्भवति तथेदमपीति श्लोकार्थः। यच्चानवयवत्वान्न क्रमशो ऽप्युत्पत्तिर्न सम्भवतीत्युक्तं तदपि प्रौक्ष्या सावयवत्वाभ्युपगमेन निराकर्तुमाह * न चेति * आत्मादावमूर्त्ते निरवयवत्वदर्शनादपूर्वस्यामूर्त्तत्वेन निरवयवत्वं वाच्यमान चामूर्त्तत्वं निरवयवत्वे प्रयोजकं मूर्त्तेष्वपि परमाणुषु निरवयवत्वादर्शनादनेकप्रयोजककल्पनापत्तेः। किं त्ववयवसन्निवेशानात्मकतेत्याशयः। नन्वपूर्वस्यावयवसन्निवेशानुपपत्तेर्निरवयवत्वं भविष्यतीत्याशङ्क्याह * अवयवेति * कारणायौगपद्याद्युगपदुत्पत्त्ययोगाक्रमोत्पत्तिप्रतीतेस्तस्याश्च निरवयवत्वे ऽनुपपत्तेः। सूक्ष्मदर्शनायोग्यावयवसन्निवेशरूपेणापूर्वे

३७५।१

प्रतीयतेऽत्पद्यतइत्यर्थः । अस्मिंस्तु पक्षे सर्वेषामेकफलसाधनानां प्रधानानां साक्षादेकफलापूर्वसाधनत्वाभ्युपगमात्सर्वेषां चाङ्गानां साक्षादेककरणोपकारापूर्वसाधनत्वाभ्युपगमात्कर्मभेदानुनिष्पाद्यपूर्वभेदाभ्युपमो विरुध्येत।तदभावे चाज्यौषधमांसप्रोक्षण्यादिधर्मव्यवस्था त्तार्तीया वाङ्नियमादेश्चावान्तरापूर्वप्रयुक्तत्वंनावश्यमिकं न सिद्ध्येदित्यवश्यं प्रतिकर्मापूर्वभेदस्य कल्प्यत्वात्तद्द्वारा च क्रमवर्त्तिनामपि कर्मणां युगपदपूर्वोत्पादकत्वोपपत्तेर्नार्थापत्तिरवयवकल्पनायै प्रभवति कल्पितानामपि चावयवानाममूर्त्तत्वेनान्योन्यानवष्टम्भकत्वान्नावयवारम्भकत्वसम्भवः । मूर्त्तत्वकल्पने तदारब्धस्यापूर्वस्यापि मूर्त्तत्वापत्तेर्विग्रहवदिव स्वतन्त्रमपूर्वं कल्प्यमानं श्रुतकर्मफलसम्बन्धबोधकमेव स्यादिति प्रौढिमात्रमिदं प्राक् सत्त्वे प्रमाणाभावाच्छक्तिनियमाच्च कार्यकारणनियमसिद्धेरभिव्यक्तेरप्यत्यन्तासत्या एवोत्पत्तेरवश्याभ्युपगन्तव्यत्वात् सांख्योक्तसत्कार्यवादानुपपत्तेरनभिमतमप्यभिव्यक्तिपक्षं प्रौढ्या दर्शयति * यदापीति * फलदानाभिमुख्यकरणरूपास्यापूर्वस्याभिव्यक्तिर्विषयेन्द्रियोभयसंस्काररूपत्वात्शब्दादिविलक्षणा कर्मभिर्भविष्यतीत्युक्ते कथं कर्मभिरपूर्वस्य फलदानाभिमुख्यं क्रियतइत्यपेक्षायां प्रतिपुरुषं स्वीकारादित्युक्तम्।प्रतिग्रहेणेव कर्मभिः कर्त्तारं प्रत्यपूर्वस्य स्वत्वापादनादित्यर्थः । नन्विन्द्रियसंस्कारेण विषयसंस्कारेणोभयसंस्कारेण वा लोके शब्दाद्यभिव्यक्तिदर्शनात्कथं तद्विलक्षणास्याभिव्यक्तिः कल्प्यतइत्याशङ्क्याह * तथा हीति * कुलालादिव्यापारेणापि घटाद्यभिव्यक्तेः सांख्यैरिष्टत्वादिति भावः।तस्मादात्मनाधिष्ठितस्यापूर्वस्य फलदानोन्मुखत्वलक्षणाभिव्यक्तिर्युक्तेति परिहरति * आत्मस्थेति * आत्मकामादिश्रुतितो वात्मनः स्वभावेन सर्वफलावाप्तिः सामर्थ्यावगमात्फलानुपभोगस्य प्रतिबन्धनिमित्तत्वावगतेस्तदपनयनरूपाभिव्यक्तिः सामर्थ्यात्मकस्यापूर्वस्य कर्मभिः क्रियते नादैरिव शब्दस्य श्रवणप्रतिबन्धकांस्तिमितवाद्यपनयरूपेति प्रौढ्या शब्दतुल्यामेवाभिव्याक्तर्मीमांसकमाह * सर्वेति * आप्तकामादिश्रुतेरनुपलब्धिविरोधेनार्थवादत्वादयमपि प्रौढिवादः।अतो ऽपूर्वस्य श्रुतार्थापत्तिप्रमाणकत्वात्तत्प्रतिपादनार्थत्वेन भाष्यकारीयं सूत्रव्याख्यानं युक्तमित्युपसंहरति * तस्मादिति * यच्च वृत्त्यन्तरकारैरारभतेर्णिजन्तादच्प्रत्ययमुत्पाद्यारम्भयति प्रवर्त्तयतीत्यारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्वरूपकथनार्थतया एतत्सूत्रं व्याख्यातं तत्प्रकृतापूर्वप्रतिपत्त्युपायशब्दचिन्तानौपयिकत्वाच्चोदनास्वरूपकथनार्थत्वे चास्य सूत्रस्य चोदनासूत्रानन्तरं

कर्त्तव्यत्वापत्तेरयुक्तमित्याह * सूत्रस्यापीति * यदपि न चैतत्सूत्रं तत्प्रतिपादने स्पष्टमित्युक्तं तन्निरासायापूर्वप्रतिपादने सूत्रं यथाभाष्यं योजयति * तेनेति * आरम्भःशिष्यतइति भाष्येणारम्भप्रातिपदिकात्फलोत्पादनवाचिनस्तत्करोति तदाचष्टइति स्मृतेरारम्भमाचष्टे इत्यस्मिन्नर्थे णिचमुत्पाद्याच्प्रत्ययकरणेनारम्भ फलोत्पादनमाचष्टे इत्यारम्भशब्दव्याख्यानादारम्भश्चोदनेत्यारम्भशब्दार्थो लभ्यते चोदनेत्यपूर्वमित्यनेन च भावशब्दा अपूर्वस्य बोधका इति भाष्यदर्शनात् चोद्यतआक्षिप्यते इति कर्मव्युत्पत्त्यापूर्वस्य चोदनात्वमुक्तमिति प्रतीतेश्चोद्यते Sनेनेति करणव्युत्पत्तौ चोदनमिति भावव्युत्पत्तौ वा Sपूर्वस्य चोदनेत्यर्थः। तेभ्यः क्रिया प्रतीयेतेति क्रियाशब्दस्य तेभ्यो Sपूर्वक्रियावगतिरित्यनेन अपूर्वविषयत्वेन व्याख्यानात् तस्याश्च तस्मात्तेभ्यः क्रिया प्रतीयेतेत्यनन्तरसूत्रोपपत्त्यायुक्तमाशङ्क्य व्याचष्टे * यदि पुनरिति * कल्प्यस्य पूर्वस्यस्यानुवृत्तेर्विनैवाध्याहारेण लभ्यते कथमाख्यातेभ्यो Sपूर्वं प्रतीयतइत्यपेक्षायां चोद्यते पुनराक्षिप्यते आख्यातेनापूर्वम्। अपूर्वस्य वा चोदकमाख्यातम्। आरम्भकत्वात्फलोत्पादनख्यापकत्वादित्यभिधानाच्च प्रकृतोपयोगी विस्पष्टश्चायमेव सूत्रार्थ इत्याशयेन यो भाष्यकृतोक्तः सूत्रार्थः स एव युक्तो न वृत्त्यन्तरकारोक्त इत्येवकारेणाभिधानात्तद्व्याख्यानार्थं भाष्यमपि व्याकृतं भवति। यदि पुनरित्याशङ्काभाष्यं नश्वरस्य कर्मणः स्थायित्वकल्पनानुपपत्तेरयुक्तमात्रमाशङ्क्य व्याचष्टे * यदि पुनरिति * कल्प्यस्यापूर्वस्य स्थायित्वकल्पनायाः सिद्धस्य कर्मणः स्थायित्वकल्पना लाघवाद्युक्तेत्याशयः। नैवमित्यादिपरिहारभाष्यमाक्षिपति * न हीति * गन्तापि प्रत्यक्षो देशान्तरं च तेन गत इति विजानात्यागत इति चेति गन्तृगम्यप्रत्यक्षत्वाभिधानेन गमनस्य प्रत्यक्षत्वाभिधानम्। अपि वा व्यतिरेकादुपशब्दाविभागाच्च द्रोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववदिति षष्ठाधिकरणसिद्धान्तसूत्रस्य रूपशब्दाविभागाच्चेत्यवयवं व्याख्यातुं यद्भाष्यकृता करिष्यते तद्विरोधो भङ्गीत्वाद्यागस्येति च विनाशित्वेन यागस्य प्रस्तुतत्वात्तस्य च देवतोद्देशपूर्वकद्रव्यस्य त्यागात्मकसङ्कल्परूपत्वेनाचलनात्मकत्वाद्देशान्तरप्रापकत्वं नास्तीत्यर्थः। नानेन प्रत्यक्षानुपलब्धिरुक्ता किं तु प्रतिक्षणविनाशिपूर्वापरीभूतावयवत्वात्सिद्धरूपा प्रतीतेः स्थायित्वरूपानुपलब्धिरित्येवं व्याख्यानेनाद्यं तावदाक्षेपं परिहरति * अत्रेति * श्लोकं व्याचष्टे * यद्यपीति * स्वरूपेणाचलनात्मकत्वे Sपि यागस्य चलनात्मकप्रक्षेपादिविशिष्टस्य फलसाधनत्वात्ते- ३७६।१

मांशेन चलनात्मकत्वमभिप्रेत्य देशान्तरप्रापकत्वाभिधानमिति द्वितीयमाक्षेपं परिहरति * यागे ऽपीति * श्लोकं व्याचष्टे * न ह्रीति * यागग्रहणेन होमस्याप्युपलक्षणमभिप्रेत्य तस्य प्रक्षेपाधिकयागात्मकत्वात्समस्तादित्युक्तम्।कथं देशान्तरप्रापकत्वस्य स्थायित्वनिरासहेतुतेत्यपेक्षायामाह * तत्रेति * देशान्तरप्रापकत्वव्याख्यानार्थं संयोगविभागफलत्वं धात्वर्थानां वदता संयोगविभागयोर्द्धातुवाच्यत्वं निरस्तम् ।

त्यक्तं प्रतीतियुक्तिभ्यां भाष्यवार्त्तिकवारितम् ।
तयोर्धात्वभिधेयत्वं वदन्न व्रीडते कथम् ॥

निराश्रयस्य प्रक्षेपादेरवस्थानायोगात्तस्य स्थायित्वसिद्ध्यर्थं तदाश्रयेणापि स्थायिना भवितव्यं न चासावाश्रयः स्थाय्यस्ति संयोगविभागफलत्वेन प्रक्षेपादेः संयोगविभागयोग्यप्रादेशिकाश्रयापेक्षत्वात्तस्य स्थायिनो ऽनुपपत्तेः । स्थाय्याश्रयाभावात्कर्मणः स्थायिता न युक्तेत्याशयः । ननु चलनात्मककर्माश्रयस्य शरीरस्य कं चित्कालस्थायित्वोपपत्तेरैहिकफलानां तावत्कर्मणां फलोत्पत्ति यावत् स्थायित्वं सम्भवतीत्याशङ्क्याह * न चेति * अनुष्ठानोत्तरकालं योग्यानुपलब्ध्या कर्मणो सत्त्वावधारणान्नाश्रयस्थायित्वे ऽपि स्थायिता युक्तेत्याशयः । न चाभिव्यञ्जकाभावेनानुपलब्धिरभिव्यक्तस्याप्यनुपलम्भादित्यभिव्यक्तिशब्देनोक्तम् । अयं भावः अनभिव्यक्तस्य फलसाधनत्वाभावादनुष्ठानेनाभिव्यक्तिर्वक्तव्या तस्याश्च क्षणिकत्वे संस्कारजनकत्वानभ्युपगमात्फलासिद्धेः स्थायिताङ्गीकार्येति अनेन चानुष्ठानोत्तरकालानुपलम्भाभिप्रायेणान्यथाभाष्यं व्याख्यातम् । ननु चलनात्मकस्य कर्मणः स्थाय्याश्रयाभावेनास्थायित्वे ऽपि सङ्कल्पादेः स्थाय्यात्माश्रयत्वात् स्थायित्वं भविष्यतीत्याशङ्क्याह * सङ्कल्पेति * सङ्कल्पादेरपि क्षणान्तरानुपलम्भादेव नावस्थायित्वं विशेषतो ऽन्योन्यविरोधेन सङ्कल्पान्तरोत्पत्तौ पूर्वसङ्कल्पनाशादित्यर्थः । समुद्रध्यानाद्यादिशब्दाभ्यामुपात्तं न तदित्यादिभाष्यं विकल्पस्थाय्याश्रयनिरासार्थत्वेन व्याख्यातुं विकल्पं तावदाह * अवस्थानं चेति * तत्राद्यनिरासार्थं न तदित्यादिभाष्यं व्याचष्टे * न तावदिति * गमनफलप्राप्तिलक्षणार्थत्वं गमेदर्शयितुं व्यापिन इत्युक्तम् । विभागविशिष्टसंयोगफलत्वाच्चलनस्यात्मनि विभागरहिते ऽनुपलब्धिरित्याशयः । सर्वत्रेति भाष्यं हेतुप्रश्नोत्तरत्वेनावतारयति * कथमिति * तद्व्याख्यानुमाह * अहम्प्रत्ययेन हीति * यथास्मिन्काले ऽहमस्मीति न विशि-

ष्यते तथास्मिन्देशे इत्यपीति मात्रशब्दव्यावर्त्ये दर्शिते नन्वस्मिन्देशो वसाम्यहमित्यादिदेशतः कालतो वावच्छेद. प्रतीयतएवेत्याशङ्क्य चैतन्येत्युक्तम् प्रत्यक्षेण शरीरस्य देशकालवच्छेददर्शनाच्छरीराभेदोपचारेणासावहं प्रत्ययः परमार्थतः स्वात्मनश्चैतन्यस्वभावत्वेनातत्स्वभावाच्छरीराद्भेदाच्चैतन्यस्य च देशकालावच्छेदाप्रतीतेर्नात्मन ऽवच्छेदो ऽस्तीत्याशयः। कथमेतावता सर्वव्यापितेत्याशङ्क्याह * ततश्चेति * नन्वहम्प्रत्ययस्यात्मग्राहकत्वात्तत्कार्यत्वव्यपदेशो न युक्त इत्याशङ्क्याह * सर्वत्रेति * ग्राहकत्ववत्कार्यत्वस्यापि सद्भावाद्यथेष्टं व्यपदेशोपपत्तिरित्याशयः।सुखादि वा कार्यशब्देनाभिमतमित्यन्यथा व्याचष्टे * सुखेति * सुखादेः सार्वत्रिकत्वमुपपादयति * न हीति * ननु शरीरएवसुखाद्युपलम्भात् कार्यत्वं भविष्यतीत्याशङ्क्याह * न चेति * सुखादयश्च स्वयमुपालभ्यन्ते न रूपादय इव शरीरगुणाः परेणापीति भाष्ये पाठिते ऽपि शरीरे परेण प्रत्यक्षेणानुपलम्भादित्यनेन हेतुना सुखादेः शरीरधर्मता निषिद्धेत्यर्थः। कार्यस्य कारणासमानदेशत्वानियमात्समवायिकारणे कार्यसमवायात्कार्यशब्देनात्मधर्मत्वविवक्षा धर्मशब्देन सूचिता सार्वत्रिकसुखाद्युपलब्धेरात्मसार्वत्रिकत्वे हेतुतामुपपादयति * तत्रेति * शरीरात्मसंयोगहेतुकत्वात्सर्वस्यात्मकार्यस्य प्रादेशिकत्वे चात्मनस्तद्देशातिरिक्तदेशान्तरगमने ऽपि शरीरस्यात्मसंयोगायोगात्तद्धस्तेत्युक्तम् नन्वित्याशङ्क्याभाष्यमवतारयति * शरीरमात्रेति * शरीरपरिमितात्मवाद्यार्हतः शरीरान्तर्गतात्मवाद्यौपनिषदः लिङ्गपदानुषङ्गः पूरणार्थः किमनेन हेतोर्दूषणमित्यपेक्षायामाह * अतश्चेति * आगमनस्यासर्वगतत्वाक्षेपकत्वादित्याशयः। ननु सर्वगते व्योम्नि सर्वत्रावकाशदानाख्यकार्योपलम्भदर्शनात्कथं विरुद्धतेति प्रश्नपूर्वकमुपपादयति * कुत इति * अयं भावः युगपत्सर्वत्र कार्योपलम्भो व्योमवत्सर्वगतत्वं साधयेन्न चासावात्मन्यस्ति पर्यायेण सर्वत्र कार्योपलम्भस्त्वसर्वगतेष्वेव दर्शनाद्विरुद्ध इति श्लोकं व्याचष्टे * यदि हीति * सुखादेः शरीरात्मसंयोगहेतुकत्वेन बहिरसम्भवात्किञ्चि- ३७७।१
दन्यदित्युक्तं सुखादेरपि शरीरान्तरगतस्योपलम्भे युगपत्सर्वत्रात्मकार्योपलम्भः स्यान्न चासावस्तीति शरीरान्तरइत्यनेनोक्तं यदि गमनं विना कार्यक्रमो घटते ततः शरीरे ऽपि तथा स्यादित्यन्यथा हीत्यनेनोक्तं सक्रियत्वप्रसङ्ग इत्यनेन सर्वगतत्वसाध्यनिश्चलत्वविरोधित्वं हेतोरुक्तं निर्विशेषणस्तर्हि सर्वत्र कार्योपलम्भो हेतुर्भविष्यतीत्याशङ्क्याह * सन्देहे वेति * सम्प्रति साधनस्यानिर्णायकत्वात्साधा-

रणत्वं विशेषणं शरीरसहितगमनात्सर्वत्र कार्योपपत्तेः पराभिमतत्वं वृद्धवाक्येनाह * आह चेति * शरीरेणैव सह गमनादिति वक्तव्ये श्लोकपूरणार्थमनुवादभूतः संशब्दप्रयोगः तदुपपादनाय संमिश्रत्वाभिधानं न हीति परिहारभाष्यमवतारयति * तत्रेति * नत्विति पूर्वभाष्यपाठे तु हिताशङ्कानिरासे तेन प्रतिज्ञातेन नोपपत्तिरुच्यते इति योज्यमित्याह * येषां त्विति * पूर्वपाठेतु न हीत्यखण्डं पदं शङ्कानिरासाक्षमत्वेनोत्तरभाष्यमाक्षिपति*कथं*पुनरिति श्लोकं व्याचष्टे * परेणापि हीति * पर्यायेण हि सर्वत्र कार्योपलम्भस्यासर्वगतेष्वेव दर्शनाद्विरुद्धत्वं निर्विशेषणस्य चानैकान्तिकत्वं यदुक्तं तन्निरासो ऽस्मान्नावगम्यतइत्याशयः । गमनाभावे सति सर्वत्रोपलभ्यमानकार्यत्वादित्येवं विधस्य हेतोर्व्योम्नि सद्भावेन विरुद्धत्वाभावाच्छरीरे वा वृत्तेरनैकान्तिकत्वाभावादपुष्टत्वं मत्वा गमनाभावोपपादनेनाशङ्कानिरासायैतद्भाष्यमिति परिहर्त्तुं परिसंख्यार्थत्वेनाशङ्कानिरासासामर्थ्यमाह * तत्रेति * श्लोकं व्याचष्टे * परिसंख्यारूपणेति * तदबहुविरुद्धमित्यपेक्षायामाह*तदिति*अमूर्त्तस्य कात्स्न्यार्योगेन क्षीरोदकवत् कृत्स्नसंयोगासम्भवात् शरीराख्यभूतमिश्रत्वासम्भवान्न भूतैः सहात्मनो गतिर्युक्तेत्युक्ते नन्वसर्वगतद्रव्यपरिमाणक्षणत्वामूर्त्तैरसर्वगतात्मवादिनं प्रत्यसिद्धममूर्त्तत्वमित्याशङ्क्य * स्वतस्तावदित्युक्तम् * मुक्तावस्थायां सर्वैः सर्वगतत्वाभ्युपगमात्संसारावस्थायां शरीरसंबन्धोपाधिकमेव मूर्त्तत्वं परैरिष्यते न चौपाधिकेन मूर्त्तत्वेनाकाशस्येव घटादिनास्य मिश्रत्वं सम्भवतीत्याशयः । श्लोकं व्याचष्टे * य-
३७८।२ देति * सूक्ष्मत्वेन कृत्स्नसंयोगासम्भवकारणं सर्वतो विसारित्वं सूचितं चन्द्रप्रकाशादेरप्यनियतपरिमाणत्वेन कथं चिदमूर्त्तत्वव्यपदेशोपपत्तस्तद्वैषम्यायात्यन्तशब्दः दृष्टान्तत्वेन ज्ञानसन्तानोपादानं स्वतः शब्दाव्यावर्त्त्यं दर्शयितुम्*योऽपीत्युक्तम्*स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेति सप्तभङ्गिनयद्याहतःस्याद्वादी स्याच्छब्दस्याख्यातप्रतिरूपकाव्ययस्य कथं चिच्छब्दार्थवाचित्वाभ्युपगमादनैकान्तवादी बद्धानां संसारिणामात्मनां शरीरादत्यन्तव्यतिरेकाभावेन तन्मिश्रत्वान् मूर्त्तत्वं वदति अपिशब्दादौपनिषदो ऽपि यावत्संसारभाव्यणुपरिमाणलिङ्गशरीरमिश्रत्वान्मूर्त्तत्वं वदतीति सूचितं स्वस्वामिभावमात्रेण सम्बन्धस्योपपत्तेर्मिश्रत्वानाक्षेपकत्वादितरेतराश्रयाभिधानं नान्यस्य कदा चिदमूर्त्त-

त्वानवगमान्मूर्त्ततैव स्वाभाविकी भविष्यतीत्याशङ्क्य * मुक्तेत्युक्तम् * मुक्तावस्थायां मूर्त्तत्वे सति वाय्वाद्यभिघातदुःखापरिहार्यत्वेन मुक्तित्वे ऽप्यर्थापत्तेरमूर्त्तत्वेन लक्षितस्य स्वभावानपायित्वात्संसारावस्थायामपि न स्वभावान्यता युक्तेत्याशयः। ननु मिश्रणसंसर्गापरपर्यायसम्पर्काभावे ऽपि शरीराश्रितत्वाद्द्रव्येनेव रथी शरीरेणात्मा नेष्यते इत्याशङ्क्यास्पर्शवत्त्वाच्चेत्युक्तम्। एकदेशसंयुक्तस्याकर्षणं दृष्टं न चास्पर्शस्यैकदेशेनापि संयोगः सम्भवतीत्याशयः। ननु माभूच्छरीरेणात्मनो नयनं वाय्वादिभिस्तु ज्वालादिवत्प्रेरणं भविष्यतीत्याशङ्क्याह *न हीति* परप्रेरितस्य गमनासम्भवे ऽभिहिते स्वतन्त्रस्य तर्हीच्छापूर्वकात्प्रयत्नाद् गमनं भविष्यतीत्याशङ्कानिराससूचनार्थम् *स्वतन्त्रइत्युक्तम्* शरीरादू बहिः कदा चिदिच्छया गमनादर्शनाच्छरीरगमनेनात्मगमनासिद्धेः शरीरगतावेव प्रयत्नो हेतुर्नात्मगताविति्याशयः। नन्वेवं सति देशान्तरादागमनस्यैवासम्भवात्सद्भावाभ्युपगमे बहुविरोधाभिधानमयुक्तमित्याशङ्क्याह * तेनेति * गमननिमित्तसार्वत्रिककार्याभ्युपगमे गमनासम्भवात्केवलस्य शरीरस्याचेतनत्वेन कार्याक्षमत्वात्सर्वकार्योच्छेदाभिप्रायं बहुविरोधाभिधानमित्याशयः। अस्मत्पक्षे गमनाभावे ऽपि तत्फललाभादविरोध इत्याह *सर्वासर्वगतत्वे त्विति* यथेत्यनेन सर्वत्रोपलभ्यमानकार्यत्वात्सर्वगतत्वे साध्ये व्योम्नो दृष्टान्तत्वं सूचितम्। गमनाक्षिप्तस्य वा सर्वगतत्वस्य बहुविरोधास्पदत्वाद् गमनस्य बहुविरोधास्पदत्वाभिधानमिति सूचयितुं सर्वगतपक्षो न कथं चित्सम्भवतीत्याह किं चेति * शरीरपरिमितपक्षे ऽपि बहिर्निर्गतस्य केशादेरात्माधिष्ठाननिरासायानिर्गत इत्युक्तं देहादनिर्गत इत्यनेन च श्यामाकतण्डुलबालाग्राङ्गुष्ठाणुमात्रपक्षात्सामान्यतो निर्दिश्याणुमात्रपक्षस्य बलीयस्त्वसूचनार्थं पुनर्विशेषतो निर्देशः। ननु बौद्धैर्ज्ञानसन्तानस्यात्मत्वाभ्युपगमात्तस्य चाद्रव्यत्वेनापरिमाणपक्षो ऽपि सम्भवात् कस्मान्न निरस्यतइत्याशङ्क्यात्मवादे तन्निरासादित्याह * ज्ञानेति * अणुमात्रपक्षे तावद्दोषानाह * तत्रेति * मध्यमपरिमाणत्वे घटादिवद्विनाशापत्तेः सर्वाभ्युपगतनित्यत्वाविरोधित्वे नाणुमात्रपक्षस्य बलीयस्त्वसूचनार्थम् * नित्यः सन्निति्युक्तम् * श्लोकं व्याचष्टे * यदा हीति* तन्मात्रेत्यनेन मात्रान्तरसञ्चारानभ्युपगमे सर्वमात्रस्थसुखाद्यसम्भव इति यथाश्रुतं व्याख्याय तदभ्युपगमे ऽपि युगपत्पदाध्याहारेण व्याख्यातुम् *ततश्चेत्युक्तम्* अथेत्यनेन गात्रान्तरसञ्चा- ३७९।२

१ सुस्थिवैयर्थ्योपपत्तेरिति २ पु० पा०।

रात्सर्वत्रोपलम्भो लघुत्वाच्च सूक्ष्मकालभेदानुपलब्धिरिति शङ्कास-ञ्चरणप्रमाणाभावान्निपुणतो ऽपि लक्ष्यमाणे कालभेदानुपलम्भाद-तिसौक्ष्म्ये च वेदानां तदनुभवोत्पत्तिकालं यावदेकत्रानवस्थानेनैक-गात्रे ऽप्युपलम्भापत्तेरुपन्यासपूर्वकं निरस्ता क्रमेण वाणुमात्रेषु शरी-रावयवेषु सञ्चरतो ऽनन्तपरमाण्वारब्धे शरीरे बहुकालं पूर्वसम्ब-द्धपरमाणुवियोगापत्तेः पुष्टिरादिशब्दोपात्तौ च वृद्ध्यशोषौ न स्या-तामित्येवं पुष्ट्यादीत्यवयवं व्याख्यातुम् * शरीरेत्याद्युक्तम् * शरीरमात्रपक्षो ऽप्यनेकादृष्टकल्पनापत्तेरयुक्त इत्याह * अथेति * एतदेवोपपादयति * सद्भाव इति * श्लोकं व्याचष्टे* सर्वे हीति* यथा सकलप्रतीत्यप्रतीतिव्यतिरेकेण विकलप्रतीत्यभावाच्छब्दस्य सावयवत्वमार्हतोक्तं स्फोटवादे प्रत्याख्यातं शब्दाधिकरणे च द्र-व्यत्वाभावेनावयवानामसंश्लेषो विश्लेषावश्यम्भावाच्च नित्यत्वं प्र-त्याख्यातं तथात्मनो ऽपीत्यर्थः । अवयवेयत्तायामुपचयापचयता-रतम्यायोगादवयवानन्त्यमार्हतोक्तं शरीरमात्रपक्षविरोधीत्यवधिश-ब्देनोक्तं संश्लेषाभावे को दोष इत्याशङ्क्य न चासंश्लिष्टानामित्युक्तं गात्रच्छेदे चेत्यनेन तत्सद्भावे चेति चकारेण सूचितमर्थं व्याख्याया-र्हतोक्तप्रमाणनिरासार्थं *यत्त्वित्युक्तम्* आत्मनः सङ्कोचविकासोप-
३८०।१ पत्तावार्हतोक्तदृष्टान्तनिरासार्थम् * दीपप्रभेत्याद्युक्तम् * अतिशब्दं व्याख्यातुं कथं चिदित्युक्तं श्लोकद्वयोक्तातिरिक्ताप्यदृष्टकल्प-नास्मिन्पक्षे स्यादित्याह * तेन चेति * सहसा जायते तच्च सहसैव विनश्यतीत्यादिशब्देनोक्तमुपसंहरति * तस्मादिति * ननु सर्वगतत्वे सत्युपनिषत्सु श्यामाकतण्डुलादिपरिमाणं विरुध्येतेत्या-शङ्क्याह * यत्त्विति * बालाग्रमात्रत्वाद्यादिशब्देनोक्तम् । वाक्यान्त-रेत्यनेनोपचारिकत्वे ऽन्यार्थविभुत्वश्रुतिविरोधो हेतुरुक्तः सावि-ष्ठ्युपाख्याने ऽङ्गुष्ठमात्रत्वाभिधानमङ्गुष्ठपरिमाणे हृदये नीयमानत्वा-त्कथं चिच्छ्रुतिसामान्यमात्रेण वृषादिवाक्यवद्व्याख्येयमित्याह * यदपीति * गौणार्थत्वोपपादनार्थं पतिव्रताप्रशंसापरमेतद्वा-क्यमित्युक्ते ननु स्वमहिम्ना सावित्र्या पतिव्रतया मृत्योस्त्रातः प-तिरित्येतावता पतिव्रतात्वप्रशंसासिद्धेरङ्गुष्ठमात्रत्वाभिधानं किम-र्थमित्याशङ्क्य * काव्येत्युक्तम् * भारतस्येतिहासत्वे ऽप्यङ्गुष्ठमा-त्रत्वस्योत्प्रेक्षामात्रत्वसूचनार्थः काव्यशब्दः ।

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः ॥

इत्यवं लक्षणे उत्प्रेक्षाख्यकाव्यालङ्कारार्थं यमवशगम-

नं मृत्युरिति च विस्पष्टस्य प्रसिद्धस्य व्यवहारस्य प्रकर्षेण शंसनार्थं कीर्त्तनार्थमित्यर्थः। एतच्च द्वैपायनेनैव नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इत्यादौ सर्वगतत्वाभिधानादवसीयतइत्याह * तथा हीति* नन्वेवं सत्येकेनैवात्मना सर्वशरीरादिष्वोपपत्तेः ते सर्वे स्वेन स्वेनात्मनोपलभ्यमानाः सन्त्येवेत्यात्मवादभाष्ये प्रतिशरीरात्मभेदाभिधानमयुक्तमित्याशङ्कते * ननु चेति * ऐकात्म्ये पशुमनुष्यादिभिन्नजातीयदेहोपभोग्यानां फलानाम् एकजातीयेन देहेन भोगासम्भवे ऽप्येकजातीयदेहोपभोग्यानां फलानामेकेन देहेनोपभोगसम्भवादनेकशरीरवैयर्थापत्तेः सुखदुःखादिव्यवस्थानुपपत्तेरेकशरीरस्थेन चात्मना दृष्टार्थे शरीरान्तरस्थस्यात्मनः प्रत्यभिज्ञापत्तेर्भेद एव युक्त इति परिहरति * नैष दोष इति * आद्यं हेतुं व्याचष्टे * इतरथा हीति * ननु यथापूर्वकृतकर्मफलोपभोगायोपात्ते देहे तदुपभोगान्नष्टे कर्मान्तरफलोपभोगार्थं देहान्तरार्थवत्त्वं तथैकस्मिन्नपि जन्मनि यत्कर्मफलोपभोगार्थं यो देहो ऽर्जितस्तेन कर्मान्तरफलोपभोगस्याशक्यत्वात्तदर्थं देहान्तरार्थवत्त्वं भविष्यतीत्याशङ्कते * जन्मान्तरेति * परिहरति * नेति * यावन्ति कर्माणि फलदानाय प्रवृत्तानि तावद्भिरुपात्तैर्नैकेनैव देहेन सर्वफलोपभोगसिद्धेर्देहान्तरानर्थक्यं जन्मान्तरे तु पूर्वदेहनाशाद्देहान्तरार्थवत्तेत्यर्थः। द्वितीयं हेतुं व्याचष्टे * सर्वेति प्रतिशरीरं चेति * चकारसूचितानि हेत्वन्तराण्याह * अन्यदीयैश्चेति * प्रत्यभिज्ञापत्तिरप्यनेन सूचिता वसन्ते ब्राह्मणो ऽग्नीनादधीत ग्रीष्मे राजन्य इत्यादिवर्णविशेषव्यवस्थया यः कर्मचोदनानां व्यवस्थाख्यो भेदः स न स्यादित्युक्तम्। ननु ब्राह्मणत्वादेर्देहाश्रितत्वेनात्मैक्ये ऽपि देहभेदाद्व्यवस्थोपपद्यते इत्याशङ्क्य * एकस्यैवेत्युक्तम् * चेतनप्रवर्त्तकत्वाच्चोदनानामात्मनो ऽपि च देहसम्बन्धोपाधिकब्राह्मणत्वाद्यभिमानेन ब्राह्मणत्वादिव्यपदेशोपपत्तेः सर्वदेहेष्वैक्ये सति व्यवस्थानुपपत्तिरिति भावः। नानात्वे तु नैते दोषाः सन्तीत्याह * अत्रोति * ननु नानात्वे सति सर्वगतत्वाभ्युपगमात्सर्वेषामेकदेशत्वं स्यात् तच्च द्रव्याणां भिन्नदेशवृत्तित्वनियमाद्विरुद्धमित्याशङ्क्याह * सर्वेषामिति * मूर्त्तत्वप्रयुक्तो ऽसौ नियमो न द्रव्यप्रयुक्त इति भावः। ननु यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको ऽनुगच्छन्नुपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो ऽयमात्मेत्याद्युपनिषत्स्वैकात्म्यव्यवहारो नानात्वे विरुध्येतेत्याशङ्क्याह * तदपेक्षयैव चेति * समानदेशवृत्तित्वच्छब्देन परामृष्टा चैतन्यं

३८।२

बोधरूपत्वमात्ममहङ्कारास्पदत्वं सुखाद्याश्रयतादिशब्देनोक्ता रागद्वेषनिवृत्तये स चौपचारिको व्यवहार इत्याशयः । ननु नानात्वेऽपि सर्वगतत्वाभ्युपगमेन सर्वदेहसम्बन्धात्सुखाद्युपलब्धिव्यवस्था न स्यादित्याशङ्क्यते * कथं पुनरिति * देहान्तरगतस्य सुखादेः स्वसमवायाभावान्नोपलम्भापत्तिरित्याशङ्क्य * अन्यदीयेत्युक्तम् * स्वासमवेतस्यापि देहादेरुपलम्भात्समानदेशत्वमात्रमुपलम्भहेतुरित्याशयः । परपक्षसाम्यापत्त्यान्येषां परिहारं दूषयितुमुपन्यस्यति * के चित्त्वादिति * गर्भस्य मातुश्च यावात्मानौ तद्वर्त्तिनामिति समासार्थः। श्लोकं व्याचष्टे *शरीरेति* स्वसमवेतस्यैव दुःखादेरुपलब्धिरिति परिहारसाम्यमभिप्रेत्य* तत्रेत्युक्तम्* स्वासमवेतस्यापि देहादेरुपलम्भदर्शनादेनं परिहारं दूषयति * स्यादिति * अत्र सुखाद्युपलम्भव्यवस्थायामित्यर्थः। ननूभयपक्षतुल्यस्य दोषस्यैकं प्रत्युद्भावनायोगाददोषो भविष्यतीत्याशङ्क्याह * न त्विति * न च साम्यमस्तीत्याह * अपि चेति * स्वकर्मोपात्तस्यैव सुखादेर्भोगयोग्यत्वाद्व्यवस्थेति स्वमतेन परिहरति * तस्मादिति * श्लोकं व्याचष्टे * यदि हीति * न त्वन्यस्यात्मनोऽन्यदीये देहे भावात् त्वत्कृतयोरपि धर्माधर्मयोरात्मीयत्वापत्तेरव्यवस्था स्यादित्याशङ्कां निरस्यन्नुपसंहरति * तस्मादिति * तत्कर्मोपार्जितैस्त्वत्वैः क्रियमाणेषु कर्मसु कर्तृता यजमानानामृत्विक्परशुकर्मवदित्यात्मवादोक्तन्यायवार्त्तिकाद् शरीरात्मनोः स्वस्वामिभावव्यवस्थानाद्व्यवस्थेत्यर्थः । सर्वगतत्वसाधनस्य प्रकृतोपयोगमाह * एवमिति * एवमात्मसमवेतस्य कर्मणोऽस्वस्थानमित्याद्यकल्पनिरासार्थं नेत्यादिभाष्यं व्याख्याय प्रदेयद्रव्यसमवेतस्यावस्थानमिति द्वितीयकल्पनिरासार्थं यत्रेति भाष्यं व्याचष्टे * अथेति * आश्रयोऽपीति भाष्यं व्याचष्टे * न चेति * सत्यपीत्यादिभाष्येण द्रव्यवदानस्यैवावस्थाविशेषत्वाद्भस्मनोऽप्यवदानविरोधित्वमाशङ्क्य भस्मावस्थायां द्रव्यवदानरूपाप्रत्यभिज्ञानात् भस्मनस्तदवस्थात्वायोगाद्विरोधितोच्यतइति तद्विपरीतशब्देन सूचितम् ।नन्वदृश्यमानमपि द्रव्यवदानं कालान्तरभाविफलसिद्ध्यन्यथानुपपत्त्यावधारितस्थायित्वस्य कर्मणो निराश्रयस्यानुपपत्तेराश्रयत्वेनानुमास्यतइत्याशङ्क्यादर्शनहेत्वभावाद्योग्यानुपलब्धिविरोधेनानुमानासम्भवाभिधानार्थं फलक्रियेत्यादिभाष्यं व्याचष्टे *न चास्येति* सौक्ष्म्यादीनामित्याशङ्क्याभाष्यं व्याचष्टे *अर्थापत्त्येति* कल्पितमिति परिहारार्थं भाष्यं निश्चितानभिधानादयुक्तमाशङ्क्य मृदूक्त्वा परपक्षे ऽप्यतिगौरवाभिधानार्थत्वेन व्याचष्टे *

३८२।२

तथा सतीति * ननु स्वतन्त्रस्यैव कर्मणः स्थितिर्भविष्यतीत्याशङ्क्य निरासार्थमनाश्रितमिति भाष्यं व्याचष्टे * एवमिति * क्षणिकत्वेनान्यत्रावगतस्य कर्मणोऽत्र स्थितिरनुपलब्धिकारणं च स्वातन्त्र्यादिकं कल्प्यमित्यतिगौरवमेवंशब्देन वदता तादृशशब्दस्यायुक्तार्थत्वं सूचितम्। देशान्तरप्राप्तिस्वभावत्वेनान्यत्रावगतस्य कर्मणः औदासीन्यस्वभावकल्पने ऽप्यतिगौरवाभिधानार्थं स्वभावान्तरेति भाष्यं आद्यकल्पविषयत्वेन व्याचष्टे * अथेति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * एवकारेण स्थायित्वकल्पनस्यायुक्तत्वाभिधानाद्भङ्गित्यवयवो व्याख्यातः। प्रयोजनभाष्ये चिन्ताशब्दं तावद्व्याचष्टे * मूलेति * अनन्तरसूत्राभिहिता पूर्वसद्भावप्रयोजनत्वशङ्का निवृत्त्यर्थत्वे चिन्ताशब्दस्याधिकरणशब्देनोक्ते ननु द्रव्यगुणशब्दा अपीत्यपिशब्दात्प्रतिपदाधिकरणप्रयोजनमतदित्यभावे तत्रैकस्मादपूर्वमित्येतावन्मात्रस्य सिद्धान्तार्थत्वेन द्रव्यादेरपूर्वार्थत्वोपपत्तेः प्रतिनिधिर्न युक्त इत्याशङ्क्य मूलशब्देन प्राधान्याद्भावार्थाधिकरणमुक्तम्। एवंशब्दार्थे ऽपि शब्द इत्यर्थः। प्रयोजनमुपपादयति * द्रव्यादीनामिति * न देवताग्निशब्दक्रियमन्यार्थसंयोगादिति षष्ठाधिकरणे कर्मणामदृष्टार्थत्वात्तस्य प्रतिनिधिना सिद्धौ प्रमाणाभावात्प्रतिनिध्यभावो वक्ष्यतइत्यर्थः। ननु प्रक्रान्तापरिसमाप्तिनिमित्तदोषपरिहारार्थं कर्मणोऽवश्यं समापनाय द्रव्यान्तरस्यावश्योपादेयत्वात् पूर्वपक्षप्रयोजनं न युक्तामित्याशङ्क्याह * कथं तर्हीति * द्रव्यान्तरोपादाने सदृशानादरः पूर्वपक्षप्रयोजनमिति परिहरति * समापनीयमेवेति * ननु पूर्वपक्षे ऽप्याश्रयत्वेन कर्मणां ऽन्वयात्तत्सिद्धये सदृशादरो भविष्यतीत्याशङ्क्य कर्मणश्चेत्युक्तम्। नन्वेवमपि प्रतिनिधिरुपात्तः स्यादित्याशङ्क्याह * न चेति * अन्यार्थत्वमुपपादयति * पूर्वद्रव्यामिति * प्रक्रान्ता समाप्तिनिमित्तो दोषः प्रत्यवायशब्देनोक्तः। काम्यवन्नैमित्तिकस्यापि कर्मणः प्रतिनिधिना समापनं प्रक्रान्तासमापनदोषपरिहारमात्रार्थं न फलसिद्ध्यर्थमिति शङ्कानिरासार्थम् * नैमित्तिकेत्युक्तम् * प्रतिनिधिना ऽप्यनुष्ठितं नै- ३८३।१
मित्तिकं कर्माकरणनिमित्तप्रत्यवायपरिहाराख्यं फलं साधयतीत्याशयः। धातोश्च फलभावनाकरणवाचित्वे श्येनादिशब्दानां तत्सामानाधिकरण्यान्नामधेयतापि सिद्धान्तप्रयोजनमित्याह * नामधेयेति * कस्मात्तर्हि भाष्यकृता ऽसौ नोक्तेत्याशङ्क्याह * सेति * स्थितएतस्मिन्नधिकरणइत्यत्रोक्तत्वादित्यर्थः। गुणार्थित्वे त्वनुष्ठेयार्थमत्वन्नाधेयत्वे तदभावादनुष्ठानोपयोगित्वेन प्रयोजनत्वोपपत्तेः।

॥ अथ कर्मणां गुणप्रधानभावविभागाधिकरणम् ॥ ३ ॥

तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥

अवगतमेतदित्यादिभाष्येण भावशब्दानामपूर्वगमकत्वोक्त्या तदेतरत्तदर्थमिति न्यायान्नामशब्दार्थस्य भावशब्दार्थे कर्मप्रत्यङ्गत्वावगतेः कर्मणां नामार्थं प्रति प्राधान्याभिधानात्प्रधानकर्मवाचित्वस्यार्थादुक्तस्यापवादायेदमधिकरणं युक्त तत्र गुणप्रधानचिन्तायां भेदलक्षणासङ्गतिमाशङ्क्योपक्रमोक्तामेव सङ्गतिं स्मारयत्येवमिति द्रव्यं प्रति कर्मणो गुणत्वे दृष्टार्थत्वात् कर्मभेदे ऽप्यपूर्वभेदो नास्तीत्याशयः । विवेकशब्देन च न किं चिद् गुणकर्मास्तीत्याशङ्क्य गुणकर्मव्युत्पादनार्थता ऽस्याधिकरणस्य सूचिता भावार्थत्वेति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * आद्यपादेनावहन्त्यादेरपि यज्यादिवद्भाव्याद्याकाङ्क्षोत्थापनहेतुभावनावाच्याख्यातप्रत्ययथयोगेन भाषार्थत्वात्प्रसक्तिलक्षणया श्रुत्या तदर्थस्य भावनया भाव्यसाधनत्वेन ग्रहणात्प्राधान्यमित्येवमाश्रितत्वात् प्रयोगस्येति सूत्रावयवोक्तश्रुतिकृतधात्वर्थप्राधान्याभिधानार्थत्वेन भाष्यं व्याख्याय भाव्यत इति व्युत्पत्त्या भावशब्देन साध्याभिधानात्साध्यार्थत्वाविशेषादित्येवं भूतभव्यसमुच्चारणन्यायार्थतया द्वितीयेन व्याख्याते ननु व्रीह्यादेर्नामार्थस्य द्वितीयया भाव्यत्वेनान्वयान्नेह भूतभव्यसमुच्चारणन्यायो ऽस्तीत्याशङ्क्य भवनकर्तृभावनावाचित्वरूपभावार्थत्वाविशेषात्सिद्धे व्रीह्यादौ भावनां प्रति भाव्यत्वमशक्यं द्वितीयया वक्तुमित्येवं तृतीयेन व्याख्यातम् । प्रधानभूतकर्मवाचिताख्यातस्य प्राधान्योक्त्योक्ता । ननु व्रीह्यादेर्भाव्यत्वानभ्युपगमे तृतीयानिर्देशाभावे च साधनत्वस्याप्ययोगादनन्वयः स्यादित्याशङ्क्य धात्वर्थस्य प्रधानत्वेनाङ्गापेक्षत्वात्फलवत्सन्निधावफलं तदङ्गमिति न्यायेनापूर्वप्रयुक्तत्वाद्धर्माणां धात्वर्थस्य चापूर्वसाधनत्वाद् तृतीयानिर्दिष्टस्यापि व्रीह्यादेर्धात्वर्थसाधनतावसीयतइति सूचयितुमाह * यावद्धीति * न्याय्यशब्देन धात्वर्थफलवत्त्वस्य पूर्वाधिकरणन्यायसिद्धतोक्ता यथा यज्यादीनामर्थो व्रीह्यादिभिर्निष्पाद्यस्तथा ऽवहत्यादीनामपीति वदता सक्तुवत् द्वितीयाभङ्गः सूचितः । प्रधानकर्मत्वपूर्वपक्षस्यापूर्वभेदोपयोगित्वमाह * अत श्रेति * ततो ब्रूम इत्यादिसिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे * अत्रेति * यद्यपि द्रव्यस्य चाख्यातपदार्थस्य चान्वये धात्वर्थस्याख्यातपदश्रुत्या फलवत्त्वावगमाद्भूतभव्यसमुच्चारणन्यायाच्च सर्वत्र धात्वर्थनिष्पादकत्वं द्रव्यस्यावसीयते तथापि द्रव्यनिष्पादितस्य

धात्वर्थस्य कैमुर्थ्यापेक्षायामक्लृप्तप्रयोजनस्यैव यागादेरदृष्टापूर्वसाधनत्वं युक्तमवघातादेस्तत्कृतेनैव द्रव्योपकारेण नैराकाङ्क्ष्येणाप्रामाणिकत्वाद्यादृष्टार्थता युक्तेत्यर्थः। अनेन च सर्वेभ्य इति भाष्योक्तगुणकर्मत्वव्युत्पादनस्य अपूर्वभेदापवादार्थत्वं विवृतम्।इलोकं व्याचष्टे* सर्वत्रेति * अनेन चाख्यातत्वाविशेषणभूतैर्भाव्यार्थजन्मन इतिद्वयमपि प्रागवस्थायामभ्युपगमेन परिहृतं व्रीह्यादेर्द्रव्यस्य सिद्धत्वात् स्वरूपेण भाव्यत्वायोगं ऽप्यसिद्धेन तण्डुलीभावादिरूपेण साध्यत्वसम्भवात् सिद्धे च साध्यत्वाशक्तेरित्येतत्परिहृतं भवतीति सूचनायोपकरोतीत्युक्तम्। ३८।१

॥ प्रधानकर्मलक्षणम् ॥

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूत्वात् ॥ ७ ॥

यद्यपि यदक्लृप्तप्रयोजनं तस्यैवापूर्वसाधनत्वं युक्तं न सर्वस्य तथापि किमक्लृप्तप्रयोजनमिति व्यवस्थाहेत्वभावाद्विधिबलात् सर्वेषामपूर्वसाधनतावश्यमापद्येतेत्याशङ्क्य तद्विवेकार्थत्वं गुणप्रधानलक्षणस्यैवं सतीति भाष्योक्तमध्यायोपक्रमएवास्य च विवेकार्थं यद्गुणप्रधानलक्षणमिति वार्त्तिकेन विवृतत्वादव्याख्यानार्थं यैरिति भाष्यं व्याचष्टे * यैरिति * यद्यप्याख्यातानां भावशब्दत्वेनाभिप्रेतानां पूर्वनिर्दिष्टानां तानि द्वैधमिति तच्छब्देन परामर्शात्तद्वाच्यानां कर्मणां गुणप्रधानद्वारा तेषां गुणप्रधानवाचितोक्तेति यद्भावशब्दवाच्यैर्यैः कर्मभिर्न द्रव्यमुपक्रियते तेषां कर्मणां प्रधानत्वात्तद्वाचीनि भावशब्दाख्यान्याख्यातानि प्रधानकर्मवाचीनीति व्याचक्षाणेन भाष्यकृतोक्तम्।तथा व्याख्यातार्थस्यापि बुद्धिस्थत्वात्तच्छब्देन परामर्शोपपत्तेः क्लिष्टव्याख्या न युक्तेति मत्वा भाष्यस्थं भावशब्दमुपेक्ष्य कर्मभिरित्येतावन्मात्रमुक्तं संस्कर्त्तुभित्यस्य सूत्रोक्तं च प्राप्तिविकारार्थत्वं च दर्शयितुं* धर्म तो वेत्युक्तम् * प्रधानत्वाभिधानस्यापूर्वभेदोपयोगित्वमदृष्टार्थानीत्यनेनोक्तम्।

॥ गुणकर्मलक्षणम् ॥

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयते तस्य द्रव्यप्रधानत्वात् ॥ ८ ॥

सूत्रं व्याचष्टे * यैः पुनरिति * अग्निमादधीतेत्यग्निशब्दस्य भाव्यत्वार्हकर्माङ्गभूताहवनीयादिरूपवाचित्वात्तस्य च यूपादिवत् शास्त्रीयकर्मोत्पाद्यत्वाद्यथाधानेनाग्नयइत्युक्तं स्वमतेनर्त्विजां प्राप्यत्वाद्भाष्यकृन्मतेन चोत्पाद्यत्वादवाप्यन्ते क्रियन्ते वेत्युक्तम् । वैतुष्यादिलक्षणं विकारमेव पुरोडाशोत्पादनयोग्यत्वाधानार्थत्वात् संस्कारत्वेनाभिप्रेत्य संस्क्रियन्ते वेत्युक्तम् । द्रव्यप्राधान्योपपादनार्थः प्रयोजनवच्छब्दः सूत्रद्वयोक्तव्यवस्थाहेतूपसंहारार्थं प्रत्यक्षमित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातं गुणप्रधानविचारस्यापूर्वसदसद्भावविवेकप्रयोजनतया न सर्वेभ्यः शक्यमपूर्वं कल्पयितुमिति भाष्यात् कुतः ऽपूर्वमित्यस्माच्च ज्ञातत्वेन प्रयोजनान्तरानपेक्षत्वात्प्रतिपादकं प्रयोजनमिति भाष्यमयुक्तमाशङ्क्योपपादयति * यदेति * यथैव भावार्थाधिकरणस्य लक्षणसङ्गत्यै धात्वर्थभेदानुनिष्पाद्यपूर्वभेदानुसारसिद्धिप्रयोजनत्वे ऽन्यदुपोदूघातेनेत्युपोदूघातशब्देनोक्ते ऽप्यनुष्ठानार्थत्वाच्चिन्तायास्तदुपयोगिप्रयोजनान्तराभिधानं तथेहापीत्याशयः । पूर्वपक्षप्रयोजनभाष्यं प्रैयङ्गवे चरौ व्रीह्यनुपदेशादयुक्तमाशङ्क्य व्याचष्टे * तदुच्यतइति * नन्वतिदेशप्राप्तानामपि व्रीहीणां प्रियङ्गुभिर्बाधात् कथमुत्पाद्यतइति प्रश्नपूर्वकमुपपादयति * कुत इति * प्रयाजेज्याङ्गभूतमाज्यं यथा प्रधानाङ्गतया श्रुतेन प्रियङ्गुद्रव्येण न बाध्यते तथा ऽवघाताङ्गभूता व्रीहयो ऽपीत्यर्थः । नन्वेवं सति सिद्धान्ते ऽप्युत्पाद्या इत्याशङ्क्याह * सिद्धान्ते त्विति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * व्रीहिस्वरूपानादरेणापूर्वं साधनांशनिवेशं संस्काराणां वक्तुं प्रधानौपयिकशब्दः । नन्ववघातस्य निर्वापोत्तरकालं विधानात्तथावनिरुप्तानामेवावघातोपपत्तेर्व्रीह्यन्तरोत्पादनानाक्षेपात्तेषां च यागप्रयुक्त्यैव लाभेनावघातस्याप्रयोजकत्वान्नेह पूर्वपक्षे ऽपि व्रीहिप्राप्तिरित्याशङ्क्ते * ननु चेति * सत्यं पदप्रयुक्तोपजीवित्वेनाप्रयोजकत्वं भवति गुणाधिकारे गुणफलसम्बन्धविधिपरस्य शास्त्रस्य वाच्यभेदापत्तेराश्रयाश्रयिसम्बन्धपरत्वायोगान्निराश्रयस्यच गुणस्य फलसाधनत्वानुपपत्तेराश्रयाक्षेपकशास्त्रान्तरापेक्षत्वाद्भवति वाजिनेज्यादौ च शास्त्रस्य नैरपेक्ष्ये ऽपि वाजिनादेः प्रयुक्त्यशक्तेरिह त्ववघातशास्त्रस्य यागशास्त्रानपेक्षत्वादवघातस्य च प्रयुक्तिशक्त्यविघातान्नान्यप्रयुक्तोपजीवने हेतुरस्तीत्याशयेन परिहरति * नैतदिति * तुल्यशब्देनान्यो-
३८५।३ न्यानपेक्षतांक्ता । श्लोकं व्याचष्टे * व्रीहिभिरिति * यागार्थव्रीहिनियमाभावं वक्ष्यमाणमभिप्रेत्य विशेषहेत्वभावोक्तिः । न च यथा सा

वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति शास्त्रयोरन्योन्यानपेक्षत्वे ऽपि तप्ते पयसि दध्यानयतीत्यानयतेर्द्विकर्मकत्वात्पयसश्चाधिकरणत्वेनाद्यदध्याख्यकर्मव्याप्यतया द्वितीयकर्मत्वात्समाप्तिः । शब्दार्थ इतिन्यायेनागारे गावो वास्यन्तामित्यगारस्येव गोवासनं प्रति दध्यानयनं प्रति प्राधान्यावसायादामिक्षायाश्च पयोरसप्रत्यभिज्ञानेन पयोऽवस्थाविशेषमात्रत्वेन ततो ऽर्थान्तरत्वाभावादामिक्षार्थत्वेन दध्यानयनस्य तत्प्रयुक्तत्वावगतेरामिक्षानुनिष्पादित्वे दध्यानयनान्निष्पत्तिरस्ति न वाजिनस्यामिक्षाप्रयुक्तादपि दध्यानयनान्निष्पत्तिसिद्धेर्दध्यानयनस्य च वाजिनार्थत्वेन प्रमाणाभावान्न दध्यानयनं प्रति वाजिनस्य प्रयोजकत्वे ऽर्थापत्तिः प्रभवति । तथावघातस्य यागानुनिष्पादित्वाभावाद्यागवच्च तस्यापि पूर्वपक्षे व्रीहीन्प्रति प्राधान्याविशेषान्न च यथा च सप्तमं पदमध्वर्युरञ्जलिना गृह्णातीति सप्तमपदपांसुग्रहणकर्मणो ऽनुनिष्पादित्वाभावे ऽपि क्रयवच्च नयनस्य स्ववाक्याश्रुतेः । सन्निधानात्त्वदूपदान्यनुनिष्कामतीति विहितनयनसाध्यत्वाविशेषे ऽपि नयनस्य प्रकृतैकहायनीसंस्कारार्थत्वेन तद्द्वारा क्रयार्थत्वावसायात्तत्प्रयुक्तत्वावगतेस्तत्प्रयुक्तनयनस्य लाभेनैव पदपांसुग्रहणकर्मणो ऽपि नैराकाङ्क्ष्यात्प्रयोजकत्वाभावस्तथावघातस्य यागार्थैर्व्रीहिभिर्नैराकाङ्क्ष्यस्ववाक्यश्रुतव्रीहिसंयोगेन वाक्यान्तरस्थव्रीह्यनपेक्षत्वादेकदेशद्रव्यत्वं चाप्रयोजकत्वकारणं तदुपलक्षितं च निनयनादिवत्प्रतिपत्तित्वमनाशङ्क्यमेव उत्तरार्द्धादादिरादानमिति भावव्युत्पत्त्यादिशब्देनावदानमुक्तम। ननु निर्वापोत्तरकालभवघातविधानाद्यागार्थं निरुप्तानामेव व्रीहीणामवघातसाधनत्वावगतेर्यथा पुरोडाशार्थकपालसाधनत्वात्तुषोपवापस्य कपालं प्रत्यप्रयोजकत्वं तथावघातस्यापि यागार्थव्रीहिसाध्यत्वाद् व्रीहीन्प्रत्यप्रयोजकत्वं भविष्यतीत्यभिप्रायेणाप्रयोजकत्वं चोद्यमिति सूचयितुं पदकर्मानन्तरमर्थाभिधानकर्मोदाहार्यमपि चरममुदाहृतम् । यागव्रीहीनवहन्तीत्यन्यार्थत्वेनाभिधानाभावान्न तुषोपवापतुल्यतेत्यर्थः । श्लोकार्थमुपसंहरति *तस्मादिति* ननु यागार्थत्वाभिधानाभावे ऽप्युपादानगौरवपरिहाराय यागार्थानामेव व्रीहीणामवघातसाधनत्वावगतेरन्यार्थत्वाभिधानफललाभादप्रयोजकत्वं भविष्यतीत्याशङ्क्याह * न चास्मिन्निति * निर्वापस्यापि पूर्वपक्षे यागार्थव्रीहिविषयत्वे प्रमाणाभावान्निर्वापावशिष्टानामपि च व्रीहीणां सन्निधेरुपादानगौरवाभावान्न यागार्थव्रीहिनियमः सम्भवतीत्याशयः । नन्वाग्नेय्याग्नीध्रमुपतिष्ठतइतिवदप्रकृतोपादाने प्रकृतकत्वन्वयलक्षणसामान्यसम्बन्धस्यापि कल्प्यत्वाद्गौरवापत्ते-

स्तत्परिहारार्थं प्रकृतानामेव व्रीहीणां ग्रहणं युक्तमित्याशङ्क्याह * न चात्रेति * विशेषाश्रुतेरिमे व्रीहयः कल्पसामान्यसम्बन्धा नेमइति विशेषाज्ञानादाग्नेयीन्यायानुपपत्तेः । प्रकरणस्यैव विशेषकत्वं वाच्यं न च तत्सम्भवति विनियोगमात्रे तस्य व्यापारादित्याशयः । ननु विनियोगे प्रमाणभूतस्येतिकर्त्तव्यताकाङ्क्षालक्षणस्य प्रकरणस्याविशेषकत्वे ऽपि सान्निध्यपरपर्यायाधिकारलक्षणस्य प्रकरणस्य सप्तमपदपांसुग्रहणादौ प्रकृतैकहायन्यादिसम्बन्धित्वाभ्युपगमेन दर्शनात्तद्वशेन विशेषे भविष्यतीत्याशङ्क्याह * न चेति * यदवदातव्रीहीणां साकाङ्क्षत्वाभावान्नैराकाङ्क्ष्ये चाधिकारस्य नवमाधिकरणसूत्रे विशेषकत्वनिरासान्नात्र प्रकृतग्रहणे प्रमाणमित्यर्थः। सिद्धान्ते तर्हि कथं प्रकृतग्रहणमित्याशङ्क्याह * संस्कारेति * आनर्थक्यपरिहारायापूर्वसाधनविशेषाकाङ्क्षायामधिकाराद्विशेषलाभो युक्त इत्याशयः । तत्रापि व्रीह्यादिशब्दस्यापूर्वसाधनत्वानभिधायित्वात् स्वाच्यलक्षितकर्मलक्षितापूर्वसाधनत्वस्य लक्षणापरम्परयावगतेः क्लेशाभिधानं पूर्वपक्षे तु नासौ न्यायो ऽस्तीत्याह * न चेति * तथोक्तं प्रयोजनमुपपाद्य स्वयं प्रयोजनान्तराण्याह * धर्मेति * यथौन्दुबरमुलूखलं सर्वौषधस्य पूरयित्वावहन्त्यथैनमुपदधातीत्यवघातस्य तण्डुलसाध्यपुरोडाशादिप्रयोजनाभावात्तण्डुलनिवृत्त्यर्थत्वाभावेनादृष्टार्थत्वात् सकृदनुष्ठानं धर्ममात्रे त्वदर्शनात् शब्दार्थेनापवर्गः स्यादित्येकादशाधिकरणे वक्ष्यते तथात्रापि पूर्वपक्षे स्यादित्येवं प्रयोजनं यागव्रीहीणां चावघातनियमाभावो द्वितीयमाज्ञानाय्योपांशुयाजाङ्गत्वाविशेषात्तद्विकारेष्वपि प्रयोगस्तृतीयम् । आदिशब्दाद्यवपक्षे ऽपि व्रीहीणामेवावघातस्त्रयाणामेव चेति प्रयोजनद्वयम् ।

॥ अथ संमार्जनादीनामप्रधानताधिकरणम् ॥ ४ ॥

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९ ॥

उदाहरणबहुत्वस्य प्रयोजनमाह * स्रुगिति * संमार्गपर्यग्निकरणसमुदायभूम्ना संमार्गशब्दः । अग्निजुह्वोर्द्वयेवदानद्वारप्रधानान्वयतुल्यत्वे ऽपि स्रुगन्तरविषयो विप्रकर्षो ऽभिमतः । द्वयवदानस्याग्निसम्बन्धापादनद्वारा च प्रधानसाधनत्वात् जुह्वा अप्यन्यपेक्षया विप्रकर्षः सम्भवति । उपभृतः प्रयाजानुयाजार्थाज्याधारत्वे ऽपि प्रधानहविराधारत्वाभावात् ध्रुवायाश्चोपांशुयाजार्थाज्याधारत्वे ऽप्यसाधारण्याभावात्प्रधानकालविप्रकर्षाच्च प्रधानविप्रकर्षः । प-

१ आज्ञायेनेति २ पु० पा० ।

रिधीनां जुहूतुल्याग्निपरिधानार्थत्वे ऽपि प्रक्षिप्यमाणहविर्बहिःपतनप्रतिबन्धकत्वेन प्रधानकालोपयोगित्वात् हविरन्यन्वयान्तरितप्रधानकालजुह्वपेक्षया प्रधानप्रत्यासत्तिः स्रुगन्तरापेक्षया तु स्पष्टैव पुरोडाशस्य त्याज्यत्वात् त्याज्यद्रव्यवदानसमवायित्वाद्वान्यतः प्रत्यासत्तिः। ननु प्रत्यासत्तिविशेषसूचनस्य किं प्रयोजनमित्याशङ्क्य प्रातिलोम्येन सिद्धान्तोपयोगमाह * एतदिति * किं तावत्प्राप्तमित्यादिपूर्वपक्षभाष्यमुपकारलक्षणशेषत्वाभावेन तदभावमात्रस्य प्रधानकर्मत्वानापादकत्वादयुक्तमाशङ्क्योपपादयति * तत्रेति * यद्यप्युपकारलक्षणशेषत्वाभावात् कुतो ऽपूर्वं कुतो नेति भाष्याच्चादृष्टार्थकर्मलक्षणमिदं न प्रधानलक्षणमिति वस्तुतो ऽवसीयते तथापि यथाश्रुतात् सूत्रात्प्रधानकर्मलक्षणं मत्वा पूर्वपक्ष इत्यर्थः। अनेन च प्रधानकर्मलक्षणापवादार्थतास्याधिकरणस्योक्ता एवं चापवादत्वेन सङ्गतिसिद्ध्यर्थमेव तान्यदृष्टार्थानीति वक्तव्ये तानि प्रधानभूतानीत्यभिधानात् सूत्रानुपालम्भः। सिद्धान्ते वा संमार्गादेरप्यदृष्टद्रव्योपकारजनकत्वाभ्युपगमाद्यथाश्रुतमपि लक्षणसूत्रद्वयमविरुद्धं तदा त्वेतदधिकरणस्य गुणकर्मत्वाभिधानप्रयोजनापूर्वाभावापवादाद् गुणकर्मलक्षणस्यैवापवादार्थत्वम्। उत्तरेण तु गुणकर्मस्यैवापवादिष्यते अत एव तदपवादापवादार्थमेतदधिकरणद्वयमेतदिति तच्छब्देनानन्तर्यविशेषात्प्रधानत्वलक्षणं परामृश्य तदपवादस्य गुणत्वलक्षणस्यापवादार्थमित्येवं व्याख्यातं वक्ष्यमाणगुणकर्मत्वापवादादुपचारतो लक्षणापवादाभिधानं यदा तु सम्मार्गादेसाध्यस्यादृष्टोपकारस्यावान्तरद्वारत्वाभावान्नापूर्वशब्दवाच्यतेष्यते तदा गुणकर्मस्वदृष्टार्थेष्वप्यपूर्वाभावाद् गुणकर्मलक्षणद्रव्योपकारत्वस्य सम्मार्गादावपवादमभावमव्यापकत्वमाशङ्क्य व्यापकत्वसिद्धये तदपवादार्थमेतदधिकरणम्। उत्तरं तु स्तुतशस्त्रयोर्गुणकर्मत्वाभावे ऽप्युपकारकत्वसद्भावादतिव्यापकत्वाभिधानेनापवादार्थमित्यध्यायार्थानुक्रमणवार्तिकं व्याख्येयम्। अस्मिंस्तु व्याख्याद्वये नास्याधिकरणस्य प्रधानकर्मलक्षणापवादार्थत्वाभिधानार्थं यैर्द्रव्यं न चिकीर्ष्यतइत्यनेन प्रधानकर्मलक्षणेनाहेत्युक्तं किं तु पूर्वपक्षबीजप्रदर्शनार्थं किमाहेत्यपेक्षायां सङ्क्षेपतः पूर्वपक्षार्थमाह * द्रव्येणेति * कर्मणो ऽनुपकारित्वाद् गुणत्वाभावे ऽप्युपकार्यत्वस्याप्यभावात्प्राधान्यमपि न स्यादित्याशङ्क्यानिरासार्थत्वेन द्रव्यं त्वेवं जातीयकमदृष्टार्थं कर्माभिर्निर्वर्त्तयत्तत्प्रतिगुणभूतमित्येवं भाष्यावयवं व्याख्यातुम् * द्रव्येणेत्युक्तम् * द्वितीयाया

३८६।१

१ व्याख्याने इति २ पु० पा०।

गुणकर्मत्वप्रामाण्यासम्भवमभिप्रेत्य तदन्यथानुपपत्तिकल्प्यादृष्टोपकारायोगाद् दृष्ट एवोपकारो वाच्यो न चासावस्तीति न * इदय-तदित्युक्तम् *

तुल्यश्रुतित्वाद्वेतरैः स धर्मः स्यात् ॥ १० ॥

नन्ववघातादिपूक्तस्य गुणकर्मलक्षणस्येहाभावात्तत्साधर्म्याभिधानमयुक्तमित्याशङ्क्याह * नैव हीति * यस्मान्नैतल्लक्षणं तस्माद् गुणकर्म्मत्वप्रमाणाद्वितीयातुल्यत्वात्साधर्म्याभिधानं युक्तमिति हि शब्दार्थः । पूर्वोक्तलक्षणत्यागे हेतुमाह * उपकारेति * तथा सति को विरोध इत्याशङ्क्याह * तादर्थ्येति * प्रत्यक्षं यजतइत्यादिभिर्द्रव्यं न चिकीर्ष्यतइति भाष्यात्प्रत्यक्षगम्यस्योपकारस्य लक्षणतोक्ता भाति सा च तृतीये निषेत्स्यमानत्वाद्विरुद्ध्येतेति * श्रुत्यादीत्यनेनोक्तम् * न प्रत्यक्षादेर्ज्ञापकत्वेन निमित्तत्वं नाप्युपकारस्य कारकत्वेनेत्यर्थः । लक्षणत्वाभावे किमुपन्यासप्रयोजनमिति प्रश्नपूर्वकमाह * किमर्थं . तर्हीति * अपूर्वाभावोपयोगितल्लक्षणं न स्वातन्त्र्येणेत्याशयः । श्लोकं व्याचष्टे * यत्रेति * पूर्वपक्षस्तर्हि न सम्भवतीत्याशङ्क्याह* पूर्वपक्षेति * द्वितीयाप्रमाणकगुणकर्मत्वाद्योगादेतल्लक्षणार्धीनत्वमापाद्य पूर्वपक्ष इति भावः । अवघातादौ द्रव्ये द्वितीयाया गुणकर्मत्वेन व्याप्तिः सधर्मशब्देनोक्तेति भ्रान्त्या ऽनैकान्तिकत्वादिदोषदुष्टत्वान्नेह सामान्यतो दृष्टं सम्भवतीति किं गुणकर्मणीति प्रश्नद्वाराशङ्कितेनेति ब्रूम इति भाष्येणेप्सिततमाख्यप्राधान्यवाचित्वस्मृतेः । प्रतियोगिनः कर्मणो गुणत्वावगतिरिति परिहृत्य * यद्यपीत्युक्तम * तदुक्तार्थत्वात्प्रत्यक्षाद्यगृहीते ऽर्थे शब्दप्रामाण्यशङ्कायाश्च प्रागेव निरस्तत्वेनासम्भवादनर्थकमाशङ्क्योपकारं विना विहितस्य कर्मणो ऽङ्गत्वापरपर्यायगुणत्वानुपपत्तिशङ्कानिरासार्थत्वेनोपकारं लक्षणया गुणभावशब्देनोक्ता प्रत्यक्षगम्योपकाराभावे ऽपि शब्दावगताङ्गत्वान्यथानुपपत्त्योपकारकत्वकल्पनं भविष्यतीति प्रतिपादनार्थत्वेनार्थवादीति सूचयितुमाह * सिद्धान्तेति * पश्चादुपकारापेक्षायां दर्शनं कल्पनं वा भविष्यतीत्यर्थः । एवं चोपकारकत्वस्याप्यव्याप्तिः परिहृता एतदेव व्याचष्टे * तत्रेति *

द्रव्योपदेश इतिचेत् ॥ ११ ॥

३८७।१

पूर्वपक्षाभिप्रायविवरणार्थत्वेन सूत्रं व्याचष्टे* परस्त्विति * श्लोकं व्याचष्टे * तन्नेति * उपदेशान्यथानुपपत्तिलभ्यगुणभूतत्व

विशेषणं गुणभूते ऽपीति भाष्योक्तं दर्शयितुम् * गुणभूतेत्युक्तम् * भाष्योक्तमन्वयव्यभिचारोदाहरणं दर्शयित्वा स्वयं व्यतिरेकव्यभिचारोदाहरणम् * तथेत्यनेनोक्तम् * हविषामभिधारणाधारत्वे ऽपि आधारनियमजन्यसंस्कारभाक्तेन प्राधान्यस्यापि विवक्षितत्वादन्वयाव्यभिचारादनुदाहरणत्वम्।व्यभिचाराभिधानस्य प्रकृतोपयोगमाह * अत इति * सत्यामपि द्वितीयायामित्यर्थः ।

न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥१२॥

न गुणभूतइति भाष्येण व्यभिचारनिरासार्थत्वेन सौत्रं नञं व्याख्याय तदुपपादनाय एवं हीत्यनेन स्मृतिरुपन्यस्ता।तत्र पूर्वपक्षिणा प्रयोगव्यभिचारस्योक्तत्वात्तन्निरासार्थं घटं करोतीत्यादौ प्राधान्ये ऽपि प्रयोगादनेकार्थत्वस्य वान्याय्यत्वाद्व्याप्यत्वेष्टतमत्वसमुदायात्मकोप्सिततमत्ववाचिन्याश्च द्वितीयायास्तदेकदेशव्याप्यत्वमात्रेण लक्षणया विषं भक्षयतीत्यादौ प्रयोगदर्शनाद्व्याप्यत्वमात्रवाचित्वेष्टतमत्वाधिक्यप्रतीत्ययोगाद् गुणत्वे तु क्वचिदप्रयोगात् प्राधान्यमेव वाच्यमिति प्रयोग एवोपन्यसनीयः । तमुपेक्ष्य स्मृत्युपन्यासस्याभिप्रायमाह * तिष्ठत्विति * स्मृतौ सत्यां प्रयोगो नादर्त्तव्य इत्याशयः । प्रयोगाविरोधो ऽपि न चेति भाष्येण वक्ष्यतइति तावच्छब्दार्थः । एतदेव प्रश्नपूर्वकमुपपादयति * किमिति * विशेषतो ऽत्रेत्याह * विवक्षेति * एतदेव व्याचष्टे * यदि हीति * तथा युक्तं चानीप्सितमिति स्मृतिस्तु लाक्षणिकप्रयोगसाधुत्वान्वाख्यानार्थान्यथालाघवाद्व्याप्यं कर्मेति स्मरणापत्तिरित्याशयः। न चेति भाष्यं प्राधान्ये ऽपि प्रयोगानुपन्यासात्परोक्तवैदिकप्रयोगप्रतियोगिप्राधान्यप्रयोगानुपन्यासाच्चापूर्वमाशङ्क्य पूरयितुमाह * तथा चेति * यदपि चेत्यादिभाष्यं सङ्कलय्य तात्पर्यतो व्याचष्टे * यानि त्विति * ओदनशिखण्डाख्यकर्मान्तरोपादानात् पचतिकरोत्योश्च द्विकर्मकत्वाभावात्तण्डुलबल्बजयोस्तदन्वयार्हतया करणत्वावगतेर्होमान्वये च होमस्याग्न्यधिकरणत्वप्रसिद्धेरग्नौ प्रक्षेपेण भस्मसाद्भावापत्तेः प्राधान्यायोगात्तृतीयार्थे द्वितीयेति शङ्काभिप्रायः। परिहाराभिप्रायमाह * तत्रेति * ओदनाद्यवस्थायास्तण्डुलाद्यवस्थया सह भिन्नाभिन्नत्वाद्भेदविवक्षायां तण्डुलादेर्गुणाकारत्वमभेदविवक्षायां प्रधानाकारतेत्यर्थः । प्राधान्यांशमुपादायेति विशेषणसामर्थ्यसूचितं तादर्थ्यं व्याचष्टे * यदेति * श्रुत्यु- ३८८।२

१ ऋपूर्णति २ पु० पा० ।

क्रं व्याचष्टे * यदात्विति * यदा तण्डुला बलवजाइचाप्तुमिष्यन्ते यदा च तण्डुलान्होमसम्बन्धित्वेनाभिप्रेत्यैवम्प्रेष्यति तदा प्राधान्यभावं भजन्तीत्यर्थः। तण्डुलानां होमाङ्गत्वाभावे होमसम्बन्धित्वेनेप्सितत्वायोगात्तण्डुलैर्जुहोतीति वेदवाक्येन गुणाभावावगतिरुक्ता होमसम्बन्धिनो भस्मीभावादीप्सितत्वानुपपत्तिमाशङ्क्य स्वस्य कण्डनाख्यस्य कर्मणः शोभादर्शनार्थमित्युक्तम् । पुंसः कण्डने शोभाबुद्ध्यभावात्। ब्राह्मण्या इति स्त्रीविषयतोक्ता एतावता तण्डुलानामीप्सितत्वायोगेनापरितोषात् गुणकामो वेत्युक्तं वीर्यकामस्तण्डुलैर्जुहोतीति तण्डुलानां वीर्यसाधनत्वश्रुतेर्या पत्युरात्मनो वा वीर्यं कामयते सा तेषां प्राधान्यं विवक्षतीत्यर्थः । ईप्सितत्वाभिप्रायस्य सम्भवित्वाभिधानार्थं भवति हीति भाष्यं व्याचष्टे * भवति हीति * तण्डुलानोदनं पचेत्यादौ केन चिदभेदविवक्षादिना कारणेन कश्चिदोदनावस्थापरिणतिरूपः प्राधान्यांशो विवक्ष्यते अगारे गावो वास्यन्तामिति प्रधानभूते ऽप्यगारे गुणांशस्तण्डुलान्पच तैरोदनं कुर्वित्युभौ सन्ति तण्डुला इत्यंशद्वयस्याप्यविवक्षादीप्सितत्वाभिप्रायासम्भवे ऽपि लक्षणया प्रयोगोपपत्तेर्न गुणत्वस्यापि द्वितीयावाच्यत्वकल्पनोचितेत्यभिधानार्थमन्यायश्चेति भाष्यं व्याचष्टे * न चेति * तेनेत्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * ननु वेदे वक्रभावेन वैवक्षिकप्राधान्यायोगात्सक्त्वादेश्च वास्तवप्राधान्याभावाद् गुणत्ववाचित्वाभावे द्वितीया न स्यादित्याशङ्क्यार्थे वेदे त्विति भाष्यं व्याचष्टे * कथं त्विति * द्वितीयेत्यादिपरिहारभाष्यं व्याचष्टे * तदुच्यत । इति * सक्तुषु विद्यमानं प्राधान्यं कथं वदतीत्याशङ्क्य * स्वत इत्युक्तम * गुणाभावोपपत्तिप्रश्नापाकरणार्थं प्राधान्याभावाभिधानस्य गुणत्वलक्षणापर्यवसायित्वमुत्तरार्द्धेन दर्शयता स एव द्वितीयान्त इत्यादिवक्ष्यमाणं भाष्यमनागतावेक्षणेन व्याख्यातं श्लोकं व्याचष्टे * द्वितीया तावदिति * कुतो हेतोः प्राधान्याभाव इति पृष्टे होमस्य सक्त्वर्थत्वं च कल्पते इति सम्भवलक्षणहेत्वभिधानार्थं न होमस्येति भाष्यं स्पष्टत्वादव्याख्याय कुतो होमस्य सक्त्वर्थत्वं नावकल्पतइति प्रश्नार्थं कुत इति भाष्यं व्याचष्टे * कथं
३८९।४ पुनरिति * सक्तूनामित्युत्तरभाष्यं व्याचष्टे * अत आहेति * श्लोकं व्याचष्टे * यस्य हीति * यत्पुनरिति पूर्वार्द्धार्थोपपादनेन यदीति भाष्यमपि प्रसङ्गाद्व्याख्यातम्। नन्वेवं प्राधान्यासम्भवे ऽप्यश्रुतगुणत्वाङ्गीकरणं कथमित्याशङ्क्याह * तत्रेति * नन्वेवं सति प्राधान्यप्रतीतिर्भ्रान्तित्वं स्यादित्याशङ्क्याह * मुख्यार्थेति * अपवादे

स्त्युत्सर्गस्य भ्रान्तिता युक्तेत्याशयः। ननु लोके प्रमाणान्तरेण गौणलाक्षणिकार्थपरत्वावसायान्मुख्यार्थत्यागो युक्तो न तु वेदे प्रमाणान्तराभावादित्याशङ्क्याह *सर्वत्रैवेति* लोकेऽप्यानर्थक्यप्रसङ्ग एव लक्षणादिनिमित्तं तदभावेऽर्थान्तरे तात्पर्यस्याशक्यज्ञानत्वान्मुख्यस्यैवार्थस्योपपत्तेरित्यर्थः। अथेत्यादिभाष्यं सङ्क्षेपतो व्याचष्टे * तेनेति * नन्वित्याशङ्क्याभाष्यं निर्व्यापारस्य द्रव्यस्य क्रतूपकाराख्यप्रयोजनसाधनत्वायोगाद्धोमातिरिक्तस्य च व्यापारस्याश्रुतेर्होमे च सति भस्मसाद्भावापत्तेरयुक्तमाशङ्क्य व्याचष्टे * नन्विति * ह्रियमाणावस्थानामुपकारसाधनत्वं भविष्यतीत्याशयः। को वेति परिहारभाष्यं पूर्वोक्तनिष्प्रयोजनत्वविरोधित्वादयुक्तमाशङ्क्य व्याचष्टे * सिद्धान्तेति * नन्विति भाष्येण सक्तूनामपि प्रकरणग्रहणात्साक्षादुपकारसाधनत्वं भविष्यतीत्याशङ्क्य द्रव्यस्याक्रियात्मकत्वात्प्रकरणाग्रहणाभिधानार्थं तदुच्यतइति भाष्यं व्याचष्टे * सर्वत्रेति* आदिशब्देनेत्थं भावेनैवोपादानम्। ननु द्रव्यस्यापि विधीयमानस्य किं भाव्यमित्यपेक्षायामनाप्तिसत्वेन वाक्यसंयुक्तायाः क्रियाया भाव्यत्वायोगात्साक्षात्पुरुषार्थस्य ज्योतिष्टोमेनावरोधात्तदुपकारस्यैव भाव्यत्वावगतेः कथं भावादिना सङ्गतिर्भविष्यतीत्याशङ्क्यं निरस्यन् श्लोकं व्याचष्टे * यथेति * किमित्यपेक्षायामप्यक्रियात्मकत्वात् कथं भावेनाग्रहणमित्यर्थः। ननु सक्तूनां साक्षात्करणोपकारसाधनत्वासम्भवेऽपि होमद्वारा भविष्यतीति नन्वितिं भाष्येणाशङ्क्य नास्तीत्यनेनं निरस्तं तदभिप्रायतस्तावद्व्याचष्टे * न चेति*कथं तर्हि गोदोहनादेरदृष्टसाधनतेत्याशङ्क्याह* यत्रापीति*स्वस्वरूपतो व्याचष्टे*न चेति*नन्विति शङ्काभाष्यं व्याचष्टे *द्वितीयेति*न हीति परिहारभाष्यं प्रतीतिविपरीताभिधानादयुक्तमाशङ्क्य छित्वा व्याचष्टे *न हीति* हेतुत्वेनोत्तरावयवं व्याचष्टे * द्वितीया हीति* कथं द्वितीयायास्तादर्थ्यज्ञापकतेत्याशङ्क्य *प्राधान्यमित्युक्तम्* कुर्याच्छब्देनावस्तवत्वं सूचितम्। ननु सक्तूनां प्रयोजनवत्त्वाभावे होमस्य तादर्थ्ययोगात्तदन्यथानुपपत्त्या प्रयोजनवत्त्वकल्पनावसीयतइत्याशङ्क्य होमव्याप्यत्वेन सक्तूनामौपचारिकं होमस्य सक्तूर्थत्वं न प्रयोजनवत्त्वकल्पनायालमित्यभिधानार्थं भवेदिति भाष्यं व्याचष्टे * तेनेति * येन कारणेन सक्तूनां प्रयोजनवत्त्वं द्वितीया ३९०।१
न ज्ञापयति तेन मुख्यतादर्थ्ययोगादौपचारिकी सक्तूर्थतेति प्रसादशब्देन सूचितम्। सक्तूनां त्यागप्रक्षेपांशमात्रव्याप्यत्वेऽपि देवतोद्देशद्रव्यत्यागप्रक्षेपसमुदायात्मकहोमव्याप्यत्वाभावसूचनार्थं कथं ना-

नेत्युक्तं व्याप्यत्वमात्रस्य प्रयोजनवत्त्वकल्पनाशक्तिर्नेत्यनेनोक्ता । ननु क्रियाजन्यफलाश्रयत्वलक्षणं व्याप्यत्वमपि होमविनाश्यानां सक्तूनामयुक्तमित्याशङ्क्याहवनीयप्राप्त्युत्तरकालं विनाशे ऽप्याहवनीयप्राप्त्याख्यक्रियाफलाश्रयत्वाविरोधसूचनार्थं भवन्तीति भाष्यं व्याचष्टे * तत्रेति * उद्देशत्यागप्रक्षेपसमुदायं प्रति कस्य चित्कर्मत्वायोगात्तद्वाचिनो जुहोतेरकर्मकत्वे ऽप्यंशकल्पनया त्यागप्रक्षेपांशविषयौपचारिकव्याप्यत्वाभिधानाख्यकर्मवाचित्वे ऽपि द्वितीयायाः प्रयोगजनकत्वैकल्पनासामर्थ्यप्रदर्शनार्थतां दर्शयितुमाहेतीति व्याप्यत्वे प्राधान्योपचारः । ननु प्रयोजनवत्त्वकल्पनासामर्थ्यो ऽपि द्वितीयाया होमस्य सक्त्वर्थत्वज्ञापकत्वाभ्युपगमेन होमस्य केन चित्प्रकारेण सक्त्वर्थतेति पूर्वोक्तं विरुध्येतेत्याशङ्क्य सक्त्वर्थत्वाभिधानसम्बन्धशब्दसूचितौपचारिकत्वप्रदर्शनार्थं होमस्य सक्त्वर्थतेत्यादिभाष्यं व्याचष्टे * तत्रेति * सक्तूनामदृष्टार्थत्वकल्पनेन सक्त्वर्थत्ववचनस्यानर्थक्यपरिहारशङ्कानिरासार्थं न च तद्वचनादिति भाष्यावयवमानर्थक्यस्यावश्यपरिहर्त्तव्यत्वात्प्रकारानभिधानाच्चायुक्तमाशङ्क्यौपचारिकत्वाख्यप्रकारान्तराभिप्रायत्वेन जिज्ञासापूर्वकं व्याख्यातुम् * तद्वचनाद्वेत्याद्युक्तम् * पुरुषदोषकृतत्वाच्छाब्दज्ञानभ्रान्तत्वस्य वेदे ऽनुपपत्तेर्भ्रान्तशब्देनौपचारिकतोक्ता श्रोतृदोषाद्वा मुख्यार्थत्वज्ञानस्य भ्रान्तित्वम् । एतदन्तेन च न होमस्य केन चित्प्रकारेणेत्यादिभाष्येणैवमवगते प्राधान्ये बलीयसा हेतुना नास्ति प्राधान्यमित्यवगम्यतइत्येतदेवोपपादितमिति सूचयितुं प्राधान्योक्तिः । नन्वेवं द्वितीयावगतप्राधान्याभावावगमे ऽपि कथं द्वितीयानिर्दिष्टे गुणभाव इति प्रश्नो नापाकृतः स्यादित्याशङ्कानिरासार्थं स एव इत्यादिभाष्यं विरोधात्तेन सम्बन्धीगुणाभावस्तु लक्ष्यतइत्यनेन प्रागेव व्याख्यातत्वादुपेक्ष्यास्मिन्नर्थे भगवदुपवर्षसम्मतिप्रदर्शनार्थं गुणाभावे चेति भाष्यं व्याचष्टे * ततश्चेति * स्थानशब्देन गुणभावस्य द्वितीयार्थता निरस्तेत्याशयः । देवतोद्देशद्रव्यत्यागप्रक्षेपाख्यधात्वर्थत्रयसमुदायरूपं जुहोत्यर्थं प्रति देवताया द्रव्यस्य वा कर्मत्वायोगात् जुहोतियोगे कर्मणि द्वितीयानुपपत्तेस्तृतीयार्थवाचितोपवर्षेणोक्ता । व्याकरणे द्वितीयायास्तृतीयार्थवाचित्वानभिधानाद्या परीष्टिर्निमित्तानां कर्त्तव्येत्युपपादिता सा महाभाष्यकारेण न कर्त्तव्येति वर्णितेत्युपवर्षे महाभाष्यकारशब्दप्रयोगाच्चैवं व्याख्यातः । द्वितीयोक्तस्यापि सक्तुप्राधान्यस्यासम्भवाद् बाध इति सकलस्य तात्प-

---

१ प्रयोजनवत्त्वेति २ पु० पा० ।

र्थं तेनेत्यादिभाष्येण तदर्थत्वादिति तच्छब्दो धर्ममात्रे तु कर्मेति व्यवहितनिर्दिष्टस्यापि कर्मणो योग्यत्वात्परामर्शकः कस्य तदर्थता विवक्षितेत्यपेक्षायां च द्रव्योपदेश इति द्रव्यशब्दस्त्वधिकरणविषयभूतः संसर्गादिसंस्कार्यत्वेनाभिमतस्य स्रुगादेः परामर्शक इत्यङ्गीकृत्य सूत्रावयवद्वयं व्याख्यातम्। तत्र लोकवदिति सूत्रावयवमव्याख्याय प्राक् तस्य चेति सूत्रावयवव्याख्यानं किमर्थमित्याशङ्क्य होमसंसर्गवैषम्याभिधानार्थत्वं दर्शयितुमाह * तेनेति * कथं सक्तूनां होमार्थतेत्यपेक्षायां तेनेति भाष्यगतेन तच्छब्देन निष्प्रयोजनत्वं हेतुत्वेन परामृष्टमिति निष्प्रयोजनशब्देन सूचितं तत्रेति भाष्यावयवव्याख्यानार्थम् * पर्यग्निकरणादित्युक्तम् * लोकवदिति सूत्रावयवपातनिकार्थं पर्यग्निकरणादेर्दृष्टोपकारजनकत्वाभावात् संस्कारत्वासम्भवमाशङ्क्यादृष्टोपकारजनको ऽपि संस्कारः सम्भवतीत्यभिप्रायकथनार्थं न स इत्यादिभाष्यं व्याचष्टे * दृढे चेति * तदुपपादनाय लौकिकदृष्टान्ताभिधानार्थं लोकवदिति सूत्रावयवं व्याख्यातुम् अदृष्टो ऽपीति भाष्यं व्याचष्टे * लोके ऽपीति * शान्त्यर्थत्वेनादृष्टार्थतोक्ता। ननु लोकप्रसिद्धमपि पर्यग्निकरणस्यादृष्टसंस्कारार्थत्वं प्रमाणाभावादयुक्तमित्याशङ्क्यानिरासार्थं लोके चेति भाष्यं व्याचष्टे * न चेति * मूलश्रुतिकल्पनेनाचारस्यापि प्रामाण्यादित्यर्थः। सिद्धान्तमुपसंहरति * तेनेति * ननु पुरोडाशादेः प्रयोजनवत्त्वेन पर्यग्निकरणादिप्रतिप्राधान्ये तस्यैव सक्त्वादिष्वभावेनाव्यभिचारित्वात्प्राधान्ये हेतुत्वोपपत्तेः। द्वितीयोपन्यासो ऽनर्थक इत्याशङ्क्य ते * नन्विति * केवलतृतीयाकृतो वेत्यनेन निष्प्रयोजनत्वस्यैव सक्त्वादिष्वव्यभिचारित्वाद् गुणभावहेतुत्वोपपत्तेर्गुणभावे च तृतीयेतिभाष्यसूचितस्तृतीयादेतुकगुणभावोपन्यासो ऽप्यनर्थक इति सूचितम्। द्वयोः प्रयोजनवत्त्वाविशेषे ऽन्यतरप्राधान्यस्य प्रयोजनवत्त्वेनाशक्यज्ञानत्वात्प्रयोजनवत्त्वानपेक्षद्वितीयाकृतमेव प्राधान्यमित्यत्र तावद् दृष्टान्तमाह * तदुच्यतइति * इन्द्रस्यापि गार्हपत्यवत् क्रत्वङ्गत्वेन प्रयोजनवत्त्वाविशेषात्तन्निरपेक्षद्वितीयाकृतमेव प्राधान्यमित्युक्तम्। ननु तत्र कतरस्य प्राधान्यमिति सन्देहे निर्णायकान्तराभावात् निर्णयमात्रे द्वितीयोपयोगो न विनियोग इत्याशङ्क्य * लिङ्गादित्युक्तम् * न च वाक्यादू गार्हपत्यप्राधान्यं गार्हपत्यसमीपे स्थित्वेन्द्रमुपतिष्ठेतेत्येवमपि तदेकवाक्यत्वोपपत्तेरिति गार्हपत्येत्यनेनोक्तं निष्प्रयोजनत्वनिरपेक्षकेवलतृतीयाकृतमेव गुणत्वमित्यत्रापि दृष्टान्तमाह * तथेति * सूक्तवाकस्येष्टदेवताप्रका- ३९।१३

शनार्थत्वात्प्रहरणस्य च स्रुगासादनोपसृक्प्रस्तरप्रतिपत्त्यर्थत्वात्प्रयोजनत्वाविशेषान्नैकस्यापि निष्प्रयोजनतेत्यर्थः। सक्तूनामपि तर्हि द्वितीयया प्राधान्यं स्यादित्याशङ्क्याह * तेनेति * भाष्योक्तं विचारप्रयोजनं दूषयति * प्रयोजनं त्विति * आद्येनादिशब्देन परिद्धयुपादानं द्वितीयेन हिरण्मयीत्वबाणवत्त्वयोः सिद्धान्तवत्पूर्वपक्षे ऽप्यङ्गप्रधानार्थत्वात् प्रयोजनाविशेष इत्यर्थः। ननु प्रियङ्गुवत्प्रकरणात्प्रधानमात्रार्थतावगतेनाङ्गप्रधानार्थतेत्याशङ्क्य निरस्यन् श्लोकं व्याचष्टे * प्रियङ्गवो हीति * प्रैयङ्गवश्चरुरिति वाक्यात् प्रधानयागसाधनचरुप्रकृतित्वप्रतीतेः प्रियङ्गूनां प्रधानमात्रार्थत्वं न प्रकरणादित्याशयः। यथा च बर्हिरादेस्तृतीये वाक्यसंयोगबलीयस्त्वेनाङ्गप्रधानहविरासादनार्थत्वं वक्ष्यते तथा शमीमयीत्वादेरङ्गप्रधानस्रुगाद्यर्थतेत्यर्थः। ननु यथा यज्ञार्थवपणं वै काम्या इष्टयस्ता उपांशु कर्त्तव्या इत्युपांशुत्वं विकृतावातिदेशिकत्वेनाप्राप्तावस्वेष्वङ्गेषु विधीयमानत्वात्प्रधानमात्रार्थं तथेतदपीत्याशङ्क्ते * स्यादेतदिति * वैकृताङ्गविधिकाले प्राकृतस्याङ्गस्य विकृतावचोदितत्वादित्येकेषां व्याख्यानमुपजीव्यैतत्सूत्रं पठितम्। काम्यशब्दोपात्तस्य प्रधानमात्रस्य तच्छब्दपरामृष्टस्योपांशुत्वविधेरङ्गसम्बन्धित्वेनोपांशुत्वस्याचोदित-
त्वादिति तार्तीयसूत्रार्थमभिप्रेत्य परिहरति * तदिति * श्लोकं
३९२।१ व्याचष्टे * यज्ञार्थवपणेति * शङ्कितामिप्रायं विवृणोति * ननु चेति * परिहर्त्तो निरस्यति * नार्हतीति * परव्याख्यानुपपत्तौ हेतुम् * आहैवं हीति * तृतीये निर्देशात्तु विकृतावपूर्वस्यानधिकार इत्यत्र बर्हिर्यूपावटमवस्तृणातीत्यप्राकृतयूपावटस्तरणाख्यकार्यार्थबर्हिरर्थत्वं प्राकृतानां बर्हिधर्माणामस्ति नास्तीति चिन्तायाः प्राकृतवैकृताङ्गप्राप्तिपौर्वापर्यचिन्ताधीनत्वाद्धर्मसाधारण्यशास्त्रातिदेशयोश्च सप्तमदशमाद्ये निषेत्स्यमानत्वेन तदभिप्रायपूर्वपक्षायोगात्प्रत्यक्षत्वेन प्राग्वैकृताङ्गप्राप्तेः पश्चादतिदिश्यमानेन बर्हिर्लुनातीत्यादिशास्त्रेण सर्वप्राकृतवैकृतबर्हिरनुवादेन लवनादिधर्मविधिसम्भवाद्यूपावटस्तरणबर्हिषो ऽपि धर्मवत्तेति पूर्वपक्षिते क्लृप्तोपकाराङ्गसम्भवे कल्पनागौरवापादकाक्लृप्तोपकाराङ्गानाकाङ्क्षणाद्विकृतौ प्राकृतानामङ्गानां पूर्वनिर्देशान्नापूर्वस्य वैकृतस्य यूपावटस्तरणबर्हिषः प्राकृतधर्मविधावधिकार इति सिद्धान्तस्य वक्ष्यमाणत्वात् प्राकृतानामङ्गानां वैकृतेभ्यः प्राक्प्राप्तिः स्यात्यतीत्यर्थः। किं चोपदेशेनानुवाद्यस्रुक्परिधिप्राप्तये ऽतिदेशः प्रागेवेष्टव्य इत्याह * अवश्यं चेति * अनिष्टापत्तेरपि प्रधानमात्रार्थता न युक्तेत्याह * किं चेति * नन्वस्मि-

न्पक्षे पर्णतादेरपि प्रधानमात्रसम्बन्धापत्तेः । प्रकृतौ प्रयाजादिस्रुक्षु प्राप्त्यभावात् कथं विकृतौ प्रसक्तिरित्याशङ्क्याह तद्दृत्युक्तं प्रकृतौ कार्यस्याकल्पत्वात्पदार्थोद्देशेन विधीयमानेषु धर्मेषु पर्णमयादिवाक्यैर्जुह्वादिमात्रोद्देशेन पर्णतादिविधानादङ्गप्रधानस्रुगर्थत्वं युक्तं विकृतौ तु प्राकृतकार्यपृष्ठेन पदार्थप्राप्तेः स्रुक्शब्दलक्षितकार्योद्देशेन शम्यादिविधीयमानं जुह्वा जुहोति स्रुवः सम्मार्ष्टीति प्राकृतकार्यद्वयसङ्गावे ऽप्येकत्रैव प्राकृतधर्मबाधेन चरितार्थस्य वैकृतधर्मविधेरन्यत्रापि बाधकत्वायोगात्कस्मिन्नेकस्मिन्विधीयतामित्यपेक्षायां प्रकरणात् प्रधानभूतहोमाख्यकार्यार्थत्वप्रतीतेः । प्रधानमात्रार्थत्वमिति यस्य ते प्रकृतौ नानावृक्षस्रुक्सम्मार्गसाध्यमपूर्वमिति वदतः पक्षस्तन्मते ऽनिष्टापत्तिरेषेत्याशयः । ननु प्रयाजानामपि होमाख्यकार्यसङ्गावाच्छम्यादिविधानोपपत्तेः कथं प्राकृतजातिप्रसक्तिरित्याशङ्क्याह * य एव हीति * होमत्वाविशेषे ऽपि प्रधानहोमेभ्यः प्रयाजादिहोमानां भेदात्सम्मार्गवत्प्राकृतविरुद्धवैकृतधर्मप्राप्तिरित्याशयः । नन्वेवं सत्येवमेवयुक्तत्वात्कानिष्टापत्तिरित्याशङ्क्याह *न चेति* अयं भावः स्रुक्कार्यस्य शमीजात्या कर्त्तुमशक्यत्वात्स्रुक्कार्ये च शमीविधौ स्रुवां बाधापत्तेः । कार्ये विधीयमाना शमी पर्णतादिकार्ये स्रुक्प्रकृतिद्रव्यपरिच्छेदलक्षणे स्रुक्शब्दोपस्थापिते विधीयेत तस्य च पर्णमयी जुहूर्भवतीत्याद्युपदेशविध्येक्यनैकत्वात्तदुद्देशेनापि विधीयमानायाः शम्याः सर्वार्थतैव युक्ता । अथ स्रुक्प्रकृतिपरिच्छेदत्वेनैकरूपत्वे ऽपि प्रधानस्रुक्प्रकृतिपरिच्छेदलक्षणात्कार्यादङ्गस्रुक्प्रकृतिपरिच्छेदलक्षणस्य कार्यस्यान्यत्वाद्विकृतौ प्रयाजादिस्रुग्वर्जनं ततः प्रकृतावप्यपूर्वसाधनांशे धर्मविध्यभ्युपगमात्प्रधानापूर्वसाधनस्रुगर्थतैव पर्णतादेर्बर्हिश्च प्रधानहविर्मात्रसादनार्थता स्यादिति सर्वेषां वेति न्यायो बाध्येत।अथ प्राकृताङ्गबाधेन वैकृताङ्गनिवेशादेकत्र च बाधेन चरितार्थस्य वैकृताङ्गविधेः सर्वत्र बाधकत्वायोगान्न विकृतावसौ न्यायः। ततो ऽङ्गगुणविरोधन्यायेनाङ्गस्रुक्ष्वेव प्राकृतजातिबाधस्य युक्तत्वाद्वैपरीत्यापत्तिरुपदेशेनातिदेशबाधस्यानुग्रहपक्षवृत्तित्वात्प्रधानगुणबाधाभ्युपगमे ऽङ्गानामप्यनुग्राह्यत्वासर्वार्थतैव पुनरापन्नेति अभ्युपगम्यापि किं चिच्छमीमयीत्वादेः प्रधानमात्रसम्बन्धकारणं प्रधानस्रुचामेव विकृतावपि प्रसङ्गेनाङ्गसाधनत्वोपपत्तेः पर्णमयीत्वादेश्च स्रुक्प्रयोजकत्वाभावात्तद्देशेनापि स्रुगन्तरोपादानायोगात्सम्मार्गः स्रुक्षु पर्णतादिप्राप्तिः पूर्वपक्षे नास्तीत्याह* यद्यपि

१ अङ्गगुणविरोधे च तात्पर्यादिति न्याय. ।

चेति * ननु पशुयागस्य वपाप्रचारेणोपक्रमादङ्गप्रचारेण चोपसंहारात्तन्मध्यपातिनः पुरोडाशस्य पाशुकैरङ्गैः प्रसङ्गोपकारदर्शनात्सम्मार्गादेः प्रधानप्रम्मवित्वात्तदबहिर्भूतस्य कथं प्रधानार्थाभिः स्रुग्भिः प्रसङ्गेनोपकार इत्याशङ्क्य *सौमिकेत्युक्तम् * षड्त्रिंशत्प्रक्रमा प्राचीत्यादिवाक्यविहिताया वेदेस्तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यादित्यत्र तृतीये साङ्गसोमयागार्थत्वेनोक्तायाः अप्यौपवसथ्याहे क्रियमाणत्वेन तत्प्राचीनाङ्गार्थत्वाभावाद्वेदिकरणोत्तरकालभाव्यग्नीषोमीयपशुयागार्थत्वे च सत्यपि तत्प्रक्रमात्प्रागेव सौमिकाग्निप्रणयनप्रक्रमे ऽनुष्ठानेन सोमार्थानुष्ठानावधारणात् सौमिकत्वाभिधानं तथा च प्रधानार्थायाप्यग्नीषोमीयादिष्वतिदेशप्राप्तदार्शपौर्णमासिकवेदिकार्यस्य हविरासादनस्यापि प्रसङ्गात्सिद्धे र्दार्शिकपौर्णमासिकी यजमानसम्मिता वेदिर्निवर्त्ततइति द्वादशे वक्ष्यते । अतस्तन्त्रिमध्यपाताभावे ऽपि तन्त्रमध्यपतनामात्रेण प्रसङ्गो भवतीत्याशयः । ननु महावेदेः सोमार्थत्वे ऽप्यग्नीषोमीयार्थत्वस्यापि भावात्तदङ्गकार्यान्तरसाधकतापि प्रसङ्गाद्युक्ता । शमीमयीत्वस्य तु प्रधानमात्रसम्बन्धे ऽङ्गार्हत्वाभावात्कथं प्रसङ्गेनाङ्गोपकारितेत्याशङ्क्य दक्षिणाः सोमस्येति वाक्यात्प्रधानमात्रार्थाया अपि दक्षिणायाः प्रसङ्गेनाङ्गोपकारित्वाद्दीक्षणीयादिष्वतिदेशप्राप्तान्वाहार्यनिवर्त्तकत्वात् द्वादशसिद्धमेव दृष्टान्ततम्।अर्थाभिधानकर्म चेति चतुर्थन्यायेनाप्रयोजकत्वाभ्युपगमे ऽपि वा यथाश्रुतसम्मार्गानिष्पत्तेः प्राकृतजात्युपसंग्रहो न युक्त इत्याह * किं चेति * अग्निपरिधानाख्येन कार्येण परिधेः स्वरूपं लक्षितं स्रुचां चादिशब्दोपात्तानां द्रव्यवृत्त्याख्येनेत्यर्थः । न विद्यते तत्परिधानादिकार्यं यस्य पलाशादेस्तस्य सम्मार्गः क्रियमाणः परिधेरकृतः स्यात्परिधीकृतस्य वा पलाशादेः सम्मार्गः क्रियमाणः परिहितपरिधानस्य प्रकृतावभावादप्राकृतकार्यस्य स्यादित्युत्तरार्द्धं द्विधा योज्यम्।श्लोकं व्याचष्टे * परिधिरिति *स्रुक्शब्दस्य जुह्वादिपरत्वाद्धोमार्थायाश्च स्रुचो जुहूत्वात् जुहूधारणार्थायाश्चोपभृत्त्वादाज्यावदानापादानभूतायाश्च ध्रुवात्वादादिशब्दोपात्तानां स्रुचामपि कार्येणैव स्वरूपोपलक्षणं तच्चेत्यनेनोक्तम् । नन्वर्थाभिधानकर्मत्वस्याप्रयोजकत्वमात्रहेतुत्वात्किमर्थो ऽपिशब्द इत्याशङ्क्यानिरासार्थस्तताश्चशब्दः । न केवलं ततो ऽर्थाभिधानकर्मत्वादप्रयोजकत्वं किं तु वक्ष्यमाणयथाश्रुतसम्मार्गानिष्पत्तेश्चेत्यर्थः । ननूभयेषां समुच्चयेन परिधानार्थत्वात्पौर्वापर्याभावेनाप्राकृतार्थत्वानापत्तिरित्याशङ्क्य * न चेत्युक्तम् * अग्न्यर्थत्वाभावे च सम्मार्गस्या-

ङ्गप्रधानहोमार्थाग्निद्वाराङ्गप्रधानहोमार्थत्वाभावेनापबर्हिषः प्रयाजान्यजत्यपबर्हिषावनूयाजौ यजतीति विहितप्रयाजानुयाजाङ्गत्वेन प्राप्त्ययोगादवभृथस्य च दशमे वक्ष्यमाणेनापूर्वत्वेनातिदेशतोऽपि प्राप्त्ययोगात्कथं चित्प्रासावभ्यपस्रवमृथेन चरन्तीति तृतीयोक्तकरणत्वाक्षिप्ताङ्गसाहित्यस्य विवक्षितत्वाच्चरत्युक्तस्य च प्रयोगस्य साङ्गप्रधानविषयत्वादपां च देशत्वात्प्रयोगाङ्गत्वावगतेरेकादशे[1] साङ्गप्रधानार्थाग्निविकारत्वस्य वक्ष्यमाणत्वादग्न्यप्राप्तेरग्न्युदाहरणे ऽपि न सम्यक् प्रयोजनमित्याह * अवभृथस्य त्विति * पुरोडाशोदाहरणप्रयोजनमनुजानाति * तरसेति * तरसा उदाहरणं विषयो यस्य प्रयोजनस्येति विग्रहः। ननु तरसोदाहरणे ऽपि पुरोडाशमात्रानुवादेन मांसविधानात्पूर्वपक्षे ऽपि सवनीयपुरोडाशवत्तदङ्गपर्यग्निकरणपुरोडाशे ऽपि मांसप्राप्तेर्न प्रयोजनसत्यतत्याशङ्क्याह * तत्र हीति * मांसं तु सवनीयानां चोदनाविशेषादिति तृतीयान्न्यायाधिकरणे पुरोडाशानादरेण सवनीयमात्रे मांसविधेर्वक्ष्यमाणत्वान्न पर्यग्निकरणपुरोडाशे मांसप्राप्तिरित्यर्थः। ननु सवनीयाङ्गभूतस्य पर्यग्निकरणस्यापि सवनाधारत्वे सवनीयशब्दवाच्यत्वात्तदीये ऽपि पुरोडाशे मांसं स्यादित्याशङ्क्याह * न हीति * तादर्थ्याभिप्रायः सम्बन्धिशब्दः मन्द्रं प्रातःसवन इत्यादौ तु सप्तमीनिर्देशात्सवनाधारमात्रे स्वरविधिरित्याशयः। ननु पर्यग्निकरणस्यारादुपकारित्वे प्रकृतौ प्रकृतपुरोडाशग्रहणस्याशास्त्रीयत्वेन विकृतौ व्रीहिमयत्वस्य यवमयत्वस्य वातिदेशायोगादुपादानलाघवाय सवनीयस्य मांसमयस्यैव पुरोडाशस्य पर्यग्निकरणसाधनत्वापत्तेर्न पूर्वसिद्धान्तपक्षयोः प्रयोजनभेदः स्यादित्याशयेनाशङ्कते *तत्रापि त्विति* व्रीहिशब्दो यवानामप्युपलक्षणम्। ननु व्रीहियवानियमाभावे ऽप्यनियतधान्यमांसादिप्रकृतिद्रव्यकतैव पूर्वपक्षे प्रयोजनं भविष्यतीत्यकदेशी शङ्कते *एवं तर्हीति*पर्यग्निकरणपुरोडाशस्यानियतद्रव्यकत्वे प्राप्ते यथैकपात्रभोजिनोर्गुरुशिष्ययोः शिष्यस्य कांस्यपात्रभोजित्वानियमे गुरोश्चानियतपात्रभोजित्वे शिष्यानुरोधेनापि गुरोर्नियमदर्शनादाग्नेयं द्यावापृथिवी यस्यैककपालस्य वैश्वदेवैककपालप्रकृतिकत्वेन प्रसूनबर्हिर्नियमादनियतबर्हिषो मुख्यस्याप्यैन्द्राग्न्यादेरमुख्यानुरोधेनाप्याधिक्यश्च गुणः साधारणे ऽविरोधात्कांस्यभोजिवदमुख्ये ऽपीत्यत्र द्वादशे प्रसूनबर्हिर्नियमो वक्ष्यते। तथा सवनीयपुरोडाशस्य मांसप्रकृतिकत्वनि- ३९३।४

१ विकृतिलिनेत्यर्थः।

२ अवभृथे प्रधाने ऽग्निविकारः स्यान्न ह्यितरे तुरग्निसंयोग इत्यत्र।

यमात्पर्यग्निकरणपुरोडाशस्यापि मांसप्रकृतिकत्वनियमापत्तेरेकदेश्युक्तम् प्रयोजनमाशङ्क्य निरस्यति * तदपीति * पूर्वपक्षप्रयोजनमाक्षिप्तं परमतेन तावत्समाधत्ते * तस्मादिति * प्रकृतौ शास्त्रसहकारित्वेनोपादानगौरवभयं कथं चिच्छब्देनोक्तम् । प्रकृतपुरोडाशग्रहणस्य प्रकृतौ शास्त्रीयत्वाद्विकृतावतिदेशसम्भवा ऽपि व्रीहिमयस्य यवमयस्य वा पुरोडाशस्याभावात्पर्यग्निकरणलोपापत्त्या परेषां समाधानं दूषयति * तत्रापि त्विति * तुल्यो हि व्रीहिसम्बन्धः शास्त्राद्यागावघातयोरिति वार्त्तिकोक्तन्यायेनारादुपकारिणाङ्गेन प्रधानप्रयुक्तद्रव्यग्रहणस्य निरस्तत्वादयुक्तताऽपि शब्देन सूचिता । लोप एव तर्ह्यस्तु पूर्वपक्षप्रयोजनमिति मतान्तरमाह * तेनेति * नन्वेकहायन्यानयनस्य सप्तमपदपांसुग्रहणाप्रयुक्तत्वात्तदर्थमनमुष्ठाने ऽप्यक्षाभ्यञ्जनस्य तेनाक्षमञ्ज्यादिति तृतीयोक्ताक्षाभ्यञ्जनशेषत्वात्पांसून्प्रति प्रयोजकत्वात्पदपांस्वभावे ऽपि यान्कांश्चित्पांसूनुपादायाक्षाभ्यञ्जनस्यानुष्ठानसिद्धेर्लोपाभावादिहाप्युक्तेन न्यायेन पर्यग्निकरणस्य पुरोडाशं प्रत्यप्रयोजकत्वलक्षणाभावादेकहायनीन्यायेन पुरोडाशोक्ता प्रकृतिव्रीहियवाप्रयोजकत्वे ऽपि यर्हि क्वचिद् द्रव्योपादानेन पुरोडाशसिद्धेः पर्यग्निकरणलोपस्यायुक्तत्वेनैतत्प्रयोजनापरितोषात्स्वमतेनानियतधान्यप्रकृतिकपुरोडाशसिद्धेर्व्रीहिमयत्वस्य यवमयत्वस्य चानिदेशाभावे ऽपि मांसमयस्य पुरोडाशस्य पूर्वपक्षे पर्यग्निकरणानापत्तेर्युक्तं पूर्वपक्षप्रयोजनमिति समाधत्ते * अनियतेति * यत्वनियमे सति मांसस्यापि पक्षे प्राप्तेः कांस्यभोजिन्यायेन मांसनियमात् सिद्धान्तसदृशकर्मापत्तिरित्युक्तं तन्निरस्यति * न चात्रेति * विशिष्टाकारस्य पिण्डस्य पुरोडाशशब्दवाच्यस्य मांसेनानिष्पत्तेः पक्षे ऽप्यप्राप्तिरित्याशयः । ननु सवनीयस्य तर्हि पुरोडाशस्य कथं मांसप्रकृतिकतेत्याशङ्क्य * सवनीयेति * सवनीयपुरोडाशप्रकृतित्वेन न प्राप्तं विधीयते किं तु तत्कार्यसाधनत्वेनेति परिहरति * नैवेति * तरसपुरोडाशमन्नसंरोधादिति छान्दोग्यसूत्रकृतान्नमिश्रणेन मांसस्य पुरोडाशनिष्पादने सामर्थ्यस्योक्तत्वात्तदनिष्पादने च चरावित्र पेषणनिवृत्त्या तदर्थाधिवापनिवर्त्तनेन धान्यमसीत्यधिवापमन्त्रनिवृत्त्यापत्तेर्धान्यशब्दोहानूहचिन्तायाः शक्यानामयनप्राप्तैतन्मन्त्रस्थधान्यशब्दोहानूहप्रयोजनत्वोक्त्ययोगप्रसङ्गात्पुरोडाशस्थाने मांसविधयुक्त्ययोगमाशङ्क्य सवनीयशब्देन धानाकरम्भपरिवापपुरोडाशपयस्याख्यानां पञ्चानामपि हविषामभिधानात्पुरोडाशशब्दस्य च लिङ्गसमवायाद्धानादिष्वपि प्रवृत्तेर्भ्रष्टयवानां च धानाख्यानां धा-

नाचूर्णस्य दध्यक्तस्य करम्भाख्यस्य परिवापाख्यानां च लाजानामिक्षाख्यायाश्च पयस्याया मांसेनान्नमिश्रेतेनापि निष्पादनाशक्तेरेकेन च वाक्येन धानादौ तत्कार्यकरत्वेन पुरोडाशे च तत्प्रकृतित्वेन मांसाविधानस्य वैरूप्यापादकत्वेनायोगान्मुख्यभूयोधानाद्यनुरोधेन पुरोडाशे ऽपि तत्कार्यकारित्वेनैव मांसविधिर्युक्तः छान्दोग्यशाखायां त्वेतेन वै गौरवीति शाक्यस्तरसपुरोडाशोपव्याहृत्या सर्वामृद्धिमाप्नोदिति परकृतिसरूपार्थवादकल्पे विधौ सवनीयशब्दाभावात्पुरोडाशमात्रोद्देशेन मांसविध्यवगते ऽसहायोपादानेनापि च मांसस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रुतेः कार्यलक्षणार्थत्वकल्पनायोगाद् व्रीह्योदनो देवदत्त इति वच्च तरसमयः पुरोडाशो ऽस्येति मध्यमपदलोपिबहुव्रीह्यर्थाश्रयणेन पदद्वयस्यापि श्रुतिसंस्थिते ऽहनि गृहपतिर्मृगयातिशयान् मृगान्हन्ति तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति पुरोडाशमात्रोद्देशेन मांसाविव गतेः सहायोपादानेनापि च मांसस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रुतेः कार्यलक्षणार्थत्ववृत्तित्वोपपत्तेः । सूत्रकृतान्नमिश्रेण मांसस्य पुरोडाशशक्तोक्ता तद्विषयमेव च धान्यशब्दोहानूहचिन्ताप्रयोजनत्वं धान्याधिकरणप्रयोजनभाष्ये तु सवनीयशब्दवद्वाक्योदाहरणमनादृत्यमिति परिहारसूचनार्थम् * यथेत्याद्युक्तम् * कथं चिच्छक्तेनान्नमिश्रिततोक्ता समाहितं पूर्वपक्षप्रयोजनमुपसंहरति * अतश्चेति * यथा प्रैयङ्गवे चरौ प्रधानमात्रे प्रियङ्गुभिर्व्रीहिनिवृत्तेर्व्रीहिसाधनक एवावघात इति दृष्टान्तार्थः । एवशब्दो मांसशङ्कानिवृत्त्यर्थः । एवं तर्ह्यनियतद्रव्यकतेत्यनियमस्य मांसनियमेन निरासान्मांसविषयत्वप्रतीतेरनियतद्रव्यकत्वं वेत्यस्यापि तद्विषयत्वशङ्कापत्तेस्तन्निरासेन धान्यमात्रविषयत्वसूचनायैवशब्देन मांसं निरस्य पुनः*स त्वित्युक्तम्*न चास्मिन्पक्षे नियोगतो यागार्था एवेति न्यायेन प्रकृतपुरोडाशग्रहणस्य निरस्तत्वात्प्रकृतावपि व्रीहियवद्रव्यकत्वासिद्धेः पूर्वपक्षप्रयोजनत्वेनानादरात् कथं चिद्वेत्युक्तम्*स्वयं प्रयोजनान्तरायाह * एतानि चेति * पुरोडाशोदाहरणे भाष्योक्तप्रयोजनानुज्ञासूचनार्थश्चकारः पशौ पृषदाज्येनानुयाजान्यजतीत्याम्नानात्पृषदाज्यधारणायोपभृदन्तरकरणाच्चतस् स्रुचश्चातुर्मास्येषु वरुणप्रघासाख्ये द्वितीये पर्वणि पृथगग्नि प्रणयतइति विहारद्वयाम्नानेन जह्वपभृन्ध्रुवाद्वयकरणात्त्वषट् यत्र च वरुणप्रघासेषु वि- ३९४।२

१ संस्थिते संस्थिते ऽहनि गृहपतिर्मृगयां याति स यान् यान् मृगान् हन्ति स तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति ।

हाराद्वित्वेन षट्संख्यत्वात्परिधिवृद्धिस्तत्रैकवर्जे पञ्चानामसंम्मार्गापत्तेर्महान्प्रयोजनविशेष इत्यर्थः । अग्निमुपधाय स्तुवतइति स्तुत्यङ्गत्वेनाराद्युपकारके ऽग्न्युपनिधाने विहिते यथा लौकिकस्याग्नेरुपनिधानं विषये लौकिकं स्यात्सर्वार्थत्वान्न वैदिकमर्थनिर्देशादित्यत्र सप्तमाधिकरणे वक्ष्यतइति दृष्टान्तार्थः । अग्निसम्मार्गस्याग्नीन्परिधींश्चाग्निं च त्रिस्त्रिः सम्मृड्ढीति प्रयाजकालीनसम्मार्गप्रैषादग्नीत्परिधींश्चाग्निं च सकृत्सकृत्सम्मृड्ढीति चानुयाजकालीनसम्मार्गप्रैषात्परिधिसम्मार्गसाहित्यावगतेराहवनीयस्यैव परिध्यन्वयेन सम्मार्गावगमात्सर्वैश्च याज्ञिकैराहवनीयस्यैव सम्मार्गानुष्ठानादाहवनीयादीनामित्यादिशब्दो वैदिकत्वसाहश्योपस्थापितपुरोडाशाद्युपसंग्रहार्थः । सर्वशब्दश्च विहारपृथक्त्वेनैकाहवनीयसम्मार्गार्थो कृतकार्याणां चाहवनीयस्रुक्परिधिपुरोडाशानां कृतसंस्काराणामपि नाशदोषापहारेष्वन्येषामुत्पादितानां संस्कारावृत्त्यर्थो व्याख्येयः ।

॥ स्तोत्रादिप्राधान्याधिकरणम् ॥ ५ ॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात् ॥ १३ ॥

ननु स्तोत्रशस्त्रयोः पूर्वाधिकरणोक्तगुणकर्मत्वहेतुद्विनीयाश्रुत्यभावात्कथं गुणकर्मत्वशङ्कत्याशङ्क्याह * यैस्त्विति * दृष्टोपकारित्वस्य स्वातन्त्र्येण गुणकर्मलक्षणत्वानभ्युपगमे ऽप्यपूर्वाभावोपयोगिलक्षणत्वस्यान्यतः सिद्धशेषाणा मित्यत्रोक्तत्वादिहापूर्वाभावः प्राप्त ऽपोद्यतइत्याशयः।सूत्रगतस्तुतशस्त्रशब्दव्याख्यानार्थं गुणवचनमितिभाष्यं व्याचष्टे * स्तुतिरिति * गुणमात्राभिधानस्य स्तुतित्वं भाष्यकृतोक्तमिति शङ्कां निराकर्त्तुमाह * गुणेति * गुणानां गुणिसम्बन्धितया वचनमिति भाष्यार्थो ऽनेनोक्तः । नन्वभिधानस्य स्तुतित्वे तस्यैकान्तेनाभिधेयशेषत्वात्प्राधान्यसिद्धान्तायोगात् सन्देहो न स्यादित्याशङ्क्याह * सा चेति * अभिधेयं विना ऽभिधानानिष्पत्तेरभिधेयाभिधानारहितशब्दोच्चारणापातात् स्तुतित्वं हीयेतेत्यर्थः । नन्वेवं सति गुणगुणिनावुभावपि प्रतिस्तुतेः शेषिशेषिभावोपपत्तेर्गुणिनी देवतामेव प्रतिगुणप्रधानभावचिन्ता न युज्येतेत्याशङ्क्याह * तत्रेति * मण्डूकाक्षादेर्देवतात्वे ऽप्यग्निराजसूयादौ विनियुक्तत्वेन स्तुतेस्तच्छेषत्वस्य पूर्वपक्षाभिमतत्वात्सन्देहभाष्यगतस्य देवताशब्दस्य स्तुत्यमात्रोपलक्षणार्थत्वसूचनाय * स्तुत्यस्येत्युक्तम् * स्तुत्यं

प्रति स्तुतेः साध्यत्वात्स्वभावतो शेषत्वे ऽपि कैमर्थ्याकाङ्क्षायां शेषत्वं भवतीतिं सूचनार्थः शेषीति च्विप्रत्ययः। पूर्वपक्षसूत्रव्याख्यानार्थं तत्रेति भाष्यं सङ्क्षेपतो व्याचष्टे * किमिति *

अर्थे न त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ १४ ॥

ननु यत्रेति बार्थवत्त्वात्स्यादिति सूत्रे पूर्वपक्षिणोत्कर्षस्याभ्युपेष्यमाणत्वादनिष्टापत्तिर्दोषाभिधानमयुक्तमित्याशङ्क्याह * प्रमाणेति * क्रमसन्निधाख्यप्रमाणद्वयविरोधो ऽनेन सूत्रेण पूर्वपक्षे ऽभिधीयते नानिष्टापत्तिरित्यर्थः। नन्वाम्नातेष्विति वक्ष्यमाणानर्थक्यापत्तिदोषान्तरसूचनार्थस्तावच्छब्दः कीदृक्दूषणमित्यपेक्षायामाह * तथा हीति * यस्मात् संस्कारकर्मत्वे यत्र स्तोत्रे अविद्यमानार्थो मन्त्रः प्रयुज्यते तस्य स्तोत्रस्य मन्त्रप्रकाश्येन देवतारूपेणार्थेन स्तोत्रप्रयोजनेनापकृष्टत्वात् क्रमसन्निधिप्राप्तस्याविद्यमानार्थमन्त्रसाध्यस्य स्तोत्रस्य बाधः प्रसज्यतइति यस्माच्छब्दार्थे यदित्यव्ययं व्याख्येयम्। स्तौतिशंसतिवाक्यविहिताया अपि स्तुतेर्मन्त्रविशेषसाध्यत्वं विना विशेषरूपानवधारणेन देवतासंस्कारत्वायोगान्मन्त्रापकर्षेण भाष्यकृता स्तुत्यपकर्षस्याप्युक्त्यवगतेः स्तुत्या एव च संस्कारत्वनिमित्तापकर्षस्य वक्तुं युक्तत्वाच्चोदनाशब्देन च स्तुत्यपकर्षस्यैव सूत्रकृतोक्तत्वात् स्तोत्रस्यापकृष्टत्वादित्युक्तं तस्मात्संस्कारपक्षो दुष्ट इति शेषः। उक्ते ऽर्थे यथापूर्वं भाष्यं,सूत्रं योजयति *येति* को ऽपकर्षे दोष इत्याशङ्कानिरासार्थं तत्रेति भाष्यं व्याचष्टे * ततश्चेति * ननु क्रमसन्निधिशब्दयोः स्थानाख्यपञ्चमविनियोगप्रमाणवाचित्वेनैकार्थ्याद्भेदोपादानमयुक्तमित्याशङ्क्याह * क्रमश्चेति * येन क्रमेण यजुर्वेदे ग्रहयागाभ्यासा विहितास्तेनैव क्रमेण सामवेदे तदङ्गभूतानि स्तोत्राणि ब्राह्मणेन विहितानि तेनैव च क्रमेणोत्तराग्रन्थे स्तोत्रसाधनभूता ऋचः पठिताः मन्त्रानपेक्षायाः स्तुतेरपकर्षायोगात् स्तुत्यपकर्षेण मन्त्रापकर्षे ऽपि लक्षणान्मन्त्रक्रमाभिधानविरोधः रथन्तरं पृष्ठं भवतीति चोदनया रथन्तरयोनित्वेनाभित्वा शूरेत्यृगुपस्थापनमेकं साम तृचे क्रियते स्तोत्रियमिति च स्तोत्रसाधनभूतस्य साम्नस्तृचाधारत्वश्रुतेः। ऋगन्तरापेक्षायां यद्योन्यां गायति तदुत्तरयोर्गायतीति योन्युत्तरर्गपेक्षया त्रित्वपूरणविधानादुत्तराग्रन्थे च तदुत्तरत्वेन नत्वावानित्यृचः पाठादुपस्थापनं त्रित्वपूरणं तु तयोः

पूर्वा बृहती ककुभावुत्तरे इति वचनात् प्रथमायाश्चतुर्थपादेन द्वितीयायाश्चार्द्धेनैकं ककुभं कृत्वा द्वितीयायां द्वितीयादिपादत्रयेणापरां कृत्वा प्रगाथसंज्ञा यावृत्त्या भविष्यतीति भाष्यकृता प्रगाथशब्देन सूचितम् । एवं तु क्रमहेतुकोपस्थापनमात्रवाचित्वात्सन्निधिशब्देन च प्रमाणान्तरानभिधानापत्तेः क्रमसन्निधी उपरुध्येयातामिति द्विवचनानुपपत्तिप्रसङ्गादपरितोषेण प्रकरणपरामर्शो वेत्युक्तम् । प्रकरणाद्धीन्द्रस्य प्रगाथस्य ज्योतिष्टोमाङ्गत्वं ऽवगते ऽपि द्वारविशेषापेक्षायां पृष्ठाख्यस्तोत्रद्वारत्वं क्रमादवगम्यतइत्याशयः । प्रकरणेन क्रियारूपस्य मन्त्रस्येतिकर्त्तव्यतात्वेनाग्रहणे ऽपीतिकर्त्तव्यताभूतस्तोत्रसाधनसामाधारत्वेन सन्निधिं परामृश्य ग्रहणात्साकाङ्क्षफलवत्सन्निधानलक्षणप्रकरणावयवभूतो ऽत्र सन्निधिर्विवक्षित इति सूचनार्थः परामर्शशब्दः ।

वशावद्वा गुणार्थं स्यात् ॥ १५ ॥

न पर्युदसिष्याम इति भाष्यात् पूर्वपक्षसमर्थनायैतत् सूत्रमित्याभाति तत्पूर्वपक्षिणो ऽप्युत्कर्षस्याभिमतत्वादयुक्तमाशङ्क्य पूर्वपक्षैकदेशी प्रमाणविरोधाख्यं दोषमनेन सूत्रेण परिहरतीति व्याख्यातुमाह * नायमिति * प्रश्नपूर्वदोषपरिहारमुपपादयति * किमिति * श्लोकं व्याचष्टे * य एवेति * सन्निहितातिक्रममात्रवाचित्वेनोत्कर्षापकर्षशब्दयोरैकार्थ्यादपकृष्येतेत्युक्तस्योत्कर्षशब्देनानुभाषणाविरोधो ऽपकर्षः स्यादित्यनेन सूचितः । नन्वैक्ये ऽपीन्द्रमाहेन्द्र्योर्माहेन्द्रं ग्रह गृह्णातीति महत्वगुणविशिष्टस्य देवतात्वश्रुतेः शुद्धप्रकाशकस्य मन्त्रस्यापकर्षः स्यादित्याशङ्कानिरासार्थत्वे यथा वशात्वगुणविशिष्टस्याप्यजाद्रव्यस्यागुणार्थं शुद्धाजाप्रकाशनार्थमभिधानं स्यादेव न त्वयमपकृष्यते तथा शुद्धेन्द्रप्रकाशनार्थमप्यभिधानं स्यादेवेत्यकारप्रश्लेषेण सूत्रव्याख्यां सूचयति * न चेति * उत्तरसूत्रव्याख्यानार्थे भाष्ये गुणश्चानर्थकः स्यादित्यत्र च सूत्रे गुणस्य देवतात्वानन्तर्गतिनिरासाद्वशावद्वेति वाशब्देन गुणस्य देवतात्वे ऽनन्तर्गतिः सूचितेति ये मन्यन्ते तन्मतेन गुणस्यातन्त्रत्वादित्युक्तम् । आपाद्यापि तु निरासोपपत्तेर्वशादृष्टान्तात्तद्वशगुणे चोदित इतिभाष्याच्च गुणस्य देवतात्वान्तर्गतिः । तद्विरुद्धाया निरुपपत्तिकायाश्चानन्तर्गतिः । शङ्कितुमशक्यत्वात्स्वमतेनान्तर्गतस्यापि गुणस्य महत्वविशिष्टदेवताप्रकरणेन लभ्यमानस्मरणत्वादित्युक्तं निर्गुणशब्देनाकारप्रश्लेषो गुणार्थमिति सूत्रावयवे सूचितः । वशात्वगुणस्यातन्त्रत्वाभावात् अन-

न्तरपक्ष एव दृष्टान्तः । ननु शब्दमात्रस्य देवतात्वादिन्द्रमहेन्द्रशब्दयोश्च भेदात्कथं देवतैक्यमित्याशङ्क्याह * न चेति * नवमे ऽपि वाशब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिरितिसूत्रे भूतभव्यसमुच्चारणन्यायेन देवता यागं प्रति गुणत्वे ऽभिहिते ननु कर्मणो ऽपीप्सितादभिप्रेतत्वं देवताया गम्यतइत्याशङ्क्य नास्या अभिप्रेततामहनुमहे तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेततागम्यत इति भाष्येणानर्थकवर्णमूहस्य प्रातिपदिकत्वाभावे तद्धितचतुर्थीसंयोगायोगात्तत्संयोगाभिधानेनार्थग्रहणेन शब्दमात्रस्य देवतात्वं निरस्तम् । दशमे च विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदनेत्यत्रावाहनादौ येन केन चित्पर्यायेण देवताभिधानसिद्धेर्विधिगताग्न्यादिशब्दानादर इति पूर्वपक्षयित्वा आग्नेयो ऽष्टाकपाल इति विधिगतेनाग्निशब्देन देवताया हविःसम्बन्धविधानाद् मन्त्रकार्ये देवतोद्देशे विधिगतस्यैव शब्दस्योच्चारणं कार्यमिति सिद्धान्तिते का पुनरियं देवतानामिति पृष्ट्वेन्द्रादीनां द्युस्थानां यत्र वा वेदे ऽग्निर्देवता वा ऽतो देवतेत्यादिर्देवताशब्दः प्रयुक्तः सा देवतेति परमतद्वयमहःशार्दूलादीनामनुपसंग्रहापत्तेर्निरस्य स्वमतेन सूक्तभाजो हविर्भाजश्च देवता इति भाष्येणाग्निदैवत्यं सूक्तम्मग्निदैवत्यं हविरित्यादिप्रयोगादाहुतिभाजो वा अन्या देवता अन्या स्तोमभाजः छन्दोभाजश्चेति लिङ्गाच्च सूक्तस्तुत्यत्वस्य त्यज्यमानहविरुद्देश्यत्वस्य च देवतात्वाभिधानादर्थस्यैव स्तुत्यत्वोद्देश्यत्वावगतेर्मूर्त्तानाममूर्त्तानां चेतनानामचेतानानां च श्रुत्या कं चिदर्थं प्रति तादर्थ्येन सङ्कल्पनीयानां देवतात्वं भविष्यतीति च भाष्येण मूर्त्तानां चेतनानां देवतात्वाभिधानाद्यस्य वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते सा भवतीति च भाष्येणोच्चारणार्थत्वाद्दिशेरुच्चार्यमाणेन शब्देन प्रजापतिं मनसा यजेतेत्यादिविधौ वा स्मर्यमाणेन वाच्यस्य देवतात्वाभिधानात् नन्वेवं सति सुतरां च येन केन चिदग्निशब्देन निर्देशः करणीय इति वाशङ्क्य भवेदेवं यद्यग्निशब्दो ऽग्निप्रत्यायनार्थमुच्चार्येतापि तु हविः सम्बद्धार्थं प्रत्याय्येतेत्युपक्रम्य देवतायाश्च यज्ञसाधनभावेन रूपेण भवति केन तर्हि सम्बन्धिना शब्देनेत्यादिना भाष्येण शब्दसम्बन्धितद्व्यतिरिक्ताभिधानाच्छब्दस्य देवतात्वं निरस्तं भवति । नन्वर्थस्यापि देवतात्वे कथमैक्यनिश्चयो ऽत आह * ततश्चेति * प्रमाणविरोधाख्यदोषपरिहाराशङ्कामुपसंहरति ३९६।१
* तस्मादिति *

न श्रुतिसमवायित्वात् ॥ १६ ॥

नन्वर्थव्याख्यानार्थं नैतदितिभाष्यं व्याचष्टे * नेति * इन्द्रो ऽस्येत्यादिभाष्यं तद्धितश्रुत्याश्च कर्मणादिवदवयवार्थानपेक्षस्य महेन्द्रस्य ग्रहसमवायेनेन्द्राद्भेदावगमादित्येवं श्रुतिसमवायित्वादिति सूत्रावयवव्याख्यानार्थतया परमतेन दूषयितुं प्रश्नपूर्वं व्याख्यातुमुपक्रमते * कुत इति * श्लोकं व्याचष्टे * यदीति * नन्ववयवार्थप्रत्यभिज्ञानात्समुदायशक्तिकल्पनानुपपत्तेः कथं तदबलीयस्त्वमित्याशङ्क्याह * तथा हीति * ततो वाक्यभेदादिः स्यात् तच्च दुष्यतीत्यर्थः । आदिशब्देनासमर्थतद्धितसामासापत्तिरुत्तरपदवृद्धिप्रयुक्तिर्महत्वस्येन्द्रविशेषणत्वानुपपत्तिश्चोक्ता अनेन च महत्व विशिष्ट इत्यन्तं भाष्यं तात्पर्यतो व्याख्यातं महेन्द्रशब्दास्तु इत्युत्तरार्द्धेनावयवव्युत्पत्तिनिरासे भाष्यं योजयितुमुपक्रमते * न चेति * व्युत्पत्तिशब्देनेन्द्रो महत्वविशिष्टो ऽस्येत्यध्याहारेण पूर्वावयवव्याख्या सूचिता कथमनेन भाष्येणावयवव्युत्पत्तिनिराकिर्यत्यपेक्षायां प्रश्नपूर्वकमुपक्रमते * कथमिति * श्लोकं व्याचष्टे * समर्थ इति * समर्थः पदविधिरिति सूत्रात्समासवृत्तौ सामर्थ्यं विशेषणं समर्थानां प्रथमाद्वेत्यस्मात्तद्धिते ऽपीत्यर्थः। कथमत्र सामर्थ्याभाव इत्यपेक्षायां तद्धितसमासवृत्ती युगपत्स्यातां क्रमेण वेति विकल्प्य यौगपद्यपक्षे वृत्तिद्वये ऽपि सामर्थ्याभावप्रतिपादनार्थं न चास्येति भाष्यं व्याख्यातुं सामर्थ्याभावं प्रति जानीते * यदि चेति * एतदुपपादनार्थत्वेन प्रश्नपूर्वं भाष्यं व्याचष्टे * कुत इति * उत्तरार्द्धेन तद्धितसंयोगापेक्षस्य वा या महत्वसम्बन्धात्समासकल्पना सा नोपपद्यतइति नञानुषङ्गेणोत्तरावयवो व्याख्यातः । ननु सामर्थ्याभावं प्रतिज्ञाय सम्बन्धाभावोपपादनमसम्बद्धमित्याशङ्क्याह
३९७।२ * एकार्थीभावेति * समित्युपसर्गस्यैकीभाववाचित्वादैकार्थ्यं तत्कारणं चार्थान्तरानपेक्षत्वं सामर्थ्यं तदेव भाष्यकृतः शब्दसम्बन्धहेतुत्वात्सम्बन्धशब्देनाभिप्रेतमित्याशयः। सापेक्षत्वस्यैकार्थ्यलक्षणसामर्थ्यविहन्तृत्वं तावत्प्रश्नपूर्वकमुपपादयति * कथमिति * श्लोकं व्याचष्टे * अविक्षिप्यमाणौ हीति * विशेषणविशेष्यभूतयोरर्थयोरेकस्मिन्विशिष्टरूपे ऽर्थे लोलीभावात् प्रधानचलनाद्व्यापारात्समासवृत्तिस्तद्धितवृत्तिर्वा भवति । विविधं च क्षिप्यमाणयोरन्यत्र व्याप्रियमाणयोरर्थयोस्तात्पर्यनानात्वनिमित्तात् बुद्धेः सन्दिग्धत्वरूपात्कालुष्यात् दुष्टयोर्नैकस्मिन्नर्थे व्यापारः सम्भवतीत्यर्थः । ननु तात्प-

र्यनानात्वोपपत्तेः कथं सन्दिग्धत्वरूपकालुष्यापत्तिरित्याशङ्क्य सकृदुच्चरितस्यानेकतात्पर्यायोगं लोकप्रसिद्धमुदाहरति * यो हीति * अतः सकृदुच्चरितस्येन्द्रशब्दस्यानेकतात्पर्यायोगात् किं विशेषणेन महत्वेनान्वयोऽस्तु विशेष्येण वा तद्धितार्थेन ग्रहणेति सन्देहापत्तेर्नैकार्थ्यलक्षणं सामर्थ्यं भवतीत्युपसंहरति *इत्येवमिति * व्यपेक्षालक्षणसामर्थ्यविहन्तृत्वं तु सापेक्षस्यातिस्पष्टमित्याह * व्यपेक्षा पुनरिति * श्लोकं व्याचष्टे * न हीति * व्याख्यातं भाष्यार्थमुपसंहरति * इतीति * पूर्वोत्तरभाष्ययोर्विषयविवेकार्थं पूर्वभाष्यस्य युगपद्वृत्तिद्वयनिरासपरत्वमाह * एवं तावदिति * दोषः समर्थतद्धितस्य समासापत्तिरूपः । न चेत्युत्तरभाष्यं क्रमेण वृत्तिद्वयनिरासपरतयार्थतो व्याचष्टे * क्रमेणेति * वक्ष्यमाणाद्वैरूप्यलक्षणादनेकार्थविधिलक्षणाच्च वाक्यभेदाद्विवेकायावृत्तिलक्षणवाक्यभेदाभिधानार्थत्वमस्य भाष्यस्य वक्तुम् * असकृदित्युक्तम् * असकृच्छ्रुतिं विवृणोति * कृत्वेति * महांश्चासाविन्द्रश्चेति विग्रहे महेन्द्र इति समासं कृत्वा तद्धितान्वये क्रियमाणे महानिन्द्रोऽस्य देवतेति व्याख्यानार्थं महदिन्द्रशब्दयोरावृत्तिप्रसङ्ग इत्यर्थः । समासशब्देन तद्धितस्याप्युपलक्षणादिन्द्रोऽस्य देवतेति विग्रहे ऐन्द्र इति तद्धितान्तत्वं कृत्वा समासे क्रियमाणे महांश्चासावैन्द्रश्चेति व्याख्यानायैन्द्रप्रातिपदिकतद्धितयोरावृत्तिः स्यादिति सूचितम् । ननु न वाक्यभेदोऽस्माद्भाष्यासम्प्रतीयतइत्याशङ्क्याह * एतदेवेति * क्रमेण वृत्तिद्वयनिरासस्य हेत्वाकाङ्क्षायां योग्यत्वाद्वाक्यभेदो हेतुत्वेन भाष्यकृतोऽभिप्रेतोऽवसीयतइत्याशयः । तद्धितपूर्वत्वे ऽन्यदपि दोषद्वयं भाष्यकृतोऽभिप्रेतमित्याह * तद्धितेति * श्लोकं व्याचष्टे *महेन्द्र इति* वाक्यभेदमात्राभिधानं तर्हि कथमित्याशङ्क्याह * न चेति * समासपूर्वत्वे तदेवैकं दूषणमित्याशयः । कृत्वासमासमिति समासशब्देनाप्येतदेव सूचितम् । एतस्मिन्नेवेति युगपद् वृत्तिद्वयाशङ्काभाष्यं यौगपद्यपक्षस्य प्रागेव निरस्तत्वाद्दोषान्तराभिधित्सया वा पुनरुपन्यासे क्रमवृत्तिनिरासव्यवधानादयुक्तमाशङ्क्य व्याचष्टे * तेनेति * तद्धितसमासवृत्त्योः कापूर्वेत्यनिश्चयेन क्रमायोगाद्यौगपद्यमेव वृत्तिद्वयवादिना वाच्यम् । क्रमस्त्वनादरणीय एवेति सूचनार्थं क्रमनिरासोत्तरकालं पुनर्यौगपद्यस्योपन्यासपूर्वकं निरास इति प्रतिपाद्येति ह्यपादर्शितम् । न चायमिति वैरूप्यलक्षणदोषाभिधानार्थं भाष्यं व्याचष्टे * ऐकशब्द्य इति * ३९८।१
महत्वं प्रतीन्द्रशब्दस्यानुवाद्योद्देश्यप्रधानभूतार्थवाचित्वात्तद्धितार्थं

च प्रति विधेयोपादेयगुणभूतार्थवाचित्वाद्वैरूप्यं विस्पष्टश्चेत्यनेकार्थ-विधिदोषाभिधानार्थं भाष्यं व्याचष्टे * विधीति * एकविधानेन चेतरानाक्षेपात्प्रत्ययावृत्तिरप्यनेकार्थे विधौ स्यादित्येवमर्थत्वेन सकृदुच्चारणं चेति भाष्यं व्याचष्टे * तथा हीति * तस्मादित्यवयव-व्युत्पत्तिनिरासोपसंहारभाष्यमकारप्रश्लेषेणाध्याहृतशुद्धं कथं तर्हि शब्दकवाक्यभेदेन वा स्वमतेन व्याख्यास्यमानत्वात्परमते ऽपि तच्छुद्धं प्रसज्यमानां निराकर्तुं यथास्थितं पठति *तस्मादिति* नन्ववयव-व्युत्पत्त्यनभ्युपगमे समासत्वाभावादर्थान्तरे चागृहीतसम्बन्धत्वेनार्थवत्त्वायोगात्प्रातिपदिकत्वाभावेन तद्धितानुत्पत्तिः स्यादित्याशङ्क्याध्येतृप्रयुक्तद्धितान्यथानुपपत्त्यैव प्रातिपदिकत्वं कल्पयित्वा तत्सिद्ध्यर्थं समासार्थयोगेनावयवार्थवत्त्वसम्बन्धग्रहणाभावेनार्थविशेषानवधारणे ऽपि कश्चिन्महेन्द्रप्रातिपदिकस्यार्थो ऽस्तीति सामान्यतः कल्पयिष्यतइत्यभिधानार्थं महेन्द्रशब्दादित्यादिभाष्यं व्याचष्टे * किं तर्हीति * व्युत्पत्तिनिरासप्रयोजनाभिधानार्थं तस्मादितिभाष्यं व्याचष्टे * ततश्चेति * नन्विन्द्रस्य वृत्रवधोत्तरकालं महत्वयोगेन यन्महानिन्द्रो ऽभवत्तन्माहेन्द्रस्य महेन्द्रत्वमिति महेन्द्रशब्दवाच्यत्वश्रुतेः समुदायशक्तिकल्पना न युक्तेत्याशङ्कानिरासार्थं यदपीत्यादिभाष्यं व्याचष्टे * न चेति * रूढित्वोपपादनार्थत्वमस्य भाष्यस्य दर्शयितुम् * अत इत्युक्तम् *

व्यपदेशाच्चेति[1] ॥ १७ ॥

सूत्रोक्तेनेन्द्रमहेन्द्रयोर्भेदापदेशेन हेतुना श्रुतिसमवायित्वहेतुसाध्याया महेन्द्रस्यागुणार्थं शुद्धेन्द्रप्रकाशनार्थमाभिधानं न सम्भवतीति प्रतिज्ञायाः साधयितुमशक्यत्वादेवताभेदप्रतिज्ञां पूर्वहेतोरवान्तरसाध्यत्वेन विवक्षितामास्मिन्हेतावध्याहारेण योजयितुमाह * व्यपदेशेति* विशब्दव्याख्यानार्थम *भेदादित्युक्तम् * कथं व्यपदेशस्य देवताभेदहेतुतेत्यपेक्षायामाह *एवमिति *समुदायस्त्वदृष्टार्थत्वापत्तेरयुक्त इत्याह * असति चेति * देवताभेदोपपादनस्य प्रकृतोपयोगमनुसन्धत्ते * तस्मादिति * एतद्व्याख्यानमतिप्रसङ्गापादनेन तावद् दूषयति * एवमिति * तद्धिते सति समासपदस्योक्तप्रकारेण रूढित्वे व्याख्यायमाने सर्वेषामग्नीषोमीयादीशब्दानां रूढित्वापत्तेर्द्विर्देवताभिधायित्वं न स्यादित्यर्थः । एवं शब्दार्थं प्रपञ्चयन् श्लोकं व्याचष्टे * यथैव हीति * द्वन्द्वसमासस्येतरेतरयोगवा-

---

१ व्यपदेशभेदाच्चेतिक्व चित् पुस्तके पा० ।

त्वित्वादग्नेरपि सोमसापेक्षत्वे द्वयोश्च तद्धितान्वयाविशेषे ऽप्युपलक्षणार्थं सोमस्याग्निसापेक्षत्वे तद्धितानन्वयाभिधानम् । सोमपदस्याग्निनाग्निपदस्य वा सोमेन तुल्यकक्ष्यार्थत्वात्तद्धितार्थं च प्रति विशेषणीभूतार्थत्वाद्विरूप्यं सोमपदोक्तिरूपलक्षणार्था । नन्वग्नीषोमादिशब्दानां न्यायेन रूढित्वावसायाद्याज्ञिकव्यवहारस्य भ्रान्तित्वेनोच्छेदो न दोषायेत्याशङ्क्याह * न चेति * न केवलं याज्ञिकानां ३९९।१
द्विदेवत्यत्वव्यवहारः किं तु मिमांसायामपीत्यर्थः तार्तीयांस्तावद् द्विदेवत्यव्यवहारानुदाहरति * तद्यथेति * आग्नेयं चतुर्द्धा करोत्याग्नेयशब्देन सापेक्षाग्निदेवत्ययोरैन्द्राग्नाग्नीषोमीययोः पुरोडाशयोरग्रहणं व्यवस्था वार्थसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था गुणश्रुतिरिति चतुर्द्धाकरणविचारतृतीयप्रथमे सिद्धान्तसूत्रे वक्ष्यति एकस्मिन्वा देवतान्तराद्विभागवदितीन्द्रपीतविचारसिद्धान्तसूत्रे चेन्द्रपीतसमासस्थेनेन्द्रशब्देन सापेक्षेन्द्रदेवत्यस्यैन्द्राग्नादेः सोमस्याग्रहणं वक्ष्यति । एकस्मिन्नेकसंयोगादिति पूषाप्रपिष्टभागविचारे च पूषशब्देन सापेक्षपूषदेवत्यस्यैन्द्रापौष्णादेश्चरोरग्रहणं वक्ष्यतीत्यर्थः। रूढित्वे चैकदेवतात्वापत्तेः सापेक्षत्वं न युज्येतेत्याह * रूढित्वं हीति * आर्ष्टमिकं द्विदेवत्यव्यवहारमुदाहरति * तथेति * ऐकार्थ्याद्वा नियम्येत पूर्ववत्वाद्विकारो हीति सूत्रे द्विदेवत्यानां दार्शपौर्णमासिकद्विदेवत्ययागप्रकृतिकत्वं वक्ष्यतइत्यर्थः । नावमिकमुदाहरति * तथेति * आशासानामेधपतिभ्यां मेधमित्यध्रिगुप्रैषगतमेधपतिशब्दे देवता तु. तदाशाब्दात्सम्प्राप्तत्वात्स्वामिन्यनर्थिकी स्यादिति सूत्रे मेधशब्दव्याच्यस्य पशोः स्वामिन्यस्य सम्बन्धस्य प्राप्तत्वेनाशासानानर्थक्यापत्तेर्देवतैव मेधपतिरिति मेधपतित्वं स्वामिदेवत्यस्योत्पाद्यसूत्रगतमेधपतित्वशब्दस्य स्वामिनो वेत्यनन्तरसूत्रे ऽनुषक्तस्य लुप्तभावप्रत्ययस्यानुषङ्गेण द्विवचनान्तमेधपतिव्याच्यमग्नीषोमाख्यदेवतारूपमर्थद्वयमाश्रियिष्यतइत्यर्थः । दाशमिकमुदाहरति * तथेति * मनोतायां तु वचनादविकारः स्यादित्यत्र त्वं ह्यग्ने प्रथमो मनोतेति मनोताख्यो मन्त्रो ऽन्यदेवत्यपशावूहितव्यो न वेति सन्देहमुपन्यस्य ननु प्रकृतावन्यार्थो ऽयं निगदो यदग्नीषोमौ हि प्रकृतौ देवता ऽयं वाग्नेयो ऽर्थतो सम्भवेनाभिधायित्वादविकारेण प्रयोक्तव्य इत्याशङ्क्य ते सत्यग्नीषोमौ देवताप्रकृताविति युक्ता यौ तु तावग्नीषोमाविति भाष्यकृद्वक्ष्यति व्याकरणशास्त्रे ऽपि द्विदेवत्यत्वव्यवहारो ऽस्तीत्याह * तथेति * देवता द्वन्द्वे चेत्यधिकृत्येदग्नेः

१ स्वामिन्यर्थकाम, स्वादिति ।

सोमवरुणयोरिति सोमशब्दे वरुणशब्दे च परभूते ऽग्निशब्दस्य देवताद्वन्द्वनिमित्तमीत्वं स्मृतं मूर्द्धन्याधिकारे चाग्नेः स्तुत्स्तोमसोमा इत्यत्राग्निशब्दात्परस्य सोमशब्दस्य मूर्द्धन्यादेशेन षत्वस्मृतेः । सोमशब्दस्याग्निशब्दाद्भेदावगमादर्थाद्देवताद्वन्द्वावगतिरादिशब्दात् पूर्वपदप्रकृतिस्वराधिकारे उभे वनस्पत्यादिषु युगपदित्यनुवर्त्तमाने देवता द्वन्द्वे चेत्यनेनेन्द्रासोमाविन्द्रावरुणाविति पूर्वपदप्रकृतिस्वरत्वं वृद्ध्यधिकारे च हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्यनुवर्त्तमाने देवता द्वन्द्वे चेत्याग्नावैष्णवादिशब्दे उभयपदवृद्धिः आनङृतो द्वन्द्वइति वानुवर्त्तमाने देवताद्वन्द्वे चेत्यानङादेशः।ननु व्याकरणस्यार्थे तात्पर्याभावान्न ततो द्विदेवत्यत्वावधारणं भवतीत्याशङ्क्याह * यदि चेति * तद्धितोच्चारणे देवतात्वप्रतीतेस्तदभ्युपगमे द्वित्वमपि प्रतीत्यविशेषादभ्युपगन्तव्यमित्याह * अथेति * ननु वाक्यभेदादिदोषापत्तेः समासस्यार्थरहितस्यान्वाख्यानात्समासकार्यस्वरलक्षणशब्दसंस्कारमात्रसिद्ध्यर्थं तद्धितान्तेषु शब्देषु द्वन्द्वस्मृतेः प्रामाण्यं कल्प्यते न द्विदेवत्यत्वसिद्ध्यर्थमित्याशङ्क्याह * एतेनेति * एतेनार्थद्वयावगमेन हेतुना स्वरसंस्कारमात्रसिद्ध्यर्थत्वकल्पना न युक्तेत्यर्थः । अश्वकर्णादिवैषम्यमुपपादयति * तथा हीति * नन्विन्द्रे ऽपि महत्त्वगुणयोगस्य प्रमाणान्तरेणासंवादान्महेन्द्रशब्दे ऽपि समासान्वाख्यानं स्वरसंस्कारमात्रार्थं स्यादित्याशङ्क्याह *महदिति * महाब्राह्मण इत्यादौ महच्छब्दस्य पूज्यत्वाख्यगुणवाचित्वावगमादिन्द्रशब्दस्य च स्तवनीयसूक्तादिना देवताविशेषवाचित्वावगमादवयवयोरर्थवत्त्वं विशेषणविशेष्यरूपार्थवाचित्वं च तावत्सिद्धमेवेत्यर्थः । नन्वेवमपीन्द्रे महत्त्वगुणयोगे प्रमाणाभावाद्विशिष्टवाचिता महेन्द्रशब्दस्य न युक्तेत्याशङ्क्याह * तत्रेति * निर्दोषकल्पनावयवार्थशब्दप्रयोगान्यथानुपपत्तिरेवेन्द्रमहत्त्वगुणयोगे प्रमाणमित्याशयः । न चाश्वकर्णादिवद्योग्यानुपलब्धिर्विशिष्टार्थबुद्धेर्बाधिकात्रास्तीत्याह * न चेति * ननु समुदायप्रसिद्धिरेवावयवप्रसिद्धेर्बाधिका भविष्यतीत्याशङ्क्याह * न चेति * समुदायशक्तिकल्पनाहेतोरवयवार्थाभावस्यानिश्चयात्समुदायप्रसिद्धेरात्मलाभानुपपत्तेर्बाधकत्वं न सम्भवतीत्यर्थः । नन्ववयवार्थाभावानिश्चये ऽपि सद्भावस्याप्यनिश्चयात् समुदायप्रसिद्ध्यात्मलाभो भविष्यतीत्याशङ्क्याह*
७००।२ न चेति * अन्यथानुपपत्तिलभ्यत्वाच्छक्तेरवयवार्थाभावानिश्चये ऽन्यथानुपपत्तेरनिश्चयान्न शक्तिकल्पना शक्येत्याशयः । अतिक्लेशापत्तेरपि शक्त्यन्तरकल्पना न युक्तेत्याह * किं चेति * श्लोकं

व्याचष्टे * प्रत्यक्षे ऽपीति * परव्याख्यादूषणमुपसंहरति * तस्मादिति* ननु क्रमेण युगपद्वा वृत्तिद्वययोगादवयवव्युत्पत्तिर्न सम्भवतीत्युक्तमत आह * न चेति* क्रमवृत्तावसामर्थ्यं परेणानुक्तमपि तद्धितपूर्वत्वे वस्तुतो ऽसामर्थ्यात्समासपूर्वत्वे ऽप्यसामर्थ्यशङ्कापत्तेस्तन्निरासार्थं निरस्तं समासवेलायामिन्द्रशब्दस्य तद्धितापेक्षत्वे ऽपि प्राधान्यात् सामर्थ्याविघातः तद्धितवेलायां च समासार्थेनैव तद्धितान्वयात्तद्व्यतिरिक्तस्याचार्थस्यापेक्षणीयस्यानुपादानान्नासामर्थ्यापत्तिरित्यर्थः। यस्त्वस्मिन्पक्षे महदिन्द्रशब्दयोरुच्चारणावृत्त्यापत्तेर्वाक्यभेद उक्तस्तन्निरस्यति * न चेति * एकार्थशब्दस्य सकृदुच्चरितस्यानेकार्थत्वायोगादनेकार्थतायामुच्चारणावृत्तिः स्यात् माहेन्द्रपदेन त्वेकेनैवोपात्तानामनेकेषामर्थानामसकृदुच्चरितैः लौकिकैः शब्दैः कथने ऽपि न वैदिकशब्दावृत्त्यापत्तिरित्यर्थः। कथं माहेन्द्रपदेनानेकार्थोपादानमित्याशङ्क्याह * वृत्तीति * नन्वेवमपि पदस्य पदार्थमात्रवाचित्वात् महत्वेन्द्रविशेषणविशेष्यभावद्रव्यदेवतान्वयरूपानेकवाक्यार्थकथनमुच्चारणावृत्तिं प्रयुञ्जीतेत्याशङ्क्याह * एकैका चेति * एवं च सकृदुच्चरितस्यापि माहेन्द्रशब्दस्य वाक्यद्वयेनार्थकथनं युक्तमित्याह * तत्रेति * न च विवरणवाक्यगतोच्चारणावृत्त्या वेदवाक्यावृत्तिरित्याह * यच्चेति * अत्र हेतुमाह * न हीति * यथास्थितस्यैव वेदस्योच्चारणावृत्तिर्भवति नान्यरूपस्येत्याशयः। ननु समामार्थकथनवेलायां महेन्द्र इत्येतावतः समासप्रातिपदिकस्य तद्धितान्तात् पृथक्करणात्तद्धितार्थकथनवेलायां च पुनस्तद्धितसहितप्रयोगादुच्चारणावृत्तिः प्रसज्येतेत्याशङ्क्याह * न चेति * कथं विभागं विनार्थकथनमित्याकाङ्क्षायामाह * किं त्विति * आवृत्तिं विना ऽनेकार्थाभिधानशक्तस्य पदस्याविभक्तस्याप्यनेकार्थकथनं पुंवाक्यैर्युक्तमित्याशयः। ननु विभागाभावे पदसमुदायात्मकवाक्यत्वाभावाद्वाक्यार्थाभिधायित्वं न युज्येतेत्याशङ्क्याह * विचित्रेति * ४०१।१
पदस्यावाक्यत्वे ऽपि वाक्यार्थाभिधायिता दृष्टत्वादविरुद्धेत्याशयः। एकानेकार्थप्रतीतिवैचित्र्यमर्थकथनवैचित्र्येणोपपादयति * तथेति* तत्रोदाहरणान्याह * तद्यथेति * बहुतरपदेन वाक्येन पदार्थकथनोदाहरणार्थं परगामिफलं पाकं निर्वर्त्तयत्येकः पाकं निर्वर्त्तयतीति पूर्वावयवीभूतं पाकं निर्वर्त्तयति वर्त्तमानकाले पाकं निर्वर्त्तयतीत्यनेकेन वाक्येन पदार्थकथनोदाहरणार्थम् * वा तथेत्युक्तम् * न चानेकेन वाक्येन कथ्यमानार्थस्य पचत्यादिपदस्य वाक्यभेदो शाब्दत्वं वा तदर्थस्य लोके प्रसिद्धमित्याह * न चेति * लौकिकवा-

कयन्यायं प्रकृते ऽतिदिशति * एवमेवेति * पौरुषेयत्वशब्देनाशब्दार्थतोक्ता । नन्वेवं सति यौगपद्यमेव कस्मान्नेष्टमित्याशङ्क्याह * अवश्यञ्चेति * क्रमवृत्तित्वाद्वाचो युगपदेनेकार्थकथनस्याशक्यत्वादवश्यं भावी क्रम इत्यर्थः । एवमपि समासपूर्वत्वे को हेतुरित्याशङ्क्याह * सो ऽपि चेति * समासवृत्तेः प्रकृत्यर्थत्वात्तद्धितवृत्तेश्च प्रत्ययार्थत्वात्समासपूर्वतैवोचितेत्याशयः । सापेक्षत्वपरिहारायापि समासपूर्वतैवोचितेत्याह * न चेति * ननु महत्वविशिष्टस्येन्द्रस्य तद्धितान्वयात्तद्धितवृत्तावित्यस्य महत्वानपेक्षत्वे ऽपि समासवृत्तौ तद्धितापेक्षत्वात्समासो न युज्येतेत्याशङ्क्याह * अथ वेति * एवं च सति यौगपद्ये तद्धितापेक्षत्वेनेन्द्रशब्दस्य महच्छब्दसमासानुपपत्तिर्योक्ता साप्ययुक्तेत्याह * अतश्चेति * नन्वेवं सति क्रमवृत्तित्वाद्वाचो युगपदवृत्तिद्वयार्थकथनाशक्तावपि क्रियापदस्येवानेकैः कारकपदैर्वस्तुतो युगपत्तद्धितमहच्छब्दाभ्यामिन्द्रशब्दान्वयोपपत्तेर्वृत्तिद्वययौगपद्यं कस्मान्नेष्टमित्याशङ्क्याह * तथापीति * क्रमविशेषे ऽप्ययमेव हेतुरित्याह * यौगपद्ये च गुणस्य देवतात्वान्तर्गतिर्न स्यादित्याह * यदीति * ननु तद्धितार्थप्राधान्यात्तद्वशीकृतयोरिन्द्रमहत्वयोरन्योन्यनियमाद् गुणस्य देवतान्तर्गतिर्भविष्यतीत्याशङ्क्याह * न चेति * क्रियाया युगपदनेककारकसाध्यत्वानियमवत्त्वं युक्तं तद्धितार्थस्य तु देवतात्वस्यैकेन नैराकाङ्क्षान्नोभयनियामकत्वे हेतुरित्याशयः । युगपदुपनिपाते च सतीन्द्रवन्महत्वस्यापि साक्षाद्देवतात्वोपपत्तेरग्नीषोमादिवत् द्वन्द्वस्य देवतात्वं स्यादित्याह * सत्यपि चेति * यौगपद्ये च समासस्याकृतावस्थत्वेन समासनिमित्तप्रातिपदिकैक्याभावात् ङ्याप्प्रातिपदिकादिति चोपादेयत्वेनास्य विवक्षितैकसंख्यत्वात्तद्धितान्वयो न स्यादित्याह * अकृतेति * सुबन्तत्वे च महदिन्द्रशब्दयोरप्रत्यय इतिपर्युदासेनाप्रातिपदिकतया तद्धितान्वययोगादसुबन्तत्वे च समासायोगाद्युगपच्च सुबन्तत्वासुबन्तत्वविरोधात् वृत्तिद्वययौगपद्यं न युक्तमित्याह * किं चेति * क्रमपक्षे समासकाले च सुबन्तत्वं तद्धितकाले चासुबन्तत्वेत्यविरोधसूचनार्थं ते यौगपद्यवादिनः पक्षइत्युक्तम्। यौगपद्यनिरासमुपसंहरति * तस्मादिति * समासपूर्वत्वोपपादनस्य प्रकृतोपयोगमाह * इतीति * अतो नैवं व्याख्यायमाने पूर्वपक्षनिरासः सिध्यतीत्याह * अतश्चेति * स्वमतेन पूर्वपक्षनिरासे सूत्रं योजयति * तदिति * विधिगतशब्दाभिप्रायः श्रुतिशब्द इति भावः । श्लोकं व्याचष्टे * यदपीति * ऐक्ये ऽपीन्द्रमहेन्द्रयोर्विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन ४०२।२

चोदनेति दशमाधिकरणन्यायेनावाहनादिविषये निगमे मन्त्रकार्ये विधिगतस्यैवशब्दस्योच्चारणावधारणात् महेन्द्रशब्दोक्तस्यैवार्थस्य देवतात्वप्रतीतेरैन्द्रमन्त्रोत्कर्षो ऽपरिहार्य इत्यर्थः। ननु दशमाधिकरणे पर्यायभूतशब्दान्तरनिषेधे ऽपीन्द्रशब्दस्य महेन्द्रशब्दाक्यवत्वान्नोत्कर्षापत्तिरित्याशङ्क्याह * तत्रेति * तेन चोदनेति दाशमिकसूत्रावयवव्याख्यायै तदुपपादयति * तथा हीति * देवतायाः प्रतिग्रहीतृत्वाभावेन रूपासमवायादुद्देश्यत्वमात्रेणोपकारित्वादुद्देश्यस्य च शब्दाधीनत्वात्केन शब्देनोद्देष्टव्या देवतेत्यपेक्षायां श्रुतशब्दत्यागेनाश्रुतशब्दकल्पनायोगाद्विधिगतेनैवशब्देन देवतात्वचोदनावगतेन शब्दान्तरवन् न्यूनशब्दोच्चारणे ऽपि देवतात्वप्रसिद्धिरित्यर्थः। यत्तु शब्दमात्रस्य देवतात्वाभावादर्थस्य गुणावुक्तावपि तत्त्वमनपायान्न्यूनशब्दोच्चारणे ऽपि देवतात्वाविघात इत्युक्तं तन्निरासाय * अर्थो ऽपीत्युक्तम् * महत्वविशिष्टस्येन्द्रस्येह देवतात्वविधानान्न शुद्धस्य देवतात्वमस्तीत्यर्थः। श्लोकं व्याचष्टे * देवतात्वस्येति * देवतात्वस्य प्रमाणान्तराविषयत्वमविहितदेवताकल्पनाशङ्कानिरासार्थेन नासति विधाने देवताभावात् सम्बन्धिशब्दो ऽयं देवतेत्यादिना पौर्णमास्यधिकरणभाष्येणोपपादयति * यथेति * श्लोकार्थमुपसंहरति * तेनेति * नन्वग्निपुरोडाशयोरिन्द्रसोमाभ्यामत्यन्तभेदा- ४०३।१
द्विहितार्थासम्पादकत्वे ऽपि निर्गुणस्य सगुणादत्यन्तभेदाभावाद्विहितार्थसम्पादकत्वं भविष्यतीत्याशङ्क्याभिष्टुतस्येत्युक्तम् ननु द्रव्यत्वेन विहितस्य रसस्य लतावस्थायामभावालुत्तायां विहितार्थासम्पादकत्वे ऽपि इन्द्रस्य शुद्धोक्तावपि वस्तुतो गुणवत्त्वसद्भावाद्विहितार्थसम्पत्तिर्भविष्यतीत्याशङ्क्य *शुद्धे चेत्युक्तम् * वस्तुवृत्तिविवक्षायामैन्द्रदध्यभावास्यायामिति शुद्धेन्द्रविधावपि वस्तुतो गुणवत्त्वसद्भावात् सगुणस्य देवतात्वप्रसक्तेः शब्दाभिधानेन देवतात्वं वाच्यम्। न च शुद्धाभिधानेन गुणवत्त्वोक्तिर्भविष्यतीत्याशयः। ननु गुणस्य गुणयुपलक्षणमात्रार्थत्वेन देवतात्वान्तर्गत्यभावात्कथं गुणवद्विधौ निर्गुणस्य देवतात्वाभाव इत्याशङ्क्य प्रश्नपूर्वं निरस्यति *कुत इति * श्लोकं व्याचष्टे * यदि हीति * ननु गुणस्य देवतात्वान्तर्गतौ स्वरूपेणापि देवताया यागसमवाये निर्गुणाभिधानोत्कर्षसिद्धे व्यर्थं श्रुतिसमवायाभिधानमित्याशङ्क्याह * तदिहेति * अतिशयार्थं श्रुतिसमवायाभिधानमित्याशयः। नन्वेवं सति महत्वेन्द्ररूपानेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह * समासेनेति *विशिष्टरूपैकार्थविधानान्न वाक्यभेद इत्याशयः। शुद्धदेवतात्व-

निरासस्य प्रकृतेन्द्रप्रगाथोत्कर्षोपयोगमाह * तत्रेति * शुद्धेन्द्रदेवतात्वनिरासे ऽपि विधिश्रुत्या सम्यगवापो ऽवगमो यस्य देवतात्वस्य तच्छ्रुतिसमवायि तस्य भावः श्रुतिसमवायित्वमित्येवं सूत्रं योजयति * अतश्चेति * ननु देवतात्वस्य विधिश्रुत्यधीनज्ञानत्वे तद्धितसंयोगेन विज्ञायेतेति भाष्यमयुक्तं स्यादित्याशङ्क्याह * तच्चेति * उपधानार्थस्य चरोर्बाहस्पत्यो भवतीति तद्धितसंयोगे ऽप्यविधानेन देवतात्वानभ्युपगमाद्विध्यधीनमेव देवतात्वं विधेयसमर्पकत्वेन तु तद्धितो भाष्यकृतोक्त इत्याशयः । अतो ऽधिष्ठानाभेदे ऽपि देवतारूपं भिन्नमित्युपसंहरति * तस्मादिति * अस्मिन्नेवार्थे प्रश्नपूर्वं भाष्यं गमयितुमुपक्रमते *कथं त्विति* तत्रेन्द्रो ऽस्येति भाष्यं शुद्धेन्द्रदेवतानिरासार्थत्वेन व्याख्यास्यन् पूर्वपक्षिणापि शुद्धस्य देवतात्वानभ्युपगमादयुक्तमाशङ्क्यापाद्योक्तित्वेन व्याचष्टे * पूर्वपक्षेति * ननु वशाद्दृष्टान्तात् सगुणे चोदित इति भाष्याच्च सगुणदेवतात्वस्यापूर्वपक्ष्यभिमतत्वप्रतीतेः । कथं शुद्धेन्द्रदेवतात्वस्य
४०४।७ पूर्वपक्ष्यभिमतत्वापादनमित्याशङ्क्याह * सिद्धवच्चेति * यद्यप्येषो ऽर्थो वस्तुतः पूर्वपक्षिणो ऽनभिमतस्तथाप्यन्यथानुत्कर्षासिद्धेरनुपपत्तिकमपि सिद्धवदभिप्रेतं मन्वानः सिद्धान्ती इन्द्रो ऽस्य ग्रहस्य देवतेति ब्रवीतीत्युक्ते तु सिद्धान्ते ऽपीन्द्रस्यैव महत्वविशिष्टस्य देवतात्वादिन्द्रस्य देवतात्वनिरासो न युक्त इत्याशङ्क्य *निष्कृष्येत्युक्तम् * महत्वान्निष्कृष्य शुद्धस्येन्द्रस्य देवतात्वमापाद्य निरस्यतीत्यर्थः। यत्रेति वार्थवत्त्वादित्यत्रोत्कर्षस्य पूर्वपक्षिणाभ्युपेष्यमाणत्वात्पूर्वपक्ष्येकदेशी पूर्वपक्षिवादिशब्देनोक्तः (स्वयं वानुत्कर्षे ऽप्यर्थवत्त्वादिशब्देनोक्तः[2]) स्वयं वानुत्कर्षे ऽप्यर्थवत्त्वाभिधानार्थतया तस्य सूत्रस्य व्याख्यास्यमानत्वात्पूर्वपक्षिणो ऽनुत्कर्षो ऽभिमतः । न चास्येति भाष्यमपि शुद्धपदाध्याहारेण व्याचष्टे * न चेति * वृत्तिद्वययौगपद्यनिरासार्थत्वप्रदर्शनाय * अकृतइत्युक्तम् * प्रधानस्य सापेक्षत्वे ऽपि समासतद्धितसंयोगोपपत्तेरुपसर्जनीभूतस्येत्युक्तं तद्धितेति भाष्यं प्रधानसापेक्षत्वे समासाविधातादयुक्तमाशङ्क्यासुबन्तत्वानिमित्तसमासासम्भवाभिप्रायेण व्याचष्टे * तद्धितेति * कस्तर्हि प्रधानसापेक्षसमासान्वाख्यानस्य विषय इत्याशङ्क्याह * तेनेति * नन्वसुबन्तत्वात् समासायोगे ऽप्यसमस्तयोरेव महदिन्द्रशब्दयोस्तद्धितान्वयो भविष्यतीत्याशङ्क्याह * अकृते चेति * यदि त्वेतद्दोषपरिहारा-

१ तुशब्दस्थाने नन्विति प० ।

२ स्वयं पा० २ पु० ना० ।

येन्द्रप्रातिपदिकमात्रस्य तद्धितान्वयो ऽभ्युपगम्यते ततो गुणस्य देवतात्वानन्तर्गतेर्महच्छब्दानर्थक्यं तद्धितप्रकृतौ च प्रातिपदिके महच्छब्दस्य विशेषणस्यानन्तर्गतेः पूर्वपदवृत्तिर्न स्यादित्याह * शुद्धस्य चेति * न चेति भाष्यं यौगपद्ये दोषान्तराणां वक्ष्यमाणत्वान्मध्ये क्रमनिरासानौचित्येनायुक्तमाशङ्क्य परानभिप्रेतत्वाभिधानार्थत्वेन व्याचष्टे * क्रमेति * क्रमवृत्तौ महत्वविशिष्टस्येन्द्रस्य देवतात्वापत्तेरित्याशयः। ननु तद्धितपूर्वत्वे विशिष्टस्य देवतात्वानापत्तेः किमित्यनभिप्रेतत्वमित्याशङ्क्याह * पूर्वमिति * समासपूर्वत्वस्य स्वाभिमतत्वान्निरासो न युक्त इत्याशङ्क्य ननु समासपूर्वत्वे ऽपि प्राधान्येनेन्द्रस्य शुद्धस्यैव तद्धितान्वयाद्देवतात्वं भविष्यतीत्याशङ्क्योत्तरत्वेन शुद्धपदाध्याहारेण व्याचष्टे * न चेति * समासान्तर्गतस्येन्द्रस्य पृथक् प्रातिपदिकत्वाभावात्तद्धितान्वयो न युक्त इत्याशयः। एतस्मिन्नेवेति यौगपद्याशङ्काभाष्यं प्रागेव यौगपद्यनिरासादयुक्तमाशङ्क्य क्रमवृत्तौ निरस्तायां पारिशेष्यान्निरस्तमपि यौगपद्यमेव क्रमविशेषानवधारणेनौचित्यादापाद्यतइत्येवमर्थत्वेन व्याचष्टे * तेनेति * न चेति वैरूप्याभिधानार्थं भाष्यं व्याचष्टे * ततश्चेति * विस्पष्टश्चेत्यनेकार्थविधिदोषाभिधानार्थं भाष्यं समासार्थस्यैकस्य देवतात्वविधावनेकार्थविध्यनापत्तेरयुक्तमाशङ्क्याकृतसमासावस्थाविषयत्वेन व्याचष्टे * विस्पष्टश्चेति प्राक्समासाद्वाक्यभेदमाहेत्यन्वयः। तस्मादित्युपसंहारभाष्यं स्वाभिप्रेतार्थानुगुणत्वायाकारप्रश्लेषेणाध्याहृतशुद्ध कथं तर्हि शब्दकभिन्नवाक्यत्वेन वा द्वेधा व्याचष्टे * तस्मादिति * महेन्द्रेति भाष्यं विशिष्टदेवतात्वोपपादनार्थत्वेन व्याचष्टे *समासेति* न तु केवलादिन्द्रशब्दादित्येवं भाष्यगत- ४०५।२
स्तुशब्दो व्याख्येयः। ननु सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिर्न त्विन्द्रशब्दमात्रादिति कथमवगम्यते इत्याशङ्क्य यस्मात्सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिस्तस्मात्सकलं प्रातिपदिकमर्थवन्न त्ववयवस्येन्द्रशब्दमात्रस्य तद्धितसम्बन्धेन सकलं प्रातिपदिकमर्थवन्महच्छब्दानर्थक्यापत्तेर्निष्कर्षाशक्तेश्चावयवस्य तद्धितसम्बन्धायोगादित्यभिधानार्थं तस्मादिति भाष्यं परोक्तावयवव्युत्पत्तिनिराकरणार्थनिरासपूर्वकं व्याचष्टे * न त्विति * शुद्धेन्द्रदेवतात्वनिरासप्रयोजनाभिधानार्थं तस्मादितिभाष्यम् इन्द्रस्यैव महत्वविशिष्टेन महेन्द्रदेवतात्वादयुक्तमाशङ्क्य व्याचष्टे * तस्मादिति * अधिष्ठानैक्ये ऽपि व्यपदेशभेदसम्भवे वृद्धोक्तं दृष्टान्तमुदाहरत्याह * चेति * आचार्यशब्दार्थस्य शिष्यमेव प्रतिसन्धायेन शिष्यापेक्षत्वादपेक्षणीयाभावे

वा ऽपेक्षानुपपत्तेरपेक्षणीयः शिष्यः प्रतिसम्बन्ध्याचार्यस्य शिष्यापेक्षायां हेतुः मातुलस्य च भागिनेयापेक्षायां भागिनेयो हेतुः तद्भेदेन द्रव्यैक्ये ऽपि पृथक्त्वेन व्यवहारो दृश्यतइति वृद्धश्लोकार्थः । यदपीति शङ्काभाष्यं पूर्वपक्षिणः कदा चिदपि महत्त्वस्य देवतात्वान्तर्गतेन्द्रनिष्ठत्वेन वृत्रवधोत्तरकालत्वाभिधानानर्थक्यादयुक्तमाशङ्क्यानन्तर्गत्याभिधानार्थत्वेन व्याचष्टे * यदपीति * तथेत्युत्तरभाष्यं प्रागेव व्याख्यातमित्याह * अस्य त्विति * ननु महत्त्वस्य देवतात्वान्तर्गतौ शुद्धेन्द्रदेवत्यप्रगाथस्य तत्प्रकाशनासामर्थ्येन देवतैक्ये ऽप्युत्कर्षसिद्धेर्भेदाभिधाने व्यर्थमित्याशङ्क्य भेदाभावे छागमन्त्रस्येव वशाजाद्रव्यकादिन्द्रमन्त्रस्य महेन्द्रदेवताकात्कर्मणः कथं चित्प्रकाशकत्वसम्भवेनोत्कर्षासिद्धेस्तत्सिद्ध्यर्थं प्रयत्नेन देवताभेदाभिधानमिति सूचयितुं देवताभेदेन कथं चिदनुत्कर्षः सिद्ध्यतीति वक्तुमाह * स्थिते चेति * अनुत्कर्षवादिना हि शुद्धस्येन्द्रस्य यत्प्रकाशनं तद्देवताया एव प्रकाशनं शुद्धस्यैव देवतात्वाद्विशिष्टस्यापि देवतात्वे शुद्धेनेन्द्रशब्देन छागशब्देनेव वशात्वविशिष्टस्य द्रव्यस्य विशेषणाप्रकाशने ऽपि स्वरूपेण प्रकाशनं विशिष्टस्यापि वा तद्धितान्वयश्रवणे विशेषणस्यानन्वयाच्छुद्धस्यैव देवतात्वं शुद्धेन्द्रशब्दोच्चारणे ऽपि वा प्रगाथगतेन मनोतागतेनैवाग्निशब्देनाग्नीषोमयोर्लक्षणया विशिष्टप्रकाशनम् आदिशब्दात्परमैश्वर्यवाचिनेन्दतिधातुना महत्त्वविशिष्टप्रकाशनमिति वाच्यम । न चैषां प्रकाराणां मध्ये कश्चित्प्रकारः सम्भवतीत्युत्कर्षो दुष्परिहर इत्यर्थः । ननु देवताभेदे सतीन्द्रशब्देन महेन्द्रप्रकाशनाशक्तेः सिद्धान्ते ऽप्युत्कर्षः स्यादित्याशङ्क्याह * अस्मत्पक्षइति * यागानङ्गस्येन्द्रादेस्त्यज्यमानद्रव्योद्देश्यत्वलक्षणहविर्भाक्ताख्यदेवतात्वाभावे ऽपि यमर्थं प्राधान्येन मन्त्रो ऽभिधत्ते सा देवतेत्येवं लक्षणास्तुतिभाक्ताख्यदेवतात्वसद्भावादेवतामित्युक्तम् । प्रकरणान्माहेन्द्रयागाङ्गत्वे ऽप्यैन्द्रप्रगाथसाध्यायाः पृष्ठाख्यायाः स्तुतेः सन्निपत्योपकारित्वे पशुपुरोडाशान्तिमप्रयाजादिवदेवतासंस्कारद्वारा यागाङ्गत्वशङ्कानिरासार्थो मात्रशब्दः । व्यपदेशाच्चेति सूत्रं व्यपदेशभेदाच्च भेद इत्यादिना प्रागेव व्याख्यातत्वान्न व्याख्यातम् ।

गुणश्चानर्थकः स्यात् ॥ १८ ॥

यदेत्यादिभाष्येण शुद्धस्येन्द्रस्य देवतात्वे महत्त्वगुणकीर्त्तनानर्थक्यापत्तिरित्येवं सूत्रं व्याख्यातं तत्प्रमादपाठस्य तुल्यसांप्रदायिकत्वेन निरस्तस्य आशङ्कितुमशक्यत्वेन गुणस्य देवतात्वानन्तर्गतिवा-

दिना स्तुत्यर्थकीर्त्तनस्यावश्यवाच्यत्वादानर्थक्यपरिहारोपपत्तेरयुक्तमाशङ्क्य प्रकृतग्रहसम्बन्धनिरपेक्षस्येन्द्रस्वरूपस्य वा स्तुतिः प्रकृतग्रहसम्बन्धिनो वेति विकल्प्याद्यकल्पे विधिशेषत्वाभावेनानर्थक्यमुपपादयितुमाह * यदि चेति * स्तुतेर्विध्यङ्गत्वं विनानर्थक्यापत्तेर्देवतात्वान्तर्गत्यभावे गुणाभिधानानर्थक्यस्यापरिहार्यत्वम् * सर्वा हीत्यनेनोक्तम् * अथोच्येतेति भाष्येण द्वितीयं कल्पमाशङ्क्य नैवमित्यनेनेन्द्रस्य प्रकृतग्रहसम्बन्धाप्रतीतेर्न स्तुत्येन्द्रविशेषणत्वं प्रकृतग्रहसम्बन्धस्य सम्भवतीत्युक्तम्। नन्वेवं तर्हि को ऽसाविन्द्र इत्यपेक्षायां यो महानिति विधेयेन्द्रोपलक्षणार्थं गुणाभिधानं भविष्यतीत्याशङ्क्यानिरासार्थं गुणसम्बन्धस्य चेत्युक्तम्। तदुभयं व्याचष्टे *किं चेति* इन्द्रस्य ग्रहसम्बन्धप्राप्तेः पश्चादभिहितः सन् विधेयदे- ४०६।२
वतोपलक्षणत्वेन वोक्तः सन् गुणो देवतात्वे ऽनन्तर्गतो भवेन्न चैतत्पश्चादभिधानं देवतोपलक्षणत्वेन वा वचनमस्ति सम्भवतीन्द्रस्य ग्रहमहत्वसम्बन्धयोरन्यतो ऽप्राप्तत्वादित्युक्तम्। नन्वन्यतो प्राप्तावपि माहेन्द्रपदादेव प्राप्तिर्भविष्यतीत्याशङ्क्य त्वत्पक्षे ऽस्य पदस्य स्तुत्यर्थत्वेन लक्षणार्थत्वेन वा विध्यर्थत्वायोगादेकस्मिंश्च पदे निष्कर्षासम्भवेनांशेन विध्यनुवादायोगान्नास्मादेव प्राप्तिः सम्भवतीति तेशब्देनोक्तम् श्लोकं व्याचष्टे * न हीति * तस्मादपीत्युपसंहारभाष्यं व्याचष्टे * तस्मादिति *

तथा याज्यापुरोरुचोः ॥ १९ ॥

पुरोरुक्शब्दस्य शस्त्रगतमन्त्रविशेषवाचित्वे ऽपि याज्यासाहचर्येणेहानुवाक्यावाचित्वं वक्तुं भाष्यकृता पुरो ऽनुवाक्याशब्दः प्रयुक्तः। तथा शब्दो बहुदुग्धिमन्त्रयोर्भेदव्यपदेशादिन्द्रमहेन्द्रयोर्भेदस्तथैन्द्रसानसिं रयिं प्रससाहिषे पुरुहूत शत्रूनिति याज्यानुवाक्याद्वयमैन्द्रं महां इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महानिति माहेन्द्रमिति व्यपदेशभेदादिन्द्रमहेन्द्रयोर्भेद इत्येवं व्याख्यातः। तत्र कथं व्यपदेशस्य देवताभेदहेतुतेत्यपेक्षायां बहुदुग्धिमन्त्रोक्तां देवतैक्ये विकल्पापत्तिमतिदेष्टुमाह * पूर्ववदिति * व्यवहितातिदेशपरिहारार्थं माहेन्द्रं दध्यमावास्यायां माहेन्द्रं पयो ऽमावास्यायामित्यत्रापि महत्वस्य देवतात्वानन्तर्गतौ गुणानर्थक्यं तथाशब्देनातिदेष्टव्यम्।

वशायामर्थसमवायात् ॥ २० ॥

ननु वशादृष्टान्तेन विशिष्टविधावपि शुद्धप्रकाशनोपपत्तेर-

नाशङ्कितगुणानन्तर्गत्यापादनेन दूषणाभिधानमयुक्तमित्याशङ्क्यानिरासायैतत्सूत्रं वशायामर्थरूपेण कर्मसमवायिनो हृदयाद्यवयवान्वयं प्रत्यक्षेणावगच्छाम इति भाष्येण वशायामर्थसमवायाद् गुणार्थस्याप्यभिधानस्यानुत्कर्षो युक्त इत्येवं व्याख्यातं तदुपपादयति * वशादीति *

यत्तेति वार्थवत्त्वात् स्यात् ॥ २१ ॥

संस्कारकर्मत्वे ऽप्यनुत्कर्षवादिनि पूर्वपक्ष्येकदेशिनि न श्रुतिसमवायित्वादितिसूत्रपञ्चकेन निरस्ते परमपूर्वपक्षी लिङ्गेन क्रमसंनिधी बाधित्वा न्याय्य एवोत्कर्ष इत्यनेन सूत्रेण प्रतिपादयतीति यथाभाष्यं तावद् व्याचष्टे * बलवदिति * अनेन चेतिकरणेन संस्कार्यसद्भावं परामृश्य यत्र संस्कार्यसद्भावस्तत्र प्रगाथः स्यादित्येवं सूत्रं व्याख्यातम् । प्रागाथमेव वेतिकरणेन परामृश्य यत्र प्रगाथः पठ्यते तत्रैव स्यादिन्द्राभिधानद्वारेण लक्षणया महत्त्वविशिष्टेन्द्रप्रकाशनेनार्थवत्त्वादित्युत्कर्षापत्तिपरिहारार्थत्वेनैवैतत् पूर्वपक्षसूत्रं व्याख्येयमित्याह * अथ वेति * यथा मनोताख्यसूक्तस्थो ऽग्निशब्दः करणेनाग्नीषोमसमासस्याग्निप्रकाशकतयावगम्यमानः सहचरितसोमलक्षकत्वात् समासस्यार्थस्य समुदायस्य प्रकाशनं करोति तथायमिन्द्रशब्दो महेन्द्रसमासार्थैकदेशतया प्रत्यभिज्ञायमानत्वात् समासार्थविशिष्टस्य प्रकाशनं करोतीत्यर्थः । श्लोकं व्याचष्टे * स्वार्थेति * ननु त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाहेति श्रुत्या मनोतासूक्तविधानाल्लैङ्गिकोत्कर्षानुपपत्तेर्लाक्षणिकार्थत्वं युक्तं प्रगाथस्य तु श्रौतविधानाभावाल्लिङ्गेनोत्कर्षोपपत्तेर्न लाक्षणिकार्थत्वं युक्तम् अनुत्कर्षाभिधानार्थत्वे चास्य सूत्रस्योत्तरसूत्रमुत्कर्षे सति केषु चिन्मन्त्रेष्वानर्थक्यापत्तेर्नोत्कर्षपक्षो युक्त इत्यभिधानार्थं न सङ्क-
४०७।१ च्छेतेत्याशङ्क्याह * अतश्चेति * अनुत्कर्षे ऽप्यर्थवत्त्वोपपत्तेर्न संस्कारकर्मत्वे सत्यसमवेताभिधानलक्षणदोषापत्तिरिति प्रौढिप्रदर्शनायेयं व्याख्या उत्तरसूत्रं तु याम्यादीनामेकदेशतयापि समासार्थलक्षणकत्वायोगादुत्कर्षापत्तेरपरिहार्यमानर्थक्यमित्यभिधानायेत्याशयः ।

न त्वाम्नातेषु ॥ २२ ॥

ऐन्द्रप्रगाथादिषूत्कृष्यमाणेष्वर्थवत्त्वसम्भवे ऽपि सर्वेषु प्रकरणाम्नातेष्वप्युत्कृष्टे ऽर्थवत्त्वं नास्तीत्युत्कर्षापादकसंस्कारकर्मत्वप-

क्षो न युक्त इति परमपूर्वपक्षदूषणशङ्कार्थत्वेन सूत्रव्याख्यानार्थमपरेषामिति भाष्यं व्याचष्टे * आम्नातेष्वपीति * अर्थदर्शनमित्यनेन पूर्वपक्षसूत्रस्थस्यार्थवत्त्वशब्दस्य प्रथमान्तत्वेन विपरिणतस्यानुषङ्गो दर्शितः। उत्कृष्टशब्देनाग्निमारुते विहितानां याम्यादीनामुत्कृष्टानामन्यत्राप्यर्थवत्ता नास्तीति भाष्यार्थः सूचितः। एतदेवोपपादयति * न हीति * विधिशब्देनाम्नातशब्दो विहितार्थतया व्याख्यातो भवति। ननु यमादेर्ग्रहान्तरे ऽपि देवतात्वाभावाद्याम्यादेरानर्थक्ये ऽप्यैन्द्रप्रगाथादेरैन्द्रादिग्रहयागेष्वर्थवत्त्वोपपत्तेः संस्कारकर्मत्वं भविष्यतीत्याशङ्क्याह * ततश्चेति *

दृश्यते ॥ २३ ॥

तदुच्यतइत्यादिभाष्येण सर्वेष्वर्थवत्त्वं दृश्यतइत्येवमानर्थक्यापत्तिलक्षणदूषणशङ्कानिरासार्थत्वेनैतत्सूत्रं व्याख्यातं तत्र याम्यादीनां ग्रहयागसान्निध्यान्नातेन तद्देवतास्मारकत्वावगतेर्यमादीनां च क्व चित् ग्रहदेवतात्वाभावाद् दूषणपरिहारासम्भवमाशङ्क्याह * यमादय इति * ग्रहदेवतात्वाभावे ऽपि कर्मान्तरदेवतात्वेन प्रकारान्तरेण वा यथासम्भवमुपयोगात्प्रकाश्यत्वं भविष्यतीत्यर्थः। मण्डूकसूक्तस्याम्नावर्थवत्त्वं भाष्योक्तमुपपादयति * मण्डूकेति * राजसूये ऽक्षसूक्तस्योपपादयति * अक्षेति * मूषिकासूक्तस्येति भाष्यमेकादशिन्यामथाखुविनियोगाभावादयुक्तमाशङ्क्योपपादयति * मूषिकेति * आखोरविनियोगे ऽप्युपशयो यूपो भवतीत्युपशयस्यैकादशिन्यां विनियोगात्तस्य च सर्वे वान्ये यूपाः पशुमन्तो ऽथो ऽपशव एवापशुरित्युपक्रम्यासौ ते पशुरिति निर्दिशेत् यं द्विष्यादित्युक्त्वा यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयादिति मन्त्रविधानादाखुसम्बन्धकीर्त्तनाखुस्तुतिद्वारेणोपशयस्तुतित्वान्मूषिकासूक्तस्यैकादशिन्यां प्रयोग इत्यर्थः। सर्वेषामिति कुसुम्भकसूक्तादिविषयत्वेन व्याचष्टे * कुसुम्भकेति * सर्वा इति श्रुत्युपन्यासस्य हेतुत्वेनोपयोगमाह * वाचस्तोम इति * यस्येति श्रुत्यन्तरोपन्यासस्यार्थवत्त्वाभिधानार्थत्वमाह * तथेति * सहस्रमृचामोदेतोः शंसेदित्याश्विनाख्ये शस्त्रे सूर्योदयावध्यृक्सहस्रं समाप्योदिते सूर्ये सौर्यस्य सूक्तम् शंसनं विधाय समाप्ते ऽप्यृक्सहस्रे सूर्यानुदये सत्यृक्सहस्रसमाप्तेः सूर्योदयावधित्वासम्भवाच्छस्त्रविच्छेदपरिहारार्थं सूर्योदयावधि यासां कासां चिदुपदेशात् सर्वासामर्थवत्तेत्यर्थः।मण्डलाख्यदशावयवत्वेन ऋग्वेदसंहिताया दशतयीत्वाद् तद् गता ऋचो

दाशतय्य इति व्याख्यातुमृचामित्युक्तम् । ननु वाचस्तोमाश्विनयोरपि कुसुम्भकसूक्तादेः समवेतार्थत्वाभावाददृष्टार्थत्वाभ्युपगमे चानुत्कृष्टस्यार्थवत्त्वोपपत्तेरुत्कर्षाभिधानानर्थक्यमित्याशङ्क्यानिरासार्थं तस्मादिति भाष्यं व्याचष्टे * तत्र चेति* तत्र वाचस्तोमाश्विनयोरेव मन्त्रविधानसामर्थ्यादृष्टाश्रयणत्वं युक्तमित्युक्ते । नन्वैद्रप्रगाथादेरपि तर्ह्यनुत्कृष्टस्यैव सन्निधावाम्नानकल्पविधिसामर्थ्यादृष्टार्थत्वं भविष्यतीत्याशङ्क्य * वचनेनैवेत्युक्तम् * श्रुतिविहितस्यैव लिङ्गबाधेनादृष्टार्थतोचिता न दुर्बलसान्निध्यादिप्रमाणकस्येत्याशयः । नन्वेवं सति श्रुतिबलादैन्द्रीवद् गौणलाक्षणिकवृत्त्यन्तराश्रयणेन समवेतार्थाभिधायित्वं सूक्तवाकवद्वा मन्त्राभिधेयस्य कर्मसमवायः कस्मान्न भवतीत्याशङ्क्य *असमवेतार्थेत्युक्तम् * करणत्वेन विनियुक्तस्य मन्त्रस्य क्रियां तत्साधनं वा ऽनभिदधतः करणत्वायोगात्तत्सिद्ध्यर्थं गौणत्वादिकल्पना मन्त्रार्थस्य कर्मसमवायकल्पना वोचिता न चैषां करणत्वेन विनियोगो ऽस्तीत्याशयः । अनेन चोत्कृष्टानां प्रकृतावप्रयोज्यानामपि कुसुम्भकसूक्तादीनां तस्माद्वाचस्तोमादौ विधानात् समवेतार्थत्वाभावे ऽप्यदृष्टार्थत्वेनार्थवत्तास्तीति भाष्यं व्याख्यातम् । नन्वेवं सति मण्डूकसूक्तादेरपि वाचस्तोमाश्विनयोरेव विधिसामर्थ्येनादृष्टार्थतया निवेशोपपत्तेर्नाग्न्यादौ विनियोगकल्पनेत्याशङ्क्याह * न चेति * दृष्टार्थसम्भवे तत्त्यागो न युक्त इत्याशयः । एतदेव दृष्टान्तेनोपपादयति * तथा हीति * अन्यत् यज्ञस्य साधनादावपघातो देवा अवन्तु न इति जपेदपि वा ऽन्यां वैष्णवीमिति यज्ञाङ्गप्रेषे तत्समाधानापेक्षायां विधीयमानस्य जपस्य तादर्थ्येनादृष्टार्थतया तत्साधनभूताया वैष्णव्यादेर्ऋचो दृष्टार्थत्वायोगेनादृष्टार्थत्वे ऽपि न तदृदृष्टान्तेन दृष्टार्थयागाङ्गदेवतास्मृतिसाधनत्वेन सम्भवदृष्टार्थत्वस्य याज्यादेरपि दृष्टार्थत्वकल्पनोचितेत्यर्थः ।

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती
क्रियोत्पत्तिं विदध्याताम् ॥ २४ ॥

पूर्वपक्षानिरासे सिद्धान्ताभिधायित्वे ऽपि पक्षद्वयप्रतिभानात्सन्देहापत्तेस्तन्निरासे श्रुतिसंयोगात्प्रकरण इति सूत्रावयवं योजयन् अथ वार्थैकदेशो ऽयमिति स्वयं व्याख्यातं पूर्वपक्षसूत्रपक्षे तावदनुभाषणपूर्वकं योजयति * यदुक्तमिति * एतच्छब्देन लक्षणा- ४०८।९

परामर्शः । अनेन च प्रकृतदेवतालक्षणार्थत्वे सत्यश्रुतिसंयोगदोषापत्तेरित्यकारप्रश्लेषेण सूत्रावयवो योजितः । ननु मनोतावल्लक्षणा न दोषायेत्याशङ्क्याह * न हीति * मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीति प्रैषसामर्थ्यान्मनोतासूक्तस्य हविर्देवतास्मृत्यर्थत्वावगतेः सोमसहितस्यैव चाग्नेर्हविर्देवतात्वाद्युक्ता लक्षणा ऐन्द्रप्रगाथस्य तु हविर्देवतास्मृत्यर्थत्वे प्रमाणाभावात्स्वरूपमात्रेणेन्द्रस्य स्तुत्यर्थं प्रकाश्यत्वोपपत्तेर्न लक्षणा युक्तेत्याशयः । ननु विरोधाभावे ऽपि इष्टार्थत्वाय लक्षणाङ्गीकरणं युक्तमित्याशङ्क्याह * सर्वेति * वैष्णव्यादेरपि देवताभूताग्न्यादिलक्षणया इष्टार्थत्वोपपत्तेरनिष्टापत्तिः स्यादित्यर्थः। भाष्यकृद्व्याख्यातपूर्वपक्षसूत्रपक्षे ऽप्यनुभाषणपूर्वकमकारप्रश्लेषं विना योजयति*यस्त्विति* अनेन च प्रक्रियतइति कर्मव्युत्पन्नं प्रकरणशब्दमङ्गीकृत्य प्रकृते माहेन्द्रयागाङ्गभूते पृष्ठाख्ये स्तोत्रे रथन्तरचोदनोपस्थानात्मकेन सन्निधिना कल्पनया श्रुत्यैन्द्रस्य प्रगाथस्याङ्गत्वेन संयोगादिति सूत्रावयवो योजितः । ननु सन्निधेर्लिङ्गेन बाधाच्छ्रुतिकल्पकत्वं न सम्भवतीत्याशङ्क्याह * विनेति* लिङ्गस्येह सन्निधिबाधकत्वायोगे चकारसूचितं तावद्धेतुमाह * यदीति * पूषाद्यनुमन्त्रणमन्त्राणां यागानुमन्त्रणसमाख्यया ।

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥

इत्यनुमन्त्रणानां स्मारकत्वलक्षणेन इष्टार्थत्वावगतेः प्रकृताग्नेयादियागस्मृत्यसामर्थ्याच्च लिङ्गेन प्रकरणकल्प्यश्रुतिप्रतिबन्धो युक्तः । ऐन्द्रप्रगाथादेस्तु इष्टार्थत्वस्य प्रागनवगतेर्लिङ्गव्यापाराभावान्न क्रमसन्निधिकल्प्यश्रुतिप्रतिबन्धकत्वं सम्भवतीत्याशयः । लिङ्गादेर्बलवद्विरोधे श्रुतिकल्पकत्वाभावात्प्रतिबन्धवाची बाधशब्दः लिङ्गक्रमसमाख्यानादित्यत्र च लिङ्गस्य सामान्यसम्बन्धसापेक्षत्वस्य वक्ष्यमाणत्वादस्य च प्रगाथस्य क्रत्वन्तरेण सामान्यसम्बन्धाभावात् लिङ्गविनियोज्यत्वानुपपत्तेर्न तद्बलेन क्रमसन्निधिकल्प्यश्रुतिप्रतिबन्धो युक्त इति कण्ठोक्तं हेतुं व्याचष्टे * न चेति * कर्मान्वयं विना हविर्भाक्त्वलक्षणदेवतात्वायोगात् स्तुतिभाक्त्वलक्षणदेवतात्वाभिप्रायो देवताशब्दः सामर्थ्येन देवतास्वरूपे कर्मान्वयानपेक्षविनियोगापत्तेरानर्थक्यं स्यादित्यर्थः । न मन्त्रमिति तु पाठे तत्सामर्थ्यमन्त्रं न विनियुञ्जीतेत्युक्ते कस्मादित्यपेक्षायां स्वरूपविनियोगे सत्यानर्थक्यापत्तेः कर्मान्वितरूपे च लिङ्गस्य व्यापाराभावादि-

१ इष्टार्थीमहेन्द्रस्तदुपलक्षणार्थत्वमिन्द्रशब्दस्येत्यर्थः ।

ति विकल्प्य व्याख्येयम।ननु लिङ्गस्य कर्मान्वितरूपविनियोगे व्यापारभावे कथं पूषाद्यनुमन्त्राणानां पूषादिदेवत्ये कर्मणि लिङ्गेन विनियोगो Sत आह * तदेतदिति * यागानुमन्त्रणसमाख्यया सामान्यतः क्रतुसम्बन्धावगतेर्लिङ्गेन द्वारविशेषविनियोगो युक्त इत्याशयः । ततश्चानर्थक्यापत्तेरुत्कर्षो न युक्त इत्युपसंहरति * तस्मादिति * स्तुत्यर्थत्वेन मन्त्राणां दृष्टार्थत्वे Sपि तज्ज्ञन्याया स्तुतेरदृष्टार्थतोक्ता एवं पूर्वपक्षनिरासार्थत्वेन स्वयं द्वेधा श्रुतिसंयोगं व्याख्यायाधुना सिद्धान्तोपपादनार्थत्वेन भाष्यकारीयाश्चतस्रो व्याख्याः सङ्गृह्णाति * किं चेति * अभिधानं च कर्मवदिति सूत्रस्य द्वेधा व्याख्यास्यमानत्वात् द्वितीयाभिप्रायत्वे पौनरुक्त्यापत्तेराख्यातश्रुत्यभिप्रायतयापि च श्रुतिसंयोगो भवति प्रउगं शंसतीति भाष्यस्य व्याख्यानादाख्यातमपि द्वितीयाग्रहणेनोपलक्षितं भाष्यक्रमात् सप्तम्यनन्तरं द्वितीयानुक्रमितव्यापिपादभङ्गापत्तेः षष्ठ्यनन्तरमनुक्रान्ता सिद्धान्ते सप्तमीसंयोगसम्भवाभिप्रायार्थं यदीति भाष्यं गुणवत्त्वज्ञापनाख्यायाः स्तुतेः स्तोतृपुरुषाधारत्वेनाक्षरानाधारत्वेनायुक्तमाशङ्क्योपपादयति * गुणेति * अयमाशयः ज्ञानहेतुर्व्यापारो ज्ञापनं स चाक्षराणामविधानाख्यः पुरुषस्याप्यभिधावकाक्षरोच्चारणाख्यः । तत्र पुंव्यापारे Sक्षराणामकर्तृत्वेनाधारत्वायोगे Sप्यभिधानाख्ये व्यापारे Sक्षराणां कर्तृत्वात्कर्त्राधारत्वाच्च व्यापारस्याक्षराधारता युक्तेति पूर्वपक्षे सप्तमीसंयोगानुपपत्त्यभिधानार्थं यदि प्रकाशनमिति भाष्यं व्याचष्टे * प्रकाशने त्विति * नन्वभिधानाख्यायां स्तुतावपि तृतीयाप्राप्तिस्तुल्येत्याशङ्क्ते * नन्विति * शब्दानां करणत्वं वा कर्तृत्वं वा निरूप्यतइत्यभिधानक्रियायां शब्दानां करणत्ववत् कर्तृत्वस्यापि विवक्षाभेदेनोक्तत्वात्कर्तुश्च क्रियाधारत्वसद्भावात्सप्तमी युक्तेति परिहरति * नैष दोष इति * प्रकाशनाधारत्वं तु शब्दस्य न कथं चिदस्तीत्याह * प्रकाशनमिति * ननु प्रकाशनशब्देन ज्ञानजन्यातिशयविवक्षायां तस्याक्रियात्वेन कारकान्वयायोगात् कवतीनां न तत्र करणत्वं ज्ञानक्रियाविवक्षायां त्वात्माधारत्वात्तस्या देवताधारत्वाभिधानं न युक्तमित्याशङ्क्यानिरासार्थम् * परमार्थतस्तावदित्युक्तम् * समवायिकारणास्याधारत्वप्रसिद्धेः परमार्थशब्देनात्मसमवेतता ज्ञानस्योक्ता साक्षाच्छब्दार्थे वा परमार्थशब्दः ज्ञानमात्मसमवेतत्वात्साक्षादात्माधारमित्यर्थः। यत्तु भाष्यकृता देवताधारं प्रकाशनमित्युक्तम् तद्देवताया ज्ञानजन्यातिशयाश्रयत्वलक्षणात् व्याप्यत्वात्फलगतं हेतावुपचरितमित्युक्ते। ननु ज्ञानस्यातीता-

४०९।१

नागतवर्त्तमानविषयत्वादतीतानागतयोश्चाश्रयत्वायोगात् ज्ञानस्य विषयाश्रितातिशयहेतुता न युक्तेत्याशङ्क्य * कर्मत्वेत्युक्तम् * पाकादिक्रियाकर्मणस्तण्डुलादेः क्रियाजन्यातिशयाश्रयत्वदर्शनात्कर्मत्वेन ज्ञानक्रियाकर्मणोऽपि क्रियाजन्यातिशयाश्रयत्वे ऽनुमिते तद्बलेनातीतानागतयोरपि अतिक्रान्तदिवसादिगतसङ्ख्यादिवदाश्रयत्वोपपत्तिरभ्युपगन्तव्येत्याशयः । नन्वौपचारिकदेवताधारत्वाभिधानस्य किं प्रयोजनमित्याशङ्क्य कवतीनामौपचारिकमपि ज्ञानाधारत्वं नास्तीत्यभिधानप्रयोजनं सूचयितुमाह * तत्रेति * अपि चेति भाष्यं श्लोके द्वितीयाग्रहणेनाख्यातस्याप्युपलक्षितत्वाद् द्वितीयाश्रुतिसंयोगस्य चाभिधानं च कर्मवदिति सूत्रव्याख्यातभाष्यात्प्रउगं निष्कैवल्यमिति द्वितीयया स्तुतेः प्राधान्यावगतिरित्येवमर्थतया ज्ञातुं शक्यत्वात्तदुपलक्षितमाख्यातश्रुतिसंयोगं शंसतीत्याख्यातेन स्तुत्याख्यस्य धात्वर्थस्य भावनाकरणत्वावगतेः करणत्वस्य च कर्त्तृव्यापारव्याप्यत्वलक्षणं कर्मत्वं विनानुपपत्तेरनिष्पन्नस्य चोत्पाद्यत्वातिरिक्तकर्मत्वायोगादुत्पाद्यत्वप्रतीतिरुत्पादिकां गुणिनीं देवतां प्रतिप्राधान्यावगतिरित्येवं व्याचष्टे * अपिचेति * किमेतत् गुणभूतं देवतां प्रत्युत प्रधानामिति सन्देहभाष्ये देवताम् प्रति स्तुतेर्गुणप्राधान्यविचारस्योक्तत्वादेवतया स्तुतिर्निर्वर्त्तयितव्येति वाच्ये ऽप्यभिधीयमानायाः देवतायाः स्तुतिनिर्वर्त्तकत्वादभिधानस्य च मन्त्राधीनत्वाद्भाष्यकृता * मन्त्रेणेत्युक्तम् *तद् व्याख्यातुं मन्त्रशब्दः स्तुतिमात्रोपलक्षणार्थः स्तोत्रशब्दः अनेन च गुणवचनः शब्द इति भाष्यावयवो व्याख्यातः। प्रकाशननिर्वर्त्तकत्वेनार्थवत्त्वे ऽपि दृष्टार्थत्वसाम्यात्स्तुतिविशेषणानर्थक्यमाशङ्क्य * शास्त्रदृष्टमित्युक्तम् * विशेषणसूचितं प्रकाशनार्थतायामदृष्टार्थत्वं प्रकाशनार्थत्वस्य शास्त्रेणादृत्वादिति व्याख्यातुमचोदित्वकरणादित्युक्तम्।ननु प्रकाशनार्थत्वानभ्युपगमे स्तुतीनामदृष्टार्थत्वं स्यादित्याशङ्क्याह * ततश्चेति * शास्त्राङ्गीकृतत्वात् स्तुतेरदृष्टार्थत्वं युक्तं न मन्त्रस्येत्याशयः। षष्ठ्यभिप्रायेण श्रुतिसंयोगव्याख्यातार्थमपि चेति भाष्यं व्याचष्टे * किं चेति * नन्वेवमपि वीर्यादिगुणस्य द्वितीयान्वयाद्विशेष्यत्वाच्च प्राधान्योपपत्तेर्न स्तुतिप्राधान्यं सिद्ध्येदित्याशङ्क्याह * न प्रधानमिति * कर्मानङ्गत्वाद् गुणानां प्राधान्यं न युक्तमित्याशयः। देवताभिधानार्थ इति भाष्यं व्याचष्टे * देवतेति * अथ यत्प्रथमान्तमित्याशङ्क्यतइत्युच्यत इत्युत्तरभाष्यं व्याचष्टे*यद्यपीति* प्रथमासामर्थ्यात्मकेन लिङ्गेनेन्द्रप्राधान्यावगतेर्न वाक्येन स्तुत्यर्थता

युक्तेत्याशङ्क्य या Sतो Sवसितस्येत्यादेर्गुणाभिधानार्थस्य पद-
समुदायस्य गुणयाकाङ्क्षस्य निराकाङ्क्षीकरणसामर्थ्यात्मकं लिङ्गं
वाक्यस्योपोद्बलकमस्तीति वक्ष्यमाणं परिहारं सूचयितुम् * यो-
४१०।१ ग्यताशब्दः * नन्वेवं सत्येकवाक्यतोपगमनसामर्थ्यात्मकस्य लिङ्ग-
स्य सर्ववाक्येषु भावान्न क्व चिल्लिङ्गेन वाक्यं बाध्येतेत्याशङ्क्यानि-
रासार्थः पूर्वशब्दः।एकवाक्यतोपगमनसामर्थ्यस्यैकवाक्यताकल्प्यत्वे-
नोपोद्बलकत्वं न सम्भवतीत्यशयः । जङ्गमस्येत्यनेन षष्ठीपरशतृप्र-
त्ययान्तस्य पातेर्धातोर्यात इति रूपमिति स्थितं चकाराच्छमस्य शा-
न्तिकरस्योदकजातस्य शृङ्गिणः पर्वतजातस्य राजेति सूचितम्।नन्वेवं
सति राजत्ववज्रबाहुत्वादीनां गुणानामेव प्राधान्यं कस्मान्नेष्टमित्या-
शङ्क्य * न चेत्यु पपत्तिरुक्ता * शङ्काभिप्रायविवरणार्थं नन्विति
भाष्यं स्पष्टत्वादव्याख्याय सत्यमिति भाष्यं वक्ष्यमाणस्यापि लि-
ङ्गत्वानुज्ञानार्थतया Sवभासमानं परेण तस्य लिङ्गत्वानभिधानाद-
युक्तमाशङ्क्य सत्यमित्येतावच्छिनति * सत्यमिति * एतदर्पीति
भाष्यं प्रागेव योग्यताशब्देन व्याख्यातत्वात् स्पष्टत्वाच्चोपेक्ष्य तथा-
पीत्याशङ्काभाष्यं वाक्यशेषादित्युत्तरभाष्यं च तात्पर्यतः सङ्क्षेपेण
व्याचष्टे * तत्रेति * सत्यपीति मध्यमावयवेनाशङ्काभिप्रायो
व्याख्यातः वाक्यशेषादेवेत्युत्तरे निर्णयहेत्वभिधानान्नेन्द्रशब्दो देव-
ताभिधानार्थ इति निर्णयस्वरूपाभिधानात्कुत इति तसिः पञ्चम्यर्थे
प्रथमार्थे च यदावृत्त्या व्याख्येयं शेषशब्देन च स्तुत्यर्थपदसमूहमा-
त्रस्य सम्पूर्णवाक्यत्वाभावे Sपि स्तुतिवाक्यस्येति वाक्यशब्दो व-
ज्रबाह्वादिपदानामपि साकाङ्क्षत्वाभिधानार्थ इति सूचितम् देवता-
भिधानमात्रपर्यवसाननिरासस्य स्तुत्यर्थपदसमूहैकवाक्यत्वसिद्ध्य-
र्थत्वं स्तुत्यर्थत्वेनैवेनि वार्त्तिकावयवेनोक्तं स्तौतिशंसत्योर्धात्वोः श्रुत्या
स्तुतिवाचित्वादित्येवं श्रुतिसंयोगव्याख्यानार्थमपि चेति भाष्यं
व्याचष्टे * न चेति * स्तुतेर्देवतास्वरूपाभिधानपूर्वकत्वात् स्व-
रूपाभिधानमात्रपर्यवसानाभ्युपगमे स्तुत्यविवक्षापत्तेर्लक्षणाप्र-
सङ्ग इत्याशयः । प्रकरणइतिसूत्रावयवमुत्कर्षाभ्युपगमनिरा-
सार्थत्वेन तु ज्ञातत्वाद्भाष्यकृतोपेक्ष्य तस्मादित्यनेन स्तौतीत्यादिः
सूत्रावयवो व्याख्यातस्तत्तात्पर्यतो व्याचष्टे * इतीति * पूर्वपक्षे
संस्कारकर्मत्वस्योक्तत्वात्प्रतियोगितया प्रधानकर्मत्वस्य वक्तव्य-
त्वात्तदेव फलेनोक्तमित्याशयः ।

शब्दपृथक्त्वाच्च ॥ २५ ॥

द्वादशेति भाष्यं संख्यापृथक्त्वयोर्भेदप्रसिद्धेः पृथक्त्वव्याख्यानाशक्तत्वादयुक्तमाशङ्क्योपपादयति * पृथक्त्वे सति निवेष्टुं शीलमस्या इति सदर्थसप्तमीसमासेन पृथक्त्वैकार्थसमवायितोक्ता स्तोत्राणां शस्त्राणां च या द्वादशसंख्या द्वादशस्तोत्रशस्त्रो ऽग्निष्टोम इत्यनेन शब्देनोच्यते सा प्रकाशनार्थत्वपक्षे तस्याभेदे सति न युक्ता पृथक्त्वनिवेशिनी यस्मादित्यर्थः।शब्दग्रहणेन द्वादशसंख्येन स्तोत्राणांशस्त्राणां च पृथक्त्वेनाभिधानादित्येवं तृतीयासमासत्वेन सूत्रव्याख्यासूचिता शब्देन कृतात्पृथक्त्वादिति च तत्कृतार्थतृतीयासमासेनोक्ते शब्दस्याभिधानएव कारणत्वेनाभिधानालाभान्नाश्रुताभिधाने शब्दाध्यहारोपपत्तिः प्रकाशनशब्देन च भाष्यस्थयोः स्तोत्रशब्दयोः[1] प्रकाशनवाचित्वं सूचितम्। अथेति भाष्यं व्याचष्टे*सामान्येति * अनेन चैक्याभिधानं सामान्याभिप्रायमिति दर्शितं पदार्थज्ञानस्यैकैकपदजन्यत्वात्प्रतिपदम् * चेत्युक्तम् * ननु स्तुतेरपि सामान्यरूपेणैक्याद्विशेषरूपेण च प्रत्यृचं भेदादेकसमुदायस्य चैकस्तुतिसाधनत्वाभावेनावान्तरभेदविवक्षानुपपत्तेर्न द्वादशत्वे ऽवस्थानं स्यादित्याशङ्कते * ननु चेति * नन्वृक्समुदायस्यैकस्तुतिसाधनत्वाभावे ऽप्येकसमुदायसाध्यानां स्तुतिनामैक्यमुपचर्य द्वादशत्वं भविष्यतीत्याशङ्क्याह * अथेति * पदात्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः क्रिया पूर्वापरिभूता लक्ष्यते वर्त्तते तदेत्यनेन न्यायेनैकफलसाधनानेकक्रियावयवसमुदायस्यैकक्रियात्वादपूर्वार्थत्वेन द्वादशत्वेन स्तुतिद्वादशेति परिहरति * उच्यतइति * प्रकाशनार्थत्वे तु प्रत्यृचं प्रतिपदं वा प्रकाशनाख्यफलनिष्पत्तिदर्शनेन प्रत्यृचं प्रतिपदं वा तत्साधनज्ञानाख्यक्रियासमाप्त्यवगमेनैर्न द्वादशत्वव्यवस्थेति वैषम्याभिधानपूर्वकं श्लोकं व्याचष्टे * प्रकाशनार्थत्वे हीति * नन्वपूर्वकैकस्तुतिजन्यत्वे तस्याः प्रत्यृचं निष्पत्तिदर्शनात्प्रत्यृचमेवापूर्वं कल्प्यं सर्वस्तुतिजन्यत्वे त्वपूर्वैक्यापत्तेर्द्वादशत्वं न स्यादित्याशङ्क्याह * न हीति * यथाविहितकर्क्समुदायसाध्यस्तुतिसमुदायजन्यत्वेनापूर्वस्य समुदायद्वादशत्वात् द्वादशत्वासिद्धिरित्याशयः।

अनर्थकं च तद्वचनम् ॥ २६ ॥ ४११।२

अग्निष्टुत्यादिभाष्येणैतत्सूत्रं देवताभिधानत्वादित्याद्यसूत्राशयबोधात्तद्देवताभिधानपरामर्शिनं तच्छब्दमङ्गीकृत्य संस्कारकर्मत्वपक्षे ऽग्निदेवत्यग्राहिकायां विकृतौ लिङ्गेनैवाग्नेयीनामृचां प्राप्तेर्देवताभि-

१ स्तवनशसनशब्दयोरित्यर्थः।

धायिनीनामाग्नेयीनामृचां वचनमनर्थकमित्येवं व्याख्यातं तत् प्राकृतानामनाग्नेयीनामप्यृचां संस्कारकर्मत्वे ऽग्निपदोद्देन प्राप्तावाग्नेयीविध्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * ऋचामिति * पूर्वेतिवा एतदृचो ऽक्षरं यदेनदूहति तस्मादृचं नोहेदिति निषधादृचोमूहानर्हत्वादाग्नेयीनामेव प्राप्तेर्विध्यानर्थक्यमित्यर्थः । संस्कारकर्मत्वनिरासद्वारा चास्यापि सूत्रस्य प्रधानकर्मत्वोपपादनार्थत्वान्न पूर्वोत्तरसूत्रानन्वयदोषः ।

अन्यश्चार्थः प्रतीयते ॥ २७ ॥

कथं सम्बन्धत्वश्रुत्या स्तोत्रशस्त्ररूपस्यार्थस्यान्यत्वप्रतीतिरित्याशङ्क्यानिरासार्थं यद्यन्यदिति भाष्यं व्याचष्टे * सम्बन्धस्येति * अन्यत्वप्रतीतेः सिद्धान्तोपपादकत्वाभिधानार्थं यदि चेति भाष्यं सङ्क्षेपेण व्याचष्टे * स चेति * प्रकाशनार्थत्वइति शेषः स्तोत्रशस्त्रसाधनभूतानां मन्त्राणां प्रगीताप्रगीतविशेषणभेदेन भेदात्तदुपाधिकः स्तोत्रशस्त्रयोर्भेदो भविष्यतीत्यधिकाशङ्कानिरासार्थं द्वादशत्वतुल्यावघ्याशङ्कापरिहारावाह * नन्विति * ननु प्रकाशनस्यापि प्रगीताप्रगीतमन्त्रलक्षणोपायनियमापूर्वभेदाद्भेदो भविष्यतीत्याशङ्क्याह * नन्विति * यत्तु नियमापूर्वं सक्रियाकृतं न भवतीति वार्त्तिकेनाध्यायोपक्रमे नियमापूर्वस्य क्रियाजन्यत्वनिषेधान्न तद्भेदेन क्रियाभेदसिद्धिरित्याशयः ।

अभिधानं च कर्मवत् ॥ २८ ॥

प्रधानकर्मणो अग्निहोत्रादेर्यथा द्वितीयासंयोगेनाभिधानं तथा शस्त्रस्यापि द्वितीयासंयोगेन भवतीत्येवं प्रधानेत्यादि भाष्येण व्याख्यातं तद्धात्वर्थस्य करणत्वेनेप्सिततमत्वलक्षणप्राधान्यायोगात् द्वितीयायाश्च करणत्वाक्षिप्तकर्तृव्यापारव्याप्यत्वेनाप्युपपत्तेरयुक्तमाशङ्क्योपपादयति * यदिदमिति * श्रुतायां भावनायां करणत्वे ऽप्यग्निहोत्रादेर्धात्वर्थस्याकृतः सोऽपि नास्तीति पुनः करणवाञ्छनमित्यनेन न्यायेनार्थाक्षिप्तायां धात्वर्थनिष्पादिकायामीप्सितत्वात् प्राधान्यं युक्तमित्याशयः । नन्वेवं सति संस्कारकर्मणो ऽप्यनिष्पत्त्या प्राधान्यापत्तिरित्याशङ्क्याह * न संस्कारक्रियेति * तत्र व्रीह्यादिनिष्पाद्यस्यावघातस्य तान्प्रति गुणत्वेनावधारितस्य न तानेव प्रति प्राधान्यं युक्तमित्याशयः । चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य त्रिरितः प्राचीनं प्रयाजान्यजतीति वाक्येनाघारस्य प्रयाजा-

र्थाज्यसंस्कारत्वावगमे ऽपि मान्त्रवर्णिकदेवतान्वयापन्नयागरूपाभिप्रायं प्राधान्याभिधानं स्वरूपाधारविषयं वा यदा तु द्वितीयाभिप्रायः श्रुतिसंयोगो व्याख्यायते तदा पौनरुक्त्यापत्तेः। प्रधानकर्मण इवाभिधानं भवतीत्येतावद्व्याख्यं यथा प्रधानकर्मणो नामधेयं भवति तथा स्तोत्रशस्त्रयोरपीत्येवं सूत्रव्याख्यानार्थतया व्याचष्टे * अथ वेति * ननु संस्कारकर्मणो ऽपि स्रुव्यापारादेर्नामधेयदर्शनान्न तेन प्राधान्यसिद्धिरित्याशङ्क्याह * इतरथा हीति * संस्कारस्य संस्कार्यनिष्ठत्वात्तदवच्छेदेनैव व्यवहारसिद्धेर्न तावत्संज्ञया कार्यं सौकार्यार्थं तु तदपेक्षयामपि दृष्टसंस्कारोपाधिकयैव प्रकाशनसंज्ञयाधारवद्व्यवहारसिद्धेःसंज्ञान्तरमनर्थकमित्याशयः।

फलनिर्वृत्तिश्च ॥ २९ ॥

स्रुतस्य स्तुतमप्यूर्जस्वत्यस्वदामामास्तोत्रस्य स्तोत्रं गम्यादिति मन्त्रे भावनिष्ठया स्तोत्रमामन्त्र्य स्तोत्रस्य मध्ये त्वं स्तोत्रमसि तदेवंभूतस्तोत्रस्य मध्ये स्तोत्रमूर्जस्वत्यपस्वत् भूत्वा मामागम्यादितीन्द्रशब्देापलक्षितानेकदेवतास्तुत्येन्द्रादिदेवतावन्तः सन्तो वयं त्वां याचामहे प्रजामिषं भक्षीमहीति च याचामहे सा सर्वा यज्ञशब्दलक्षितस्य यज्ञाङ्गस्य सम्बन्धिनी ममाशीः सत्या भूयादिति स्तोत्रात् प्रधानकर्मण इव फलनिष्पत्तिर्दृश्यतइत्येवं सूत्रव्याख्यानार्थं फलेत्यादिभाष्यं व्याचष्टे * यो ऽयमिति * न देवताया इति फलव्यतिरेकसूचितमर्थं व्याचष्टे * त्वत्पक्षे त्विति * ४१२।१

॥ अथ मन्त्राविधायकत्वाधिकरणम् ॥ ६ ॥

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥

सूत्रभाष्ययोर्मन्त्रग्रहणात् मन्त्रगतभावशब्दविषयत्वेनैतदधिकरणं कश्चिद्व्याख्यातं तत् दूषयितुमुपन्यस्यति * तावदिहेति * यद्याद्युपबन्धस्य ब्राह्मणे ऽपि तुल्यत्वान्मन्त्रत्वातिरिक्तविधायकत्वासम्भवहेत्वप्रतीतेर्मन्त्रग्रहणस्य हेत्वर्थत्वं मत्वा मन्त्रत्वादित्युक्तम्। प्राप्तार्थत्वाच्चेत्यनेन विहितत्वादिति भाष्योक्तो हेतुर्ब्राह्मणविहितस्य मन्त्रो ऽनुवादको मन्त्रविहितस्य वा ब्राह्मणमित्यनिश्चयादभ्युच्चयत्वेन व्याख्यातः। कर्मान्तरत्वाशङ्कानिरासार्थं नेति भाष्यं व्याचष्टे * तथा हीति * स्तुत्यर्थतायामपीत्यपिशब्दसूचितार्थव्याख्यानपूर्वकं भाष्यमुत्तरार्द्धेन व्याचष्टे *न चेति* गुणग्रहणं फलनिमित्तयोरप्युपलक्षणार्थम्। ननु विधौ ब्राह्मणे मन्त्रे च यान्याख्यातानि तेषां सर्वे-

षामेकमेव विधानरूपं प्रयोजनं ब्राह्मणे विधायकशक्तियुक्तत्वेनावधारितस्याख्यानशब्दस्य मन्त्रे ऽप्यैक्येन प्रत्यभिज्ञानादिति वदता सूत्रकृता विधायकत्वमात्रस्य पूर्वपक्षितत्वात् स्तुतित्वनिरासो ऽनर्थक इत्याशङ्कानिरासपूर्वकं श्लोकं व्याचष्टे * स्मारकत्वेति * फलनिमित्तयोरविधेयत्वे ऽप्यज्ञातज्ञापनाभिप्रायेण विधीयेरन्नित्युक्तं तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * दूषयितुमुपक्रमते *इतीति* मन्त्रत्वस्य तावद्धेतुत्वं दूषयति * किं पुनरिति * ननु मन्त्रशब्देन विधिशक्त्याविर्भावहेतुब्राह्मणत्वाभावो विवक्षित इत्याशङ्क्याह * कथं चेति * कारणाभावमेवोभयत्रापि व्यभिचारदर्शनेनोपपादयति * दृष्टाश्चेति * एतदेवोपसंहरति * तस्मादिति * प्राप्तार्थत्वस्यापि हेतुत्वं दूषयति * किं चेति * श्लोकं व्याचष्टे * न हीति * ततश्चोभयोरपि विधायकतैव युक्तेत्याह * नत्रेति * नन्वेकेन विहिते द्वितीयन्तरानर्थक्यं स्यादित्याशङ्क्याह * अभ्यासाच्चेति* यच्चासकृदपीत्युक्तं तदप्ययुक्तमित्याह * बलवदिति * दूषणमुपसंहरति * तस्मादिति * अन्यैस्तु मन्त्रत्वस्य विधिशक्तिविरोधानाहेतुत्वे ऽपि कर्मकरणतया ब्राह्मणेन विनियुज्यमानत्वस्य व्रीह्यादावविधायकत्वेन व्याप्तिदर्शनाद्धेतुत्वं भविष्यतीत्युक्तम् । तदपि दूषयितुमुपन्यस्यति * ये ऽपीति* विधायकस्यापि ब्राह्मणस्य ब्रह्मयज्ञे ब्राह्मणेन विनियोगदर्शनात्करणत्वविशेषणे कृते ननु ब्राह्मणमपि ब्रह्मयज्ञफलकरणत्वेनैव विनियुक्तमित्याशङ्क्य कर्मणामिति विशेषितम् । ननु पञ्चमे पाठाधिकरणे ऽर्थकृते वानुमाने स्यातत्कर्तृकत्वे परार्थत्वात्तेन सम्बन्धस्तस्मात् स्वशब्द उच्यतइति सूत्रे परार्थो हि वेदो यदनेन शक्यते कर्तुं तस्मै तस्मादेष समाम्नायते शक्यते चानेन परार्थो विधातुं क्रियाकाले च प्रतिपत्तुं तस्माद्वेदः पदार्थांश्च ज्ञातुमुपादेयः क्रियाकाले च प्रतिपत्तुमित्यादिभाष्येण ब्राह्मणस्यापि स्मारकत्वस्य वक्ष्यमाणत्वात्कर्मकरणत्वेन विनियोगो ऽस्तीत्याशङ्क्य ब्राह्मणेनेति विशेषितं स्मारकतया ब्राह्मणस्य लिङ्गेन विनियोगो न ब्राह्मणेनेत्याशयः । दूषयति *तैरपीति * मात्रशब्दसूचितं हेतोरप्रयोजकत्वं प्रश्नपूर्वमुपपादयति * कुत इति * साध्याभावविरोधी हेतुः साध्याक्षेपकत्वात्प्रयोजको भवति । न च विनियोगो विधायकत्वविरोधीत्याशयः । श्लोकं व्याचष्टे * न हीति * विनियुक्तशब्देन श्लोकस्थौ नियोगशब्दौ विनियोगवाचितया व्याख्यातौ । पूर्वश्लोकं ऽप्येवमविरोधमेव पाठाधिकरणे वक्ष्यमाणेन ब्राह्मणस्योभयार्थत्वेनोपपादयति * तथा हीति * ननु ब्राह्मणस्य वि-

४१३।२

धायकत्वोत्तरकालं सम्बन्धित्वेन यत्सन्निधाने यो दृष्ट इति न्याया-द्विधेयस्मारकत्वावगतेर्विनियोगात्प्राग्विधायकत्वमविरुद्धं मन्त्रस्य तु प्रागेव ब्राह्मणेन विनियोगात् स्मारकत्वप्रतीतेर्विधायकत्वानुपपत्तिरित्याशङ्कानिरासस्सूचनायार्थम् * प्रथममित्युक्तम् * अर्थत्वेन प्रतिपाद्यत्वेन स्मार्यत्वं तच्च विधानात्प्राग्प्यस्तीत्याशयः । ननु मन्त्रस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः स इत्यस्मिन्नधिकरणे मन्त्रस्य कर्मकालप्रयोज्यत्वाद्रूपेणाभिधानेनैव कर्मप्रयोगे ऽनुष्ठाने सामर्थ्यात्स्मारकत्वावगतेः स्मृतिकार्यत्वेन चानुष्ठानस्य स्मृतिक्रमेण क्रमस्य न्याय्यत्वान्मन्त्रब्राह्मणपाठक्रमयोर्विरोधे मन्त्रपाठक्रमानुरोधेन पश्चाद्धिहितस्याप्याग्नेयस्य प्रागनुष्ठानमित्युक्ते ननु च ब्राह्मणपाठस्यापि तदेव दृष्टमनुष्ठेयस्मरणं प्रयोजनमित्याशङ्क्योत्पत्तिदेशः स इति सूत्रावयवेन कर्मोत्पत्तिमात्रार्थो ब्राह्मणपाठ इति वक्ष्यमाणत्वात् पाठाधिकरणे ब्राह्मणस्य विधिस्मृत्याख्यप्रयोजनद्वयार्थत्वाभिधानं भाष्यकारीयमनादृतमित्याशङ्क्याह * मन्त्रतस्त्विति * प्रभृत्यर्थेनेतिकरणेनोत्पत्तिदेशः स इति सूत्रावयवः परामृष्टः उत्पत्तिदेशः स इति यत्सूत्रकृद्वक्ष्यति तदत्र विरोधे सति न त्वविरोधे ऽपीत्यर्थः। ननु ब्राह्मणस्य शक्त्यालोचनया स्मारकत्वावगमे ऽपि कर्मानुवादेनाविनियोगान्न कर्मविधायित्वं विरुध्यते मन्त्रस्य तु कर्मानुवादेन तत्स्मारकतया वचनेन विनियोगात्कर्मविधायित्वानुपपत्तिरित्याशङ्क्याह * ये चेति * वाचस्तोमादौ सर्वमन्त्राणां वचनेन विनियोगे ऽपि स्वार्थविधायित्वाविरोधाद् यस्मिन्कर्मणि यो मन्त्रो विनियुज्यते तत्कर्मविधायिता तस्य विरुद्धेतेति वाच्यम। न च सर्वमन्त्राणां स्वाभिधेये कर्मणि विनियोगो ऽस्तीत्याशयः । उदाहृत एव हि तावन्मन्त्रो ऽनुबन्ध्यपशुपुरोडाशानुनिर्वाप्यः देवीहविर्यागे चरुद्रव्यके गोदेवत्ये याज्यात्वेन विनियुक्तः । न चानेन गोदेवत्यं कर्माभिधीयते यागे गवां करणत्वाभिधानाद्दाने च सामर्थ्यात्कर्मतयान्वयावगतेरतो गोदेवत्ये यागे वाचनिकविनियोगसद्भावे ऽपि गोद्रव्यकयागदानविधायिता न विरुध्यते यदि वात्र मन्त्रो विधायको न वेति चिन्त्यते ततः प्रकृताख्यातशब्दचिन्ता सङ्गतिर्न स्यादित्याह * न चेति * मन्त्रब्राह्मणसाधारणयद्याद्युपबन्धाख्यातशब्दविषयत्वेनाधिकरणं स्वमतेन व्याख्यातुमुपक्रमते * इतीति * गुणप्रधानकर्मविधायकत्वेन द्विविधमित्यपि वाच्ये लक्षणयैकदेशेन तदर्थलाभात् विधायकशब्दानुक्तिः । ननु तृतीये ऽपि प्रकारे व्युत्पाद्ये प्रागेव तानि त्रैधं गुणप्रधानानीति सूत्रं कस्मान्न कृतमि-

त्याशङ्क्य द्वैविध्योक्त्यनन्तरमेव तृतीयप्रकारोक्तेः प्रसङ्गो न प्रागिति इदानीं शब्दसूचितमर्थमुपपादयितुं पूर्वप्रकृतापेक्षित्वधाच्यथशब्दः प्रयुक्तः । विधायकत्वमात्रप्रतियोगित्वेनाविधायकत्वस्य विधायकद्वैविध्यमनपेक्ष्य तृतीयत्वं न सम्भवतीत्याशयः । विधिशक्तियुक्तत्वेनावगतस्य लिङादेर्यच्छब्दाद्युपबन्धे ऽपि प्रत्यभिज्ञानाद्यदाग्नेयो ऽष्टाकपाल इत्यादौ यच्छब्दाद्युपबन्धे ऽपि विधित्वाभ्युपगमाद्यच्छब्दाद्युपबन्धस्य विधिशक्तिप्रतिबन्धकत्वानुपपत्तेरभिधायकत्वाख्यप्रकारान्तराभावाभिधानार्थतया पूर्वपक्षसूत्रं व्याचष्टे * तत्रेति * प्रकारान्तरव्युत्पादनार्थत्वेनापि वा प्रयोगसामर्थ्यान्मन्त्रो ऽभिधानवाची स्यादिति सिद्धान्तसूत्रमवतरणपूर्वं व्याचष्टे * तथेति * अभिधानातिरिक्तप्रेरणाख्यव्यापारनिषेधार्थमभिधानकारीति वाच्ये करोत्यर्थं तत्साधुकारित्ववाचिना णिनिप्रत्ययेन विवक्षित्वा प्रत्ययानुग्रहार्थं कर्स्मिंश्चिद्धातौ प्रयोज्ये ऽनुवादार्थो वचिः प्रयुक्त इत्येवमभिधानवाचीति सूत्रावयवार्थं सूचयितुं विधायकत्वाभावो ऽभिधायकशब्देनोक्तः । केषामाख्यातानां विधायकत्वाभावः कश्च तत्र हे-
४१४।२ तुरित्यपेक्षायामाह * पश्येति * सिद्धत्वद्योतनाद्धक्राभिमुख्यासम्भवाद्विधौ ।

आत्मनि प्रेरणायोगान्निमित्तत्वाभिधानतः ।
विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम् ॥
प्राप्त्ययोगे ऽपि तत्रापि क्व चित्स्यादपि हन्तृता ।

श्लोकं व्याचष्टे*मन्त्रेति*एतदेव प्रपञ्चयति *तत्रेति*याभिर्गोभिर्यजते याश्च ददाति ता गावो न नश्यन्ति न च तस्करो हरति न चासां कं चिदवयवमभित्रकृतो व्यधिरुपद्रवः पीडयति गोस्वामी च ताभिः सह ज्योक् चिरकालं स च ते संसक्तः संयुक्तो भवतीति गोस्तुत्यर्थे मन्त्रे गोयागगोदानयोर्यच्छब्देन सिद्धवद्भावाभिधानाद्विधायकत्वोपघातः वक्त्रभिमुखकरणार्थं या चामन्त्रणविभक्त्या लिङादेः समान्यतो वक्त्रभिहितार्थानुष्ठानप्रवृत्तवक्त्रभिमुखपुरुषप्रवर्त्तकत्वावगमादप्रवृत्तप्रवर्त्तनात्मकविधिशक्तिविघातः बर्हिर्देवसदनं दामि शुक्रं त्वा शुक्राय धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामीत्यस्मदर्थेनोत्तमपुरुषेणात्मनि प्रवर्त्तनानुपपत्तेर्निमित्तत्ववाचिना च यदिशब्देन प्राप्तिबुद्धेरित्याशयः । नन्वविशेषेण मन्त्रब्राह्मणगतानां यच्छब्दाद्युपबद्धानामाख्यातानां विचार्यत्वे सूत्रभाष्ययोर्मन्त्रोदाहरणमयुक्तमित्याशङ्क्याह * न चेति * यद्योत्तरसूत्रे मन्त्राणामविधाकत्वं प्रायिकमिति भाष्यकृद्वक्ष्यति तत्रामन्त्रणविभक्त्या-

दिबाहुल्यमेव कारणमिति प्रसङ्गादाह * अविधायका इति * ते विधिशक्त्युपघातका यच्छब्दादयः प्रायेण मन्त्रेष्वित्येव हेतोरसावध्येतृप्रसिद्धिरित्यर्थः । यश्च ब्राह्मणे विधिशब्दश्चेति मन्त्राधिकरणान्त्यसूत्रादौ विधिमन्त्रयोरित्यत्र च विधायकत्वव्यपदेशस्तत्रानुपहतविधिशक्तिप्रत्ययबाहुल्यं कारणमित्याह * ब्राह्मणे त्विति * ब्राह्मणानुदाहरणे वा विधायकालपत्वमेव कारणमित्यर्थादुक्तमपि स्पष्टीकर्तुमाह * अल्पे त्विति * ब्राह्मणस्य तु विधायकत्वे ऽनुपहते विधिशक्तित्वमेव कारणं न ब्राह्मणत्वं कारणं किन्तूपहतविधिशक्तितेत्याह * विधायकत्वेति * न मन्त्रस्याविधायकत्वहेतुत्वाभावे मन्त्रविशेषणानर्थक्यं स्यादित्याशङ्क्य निरस्यन् प्रयोगसामर्थ्यादिति सूत्रावयवं व्याचष्टे * तत्र त्विति *यथाद्युपबन्धत्वरूपान्निमित्तादिप्रत्यायनार्थत्वावगतेः स्वयमविधायकत्वे ऽप्येकां गां दक्षिणां दद्यादित्याद्याख्यातां तदैकवाक्यत्वेन विधिप्रयोजनत्वात्प्रयोगसामर्थ्यभावाच्च न ब्राह्मणगतानामाख्यातानामभिधानमात्रपर्यवसानम् । मन्त्रगतानां तु विधायकैकवाक्यत्वाभावेन निमित्तादिप्रत्यायनार्थत्वानवगमात्प्रयोगसामर्थ्याच्चाभिधानमात्रपर्यवसानमित्याशयः । प्रयोगसामर्थ्यमेव प्रश्नपूर्वमुपपादयितुं मन्त्राधिकरणोक्तमनुष्ठेयार्थस्मारकत्वं तावत् स्मारयति * कुत इति * श्लोकं व्याचष्टे * न तावदिति * यश्चास्माभिर्यच्छब्दाद्युपबन्धेन विधिशक्तिविघातो ४१५।१
ऽभिहितस्तत्रैव भाष्यमपि प्रतिज्ञापूर्वं योजयति * भाष्यमपीति *

॥ अथ मन्त्रनिर्वचनाधिकरणम् ॥ ७ ॥

तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

मन्त्रगत इति भाष्येण मन्त्रलक्षणस्य प्रासङ्गिकत्वेन सङ्गतिमुक्त्वोच्यतइत्यनेन मन्त्रलक्षणात्प्राक्तद्गताख्यातविचाराशक्तिमाशङ्क्यदमित्यनेनार्थतो विपरीतक्रमतोक्ता साऽनाहत्येत्याह * यथोक्तेनेति * भाष्यकृतानुमन्त्रत्वस्याविधायकत्वाप्रयोजकत्वे ऽप्यभिधानमात्रपर्यवसानस्य विध्येकवाक्यत्वाभावेन मन्त्रेष्वेव भावान्मन्त्राणामेव पूर्वाधिकरणोदाहरणत्वं मत्वा विपरीतक्रमतोक्तेत्याह * भाष्येति * चुदेः प्रेरणार्थत्वात्प्रयोजनस्य च प्रेरकत्वात्प्रयोजनवाचिनं चोदकशब्दमङ्गीकृत्य तच्चोदकेष्वति सूत्रावयवं स्वयं तावद्व्याचष्टे * तच्चोदकेष्वति * या तु भाष्यकृता प्रवृत्तिकारणवाचिनः चोदकशब्दस्य लक्षणया कारणमात्रार्थत्वाच्चत्वमङ्गीकृत्य तच्छब्दव्याख्यानायामिधानस्येति षष्ठ्युक्ता सा लक्षणा दोषाद-

भिधानकारणत्वस्य च ब्राह्मणे ऽपि भावेनातिव्यापकत्वापत्तेरयुक्तेति कारणस्य कार्यप्रयोजनत्वाद्विवक्षिताभिधानप्रयोजनकत्वरू-
(१६) पार्थप्रदर्शनायैवेत्याह *अर्थेति * षष्ठीसमासप्रदर्शनार्थत्वान्निवृत्त्यर्थो मात्रशब्दः अभियुक्ता इति भाष्यावयवेन मन्त्राख्येति सूत्रावयवं व्याख्याय ननु लक्षणसूत्रे वृद्धप्रयोगाभिधानमनर्थकमित्याशङ्क्य प्रायिकमित्यादिभाष्येण प्रयोगोपलक्षणार्थमेवेदं लक्षणमित्युक्तं तद्व्याचष्टे *अध्येत्रिति * ननु वृद्धप्रयोगगम्ये मन्त्रशब्दार्थे लक्षणाभिधानमनर्थकमित्याशङ्क्य न शक्यमिति भाष्येण लक्षणं विना साकल्येन प्रयोगविषयाज्ञानाल्लक्षणार्थवत्वोक्ता तत्र पृष्टा कोटशब्दं व्याचष्टे * धरणीति * तच्छब्देनेतिकरणसूचितकुटिलीकरणजन्यक्लेशपरामर्शात्पृष्टा कोटजन्यक्लेशसामान्येन प्रत्येकं मन्त्रपदप्रयोगविषयालोचनस्य पृष्टस्याकोटः । कौटिल्यं वक्रत्वम् । अस्मिन्निति पृष्टाकोटशब्देनाभिधानमित्यर्थः । ऋषयो ऽपीति श्लोकस्य न शक्यमित्यनेन पौनरुक्त्यमाशङ्क्य ननु पदार्थान्तराणां प्रत्येकनिरूपणाशक्तावपि मन्त्रपदार्थानामध्येतृपरम्परया प्रत्येकं निरूपयितुं शक्यत्वाल्लक्षणानर्थक्यमित्याशङ्क्यानिरासार्थत्वसूचनार्थं पदार्थशब्दस्थाने लक्ष्यपदप्रक्षेपेण प्रतिज्ञापूर्वं पठति * श्लोकश्चेति * विप्रकीर्णानेकशाखागतानां साकल्येनोपसंहारो न शक्य इत्याशङ्क्यानिरासाशयः । नन्वभिधानप्रयोजनत्वस्य मन्त्रलक्षणत्वे किमिति वृत्तिकारेणास्यन्तत्वादिमन्त्रलक्षणमुक्तमित्याशङ्क्योदाहरणमित्यादिभाष्येणास्यन्तादेः स्वमतेनोदाहरणत्वमुक्त्वा तच्चेत्यनेन तच्छब्देन लक्षणं परामृश्य यदिदमस्यन्तादिवृत्तिकारेण तल्लक्षणमाख्यातं तदुदाहरणमिषेण न तु परमार्थतो लक्षणम् * प्रायिकत्वादित्युक्तम् तद्व्याचष्टे * वृत्ताविति * यदेतेषां मन्त्राणामस्यन्तत्वादिलक्षणं वृत्तावुक्तं स मन्त्राणामुदाहरणविस्तरो मतो न तु वस्तुतो लक्षणं प्रायिकत्वादित्यर्थः । आयुर्दा अस्यायुर्मे देहीत्याशिषम्।अग्निर्मूर्द्धा दिवः ककुदिति स्तुतिमेको ममैका तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्म इति संख्यां च च स्पष्टत्वादव्याख्यायाक्षीत्यस्य तु विग्रीवो वयोदर इत्यादिवदिन्द्रस्तुत्यर्थत्वोपपत्तेः । प्रलपितत्वानुपपत्तिमाशङ्क्य स्तुत्यसम्भवसूचनार्थं डुलिशब्दं व्याचष्टे* डुलिरिति*अम्बे ऽम्बिके ऽम्बालिके न मा नयति कश्चन स ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीमिति सुकल्याणरूपां काम्पिलदेशवासिनीं मां न कश्चिन्नयति कुत्सितो ऽश्वः स्वपितीति किशोर्याः परिदेवनमग्नीदग्नीन्विहरेति प्रैषं को ऽसि कस्यासि को नामासि यस्य ते नाम मन्महि यं त्वा सोमेनातीतृपा-

मेत्यन्वेषणं पृच्छामि त्वा परमन्तं पृथिव्या इति पृष्टमियं वेदिः परो अन्तः पृथिव्या इत्याख्यानं च स्पष्टत्वादव्याख्यायाच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्यनुषङ्गविषयमाह * प्रतीति*प्रयोगमुदात्तानुदात्तस्वरिताख्यत्रैस्वर्यरूपत्वेन सन्नतराधिकं चातुःस्वर्यरूपत्वेन च भाष्यकृता व्याख्यातत्वादव्याख्याय सामर्थ्यस्याव्यापारत्वाद्व्यापारवाचिनाभिधानशब्देन व्याख्यानानुपपत्तिमाशङ्क्याभिधानशब्दं शक्तिविषयत्वेन व्याख्यातुमाह * सामर्थ्यमिति * लक्षणत्वासम्भवोपपादनायास्यन्तत्वान्तयोरव्याप्त्यभिधानार्थत्वेनासिमध्या अपि चेत्यादिभाष्यं स्पष्टत्वादव्याख्यायाशीरित्यादावतिव्याप्त्यभिधानार्थत्वेन परिदेवनप्रैषौ व्याचष्टे* ये मामिति* किं जानाति भवान् किं शाखावती सूर्मिमित्यस्यार्थस्य पृष्टशब्दादेव ज्ञातत्वात् सूर्मिशब्दमात्रार्थं व्याचष्टे * कर्णवन्तीमिति * भाष्यशेषः स्पष्टत्वान्न व्याख्यातः। मन्त्रप्रतिपत्तेः प्रयोजनापेक्षायामस्तीत्यनेनाह बुध्निय मन्त्रं मे पाहि यमृषयस्त्रयीविदो विदुः ऋचो यजूंषि सामानि सा हि श्रीरमृता सतामित्यादौ वेदे प्रयुक्तस्य मन्त्रशब्दस्यार्थज्ञानं प्रयोजनमुक्तम् ।

॥ अथ ब्राह्मणनिर्वचनाधिकरणम् ॥ ८ ॥

शेषे ब्राह्मणशब्दः ॥ ३३ ॥

यदि वेदप्रयुक्तमन्त्रशब्दार्थज्ञानार्थं मन्त्रलक्षणमुक्तं तर्ह्येतत् ब्राह्मणकान्येव पञ्चहवींषि भवन्ति यद्ब्राह्मणकानीतराणीत्यादौ वेदप्रयुक्तब्राह्मणशब्दार्थज्ञानार्थं ब्राह्मणस्यापि लक्षणं वक्तव्यमित्यथेति भाष्येण पूर्वप्रकृतापेक्षित्ववाच्यथशब्दयुक्तेनाशङ्क्य तन्निरासार्थत्वेन सूत्रव्याख्यानार्थं मन्त्राश्चेति भाष्यमिति वक्तुं सूत्रस्य मन्त्रव्यतिरिक्तरूपब्राह्मणलक्षणाभिधानार्थत्वप्रतीतेः । सूत्रदूषणार्थमिति शङ्कामुपन्यासपूर्वकमुपन्यस्यति * परिशेषेति * सूत्रे शेषशब्दप्रयोगात्परिशेषशब्देन तद्व्याख्याप्रतीतेस्तद्व्याख्यं लक्षणावक्तव्यत्वाभिधानार्थत्वेन सूत्रस्य व्याख्यानमेवेत्युक्ते ननु शेषशब्देन मन्त्रव्यतिरिक्तत्वरूपलक्षणाभिधानान्न लक्षणावक्तव्यत्वं सूत्रणोक्तमित्याशङ्क्य * लक्षणेत्युक्तम् । मन्त्रव्यतिरिक्तत्वमात्रस्याब्राह्मणेऽपि भावान्मन्त्रव्यतिरिक्तवेदत्वं लक्षणं वाच्यं तच्च द्विविध एव वेद इति जानतानुक्तस्यापि ज्ञातुं शक्यत्वादजानता तूक्तेऽपि लक्षणे कल्पादेरपि मन्त्रव्यातिरिक्तत्वेन कतमत् ब्राह्मणमिति ज्ञातुमशक्यत्वादव्याच्यमित्याशयः । ननु लक्षणपरत्वाभावे सूत्रानर्थक्यं स्यादिति श-

ङ्क्ते * किमर्थं पुनरिति * तृतीयप्रकारनिरासार्थत्वेनानर्थक्यं परि-
हरति * नेति * ननु ब्राह्मणलक्षणस्यावचनीयत्वे किमिति वृत्ति-
कारेणेति करणबाहुल्यादिलक्षणमुक्तामित्याशङ्क्यानिरासार्थे वृत्तिकार-
स्त्वित्यादिभाष्ये यदेनमधिनोत्तद्दध्नो दधित्वमिति यस्मात्साम्ना-
ऽयमिन्द्रमधिनोत्तस्मात्तद्दधीति धिनोतेः प्रीतिकर्मणो दधिशब्दनि-
र्वचनम्।उपवीता वा एतस्याग्नयो यत् ब्रह्मा सामानि गायतीति सा-
मगाने विलम्बेनाग्निविगमापत्तेर्निन्दां प्रशंसादीनि चावयवव्युत्प-
त्त्यादिरूपेण प्रसिद्धत्वादव्याख्याय परकृत्यादिशब्दान् व्याचष्टे *
४१७। एकेति* एकः कर्त्ता यस्मिन्नुपाख्याने विषय इति समासार्थः। बहु-
कर्तृकमित्यत्राप्येवं ब्राह्मणलक्षणस्य विवक्षितत्वाद्विधिशब्दानुपपत्ति-
माशङ्क्य व्याचष्टे * विधीति * इति करणबाहुल्यादीनां द्वादशा-
नां मध्ये सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ कस्य चिदभावाद्व्यापकत्वे-
नालक्षणत्वाभिधानार्थमेतदपीति भाष्यमिति करणेत्यादिचातिव्या-
प्त्यभिधानार्थं स्पष्टत्वान्न व्याख्यातम्। रुग्रो ह भुज्युमश्विनोदमेघे रयिं
न कश्चिन्ममृवाँ अवाहाः तमूहथुर्नौभि रात्मन्वतीभिरन्तरिक्ष-
द्भिरपोदकाभिरित्यस्यैवमाख्यायिकासरूपत्वं हे अश्विनौ रुग्रो
नाम कश्चिद्राजा भुज्युनामानं स्वपुत्रमुदमेघे समुद्रे अवाहाः वाह-
यामास इति तिङां तिङो भवन्तीति प्रथमपुरुषार्थमध्यमः प्रसि-
द्धिद्योतनार्थो हकारः नकारस्योपमार्थत्वाद्यथा कश्चिन्मृवानासन्नमर-
णो रयिं धनं समुद्रे वाहयतीति दृष्टान्तः तं भुज्युमात्मन्वतीभिः दृढा-
भिरन्तरिक्षप्रुद्भिराकाशगामिनीभिरपोदकाभिर्निर्जलाभिर्नौभिर्युवामू-
हथुः समुद्रादुत्तरयामासथुरिति इन्द्रवायू इमे सुता उपप्रयोभिरा-
गतमिति पूर्वार्द्धर्चेण हे इन्द्रवायू इमे सोमा अभिषुताः तानत्तुं प्र-
योभिरन्नैर्यजमानाय देयैः सह युवामागतमित्युक्ते यस्मादिन्दवो वां
युवामुशन्तीच्छन्तीतिहेतुः यत्प्रेषिता वरुणेन ताः शीभं समबला तत्त-
द्दाप्नोदीन्द्रो वोयतीस्तस्मादापो अनुष्टुनेति हे आपो यस्मात्ता यूयं व-
रुणेन प्रेषिताः सत्यः शीभं स्वाच्छन्द्यं समबला तव लानमकुर्वतः तच्च
यतीः कुर्वतीर्वो युष्मानिन्द्र आप्नोत्तस्मादापः स्थ न भवथेत्यन्व-
र्थसंज्ञात्वद्योतनार्थानुशब्दयोगादपशब्दनिर्वचनमिति ज्ञातुं शक्य-
त्वान्न निर्वचनमित्युक्तं मोघमन्नं विन्दते अप्रचेताः सत्यं
ब्रवीमि वधइत् स तस्यनार्यमणं पुष्यति नो सखायं केव-
लाद्यो भवति केवलादीत्येव निन्दा यः केवलम् एकाकी यत्ति न त्वर्यमश-
ब्दोपलक्षितं देवगणं सखायं च मनुष्यगणं पोषयति स मन्दप्रज्ञो
निष्फलमन्नं लभते न तस्यान्नं फलदं भवति प्रत्युत चौराद्युपद्रवहेतु-

त्वाद्वधकार्येव भवति केवलपापश्च सम्भवति सत्यमेतद् ब्रवीमीति। अग्निर्मूर्द्धा दिव इति द्युमूर्द्धत्वादिगुणकीर्त्तनात्प्रशंसा तिरश्चीनो विततो रश्मिरेषामधः स्विदासीदुपरिस्विदासीदित्येषां कवयो मनीषेति पूर्वस्यामृचि निर्दिष्टानां कवीनां रश्मिः तिरश्चीनो विततः किमध आसीदुतोपरीति स्विच्छब्दयोगात् प्लुत्या च संशयः। वृणीयादिन्नाधमानायतव्यानिति भोज्यान्पदार्थान्याचमानाय दद्यादिति विधिः चित्र इद्राजा राजका इदन्यकेत्यकेसरस्वतीमनुपर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददादिति हे राजकाश्चित्रो नाम राजा सरस्वतीदेशे ऽन्यस्मिंश्च यस्मिन्कस्मिंश्चित्पुण्यदेशे सहस्रं गवामयुतानि दत्तवानित्येकचरितोपाख्यानं परकृतिः यज्ञेन ज्योतिष्टोमादिना विष्णुर्वै यज्ञ इति श्रुतिर्यज्ञं विष्णुमयजन्त देवा इति बहुचरितोपाख्यानं पुराकल्पः।

॥ ऊहाद्यमन्त्रताधिकरणम् ॥ ९ ॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः ॥ ३ ४॥

वेदस्य द्वैराश्यनियमे सत्यूहादेरप्यनुमानादिगम्यवेदत्वाभ्युपगमात् विधिप्रयोजनत्वाभावेन च ब्राह्मणत्वाभावान्मन्त्रत्वप्रसङ्गे पठ्यमानवेदविषयत्वं द्वैराश्यनियमस्य वक्तुमेतदधिकरणमिति ब्राह्मणलक्षणावक्तव्यत्वाभिधातव्यवधेरदोषत्वं स्पष्टत्वादनभिधायाधिकरणविषयं व्याचष्टे * सूर्यायेति * प्राकृतस्थानपतितपदार्थान्तरकार्यगः उहः प्रयोगो विकृतावूह्यमानतयोदित इत्यग्निपदस्थाने सूर्यपदप्रयोगस्य विकृतत्वादूहत्वं यत्र शब्दे काश्यपावत्सारनैध्रुवेत्यादावार्षेयत्रयं कीर्त्यते स प्रवरः देवदत्तस्य पिता यजत इत्यादि यजमानपुत्रादिनामग्रहणं सूक्तवाकादावाशास्ते ऽयं यजमानो ऽसावसाविति सर्वनामयुक्तमन्त्राम्नाने नामधेयस्य मन्त्रताया वक्ष्यमाणत्वात् सर्वनामस्थाने प्रक्षेप्य नामधेयव्यावृत्त्यर्थम् * यथेत्युक्तम् * पूर्वपक्षसिद्धान्तौ यथाभाष्यं स्फुटत्वात् संक्षिपति * तेषामपीति * भाष्यानुक्तो ऽपि मन्त्रमध्यपातो हेतुः सम्भवादुक्तः। मन्त्रमध्यपातस्य हेतुत्वशङ्कोत्प्रेक्षामात्रत्वादयुक्तेत्याशयः। ऊहादिभ्रंशे मन्त्रभ्रंशनिमित्तप्रायश्चित्ताभाववदूहितपदवतो वाक्यस्य समस्तस्यामन्त्रत्वात् मन्त्रनिमित्तशब्दविकाराभावो ऽपि कस्मात् सिद्धान्तप्रयोजनत्वेन भाष्यकृता नोक्त इत्याशङ्कानिरासार्थं स्वयं चिन्तान्तरं प्रस्तौति * किं पुनरिति * पूर्वपक्षमाह * समस्तस्येति * श्लोकं व्याचष्टे * सम्प्रदायेति * मन्त्रैकदेशे मन्त्रत्वसद्भावाभ्युपगमे ऽतिप्र

सक्तिरित्याह * अथेति * पूर्वपक्षप्रयोजनमाह * तस्मादिति * एतदेव प्रपञ्चयति * अतश्चेति * तस्योहवतो वाक्यस्य न केवलमूहितावयवमात्रवर्त्तिनि निमित्तांशे, मन्त्रभ्रंशनिमित्तप्रायश्चित्ताभावः । किं तु सर्वावयववर्त्तिनीत्येकं तावत्प्रयोजनं मन्त्रे श्वेतवहोक्थशस्पुरोडाशो गिवनित्यादिना यावन्तः श्वेतवा दनुत्कृशाः पुरोडा इत्यादयो मन्त्रविषयत्वेन हृग्रहोभैः छन्दसीत्यादिना चाम्नातवेदाख्यछन्दोविषयत्वेन आन्यं दिवो मातरिश्वा जभार इमामगृभ्णन्नित्यादयो यावन्तः शब्दविशेषाः स्मर्यन्ते तेषामभावाच्छ्वेतवाहउक्थशंसः पुरोडाशो जहार अगृह्णन्नित्यादिलौकिकप्रयोगः कार्य इति द्वितीयमिति दृष्टान्तदार्ष्टान्तिकव्याजेन प्रयोजनद्वयमुक्तम् सिद्धान्तमाह * अ-
४१८।३ त्रेति * ऋगादिजातिवन्मन्त्रजातेरप्यभावाद्रचनाविशेषाभिप्रायो गोत्वनिदर्शनायाकृतिशब्दः । यथा द्वित्रिवृक्षोपजनापाये ऽपि तदेवेदं वनामिति प्रत्यभिज्ञानात् पूर्ववनाविनाशस्तथात्रापि स एवायं मन्त्र इति प्रत्यभिज्ञानान्मन्त्राविनाश इत्याशयः । श्लोकं व्याचष्टे * न हीति * प्रत्यक्षोपलम्भमेव व्यवहारेण द्रढयति * तथा हीति * याज्यान्तप्लुतविधौ वर्णविकारः इरापदविधौ गिरापदलोपाद्वर्णलोपः उदात्तानुदात्तस्वरितानामत्यन्तसन्निकर्षलक्षणैकश्रुत्यविधौ स्वरान्तरनियोगः । श्लोकं व्याचष्टे * यत्रेति * न तु यथा व्योमन् ब्राह्मणास इत्यादिपदे वर्णलोपागमादिविधिना न्यूनाधिक्ये ऽपि पूर्वावगतार्थाभिधानशक्त्यविघातावगमात्पूर्वपदाविनाशस्तथेहापीरादिविधिना मन्त्रस्य पूर्वावगतार्थतात्पर्याविघातावगमान्मन्त्रत्वाविनाश इत्याशयेनाशङ्कते * स्यादिति * एवं तर्ह्यूहादावपि पूर्वावगतकर्मसमवेतदेवताभिधानाद्यर्थत्वाविघातेनोहितपदवतो ऽपि मन्त्रस्याविनाशापत्तिसाम्यादेतत्कारणत्वानुपपत्तेर्विहितत्वमात्रं मन्त्रत्वाविनाशकरणं वाच्यं तच्चामन्त्रे ऽपि व्रीह्यादौ विहितत्वादकारणमित्याशयेन परिहरति * तदिति * अस्तु तर्हि इरापदादिमतो वाक्यस्यामन्त्रतेत्याशङ्क्याह * न चेति * एवं कतिपयवर्णपदान्यत्वे ऽपि मन्त्रत्वाविनाशे स्थिते प्रसङ्गादूहादिवैषम्येणेरापदादेर्मन्त्रत्वं वक्तुं पूर्वपक्षं दर्शयन्ननन्तरमुपसंहरत्यत्रेति । सिद्धान्तमाह * न चेति * गिरापदवन्मन्त्राम्नानमात्रालोचनेनेरापदस्यामन्त्रत्वप्रतिभाने ऽपि इरापदविध्यालोचनान्मन्त्रत्वावधारणेति समस्तेत्यनेनोक्तम् । नन्वेवं सतीरापदेन गिरापदस्य बाधात् सामाम्नायावगतमन्त्रत्वं विरुध्येतेत्याशङ्क्यानिरासस्यूचनायेह स्वाध्यायकाले गिरापदवान्मन्त्र इह प्रयोगवेलायामिरापदवानित्युक्तम् । इह गिरापदं मन्त्रे इहेरापदमिति वा-

रुये मन्त्रप्रेषनिमित्तप्रायश्चित्तविषयत्वमात्रप्रदर्शनार्थं पदस्य मन्त्रतोक्ता। वस्तुतस्तु वाक्यस्यैव मन्त्रवत्त्वं न पदस्येति सूचयितुम्*पद्वानित्युक्तम् * नन्वमन्त्रस्यापि व्रीह्यादेर्विधिदर्शनात्तत्कथं विध्यालोचनान्मन्त्रत्वावधारणेत्याशङ्क्यादित * एवेत्युक्तम् * विधेः प्राग्विधेयसमर्पणाम्नानवेलायामित्यर्थः। आम्नानेन मन्त्रत्वं न विधिमात्रेणेत्याशयः। परस्त्वैरमित्यनेनेरापदस्य स्वरूपेणाम्नानाभावादुच्चार्यत्वेन विधानमाम्नानं वाच्यं तच्चोहादेरप्यस्तीत्याशयेन साम्यमाह * यद्येवमिति * निष्कृष्टस्येरापदस्याम्नानाभावे ऽपि त ४१९।१
द्धितान्तपदान्तर्गतस्याम्नानमस्तीत्याशयेन सिद्धान्ती निरस्यति * नेति* वैदिकशब्देनाम्नानमभिप्रेतम्। श्लोकं व्याचष्टे *वैदिकं हीति* ननु न्यायेनाप्युच्चार्यत्वेनैकल्पत्वादुच्चारणस्यैवाम्नानत्वादस्त्येवोहस्याम्नानमित्याशङ्क्यानिरासस्सूचनार्थत्वेनोत्तरार्द्धं व्याख्यातुम् * न चेत्युक्तम् * परस्तु वेदप्रमेयत्वं वैदिकशब्देनोक्तमिति भ्रान्त्या पुनः साम्यमाशङ्कते * ननु चेति * सिद्धान्ती स्वाशयं प्रकटयति * अत्रेति * नन्विरापदस्याप्युच्चारणीयरूपेणाम्नानं नास्तीत्याशङ्क्योच्चारणीयनिष्कृष्टरूपानाम्नाने ऽपि तद्धितान्तर्गतास्नानादूहादिवैषम्यमाह * तत्रेति * नन्वेवं सति सूर्यशब्दस्यापि तद्धितान्तपदान्तर्गतस्याम्नानमस्तीति पुनः साम्यमाशङ्कते * नन्विति * उच्चारणीयत्वोपपादनाय * श्रुतीत्युक्तम्* सूर्यशब्देन देवतामुद्दिश्य हविस्त्यजेदित्युच्चार्यत्वेन विनियोगान्न व्रीह्यादितुल्यतेत्याशयः। मन्त्राख्यवाक्यावयवत्वेन पदस्य मन्त्रत्वान्मन्त्रावयवत्वेनाम्नानं मन्त्रत्वे हेतुः। न च तत्सूर्यादिपदे ऽस्तीति परिहरति *नेति* एतदेवोपसंहरति * तस्मादिति * मन्त्रावयवत्वेन सूर्यादिपदानां विनियोजकानाम्नानान्मन्त्रावयवत्वेनाम्नानं नास्तीत्यमन्त्रतेत्यर्थः। नन्वेवं सत्यग्ने महाँ असि ब्राह्मण भारतेत्यादिमन्त्रावयवत्वेन प्रवरविध्याम्नानात् सुब्रह्मण्यानि निगदावयवत्वेन च नामविध्याम्नानयोर्मन्त्रत्वं स्यादित्याशङ्कते * नन्विति * मन्त्रत्वहेतुं स्वरूपाम्नानसिद्ध्यैतद्विध्याम्नानस्योक्तत्वात् स्वरूपाम्नानरहितं विध्याम्नानं न हि मन्त्रत्वहेतुरित्याशयेन परिहरति * स्यादिति * नन्वेवं सत्याशास्ते ऽयं यजमानो ऽसावित्यादिसर्वनामसंयुक्तमन्त्राम्नाने ऽपि नाम्नः स्वरूपेणानाम्नानादमन्त्रत्वं स्यादित्याशङ्कते * एवं तर्हीति * स- ४२०।१
र्वनाम्नः स्वरूपाम्नानप्रकारत्वोपपादनायाशक्यानामभ्युपगमेनोत्तरमाह * तथा नामेति * सर्वनामद्वारा स्वरूपाम्नानान्न मन्त्र-

१ आम्नानात्तयोरिति २ पु० पा०।

त्वानुपपत्तिरिति स्वमतेन परिहरति * अथ वेति * ननु देवदत्तादिनाम्नो मन्त्रत्वे इरापदादिवत्कस्मात्साक्षादनाम्नानमित्याशङ्क्य विशेषाणामित्युक्तं कथं सर्वनाम्ना स्वरूपाम्नानमित्याशङ्क्य *अशून्येत्युक्तम् * सर्वनाम्नो प्रयोगार्हत्वात्तत्स्थानस्य शून्यत्वापत्तेः प्रयोगार्हदेवदत्तादिनाम तत्स्थानपूरकतयावसीतइत्याशयः । एतदेवोपपादयति * इतरथा हीति * आशास्ते ऽयं यजमान इत्येतावताप्यभिधानसिद्धेस्तदंशेत्युक्तम् । नन्वेवमपि देवदत्तादिपदस्याध्येतृभिरनाम्नानादविधानात्कथं सर्वनामस्थाने प्रयोग इत्याशङ्क्याह * प्रवरेति * इरापदादिवत्साक्षाद्विध्यभावे ऽपि सूक्तवाकादिमन्त्रविधिनैव मन्त्रगतसर्वनामार्थवत्त्वाय तत्स्थाने देवदत्तादिपदप्रयोगः कल्प्यतइत्यर्थः । यजमानस्य तत्पूर्वेषामपरेषां च प्रत्येकं नाम गृह्णातीति सर्वनामरहितसुब्रह्मण्यानिगदविधिर्विहितं नामधेयं दृष्टान्तः । सर्वनामस्थानप्रक्षेप्यनामधेयस्य मन्त्रत्वोपपादनप्रयोजनमाह* तस्मादिति * अधिकरणविषयभूतानामऊहादीनां मन्त्रत्वाभिमतसर्वनामस्थानप्रक्षेप्यनामेरापदादिवैषम्यमुपसंहरति * नन्विति * चिन्तान्तरसिद्धान्तमुपसंहरति * अतश्चेति * क्रतुनाकाङ्क्षितं प्रत्यभिज्ञायमानं च मन्त्रत्वं यस्येति विग्रहः । अविशिष्टं तथा मन्त्रत्वेन प्राप्तत्वात् क्रत्वाकाङ्क्षितप्रत्यभिज्ञायमानमन्त्रत्वाच्च प्रायश्चित्तेन छान्दसप्रयोगैश्च न वर्जनीयमित्युक्ते कथं मन्त्ररूपप्राप्तिस्तत्प्राप्तौ वा कथमूह्यपदस्यामन्त्रस्य प्रक्षेप इत्याशङ्क्याभिधानेत्युक्तं कर्मसमवेतार्थप्रकाशनाख्यस्याभिधानस्य प्रकृतिवद्विकृतावपि कर्मसमवेतो ऽर्थो ऽग्नये जुष्टं निर्वपामीत्येन सकलेनाभिधेय इत्येवं चोदकेन प्रापितत्वादूह्यपदप्रक्षेपः । प्रकृतिवद्यथासमाम्नायावगतेन मन्त्रस्वरूपेणाभिधेय इत्येवं रूपेण चार्पस्य यथा समाम्नायावगतमन्त्ररूपस्य चोदकेन प्रापितत्वान्मन्त्ररूपप्राप्तिरित्यर्थः ।

॥ ऋग्लक्षणाधिकरणम् ॥ १० ॥

तेषामृग्यत्तार्थवशेन पादव्यवस्था ॥ ३५ ॥

ननु कर्मभेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थं भावशब्देभ्यो ऽपूर्वाधिगतिरिति भावार्थाधिकरणेनोक्ते तदपवादायाख्यातद्वैविध्यमुक्त्वा प्रसङ्गान्मन्त्रगताख्यातस्याविधायकत्वलक्षणे तृतीयप्रकारे ऽभिहिते तदनुप्रसङ्गान्मन्त्रलक्षणोक्त्या ऽध्यायोपक्रमप्रतिज्ञातपदार्थसमाप्तेः कथमृगादिलक्षणसङ्गतिरित्याशङ्क्याह * प्रसक्तेति * प्रसक्तानुप्रसक्तं चेति भाष्यगतेन चकारेण तदनुप्रसक्तस्याप्यर्थस्य प्रतिज्ञा-

नादविरोध इत्याशयः । ननु तेषां मन्त्राणां मध्ये यत्र मन्त्रे पादव्यवस्था स मन्त्र ऋगिति लक्षणस्यादुष्टत्वादेवं जातीयकेष्वित्यादिभाष्येणाभियुक्तोपदेशाभिधानं व्यर्थमित्याशङ्क्याह * शब्दार्थस्येति * यदीति भाष्येणार्थवशत्वस्येह लक्षणान्तर्गतिं मत्वा यदग्ने स्यामहं त्वमित्यादावर्थवशत्वसद्भावे ऽप्यग्निः पूर्वेभिर्ऋषिभिः यद्वा जगज्जगत्याहितं पदमित्यादौ लघुगुर्वक्षरसामाख्यवृत्तवशेनाग्निमीलइत्यादौ चाक्षरसंख्यानियमलक्षणाच्छन्दोवशेन तमुस्रामिन्द्रं न रेजमानमित्यादौ चान्यवैषम्येणैवादेवमिन्द्रोविष्णे नृन्प्रेत्यादौ च प्रायवशेन पादव्यवस्थायामर्थवशत्वाभावाल्लक्षणाव्याप्तिं शङ्कितामुपपादयति * क्रियापदेति * नन्वेवं सति न क्व चिदर्थवशेन पादव्यव- ४२१।।
स्था स्यादित्याशङ्क्ते * ननु चेति * ऋगर्थापर्यवसाने ऽप्यवान्तरार्थपर्यवसानात्परिहरति * कथमिति * आख्याताभावेनोत्तरयोरसाव्यसमाप्त इत्याशङ्क्ते * परयोरिति * तयोरप्याख्यातान्वयात्समाप्तिमाह*नेति* अनावृत्तस्यैवानेकान्वयमात्रविवक्षयानुषङ्गाभिधानान्न वाक्यभेदापत्तिः । एतदेवोपसंहरति * तस्मादिति * नार्थवशेनेति परिहारभाष्यं व्याचष्टे * एतस्य त्विति * पादव्यवस्थैव कथमित्यपेक्षायां लक्षणानन्तर्गतस्याप्यर्थवशत्वस्यार्थवशेन वृत्तवशेनाप्यैतृप्रसिद्धिवशेनेत्युपलक्षणायाभिधानान्नानर्थक्यमित्याशयः ।

॥ सामलक्षणाधिकरणम ॥ ११ ॥

गीतिषु सामाख्या ॥ ३६ ॥

गीतित्वस्य लौकिक्यामपि गीतौ सद्भावेनातिव्यापकत्वमाशङ्क्य मन्त्रगतत्वविशेषणसूचनायाह * तेषामिति*अभियुक्तोपदेशो ऽत्रापि पूर्वोक्तप्रयोजन एवेत्याह*अत्रापीति * सिद्धप्रामाण्येनोपदेशेन व्यवहाराय प्रथमं दृष्टान्तेन तत्प्रामाण्योपपादनस्योचितत्वेन मन्त्रलक्षण एव कार्यत्वादभियुक्तोपदेशश्चेत्यादिभाष्यं पठनीयमिति स्वयमेवाशङ्क्य परमतेन तावत्परिहरति * प्राथम्यादिति * यथेति मध्यप्रतीकेनाभियुक्तेत्याद्युक्तं नाभियुक्तोपदेशमात्रप्रामाण्याभिधायैनातदुक्तं किं तु गीतेः सामत्वे साम्ना स्तुवतइति स्तुतिसाधनत्वायोगापत्तेरयमप्रमाणमित्याशङ्कानिरासादत्रैव वाच्यमित्याशयेन स्वयं परिहरति * अथ वेति * अभियुक्तोपदेशं दृष्टान्तं मत्वा साध्यविकलत्वमाशङ्क्ते * ननु चेति * नात्यन्तसाम्येन दृष्टान्त इत्याशयेन परिहरति * नैष दोष इति * ननूपदेशदृष्टस्य प्रामाण्येऽपि गीतिमात्रविषयत्वं कथमवसीयतइत्याशङ्कानिरासार्थं गीति-

विशिष्टे चेदिति भाष्यं व्याचष्टे * गीतेरिति * सप्तमद्वितीयपादे वक्ष्यमाणस्यैव गीतिमात्रवाच्यत्वस्येह लक्षणसमर्थनायानागतापेक्षणेन भाष्यकृतोक्तत्वादपौनरुक्त्यम् । अत्रैव वृद्धसम्मतिमाह * आह
४२२।१ चेति *

॥ यजुर्लक्षणाधिकरणम् ॥ १२ ॥

शेषे यजुः शब्दः ॥ ३७ ॥

यजुष इति भाष्यस्य सूत्रप्रत्याख्यानार्थत्वभ्रान्तिं निरस्यति * शेष इति *

॥ निगदानां यजुष्टवाधिकरणम् ॥ १३ ॥

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३८ ॥

निगदा इति भाष्यं सूत्रानारूढमाशङ्क्य व्याचष्टे *शेष इति* धर्मस्य विशेषाश्रवणादन्यत्ववाचितया विशेषशब्दं व्याचष्टे * धर्मेति*तृतीये वेदो वा प्रायदर्शनादित्यत्रोच्चैस्त्वोपांशुत्वयोर्वेदधर्मत्वे वक्ष्यमाणे ऽपि तत्रत्यपूर्वपक्षे स्थित्वोपांशुत्वस्य यजुर्जातधर्मत्वेनोच्चैस्त्वस्य तदन्यतोक्ता विधित्वे विशेषशास्त्रेण सामान्यशास्त्रबाधात्सिद्धान्ते ऽपि धर्मान्यत्वोपपत्तेः पूर्वपक्षोपपादनाशक्तिं मत्वोच्चैरित्यस्यानुवादता भाष्यकृतोक्तेति भ्रान्तिं निवर्त्तयितुं विधित्वे ऽप्यबाधपक्षसम्भवे बाधपक्षस्यानङ्गीकार्यत्वाद्धर्मान्यत्वस्य पूर्वपक्षोपपादकत्वं वक्तुमाह * यदि तावदिति * अनुवादत्वे तु निगदस्य यजुषो भेदेन विनोच्चैस्त्वधर्माप्राप्तेःसुसाधो भेद इत्याह * अथेति *

व्यपदेशाच्च ॥ ३९ ॥

धर्मान्यत्वस्य तार्तीयवाक्याधिकरणविरुद्धत्वेनाभ्युच्चयमात्रत्वात्तन्मुख्यहेत्वभिधानार्थमिदं सूत्रं यथा भाष्यं स्पष्टत्वान्न व्याख्यातम् ।

यजूंषि वा तद्रूपत्वात् ॥ ४० ॥

तद्रूपत्वस्य हेतोः यजूरूपत्वादिति भाष्यकृद्व्याख्यानादन्यथापि निगदस्य मन्त्ररूपत्वाद्यजुषो वा निगदरूपत्वस्य श्रवणान्निगदस्यैव चोच्चैस्त्वधर्मरूपत्वाद्व्यपदेशभेदसिद्धिरिति व्याख्यानत्रयं सूचयन्सूत्रं व्याचष्टे * अह इति * कं मन्त्रमित्यपेक्षायामृचो यजूंषि सामानीत्यृग्यजुःसामस्वेव मन्त्रत्वोपसंहारात् मन्त्रत्वेना-

ध्येतृप्रसिद्धेरस्य निगदस्य त्रयान्यतमान्तर्भावावगतेर्ऋक्सामवैलक्षण्येन पारिशेष्याद्यजुष्ट्वमित्येको हेत्वर्थः। तदाहुः। ऋक्सुब्रह्मण्या इयजूः सामा इति प्रइनोत्तरभूते मन्त्रएव खल्वयं निगदभूतो भवति तस्माद्यजुरिति वेदे निगदशब्दस्य मन्त्रशब्दसामानाधिकरण्येन हेतुना यजुष्ट्वापरित्यागेनैव निगदे मन्त्रशब्दप्रयोगावगमादिति द्वितीयः निगदस्य यजुष्ट्वापरित्यागेनैव धर्मविशेषेणोच्चैस्त्वेन व्यपदेशभेदसिद्धेरिति पूर्वपदावृत्त्या तृतीयः। गुणार्थो व्यपदेश इत्यत्र व्यपदेश हेतुर्निराकरिष्यमाणोऽपि मुख्यत्वसूचनायेह निराकृतः। परिशेषेत्यनेन भाष्योक्तहेत्वर्थो व्याख्यातः। यद्वा त्रिष्वेव मन्त्रत्वोपसंहारान्मन्त्र एव खल्वयं निगदभूतो भवतीति च वेदे निगदस्य मन्त्रशब्दसामानाधिकरण्येन निगदे मन्त्रशब्दप्रयोगादित्येक एव हेतुः।

वचनाद्धर्मविशेषः ॥ ४१ ॥

उच्चैस्त्वोपांशुत्वयोर्जातिधर्मत्वाभावान्न तावद्यजुष्ट्वेन निगदस्यापांशुत्वप्राप्तिः यदि परं प्रायेण यजुर्वेदविहितत्वात्तत्प्राप्तिः स्यात्सास्य वचनेनैवोच्चैस्त्वावगमान्निरस्तेत्यभिधानायैतत्सूत्रं तत्र वचनशब्दो वचनं परमित्यादौ विधानवाचित्वेन प्रसिद्धः कस्माद्भाष्यकृताभिधानवाचित्वेन व्याख्यात इत्याशङ्क्याह * न्यायेति * अग्नीदग्नीन् विहरेत्यादेर्निगदस्य प्रैषसामर्थ्यात्परप्रत्यायनेनार्थवत्त्वावगतेरुच्चैस्त्वं च विना परस्य प्रत्यापयितुमशक्यत्वान्न्यायप्राप्तेनोच्चैस्त्वेनोपांशुत्वबाध इत्यर्थः।

अर्थाच्च ॥ ४२ ॥

परप्रत्यायनार्थत्वादपि निगदस्य यजुष्ट्वेऽपि धर्मविशेषो युक्त इत्येवमर्थतयैतत्सूत्रमाभासमानं पूर्वसूत्रेण पौनरुक्त्यापत्तेर्ननूपांशुत्वे परप्रत्यायनाशक्तौ प्रैषत्वायोगात्प्राप्तकालतायां लोट् भविष्यतीत्याशङ्क्यानिरासार्थत्वेनैतद्व्याख्यानार्थमस्ति चेति भाष्यं व्याचष्टे * अस्ति ४२॥८
चेति * अवयवार्थालोचनेनाप्युच्चैस्त्वमिति हेत्वन्तराभिधानार्थत्वेनैतत्सूत्रव्याख्यानार्थं यानीति भाष्यं व्याचष्टे * तथा चेति * न्यायेन वचनबाधो न युक्त इत्याशङ्क्योपन्यासपूर्वं तन्निरासार्थं नन्वित्यादिभाष्यं व्याचष्टे * वाचनिकमपि चेति * परसम्वेदनार्थत्वान्निगदस्य तद्द्वारेणोच्चैस्त्वे स्वरूपतश्चोपांशुत्वे प्राप्ते।

गुणे स्वरूपतो धर्मः प्रधानद्वारतो परः।
यत्र स्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनमिति ॥

अनेन न्यायेनोच्चैस्त्वस्योपांशुत्वाद् बलीयस्त्वात् प्रमाणबलाबलाच्च प्रमेयबलाबलबलीयस्त्वस्योक्तत्वाद्वाचनिकस्याप्युपांशुत्वस्य न्यायप्राप्तेनोच्चैस्त्वेन युक्तो बाधः यजुरन्तरविषयत्वाच्च वचनानर्थक्यपरिहार इत्याशयः ।

गुणार्थो व्यपदेशः ॥ ४३ ॥

यस्तु व्यपदेशो भेदहेतुत्वेनोक्तः स यजुष्टेऽपि निगदस्योच्चैस्त्वगुणाभिधानार्थत्वेनोपपन्नत्वान्न भेदसाधक इत्येवं सूत्रव्याख्यानार्थमथेति भाष्यं व्याचष्टे * ब्राह्मणेति *

सर्वेषामिति चेत् ॥ ४४ ॥

निगदशब्दस्योच्चैस्त्वगुणाभिधानार्थत्वे सत्यृक्ष्वपि निगदशब्दः स्यादित्येवमर्थत्वेन सूत्रव्याख्यानार्थं यदि त्विति भाष्यं व्याचष्टे * अतिप्रसङ्गेति *

नर्गव्यपदेशात् ॥ ४५ ॥

ऋचः सकाशात् निगदस्य भेदेनोपदेशान्नर्चो निगदत्वप्राप्तिरित्येवं सूत्रव्याख्यानार्थं नेत्यादिभाष्यं व्याचष्टे *न तावदिति * प्राप्तिमनभिधाय लिङ्गमात्राभिधानमसाधकत्वादयुक्तमित्याशङ्क्यातिप्रसङ्गस्तावन्निगदशब्दस्यानृग्वाचित्वहेतुप्रवृत्तिनिमित्तप्रापकाज्ञाने ऽपि व्यपदेशान्निरसः या तूच्चैस्त्वे सत्यप्यृचि निगदशब्दाप्रयोगात् व्यभिचाराशङ्का तन्निरासः प्राप्त्यभिधानभाष्ये भविष्यतीति तावच्छब्देन सूचितम्।उच्यतइत्यादिप्रश्नपूर्वं प्राप्त्यभिधानार्थं भाष्यं व्याचष्टे* न चेति * गदतेरपादबद्धपदसमुदायवाचित्वात्प्रकर्षवाचिनि शब्दोपसृष्टस्योच्चैरविनोच्चार्यमाणापादबद्धसमूहवाचितावसीयतइत्याशयः । प्रयोजनं पूर्वपक्षे निगदानामृग्यजुःसामान्यत्वाद्वाचस्तोमेऽसनाभावः । सिद्धान्ते यजुष्टवाच्छंसनमिति ।

॥ एकवाक्यत्वलक्षणाधिकरणम् ॥ १४ ॥

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥४६॥

भाष्योक्तयजुःपरिमाणाभिधानार्थत्वत्यागेन वाक्यलक्षणार्थतयैतत्सूत्रं कैश्चिद्व्याख्यातं तदूदूषणायोपन्यस्यति* के चिदिति * वाक्यस्यापि लौकिकस्यैव लक्षणमित्याह * तत्रापीति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * लौकिकानां हीति * ननु वाक्यं लक्षयितव्ये वैदिकं कस्मान्न लक्ष्यतइत्याशङ्क्या- ४२४।१

ह * वैदिकानां पुनरिति * यस्य वाक्यस्यैकत्वादर्थैकत्वं गम्यते तद्वाक्यमिति वैदिकानां लक्षणमित्यर्थैकत्वमितीतिकरणेन सूचितं कस्माद्वैदिकवाक्यानामेतल्लक्षणानुपपत्तिरित्याशङ्क्य * अनन्येत्युक्तम् * वैदिकानामर्थस्यानन्यप्रमाणगम्यत्वेन प्राग्वाक्यादज्ञातत्वादज्ञाने ऽपि वाक्यात्प्राग्वाक्यैकत्वाज्ञानादर्थैकत्वासिद्धेर्नार्थैकत्वस्य वाक्यलक्षणतोपपन्नेत्यर्थः कथं वाक्यैकत्वस्यार्थैकत्वज्ञानहेतुतेत्याशङ्क्याह * यथैव हीति*वेदवाक्यानां सौत्रलक्षणानुपपत्तौ वृद्धसम्मतिमाह*आह चेति* शास्त्रासङ्गतत्वेन लौकिकवाक्यलक्षणं दूषयति * अत्रेति * नन्वर्थापत्त्या विपरीतवेदवाक्यलक्षणार्थं लौकिकवाक्यलक्षणाभिधानमित्याशङ्क्याह * वैदिकेति * वाक्यैकत्वस्य वाक्यार्थैकत्वज्ञानहेतुत्वं विनापि शब्दान्तरादिभिर्वाक्यार्थभावनाभेदसिद्धेर्न भेदलक्षणोपयोग्येतल्लक्षणमित्याशयः। यदि त्वज्ञातलक्षणस्य वेदवाक्यस्य धर्मप्रामाण्यज्ञानायोगात्प्रामाण्यासिद्ध्यै लक्षणाभिधानं ततः प्रमाणलक्षणे वाच्यमित्याशयेनाह * किमर्थमिति * एकशब्दानर्थक्यापत्तेश्च न लौकिकवाक्यलक्षणे ऽप्येतत्सूत्रं समञ्जसमित्याह * एकेति * ननु एकशब्दस्य लौकिकवाक्यलक्षणानुपयोगे ऽप्यर्थैकत्वज्ञानहेतुवाक्यैकत्वपदसमूहत्वं वेदवाक्यलक्षणं सूचयितुमेकशब्द इत्याशङ्क्य वेदवाक्यलक्षणमपि मन्त्रप्रकरणासङ्गतत्वादयुक्तमित्याशयेनाह * कथं चेति * भाष्यविरोधश्च तेषां स्यादित्याह * भाष्येति * न केवलं शास्त्रलक्षणाप्रकरणासङ्गतिर्भाष्यविरोधा एव तद्व्याख्याने दोषाः किं त्वनुपयोगो ऽपीत्याह * किं चेति * एकशब्दार्थबत्त्वायैकवाक्यत्वस्येदं लक्षणमिति यदि कश्चित् ब्रूयात्तदप्यनुपयोगीति वक्तुम् * एकत्वस्येत्युक्तम् * मन्त्रादिषु मध्ये क उपयुज्यतइति वाक्यं तदेकत्वलक्षणवादिभिर्वक्तव्यमितीतिकरणाध्याहारेण योज्यम्। यजुर्व्यतिरिक्तमन्त्रेषु तावदनुपयोगं विवृणोति * ऋगिति * ब्राह्मणे विवृणोति * तथेति * एकवाक्यत्वलक्षणस्य वाक्यभेदपरिहारोपयोगं शङ्कते * नन्विति * दोषत्वावधारणेन वाक्यभेदस्य परिहार्यत्वात् वाक्यैकवाक्यत्वज्ञानं च विनाप्यावृत्तिविभागयोर्दोषत्वावधारणान्नैकवाक्यत्वलक्षणस्य वाक्यभेदपरिहारोपयोग इति परिहरति * नेति * अनावृत्तस्याविभक्तस्य वा शब्दस्य विवक्षितानेकार्थाभिधानाशक्तेः पदादिरूपस्य शब्दस्यावृत्तिरादिशब्दोक्तो विभागो सामर्थ्यहेतुकत्वात् स्वत एव दोषत्वसूचनायासामर्थ्यमित्युपचरितः असामर्थ्यहेतुकं यच्छब्दावृत्त्यादि स वाक्यभेदः स चासामर्थ्यरूपत्वात् स्वत एव तावद्दोष- ४२५।।

त्वेनावधार्यते विभागावृत्त्योस्तु दोषतोपपादयिष्यतइत्याशयः । श्लोकं व्याचष्टे * पदेति * वाजपेयगुणविधावाख्यातपदावृत्तिः।ग्रहैकत्वविवक्षायां पदैकदेशप्रातिपदिकावृत्तिः हविरार्त्तेरुभयत्वेन विशेषणे हविरार्त्तिमार्च्छदिति पदसमुदायावृत्तिः । आरुण्यस्य कृष्णप्रकरणनिवेशे ऽरुणयेति पदस्य पिङ्गाक्ष्यादिवाक्यार्द्विभागः । नानात्वग्रहणं दृष्टान्तार्थं कथं वाक्यैकत्वज्ञाननिरपेक्षैरावृत्तिलक्षणो विभागलक्षणो वा वाक्यभेदो दोषत्वेनावधार्यतइत्याशङ्क्याह * विभागेति * अरुणया क्रीणातीति तृतीयया क्रियान्वयस्य गम्यमानस्य त्यागः प्राकरणिकानां चानेकद्रव्याणामारुण्यनियमादनेकादृष्टकल्पना आवृत्तिलक्षणवाक्यभेदे त्वावृत्तेरभेदत्वेनाप्रामाण्यं दोष इत्यर्थः । एतदेवोपसंहरति * इतीति * लोके त्वत्यन्तानुपयोग इत्याह * पौरुषेयेति * लक्षणान्तरापेक्षामभ्युपेत्यैतल्लक्षणमनुपयोगीत्याह * यदि चेति * यत्तु हेतुप्रसिद्धेर्लौकिकवाक्यलक्षणमेतदित्युक्तं तद्वक्तरर्थं श्रोत्रर्थं वेति विकल्प्य दूषयति * वक्तॄणां चेति * व्यवहारानौपयिकं च स्वरूपज्ञानमात्रार्थं लक्षणं वेदवाक्ये ऽपि कस्मान्नोक्तमित्याह * किमर्थं चेति * यत्स्वर्थापत्त्या विपरीतं लक्षणं सूचितमित्युक्तं तदनुभाष्य दूषयति*यदि त्विति*न च वाक्यैकत्वादर्थैकत्वमितीदृग्वाक्यलक्षणमित्याह * न चेति * नन्वनेनार्थैकत्वज्ञानहेत्वेकवाक्यत्वं वेदवा-
४२६।१ क्यलक्षणं सूचितमित्याशङ्क्याह *अपि चेति * वेदवाक्यलक्षणविषयोत्थितार्थापत्तिर्नैकान्ततो विपरीतं लक्षणं कल्पयतीत्याशयः । ननु लौकिकानामेवैतल्लक्षणमिति परिसंख्ययास्य लक्षणस्य वैदिकविषयत्वनिवृत्तेर्विपरीतं वेदवाक्यलक्षणं कल्प्यतइत्याशङ्क्याह * न चेति * सत्यामपि सामान्यविशेषोपादानेन सम्भवत्या परिसंख्यया वेदवाक्यविषयत्वनिवृत्तावनेकैतत्व्यतिरिक्तलक्षणसम्भवान्न नियोगतो वाक्यैकत्वादर्थैकत्वमिति लक्षणं कल्पयितुं शक्यमित्याह * यदि हीति * ननु विपरीतमेव लक्षणं बुद्धिस्थं भवति न्यान्यमात्रमित्याशङ्क्याह*एवमपीति* वैपरीत्यस्याप्यनेकधा सम्भवान्न निर्द्धारणं भवतीत्याशयः।या चार्थैकत्वस्यासिद्धतोक्ता सा वाक्यैकत्वस्यापि तुल्येत्याह * किं चेति * श्लोकं व्याचष्टे * वाक्येति * एतदेवोपपादयति * तथा हीति * बहुवाक्यवर्त्तिष्वेकवाक्यवर्त्तिषु वा वर्णेषु बहुनि वाक्यान्येकं वेत्यवधारणा न दृष्टेत्यर्थः । अतः सूत्रोक्तेनैव लक्षणेन एकवाक्यत्वसिद्धिरित्याह * तस्मादिति * सर्वसाधारणं चैतल्लक्षणमित्याह * लोकेति * या त्वर्थैकत्वस्यासिद्धतोक्ता तामनुभाषणपूर्वकं परिहरति * यत्त्विति * श्लोकं व्या-

चष्टे * यदि हीति * भावनायाश्च वाक्यार्थत्वात्तस्याश्च भेदाभेदा- ४२
धारणस्य शब्दान्तरादिसदसद्भावाधीनत्वाद्वाक्यैक्यज्ञानात्प्रागर्थै-
क्यावधारणं सम्भवतीत्याह * भावनैव चेति * प्राधान्यं वि-
नानेकपदार्थवैशिष्ट्ययोगाद्वाक्यार्थत्वोपपादनाय प्राधान्यसूचनार्थ-
म्*स्वकारकेत्युक्तम्*शब्दान्तरादिभिर्विना भेदासिद्धिर्नित्यमित्यने-
नोक्ता श्लोकं व्याचष्टे * यस्मिन्निति * दध्ना जुहोतीत्यादौ भाव-
नास्वरूपाभेदे ऽपि गुणविशिष्टत्वरूपेणोत्पत्तिवाक्यविहितधात्वर्थ-
मात्रविशिष्टभावनारूपाद्भेदसद्भावान्नोत्पत्तिवाक्यस्य गुणवाक्यैः स-
हैकवाक्यतापत्तिःपरव्याख्यां दूषयित्वा यथाभाष्यं सूत्रं व्याख्यातु-
मुपक्रमते * तस्मादिति * सङ्गतिं तावदाह * भेदेति * ऋचो
यजूंषि सामानीति बहुवचनश्रवणादृगाद्यवान्तरभेदाकाङ्क्षायामेतावं-
तीयमृगित्युपदेशकाङ्क्ष्यतृवाक्यादृचाम् एतावदिदं सामेत्यस्माच्च सा-
म्नां भेदसिद्धेर्लक्षणं न कृतम् करणे ऽपि यजुर्वेदस्याध्येतृवाक्यादसि-
द्धेर्भेदज्ञानार्थं लक्षणमित्यर्थः । ननूत्तरादिः पूर्वान्तलक्षणमिति व-
चनादिपे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीत्यादिभिन्नप्रतीकाविनि-
योगेन यजुषामपि भेदसिद्धेस्तद्भेदलक्षणमपि न कार्यमित्याशङ्क्य ते
* नन्विति * अभ्युपगम्यैतद्वचनप्रामाण्यमव्यापकत्वं तावदाह
* न तावदिति * सौत्रविनियोगस्य भेदप्रतीतिमूलतया तन्निरपेक्ष्ये-
ण लक्षणत्वायोगात् * ब्राह्मण इत्युक्तम् * सत्यपि वा सर्वेषामर्थाभि-
प्रतभेदानां विनियोगे मध्ये विनियोगरहितमन्त्रान्तरसद्भावशङ्कानि-
वारणाशक्तेरर्थापत्त्ययोगाद्वचनस्य चावैदिकतया स्वातन्त्र्येण प्रामा-
ण्याभावात्सूत्रकृद्वचनस्य चैकार्थ्यनिबन्धना पदसमूहस्यैकवाक्यतेति
न्यायमूलत्वात्तस्य लक्षणस्वरूपमुच्यतइत्याह * न चेति * यजुः
परिमाणे सूत्रयोजनार्थं यावतेति भाष्यमिपे त्वेत्यादियजुषां यागे वि-
नियोगाभावादयुक्तमाशङ्क्यावतारणपूर्वं व्याचष्टे * तत्रेति * यजे-
रुसि प्रत्यये कृते यजुःशब्दव्युत्पत्तेस्तस्य चोणादित्वेन बाहुलकत्वा-
त्प्रयोगानुसारेण करणवाचित्वावगतेरिपे त्वेत्यादीनामपि च प्रकर-
णाम्नानानुमितेन वाक्येन यागाङ्गत्वावगमाद्यजुष्ट्वाविरोध इत्याश-
यः । ननु श्रुत्यादिभिः छेदनादौ विनियुक्तानां कथं यागाङ्गतेत्याश-
ङ्क्यानिरासार्थं यावता क्रियाया इति भाष्यं व्याचष्टे * तत इति *
तावच्चेति योजनोपसंहारभाष्यं व्याचष्टे * तेनेति * वाक्यविशे-
षस्यैव यजुष्ट्वाद्यजुर्विषयः सूत्रे वाक्यशब्द इत्यर्थः । श्लोकं व्याचष्टे
* वचनार्हं हीति * यावान्पदसमूहो वाक्यं तावानेव यजुरिति वा- ४२८१
क्यपरिमाणेन यजुः परिमाणं वक्तुं वाक्यलक्षणमित्यर्थः । ननु म-

न्त्रावान्तरभेदप्रस्तावाद्यजुर्भेदे प्रतिपाद्ये यजुः परिमाणलक्षणमप्यसङ्गतमित्याशङ्क्यानिरासार्थत्वेनैतदस्माच्चेदिति भाष्यं व्याचष्टे * इदं चेति * अनेन चैतस्माच्चोदकार्थत्वात्कारणादेकयजुर्वाक्यता भवति तस्माद्यावानेकार्थः पदसमूहस्तावदेवैकं यजुर्वाक्यमधिकं तु यजुर्वाक्यान्तरमिति सावधारणत्वेन भाष्यं योजितम्। किमित्युदाहरणप्रश्नभाष्यं विपर्ययाशयेन व्याचष्टे * किमिति * चेच्छब्देनैकार्थ्यसाकाङ्क्षावयवत्वयोः संहतयोः लक्षणत्वेनाभिधानात्प्रत्येकं लक्षणत्वाभावेन लक्षणद्वित्वायोगाल्लक्षणाधिष्ठानाभिप्रायो लक्षणशब्दः एतदेवोपपादयति * तथा हीति * श्लोकं व्याचष्टे * पदस्य हीति* प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां प्रत्येकमर्थप्रत्यायनशक्त्यवगमाद्विभक्तप्रयोगाभावेनार्थप्रत्यायाभावः शक्तिशब्देन लक्षितः देवस्येत्युदाहरणभाष्याशयमाह * प्रयोजनेति * नन्वित्यादिभेदानां संसर्गाणां च बहुत्वादित्यन्तमाशङ्काभाष्यं तात्पर्यतस्तावत्व्याचष्टे * नन्विति * एकैकपदस्यैकार्थ्यात्पदसमूहस्यानुदाहार्यत्वशङ्कायां साकाङ्क्षावयवत्वाभावात्सत्यामित्यनेन निरस्तायां न तर्हीत्यनेन पदार्थानेकत्वात्पदसङ्घस्य च पदार्थातिरिक्तैकार्थवाचितायास्तद्भूताधिकरणे निरस्तत्वात्पदसङ्घस्यानुदाहार्यत्वशङ्काशये विवृते ननु पदार्थातिरिक्तैकनिर्भागवाक्यार्थायोगे ऽपि पदार्थानां भेदः संसर्गो वाक्यार्थ इत्याशङ्कानुपपत्त्यभिधानार्थं भेद इति भाष्यं व्याचष्टे * यदेति * तथापीत्याशङ्कासमर्थनार्थं भाष्यमुपपादयितुमवतारयति * अत इति * भेदानेकत्वं तावत्प्रश्नपूर्वकमुपपादयति * कथमिति * ऋगतावित्यस्य धातोरौणादिके थन्प्रत्यय कृते ऽर्थशब्दव्युत्पत्तेः। प्रतिपदमर्थत्वाद् गम्यमानत्वादित्यर्थः।श्लोकं व्याचष्टे * व्यक्तीति * ननु यथा शुक्लशब्दसान्निधानात् कृष्णादिभ्यो गोव्यक्तेर्व्यवच्छेदः प्रतीयते तथा शुक्लत्वसंसर्गस्यापि प्रतीतेः कस्मान्न वाक्यार्थतेत्याशङ्क्य शुक्लत्वसंसर्गस्य गोपदार्थान्तर्गतत्वादित्युक्तं गोव्यक्तेः शुक्लशब्देन कृष्णादिभ्यः शुक्लव्यक्तेश्च गोशब्देनाश्वादिभ्यो निवृत्तौ वाच्यायां कृष्णादिव्यक्तिष्वपि गोत्वस्याश्वादिष्वपि शौक्ल्यस्य सत्त्वात्स्वरूपेणाव्यावृत्तेः शब्दवाच्यत्वरूपेण व्यावृत्तिं वक्तुं गोशब्दस्य शुक्लशब्दस्य चेति चोक्तं संसर्गानेकत्वमुपपादयति * तथेति * श्लोकं व्याचष्टे * आकृतीति * गोत्वशुक्लत्वयोरेकार्थसमवायलक्षणस्य संसर्गस्य सम्बन्धत्वेन द्विष्ठत्वात्तत्सम्बन्धिभेदे ऽप्यैक्यमाशङ्क्य * सामस्त्येनेत्युक्तम् * व्यक्तिसमवेतं गोत्वमितिवद् गोत्वसमवेता व्यक्तिरित्यप्रतीतेः सम्बन्धत्वे ऽपि समवायस्य व्याप्तिवदा-

४२९।१

धेये सामस्त्येनोपलम्भात् द्विष्ठत्वाभावेनैकव्यक्त्युपसंहारात्मकस्यै-
कार्थसमवायस्यापि न द्विष्ठतेत्याशयः। ननु यद्यपि गोत्वविशिष्टायां
व्यक्तौ शुक्लत्वसंसर्गाच्छुक्लत्वविशिष्टायां व्यक्तौ गोत्वस्य संसर्गो
ऽन्यस्थापि गौः शुक्ल इति वाक्यादेकास्मिन्नर्थे गोत्वशुक्लत्वयोः
संसर्ग इत्येकरूप्येण प्रतीतेर्वाक्यार्थैक्यमित्याशङ्क्याह * यद्यपीति *
गौः शुक्लः स्थूल इति त्रिपदएव तावद्वाक्ये गौः शुक्लो गौः स्थूलः
शुक्लः स्थूल इति येन येन वाक्यैकदेशेनावस्थितं पदद्वयमन्योन्यं सं-
सृज्यते तेन तेन वाक्यैकदेशेन गोत्वशुक्लत्वादिसंसर्गस्य प्रतीतेर्वा-
क्यार्थत्रयापत्तिरित्यर्थः। द्विपदे ऽप्येकप्रयोजनवशीकाराभावेन
पदार्थानामुपकार्योपकारकत्वाभावात्स्वातन्त्र्येणैकार्थविशेषणत्वरू-
पैकत्वाभावात्प्रत्येकं भेदसंसर्गस्य प्रतीतेरपरिहार्यं वाक्यार्थनानात्व-
मित्याह * किं चेति * श्लोकं व्याचष्टे * यावद्धीति * ननु सि-
द्धान्तिनो व्यक्तिपदार्थकत्वाभावाद्भेदवाक्यार्थत्वशङ्कानुपपत्तेस्त-
दुपन्यासो न युक्त इत्याशङ्क्याह * यद्यपि चेति * एकेति भाष्यं ४३०।१
समाधानाशयविवरणार्थत्वेन व्याचष्टे * सिद्धान्तेति * सर्वपदे-
ष्वेकस्यैव पदार्थस्येतरविशिष्टस्यैव प्राधान्येन प्रतिपाद्यत्वादेकार्थते-
त्याशयः। एवं च सति विशेष्यस्यैवैकस्य पदार्थस्येतरैः सह संसर्ग-
स्य भेदस्य वा प्रतिपाद्यत्वाच्छक्यमेवैक्यं वक्तुमित्याह *एवमिति*
उक्तोदाहरणे विशिष्टैकप्रयोजनाभिधानार्थं यथा तावदिति भाष्यं
पदार्थान्तराणां निर्वापविशेषगत्वासिद्धेरयुक्तमाशङ्क्योपपादयति
*तस्मादिति * नन्वित्याशङ्काभाष्यं व्याचष्टे * परस्त्विति* यदीति
परिहारभाष्यं व्याचष्टे *सिद्धान्तेति* विशेषणद्वयानर्थक्याशङ्कार्थम-
थेतिभाष्यं व्याचष्टे*किमर्थमिति*उच्यतइत्यादि पुरोडाशप्रतिष्ठाप-
नम् इत्यन्तं भाष्यं तात्पर्यतस्तावद्व्याचष्टे*प्रत्युदाहरणे इति* अवयव
शो व्याचिख्यासुर्भवतीति भाष्यं तावद्व्याचष्टे*पुरोडाशेति*नन्वित्यै-
कार्थ्याभावाशङ्काभाष्यं निर्वापन्यायेनेहाप्याशङ्कानिरासोपपत्तेरयुक्त
माशङ्क्योपपादयति * निर्वाप इति* नेति परिहारभाष्यमसकृदुच्चा-
रिताख्यातयोगेन भगादीनां संहत्य विशेषणत्वादनुपादानान्निरपेक्ष
साधनत्वावगतेस्तद्भेदेन विभागनानात्वावगमादयुक्तमाशङ्क्योपपा-
दयति * तत्रेति * स्तुत्यर्थमसमवेतनिरपेक्षसाधनभेदाभिधाने ऽपि
क्रियान्यत्वाभावस्य चित्यधिकरणेन च कारकभेदादस्य भेदो भव-
तीति वार्त्तिके वक्ष्यमाणत्वाद्भागादिकर्तृभेदमात्रेण तावन्न विभागा-
न्यत्वापत्तिः। न चायुरादिवदसमवेतत्वे ऽपि प्रोत्साहनायाशास्त्वे
न भागादेः प्राधान्यं येन विशेषणभेदात् फल्गुनिवद्विभागभेदः स्या-

दित्यर्थः । विशेषणाविवक्षाभिधानार्थः सामान्यशब्दः तथेति प्रत्यु-
४३१।१ दाहरणान्तराभिधानार्थं भाष्यं व्याचष्टे * तस्मिन्निति * तस्मात्स-
म्यगिति परिहारोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

॥ वाक्यभेदाधिकरणम् ॥ १५ ॥

समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

कियतः पदसमूहस्येह चिन्ताविषयतेति दर्शयन् पूर्वपक्षयति * तेषामिति * दृष्टार्थस्यैव लिङ्गविनियोज्यत्वात्तत्पर्युदासेन दृष्टार्थमन्त्रत्वपर्युदासे सिद्धे ऽपीषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीत्याद्यनेकवाचनिकविनियोगसद्भावे ऽपि मन्त्रैक्यं वक्तुम् * प्रागित्युक्तम् * इषे त्वेत्यादिमन्त्राणां छेदनादिकरणत्वेन विधानादभिधानं च विना मन्त्राणां करणत्वायोगाद्यावता क्रियाया उपकारः प्रकाश्यतइत्यादिभाष्याद्यावता पदसङ्घेन स्मार्यते यागसाधनमित्यादिवार्त्तिकाच्च प्रतिपाद्यार्थैकत्वस्यैवैकवाक्यलक्षणत्वप्रतीतौ स्तोत्रशस्त्रमन्त्राणां चैकादृष्टसाधनत्वे ऽप्यैकमन्त्र्याभावात्कल्पाख्यातलभ्यच्छेदनादिक्रियाभिधानाभिप्रायो भाष्यवार्त्तिकयोरदृष्टशब्दः । अत एव तदुभाभ्यामेवं कल्पयितुं न्याय्यमित्युभयशब्दोक्तेन पदचतुष्टयमात्रस्यैकवाक्यत्वेन प्राक् दृष्टार्थेत्यविरुद्धं वायवस्थेत्याख्यातस्य श्रुतत्वाद्वायुवच्छीघ्रगामिनो भवतेति चोक्ते ऽर्थादपाकरणप्रतीत्युपपत्तेरपाकरणवाच्याख्यातस्य कल्प्यत्वादितरथास्यापि यथाश्रुतस्य वत्सापाकरणाभिधानार्थत्वायोगादृष्टार्थत्वापत्तेरविधित्वायोगात् विरुद्धेत आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम् अपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् इत्येतावतः पदसमूहस्यैकमन्त्र्यमभिमतम् एतदेवोपपादयति * तथा हीति * तेषामदृश्यमानसमवेतार्थत्वानां पदानामप्रतीतौ वाक्यार्थः प्रयोजनभूतः कल्प्यस्तस्य चालपस्यैव प्रमाणवत्वादेक एवार्थ इत्यर्थः । अनेन चादृष्टस्य वाक्यार्थस्यानुमानं यस्यां कल्पनायां साल्पीयसीति भाष्यं व्याख्यातं श्लोकं व्याचष्टे * यदा हीति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति * नन्वैकमन्त्र्ये प्रतीकभेदग्रहणं बहुवचनं वा युक्तं स्यादित्याशङ्कते * कथं पुनरिति * आनः प्राण एतु परावतश्चान्तरिक्षात् दिवस्परि आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वेति हिरण्यमभिव्यनितीत्यन्तप्रतीकेन विनियोगस्य सङ्कर्षे वक्ष्यमाणत्वान्मध्यान्त्यप्रतीकाभ्यामपि वि-

नियोगोपपत्तेरभ्यासापेक्षया च बहुवचनोपपत्तेरुभयमप्युपपादयति * तदुच्यतइति*श्लोकं व्याचष्टे * आदीति * एवमिति सिद्धान्तोपक्रमभाष्यं व्याचष्टे * उच्यत इति * सौत्रसमशब्दोक्तं परस्परानाकाङ्क्षत्वं कल्प्यैकार्थत्वेन विभज्यमानसाकाङ्क्षत्वावगमादयुक्तमाशङ्क्येवे त्वेति भाष्येणानेकार्थत्वमुक्तमुपपादयितुं सामान्यन्यायं तावदाह * रूपादिति * श्लोकं व्याचष्टे * तिष्ठतु तावदिति * प्राणाय प्रयोजनाय त्वामभिव्यनि- ४३२।१
मीत्युक्ते कथं हिरण्याभिधानस्य प्राणप्राप्त्यर्थतेत्यपेक्षायां परावतो दूरदेशादन्तरिक्षाद्दिवश्च सर्वतः प्राणो ऽस्मानागच्छतु। यच्च पृथिव्या उपर्यायुस्तदप्यागच्छतु तवामृतत्वेनायुः प्राणादानसामर्थ्यादित्युपक्रमोपसंहारपर्यालोचनया प्राणप्राप्तिसङ्कल्पार्थत्वेन प्राणप्राप्त्याशासनस्य रूपादेकवाक्यत्वावगतेस्तद्वशेनान्त्यप्रतीकेनापि सकलविनियोगो युक्तो न त्वेकवाक्यत्वरूपावगमात्प्रागिति विनियोगवाक्यं वेत्यनेन सूचितम्। न च रूपभेदानुसारात्प्रयोजनभेदकल्पने ऽपि दोषः प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहुन्यपीत्युक्तत्वादित्याह * प्रमाणवच्चेति * एवं च सतीह त्वाशब्दभेदेन भिन्नवाक्यरूपावसायान्नान्योन्याकाङ्क्षोपलभ्यते। न चैकप्रयोजनत्वात्कल्प्यते तस्याप्यनुपलम्भादिति सामान्यन्यायस्य प्रकृतोपयोगमाह * रूपेति * नन्विहाख्याताश्रवणेन तल्लभ्यस्य प्रयोजनस्य कल्प्यत्वात्कल्पनालाघवादैक्यमेव युक्तमित्याशङ्क्याह * ततश्चेति * रूपभेदात्प्रयोजनभेदावगतेर्न तदैक्यकल्पना युक्तेत्याशयः। या च प्रयोजनैक्यात्साकाङ्क्षावयवत्वकल्पनोक्ता साप्याकाङ्क्षावशेनैव प्रयोजनैक्यस्य कल्प्यत्वादयुक्तत्वादयुक्तेत्याह * न चेति * नैराकाङ्क्ष्ये च सति सर्वदा वाक्यभेदः सिद्ध इत्याह * तेन चेति * विनियोगभेदाच्चैहैकवाक्यत्वे ऽपि दुर्वारः प्रयोजनभेद इत्यार्हं * त्वत्पक्षे ऽपि चेति * अभ्युपगम्याहदृष्टार्थभेदः साधितः। वस्तुतस्तु छेदनादिसाधनत्वविनियोगादि इषित्वा छिनत्त्यूर्जे त्वानुमार्ज्मीति भिन्नाख्यातकल्पनेन दृष्टार्थत्वात्तद्भेदेन स्पष्टो भेद इत्याह * न चेति * अनेन च नन्वित्याशङ्कानिरासार्थं यद्यपीति भाष्यं प्रत्यक्षाद्यनुपलब्धो ऽपि प्रयोजनभूतो वाक्यार्थः श्रुतार्थापत्त्या छिनदूमीत्यादिशब्दकल्पनया गम्यत इत्येवं व्याख्यातम्। ये तु श्रुतार्थापत्तेः शब्दकल्पकत्वं नेच्छन्ति तन्मते ऽप्यवाचकस्यापि मन्त्रस्य रथद्योपवत्स्मारकत्वोपपत्तेर्दृष्टार्थतेत्याह * यद्वेति * ननु त्वेतिकर्मकारकवाचिनः पदस्य क्रियापदं विना नैराकाङ्क्ष्यायोगाच्छ्रुतार्थापत्तेश्च शब्दाकल्पकत्वे ऽनुषङ्गेण

वाक्यसमाप्तिर्लौकिकवाक्यशेषो वेत्युत्तराधिकरणाचिन्तानुपपत्तेरविशिष्टस्तु वाक्यार्थ इति चाभिधानार्थत्वस्य मन्त्राधिकरणोक्तस्य बाधापत्तेरवाचकस्य मन्त्रस्य स्मारकत्वं न युक्तमित्याशङ्क्याह *उभयमपि चेति* अयुक्तोऽप्ययं पक्षः कश्चिदाश्रितत्वादुक्त इत्याशयः । वस्तुतस्तु व्यवस्थितशास्त्रार्थाभ्युपगमस्य न्याय्यत्वादेकस्मिन्पक्षे ग्राह्ये मन्त्राधिकरणोक्ताभिधानार्थत्वविरोधेनावाचकप्रयोगानुपपत्तेर्विकल्पस्य च वाक्यस्य साकाङ्क्षत्वाद्वाचकत्वायोगेन प्रयोगेन प्रयोगासम्भवादध्याहार एव युक्त इत्याह * सर्वथेति * सूत्रकृद्भ्रान्तौ किं मूलमित्याशङ्क्याह * अथ वेति * यथाम्नानं यथाविनियोगं च यावान्मन्त्रोऽवगतस्तदनुसार्यत्वाद्विनियोगब्राह्मणस्यानुष्ठानकाले ऽनुसन्धानेन संस्कारोद्बोधे यतितव्यमिति शास्त्रार्थभ्रमः सूत्रकृद्भ्रान्तौ मूलमित्याशयः । ननु भ्रान्तिमूलत्वे ऽयं पक्षो न कैश्चिद्याज्ञिकैर्गृह्यतइत्याशङ्क्याह * तत्रेति * मन्त्रस्याध्याहृतपदवत्त्वे ऽप्यध्याहृतपदभ्रंशे मन्त्रभ्रंशनिमित्तप्रायश्चित्ताभावायानाम्नानोपपत्तेस्तावन्मात्रमन्त्रत्वे ऽर्थापत्त्यभावाद्वस्तुतो शास्त्रीये ऽप्यर्थे सूत्रानुसाराच्छास्त्रीयत्वभ्रान्त्यानुष्ठानात् परिग्रह इत्याशयः।प्रकृतमुपसंहरति * इतीति * यजुर्विषयत्वाच्चेह वाक्यशब्दस्य यजुःशब्दस्य च यागसाधनवाचित्वेन यौगिकत्वात्सूक्तवाक्यवत् स्वाध्यायकाले भेदानभ्युपगमे ऽपि कर्मकाले विनियोगभेदाद्यजुर्भेदावगतेर्भेदेनैव प्रयोज्यतेत्याशयेनाह * किं चेति * नियोगशब्दो विनियोगवाची प्रत्येकं यागहेतुत्वसिद्धये ऽन्योन्यनिरपेक्षाणां कार्यान्यतोक्ता विनियोगभेदेनोपपादितो अनेन वेषे त्वेति छिनत्तीति विनियोगाभिधानभाष्यं तात्पर्यतो व्याख्यातम्।आयुरिति भाष्यं व्याचष्टे *तथेति * नन्वित्याद्याशङ्काभाष्यं व्याचष्टे * निर्वापवदिति * उच्यतइत्यादिपरिहारभाष्यं प्रत्यवयवं व्याचष्टे * नेति * मन्त्रशब्देन कल्पिशब्दस्य मन्त्रपरतोक्ता। ननु निर्विशेषकल्पिमात्रस्येह विवक्षितत्वेन कल्पिमन्त्रस्यार्थैक्यादैक्यावगतेः श्रुतमपि बहुवचनमभ्यासाभिप्रायं व्याख्येयमित्याशङ्कानिरासार्थं ताश्चेति भाष्यावयवं तासामेवार्थमनपेक्ष्योच्चार्यत्वेनार्थैक्यनिमित्तैकवाक्यता नास्तीत्येवशब्दार्थं चशब्दमङ्गीकृत्य व्याचष्टे * इह तावदिति * मन्त्रपरत्वपक्षस्य परमतत्वसूचनार्थस्तावच्छब्दः। नन्वर्थाविवक्षायां वाक्यभेदहेत्वर्थभेदाभावात् भिन्नवाक्यतापि न स्यादित्याशङ्कानिरासार्थं तत्रेति भाष्यावयवं व्याचष्टे * तत्र चेति * बहुवचनान्यथानुपपत्त्याक्षराणि प्रत्युपसर्जनभूतस्याप्यर्थस्य भेदो ऽवसीयतइत्याशयः। कल्पि- ४३३।१

रूपस्य चार्थस्याविवक्षितत्वेन विशेषानपेक्षत्वादाथुरादिविशेषाभिधानस्य मन्त्रबहुत्वापादनमेव प्रयोजनमित्यभिधानार्थं कल्प्तीति भाष्यावयवं व्याचष्टे * कल्प्तीति * ननु बहुवचनस्य श्रुताभ्यासापेक्षयोपपत्तेरर्थभेदकल्पनानुपपत्तेर्मन्त्रे च कल्प्तिसंज्ञायाः कल्प्त्यभिधानमात्रेणोपपत्तेरेकवाक्यतैव युक्तेति शङ्कार्थे नन्विति भाष्ये ऽपूर्वदृष्टान्तत्यागेन दृष्टान्तान्तराभिधाने ऽभिप्रायमाह * यथेति* सकृच्छ्रुतत्वान्निर्वापस्य भेदे ऽप्यभ्यासेन कल्प्तीनां भेदो भविष्यतीति प्रत्यवस्थानानुत्थानार्थं दृष्टान्तान्तराभिधानमित्याशयः। एतदेव विवृणोति * पुनरिति * कल्प्तिसंज्ञायाः कल्पतामिति शब्दवत्त्वेनाप्युपपत्तेः कल्प्तिमात्रस्याप्यविवक्षितत्वान्नैकार्थेनैकवाक्यतापत्तिर्विभागसमान्यस्य तु कर्माङ्गत्वेन तत्प्रकाशनं दृष्टार्थत्वाद्युक्तमिति वैषम्याभिधानार्थं नैतदिति भाष्यं व्याचष्टे * नैतदिति * शङ्काशैथिल्येन यथेति भाष्यावयवं व्याख्यायेदानीं परिहारशेषत्वेन व्याचष्टे * अथ वेति * विभागमन्त्रैक्याभिप्रायेणैतद् दृष्टान्ताभिधानमिति भ्रान्त्याशङ्कते * ननु चेति * भ्रान्तिनिरासेनोत्तरमाहैवं * तर्हीति * भेदे सत्यष्टदोषदुष्टविकल्पापत्तेरैक्यमेव युक्तमित्यनेन प्रकारेण भेदस्यैवाक्षेपान्नासङ्गतिदोषः कथमस्माद्भाष्याद्विकल्पप्रतीतिरित्याशङ्क्य दृष्टान्तेन सहात्यन्तसाम्यापादनपरत्वादित्युक्तं शङ्काभाष्यं विकल्पापादने योजयित्वा तन्निरासे परिहारभाष्यं योजयति * नैतदिति * यदि गुणभूते इत्यादिपूर्वाधिकरणभाष्येण साधनप्राधान्ये भेदाभिधानादिहार्थाविवक्षायामपि प्रतीतिमात्रेणायुरादिप्राधान्याभिधानं क्रियाप्राधान्ये ऽपि विशेषणभेदाद्भेदः शक्यो वक्तुमिति प्रौढिदर्शनाय *अथापीत्युक्तम् * नन्विहार्थस्याविवक्षितत्वात्कथं ४३४।०
तद्भेदपरतेत्याशङ्क्यानिरासार्थत्वेन दृष्टार्थत्वादिति भाष्यावयवं व्याचष्टे * भेदपरत्वे चेति * पूर्वं मन्त्रबहुत्वापादनार्थत्वरूपं यद् दृष्टार्थत्वमुक्तं तदेव भेदपरत्वे साध्ये हेतुत्वेनोच्यतइत्यर्थः। अपि चेत्यादिभाष्यमिहेत्यादिभाष्येण पुनरुक्ततया भासनं पूर्वोक्तमन्त्रपरत्वपक्षादर्थपरत्वरूपपक्षान्तराभिधानार्थत्वेन व्याचष्टे * अथ वेति* आयुर्दा अग्ने ऽस्यायुर्मे देहीत्यादिवदिहाप्यायुरादिशब्दानां प्रधानफललक्षणार्थत्वेन प्रोत्साहनार्थत्वोपपत्तेस्तद्वदेव च लक्ष्यमाणार्थैक्ये ऽप्यभिधेयार्थभेदाद्भिन्नवाक्यत्वोपपत्तेः मन्त्राधिकरणनिरस्तोच्चारणमात्रप्रयोजनत्वपक्षानुपपत्तिसूचनार्थो ऽथ वा शब्दः। ननूच्चारणार्थत्वाद्वचेरर्थकर्मता न युक्तेत्याशङ्क्ते * कथं पुनरिति * शब्दः पठ्यते गम्यते ऽभिव्यज्यते ऽनेनेति व्युत्पत्त्योच्चारणं शब्दपदशब्देनोक्तम्। उ-

ऽच्चारणावाचितया लोके वचिः प्रयुज्यतइत्यर्थः। अभिधानवाचितया ऽपि लोके वचिः प्रयुज्यत इति परिहरति * नैष इति * शब्दमुच्चारयन्तं प्रयुञ्जाने वाचयतेः प्रयोगात्तदन्तर्गतस्य वचेर्यथोच्चारणार्थता ऽवगम्यते तथार्थमभिदधानं प्रयुञ्जाने ऽपि प्रयोगादभिधानार्थतापि गम्यतइत्याशयः। तेनैष शास्त्रार्थो भवतीत्याह *तस्मादिति* क्रियाभिधानप्रतिपादनस्य प्रकृतोपयोगाभिधानार्थमायुरित्यादिभाष्यं व्याचष्टे * तत्प्रकाशनेन चेति * इष्टार्थशब्देन प्रोत्साहनार्थत्वाविशेषान्मन्त्रभेदे ऽपि सर्वप्रयोगः सूचितः। प्रयोजनं तु मन्त्रैक्ये सत्येकदेशभ्रंशे ऽपि सर्वावृत्तिः भेदे तु यस्मिन्मन्त्रे भ्रंशस्तस्यैवावृत्तिरित्याशयः। तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति *

॥ अनुषङ्गाधिकरणम् ॥ १६ ॥

अनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ४८ ॥

भिन्नाहः प्रयोज्यत्वेनानुष्ठानकाले ऽत्यन्तावुद्धिस्थस्याविशेषस्य समाम्नानकाले बुद्धिस्थत्वादनुषङ्गो भवतीत्यतिशयद्योतनायैतदुदाहरणमिति सूचयितुं मन्त्रप्रयोगस्य विषयं विविनक्ति * ज्योतिष्टोम इति* पूर्वाह्णापराह्णयोरभ्यस्यमानमाग्नेयसौम्यवैष्णवयागत्रयमेकोपसत् तथाविधानां तिसृणामुपसदां ज्योतिष्टोमे विहितानामवयवभूता प्रत्येकमादावाग्नेय्युपसदग्निमनीकमिति वाक्येन विहिता ततश्चाग्नेय्यस्तिस्रो भवन्तीत्यपिशब्देन सूचितम्। एवं च सति मन्त्रत्रयस्य यथासंख्यलक्षणेन क्रमेण भिन्नाहप्रयोज्याग्नेय्यङ्गत्वात् भिन्नाहप्रयोज्यतेत्याशयः। अहस्त्रयावच्छेदेनोपसदां त्रित्वात्प्रथमोपसदवयवभूताग्नेयी प्रथमा उत्तरोपसदवयवभूते उत्तरे अत्रेति सन्देहभाष्यं सामान्यतः शेषसद्भावासिद्धौ लौकिको वैदिको वेति विशेषचिन्तानुपपत्तेरयुक्तमाशङ्क्योपपादयितुमाह * तत्रेति * नन्वध्ययनविधिनाध्ययनेनैव वेदोपादाननियमादनधीतस्य शेषस्याभावावगमेनाधीत-
४३५।२ मात्रस्य पूर्णतावसायात्कथं कल्पनेति पृष्ठोत्तरमाह * कुत इति * साकाङ्क्षवाक्यानर्थक्यापत्तेरवश्यकल्पनीयत्वाच्छेषस्याधीतमात्रविषयो ऽध्ययनोपादाननियमो ऽवसीयतइत्याशयः। श्लोकं व्याचष्टे * न हीति * सन्देहभाष्योपपादनोपसंहारपूर्वं किं प्राप्तमिति पूर्वपक्षप्रतिज्ञाभाष्यं व्याचष्टे * तत्रेति * न हीत्युपपत्तिभाष्यं तात्पर्यतो व्याचष्टे * तथा हीति * श्लोकं व्याचष्टे * यथैवेति *

नन्वग्निसम्बन्धिन्यास्तन्वाः पत्न्या वा रजाणयत्वादिति विशेषणमिति विशेषनिर्द्धारणाद्वैदिकवाक्यशेषस्यानभ्युपगमे कीदृशो वाक्यशेषः प्रयोज्य इत्यनध्यवसायः स्यादित्याशङ्क्याह * तत्रेति * व्यक्षितत्वेन बुद्धिविलम्बाभावाद्वैदिकस्याव्यवस्थितालौकिकाल्लघुतरप्रयोगत्वेन प्रयोज्यत्वावधारणे ऽपि वैदिकत्वबुद्धिनिरासः पूर्वपक्षिणो ऽभिमत इत्यर्थः । कथं वैदिके तद्बुद्धिनिरास इत्याशङ्क्याह *तथा हीति*न हीति भाष्यस्य तात्पर्यान्तरमाह * यदीति * स च ४३६।१
प्रथमान्तानां विशेषणविशेष्याणां चतुर्थ्यन्तान्वयार्हत्वात्प्रथमान्तान्वयानर्हेण स्वाहाशब्देन व्यवायादनन्वयापत्तेरयुक्त इत्याशयः। एतदेवोपसंहरति * तस्मादिति * सिद्धान्तमारभमाणः सामान्यन्यायं तावदाह * इतीति * श्लोकं व्याचष्टे* वैदिकस्येति * मन्त्रस्याविधित्वे ऽपि वेदाभिप्रायश्चोदनाशब्दः । नन्वेवमपि याते अग्ने यज्ञियेत्यादिशेषस्य तनूस्तयेहीत्यादेरपि वैदिकस्य सम्भवात्कथं तनूर्वर्षिष्ठेति शेषनियम इत्याशङ्क्याह * या चेति * सन्निकर्षक्रमं दर्शयति * तत्रेति * एतदेव व्याचष्टे * एकस्मिन्निति * लिङादिप्रत्ययोक्तस्य विधेर्विषयाकाङ्क्षायां तत्रैव भावनाख्यविषयदर्शनाद्रमणीयमित्यदृष्टशब्दव्यतिरेकमाख्याय प्रकृतौ प्रत्यये वेत्यनेन प्रकृतावदृष्टो भावनादिरर्थः प्रत्यये ऽन्विष्यते प्रत्यये चादृष्टः करणांशः प्रकृतावन्विष्यतइत्यावृत्त्या व्याख्यातं प्रकृतिप्रत्ययात्मके स्वस्मिन्पदे क्रीणातीत्यस्मिन्नदृष्टं कर्मकरणं वा पदान्तरे ऽन्वेष्यं स्ववाक्ये सा वैश्वदेवीत्यत्रादृष्टस्ते पयसीत्यनन्तरवाक्यान्तरे अनन्तरे त्वदृष्टस्तेनैवैकान्तरादिक्रमेण प्रकृते वाक्यान्तरे सौर्यादौ स्वप्रकरणे ऽनुपलब्धः करणोपकारश्चोदनादिसामान्यद्वारोपस्थाप्यमानाग्नेयादिगतोपकारानुसारेण प्रकरणान्तरे ऽन्विष्यतइत्यर्थः।सर्वात्मना ऽन्वेषणं व्याख्याय त्यक्तव्यापारे वेदे लौकिकाऽप्यनुज्ञां व्याचष्टे * यदा त्विति * संयज्ञपतिराशिषेत्यादौ गच्छतामित्यादिपदाध्याहारोऽत्रोदाहरणम् । ननु साकाङ्क्षस्याकाङ्क्षणीयालाभे व्यवहारानुपपत्तौ दर्विहोमानां वैदिकानां लौकिककरणोपकारालाभात्कार्यासाधनत्वे स्यादित्याशङ्क्याह * लोके ऽपि चेति *सर्वात्मनान्विष्यमाणाकाङ्क्षणीयालाभे यावल्लुब्धेन नैराकाङ्क्ष्यं कल्प्यतइत्यर्थः । ननु लौकिकस्यापि शेषस्य वेदेनाऽभ्यनुज्ञाने लौकिकवैदिकयोः को विशेष इत्याशङ्क्याह * सर्वत्र चेति * सामान्यन्यायमुक्त्वा प्रकृते स्वपदस्ववाक्ययोः शेषालाभे ऽप्यनन्तरैकान्तरवाक्ये लाभात् स एव ग्राह्य इति सिद्धान्तमाह ४३७।१
* तादिहेति * कस्मिन्वाक्यान्तरात्स्वपेक्षायामाह * स चेति *

यादृग्विशेष्यसमर्पकः शेषो ऽपेक्षितस्तादृग्प्रजाशयेत्यस्यानन्तरो हराशयेत्यस्य व्यवहितो ऽध्यस्तादुपलभ्यतइत्यर्थः । उभयाकाङ्क्षाभावे ऽपि शेष्याकाङ्क्षयान्वयो युक्त इति प्रतीतिसौकार्यार्थं शेषिणोश्चैतन्यारोपेणाह * यद्यपि चेति * आवयोरप्यर्थेनायमाम्नातो न त्वेकस्यैवार्थेनेति भ्रमितव्यमित्येवं विधं प्रयोजकव्यापारं वाक्यशेषप्रतिपत्तारं पुरुषं प्रति कुरुतइत्यर्थः । सर्वेत्यनेनैकसामीप्यस्यासाधारण्यापादकत्वं निरस्तं सर्वानन्तराम्नानरूपसर्वार्थत्वप्रमाणात्प्रमाणान्तरेणाकाङ्क्षायोग्यतासन्निधित्वाविशेषरूपेण सर्वार्थत्वलाभोपपत्तेरसकृत्पाठवैयर्थ्यात्सकृत्पाठकारणं प्रमाणान्तरेत्यनेनोक्तम्।नन्वाम्नातस्य सर्वार्थत्वे सत्युत्तरयोः प्रागाम्नानात्प्रागेव प्रयोगः स्यादित्याशङ्क्याह * यद्यपि चेति * प्रथमान्तविशेषणाविशेष्यान्वयानर्हेण स्वाहाशब्देन व्यवायपरिहारार्थं पश्चात्प्रदेशवर्त्तित्वेनाकाङ्क्षितत्वात्तत्रैव निवेश इत्यर्थः।ननु पश्चान्निवेशे पुनात्वच्छिद्रेणेत्यादिवत्सर्वेभ्यः पश्चात्पाठापत्तेः तदभावे नेहपश्चात्तन्निवेशो न युक्त इत्याशयेन पृष्ट्वोत्तरमाह. * कुत इति * श्लोकं व्याचष्टे * स हीति * तृतीयानन्तरपाठे ऽपि पूर्वयोर्व्यवधानापत्तेः सर्वेषामीप्सिते प्रदेशे शेषाम्नानं न शक्यमित्याशयः । यद्वा पाठक्रमात्प्राङ् निवेशः प्रतीतः कस्मान्नाद्रियतइत्याशयेन पृष्टे प्रतीतिमात्रार्थत्वेनापि पाठोपपत्तेर्नान्वयविरोधिनः प्राङ्निवेशस्यादरो युक्त इत्युक्त्वा पूर्वमन्त्रवदुत्तरयोरपि पश्चाच्छेषनिवेशज्ञापनार्थत्वात् प्रदेशपाठो ऽपि नात्यन्तमनर्थक इत्युत्तरार्द्धेनोक्तोनन्वेवं सति सर्वेभ्यः पश्चात्कस्मान्नाम्नात इत्याशङ्क्यानिरासार्थं स हीत्युक्तमिति व्याख्येयम। नन्वाकाङ्क्षासान्निध्ययोग्यत्वाविशेषवदानन्तर्याविशेषो ऽपि सर्वार्थत्वहेतुर्भाष्यकृतोक्तः स कस्मादुपेक्षित इत्याशङ्क्योपेक्षाकारणं दर्शयिष्यन् भाष्यं तावदनुसन्धत्ते *भाष्येति* यथैव हीति भाष्येण प्रथमद्वितीययोर्मध्ये पाठादानन्तर्येणोभयान्वयमुक्त्वा हराशयेत्यनेन तृतीयस्य व्यवधानमाशङ्क्य तन्नेत्यनेन शेषाकाङ्क्षत्वाविशेषेणोभयोरेकशेषग्रहणलक्षणैकधर्मयोगात्समुदायापादनेनाव्यवधाने साधिते समुदायान्वयापत्तिमाशङ्क्य समुदायेन चेत्यनेन समुदायस्यैकार्थ्याभावेनाप्रयोज्यत्वाच्छेषान्वययोग्यत्वेन वाक्यशेषस्य तेनान्वयाभावात्समुदाय्यन्वये ऽभिहिते नन्वेवं सत्यानन्तर्यादेकेनैव समुदायिनान्वयः स्यादित्याशङ्क्य च समुदायीत्यनेन समुदायद्वारा समुदाय्यन्वयाद् विशेषाग्रहणेनोभयान्वयमुक्त्वा नन्वेवमपि विभागेनानेकसमुदाय्यन्वयोपपत्तेर्नावृत्त्यापादकः कृत्स्नस्य शेषस्यानेकान्वयो युक्त इत्याशङ्क्य समुदायिनोः प्राधान्यात्तदनुरो-

धेन शेषावृत्तेर्युक्तत्वात् कृत्स्नः शेषान्वयं च विना समुदायिनोर्नै-
राकाङ्क्ष्यानुपपत्तेः प्रत्येकमेकैकेन समुदायिना कृत्स्नस्य शेषस्या-
न्वय इति तस्मादित्यनेनावधार्यापि चेत्यादिना पुनः सर्वेषु तुल्ययो-
गित्वादिति सूत्रावयवस्य सर्वेषु शेषिषु तुल्यशेषानन्तर्ययोगित्वा-
दिति पूर्वव्याख्यानात्तुल्याकाङ्क्षासन्निधियोग्यतायोगित्वादित्येवं
व्याख्यान्तरं कृतमित्यर्थः। तत्रानयोस्तुल्यत्वं परमतेनाह * तत्रेति* ४३८।१
स्वमतमाह * परे त्विति * अपरितोषहेतुं प्रश्नपूर्वकमाह * कि-
मिति * श्लोकं व्याचष्टे * समुदायत्वमित्यादिना * पद्यतइत्यन्तेन
पदे वर्णानां वाक्ये च पदानामेकार्थप्रतिपादनकार्यकारित्वादाग्ने-
यादिषट्कस्य च फलसाधनत्वाद्त्रिकस्यैककार्यकारित्वाभावे ऽपि य-
एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजतइत्येक-
शब्दोपादानात्समुदायत्वं कार्यैक्यमाशङ्क्ते * नन्विति * क्रत्वङ्गप्र-
काशनमेव मन्त्राणां कार्यं नैकशेषग्रहणमित्याशयेनोपहसति *अत्य-
होन्विति* कस्माच्छेषग्रहणमपि कार्यं न स्यादित्याशङ्क्याह *अपेक्षा-
हीति * कार्यासिद्धये तु ग्राहकत्वेन शेषग्रहणे समुदायिनोरपेक्षा-
तो ऽवान्तरव्यापारत्वेनापेक्ष्यमाणत्वात् कथं शेषग्रहणं समुदायत्वा-
पादनसमर्थं प्रधानकार्यमित्युच्यत इत्यर्थः। समुदायिनौ च प्रत्यस्या-
ङ्गत्वेनावृत्त्या तदन्वयोपपत्तेर्न शेषवशेन समुदायिनोः समुदायत्वा-
पत्तिरित्याह * शेष इति * पश्चाच्च प्रत्येकं शेषान्वयनिर्माणे प्राक्
समुदायत्वहेतुर्न प्रतीयतइत्येवमुत्तरार्धं व्याचष्टे * पश्चादपि चेति*
समुदायत्वोपपत्तौ च पश्चात्प्रत्येकनिर्माणहेतुर्नास्तीत्यन्यथा व्या-
चष्टे * यदि चेति * एकपुत्रस्यात्यन्तप्रियत्वेन पितृभ्यामनिवार-
णाद्राजकीयत्वेन चान्यैरनिवारणादत्यन्तान्याय्या यथा क्रीडा तथेय-
मित्यर्थः। न चास्मिन्पक्षे प्राक्शब्दप्रयोगो वारयितुं शक्यतइत्या-
ह * पुरस्तादेव चेति * न चैकस्य पश्चादितरयोश्च प्राक्शेषा-
म्नानानन्तर्याच्छेषस्यागृह्यमाणे विशेषत्वं भवति देशभेदेन गृह्यमा-
णविशेषत्वात्ततश्च न गम्यते विशेष इत्येतद्भाष्यमयुक्तमित्याशये-
नाह * न चेति * तन्त्रं भिद्यते विदार्यते नाश्यते ऽनेनेति व्युत्प-
त्त्या विशेषग्रहणं तन्त्रभेदशब्देनोक्तं देशभेदो ऽनिमित्तं यस्यासौ दे-
शभेदनिमित्तः स चासौ तन्त्रभेदश्चेति विग्रहः देशभेदमेव द-
र्शयति * प्रथमस्य हीति * तेनोत्तरे च सर्वेषु तुल्ययोगित्वादिति
सूत्रादवयवव्याख्या युक्तेत्याह * तस्मादिति * कीदृक्तदित्यपेक्षा-
यामाह * आकाङ्क्षेति * योग्यताशब्देनाकाङ्क्षापरिपूरणसामर्थ्यं
व्याख्यातम्। आनन्तर्यस्यान्वयहेतुत्वाभावादपि सर्वार्थतेत्येवमपि च

शब्दव्याख्यासूचनार्थम् * नेत्युक्तम् * आनन्तर्यस्यान्वयहेतुत्वमुपपादयति * यो हीति * नन्वनन्तरमात्रान्वयप्रतीतेराकाङ्क्षादित्रयासिद्धेस्तत्रानन्तर्यस्य हेतुताश्रयणीयेत्याशङ्क्याह * सन्निधीति * आनन्तर्ये सन्निधिविशेषः तस्मादानन्तर्याश्रयस्यानन्तरस्य शीघ्रं बुद्धिस्थत्वात्तेनैवान्वयो नान्येनेति या प्रतीतिर्भवति तस्या भ्रान्तित्वान्न सम्यगन्वयहेतुतानन्तर्यस्यास्तीत्याशयः । कथमनन्तर-
४३९।। मात्रान्वयप्रतीतेर्भ्रान्ततावसीयत इत्याशङ्क्याह * सा त्विति * देवदत्त गामानयेत्यादौ व्यवहितस्यापि देवदत्तादेरानयनाद्यन्वयदर्शनाद् भ्रान्तितावसीयत इत्याशयः । अत्रैव दृष्टान्तमाह *यथेति* एकानन्तरपाठस्तद्ध्वनर्थकः स्यादित्याशङ्क्याह * एवं हीति * सर्वार्थस्याप्यवर्जनीयमेकानन्तर्यमित्यर्थः । उपसंहरति *तस्मादिति * नन्वत्यन्तसन्निकर्षस्य सन्निधित्वे नामान्तरेणानन्तर्यमेव कथं चित्सन्निकर्षस्य त्वसंबद्धपदव्यवाये ऽपि भावादतिप्रसक्तिरित्याशयेन किं यांस्त्विति पृष्ट्वा यावतीति भाष्येणोत्तरं दत्तं तद्व्याचष्टे * सन्निधिरिति * विशेषणविशेष्येषु बुद्ध्यनुवृत्तिं विना सर्वविशेषणविशिष्टैकबुद्ध्युत्पत्त्यसम्भवाद्विशिष्टबुद्ध्युत्पत्तिं यावद्विशेषणविशेष्यबुद्धीनामनुवृत्तिरिष्यते विशेषणविशेष्यान्वयस्यापेक्षाधीनत्वादपेक्षाकाले न बुद्ध्यनुवृत्तिकालोपलक्षणमेतदित्याशयः । कश्चेत्यनेनापेक्षाकालस्योपलक्षणं पृष्ट्वानन्तर्यमित्युत्तरं दत्तं तद्व्याचष्टे * सा चेति * नन्वव्यवधेः सन्निधिशब्दव्याप्यत्वाद्व्यवसायस्य सन्निधित्वं विरुद्धमित्याशङ्क्य सम्बन्धपदव्यवाये सम्बन्धादेव हेतोर्बुद्धिविच्छेदहेत्वसम्बन्धबुद्ध्युत्पत्त्यभावेनं पूर्वबुद्धेः क्षणिकत्वात् स्वरूपेण नाशे ऽपि संस्कारद्वारानपायात्पदव्यवाये ऽपि तज्जनितबुद्ध्यव्यवायादविरोध इत्यभिधानार्थं सम्बद्धेति भाष्यं तात्पर्यतो व्याचष्टे * सम्बन्धेति * सम्बन्धपदव्यवधेरपि बुद्ध्यानन्तर्यप्रकार एवेत्यर्थः । ननु रजाशयेत्यस्य शेषान्वये ऽपि तद्व्यवधानाद्रराशयेत्यस्य शेषान्वयानुपपत्तेः सम्बन्धो नास्तीत्याशङ्क्य यत्रापि हराशयेत्यस्मिन् रजाशयेत्यनेन शेषाकाङ्क्षेण व्यवायसूत्रे ऽपि शेषान्वयो ऽस्ति यतो द्वयोरपि शेषिणोरपेक्षितविशेष्यान्वयरूपं कार्यं वक्तव्यमित्येतदर्थं पूर्वं शेषिणं शेषो ऽपेक्षते तच्चोत्तरापेक्षायामपि तुल्यं कारणमिति यथैवोभयाकाङ्क्षया पूर्वस्य शेषिणः शेषान्वयस्तथैवोत्तरस्यापि शेष्यन्तरमनपेक्ष्यमाणे तु शेषे ऽन्यतरः शेषी शेषालाभेन शेषाकाङ्क्षत्वात्प्रमादाधीतः स्यात् शक्यते पूर्ववदुत्तरो ऽपि शेषी शेषेणापेक्षितुं तस्माद्यथैवायं शेषो रजाशयेत्यस्य पश्चादपतितो ऽपि यो-

ण्यत्वाद्यथाकाङ्क्षिते देशे सन्निधौ भवत्येवं द्वयोरप्येत्यस्यापी त्यभिधानार्थं यत्रापीत्यादिभाष्यमानन्तर्योपपादनार्थत्वेन प्रथमपूर्वं तात्पर्यतो व्याचष्टे * कथमिति * आद्येन यथाकाङ्क्षिते देशे सम्बन्धं प्राप्य द्वितीयस्यापि यथाकाङ्क्षिते देशे ऽनन्तरो भवति ततो द्वितीयस्योपरि देशे निविष्टस्तृतीयस्यापि यथाकाङ्क्षितदेशएवानन्तर्यं प्राप्नोतीत्यर्थः । श्लोकं व्याचष्टे * यात इति * द्वयोरप्यसम्बद्धपदाव्यवायात् द्वयोरपि चाकाङ्क्षावत्त्वाच्छेषान्वयस्तुल्य इत्येवमर्थं द्वयोरपीति भाष्यं गतार्थमाभासमानम् । ननु व्यवहितस्याप्यनुषङ्गाभ्युपगमे सर्वत्र तत्सम्भवान्नाध्याहारः क्व चित् स्यादित्याशङ्कानिरासार्थत्वेनासम्बद्धपदाव्यवाय एवाकाङ्क्षावत्त्वएव चानुषङ्गो भवति नान्यथेति परिसंख्यार्थमिति सूचयितुमाह *ततः परं त्विति* अरुणादिवाक्येष्वप्ययं न्यायस्तुल्य इत्येतत्सूचनार्थं चेदं भाष्यमिति सूचयितुं सर्वत्रेमं न्यायमतिदिशति * सर्वत्रैवेति * नत्वानन्तर्यविशेषेणैकान्वयप्रतीत्या नैराकाङ्क्ष्यान्नान्वय इत्याशङ्कानिरासार्थमेतावच्चेति भाष्यमुपपादयितुमाह * यद्यपि चेति * युगपदाम्नानाशक्तिमात्रनिबन्धनत्वेनावास्तवत्वादानन्तर्यमकारणमित्याशयः । सन्निकृष्टविप्रकृष्टान्वययोः प्रामाण्याविशेषोपपादनार्थं सर्वलोकवेदसाधारणत्वमस्य न्यायस्याह * एवमिति * यद्वा किमित्यानन्तर्यमकारणमित्याशङ्क्य यस्मादसम्बद्धपदाव्यवधाने सत्यानन्तर्याभावेऽपि सर्वत्र लोके वेदे च वाक्ये पदानां प्रकरणे च वाक्यानां सम्बन्धो भवतीत्येवमर्थत्वेनाव्यवधान इति भाष्यं * व्याख्यातुमेतदुक्तम् * एतदेव भाष्यं तात्पर्यतो व्याचष्टे * अव्यवधान इति * तस्मादित्युपसंहारभाष्यं व्याचक्षाणो ऽनुषङ्गसमाप्तिशब्दौ व्याचष्टे * तस्मादिति * अथेति भाष्येणविषयान्तरव्याप्तचर्थमावृत्त्यैतत्सूत्रं व्याख्यातं तदुभयत्राप्यसम्बद्धपदव्यवायाभावे सत्येवान्यतराकाङ्क्षयैव चानुषङ्गाद्वैलक्षण्ययाभावेनायुक्तमाशङ्क्य वैलक्षण्यं दर्शयन् ४४०।१
व्याचष्टे *यत्र तावदिति* शेषस्यावृत्त्यानेकशेष्यन्वयाद् गौणवृत्त्यैकमावृत्त्यानेकान्वयिशेषत्वेनानेकं च व्यावर्त्यमानैकान्वयिशेषत्वेनोक्तम् । अनेकेषु साकाङ्क्षेष्वेकस्मिंश्छेषान्वयेन निराकाङ्क्षीकृते ऽपीतरनैराकाङ्क्ष्यायानुषङ्गो युक्तः । शेषस्य त्वेकस्यैकशेष्यन्वयेन नैराकाङ्क्ष्ये शेष्यन्तरान्वययायानुषङ्गो ऽनर्थक इत्यधिकाशङ्केत्याशयः । अत्र हीत्यादिनास्ति सर्वत्रानुषङ्गम् इत्यन्तं पूर्वपक्षभाष्यं तात्पर्यतो व्याचष्टे * किमिति * आह नैतदेवं पुनातु शब्देनेतिसिद्धान्तभाष्यं व्याचष्टे * उच्यतइति * कर्तृकर्मक्रियापदसमूहात्मकवाक्यार्थत्वे सति

शेषिवाक्यानेकत्वादेकशेष्यन्वयेन निराकाङ्क्ष शेष्यन्तरान्वयो न स्यात् कारकाणां त्वन्योन्यान्वयायोगात्करणव.. ..: शेषस्य क्रियापदमात्रान्वयप्रतीतेराख्यातवाच्यार्थद्वारा सर्वमन्त्रान्वय इत्यर्थः कारकपदस्यानन्तर्याभावे ऽप्यरुणादिवक्रियापदेनैवान्वयादानन्तर्याभिधानानर्थक्यमाशङ्क्याातिशयार्थत्वेन व्याचष्टे * आनन्तर्येति * एकश्चेति भाष्यं व्याचष्टे * स चेति * ननु शब्दैक्ये ऽप्यायुरादिभेदेनेव कल्पेश्चित्पत्यादिकारकभेदेन पवनक्रियारूपार्थभेदादेकेनैवान्वयः शेषस्य स्यादित्याशङ्क्याह * न चेति * आयुरादेः कर्मासमवाये ऽपि प्रोत्साहनायाशास्यत्वात्तद्भेदेन क्रियाभेदो युक्तः एषां तु करणमन्त्रत्वेन प्रोत्साहनार्थत्वाभावादसमवेतार्थत्वाभावात् भगादिवत्स्तुतिमात्रार्थमुपात्तस्य चित्पत्यादेर्भेदे ऽपि क्रियाभेदो नास्तीत्याशयः । नन्वेवमपि सकृदन्वयेन कृतार्थस्य शेषस्य क्रियापदावृत्तावप्यावृत्तिरयुक्तेत्याशङ्क्याह * न चेति * तेनावगच्छाम इति भाष्यं व्याचष्टे * तस्मादिति * ननु क्रियैक्यभ्यासभेदात् श्रपणवच्चित्पत्यादिवच्चाच्छिद्रादेरपि व्यवस्था भविष्यतीत्याशङ्क्ते *अथेति * वैषम्यमाह * उच्यत इति * श्लोकं व्याचष्टे * ऐन्द्रवायवादीति * प्रत्युताव्यवस्थायामेव कारणमस्तीति करणस्येत्यनेनोक्तं यथा चेत्युत्तरार्द्धव्याख्याकर्तृभेदमात्रेण तु करणभेदो ऽनाशङ्क्य
४४१।५ एवेत्याह * न चेति * अतिप्रसक्तिमाशङ्क्ते * नन्विति * परिहरति * नैष इति * यथा बर्हिधर्माणां प्रकरणादर्शपूर्णमासबर्हिरर्थत्वावगतेर्न पिण्डपितृयज्ञबर्हिषि प्रसक्तिस्तथास्यापि शेषस्य प्रकरणपठितपुनातुशब्दैकवाक्यतया तादर्थ्यावगतेर्न मन्त्रान्तरगतपुनातुशब्दान्वयप्रसक्तिरित्यर्थः । एतदेव विवृणोति * इहेति * दोषान्तरापत्तिमाशङ्क्ते * नन्विति * विभागमन्त्रवद्युक्त एवात्रापि विकल्प इति परिहरति * कुतो वेति * असम्बद्धपदव्यवायादपि न मन्त्रान्तरेषु प्रसक्तिरित्याह * सर्वेषु चेति * तथा च सतीति भाष्यं व्याचष्टे * तस्मादिति * श्लोकं व्याचष्टे * सर्वेति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति * उदाहृतेषु समुच्चयाभावान्मन्त्रवृत्त्यसम्भवे ऽपीषएकपदीत्यादिषु भवेत्यादिशेषानुषङ्गस्याप्येतन्न्यायविषयत्वात्तत्र च केषां चित्सकृत्प्रयोगदर्शनादनुष्ठानविरोधमाशङ्क्य *आहैवं चेति* नन्वनु पश्चात्सज्यतइति व्युत्पत्त्या हृदयस्याग्रे ऽवद्यतीत्यादौ च पुरस्तादाम्नातस्यैवानुषङ्गस्य पश्चादाम्नातेनैव प्रायशो ऽन्वयदर्शनात्पश्चादाम्नातस्याछिद्रेणेत्यादेः नानुषङ्गो युक्त इत्याशङ्क्याह * पुरस्तादिति * न्यायतुल्यत्वाद्विशेषमात्रं

तदित्यर्थः।


॥ व्यवेतानुषङ्गाधिकरणम् ॥ १७ ॥

व्यवायान्नानुषज्यते ॥ ४९ ॥ ४४२।१

नन्वसम्बद्धपदव्यवायाभाव एव सर्वेषु तुल्ययोगित्वादित्यनेनानुषङ्गस्योक्तत्वाद्व्यवाये ऽनुषङ्गाप्रसक्तेर्व्यर्थमिदं सूत्रमित्याशङ्क्याह * प्रत्युदाहरणत्वेनेति * वायुरित्यादिभाष्यं व्याचष्टे * सन्त इति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * ततश्चेति * नन्वध्याहार्यपदस्य यथैव पाठः प्रतिपत्त्युपाय इत्यनेन न्यायेन सामर्थ्यलभ्यतयानुद्धार्यमाणत्वाल्लौकिकशेषकर्त्तव्यत्वाभिधानमयुक्तमित्याशङ्क्याह * तत्रेति * कल्प्यपदसहितानां श्रुतानां पदानां वाक्यार्थप्रतिपादकत्वात्तेन विना न्यूनत्वापत्तेरुद्धार्यमाणपदैकवाक्यतयावश्यं सामर्थ्यकल्प्यं पदमित्यर्थः। यद्यपीत्यनेन कल्प्यस्यापि पदस्याभिधानकरणत्वात् कर्तृव्यापारव्याप्यत्वं च विना करणत्वायोगात्तदुच्चारणातिरिक्तासाधारणशब्दविषयकर्तृव्यापाराभावाद्धोद्धार्यत्वमसूचितम्। अनुषङ्गप्रत्युदाहरणत्वायाध्याहारोपसंहारस्यानुषङ्गासंभवोपसंहारपरत्वं वक्तुमाह * तस्मादिति * उभयत्रोद्धार्यत्वे ऽपि किं चिन्तायाः प्रयोजनमित्याशङ्क्याह * प्रयोजनमिति * अत्रैव वृद्धसम्मतिमाह * आह चेति *

इति श्रीमन्त्रिकाण्डमीमांसामण्डनप्रातिवसन्तसोमयाजिभट्टमाधवात्मजसोमेश्वरकृतायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां द्वितीयस्याध्यायस्य प्रथमः पादः।





॥ न्यायसुधायाम् ॥

द्वितीयाध्यायस्य द्वितीयः पादः

॥ अङ्गापूर्वभेदाधिकरणम् ॥ १ ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

लक्षणार्थविचारस्यावसरमाह * उपोद्घातेति * उपोद्घातया यार्थाधिकरणोक्तकर्मभेदानुनिष्पाद्यपूर्वभेदापवादार्थाख्यातद्वैविध्यप्रसक्तमन्त्रगताख्याताविधायकत्वलक्षणतृतीयप्रकारानुप्रसक्तमन्त्रलक्षणे प्रसक्तानुप्रसक्तं चेत्यध्यायोपक्रमभाष्यगतचशब्दप्रतिज्ञाते ऋक्सामलक्षणादौ समाप्तइत्यर्थः । शब्दान्तरस्यापर्यायभूतधातुभेदरूपत्वेन धात्वर्थभेदद्वारा भावनाभेदकत्वस्य स्पष्टत्वं प्राक्च्युत्पाद्यत्वे कारणमाह * तत्रेति * भावार्थाधिकरणोक्तस्य धात्वर्थभेदानुनिष्पादिना ऽपूर्वभेदस्य धात्वर्थभेदे ऽप्यपूर्वभेदहेतुभावनाभेदाभावेनाक्षिप्य समाधानार्थतयास्यैवादौ सङ्गतत्वादिति हेत्वन्तरसूचनार्थस्तावच्छब्दः स्पष्टत्वस्य वा कथं प्राग्वाच्यत्वहेतुतेत्याशङ्क्य स्थूलसूक्ष्मयोः क्रमे बुद्ध्युत्पत्तेरिति सूचनार्थः । अस्तीतिभाष्येण ज्योतिष्टोमगतधातुभेदोदाहरणस्यैकप्रयोगवाक्यगताख्यातप्रत्ययसम्बद्धानां प्रात्यात्मिकानेकाख्यातप्रत्ययसम्बद्धानां सर्वधातूनाम्मुदाहरणत्वज्ञापनं प्रयोजनमाह * एकेति * धातुत्रयोदाहरणं तर्हि ४४३।१
किमर्थमित्याशङ्क्याह * भाष्येति * स्वत्वत्यागांशसाम्येन धातुत्रयार्थानामन्त्यन्तभेदाप्रतीतेर्धातुत्रयस्य पर्यायत्वभ्रमाच्छब्दान्तरत्वाभिमतापर्यायभूतभेदाभावाशङ्कानिरासार्थं त्रयोदाहरणमित्याशयः । यजतीति सन्देहभाष्यं त्रिविधसन्देहपरतया परमतेन व्याचष्टे * तत्रेति * ननु धातुनिर्देशार्थानां यजत्यादिशब्दानां लक्षणया धात्वर्थपरत्वे लक्षितलक्षणया भावनापरत्वे सम्भवत्यपि भावनाधात्वर्थयोर्धात्वर्थधातुजन्यत्वाभावात्कार्यशब्दो न युज्येतेत्याशङ्क्याह * कार्येति * विशेष्यप्रतिपाद्ययोरप्युपकार्यशब्दैकदेशकार्यशब्देन भामाशब्देनेव सत्यभामायाः शङ्क्यमभिधानमित्याशयः । कुर्वन्तीत्यप्युप-

कुर्वन्तीत्येवं व्याख्येयमित्याह * भावनेति * संहृत्यापीत्यादिभाष्यं सन्देहहेत्वभिधानार्थत्वेनावतारयति *कुत इति* व्याचष्टे*साधनत्वमिति * स्वमतेन संहृत्यैकभावनाविशेषणत्वात्संहृत्यैकमपूर्वं भावनाशब्दाश्चोदयन्त्युत वियुत्यानेकभावनाविशेषणत्वाद्भिन्नान्यपूर्वाणीति भावनाभेदाभेदफलभूतापूर्वभेदाभेदचिन्ताद्वारा भावनाभेदाभेदावेव चिन्त्येते इत्येवं सन्देहभाष्यं व्याचष्टे* अथ वेति * प्राकरणिकसर्वधात्वर्थानुरक्तेति वाच्ये ऽप्युदाहृतापेक्षया त्रयोक्तिः । ननु क्रियतइति व्युत्पत्त्यापूर्वस्य क्रियते ऽनेनेति व्युत्पत्त्या धात्वर्थस्य कर्मशब्दवाच्यत्वाद्भावनाभेदे विचार्ये सौत्रः कर्मशब्दो न युज्येतेत्याशङ्क्याह * भावनैव चेति * कर्मशब्दवाच्यधात्वर्थानुरागाद्भावनापि कर्मशब्देन वक्तुं शक्येत्याशयः । नन्वेवं क्लिष्टव्याख्याने को हेतुरित्याशङ्क्याह * तस्या एवेति * संख्यादिष्वपूर्वभेदचिन्तायां भाष्ये ऽप्यभावेनानाशङ्क्यत्वादादिशब्दो ऽभ्यासविषयः । अभ्यासस्य धात्वर्थभेदकत्वे वक्ष्यमाणे ऽप्यपूर्वापेक्षयैवकारः । कस्माच्छब्दान्तरादेर्नापूर्वभेदकतेत्याशङ्क्याह * अपूर्वस्येति * शब्दाद्धान्तरेणानुरञ्जकप्रकृत्यर्थहेतुकप्रत्ययार्थभेदावगमात्पुनर्विधानाख्ये चाभ्यासेनाभिधानपूर्वकत्वाद्विधानस्याभिधेयस्यैव भेदागममात्रान्नानाभिधेयभेदकता युक्तेत्याशयः । अननुष्ठेयत्वादपि नापूर्वस्य भेदाभेदौ चिन्त्याविति आह * कर्मेति * नन्वपूर्वस्याविचार्यत्वे ऽपि फलत्वाद्युज्येतोपन्यासो धात्वर्थैकत्वोपन्यासस्तु यद्वेति भाष्ये करिष्यमाणः कथं युज्यतेत्याशङ्क्याह * प्रासङ्गिकत्वेति * धात्वर्थभेदे ऽपि भावनाभेदो नास्तीत्युक्ते भावनैक्यप्रसङ्गाद्धात्वर्थैक्यं पूर्वपक्षातिशयायोक्तमित्यर्थः । प्रधानतैवास्य कस्मान्न स्यादित्याशङ्क्याह * कथमिति * सर्वधात्वर्थाव्यापकत्वान्नास्य प्रधानता युक्तेत्यर्थः । नन्वेकधात्वर्थानुरक्तायां भावनायां धात्वन्तरार्थानवकाशाद् गुणन्यायेनैव भावनाभेदसिद्धेः । पूर्वपक्षासम्भवाद्भावनाभेदाभेदसन्देहो न युक्त इत्याशङ्क्याह * ततश्चेति * किं सोमेन यजेतेत्यादिवाक्यैस्तत्तद्धात्वर्थविशिष्टाभावना विधीयमाना प्रतिधात्वर्थं भिद्यते ऽथ वा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्येनानाहृतधात्वर्थविशेषां भावनां फलोद्देशेन विहितां सोमेन यजेतेत्यादिवाक्यैरनूद्य तां प्रति विधीयमाना यागदानहोमादयो धात्वर्थाः संहृत्य विशेषन्तीति सोमादिवाक्ये धात्वर्थविशिष्टभावनाविधिर्वाक्यान्तरविहितशुद्धभावनोद्देशेन वा धात्वर्थविधिरिति सन्देहो भावनाभेदाभेदसन्देहकारणमित्याशयः । ननु ज्योतिष्टोमवाक्ये ऽपि

विज्ञप्तिः ।

---

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।
२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण धर्मशास्त्र साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।
४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।
५ भारतवर्षीयै ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८
६ कालान्तरे प्रतिस्तबकं " " १ " ०
७ प्रापणव्ययः पृथग् नास्ति ।
८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषं) १
(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः । (मीमांसा) २
(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मानरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायरचितः । (न्यायः) ४
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ७
(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्त) १

पत्त्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

THE CHOWKHAMBA SANSKRIT SERIES, BENARES.

This Monthly Magazine consists of very rare and invaluable ancient Sanskrit works on Vedic Literature, Hindu Philosophy different sciences, general literature and Purâṇas &c. that have never been published before. The monthly issue of this Magazine dealing with one subject contains 100 pages of Demy octavo size, printed neatly in beautiful types on good thick paper, after being carefully corrected by the Pandits of the Government Sanskrit College Benares and other learned men.

The works included in the Magazine hitherto issued and those in course of preparation for publication are as follows:—

Names of Books,	*Fasciculus ready for Sale*
1. Sanskârararatnamâlâ, by Gopînâtha Bhatta.	(Sanskâra) 2
2. Shabdakoustubha, by Bhattoji Dikshita.	(Vyâkarana) 10
3. Sloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Pârthasârathi Misra. (Complete)	(Mîmânsâ) 10
4. The Vedânta–Tattvatraya, of Sri Lokacharyya along with Bhatta–Bhasha–Prakasha of Sri Narayana Tirtha. (Complete)	(Vedanta) 2.
5. Karana-Prakash, by Brahmadeva. (Complete)	(Jyotisha) 1.
6. Bhatta–Chintamani, of Gaga Bhatta.	(Mimansa) 2.
7. Nyaya–Ratna–Mala, of Sri Parthasarathi Misra.	(Do) 2.
8. Brahma Sutra, with Commentary called Viggyanamrita.	(Vedanta) 6.
9. Syadwâda Manjarî, by Mallishêna with a Commentary by Hêmchandra.	(Jaina Dars'ana) 2.
10. Siddhitrayam by Yamun Muni.	(Vedanta) 1.
11. Nyâya-Makarand, of Sri Anand-Bodh Bhattarkacharyya with annotations by Chit-Sukh Muni.	(Do) 1.
12. Vibhaktyartha-Nirnaya, By M. M. Sri Girdhara Upadhyaya.	(Nyaya) 4.
13. Vidhiraṣâyana, of Appaya Dikshita.	(Mimansa) 2.
14. Nyayasudha, A commentary on Tantravartika, By Pandit Someshwara Bhatta.	(Mimansa) 7.
15. Si va-stotravali, by Utpaladevacharya. With the commentary of Kshemaraja.	(Vedanta) 1.

FOR INDIA, BURMA & CEYLON.

Annual subscription	(in advance)	Rs	7	8 0
Single copy		,,	1	0 0

FOR FOREIGN COUNTRIES.

		£.	s.	d.
Annual subscription	(in advance) ...	0	15	0
Single copy		0	1	9

To be had from:— *Postage free.*

D. GUPTA, *Secretary,*

No. 55.] [Price Rupee One.

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA.

BY

PANDIT SÔMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS VIII.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES.

OTTO HARRASSOWITZ, LEIPZIG:

by Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

181.43
$ 69 N
F.8

Registered Accordin[illegible] to Act XXV. of 1867.

श्रीः

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—५५

यागानुरक्तभावनाप्रतीतेर्द्धात्वर्थान्तरानुरागायोगान्न गुणन्यायाति-
क्रम इत्याशङ्क्य फलवाक्ये धात्वर्थानुरागविवक्षायां भावनायाः फलं
प्रत्युपादानविधानगुणभावाद्धात्वर्थे च प्रति उद्देशानुवादप्रधानभा-
वाद्वैरूप्यापत्तेर्द्धात्वर्थानुरागविवक्षा पूर्वपक्षिणो ऽभिमतेति सूचना-
र्थम * पूर्वोक्तम * भाष्योक्तसन्देहकारणानिवृत्त्यर्थो ऽपिश-
ब्दः। अयं चार्थः प्रयोगवाक्यशेषभावेन हि समुदायस्य सत्ता सम्ब-
न्धो गम्यतइत्यादिभाष्यालोचनयोक्तत्वान्न स्वातन्त्र्येक्षितत्वेनोपहा-
स्यः परमतेन त्रिविधपूर्वपक्षाभिधानार्थत्वेन भाष्यं व्याख्यातु पठति
* किं तावदिति * संहत्यशब्दं तिस्रो भावनाः संहत्यैकमपूर्वं कु-
र्वन्तीत्येवं व्याख्यातुमाह * तत्रेति * अदृष्टार्थानामिति भाष्यस्या-
पूर्वैक्योक्तैव व्याख्यातत्वात्तदुपपादनार्थमदृष्ट इतिभाष्यावयवं
व्याचष्टे * इयं चेति * विरुध्यमान इति भाष्यावयवार्थमाह
* दृष्टेति * उक्तें ऽर्थे भाष्यावयवं योजयति * तादिति * विशेष- ४४४।२
श्चेदित्यवयवं व्याचष्टे * तत्रापीति * बहुभ्य इत्यवयवं तस्माच्छ-
ब्दान्तमुपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * ननु स्वर्गकामो
यजेतेति फलवाक्ये यागभावनामात्रविधानात्कथं यागहोमदानादि-
भावनासमुदायस्य फलापूर्वसाधनतेत्याशङ्क्य निरासार्थं समुदाय
इतिभाष्यमपनीतस्मात्तच्छब्दकपाठेन सूचितव्याख्यानत्वाद्व्याख्याय
तदुपपादनार्थं न चेति भाष्यमाशङ्कोत्तरत्वेन व्याचष्टे * तत्रेति *
फलवाक्यगताख्यातविहितभावनासमुदायावयवभूतैकैकधात्वर्थाव-
च्छिन्नभावनावाचिभिर्सोमादिवाक्यगतैर्यजतिजुहोतिददातीत्याख्या-
तशब्दैः कल्पनागौरवभयात्प्रतिभावनं भाष्यान्वयमसहमानैरे-
कभाव्यान्वयाय भावनासमुदायस्यार्थाक्षिप्तत्वेन शाब्दत्वात्फलवाक्ये
फलसाधनतया युक्तो विधिरित्यर्थः। अथ वेति भाष्यं पक्षान्तरप-
रिग्रहार्थत्वेन व्याचष्टे * अथ वेति * उत्तरस्तमेवानुवदतीति भा-
वनानुवादाभिधानेनैकस्यां भावनायां त्रयो यजत्यादय उपाया वि-
धीयन्तइति चोपायतया धात्वर्थविधानाभिधानेन सूचितामुपपत्ति-
माह * तस्यापीति * श्लोकं व्याचष्टे * यदि हीति * धात्वर्थानां
प्राधान्ये सति फलवत्स्वरूपेणाविधेयत्वापत्तेः फलवाक्यविहितभाव-
नाप्रत्यभिज्ञाने ऽपि सोमादिवाक्येषु तत्तद्धात्वर्थविशिष्टरूपेण विधी-
यमाना भावनैकधात्वर्थविशिष्टायां धात्वर्थान्तरनिवेशायोगाद् गुण-
न्यायेन प्रतिधात्वर्थं भिद्यते भावप्रधानमाख्यातामिति स्मृतेस्त्वाख्याते
भावनायाः प्राधान्याद्भावशब्दस्य धात्वर्थविषयत्वव्याख्याने ऽपि वा
प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति स्मृतेः

प्रत्ययार्थत्वेन भावनायाः प्राधान्यात्फलवाक्यविहितशुद्धभावनानुवादेन सोमादिवाक्यैरनाहतपौर्वापर्यैर्युगपत्सर्वधात्वर्थविधानान्न गुणन्यायो ऽस्तीत्याशयः । ननु सोमादिवाक्येषु भावनाविध्यभावे विशेषणसम्बन्धमात्रार्थे भावनाभिधानावृत्तिः स्यान्न चासौ युक्तेत्याशङ्क्याह * यद्यपीति * असत्यां गतौ गुणानुरोधेनापि प्रधानावृत्तिर्युक्तेत्याशयः । न तु केवलप्रकृतिप्रयोगासम्भवमात्रात्प्रत्ययावृत्तिसिद्धेः केवलप्रत्ययप्रयोगासम्भवः किमर्थमुक्त इत्याशङ्क्याह * यदि त्विति * कल्पनादौ विशेषणान्वयाभिधानावृत्तिर्दृष्टेत्याह * दृष्टा चेति * अनन्यगतिगुणसम्पादनार्था चानुष्ठानावृत्तिरपि
४४५।१ दृष्टा किमुताभिधानावृत्तिरित्याह * तथेति * नन्वेवं सति भिन्नवाक्योपादानाद्धात्वर्थानां प्रत्येकमेव भावनाविशेषणता युक्तेत्याशङ्क्याह * तस्मादिति * यस्मात्कल्पनालाघवाय संहत्य विशेषणत्वं प्रतीयते तस्मात्सर्वधात्वर्थविशेषैकभावनाभिधानार्थत्वेनानेकार्थत्वात्सर्वं प्रकरणमेकं वाक्यमित्यर्थः । तस्मादित्युपसंहारभाष्यं सङ्क्षिप्य व्याचष्टे * एकमिति * संहत्य विशेषणत्वकल्पनस्यादृष्टकल्पनालाघवहेतुकत्वाभिधानार्थमत इति भाष्यं व्याचष्टे * एकं चेति * तृतीयपूर्वपक्षाभिधानार्थं यद्वेति भाष्यं स्वत्वपरित्यागांशेत्यनेन व्याख्यातत्वादसार्वत्रिकत्वेन चानादृत्य तथोक्तत्वादुपेक्ष्य स्वमते पूर्वपक्षैकध्याभिधानायाद्यं पूर्वपक्षं दूषयितुमारभते * अयमेव चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * यदि हीति * अदृष्टार्थभावनाभेदान्यथानुपपत्त्या भावनाभेदवदपूर्वभेदस्याप्यवश्याभ्युपगन्तव्यत्वापत्तेः किमनेन पूर्वपक्षेण सिद्धान्तप्रतिकूलं क्षतं स्यादित्यर्थः कथमेकशब्दोपादानात्समुदायत्वापादनमित्यपेक्षिते समुदायानुवादरूपेण वा * फलादिसम्बन्धेन वेत्युक्तम् * पौर्णमासीमित्येकशब्दोपादानं तावद्यजिनानूद्यमानानां यागानां समुदायत्वापादनार्थमेव राजसूयेनेत्यस्य फलान्वयपरत्वात्समुदायापादनार्थत्वाभावे ऽप्येकशब्दोपादानेनैकफलान्वयात्समुदायत्वापत्तिरित्याशयः । ज्योतिष्टोमशब्दस्य सर्वप्राकरणिकया होमाद्यवच्छिन्नभावनासमूहवाचित्वमाशङ्कते * ननु चेति * यजिसामानाधिकरण्याद्भावनावाचितैव तावदयुक्ता धात्वर्थद्वारलक्षणया तु तद्वाचित्वाभ्युपगमे ऽपि यजिमात्रसामानाधिकरण्याद्धोमाद्यवच्छिन्नभावनासमूहवाचिता दुराशङ्केति परिहरति * नेति * उपसंहरति * तस्मादिति * का तर्हि भाष्यस्य गतिरित्याशङ्क्याह * एवं न्विति * यथेन्द्रायुधं लोहितशु-

कलकृष्णैस्त्रिभिर्धातुभिः संहत्यानुरज्यते तथा सर्वधात्वर्थैर्भावनेति प्रतिज्ञाभाष्यव्याख्या भावनैक्योपपादनार्थत्वेनाहष्टार्थानामित्यादि-भाष्यं व्याचष्टे * तत्सिद्ध्यर्थात्विति * कर्मभेदे हीत्यनेनाबहुश्य एकमपूर्वमिति अकारप्रश्लोषो भाष्ये सूचितः भावनैक्ये समुदाय-शब्दानुपपत्तिमाशङ्क्य धात्वर्थसमुदायानुरक्तस्यैकस्य भावनाख्यस्य कर्मणो ऽनुरञ्जकस्य समुदायस्यावयवभूतानां धात्वर्थानां समुदा-योऽभिप्रेत इत्येवं व्याचष्टे * तस्मादिति * भाष्यं च धात्वर्थानां समुदायाप्रतीतेः कथं संहत्यानुरञ्जकतेत्याशङ्क्यानिरासार्थत्वे यस्मा-त्कल्पनालाघवाय भावनैक्यं युक्तं तस्मात्तत्सिद्ध्यर्थं धात्वर्थसमु-दायो ऽनुरञ्जकः कर्त्तुं वेदस्येष्टो ऽवसीयत इत्येवं व्याख्येयम्। अथ वेति भाष्यं पक्षान्तराभावेनायुक्तमाशङ्क्य परमतेनोपसंहारार्थत्वेन व्याचष्टे * अत इति * स्वमतेनोपपत्त्यन्तरार्थत्वेन व्याचष्टे * शङ्क्यं त्विति * अभिन्नार्थत्वामेवोत्तरस्तमेवेति भावनैक्याभिधानेन दर्श-यतीत्याह * तदिति * परेषां व्याख्यानं दूषयितुमुपन्यस्यति * ए-वमिति * दूषयति * तत्विति * स्वमतेन भावनापरामर्शितया त-च्छब्दं व्याचष्टे *तस्मादिति* पूर्वभाष्यपर्यालोचनयाप्येष एवार्थः प्र- ४४६।६
तीयतइत्याह * तथा चेति* एतदेवोपपादयति *अतइति* तस्मा-दित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * यजत्यादित्रये धात्व-र्थैक्यादपि भावनैक्यमित्युपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्या-चष्टे * तस्मादिति * यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमि-त्युपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्याचष्टे *यद्वेति* ननु नैकां-शसाम्यमात्रेण धात्वर्थैक्यं युक्तमर्थैकांशसाम्येन सादृश्याद् गौण-वृत्त्या ददातिजुहोतिभ्यां यजत्यर्थानुवादो ऽभिहितः सो ऽपि गौण-त्वदोषापत्तेरयुक्त इत्याशङ्क्याह * अथापीति * जघन्यत्वसाम्याद् गौणतैव लक्षणा शब्देनोक्ता समुदायवाचिना वा त्यागाख्यैकदेशे वृ-त्तिर्लक्षणाभिमता गुणसम्बन्धार्थमिति भाष्यावयवं व्याचष्टे * गुणे-ति * को गुण इत्यपेक्षायामाह *एकत्रेति* प्राकाशावध्वर्यवे ददा-तीतिवत्सम्बन्धविधानादवाक्यभेदाभिप्रायः दक्षिणाकालत्वलक्षणो गुणो दाक्षिणशब्देनाभिमतः। ननु दक्षिणानयनोत्तरकालमेतद्धोमवि-धानात् क्रमेणैव दक्षिणाकालत्वप्राप्तेस्तत्प्रख्यन्यायेन दाक्षिणशब्दस्य नामत्वाद् गुणविधित्वं नास्तीत्याशङ्कते * नन्विति * धात्वर्था-नुवादपक्षे गुणविधित्वापत्तिरिति परिहरति * कर्मेति * अस्मिंश्च पक्षे सन्देहभाष्यगता यजत्यादिशब्दा श्रुतिवृत्ता एवेत्याह * तदा चेति * कार्यशब्दस्वरूपक्रमानुरोधात्क्रियासामान्यवाचिना करो-

तिना तद्विशेषोक्तिक्रियालक्षणाद्वाच्यधात्वर्थविषयो ऽर्थाक्षेप्यापूर्वविषयो वेत्याह * एकामिति * संहत्यकारित्वे कार्यैक्य * लाभादेकमित्युक्तम् * एकं धात्वर्थमेकं वापूर्वं त्रयो धातवो गमयन्तीति कुर्वन्तिशब्दार्थे व्याख्याते ददातिजुहोत्योर्गुणसम्बन्धार्थत्वेन धात्वर्थाविधायकत्वात्कथं धात्वर्थसाध्यापूर्वगमकतेत्याशङ्क्य * तदेत्युक्तम् * यजत्यर्थानुग्राहकगुणविधायकत्वेन तयोर्यजत्यनुग्राहकत्वात्तत्सहकृतस्य यजतेरपूर्वगमकत्वमभिप्रेत्य संहत्येत्युक्तमित्याशयः * तस्मादिति * पूर्वपक्षोपसंहारभाष्यं फलतो भावनैक्योपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * उत्तराधिकरणे पूर्वशब्दस्य फलतः कर्मविषयतया व्याख्यास्यमानत्वादिहाव्याख्या सिद्धान्तसूत्रं व्याचष्टे * उच्यतइति * शब्दान्तरस्य धात्वर्थभेदद्वारा भावनाभेदप्रमाणत्वं वक्तुम् * धात्वर्थभेद इत्युक्तम् * धात्वर्थस्य प्रयत्नाख्यभावनाजन्यत्वातद्भेदस्य भावनाभेदकत्वासम्भवमाशङ्क्य ज्ञापकहेतुत्वं वक्तुम् * विज्ञेयमित्युक्तम् * संख्यादित्रयस्य भावनाभेदकत्वाभावे ऽपि धात्वर्थभेदाद्भावनाभेदसिद्धिं वक्तुम् *सर्वत्रेत्युक्तम्* कृतानुबन्धत्वव्याख्यानायोत्तरार्द्धम् । ननु भावनावाचिप्रत्ययैक्यात् भावनायाः स्वतस्तावदैक्यप्रतीतेः प्राधान्याच्च धात्वर्थभेदे ऽप्यावृत्त्यनुपपत्तेः कथं धात्वर्थभेदाद्भेद इत्याशङ्क्य निरस्य लोकार्थं प्रपञ्चयति * यद्यपीति * सम्बन्धिनिरूपणाधीननिरूपणस्य सम्बन्धस्य सम्बन्धिभेदेन ज्ञेयनिरूपणाधीननिरूपणस्य ज्ञानस्य ज्ञेयभेदेन भेददर्शनाद्यद्यधीनं निरूपणं तत्तद्भेदेन भिद्यतइति व्याप्तेर्धात्वर्थाधीननिरूपणत्वाद्भावनाया धात्वर्थभेदेन भेदो ऽनुमीयत इत्याशयः । कथमनुरञ्जकभेदस्यान्नुरज्यभेदाक्षेपकतेत्याशङ्क्याह * न हीति * भावनाया धात्वर्थावच्छेदं विना भावनान्तराद्व्यावृत्त्यप्रतीतेरेकभावनावच्छेदकत्वविरोधप्रसङ्गेनैकस्यां भावनायामनेकानुरञ्जकसमावेशायोगादनुरञ्जकभेदो ऽनुरज्यभेदमाक्षिपतीत्याशयः । त्रयाणामप्येकस्यां भावनायां समावेशो न सम्भवति किमुत प्रकरणगतानां सर्वधात्वर्थानामिति त्रय इत्यनेनोक्तम् । ननु प्रत्येकमनुरञ्जकत्वे माभूत्समावेशः समुच्चितानामेव तु धात्वर्थानामेकभावनानुरञ्जकत्वं घटपटाविति युगपत् घटपटज्ञाने घटपटयोरिवैकज्ञानानुरञ्जकत्वं भविष्यतीत्याशङ्क्याह * न चेति * युगपत् घटपटसंयुक्तेनेन्द्रियेण घटपटविषयैकज्ञानोत्पत्तावपि ज्ञानजन्यार्थप्रकाशाख्यस्य फलस्याश्रयभूतघटपटभेदेन भेदात् घटप्रकाशांशे घटस्यानुरञ्जकत्वं पटप्रकाशांशे पटस्येत्यंशभेदेनोभयोरेकज्ञानानुरञ्जकत्वं युक्तम् । धात्व-

र्थस्यानुकरणांशनिवेशेन भावनानुरञ्जकत्वात्करणांशस्य चैक्यान्ना-
नेकानुरञ्जकत्वापेक्षेत्याशयः। ननु समुच्चितानामेव करणांशनिवेशो
भविष्यतीत्याशङ्क्याह * अन्योन्येति * भिन्नशब्दोपादाने ऽपि धा-
तुसमूहात्प्रत्ययोत्पत्तत्वादग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धा-
तोस्तु प्रकृतित्वेनोपादेयतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययो-
त्पत्तावग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धातोस्तु प्रकृतित्वेनो-
पादेयतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययोत्पत्तारित्याह * न ४४७।४
चेति * नन्वेकस्मिन्पदे ऽनेकधातूपादानाभावे ऽपि प्राकरणिकानां
सर्वधातूनां प्रयोगवाक्यैकवाक्यत्वात्तद्विहितायां भावनायां प्राकर-
णिकसर्वधात्वर्थानां निवेशो भविष्यतीत्याशङ्क्याह * न चेति *
प्रयोगवाक्ये शुद्धभावनाप्रतीत्यभावात्सोमादिवाक्येषु च भावनावि-
धिनिरपेक्षधात्वर्थविध्ययोगात्साकाङ्क्षत्वाभावेन प्राकरणिकसर्वधा-
त्वर्थानुरक्तैकभावनाविधानरूपैकार्थत्वाभावान्नैकवाक्यता युक्तेत्या-
शयः। ननु कल्पनालाघवायापूर्वैक्यावधारणात्तस्य च भावनैक्यं
विनानुपपत्तेः सर्वप्राकरणिकवाक्यानामेकभावनाप्रयोजनत्वेनैका-
र्थ्यादेकवाक्यता भविष्यतीत्याशङ्क्याह * न चेति * रूपादुत्तर-
काले हि विनियोगप्रयोजने इत्यनेन न्यायेनादृष्टप्रयोजनभेदाभेदयो-
र्मन्त्रभेदाभेदपूर्वकत्ववत्कर्मभेदो भेदपूर्वकत्वावगतेर्नापूर्वैक्येनैकार्थ्ये
ऽप्येकवाक्यकल्पना युक्तेति प्रत्याख्यानप्रकारं प्रकृते योजयितुमाह
* न चेति * ननु फलवाक्ये भावनाया धात्वर्थानुरागविवक्षायां
फलं प्रत्युपादेयविधेयगुणत्वाद्धात्वर्थं च प्रत्युद्देश्यानुवाद्यप्रधानत्वाद्वै-
रूप्यापत्तेः शुद्धाया विधेयत्वात्सोमादिवाक्यैस्तदनुवादेन रागादि-
धात्वर्थानुरागविधानमेकवाक्यत्वाभ्युपगमेन वा सर्वधात्वर्थानुरक्तै-
कभावनाविधानं युक्तमिति पूर्वपक्षाशयमाशङ्क्य निरस्यति * यदि
चेति * ननु भिन्नवाक्यगतैरपि धात्वर्थैरनुरागसम्भवे किमित्यप्र-
तीयमानैकवाक्यत्वकल्पनेत्याशङ्क्याष्टदोषविकल्पपरिहाराय समुच्च-
यसिद्ध्यर्थत्वं सूचयितुम् * युगपद्धेत्युक्तम् * पृथक्शब्देन धात्व-
र्थानुरागनिरपेक्षतोक्ता प्रत्ययेन शुद्धभावनोपादाने ऽप्यशक्यानुष्ठान-
त्वाद् बुद्धाया विधेयत्वासम्भवसूचनार्थो विधिवाच्युत्पत्तिशब्दः।भा-
वनायाश्च धात्वर्थवत् कारकत्वानभ्युपगमात्कर्मकरणत्वाभावेन तन्नि-
मित्तोद्देश्योपादेयत्वाद्यभावाद्धात्वर्थनिरपेक्षायाश्चाविहितत्वेन धा-
त्वर्थान्वये ऽप्यनुवाद्यत्वाभावान्न वैरूप्यापत्तिरित्याशयः। यदा च
धात्वर्थनिरपेक्षाया भावनाया विधेयत्वं न सम्भवति तदा ददात्या-
दीनां धात्वर्थानां मध्ये केन चिदेकेन धात्वर्थेन समस्तैर्वा धात्वर्थैर-

वच्छिन्नोत्पादयितव्या न शुद्धेत्याह * इतीति * ननु समस्तधात्वर्थावच्छिन्नभावनोत्पत्तिपक्षे पूर्वपक्षासिद्धिः स्यादित्याशङ्क्याह *तत्रेति * समस्तानामपि संहत्यावच्छेदकत्वायोगात्प्रत्येकमवच्छेदकत्वावगतेः प्रतिधात्वर्थं भावनाविधौ विहिताया विध्यसम्भवाद्भेदसिद्धिरित्यर्थः । अथैकेन धात्वर्थेनावच्छिन्ना भावनैकहायन्येव क्रयो विधीयते ऽन्ये तु धात्वर्थास्तस्यामेव भावनायां हिरण्यादीनीव क्रये विधीयमानानि न भावनाभेदमापादयन्तीत्युच्यन्ते तत्राप्येकहायनीवाक्येनैकगुणोपादानरूपकर्मोत्पत्तिचिन्हवदिह कस्मिंश्चिद्वाक्ये भावनोत्पत्तिचिन्हाभावेन व्यवस्थाहेत्वभावादगृह्यमाणविशेषतया सर्वत्र भावनाविध्यापत्तेर्दुवारो भावनाभेद इत्याह * अथेति * धात्वर्थान्तरेषु भावनाविध्यभावसूचनार्थं तावच्छब्दः अथागृह्यमाणविशेषत्वे ऽप्यनेकोत्पत्त्यानर्थक्याद्येन केन चिदेकेन धात्वर्थेनानुरक्ताया भावनाया उत्पत्तिरिष्यते तथाप्येकधात्वर्थानुरक्तायां धात्वर्थान्तरस्य गुणन्यायेनानिवेशाद्भावनाभेद एवेत्याह * येन केन चिदिति* धातुशब्दो ऽर्थपरः श्लोकं व्याचष्टे * येनैव हीति * सर्वप्रकरणैकवाक्यत्वविवक्षया वाक्यशब्दप्रत्याख्यातं वाक्यभेदविवक्षया प्र-
४४८।१ करणशब्दः एतदेवोदाहरणनिष्ठं विवृणोति * ददातिर्हीति * सर्वत्र पदश्रुतिगम्यत्वात् तुल्यबलत्वमाशङ्कते * ननु चेति*धात्वर्थान्तरानुक्तभावनाविशेषान्वयस्य श्रुत्यानवगतेरतुल्यबलत्वमाह * सत्वामिति * ननु भावनायाः स्वतो वैलक्षण्यानवभासेन सर्वत्रैक्यात्त्यागानुरक्तान्या दानानुरक्तान्येति भेदव्यवहारो न युक्त इत्याशङ्क्ते * ननु चेति * भिन्नधात्वर्थानुष्ठाने प्रयत्नाख्यभावनाव्यक्तिवैलक्षण्यस्य स्वसंवेद्यत्वाद्वैलक्षण्यानवभासेन सामान्यस्यैक्यं वाच्यं तत्विष्टमेवेत्युपहासेन परिहरति * केन चेति * धात्वर्थानुरक्तभावनाव्यक्तिवाची कर्मशब्दः व्यक्तेरपि धात्वर्थवैलक्षण्यं विना वैलक्षण्याप्रतीतेर्न भेदो ऽस्तीत्याशङ्किता स्वाशयं दर्शयति * नन्विति * धात्वर्थवैलक्षण्याख्यसामग्र्यपेक्षो ऽपि भावनाव्यक्तिवैलक्षण्यावभासो बाधाभावात्प्रमाणमिति निराकरोति * कथमिति* बाधाभावे ऽप्यन्योपाधिकत्वाच्छब्दभेदप्रत्यवद्भावनाभेदप्रत्ययो मिथ्येत्याशङ्किता स्वाशयं विवृणोति * नन्विति * अन्यसन्निधिजन्यत्वमात्रं वौपाधिकत्वमभिप्रेतमन्यधर्माध्यासन्निबन्धनत्वं वेति विकल्पं मनसि कृत्वाद्ये कल्पे तावत्प्रतिवर्णव्यञ्जकध्वनिभेदाद्भिन्नध्वनिसन्निधिजन्यत्वस्य सत्त्वे ऽपि गकारो ऽयं ककारो ऽयमित्यादिप्रत्ययभेददर्शनादनैकान्तिकत्वं तदभिप्रायत्वेन दृष्टान्तस्य साध्य-

विकल्पत्वमाह * नैतदिति * अथ द्रुतो ऽयं मध्यमो ऽयं विलम्बितो ऽयमित्यादिभेदप्रत्ययहृष्टान्तेनान्यधर्माध्यासनिबन्धनत्वं भावनाभेदप्रत्ययस्य मिथ्यात्वे हेतुरभिप्रेतः । सो सिद्धः ध्वनिधर्मो हि त्रिचतुःपञ्चकमात्रत्वरूपा द्रुतादिवृत्तयस्तस्मादुच्चारणं तेषां मात्राकालं प्रतीयते द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयमिति शब्दे मात्रानिषेधात् । तत्कल्पनानुपपत्तेर्वस्तुतो सत्त्वादध्यासेन प्रतीयन्तइति युक्तम्।धात्वर्थधर्मस्त्वनन्तरं नियमेन किं चिदुत्पादनरूपो भावनाफलस्यानन्तरोत्पत्तिनियमाभावान्न भावनायां प्रतीयते पूर्वापरीभावानिष्पन्नत्वरूपस्तु भावनायामपि व्यापारत्वेन वास्तवत्वान्नाध्यस्त इत्याशयेनाह * न चेति * द्रुतादिधर्मरहिताच्छब्दाद्विलक्षणधर्मतार्थान्तरशब्देनानन्तरं किं चिदुत्पादननियमरूपधर्मरहिताच्च भावनाख्यात्प्रयत्नाद्विलक्षणधर्मता व्यतिरिक्तशब्देन विवक्षिता । पूर्वापरीभावानिष्पन्नत्वरूपधात्वर्थधर्मतुल्यत्वप्रदर्शनार्थो नात्यन्तवाच्यदूरशब्दः उपसंहरति * तस्मादिति * एवं धात्वर्थाधाननिरूपणत्वाद्धात्वर्थभेदे वास्तवं भावनास्वरूपभेदमुक्त्वेदानीं स्वरूपेण भावनाव्यक्त्यैक्ये ऽपि शब्दान्तरादिभिर्विधेयरूपभेदस्य व्युत्पाद्यत्वाद्धात्वर्थानुरक्तायाः एव च भावनाया विधेयत्वाद्धात्वर्थानुरक्तरूपेण भेदो भविष्यतीति वक्तुं वृद्धानां श्लोकं पठति *आह चेति* रक्तेन लाक्षादिनोपधानेनावरुद्धे स्फटिके चोदिते सति कृष्णस्फटिकमानयत्यादिचोदनया यद्धितं तद्रक्तचोदनाविहिते स्फटिके कार्ष्ण्यादेर्निवेशो योगात्तस्मादन्यद्यथा गृह्यते तथैकधात्वर्थावरुद्धा भावना विधाने सति या धात्वर्थान्तरचोदनास्तास्ता भावनान्तरविषयाः स्युरित्यर्थः । नन्वेवं सति गुणन्यायादेव भेदसिद्धेः शब्दान्तरानर्थक्यं स्यादित्याशङ्क्याह * यस्मात्त्विति * पूर्वपक्षनिरुत्तरीकरणायैतदुक्तं । वस्तुतस्तु यस्मात्प्रत्ययः कृतधात्वर्थावच्छेदमेव स्वार्थं वदति तस्मात्फलवाक्ये ऽपि शुद्धभावनानवगतेर्नैकस्यां भावनायामनेकधात्वर्थावच्छेदः सम्भवतीत्येतदिह व्युत्पाद्यमित्याशयः । ननु

प्रकृतिप्रत्ययौ ब्रूतः प्राधान्येन सहेति यत् ।
भेदेनैवाभिधाने हि प्राधान्यं तत्तथोच्यते ॥
स्याच्चेत्स उभयोर्वाच्यः प्रत्ययार्थः कथं भवेत् ।
व्यपदिश्येत नैकेन यद्यर्थ उभयोरसौ ॥
सर्वदा तूच्यते यस्मात्प्रकृत्यर्थोपसर्जनः ।
तेनासावुभयोरर्थः प्रयोजनतयोदितः ॥
यान्यावयवशक्तिभ्यां शक्तिःकाचित्पदाश्रया ।

विद्यते यत एकस्माद्विशिष्टार्थगतिर्भवेद् ॥ इति
शब्दे प्रकृतिप्रत्यययोरप्यन्विताभिधानस्य निरस्तत्वात्कृतानु-
बन्धमेव स्वार्थं प्रत्ययो वदतीत्ययुक्तमित्याशङ्क्य * प्रकृतीत्युक्तम् *
नित्यं विशिष्टएवार्थे प्रत्ययो यत्प्रवर्त्तते ।
तत्पूर्वतरविज्ञातप्रकृत्यर्थविशेषणाद् ॥

इत्यनेन न्यायेनान्वितानभिधाने ऽपि परश्रेति प्रत्यय-
स्य प्रकृतिपरत्वस्मृतेर्वृद्धप्रयोगरूपाच्चाचारात्स्वार्थाभिधाने प्रकृ-
तिप्रत्ययक्रमस्य नित्यं विवक्षितत्वावगतेरवर्ज्जनीया विशिष्टार्थाव-
गतिरित्याशयः । इममेवार्थं तद्भूतताधिकरणभाष्येण द्रढयति *
यथोक्तमिति * यजेतेत्यनेनेति भाष्येण कृतानुबन्धत्वादिति सूत्रा-
वयवं व्याख्याय ननु धात्वर्थसमुदायेनैवावच्छेदाख्यो ऽनुबन्धो भा-
वनाया भविष्यतीत्याशङ्कानिरासार्थं प्रयोगेति भाष्यमुत्पत्ति-
वाक्यशेषत्वेनापि धात्वर्थसमूहस्यापि सत्ताशब्दोक्तभावनान्वयोपप-
४४९।१ त्तेरयुक्तमाशङ्क्योपपादयति * प्रयोगवाक्येति * उत्पत्तिवाक्ये-
नैव सर्वाणि प्राकरणिकानि गुणफलनिमित्तवाक्यानि सम्बन्ध्यन्ते न
परस्परेणेतीन्द्रियकामाधिकरणवार्त्तिकवक्ष्यमाणन्यायेन प्रयोगवा-
क्ये भावनोत्पत्त्यभावान्नान्येषां तच्छेषत्वं सम्भवतीत्याशङ्क्योत्पत्ति-
लक्षणार्थेन सत्ताशब्देन प्रयोगवाक्ये भावनोत्पत्तिर्विवक्षितेति भा-
वनाशब्देन सूचितम् । समुदायानुरागकल्पनस्यापूर्वकल्पनालाघवार्थ
त्वात्फलान्वयकल्पत्वाच्चापूर्वस्य फलान्वयस्य च धात्वर्थोत्पत्तिवाक्या-
नां प्रयोगवाक्यशेषत्वाधीनत्वात्समुदायानुरागकल्पनस्य प्रयोगवाक्य-
शेषत्वहेतुकतेत्यर्थः । ननु धात्वर्थावच्छेदानपेक्षेण स्वरूपेण भावनाया
भाव्यनिष्ठत्वात्फलान्वयोपपत्तेस्तादृश्याश्च धात्वर्थोत्पादकसोमा-
दिवाक्यानपेक्षाद्भावनोत्पादकात् ज्योतिष्टोमवाक्यात्प्रतीतेः किमर्था
सोमादिवाक्यानां ज्योतिष्टोमवाक्यशेषत्वापेक्षेत्याशङ्क्याह * नेति *
धात्वर्थावच्छेदं विनानुष्ठेयत्वात्फलान्वयो न सम्भवतीत्याशयः ।
प्रकरणान्तरगतासु राजसूयादिभावनासु ज्योतिष्टोमभावनान्वया-
तिदेशसूचनार्थं बहुवचनम् । ननु भिन्नानामपि भावनानामेकप्रयोगवा-
क्यग्रहणात्समुदितानामेवापूर्वसाधनत्वाभ्युपगमेन कल्पनालाघ-
वोपपत्तेः कथं प्रयोगवाक्यशेषत्वाद्धात्वर्थसमूहस्यैकभावनान्वया-
वगतिरित्याशङ्क्याह * अवधृतेति * अवधृतभेदानामेकवाक्यो-
पादाने ऽप्येकशब्दानुपादानात्समुदायानुवादरूपतयैकीकरणमश-
क्यमित्यर्थः । स्वर्गकामो यजेतेत्युपक्रमलक्षणया श्रुत्या धात्वर्थे
संपादवदस्य यागस्यैव भावनासम्बन्धो ऽवगम्यतइति श्रुतेति भाष्यो-

क्तार्थव्याख्यार्थं सन्निहितयोरपीति भाष्ये दानहोमयोः प्रयोगवाक्ये ऽनुपादानान्नैकवाक्योपादानलक्षणः संनिधिरस्तीत्यपिशब्दसूचितमर्थं व्याचष्टे * न चेति * श्रुत्येतिशब्दं यजेरुपलक्षणार्थत्वशङ्कानिराससूचनार्थत्वेन व्याचष्टे * न चेति * ननु यागायागसङ्गे लिङ्गसमवायाद्यजिप्रवृत्तेस्तदन्तर्गतस्य यागस्याप्युक्तत्वान्न स्वार्थत्यागापत्तिरित्याशङ्क्य * अहोभयेति * भावनावद्धात्वर्थानामपि सङ्गापत्तिहेतुत्वभावात्स्वरूपेण यागाभिधाने युगपद् वृत्तिद्वयापत्तिरित्याशयः। तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * भावनावाचिप्रत्ययैक्यात् शब्दान्तरात्वानुपपत्तिमाशङ्क्य शब्दान्तरं चेत्युपक्रमपूर्वकं शब्दान्तरत्वोपपादनार्थं तत्रार्थान्तरमित्यादिच शब्दान्तरहेतुकभावनाभेदोपसंहारभाष्यमेकहेलया व्याचष्टे * अतश्चेति * ननु यथा केवलस्य प्रधानस्य फलसाधनत्वज्ञानमुत्पन्नमपि करणस्येतिकर्त्तव्यतापेक्षत्वात्सेतिकर्त्तव्यताकस्य फलसाधनत्वज्ञानेन बाध्यते तथा केवलस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानमुत्पन्नमपि जन्यत्वेन तस्य भावनावच्छेदकत्वात् कारकानपेक्षेण च प्रत्ययवाच्याख्यभावनामात्रेण धात्वर्थाजननात्सिद्धरूपकारकाश्युपगमे च तस्य निर्व्यापारस्य कारकत्वायोगाद्व्यापारकल्पनायां गौरवापत्तेर्धात्वर्थरूपकारकावच्छिन्नस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानेन बाधिष्यतइत्याशङ्कानिरासार्थं नन्विति भाष्यं व्याचष्टे * न चेति * दृष्टेनैव द्रव्यसम्प्रदानादिना कारकसङ्गेन दानादिधात्वर्थनिष्पत्तेर्न तन्निष्पादकधात्वर्थान्तरापेक्षेत्याशयः। यदा च शुद्धभावनाप्रतीत्यभावाद्धात्वर्थान्तरानपेक्षत्वान्न विभज्यमानसाकाङ्क्षत्वं भावनाभेदे च भावयितव्यापूर्वभेदावश्यम्भावान्न संहत्यैकार्थं तदैकवाक्योपादानाभावादपि धात्वर्थसम्पाद्यस्यैकभावनावच्छेदकता न युक्तेत्यभिधानार्थं तस्मादिति भाष्यं न चैतत्पदत्रयमेकवाक्यतां गच्छतीत्यादिना सा भावयितव्यापूर्वभेदाहते नैव भिद्यतइत्यन्तेन च व्याख्यातप्रायत्वान्न व्याख्यातं यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमित्युपपत्त्यन्तरनिरासार्थं न चेत्यादिभाष्यं व्याचष्टे * न चेति * भाष्यस्थो दानमिति शब्दो धातुलक्षणार्थः परसम्बन्धार्थत्वादित्यनेनासेचनार्थत्वात् जुहोतेरित्युपलक्षितमित्यासेचनशब्देन सूचितम्। ननूदेशत्यागप्रक्षेपसमुदायवाचिनो जुहोतेस्त्यागपरस्वत्वापादनसमुदायवाचिनश्च ददातेस्तदेकदेशत्यागमात्रलक्षणायैकार्थ्यं भविष्यतीत्याशङ्क्याह * न चेति * देवतोद्देशसद्भावे ऽप्यासेचनपरस्वत्वापादानापेक्षो मात्रशब्दः त्यागमात्रार्थत्वादिति भाष्ये ऽपि मात्रशब्दो ऽनेन सूचितः।

कालार्थे च तद्धितास्मृतेर्दाक्षिणशब्दस्य दक्षिणाकालवाचित्वात्प्रसिद्धेर्विधौ चावाचकशब्दायोगादर्थाक्षिप्तसाध्यांशसामानाधिकरण्याच्च नामत्वावगतेः कर्मण एव विधेयत्वात्सिद्धो भेद इत्याह * न चेति * धात्वर्थभेदाभेदचिन्तायां ददातिवाक्ये गुणविधौ सम्बन्धविधेराधाराग्निहोत्राधिकरणे निराकरिष्यमाणत्वाद्वाक्यभेदापत्तेः पूर्वपक्षायोगादुक्तोदाहरणानुपपत्तिप्रसक्तेनेह तच्चिन्तेति प्रसङ्गादर्शयितुमाह * ददातिना त्विति * प्रयोजनभाष्यं धात्वर्थसङ्ख्यैकं भावनावच्छेदकत्वे सर्वेषामेकापूर्वसाधनत्वादङ्गाङ्गित्वाभावः पूर्वपक्षे सिद्धान्ते ज्योतिष्टोमयागाङ्गतेतरधात्वर्थानामित्येवं स्पष्टत्वान्न व्याख्यातम ।

॥ समिदाद्यपूर्वभेदाधिकरणम् ॥ २ ॥

एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् ॥ १ ॥

ननु शब्दभेदरूपत्वेन सञ्ज्ञायाः शब्दान्तरसादृश्यादनन्तरविचार्यत्वासमाप्तेः कथमभ्याससर्वानन्तरं विचार्यतेत्याशङ्क्याह *शब्दान्तरेति * धात्वर्थविषयत्वेन सञ्ज्ञायास्तन्मात्रभेदकत्वाच्छब्दान्तरस्य तु धात्वर्थवाचित्वे ऽपि धात्वर्थस्य स्पष्टभेदत्वेनाभेदाशङ्कायोगाद्विशेषणशब्दानां च विशेष्यपरत्वेन धात्वर्थमात्रे धातोरपर्यवसानाद्धात्वर्थभेदद्वारा भावनाभेदकत्वाद्वैलक्षण्यमभ्यासस्य तु पुनर्विधानात्मकत्वाद्विधेश्च धात्वर्थानुरक्तभावनाविषयत्वेनोभयभेदकत्वाद्भावनाभेदकत्वांशेन साम्याद्धातुभेदे धात्वर्थभेदाद्भावनाभेदो धात्वर्थभेदे तर्हि धात्वर्थाभेदाद्भावनाया अप्यभेद इति च प्रत्युदाहरणारूपेण पूर्वपक्षसौकार्यादनन्तरसङ्गतिरित्याशयः । उदाहरणासंभवेनाभ्यासचिन्तामाक्षेप्तुं भाष्योक्तं तावदुदाहरणमुपन्यासपूर्वकमाक्षिपति * तत्रेति * ननु प्रमाणान्तरसम्भवे ऽप्यभ्यासो ऽपि
४५०।६ प्रमाणं न वेति चिन्ता भविष्यतीत्याशङ्क्याह * षडपीति * एकस्मिन्विषये ऽनेकप्रमाणव्यापृतावेकप्रमाणव्युत्पादनेनैव कर्मभेदसिद्धेः प्रमाणान्तरस्य व्युत्पादने परस्याधिकस्यानन्यलभ्यस्य भागस्य भज्यमानस्य फलस्य लाभो नास्तीत्यर्थः । तर्हि उदाहरणान्तरं भवत्वित्याशङ्क्याह * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * नन्वैन्द्रवायवादिनाम्नः संस्कार्यसोमपरत्वेनोक्तगतिद्वयाभावात्तद्युक्तमाख्यातमुदाहरणं भविष्यतीत्याशङ्क्याह * ऐन्द्रवायवमिति * देवतालक्षणगुणविधानार्थत्वादैन्द्रवायवादिनाम्नो वा ऽपि गुणाद्भेद इत्यर्थः । भिन्नादिनाम्नस्तर्हि निमित्तार्थत्वेनागुणवि-

धानार्थत्वात्तद्युक्तमाख्यातं भेदकं स्यादित्याशङ्क्याह * भिन्न इति* प्रकरणान्तरेण भेदसिद्धेरभ्यासस्य चाभेदकत्वान्नोदाहरणतेत्यर्थः। कैश्चिद्वैशाख्याममावास्यायां सप्तदशमारुतीस्त्रिवत्सरा उपाकरोति सप्तदश पृश्नीनुक्षणस्तान्पर्यग्निकृतानेतरा लभते प्रेतरात्सृज्जृन्ति ततः संवत्सरा नवनीतपृश्नारुणा आनयन्ति तांश्चैवोक्षणस्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरान्सृजन्ति ततः संवत्सरे राजीवा आनयन्ति तांश्चैवोक्षणन्पर्यग्निकृतानेतरेतरा लभन्ते प्रेतरान्सृजन्ति ततः संवत्सरे पिशङ्गीरानयन्ति तांश्चैवोक्षणस्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरां सृजन्ति ततः सम्वत्सरे सारङ्गीरानयन्ति तांश्चोक्षणस्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरात्सृजन्तीति पञ्चशारदीयाख्याहीनसम्बन्धिषु पशुषु विहितेषु पञ्चकृत्वः पर्यग्निकरणाभ्यासमुदाहृतमुपन्यासपूर्वकं निरस्यति * ये त्विति * पञ्च शारदीयास्तथेति चेदित्येकादशाधिकरणे प्राजापत्योत्सर्गवदुक्षणामप्युत्सर्गः संस्कारनिषेध इति प्राप्ते संस्कारनिषेधे सति त्रींस्त्रीनुक्षण एकैकस्मिन्नहन्यालभेरन्यं चोत्तम इति प्राप्ते कर्मण्यनेकगुणविधानाद्वाक्यभेदापत्तेर्नवमोपान्त्यव्युत्पादितारण्योत्सर्गवत्कर्मशेषनिषेधेन चोदनैकवाक्यत्वादिति सूत्रेण सिद्धान्तयित्वा संस्काराणां च दर्शनादिति सूत्रान्तरेण प्रतिवर्षं संस्कारानुवाददर्शनात्कर्मैक्ये च द्रव्याभेदेन पुनः पुनः संस्कारानर्थक्यात्प्रतिवर्षं कर्मसमाप्तिरवसीयतइत्युक्ता ननु वचनमेतद्भविष्यतीत्याशङ्क्य पर्यग्नि करोति पर्यग्निकृतांश्चोत्सर्जन्तीत्यनेकार्थविधौ वाक्यभेदापत्तेर्वत्सतरीषु च प्रकृतिप्राप्तानुवादत्वात्तत्साहचर्येणोक्ष्वस्यप्यनुवादतैव न्याय्येति भाष्यकृद्वक्ष्यति। नन्वविधेयत्वात्पर्यग्निकरणस्य पुनर्विधानरूपाभ्यासाभावे ऽपि यागानां पुनर्विधानेन भेदस्यैकादशे वक्ष्यमाणत्वादुदाहरणत्वं भविष्यतीत्याशङ्क्याह * न चात्रेति * द्रव्यदेवतान्वयकल्पत्वाद्यागानां तद्भेदेन गुणादेव यागभेदावगतेर्नाभ्यासस्य व्यापारो ऽस्तीत्याशयः। उदाहरणासम्भवमुपसंहरतीति भाष्योक्तमेवोदाहरणं समाधातुमाह * यथोदाहृतेष्वेव त्विति * भिन्ने जुहोतीत्यादेरनुपादेयार्थस्याख्यातान्वितस्यापि नाम्नस्तत्पारतन्त्र्यभावात् * प्रायेणेत्युक्तम् * श्लोकं व्याचष्टे * यानीति * ननु सर्व- ४५१।१
वाक्येषु चाख्यातं तेनाकाङ्क्षानिवर्त्यनादित्यनेन न्यायेनाश्रुताख्यातत्कतेष्वपि वाक्येषु तत्कल्पनेनाख्यातवत्त्वान्न क्व चित्संज्ञागुणयोर्भेदकत्वं स्यादित्याशङ्क्ते * नन्विति * कल्पस्याख्यातस्य कल्पकपारतन्त्र्येण भेदाभेदयोरव्यापारात् ज्योतिरादौ चैतेन सहस्रद-

क्षिणेन यजेतेत्यादिगुणान्वयव्यापारेणैतेनार्द्धिकामो यजेतेत्यादिफलान्वयव्यापारेण च श्रुतस्याप्याख्यातस्य भेदाभेदयोरव्यापारात्तदन्वितस्यापि नाम्नोऽपि भेदकत्वमविरुद्धमिति परिहरति * तत्रेति * भेदव्यापाराभावमात्रं सम्भवशब्देनोक्तम्। ननु यच्छब्दाद्यनुपबद्धस्याख्यातस्य विधेयान्तरोपादानात्प्राक् प्रकृतनिवेशनिश्चये ऽप्याख्यातसामानाधिकरण्यं विना संज्ञात्वानिश्चयात्कथं तयाभेद इत्याशङ्क्य * तत इत्युक्तम्* यागसंज्ञात्वनिश्चये ऽप्यधिकारार्थाथशब्दान्वयेनानुष्ठेयक्रियासंज्ञात्वनिश्चयाद्भेदकत्वोपपत्तिरित्याशयः। नन्वेवं सत्यैन्द्रवायवं गृह्णात्युद्भिदा यजेतेत्यादिनाम्नामाख्यातपारतन्त्र्याद्भेदकत्वानुपपत्तेः सर्वाणि परस्परासङ्गतौत्पत्तिककगुणयोगाद्विद्यन्ते नाम्नैव चैवमादीनां भेद इति चायुक्तं स्यादित्याशङ्क्याह * यत्रापीति*आनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेनागत्या तत्र भेदकतेत्याशयः। एकसंज्ञावरुद्धे संज्ञिनि संज्ञान्तरस्याप्यसम्भवाद् गुणशब्देन संज्ञाप्युपलक्षिता आनर्थक्यनिमित्तत्वप्रदर्शनायैवादिशब्देनाक्रियमाणे यागे न शक्यः कर्त्तुमित्यनर्थकः स्यादित्युदाहृतम्।नन्वेवं सत्यत्रापि गुणादेव भेदसिद्धेः किमभ्यासोपन्यासेनेत्याशङ्क्याह * तत्रेति * आख्यातस्य भेदकत्वसम्भवे तत्पारतन्त्र्याद् गुणस्य भेदकत्वं नास्तीत्याशयः।ननु भाष्ये पूर्वभेदाभेदस्य सन्देहाभिधानात्किमेकस्य कर्मणो वाचकमनेकस्येत्ययुक्तमुक्तमित्याशङ्क्य द्वेधा व्याचष्टे * किमिति*यजतिशब्दः किम् यागे ऽभ्यासपूर्वमन्यत्कर्मैकं विधत्ते किं वा प्रतियजतिशब्दाभ्यासमन्येषां कर्मणां भेद इति द्वितीयव्याख्यायां भाष्यार्थः।अपूर्वशब्दो ऽन्यवाची कर्मविशेषणमित्याशयः। पूर्वपक्षं प्रतिजानाति * किमिति * हेतुप्रश्नोत्तरत्वेन शब्दान्तरइति भाष्यं पूर्वोक्तभेदहेत्वभावाभिधानार्थत्वेन व्याचष्टे * कुत इति*इहेति भाष्यं कर्मप्रत्यभिज्ञाख्याभेदहेत्वन्तरार्थत्वेन व्याचष्टे * अपि चेति * शब्दस्य तत्त्वात्पूर्वमेव कर्मबुद्धौ निवेशितमित्यर्थः।श्लोकं व्याचष्टे * यथैवेति * नन्विति भाष्येणानन्यपरविधिपुनः श्रुतविधेयकर्मभेदं विनानर्थक्यापत्तेर्भेदकत्वमाशङ्क्य सत्यमिति भाष्येणार्थशब्दो ऽभिधेयवाची प्रयोजनवाची वेति विकल्याद्यपक्षे प्रयोजनाभावे ऽप्यभिधेयसद्भावानर्थक्यमित्युक्तं तद्व्याचष्टे * यथा चेति * वार्त्तिके निष्प्रयोजनत्ववाच्यनर्थशब्दः। ननु वेदस्य प्रयोजनवदर्थाभिधायित्वनियमस्यार्थवादाधिकरणे स्थितत्वान्निष्प्रयोजनत्वापादकः कर्मैक्यपक्षो न युज्येतेत्याशङ्क्याह * न चेति * स्वरूपपरत्वे ऽर्थवादानां प्रत्यक्षादिविरोधेनाप्रामाण्यापत्तेः स्तुत्यर्थतो- ४५२।

क्ता पुनः श्रुतेश्च पूर्वकर्मविधायित्वे ऽप्यनपेक्षत्वेनाप्रामाण्यापत्तेः निष्प्रयोजनत्वमात्रेण न भेदकत्वं कल्प्यमित्याशयः। न चेति भाष्येण निष्प्रयोजनतापि नास्तीत्युक्तं तत्र भाष्योक्तस्य देवताविध्यर्थत्वस्य गुणानिमित्तभेदापत्तेरयुक्तत्वेनापरितोषात्स्वयं तावत्प्रयोजनत्रयमाह * अस्ति चेति * मन्त्रवत्कर्मकालप्रयोगितैकं प्रयोजनमित्याशयः। विधिश्रवणात्प्रयोगार्हरूपाभावेन प्रयोज्यत्वानुपपत्तेरपरितोषात्प्रयोजनान्तरमाह * अथ वेति * प्रतिप्रधानप्रयोगमावृत्तिराभीक्ष्ण्यं आदिशब्देनातिशयः। नन्वाभीक्ष्ण्ये द्वे भवतइति स्मृतेः पञ्चकृत्वो ऽभ्यासो न युक्त इत्याशङ्क्याह * अस्ति हीति * सकृत्प्रयुक्तात्प्रतीते ऽप्यर्थे तात्पर्यातिशयद्योतनार्थत्वादभ्यासस्यातिशयातिरेकार्थो ऽभ्यासातिरेक इत्यर्थः। पञ्चकृत्वो ऽप्यभ्यासो दृश्यतइत्याह * तथेति * इन्द्रस्य त्वष्टृपुत्रवधात्तेजोधर्ममाविशद् बलं वायुं रूपमश्विनौ अर्द्धमात्मन्यतिष्ठन्ततः पाण्डुपत्न्यां कुन्त्यां धर्मेण तेजोनिक्षिप्तं युधिष्ठिरो ऽभवद्वायुनिक्षिप्तं बलं भीमः इन्द्रनिक्षिप्तं देहार्द्धमर्जुनः अश्विभ्यां माद्र्यां निक्षिप्तं रूपं नकुलसहदेवाविति पञ्चापीन्द्रावयवप्रकृतित्वादिन्द्रा एवेति पञ्चेन्द्रोपाख्याने कुमार्यैव वृद्धतां प्राप्तया पतिं मे देहीति पञ्चकृत्वो वरमीश्वरः प्रार्थित इति श्रूयतइत्यर्थः। नन्वेवं सति पतिपञ्चकवद्यागपञ्चकमपि स्यादित्याशङ्क्याह * न चेति * अर्थान्तरविवक्षया प्रयुक्तस्य शब्दस्यार्थान्तरकल्पनया प्रत्यवस्थानं ह्रदं निद्रिते ऽन्यमनस्के वा प्रबोध्यमाने बुध्यस्व बुध्यस्वेति यावत्प्रबोधं वृद्धकुमार्याश्च यावद्वरलाभमभ्याससम्भवे ऽप्यपौरुषेयत्वाद्वेदे तादृगाशयानुपपत्तेः। प्रतिप्रधानानुष्ठानमावृत्तेश्च न्यायादेव सिद्धेरनुष्ठानादरस्य च विधित एव सिद्धेरपरितोषात्पञ्चानां विकल्पेन विधातृतेति तृतीयं प्रयोजनमाह * अथ वेति * अध्येतृभेदाभावाद्व्यवस्थितविकल्पानुपपत्तेरेकस्मिन्नध्येतरि विकल्पे सर्वाध्ययनानर्थक्यापत्तेरपरितोषाद्भाष्योक्तं प्रयोजनमभ्युपेत्यवादेनानुसन्धत्ते * अथ वेति * ननु समिदादिशब्दानां देवताविध्यर्थत्वानिरासेन नामधेयत्वस्य वक्ष्यमाणत्वाद्देवताविधानार्थता न युक्तेत्याशङ्क्याह * कर्मेति * विध्यपेक्षितविधेयविशेषसमर्पणार्थत्वान्नामधेयस्य प्राक्सिद्धविशेषापेक्षिण्यनुवादे ऽनुपपत्तेरगत्या गुणार्थत्वापत्तिरित्यर्थः। वैश्वदेवादिनामधेयस्य गुणाद्युपबन्धोपयोगेनार्थवत्त्वादनुवादे ऽप्युपपत्तिरित्याशयः। प्रत्यभिज्ञायाः कर्मैक्यप्रामाण्याभावे ऽपि गुणविधावुपपदाक्रान्तविधिशक्तित्वेन कर्मानुवादावगतेर्गुणविधित्वस्याप्यभ्युपेत्यवादत्वं सूचयितुमाह * त-

स्मादपीति * वस्तुतस्तु प्रत्यभिज्ञैवाभेदे हेतुरित्याह *यत्रापि चेति* न हेयान्तरस्थशब्दार्थप्रत्यभिज्ञानोक्तिरतिशयार्था विधेयभेदज्ञानं च विना विध्यभ्यासाज्ञानाद्विध्यभ्यासाद्विधेयरूपभेदाभ्युपगमे ऽन्यन्योन्याश्रयापत्तेः पुनरुच्चारणरूपाद्वाचकाभ्यासाद्वाच्यभेदो ऽभ्युपगन्तव्यस्तत्र जातेर्भेदायोगाद्व्यक्तेर्वाच्यत्वापत्तेस्तस्याश्चानित्यत्वा-
४५३।२ च्छब्दार्थसम्बन्धानित्यत्वाद्भेदाप्रामाण्यापत्तिरित्याशयेनाह * यदि चेति * यदा त्वन्ये त्वभेदमाचार्याः कर्मणामेव मन्यन्तइत्येतन्मताश्रयणेनैकैव यागव्यक्तिर्गकारादिव्यक्तिवन्नित्येष्यते तदा तद्व्यतिरिक्तजात्यभावात्प्रत्यभिज्ञानायास्तद्विषयत्वाशङ्कानुपपत्तेर्व्यक्तैक्यप्रामाण्यं स्पष्टमेवेत्याशयेनाह *किं चेति* संख्यानिबन्धनस्तु भेदो द्रव्यादिकारकात्मकव्यञ्जकभेदोपाधिको वर्णस्येव द्रुतादिभेदोपाधिक इत्याशयः। अस्मिंश्च पक्षे ऽभ्यासार्थत्वेनापि पुनःश्रुत्युपपत्तेर्न कर्मप्रतीकतास्तीत्याह * यद्यपि चेति * स एव तर्ह्यस्तित्वत्याशङ्क्याह * न चेति * ज्योतिष्टोमे ग्रहणान्वायित्वेन श्रुतानां देवतानां प्रकरणेन ग्रहणद्वारा योगान्वयात्प्रकरणस्य च युगपत्सर्वाङ्गग्राहित्वात्समुच्चयावगतेः प्रत्येकं च ग्रहणान्वयासंहतानां यागान्वयायोगाभ्यासो युक्तो न त्वत्र देवतासमुच्चयहेतुरस्तीत्याशयः। पूर्वपक्षप्रयोजनं चानेन समर्थितं तस्मादित्युपसंहारभाष्यस्यमपूर्वशब्दमयागेभ्यो ऽन्यत्ववाचितया व्याख्यातुमाह*तस्मादिति * भाष्योक्तां सूत्रव्याख्यां स्पष्टयति * एवमिति * विधेरप्रवृत्तप्रवर्त्तनस्वभावत्वाद्विहितविधावप्रामाण्यापत्तेर्विधिपुनःश्रवणस्य भेदकत्वावश्यम्भावात्कर्मैक्यवादिना कर्मानुवादाभ्युपगमेन विधिपुनः श्रवणाभावो वाच्य इति मत्वा तदेव प्रश्नपूर्वमुपपादयति * कथमिति * नन्वन्याक्षिप्तशक्तित्वाभावे ऽपि विपरिवृत्तेरनुवादो ऽवसीयतइत्याशङ्क्याह * यदि हीति * ननु व्रीहिभिर्यजेतेत्यादौ विपरिवर्त्तमानस्यैवानुवादाभ्युपगमादवश्यमनुवादे विपरिवृत्तेः किं चित्कारो वाच्यस्तत्रानुवादत्वं चेत्तथा न क्रियते किं तर्हि क्रियतइति पृष्टवोत्तरमाह * किं तर्हीति * समान्यतस्त्वनुवादत्वप्रसिद्धिरन्याक्षिप्तविधिशक्तित्वादेवेत्याह * तत्सामान्येति * एतदेव व्याचष्टे * यदा हीति* नन्वनेकविध्यशक्तौ न क्व चिद्विशिष्टविधिः स्यादित्याशङ्क्याह * तां चेति * विपरिवृत्त्यभावे विशिष्टविधिरगत्या स्यादित्याशयः । ननु य एवं विद्वान्पौर्णमासीं यजतइत्यादौ रूपालाभादिनाप्युत्तारणदर्शनात्किमन्याक्षिप्तत्वेनेत्याशङ्क्याह * धात्वर्थेति * चतुर्जह्वां गृह्णाति प्रयाजेभ्यस्तत् गृह्णाति अध्वर्युरुपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तत्

गृह्णातीति वाक्यान्ताभ्यां जौहावोपाभृताज्यद्रव्यलाभान्मान्त्रवर्णिकदेवतालाभाच्चान्यो नोत्तारणहेतुरस्तीत्याशयः । ननु सामान्यतोऽनुवादत्वाप्रसिद्धावपि प्रकृतस्यानुवाद इत्यनुवादविशेषत्वमेव तर्हि विपरिवृत्तेरस्त्वित्याशङ्क्याह * सर्वत्रैवेति * शब्दशक्त्यावगतस्य विधित्वस्यासम्भवावधारणं विना नानुवादकता युक्तेत्याशयः।अतोऽनुवादाकाङ्क्षा प्राप्तिरेचानुवादत्वे हेतुर्न प्राप्तिमात्रमित्युपसंहरति * तस्मादिति * अनुवादत्वावधारणे ऽनुवादाकाङ्क्षाया ४५४।॥
हेतुत्वाभिधानस्य प्रकृतोपयोगमाह *तत्रेति* पूर्वं तेनैव शब्देनैक्येन प्रत्यभिज्ञानात्कर्मैक्यावगतेर्न तद्विरुद्धो भेदः पुनर्विधानात् सिध्यतीति यदुक्तं तद् दूषयितुमनुभाषते * यस्त्विति * दूषयति* प्रमाणेति * एतदेव विवृणोति * तथा हीति * श्लोकं व्याचष्टे * विधायकौ हीति * ननु दध्यादिवाक्ये ऽपि तर्हि कर्मान्तरत्वं स्यादित्याशङ्क्याह * यत्र पुनरिति * प्रत्यभिज्ञानस्यापि जातिविषयत्वेनोपपत्तेर्नात्यन्तबाध इत्याह * तस्मादिति * सामान्येनैक्ये चेदविवादः कस्य तर्ह्यत्र भेदश्चिन्त्यतइत्यपेक्षायामाह * तथा हीति * पश्वादीनां यागत्वसामान्यैक्ये ऽपि पशुत्वाद्यवान्तरसामान्यात्मकविशेषरूपेणान्योन्यं पशूनां चाग्नीषोमीयादीनां सोमानां ज्योतिष्टोमादीनाम इष्टीनां च दर्शपूर्णमासाधानानां विधेयात्मकव्यक्तिरूपेणान्योन्यं भेदश्चिन्त्यत इत्यर्थः । सर्वत्र शब्देन संख्यादिसाधारणतास्याभिधानस्योक्ता । ननु विधिश्रुत्या कर्मान्तरज्ञानवद्यजिश्रुत्यैवैक्यज्ञानान्न बलाबले विशेष इत्याशङ्क्ते * ननु चेति * यागत्वमात्रज्ञानं तया नैक्यज्ञानमिति परिहरति * नेतदिति * श्लोकं व्याचष्टे * न हीति * ननु शब्दार्थरूपस्येह भेदाभेदविचाराद्वयक्तेश्चाशब्दार्थत्वाच्छब्दार्थभूतस्य च सामान्यस्यैक्याद्यजिश्रुत्यैव कर्मैक्यज्ञानसिद्धिरित्याशङ्किता स्वाशयं विवृणोति * नन्विति * शब्दावाच्यत्वेने- ४५५।॥
तरासामवाच्यत्वाच्छब्दार्थतायामेवैक्यापत्तेर्विपरीतसाधनो हेतुरित्याशयेन परिहरति * येनैवेति * नन्ववाच्यत्वे सत्यैक्यवद्भेदस्याप्यनवगमात्कथं विपरीतसाधनतेत्याशङ्कां प्रश्नपूर्वं निरस्यति * कथमिति * विधेयरूपस्येह भेदाभेदविचाराज्ज्ञातेश्चाननुष्ठेयत्वेनाविधेयत्वात्तल्लक्षितानां व्यक्तीनामेव विधेयत्वावगतेर्विधेयसमर्पकस्य यजेस्तात्पर्यवृत्त्या व्यक्तिविषयत्वेनैक्यज्ञाने व्यापाराभावाद्विहितविधानायोगेन विधिपुनःश्रुत्या सन्निधिकृतैक्यज्ञानबाधाद्भेदज्ञानसिद्धिरित्याशयः । श्लोकं व्याचष्टे * यदिति * गत्वादिवच्च चैतेष्वित्यनेन व्यक्त्याकृतिभेदाभावमुक्तं दूषणायानुभाषयते * यस्त्विति *

दूषयति * सत्यमिति * कर्मव्यक्तीनां स्वरूपेण क्षणिकत्वाद्व्यक्त्याकृतिभेदादिप्रमेयस्य विधेयरूपस्य विधिनित्यत्वेन नित्यत्वाद्विधेयरूपव्यक्त्याकृतिभेदो ऽपन्होतव्यः स च शब्दान्तरादिभेदप्रमाणं विना नास्तीत्येतावता न तत्सद्भावे ऽप्यपह्नोतुं शक्य इत्याशयेन श्लोकं व्याचष्टे * यथैवेति * व्रीहियवद्रव्यभेदे ऽप्याग्नेयादेरभ्युदयनिमित्तदेवताभेदे ऽपि चाभेदसूचनार्थं यजमानादीत्यादिशब्देन द्रव्य-
४५६।२ देवतोपादानम्। एतदेव व्यवहारेण द्रढयति * तथा हीति * यागहोमादिकर्मव्यक्तिवद्यागव्यक्तीनां स्वरूपवैलक्षण्यानुपलब्धेर्भेदानुपपत्तिशङ्कानिरासार्थत्वेन प्राक् तस्मादिति व्याचष्टे * न चेति * यन्मात्रमिति श्लोकार्थमुपसंहरति * अतो ऽत्रेति * अतः शब्दपरामृष्टप्रामाण्याविशेषमुपपादयति * न हीति * इष्ट्यादिषु समस्तेषु प्रत्येकं वा भेदप्रत्ययस्यात्रौपाधिकत्वाद् बाधाभावाच्च न प्रामाण्ये विशेष इत्यर्थः । देशादिभेदे ऽपि विधेयरूपेण व्यक्त्यभेदोपसंहारमेवकारसूचितं विवृणोति * तेनेति * येन कारणेन शब्दान्तरादिषट्कावधिरेव भेदस्तेन व्यक्तिभेदे शब्दान्तरादिप्रमाणाभावाच्छब्दव्यक्तिवद्यागव्यक्तिषु नित्याभिव्यञ्जकभेदाद्भेदप्रतीतिरित्याशयः।ननु कर्मणः पूर्वापरीभूतानिष्पन्नत्वरूपत्वान्नित्यत्वं न सम्भवतीत्याशङ्क्य कूटस्थनित्यत्वाभावे ऽपि नित्यविधिविषयत्वरूपेण प्रवाहनित्यत्वसूचनार्थम् * तासु विधेयरूपास्वित्युक्तम् * एकविधिविषयभूतव्यक्तिवद्भिन्नविधिविषयभूतेष्विष्ट्यादिषु भेदप्रत्ययस्याभिव्यञ्जकभेदनिबन्धनत्वनिरासायैवकारः । ननु सङ्कल्पात्मकयागस्वरूपस्य मानसप्रत्यक्षगम्यत्वाद्विधेयरूपस्य च विधिगम्यत्वात्कथं देशाद्यभिव्यङ्ग्यतेत्याशङ्क्याह * तेभ्यश्चेति * विधेयरूपाश्रयस्य यागस्वरूपस्य देशादिभिर्निष्पादनादानिष्पन्ने चाश्रयरूपे तदाश्रयविधेयरूपाप्रतीतेर्देशादिना विधेयरूपाभिव्यक्तिरित्याशयः । द्रव्यदेवतामात्राद्यागसिद्धेर्न देशादिभ्यो यागसिद्धिरित्याशङ्क्य * फलेत्युक्तम् * देशादीतिकर्त्तव्यतारहिताद्यागात्फलासिद्धेर्विधेयरूपोपलक्षितफलसाधनत्वरूपेण यागस्य देशादिभ्यः सिद्धिरित्याशयः । यदा त्वथ प्रत्यक्षे नित्ये एवेति शब्दाधिकरणभाष्यानुसारादृ बुद्धिकर्मणोरपि वर्णवत् कूटस्थनित्यतेष्यते तदा यागनित्यत्वे पूर्वकल्पनानुपपत्त्या शङ्कानिरासार्थत्वेनायं ग्रन्थो ऽनुष्ठानं नित्ययागाभिव्यञ्जकमाश्रित्य शब्दाभिव्यञ्जकादुच्चारणाच्छब्दफलार्थप्रतीतिसिद्धिवत्तेभ्यो नित्ययागाभिव्यञ्जकेभ्यो ऽनुष्ठानेभ्यो यागफलस्य सिद्धिस्तेषां क्षणिकत्वाद्युक्ता ऽपूर्वकल्पनेत्येवं योज्यः । नन्वनित्याना-

मपि व्यक्तीनां नित्यसामान्योपलक्षितानां नित्यविधिविषयत्वोपपत्तेर्व्यक्तिनित्यत्वाभ्युपगमो वृथेत्याशङ्क्याह * यागत्वमेव चेति * विध्यन्तरविषयव्यावृत्तावान्तरसामान्यं विनानन्यविहितविधिविषयोपलक्षणायोगाद्यागत्वातिरिक्तस्य वावान्तरसामान्यस्याभावाद्व्यक्तीनामेव प्रवाहरूपेण कूटस्थत्वेन वा नित्यताभ्युपगन्तव्येत्याशयः। ननु भिन्नासु ज्योतिष्टोमादिव्यक्तिषु अभिन्नस्यैकाहादिशब्दस्य तज्जन्यस्य च प्रत्ययस्य यागत्वातिरिक्तावान्तरसामान्याभावे ऽनुपपत्तेस्तान्येष्टव्यानीत्याशङ्कते * नन्विति * एकोपाधियोगादुपपत्तेः हरिहराति * नेति * एकाहशब्दस्योपाधिमाह * एकेनेति* अहीनशब्दस्याह * द्व्यादिभिरिति * यजिचोदिताहर्गणयोगस्योपाधित्वं प्रागित्यनेन सूचितम। ननु द्वादशाहस्यापि यजिचोदिताहर्गणयोगेनाहीनत्वात्तस्मात्प्रागिति कस्मादुक्तमित्याशङ्क्याभ्युपैति चोदितत्वसत्रलक्षणस्यापि सद्भावेन तस्य केवलाहीनत्वासम्भवादित्याह * स त्विति * आसीरन्नित्यसिचोदितगतस्योपेयुरित्युपैतिचोदितगतस्य वा सततानुष्ठानस्य सत्रशब्दोपाधित्वमाह * तदवधिकमेवेति * द्वादशाहस्याप्यवधित्वेन सत्रतोक्ता सहस्रसम्वत्सरं तदायुषामसम्भवान्मनुष्येष्वित्यत्र षष्ठाधिकरणे सहस्रसम्वत्सरशब्दस्याहः सहस्रवाचितया वक्ष्यमाणत्वात्षड्त्रिंशत्सम्वत्सरादेस्तदवधिककालत्वे ऽपि पूर्वपक्षे स्थित्वा सहस्रसम्वत्सरपर्यन्ततोक्ता सर्वसत्रान्ते विधानाद्वा यागगतपशुसोमातिरिक्तहविष्कत्वमिष्टिशब्दस्य पशुहविष्कत्वं पशुशब्दस्य सोमहविष्कत्वं होमशब्दस्योपाधिमाह * हविर्विशेषेति * वस्तुवृत्तिकथनार्थं चेदमेकाहत्वाद्यवान्तरजात्यभावाभिधानं तत्सद्भावे ऽपि त्वनेकज्योतिष्टोमविश्वजिदादिविधेयसाधारण्येनैकाहत्वादेरसाधारणविधेयोपलक्षणत्वायोगाद्व्यक्तिनित्यताभ्युपगन्तव्येत्याह * अथापीति * स्वमतेन शब्दान्तरादिषट्कस्य विधेयरूपभेदे व्यापारमभिप्रेत्य भिन्नानामपि व्यक्तीनां यजिवाच्ययैकयागत्वजात्योपलक्षितानामेकविधिविषयत्वोपपत्तेर्विधिविशेषविषयत्वाच्च विधेयान्तरेभ्यो व्यावृत्युपपत्तेर्यागत्वातिरिक्तावान्तरजात्यभावो ऽभिहितः स्वरूपभेद एव तु शब्दान्तरादिषट्कव्यापाराभ्युपगमे विधेयान्तरव्यावर्त्तकप्रतिविध्यसाधारणावान्तरज्योतिष्टोमत्वादिजात्या विना विधेयान्तरेभ्यो व्यावृत्त्यनुपपत्तेर्ज्योतिष्टोमादिव्यक्त्याकृतिभेदे ऽप्यदोषाद्व्यक्तेरादिवद्व्यक्त्याकृतिभेदो नास्तीति यदुक्तं तदयुक्तमित्याशयेन * आहैवमिति * एकाहत्वादिज्योतिष्टोमत्वादीनि प्रतिविध्यसाधारणान्यवान्तरसामा-

न्यानि यदि कल्पन्ते ततश्च स एषायं ज्योतिष्टोम इत्यादिप्रत्यभिज्ञायाः सामान्यविषयत्वोपपत्तेर्दैर्ग्यादिभेदाद्वचक्तयो यदि भिन्ना भवन्ति तथा प्यदोष इत्यर्थः ॥ स्वरूपभेदाभेदचिन्तापक्षे भिन्नानां व्यक्तीनामेकविधिविषयत्वरूपेणैक्यस्यानादरसूचनार्थो ऽत्यन्तशब्दः पराभिमतत्रैलोक्यवर्त्तियागव्यक्तैक्याभ्युपगमे ऽप्यनुष्ठानभेदविषयत्वेन भेदप्रमाणानां व्यापाराद् प्रौक्ष्या दर्शयति * तथेति * कर्मभेदं कुर्यादिति भाष्यमस्मिन्पक्षे न युज्येतेत्याशयेनाशङ्कते * नन्विति * भाष्यस्यायुक्तत्वे ऽपि भेदचिन्ताप्रयोजनं तावत्सिद्ध्यतीति परिहरति * सर्वथा तावदिति * भाष्यमप्युपपादयितुमाह * तथापि त्विति * ग्रहयागेषु ज्योतिष्टोमवाक्येन ज्योतिष्टोमरूपतयानुष्ठानविधानात् ज्योतिष्टोमरूपतायाश्च सर्वाभ्यासेष्वैक्यान्नानुष्ठानभेदचोदनेति विशेषनिमित्तामित्याशयः विशेषनिमित्तान्तरमाह * अभ्यासेष्विति * ज्योतिष्टोमरूपावयव्युत्पादनात्तदपेक्षया ग्रहयागाभ्यासेष्ववयवबुद्धिर्न प्रयाजाभ्यासेष्वित्यतो ऽपि निमित्ताद्विशेषः । वैषम्यमित्यपिशब्दाभ्याहारेण योज्यम् । नन्वेवमपि कर्मभेदशब्देनैवंविधवैषम्यसूचनस्य किं प्रयोजनमित्याशङ्क्याह *एतत्ज्ञानस्य चेति* प्रयाजाभ्यासवत् ग्रहाभ्यासेष्वप्यनुष्ठानभेदचोदनायां धर्मग्रहणशक्तापूर्वभेदात्पशुसोमाधिकरणपूर्वपक्षवत्सिद्धान्ते ऽपि सोमविकारेष्वेकस्यैव ग्रहणस्य धर्मैः सकृदनुष्ठानेन च भवितव्यमिति प्रकृतितुल्यानुष्ठानं पशुसोमाधिकरणसिद्धान्तप्रयोजनं न सेत्स्यतीत्याशयः । प्रौढेरेव सबीजत्वार्थं भाष्यसम्मतिमाह * तस्मादिति * अस्यैव स्वमतत्वशङ्कानिवृत्त्यर्थं वक्ष्यमाणमेव भाष्यं स्वमतेनान्यथा व्याचष्टे * अथ चेति * बहुकृत्वो ऽपीति पूर्वपक्षभाष्योक्तार्थानुभाषणार्थं नन्विति भाष्यं विहितविधानानर्थक्यापत्तेर्विधिपुनः श्रुतेः कर्मान्तरविधिशक्त्यवगमादयुक्तमाशङ्क्य व्याचष्टे * नन्विति * उच्यतइत्यादिभाष्यं समिदादिशब्दानां देवताविधित्वस्य नवमे निराकरिष्यमाणत्वादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * तत्रेति * कीदृशो ऽभ्युपेत्यवाद इत्यपेक्षायां पुनःश्रुतेर्देवताविधानाक्षिप्तशक्तित्वात्कर्मभेदकत्वाभावे ऽपि गुणाद्भेदो भविष्यतीत्येवं रूपं वक्तुं समिद्वाक्येन शुक्ले यागे विहिते तनूनपादादिवाक्ये देवताविध्युपपत्तेर्न गुणाद्भेद इत्याशङ्कानिरासार्थं समिधो यजतीत्यादिभाष्यं व्याचष्टे * यत्तावदिति * भाष्यस्थस्य देवताशब्दस्योपलक्षणार्थत्वज्ञापनार्थो द्रव्यशब्दः गुणस्य भेदकत्वाय पूर्वकर्मसंयोगासम्भवाभिधानार्थं तत्रेति भाष्यं व्याचष्टे * उभयमपि चेति * अभ्युपेत्यवादस्वरूपार्थं स

४५७।४

एष इति भाष्यं व्याचष्टे * अवश्यं चेति * समिद्वाक्यन्यायमुत्तरेषु वाक्येष्वतिदिशति * एवमिति * अस्याप्यभ्युपेत्यवादत्वोपपादनार्थं गुणविधित्वं द्रव्यविधित्वेन देवताविधित्वेन चेत्येवं विकल्प्याद्यं पक्षं तावन्निरस्यति * गुणेति * द्वितीयान्तेन शब्देन द्रव्यविधिर्निरस्त इत्यर्थः। गुणविधित्वमपि कीदृगित्यपेक्षायामाह * विशेषेण चेति * प्रयाजे ऽपि चेदित्यत्राधिकरणे श्रुत्याविनियुक्तानां मन्त्राणां स्वार्थसमवायकल्पकत्वासम्भवान्मान्त्रवर्णिकदेवताप्राप्त्यभावेन तत्प्रख्यन्यायाभावान्नामधेयत्वानुपपत्तेर्विष्णुं यजतीतिवत्समिदादिशब्दानां द्वितीयान्तानां देवानां विधित्वं पूर्वपक्षयित्वा यजेः पूजावाचित्वाभावेन देवतायाः पूज्यमानकर्मत्वायोगात्तदुद्देशांशस्य वा समाप्तित्वेनाशब्दार्थत्वात्तत्कर्मणो ऽभिभूतत्वेन विवक्षानुपपत्तेरुद्देश्यत्वे ऽपि चानीप्सितत्वात्प्राधान्यलक्षणकर्मत्वानुपपत्तेः श्रुत्याविनियुक्तानामपि मन्त्राणामुपांशुयाजवद्यागाकाङ्क्षितदेवताकल्पकत्वोपपत्तेर्देवताविधित्वस्य निराकरिष्यमाणत्वादेवतार्विधित्वेनापि गुणविधित्वं न सम्भवतीति द्वितीयं पक्षं निरस्यति * नचायमिति * तस्मादिति सिद्धान्तोपसंहारभाष्यं फलतो यागभेदोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * अनेन च यस्मात्समिदादिवाक्यैः प्रधानयागानुवादे ४५८।१
पुनः पुनर्यागस्याक्रियमाणत्वादेवतान्तरान्वयकरणाशक्तेर्विध्यानर्थक्यापत्तिस्तस्माद्यागविधित्वमभ्युपगम्य विहितविध्ययोगात् भिन्ना यागाभेदेन कार्या इत्येवं भाष्यं व्याख्यातम्। ननु यागभेदे ऽपि प्रयाजसमाख्ययैककार्यत्वावगतेर्विकल्पस्य न्याय्यत्वान्नाभ्यासो युक्त इत्याशङ्कानिरासार्थं प्रत्यभ्यासं चेति भाष्यं तद्विवरणार्थं च न च यत्समिद्यागान्वयेन क्रतोरदृष्टमुपकाररूपं क्रियते तदेव तनूनपाद्यागान्वयेन तयोर्यागयोर्भिन्नत्वेन तदनुनिष्पाद्यादृष्टभेदावगतेः समाख्यायाश्च प्रधानप्राग्भावमात्रनिमित्तत्वेन कार्यभेदे ऽप्यविरोधादित्यभिधानाय यागैक्ये ऽप्यनेकदेवतान्वयसम्पादनायानुष्ठानाभ्यासोपपत्तेः पूर्वपक्षप्रयोजनाभावाशङ्कानिरासार्थं च प्रयोजनभाष्यं स्पष्टत्वान्न व्याख्यातम्।

॥ आधाराद्याग्नेयादीनामङ्गाङ्गिभावाधिकरणम् ॥ ३ ॥

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ २ ॥

समप्राधान्याङ्गाङ्गिभावचिन्ताया लक्षणासङ्गतिं पौनरुक्त्यं चाशङ्कते * समस्तानीति * एवं समामनन्तीति प्रकारवाचिनैवंशब्देनानूयाजादिसूचनात् * समस्तानित्युक्तम् * आधारसमिष्टयजुषोर्होमत्वे ऽपि यागेष्वेव समप्राधान्यशङ्कोपपत्तेर्भूम्ना यागशब्दः अवघातादौ गुणाप्रधानकर्मत्वचिन्ताया लक्षणार्थत्वाभावे ऽपि यथा प्रासङ्गिकसङ्गतिस्तथापीह नास्तीति केन * नामे त्युक्तम् * विशेषतश्चेयं चतुर्थोपान्त्ये करिष्यमाणत्वात्पुनरुक्तेतीयमित्यनेनोक्तम्।असङ्गतिं तावद्विवृणोति * अभ्यासेति * लक्षणार्थत्वशङ्कामुपन्यासपूर्वं दूषयति * केचिदिति * पौनरुक्त्यं विवृणोति * महतेति * श्लोकार्थमुपसंहरति * तस्मादिति * चिन्ताद्वयं चैकस्मिन्नधिकरणे न युक्तमित्याह * य एवमिति * शब्दान्तरत्वादित्यपि भाष्यमयुक्तमित्याह * अपि चेति * श्लोकं व्याचष्टे * शब्दान्तरत्वादिति * ननु प्रयोगचोदनाभावादर्थैकत्वमविभागादितिवत्तन्त्रेण चिन्ताद्वयं भविष्यतीत्याशङ्क्य * आह न चेति * समप्राधान्याङ्गाङ्गिभावयोः पक्षयोर्हेतू न दृश्येते इत्याशयः ।विध्यनुवादचिन्तैवाधिकरणार्थो नाद्येति समाधत्ते * तस्मादिति * द्वयोरेवोदाहरणत्वे वाक्यान्तरानर्थक्यमाशङ्क्याह * तत्रेतरेषामिति * कस्मात्समप्राधान्याङ्गाङ्गिभावो नाधिकरणपक्षावित्याशङ्क्य पौनरुक्त्या सङ्गतिहेत्वभावात्मकयुक्तित्रयपरामर्शायोक्तशब्दः।नन्वेवमपि प्रकृतानां कर्मणामनुवदितारावपूर्वयोर्वा कर्मणोर्विधातारावितिं- प्रकृतापूर्वशब्दाभ्यां भेदाभेदयोरपि चिन्यत्वप्रतीतेश्चिन्ताद्वयापत्तिरित्याशङ्क्याह * तदिहेति * विध्यनुवादसिद्धौ पूर्वन्यायादेव भेदाभेदयोः सिद्धेः पृथगचिन्यत्वात्त्रिकस्य त्रिकस्यैकपक्षतेत्यर्थः । किमर्थं तर्हि त्रयोपन्यास इत्याशङ्क्य * उत्तरफलत्वेनेत्युक्तम् * विधातृत्वे ऽपि कर्मभेदाभावे पुनर्विधानार्थवत्त्वाय फलवाक्यस्थद्विवचनान्तदर्शपूर्णमासशब्दापेक्षितद्वित्वसम्पादनार्थमाग्नेयादिसमुदायद्वयविधातृत्वापत्तेः सिद्धान्तवत्तेषामेव फलान्वयेनेतरेषामङ्गत्वात्समप्राधान्यासिद्धेरनुवादत्वे ऽपि चाग्नेयाद्यतिरिक्तकर्मानुवादित्वात्तेभ्यो ऽन्यत्वे सत्याग्नेयादिसमुदायद्वयाकल्पेः फलवाक्यस्थदर्शपूर्णमासशब्दस्याग्नेयादिषट्कविषयत्वाप्रसिद्धेर्यजिविशेषकत्वायोगात्समप्राधान्यापत्त्याङ्गाङ्गिभावासिद्धेरुत्तरोत्तरस्य फलत्वज्ञापनार्थं त्रयोपन्यास इत्याशयः । नन्वेवमप्याभ्यासलक्षणभेदातिप्रसङ्गापवादार्थत्वेनाधिकरणस्य सङ्गतिसिद्ध्यर्थं भेदाभेदाभ्यां च विना विध्यनुवादत्वमात्रात्समप्राधान्याङ्गाङ्गिभावासिद्धेः प्रयोजनाभावेनाधिकरणानारम्भत्व-

४५९।३

प्रसङ्गाद्भेदाभेदावेवोपन्यसनीयावित्याशङ्क्याह * त्रितयस्य चेति * ४६०।१
भेदाभेदयोः प्राधान्येन विचार्यत्वे ऽप्युपायभूतविध्यनुवादद्वारा फलभूतसमप्राधान्याङ्गाङ्गिभावद्वारा चेष्टभेदाभेदसिद्धिं मत्वा न श्रुत्योपन्यास इत्याशयः। पश्चात्तर्हि प्रकृतापूर्वशब्दाभ्यां तयोः श्रुत्योपन्यासः किमर्थमित्याशङ्क्याह *तत्र चेति * नन्वादौ भेदाभेदावुपन्यस्य तत्सिद्ध्यर्थत्वेन विध्यनुवादचिन्ताकस्मान्न कृतेत्याशङ्क्ते * किमर्थं पुनरिति * फलद्वारोपन्यासो भाष्यकृत्प्रक्रियेति केषांचित्परिहारमाह * एषा हीति * स्वमतेन लिङ्गदर्शनानुसारेणैवं कृतमिति परिहरति * अथ वेति *नन्वेवमपि तत्रेति सन्देहभाष्यावयवो ऽनर्थक इत्याशङ्क्याह * तत्रेति * आग्नेयादिवाक्यानां कर्मविधायकत्वे सत्येव विद्वद्वाक्ययोस्तद्व्यतिरिक्तकर्मविधायित्वादेकः पूर्वपक्ष इत्युक्तशब्दान्तरत्वादिति भाष्यान्नेदृक् पूर्वपक्षः प्रतीयत इत्याशङ्क्य * समप्राधान्यद्वारेणेत्युक्तम् * द्वितीयपूर्वपक्षाभिप्रायसूत्रेति भाष्यावयव इत्याशयः। अनेन च विद्वत्संयुक्तावप्याख्यातप्रत्ययौ विधातारावित्यपिशब्दाध्याहारेणाद्यपूर्वपक्षवचनव्यक्तौ तावेवेत्येवशब्दाध्याहारेण चावृत्त्या द्वितीयपूर्वपक्षवचनव्यक्तावथ वेति भाष्यावयवं व्याख्याय विद्वद्वाक्याभ्यामेव कर्मविधावाग्नेयाद्धि वाक्यानर्थक्याशङ्कानिरासार्थत्वेन तत्रेति भाष्यावयवो व्याख्यातो भवति * किं तावदिति * पूर्वपक्षभाष्यं व्याचष्टे * प्रथमं तावदिति * व्यतिरेकशब्देनाद्यपूर्वपक्षार्थतोक्ता भेदे च दृष्टसामर्थ्यादित्यनेनोक्तमाक्षेपं परिहरति * यद्यपि चेति * अभ्यासलक्षणभेदातिप्रसङ्गापवादार्थत्वे ऽप्यधिकरणस्य समप्राधान्ये सत्यङ्गाभावात्किमपेक्ष्य प्रधानतेत्याशङ्क्यायागानामाघारादीनां राजसूयवदङ्गत्वसूचनार्थं शब्दान्तरेणायागेभ्यो भेदः पूर्वपक्षितः। ननु विद्वद्वाक्ययोरनुवादत्वेन विधातृत्वाभावान्न पूर्वन्यायद्वयविषयतेत्याशङ्क्याह * न चेति * प्रकृतयागानुवादे च प्रयाजादेरपि प्रकृतत्वाविशेषेणानुवादापत्तेः सञ्ज्ञायाश्चाप्रसिद्धत्वेनाविशेषकत्वात्फलवाक्यस्थद्विवचनापेक्षिताग्नेयादिसमुदायद्वयसम्पादनमपि प्रयोजनं न सम्भवतीत्याशयेनाह * न चैषेति * न च लिङाद्यभावेनाविधातृ- ४६१।१
तेत्याह * वर्त्तमानेति * यावदुक्थो नोपाप्नोति तावदुपाप्नोतीत्यर्थवादात् पौर्णमासीवाक्यस्य यावदतिरात्रेणोपाप्नोति तावदुपाप्नोतीत्यर्थवादाच्चामावास्यावाक्यस्य विधित्वनिश्चयः यच्छब्दोपबन्धो ऽपि न विधिशक्तिं व्याहन्तीत्याह * सत्यपि चेति * विधायकत्वे च सत्यभ्यासाद्भेदसिद्धिरित्याह * न चेति * नन्वर्थवादता-

नयाः कस्मान्न कल्पितेत्याशङ्क्याह * न चेति * नन्वरूपत्वात्कर्मविधिर्न सम्भवतीत्याशङ्क्ते * किं पुनरिति * परिहरति * तदिति * हेत्वर्थतया साधारणशब्दं व्याचष्टे * सर्वस्मै वा इति * ननु विहिताज्यद्रव्यकेष्वेवानेन ध्रौवत्वमात्रविधिरित्याशङ्क्योपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतत्वाद्यथा कामी प्रतीयेतेति सूत्रेण दशमे हविर्विशेषाश्रवणेनोपांशुयाजे द्रव्यानियमं पूर्वपक्षयित्वा ध्रौवाद्वा सर्वसंयोगादित्यनेनाविहितद्रव्यकेषु ध्रौवविधिर्वक्ष्यमाणो दृष्टान्ततः। यच्च तत्र भाष्यकृता आज्यस्यैव नावित्यनेनाज्यविधिमाशङ्क्यैवमप्यनियमो यत्किं चिदाज्यमिति वक्ष्यते तदभ्युपेत्यवादमात्रमित्याशयः । ननु तृतीये मिथश्चानर्थसम्बन्ध इत्यत्राज्यभागक्रमान्नानेन वार्त्रघ्नीवृधन्वत्याख्यमन्त्राणां तदङ्गत्वस्य वक्ष्यमाणत्वात्कथमनयोः कर्मणोस्तद्वशाद्देवताप्राप्तिरित्याशङ्कां निरस्यन्मात्रवर्णिकं व्याचष्टे * तथेति * आग्नेयादेर्निर्ज्ञातदेवतात्वनार्थान्तरवाचिमन्त्रान्वययोगात्तादर्थ्येन वाक्यविनियोगानुपपत्तावपि विद्वद्वाक्यविहितयोः कर्मणोरनिर्ज्ञातदेवतात्वेनैतन्मन्त्रान्वयाविरोधात् वाक्येन क्रमं बाधित्वैतदङ्गतया विनियोगोपपत्तिरनयोरित्यनेन सूचिता । नन्वनुवाक्याविधिस्थयोः पौर्णमास्यमावास्याशब्दयोः कालवाचित्वात्कथं वाक्येन कर्माङ्गतेत्याशङ्क्याह * न हीति * ननु कर्मणिलक्षणापत्तेः श्रुत्या कालार्थतैवोचितेत्याशङ्क्ते * नन्विति * कालस्याननुष्ठेयत्वेन मन्त्रानाकाङ्क्षत्वात्तदङ्गत्वे मन्त्रस्यानर्थक्यापत्तेरर्थवत्त्वाय लक्षणाप्युचितेति परिहरति * किं हीति * ननु कर्मणोऽधिकरणत्वायोगात्तद्वाचित्वे सप्तमी न युज्येतेत्याशङ्क्याह * दृष्टश्चेति * अधिकरणस्याधेयसंस्कार्यत्वेनागारे गावो वास्यन्तामित्यादौ प्राधान्यदर्शनाल्लक्षणयाधिकरणवाचिन्याः सप्तम्याः प्राधान्यार्थता युक्तेत्याशयः । नन्वेकस्मिन्कर्मण्यनुवाक्याद्वयानर्थक्यं याज्यानुपलब्धेश्च यागानुष्ठानासिद्धिरित्याशङ्क्याद्वयं चतुर्द्धा परिहरति * तेनेति * अनुवाक्याद्वयस्यैकयागार्थत्वाद्विकल्पो याज्यापि चाश्रुता देवतलक्षणयाज्यानुवाक्या इत्यसमाम्नातयाज्यानुवाक्याविषये यागाङ्गदेवतावाचियाज्यानुवाक्याकल्पनस्मृतेराग्नेय्यनुवाक्यापक्षे याज्याप्याग्नेयी सौमीपक्षे सौमीकल्पेत्येकः परिहारः इतरेतरयोर्विहितद्वन्द्वापवादत्वेनैकशेषस्यापीतरेतरयोगावाचित्वादनुवाक्याद्वयस्य समुच्चयप्रतीतेस्तद्वशेनाग्नीषोमयोर्देवतात्वकल्पनाद्वयोरर्थवत्त्वं याज्या च तदानुरूप्येणैवाग्नेयी सौमी चान्या कल्पेति द्वितीयः । कर्मद्वयाभिप्राया

वीप्सा कल्पनालाघवे ऽप्येकैव द्विदेवत्या याज्येति तृतीयः । एकस्मिन्कर्मण्यनुवाक्याद्वयानर्थक्याद्याज्यानुवाक्यात्वे ऽपि चेतरेतरयोगोपपत्तौ अनुशब्दस्य च याज्यायामपि प्रैषपश्चाद्भावेनाविरोधात्समुच्चितयोश्चाङ्गत्वेनाग्नीषोमदेवत्यकर्माध्यवसानान्मनोतान्यायेनैकदेशद्वारा तत्प्रकाशनेनोभयोः सम्बादोपपत्तेरश्रुतकल्पनापरिहाराच्च श्रुतयोरेवं मध्ये ऽनुवाक्यैका याज्यैकेति चतुर्थः। आज्यभागयोस्तर्ह्यनुवाक्याकल्पदेवतानुपपत्तेः साकाङ्क्षत्वं स्यादित्याशङ्क्याह * आज्यभागयोस्त्विति * तौ होचतुरग्नीषोमौ किमावयोस्ततः स्यादित्यग्नीषोमयोः प्रक्रान्तयोः नाविति द्वितीयया याजिकर्मत्वनिर्देशाद्विष्णुं यजतीत्यादिवदेवतात्वावधारणेत्याशयः । जुषाणो ऽग्निराज्यस्य वेतु जुषाणः सोम आज्यस्य वेत्विति याज्यायास्तु केन चित्साकाङ्क्षतानाशङ्क्योत्याह * याज्येति * नन्वनुवाक्ययोर्बाधितत्वात्तत्साकाङ्क्षत्वं स्यादित्याशङ्क्याह * अनुवाक्येति * रूपवन्तावित्युत्तरार्द्धं व्याचष्टे*तस्मादिति * पूर्वपक्षभाष्यार्थं व्याख्यातमुपसंहरति * अतश्चेति * ननु भेद ऽपि चतुर्थीपान्त्यन्यायेन दर्शपूर्णमासाख्यानामेव यागानां प्राधान्यान्नेतरेषामङ्गत्वात्समप्रधान्यसिद्धिरित्याशङ्क्ते * भेद इति * तमेव न्यायं प्रश्नपूर्वकमाह *कुत इति* पृथक्केनाभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं तत्सन्निधावसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुतान्यसम्बन्ध इति सिद्धान्तसूत्रावयवं केषु चिदेवेत्यध्याहारेण व्याख्यातुं पूर्वार्द्धं दर्शपूर्णमासाभ्यामिति द्विवचनश्रुतेर्दर्श इत्यभिधानस्य पूर्णमासशब्दवाच्यात्पूर्णमास इत्यस्य च दर्शशब्दवाच्यात्पृथक्केन निवेशः प्रतीयते स च प्रकृतयागमात्रवाचित्वे पृथक्कार्योगात्केषु चिदेव यागेषु युक्तो न सर्वेष्वित्यर्थः।दर्शशब्दस्याप्रसिद्धार्थत्वात्पूर्णमासशब्दवच्च केन चिद्यागनाम्ना सारूप्याभावात्कथं यागविशेषे निवेश इत्याशङ्क्यारम्भणीयाख्यशेषे दर्शो वा एतयोः पूर्वः पूर्णमास उत्तरो ऽथ यत्पूर्णमासं पूर्वमारभते तद् यथापूर्वं क्रियते तस्मात्पूर्णमासमारभमाणः सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावास्या वै रस्वती पूर्णमासः सरस्वानुभावेतौ यथा पूर्वं कल्पयित्वा ऽऽरभतइत्यमावास्याख्ययागविशेषस्य दर्शव्यपदेशाच्चन्द्रदर्शनाद्वामावास्यायां तिथौ दर्शव्यपदेशात्प्रतिपद्दर्शषष्ठीषु न कुर्यादन्तधावनमित्यादौ चामावास्यायां दर्शव्यपदेशात्प्रसिद्धार्थतोक्ता अतो यागविशेषाणां फलवत्त्वात्फलवत्त्वस्यैव च प्राधान्यापरपर्यायमुख्यलक्षणत्वात्सन्निहितस्य फलासंयुक्तस्यासंयुक्तं प्रकरणादिति कर्त्तव्यतार्थित्वादिति तृतीयाधिकरणन्या- ४६२।१

येनाङ्गत्वकारणभागित्वादश्रुतान्यफलान्वयकल्पने च गौरवापत्तेरङ्गतैव युक्तेति सूत्रार्थः सङ्क्षेपेणोत्तरार्द्धेनोक्तः । श्लोकं व्याचष्टे * दर्शेति * विद्वद्वाक्याभ्यां समुदायद्वयाकरणे दर्शपूर्णमासनाम्नो प्रसिद्धार्थत्वेन यज्यर्थाविशेषत्वान्न चतुर्थान्त्यन्यायमुदाहरति * यथेति * ज्योतींषि वा एतानि य एते स्तोमा इत्यर्थवादे त्रिवृदादिस्तोमेषु ज्योतिष्टवव्यपदेशात् ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति च विधौ सोमयागस्य त्रिवृदादिस्तोमयोगावगमात्प्रसिद्धार्थेन नाम्ना यज्यर्थो विशेष्यतइत्यर्थः । यजिना नामार्थविशेषणे चतुर्थस्यैव चतुर्थपादाद्यन्यायमुदाहरति*तथेति * राजसूयेन स्वाराज्यकामो यजेतेति फलविधिपरे वाक्ये यजेः प्रकृतेष्टिपशुसोमयागमात्रानुवादित्वावधारणात्प्रसिद्धार्थेन यजिना नाम विशेष्यतइत्यर्थः । उत्तरार्द्धं व्याचष्टे * तदिहेति * ननु प्रकृतयागमात्रविषयत्वे दर्शपूर्णमासशब्दस्य तदवयवभूतयोर्दर्शपूर्णमासशब्दयोर्द्विवचन
४६३।४ स्य च को ऽर्थ इत्याशङ्क्याह * ततश्चेति * अवयवार्थो समासार्थश्च द्वित्वं चाविवक्षितानि यस्मिन्पद इति विग्रहः समासार्थेतरेतरयोगविवक्षायामवयवार्थाविवक्षानुपपत्तेस्तदविवक्षाभिधानम।अर्थान्तराविवक्षायामपि करणत्वविवक्षया यजिसामानाधिकरण्याद्राजसूयनामवद्यागनामतेत्युक्ते ऽवयवार्थाविवक्षायां प्रवृत्तिनिमित्ताभावात्कथं यागनामतेत्याशङ्क्य वर्णपङ्क्तिमात्ररूपत्वेन रूढितोक्ता।ननु रूढियोगमपहरतीति न्यायेनावयवार्थाविवक्षायामपि द्विवचनार्थाविवक्षा न युक्तेत्याशङ्क्याह * सुपामिति * नन्वमावास्यापौर्णमासीकालवाचिनोदर्शपूर्णमासशब्दयोस्तद्योगिष्वाग्नेयादियागेषु द्विवचनस्य च द्वित्वयोगिष्वाज्यभागादिषु लक्षणया प्रसिद्धिसम्भवान्नाप्रसिद्धार्थतेत्याशङ्कते * कथं पुनरिति * नन्वेवमपि प्रकृतिप्रत्ययसमुदायात्मकस्य पदस्याप्रसिद्धार्थत्वाद्यज्यनुरोधवृत्तित्वमपरिहार्यमित्याशङ्क्य निरस्यन् श्लोकं व्याचष्टे * तन्नामेति * लब्धार्थप्रतिपादकानुरोधेनेवाविभक्तिव्याख्याविभक्त्यनुरोधेन वा प्रातिपदिकव्याख्या भविष्यतीत्याशयः । स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तरानन्वयवत्पदस्यापि स्वार्थासमाप्तस्य पदान्तरानन्वयान्नैकैकांशप्रसिद्धिमात्रेण यजिविशेषकता युक्तेति परिहरति * तदिति * श्लोकं व्याचष्टे * यद्यपीति * नन्वाग्नेयवाक्येनासम्भवत्समुच्चयपौर्णमास्यवास्याकालद्वयगुणककर्मविधानाद् गुणानुरोधेन च प्रधानावर्त्ययोगाच्चशब्दयोगाच्च कालविकलपानुपपत्तेरेककर्मासम्भविगुणद्वययोगेनाग्नेययागद्वित्वावगतेस्तयोश्चैकवाक्यविहितत्वावा-

न्तरसामान्यावच्छेदेनामावास्यापौर्णमासीकालयोर्गिषु यागान्तरेषु सत्स्वपि द्वित्वसंख्यावृत्त्युपपत्तेर्द्वयोरपि प्रकृतिप्रत्ययार्थयोस्तत्र सद्भावाद्दर्शपूर्णमासशब्दस्याग्नेययागद्वयवाचित्वेन प्रसिद्धत्वाद्यजिविशेषकत्वं भविष्यतीत्याशङ्क्याह * न चेति * विद्वद्वाक्ययोः प्रकृतयागानुवादित्वाभावे पौर्णमास्यमावास्याशब्दयोस्तद्वाच्यकालयोगिप्रकृतयागनामत्वानवगतेस्तयोर्वा लक्षणया प्रकृतयागप्रवृत्तावपि दर्शपूर्णमासशब्दयोस्तात्पर्यावधारणहेतुसामानाधिकरण्याभावात्पूर्णमासशब्दस्य किं चिद्वर्णसाम्याद्वाचकपौर्णमासीशब्दोपस्थापनेनाख्याभूतपौर्णमासीशब्दविकारमात्रत्वाद्वा ततो ऽनन्यत्वेन दर्शशब्दस्य जघन्यवृत्तिसाम्याद् गौणत्वशब्दोक्त्या विरुद्धलक्षणयामावास्याशब्दैकार्थ्यकल्पनादर्शपूर्णमासशब्दस्य प्रकृतपौर्णमास्यमावास्याकालयोगियागविषयत्वाध्यवसानं न भवतीत्यर्थः। ननु ज्योतींषि वा एतानि य एते स्तोमा इतिवद्वाचकशब्दसामानाधिकरण्याभावे ऽप्यर्थतैते मोदमाना इवेत्यत्र धान्यशब्दस्य दीर्घशूकविषयत्वमाग्नेय्यागीमित्यत्र चाग्नेयीशब्दस्य प्रकृताग्नेयीविषयतावसीयतइत्याशङ्क्य *अर्थेत्युक्तम् * शब्दान्तरवदर्थप्रकरणाभ्यामपि सामानाधिकरण्याध्यवसानं न भविष्यतीत्याशयः । नन्वाग्नेययागयोः पौर्णमास्यमावास्यानामत्वानवगतेर्दर्शपूर्णमासशब्दस्य तद्विषयत्वाध्यवसानाभावे ऽपि विद्वद्वाक्यस्थयोः पौर्णमास्यमावास्याशब्दयोरर्थाक्षिप्तसाध्यांशसामानाधिकरण्येनापूर्वयागनामत्वावगतेर्दर्शपूर्णमासशब्दस्य तद्विषयत्वाध्यवसानात्प्रसिद्धार्थत्वेन यजिविशेषकत्वोपपत्तेर्विद्वद्वाक्यविहितयोरेव यागयोः फलवत्त्वेन प्राधान्यादितरेषामङ्गत्वं भविष्यतीत्याशङ्क्ते * कस्मात्पुनरिति * एतदेव सिद्धान्तन्यायतुल्यत्वापादनेनोपपादयति * तथा हीति * शङ्कोत्तरत्वेन श्लोकं व्याचष्टे * यदीति * पौर्णमास्यामावास्याशब्दयोर्यागनामत्वे ऽपि ४६४।१
दर्शपूर्णमासशब्दस्य यागनामत्वानवधारणात्कालयोगेन च वृत्तेराग्नेयादिष्वपि तुल्यत्वेन विद्वद्वाक्यविहितयोर्यागयोराग्नेयवदेकवाक्यविधानाभावे भावान्तरसामान्यावच्छेदाभावाद्वित्वसंख्यापरिच्छेद्यत्वानुपपत्तेर्नाष्टानां मध्ये तयोर्निष्कर्षः सम्भवतीति परिहरति नैतदिति श्लोकं व्याचष्टे * न हीति * ननु निष्कर्षायोगे ऽपि ययोः कयोश्चिद्वयोः फलान्वयो भविष्यतीत्याशङ्क्ते * स्यादिति * नित्यं वाष्टानां मध्ये ययोः कयोश्चिद्वयोः फलवत्त्वाय दर्शपूर्णमासशब्देन ग्रहणं विकल्पेन वेति विकल्पाद्यपक्षे निर्द्धारणहेत्वभावात्प्रमाणाभावो द्वितीये चैकस्याङ्गप्रधानत्वविरोधापत्तिरिति परिह-

ति * तदिति * श्लोकं व्याचष्टे * विनेति*अतिदेशे सन्देहापत्ति-
श्च द्वितीये पक्षे स्यादित्याह*·उभयात्मनां चेति * अभ्युपेत्यवादेन
चैतदुक्तं वस्तुतस्त्ववान्तरसामान्यावच्छेदं विना द्वित्वानवधार-
णान्नैको ऽपि पक्षः सम्भवतीत्याह * सर्वेति * ननु सिद्धान्ते ऽपि
४६५।४ षण्णां कथं द्वित्वापत्तिरित्याशङ्क्याह * सिद्धान्ते त्विति*नन्वेवं द्वि-
वचनोपपत्तावपि प्रातिपदिकयोरप्रसिद्धार्थत्वाद्यजिविशेषकता न यु-
क्तेत्याशङ्क्याह * तद्वशेन चेति * पूर्वपक्षे समुदायत्वानापादनाद्दो-
षमभ्याह * नन्विति*ननु समुदायगतद्वित्वाभावे ऽपि कालगतद्वि-
त्वापेक्षं द्विवचनं भविष्यतीत्याशङ्क्ते * अथेति * विद्वद्वाक्या-
भ्यां फलवाक्यस्थदर्शपूर्णमासशब्दगतद्वित्वसम्पत्त्यर्थं समुदायद्व्या-
नापादने दर्शपूर्णमासशब्देन तात्पर्यप्रमाणाभावादाग्नेयादिविषयत-
यानवधारितेनाख्यातं न विशेष्टुं शक्यमिति परिहरति * नेहशेने-
ति * कालगतायाः संख्याया यागान्वयकल्पना न शक्येत्याह
* न चेति * समुदायगतसंख्यान्वयस्तु समुदायिनां युक्त इत्याह
* समुदायेति * पूर्वपक्षप्रयोजनमुपपादितमुपसंहरति * तस्मा-
दिति * सूत्र द्वेधा योजयन् तत्सिद्धान्तमाह * तथेति * पौर्ण-
मासीशब्देनोदाहरणीभूतविद्वद्वाक्ययोरुपलक्षणं प्रकरणशब्दस्य क-
र्मव्युत्पत्तावालम्बनपदाध्याहारो भावव्युत्पत्तौ सहकारिपदाध्याहार
इत्यर्थः । द्वितीयव्याख्याने ऽपि प्रकृतानामिति भाष्यानुसारं व-
क्तुम् * ततश्चेत्युक्तम् * रूपावचनस्य प्रकृतानुवादहेतुत्वोपपाद-
नार्थं य एवं विद्वानित्यादिभाष्येण सञ्ज्ञया कर्मविशेषाभिधानाद्रूपं
च विनाविशेषाप्रतिपत्तेर्विध्यसम्भवो ऽभिहित आधाराग्निहोत्रादि-
करणे सञ्ज्ञोपबन्धादित्यस्मिन्सूत्रे व्याख्यास्यमानत्वादुपेक्ष्य स्वयं
विधिस्वभावमेव तावत्प्रश्नपूर्वमुपपादकमाह * कुत इति * भा-
ष्योक्तामप्युपपत्तिमनुसन्दधानः श्लोकं व्याचष्टे * न हीति * वि-
४६६।२ ध्यनुरोधो ऽननुष्ठेयसामान्यवाचित्वनिरासायानेनेति विशेषणेनोक्तः
अव्यक्तासु तु सोमस्येत्यनेन न्यायेनातिदेशाद्रूपलाभमाशङ्क्याव्यक्त-
चोदितत्वेन सोमधर्मातिदेशस्य वक्ष्यमाणत्वादिह च श्रुतस्याख्यातस्य
यच्छब्दोपबन्धेनाविधायकत्वाद्विध्यध्याहारस्यैव विधानयोग्यरूपव-
त्कर्मावगतिसापेक्षत्वादातिदेशिकरूपालाभाद्विध्यध्याहारे विध्यध्या-
हाराच्च विधेयत्वेनातिदेशिकरूपलाभे ऽन्योन्याश्रयापत्तेर्नातिदे-
शाद् रूपलाभः सम्भवतीति सूचनार्थो ऽपूर्वशब्दः।नन्वनुवादो ऽप्य-
ज्ञातरूपस्य न सम्भवतीत्याशङ्क्यानुवादस्य बुद्धिविपरिवृत्तिनिमित्त-
त्वेन प्रकृतविषयत्वात्प्रकृतानां च ज्ञातरूपत्वेनानुवादसम्भवाभिधा-

नार्थम् अथ त्विति भाष्यं व्याचष्टे * प्रकृतेति * पूर्वपक्षोक्तं द्रव्यदेवतमनुभाष्येण पूर्वं निरस्यति * नन्विति * सत्यमित्युपहासः सूचितः । यागमात्रसाधारणत्वेन स्थितस्य ध्रौवस्य सञ्ज्ञाविशेषावच्छिन्नयागविशेषानवच्छेदकत्वात्सत्यपि लाभेनावच्छेदकत्वाख्यारूपतास्तीत्याशयः । यथाकथं चिदित्यनेन ध्रुवावाक्यस्यार्थवादसरूपस्याप्यन्यथानुपपत्त्या क्लेशेन ध्रौवत्वविशिष्टाज्यप्रापकत्वात्प्राप्तिक्लेशः सूचितः । मान्त्रवर्णिकदेवताप्राप्तिमाशङ्कितां निरस्यति * न हीति * न केवलं विरोधापत्तेः कर्मवाचित्वं न युक्तं किं तु लाक्षणिकत्वादपीत्याह * किं चेति * ननु लक्षणापि शब्दवृत्तिप्रकार एवेत्याशङ्क्याह * यदि हीति * सप्तमीनिर्देशादपि कालवाचितैव युक्तेत्याह * अपि चेति * कालस्य मन्त्रान्वयायोगात्तद्वाचित्वानुपपत्तिर्योक्ता तामप्यनुभाष्य निरस्यति * यस्त्विति * नन्वाज्यभा- ४६७।१
गयोः कालयोगाश्रवणात्प्रधानद्वारा कालयोगाश्रयणे वा पौर्णमासीस्थप्रधानाङ्गभूतयोरिति च युगपच्छ्रुतिलक्षणाविरोधापत्तेः कालतश्च व्यवस्थाश्रयणे विकृतिषु य इष्टयेति वाक्येन कालविकल्पविधानात् पौर्णमासीकालोपांशुयाजाग्नीषोमीयविकारो यदामावास्यायां क्रियते ऽमावास्याकालसान्नाय्यविकारो वा पौर्णमास्यां तदा पौर्णमासकालप्रधानाङ्गभूतयोराज्यभागयोर्वृधन्वतीप्राप्तेरमावास्याकालप्रधानाङ्गभूतयोश्च वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधप्रसङ्गात्प्रधानसादृगुण्यार्थत्वाच्चाङ्गगुणानुष्ठानस्य तद्बाधे प्रधाने वैगुण्यापत्तेः कर्मवाचित्वेना ऽपि च पौर्णमास्यमावास्याशब्दयोः पौर्णमास्याख्यकर्माङ्गभूतयोराज्यभागयोर्वात्रघ्न्यौ अमावाख्यस्याकर्माङ्गभूतयोर्वृधन्वत्यौ इति कर्मकृतव्यवस्थार्थत्वेन वाक्यस्याविरोधोपपत्तेस्तत्र जयानिति यच्चाज्यभागव्यतिरेकजनितप्राधान्यार्थतैव युक्ता नापूर्वयोः कर्मणोः मन्त्रविधानार्थतेति स्वमतेन मान्त्रवर्णिकदेवताकल्पनानुपपत्तिप्रकारमाह * किं चेति * श्लोकं व्याचष्टे * सर्वत्रैवेति * यत्वनुवाक्याद्वयानर्थक्यपरिहारायाश्रुतयाज्याकल्पनपरिहाराय च श्रुतयोरेव वार्त्रघ्नीवृधन्वत्योर्मध्ये ऽनुवाक्यैका याज्या चैकेत्युक्तं तदनुभाष्य दूषयति * यच्चैति * अज्ञातदेवतात्वादेवापूर्वयोः कर्मणोः प्रकाश्येन देवतारूपेण प्रकाशकतया मन्त्रस्यानपेक्षितत्वात्प्रकाशनाख्ये याज्यानुवाक्याकार्ये वार्त्रघ्नीवृधन्वत्योर्वा विनियोगाद्याज्यात्ववदनुवाक्यात्वमपि न स्यादित्याशयेनाह * अपि चेति * मन्त्रार्थस्य कर्मसमवाये सिद्धे मन्त्रस्यालिङ्गविनियोज्यत्वापत्तेस्तदभावाभिधानेन मन्त्रार्थस्य कर्मसमवायासिद्धिः प्रकाश्यकानपेक्षत्वायोक्ता वाक्यी-

यविनियोगान्यथानुपपत्त्या मन्त्रार्थस्य कर्मसमवायकल्पनामाशङ्क्य * वाक्ये चेत्युक्तम् * कर्मसमवेतार्थप्रकाशकत्वं विना मन्त्रस्य करणात्वायोगात्करणत्वश्रवणे तदन्यथानुपपत्त्या मन्त्रार्थस्य कर्मसमवायकल्पना नान्यथेतित्याशयः । अनुपूर्ववचियोगेनानुवाक्यात्वमाशङ्क्याज्ञातदेवते कर्मणि विहितायां वैष्णव्यां व्यभिचारोऽभिहितः । ननु सन्निपत्योपकारित्वसिद्धये ऽनुवाक्यात्वं कल्पयिष्यतइत्याशङ्क्याह * मान्त्रवर्णिकेति * समवेतार्थत्वसम्भवे सन्निपत्योपकारित्वेनारादुपकारित्वं बाध्यते नान्यथेत्याशयः । यच्चापूर्वकर्मविषयत्वे ऽनुवाक्याद्वयानर्थक्यं लिङ्गाविनियोज्यत्वाच्चाद्दृष्टार्थत्वमुक्तं तदुभयमप्याज्यभागविषयत्वेन प्राप्नोतीत्याह * आज्यभागयोः पुनरिति * यागद्वित्वाद्देवताद्वित्वाच्चानुवाक्याद्वयस्यार्थवत्त्वं लिङ्गविनियुक्तत्वाच्च दृष्टार्थतेति दृष्टार्थशब्देनार्थवत्त्वस्यापि सूचनादित्यर्थः । यश्चानेकार्थविधिप्रसङ्गो ऽपूर्वकर्मविषयत्वे ऽस्तीत्याह * तत्र चेति * अपेक्षितविधानं त्वादावेवोक्तम् । नन्वाज्यभागाङ्गत्वस्य लिङ्गक्रमाभ्यामेव प्राप्तेस्तदर्थशास्त्रानर्थक्यमित्याशङ्क्याह * न चेति * लिङ्गस्य व्यवस्थापकत्वाशङ्कानुपपत्तेः क्रममात्रस्य निरासः मान्त्रवर्णिकदेवताप्राप्तत्वभावमुप-
४६८।१ संहरति * तस्मादिति * सूत्रार्थमुपसंहरति * अतश्चेति * आनर्थक्यापत्त्यानुवादत्वानुपपत्तिमाशङ्क्य * किं पुनरिति * आनर्थक्यमेवोपपादयति * पश्यति * दध्ना जुहोतीतिकरणत्वेन दधिविधानात्पदार्थचोदना दण्डी प्रैषानन्वाहेति दण्डप्रातिपदिकार्थविधानातद्भागार्थचोदना सोमेन यजेतेति विशिष्टविधानाद्वाक्यार्थचोदनेति यथाग्नेयादिवाक्येष्वनेन कर्तृसमीहितं कुर्यादित्यवगमे ऽपि कर्तृविशेषानुपादानात्सामान्यस्य चाकर्तृत्वात्कर्तृसमीहितसाधनत्वलक्षणधर्मबोधाशक्तत्वे ऽपि स्वर्गकामवाक्यस्य कर्मकर्तृविशेषोपादानेन धर्मबोधोपयोगित्वात्तच्छेषत्वेनाग्नेयादिवाक्यानां धर्मप्रमोपयोगस्तथा विद्वद्वाक्ययोरपि प्रयोगवचनाङ्गत्वाद्धर्मप्रमोपयोगो भविष्यतीति परिहरति * उच्यत इति * कथमनयोः प्रयोगवचनाङ्गतेत्याशङ्क्य द्वित्वसिद्ध्या * प्रयोजनभूतयेत्युक्तम् * द्वित्वसम्पादकत्वे ऽप्यनयोः कः प्रयोगवचनस्योपकार इत्यपेक्षिते प्रयोगवचने द्वित्वस्योपादानादित्युक्तम् । श्लोकतात्पर्यं व्याचष्टे *वाक्येति* अविधायकत्वेनानयोराग्नेयादिवाक्यवैषम्यमाशङ्क्याह * न हीति * ननु समुदायद्वयावचने ऽपि पौर्णमास्यमावास्याख्यकालद्वययोगेनाग्नेयादीनां द्वित्वसिद्धेर्नानयोर्द्वित्वसिद्धिप्रयोजनतेत्याशङ्क्याह * न

चाह्नेति * कालकर्मणोरत्यन्तभेदात्कालगतसंख्यायोगः कर्मणो न सम्भवतीत्याशयः। विद्वद्वाक्याभ्यां विनाग्नेयादीनां द्वित्वासिद्धिं भाष्यकाराभिप्रेतत्वेन द्रढयति * एतदेव चेति * आग्नेयादीनि पयोन्तानि प्रधानानि आधारादीन्यारादुपकाराकाण्यङ्गानीत्यनुवादपक्षे प्रयोजनस्याङ्गप्रधानत्वस्यादावुपन्यासात्तत्सिद्ध्यर्थद्वित्वसिद्ध्यर्थतानुवादस्यावसीयतइत्याशयः । नन्वङ्गप्रधानत्वस्य प्रयोजनोपन्यासेऽधिकरणान्ते कार्यता स्यादित्याशङ्क्याह * इतरथा हीति * प्रयोजनमप्यनुवादत्वनिर्वाहायादावुपन्यस्तमित्याशयः । अनुवादानर्थक्यपरिहारमुपसंहरति * तस्मादिति * कथं पुनरित्यादिभाष्येणैकवचनान्तयोः पौर्णमास्यमावास्याशब्दयोरनेकाग्नेयादिवाचित्वानुपपत्तिमाशङ्क्य समुदायशब्दतयैकवचनावकल्पनिमुक्त्वा कथं भिन्नवाक्यविहितानामाग्नेयादीनां साहित्यात्मकः समुदाय इत्याशङ्क्य रूपवन्तो हीत्यनेन प्रपञ्चेनानेकस्यैकधर्मान्वयेन शिष्टः कृतः समुदायोऽस्तीत्युक्तं तद्व्याख्यातुमाशङ्कते * कथं पुनरिति * अभेदे समुदायायोगाद्भिन्नवाक्यविधानाभिप्रायो भिन्नशब्दः। प्रकृतत्वाविशेषाद्यजेः सर्वप्रकृतयागविषयत्वप्रतीतेः सर्वेषां चैककालयोगाभावात्तन्निमित्तोऽपि समुदायो न सम्भवतीति सूचनायात्यन्तशब्दः व्याचष्टे * शक्यमिति * कालयोगनिमित्तनामधेयावच्छेदेन यजेः कालयोगियागविषयत्वावसायाद्भिन्नवाक्यविहितानामप्येककालान्वयात्समुदायः सम्भवतीत्याशयः। श्लोकं व्याचष्टे * यथैव हीति * ननु सत्यपि समुदाये पौर्णमास्यमावास्यानामधेययोः सामानाधिकरण्येन यागविषयत्वात्तेषां च बहुत्वान्नैकवचनोपपत्तिरित्याशङ्क्यानिरासार्थं भवति हीति भाष्यं व्याचष्टे * तदगतेति * समुदायगतस्यैकत्वस्य समुदायसमुदायिनोरत्यन्तभेदाभावेन लक्षणया वा समुदाय्यन्वयावधारणादित्यर्थः । यदाग्नेयादीनां समुदायवचनावेतावितिसमुदायानुवादप्रयोजनाङ्गाङ्गिभावाभिधानार्थादुत्तरभाष्यात्पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वशङ्कां निराकर्तुमाह * समुदायीति * तच्छब्देन समुदायिनः परामृष्टाः एतदेवोपपादयति * तथा हीति * नञं पूर्वेण ४६९।१ सम्बद्ध्य किं त्वित्यद्ध्याहारेणोत्तरावयवो योज्यः। श्लोकं व्याचष्टे * पौर्णमासीमिति * समुदायस्य च कालयोगाभावात्तन्निमित्तयोर्नाम्नोः समुदायवाचिता न युक्तेत्याह * न चेति * पौर्णमास्यां पौर्णमास्या यजेतेत्यत्र समुदायस्य कालयोगमाशङ्क्यानयोर्नाम्नोस्तद्वाक्यविहितकालयोगनिमित्तत्वेन नामप्रवृत्तौ सत्यां तन्नामकानां

यागानां कालविधिः कालविधौ च सति नामप्रवृत्तिरितीतरेतराश्रयापत्तेरुत्पत्तिवाक्यविहितकालयोगनिमित्तस्यापि समुदायनामत्वात्फले विधानापत्ते (रितियुक्तेति सूचनायोत्पत्तिशब्दः समुदायनामत्वे ऽवयवानामसाधनत्वापत्तेः प्रत्येकमपूर्वककल्पनप्रमाणाभावाद्धात्वर्थभेदेन भावनाभेदाभावे सत्यनेकधात्वर्थानुरक्तत्वे चानयोर्दर्शपूर्णमासशब्देनैतएवाभिधीयन्त इति भाष्यं विरुध्यतेत्याह *यदि चेति *समुदाययोश्च फलसाध्यैकैकभावनापत्तेः[1]) कर्मभेदवाचोयुक्तेरभिधेयाभावाद्विगतार्थत्वं स्यादित्याह * अत इति *तेषामर्थाधिकरणवक्ष्यमाणा च धर्मव्यवस्थापूर्वैक्ये भज्येतेत्याह *सर्वेति *एकादशगता तन्त्रावृत्तिचिन्तादिशब्दोक्ता च द्वादशगता प्रसङ्गचिन्ता ऽपूर्वैक्ये भज्येतेत्याह *न चेति *समस्तान्वये चेतिकर्त्तव्यतायाः प्रत्येकविकारे सौर्यादावतिदेशायोगादैकार्थ्याद्वा नियम्येन पूर्ववद्वा विकारो हीत्यष्टमाधिकरणसिद्धान्तो भज्येतेत्याह * नन्विति * दशमान्ये च प्राक्सोमादेकपुरोडाशा पौर्णमासी सान्नाय्यरहितामावास्येति व्यवहारः पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वे न युज्येतेत्याह * सहस्रेति * नवमे च त्सरा वा एषा यज्ञस्य तस्माद्यर्हिक चित्प्राचीनमग्नीषोमीयात्तनोपांशु चरन्तीति उदाहृत्य यज्ञभागधर्मो वैतदुपांशुत्वं पदार्थधर्मो वेति सन्दिग्धे यज्ञस्य फलवत्त्वेन धर्मप्रयुक्तसामर्थ्याद्यज्ञस्य यत्प्राचीनेति व्यविहितेनापि यज्ञशब्देन प्राचीनशब्दस्यान्वयप्रतीतेः श्रुत्या च प्राग्देशवाचिनः प्राचीनशब्दस्य लक्षणया तद्देशपदार्थपरत्वायोगाद्यज्ञभागधर्मत्वं पूर्वपक्षयित्वा प्राचीनशब्दस्य वीप्सा किं चिर्हिक चिच्छब्दसमभिव्याहृतयच्छब्दान्वयाद्वीप्सायाश्च बहुविषयत्वेनैकस्मिन्देशे ऽनुपपत्तेर्लक्षणयाग्नीषोमीयप्राग्देशपदार्थपरत्वस्यैव न्याय्यत्वात्पदार्थधर्मतेति सिद्धान्तयितुं तद्देशानां वा सङ्घातस्याचोदितत्वादिति सूत्रे ऽङ्गप्रधानसङ्घातस्य यज्ञशब्दवाच्यत्वाभावात्साङ्गप्रधानसङ्घातापेक्षया च प्राग्भाविनो ऽङ्गजातस्य यज्ञावयवत्वायोगेन प्राचीनयज्ञशब्दान्वये ऽप्यवयवव्यतिरेकजनितपृथ्यनुपपत्तेः । तत्सम्बन्धितयोपांशुत्वस्याचोदितत्वान्न यज्ञभागधर्मतेति वक्ष्यमाणत्वात्सप्तमान्ये च गवामयनिकेषु ज्योतिरादिष्वहस्सु नाम्नैकाहरूपज्योतिरादिधर्मेषु चोदकाच्च द्वादशाहधर्मेषु प्राप्तेषु चोदकबलीयस्त्वात्तद्द्वादशाहधर्माः कार्या नामबलीयस्त्वाद्वैकाहधर्मा इति सन्दिग्धे प्रत्येकं फलसाधनत्वाभावेन नामावगतप्राप्त्यात्मिकधर्म्मानाकाङ्क्षत्वादविरुद्धाधिकधर्मातिदेशकत्वे च ना-

१ अयं पा० ढ० पाठः प्रतिभाति ।

मोपपत्तेर्द्वादशाहिकद्वादशोपसत्त्वैकादशिनीविहारदर्शनाभ्यां च लिङ्गाभ्यां चोदकानुग्रहेण द्वादशाहिकधर्मातिदेशे प्राप्ते फलवाक्यसाधनभूतानामह्नां साहित्यावगमे ऽप्युत्पत्तिवाक्येषु प्रत्येकमेव साधनत्वावगमाद्धर्माकाङ्क्षोपपत्तेर्नाम्नां च प्रत्यक्षत्वेनानुमानिकाद्यागत्वाव्यक्तचोदितत्वाद्गुणत्वाद्यनेकलिङ्गापेक्षाच्चोदकाद् बलीयस्त्वात् ज्योतिरादिनाम्नां च यागवाचित्वेनाधिकधर्मातिदेशकत्वायोगादेकाहरूपज्योतिरादिधर्मातिदेशं सिद्धान्तयित्वा लिङ्गं सङ्गातधर्मः स्यात्तदर्थापत्तेर्द्रव्यवदिति सूत्रेणाहःसङ्गातात्मकस्य गवामयनस्याहःसङ्गातात्मकद्वादशाहकार्यापन्नत्वेन नीवारादौ व्रीहिधर्मवत्तदीयद्वादशोपसत्त्वैकादशिनीविहारप्राप्तेर्लिङ्गद्वयोपपत्तिं परमतेनोक्तां निराकर्तुं न वार्थधर्मत्वात्सङ्गातस्य गुणत्वादित्यत्र द्वादशशब्देन संख्यावाचितार्थादुक्तस्यापि सङ्गातस्य फलसाधनीभूताहःशब्दोक्तयागविशेषणत्वेन गुणभूतत्वात्साधनत्वाभावेन धर्माग्राहकत्वान्न सङ्गातकार्यापत्त्या धर्मप्राप्तिर्युक्तेति वक्ष्यमाणत्वात्सूत्रकृतो ऽपि समुदायवाचित्वाभावाभिप्रायो ऽवगत इत्याह * सङ्गातस्येति * यद्यप्यङ्गप्रधानसङ्गातसम्बन्धितयोपांशुत्वस्याचोदितत्वमनेनोक्तं तथापि यथाङ्गप्रधानानां समुदितानां फलसिद्धिहेतुत्वे ऽपि समुदायस्य शब्दवाच्यत्वाभावात्तत्सम्बन्धित्वेनोपांशुत्वस्याचोदनात्तथा प्रधानानां समुदितानामपि फलसाधनत्वे तत्समुदायस्य शब्दवाच्यत्वाभावेनाचोदनेति प्रकृतोपयोगसिद्धेरुदाहृतम् । कथं तर्हि समुदायवचनावेताविति भाष्यमित्याशङ्क्याह * तस्मादिति * सकृदुच्चरिते चास्मिन्विवक्षैकैव दृश्यतइत्यनेन न्यायेनानेकार्थस्यापि शब्दस्य सकृदुच्चारणेनैकार्थपरत्वायोगात्पौर्णमास्यमावास्याशब्दयोरनेकयागनामत्वायोगशङ्कानिरासार्थं सकृदुच्चरितस्याप्यन्योन्यसापेक्षानेकार्थपरत्वोपपत्त्यै समुदायस्योपलक्षणाख्योपसर्जनत्वोक्त्यर्थत्वेन समुदायो वचनमाग्नेयाद्युक्ताबुपलक्षणीकृतो निमित्तमेतयोरिति कृत्यल्युटो बहुलमिति निमित्ते ल्युटं व्युत्पाद्य समुदायवचनशब्दो व्याख्येय इत्याशयः । समुदायशब्दतयेति भाष्यस्य का गतिरित्याशङ्क्याह * तेषां त्विति * समुदायिवाचिनोरपि पौर्णमास्यमावास्याशब्दयोर्वाच्यसमुदायी लक्षितसमुदायगतसंख्याद्वारैकवचनयोगाभिधानार्थं समुदायशब्दतोक्तेत्यर्थः॥ कथं समुदायशब्दत्वोक्त्यायमर्थो लभ्यतइत्याशङ्क्य समुदायापेक्षः शब्दः समुदायशब्द इति शाकपार्थिववन्मध्यमपदलोपिसमासत्वं भाष्यकृतोक्तमिति सूचयितुमाह * तथा चेति * नन्व-

नयोः समुदायवाचित्वाभावे समुदायवाचियूथादिशब्ददृष्टान्तोपा-
४७०।२ दानमयुक्तमित्याशङ्क्याह * यूथेति * कुलपर्षच्छब्दयोराकृतिवा-
दे ऽनुदाहृतत्वादस्त्येव सङ्गतिश्चात्र वृक्षा हि बहवो वनमित्यादिना
समुदायोपलक्षितमुदायिवाचिता यूथादिशब्दनां तत्रोक्तेति सूच-
नार्थं द्विवचनं तन्त्राविरोधात्तु तेषां समुदायवाचित्वे ऽपि समुदा-
यनिमित्तैकवचनलाभमात्रसाम्यादृष्टान्तत्वोपपत्तिर्यदा त्वित्यनेनो-
क्ता दर्शपूर्णमासशब्देन तएवाभिधीयन्तइति भाष्यावयवपर्यालो-
चनयापि समुदायवचनशब्दस्य समुदायिवाचित्वेन तत्पर्यायतया
दर्शपूर्णमासशब्दयोसमुदायिभिधानत्वार्थत्वं गम्यतइति सूचयितुं
वेदेति भाष्यमर्थतो व्याचष्टे * एतेनेति * पौर्णमास्यामावास्या-
शब्दयोः समुदायिवाचित्वे त्वव्याख्योपपत्तेः समुदायिवाचितैव
समुदायवचनशब्देनोक्तेत्याशयः । तत इति भाष्यं समुदा-
यानुवादप्रयोजनाभिधानार्थत्वेन व्याख्यातुं पूर्वोक्तमेव स-
मुदायानुवादप्रयोजनं स्मारयति * तस्मादिति * इदमे-
कमिदं चैकमित्येकत्वद्वयविषयं प्रत्ययमपेक्ष्य द्वित्वोत्पत्तेर्द्वित्व-
स्य निमित्तकारणं यो द्वित्वे ऽनपेक्ष्यमाणत्वादपेक्षाख्य एकत्वद्वय-
प्रत्ययस्तस्य सिद्धिरित्यर्थः । एतदेव चतुर्थोपान्त्यन्यायाभिधानेनो-
पपादयितुं तदीयासिद्धान्तसूत्रावयवं तावत्पठति * यथेति *
न्यायमभिधत्ते * तद्द्वित्वेति * पौर्णमास्यमावास्याशब्दोक्तसमुदाय-
द्वित्वानुसारित्वाद्दर्शपूर्णमासशब्दयोः समुदायविषयत्वं ऽभिहिते
ननु द्विवचनान्तत्वमात्रेण प्रपौर्णमास्यमावास्याशब्दविलक्षणयोर्दर्श-
पूर्णमासशब्दयोस्तत्सम्पादितसमुदायद्वित्वानुसारित्वानवसायात्कथं
तद्विषयत्वावगतिरित्याशङ्क्याह * अस्ति चेत्याद्युक्तं * दर्शशब्दस्य
विरुद्धलक्षणया दर्शनावपर्ययादर्शनगमकत्वात्स्पष्टामावास्याविष-
यत्वप्रतिपत्तिरित्यर्थः । शक्यते चेति तत्रत्यं भाष्यं पठितं दर्शो वा
एतयोः पूर्व इत्युपक्रम्यामावास्या वै सरस्वतीत्युपसंहाराद्दर्शामावा-
स्ययोः सामानाधिकरण्यावगतिः । भाष्यं व्याचष्टे * तेनेति * पौ-
नरुक्त्यं शङ्कते * ननु चेति * विद्वद्वाक्ययोः समुदायानुवादत्वे
स्थिते ऽपि दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वाद्यागमात्रं ग्रहणशङ्का-
निरासायैतदधिकरणस्य प्रयोजनाधिकरणं तदिति पौनरुक्त्यं परि-
हरति * नैष दोष * इति हिशब्दो ऽपिशब्दार्थे पौर्णमास्यधिकरणं
विनेज्याधिकरणपूर्वपक्ष एव स्यादितीज्याधिकरणस्य पौर्णमास्यधि-
करणाधीनत्वात्पौर्णमास्यधिकरणप्रयोजनत्वेनारम्भ इत्यर्थः । भा-
ष्योक्तं फलवाक्यस्यद्वित्वसिद्धिप्रयोजनत्वमुपपाद्य स्वयं कालवा-

क्रयस्थयोस्तृतीयान्तयोः पौर्णमास्यमावास्याशब्दयोराग्नेयादित्रिकद्वयनामत्वसिद्धिप्रयोजनताप्यस्तीत्याह * इदमिति * विद्वद्वाक्याभ्यामनयोः शब्दयोस्त्रिकद्वयनामत्वाकरणे का पौर्णमासी कामावास्येत्यज्ञानान्नैतद्वाक्यविहितस्त्रिकस्य त्रिकस्य कालयोगः सिद्ध्यतीत्याशयः। वाक्यान्तरैरेवाग्नेयादीनाङ्गालविधानेनैतस्य कालवाक्यस्यानर्थक्यान्नैतद्वाक्यापेक्षितनामनामिसम्बन्धसिद्धिप्रयोजनत्वं विद्वद्वाक्ययोः सम्भवतीत्याशङ्क्य ते * तत्रेति * एतद्वाक्यविहितस्त्रिकस्य त्रिकस्य परस्परसहितस्य साङ्गस्य कालयोगो न वाक्यान्तरैः सिद्ध्यतीति परिहरति * उच्यतइति * श्लोकं व्याचष्टे * उत्पत्ती- ४७१।१
ति * परस्परसहितश्चेत्यनेनैकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात्स्यादित्येकादशाधिकरणवक्ष्यमाणा प्रधानकालतन्त्रतोक्ता साङ्गशब्देनाङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मादेकदेशत्वमिति तदन्तरा गर्भिणीन्यायवक्ष्यमाणाङ्गाङ्गानां प्रधानकालतोक्ता यस्मिन्नित्यनेन तुल्यानां तु यौगपद्यमेकशब्दोपदेशात्स्याद्विशेषाग्रहणादित्येकादशाधिकरणवक्ष्यमाणस्याङ्गानुष्ठानतन्त्रत्वस्य प्रधानप्रयोगतन्त्रत्वमन्तरेणासिद्धेरर्थाक्षिप्ता प्रधानप्रयोगतन्त्रतोक्ता कालयोगान्यथात्वप्रयोगान्यथात्वापादकतौत्पत्तिकेत्यनेनोक्ता नन्वितरेतरयुक्तानां साङ्गानां च करणत्वावगमात्तादृशानां कालसंयोगे सति समुदायद्वयस्यापीतरेतरसाहित्यापत्तिः कालद्वये प्रयोगः स्यादित्यनिष्टापत्तिं शङ्कते * ननु चेति * पौर्णमासीकाले ऽमावास्याख्यसमुदायप्रयोगो ऽमावास्याकाले वा पौर्णमास्याख्यसमुदायप्रयोगो ऽन्यसाहित्यलभ्यत्वेनौपाधिकत्वादौपाधिकस्य त्वाकाङ्क्षां विना विधानायोगात्कालद्वयप्रयोगे चोत्पत्तिवाक्यविहितैककालत्वविरोधापत्तेर्नास्माद्वाक्यात्प्रयुज्यतइति परिहरति *अत्रेति* श्लोकं व्याचष्टे * अमावास्या हीति * कालद्वयप्रयोगे व्यवस्थितकालत्वानिमित्तद्विवचनान्तदर्शपूर्णमासशब्दवाच्यत्वायोगाद्यजिविशेषकत्वं न स्यादित्यदर्शत्वमित्यनेन सूचितम्। ननु फलं भवत् भावयेदनेनेत्थमिति प्रयोगविधिनाङ्गप्रधानयोर्युगपदनुष्ठानविधानात्प्रयोगविधिवशेनैवाङ्गानां प्रधानकालत्वसिद्धेरेतद्वाक्यमनर्थकमित्याशयेनाशङ्कते * आहेति * फलभवनकालस्याप्रत्यक्षत्वेनाङ्गप्रधानकालपरिच्छेद्यत्वात्प्र- ४७२।१
धानानां चोत्पत्तिवाक्यालोचनेन प्रत्येकं कालयोगात् षट्सु पौर्णमास्यमावास्यासु प्रयोगावगमात्तावत्कालाबहिर्भावमात्रेणाङ्गानां प्रयोगवाक्यावगतप्रधानकालत्वोपपत्तेरेकस्यां पौर्णमास्याममावास्यायां वा साङ्गप्रधानप्रयोगो नैतद्वाक्यं विना लभ्यतइति वक्ष्यमाणाशयेन प्र

रिहरति*उच्यतइति*मान्त्रवर्णिकमित्युपहासः कालस्य प्रयोगाङ्ग-त्वात्प्रयोगस्य च साङ्गप्रधानविषयत्वादुत्पत्तिवाक्यावगतकालयोगे-नैवाङ्गप्रधानयोरेककालत्वावगतेरित्यन्तैककालत्वायोगाच्च सन्निकृष्ट-कालत्वप्रतीतेर्दूरस्थानामङ्गानामनुपकारित्वावसायादेकस्यां पौर्णमा-स्याममावास्यायां वा साङ्गप्रधानप्रयोगो ऽस्माद्विनैव लभ्यतइत्या-शयेनाशङ्कते * नन्विति * उत्पत्तिवाक्यस्थस्य कालस्य प्रयोगा-ङ्गत्वात्साङ्गप्रधानविषयत्वानवगतेः सन्निकृष्टैरुपकर्त्तव्यमिति विधि-तो ऽनवगमान्न दूरस्थानामनुपकारित्वे किं चित्प्रमाणमस्तीत्याशयेन परिहरति * सन्निकृष्टैरिति * ननु य इष्ट्वा पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां वेत्यनेनैव पश्वादेः सद्यस्काल-त्वायाग्नेयादीनां प्रकृतौ पूर्वेद्युरन्वाधानाद्यङ्गविचारितद्वैयहकाल्या-द्विकृतिष्वपि तत्प्राप्तेः सद्यस्कालत्वायेष्टिशब्दार्थवानित्याशयेन पर-स्परसाहित्याङ्गसाहित्ययोः सिद्धेरेतद्वाक्यमनर्थकमित्याशङ्कते *न-नु चेति * षण्णामप्यनेन साहित्यं स्यान्न त्रिकस्येति परिहरति * सत्यमिति * श्लोकंव्याचष्टे * न तावत्त्रिकस्येति * रूढित्वप्र-दर्शनाय सोमाङ्गेषु दीक्षणीयादिषु दार्शिकपौर्णमासिकविद्धव्यन्त-प्रवृत्तेः सोमे ऽपीष्टेर्दर्शपूर्णमास्याख्याया विध्यन्तस्य प्रवृत्तिरिति पूर्वपक्षाभिधानार्थं सूत्रं पठितम्।नन्वेवं सति पौर्णमास्यमावास्यावा-
४७३।२ क्याभ्यामेवेष्टप्रयोगसिद्धेरिष्टयेत्यनर्थकं स्यादित्याशङ्क्य * प्रकृता-वित्युक्तम । नन्विष्टिवाक्येनेष्टप्रयोगासिद्धावपि देशवाक्ये त्रिकद्व-यस्योत्पत्तिवाक्यावगतकालयोगनिमित्तभिन्नशब्दोपादानेनेतरेतरयो-गावगतसाहित्यविवक्षया स्वसमुदायिस्वाङ्गसाहित्यमात्रसिद्धेरि-ष्टप्रयोगः सेत्स्यतीत्याशङ्कते * नन्विति * देशान्वयनिमित्तेन सा-हित्येन कालान्वयसाहित्यानवगतेर्नैकैकस्य त्रिकस्य साङ्गस्यैककाल-त्वं सिद्ध्यतीति परिहरति * तत्रेति * श्लोकं व्याचष्टे * भेदेनापि हीति * भेदेनापि प्रयुज्यमानानां देशं प्रतिसाहित्योपपत्तेरितरेतर-योगानुरोधात्कालतन्त्रत्वाभ्युपगमे च षण्णामेवैककाल्यापत्तेरुत्पत्ति-वाक्यानुरोधात्त्वितरेतरयोगाविवक्षायामन्योन्यानपेक्षाणां निरङ्गानां च कालयोगापत्तेर्न देशवाक्येनाप्यभिप्रेतप्रयोगासिद्धिरित्यर्थः । षट्स्वित्यनेन पूर्वं इष्टान्तव्याजेनाग्नेयादेः प्रत्येकानुष्ठानापत्तिमङ्गानां च षट्पक्षान्तराले सकृदनुष्ठानापत्तिमुक्तामत्रापि योजयित्वा प्र-योगभेदविधानाभावादिहापि वा कर्मपृथत्कात्तेषां तन्त्रविधाना-त्साङ्गानामुपदेशः स्यादित्येकादशवक्ष्यमाणप्रतिप्रधानावृत्तिन्याया-भावे ऽप्यभ्युपेत्यवादेनाथ वेत्युत्कोत्पत्तिवाक्यावगतस्य पौर्णमा-

सीकालत्वस्यामावास्याकालत्वस्य चैकस्यामपि पौर्णमास्याममावास्यायां वा प्रयोगे विरोधाभावाद्विरुद्धसमुदाययौगपद्यबाधेऽप्यनुपादेयसमदेशान्वयावगतस्वसमुदायियौगपद्यबाधायोगमथ त्वित्यनेनाशङ्क्य तत इत्यनेनैवमप्यावृत्त्योभयसमीपेऽङ्गप्रयोगस्येष्टस्यासिद्धिरित्युक्ते करणविभक्तिवशेनोभयोरपि समुदाययोरङ्गसामीप्यावगतेस्तत्सम्पत्त्यर्थमावृत्तिम् *आशङ्क्याथ वेत्युक्तम् * सकृद्दृष्टाभ्यां नवम्यां वाङ्गप्रयोगे समुदायद्वयस्य तुल्याङ्गसामीप्यसम्पत्तेरत्यन्तसामीप्यस्य चैकस्मिन्नप्यशक्यत्वान्नावृत्तिसिद्धिरित्याशयः । ननु फलवाक्येन साध्यसाधनेतिकर्त्तव्यताविशिष्टभावनाविधायिनाङ्गप्रधानयोर्युगपत्प्रयोगविधानाद्यावता विलम्बेन विनानुष्ठानाशक्तिस्ततोऽधिकस्य विलम्बस्य निवारणात्प्रधानकालएवाङ्गानुष्ठानप्रतीतेरौत्पत्तिककालविरोधाच्च समुदायद्वययौगपद्यानुपपत्तेः कालवाक्याभ्यां विनापीष्टप्रयोगसिद्धिरित्याशङ्क्याह * अनेनैवेति* फलवाक्यस्य स्वरूपेण फलविधिमात्रार्थत्वाभ्युपगमादुत्पत्तिविनियोगवाक्यैकवाक्यतया च प्रयोगविधानार्थत्वाभ्युपगमात्फलविधित्वरूपेणेष्टप्रयोगसाधकत्वं प्रयोगविधित्वरूपेण वेति विकल्प्य आद्यपक्षे ऽयमतिदेशः एतदेव विवृणोति * फलस्यापीति * सिद्धे ऽपीत्यपिशब्दस्योत्कर्षो ऽन्यस्य वाध्याहारः प्रयोगपरत्वं विना प्रयोगतन्त्रासाधकत्वात्कालतन्त्रासाधकतेत्याशयः । द्वितीयपक्षाश्रयणेनाशङ्कते * अथेति * प्रयोगविधिमात्रा- ४७४।२
लोचने षण्णामपि युगपदुपादानादिति पूर्वोक्तमेव न्यायेन समुदायद्वययौगपद्यापत्तेस्तस्याश्चौत्पत्तिवाक्यविरोधेन दोषत्वात्तदनुरोधे तु प्रत्येकं कालयुक्तानामित्यादिपूर्वोक्तेनैव न्यायेन प्रत्येकं प्रधानप्रयोगो ऽङ्गानां च षट्पक्षान्तराले क्व चिदहनि प्रयोगः साङ्गस्य वैकैकस्य प्रधानस्य प्रयोगस्त्रिकयोर्वा कालभेदेन प्रयुज्यमानयोरेकस्य कस्य चित्समीपे ऽङ्गप्रयोगः पक्षान्तराले वा क्व चिदहनीत्यत्रापि योजनापत्तेः प्रयोगविधिरूपेणापि नेष्टप्रयोगसिद्धिरित्याशयेन परिहरति * तत्रापीति * ननु फलभवनकाले ऽङ्गप्रधानयोर्युगपदनुष्ठानावगतेस्त्रिकद्वयस्यौत्पत्तिककालाविरोधार्थं कालभेदेनानुष्ठाने त्रिकद्वयस्याप्यङ्गयौगपद्याङ्गावृत्तेर्न्याय्यत्वादिष्टप्रयोगसिद्धिरित्याशङ्क्याह *न चेति*फलभवनकालेनाङ्गप्रधानकालपरिच्छेदे फलस्वरूपोत्पत्त्या कालान्तरभाविन्यैककाल्यायोगात्फलापूर्वोत्पत्तिकालेन परिच्छेद्यत्वापत्तेस्तस्य च क्षणिकत्वेनाङ्गप्रधानयोरेकक्षणे ऽनुष्ठेयतापत्तेराङ्गप्रधानकालेनैव तु फलापूर्वोत्पत्तिकालस्य परिच्छेद्यत्वात्तस्य चाद्यप-

दार्थारम्भात् प्रभृत्यासमाप्तेरेकत्वादुत्पत्तिवाक्यावगतपौर्णमास्य-मावास्याकालालोचनया यावन्तं षट्पक्षपरिमितं पक्षपरिमितं वा कालं प्रधानानि व्याप्नुवन्ति तावतः फलभवनकालत्वात्तावत्कालत्वात्तावत्कालमध्ये ऽङ्गेष्वनुष्ठितेष्वङ्गप्रधानविषययौगपद्यासिद्धेरङ्गावृत्त्यनाक्षेपापन्नेष्टप्रयोगसिद्धिरित्यभिधानायाङ्गप्रधानानीत्यङ्गशब्दे प्रयुक्ते निरङ्गानां प्रधानानामुत्पत्तिवाक्ये कालविधानात्कथमङ्गानां प्रधानकालतेत्याशङ्क्य * प्रयोगेत्युक्तम् * प्रयोगविधिविहितस्य साङ्गप्रधानप्रयोगस्यापि कालान्तराश्रवणादौत्पत्तिक एव कालो ऽवसीयतइत्याशयः । प्रत्येकं प्रयोगादियोजनां विवृणवनुपसंहरतीतीति उत्पत्तिवाक्यमात्रानुरोधे तिसृषु पौर्णमासीषु त्रयाणां तिसृष्वमावास्यासु त्रयाणां प्रधानानां प्रतिप्रधानमङ्गावृत्तिपक्षे साङ्गानामन्यथा यत्र क चनान्तराले चशब्देनाङ्गप्रयोगसूचनाच्छुद्धानामपवर्गः प्रयोगोत्पत्तिद्वयालोचने द्वयोः पौर्णमास्यमावास्ययोस्त्रिकद्वयप्रयोगो ऽङ्गप्रयोगश्चैकसमीपे पक्षान्तराले वेति योज्यम। कालवाक्याभ्यामनर्थक्यपरिहारमुपसंहरति * तस्मादिति * कालवाक्याभ्यामेव तर्हीष्टप्रयोगसिद्धेरुत्पत्तौ कालविध्यानर्थक्यमिति शङ्कते * नन्विति * पौर्णमास्यमावास्याशब्दविषयज्ञानं प्रयोजनमित्याशयेन परिहरति * कथमिति * एतदेव विवृणोति * पश्येति * श्लोकं व्याचष्टे * पौर्णमासीति * उपसंहरति * तस्मादिति * भाष्यकृतो ऽप्येतदेव प्रयोजनमभिमतमिति सूचयितुमाह * अत एवेति *

४७५।१

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥४॥

यदि चेति भाष्येण समप्राधान्यनिरासार्थत्वेनैतत्सूत्रं पूर्वेषां प्राकृतानां प्रयाजादीनां विकृतौ कृष्णलहोमादिविशेषदर्शनान्न सर्वेषां समप्रधान्यमित्येवं व्याख्यातं तच्च शब्दात् पूर्वसूत्रोक्ते ऽनुवादत्वे हेत्वन्तरसमुच्चयार्थत्वप्रतीतेरयुक्तमाशङ्क्योपपादयति * यदि चेति * पूर्वपक्षप्रयोजनसमप्राधान्यनिरासद्वारा पूर्वपक्षनिरासेनार्थात्सिद्धान्तसिद्धेश्च शब्दोपपत्तिरित्याशयः । समप्राधान्ये कथं विकृतौ प्रयाजादिदर्शनानुपपत्तिरित्याशङ्क्याह * ततश्चेति * कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तदूबन्धनत्वादित्यष्टमाधिकरणे फलस्य स्वर्गस्य नियमस्य यावज्जीवतायाः कर्तुः स्वर्गकामस्य समुदाययोराग्नेयादित्रयसाहित्यात्मकयोर्विकृत्यनन्वये कर्मणः करणभूतस्य विकृतावप्रवृत्तेर्हेतुतया वक्ष्यमाणत्वात्प्रयाजादेरपि करणत्वे सत्यप्रवृत्तिः स्यादित्याशयः । अत इत्युपसं-

हारभाष्यं सिद्धान्तप्रयोजनोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति *

गुणस्तु श्रुतिसंयोगात् ॥ ५ ॥

नैतदिति भाष्येण सिद्धान्तनिरासार्थतया तु शब्दो व्याख्यातस्तत्स्पष्टत्वाद्व्याख्याय श्रुतिसंयोगव्याख्यानार्थं तथेति भाष्यं व्याचष्टे * पौर्णमासीति * स्वयं श्रुतिसंयोगं व्याचष्टे * प्रत्यक्षेति * अस्मिन्व्याख्याने श्रुतिसंयोगशब्देन सिद्धान्ते कल्पनागौरवाभिधानात्पूर्वपक्षपक्षे तदभावमाह * सो ऽपि चेति * नानुमातव्यो भविष्यतीत्यनुषङ्गः। अनेकमित्यत्र नानुमातव्यमिति विपरिणतानुषङ्गः गुणशब्दं स्वयं तावद्विधित्वे ऽधिकां गुणो ऽस्तीत्येवं व्याचष्टे * समुदायेति * नन्विति भाष्येणारूपत्वेनापूर्वयोः कर्मणोर्विध्यसम्भवं पूर्वसूत्रोक्तमनुभाष्य वाक्यान्तरेणेत्यादिना गुणो रूपं वाक्यान्तरस्थपौर्णमास्यमावास्याश्रुतिसंयोगादवगम्यतइत्येवमावृत्तश्रुतिसंयोगशब्दसहितो गुणशब्दो रूपत्वपरिहारार्थत्वेन व्याख्यातस्तद्व्याचक्षाणो ऽस्मिन्नपि पक्षे विद्वद्वाक्ययोर्दर्शपूर्णमासशब्दतात्पर्यावधारणार्थत्वाभावात्तात्पर्यावधारणं च विना लाक्षणिकशब्दप्रवृत्त्ययोगादर्शपूर्णमासशब्दयोराग्नेयवाक्यविहितकर्मद्वयनामत्ववद्विद्वद्वाक्यविहितकर्मद्वयनामत्वस्याप्रसिद्धेर्यजिविशेषकत्वायोगात् विशेषतश्चास्मिन्पक्षे ऽष्टाकपालादिवाक्यैः कालाविधानात्पौर्णमास्यां पौर्णमास्येति वाक्यद्वयविहितकालयोगेन दर्शपूर्णमासशब्दप्रवृत्त्यभ्युपगमापत्तेस्तत्र च तृतीयानिर्देशात्करणकृतयोः पौर्णमास्यमावास्ययोः कालान्वयप्रतीतेः करणत्वस्य च फलवाक्याधीनत्वात्फलवाक्यस्थाभ्यां दर्शपूर्णमासशब्दाभ्यां विद्वद्वाक्यविहितयोः कर्मणोः फलान्वयावगमे करणत्वात्कालान्वयः। कालान्वये सति फलान्वयात्करणत्वावगतिरितीतरेतराश्रयापत्तेर्दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वेन यजिविशेषकत्वायोगात्प्रकृतयागमात्रस्य फलान्वयात्समप्राधान्यापत्तेर्विकृतौ प्रयाजादिदर्शनानुपपत्तिरित्याशङ्क्य निरस्यति * प्रयाजादीति * सप्तमोपान्त्ये सौर्यादौ लौकिकी पार्वणस्थालीपाकेतिकर्त्तव्यताप्रयुक्तस्थालीपाकादौ दृष्टप्रवृत्तित्वेनातिदेष्टव्येति पूर्वपक्षिते बार्हस्पत्ये ऽह्नि बर्हिषो लुनातीति बर्हिषो लवनदर्शनं पितृयज्ञे च न होतारं वृणीतइति होतृवरणनिषेधदर्शनं सौर्ये च प्रयाजे प्रयाजे कृष्णलं जुहोतीति प्रयाजदर्शनं वैदिकेतिकर्त्तव्यतानातिदेशेन युज्येतेत्याशङ्क्यापि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति सूत्रेण यत्र बर्हिर्लवनं प्रत्यक्षविहितं तत्रार्द्धविधिर्होतृवरणनिषेधो नित्यानु-

वादः प्रयाजवाक्यं कृष्णलविशिष्टप्रयाजविधानार्थमिति पूर्वपक्षी परिहरिष्यति सम्भवमात्रेण त्वत्र प्रकृतिस्थप्रयाजगुणविधिपक्षाभिधानम् । यद्भावगतार्थविषयत्वाद्वीप्सायाः प्राप्ताभावे ऽनुपपत्तेरस्य वचनोदाहरणत्वं भाष्योक्तं दूषयित्वा स्वयं प्रकृतिस्थप्रयाजानुवादत्वस्य लक्ष्यमाणत्वात्स्वाभिप्रायेणैतदुक्तम्। आद्यात्पूर्वपक्षात्,भेदाभिधानायैतावेवेत्येवकारः । नन्वष्टाकपालादिवाक्येषु पौर्णमास्यमावास्याशब्दयोः कालवाचित्वेन विद्वद्वाक्यविहितकर्मानुवादिशब्दाभावान्न तैरत्र गुणविधिः सम्भवतीत्याशङ्कानिरासार्थं यदिति भाष्यं व्याचष्टे * अष्टाकपालादीति *

४७६।१ चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि
तदर्थत्वात्तस्य तस्योपदिश्येत ॥ ६ ॥

चोदनाशब्दव्याख्यानार्थं कर्मचोदनाशब्दं गुणविधित्वनिरासार्थतया व्याचष्टे * नैत इति * सूत्रशेषव्याख्यानार्थं कुत इति भाष्यं तात्पर्यतो व्याचष्टे * कुत इति* अप्राप्ते कर्मणि दृष्टस्यानेकगुणविधिप्रकारस्य प्राप्ते कर्मण्यसम्भवाभिधानायोत्तरार्द्धं तावद्व्याख्यातुं पीठिकां करोति * कर्मोत्पत्तीति * फलाद्यनुपादेयपरे वाक्ये कर्मविधावप्यनेकगुणविध्यसम्भवसूचनायोत्पत्तिशब्दः । ननु कारकैर्विना भावनाविध्यपर्यवसाने ऽग्निहोत्रादिवाक्ये कारकाश्रवणान्न विधिः स्यादित्याशङ्क्याह * तत्रेति * आत्मनो निष्पादकत्वेनांशभूततयावगतानि यानि कारकसामान्यानि तदन्यथानुपपत्त्या कारकविशेषाक्षेपात्स्ववाक्ये कारकाश्रवणे ऽपि विधिपर्यवसानं सम्भवतीत्याशयः । अर्थापत्त्या कारकविशेषाक्षेपे तद्वाचिपदानर्थक्यमाशङ्क्य * कारकविभक्त्यन्तेत्युक्तम् * तत् ईदृशं ह्येकं वाक्यं श्रुतानुमितैकदेशे निष्पन्नमग्नीषोमीयेण पशुना यजेतेति पशुसोमाधिकरणवार्त्तिकवक्ष्यमाणन्यायेनाग्नेयेनाष्टाकपालेन यजेतेत्यादिप्रकारवचनव्यक्त्याश्रयणात्सर्वत्र कारकविभक्त्यन्तताभिप्रेता यः कश्चिद्विशेषो ऽतीत्यनिर्द्धारितविशेषाक्षेपे ऽपि विशेषनिर्द्धारणार्थानि पदान्तराणीत्याशयः । वाक्यादेवेत्यनेन स्ववाक्योच्चारणस्योत्पत्तिशिष्टबलीयस्त्वं प्रयोजनं सूचितम् । विशेष्यते भावनेत्यन्वयः । नन्वेवं सत्यमूर्त्तत्वेन जात्यादेः कारकत्वायोगाद्भावनान्वयो न स्यादित्याशङ्क्याह * प्रतिपदं चेति * द्रव्याश्रितत्वेनामूर्त्तस्यापि द्रव्यद्वारा कारकत्वोपपत्तिरुक्ता । ननु पशुत्वादिजातेरादिशब्दोक्तस्य चारुणा-

दिगुणस्याभिक्रमणादिक्रियायाश्च श्रुतिलक्षणद्वारैकशब्दोपादानलक्षणया श्रुत्या लिङ्गसंख्ययोश्चैकपदोपादानलक्षणया श्रुत्या द्रव्यान्वयात्तादर्थ्यप्रतीतेः कथं भावनार्थतेत्याशङ्क्य * एकेत्युक्तम् * जात्यादेर्द्रव्येण सह विशेषणविशेष्यभावे ऽपि जातिगुणयोः प्रातिपदिकार्थत्वात्प्रातिपदिकार्थकारकत्ववाचिन्या विभक्त्या संख्यायाश्च प्रत्ययार्थत्वेनैकाभिधानलक्षणया श्रुत्या लिङ्गस्यापि टाबादिप्रत्ययार्थत्वात्प्रातिपदिकार्थत्वाद्वा यथासम्भवं कारकत्ववाचिन्या श्रुत्या कारकत्वेन भावनार्थत्वप्रतीतेरभिक्रमणादेश्च धातुसम्बन्धाधिकारविहितणमुल्श्रुत्या धात्वर्थान्तरान्वयाभिधानात्तत्र वीप्सोक्ता। वृत्त्यन्वथानुपपत्त्यवगतसन्निपत्योपकारित्वेन कारकत्वावगत्या भावनार्थत्वप्रतीतेर्न द्रव्यशेषतास्तीत्याशयः। यथा द्रव्यस्य कारकत्वेन भावनार्थत्वान्न जात्यादिशेषता तथा जात्यादेरपि न द्रव्यशेषतेति परस्परशब्देनोक्तम्। नन्वेवमपि सन्निकृष्टपदान्वयमात्रेण भावनावैशिष्ट्यसिद्धेर्विप्रकृष्टपदानर्थक्यमित्याशङ्क्याह * एवमिति * कारकात्मना भावनार्थतैवैवंशब्देनोक्तां व्याचष्टे * स चेति * ननु विशिष्टविधौ विशेषणानामपि विधेयत्वात्कथं नानेकशक्तिकल्पनापत्तिरित्याशङ्क्याह * तथा हीति * श्लोकं व्याचष्टे * विशिष्टाया- ४७७।१
मिति *ननु विशिष्टविधेः स्वार्थान्यथानुपपत्त्या विशेषणाविधिकल्पकत्वे विशेषणे विहिते विशिष्टविधिर्विशिष्टे च विहिते विशेषणविधिरितीतरेतराश्रयः स्यादित्याशङ्क्याह *विशेषणेति * पश्चात्कल्पस्यापि विशेषणविधेः प्राक्प्रवृत्तत्वेनैव कल्प्यत्वान्नेतरेतराश्रयापत्तिरित्याशयः। श्लोकं व्याचष्टे * विशिष्टेति * एकस्यानेकशक्तिकल्पनापत्ति-परिहारमुपसंहरति * तेनेति * विशेषणविशेष्यविधेरन्योन्यनैरपेक्षणापर्यवसानाद्युगपद्व्यापारो गम्यते विशेष्यानुवादेन विशेषणविधिना क्रमेण अप्राप्ते त्वित्युत्तरार्द्धं व्याख्यातमुपसंहरति * इतीति * प्राप्ते कर्मणीति * पूर्वार्द्धं व्याख्यातुमुपक्रमते * नेति * एतदेव प्रश्नपूर्वं दृष्टान्तेनोपपादयति * कथमिति * श्लोकं व्याख्यास्यन् दार्ष्टान्तिके ऽङ्गाकर्षणन्यायं योजयति * यदा हीति * प्रतिघातस्य नित्यमपादानापेक्षत्वात्तस्या इति पञ्चम्यन्तसापेक्षत्वे ऽपि समासाविघातः प्रधाननयनन्यायस्तत्र नास्तीत्याह * विशिष्टेति * ननु प्राप्ते कर्मण्यनेकगुणविधानाशक्तावजया क्रीणातीत्यादिष्वनेकजात्यादिविधिः प्राप्ते सोमक्रयादौ च स्यादित्याशङ्क्याह * तत्रेति * यथानेककारकविशिष्टभावनाविधिना विशेषणभूतानेक- ४७८।१
कारकविध्याक्षेपस्तथानेकजात्यादिविशिष्टकारकविधिना विशे-

षणाभूतानेकजात्यादिविध्याक्षेप इत्यर्थः । नन्वेवं सत्यनेकस्यापि द्रव्यदेवतारूपस्य कारकस्यैवाग्नेयपदोपादानात्पदान्तरोपात्तस्यापि चाष्टाकपालस्य द्रव्यरूपैककारकत्वात्प्राप्ते कर्मणि विध्युपपत्तिरित्याशङ्क्याह * यदा त्विति * एकपदोपात्तस्याप्यनेकस्य कारकस्य परस्परान्वयाभावेनैकविशिष्टेतरविध्ययोगान्नैकयत्नेन विधिः सम्भवतीत्याशयः । एकस्यापि तु कारकस्यानेकपदोपात्तस्यैकयत्नेन विध्यसम्भवे ऽनेकपदसम्बद्धमित्यत्राधाराग्निहोत्राधिकरणवार्त्तिके साधयिष्यते । दार्ष्टान्तिके ऽङ्गकर्षणन्यायं योजितमुपसंहरति * एवं चेति * अत्रैव सूत्रावयवं योजयति * तदिति * भाष्यकृतां सूत्रानुक्तविशेषणोक्तौ प्रयोजनमाह * परस्परेति * दृष्टान्ते श्लोकं व्याचष्टे * लोके ऽपि चेति * अमात्येन गन्तव्यमिति सकृदुच्चारणव्यापारे सेनान्यादिगमनहेतुप्रयत्नान्तरोपादानाशक्तेरुच्चारणावृत्तिः स्यादिति दृष्टान्तपर्यवसानं श्रुतिशब्दः श्रुतिहेतूच्चारणलक्षणार्थः । यदि तावदित्यादेः स एवाग्निरष्टाकपालस्य नान्यस्येत्यन्तस्य प्राप्ते कर्मणयनेकगुणविधावुच्चारणावृत्तेर्लक्षणवाक्यभेदाभिधानपरत्वं तावदाह * एतमिति * एतदेवावयवशो व्याचिख्यासुर्यदि तावदित्यादिभाष्यं व्याचष्टे * यदीति * कर्मान्वायितया ऽष्टाकपालविधौ अष्टाकपालस्वरूपकर्त्तव्यत्वस्यापि क्लेशलभ्यत्वादाग्नेयान्वयरूपार्थान्तरविधानं दूरोत्सादितमित्यर्थः । अर्थान्तरविध्यशक्तौ तदानीमिति भाष्यावयवं योजयति * तदाहेति * अथाग्नेयइति भाष्यं न तदाग्नेय. सत्तया सम्बध्यतइत्यर्थो लभ्यतइत्यनुक्तत्वान्नयूनमाशङ्क्याह
४७९।१ * अथेति * अथ पौर्णमास्यामित्यथ तस्यामिति च भाष्यद्वयमेकहेलया व्याचष्टे * एवमिति * केन अष्टाकपालो विहित इत्यनूद्यमानाष्टाकपालोत्पत्तिर्निरस्ता केन तस्याविहितइति चावृत्या तस्य पौर्णमास्यन्वयो निरस्तः । विधीयमानाग्नेयोत्पत्तिनिरासस्तु प्राग्वत्सिद्ध इतरत्राप्यनूद्यमानाग्नेयोत्पत्तिपौर्णमास्यन्वयविधीयमानाष्टाकपालोत्पत्तिनिरासः । स एवोत्पत्तिदेशे ऽनेनोक्तः । एवं सत्यपि क्लेशेन तद्विधीनभ्युपगम्याग्नेयस्याष्टाकपालस्य वाष्टाकपालेनाग्नेयेन वान्वयविधावतिगौरवं स्यादित्यर्थः । अथ पौर्णमासीति भाष्यं व्याचष्टे * पौर्णमासीपदेति * द्रव्यदेवतोभयस्वरूपकर्त्तव्यता पूर्वोक्तात्रापि योजिता । ननु पौर्णमास्याख्यक्रियान्वयद्वारः परस्परान्वयो भविष्यतीत्याशङ्क्याह * न चेति * द्रव्यदेवताविशिष्टपौर्णमासीविधौ सत्युभयविशेषणवशीकारं विनोभय-

विशिष्टत्वायोगादेककक्रियावशीकारात्परस्परनियमः सिद्ध्येत्तस्य त्वनिष्टत्वेन दुष्टत्वाद्या पौर्णमासीत्यनूद्य तस्यामाग्नेय इत्युक्ते ऽष्टाकपालानुरागाप्रतीतेस्तस्यामष्टाकपाल इत्युक्ते चाग्नेयानुरागाप्रतीतेर्न क्रियाद्वारा द्रव्यदेवतयोः परस्परान्वयः सम्भवतीत्यर्थः । अथ द्रव्यदेवते इति भाष्यव्याख्यानपूर्वमथ केन चिदित्याशङ्क्याभाष्यमवतारयति * एतदिति * परस्परासम्बन्धपरिहारार्थं प्रागेव द्रव्यदेवतायाः परस्परसम्बन्धं कुर्वन्नन्यतः सिद्धं द्रव्यस्य देवतासबन्धमनूद्येत्युक्तम्।ननु द्रव्यदेवतान्वयविधिपूर्वककर्मान्वयविध्यभ्युपगमे ऽपि द्रव्यदेवतान्वयसिद्धेरनुवादाभिधानं किमर्थमित्याशङ्क्यान्यतरसम्बन्धितया ऽन्यतराविधिर्द्वयोर्वा युगपादिति विकल्पद्रव्यसम्बन्धितया देवताविधौ देवतासम्बन्धितया द्रव्याविधौ उभयोर्द्रव्यदेवतयोः स्वरूपाविधिः सम्बन्धविधिश्चेति क्लेशे युगपत्वितरेतरनैरपेक्ष्येणोभयविधौ परस्परसम्बन्धक्लेशमनुभूय पौर्णमासीसम्बन्धक्लेशो यस्तत्परिहारार्थमित्युक्तमिति तच्छब्दाक्षिप्तयच्छब्दाध्याहारेणैकग्रन्थतया योज्यम्। अवतारितभाष्यस्य परव्याख्यामुपन्यासपूर्वकं दूषयति * तत्रेति * परस्वहरणमेव तावन्निषिद्धत्वादयुक्तं विशेषतो हविषः सुतरामनपवृक्तकर्मण इत्यर्थः । केन चिदाग्नेयमष्टाकपालं निर्वपेद्रुक्काम इत्यादिवाक्येन विधानात्सङ्कल्पविषयीकारित इत्येवं स्वमतेन व्याचष्टे * तस्मादिति * रुक्कामेष्ट्यां विहितस्य पुरोडाशस्य तत्र त्यक्तस्यान्यत्रात्याज्यत्वेन साधारण्यायोगादाच्छिद्य विधौ च रुक्कामेष्ट्यसिद्ध्यापत्तेः पौर्णमास्यां विध्ययोगे ऽपि पुरोडाशान्तरस्य चाग्नेयोपलक्षणायोगे ऽपि यो ऽष्टाकपालो ऽन्यत्राग्नेयतया विहितः स पौर्णमास्यां भवतीत्यष्टाकपालत्वसाम्यात्पुरोडाशान्तरस्याग्न्युपलक्षितस्य पौर्णमास्यां विधिरित्याशयः । तथापीति परिहारभाष्यमाग्नेयपदान्वयेनैवाग्निदेवत्यत्वसिद्धेरयुक्तमाशङ्क्योपपादयति * तत्राहेति * अष्टाकपालस्य पौर्णमासीसम्बन्धविध्यर्थमुपलक्षणायाग्नेय इति शब्दो वाचको ऽस्येति व्युत्पत्त्याग्नेयशब्दोक्तस्याग्नेयत्वस्यानूद्यमानात्वात्पौर्णमासीगतस्याष्टाकपालस्य नाग्निदेवत्यत्वसिद्धिरित्यर्थः । सिद्ध्यर्थमिति पाठेतूपलक्षणभूताग्निसम्बन्धसिद्ध्यर्थमिति व्याख्येयम् । अथेति भाष्येणोपलक्षणार्थत्वबहुविधानार्थतामप्याग्नेयशब्दस्याशङ्क्य स वक्तव्य इत्यनेन वैश्वदेवशब्दवत्त्वात्सकृदुच्चरितस्याग्नेयादिशब्दस्य विध्यनुवादत्वासम्भवेन परिहृतं तद्व्याचष्टे * युगपादिति * कल्पयिष्याम इति भाष्येणाष्टाकपालस्य पौर्णमासीयागान्वयं विहिते देवतां विना द्रव्य-

स्य यागान्वयायोगाद्देवताकाङ्क्षायामुपलक्षणत्वेन बुद्धिस्थस्याग्नेर्देवतात्वकल्पनमाशङ्क्य नासतीत्यनेन यस्य वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते सा देवता भवतीति विधिशब्दाधिकरणावक्ष्यमाणलक्षणेन त्यज्यमानद्रव्यसम्बन्धापेक्षप्रवृत्तित्वात्मकसम्बन्धिशब्दत्वाद्देवताशब्दस्य गुर्वादिशब्दस्याध्यापनादिक्रियाजन्याध्याप्यावच्छिन्नाध्यापयित्रादिगतातिशयवाचित्वावगतिवत्त्यागोद्देशक्रियाजन्यद्रव्यावच्छिन्नाग्न्यादिगतातिशयवाचित्वावगतेर्विधानं च विनाग्न्यादेर्द्रव्यत्यागोद्देश्यत्वप्रमाणाभावेनोद्देशक्रियाजन्यातिशयभात्कायोगान्नाग्न्युद्देशेन द्रव्यत्यागविधिं विनाग्नेर्देवतात्वसिद्धिरित्युक्तम् ।

तदर्थो यादृशो यत्र देवतात्वेन चोदितः ।
मनागपि ततो ऽन्यत्वे देवतेति न गम्यते ॥

इतिस्तुतशस्त्राधिकरणवार्त्तिके व्याख्यातमितीतिकरणेन सूचितम् । एवं तर्हि यो ऽष्टाकपालतयान्यत्राग्नेयो विहितः स पौर्णमास्यां भवतीत्यन्यतः सिद्धं देवताया द्रव्यान्वयमनूद्य कर्मान्वयमात्रविधानादवाक्यभेदो भविष्यतीत्याशङ्क्य कर्मविधिं विना न कथंचिद्वाक्यभेदपरिहारः सम्भवतीति दर्शयितुमाह * अनेनैवेति *

नियोगेन विकल्पेन द्वे वा सह समुच्चिते ।
सम्बन्धः समुदायो वा विशिष्टावेकयेतरे ॥

इत्यनेन न्यायेन बहुप्रकारावचनव्यक्तीराशङ्क्य देवतानुपलक्षितद्रव्यमात्रविधौ द्रव्यानुपलक्षितदेवतामात्रविधौ वान्यतरपदानर्थक्यापत्तेर्यथा देवतोपलक्षितद्रव्यस्यैव विद्वद्वाक्यविहितकर्मान्वयविधौ विधिं विना देवतानवगतेरुपलक्षणार्थत्वेनोपचिरितस्याग्नेयशब्दस्याविधित्वकल्पने सकृदुच्चरितविध्यनुवादत्वायोगेनोच्चारणावृत्तिलक्षणो वाक्यभेदस्तथा द्रव्योपलक्षिताया देवतायाः एव विधौ द्रव्यस्यापि विधिं विना कर्मान्वयासिद्धेरुपलक्षणार्थस्याष्टाकपालशब्दस्य विधित्वकल्पने ऽपि द्रव्यं वा देवता वा विधीयतइत्यस्मिन्पक्षे विकल्पेनान्यतरस्योपलक्षणार्थस्य विधित्वकल्पनवाक्यभेदः । द्रव्यं देवता चेति समुच्चयपक्षे स्पष्टो वाक्यभेदः द्रव्यदेवतासम्बन्धसमुदाययोर्विधौ सम्बन्धो हि विधीयमानः सम्बन्धिनं तावदाक्षिपेद्धात्वर्थे पुनः स विधातव्य एवं सम्बन्धी अन्यथासम्बन्धस्यैवं सम्बन्धी शेषः स्यान्न क्रियाया इत्याधाराग्निहोत्राधिकरणवक्ष्यमाणन्यायेन द्रव्यदेवतयोरपि विध्यापत्तेर्वाक्यभेदः अन्यतरविशिष्टान्यतरविधावपि द्रव्यदेवतयोर्भिन्नकार-

कत्वात्कारकयोश्चान्योन्यविशेषणविशेष्यभावाभावेनैककारकविशि-
ष्टकारकान्तरविध्ययोगादेकस्वरूपविशिष्टान्तरस्वरूपविध्यभ्युपगमे
चान्योन्यविशेषणत्वप्रसङ्गाद्भात्वर्थे पुनः स विधातव्य सम्बन्धी-
त्यनेन न्यायेन क्रियाङ्गत्वासिद्ध्यर्थं विशेषणस्यापि विध्यापत्तेर्वाक्य-
भेदः प्रपञ्चयितव्य इत्यर्थः।एते पक्षाः पुनर्योज्याव्यतिकीर्णाः परस्पर-
मिति न्यायेन वचनव्यक्त्यानन्त्याद्वाक्यभेदानन्त्याभिधानं पौर्णमासी-
ग्रहणस्योपलक्षणार्थत्वेनामावास्याया अनुवादेनापि द्रव्यदेवताविधा-
नस्य निरस्तत्वाच्किं तद्वाग्नेयादिवाक्ये विधीयतइत्याशङ्कायां तस्मादि-
त्यन्तभाष्यं व्याचष्टे * तेनेति * विद्वद्वाक्यविहितएव कर्मणि द्र-
व्यदेवतासम्बन्धो विधीयतामित्याशङ्कानिरासार्थं स एष इति भाष्यं
व्याचष्टे * न चेति * यजतिस्तु द्रव्यफलभोक्तृसंयोगादिनेव न्या-
येन योगं विना द्रव्यदेवतान्वययोगाद्यागापेक्षायां वाक्यान्तरप्राप्ते
यागे द्रव्यदेवतान्वयविधौ सम्बन्धो विधीयमान इत्याधाराग्निहो-
त्राधिकरणवार्त्तिकोक्तन्यायेन द्रव्यदेवतयोरपि विध्यापत्तेर्वाक्य-
भेदप्रसङ्गादस्मिन्नेव वाक्ये द्रव्यदेवताविशिष्टयागविधानात्स एव
यागो भवतीत्यपरोक्षवाचिनैषशब्देन वाक्यान्तरविहितात्परोक्षा-
द्यागाद्भेदः सूचित इत्याशयः।एवं तर्ह्याग्नेयादिवाक्यविहितं यागा-
न्तरमेव विद्वद्वाक्याविहितयोर्यागयोः पौर्णमास्यमावास्याशब्दोक्त-
योरङ्गत्वेन विधीयमानं रूपं भविष्यतीत्याशङ्कानिरासार्थं तेनेत्या-
दिभाष्यं व्याचष्टे * कर्मान्तरत्वे चेति* आग्नेयादिवाक्यस्थयोः पौ- ४८०।१
र्णमास्यमावास्याशब्दयोः श्रुत्या कालार्थत्वप्रतीतेर्लक्षणाहेत्वभा-
वाच्चायुक्तमप्याग्नेयादिवाक्यविहितानां यागानां विद्वद्वाक्यविहि-
तयागाङ्गत्वं प्रौढ्याभ्युपेत्य यागस्य यागान्तरव्यवच्छिन्नरूपयागप्र-
त्यायकत्वायोगात् रूपत्वाभावो भाष्यकृतोक्त इत्यवयवव्याख्यया
सूचितं श्रुत इति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * इतीति *
पूर्वपक्षसूत्रस्थश्रुतिसंयोगशब्दव्याख्यानार्थं तथा न लक्षणाशब्दो
भविष्यतीति भाष्येणार्थादुक्तं विद्वद्वाक्यस्थयोः । पौर्णमास्यमावा-
स्याशब्दयोराग्नेयादियागसमुदायपरत्वे लाक्षणिकं दोषं यत्त्विति-
भाष्येणानुभाष्य तत्परिहारार्थं नैष इति भाष्यं व्याचष्टे * अष्टश्चे-
ति * एकवचनान्वयाय समुदायलक्षणा श्रुत्यर्थान्वययोगादग-
त्याश्रयणीयेत्यर्थः । कालवाचिभ्यां पौर्णमास्यमावास्याशब्दाभ्यां
यागलक्षणा त्वत्पक्षेऽपि तुल्येति सूचनायादिशब्दः। यत्तु स्वयं श्रु-
तिशब्दव्याख्यार्थं प्रत्यक्षश्रुतश्च यजिर्न द्रव्यदेवतासम्बन्धाकलेशेना-
नुमातव्यो भविष्यतीत्युक्तम् तत्परिहरति*किं चेति*भावनैकविषय-

त्वाद्विधेर्द्रव्यदेवतान्वयं विदधताग्नेयादिवाक्ये तत्तद्वच्छिन्नाया भावनाया एव विधेयत्वाद्व्यापारस्य च व्यापारान्वयं विना भावनावच्छेदकत्वायोगादपुंव्यापारत्वेन च भवत्युक्तस्य व्यापारस्य पुम्प्रयत्नापरपर्यायभावनावच्छेदकत्वायोगाद्भवत्युक्तक्रियातो ऽन्यक्रियायोगाभावे वाक्यासमाप्तेरसमाप्तस्य चार्थाभावेनार्थद्वारवाक्यान्तरान्वयायोगान्न वाक्यान्तरे प्रत्यक्षश्रुतो ऽपि च यजिराग्नेयादिवाक्ये ऽन्वीयतइत्यर्थः। श्लोकं व्याचष्टे*अष्टाकपाल इति*यत्तु स्वयं पूर्वपक्षसूत्रस्थगुणशब्दव्याख्यानार्थं समुदायानुवादत्वाच्च विधित्वं गुणवत्तरमित्युक्तं तत्परिहर्त्तुमाह * अनुमिते चेति * प्रकृतप्रत्यभिज्ञानाद्यच्छब्दोपबन्धेन वानुवादसरूपत्वादनुवादतैवेह गुणवत्तरेत्याशयः । ननु सत्यपि यच्छब्दोपबन्धे यदाग्नेयो ऽष्टाकपाल इत्यादिवद्विधिशक्त्याशङ्क्याह * क्रियेति * न वलोप इत्यत्र यच्छब्दस्य विधिशक्तिप्रतिबन्धकनिरासात्कथं विद्वद्वाक्ययोरनुवादसरूपता यादृशी क्रिया तां कुर्यादिति क्रियारूपानुवादे ऽपि कर्त्तव्यत्वाननुवादत्वेन क्रियासमानाधिकरणस्य यच्छब्दस्य विधिशक्त्यप्रतिबन्धकत्वे ऽपि कर्तृसमानाधिकरणं कर्त्तव्यत्वानुवादित्वाद्विधिशक्तिं प्रतिबध्नातीत्याशयः । वृद्धवाक्येनैतदेव द्रढयति * तथा चेति * रुजेर्नाशापरपर्यायभङ्गवाचित्वान्न नाशयेदित्यर्थः ।

व्यपदेशश्च तद्वत् ॥ ७ ॥

भाष्यकारीयव्यपदेशशब्दस्य पौर्वापर्यविषयतया व्याख्यानं द्वितीयपूर्वपक्षनिरासार्थं सम्भवविषयत्वोपलक्षणार्थं चेत्याह *एकेष्टिरिति * यद्येको यागो ऽमावास्यायामिति विग्रहेण द्वितीयपूर्वपक्षनिरासार्थतोक्ता संहत्य युगपद्भावो धारणं निष्पादनं पौर्वापर्यं चेति द्वन्द्वैकवद्भावः। यागैक्ये ऽपि हविर्भेदादुभयोपपत्तिमाशङ्क्य * साक्षाय्येत्युक्तम्* यागैक्ये सत्याग्नेयस्यैन्द्रस्य साक्षाय्यस्य दध्नः पयसो वा विकल्पः स्यादित्यर्थः। व्यतिरेकमुखेन श्लोकं व्याचष्टे *कर्मेति* आद्यपूर्वपक्षे पौर्वापर्यविवक्षायां देवतान्वयाविवक्षयेन्द्रत्वविशेषणाविवक्षां मत्वा व्याख्याविभवार्थं स्वयमुत्तरइति द्विवचनविषयत्वेन व्यपदेशशब्दं व्याचष्टे*प्रथमेति*पूर्वपक्षद्वये ऽपि सर्वेषां समप्राधान्येनाग्नेयादेः प्राधान्यलक्षणसाधकतमत्वरूपतैक्ष्ण्यशब्दवाच्योग्रत्वाभावादुग्रत्वविषयतयापि व्यपदेशव्याख्यानं च शब्दात्सूचितम्।

४८१।२ **लिङ्गदर्शनाच्च ॥ ८ ॥**

पूर्वपक्षद्वये ऽपि श्रुत्यर्थाभ्यां लिङ्गानुपपत्तिमाह * कर्मान्तरेति * पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृन्नयो ऽनुयाजा इत्याहवनीये यजिचोदिताङ्गाहुतीनामेकादशसंख्यत्वाद्विद्वद्वाक्ययोः कर्मान्तरविधित्वपक्षे पौर्णमास्यां प्रधानाहुतिचतुष्ट्वात्पञ्चदशसंख्यापत्तेरमावास्यायां या च प्रधानाहुतिस्त्रित्वाच्चतुर्दशसंख्यापत्तेराधिक्यात्तयोरेव कर्मविधित्वपक्षे प्रधानाहुत्यैक्येनोभयत्र द्वादशसंख्यापत्तेन्यूनत्वाच्छ्रुतसंख्यानुपपत्तिरित्यर्थः कर्मैक्यपक्षे न्यायेनाग्नेयादिवाक्यविहितानां प्रधानाहुतीनां विकल्पापत्तावपि दशभिः क्रीणातीतिवच्चतुर्दशत्रयोदशवचनपर्यालोचनया समुच्चयावगमाद्याज्यानुवाक्याक्रमाच्चाहुतिपौर्वापर्योपपत्तेर्लिङ्गव्यपदेशोपपत्तिमाशङ्क्य सिद्धान्तपक्षेणानुवादतयाप्युपपन्नस्य चतुर्दशत्रयोदशवचनस्य विधित्वकल्पनायोगाद्विधित्वे च प्राधान्याहुतीनामैवैतत्संख्यत्वापत्तेरङ्गसंख्यालक्षणापत्तेश्च नैतत्समर्थनं युक्तमिति अनुवादशब्देन सूचितम्। ननु सिद्धान्ते ऽप्यसोमयाजिनः पौर्णमास्याम् अग्नीषोमीयाभावादमावास्यायां च सान्नाय्याभावाल्लिङ्गानुपपत्तिरित्याशयेन पृष्टोत्तरमाह * कुत इति * सोमयाजिविषयत्वात्पौर्णमास्याममावास्यायां तु सोमयाजिनः सान्नाय्यद्वयस्य सम्प्रतिपन्नदेवतात्वेनैकाहुतित्वादसोमयाजिनो ऽप्यैन्द्राग्नस्य पुरोडाशस्य सान्नाय्यद्वयस्थाने विधानेनैककर्म्यार्थदेवैकाहुतित्वावगतेः सदा प्रधानाहुतिद्वित्वाल्लिङ्गोपपत्तिरित्याशयः । अधिकरणार्थमुपसंहरति * तस्मादिति * सुखग्रहणार्थं वृद्धानामधिकरणार्थसंग्रहश्लोकं पठति * आहेति *

उपांशुयाजापूर्वताधिकरणम् ॥ ४ ॥

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

ननु सापवादाभ्यासचिन्तायाः समाप्तत्वात्संख्यादिनिमित्ते कर्मभेद चिन्त्ये मध्ये चिन्तान्तराण्यसङ्गतानीत्याशङ्क्य साधारणीं सङ्गतिमाह * इदानीमिति * उपांशुयाजाधाराग्निहोत्रपशुसोमवाक्यानां वाक्यान्तरविहितसमुदायानुवादत्वे सत्युपांशुयाजादिकर्मभेदो विधित्वे त्वभेद इति भेदाभेदफलत्वाल्लक्षणसङ्गतिः सूचिता अधिकरणत्रयमध्ये ऽप्यस्य प्राथम्यसिद्ध्यै वैशेषिकसङ्गतिसूचनपूर्वकं सूत्रं व्याचक्षाणः पूर्वपक्षमाह * तत्रेति * विष्णवादिवाक्यैर्याग्विधावुपांशुयाजत्वापत्त्या पौर्णमास्यां षोडशाहुत्यापत्तेर्लिङ्गदर्शनाक्षेपेण पूर्वपक्षोत्थानादुपांशुयाजचिन्तायां

वैशेषिकयनन्तरसङ्गतिस्तावच्छब्देन सूचिता विष्णवादिवाक्येषु विधेयत्वयोग्यस्वप्रधानभूतयागाश्रुतेः प्रकृतयागाभावात्पौर्णमासीवद्भावायोगं कुत इति भाष्येणाशङ्क्य नामसम्बन्धादित्यादिना तद्भद्भावोपपादनं कृतं तत्रोपांशुयाजशब्दस्य नामधेयतायाः स्वानभिमतत्वात्संज्ञावच्छेदनिमित्तमुपेक्ष्यारूपत्वप्रकृतयागसद्भावनिमितं तद्भद्भावं व्याचष्टे *कुत इति* श्लोकं व्याचष्टे *एतेषु तावदिति* तव्यस्य विधिवाचित्वादुपसर्जनत्वेनापि निर्दिष्टस्य यागस्यार्थान्निष्कृष्य विधेयत्वोपपत्तिसूचनार्थं तव्येत्युक्तम्।यजतीत्यस्य वर्त्तमानापदेशत्वान्नैकान्तिकविधितेति तावच्छब्देन सूचितम्। विष्णवादिवाक्यानां विधित्वाभावे ऽप्यन्तरालवाक्ये रूपाज्ञानसाम्यात्ततो न केवलं रूपाज्ञानं किं त्वदृष्टान्तरकल्पनं च प्राप्तमिति योज्यम्। तैत्तरीयकशाखायामुपांशुयाजमन्तरा यजत्यजामित्वायेत्यन्तरालवाक्ये ऽप्यजामिकरणार्थवाददर्शनाद्भाष्यकृतोपेक्षितमपि हेत्वन्तरमुद्गृहीते वाक्ये तादृगर्थवादादर्शनात्स्वयमाह *किं चेति*विष्णवादिवाक्येषु प्रत्येकमजामिकरणावगतेस्तदेकविषयत्वेन जामिदोषोक्तेरपि विष्णवादिवाक्यविषयस्तुत्यर्थत्वावगमात्तस्याश्चोपक्रमस्थत्वात्तदनुरोधेनोपसंहारस्थास्यापांशुत्वविशिष्टयागविधेरपि विष्णवादिवाक्यप्रतिपाद्यतावसीयत इत्याशयः । जामिदोषोपक्रममुपन्यसनमित्यर्थः। सहार्थतृतीययोक्तः श्लोकं व्याचष्टे * यथोपक्रममिति * जाम्युपन्यासाजामित्वयोरेकविषयत्वेनाजामित्वस्य विष्णवादिवाक्योक्तयागविषयत्वाज्जामित्वस्याप्युपक्रमस्थस्य सन्दिग्धेषु वाक्यशेषादित्यनेन न्यायेन तद्विषयत्वावगतेरुपसंहारस्थस्य विधेरुपक्रमानुसारित्वस्य न्याय्यत्वादिति विष्णवादियुक्ता एव विधय इत्यर्थः। जामिदोषेण सहोपन्यसनमिति योजनसूचनायोपन्यासशब्दः। समुदायानुवादव्यवहितस्यापि जामित्वस्यानुवादेन स्तुतेरनपेक्षितत्वेनासम्बन्धाद् ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः।
अर्थतो ह्यसमर्थानामानर्थक्यमकारणम् ॥

इत्यनेन न्यायेनापेक्षावशाद्विधिवाक्यान्वयो ऽनेकैरपि चैकस्य तन्त्रेणान्वयो न विरुद्ध इत्याशयः । यागत्रयस्योपांशुत्वाद्येकधर्ममयोगात्समुदायाकरणे शक्ये ऽप्यनुवादानर्थक्यमाशङ्क्याह * समुदायेति * अन्यथा कालवाक्ये ऽग्नीषोमकीर्त्तनातदेवत्यस्योपांशुयाजस्य कालान्वये सति विद्वद्वाक्यस्थेन पौर्णमासीशब्देनानुवादात्फलवाक्यस्थेन पूर्णमासशब्देन फलान्वयात्प्राधान्यावगतेर्वैष्णवप्राजापत्य- ४८२।१

योरङ्गत्वं स्यादित्याशयः । नन्वित्याशङ्काभाष्यमाक्षिपति * नन्विति * समाधत्ते * नैष इति * नैवं जातीयक इति परिहारभाष्यमवतारयन् व्याचष्टे * अत इति * नाम्नो ऽप्युपांशुत्वगुणकयागत्वानिमित्तत्वादकृतकत्वस्य तदवाचकत्वापत्तेः पक्षद्वयसाम्येनादोषत्वशङ्कानिरासार्थमव्युत्पन्नस्त्विति भाष्यं व्याचष्टे * व्युत्पन्नेति * नन्वित्याशङ्काभाष्याशयं व्याचष्टे * नन्विति * माभूदिति परिहारभाष्याशयमवतारणपूर्वं व्याचष्टे * तदिति *

चोदना वा प्रकृतत्वात् ॥ १० ॥

सूत्रं व्याचष्टे * कर्मेति * विष्णवादिसंयुक्तानां भिन्नवाक्यत्वाभावे ऽप्यवान्तरपदसङ्गविषयो वाक्यशब्दः विष्णवादिवाक्यानामविधायकत्वं न हीत्यादि भिद्येत वाक्यमित्यन्तभाष्योक्तया युक्त्योपपादयति * यथेति * तथात्रापि न पृथग्विधित्वप्रतिपत्तिरित्यध्याहारेण नानेकादृष्टकल्पनानुबन्धिविध्यभ्युपगमो युक्त इति व्यवहितान्वयेन वा पूरणीयम् । ननु वैश्वानरं द्वादशकपालं निर्वपेदित्युपक्रान्ताया वैश्वानरेष्टेर्यस्मिन्जातएतामिष्टिं निर्वपतीत्युपसंहारेणैकवाक्यत्वावगमाद् दृष्टत्वादियुक्तानां शब्दानां पृथग्विधित्वायोगो ऽप्यत्र जामित्वोपक्रमाद्जामित्वोपसंहाराच्चैकवाक्यत्वानवगतेर्न तत्तुल्यतेत्याशङ्क्यैकं हीदं वाक्यमिति भाष्योपपादितमेकवाक्यत्वं प्रपञ्चयितुम् * जामि वा इत्युक्तम् * सोदर्यवाचिजामिशब्दलक्षितस्य सादृश्यस्य नैरन्तर्यानुष्ठाने सत्यालस्यापादकत्वेन दोषत्वात्तत्कीर्त्तनस्य च निषेधाश्रुतेर्निन्दापर्यवसायित्वायोगादाकाङ्क्षावशेनाजामित्वकरकर्मस्तुत्यर्थत्वावगमाज्जामित्वोपन्यासयोरेकवाक्यतावसीयतइत्याशयः । ननु जामित्वाजामित्वोपन्यासयोरेकवाक्यत्वावसाये ऽप्यजामित्वस्य विष्णवादिवाक्योक्तयागविषयत्वात्तदेकवाक्यतया जामित्वस्यापि तद्विषयत्वावगतेस्तस्य चोपक्रमस्थत्वात्तदनुसारेणोपसंहारस्थस्य विधेरपि तद्विषयतावसीयतइत्याशङ्क्य कः पुनरित्यादिभाष्योक्तार्थवादस्यान्तरालवाक्योक्तयागविषयत्वाद्विधेरपि तद्विषयत्वमुपपादयितुम् *जामिता चेत्युक्तम् * ४८३।२
पञ्चम्यन्तवैश्वानरवाक्यवदत्रापि वाक्ये विध्यैक्यावसायान्न पृथक् विधितेत्यध्याहारेण नानेकेति व्यवहितान्वयेन वा पूरणीयम् । नन्वेवमपि विष्णवादिवाक्येषु तव्यप्रत्ययेनैकान्तिकविधित्वावगमात्पृथक्विधित्वापत्तिरित्याशङ्क्य तस्मिन्क्रियमाणइति भाष्योक्तं विधित्वानादरमुपपादयितुम् * विष्णवादीत्युक्तम् * न हीत्यनेन विधि-

त्वानपेक्षोपपादिता विष्णवादियुक्तगतस्याजामित्वस्य जामितयान्वये सति विष्णवादियुक्तविधेस्तथान्वयः स्यान्न त्वजामित्वस्य विष्णवादियुक्तगतत्वं सम्भवति विष्णवादियुक्तानामन्तरालसंयोगाभावेन स्तुत्यनर्हत्वादित्याशयः । नन्वन्तरालयुक्तस्याप्यजामित्वान्वयाश्रुतेर्न विधानार्हतास्तीत्याशङ्क्य तत्र व्यवधानादिति भाष्योक्तमन्तरालसंयोगेनैवाजामित्वान्वयावगमाज्ज्याम्युपक्रमेण वाक्येन विधानार्हत्वं विवरीतुम् * अन्तरालेत्युक्तम् * विष्णवादिवाक्यानां यागाविधायकत्वमेवापि चेति भाष्यांक्तेन युक्त्यन्तरेणोपपादयति * किं चेति * विष्णवादिवाक्यैर्यागविधौ सति विष्णवादिदेवताया यागान्वये श्रुतेन विधिना कृते यागो ऽर्थाद्देवतां प्रत्युपसर्जनभूतो विधेयः स्यात्तच्चान्तरालवाक्येन श्रुते चकारात्स्वप्रधानभूते यागे विधेये सम्भवत्ययुक्तमित्यर्थः। अनेन चार्थाक्षेपाधीनत्वेनोपसर्जनभूतस्य देवतासंस्कारकत्वापत्तेरविनियुक्तायाश्च देवतायाः संस्कार्यत्वायोगाद्देवताविधिसापेक्षत्वेन यागविधेर्विप्रकृष्टत्वमाभिप्रेत्य भाष्ये वाक्यशब्दः प्रयुक्त इति सूचितम। श्लोकं व्याचष्टे *कर्मोत्पन्नइति* याग उपसर्जनं विष्णवादिः प्रधानं यस्मिन्निति बहुव्रीहिं विगृह्य यागोपसर्जनश्चासौ विष्णवादिप्रधानश्चेति कर्मधारयो विग्राह्यः प्रत्यक्षस्य प्रधानस्य च यागस्य कर्त्तव्यत्वोपदेशोपपत्तेरित्यर्थः। एवं सत्यपि विधित्वे देवताविध्यापत्तेर्यागविधित्वं नास्तीत्याह * तत्रेति * देवताविधितैव तर्ह्यस्तु इत्याशङ्क्याह * न चेति * देवतान्वयानभिधायित्वात्तव्यप्रत्ययानां देवताविधायित्वासम्भवे ऽभिहिते चतुर्थ्या देवतात्वानभिधायित्वे ऽपि यथादेवताविधायित्वं तथा तव्यस्यापि भविष्यतीत्याशङ्क्य * सम्प्रदानमित्युक्तम् * त्यज्यमानद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मकसम्प्रदानत्ववाचिनी चतुर्थी लक्षणया वाच्यैकदेशत्यज्यमानद्रव्योद्देश्यत्वात्मकं देवतात्वं वदतीत्याशयः। ननु कर्मत्ववाचिन्यापि द्वितीयया विष्णुं यजतीत्यादौ देवताविधिदर्शनात्तद्वाचिनस्तव्यप्रत्ययस्यापि देवताविधायित्वं कस्मान्न स्यादित्याशङ्क्याह *तत्रेति *तव्यस्य द्वितीयावद्प्रधानभूतकर्मानभिधायित्वात्तत्तुल्यार्थतैव तावत् क्लेशलभ्या न च तल्लाभमात्राद्देवतासिद्धिः देवतायाः कर्मत्वाभावादित्याशयः। कथं तर्हि देवतायास्तव्यद्वितीयाभ्यां निर्देश इत्याशङ्क्य निर्देशालम्बनमाह * त्यागार्थत्वाद्धीति * देवतोद्देशद्रव्यत्यागसमुदायवाचित्वाद्यजेस्ताहशस्य च कर्माभावाद् द्रव्यस्यापि पारमार्थिककर्मत्वाभावे ऽपि देवताद्वच्छब्दमात्रोपकारित्वशङ्कानिवृत्तये ऽर्थरूपोपकारित्वप्रदर्शनार्थः ।

परमार्थशब्दः। उद्देशविशिष्टत्यागवाचिनो ऽपि यजेर्विशेषणांशानादरेण विशेष्यांशविवक्षया त्यागार्थत्वमभिप्रेत्य कर्म भवतीति लप्बलोपे पञ्चमी। नन्वेवं सति देवतायाः कथं कर्मतेत्याशङ्क्य देवतोद्देशेन द्रव्यत्यागोत्तरकालं देवतामुद्दिश्य त्यज्यमानेन द्रव्येण देवतायाः प्रतिग्रहीतृत्वाभावे ऽपि प्रतिश्रवणेनेवाप्रतिगृह्णतो ऽपि ब्राह्मणस्य स्वाम्यापादनेनाप्यमानत्वात्तत्ते पयसि दध्यानयतीत्यत्रानयतिकर्मणा दध्नेव व्याप्यमानस्य पयसो * द्वितीयकर्मत्वं भवतीत्युक्तम् * ननु देवताया द्रव्येणाप्यमानत्वस्य दध्नेव पयसः संस्कार्यत्वमात्रविवक्षायां द्विकर्मकलक्षणो धातुः प्रसज्येत गवेव तु ब्राह्मणस्य स्वाम्यविवक्षायां सम्प्रदानत्वापत्तेश्चतुर्थी स्यादित्याशङ्क्य * तत्रेत्युक्तम् * प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वादित्यत्र षष्ठाधिकरणसूत्रे प्रक्रान्तं कर्म वीतायामपि फलेच्छायां प्राप्ते वा फले ऽवश्यं समापनीयमित्येतदुपपादनार्थं भाष्यकृतोपक्रमादारभ्य समाप्तिपर्यन्तस्य व्यापारसमूहस्याख्यातेन विधित्सितत्वात् श्रुत्या चारम्भसमाप्त्योर्विधौ गौरवापत्तेरारम्भमात्रविधौ च नियोगतः समाप्त्यसिद्धेर्योगादि समापयेदिति शास्त्रार्थ इति नायमारम्भसमाप्तिशब्दार्थः। किं तर्हि समाप्तिरेव समाप्त्या व्यर्थप्राप्तत्वादारम्भस्य तस्मात्परिसमाप्तिः शब्दार्थ इति भाष्येण वक्ष्यमाणत्वाद्देवतास्वाम्यापत्तेश्च देवतोद्देशविशिष्टद्रव्यत्यागोत्तरकालत्वेन समाप्तित्वात्तत्कर्ममात्रविभोधैनैककर्मत्वावधारणात् द्विकर्मकधात्वप्रसक्तेर्देवतायाश्च प्रतिग्रहीतृत्वाभावेन सम्प्रदानत्वाभावाच्चतुर्थ्यप्रसक्तेस्तव्यद्वितीयोपपत्तिरित्यर्थः। न तु त्यज्यमानद्रव्याप्यमानस्य तव्यद्वितीयावाच्यत्वे तल्लक्षणत्वाद्देवतात्वमेव वाच्यं स्यादित्याशङ्क्याह * नत्विति * त्यज्यमानद्रव्योद्देशकर्मत्वं देवतात्वं तच्चोद्देशांशस्य विशेषणत्वेन द्वितीयानन्वयान्न द्वितीययोच्यते देवतात्तेस्त्वाहवनीयप्राप्तेर्जुहोत्यर्थत्ववत् यज्यर्थत्वाभावान्नान्तरीयकसिद्धावपि अशास्त्रीयत्वेन तत्कर्मत्वलक्षणमाप्यमानत्वं न देवतात्वमित्याशयः। कथं तर्हि द्वितीयानिर्देशे देवतात्वसिद्धिरित्याशङ्क्याह * किं तर्हीति * देवतामुद्दिश्य त्यज्यमानेन द्रव्येणाप्यमानत्वलक्षणस्य कर्मत्वस्य त्यज्यमानद्रव्योद्देश्यत्वलक्षणाद्देवतात्वाद्विनानुपपत्तेस्तन्निमित्तया लक्षणया गम्यमानत्वाद्वितीयानिर्देशे देवतात्वनिश्चय इत्यर्थः। यजदेवपूजासङ्गतिकरणदानेष्विति स्मृतिबलेन पूजाकर्मत्वलक्षणं देवतात्वं द्वितीयावाच्यमित्याशङ्क्ते * नन्विति * व्याकरणस्यार्थान्वाख्यानार्थत्वाभावेनार्थवत्त्वे प्रामाण्याभावात्पुरा- ४८४।१

णादौ च यज्ञानधिकारिणो भीष्मादेर्यष्टृत्वकीर्त्तनालम्बनानि पूजाप्रतिष्ठादानानि दर्शयितुमौपचारिकार्थान्वाख्यानोपपत्तेर्यजेः पूजावाचित्वाभावान्न तत्कर्मत्वं देवतात्वमित्याशयेन परिहरति * नैष इति * एतदेव प्रश्नपूर्वकमुपपादयति*कुत इति*श्लोकं व्याचष्टे* न हीति*अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्याद् गुणत्वे देवताश्रुतिरित्यत्र नवमाधिकरणसूत्रे विग्रहाद्यभावेन रूपासमवायादेवतायाः पूज्यत्वं निरस्यातिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिविधानत्वादिति दृष्टान्तवैषम्याभिधानार्थे सूत्रे विग्रहादिसद्भावे ऽपि यजेः पूजावाचित्वाभावाद्यागकर्मणि देवताप्राधान्याभाव इति मध्यमावयवेन देवताप्राधान्यस्य निषेत्स्यमानत्वं न चातिथिवदिति चकारसूचितम् । न च यजिरित्यनेन व्याख्यातं किं च पूजयतोःप्रीत्युत्पादनवाचित्वादुत्पादनस्य च करोत्यर्थत्वेन नित्यं सकर्मकत्वात्पूज्यस्य तत्कर्मत्वे सत्यपि स्वास्थ्यकामः शयीतेत्यादौ प्रत्ययार्थकर्मणि स्वास्थ्यादावदर्शनेन द्वितीयाया धात्वर्थकर्मविषयत्वावसायाद्दानादिना च पूज्यस्य धात्वर्थकर्मत्वदर्शनाद्यागेन देवतायाः पूज्यत्वे ऽपि यागकर्मत्वाभावान्न द्वितीयावाच्यतास्तीत्याशयेनाह * दानेन चेति * नन्वेवं सत्युपाध्यायवद्देवतायाः पूज्यत्वेन यज्यर्थत्यागकर्मणा त्याज्येन द्रव्येणाभिप्रेयमाणत्वात्सम्प्रदानत्वमेव देवतात्वं स्यादित्याशयेनाशङ्कते * एवं तर्हीति * मुख्यं वा संप्रदानत्वमापद्यते गौणं वा तत्र मुख्यं तावन्न सम्भवतीत्याह * नेति * तादृशशब्देनोपाध्यायवन्मुख्यतोक्ता । नन्वप्रतिग्रहीतृत्वान्मुख्यसम्प्रदानत्वाभावेन सम्प्रदानत्वनिर्देशाभावे सति मुख्यकर्मत्वाभावे सति मुख्यकर्मत्वाभावे कर्मत्वनिर्देशस्याप्यभावापत्तेर्विष्णुं यजतीत्यादिकर्मत्वनिर्देशान्मुख्यकर्मतैव देवतायाः प्रतीयतइत्याशङ्क्य मुख्यसम्प्रदानत्वाभावे ऽपि सम्प्रदानत्वनिर्देशवन्मुख्यकर्मत्वाभावे ऽपि कर्मत्वनिर्देशोपपत्तिप्रदर्शनार्थं गौणसम्प्रदात्वनिर्देशमुदाहरति * अपि चेति * क्वचित्शब्देन गौणत्वं सूचितम् । एवमौपचारिकपूज्यत्वाभ्युपगमेन गौणे कर्मत्वे सम्प्रदानत्वे वा सत्यपि देवतात्वं नास्तीत्युक्तेदानीं देवतायाः पूज्यत्वाभावात्तन्निमित्तं कर्मत्वं सम्प्रदानत्वं वा गौणमपि नास्तीत्याह * सर्वथेति * न मुख्यवृत्त्या नापि गौणवृत्त्येति सर्वथाशब्देन सूचितम् । कथं तर्हि विष्णुं यजति सोमाय यजतइत्यादौ द्वितीयाचतुर्थीनिर्देशः इत्याशङ्क्यैतदालम्बनं वक्तुम * आहासाधारणेन त्विति * पूजायाः प्रीत्युत्पादनात्मकत्वेन करोत्यर्थत्वाद्यजिपरप्रत्ययार्थत्वे सत्योदनस्येव पाके देवतायाः पूजाख्ये प्रत्यया-

थं मुख्येऽप्सिततमत्वलक्षणकर्मत्वोपपत्तेर्विषयस्येव वा भक्षणे गौणानीप्सितत्वलक्षणकर्मत्वोपपत्तेरप्रतिग्रहीतृत्वे ऽपि च यज्ञान्यस्मै प्रतिश्रुतमित्यत्राप्रतिग्रहीतुरिव पूजाकर्मत्वाद्यागे गौणसम्प्रदानत्वोपपत्तेस्तद्व्यावृत्त्यर्थः केवलशब्दः। यजिपरस्य प्रत्ययस्य ददातिपरप्रत्ययवत्पूज्यवाचित्वाभावाद्यागमात्रविषयं देवतायाः कर्मत्वं सम्प्रदानत्वं वा स्यात्तच्च कर्मान्तरसम्प्रदानान्तरव्यावृत्तेनैव रूपेण भवतीत्याशयः। देवतायाः कर्मान्तरसम्प्रदानान्तरविलक्षणकर्मत्वं सम्प्रदानत्वाभ्युपगमे हेतुमाह * तच्चेति * तत्कर्मत्वं सम्प्रदानत्वं वा यदेवं भूतमन्येभ्यो विलक्षणं कल्प्यते तदेवतायाः कारकत्वावगमात्कर्तृकरणापादानाधिकरणकर्मसम्प्रदानातिरिक्तस्य कारकस्याभावाद्देवतायाश्च कर्मसम्प्रदानातिरिक्तकारकत्वस्य कथं चिदप्ययोगात्पारिशेष्यात्कर्मत्वस्य सम्प्रदानत्वस्य वावगतेः कर्मान्तरसम्प्रदानान्तरतुल्यस्य च तस्यायोगादित्यर्थः । कथं देवताया कारकत्वावगतिरित्याशङ्क्याह * न हीति * कारकत्वं विना क्रियान्वययोगात्प्रातिपदिकवाच्येनाकारकरूपेण यागान्वयं न प्रतिपद्यते देवतेति । सर्वत्रेयं देवतेति देवताशब्दानुषङ्गेण योज्यम् । देवतावाच्यग्न्यादिप्रातिपदिकपरो ऽत्रत्यो देवताशब्दो देवताशब्दवाच्येनापि रूपेण देवतायागान्वयं न प्रतिपद्यते किमुताग्न्यादिशब्दवाच्येनेत्यतिशयद्योतनार्थः । देवतातद्धितविषयो वा देवताशब्दः तद्धितनिर्देशे ऽपि देवताया द्रव्यमात्रान्वयप्रतीतेर्यागान्वयार्थमग्निमनेन यजेताग्नये यजेतेति वा वचनव्यक्तिः कल्प्येत्याशयः। कीदृक् विलक्षणं रूपं कर्मसम्प्रदानयोरित्यपेक्षिते सम्प्रदानस्य तावत् त्याज्यद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मकस्य तदेकदेशोद्देश्यत्वमात्रेण त्यज्यमानद्रव्यस्यान्यत्राविनियोज्यत्वलक्षणदेवतास्वत्वापत्तेः देवतायाः प्रतिग्रहीतृत्वाभावे ऽपि तत्फललाभात्त्यज्यमानद्रव्योद्देश्यत्वमात्रे सकलसम्प्रदानरूपकल्पनात्मकं वैलक्षण्यमाह * तेनेति * येन कारणेनान्यसम्प्रदानतुल्यं देवतायाः सम्प्रदानत्वं नास्ति तेन कारणेन देवतोद्देशद्रव्यत्यागात्मकस्य यागस्य त्यागांशप्राधान्यविवक्षायां प्रतिग्रहाद्विनापि तत्फललाभात्सकलसम्प्रदानत्वकल्पनेन चतुर्थीनिर्देश इत्यर्थः । उद्देश्यांशप्राधान्यविवक्षायां तद्विशेषणभूते त्यागांशे आप्यमानत्वाध्यायेन सकलं यागं प्रति कर्मत्वरूपं कर्मणो वैलक्षण्यमाह * यद्वेति * वचनव्यक्तिभेदेनैतदेव स्पष्टयति * तेनेति * देवतोद्देशेन द्रव्यत्यागाद्देवतास्वाम्यापत्तावपि तदापादनस्याविहितत्वद्योतनायेवशब्दः परस्व- ४८५।२

त्वापादनत्यागयोः प्राधान्याविवक्षायामपि पश्चाद्भावद्योतनार्थौ तु-मुनौ । ननु देवताया रूपासमवायेन तदुद्देशस्याप्राधान्यान्न द्वितीयोक्तकर्मान्वयः सम्भवतीत्याशङ्क्य होत्रादेर्द्रव्यस्याख्याभावात्यक्तृत्वायोगेन त्यागशून्ये देवतोद्देशमात्रे होतर्यजेत्यादेर्यजिप्रयोगात्प्राधान्यमुपपादयितुमाह * तथा चेति * नन्वेवं रूपयोरपि कर्मसम्प्रदानयोर्विभक्तिवाच्यत्वात्तद्रूपस्य देवतात्वस्य विभक्तिवाच्यता न विरुद्धेत्याशङ्क्याह * तदेतदिति * अनेकवाच्यशक्तिकल्पनापत्तेर्नानयोर्देवतामात्रविषययोर्वाच्यत्वकल्पना युक्तेत्याशयः । नन्वेवमपि लाक्षणिकत्वाविशेषात्सम्प्रदाननिर्देशवत्कर्मनिर्देशेऽपि देवतात्वं कस्मान्नेष्यतइत्याशङ्क्याह * तत्रापीति * प्रतिग्रहीतृत्वाभावेनासमस्तात्मकत्वाद् दूषितमपि सम्प्रदानत्वमुद्देशत्यागाव्यभिचारित्वात्तत्सम्बन्धिनो देवतात्वस्य प्रत्यासन्नं कर्मत्वं तूद्देशत्यागव्यतिरिक्तेषु क्रियान्तरेष्वपि सम्भवेन सव्यभिचारित्वाद्विप्रकृष्टं ततश्च कर्मत्वेन देवतात्वलक्षणा ऽत्यन्तक्लिष्टेत्याशयः । ननु कर्मत्वबहेवतात्वस्यापि सप्तदेवताः शंसतीत्यादौ क्रियान्तरेषु भावात्तु तन्मात्रेण कर्मत्वस्य देवतात्वाद्विप्रकर्षः स्यादित्याशङ्क्याह * न हीति * तत्प्रकृतं हविर्भात्कलक्षणं देवतात्वं सकलं यथायजिमेव प्रति ननु क्रियान्तरमपि प्रति न तथा सकलं कर्म यजिमेव प्रतिक्रियान्तरेष्वपि कस्य चित्कर्मणः सद्भावादित्यर्थः । स्तुतिभात्कलक्षणं त्वितरद्देवतात्वं न हविर्भात्कलक्षणमित्याशयः । ननु कर्मत्वसम्प्रदानत्वयोर्देवतात्वाभावाद्द्वितीयाचतुर्थ्यौ देवतानभिधायित्वे को ऽन्यस्तद्वाची शब्दः स्यादित्याशङ्क्याह * परमार्थतः पुनरिति * स्मृतितिबलेनैतदेवोपपादयति * तथा चेति * क्रीतादितद्धितविधौ यथा तृतीयया कारकविभक्त्या वदनं कृतं न तथा देवताताद्धितविधाविदमग्नये ऽनेनाग्निमिति वा कारकविभक्त्या वदनं कृतमित्यर्थः । भावे ऽनिष्टा श्लोकं व्याचष्टे * ये हीति * अनन्यशब्दवाच्यत्वोपपादनस्य तव्यप्रत्ययवाच्यत्वोपयोगमाह * ततश्चेति * देवतायास्त्ववाच्यत्वोपपादनस्य प्रकृतयागविधायित्वाभावोपयोगमाह * तत्रेति * न त्विति भाष्येणान्तरालवाक्ये ऽपि यागान्तरालान्वयविधिप्रतीतेर्यागस्य स्वरूपविधिक्लेशसाम्यमाशङ्क्य बाढमित्यनेनोपांशुत्वान्तरालान्वयस्यैव विधेयत्वाभिधानेनाशङ्काशयानतिक्रमाद्विधित्वाभिधानाच्चायुक्तत्वमाशङ्क्यैकग्रन्थेनाशङ्कापरिहाभाष्यद्वयं तात्पर्यतो व्याचष्टे * अन्तरेति * विशिष्टार्थप्रतीतौ सम्बन्धस्य नान्तरीयकत्वात्सम्बन्धशब्देन लक्षणया वैशिष्ट्याभिधानाद्विधित्वं च

विनानर्थक्यापत्तेरनन्यगतित्वस्य हेतुत्वेन विवक्षितत्वाच्छङ्कापरिहार इत्याशयः। केन भाष्येणानन्यगतित्वं हेतुत्वेन विवक्षितमित्याशङ्क्य नन्वन्तरालसम्बन्धस्यान्यत्प्रयोजनमिति भाष्येणेति सूचयितुमाह * न हीति * उपांशु पौर्णमास्यां यजन्नित्यत्रैकीकृतानां कालसम्बन्धे सति सर्वेषां प्राधान्यं स्यादित्यत्र समुदायानुवादार्थत्वोक्तेत्याशङ्कते *ननु चेति * शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीय इत्यन्यार्थदर्शनस्य प्राधान्यद्योतकत्वेन व्याख्यायां पूर्वपक्षे ऽग्नीषोमीयोपांशुयाजव्यतिरिक्तयोर्वैष्णवप्राजापत्योपांशुयाजयोरप्राधान्यापत्त्यभिधानेन समुदायानुवादानर्थक्यस्य वक्ष्यमाणत्वान्न सर्वोपांशुयाजप्राधान्यज्ञापनेनार्थवत्तेति परिहरति *तथेति *एवं तु व्याख्यायमाने यदीमे ऽपि विधीयेरन् भिद्यते वाक्यमित्यस्यानन्तरमेकं हीदमित्यादेर्विष्ण्वादिसम्बन्धो ऽनूद्यतदित्यन्तस्य भाष्यस्यान्वयापत्तेरुपांशुत्वादिसम्बन्धइत्यस्यानन्तरं च नन्वन्तरालसम्बन्धस्येत्यस्यान्वयापत्तेर्व्यवहितान्वयदोषभयान्नन्वित्यनेन विष्ण्वादिवाक्यविहितेषु यागेष्वन्तरालगुणविधानायान्तरालवाक्यमित्याशङ्क्योपांशुत्वस्यादिशब्दोपात्तस्य चान्तरालस्य प्राप्ते कर्मण्येकेन वाक्येन विधानाशक्तेश्चोदना वा गुणानां युगपद् शास्त्रादित्यनेन न्यायेन विष्ण्वादिवाक्यैर्यागविधावप्यन्तरालवाक्येन कर्मान्तरविधानापत्तौ वाढमित्यनेनार्हतीत्यन्तेनोक्तायां विष्ण्वादिवाक्यप्राप्तानामुपांशुत्वस्यान्तरालवाक्ये ऽनुवादात्कथमनेकगुणविधानात्कर्मान्तरापत्तिरित्याशयेन कथमिति पृष्टे जामि वेत्यादिनानूद्यत इत्यन्तेन विष्ण्वादिवाक्यानां विधायकत्वायोगान्न तत्प्राप्तोपांशुत्वानुवादः सम्भवतीत्युक्ते ऽनुपादेयान्तरालकालान्वयात्प्रकरणान्तरन्यायेनापि कर्मविधित्वाभिधानार्थं नन्वन्तरालसम्बन्धस्येति भाष्यमिति यथान्यासमेव भाष्यव्याख्यां सूचयितुमाह * किं चेति * नन्व- ४८६।१
नुपादेयान्वये ऽपि विष्ण्वादिवाक्यविहितयागविपरिवृत्तेः प्रकरणान्तरन्यायो नास्तीत्याशङ्क्याह * तादृगिति * एतदेव व्याचष्टे * यादृशी हीति * अस्मिंश्च व्याख्याने विष्ण्वादिवाक्यानां कर्मविधित्वे ऽप्यन्तरालवाक्यस्य गुणात्प्रकरणान्तराद्वा कर्मान्तरविधित्वाभिधानाद्भाष्यस्थः कर्मान्तरशब्दः समञ्जस एवेत्याह * तत्रेति * ननूद्देश्यत्वेन देवताया अपि कालवदनुपादेयत्वात्तदन्वये ऽपि कर्मान्तरापत्तेस्तस्मिन्नेवान्तरालविहिते यागे देवतां विदध्युरिति वार्त्तिकमयुक्तं स्यादित्याशङ्क्याह * देवतायाः पुनरिति * अस्या इदमिति द्रव्यत्यागसङ्कल्पविषयत्वलक्षणोद्देश्यत्वे ऽपि देवतायाः

कर्मकाले शब्दप्रतिपाद्यत्वेनापाद्यत्वलक्षणोपादेयत्वान्न तदन्वयः कर्मान्तरत्वापादक इत्याशयः । ननु कर्मान्तरशब्दस्य विष्ण्वादिवाक्यानां कर्मविधित्वाभ्युपगमविषयत्वे प्रकृतानां यागानामभावादिति भाष्यमयुक्तं स्यादित्याशङ्क्याह * कर्मेति * आद्यव्याख्याने त्वाग्नेयाद्यपेक्षया कर्मान्तरशब्द इत्याह * अथ वेति * परमार्थतस्तु द्वितीये व्याख्याने विष्ण्वादिवाक्यानां विधित्वमनिष्टमेवेति दर्शयन्नुपसंहरति * तस्मादिति * प्रकरणान्तरन्यायाभावेऽप्यनुपादेयान्वयस्याकर्मविधित्वापादकत्वं दर्शयितुमाह * धात्वर्थ चेति * अनुपादेयङ्गविधितोऽपि तदुद्देशेन कर्मैव विधेयमित्याशयः ननु कुत्वप्रसक्त्योपांशुयाजशब्दस्य गुणविधित्वायोगेनोपांशुत्वस्याविधेयत्वान्नानेकगुणविधानेन कर्मविधित्वसिद्धिरित्याशङ्कां निराकर्तुं प्रसक्तिं तावत्करोति * स त्विति * गुणविधित्वपक्षे कुत्वप्रसक्तिं नैवं जातीयक इति पूर्वपक्षभाष्योक्तां परिहर्त्तुमनुभाषते * यत्विति * पक्षद्वयसाम्येन परिहर्त्तुम् । उपपत्तिसाम्यं तावदाह * तत्रेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * वाच्येति * यस्त्वभ्युत्पन्नस्त्विति पूर्वपक्षभाष्येण पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति पात्नीवतशब्दस्य त्वाष्ट्रपात्नीवतावाचकस्यापि किं चिद्वर्णसारूप्यावगमात्तदनुवादकत्वदर्शनेनोपांशुयाजशब्दस्यानुवादकत्वे वाचकत्वानपेक्षेति परिहार उक्तस्तन्निरा-
४८७।२ सार्थमनुभाषते * स्यादिति * निराकरोति * तदिति * नन्वेवमपि नामत्वानिरासेन गुणविधिनिश्चयः कथमित्याशङ्क्याह * न चेति * श्लोकं व्याचष्टे * न तावदिति * उपांशुयाजनामकत्वाच्चास्य कर्मण इदमवगम्यते नूनमस्योपांशुत्वं धर्म इति दशमोपान्त्याधिकरणभाष्यं त्वाग्नेयाग्नीषोमीयशब्दवद्धृदयमुपांशुयाज इत्यादिवाक्यान्तरस्थगुणनिमित्तोपांशुयाजशब्दव्यवहारविषयमित्याशयः । अतोऽन्तरालवाक्यस्थेनैवोपांशुयाजशब्देनोपांशुत्वविधिरित्युपसंहरति * तस्मादिति * सूत्रकृतोऽपि गुणविधितैवेष्टेत्याह * तथा चेति * कथं तेनेति भाष्येण जामित्वापनयनप्रकारं पृष्ट्वा तस्मिन्नित्यनेन देवतावैलक्षण्यं प्रकारत्वेनोक्तं तत्पुरोडाशनैरन्तर्येणोक्तस्य जामित्वस्य द्रव्यवैलक्षण्यं विनानपनयनादयुक्तमाशङ्क्य देवतावैलक्षण्यस्योपलक्षणार्थत्वं दर्शयितुमाह * जामित्वेति * सर्वस्मै वा तद्यज्ञाय गृह्यते यत् ध्रुवायामाज्यमित्यनेनानिर्दिष्टद्रव्यकेषु यागेष्वाज्यविधानाद् द्रव्यवैलक्षण्यमाग्नेयाग्नीषोमीययोर्मध्यमस्वरत्वात्स्वरवैलक्षण्यं विष्णुप्रजापतिपक्षे देवतावैलक्षण्यं युगपत्पुनरिति भाष्येण विष्ण्वा-

दिवाक्यानामर्थवादत्वदेवताविधित्वाभावाद्विष्ण्वादेरप्राप्तत्वेनानुवादानुपपत्तिमाशङ्क्य यष्टव्यानित्यनेनायष्टव्यत्वे ऽप्युपांशुयाजस्तुत्यर्थं यष्टव्यत्वकीर्त्तनमित्युक्तं तस्य ज्ञायत एवेति भाष्येण विरोधमाशङ्क्य परिहर्त्तुमाह * ज्ञायत एवेति * देवतावैलक्षण्येनाग्नेयाग्नीषोमीयाभ्यामुपांशुयाजस्य वैचित्र्यप्रदर्शनार्थं कीर्त्तिता न विष्ण्वादिवाक्यविहितत्वप्रदर्शनार्थं तेन कारणेन विष्ण्वादेरवश्ययष्टव्यत्वाभावे ऽपि स्तुत्यर्थत्वेनोपादानाभिधानं न पूर्वभाष्यविरुद्धमित्याशयः । अयष्टव्ये यष्टव्यत्वोपपादनालम्बनम * गुणवादेनेत्यनेनोक्तम * कीदृशो गुणवाद इत्यपेक्षिते* प्राधान्येत्युक्तम * अग्निर्वै देवानामवमो विष्णुः परम इति श्रुतेर्विष्णोः सर्वदेवानां मध्ये प्राधान्यप्रसिद्धिः एत इति वै प्रजापतिर्देवानसृजतेति श्रुतेः प्रजापतेः प्राधान्यप्रसिद्धिरग्नीषोमीययोस्तु तावब्रूतामग्नीषोमावित्यत्र कीर्त्तनादुपांशुयाजे प्राधान्यप्रसिद्धिः । ननु विष्ण्वादेः प्राधान्यमात्रेण यष्टव्यत्वाभिधाने यागान्तरेष्वपि यष्टव्यत्वापत्तेर्वैलक्षण्यं न स्यादित्याशङ्क्य * यागइत्युक्तम* विधिं विना देवतात्वाभावात्प्राप्तावनियमप्रसक्त्ययोगे ऽपि या काचिदिह देवता स्यादित्यपेक्षायामन्यिमप्रसक्तिरुक्ता निर्दिष्टदेवताकत्वाद्यागान्तरेष्वप्रसक्तिरित्याशयः । ननु विष्णुरुपांशु यष्टव्य इत्येवमादीनां विधित्वाभावे विष्ण्वादेर्विधायकाभावाद्विध्येकगम्यत्वेन च देवताया यागाक्षेपमात्रेणालाभाद्देवताराहित्येनोपांशुयाजविधिरवसीदेदित्याशङ्क्य तत्रेति भाष्येण शाखान्तरविधानेन विहितत्वमुक्त्वा यद्यपीत्यनेन प्रत्यक्षविध्यभावे उपांशुधर्मकत्वेन विष्णुप्रजापत्योः कल्पविधिविहितत्वं विष्णोश्च मन्त्रवर्णकल्पेनापि विधिना विहितत्वमग्नीषोमयोस्तु पुराकल्पसरूपार्थवादकल्पविधिविहितत्वमुक्तं तत्सर्वमाक्षेप्तुं शाखान्तरइति तावदाक्षिपति * शाखान्तर इति * अनुदाहृत्यैव शाखान्तरे ऽस्तीत्यभिधाने यस्मै यद्रोचते तत्सर्वं सिद्ध्येदित्याशयः । शाखान्तरे च देवताविधौ सत्युपांशुयाजे पूर्वाधिकरणपूर्वपक्षे द्रव्यानियमवत्कि देवतायामप्यनियमः शास्त्रैकप्रमाणत्वाद्वा देवतायास्तेन विना कल्पनायोगादाग्नेयमुपांशुयाजमन्तरा यजत्यैन्द्रमुपांशुयाजमन्तरा यजतीत्यादिप्राकरणिकवाक्यान्तरस्थाग्नेयादिपदानुषङ्गेण वैकल्पिकप्रकृताग्न्यादिदेवताविधिकल्पनया प्रकृतानामेव मध्ये या का चित्प्रजापतिधर्मोपांशुत्वदर्शनाद्वा प्रजापतिविधिकल्पनया स एव प्रजापतिर्मनसा यजेतेति वा प्रजापतेस्तूष्णीं भावधर्मकत्वविधानेनोपांशुत्वधर्मकत्वाभावात्प्रजा-

याजस्य तद्देवत्यत्वद्योतनेत्यपेक्षायामाह * अन्या हीति * ननु प्रत्यक्षमानसत्वविधिविरोधान्न लिङ्गेनोपांशुत्वप्राप्तिरित्याशङ्क्याह * विष्णवति * यथान्यो न शृणोति तथोच्चारणस्योपांशुत्वादन्याश्रवणसाहश्येन मानसत्वप्रयोपांशुशब्दो ऽनुक्तदेवताकेषु विष्णुप्रजापतिदेवत्यत्वद्योतनार्थं प्रयुक्त इत्याशयः। अग्नीषोमयोस्त्विति भाष्यं कालविधायिनि वाक्ये ऽग्नीषोमयोः प्राप्तिरुदाहृत्यतइत्येवं व्याचक्षाणः समाधत्ते * तथेति * तावन्नतामित्यस्मिन्कालस्य विधायके वाक्ये ऽग्नीषोमीययोरनुवादेन मान्त्रवर्णिकीं प्राप्तिमग्नीषोमयोस्त्विति भाष्यमुपोद्बलयतीत्युक्ते ननु पुराकल्पसहशस्यापि विधायकत्वाभ्युपगमे देवताविधायकतापि कस्मान्नेष्टेत्याशङ्क्य कालस्य विधायके वाक्यभेदापत्तेर्देवता * विध्यसम्भवादित्युक्तम् * देवतैव तर्हि विधीयतां न काल इत्याशङ्क्य यथेत्यनेन देवताज्योपांशुत्वकालानामिह वाक्ये कीर्त्तितानां मध्ये ऽन्यतः प्राप्तिसम्भवासम्भवावालोच्य विधेयतयानुवाद्यतया च ग्रहणस्य न्याय्यत्वात्कालव्यतिरिक्तानां चान्यतः प्राप्तिसम्भवात्कालस्य *वैतद्विधायकमित्युक्तम् *

गुणोपबन्धात् ॥ ११ ॥

यदुच्यत इति भाष्येणोपांशुत्वगुणोपबन्धान्नारूपत्वेन पौर्णमासी लभ्यते इति पूर्वपक्षोक्तारूपत्वपरिहारार्थत्वेनैतत्सूत्रं व्याख्यातुमुपांश्वित्विति वाक्यमुदाहृतं तद्देवतावदुपांशुत्वस्याप्यविधायकत्वाद्विध्यर्थत्वे चोपांशुशब्दस्य यागविशेषोपलक्षणार्थत्वायोगात्त्रिष्वपि पौर्णमासीयोगेषुपांशुत्वोपपत्तेर्नोदाहार्यमित्याशङ्क्योत्पत्तिवाक्यस्थस्योपांशुयाजशब्दस्योपांशुत्वविधानार्थत्वोपोद्बलनायैतदुदाहृतमिति सूचयन् व्याचष्टे * यस्येति * यथाश्रुतार्थत्यागे हेतुमाह * नन्विति * नन्वर्थवादकल्पविधित्वमात्रेणैकस्य वाक्यस्यानेकार्थपरत्वे वाक्यभेदः शक्यपरिहारः ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादावनेकार्थविधौ चोदिते हि ते हि तदर्थत्वात्तस्य तस्योपदिश्यतेत्यनेन वाक्यभेदाभिधानाद्रात्रिसत्रे ऽप्यर्थवादकल्पस्य विधेः फलमात्रपरत्वान्नानेकार्थपरतास्तीत्याशयः। उपांशुत्वादिवच्चाज्यस्याप्यनेनैव विधानापत्तेर्हविर्लिङ्गाश्रुतित्वादिति दशमोपान्त्याधिकरणसूत्रविरोधः। किमर्थं तर्ह्येतदुदाहृतमित्यपेक्षायां पूर्वसूचितमेव प्राप्त्युपोद्बलनार्थत्वं प्रकटयति * अत इति *

४८९।१ प्राये वचनाच्च ॥ १२ ॥

कयारूपे ऽमावास्याक्रमाम्नातो ऽपि प्रधानानुसारात्पौर्णमास्यामेव स्यादिति वदतास्यैव कालविधानार्थत्वेनोपन्यासान्नोत्पत्तिवाक्ये कालविधिरित्याशयः । पौर्णमासीशब्देनानपायश्च कालस्य लक्षणं हि पुरोडाशावित्यनेन न्यायेनैकपुरोडाशायां पौर्णमास्यामिवामावास्यायामप्युपांशुयाजोपपत्तिः पौर्णमासी विध्यभावे सूचिता शाखान्तरइतिभाष्यं तावत्समाधानुमारभते * अत्रेति * शाखाभेदेनोपांशुयाजक्रमे वैष्णवादियाज्यानुवाक्यायुगलाम्नानात् श्रुत्याविनियुक्तस्यापि मन्त्रस्य प्रधानाकाङ्क्षितदेवताप्रकाशनलक्षणोपकारकत्वसम्भवेनाकाङ्क्षिताहष्टोपकारकल्पनायोगाद्देवताकल्पकत्वोपपत्तेर्मन्त्रवर्णकल्पो देवताविधिर्विष्णुर्वा स्याद्धौत्राम्नानादिति दशमोपान्त्यधिकरणगतसूत्रवक्ष्यमाणन्यायेन स्थित इत्यर्थः । सूत्रे विष्णुग्रहणमन्तरेण एकशाखायाममावास्यायां विष्णुयाज्यानुवाक्याम्नानादमावास्यायामेवोपांशुयाजहविः कार्यमिति प्रदर्शनार्थं पूर्वपक्षस्थेन कृतं न देवतान्तरनिवृत्त्यर्थमित्याशयः । ननु नाना शाखाधीतानामपि याज्यानुवाक्यायुगलानां देवताकल्पनात्प्राक् दृष्टार्थत्वेनानवसायाद्वसन्तमृतूनां प्रीणामीत्यादीनामेको ममेत्यादीनां च प्रयाजानुमन्त्रणानामिव समुच्चयापत्तेस्तत्कल्पानां देवतानामपि समुच्चयः प्रसज्येतेत्याशङ्क्याह * तैश्चेति * देवताकल्पनात्प्रागपि याज्यानुवाक्यासामान्यतो यागाङ्गदेवताप्रकाशनलक्षणैककार्यत्वावगतेर्न समुच्चयो युक्त इत्याशयः । ननु याज्यानुवाक्यानां हौत्रप्रवचनाख्यवेदाम्नानेनाध्वर्यवप्रवचनाख्ययजुर्वेदविहितोपांशुयाजापेक्षया वेदान्तरीयत्वाच्छाखान्तरीयत्वाभिधानं न प्रयुज्येतेत्याशङ्क्याह * तदेव चेति * वेदान्तरस्य शाखान्तरताप्यस्तीत्याशयः। वेदैकयएव शाखान्तरव्यपदेशाङ्गस्येनापरितोषात्परिहारान्तरमाह * आध्वर्यवे ऽपि त्विति * नन्वेवं सत्यध्वर्युप्रयोज्यतैव स्यादित्याशङ्क्य होतर्यजेति प्रैषसामर्थ्याद्धोतृ * प्रयोज्यत्वरूपेणेत्युक्तम् * यथाश्रुतवचनव्यक्त्याश्रयणेनैव विष्णुप्रजापत्योरुपांशुधर्मकत्वावगतेर्यागस्य विष्णुप्रजापत्योश्चोपांशुत्वसाम्याद्विष्णुप्रजापतिदेवत्यत्वप्रापकलिङ्गोपन्यास इत्येवं तथापीति भाष्यं समाधत्ते * उपांश्विति * उपांशुधर्माणावित्यनेन यद्विष्णुप्रजापत्योरुपांशुत्वधर्मत्वमुक्तं तदुपांशुयाजस्य मन्त्रवर्णप्राप्तविष्णुप्रजापतिदेवत्यत्वद्योतनार्थमित्यर्थः । शाखान्तरभाष्योक्तस्य मान्त्रवर्णिकत्वस्य विष्णुर्वा स्यादिति सूत्रवक्ष्यमाणत्वद्योतनार्थं मन्त्राम्नानाचेति भाष्यमिति सूचनार्थश्चकारः कथं विष्णुप्रजापत्योरुपांशुधर्मत्वेनोपांशु-

याजस्य तद्देवत्यत्वद्योतनेत्यपेक्षायामाह * अन्या हीति * ननु प्रत्यक्षमानसत्वविधिविरोधान्न लिङ्गेनोपांशुत्वप्राप्तिरित्याशङ्क्याह * विष्णवति * यथान्यो न शृणोति तथोच्चारणस्योपांशुत्वादन्याश्रवणसाहश्येन मानसत्वप्रयोपांशुशब्दो ऽनुक्तदेवताकेषु विष्णुप्रजापतिदेवत्यत्वद्योतनार्थं प्रयुक्त इत्याशयः। अग्नीषोमयोस्त्विति भाष्यं कालविधायिनि वाक्ये ऽग्नीषोमयोः प्राप्तिरुदाहृत्यतइत्येवं व्याचक्षाणः समाधत्ते * तथेति * तावन्नतामित्यस्मिन्कालस्य विधायके वाक्ये ऽग्नीषोमीययोरनुवादेन मान्त्रवर्णिकीं प्राप्तिमग्नीषोमयोस्त्विति भाष्यमुपोद्बलयतीत्युक्ते ननु पुराकल्पसहशस्यापि विधायकत्वाभ्युपगमे देवताविधायकतापि कस्मान्नेष्टेत्याशङ्क्य कालस्य विधायके वाक्यभेदापत्तेर्देवता * विध्यसम्भवादित्युक्तम् * देवतैव तर्हि विधीयतां न काल इत्याशङ्क्य यथेत्यनेन देवताज्योपांशुत्वकालानामिह वाक्ये कीर्त्तितानां मध्ये ऽन्यतः प्राप्तिसम्भवासम्भवावालोच्य विधेयतयानुवाद्यतया च ग्रहणस्य न्याय्यत्वात्कालव्यतिरिक्तानां चान्यतः प्राप्तिसम्भवात्कालस्य *वैतद्विधायकमित्युक्तम् *

गुणोपबन्धात् ॥ ११ ॥

यदुच्यत इति भाष्येणोपांशुत्वगुणोपबन्धान्नारूपत्वेन पौर्णमासी लभ्यते इति पूर्वपक्षोक्तारूपत्वपरिहारार्थत्वेनैतत्सूत्रं व्याख्यातुमुपांश्वित्विति वाक्यमुदाहृतं तद्देवतावदुपांशुत्वस्याप्यविधायकत्वाद्विध्यर्थत्वे चोपांशुशब्दस्य यागविशेषोपलक्षणार्थत्वायोगात्त्रिष्वपि पौर्णमासीयोगेषुपांशुत्वोपपत्तेर्नोदाहार्यमित्याशङ्क्योत्पत्तिवाक्यस्थस्योपांशुयाजशब्दस्योपांशुत्वविधानार्थत्वोपोद्बलनायैतदुदाहृतमिति सूचयन् व्याचष्टे * यस्येति * यथाश्रुतार्थत्यागे हेतुमाह * नन्विति * नन्वर्थवादकल्पविधित्वमात्रेणैकस्य वाक्यस्यानेकार्थपरत्वे वाक्यभेदः शक्यपरिहारः ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादावनेकार्थविधौ चोदिते हि ते हि तदर्थत्वात्तस्य तस्योपदिश्यतेत्यनेन वाक्यभेदाभिधानाद्रात्रिसत्रे ऽप्यर्थवादकल्पस्य विधेः फलमात्रपरत्वान्नानेकार्थपरतास्तीत्याशयः। उपांशुत्वादिवच्चाज्यस्याप्यनेनैव विधानापत्तेर्हविर्लिङ्गाश्रुतित्वादिति दशमोपान्त्याधिकरणसूत्रविरोधः। किमर्थं तर्ह्येतदुदाहृतमित्यपेक्षायां पूर्वसूचितमेव प्राप्त्युपोद्बलनार्थत्वं प्रकटयति * अत इति *

४८९।१ प्राये वचनाच्च ॥ १२ ॥

प्रधानेति भाष्येणोपांशुयाजस्य प्रधानप्राये वचनात् प्राधान्याधगतेर्विष्णवादिवाक्यैश्च विधावुपांशुयाजभेदे सत्यग्नीषोमीयस्यैवोपांशुयाजस्य कालविधिप्रसङ्गाद्विद्वद्वाक्यानूदितत्वात्फलवाक्यग्रहेण प्राधान्याद्वैष्णवप्राजापत्ययोरुपांशुयाजयोर्गुणत्वापत्तेरुपांशुयाजमात्रप्राधान्यावगतिबाधप्रसङ्गान्नोपांशुयाजवाक्यं पौर्णमासीवाक्यवत्समुदायानुवाद इत्येवं सूत्रं व्याख्यातं तत्र किं प्राये वचनमित्यपेक्षायामुदाहरति * हृदयमिति * यज्ञस्यामूर्त्तत्वेन शिरोहृदयपादायोगमाशङ्क्य स्तुत्यर्थं पुरुषत्वोपचारः । ननूपांशुयाजभेदेऽपि विध्युद्देशान्तर्गतत्वात्सन्निहितत्वाच्चोपांशुत्वस्यैवार्थवादस्थव्यवहितदेवतानपेक्षस्य यागोपलक्षकत्वात्सर्वेषामुपांशुयाजानां कालविध्यवगतेर्विशेषतश्च समुदायेनैकीकृतानां कालयोगावगते. पक्षद्वयेऽप्यविशिष्टं प्राधान्यमित्याशङ्क्ते * कथं पुनरिति * यागोपलक्षणत्वं विना देवताकीर्त्तनानर्थक्यापत्तेरर्थवादस्थयोर्व्यवहितयोरपि वाग्नीषोमयोरुपांशुत्ववदुपलक्षणत्वावगमात्कालोद्देशेन चोपादीयमानानां यागानामनेकोपलक्षणान्वये ऽपि वाक्यभेदानापत्तेः समुदायीकृतानामपि च कालान्वये समुदायशब्दाभावेनाग्नीषोमदेवत्यस्यैवोपांशुयाजस्य कालविधिप्रतीतेः प्राधान्यापत्तिरिति परिहरति * उच्यतइति * अवधारिते ऽपीत्यपिशब्दो ऽध्याहार्यः अग्नीषोमीय एवेत्यनेनाग्नीषोमयोरुपलक्षणत्वावश्यं भावः सूचितः । श्लोकं व्याचष्टे * ताविति * नन्वेवं सत्युपांशुयाजैक्ये ऽप्यग्नीषोमपक्ष एव कालविधानापत्तेर्नित्यवत्प्राधान्यकीर्त्तनं न युज्येतेत्याशङ्कते *नन्विति* अष्टदोषदुष्टदेवताविकल्पापत्तेरप्युपांशुयाजैक्यपक्षो न युक्तइति सूचनार्थो दोषशब्दः । कर्मैक्ये सत्युपलक्षणापाये ऽप्युपलक्ष्यानपायादेवतान्तरपक्षे ऽप्यविशिष्टः कालविधिरिति परिहरति * नैष इति * श्लोकं व्याचष्टे * यदि हीति * सर्वत्रेत्युक्ते क्वेत्युदाहरणापेक्षायामसोमयाजिनो ऽग्नीषोमीयपुरोडाशाभावादन्तरालकालोपलक्षणीभूतपुरोडाशद्वयाभावे ऽपि तदुपलक्षितानेयपश्वाद्यवलक्षककालानपायादुपांशुयाजानिवृत्त्यभिधानार्थं दशमान्त्याधिकरणसूत्रमुदाहृतम् । एवं च सत्यग्नीषोमग्रहणस्योपलक्षणार्थत्वेऽपि देवतान्तरपक्षे कालयोगनिवृत्तिप्रयोजनत्वानवगमात्फलवाक्ये वैरूप्यापत्तेश्च कादाचित्कप्राधान्यप्रयोजनत्वायोगादानर्थक्यपरिहारायाज्यग्रहणवत्स्तुत्यर्थतैव न्याय्येति सूचयितुमाह*नचेति* भेदे तु पलक्षणार्थतया विध्युद्देशान्तर्गतत्वेन प्रयोजनवत्तरत्वसम्भवे मन्दप्रयोजनस्य स्तुत्यर्थत्वस्यान्याय्यत्वादुपलक्षणार्थतैवोचितेति

सूचयितुमाह * नानात्वे त्विति * तस्मादित्युपसंहारभाष्यं प्रायवचनहेतुसाध्याभिधानार्थत्वेन व्याचष्टे * तस्मादिति * अधिकरणसिद्धान्तप्रयोजनाभिधानार्थम् * चैककर्मत्वायेत्युक्तम् *

॥ आधाराद्यपूर्वताधिकरणम् ॥ ५ ॥

४९०।१ आधाराग्निहोत्रमरूपत्वात् ॥ १२ ॥

नापूर्वविधी इति भाष्येण पूर्वाधिकरणपूर्णपक्षसूत्रस्थपौर्णमासीवत्पदानुषङ्गेणाधाराग्निहोत्रं पौर्णमासीवत् समुदायानुवाद इत्येवमेतत्सूत्रं व्याख्यातं तत्रोपांशुयाजवत्प्रकृतकर्माभावेनेहापि समुदायानुवादत्वनिराससिद्धेः प्रत्यवस्थानानुपपत्तिमाशङ्क्योपांशुयाजवैषम्यमाहोर्ध्वमिति वैषम्योक्त्यानन्तरसङ्गतिरपि सूचिता। ननूर्ध्वादिवाक्यानां कर्मविधितैव नास्तीत्याशङ्क्याह * किं चेति * एकोपक्रमसंहाराभावेनैकवाक्यत्वावगतेः । कथं चिच्चैकवाक्यस्वप्रतीतावपि ऊर्द्धत्वादेः कथं चित्प्राप्त्यभावेन स्तुत्यर्थत्वायोगाद्विधित्वावगतेः कर्मनिरपेक्षगुणविध्ययोगादू गुणविशिष्टकर्मविधितैव स्यात्येत्याशय।श्लोकं व्याचष्टे*नेति* कर्मनिरपेक्षगुणविधिसम्भवासम्भवसन्देहो ऽत्र मूलसन्देहे हेतुरिति सूचयितुं सन्देहपूर्वं गुणघत्कर्मगोचरपदव्याख्या एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * न तावदिति * विधौ स्मृताया लिङो यासुडागमविधानात् यादित्येतावतः प्रयोगाननुगतमपि विध्यभिधायित्वमभ्युपेत्य * न हीत्युक्तम् * भावनाभिधायित्वं तु शुद्धस्य न प्रयोजनात्स्मृतेर्वावगम्यतइत्याशयः। कुर्याच्छब्दमात्रान्वये ऽपि धात्वर्थाद्व्यतिरेकः स्यान्न भावनातः । वस्तुतस्तु करोत्यर्थस्यापि धात्वर्थानवच्छिन्नस्याप्रतीतेर्न तद्व्यतिरेकेणापि विधित्वस्य दध्याद्यन्वयः सम्भवतीति किं * तर्हीत्यनेनोक्तम् * ननु भावनाया धात्वर्थानपेक्षगुणविध्ययोगे ऽपि तद्द्वारैव गुणविधिर्भविष्यतीत्याशङ्क्याह * तस्मादिति * अशक्तिमेवोक्तवचनव्यक्तिद्वयातिरिक्तवचनव्यक्त्यसम्भवेनोपपादयति * देवहीति * दध्युदूर्ध्वादिवाक्यानां गुणवत्कर्मगोचरत्वमुपपादितमुपपादयति * तस्मादिति * ननु तस्मादेव तावपि समुदायानुवादाविति पूर्वपक्षोपसंहारभाष्यात्समुदायानुवादत्वं पूर्वपक्ष्यभिमतं गम्यते न च दध्युदूर्ध्वादिवाक्यविहितानां कर्मणां समुदायो ऽस्त्येकधर्मयोगाभावादित्याशङ्क्याह * तत्रेति * हवनाधारणरूपैकजातीयैकदेशे पठितत्वलक्षणैकधर्मयोगाख्येन प्रचयेनापादितः समुदायो ऽस्तीत्यर्थः । धात्वर्थसमुदाय-

स्येव धातुना भावनासमुदायस्यापि प्रत्ययेनानुवाद इति वक्तुम् * तासामित्युक्तम् * रूपवतीनामित्येनेनाघाराग्निहोत्रयोः स्ववाक्ये विहितरूपाभावाद्वाक्यान्तराविहितरूपापेक्षणे च विहिते कर्मणि वाक्यान्तरैस्तदनुवादेन रूपविधिर्वाक्यान्तरविहिते च रूपे सति कर्मविधिरितीतरेतराश्रयापत्तेः कर्मविध्ययोगं सूचयता न ह्यित्यरूपस्वव्याख्यानार्थं भाष्यं व्याख्यातम्। अनुवादप्रयोजनापेक्षायामग्निहोत्रवाक्ये तावद्यावज्जीवमग्निहोत्रं जुहुयादिति निमित्तचोदनायामग्निहोत्रं जुहुयादिति फलचोदनायां चैकत्वसिद्धि प्रयोजनमाह * निमित्तेति* पूर्वपक्षे निष्प्रयोजनत्वदोषं परिहृत्य प्रत्युतान्याय्यविकल्पपरिहारो गुण एव स्यादित्याह * एवं चेति * नन्वाघारकर्मणोर्द्रव्यदेवतान्वयेन यागरूपतायास्तत्प्रख्याधिकरणे ऽभिहितत्वाद्यागरूपस्य च द्रव्यदेवतस्याघारवाक्यवदूर्ध्वादिवाक्ये ऽप्यश्रुतेररूपता तुल्येत्याशङ्क्याह * तथेति * आघारवाक्येष्वनुवादप्रयोजनमाह * तस्यार्पाति * ४९१।१

संज्ञोपबन्धात् ॥ १४ ॥

संज्ञोपबन्धश्चेति सूत्रव्याख्यानार्थं भाष्यं व्याचष्टे * अपि चेति* असौ संज्ञाप्रतिपाद्यो विशेषो ऽस्य जुहोत्याघारयति वाक्यस्य कर्मणः क इति रूपं विना न निर्द्धार्यतइत्यर्थः। नन्विति भाष्येणाघाराग्निहोत्रसंज्ञाया यौगिकत्वेनोद्भिदादिवत्संज्ञयैव कर्मविशेषो विज्ञायतइत्याशङ्क्य यदीत्यनेनोद्भित्संज्ञया पश्वनुत्पादककर्मव्यावृत्तेरतिदेशिकद्रव्यदेवतलाभाच्च पशूत्पादकाचित्यादिव्यावृत्तेर्विशेषज्ञानसम्भवे ऽप्यत्र व्यवस्थितप्रकृत्यलाभेनातिदेशायोगाद्ध्यादिवाक्येषु च शुद्धगुणविध्ययोगेनोपदेशतो ऽपि द्रव्यदेवता ऽलाभात्संज्ञया नाघारयागाहवनरूपकर्मव्यावृत्तावप्याधारणहवनरूपकर्मान्तराव्यावृत्तेर्विशेषज्ञानासम्भवेनाधारणहवनसामान्ययोरेव संज्ञित्वापत्तेस्तयोश्च दध्यादिवाक्यविहितविशेषान्तर्गतत्वेन ज्ञातपूर्वत्वादनुवादतैव स्यादिति परिहृतं तद्व्याचष्टे * सामान्यमिति * आघाराग्निहोत्रसंज्ञयोर्यौगिकत्वे ऽप्याधारणहवनसामान्यं प्रतिपाद्यं स्यादिदं चान्यत एव ज्ञातत्वान्न क्रियान्तरवद्विधानार्हमिति वत्यर्थकल्पनया योज्यम्। अथेति भाष्येण विधिस्वभावादेव विधेयान्तरव्यावृत्तकर्मविशेषप्रतिपत्तेरायोगिक्यामपि संज्ञायां विशेषज्ञानं सेत्स्यतीत्याशङ्क्य तथापीत्यनेन विधिस्वभावाद्विधेयान्तरव्यावृत्तिप्रतीतावपि नञ्योगशून्यायाः संज्ञाया व्यावृत्तिवाचित्वाभावात्तिष्ठतेरपि गतिनि-

वृत्तिवाचित्वे सत्युपवेशनादावपि प्रयोगापत्तेरुर्ध्वत्वोपलक्षणार्थत्वेन गतिनिवृत्त्यर्थत्वस्मृतेर्व्याख्येयत्वाच्छुद्धयोश्चाधारणहवनयोः सामान्यरूपत्वेनाविधेयतया विधानार्थं वाच्यत्वानर्हत्वाद्विधेयत्वेन च वाच्यत्वार्हस्य विशेषस्य रूपं विनानवगतत्वेनापूर्वविशेषविधिर्युज्येतेति परिहृतं तद्व्याचष्टे * तदज्ञेयतयेति * तस्य विधानार्हस्यापूर्वस्य क्रियान्तरस्यान्यत्र दध्यादिवाक्येषु विधिर्युज्यते न त्वाधाराग्निहोत्रवाक्ययोस्तत्र रूपाभावेनाज्ञेयत्वादित्यध्याहारेण योजना नाश्रेति तु पाठः सुगम एव द्वितीयान्तसत्संज्ञोपबन्धादित्येवमन्यथा सूत्रव्याख्यानार्थमपि चेति भाष्यं व्याचष्टे * क्रियाश्रेति * कारकवाचित्वेन साधनशब्दव्याख्यानाया * कारकत्वेनेत्युक्तम् * उत्तरार्द्धेनानुवादेति भाष्यं व्याख्यातं श्लोकं व्याचष्टे * आधारमिति * समुदायस्य समुदायिभ्यो ऽत्यन्तभेदाभावे ऽपि साध्यत्वोपपत्तिर्दृष्टान्तेनोक्ता ननु सामान्यशब्दोक्ताया भावनातो विशेषशब्दोक्तस्य धात्वर्थस्य व्यापाररूपत्वेनाभेदवद्भाव्याभाव्यनिष्ठत्वेन भेदस्यापि भावाद्युक्तं कर्मत्वं समुदायस्य तु समुदायिभ्यः कथं चिदपि भेदाभावात्कथं कर्मतेत्याशङ्क्ते * ननु चेति * समुदायिभ्यः समुदायस्य भेदाभावे ऽपि समुदायिनामेव प्रत्येकरूपासामस्त्यरूपस्य भेदात्तस्यैव च समुदायशब्दवाच्यत्वादेकधर्मान्वयाख्यप्रचयद्वारा च प्रत्येकरूपैः साध्यत्वात्कर्मत्वोपपत्तिरिति क्रियाणामिति भाष्यसूचितं
४९२।। परिहारमाह * नेति * समुदायस्यावयवभूतानां क्रियाणां प्रचयेन साध्यत्वान्नायुक्ता कर्मतेत्यर्थः एतदेव विवृणोति * समस्ताभ्यो हीति * नन्वाधाराग्निहोत्रशब्दयोः पौर्णमास्यमावास्याशब्दन्यायेन प्रत्येकरूपवाचित्वावधारणात्प्रत्येकरूपस्यैव कर्मत्वं वाच्यम् । तच्च विरुद्धमित्याशङ्क्ते * ननु चेति * अवाच्यस्यापि सामस्त्यरूपस्य लक्षणयावगतेः । कर्मत्वं भविष्यतीति परिहरति * नैष इति * ननु विधावप्योदनपाकं पचतीतिवद्भावनाधात्वर्थलक्षणसामान्यविशेषभेदेनापि क्रियाकर्मत्वोपपत्तेर्न कर्मत्वनिर्देशो ऽनुवादत्वहेतुरित्याशङ्क्याह * न चेति * जुहोत्याधारयतिसामानाधिकरण्यं विनाग्निहोत्राधारशब्दयोर्धात्वर्थवाचित्वानवगतेर्जुहोत्याधारयत्योश्च पाकमितिवद्भावनाख्यसामान्यशब्दादाख्यातप्रत्ययाद्भेदेनानुपादानाद्धात्वर्थस्य कर्मत्वं यद्भवतो ऽभिमतं तन्न सम्भवतीत्यर्थः । ननु तत्प्रख्याधिकरणे सामाधिकरण्यं च साध्यांशेनेह कर्मण इति वार्त्तिके जुहोत्याधारयत्यर्थयोः शब्दभेदानुपादाने ऽपि साध्यत्वस्योक्तत्वात् द्वितीया-

न्तसञ्ज्ञोपबन्धस्य पूर्वपक्षहेतुमात्रत्वप्रतीतेः किमात्रातिनिर्बन्धेनेत्याशङ्क्याह * एतदिति * पौर्णमासीसिद्धान्तौपयिकत्वान्निर्बन्ध इत्याशयः । भाष्यकृतां तु धात्वर्थस्य भाव्यनिष्ठत्वाभावेन करोत्यर्थक्रियात्वाभावादकारकत्वे च क्रियारूपया भावनयानन्वयापत्तेर्विधिसामर्थ्याच्च करणत्वावगमे ऽपि कर्तृव्यापारव्याप्यत्वं विना करणत्वायोगेनार्थाद्व्याप्यरूपकर्मत्वप्रतीतेर्विधिपक्षे ऽपि द्वितीयान्तसञ्ज्ञोपबन्धोपपत्तेरेतद्व्याख्यानादरेणाद्यैव व्याख्या य एवं विद्वान्पौर्णमासीसञ्ज्ञकं यागं यजतइत्यादिना पौर्णमासी सिद्धान्ते योजिता द्विविधमपि सूत्रार्थमुपसहरति * तस्मादिति *

अप्रकृतत्वाच्च ॥ १५ ॥

न च प्रकृतमपीति भाष्येणैतत्सूत्रमाघारे प्राकरणिकाद्वाक्यान्तरादपि रूपानवगतेररूपत्वोपपादनार्थतया व्याख्यातमित्याभाति तत्प्रख्याधिकरणे वाक्यान्तरतो द्रव्यदेवतालाभस्योक्तत्वादलाभे वोर्ध्वादिवाक्यैरप्याघार्यद्रव्यं विनाघारणविध्ययोगापत्तेरयुक्तं मत्वा स्वयमाघाराग्निहोत्रवाक्ययोररूपत्वे ऽपि वाक्यान्तरेभ्यो रूपावगतेर्विधेयत्वोपपत्तिशङ्कानिराकर्तुमेतत्सूत्रमिति वक्तुमाशङ्क्य तावदाह * अथेति * तत्र वाक्यान्तरविहिते रूपे सति कर्मविधिः कर्मणि च विहिते सति तत्र रूपविधिरितीतरेतराश्रयं शब्दार्थस्य प्रयोगभूतत्वादिति सिद्धान्तसूत्रावयवेन परिहरिष्यमाणत्वादनुपन्यस्य दृष्टान्तवैषम्येण परिहारमाह * नेति * न चोदर्ध्वादिवाक्येष्वाघारशब्दो ऽस्तीत्यपि वाक्यसम्मन्त्रद्रव्यविधावाघारशब्दादप्यनुवाद्यविशेषाप्रतीतेर्वक्ष्यमाणत्वान्नोक्तम् । अनेनैव तण्डुलादिवाक्येन प्रकृताग्निहोत्रशब्दाभावादित्येवं सूत्रं योजितम् । ननु यथा व्रीहिभिर्यजेतेत्यादौ दर्शपूर्णमासशब्दाभावे ऽपि प्रकरणाद्यजेस्तद्विषयत्वावधारणं तथेह जुहोतेरग्निहोत्रविषयत्वावधारणं भविष्यतीत्याशङ्क्ते * ननु चेति * प्रकृतिशब्दाभावे व्युत्पाद्यावुत्पत्तिवाक्ये प्रकरणाभावादित्येवमेतच्छङ्कानिरासे ऽप्येतत्सूत्रमवतारणपूर्वं योजयति * अत इति * उत्पत्तिवाक्ये ऽपि स्वसमाप्यफलकरणत्वप्रतीतेरितिकर्तव्यताकाङ्क्षात्मकप्रकरणसद्भावे ऽप्यज्ञातरूपस्य विध्ययोगात्फलकरणत्वप्रतीत्यभावाभिप्रायेणैतदुक्तं प्रयोगवाक्यारूढस्यैव तर्हि जुहोत्यर्थस्य फलकरणत्वात्प्रकरणेन द्रव्यदेवतान्वयो ऽस्तीत्यज्ञाताशयः शङ्क्ते * तत्रेति * स्वाशयं प्रकटयन्परिहरति * तादिति * तण्डुलादिवाक्यविहितानां तु कर्मणां प्रज्ञातरूपत्वा-

४९३।२ त्फलान्वये सति प्रकरणोपपत्तेः प्रकरणेन ग्रहणं युक्तमित्याह *अत इति * नन्वाघारशब्दस्य मन्त्रद्रव्यविध्योर्भावादाघाररूपं ज्ञास्यत इत्याशङ्क्ते * नन्विति * विधौ सकलमन्त्रपाठे ऽपि लाघवार्थं वार्त्तिके प्रतीकमात्रग्रहणं धात्वर्थानधिकार्थत्वान्नाघारशब्दो धात्वर्थं विशेष्टुं शक्नोतीति परिहरति * नेति * एतदेवोपपादयति * तत्रेति * आघारे ऽप्याशङ्क्योपन्यासपूर्वकं तन्निरासे ऽपि सूत्रं योजयति * नन्विति * एतदेव विवृणोति *दर्शेति * दर्शपूर्णमासप्रकरणपठितानामपि प्रयाजानामवान्तरप्रकरणस्यातिक्रमाधिकरणे व्युत्पादयिष्यमाणत्वादेतदप्यज्ञातरूपाघारविध्ययोगाशयं भाष्यमप्यस्मिन्नर्थे योज्यम्।कथं भावात्मकप्रकरणाभावे ऽप्यधिकारलक्षणसान्निध्यात्मकात्प्रकरणाद्विशेषावगतिरित्याशङ्क्योपन्यासपूर्वं तन्निरासे ऽपि नास्ति प्रकृतमस्येति विग्रहस्यषष्ठ्युक्तस्य सम्बन्धस्य नञा वयं प्रकृतमेवेति च प्रकृतशब्दो ऽवधारणमभिप्रैत्यैतत्सूत्रं योजयति * सन्निधेरिति * स्रौवाघारस्याप्याघारयतिनानुवादोपपत्तेरित्याशयः । तण्डुलादेरपि वाक्यबलीयस्त्वेनाप्रकृतहोमान्वयसूचनार्थं बहुवचनम् । नन्वेवं सति पूर्वपक्षे ऽप्युदूर्ध्वत्वतण्डुलादेः स्रौवाघारजयाहोमादिभिरप्यन्वयः स्यादित्याशङ्क्याह * तदिति * ज्ञातरूपाणां फलान्वयेन कथम्भावात्मकप्रकरणोपपत्तेस्तस्य चापूर्वसाधनत्वलक्षणार्थं वाक्येनापेक्षितत्वेनाविरोधादबाधः सिद्धान्ते त्वज्ञातरूपयोराघाराग्निहोत्रवाक्योत्पादितयोः कर्मणोः फले विधानाशक्तेः कथं भावात्मकप्रकरणायोगादधिकारात्मकस्य च प्रकरणस्य वाक्येनानपेक्षणाद्विरोध इत्याशयः । तत्राधिकारात्मकस्य प्रकरणस्य वाक्यविरोधे सत्येवं वक्ष्यमाणप्रकारेणाविरोध इति तत्र शब्दार्थे तच्छब्दो योज्यः । नन्वेवमपि द्रव्यविशिष्टकर्मवाक्ये देवताभावाद्देवताविशिष्टकर्मवाक्ये च द्रव्याभावादूर्ध्वादिवाक्ये वोभयाभावात्कर्मान्तरगुणस्य च कर्मान्तरे ऽनन्वयादेकेन च होमानिष्पत्तेर्द्रव्यं च विनोदूर्ध्वत्वादिमात्रेणाघारानिष्पत्तेर्न विधिर्निर्वहतीत्याशङ्क्याह * यत्र चेति * अन्येनापि रूपेण कर्मान्तराद्व्यावृत्तेः कर्मणि विहिते येन विना कर्मानिष्पत्तिस्तत्कर्मान्तरगतमन्यथानुपपत्त्या कल्प्यतइत्यर्थः । कश्चिदित्यनेनाद्रव्यं देवतस्याप्यूर्द्धत्वादेः कर्मरूपत्वे द्रव्यदेवतादविशेष उक्तः । एवं च यद्यूर्ध्वत्वादिवाक्येष्वपि न किं चित्रूपं स्यात्ततो विशेषाग्रहणेनेतरयोरपि विधित्वं स्यान्न त्वेतदस्तीत्याह * सर्वेषु चेति * तस्मादिति पूर्वपक्षोपसंहारभाष्यम् * तस्मादिति *

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्सन्निधेर्गुणार्थेन पुनः श्रुतिः ॥ १६ ॥

दद्धरूर्द्धादिवाक्यानां कर्मविधित्वानभ्युपगमाद्भाष्यस्थकर्मान्तरोक्त्यनुपपत्तिमाशङ्क्याभ्युपेत्यवादेन स्रौवाधारचतुर्होतृहोमाद्यपेक्षया वा समाधत्ते * कर्मेति * कृत इत्यादिना रूपवन्तौ विधीयेते इत्यन्तेन भाष्येण वाक्यान्तरविहितरूपापेक्षणे ऽन्योन्याश्रयापत्तेः स्ववाक्यज्ञातरूपकर्मविध्ययोगस्यारूपत्वादित्यनेनोक्तस्याप्रवृत्तप्रवर्त्तनात्मकविधिस्वभावादेव विध्यन्तराविषयभूतकर्मान्तरव्यावृत्तविधानार्हकर्मप्रतीतेर्वाक्यान्तरावगतरूपवत्तया चानुष्ठानार्हत्वाद्विधिनिर्वाहोपपत्तेः । स्ववाक्यज्ञातरूपस्यापि कर्मणो विधिसम्भवाद्विधिनिर्वाहार्थं वाक्यान्तराविहितरूपापेक्षणे ऽपि विधिप्रवृत्तावनपेक्षणान्नेतराश्रयमित्येवं परिहारार्थतया विधिशब्दार्थस्य प्रयोगे ऽनुष्ठाने भूतत्वाद्वर्त्तमानत्वाद्वचाप्रियमाणत्वादनुष्ठापकरूपत्वादन्यतः प्राप्ते चानुष्ठाने ऽनुष्ठापनानर्थक्याद्रूपं विनापि कर्मान्तरं विधेयं प्रतीयते तच्च वाक्यान्तरतो रूपावगत्या निर्वहतीत्येवं सूत्रावयवो व्याख्यातः तदन्तर्गतेन चाघारेत्यनेनाविज्ञातार्थावित्यन्तेन हवनाधारणयोर्विधिविषयसमानयोस्तदेकीभूतयोः विधिविषयभूतयोरेव संज्ञाविषयत्वात्संज्ञोपबन्धोपपादनार्थतया ऽघाराग्निहोत्रशब्दार्थस्य प्रयोज्यात्मभूतत्वादित्येवं व्याख्यातस्तत्र द्वितीयव्याख्यानार्थं भाष्यं जुहोत्याघारयति * लक्षितेति * वार्त्तिकेन व्याख्यास्यमानत्वादुपेक्ष्य शेषं सङ्क्षेपतो व्याचष्टे * आघारयतीति * यदुक्तमिति भाष्येण पूर्वेभ्यो होमाघारेभ्य इति पूर्वपक्षभाष्यावयवसूचितमर्थमनुभाष्य नैतदित्यादिना वाक्यार्थो यस्तं विधातुमित्यन्तेन तन्निरासार्थतया तत्सन्निधेर्गुणार्थेन पुनःश्रुतिरिति सूत्रावयवो व्याख्यातस्तत्र तस्मान्नानुवादाविति भाष्यं तावत्तात्पर्यतो व्याचष्टे * न चेति * नन्विति भाष्येणोपदश्रवणाद्दध्यादिवाक्यानां शुद्धहोमाधारविध्यशक्तावपि होमाधारसम्बन्धितया दध्यूर्ध्वादिविध्यभ्युपगमात्सम्बन्धस्य च सम्बन्धिद्वयनिष्ठत्वात्प्रतिसम्बन्धिभ्यां होमाधाराभ्यां विनानुपपत्तेरर्थापत्त्या तयोरपि प्राप्तिराघाराग्निहोत्रवाक्ययोरनुवादत्वं भविष्यतीत्याशङ्क्य नैतदेवमित्यनेन ब्रूम इत्यनेन निरस्तं तत्तात्पर्यतस्तावद्व्याचष्टे * न चेदिति * भाष्यस्थस्य सम्बन्धशब्दस्य विशिष्टवाचित्वं शङ्कायाश्च ४९४।१

विशिष्टविधानाशयत्वं तन्निरासार्थत्वं चोत्तरस्थानेनोक्तम् अत्रैवावतारणपूर्वमस्मि हीति भाष्यावयवमध्याहारेण द्वेधा योजयति * तदिति * अस्मिन्नाधाराग्निहोत्रवाक्यस्थे प्रत्यक्षे कर्मविधाने सति न सम्बन्धो ऽर्थादापादक इत्याद्या योजना अस्मिन्सम्बन्धे विध्यर्थाक्षेप्ये होमाधाराख्यसम्बन्धिविधौ प्रत्यक्षे सति सम्बन्धाख्यगुणविधानेन सम्बन्धमात्रं विधीयतइति द्वितीयासम्बन्धशब्देनास्मिन् पक्षे सम्बन्ध एवोक्त इति गुणशब्देनोक्तं तस्मादित्याशङ्कानिरासोपसंहारभाष्यं व्याचष्टे * तस्मादिति * नन्वाधारयतीति भाष्येण श्रुत्या धात्वर्थावच्छिन्नभावनाविधिप्रतीतेर्न वाक्ययिसम्बन्धविधियुक्त इत्याशङ्क्य सत्यमित्यनेन सम्बन्धस्य पदान्तरान्वयलभ्यत्वेनाश्रौतत्वे ऽपि तच्छब्दपरामृष्टस्य धात्वर्थावच्छिन्नभावनाख्यस्य कर्मणः सन्निहिताधाराग्निहोत्रविधिप्राप्तत्वेनोदूर्ध्वादिवाक्यैरविधेयत्वाद्वाक्यीयगुणविध्यर्थं कर्मश्रवणं न कर्मविध्यर्थमिति तन्निरासार्थत्वेन सूत्रावयवो व्याख्यातस्तद्वयमेतच्छङ्कापरिहाराशयप्रपञ्चार्थैरुत्तरभाष्यैरेव व्याख्यास्यमानत्वान्न व्याख्यातम्।ननु पदान्तरेत्याशङ्काशयविवरणार्थं भाष्यं व्याचष्टे * भावनेति * सत्यमेवमिति परिहाराशयविवरणार्थं भाष्यं व्याचष्टे * सप्तत्यमिति * भावनामध्यशब्देन तं व्यापारशब्दोक्तभावनाविशेषणभूतं स्वपदार्थं धात्वर्थं गुणशब्दो विशेष्यतीति गुणस्य भावनाद्वारधात्वर्थविशेषणत्वाभिधानेन भावनाविशेषणतैवोक्तेति सूचितम्।ननु गुणविधावपि भावनातो विध्यनुत्तारणे कर्मानुवादेन गुणविध्युद्घोषो विरुध्येतेत्याशङ्क्याह * तेनेति * येन कारणेनोदूर्ध्वादिवाक्येष्वपि स्वपदार्थं धात्वर्थगतव्यापारं भावनां वक्ष्यतीत्युक्तं तेन कारणेन सर्वत्रैवैतद्वक्ष्यमाणमुपदिष्टं भवतीत्यर्थः । शास्त्राभिव्यक्तिरितीतिकरणाध्याहारेणोत्तरग्रन्थान्वयः विशिष्टविधेः सार्वत्रिकत्वे ऽपि तात्पर्याभिप्रायः । कर्मानुवादेन गुणविध्युद्घोष इत्याशयः। नन्वेवमपि व्याख्यातृणामष्टप्रकारश्रुत्युद्घोषो विरुध्येतेत्याशङ्क्य भ्रान्तिमूलत्वं तदुद्घोषस्याह *तत्रेति* आत्मना यथा भ्रान्तिरुत्पन्ना तथान्येषामप्युत्पादयितुमित्युपहासः किलेति भ्रान्तित्वं सूचितम् । भ्रान्तित्वोपपादनायाष्टावपि प्रकारान्परदौर्बल्यनियमं च दूषयन् शुद्धधात्वर्थविधिरूपं प्रथमं प्रकारं तावत्सोदाहरणानु-
४९५।१ भाषणपूर्वं दूषयति * तत्र तावदिति * कस्मादयुक्तमित्यपेक्षायामेकाभिधानश्रुत्या भावनान्वयस्य प्रागवगमादिति हेतुमाह * न हीति * भावनानिरपेक्षस्य धात्वर्थस्य पुम्प्रवृत्त्यविषयत्वादप्यविधेय-

तेत्याह * न चेति * एतदेवोपपादयति * सा हीति * देहाश्रितस्यापि विष्णुक्रमादेरात्माश्रितस्यापि च··यागादेः प्रयत्नरूपभावनां विना प्रवृत्त्यविषयतापिशब्देन सूचिता किं च भावनावद्धात्वर्थस्यानुष्ठेयनिष्पाद्यापरपर्यायसाध्यत्वेन विधानस्य अन्यदेव हि यागादौ सामान्यं करणात्मकम्। अन्यच्च भावनानाम साध्यत्वेन व्यवस्थितमिति वार्त्तिके निरस्तत्वाद्ध्यादितत्करणत्वेनैव विधानावगतेः करणत्वस्य च क्रियारूपभावनान्वयनिबन्धनत्वान्न तां विनां विधेयत्वोपपत्तिरित्याशयेनाह * इदं चेति * ननूत्पत्तिवाक्ये साध्यत्वेनापि हि विहितस्य किमर्थमपुरुषार्थरूपो धात्वर्थः साध्य इत्यपेक्षायां फलवाक्ये करणत्वेन विधानात्फलवत्त्वोपपत्तेर्नोत्पत्तिवाक्ये करणत्वेन विधिरित्याशङ्क्याह * न हीति * धात्वर्थस्य साध्यत्वेन विधौ पुरुषस्य किमर्थमित्यपेक्षायामपि विधेयस्य करणत्वानवगतेः साध्यानपेक्षत्वात्पदार्थापेक्षां च विना पदार्थान्तरान्वयायोगात्फलवाक्ये ऽपि करणत्वेन विधिर्न सम्भवतीत्युक्ते ननु भावनावत्करणत्वाभावे ऽपि साध्यापेक्षा भविष्यतीत्याशङ्क्य*असावित्युक्तम्। भावनायाः करोत्यर्थरूपत्वेन नित्यं कर्मापरपर्यायसाध्यापेक्षत्वे ऽपि धात्वर्थस्य करोत्यर्थत्वान्न करणत्वं विना साध्यापेक्षत्याशयः। विशिष्टधात्वर्थविधिरूपं द्वितीयं प्रकारं दूषयति * सोमेनेति * तद्भूतानां क्रियार्थेन समाम्नाय इत्यनेन न्यायेन धात्वर्थस्य कारकाणां च परस्परान्वयमपेक्ष्य भावनयान्वितानां पश्चाद्धात्वर्थस्यानिष्पन्नस्य करणत्वायोगात्कारकैश्च विना तदनिष्पत्तेः कारकापेक्षायां कारकाणां च सिद्धरूपत्वेन व्यापाररूपधात्वर्थनिष्पादनं विना साक्षाद्भावनान्वययायोगाद्धात्वर्थापेक्षायामरुणैकहायनीन्यायेनान्योन्यनियमान्न भावनाविधिनिरपेक्षो गुणविशिष्टधात्वर्थविधिर्युक्त इत्याशयः। सप्तमनवमाद्ययोश्च यजेतेत्थमितीति कर्त्तव्यतायां धात्वर्थान्वयनिरासेनेत्थं कुर्यादिति भावनान्वयस्य भाष्यकृता वक्ष्यमाणत्वाद् गुणानां धात्वर्थविशेषणत्वानुपपत्तेर्न तद्विशिष्टधात्वर्थविधिरित्याह * तथा चेति * गुणान्वये च धात्वर्थस्य वैरूप्यं स्यादित्याह * भावनां चेति * धात्वर्थस्यान्यत्र विधिरूपं तृतीयं प्रकारं दूषयति * तथेति * भावनायां तु धात्वर्थस्य कारकाणां वा विधेः सर्वत्राविशेषात्तदभिप्रायान्यशब्दव्याख्या न युक्तेत्याह * यदि त्विति * अन्योद्देशेन च शुद्धधात्वर्थविधानस्य तन्निरपेक्षशुद्धधात्वर्थविधानात्पदान्तरापेक्षानिमित्तविप्रकर्षेण दौर्बल्ये ऽपि अन्योद्देशनिरपेक्षविशिष्टधात्वर्थविधाने ऽपि

विप्रकर्षसाम्यात्ततो दौर्बल्यानुपपत्तेः प्रत्युताश्रुतविशेषणाविधिकल्पनाभावेन ततो बलीयस्त्वाद् द्वितीयस्थाननिवेशापत्तेस्तृतीयस्थाननिवेशो न युक्त इत्याह * न चेति * अन्योद्देशेन विशिष्टधात्वर्थविधिरूपं चतुर्थं प्रकारं द्वितीयतृतीयपक्षोक्तदोषापादनेन दूषयति * पक्षेति * धात्वर्थे ऽन्यविधिरूपं पञ्चमप्रकारं दूषयति * दध्नेति * तृतीयानिर्दिष्टस्यापि दध्नो विधेयत्वेनानुष्ठानाविषयत्वाद्विधेर्दध्यनुष्ठेयमित्यभिप्रेत्यानुष्ठानार्थकरोतिप्रयोगोपपत्तेस्तत्र जयान् जुहुयादितिवच्च प्राधान्यविवक्षयापि सप्तमीप्रयोगोपपत्तेर्होमाधिकरणद्रव्यधिकर्त्तव्यत्वस्य परानभिप्रेतत्वे ऽपि दधिहोमे करोतीति परोक्तायावचनव्यक्तेरङ्गसैषो ऽर्थः प्रतिभातीत्यारोप्याच्छलेनेदं दूषणद्वयमुक्तं सप्तम्यश्रुतेर्न शब्दाद्धोमस्याधिकरणत्वं स्थालीवच्च पतनप्रतिबन्धकत्वाभावान्नार्थरूपेण दध्नश्च तृतीयाश्रुतेर्भूतभव्यसमुच्चारणन्यायेन करणत्वावगमात्कर्मत्वरूपा कर्त्तव्यता न युक्तेत्यर्थः । यथा चान्यत्र शुद्धधात्वर्थविधिश्रुतिर्विशिष्टविधानाद् बलीयसी तथा धात्व-
४९६।१ र्थे ऽन्यविधिश्रुतिरपीति पञ्चमस्थाननिवेशो ऽस्या न युक्त इत्याह *इयमपि चेति * अन्यत्र शुद्धधात्वर्थविधेरपि द्विविधविशिष्टविध्यपेक्षया बलीयस्त्वसूचनार्थश्चकारः हेतुमाह * एकेति * नन्विदं पदान्तरार्थविधिविषयत्वेन विप्रमृष्टार्थत्वार्थं दुर्बलेत्याशङ्क्याह * उभयेति * विशिष्टविधावपि विशेषणभूतपदार्थान्तरविधिरित्याशयः । दध्ना जुहोतीत्यत्र च सन्निकृष्टार्थविध्यसम्भवकृतत्वाद्विप्रकृष्टार्थग्रहणं न दोषायेत्याह * सन्निकृष्टेति * प्रकृतश्रुतिविधेयदधिपरामर्शार्थो ऽस्य शब्दः तत्र तु विशिष्टविधावुभयोर्विशेषणविशेष्ययोर्विध्याश्रयणात्सन्निकृष्टविद्ध्यर्थं तत्सम्भवो विप्रकृष्टविध्यर्थं चासम्भवो ऽभ्युपगन्तव्य इति युगपद्विरुद्धसम्भवासम्भवापत्तिरित्याह * तत्रेति * सन्निकृष्टासम्भवकृतत्वाद्विप्रकृष्टग्रहणस्योभयाश्रयणे सम्भवासम्भवविरोधापत्तिरित्येकग्रन्थतया वा विशिष्टविधिदौर्बल्याभिधानार्थतयैतद्योज्यम्।नन्वेवं सति न क्व चिद्विशिष्टविधिराश्रीयेतेत्याशङ्क्याह * अगत्येवेति * विशिष्टविधिरित्यध्याहारः।यद्यपि च श्रौतेन विधिना सन्निकृष्टविधानात्कालेन च विप्रकृष्टार्थविधानात्कालभेदेन विप्रतिषेधपरिहारोपपत्तेरन्योद्देशनिरपेक्षविशिष्टविधेरियं विप्रकृष्टार्थविषयत्वात् गुर्वी तथाप्यन्यत्र विशिष्टविधानात्पदान्तरापेक्षानिमित्तविप्रकर्षस्योभयत्र सद्भावेनाविशेषाद् गुर्वी न भवत्येवेत्याह * अन्यत्रेति * तदेव त्वातिगुर्वीति सूचनार्थो ऽतिशब्दः प्रकृतमुपसंहरतीति क तर्हि निवेशयितव्येत्यपेक्षा-

थामाह * कामामिति * श्रुतिलिङ्गादिवदासां पूर्वपूर्वानपेक्षत्वाच्च क्रमोपन्यासेन प्रयोजनं यदि त्ववश्यं क्रमेणोपन्यस्तव्या स्ततो वरमेवं क्रम इति * कामामित्यनेनोक्तम् * धात्वर्थे ऽन्यसम्बन्धविधिरूपं षष्ठं प्रकारं दूषयति* यत्त्विति*किं यद्दातीति दानमात्रमनूद्य तत्र प्राकाशावध्वर्यवे इत्यानन्तर्यावगतः प्रदीपाध्वर्युसम्बन्धो विधीयते उताध्वर्यवे यद्दातीति क्रियाकारकान्वये क्रियाप्राधान्यविवक्षयाध्वर्युविशिष्टं दानमनूद्य तस्य प्रदीपसम्बन्धे विधीयमाने ऽर्पीमाश्वाविष्टदक्षिणा इति स्मृतेःप्राकाशशब्दवाच्ययोः प्रदीपयोर्दानसम्बन्धस्य प्रदानत्वादानर्थक्यतदङ्गन्यायेन विशेषणे ऽवताराद्विशेषणभूतस्याध्वर्योः प्रदीपसम्बन्धविधिर्विधेयसम्बन्धित्वेन वाध्वर्योरेव प्राधान्यविवक्षायां दानविशिष्टमध्वर्युमनूद्य तस्य प्रदीपसम्बन्धविधिर्दद्दात्यविवक्षया वा शुद्धाध्वर्यवनुवादेन प्रदीपसम्बन्धविधिरिति वचनव्यक्तीनां मध्ये कया धात्वर्थे ऽन्यसम्बन्धविधिरित्यशक्यं विवेक्तुमित्यर्थः। एतदेवोत्तरेण प्रपञ्चेन विवृणोति * सर्वत्र हीति * समस्ताया ज्योतिष्टोमिकया दक्षिणाया अश्वमेधेति देशप्राप्तायाः प्राकाशदशमाधिकरणे ऽध्वर्युभागमात्रविकारत्वाभिधानेन निवेश्यमानः प्रसज्येतेत्यर्थः।द्विष्ठत्वाच्च सम्बन्धस्याध्वर्व्याख्यसम्बन्धिप्राप्तावपि प्राकाशाख्यसम्बन्ध्यप्राप्तौ विधातुमशक्यत्वात्प्राकाशयोरपि विध्यापत्तेर्वाक्यभेदः स्यादित्याह * प्रत्ययस्य चेति * ननु सम्बन्धविधिनैवार्थाक्षेपान्न वाक्यभेदापत्तिरित्याशङ्क्याह * सम्बन्धो हीति* एवमप्यर्थाक्षेपगौरवं तावदेको दोषः धात्वर्थाङ्गत्वेन चार्थाक्षेपलभ्यस्यापि सम्बन्धिनो विधेयत्वात्प्रत्ययावृत्तिस्तदवस्थेत्याशयः । ननु सम्बन्धिविशिष्टस्यैव सम्बन्धस्य धात्वर्थाङ्गत्वात् विशेषणस्य चाङ्गत्वं विना विशिष्टस्याङ्गत्वासिद्धेः सम्बन्धिनो ऽपि धात्वर्थाङ्गतार्थादेव लप्स्यते अतः सम्बन्धिनो धात्वर्थानङ्गत्वं वदता सम्बन्धस्यापि वाच्यं न च तद्वक्तुं शक्यम् । धात्वथानुरक्तेन प्रत्ययेन सम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वावगतेरित्याशङ्क्ते * तत्रेति* धात्वर्थानुरक्तेन प्रत्ययेन विधानाद्धात्वर्थाङ्गत्वे च दध्ना जुहोतीत्यस्याः सम्बन्धविधित्वाभावाद्भेदोपादानार्थवत्त्वे ऽपि वायव्येन्द्रियश्रुत्योः प्राकाशश्रुतिवत्सम्बन्धविधित्वाभ्युपगमाद्भेदोपादानानर्थक्यं दोषमाह * एवं तर्हीति * ननु वायव्यश्रुतावेव धात्वर्थस्य प्रकृतिद्योतनार्थे विधायकप्रत्ययानुरञ्जकत्वं युक्तमिन्द्रियश्रुतौ त्वविवक्षितत्वान्न प्रत्ययानुरञ्जकतेत्याशङ्क्याह * न हीति * प्रकृतिप्रत्ययथोः पौर्वापर्यनियमाच्छ्रुद्धप्रत्ययार्थानुपलब्धेर्धात्वर्थस्यानुरञ्जकता सर्वत्रा-

विशिष्टेत्याशयः । वायव्यश्रुत्युपन्यासो दृष्टान्तार्थः । नन्विन्द्रिय-श्रुतौ बलादापतितस्याप्यनुरञ्जकत्वस्यानुपकारित्वेन त्यागान्नानुरञ्जकतत्याशङ्क्य वायव्यवाक्ये ऽपि तर्हि धात्वर्थानपेक्षाद्धातुमात्रादालभतिचोदिताग्नीषोमीयपशुयागप्रकृतिद्योतनासङ्क्रेददात्यर्थस्य चाध्वर्युप्राकाशसम्बन्धापादकत्ववदालभत्यर्थस्य द्रव्यदेवतासम्बन्धानापादकत्वेन विधायकप्रत्ययोपकारित्वाभावान्नानुरञ्जकत्वं स्यादित्याह * प्रकृतीति * लिङ्शब्दो भावव्युत्पत्त्या द्योतनाख्यलिङ्जन्यवाची उपकारिणो ऽपि धातोरनुरञ्जकत्वानपेक्षणाद्धात्वर्थस्यानुरञ्जकता दूरोत्सारितेति सूचनायात्मशब्दः । ननु क्रियागर्भत्वात्सम्बन्धस्य धात्वर्थे विना द्रव्यदेवतसम्बन्धानिष्पत्तेधात्वर्थान्तरवाचिशब्दाश्रवणाच्च विधेयसम्बन्धापादनेनात्मनो विधायकस्योपकरिष्यतीत्याशङ्क्याह * न चेति * यदि च श्वेतवाय्वोः सम्बन्धः कार्यः सचालम्भाति द्वारेति विधीयेत न ततो वाक्यभेदः स्याद्विधेयापादकविधावपि त्ववाक्यभेदे गुणफलसम्बन्धापादकाश्रयाश्रयिसम्बन्धविधावप्यवाक्यभेदापत्तेरिन्द्रियवाक्ये ऽपि धात्वर्थत्यागोक्तिरयुक्ता स्यादित्याह * यदि चेति * विनापि त्वाश्रयाश्रयिसम्बन्धे गुणफलसम्बन्धोपपत्तौ प्रकरणलभ्याश्रयिसम्ब-
४९७।२ न्धाभ्युपगमो विरुध्यतेत्याह * किमिति वेति * सप्तमाष्टमश्रुतिप्रकारावप्यनेन प्रसङ्गाद् दूषितौ भवतः अतो न धात्वर्थानुरक्तेन प्रत्ययेनान्यसम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वसिद्धिरित्युत्तरश्रुतिप्रकारद्वयदूषणस्य प्रस्तुताशङ्कानिरासार्थत्वं दर्शयितुमाह * तस्मादिति * पञ्चमश्रुतिप्रकारवत्तु धात्वर्थाङ्गत्वसिद्ध्यर्थं दाने प्रकाशाध्वर्युसम्बन्धं करोतीतिवचनव्यक्त्यभ्युपगमे पूर्ववद्धात्वर्थाधिकरणत्वसम्बन्धकर्त्तव्यत्वे आपाद्य निराकार्ये इत्याह * पूर्ववच्चेति * ननु धात्वर्थाङ्गतयेह सम्बन्धस्य विधिरिष्टो न तु धात्वर्थस्याधिकरणतासम्बन्धस्य वा कर्मतेत्याशङ्क्याह * न चेति * दध्नो ऽपि भावनान्वयात्प्राक् धात्वर्थे विधिर्न सम्भवतीत्यपिशब्दार्थः कस्मादित्यपेक्षायामाह * इतीति * यथा भावनान्वयात्प्राक्कस्य चिद्धात्वर्थान्वयो न सम्भवति तथा तद्भूताधिकरणोक्तेन मार्गेणेत्यादिवार्त्तिकेनोक्तमित्यर्थः । यद्दाति तत्राध्वर्युप्राकाशयोः सम्बन्ध इति वचनव्यक्तिनिरासमुपसंहरति * एवं तावदिति * आध्वर्यवे यद्दाति तस्य प्राकाशसम्बन्ध इत्यस्यापि वचनव्यक्तौ दानस्याध्वर्युविशिष्टत्वे ऽध्वर्योर्वा दानविशिष्टत्वे वाक्यभेदः स्यादित्याह * अथेति * यो ऽध्वर्युस्तस्मै प्राकाश-

वित्यस्यां तु वचनव्यक्तौ क्रियागर्भत्वात्सम्बन्धस्य ददातिं विना सम्प्रदानसम्प्रदेयसम्बन्धायोगात्कल्पिते ददातौ सम्बन्धः सम्बन्धाच्च ददातिकल्पनेतीतरेतराश्रयापत्तेर्न धात्वर्थे ऽन्ययोः सम्बन्ध इति वचनस्य श्रुतेर्व्यक्तिः प्रकारः सम्भवतीत्याह * शुद्धेति * ननु सम्प्रदानश्रुत्याक्षिप्ताद्धात्वर्थादेवाध्वर्युप्रकाशयोः सम्बन्धसिद्धेर्धातुकल्पनाभावान्नेतरेतराश्रयापत्तिरित्याशङ्क्य * यद्यपीत्युक्तम् * धात्वर्थस्याशाब्दत्वे ऽन्वयायोगादन्वयसिद्धये ऽवश्यकल्प्यो धातुरित्याशयः । यथा च सोमेन यजेतेति श्रुतियजिसद्भावाक्षेप्तृवाक्यवादिवाक्यंष्वन्ययजिकल्पना युक्ता तथेहापि श्रुतददात्यविवक्षयान्यददातिकल्पनायोगाच्च शुद्धाध्वर्यवनुवादोपपत्तिरिति सूचनार्थो दृष्टान्तः दानाध्वर्यवनुवादेन च तत्सम्बन्धितया प्राकाशविधानेनार्थात्सम्बन्धविधिसिद्धावपि तात्पर्याभावाच्छ्रुतिप्रकारत्वानुपपत्तिरित्याह * अवश्यं चेति * अन्यतराप्राप्तौ सम्बन्धस्याश्रौतत्वे भाष्यकृत्संमतिमाह * वक्ष्यति चेति * यत्र च सम्बन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानं सम्बन्धो नान्तरीयको यद्वा सम्बन्धस्य विधानानान्तरीयकौ सम्बन्धिनाविति तृतीयाधिकरणभाष्ये सम्बन्धविधिद्वैविध्यमुक्त्वा यत्रोभौ लक्षणत्वेन तत्र स्वशब्देन सम्बन्धो विधीयते यत्र त्वन्यतरो लक्षणत्वेन तत्रैकं लक्षयित्वान्यतरो विधीयत इति विषयोदाहरणभाष्ये प्राग्वक्ष्यमाणमपि प्रकृत्य परिधीन् हरीयोजनं जुहोतीत्यादावुभयप्राप्तौ सम्बन्धस्य श्रौतत्वं जाघन्या पत्नीः संयाजयन्तीत्यनभिमतत्वाद्व्यतिरेकप्रदर्शननमात्रायेति सूचनार्थम् * पश्चादुक्तम् * विधेयान्तराभावेनार्थाक्षेपायोगात् श्रौतत्वसिद्ध्यर्थः केवलशब्दः उभयाप्राप्तौ सम्बन्धिनोः सम्बन्धविधिनान्तरीयकत्वायोगादनुदाहरिष्यमाणाप्युभयाप्राप्तिर्वायव्यं श्वेतमित्यादौ विशिष्टविधिरूपसम्बन्धविधिनान्तरीयकत्वविषयतयानुभयप्राप्तौ वेत्यनेनोदाहृता आख्यातेन च पदार्थान्तरान्वयविधौ बुद्धिविक्षेपस्य श्रुतित्रये ऽपि साम्याच्च बलाबले विशेष इत्याह * तिसृणामिति * ननु सन्निकर्षविप्रकर्षाविशेषे ऽपि धात्वर्थे ऽन्यान्वयविधौ धात्वर्थस्याविषयत्वे ऽपि विधेयविषयतया ग्रहणोनानुग्रहाद्धात्वर्थानुरक्ते ननुप्रत्ययेनान्यान्वयविधौ धात्वर्थस्याविधेयत्वे ऽपि विधेयविषयतयाप्यग्रहणात्ततो दौर्बल्यं प्रत्ययानुरञ्जकत्वेन तु ग्रहणोनात्यन्तत्यागाभावाद्धात्वर्थत्यागेनान्यान्वयविधितो बलीयस्त्वमित्याशङ्क्याह * नापीति * विधेयविषयत्वप्रत्ययानुरञ्जकत्वत्यागानामेकधात्वर्थविषयत्वाभावेनाविरोधाच्च बलाबलज्ञानो-

पयोग इत्याशयः । अतः परदौर्बल्याभावक्रमेणोपन्यासः सप्तमाष्टम-श्रुत्योश्च षष्ठश्रुत्यन्तर्भावादष्टत्वगणनोपन्यासो ऽनर्थक इत्याह * इतीति * प्रकरणार्थमुपसंहरति * तस्मादिति* पुनःश्रुतिरिति सू-त्रावयवेन विहिताया अपि भावनायाः पुनर्विधानाभिधानात्स्वपदा-र्थगतं वक्ष्यतीति च भाष्यावयवेन स्वपदार्थधात्वर्थगतं भावनाख्यं व्यापारं विधिश्रुतिर्विधास्यतीत्यभिधानात्सर्वत्र विशिष्टभावनाविधि-प्रतीतिरधिकरणगतसूत्रभाष्यावयवविवक्षया लाक्षणिको ऽधिकर-णशब्दः प्रस्तुतदध्यूर्ध्वादिवाक्यरूपविषयवाची वा । ननु सर्वत्र भा-वनाविधौ न क्व चिद्विप्रकृष्टार्थविध्यभिधानं युज्येतेत्याशङ्क्याह * यद्येति * सन्निकृष्टं धात्वर्थस्य भावनाविशेषणत्वं विप्रकृष्टं गुणस्ये-त्याशयः । स एष इति भाष्यं स्वस्वपदार्थभूतो धात्वर्थ एष भावना-ख्यव्यापारविशेषणीभूतः सन् गुणविशिष्टो विधिश्रुत्या प्रत्येष्यते विधास्यत इत्येवं व्याख्यातुमाशङ्कते * कथं पुनरिति * शङ्कानिरा-
४९८।१ सार्थत्वेन भाष्यं व्याचष्टे * विशिष्टेति * ततश्च गुणविधिव्यपदे-शो ऽपि फलाभिप्रायेणोपपत्स्यत इत्याह*फलतश्चेति * ननु प्राप्तत्वे ऽपि कर्मणो विशिष्टविधौ सत्यनेकार्थविधिनिमित्तप्रत्ययावृत्त्यभि-धानं विरुध्येतेत्याशङ्कते * नन्विति * श्रुतिवृत्त्या विधेः सर्वत्र भा-वनाविषयत्वे ऽपि प्राप्तायां तस्यामप्राप्तप्रापणाविषयस्वभावत्वा-द्विधेस्तात्पर्यवृत्त्या विशेषणत्वात्सकृदुच्चरितस्य चानेकतात्पर्यायो-गादपरिहार्या वृत्तिरिति परिहरति* नैष इति * कृदन्तविधिशब्दो-त्पन्नेन भावप्रत्ययेन सम्बन्धाभिधानात्तेविधेर्भावनया सह विषय-विषयिलक्षणस्य सम्बन्धस्य श्रुतिवृत्त्या सार्वत्रिकत्वे ऽपि तादर्थ्यस्य तात्पर्यापरपर्यायस्य तत्प्रयोजनत्वस्य तत्फलत्वस्याप्राप्तविषयतयाविभक्तत्वाद्व्यवस्थितत्वाद्विशेषणफले विधित्वे ऽनेकविशेषणपरे सत्य-परिहार्यो वाक्यभेद इत्यर्थः । श्लोकं व्याचष्टे * यदा हीति * अर्थाद्विशेषणविधावेवाक्यभेदस्यैक्ये उक्तव्यवसितानां तु नार्थाक्षेपो विरुध्यते इति पौर्णमास्यधिकरणवार्त्तिकोक्तत्वे ऽपि भाष्यकृतो निर्वृत्तवारवन्तीयको यागो विधीयते ननु वारवन्तीयनिर्वृत्तिरर्थात्तु रेवतीषु वारवन्तीयमभिनिर्वत्स्यतीत्यनेन वारवन्तीयाधिकरणे वक्ष्य-माणत्वाद्वक्ष्याम इत्युक्तम् * प्रपूर्वस्य वसेः स्वस्थानात्प्रस्थितस्या-न्यत्र वासे प्रयोगाद्भावनातः प्रस्थायापरत्रोषितत्वादित्यर्थः । स्पर्शा-देरज्ञानमित्यध्याहारः । ननु योग्यतालक्षणसम्बन्धेन चक्षुषो ग्रा-हकत्वाच्चक्षुर्ग्राह्यरूपसमानदेशस्यापि स्पर्शादेर्योग्यत्वेनाग्रहणं यु-क्तं विधेस्तु विशेषणे ऽप्यवतारस्य भावनान्वयमात्रापेक्षत्वाद्भावनाया-

अ सर्वविशेषणेष्वैक्यान्न व्यवस्था युक्तेत्याशङ्क्याह * सर्वेति * विधित्वस्य यो देशो भावनाख्यः स सर्वेषां विशेषणानां यद्यपि समानस्तथापि भावनातः प्रचलितस्य फलालोचनहेतुकत्वादेकस्य च विधेरनेकफलत्वायोगादेकत्रैव विशेषणे विधित्वं पर्यवसितं चोदिते हि तदर्थत्वादित्यत्र दर्शितमिति फलमालोच्येति ल्यब्लोपपञ्चम्यर्थे तसिमङ्गीकृत्य व्याख्येयं विधेर्विशेषणेष्ववतारस्य तात्पर्यापेक्षत्वात्तात्पर्यस्य चैकत्रैवोपपत्तेरेकत्रैवावतारो युक्त इत्याशयः । विरोधपरिहारमुपसंहरति * तस्मादिति * ननु विशेषणफलेन विधाने ऽनेकार्थविधौ वाक्यभेददोषे सत्यभ्युदितेष्टिविधावंग्न्यादिदेवतातदृगुणादात्रादिरूपानेकार्थविधानात्प्राकाशादिविधिषु प्राकाशादिदेयतत्तद्विशेषणाहिरण्यमयत्वादिरूपानेकार्थविधानाद्दोषः स्यादित्याशङ्क्याह * यस्त्विति * पञ्चमादिश्रुतिप्रकारचतुष्टयापेक्षः सर्वशब्दः ये मध्यमास्तानग्नये त्वाग्ने पुरोडाशमष्टाकपालं निर्वपेदित्यभ्युदितेष्टिविधौ हि चन्द्राभ्युदये निमित्ते भावनामनादृत्य प्रकृतदर्शाख्यधात्वर्थोद्देशेनान्यविधाने ऽपि देवतातद्गुणरूपानेकार्थविधानात्प्राकाशादिविधिषु च धात्वर्थे ऽन्यसम्बन्धविधाने ऽपि देयतद्विशेषणरूपानेकार्थविधानात् त्रिष्वपि च सम्बन्धविधिपक्षेषु सम्बन्धो विधीयमानः सम्बन्धिनं तावदाक्षिपेदिति वार्त्तिकोक्तन्यायेन सम्बन्धाक्षिप्तयोः सम्बन्धिनोरक्रियाङ्गत्वेनाननुष्ठेयत्वादनुष्ठेयत्वासिद्धये क्रियाङ्गत्वेन तयोरपि विधानापत्तेस्तुल्यो वाक्यभेदस्तश्चोभयवादितुल्यत्वान्नैकः पर्यनुयोज्य इत्याशयः । नन्वेवं सति वाक्यभेदपरिहारायाभ्युदितेष्टिविधौ यागान्तरविधानापत्तेः प्राकाशादिविधिषु च प्राकृते दक्षिणादाने प्राकाशादिमात्राविधानात्समस्त प्राकृतदक्षिणाबाधापत्तेस्तदधिकरणसिद्धान्तहानिः * स्यादित्याशङ्क्याह * यथेति * षष्ठे ऽभ्युदितेष्ट्यधिकरणे टुप्टीकायां नैवानेकगुणा विधीयन्ते किं तर्हि विद्यमानस्यैव हविषो मध्यमभागाग्निदातृत्वविशिष्टा भावना प्रकृतयागसंम्बद्धा विधीयते इत्यादिवार्त्तिकेन प्रकृतदर्शयागाभेदे ऽपि तदवच्छिन्नभावनान्तराभ्युपगमेन वाक्यभेदः परिहरिष्यते दशमे प्राकाशाधिकरणे यद्वा सर्वविशेषणाविशिष्टो ददातिरपूर्वो विधीयतइति भाष्येणैव कर्मान्तरविधानाभिधानात्तेनैव न्यायेनोत्तराधिकरणेषु स ब्रह्मणे देय इति श्वेताश्वब्रह्मविशिष्टदानान्तरविधिप्रतीतेः सप्रियाय सगोत्राय ब्रह्मणे देय इति सोमचमसप्रियसगोत्रब्रह्मविशिष्टदानान्तरविधिप्रतीतेर्यजुर्युक्तं रथमध्वर्यवे ददातीति यजुर्युक्तरथाध्वर्युविशिष्टदानान्तरविधिप्रती-

तेर्वाक्यभेदपरिहारो भविष्यतीत्याशयः । भवेदित्याशङ्क्याभाष्यं तं तु स्वपदार्थमित्यनेन गुणस्य भावनाविशेषणीभूतधात्वर्थविशेषणत्वोक्त्या भावनाविशेषणत्वस्योक्तत्वादयुक्तमाशङ्क्य यद्यपि तस्य भावनाख्यव्यापारस्य सम्बन्धिनं धात्वर्थाख्यं पदार्थं गुणशब्दो विशिनष्टि व्यापारं विशिष्यात्तथापि विनानेन प्रकारेण गुणावच्छिन्नरूपेण व्यापारो विधेयः प्रतीयेतेत्येवं विधेयत्वनिरासार्थत्वेन व्याचष्टे *भवेदिति* गुणस्यःसाक्षाद्विधेयत्वयोग्यतायां गुणविधानार्थं तदवच्छिन्नरूपविधेयत्वं स्यात्तस्य त्वयोग्यत्वाद् गुणविशिष्टायां भावनायामेव विधेस्तात्पर्यावसायान्न गुणविधानार्थत्वोपपत्तिरिति साक्षाच्छब्देन सूचितं भावनापरे ऽपि विधावर्थाक्षेपाद्धि विशेषणभूतगुणानुष्ठानसिद्धेर्नैयमाशङ्क्य युक्तेत्याशङ्काक्षेपार्थं तत्रेति भाष्यमनुष्ठानस्य विध्यधीनत्वाद्विधिं विनानुपपत्तेरयुक्तमाशङ्क्य वाक्यावगतविधेयभावनाविशेषणत्वानुपपत्तिकल्पितगुणविध्याशयत्वेन व्याचष्टे * तत्रेति * अथाप्रियमाणे ऽपीति भाष्यं व्यधिकरणे सप्तम्यामङ्गीकृत्य विधेयाया भावनाया धात्वर्थाधीननिरूपणत्वाद् गुणाधीननिरूपणत्वाभावाद् गुणे पुंस्त्वव्याप्रियमाणे विधौ वा तस्मिन्नव्याप्रियमाणे ऽपि गुणानपेक्षधात्वर्थावच्छिन्नभावनाविधानेन विधिशब्दार्थोपपत्तेर्नानुष्ठानं सेत्स्यतीत्याशङ्क्याशयविवरणार्थत्वेन व्याचष्टे * अव्याप्रियमाणे ऽपीति * तत्रेत्यादिनैकग्रन्थेन वा स एवाशङ्कितान्येनापृष्ट एवानुष्ठानं निरूपयत्यन्यथा व्याचष्टे *स एवेति* स्वयं शब्देन प्रश्नानपेक्षोक्ता भावनाया गुणाधीननिरूपणत्वाभावाद् गुणानपेक्षविधेयत्वापत्तावपि स्ववाक्योपात्तगुणश्रुत्यानर्थक्यपरिहारार्थङ्गुणविधिः कल्प्य इति पुनराशङ्काक्षेपार्थङ्गुणेति भाष्यम्भावनाविधिना गुणस्य विधातुमशक्यत्वाद्भावनानिरपेक्षस्य च विधेः कल्पनायोगादगत्यानर्थक्यमेव ज्याय इत्याशङ्काशयविवरणार्थं वानर्थकश्चेति भाष्यमेकहेलया व्याचष्टे * तेनैवेति * विधिकल्पनाशयः प्रश्नः कल्पनानुपपत्त्याशयं चोत्तरमित्यर्थः । सर्वस्य वेदस्याध्ययनविधिनार्थवत्त्वावधारणे आनर्थक्यायोगादवश्यकल्प्यो गुणविधिरित्याशङ्काक्षेपाशयविवरणार्थं कथं पुनरिति भाष्यं व्याचष्टे *तथेति* यथा तत्र किं भविष्यतीति प्रश्नः कल्पविध्याशयस्तथायमपि प्रश्नः कल्पविध्याशय इत्युक्तेः पौनरुक्त्यं तर्हीत्याशङ्काशयाधिक्यं वेत्यनेनोक्तं पूर्वपक्षे भावनानुष्ठानार्थत्वाद्विधेः कारकशून्यायाश्चानुष्ठानाशक्तेर्विशिष्टविधिना विशेषभूतकारकानुष्ठानाक्षेपार्थं गुणवचनेन सान्निध्यार्थवत्त्वोपपत्तेर्नानर्थक्यं सिद्धान्ते तु दध्यादिवाक्ये विधेर्भा-

वनारूढत्वे ऽपि तदनुष्ठानार्थत्वाभावात्कारकानुष्ठानाक्षेपाशक्तेः सान्निध्यान्नातस्यापि गुणस्यानुष्ठानानवगमादानर्थक्यमित्युत्तरार्थं भाष्यं सिद्धान्ते ऽपि गुणानुष्ठानार्थत्वाभ्युपगमादयुक्तमाशङ्क्य मध्यप्रतीकेनावतार्यानर्थक्यापादनार्थत्वेन व्याचष्टे *असति त्वर्थ इति* भवेदित्यादि किमन्यदुच्यतेत्यन्तभाष्योक्ता कापरिहारार्थमेवन्तर्हीति भाष्यं वाक्यशब्दे श्रवणादेकाभिधानलक्षणश्रुत्यपात्तभावनानपेक्षगुणविधानार्थं तया भासमानं भावनार्थविधायकेनापि विधिना विधिप्रयोजनभूतगुणसमर्पणार्थवाक्यापेक्षणाभिधानार्थत्वेन व्याचष्टे * एवं तर्हीति * वाक्याद्भविष्यतीति वाक्ये किं भविष्यतीत्यपेक्षायामतिक्रान्तावेक्षणेन गुणगतस्य व्यापारस्य विधेयत्वप्रतीतिरित्यवगमात् * विधिरित्युक्तम् * ननु गुणमतो व्यापारो भविष्यतीति भाष्यार्थकल्पनयानेन विधिशब्देन भाष्यगता व्यापारशब्दा विधिवाचित्वेन व्याख्याता इति भ्रमितव्यम् नन्विदानीमेव वाक्याद् गुणव्यापार* उपगम्यतइत्युक्तम् *सत्यमेतद्विधीयमानस्तु कुतो ऽवगम्यतइति वक्ष्यमाणभाष्ये व्यापारस्याविधीयमानत्वोक्त्यनुपपत्तिप्रसङ्गाद्विधिवाचित्वे च व्यापारशब्दानां भावनावाचिशब्दान्तरस्येहाभावात्प्रस्तुताधिकरणन्यायेन सर्वत्र लिङ्गशिष्टभावनाविधिरेव तत्त्वमिति वार्त्तिकं निरालम्बनमेव स्यात् श्रुतिबलीयस्त्वेन पूर्वपक्षिप्रत्यवस्थानार्थं श्रुत्यर्थे सतीति भाष्यं श्रुत्युपात्तायां भावनायां विधेस्तात्पर्ययोगेन श्रुतिविरोधाभावादयुक्तमाशङ्क्य भावनाविधिद्वारत्वाद् गुणविधेर्भावनानिरपेक्षे गुणे तात्पर्ययोगादापाद्योक्त्यर्थत्वेन व्याचष्टे * परास्त्विति * भावनाद्वारापि प्रवर्त्तमानस्य विधेरप्राप्तप्रापणस्वभावत्वेनान्यतः प्राप्तायां तात्पर्ययोगादानर्थक्यतदङ्गन्यायेन गुणे तात्पर्यावतारो युक्त इति परिहारार्थं सत्यमित्यादिविहितत्वादित्यन्तं भाष्यं व्याचष्टे * सत्यमिति * तत्सन्निधेरिति सूत्रावयवव्याख्यानार्थं स्वपदार्थस्येति भाष्यावयवं कर्मान्तरविधानोपपत्तेरयुक्तमाशङ्क्य कथं चित्प्राप्तिसम्भवे विशिष्टविधिगौरवान्याय्यत्वाभिधानार्थस्तद्गुणाधिकरणाधिकरणसूत्रावयवः पठितः । नन्वेवं सति तेनैव न्यायेन श्रुत्यर्थाविवक्षासिद्धेः प्रश्ना न युक्त इत्याशङ्क्य * कथमित्युक्तम् * श्रुत्यर्थाविवक्षायां द्वेषातिशयेनोक्तन्यायापरामर्शात्प्रश्नः श्रुत्यर्थाविवक्षावादिन एव वा हेत्ववतारार्थे प्रश्नोक्तिरित्यर्थः । तत्सन्निधेरिति सूत्रावयवव्याख्योपसंहारार्थे तस्मादिति भाष्यं तस्मात् शब्दपरामृष्टतत्सन्निधिं त्रेधा व्याचष्टे * तस्मादिति * पौर्णमास्यधिकरणादिष्वानां चोदनाशब्दानां शब्दान्तरे कर्म- ४९९।२

भेद इति कर्मशब्दालोचनेन कर्मचोदनाविषयतया व्याख्यानात्तस्मिन्कर्मणि गुणत्वस्य संशब्दोक्तेनैकैकीभावेन विधानात्कारकद्रव्यावयवविशेषत्वेन क्रियायाः क्रियाकारकयोरत्यन्तभेदाभावात्क्रियाद्वारा गुणस्य विधेयत्वोपपत्तिरित्याद्ये व्याख्याने तत्सन्निधिशब्दार्थस्तस्य गुणस्य सन्निधौ पठितस्याविधाने प्रमादपाठापत्तिरिति द्वितीये तस्याः कर्मचोदनाया वाक्यान्तरस्थायाः प्रत्यभिज्ञानान्न दध्यादिवाक्ये कर्मणि विधेयतेति तृतीये सत्यं न श्रूयतइत्यादिभाष्येण गुणविधिव्युत्पादनार्थत्वेन तत्सन्निधेरित्यादिसूत्रावयवं व्याख्यायाख्यातपदार्थविधावाख्यातपदानर्थक्यशङ्कानिरासार्थत्वेन तस्य कर्मणोऽग्निहोत्राधारवाक्यचोदितस्य दध्यादिवाक्ये सन्निधानाद् गुणान्वयार्था पुनः श्रुतिरित्येवं व्याख्यातुं जुहोतेरिति भाष्यं स्पष्टत्वादव्याख्याय यदीत्याशङ्काभाष्यं विधायकप्रत्ययानुवादत्वानभिधानादयुक्तमाशङ्क्य धातोरनुवादत्वे प्रत्ययस्यापि केवलाप्रयोज्यत्वेनानुवादत्वापादनाशयत्वेन व्याचष्टे * जुहोतेरिति * नन्वेवमपि दध्यादिशब्दस्य विधायकत्वानिरासात्प्रश्नो न युक्त इत्याशङ्क्याह * दधिशब्देनेति * यथा वाजपेयाधिकरणे, यदि यजेतेत्यनुवादः केनेदानीं गुणो विधीयतइति प्रश्नोपपादनार्थं वाजपेयशब्देनेति मा वोचत न ह्याख्यातं वा कृत्यं वान्तरेण * नाम पदस्य विधिशक्तिरस्तीत्युक्तम् * तथात्रापि वाच्यमित्यर्थः। क्रियाशब्दः प्रक्रियार्थः वाक्यावगतस्य गुणान्वयस्याप्राप्तत्वाद्विधेयत्वप्रतीतेस्तदन्यथानुपपत्तिकल्पितेनाख्यातेन विधिसम्भवाच्छङ्कानिक्षेपार्थं नन्विति भाष्यं श्रुताख्यातत्यागेनाश्रुतकल्पनायोगेनाशङ्कासमाधानार्थं च सत्यमिति भाष्यं स्पष्टत्वादव्याख्यायैवं तर्हीत्युत्तरभाष्यं व्याचष्टे * प्रत्यय इति * प्रत्ययस्य विधित्वे तद्वाच्यायाः भावनाया विधेयत्वापत्तेर्धात्वर्थानवच्छिन्नायाश्च तस्या विध्ययोगाद्धात्वर्थस्यापि विधेयत्वापत्तिरिति कस्येति भाष्येणाशङ्क्योहाविधीयमानस्याप्यन्यतोऽवच्छेदकत्वेनैव प्राप्तेरनुवादोपपत्त्यभिधानार्थं धात्वर्थस्येति भाष्यं व्याचष्टे * धात्वर्थ इति * धातुप्रत्यययोः सहप्रयोगनियमेऽप्यर्थभेदाद्विध्यनुवादविभागोपपत्तिसूचनार्थो विवेकशब्दः। ननु स्वपदोपात्तस्यापि धात्वर्थस्यान्यतः प्राप्तत्वेनानुवादाभ्युपगमे भावनाया अपि प्राप्त्याविशेषेणानुवादापत्तेर्व्यापारशब्देन भावनाविधानाभिधानं न युक्तमित्याशङ्क्यार्थ यदीति भाष्यं व्याचष्टे * यदीति * भावनानिरपेक्षगुणविधानाशक्तेर्गुणविधानार्थं प्राप्तायाः अपि भावनाया गुणविशिष्टरूपेण गुणविधानोपपत्त्यभिधानार्थं वाक्यार्थ इति भाष्यं

पराभिमतधात्वर्थोद्देशेनान्यविधिनिरासेन विशिष्टभावनाविध्यभिप्रायत्वेन व्याचष्टे * वाक्यार्थ इति*यथैवं तर्हि वाक्याद्धविष्यतीति भाष्यं विशिष्टभावनाशयं तथेतदपीत्यर्थः।तस्मादिति सिद्धान्तोपसंहारभाष्यमुपक्रमभाष्यव्याख्यया व्याख्यातमप्यनन्तरोक्तवाक्यार्थविध्यालोचनेन भ्रान्त्यापादकत्वाद्व्याचष्टे * तस्मादिति * केवलगुणविध्यसम्भवाद्वाक्यान्तरतो ऽप्याधारणहवनरूपकर्मान्तरव्यावृत्तरूपाप्रतीतेः संज्ञोपबन्धासम्भवस्योक्तस्य केवलगुणविधिव्युत्पादनात्परिहारासिद्धेर्भाष्यकृतोपेक्षितं परिहारं स्वयमाह * जुहोतीति*ननु सजातीयकर्मान्तरव्यावृत्तिर्न जुहोत्याधारयतिभ्यां सत्स्यतीत्याशङ्क्याह * इहेति * विधिस्वभावात्सर्वतो व्यावृत्तेः संज्ञोपबन्धोपपत्तिरित्यर्थः । अप्रकृतत्वाच्चेति सूत्रोक्तं प्राकरणिकवाक्यान्तरतो ऽपि रूपालाभं परिहरति * प्रकरणाच्चेति * यत्त्वज्ञातरूपस्य कर्मणो विध्यसम्भवात्फलकरणत्वानवगतेरुत्पत्तिवाक्ये कथंभावात्मकं प्रकरणं नास्तीत्युक्तम्। तद्वाक्यान्तरतो रूपलाभसम्भवे स्वभावात् ज्ञातरूपस्यापि कर्मणो विधिसम्भवादेव कर्मान्तरव्यावृत्तिसिद्धेर्विधिसम्भवादुत्पत्तिवाक्ये ऽपि सामान्यतः फलकारणत्वावगतेः प्रकरणं सम्भवतीत्येवं परिहरति * न चेति * ननु प्रकारविशेषाकाङ्क्षात्मकत्वात्कथम्भावस्य फलविशेषान्वयोत्तरकालत्वाच्च प्रकारविशेषाकाङ्क्षाया नोत्पत्तिवाक्ये कथम्भावोपपत्तिरित्याशङ्क्याह * फलेति * निर्विशेषसामान्याभावादुत्पत्तिवाक्ये ऽप्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफलविशेषान्वयोत्तरकालं कथम्भावोपपत्तिरित्याशङ्क्याह * फलेति * निर्विशेषसामान्याभावादुत्पत्तिवाक्ये ऽप्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफलविशेषान्वयोत्तरकालं कथम्भावोपपत्तिरित्याशयः। या चानभिज्ञातरूपस्य फले विधातुमशक्यतोक्ता साप्ययुक्तेत्याह * न चेति * ५००।१
होममात्ररूपेण फले विहितस्य कर्मणो द्रव्यादिग्रहणे विरोधाभावादित्यर्थः । विशेषतो ऽत्र द्रव्यादेर्वाक्यग्राह्यत्वेन प्रकरणानपेक्षणात्सन्निधिमात्रेण च कर्मानुवादोपपत्तेः कथम्भावाभावे ऽप्यविरोध इत्याह * इष्यते चेति * वाक्यान्तरप्राप्तं च कर्मानूद्य वाक्यान्तरेण रूपग्रहणसम्भवे स्ववाक्याज्ञातरूपस्यापि कर्मणो वाक्यान्तरतो रूपलाभाद्विधिनिर्वाहोपपत्तेर्विध्ययोगाभिप्रायेणाधारप्रकरणनिरासायोगात्परप्रकरणपाठमात्रेण तन्निरासो वाच्यः। स चाभिक्रमाधिकरणे निराकरिष्यमाणत्वादयुक्त इत्याशयेनाह * न चेति * एतदेवोपसंहरति * तेनेति * यदुक्तमित्यादिभाष्यमप्याधारप्र-

करणसङ्ग्रावाभिधानार्थमित्यनेन सूचितम् । तण्डुलोदूर्ध्वादिवाक्यानां कर्मविधित्वे कर्मबहुत्वात्तदनुनिष्पाद्यपूर्वबहुत्वकल्पनापत्तेत्याह * बहूनि चेति * अथानेकादृष्टकल्पनापत्तावपि रूपवत्त्वेनैषां विधित्वमिष्यते तदपि नास्तीत्याह * न चेति * तण्डुलादियुक्तानां होमानां देवता नास्ति ऊर्ध्वादियुक्तानां चाघाराणां यथा देवता नास्त्येवं द्रव्यमपीत्युभयाभावाभिधानं यदग्नये चेति देवतायुक्ते होमे द्रव्याभावस्तस्याघारमिन्द्र ऊर्ध्वो ऽध्वर इति वाक्यविहिते चाघारे ऽन्यतराभावश्चकारेण सूचितः । कर्मान्तरविधेश्च कर्मान्तरे गुणसमर्पकत्वायोगान्न वाक्यान्तराद्देवतादिलाभ इत्याह * सर्वे चेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तत इति * ननु वाक्यान्तराद्रूपलाभसम्भवाभिधानेनाद्यसङ्ग्रोपबन्धव्याख्यायां परिहारसिद्धावपि द्वितीयव्याख्यायां परिहारानभिधानान्नोपसंहारो युक्त इत्याशङ्क्यानुभाषणपूर्वं परिहरति * यस्त्विति * प्रयत्नरूपभावनासाध्यत्वे ऽपि होमादिधात्वर्थस्य करणभूतधात्वर्थानवच्छिन्नाया भावनायाः कर्मान्वययोगात्तदवच्छेदकत्वेन सङ्कल्पादिधात्वर्थोपन्यासो ऽनुष्ठेयहोमादिस्वरूपानुसन्धानं द्रव्यादिकारकसमवायाभिधानं वादिशब्दोपात्तं क्रियात्वे ऽपि धात्वर्थस्य जन्यत्वात्कर्मत्वोपपत्तेः । वस्तुतस्तु धात्वर्थस्य करोत्यर्थरूपक्रियात्वमेव नास्तीत्यपिशब्दार्थः । ननु सङ्कल्पादेरनुपादानान्न तदपेक्षया कर्मत्वनिर्देशोपपत्तिरित्याशङ्क्याह * तेनेति * अनिष्पन्नस्य होमादेः फलकरणत्वायोगात्सङ्कल्पादिनिष्पादितेन होमेन फलं भावयेदिति शास्त्रार्थो ऽवसीयतइत्याशयः । ननु दध्यादिवाक्यानां कर्मविधित्वाभावे ऽप्यग्निसूर्यवाक्ययोरनेकगुणविधानात्कर्मविधित्वावगतेरग्निहोत्रवाक्यस्य तद्वाक्यविहितसायम्प्रातर्होमद्वयसमुदायानुवादत्वं भविष्यतीत्याशङ्कते * ननु चेति * कर्मविधानं यदनेनोक्तं तदापद्यतइत्यर्थः । अत्र कैश्चिद्भाष्यमनादृत्योत्सूत्रं पूर्वपक्षं कृत्वाद्यसूत्रत्रयेण समुदायानुवादत्वसिद्धान्तमुपवर्णयाग्निहोत्रे देवतायाः प्रकरणादप्यप्राप्तेर्विधित्वासम्भवस्य प्रकृतत्वाच्चेति सिद्धान्तसूत्रोक्तस्याग्निसूर्यवाक्याभ्यां देवताप्राप्तेरनुपपत्तिमाशङ्क्याग्निसूर्यवाक्ययोः कर्मविधित्वं चोदना वा शब्दार्थस्य प्रयोगभूतत्वादिति सूत्रावयवेनानेकगुणविधानान्यथानुपपत्त्योक्ताग्निसूर्यवाक्ययोरपि द्रव्याभावात्कर्मविधित्वानुपपत्तिमाशङ्क्य दध्यादिवाक्यैर्द्रव्यप्राप्तिरुत्तरावयवेनोक्तेत्युक्तं तेषां मतं दूषयितुमुपन्यस्यति * तथा नामेति * अनैव परोक्तामुपपत्तिमाह * एवं चेति * आहु-

ती इति द्वित्वसंख्यायाः पृथक्कनिवेशाद्भेदव्यवहारः व्यपदेशभेदः स्पृष्टः धर्मभेदोऽपि भेदापादकत्वाद्भेदं व्यवहारयतीत्यादिशब्देनोक्तः। नन्वभ्यासविषयाभेदे व्यवहारा भविष्यन्तीत्याशङ्क्याह * न चात्रेति * एकस्मिन्नभ्यासे सकलो ज्योतिष्टोम इति प्रतीत्यभावादुक्तं ज्योतिष्टोमावयवत्वमिह त्वेकैकस्मिन्सकलमग्निहोत्रमिति प्रतीतेर्नाग्निहोत्रावयवतेत्यर्थः। उभयत्र च समस्तेतिकर्त्तव्यतावृत्तिर्भेदापादिकेत्याह * एवञ्चेति * ननु कर्मैक्यं ऽपि कालभेदादितिकर्त्तव्यतावृत्तिर्युक्तेत्याशङ्क्याह * अन्यथात्विति * एकादशे दर्शपूर्णमासाख्ययोः समुदाययोः राजसूयाख्यानामिष्टपशुसोमयागानां चातुर्मास्याख्यानां च वैश्वदेवादिपर्वणां कालभेदादङ्गावृत्तौ सिद्धान्ततायां सवनीयपशौ च या पशुपुरोडाशाङ्गप्रचाराणां कालभेदे ऽप्यङ्गानावृत्तिवदिहाप्यनावृत्तिरित्याशङ्क्यैकस्य कर्मणः प्रक्रमात्प्रभृत्यासमाप्तेरेककालत्वात्सवनीयपशोश्चैककर्म्यात्प्रयोगाख्यस्य तन्त्रस्य विप्रकृष्टकालत्वे ऽप्यङ्गानावृत्तिर्युक्तेति वैषम्यं वक्ष्यमाणं दृष्टान्ततम्। दध्यादिवाक्यानां च कर्मविधित्वे दध्यादीनां भिन्नकर्मविषयत्वात्समुच्चये सति सम्प्रतिपन्नदेवतात्वात्सहप्रदानापत्तेर्विकल्पसिद्ध्यर्थं कर्मैक्यायाग्निहोत्रवाक्यस्य विधायकत्वं सिद्धान्तायितव्यं सूर्याग्निवाक्ययोस्तु कर्मविधित्वे पक्षद्वये ऽपि दध्यादिविकल्पसिद्धेर्विचारो ऽनर्थकः स्यादित्याशयेनाह * न चेति * परमतमुपसंहरति * तस्मादिति * सूर्याग्निवाक्ययोः कर्मविधित्वे सत्येककर्मासम्भविदेवताद्वयरूपगुणभेदितस्यैकैकवाक्यविहितस्य कर्मद्वयस्यैक्यमुपचर्यापराग्निकहोमानां चाग्निहोत्रवाक्यात्पश्चाद्विहितत्वेनानुवादायोगमभिप्रेत्य सायम्प्रातराहवनीयहोमावित्यादुक्तं परमतमुपन्यस्तं दूषयन्समुदायानुवादमेव तावन्निष्प्रयोजनत्वेन दूषयति * उच्यतइति * दर्शपूर्णमासाभ्यामिति द्विवचनस्य समुदायानुवादाव्यतिरेकेणासिद्धेर्विद्वद्वाक्ययोः समुदायानुवादो ऽर्थवान् अग्निहोत्रमिति वैकवचनस्य राजसूयेनेत्येकवचनवत् समुदायानुवादं विना ऽप्यसमुदायीकृतानामेव प्रकृतानां कर्मणामेकफलान्वयात्समुदायसिद्धौ सत्यां तदगतैकत्वद्वारा सिद्धेः समुदायानुवादो ऽनर्थक इत्याशयः। नन्वग्निहोत्रशब्दविशेषितेन धातुना फलान्वयावगमात्ततः प्रागेव समुदायत्वसिद्ध्यर्थं समुदायानुवादो ऽर्थवानित्याशङ्क्यं निरस्यन् श्लोकं व्याचष्टे यथैव हीति * अनवगतफलानामपि कर्मणामेकप्रकरणविधानलक्षणैकधर्मान्वयाख्यात्प्रचयात्साहित्याख्यः समुदायः सेत्स्यतीत्याशङ्क्या-

निरासाशयः । प्राक्फलान्वयात्समुदायासिद्धावप्राप्तत्वान्नानुवादो ऽपि सिद्ध्येदिति सूचनार्थो दृष्टान्तः। समुदायसिद्ध्यैवैकवचनालम्बनैकत्वसिद्धिर्न तत्सिद्ध्यर्थो ऽप्यनुवादो युक्त इति सूचनायैकत्वशब्दः । एवमग्निहोत्रं जुहुयात्स्वर्गकाम इति प्रयोगवाक्यगतमाग्निहोत्रपदमपि प्रचयशिष्टसमुदायैकत्वद्वारेण भविष्यतीत्यध्याहारेण योज्यं यथा चेति श्लोकव्याख्या नन्वग्निहोत्रशब्दस्यैकप्रकरणविधानलक्षणप्रचयकृतसमुदायनिमित्तत्वे सति गार्हपत्यान्वाहार्यपचनहोमानामपि प्रकृतत्वाविशेषात् ग्रहणेन फलान्वयापत्तेर्दर्शपूर्णमासादौ च सर्वत्र गार्हपत्यान्वाहार्यपचनयोः प्रधानकर्माधिकरणत्वाभावव्याप्तेरग्निहोत्रद्रव्यस्य च चतुरुन्नयनविधानाच्चतुरुन्नयनसंस्कृतस्यैव प्रधानहोमार्थत्वावगमात्तस्य चाहवनीयहोममात्रार्थत्वादाहवनीयाधिकरणहोमविधायकाग्निसूर्यवाक्यानन्तर्याच्चाग्निहोत्रं जुहोतीति समुदायानुवादस्थस्याग्निहोत्रशब्दस्याहवनीयाहोममात्रविषयत्वेन तन्मात्रस्य फलान्वयावगतेर्नैकप्रकरणविधानापादितसमुदायनिमित्तताग्निहोत्रशब्दस्य सम्भवतीत्येतद्वाक्याभावे ऽग्निसूर्यवाक्यविहितहोममात्रसमुदायासिद्धेस्तत्सिद्ध्यर्थः समुदायानुवादो ऽर्थवानित्याशयेनाशङ्कते * नन्विति * प्रकृतत्वाविशेषेण ५०१।२
जुहोतेः सर्वहोमग्राहित्वावसायाद्वैदिके चार्थे ऽनुमानाप्रवृत्तेः पिण्डपितृयज्ञादेश्चातिप्रणीताग्नौ विहितस्याहवनीयानधिकरणत्वे ऽपि [illegible]न्यदर्शनात्संस्कारव्यवस्थामात्रेण च प्राधान्यव्यवस्थानुपपत्तेरानन्तर्यस्य च पञ्चमक्रमात्मकप्रमाणत्वेन प्रकरणेन बाधाद्राजसूयशब्दवत्प्रकृतमात्रग्राहिजुहोतिसामानाधिकरण्येनाग्निहोत्रशब्दस्य सूर्यप्रकृतहोमविषयत्वावसायान्नाहवनीयहोममात्रसिद्ध्यर्थत्वं समुदायानुवादस्य सम्भवतीत्याशयेन परिहरति * समुदायेति * ननु बहुव्रीहेः सर्वनामार्थवृत्तित्वात्सन्निहिताहवनीयहोमविषयत्वावगतेरापराग्निकेभ्यो व्यवच्छेदो भविष्यतीत्याशयेन शङ्कते *नन्विति * पाश्चात्ये ऽप्यथैष ज्योतिरित्यादौ सर्वनामप्रयोगदर्शनेन प्राक्भावमनादृत्य सन्निधिमात्रापेक्षणादापराग्निकहोमानामपि चैकप्रकरणगतत्वेन सन्निध्यविशेषादत्यन्तसन्निधेश्च द्वयोरप्यसम्भवात्सन्निहितार्थवृत्तित्वेन विशेषणत्वानुपपत्तेरग्निदेवत्यहोमाभिधायित्वेन विशेषणत्वं वाच्यं तच्चापराग्निकनामप्यग्निदेवत्यत्वान्न सम्भवतीत्यापाद्योक्त्या परिहरति * नेति * अग्निदेवत्यत्वे च विशेषणे सति प्रातर्होमस्यापि प्राधान्यं न स्यादित्याह * अपि चेति* अतः समुदायानुवादाभाववत्समुदायानुवादे ऽपि सर्वेषां प्राधान्यात्समुदायानु-

वादो ऽनर्थक इत्युपसंहरति * तस्मादिति * नन्वग्निहोत्रवाक्यस्य विधित्वे सर्वाग्निष्वप्यस्तस्य कर्मणो भेदाभावात्प्राधान्यविशेषे ऽप्यग्निसूर्यादिवाक्यानां कर्मविधित्वे ऽग्निहोत्रवाक्यास्यानन्यप्रयोजनत्वात्समुदायानुवादार्थत्वावगतेः प्रकृतमात्रग्रहणं च समुदायानुवादानर्थक्यापत्तेः प्राग्विहिताहवनीयहोममात्रानुवादावसायादापराग्निकानामङ्गत्वं भविष्यतीत्याशङ्क्याह * तथेति * सूर्याग्न्यादिवाक्यानां कर्मविधित्वाभावे ऽपि गुणार्थतयार्थवत्त्वोपपत्तेर्न तेषां कर्मविधित्वाभ्युपगमेनाग्निहोत्रवाक्यस्य समुदायानुवादताभ्युपगन्तुं युक्तेत्याशयः । शाखान्तरे च द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रो ऽन्वाहार्यपचने दश सम्पद्यते दशाक्षरा विराट् य एवं विद्वान् विराट् सम्पन्नमग्निहोत्रं जुहोतीति सर्वहोमविषयत्वेताग्निहोत्रशब्दप्रयोगात्सर्वविषतयैवाग्निहोत्रशब्दस्य निश्चीयत इत्याह * तथा चेति * विराट्शब्दस्य दशकाख्यत्वादापराग्निकहोमाग्रहणे च दशकासम्पत्तेः सर्वविषयत्वलिङ्गेन विराट्सम्पत्त्युपन्यासः अतः समुदायानुवादानर्थक्याद् गुणविधित्वस्य च तत्प्रख्याधिकरणे निरस्तत्वात्कर्मविधितैवाग्निहोत्रवाक्यस्य युक्तेत्याह * तस्मादिति * नन्वेवमपि गार्हपत्यादिवाक्येषु संख्याधिकरणारूपानेकगुणविधानात्कर्मविधिप्रतीतेः कर्मभेदे सति कर्मैक्यं न सिध्यतीत्याशङ्क्याह * तनश्चेति * यदाहवनीये जुहोतीत्यनारभ्यवादेन सर्वहोमानामाहवनीयाधिकरणत्वप्राप्तेराहवनीये द्वे इत्यस्याहुत्यन्तरपरिसंख्यार्थत्वादष्टानामाहुतीनामधिकरणापेक्षायां गार्हपत्यान्वाहार्यपचनाधिकरणत्वविधौ समं स्यादश्रुतित्वादित्यनेन न्यायेनैकैकत्र चतुष्ट्वस्य प्राप्तस्यानुवादाद् गार्हपत्ये जुहोत्यन्वाहार्यपचने जुहोतीति वाक्यान्तराभ्यां वा गार्हपत्यान्वाहार्यपचनप्राप्तेश्चतुरावृत्तिलक्षणगुणमात्रविधानार्थत्वात्तत्संयोगस्याहवनीयसंयोगस्य च द्विरावृत्तिलक्षणगुणमात्रविधानार्थत्वान्न वाक्यभेदापत्तिरित्याशयः। ननु कर्मैक्ये सत्यग्नीनां विकल्पापत्तेस्तत्संयोगेन विहितानामावृत्तीनामपि विकल्पप्रसङ्गाद्विराट्सम्पत्त्यनुवादो न युज्येतेत्याशयेनाशङ्कते * कस्मात्पुनरिति * केषां चित्परिहारं दूषयितुमुपन्यस्यति * के चिदिति * प्रक्षेप्यस्य द्रव्यस्य क्व चित्प्रतिष्ठां विनाप्याधारासिद्धयोजनमात्रेण प्रक्षेपसिद्धेरग्निसंयोगस्याहष्टार्थत्वेनैक्याप्त्यै प्रमाणाभावान्न विकल्प इत्यर्थः।अदृष्टार्थत्वे सति वैकल्पिकबाधायोगादविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यादिति दशमाधिकरणविरोधः स्यादिति दूषण-

माह * एवं त्विति * तत्राङ्गानुरोधेनाश्रुतावृत्त्ययोगाद् बाधसम्भवे ऽपीहावृत्तिश्रवणाद्विकल्पानुपपत्तिरित्याशयेनाशङ्कते * अथेति * द्विरावृत्त्यादिश्रवणे ऽपि दशकृत्वा आवृत्त्यश्रवणाद्विराट्श्रुतेश्चानुवादसरूपत्वात्साम्यमित्याशयेन परिहरति * इहापीति * स्वमतेनानुवादसरूपत्वमन्यतः प्राप्त्यभावाद्विधित्वे सति द्वादशाधिकरणन्यायेन समुच्चयसिद्धिरिति परिहरति * तस्मादिति * विराट्सम्पत्त्यविधाने त्वदृष्टार्थत्वे ऽप्याहवनीयादिसंयोगस्य प्रत्येकमाहुतीनां स्थानविशेषनियमात्स्थानान्तरपाते च प्रायश्चित्तान्नानात्कर्ममध्ये चानुगते ऽग्नौ लौकिकाग्निब्राह्मणपाण्यादौ होमविधिदर्शनात्सप्तमीश्रुतेश्चाधारणत्वद्वारैवादृष्टार्थत्वावसायान्न देवताग्निशब्दक्रियमित्यत्र वाग्निप्रतिनिधिनिरासस्य प्रत्यक्षदृश्याग्निरूपस्य दृष्टार्थत्वे ऽप्याहवनीयादिरूपस्यादृष्टार्थत्वेनान्यत्र तदवयवानुवृत्तौ प्रमाणाभावादुपपत्तेरन्योन्यनिरपेक्षस्य च विभक्तिश्रुत्याधारत्व-
५०२।२ प्रतीतेर्विकल्प एव स्यादित्याह * अन्यथा हीति * श्लोकं व्याचष्टे * सत्यपीति * ननु विद्वद्वाक्यस्य विधित्वाभ्युपगमे द्विचतुर्दशकृत्व आवृत्तिलक्षणानेकगुणविधानात्कर्मोत्पादकत्वापत्तेरुत्पत्तिस्थया संख्यया कर्मभेदः स्यादित्याशयेनाशङ्कते * कस्मात्पुनरिति * अग्निहोत्रवाक्यस्यानन्यप्रयोजनत्वेन कर्मोत्पादकत्वावसायाद्विरावृत्त्यादिवाक्यानां च विभागेनैकैकगुणविधायकत्वोपपत्तेरनुत्पत्तिस्थत्वान्नेयं संख्या भेदिकेत्याशयेन परिहरति * नेति * नन्वनुत्पत्तिस्थापि संख्या कस्मान्न भेदिकेत्याशङ्क्याह * उत्पत्तिस्था हीति * उत्पत्तिवाक्यावधारितसंख्ये कर्मणि संख्यान्तरानिवेशादावृत्त्यापि च संख्यान्तरसम्पादनोपपत्तेर्नास्वरूपभेदकत्वं सम्भवतीत्याशयः । अग्निहोत्रवाक्यस्य कर्मविधित्वे कर्मैक्यसिद्धिमुपपादितामुपसंहरति * तेनेति * „परोक्तं समुदायानुवादत्वं निष्प्रयोजनत्वेन दूषयित्वाग्निसूर्यवाक्ययोर्गुणविधित्वे वाक्यभेदापत्तेः । कर्मविधित्वमाशङ्कितमनुभाषणपूर्वकं दूषयति * यत्विति * चशब्दात्समुच्चितस्य देवताद्वयस्य सकृच्छ्रुतेन प्रत्ययेन विधानोत्पत्तेः कालदेवतारूपाणामेकार्थविधानाद्वाक्यभेदो वाच्यः स चात्र कालानुवादान्नास्तीत्याशयः । नन्वनेकार्थविधिलक्षणवाक्यभेदाभावे ऽपि विशिष्टानुवादलक्षणो वाक्यभेदः स्यादित्याशङ्कते * नन्विति * कालमात्रानुवादात्परिहरति * नेति * जुहोतेस्तर्हि का गतिरित्याशङ्क्य प्रकरणलभ्यकर्मानुवादतोक्ता ननु कालस्य देवतान्वयो न सम्भवतीत्याशङ्क्य द्वेधा परिहरति * स त्विति * प्राकरणिकाद्वा-

क्यान्तरात्कालस्य कर्मान्वयावगतेस्तद्द्वारा देवतान्वय इत्येकः परिहारः । विधीयमानया सम्प्रदानभूतया देवतयाकाङ्क्षितत्वान्प्राकरणिकवाक्यान्तरेण च होमस्य कालान्वयितयावगतेस्तल्लक्षणार्थः कालनिर्देश इति द्वितीयः । ननु प्रत्यक्षश्रुतत्वाद्धोमस्य कालेन लक्षणा न युक्तेत्याशङ्क्याह * न चेति * वाक्यभेदापत्तेः श्रुतस्य होमस्य कालेन विशेष्टुमशक्यात्प्रत्ययानुग्राहकत्वेन च धात्वर्थानर्थक्यपरिहारापपत्तेर्लक्षणयैव लाभो ऽभ्युपगन्तव्य इत्याशयः । ननु कालेन होमलक्षणायामनया यो हि कालस्येत्यनेन न्यायेनैककालक्षितहोमस्य कालान्तरं ऽप्यनपायादग्नीषोमलक्षितांपांशुयाजे विधीयमानस्य पौर्णमासीकालस्य देवतान्तरयुक्ते ऽपि प्राप्तिवदेककालक्षिते होमे विधीयमानाया देवतायाः कालान्तरयुक्ते ऽपि प्राप्तेर्व्यवस्थापरत्वात्किन्न युज्येतेत्याशङ्क्याह * न चेति * कर्मस्वरूपमात्रलक्षणे सत्येकैकेनैव तत्सिद्धेः कालद्वयोपादानानर्थक्यप्रसङ्गात्स्वानुरक्तकर्मलक्षणे कालान्तरयुक्ते कर्मणयप्राप्तेर्नोपांशुयाजतुल्यतेत्याशयः । अतो ऽग्निसूर्यवाक्ययोर्व्यवस्थापरता युक्तेत्याह * तेनेति * व्यवस्थायाः सूर्याग्निमात्रविषयत्वे ऽपीतरेतरयुक्तदेवताद्वयविधेः प्रत्येकव्यापाराभावे वाच्यभेदसूचनार्थौ द्वन्द्वनिर्देशौ द्वन्द्वनिर्देशसूचितमपि वाक्यभेदपरिहारमजानतां वाक्यभेदोक्त्याशयमाशङ्कते * नन्विति * चशब्दाद्देवताद्वयसमुच्चयस्य सकृच्छ्रुतेन प्रत्ययेन विधानावगतेर्वाक्यभेदाभावे ऽपि वाक्यभेदमाशङ्कमाननाग्नेयपदोपात्तद्रव्यदेवतारूपानेककारककवदग्निप्रजापत्योरनेककारकत्वं वाच्यं तच्च नास्तीत्यनेककारकत्वं परानभिमतमप्यापाद्यान्येषां परिहारं दूषयितुमुपन्यस्यति *नेति* ५०३।१
प्रतिपदं च यावत्किं चित् द्रव्याश्रितं जातिलिङ्गसंख्यादीत्यादिपौर्णमास्यधिकरणवार्त्तिकोक्तं परामृष्टं पृथक्चतुर्थीनिर्देशादग्नीषोमवत् समुच्चितयोः कारकत्वाप्रतीतेः कारकयोस्तु समुच्चये कारकभेदापत्तेरग्नये दात्रइत्यादिवद्विशेषणविशेष्यभावात्त्वेककारकत्वे च शब्दानुपपतिप्रसङ्गात्सत्यपि वा विशेषणविशेष्यभावेनैककारकत्वे भिन्नकारकविभक्त्युपात्तयोररूणयैकहायन्यादिवक्रियान्वयं विना परस्परविशेषणविशेष्यभावायोगाद्यज्जहोति तदग्नये तच्च प्रजापतित्वगुणविशिष्टाय जुहोतीति प्रत्येकविधिव्यापारापत्तेरपरिहार्यो वाक्यभेद इत्याशयेन दूषयति*अत्रेति * अग्नये दात्रइति वद्विशेषणविशेष्यत्वाङ्गीकरणेन प्रजापतित्वगुणविशिष्टस्याग्नेः कारकत्वाद्यद्यप्येकं कारकं तथाप्यनेककारकपदोपात्तयोः कारक-

विभक्तिश्रुत्या क्रियान्वयावगतेः क्रियान्वयात्प्राग्विशेषणविशेष्यत्वाप्रतीतेः प्रत्येकं विधिव्यापाराद्विधायकप्रत्ययावृत्तिः स्याद्धस्तुतस्तु प्रजापतेः स्वतन्त्रदेवतात्वप्रसिद्धेर्विशेषणत्वाभावेन कारकैक्यं नास्तीति यद्यपि शब्दार्थः श्लोकं व्याचष्टे * विभक्त्या हीति * समासस्यैकपद्यात्सकृच्छ्रुतप्रत्ययान्वयो युक्तः अग्नये च प्रजापतये चेत्यत्र समासाभावेनेतरेतरयुक्तस्याग्नीषोमवत्कारकत्वाभावाद्विशेषणत्वविशेष्यत्वाप्रतीतेश्च विशिष्टस्य कारकत्वाभावात्परमार्थतस्तावन्नैकं कारकं यद्यप्येकं तथाप्यनेकपदोपादानात्प्रत्ययावृत्त्यापत्तिरित्यपि शब्दार्थः । ननु सम्प्रदानत्वमात्ररूपेण कारकैक्योक्तिः सम्भवति सामान्यस्याविधेयत्वाद्विभक्तिभेदे च कारकविभक्त्यैक्ययोगादावृत्युपपादनार्थं प्रत्ययस्य क्रियैकविषयत्वेन क्रियान्वयं विना चार्थस्य विषयीकरणरूपालोचनायोगात्कारकत्वं च विना क्रियान्वययोगाद्विभक्तिप्रयुक्तस्य प्रत्ययस्य नामार्थालोचनतोक्ताभिन्नयोरपि कारकयोश्चशब्देनेतरेतरयुक्तयोर्विषयत्वावगमात्प्रत्येकं विधिव्यापाराभावाद्भिन्नयोरपि विधेयत्वे विषयाभेदाद्वाक्यभेदपरिहारसम्भवे ऽपि यद्यवश्यमेकार्थविधिरेव वाक्यभेदपरिहाराय वाच्य इत्याग्रहस्ततो देवताद्वयविधौ कारकैक्यसम्भवात्सामान्यरूपेणैक्यसम्भवे ऽप्यनेकपदोपात्तयोरितरेतरयोगाविवक्षायामनेकविधेयत्वापत्तेस्त्वदुक्तपरिहारायोगाद्धरमेकदेवताविधानाभ्युपगमेन वाक्यभेदः परिहर्त्तव्य इत्याह * तस्मादिति * प्रजापतिमात्रविधौ व्यवस्थानुपपत्तेः सायम्प्रातःशब्दयोरविवक्षितार्थत्वादेकेनैव वाक्येन कालद्वये ऽपि कर्मैक्यात्प्रजापतिप्राप्तेर्वाक्यान्तरानर्थक्यप्रसङ्गाद्विधेयस्य प्रजापत्तेर्देवतान्तरसाहित्येन स्तुत्यर्थं पुनः प्रजापतिसङ्कीर्त्तनमित्यभ्युपगमे विध्यर्थवादयोरेकवाक्यत्वाद्वाक्यद्वयव्यवस्थानुपपत्तेर्यथाग्नाई पन्नीवान्निति मन्त्रवर्णाद्देवताभूताग्निप्राप्तेस्तद्विशेषणमात्रं पात्नीवतं गृह्णातीति तद्धितेन विधीयते तथात्राप्यग्निसूर्ययोः प्रजापतित्वविशेषणं सायमग्नेः प्रजापतित्वं विशेषणं प्रातः सूर्यस्येत्येवं व्यवस्थया विधीयत इत्येवं व्याख्येयं नाग्नेः सूर्यस्य वा शुद्धस्य देवतात्वं किं तु प्रजापतित्वविशेषणमपि देवतात्वान्तर्गतमित्यभिधानार्थत्वाभ्युपगमेन च शब्दानर्थक्यं परिहार्य्यमित्याशयः । विशेष्ययोर्देवताभूतयोरग्निसूर्ययोः कुतः प्राप्तिरित्याशङ्क्याह * अग्नीतिं * अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति वाक्यान्तरविहितमन्त्रवशाद्विशेष्यप्राप्तिरित्य-

र्थः । प्रजापतेः स्वतन्त्रदेवतात्वे गुणवृत्त्यैन्द्रीवन्मन्त्रयोः प्रजापतिप्रकाशकत्वोपपत्तेर्देवताकल्पकत्वायोगान्न मूर्ध्नाग्निसूर्यप्राप्तयर्थो ऽयं ग्रन्थः । नन्वग्निसूर्ययोरन्यतः प्राप्तत्वे प्रजापतिविधौ कीर्त्तनं किमर्थमित्याशङ्क्याह * ताभ्यामेव चेति * स्तुतिशब्दस्य गुणवत्त्वाभिधानवाचित्वाद्विधीयमानप्रजापतित्वलक्षणगुणापेक्षितगुणिसमर्पणायोपादानमित्यर्थः । ननु प्रजापतिशब्दस्य देवताविशेष रूढत्वात्प्रजापालनगुणवाचिता न युक्तेत्याशङ्क्यागत्या गुणवाचित्वाङ्गीकरणौचित्याभिधानाय * औचित्येनेत्युक्तम् * नन्वेवं सति तत्प्रख्याधिकरणे * यदग्नये चेत्यत्र * नाग्निप्राप्तयभिधानं न युज्येतेत्याशङ्क्याह * यदपि चेति * मन्त्रतो प्राप्तस्याग्नेर्विशेष्यत्वेनानुवादायोगान्मन्त्रस्याग्निप्रापकत्वलिङ्गतयेदं तत्रोदाहृतमित्यर्थः । नन्वग्निप्रजापत्योर्विशेषणविशेष्यभावे ऽग्नेः पूर्वाहुतिः प्रजापतेरुत्तरेत्यादिविरोधेनापि पक्षस्यानभिमतत्वात्केन विशेषणोपन्यास इत्याशङ्क्य * आहैवं चेति * ब्राह्मणेनाग्निसूर्ययोरविधाने लिङ्गात्तद्देवत्यमन्त्राप्राप्तेर्मन्त्रविषययोर्विध्योर्नानर्थक्यापत्तिरित्यर्थः । ननु लिङ्गात्केवलदेवत्यमन्त्रप्राप्तावप्यग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोतीति मिश्रदेवत्यमन्त्रविधानात्पर्युदस्तयोः प्रतिप्रसवार्थत्वेनानर्थक्यं परिहर्त्तुं शक्यमित्याशङ्क्याह * अन्यथेति * परिहियते · अनेनेति करणे परिहारशब्दं व्युत्पाद्य परिहारश्च तत्प्रयोजनं चेति कर्मधारयो विग्राह्यः तदर्थशास्त्रत्वलक्षणस्य दोषस्य परिहारकं यत्प्रयोजनं मन्त्राधिकरणे गुणविधिरूपं परिसंख्यारूपमर्थवादरूपं चोक्तं तत्तावन्न सम्भवति यत्त्वादिशब्दोक्तं पर्युदस्तमन्त्रप्रतिप्रसवरूपामिहाभिमतं प्रयोजनं तस्मिन्कल्प्यमाने ऽति क्लेशः स्यादिति कल्प्यमानपदाध्याहारेण व्याख्येयम् । नन्वतिक्लेशापत्तावप्यग्नेः पूर्वाहुतिः प्रजापतिरुत्तरेत्यादिश्रुतिविरुद्धविशेषणविशेष्यत्वकल्पना न युक्तेत्याशङ्क्याह * तस्मादिति * एकार्थविधिं विना वाक्यभेदपरिहारासम्भवाभिमानिनं प्रत्येकार्थविध्युपपादनार्थं मन्त्रवर्णप्राप्तयोरग्निसूर्ययोः प्रजापतित्वलक्षणविशेषणरूपैकार्थविधिरनभिमतो ऽप्युक्तो न पारमार्थिक इत्याशयः । कस्तर्हि पारमार्थिको वाक्यभेदपरिहार इत्याशङ्क्याह * एतीति * येन कारणेन पारमार्थिको वाक्यभेदपरिहारो भवति तत्प्रागेवाग्निप्रजापती सूर्यप्रजापती इति चेतरेतरसाहित्यवाचिद्वन्द्वनिर्देशात्सूचितमित्यर्थः * अयमाशयः * यथा गोश्वश्वाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च

माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्ये चशब्देनेतरेतरसहितस्य गवादिशब्दस्य दक्षिणाशब्दान्वयावगमात्समुदितानां गवादी नामेकदक्षिणात्वावगतेर्द्वेनुर्दक्षिणेति विकृतौ विहिताया धेनोः समस्तदक्षिणाविकारत्वं दशमे वक्ष्यते तथेहापि यज्जुहोति तदग्नये च प्रजापतये चेति चशब्दात्समुच्चितयोरेवाग्निप्रजापतिशब्दयोर्विधायकान्वयप्रतीतेः प्रतिपदं विधेरपर्यवसानेन विधिव्यापारभेदाभावात्पृथक् चतुर्थीनिर्देशात्कारकभेदप्रतीतेर्भिन्नयोरपि विधेयत्वे प्रत्यावृत्त्यप्रसक्तेः समुदितरूपस्य च विधेयत्वेन विधेयभेदाभावादनेकार्थत्वाप्रसक्तेर्देवताद्वयविधावपि न वाक्यभेदापत्तिरिति प्रपञ्चितं चैतत्तन्त्रसारे वाजपेयाधिकरणे ऽत्रापि तत्प्रख्याधिकरणे ऽस्माभिरुपपादितमिति ग्रन्थगौरवभयान्न बहुप्रपञ्च्यते । यत्तु ग्रहाभ्यासेषु ज्योतिष्टोमावयवबुद्धिवत्सायम्प्रातर्होमयोरग्निहोत्रावयवबुद्ध्या भावेन तद्भेदव्यवहारस्यावयवविषयत्वायोगाद्भेदोपपादकत्वमुक्तं तदप्यनुभाषणपूर्वं दूषयति * यस्त्विति * यथा दर्शपूर्णमासावृत्त्यात्मके दाक्षायणयज्ञे सकलयोर्दर्शपूर्णमासयोर्द्विरावृत्तेर्नावृत्तावयवबुद्धिस्तथाग्निहोत्रस्यापि सकलस्य विराड्वाक्यादृशकृत्वो ऽभ्यस्तस्य द्वे आहवनीये द्वे गार्हपत्ये द्वे अन्वाहार्यपचनइति वाक्यात्षड्कृत्वो ऽभ्यस्तस्य तस्य वा एतस्याग्निहोत्रस्य स च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्त वा एव शतानि विंशतिश्च संवत्सरे प्रातराहुतय इति वाक्यान्तरालोचनया वा द्विरभ्यस्तस्य सायम्प्रातःकालयोरावृत्तेर्नावृत्तावयवबुद्धिरित्यर्थः । नन्वेकस्मिन्काले ऽग्निहोत्रसाकल्ये सति दाक्षायणयज्ञवदावृत्त्यविधानात्प्रयोगसमाप्तेः कालद्वये ऽनुष्ठानप्रमाणाभावादाचारविरोधः स्यात्सूर्याग्निवाक्यविहितयोस्तु कर्मणोरग्निहोत्रवाक्येन समुदायानुवादे प्रयोगवाक्यस्थेनाग्निहोत्रशब्देन कर्मद्वयग्रहणात्कालद्वये ऽनुष्ठानोपपत्तिरित्याशयेन स एव पूर्वपक्षी प्रत्यवतिष्ठते * नन्विति * एकैकस्मिन्काले प्रयोगसमाप्तावपि सायं जुहोति प्रातर्जुहोतीति वाक्यान्तरप्राप्तयोः कालयोः प्रयोगापेक्षितत्वेन तच्छेषत्वावगतेर्यावज्जीवं सायम्प्रातर्जुहुयादिति प्रयोगशास्त्रार्थावधारणादङ्गत्वे ऽपि कालस्यानुपादेयत्वसाम्येनार्थान्निमित्तभूतजीवनविशेषणत्वावगतेः कालावच्छिन्नस्य जीवनस्य निमित्तत्वात्प्रतिनिमित्तं च नैमित्तिकानुष्ठानस्य षष्ठे वक्ष्यमाणत्वान्नैमित्तिकहोमकरणं तावदेकस्मिन्काले प्रयोगसमाप्तावपि यावज्जीवचोदनया भविष्यतीत्यनुष्ठानाविरोध इत्याशयेनैकदेशिनः परिहारं दूषयितुमुपन्यस्यति *

नेति * उभयत्रानुष्ठानस्यानेन प्रकारेण सिद्धावपि सायं होमे कृते ५०४।१
यजमानापद्यप्यूर्त्विग्द्वारा प्रातर्होमो ऽवश्यकार्यत्वाचारविरोधः प्र-
योगभेदपक्षे दुष्परिहर इति दूषणमाह * सत्यमिति * अस्या-
चारस्यैकप्रयोगपक्षे न्यायमूलत्वप्रदर्शनार्थम् * प्रक्रान्तेत्युक्तम् *
काम्यप्रयोगे वोभयत्रानुष्ठानविरोधो ऽपि दुष्परिहर इत्याह * किं
चेति * नन्वेकस्मिन्काले ऽनुष्ठानात्फलसिद्धावपि कालान्तरे नैमि-
त्तिकानुष्ठानोपपत्तेर्नाचारविरोधः इत्याशङ्क्य * सर्वाङ्गसंयुक्तः फ-
लार्थिना चेत्युक्तम् * कालद्वये सर्वाङ्गादरः फलप्रार्थनं च विरु-
ध्येतेत्याशयः । प्रयोगैक्ये ऽत्वविरोध इत्याह * अभ्यस्तेति * एकदे-
शिपरिहारं दूषयित्वा स्वमतेन प्रश्नपूर्वं परिहरति * कथं पुनरिति *
तिस्र एव साह्नस्योपसद इत्यादिवाक्यपर्यालोचनया पूर्वाह्णपारा-
ह्णोपसत्प्रयोगैक्यावसायात्पुरस्तादुपसदां प्रवर्ग्येण चरन्तीत्युपस-
त्पूर्वप्रयोज्यत्वविधानेन प्रवर्ग्यस्यापि पूर्वाह्णापराह्णान्तस्यैकप्रयोग-
गतत्वावगतेस्तदुपमानेनाग्निहोत्रस्य कालद्वये ऽभ्यस्तस्यैकप्रयोगत्वं
द्रढयितुं प्रवर्ग्ये ऽपि माप्रक्रमोपन्यासः । ननु सायम्प्रातर्होमयो-
र्भिन्नकर्मत्वे ऽग्निहोत्रवाक्ये समुदायानुवादस्यार्थवत्त्वाय समुदि-
तयो फलसाधनत्वावगमात्तत्समुच्चयसिद्धेर्नास्य वै शब्दयोगमदनु-
वादसरूपस्य वचनत्वकल्पनापद्यते कर्मैक्ये तु वचनं विना कालद्व-
यसमुच्चयासिद्धेर्वचनत्वक्लेशापत्तिरित्याशङ्क्याह * भेदेति *
विराड्वाक्यादालोचनेन दशकृत्वः षट्कृत्वो द्विर्द्विर्वैकस्मिन्काले
ऽभ्यस्तस्याग्निहोत्रशब्दवाच्यत्वावगतेः कालद्वयाभ्यस्तकर्मसमुदा-
यानुवादायोगाद्भेदपक्षे ऽपि वचनं विना समुच्चयो न सिद्ध्यती-
त्याशयश्चशब्दादेव समुच्चयो न वाक्यादित्यर्थः । नन्वेवमपि
कालयोगिनश्चशब्दात्कालसाहित्यावगतेः परस्परसहिते कालद्वये
सकृदनुष्ठानापत्तेर्नाभ्याससिद्धिरित्याशङ्क्याह * न चेति * अनुपादे-
यत्वेन कालसाहित्यस्याशक्यसम्पादत्वाभ्यासेनैव कालद्वयान्वयः
सम्पाद्य इत्यर्थः । ननु कालयोः कर्मण्युद्देश्यत्वात्समुच्चयस्य चो-
पादेयत्वात्समुच्चयविशिष्टकालविध्यनुपपत्तेः । स्यादन्यथेन काल-
समुच्चयरूपानेकार्थविशिष्टविधौ वाक्यभेदः स्यादित्याशङ्क्याह * प्राप्त-
योश्चेति * अतः सायम्प्रातरभ्यस्तमेकं कर्मेत्युपसंहरति * तस्मा-
दिति * कर्मैक्ये ऽङ्गावृत्त्ययोगमाशङ्क्तितमनुभाषणपूर्वं परिहरति
* यत्त्विति * प्रयोगवेलायां कालापेक्षत्वादनुत्पत्तिबाधकयस्त्वा-
ज्ञोपांशुयाजाङ्गभूतकालवदुत्पत्तिशेषत्वानवगतेः कालस्य प्रयोगा-
ङ्गत्वेन विध्यवधारणात्प्रयोगस्य च साङ्गप्रधानविषयत्वात्प्रयोगवि-

धौ प्रधानस्याङ्गसाहित्येन विशेषणस्तस्य चोपादेयविशेषणत्वेन विवक्षितत्वात्कालद्वयान्वयेन साङ्गस्य द्विः प्रयोगो ऽवसीयते सवनीयपशौ तु प्रयोगैकदेशभूतानां वपाप्रचारादीनामनेककालान्वये ऽपि प्रयोगावच्छेदककालभेदाभावान्नेतिकर्त्तव्यतापत्तिरित्याशयः । प्रधानैक्ये ऽपि प्रयोगावयवभूतयोरभ्यासयोः सायम्प्रातः कालान्वयात्सायन्तनस्य प्रातस्तनस्येति व्यपदेशौ यद्प्यग्निसूर्यवाक्ययोः कर्मविधायित्वं निराकृत्य कर्मैक्यसिद्धये ऽग्निहोत्रवाक्यस्य कर्मविधायित्वं सिद्धान्तितम् * निष्प्रयोजनमित्युक्तम् * तदप्यनुभाषणपूर्वं परिहरति * यत्विति * दध्यादीनां विकल्पाविशेषे ऽपि अग्निसूर्यवाक्ययोः कर्मविधित्वे कर्मभेदाद्विकृतावेककर्मणि विकल्पो विभागो हि चोदनैकत्वादित्यष्टमाधिकरणन्यायेन सायम्प्रातर्होमाङ्गयोर्विकल्पेन प्राप्तेः । कौण्डपायिनां होमः सायम्प्रातर्वा कालाध्वनोरत्यन्तसंयोगइत्यत्यन्तसंयोगे द्वितीयास्मृतेरहरहर्वा चोदितत्वादिति सङ्कर्षे वक्ष्यमाणन्यायेन प्रत्यहं सकृत्कार्यः । सिद्धान्ते तु कर्मैक्यात्सायं प्रातः प्राकृतः प्रकृतिवदभ्यसितव्य इत्यभ्यासप्रयोजनवान् सिद्धान्त इत्यर्थः । दध्यादिवाक्यानां तु कर्मविधित्वपूर्वपक्षे दध्यादिद्रव्यकेषु दशसु कर्मसु यदग्नये चेत्यादिवाक्यैर्देवताविधानात्समप्रतिपन्नदेवतात्वेन दध्यादिद्रव्याणां साम्नाय्यद्वयवत्सहप्रदानं सिद्धान्ते तु विकल्प इति स्पष्टं प्रयोजनम्।आधारे तु कर्मैक्ये ऽप्यूर्ध्वत्वादीनां भिन्नार्थत्वात्समुच्चयाविशेषे ऽपि कर्मभेदे ऽपि च समुदायीकरणार्थवत्त्वाय प्रयोगतन्त्रत्वाविशेषे ऽपि कर्मभेदे सत्यूर्ध्वत्वादीनां मध्ये यस्यान्तरायस्तद्युक्तं क्रमावर्त्तनीयं कर्मैक्ये तु गुणलोपे प्रायश्चित्तं नावृत्तिरिति प्रयोजनमद्रव्यसंयोगाच्चोदनापशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणो ऽर्थेन नन्वाधाराग्निहोत्रयोरङ्गाङ्गिसम्बन्धाभावेनाभ्यर्हितं पूर्वं निपततीत्यस्याविषयत्वादल्पाच्तरत्वेनाधारशब्दस्य पूर्वनिपातो युक्तः। इह तु पशुशब्दस्य घ्यन्तत्वे ऽपि लक्षणहेत्वोः क्रियाया इत्यादौ घ्यन्तस्य पूर्वनिपातव्यभिचारात्सोमस्य प्राधान्येनाभ्यर्हितत्वात्पशोः पूर्वतराभिधानमयुक्तमित्याशङ्क्याह * पशोरिति * न्यायनिष्ठे शास्त्रे न्यायव्युत्पादनादरविषयस्याभ्यर्हितत्वात्पशोश्च पूर्वपक्षस्य किलष्टत्वेन न्यायव्युत्पादनादरविषयत्वात् पूर्वनिपातो युक्त इत्याशयः । सूत्रे च पशुमात्रग्रहणे ऽपि दैक्षस्य चेतरेष्विति दैक्षस्य सर्वपशुप्रकृतित्वेन वक्ष्यमाणत्वादग्नीषोमीयस्यैव वरुणपाशाभ्यां वा एषो ऽभिधीयते यो दीक्षित इति दीक्षोपक्रमविधानेन दैक्षशब्दवाच्यत्वात्स

एवोदाहर्त्तव्य इति सूचयितुं भाष्ये ऽर्थवादावयवोदाहरणं हृदया-
र्दीस्तु पशुशब्देनानुवदति * सोमशब्देन च रसमिति * पूर्वपक्ष-
भाष्ये पशुसोमशब्दयोरप्यनुवादत्वाभिधानाच्छब्दद्वयस्य सन्देहवि-
षयत्वमाह * द्वौ चेति * पशावपि यज्यनुवादेन पूर्वपक्षवचनव्य-
क्तिं परमतेन दर्शयितुं तस्मिन्पक्षे हृदयादिवाक्येष्वेव यज्यनुमा-
नात्पशुवाक्ये यजेरभावान्न शङ्का युक्तेत्याशङ्क्य देवतान्वयान्यथानुप-
पत्त्या यत्पशुना यजेत तदग्नीषोमीयेणेति प्राप्तेष्वपि यागेषु *
यज्यनुमानं युक्तमित्युक्तम् * सन्देहस्वरूपमाह * तत्रेति * कथं
तर्हि भाष्यकृताधातुमात्रानुवादनावद्यतिगृह्णात्यभिहितकर्मविषयता-
चोक्तेत्याशङ्क्याह * किमवद्यतीति * गृह्णात्यवद्यत्योर्यागानाभिधाय-
कत्वाद्यजातिचोदनादुपायिचोदनादित्यादावभिधानार्थत्वेन हृष्टस्या-
पि चोदयतेरिहाभिधानार्थत्वानुपपत्तेराक्षेपापरपर्यायकल्पनावा-
चित्वमङ्गीकृत्यावद्यतेर्यागीयद्रव्यसंस्कारार्थावदानवाचित्वेन याग-
कल्पत्वविवक्षयावद्यतिसम्बन्धानुमितानामित्येवं व्याख्यायते गृह्णा-
तावेतद्व्याख्यानासम्भवेनापरितोषाद्विधिवाचित्वमङ्गीकृत्यावद्यति-
गृह्णातिशब्दयोः प्रत्ययलक्षणार्थत्वाभ्युपगमेन व्याख्यान्तरं कृतं हृद-
यादिरससमुदायवाचिनौ पशुसोमशब्दावित्यप्यनेन भाष्येणोपल-
क्षितमिति प्रदर्शनशब्देनोक्तम् । ननूभयत्र यजेरनुवादकतायामालभ-
तिशब्दो न युज्यतेत्याशङ्क्याह * आलभतिरपि चेति * अस्यां पूर्व-
पक्षवचनव्यक्तौ भाष्यानार्जवापत्तेरवद्यतिगृह्णात्याक्षिप्तानां स्पर्श-
नयागकर्मणां समुदायस्यालभतियजती वदितारावितिं यथाश्रुतं
भाष्यं व्याख्यातुं स्वमतेन पशावालभत्यनुवादपूर्वपक्षवचनव्यक्ति-
मङ्गीकृत्य सन्देहस्वरूपमाह * अथ वेति * अवद्यतियुक्तेषु वाक्येषु
यागविध्यप्रतीतेः पशुवाक्ये यागानुवादायोगद्योतनाय *अवद्यता-
वित्युक्तम् * नन्वेवं सतिं पूर्वपक्षे ऽपि पशुवाक्ये यागविध्यापत्तेः
कः पूर्वोत्तरपक्षयोर्विशेष इत्याशङ्क्य यत्पशुशब्दलक्षितं हृदयाद्याल-
भतेस्तदग्नीषोमीयं कुर्यादिति हृदयाद्यालम्भानुवादद्वारेणैकादशाना-
मवदानानां प्रत्येकं देवतान्वयादेकादशयागाः पूर्वपक्षे सिद्धान्ते च
पशुद्रव्यैक्येन देवतानन्वयैक्यादेको याग इति विशेषो ऽभिहितः ।
लक्षणसङ्गतिश्चानेन भेदाभेदफलत्वात्सूचिता अनन्तरसङ्गतिस्त्वा-
धाराग्निहोत्रवाक्यविहितयोः कर्मणोर्दध्यूदध्र्यादिवाक्यानां गुणवि-
धित्वोपपत्तेकर्मविधित्वाभावात्प्रकृतकर्माभावेन समुदायानुवादे नि-
रस्ते हृदयैन्द्रवायवादिवाक्यानां पशुसोमवाक्यविहितयोः कर्मणो-
र्गुणविधित्वायोगात्कर्मविधित्वापत्तेः प्रकृतकर्मसद्भावात्पशुसोमवा-

क्रययोः समुदायानुवादत्वं भविष्यतीत्याशङ्क्यानिरासार्थत्वात्स्पष्टा न-न्वत्रद्यतिना स्पर्शनाक्षेपे ऽपि गृह्यगातिना यागानाक्षेपान्नेयं व्याख्या युक्तेत्याशङ्क्य यथावद्यतौ स्पर्शनाक्षेपस्तथा सोमे ऽपि यागाक्षेप इत्युक्ते तदुपपादनाय * अयमेवेत्युक्तम् * ग्रहणस्य यागपर्यन्तत्वं विना देवता-न्वययोगाद्यागपर्यन्तत्वं सामानाधिकरण्योक्त्या विवक्षितं। यद्वा यथा पशौ पूर्वपक्षे बहवो यागाः सिद्धान्ते त्वेकस्तथा सोमे ऽपीत्युक्ते त-दुपपादनार्थं पूर्वपक्षे ग्रहणवाक्येष्वेव यागकल्पनाभिधानायायमे-वेत्युक्तं भाष्याञ्चस्यादालभत्यनुवादव्याख्यैव युक्ता न यज्यनुवाद-व्याख्येत्याह * तथा सतीति * भाष्यकृद्व्याख्याने ऽपि पूर्वपक्षस्य सौत्रत्वसिद्ध्यर्थमुपांशुयाजाधिकरणपूर्वपक्षसूत्रस्थेन पौर्णमासीव-च्छब्देनेहापि पूर्वपक्षाभिधानं सूचयत्पूर्वपक्षमारभते * तत्रेति * नन्विह रूपश्रवणात्कथं पौर्णमासीतुल्यतेत्याशङ्क्य सोमवाक्ये देव-तानवगतेरैन्द्रवाक्यानां च यागानुमानात्प्रागपर्यवसानेन वाक्या-न्तरानन्वयाद्देवतासमर्पकत्वानुपपत्तेर्यागानां च रूपत्वाभावाद्रूप-त्वमुपपादयति * तथा हीति * श्लोकं व्याचष्टे * न हीति * ननु दध्यादिवाक्यवदैन्द्रवायवादिवाक्येष्वपि विधिगौरवापत्तेः क-र्मविधित्वाभ्युपगमो न युक्त इत्याशङ्क्याह * यश्चेति * सिद्धान्ते चैन्द्रवायवादिवाक्येष्वपि देवताविशिष्टग्रहणविध्यभ्युपगमादुभ-यत्र गौरवापत्तिरित्याह * अपि चेति * तत्सन्निधेर्गुणार्थेन पुनः श्रुतिरित्यत्र चोपपदश्रुतौ सम्भवदनुवादस्य कर्मणो विधेयत्वानिषे-धान्न सोमवाक्ये यागविधिरित्याह * किं चेति * सम्भवदनुवा-दत्वं यादृशशब्देनोक्तं पूर्वपक्षे सोमशब्दस्याप्यनुवादत्वात् * भवा-नित्युक्तम् * श्लोकं व्याचष्टे * एकत्रैवेति * सत्याङ्गतावेकत्रैव विधिशक्त्यभ्युपगमस्य न्याय्यत्वात्सम्भवेदनुवादे कर्मणि सति गुणे विधिशक्तिः संक्रामतीत्यग्निहोत्राधिकरणे ऽभिहित-मित्यर्थः। किं तावदित्यादिभाष्येणालभतियजत्योरनुवादत्वे ऽभिहि-ते हृदयादिरसद्रव्यकेषु यागेषु पशुसोमशब्दयोरप्राप्तार्थत्वेनानुवा-दायोगादुत्पत्तिशिष्टगुणावरोधेन च विध्ययोगादानर्थक्यमाशङ्क्य हृदयादीनिस्त्वित्यनेन लक्षणया हृदयादिरसानुवादकतोक्ता तत्र पशु-वाक्ये देवताविध्यभ्युपगमाद्वाक्यभेदापत्तेर्द्रव्यविध्ययोगे ऽपि सो-मवाक्ये अथैन्द्रवायवादिवाक्येषु लता विधीयतइति भाष्ये द्रव्यवि-धेराशङ्क्यिष्यमाणत्वात्पक्षद्वयमाह * तत्रेति * ननु पशुशब्देन हृ-दयाद्यनुवादो देवतान्वयायार्थवान्सोमशब्देन तु रसानुवादो ऽन-र्थक इत्याशङ्क्य लक्षितलक्षणया नामधेयत्वेनोपयोगमाह * ततश्चे-

ति * द्रव्ये रूढत्वादयागनामत्वेनावभासमानमप्यानर्थक्यपरिहारार्थं नामधेयं भवतीति च्विप्रत्ययार्थः । नामान्तरसद्भावान्नामानर्थक्यमाशङ्क्यते * नन्विति * स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादौ सोमशब्देनापि व्यवहारान्नानर्थक्यमिति परिहरति * यदीति * नन्वेवं सति समस्तवाक्यानुवादोऽनर्थकः स्यादित्याशङ्क्याह * समस्तेति * यत्पौर्णमासीवाक्ये प्रयोगवाक्यगतसंख्योपजननं प्रयोजनमुक्तं तदेवान्नापीत्यर्थसोमशब्दस्यानुवादत्वमुक्तमुपसंहरति * तस्मादिति * नन्वैन्द्रवायवादिवाक्येषु द्रव्यदेवतान्वयाद्यागकल्पनोपपत्तेः क्रयादिवाक्येभ्यश्च सोमरसावगतेः सोमवाक्ये पूर्वपक्षसम्भवेऽपि हृदयादिवाक्येषु देवताविरहाद्यागकल्पनानुपपत्तेर्हृदयादेश्च पशुप्रकृतित्वस्यान्यतोऽनवगतेः पशुवाक्ये पूर्वपक्षो न सम्भवतीत्याशङ्कते * भवेदिति * पशुशब्देन हृदयाद्यनुवादं तावदुपपादयति * उच्यतइति* षष्ठ्यन्तयवक्ष्यमाणो दृष्टान्तः उत्तरार्द्धं व्याचष्टे * हृदयादिभिरिति * नन्वेवमपि यागानुवादो न सम्भवतीत्याशङ्क्याह * तत्र त्विति * आलम्भानुवादेनेह पूर्वपक्षो न यागानुवादेनेत्याशयः । यागानुवादमपि प्रौढ्योपपादयति *अथ वेति* पशुसान्नाय्ययोः पशुप्रभवत्वसाम्येन द्रव्यसारूप्यात्पशुयागस्याष्टमे सान्नाय्ययागविकारत्वाभिधानात्तेनैव न्यायेन हृदयाद्यवदानस्य द्रव्यसारूप्यात्सान्नाय्यावदानप्रकृतिकत्वावगतेः सान्नाय्यावदानस्य च यागीयद्रव्यसंस्कारार्थत्वेनास्यापि तथात्वावसायाद् हृदयादीनां संस्कार्यत्वान्यथानुपपत्त्या पूतीकफलचमसवद्यागान्वयप्रतीतेः प्रत्यवदानं यागकल्पनात्पशुवाक्ये यागसमुदायानुवादोपपत्तिरित्यर्थः । परमतत्वद्योतनायोत्प्रेक्ष्यमाणशब्दः । यच्च सोमवाक्ये प्रत्यक्षयजिसद्भावादैन्द्रवायवादिवाक्येषु तत्कल्पना युक्तेति दूषणं तदिहोभयत्राप्यानुमानिकत्वाविशेषान्नाशङ्क्यमित्याह * साधारणश्चेति * दश गृह्णातीति ग्रहणसमुच्चयदर्शनात्तस्य च यागार्थत्वाद्यागसमुच्चयप्रतीतेर्दशमो गृह्यते तृतीयो हुतय इति च द्वयोरपि क्रमदर्शनाद्यागैक्ये च दध्यादिवद्देवतावैकल्पापत्तेः क्रमसमुच्चयानुपपत्तिप्रसङ्गाद्यागभेदार्थमपि ऐन्द्रवादिवाक्यानामेव यागविधिताश्रयणीयेत्यभिधानार्थमपि चेति भाष्यं व्याचष्टे *सोमेति* एतदेव संस्कारस्तु न भिद्येतेति सूत्रे खादिरतादिवैषम्यस्य वक्ष्यमाणत्वात्तद्दृष्टान्तेनोपपादयति * पश्येति * ननु भेदपक्षेऽपि ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति प्रत्येकं ज्योतिःशब्दवाच्यस्तोमयोगनि-

मित्तज्योतिष्टोमशब्दवाच्यत्वात्प्रत्येकं फलान्वयेन यागविकल्पापत्तेः क्रमसमुच्चयदर्शनानुपपत्तिरित्याशङ्क्य समुदायानुवादबलात्समुदितानां फलान्वयावगत्यभिधानार्थमथ पुनरिति भाष्यं व्याचष्टे * मम त्विति * पशौ क्रमसमुच्चयदर्शनानुपन्यासस्याशयमाह * पशाविति * एतदेव विवृणोति * न हीति * ननु हृदयादिसमुच्चये ऽपि लोहितं निरस्यतीत्यादिवाक्यान्तरवशेन केषां चित्पञ्चवयवानामपनयान्न सर्वेण पशुनेष्टं स्यादित्याशङ्क्याह * यन्मात्रमिति * किं चिदपनयेति बाहुल्यात् सामस्त्यव्यवहारोपपत्तिरित्याशयः । नन्वेवं सत्यनिषिद्धेन हृदयाद्येकादशावदानातिरिक्तेनापि यागापत्तेरेकादशभ्य एव हृदयादिभ्यो ऽवदेयमिति दशमाधिकरणसिद्धान्तो विरुध्येतेत्याशङ्क्याह * एतीति * न्यायात्सर्वप्राप्तावप्येकादशपशोरवदानानीत्यस्यानन्यप्रयोजनत्वादवयवान्तरपरिसंख्यार्थत्वेन तत्रत्यः सिद्धान्त इत्याशयः । समुच्चयांशेन त्वनुवादकत्वादिह लिङ्गत्वेनोपन्यासः । ननु सोमस्यापि दशमुष्टेस्त्रिपर्वणो बहूदकादिषु तस्य प्रादेशमात्रेण पात्रेण समस्तस्य ग्रहीतुमशक्यत्वात्सोमयागैक्ये ऽपि समस्तसोमसाधनकत्वादेव क्रमसमुच्चयदर्शनोपपत्तिरित्याशङ्क्याह * सोमे त्विति * उत्पत्तिवाक्ये सोमस्य समस्तचोदनाभावात्पशुवैषम्यं भाष्यकृतो ऽभिमतमित्याशयः । तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * सूत्रे चोदनेत्येकवचनप्रयोगे ऽपि पशुसोमयोरिति सप्तमीद्विवचनेनोदाहरणद्वयपरिग्रहात्कर्मणोश्चोदने इति द्विवचनान्तेन व्याख्याय शुद्धकर्मचोदनाशङ्कानिरासार्थं प्रकारवाचिविधानशब्दप्रयोगेण विशिष्टचोदनात्वमुक्तं तत्स्पष्टत्वाद्व्याख्यायापूर्वद्रव्यसंयोगादित्येकं द्रव्यसंयोगलक्षणहेतुव्याख्यानार्थस्य कुत इत्यादिभाष्यस्य तात्पर्यं व्याचष्टे * इतीति * श्लोकं व्याचष्टे * यदि हीति * एवं विद्वानित्येवंशब्देन प्रकृताशेषरूपपरामर्शादशेषरूपप्रत्यभिज्ञाने ऽभिहिते विद्वच्छब्दान्वयेनैवं शब्दस्य यज्यनन्वयाद्यागरूपापरामर्शकत्वे तु द्रव्यं संयोगमात्रमनेनैव भाष्येणोक्तमिति सूचयितुम् * यदि वेत्युक्तम् * पशुविकारस्य हृदयादेर्लक्षणया पशुशब्देनाभिधानात्सोमविकारस्य च रसस्य सोमशब्देनाभिधानान्न पूर्वद्रव्यसंयोगो ऽस्तीत्याशङ्कानिरासार्थत्वेन प्रकरणे ह्यनर्थको द्रव्यसंयोग इति सूत्रावयवस्य पशुसोमाख्यं द्रव्यं यागे संयोजयतीति व्युत्पत्त्या द्रव्यसंयोगशब्दोक्तः । पशुशब्दः सोमशब्दश्च प्रकियतइति व्युत्पत्त्या प्रकृते हृदयादौ रसे च मुख्यार्थत्यागापत्तेर्न प्रवर्त्ततइत्येवं व्याख्यानार्थं नन्वित्याशङ्का-

भाष्यं तावद्व्याचष्टे * तत्रेति * नैतदित्यादिव्याख्याभाष्यं व्याचष्टे * तत्रेति * किं लक्षणाश्रयणे कारणं यदिह नास्तीत्यपेक्षायामाह * विस्पष्टे हीति * मञ्चाः क्रोशन्तीतिवत्परशब्दसामानाधिकरण्याभावे ऽपि गङ्गायां घोष इत्यादौ लक्षणां विना पदान्तरान्वयासम्भवे लक्षणादर्शनाद् * अनन्यथासम्भवे वेत्युक्तम् * ननूत्पत्तिशिष्टरसहृदयाद्यवरुद्धयोर्यागयोर्लतात्राणिविध्ययोगात्पशुशब्दस्य च प्रकृतहृदयाद्यनिवेशे देवताविधिपरे वाक्ये द्रव्यविध्ययोगेनानर्थक्यापत्तेरस्त्यनन्यथा सम्भव इत्याशङ्क्याह * शक्यं हीति * यागान्तरविध्यभ्युपगमान्नैको ऽपि दोष इत्याशयः। अपूर्वयोः कर्मणोरिति सिद्धान्तोपक्रमस्थमपूर्वशब्दं उपांशुयाजाधाराग्निहोत्राधिकरणसिद्धान्तोपक्रमभाष्यस्थकर्मान्तरशब्दवदभ्युपेत्यवादत्वेन व्याचक्षाणः तस्मादित्युपसंहारभाष्यं तदनुसारितया व्याचष्टे * तेनेति * न हि तस्य गुणार्थेनेति सूत्रावयवं प्रकृतेषु यागेष्वनर्थको द्रव्यसंयोग इत्येवमर्थावृत्तपूर्वावयवसहितमाशङ्क्योत्तरत्वेन व्याख्यातुमथेत्यात्याशङ्काभाष्यमुत्पत्तिशिष्टरसावरुद्धे यागे प्रदेयतया लताविध्याशङ्कानुपपत्तेरयुक्तमाशङ्क्य प्रदेयप्रकृतित्वेन लताविध्याशङ्कार्थतया व्याचष्टे * कस्मादिति * भाष्यानारूढपशुग्रहणेन सिद्धान्ते द्वयोरपि प्रदेशप्रकृतित्वेन विधिः सूचितः। न सेति भाष्यं मध्यप्रतीकेनोत्तरतयावतारयति * तत्राहेति * प्रदेयप्रकृतित्वेनापि विधौ शङ्कते गृह्णादिवाक्येष्वनया धारया गृह्णातीति प्राकरणिकवाक्यान्तरालोचनेन धाराग्रहणयोग्यद्रव्यप्रतीतावपि स्वाभाविकद्रवत्वयुक्तस्योदकादेरपि धाराग्रहणोपपत्तेर्विकारद्रव्यानवगमेन सोममभिषुणोतीत्यादिवाक्यालोचनाद्विकारद्रव्यावगमाभ्युपगमे तु प्रकृतिद्रव्यस्याप्यवगमे प्रकृत्यनपेक्षणात्प्रदेयतयैव विधेयत्वं शङ्क्यमित्यापाद्य श्रौतरसावरुद्धेषु यागेषु वाक्येन लताविध्यनुपपत्त्यभिधानार्थत्वेन भाष्यं व्याचिख्यासुरवघ्नतिवाक्येषु हृदयादिविकारद्रव्यप्रतीतेस्तत्प्रकृतित्वेन पशुविध्याशङ्कापरिहारौ कस्मान्नोपन्यस्तावित्याशङ्कानिरासपूर्वं व्याचष्टे * पशुस्तावदिति * ननुतद्धितश्रुत्यनुपात्तत्वान्न रसस्य लतातो बलीयस्त्वं प्रत्युत प्रकरणलभ्यत्वाद्दौर्बल्यमित्याशङ्कते * कथं पुनरिति * सास्य देवतेति सन्निहितविशेषवाचिसर्वनाम्नास्य शब्दार्थे तद्धितस्मृतेः श्रौतत्वमाहोच्यत इति नन्वनुपात्तस्य द्रव्यविशेषस्य देवतान्वयो न सम्भवतीत्याशङ्क्याह * अधिकारेणेति * सन्निहितत्वोपलक्षितस्य द्रव्यविशेषस्य तद्धितश्रुत्या देवतान्वये कृते कस्येति निर्द्धारणापेक्षायां प्रकरणान्निर्द्धार्यत इ- ५०९।१

त्यर्थः । एतच्च तद्धितनिर्देशे श्रुत्येतिगुणाधिकरणभाष्यव्याख्यावेलायां देवतासङ्गतिः श्रुत्या तद्धितान्तात्प्रतीयतइत्यादिवार्तिकेनोपपादयिष्याम इत्याह * गुणश्चेति * वैश्वदेवाधिकरणव्युत्पादितोत्पत्त्युत्पन्नशिष्टबलाबलाभिधानार्थं चैतद्भाष्यमिति सूचयितुं युक्त्यन्तरमाह * किं चेति * दुर्बलतरत्वसूचनार्थं प्रवृत्तापेक्षत्वं वाक्यान्तरस्य विशेषणम् । लतायाश्च दौर्बल्याद्सावरुद्धेषु यागेषु विधातुमशक्यत्वे सति न केवलं प्रकृतप्रत्यभिज्ञानानुवादायोगाद्यागस्य विधेयत्वापत्तेः पुनर्विधानलक्षणादश्यासाद्भेदः किं तु गुणादपीत्याह * ततश्चेति * व्याख्यातं भाष्यं दूषयितुमारभते * शक्येति * प्रकृतेषु यागेषु रसविरोधात्प्रदेयतयाँ लताविध्ययोगे ऽपि व्रीहिवत्प्रदेयप्रकृतितया विध्युपपत्तेः शक्यपरिहारं भाष्योक्तं दूषणमित्याशयः । नन्वष्टाकपालादिशब्दानां संस्कृततद्धितान्तत्वात्ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यन्नित्याग्नेयवाक्यशेषाच्चाष्टाकपालशब्दस्य पुरोडाशविषयत्वावगमाद्विकारद्रव्यप्रतीतेः प्रकृत्यपेक्षायां युक्तः प्रकृतित्वेन व्रीहिविधिरैन्द्रवायवादिवाक्येषु तु धारावाक्याद्रवद्रव्यावगमे ऽपि विकारद्रव्यत्वानवगतेराभिषवादिवाक्यालोचने तु प्रकृतिद्रव्यस्याप्यवगतेर्न लतायाः प्रकृतित्वेन विधिर्युक्त इत्याशयेन पृच्छति * कुत इति * विकारद्रव्यत्वाभावे ऽपि धानादिवत्कपालसंस्कार्यत्वोपपत्तेर्वाक्यशेषस्य च विष्णुरुपांशु यष्टव्य इत्यादिवदूर्जो ऽवरुध्या इत्यादिवच्च स्तुतिमात्रोपयुक्तस्य विध्युद्देशापेक्षितार्थसमर्पकत्वायोगादश्वशफमात्रः पुरोडाशो भवतीत्यादिविध्यन्तरालोचनाच्च पुरोडाशप्रतीत्या विध्युद्देशपर्यवसानोपपत्तौ स्तुत्युपयुक्तस्य रात्रिसत्रवत्परावृत्त्यविधित्वकल्पनानुपपत्तेरष्टाकपालादौ प्रकरणानालोचने प्रकृतिविकारद्रव्ययोर्द्वयोरप्यप्रतीतेस्तदालोचने च द्वयोरपि प्रतीतेः किं प्रकृतिको ऽसावित्यनपेक्षायामपि किं पुरोडाशप्रकृतिभूता व्रीहयस्तन्निष्पत्तौ व्यापारयितव्याः किं वा नो वासोजाघनीवद्यथा कथं चिन्निष्पन्नं व्रीहिमयपुरोडाशस्वरूपमात्रं व्यापारयितव्यमित्यपेक्षायां निर्वापावघातपेषणसंयवनपिण्डकरणादिनिष्पादकविधिदर्शनेन प्रयोगकाले निष्पादनावगमादसम्भवे ऽपि निष्पादकविध्यनालोचने च पर्णमयी जुहुर्भवतीत्यादिवत्प्रकृतिद्रव्यविधाने ऽपि यथा कथं चिद्विशिष्टद्रव्यलाभेनापि प्रयोगोपपत्तेः प्रयोगकाले निष्पादनानाक्षेपापत्तेर्यथा व्रीहीणामविधानेसक्तुवदसंस्कार्यत्वापत्तोर्निर्वापादिविधीनामारादुपकारित्वप्रसङ्गाद्यागाङ्गत्वेनैव विहितेषु व्रीहिषु योग्यतया

पुरोडाशप्रकृतित्वेनाविरोधोपपत्तौ विरोधापादकसाक्षाद्यागसाधनत्वाङ्गीकरणानौचित्यात्प्रकृतितावसीयते तथा सोमे ऽपीत्याशयेनोत्तरमाह * यथैवेति * श्लोकं व्याचष्टे * विधीयमानं हीति * लताविशिष्टयागविधिपक्षे ऽपि चाभिषवेण लतास्वरूपनाशात्प्रदेयप्रकृतित्वेनैव यागाङ्गता तुल्येत्याह * अपि चेति * रसलतयोश्च ५१०
विरोधाभ्युपगमे रसस्योत्पत्तिशिष्टत्वपक्षे लताया दौर्बल्यात्तदानुगुण्येन प्रवृत्तस्तदापेक्षितप्रकृतित्वाङ्गीकरणेन विरोधः शक्यपरिहारः लतायास्तुत्पत्तिशिष्टत्वे दुष्परिहर इत्याह * अपि चेति * श्लोकं व्याचष्टे * रसस्येति * का तर्ह्यैन्द्रवायवादिष्वित्यादेर्भाष्यस्य गतिरित्यपेक्षायामुत्पत्तिशिष्टरसावरोधात्प्रदेयत्वेन लताविध्याशङ्कानुपपत्तेः प्रदेयप्रकृतित्वाशङ्कायाश्च निराकर्तुमशक्यत्वादुपेक्षणीयत्वं वक्तुमाह * तस्मादिति * पशुसोमाख्यगुणस्य प्रदेयप्रकृतित्वेन विधिरित्याशङ्का नोद्घाटनीयेति वाच्ये तन्निरासार्थस्य न हीति सूत्रावयवस्याप्युपेक्षणीयत्वसूचनायानुद्घाट्यैवोत्तरं सूत्रं प्रस्ताव्यमिति ऽपि प्रयुक्ते ऽवयवदोषेण सकलसूत्रापेक्षां प्रसज्यमानां निराकर्तुं समुदायेत्युक्ते गुणविधित्वाशङ्कायामानर्थक्यायां कथं कर्मविधित्वसिद्धान्तसिद्धिरित्याशङ्क्य पशाविवित्युक्तं प्राप्ते कर्मण्यनेकगुणविध्ययोगादेव तत्राशङ्का नोत्तिष्ठतीत्याशयः। सोमे कथं सिद्धान्तसिद्धिरित्यपेक्षायामुत्तरसूत्रेण गृह्णातिवाक्यानां कर्मविधित्वनिरासादिति सोमे त्वित्यनेनोक्तमिति योज्यम्। समुदायानुवादत्वमात्रं निराकृत्यमिति सुगमः पाठः। एवं तु सूत्रभाष्यकृतोर्द्वयोरप्यबुद्धिपूर्वकारित्वापत्तेः पूर्ववत्तापरितोषणोत्पत्तिशिष्टरसावरोधान्नैन्द्रवायवादिवाक्यावीहितेषु यागेषु लता विधातुं शक्येति पूर्वसूत्रावयवोक्तमुपपत्तिं चकारेणोत्पत्तिशिष्टरसावरोधे ऽपि तत्प्रकृतित्वेन लताविधिसम्भवरूपनिराकरणहेतुसूचनपूर्वमुत्तरसूत्रेणैन्द्रवायवादिवाक्यानां कर्मविधायित्वाभावान्न रसस्योत्पत्तिशिष्टतेत्येवं निराकृत्यैन्द्रवायवादिवाक्यानां कर्मविधित्वाभावलक्षणायैवोपपत्त्या सोमवाक्यस्य कर्मविधित्वं निर्णेतव्यमिति पक्षान्तरमाह * अथ वेति * निराकार्योपपत्त्युपन्यासस्यापि मन्दप्रयोजनत्वेनेहाप्यारितोषात्स्वयमन्यथा सूत्रव्याख्यामारभते * पूर्वेति * पशुसोमवाक्योदाहरणे ऽस्य सूत्रस्य पूर्वपक्षोक्त्यशक्तिमाशङ्कते * कथं पुनरिति * गृह्णात्यवघातिवाक्योदाहरणाङ्गीकरणेन पूर्वपक्षे सूत्रं योजयितुं सन्देहस्वरूपं तावदाह * उच्यते इति * योजयति * किमिति * पशुसोमवाक्ययोरुत्पत्तिचोदनात्वे सति प्रकरणापेक्षो

गृह्णात्यवद्यतिवाक्येषु रसहृदयादिद्रव्यसंयोगो विधीयमानो न यागाङ्गत्वं प्रतिपद्येतेति मध्यमाशयवे व्याख्याते ऽवदानग्रहणयोः पशुसोमसंस्कारार्थत्वेनाविरोधशङ्कानिरासार्थतयाशङ्क्य स्वरूपनाशकत्वात्संस्कारार्थत्वायोगाभिधानार्थत्वेन न हीति सूत्रावयवं व्याख्याय प्रदेयप्रकृतित्वेनाविरोधाशङ्कानिरासार्थतया तस्योत्पत्तिवाक्यैः प्रदेयत्वेन प्रकृतस्य रसहृदयादेः प्रकृतित्वलक्षणगुणार्थेन पशुसोमयोः संस्कारवाक्यैरेव सोमं क्रीणातीत्यादिवार्त्तिकोक्तेन न्यायेन सिद्धतया विध्ययोगात्प्रकृतेरसहृदयादौ प्रकृतित्वेन पशुसोमद्रव्यसंयोगो ऽनर्थक इति व्याख्यान्तरे ऽथ वेत्यनेन कृतेमम त्वित्य-
५११।८ नेन पूर्वपक्षे ऽर्थवक्तोक्ता पूर्वपक्षसूत्रार्थमुपसंहरति * तस्मादिति *

अचोदकाश्च संस्काराः ॥ १८ ॥

पूर्वसूत्रसमर्थनार्थं गृह्णात्यवद्यतिवाक्यानां कर्मविधित्वपूर्वपक्षकरणे ऽप्यधिकरणत्रयस्य समुदायानुवादापवादार्थत्वेन पशुसोमवाक्ययोः समुदायानुवादपूर्वपक्षस्यैव विवक्षितत्वात्तन्निवृत्त्यर्थत्वेन तुशब्दस्थाने वाशब्दं व्याचष्टे * नैवेति * पशुसोमवाक्यस्थयोराख्यातशब्दयोः समुदायानुवादत्वनिरासस्साध्ये ऽवद्यतिगृह्णातिपराणां प्रत्ययानां यागाचोदकत्वस्य साक्षादहेतुत्वात्पूर्वाधिकरणसिद्धान्तहेतोश्च शब्दार्थस्य प्रयोगभूतत्वादित्यस्य निर्गुणाख्यातश्रुतिविषयत्वेनेहाभावात्तत्पूर्वाधिकरणसिद्धान्तहेतोरप्रकृतत्वादित्यस्य पूर्वाधिकरणे ऽपि प्रकृतकर्मसद्भावे निर्गुणश्रुतावपि पौर्णमासीवत्समुदायानुवादापत्तेरपेक्षित्वेनानुषक्तस्यात्राप्यनुषङ्गं करोति * चोदना चेति * अप्रकृतत्वोपपादनार्थत्वेन प्रश्नपूर्वं सूत्रं योजयति * कथमिति * संस्कारविधिष्वपि यागकल्पनं पूर्वपक्षोक्तं निराकर्त्तुमारभते * तन्मात्रेति * ऐन्द्रवायवादिवाक्येषु तावत्सोमेन यजेतेति श्रुतयागप्रत्यभिज्ञानात्कल्पनानुपपत्ति * माहैवं हीति * भाष्यमप्यनेन व्याख्यातं भवति यागानुमानात्प्रागाग्नेयादिवाक्यवत्स्वार्थपर्यवसानं पूर्वपक्षोक्तमनुभाषणपूर्वं परिहरति* यदुक्तमिति * अतो ऽत्र नियोगापरपर्यायविधिविषयभूतपुंव्यापारलाभाद्वाक्यस्य सङ्गतार्थत्वं पर्यवसानमस्तीत्यर्थः । तल्लाभे पूर्णत्वात्
५१२।१ वाक्यान्तरसङ्गतिर्युक्तेति वा योज्यम् । श्लोकं व्याचष्टे *आग्नेय इति* समाप्यते शब्देन सङ्गतिशब्दस्य समाप्त्यर्थत्वं व्याख्यातम् । ननु ग्रहणभावनालाभे ऽपि यागं विना देवतान्वयासिद्धेः कथं वाक्यसमा-

त्तिरित्याशङ्क्याह * इदं त्विति * स्वकार्याक्षमत्वनिबन्धनत्वेनासमाप्तेर्विधिविषयलाभमात्राद्विधानाख्ये कार्ये विधिवाक्यस्य क्षमत्वसिद्धेः सापेक्षत्वे ऽपि समाप्त्युपपत्तिरित्याशयः । सापेक्षत्वनिबन्धनया त्वसमाप्त्या वाक्यान्तरानन्वयेन कस्य चिद्वाक्यस्य वाक्यान्तरानन्वयः स्यादिति दर्शयितुमाह * सर्वमेव हीति * समाप्त्यभिधानस्य प्रकृतोपयोगं दर्शयन्वाक्यान्तरान्वयार्थत्वेन सङ्कृतिशब्दं व्याचष्टे * तेनेति * न सापेक्षस्यापि वाक्यान्तरान्वये सत्याग्नेयादिवाक्यस्यापि कस्मान्न स्यादित्याशङ्क्य विधिविषयालाभादित्याह * आग्नेय इति * पूर्वपक्षसूत्रस्थचोदनाशब्दसूचितं यागानुमानात् प्रागपर्यवसानं परिहृत्यावदानग्रहणयोः पशुसोमस्वरूपनाशकत्वेनोत्पत्तिशिष्टस्य पशुसोमद्रव्यस्य संस्कारलक्षणगुणार्थेन विध्ययोगात्प्रकरणे विधीयमानो हृदयादिरसः संयुक्तो ऽवदानग्रहणाख्यः पदार्थो ऽनर्थकः स्यादिति प्रकरणे हीत्यादिसूत्रावयवोक्तं सिद्धान्तदूषणमनुभाषणपूर्वं परिहरति * अथेति * सूत्रोक्तस्य दोषस्य सूत्रेणापरिहारे सूत्रकृतः शून्यहृदयत्वापत्तेश्चोदयतेः प्रेरणे स्मरणेन नुदिसमानार्थत्वान्नुदेश्चापनयनाख्ये बाधे प्रयोगाच्चोदकशब्दस्य बाधकवाचित्वमङ्गीकृत्यावदानग्रहणपदार्थाः संस्कारत्वात्पशुसोमयोरबाधका इत्येवमस्मिन्परिहारे सूत्रं योज्यम् । विशसनाभिषवादिना पशुसोमयोर्विनाशात्साधनत्वासम्भवाशङ्का द्वारशब्देन निरस्ता प्रदेयप्रकृतित्वेनैव पशुसोमयोः साधनतेत्याशयः । श्लोकं व्याचष्टे * यदीति * ननु न हि द्रव्यकथम्भावादतिदेशो ऽत्र कल्प्यतइति संख्याधिकरणवार्त्तिके द्रव्यस्येतिकर्त्तव्यताकाङ्क्षाया निराकरिष्यमाणत्वान्न पशुसोमयोरितिकर्त्तव्यताम्वयः सम्भवतीत्याशङ्क्याह * पञ्चेति * सप्तदशानां पशूनामेकसाधनत्वेन प्रत्येकं साधनत्वाभावादितिकर्त्तव्यतानाकाङ्क्षत्वे ऽपीह साधनत्वसद्भावाद्युक्तेतिकर्त्तव्यताकाङ्क्षेत्याशयः संस्कारवाक्यस्य एव पशुसोमयोः प्रदेयप्रकृतित्वेन प्राप्त्युपपत्तेः प्रकृतित्वलक्षणगुणार्थत्वेन विध्ययोगात्प्रकृते हृदयादौ रसे पशुसोमद्रव्यसंयोगो ऽनर्थकः स्यादित्येवमर्थाङ्गीकरणेन प्रकरणे हीत्यादिसूत्रावयवोक्तं दूषणमनुभाषणपूर्वं परिहरति * यत्त्विति * उत्पत्तिशिष्टविरोधोत्तरस्यापि सौत्रतापिशब्देनोक्ता पशुसोमयोरविनियोगे क्रमोपकरणादिवाक्यानां सक्तुहोमादिवाक्यवदारादुपकारिकर्मविधायित्वापत्तेर्न पशुसोमाक्षेपशङ्करस्तीत्याशयः । याच्च हृदयादिभिः प्रकृतिद्रव्यापेक्षिते छागस्य वपाया मेदसो ऽनुब्रूहीति म- ५१३।१

न्त्रवर्णेन छागलाभात्तदन्तर्गतपशुत्वप्राप्तिरुक्ता सास्य मन्त्रस्य सूक्तवाकादिवच्छ्रुत्यविनियुक्तत्वेनात्यन्ताप्राप्तार्थप्रापणाशक्तेर्विनियोजकस्य लिङ्गस्य सामर्थ्यलक्षणत्वात्तस्य च वाक्यशेषवत्सन्दिग्धार्थनिर्णायकत्वेनार्थाद्वा कल्पनैकदेशत्वादित्यत्र स्थितत्वादयुक्तेत्याह * न चेति * कथं तर्हि षष्ठान्त्ये छागप्राप्तचभिधानामित्याशङ्क्याह *पश्विति * अनेनैव यथैव पशुसामान्यइति वार्त्तिकोक्तस्य पूर्वपक्षस्य निरस्तत्वात्प्रसङ्गेनाथ वा साम्नाय्यं वा तत्प्रभवत्वादित्यनेन न्यायेनेत्यादिवार्तिकोक्तं पूर्वपक्षं निरस्यति * न चेति * ततश्च साधारणश्चायं तवाप्यानुमानिकयागाभ्युपगम इति यदुक्तं तदप्ययुक्तमित्याह * द्रव्येति * या च साम्नाय्यावदानप्रकृतित्वेन हृदयाद्यवदानानां यागीयद्रव्यसंस्कारार्थत्वाद्यागानुमापकतोक्ता सापि साम्नाय्यावदानस्य चतुरवत्तहोमविधिनार्थगृहीतत्वेनाविधेयत्वाद्विधेयानि हृदयाद्यवदानानि प्रतिप्रकृतित्वानुपपत्तेः संस्कारार्थत्वस्य चानङ्गत्वेनानतिदेश्यत्वादयुक्तेत्याह * न चेति * नन्वतिदेशाभावेऽवदानत्वेन हेतुना यागीयद्रव्यसंस्कारार्थतानुमास्यते ऽत अ. * न चेति * पूतीकानभिषुणुयात्तमस्मै भक्षं प्रयच्छेदित्यनयोस्तु प्रकृताभिषवभक्षप्रत्यभिज्ञानाद्यदि सोमं न विन्देत यदि सोमं विभक्षयिष्येदित्येकवाक्यत्वाच्च यागद्रव्यार्थत्वविज्ञानं युक्तमिति दृष्टान्तवैषम्यमाह * प्रतीकेति * प्रसङ्गाद्यश्चात्र पक्षे विशिष्टविध्याश्रयणे दोष इति वार्त्तिकोक्तं सोमवाक्ये विशिष्टविधितुल्यत्वं निरस्यति * सोम इति * नन्वैन्द्रवायवादिवाक्येषु यागविध्यभावे देवताया ग्रहणानन्वयाद्विशेषणविशेष्यत्वशून्ययोर्देवताग्रहणयोर्विधेयत्वापत्तेर्वाक्यभेदप्रसङ्गादालभितवत्प्रकृतिवल्लिङ्गद्योतनाय गृहणातिपरप्रत्ययेनैन्द्रवायवं कुर्यादिति वचनव्यक्त्याश्रयणेन विशिष्टयागविधिरवसीयतइत्याशङ्क्याह * न चेति * सोमरसमिन्द्रवायुदेवत्यं कर्त्तुं पात्रे गृहणीयादिति विहिते यागसम्पाद्यत्वाद् द्रव्यदेवतान्वयस्य ग्रहणमात्रेणासिद्धावपि प्रकरणलभ्ययागान्वयासिद्ध्युपपत्तेर्न वाक्यभेद इत्याशयेन प्रश्नपूर्वमुपपादयति * कुत* इति देवताग्रहणं चेत्यनेन रूपेण विधेयानेकभावे ऽपि प्रकरणलभ्ययागाख्यक्रियान्तरप्रसादेन देवताविशिष्टग्रहणविधिसम्भव इत्यर्थः । श्लोकं व्याचष्टे * शक्यते हीति * ग्रहैर्जुहोतीतिविध्यर्थस्य ग्रहणपात्रेषु ग्रहणमन्तरेणानिष्पत्तेरर्थप्राप्तग्रहणानुवादसम्भवाद्विशिष्टविधिगौरवमपि नास्तीत्यर्थप्राप्त्यभिधानेनोक्तं समासेत्यनेन देवताद्वयनिमित्तवाक्यभेदाशङ्का निरस्ता यागान्वयं विना

ग्रहणस्य देवतान्वयानुपपत्त्या शङ्कानिरासार्थत्वेन क्रियान्तरप्रसादेनेति व्याख्यातुम् * प्रकरणेत्युक्तम् * देवताग्रहणयोर्यागगुणत्वात्परस्परानपेक्षत्वे ऽपि यागद्वारा परस्परान्वयोपपत्तेर्देवताविशिष्टग्रहणविधिसम्भवाभिधानार्थम् * गुणेत्युक्तम् * यादृशं द्रव्यसम्बद्धमित्येतद्वार्त्तिकोक्तं प्रकृतयागसङ्गावात्सोमवाक्ये यागविध्यसम्भवं परिहर्त्तुमाह * तस्मादिति * सोमवाक्यस्य यागविधित्वे गुणत्रयमाह * एवं च सतीति * समुदायानुवादाभावे ऽपि राज- ५१४।२
सूयवत्प्रयोगवाक्यस्यैकत्वसिद्धेर्ज्योतिष्टोमब्दस्य च सोमद्रव्यकयागवाचित्वादीक्षणीयादिव्यावृत्तिसिद्धेरानर्थक्यमित्याशयः । आद्यसूत्रोक्ताया युक्तेः सिद्धान्ते ऽनुपपत्तेः पूर्वपक्षे तद्योजितं पशुसोमवाक्ययोस्तु विधित्वसिद्धान्तो ऽतो युक्त एवेति सूचयन्सिद्धान्तमुपसंहरति * तेनेति *

तद्भेदात्कर्मणो ऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि
स्यात् भेदो द्रव्यगुणीभावात् ॥ १९ ॥

पशुविषयायाश्चिन्तायाः पर्यवसितत्वं भाष्योक्तमुपपादयति * क्रमेति * क्राधिकरणे कीदृशी वोद्भविष्यतीत्यपेक्षायामाह * पशोरिति * अग्नीषोमीयं पशुमालभेतेति तद्धितेनाष्टाकपालादिवत्समस्तपशोर्देवतान्वयात्प्रदेयत्वलक्षणहविष्ट्वावगतेः समस्तादवदाने पशोरेकहविष्ट्वं समस्तचोदितत्वादिति सूत्रेण पूर्वपक्षिते प्रत्यङ्गं वा ग्रहणवदङ्गानां पृथक्प्रकल्पनत्वादिति सूत्रेण पशुस्वरूपस्य विशसनेन नाशितत्वात्प्रदेयत्वानुपपत्तेः पृथक्कल्पितेभ्यश्च हृदयादिभ्यो ऽवदानविधानात्तद्धितोक्तस्य देवतान्वयस्य साक्षादसम्भवादगत्या व्यवहितविषयत्वावगतेः प्रत्यङ्गं हविष्ट्वेनावदानस्य सिद्धान्तयिष्यमाणत्वात्प्रत्येकमङ्गानां हविष्ट्वविवक्षयोत प्रत्यङ्गमित्युतशब्दं पूर्वान्निपात्य साङ्गानां हविष्ट्वे सिद्धे तद्विशेषचिन्तासां सर्वाङ्गविवक्षया प्रत्यङ्गमुतैकस्मादित्यावृत्त्या योज्यं हृदयजिह्वावक्षोयकृद्वृक्कौ सव्यन्दोरुभे पार्श्वे दक्षिणाश्रोणिगुदं तृतीयमित्येकादशदैवतान्यवदानानि परिगणितानि।सोम इति परिहारप्रतिज्ञाभाष्यं व्याचष्टे *सोमे त्विति * इन्द्रवाय्वा इति परिहारभाष्यं व्याचष्टे * वाक्येनेति * ततो विकल्पिष्यन्ते इत्यन्ध्याहारेण यदि शब्दान्वयः वाक्यव्यतिरेकवाचिना तु शब्देन प्रकरणसूचनात्प्रकरणेन तु यागसङ्गतत्वात्सर्वासां समुच्चय इति सर्व्वशब्देन समुच्चये सूचिते प्रकरणेनाप्यन्वये तु ल्यार्थत्वाद् विकल्पः कस्मान्न भवतीत्याशङ्क्यान्योन्यनैरपेक्ष्येणान्व-

याभावाद्विकल्पानापत्त्यभिधानार्थम् * युगपादित्युक्तम् * वाक्येनान्वये समुच्चयः कस्मान्न भवतीत्याशङ्क्य यत्र दध्ना जुहोतीत्यादौ वाक्येनान्वयश्चोद्यते तत्र तुल्यार्थत्वादसमुच्चय इत्युक्ते प्रकरणेनाप्यन्वये तुल्यार्थत्वाविशेषमाशङ्क्यान्योन्यसापेक्षतुल्यार्थत्वाभावात्समुच्चयानापत्त्यभिधानार्थं निरपेक्षेणेत्यनेन पृथक्शब्दोक्तं नैरपेक्ष्यं व्याख्यातम्। आद्यं श्लोकं व्याचष्टे *यदीति * य इमाः पुनरित्यादियुगपदेव सम्बन्ध्यन्तइत्यनेन सर्वास्त्विति श्लोकावयवो व्याख्यातः देवतानामक्रियात्मकत्वात् प्रकरणग्रहणानुपपत्तिमाशङ्क्य सर्वेत्यनेन ग्रहणाख्यक्रियाद्वारा तदुपपादितं द्वितीयं श्लो-
५१५।४ कं व्याचष्टे * तत्र नामेति *एतदेव प्रश्नपूर्वकमुपपादयति * किमिति * नन्विन्द्रवाय्वादीनां देवतात्वेनैव सामर्थ्यात्प्रत्येकं च देवतात्वावगतेः प्रत्येकमेव सामर्थ्यमवसीयतइत्याशङ्क्याह * नन्विति * ननु त्यज्यमानद्रव्योद्देश्यत्वमात्रेण देवताया यागनिष्पादकत्वात्प्रत्येकमेव चोद्देश्यत्वप्रतीतेरेकैकया देवतयास्त्वेव यागसिद्धिरित्याशङ्क्याह * सत्यपि चेति * यागरूपनिष्पत्तावपि यागाभ्यासात्मकज्योतिष्टोमरूपनिष्पादनसामर्थ्यस्य शब्दैकसमधिगम्यत्वाद्देवताविनियोजकशब्दकल्पनायाश्च प्रकरणाधीनत्वात्तस्य चापर्यायप्रवृत्तित्वान्न प्रत्येकं सामर्थ्ये प्रमाणमस्तीत्याशयः । नन्वेकार्थास्तु विकल्परन्समुच्चये ह्यावृत्तिः स्यात्प्रधानस्येति द्वादशाधिकरणे तुल्यार्थत्वमात्रेण विकल्पस्य वक्ष्यमाणत्वात् प्रत्येकत्वविशेषणमयुक्तमाशङ्क्याह * प्रत्येकमिति * दधिमधुपयोघृतं धाना उदकं तण्डुलास्तत्ससृष्टं प्राजापत्यमिति चित्रेष्टिद्रव्याणां तुल्यार्थत्वे ऽप्यन्योन्यसापेक्षत्वेन विकल्पाभावाद्विशेषणार्थत्वेत्याशयः । दृष्टान्ते ऽन्योन्यनैरपेक्ष्यमुपपादयति * वाक्येति * ननु ग्रहणद्वारा देवतानां यागान्वयात्तत्र च वाक्येन प्रत्येकमेव विनियोगात्प्रत्येकं तुल्यार्थतावसीयत इत्याशङ्कानिरासार्थं भाष्यकारस्यादृष्टसंस्काराभिधानमितिसूचयितुमाशङ्कां तावदाह * नन्विति * ग्रहणासंस्कारस्यादृष्टार्थत्वेन प्रमाणान्तरतो भेदाभेदानवधारणान्न तादर्थ्येन विहितानां भिन्नानां देवतानामैकार्थ्ये प्रमाणमस्तीत्याशङ्कानिरानिरासार्थमथ पुनरित्याद्येवमपरेष्वपि ग्रहणेष्वित्यन्तं भाष्यं ग्रहपात्रे सोमग्रहणं विना ग्रहेर्जुहोतीतिविध्यर्थानिष्पत्तेर्ग्रहणस्य दृष्टार्थत्वादयुक्तमाशङ्क्योद्देश्यत्वेन देवताया ग्रहणसाधनत्वाद्यागवच्च ग्रहणस्य देवतोद्देशाधीननिष्पत्तित्वाभावेन ग्रहणं देवतोद्देशस्यादृष्टार्थत्वात्तद्विशिष्टरूपेण ग्रहणस्यादृष्टार्थतामभिप्रेतेति सूचयन्परिहरति * सत्यमिति *

विज्ञप्तिः ।

१ अस्यां चौखम्बासंस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।

२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच्च शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयैर्ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

६ कालान्तरे प्रतिस्तबकं ” ” १ ” ०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । सम्पूर्णः । (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १

(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र विरचिता सम्पूर्णः । (मीमांसा) २

(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । सम्पूर्णः । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णम् । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । सं० } (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः } (वेदान्तः) १

(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः } (न्यायः) ५

(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् सम्पूर्णम् (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । } (मीमांसा) ८

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । } (वेदान्त) १

पत्रादिप्रेषणस्थानम् }

हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।

